
शिवपुराणम्।

कृष्णद्वैपायन-महर्षि-श्रीवेदव्यास-

प्रणीतम्।

पण्डितवरश्रीयुक्तपञ्चाननतर्करत्न

सम्पादितम्।

श्रीयुक्तवीरसिंहशास्त्रिणा श्रीयुक्तधीरानन्दकाव्यनिधिना च

परिशोधितम्।

कलिकाताराजधान्याम्

कलुटोलाष्ट्रीटस्थित ३४।१ नं वङ्गवासी-ष्टीम-मेसिन-यन्त्रे

श्रीअरुणोदयरायेण

मुद्रितं प्रकाशितञ्च।

शकाब्दाः १८१२।

विज्ञप्तिः।

"चतुर्विंशतिसाहस्रं शैवमत्र निरूपितम्" इति ब्रह्मवैवर्त्तपुराणोक्तेः "ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा" इति विष्णुपुराणोक्तेश्चाष्टादशपुराणेषु तुर्य्यं शिवपुराणमस्मद्देशवासिनामसकृच्छ्रवणपदवीमुपगतमिदमनो वागोचरः प्रायेणाभवदपि वा केषाञ्चिदीचागोचरः पुनरीदृक्तया नैव। तथा चात्र देशे यस्य कस्य शिवपुराणस्य विद्यते स्वल्पतरः प्रचारस्तदपरमिदञ्चान्यत्। देशप्रचलितस्य तस्य देशानुरागितयेतरानवलोकनाच्च महापुराणतां प्रामाणिकताञ्च वर्णयन्त्येके। अस्य चापरे। शिवपुराणस्य प्रसिद्धचतुर्विंशतिसहस्रश्लोकात्मकता प्रामाणिकत्वेन सर्व्वजनपरिगृहीता चैतदन्तर्गता सनत्कुमारसंहिता द्योतयतो विजयमन्यपचस्य। वस्तुतः कल्पभेदेन द्वयोरपि शिवपुराणयोः श्रीमद्भागवत-देवीभागवतयोरिव महापुराणत्वमाचक्ष्महे। एवञ्च मत्स्यपुराणादिष्वष्टादशपुराणगणनाप्रसङ्गे शिवपुराणस्यानुल्लेखादुल्लेखाच्च वायुपुराणस्य ब्रह्मवैवर्त्तपुराणादिषूक्तं शैवपदं शिवमाहात्म्यप्रकाशकत्वेन वायुपुराणमेव गमतयतीति माशङ्कि। एतच्छिवपुराणस्यापि वायवीयसंहिताघटितत्वात् वायवीयपदस्याप्येतत्परत्वकल्पनायां बाधकाभावात्, वायुपुराणस्य चतुर्विंशतिसहस्रश्लोकानात्मकत्वाच्च। अतः पुराणविरोधपरिहारायात्रापि गत्यन्तराभावेन कल्पभेदव्यवस्थित्यनुसरणमिति ज्ञेयम्। तदिदं शिवतत्त्वप्रणवस्वरूपाद्यवश्यवेदितव्यगूढार्थ-तर्व्वाड़ीप्रभृतिदैत्यमर्द्दनादिरूपनानाख्यानख्यापकत्वेनानुपलभ्यमानमपि विरलप्रचारमात्रतया धर्म्मानुरागिणामत्यादरास्पदमिति श्रुतिप्रत्यचसन्तानः। तत् षड्भिः संहिताभिर्विभक्तमिदं शिवपुराणमाहृत्य देशान्तरतः पाठद्वैधादिनिवेशनपुरःसरं प्रकाश्यं नीतम्।

इदन्त्ववधातव्यम्,—एतच्छिवपुराणीयवायवीयसंहितायां शिवपुराणस्य लचश्लोकात्मकत्वादशसंहितात्मकत्वकथनादेतदन्तर्गतज्ञानसंहिता-सनत्कुमारसंहितयोश्चानुल्लेखादिदममूलमन्यद्वा किञ्चिदिति विवदन्ते केचित् इह वयं समादध्मः,—तत्रैव संहितायां—

"संक्षिप्य स पुनर्वेदांश्चतुर्द्धा कृतवान् मुनिः। व्यस्तवेदतया लोके वेदव्यास इति श्रुतः॥

पुराणमपि संक्षिप्तं चतुर्लचप्रमाणतः। अद्यापि देवलोके तच्छतकोटिप्रविस्तरम्॥"

इत्यनेन सन्दर्भेण शतकोटिश्लोकात्मकानि पुराणानि संक्षिप्तानि पुनश्चतुर्लचश्लोकात्मकत्वेनेत्यभिधानाल्लचश्लोकात्मकशिवपुराणस्य देवलोके प्रसिद्धिरितरस्य च मर्त्त्यलोके। इत्येतत् साधु कल्पयितुमर्हम्। अन्यथा दुष्परिहरा पाराशर्य्यस्य स्ववचोव्याघातापत्तिः, परस्परविरोधो वा वाक्यद्वयस्य। किञ्च ज्ञानसंहिता-सनत्कुमारसंहितयोरेतच्छिवपुराणानन्तर्गतत्व-चतुर्विंशतिसहस्रश्लोकात्मकत्वं व्याहन्यते तावदस्य शैवस्य। स्याच्चेतत्संहिताद्वयघटितमेव शिवपुराणमिति चिरन्तनव्यवहारलोपः। तस्माद्देवलोकप्रसिद्धाष्टसहस्रश्लोकात्मकरुद्रसंहितैव ज्ञानसंहितात्वेन संक्षिप्ता मादृशामर्व्वागृदृशामुपचिकीर्षया भगवता वेदव्यासेन। औमसंहिता मातृसंहितादीनाञ्च काचित् सनत्कुमारसंहितात्वेनेति।

यद्यप्यविदानीमसकृदाशास्महे,—पण्डितश्रीयुक्तवीरसिंहशास्त्रि-श्रीयुक्तधीरानन्दकाव्यनिधिभ्यां सयत्नपरिश्रमं संशोधितमिदं सतां प्रीतये भूयादिति।

अवसितौ चेदमालोक्यम्,—अथ शिवपुराणे एकोनचत्वारिंशेऽध्याये गणेशविवाहप्रस्तावे कन्या-लक्षणानीत्युपक्रम्य रणवीरज्योतिर्म्महानिबन्धे वक्ष्यमाणाः श्लोका उद्धृताः। परमिदानीं सर्व्वेष्वेवादर्शपुस्तकेषु शिवपुराणज्ञानसंहितायाः षट्त्रिंशाध्याये गणेशविवाहप्रस्तावस्य सत्त्वात् तत्र चैषामनुपलभ्यमानतयान्तर्मूलमनिवेश्यात्रैवैते प्रदर्श्यन्ते,—

तस्मात् परीक्ष्य मतिमान् कन्यां लक्षणसंयुताम्।
विवाहेत यथा न स्यात् सर्व्वथानर्थभाजनम्॥ १
तथा च सम्प्रवक्ष्यामि कन्यादोषानशेषतः।
यान् विज्ञाय सुधीः क्वापि न मज्जेद्दुःखसागरे॥ २
कपिला केकराक्षी च हीनाङ्गी रोगिणी खला।
अलोमा चातिलोम्नी चाधिकाङ्गी पिङ्गला तथा॥ ३
वक्रनासा कृशा दीर्घा श्वपुटा खलतिस्तथा।
एताः कन्याः परित्याज्या विवाहे तु कृतात्मभिः॥ ४
इमे कन्यागता दोषाश्चतुर्द्दश प्रकीर्त्तिताः।
वाह्या आभ्यन्तरा दोषा दुर्ज्ञाना अकृतात्मभिः॥ ५
तस्माद्देवोक्तमाहृत्य दोषज्ञानं भवेदिह।
अष्टौ पिण्डान् विधायादौ शुद्धमृत्सम्भवानिह॥ ६
ताभिस्तस्याः परीक्ष्येत लक्षणं ह्यन्तरञ्च यत्।
क्षेत्राद्गोष्ठाद्वेदितः सिन्धुतश्च
द्यूतस्थानादेरिणाच्चापि सम्यक्।
चतुष्पथात् पितृवनात् तथैव
मृदो ग्राह्याः शुद्धिमभीप्समानैः॥ ७
इत्थमानीय मृत्कूटानसङ्कीर्णान् पृथक् पृथक्।
वेदमन्त्रेण संमन्त्र्य पिण्डितांस्तान् गुरुर्वदेत्॥ ८
एतन्मध्ये त्वया ग्राह्यं पिण्डमेकं सुलक्षणे।
पिण्डे गृहीते मतिमान् फलं ब्रूयात् सुनिश्चितम्॥ ९
क्षेत्रपिण्डेऽन्नसंयुक्ता पतिपुत्रसुखान्विता।
गोष्ठपिण्डे पतिमती रूपिणी वेदिपिण्डतः॥ १०
नदीपिण्डे समृद्धा स्याद्द्यूतपिण्डे शठा भवेत्।
प्रव्राट् चतुःस्रुतीपिण्डादेरिणाद्धनवर्ज्जिता॥ ११
श्मशानपिण्डे सुक्रूरा पतिघ्नी स्यान्न संशयः।
आन्तरं लक्षणं वीक्ष्य कुर्य्याद्भार्य्यां मनोरमाम्॥ १२
इमे कन्यागता दोषा मया तेऽद्य प्रकीर्त्तिताः।
पितृसम्बन्धतो दोषान् शृणु त्वं वरवर्णिनि॥ १३
हीनकर्म्माथ निष्क्रान्तो लोमशोऽर्शस आमयी।
क्षयी निष्पौरुषः श्वित्रि-कुष्ठ्यपस्मारिणस्तथा॥ १४
दशैमान् पितृदोषांश्च परीक्ष्य विधिवद्बुधः।
कन्यां सुलक्षणवतीं विवाहेत मुदान्वितः॥ १५

इत्यलम्।

सम्पादक-
श्रीपञ्चाननतर्करत्नस्य।

शिवपुराण-सूचीपत्रम्।

ज्ञानसंहितायाः—

सनत्कुमारसंहितायाः—

—

वायवीयसंहितायाः—

पूर्व्वभागस्य—

† मूले भ्रमात् त्रिपञ्चाशाध्यायस्य द्विपञ्चाशत्त्वेन तमारभ्या परिसमाप्तेरेतत्संहिताया एकाध्यायन्यूनताघटितमसामञ्जस्यं वर्त्तते। तत्रैव तद्द्रष्टव्यम्। अत्र पुनर्यथायथमेव निवेशितमिति॥

उत्तरभागस्य—

धर्म्मसंहितायाः—

शिवपुराणसूचीपत्रं समाप्तम् ।

शिवपुराणम् ।

ज्ञानसंहिता ।

प्रथमोऽध्यायः ।

ओं नमो भगवते वासुदेवाय ।

नारायणं नमस्कृत्य, नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

जगतः पितरं शम्भुं जगतो मातरं शिवाम् ।
तत्पुत्रञ्च गणाधीशं नत्वैतद्वर्णयाम्यहम् ॥ १
वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते हृदये संवित् तं नृसिंहमहं भजे ॥ २
एकदा मुनयः सर्व्वे नैमिषारण्यवासिनः ।
पप्रच्छुः परया भक्त्या व्यासशिष्यं गुणान्वितम् ॥ ३

ऋषय ऊचुः ।

सूत सूत महाभाग चिरं जीव सुखी भव ।
पिबन्तस्त्वन्मुखाम्भोजाच्युतं ज्ञानामृतं वयम् ॥ ४
अवितृप्ताः पुनः किञ्चित् प्रष्टुमिच्छामहेऽनघ ।
व्यासप्रसादात् सर्व्वज्ञो यातोऽसि कृतकृत्यताम् ॥ ५
नाज्ञातं विद्यते किञ्चिद्भूतं भव्यं भवच्च यत् ।
गुरोः कृपां समासाद्य सर्व्वं सार्थीकृतं त्वया ॥ ६
कथय त्वं प्रसादेन शिवरूपमनुत्तमम् ।
तत्पजां परमां दिव्यां चरित्राण्यप्यनेकशः ॥ ७
अगुणो गुणतां यातः कथं लोके महेश्वरः ।
शिवतत्त्वं वयं सर्व्वे न जानीमो विचारतः ॥ ८
सृष्टेः पूर्व्वं कथं देवस्तन्मध्ये च कथं पुनः ।
तदन्ते च कथं तिष्ठेच्छङ्करो लोकशङ्करः ॥ ९
कथं प्रसन्नतां याति प्रसन्नः किं फलं पुनः ।
यच्छते सर्व्वलोकेभ्यः सर्व्वं कथय सुव्रत ॥ १०
सद्यः प्रसन्नो भगवान् भवतीत्यनुशुश्रुम ।
एतत् सर्व्वं तथा चान्यत् कथनीयं त्वयानघ ॥ ११
इति पृष्टस्तथा तैर्हि श्रुत्वा हर्षसमन्वितः ।
उवाच वचनं तत्र ऋषीणां शृण्वतां तदा ॥ १२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां परिपाटिका नाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

सूत उवाच ।

सम्यक् पृष्टं भवद्भिस्तु यथावत् कथयाम्यहम् ।
कपोलकल्पितं नैव कथयिष्ये मुनीश्वराः ॥ १
भवद्भिः पृच्छ्यते यद्वत् तत् तथा नारदेन व ।
पृष्टं पित्रे स्वयं तत्र ज्ञानाय परमात्मने ॥ २
कस्मिंश्चित् समये विप्रा नारदो मुनिसत्तमः ।

पृथिव्यामटनं कृत्वा शिवरूपाण्यनेकशः ॥ ३
दृष्ट्वा नत्वा च सम्पूज्य तत्त्वं ज्ञातुं महात्मनः ।
पप्रच्छ ब्रह्मणे तच्च शिवरूपं विचिन्तयन् ॥ ४

नारद उवाच ।

ब्रह्मन् ब्रह्मविदां श्रेष्ठ पितामह जगत्प्रभो ।
त्वत्प्रसादान्मया सर्व्वं विष्णोर्माहात्म्यमुत्तमम् ॥ ५
भक्तिमार्गं ज्ञानमार्गं तपोमार्गं सुदुष्करम् ।
दानमार्गञ्च तीर्थानां मार्गञ्च श्रुतवानहम् ॥ ६
न ज्ञातं शिवतत्त्वञ्च पूजा च विधिवत् क्रमात् ।
चरित्रं विविधं तस्य निवेदय मम प्रभो ॥ ७
स सन्दिग्धं कथञ्चान्यं विहाय परमेष्ठिनम् ।
पृच्छेयं परमं तत्त्वं नैर्गुण्यं परमेश्वरम् ॥ ८
तस्मात् त्वया च वक्तव्यं माहात्म्यं शङ्करस्य च ।
लोकानामुपकारार्थं व्रतानि च शिवस्य च ॥ ९
सन्तुष्टश्चैव भक्तेभ्यः किं किं यच्छति वै फलम् ।
तदुत्पत्तिं विवाहञ्च गिरिजायाः सविस्तरम् ॥ १०
बहुभ्यश्च श्रुतं पूर्व्वं न तृप्तोऽस्मि जगत्प्रभो ॥ ११

सूत उवाच ।

इति श्रुत्वा वचस्तस्य नारदस्यात्मजस्य च ।
उवाच वचनं तत्र ब्रह्मा लोकपितामहः ॥ १२

ब्रह्मोवाच ।

भो ब्रह्मन् साधु पृष्टोऽहं लोकानां हितकाम्यया ।
यच्छ्रुत्वा सर्व्वलोकानां सर्व्वपापक्षयो भवेत् ॥ १३
तत्त्वं नैव मया सम्यग्विष्णुना प्रभविष्णुना ।
शिवस्य परमं ब्रह्मन् न ज्ञातं रूपमद्भुतम् ॥ १४
इदं दृश्यं यदा नासीत् सदसदात्मकञ्च यत् ।
तदा ब्रह्ममयं तेजो व्याप्तिरूपञ्च सन्ततम् ॥ १५
न स्थूलं न च सूक्ष्मञ्च शीतं नोष्णन्तु पुत्रक ।
आद्यन्तरहितं दिव्यं सत्यं ज्ञानमनन्तकम् ॥ १६
योगिनोऽन्तरदृष्ट्या हि यं ध्यायन्ति निरन्तरम् ।
तद्रूपं सकलं ह्यासीज्ज्ञानविज्ञानदं महत् ॥ १७
कियता चैव कालेन तस्येच्छा समपद्यत ।
प्रकृतिर्नाम सा प्रोक्ता मूलकारणमित्युत ॥ १८
अष्टौ भुजाश्च तस्यासन् विचित्रवसना शुभा ।
राकाचन्द्रसहस्रस्य वदनं तस्य नित्यशः ॥ १९
नानाभरणसंयुक्ता नानागतिसमन्विता ।
नानायुधधरा देवी प्रफुल्लपङ्कजार्चिका ॥ २०
अचिन्त्यतेजसा युक्ता सर्व्वयोनिसमन्विता ।
एकाकिनी यदा माया संयोगाच्चाप्यनेकिका ॥ २१
यतो वै प्रकृतिर्देवी ततो वै पुरुषस्तदा ।
उभौ च मिलितौ तत्र विचारे तत्परौ मुने ॥ २२
आवाभ्यां किं प्रकर्त्तव्यं ध्यायतः स्म परस्परम् ।
एतस्मिन्नन्तरे वाणी समुत्पन्ना शुभा शुभा ॥ १३
तपश्चैव प्रकर्त्तव्यं संशयस्यापनुत्तये ।
ततस्ताभ्याञ्च तच्छ्रुत्वा तपस्तप्तं सुदारुणम् ॥ २४
कियत् कालं तदा ब्रह्मन् ध्यानमार्गपरायणौ ।
प्रकृतिः पुरुषश्चैव प्रबुद्धौ ध्यानमार्गतः ॥ २५
प्रबुध्य विस्मयं प्राप्तौ कियत् तप्तमहो इति ।
तदङ्गाज्जलधारा हि सञ्जाता विविधा मुने ॥ २६
ताभिर्व्याप्तञ्च सकलं ब्रह्मरूपमभूज्जलम् ।
अनन्तं ह्यभवत् तच्च स्पर्शनात् पापनाशनम् ॥ २७
तदा श्रान्तश्च पुरुषस्तया सह जले स्वयम् ।
सुष्वाप परमप्रीतो बहुकालं तया सह ॥ २८
नारायणेति वै नाम जातं तस्य महात्मनः ।
नारायणीति वै नाम प्रकृतेः सम्मतं मुने ॥ २९
नान्यत् किञ्चित् तदा ह्यासीत् प्रकृतिं पुरुषं विना ।
एतस्मिन्नन्तरे ब्रह्मंस्तत्त्वान्यासन् महात्मनः ॥ ३०
प्रकृतेश्च महानासीन्महतश्च गुणास्त्रयः ।
अहङ्कारस्ततो जातस्ततस्तन्मात्रकाः पराः ॥ ३१
पञ्च भूतान्यतोऽप्यासन् ज्ञान-विज्ञानकान्यतः ।
तत्त्वानामिति संख्यानमुच्यते ऋषिसत्तम ॥ ३२
जड़ात्मकञ्च तत् सर्व्वं प्रकृतिं पुरुषं विना ।
ताभ्यामेकीकृतं तच्च चतुर्व्विंशतिसंज्ञितम् ॥ ३३
तद्गृहीत्वा च सुष्वाप जले ब्रह्मस्वरूपिणि ।
सुप्ते नारायणे देवे नाभौ पङ्कजमुत्तमम् ॥ ३४
अनन्तपत्रिकायुक्तं कर्णिकारसमन्वितम् ।
अनन्तयोजनायाममनन्तोच्छ्रायसंयुतम् ॥ ३५
कोटिसूर्य्यप्रतीकाशं सुन्दरं तत्त्वसंयुतम् ।
तस्मात् पद्मात् ततो यज्ञे पुत्त्रोऽहं हेमगर्भकः ॥ ३६
तन्मायामोहितश्चाहं नाविदं कमलं विना ।
कोऽहं वा कुत आयातः किं कार्य्यन्तु मदीयकम् ॥ ३७
कस्य पुत्त्रोऽहमुत्पन्नः केनैव निर्म्मितो ह्यहम् ।

इतिसंशयमापन्नं न धीमीं समपद्यत ॥ ३८
किमर्थं मोहमायातो यत्र वै कमलस्थलम् ।
मत्कर्त्ता च भवेत् तत्र भविष्यति न संशयः ॥ ३९
इति बुद्धिं समास्थाय कमलादवरोहयन् ।
नाले नाले गतस्तत्र वर्षाणां शतकं मुने ॥ ४०
न लब्धन्तु मया तत्र कमलस्थानमुत्तमम् ।
संशयन्तु पुनः प्राप्तः कमलं गन्तुमुत्सुकः ॥ ४१
आरुरोहाथ कमलं नालमार्गेण वै मुने ।
कुड्मलं कमलस्याथ लब्धवान् न विमोहितः ॥ ४२
नालमार्गे तु भ्रमतो गतं वर्षशतं पुनः ।
क्षणमात्रं तदा तत्र श्रान्तोऽतिष्ठं विमोहितः ॥ ४३
तदा वाणी समुत्पन्ना तपेति परमा शुभा ।
तच्छ्रुत्वा तु तपस्तप्तं द्वादशाब्दं प्रयत्नतः ॥ ४४
तदा वै भगवान् विष्णुश्चतुर्ब्बाहुः सुलोचनः ।
ममैवानुग्रहं कर्त्तुं पीताम्बरधरः शुभः ॥ ४५
शङ्खचक्रायुधस्तत्र गदापद्मधरः परः ।
घनश्यामः सुसन्तुष्टः प्रसन्नमुखपङ्कजः ॥ ४६
मुकुटादिभूषणैर्युक्तः कोटिकन्दर्पसम्मतः ।
प्रकृत्या जनितः सोऽथ मया दृष्टः पुरो मुने ॥ ४७
तं दृष्ट्वा सुन्दरं रूपं विस्मयं परमं गतः ।
कालात्मा काञ्चनाभश्च शुक्लकृष्णश्च निर्गुणः ॥ ४८
नारायणो महाबाहुः सर्व्वात्मा सदसन्मयः ।
तथाभूतमहं दृष्ट्वा हर्षितो ह्यभवं तदा ॥ ४९
मायया मोहितस्तस्य तमवोचममर्षितः ।
कस्त्वं वदेति हस्तेन समुत्थाप्य सनातनम् ॥ ५०
प्रबुद्धो भगवांस्तत्र कथं कथय सुव्रत ।
इत्येतद्वचनं श्रुत्वा नामतो भगवान् हरिः ॥ ५१
तत्त्वेन परमो विष्णुनिर्म्माता तव सुव्रत ।
वत्स जानीहि भद्रं ते सत्यमेतद्वदाम्यहम् ॥ ५२
तस्य तद्वचनं श्रुत्वा स्मितपूर्व्वं महामुने ।
मायया मोहितस्तं वै परिभत्स्य पुनस्तदा ॥ ५३
भाषसे वत्स वत्सेति सर्गसंसारपालकम् ।
मामाहात्यस्मितं कृत्वा गुरुः शिष्यमिवानघ ॥ ५४
कर्त्तारं जगतां साक्षात् प्रकृतेश्च प्रवर्त्तकम् ।
सनातनमजं विष्णुं विरञ्चे विश्वसम्भवम् ॥ ५५
विश्वात्मानं विधातारं धातारं पङ्कजेक्षणम् ।
किमथ भाषसे मोहाद्वक्तुमर्हसि सत्वरम् ॥ ५६
सोऽपि मामाह जगतां कर्त्ता त्वमिति लोकय ।
भर्त्ता हर्त्ता भवानङ्गादवतीर्णो ममाव्ययात् ॥ ५७
विस्मृतोऽसि जगन्नाथं नारायणमनामयम् ।
पुरुषं परमात्मानं कर्त्तारं जगतां प्रभुम् ॥ ५८
विष्णुमच्युतमीशानं विश्वस्य प्रभवोद्भवम् ।
तवापराधो नास्त्यत्र मम मायाकृतन्त्विदम् ॥ ५९
शृणु सत्यं परंब्रह्मन् सर्व्वं तन्मम सम्भवम् ।
मयासृष्टं पुरा व्यक्तं चतुर्व्विंशतितत्त्वकम् ॥ ६०
इति श्रुत्वा वचस्तस्य ब्रह्मा क्रोधान्वितस्तदा ।
को वा त्वमिति सम्भाष्य कश्चित् कर्त्ता भवेत् तव॥६१
मायया मोहितश्चाहं युद्धं चक्रे सुदारुणम् ।
विवादशमनार्थञ्च प्रबोधार्थं द्वयोरपि ॥ ६२
ज्योतिर्लिङ्गं तदोत्पन्नमावयोर्मध्य अद्भुतम् ।
ज्वालामालासहस्राढ्यं कालानलचयोपमम् ॥ ६३
क्षय-वृद्धिविनिर्म्मुक्तमादिमध्यान्तवर्ज्जितम् ।
अनौपम्यमनिर्द्दिष्टमव्यक्तं विश्वसम्भवम् ॥ ६४
तस्य ज्वालासहस्रेण मोहितो भगवान् हरिः ।
मोहितं प्राह मामत्र किमर्थं स्पर्द्धसेऽधुना ॥ ६५
आगतोऽत्र तृतीयोऽपि तिष्ठतां युद्धमावयोः ।
कुत एवात्र सम्भूतं परीक्षावोऽग्निसन्निभम् ॥ ६६
वायुवेगसमो भूत्वा गच्छोर्द्ध्वं विश्वसम्भव ।
भवानूर्द्ध्वं प्रयत्नेन गन्तुमर्हति सत्वरम् ।
हंसरूपं त्वया धार्य्यं वाराहञ्च मया पुनः ॥ ६७
एवं व्याहृत्य विश्वात्मा स्वरूपमकरोत् तदा ।
हंसश्चाहं तदा जातः सुन्दरः पक्षसंयुतः ॥ ६८
तदाप्रभृति मामाहुर्हंसहंस-विराड़िति ।
हंसहंसेति यो ब्रूयात् सोऽहंसोऽहं भविष्यति(क)॥६९
सुश्वेतो ह्यनिलप्रख्यो विश्वतः पक्षसंयुतः ।
मनोऽनिलजवो भूत्वा ततश्चोर्द्ध्वं गतः पुरा ॥ ७०
नारायणोऽपि विश्वात्मा सुश्वेतो ह्यभवत् तदा ।
दशयोजनविस्तीर्णमायतं शतयोजनम् ॥ ७१
मेरुपर्व्वतवर्ष्माणं तीक्ष्णनखाग्रदंष्ट्रिणम् ।
कालादित्यसमाभञ्च दीर्घघोणं महास्वनम् ॥ ७२
ह्रस्वपादं विचित्राङ्गं जैत्रं दृढमनोजवम् ।

(क) सोऽहं सोऽयं भविष्यतीत्यपि क्वचित् पाठः ।

वाराहं रूपमास्थाय गतवांस्तदधो जवात् ॥ ७३
एवं वर्षसहस्रन्तु चरन् विष्णुरधोगतः।
तदाप्रभृति लोकेषु श्वेतवाराहकल्पकः ॥ ७४

इति श्रीशैवे महापुराणे ज्ञानसंहितायां ज्योतिर्लिङ्गप्रादुर्भाववर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः।

सूत उवाच।

ततः परञ्च यज्जातं श्रूयतामृषिसत्तमाः।
श्रान्तश्च(क) बहुधा कालं विष्णुना प्रभविष्णुना ॥ १
नापश्यदल्पमप्यस्य मूलं लिङ्गस्य शूकरः।
तावत् कालं गतो ह्यूर्द्धमहमप्यरिसूदन ॥ २
सत्वरं सर्व्वयत्नेन तस्यान्तं ज्ञातुमिच्छया।
श्रान्तो न दृष्ट्वा तस्यान्तमहं कालादधोगतः ॥ ३
तथैव भगवान् विष्णुः श्रान्तस्रस्तविलोचनः।
समागतो मया सार्द्धं प्रणिपत्य भवं मुहुः ॥ ४
मायया मोहितः शम्भोस्तस्थौ संविग्नमानसः।
प्रणिपत्य मया सार्द्धं सस्मार किमिदन्त्विति ॥ ५
अनिर्द्देश्यञ्च तद्रूपमनाम कर्म्मवर्ज्जितम्।
अलिङ्गं लिङ्गतां यातं ध्यानमार्गेऽप्यगोचरम् ॥ ६
स्वस्थं चित्तं तदा कृत्वा नमस्कारपरायणौ।
जानीयावो न ते रूपं योऽसि सोऽसि नमोऽस्तु ते ॥ ७
एवमब्दशतं जातं नमस्कारं प्रकुर्व्वतोः।
तदा समभवत् तत्र सनादं शब्दलक्षणम् ॥ ८
ओमितीदं मुनिश्रेष्ठ सुव्यक्तं प्लुतलक्षणम्।
किमिदन्त्विति सञ्चिन्त्य मया तिष्ठन्महास्वनम् ॥ ९
यस्माच्छब्दः समुद्भूतस्तस्मै तुभ्यं नमोऽस्तु ते।
लिङ्गस्य दक्षिणे भागे तदापश्यत् सनातनम् ॥ १०
आद्यं वर्णमकारन्तु उकारञ्चोत्तरे ततः।
मकारं मध्यतश्चैव नादान्तं तस्य चोमिति ॥ ११
सूर्य्यमण्डलवद्दृष्ट्वा वर्णमाद्यन्तु दक्षिणे।
उत्तरे पावकप्रख्यमुकारमृषिसत्तम ॥ १२
शीतांशुमण्डलप्रख्यं मकारं तस्य मध्यतः।
तस्योपरि तदापश्यत् स्फटिकप्रभवं परम् ॥ १३
तुरीयातीतममृतं निष्कलं निरुपप्लवम्।
निर्द्वन्द्वं केवलं तत्त्वं बाह्याभ्यन्तरवर्ज्जितम् ॥ १४
आदिमध्यान्तरहितमानन्दस्यापि कारणम्।
सत्यमानन्दममृतं परंब्रह्मपरायणम् ॥ १५
एकाक्षरन्तु यत् प्रोक्तं भगवान् नीललोहितः।
सर्गकर्त्ता ह्यकाराख्य उकाराख्यस्तु पालकः ॥ १६
मकाराख्यस्तु यो नित्यमनुग्रहकरो भवः।
अहमेव हरिर्ब्रह्मन् विस्मयाविष्टमानसौ।
एतस्मिन्नन्तरेऽन्यच्च रूपमद्भुतसुन्दरम् ॥ १७
पञ्चवक्त्रं दशभुजं कर्पूरगौरकं मुने।
नानाकान्तिसमायुक्तं नानाभरणसंयुतम् ॥ १८
महोदारं महावीर्य्यं महापुरुषलक्षणम्।
तद्दृष्ट्वा परमं रूपं निर्म्माता स्वयमेव हि ॥ १९
ततो विज्ञाय देवेशं यथावच्छ्रुतिसम्मतैः।
मन्त्रैर्महेश्वरं देवं तुष्टाव सुमहोदयम् ॥ २०
आवयोः स्तुतिभिस्तुष्टो लिङ्गे तस्मिन् निरञ्जनः।
दिव्यं शब्दमयं रूपमास्थाय प्रहसन् स्थितः ॥ २१
अकारस्तस्य मूर्द्धा च ललाटं दीर्घ उच्यते।
इकारं दक्षिणं नेत्रमीकारं वामलोचनम् ॥ २२
उकारं दक्षिणं श्रोत्रमूकारं वाममुच्यते।
ऋकारं दक्षिणं तस्य कपोलं परमेष्ठिनः ॥ २३
वामं कपोलमॄकारं लृलॄ नासापुटे उभे।
एकारमोष्ठमूर्द्धन्तु ऐकारमधरं विभो ॥ २४
ओकारञ्च तथौकारं दन्तपङ्क्तिद्वयं क्रमात्।
अंअश्च तालुनी तस्य देवदेवस्य धीमतः ॥ २५
कादिपञ्चाक्षराण्यस्य पञ्च हस्ताश्च दक्षिणे।
चादिपञ्चाक्षराण्येव पञ्च हस्तास्तु वामतः ॥ २६
टादिपञ्चाक्षरं पादौ तादिपञ्चाक्षरं तथा।
पकारमुदरं तस्य फकारं पार्श्वमुच्यते ॥ २७
बकारं वामपार्श्वन्तु भकारं स्कन्ध उच्यते।
मकारं हृदयं शम्भोर्महादेवस्य योगिनः ॥ २८
यकारादि-सकारान्तं विभोर्वै सप्त धातवः।
हकारं नाभिरूपं हि क्षकारं नाद उच्यते(क) ॥ २९

(क) अनन्तरं यज्जातं तच्छ्रूयतामिति प्रतिज्ञाय श्रीनिमत्नुवदति श्रान्तमिति।

(क) मेढ़्र उच्यते इति पाठान्तरम्।

एवं शब्दमयं रूपमगुणस्य गुणात्मनः ।
तं दृष्ट्वा तु मया सार्द्धं भगवन्तं महेश्वरम् ॥ ३०
प्रार्थयन्तौ पुनस्तं वै कृपा कार्य्या त्वया विभो ।
इत्येवं वचनं श्रुत्वा प्रसन्नः शङ्करस्तदा ॥ ३१
उवाच वचनं तत्र प्रसन्नो भगवानिह ।
तदीयं तद्वचस्तत्र श्रुत्वा विष्णुर्मया सह ॥ ३२
उवाच यदि देवेश प्रसन्नो भगवानिह ।
आवयोः किञ्चित् कार्य्यं वै यदिच्छसि तथा कुरु॥३३
इत्येवं वचनं श्रुत्वा शम्भुर्वाक्यमथाब्रवीत् ।
सृष्टिकर्त्ता भवेद्ब्रह्मा सृष्टेश्च पालको हरिः ॥ ३४
मदीयश्च तथांऽशो भविष्यति तदन्तकृत् (क) ।
इयञ्च प्रकृतिर्देवी या नारायणमाश्रिता ॥ ३५
तस्यां भविष्यति शक्तिर्ब्रह्माणी सम्भविष्यति ।
अन्या शक्तिः पुनस्तत्र प्रकृतेः सम्भविष्यति ॥ ३६
समाश्रयिष्यते विष्णुं लक्ष्मीरूपेण सा तदा ।
पुनश्च कालीनाम्नी च मदंशं प्रापयिष्यति ॥ ३७
ज्योतीरूपेण सा तत्र कार्य्यार्थं सम्भविष्यति ।
त्रयो देवास्तथा प्रोक्ताः शक्तयः परमाः शुभाः ॥ ३८
सृष्टिकार्य्यन्तु सम्भूय कुर्व्वन्तु तं मदाज्ञया ।
इत्येवन्तु वचः श्रुत्वा विष्णुर्वाक्यमथाब्रवीत् ॥ ३९

श्रीभगवानुवाच ।

भवदुक्तं करिष्यामो नियताः सर्व्व एव हि ।
किञ्चिद्विज्ञाप्यमस्त्येव तत् त्वं कर्त्तुमिहार्हसि ॥ ४०
ततो वचनमारब्धं शङ्करेण परं शुभम् ।
यदभिष्टतमं (ख) तुभ्यं दास्यामि हितकाम्यया ॥ ४१
विष्णुर्मया सहोवाच शङ्करं लोकशङ्करम् ॥ ४२

श्रीभगवानुवाच ।

देवदेव नमस्तुभ्यं देहि तत्त्वं नमोऽस्तु ते ।
ध्येयं सेव्यं तथा पूज्यं वक्तुमर्हसि सुव्रत ॥ ४३
यत् कृत्वा सर्व्वसामर्थ्यं भविष्यति न संशयः ।
इत्युक्तः शङ्करस्तस्मै ददौ नादात्मकं शिवम् ॥ ४४
प्रणवात्मकं परं तत्त्वं लब्धवान् परमात्मनः ।
हरिस्तत्र परं तत्त्वं ज्ञात्वा रूपमपश्यत ॥ ४५
तदुपायं प्रवक्ष्यामि मन्त्रतत्त्वं शुभान् पथः ।
प्रणम्य भगवान् विष्णुः पुनश्चापश्यदूर्द्धतः ॥ ४६
ओङ्कारप्रभवं मन्त्रं कलापञ्चकसंयुतम् ।
ओँ तत्त्वमसीत्युक्तं महावाक्यं हरस्य च ॥ ४७
शुद्धस्फटिकसङ्काशं मन्त्ररूपमनुत्तमम् ।
मेधाकारमभूद्भूयः सर्व्वकामार्थसाधकम् ॥ ४८
पुनर्मन्त्रं तथान्यच्च गायत्रीलक्षणं महत् ।
चतुर्व्विंशतिवर्णाढ्यं चतुर्व्वर्गफलप्रदम् ॥ ४९
पुनर्मृत्युञ्जयं मन्त्रं पञ्चाक्षरमतः परम् ।
चिन्तामणिं तथा मन्त्रं दक्षिणामूर्त्तिसंज्ञितम् ॥ ५०
पञ्चमन्त्रं तथा लब्ध्वा जजाप भगवान् हरिः ॥ ५१

इति श्रीशैवे महापुराणे ज्ञानसंहितायां विष्णु-
ब्रह्मवरप्रदानं नाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ।

ब्रह्मोवाच ।

जपतस्तस्य देवस्य प्रादुर्भूतो हरः स्वयम् ।
पुनः प्रसन्नस्तत्रैव हरये परमात्मने ॥ १
निगमं श्वासरूपेण ददौ तस्मै महात्मने ।
तत्र मन्त्रा ह्यनेके वै तत्र कर्म्माण्यनेकशः ॥ २
सर्व्वविद्यानिधिर्देवो हरश्चासीन्महामुने ।
ईशानः सर्व्वविद्यानां श्रुतिरेषा सनातनी ॥ ३
हरात् प्राप्य स्वयं विष्णुर्हरिर्मह्यमदात् पुनः ।
पुरतः श्वासरूपेण प्राप्तवान् निगमं तदा ॥ ४
स्वीयं ज्ञानमदात् तस्मै रहस्यं परमात्मने ।
परमात्मा पुनर्मह्यं दत्तवान् कृपया मुने ॥ ५
सम्प्राप्य निगमं देवः पप्रच्छ पुनरेव तम् ।
कथञ्च तुष्यसे देव मया ध्येयः कथं प्रभो ।
किं ध्यानञ्च प्रकर्त्तव्यं शङ्करञ्च कथं व्रजेत् ॥ ६
एतत् सर्व्वं महाराज कृपां कृत्वा ममोपरि ।
कथनीयं प्रयत्नेन शृण्वतां पापहारकम् ॥ ७
इत्येतद्वचनं श्रुत्वा प्रसन्नो भगवान् हरः ।
उवाच हरये तत्र शृणुष्वावहितो हरे ॥ ८
इदं लिङ्गं सदा पूज्यं ध्यानञ्चैतादृशं मम ।
इदानीं दृश्यते यद्वत् तथा कार्य्यं त्वया सदा ॥ ९
पूजितो लिङ्गरूपेऽस्मिन् प्रसन्नो विविधं फलम् ।

(क) तवाङ्गज इति च पाठः ।
(ख) यदभीष्टतममिति च पाठः ।

दास्यामि सर्व्वलोकेभ्यो मनोऽभीष्टान्यनेकशः ॥ १०
यदा दुःखं भवेत् तत्र पूजिते दुःखनाशनम् ॥ ११
इति दत्त्वा हरस्तस्मै वरानन्याननेकशः ।
उवाच वचनं देवो विष्णवे प्रभविष्णवे ॥ १२
अयं ब्रह्मा तथा कर्त्ता सृष्टेः कार्य्यं निरन्तरम् ।
पालय त्वं सदा देवं मद्भक्तिं परमां कुरु ॥ १३
इत्युक्त्वा तु पुनस्तस्मै पूजाविधिमदाच्छुभम् ।
येनैव पूजितः शम्भुः फलं यच्छत्यनेकशः ॥ १४
तदहं कथयिष्यामि सर्व्वपापहरं परम् ।
ततः सर्व्वमयं देवं विश्वरूपं महेश्वरम् ॥ १५
अनन्तं निष्कलं देवमृग्यजुःसामरूपिणम् ।
सर्ग-स्थिति-लयानां हि कर्त्तारं परमेश्वरम् ।
तुष्टाव पुनरिष्टाभिर्वाग्भिर्वरदमीश्वरम् ॥ १६

हरिरुवाच ।

एकाक्षराय देवाय अकारायात्मरूपिणे ।
उकारायादिदेवाय विद्यारूपाय ते नमः ॥ १७
तृतीयाय मकाराय शिवाय परमात्मने ।
जलाय जलजाय्याय नमस्ते जलशायिने ॥ १८
चित्ताय चित्तिरूपाय स्मृतिरूपाय ते नमः ।
ज्ञानाय ज्ञानगम्याय नमस्ते परमात्मने ॥ १९
हिरण्यबाहवे तुभ्यं नमस्ते हेमरेतसे ।
कपर्द्दिने नमस्तुभ्यं नागाङ्गाभरणाय च ॥ २०
वृषाकपये सर्व्वाय कर्त्रे हर्त्रे नमो नमः ।
शिवाय शिवरूपाय व्यापिने व्योमव्यापिने ॥ २१
नमो निधीनां पतये लिङ्गिने लिङ्गरूपिणे ।
तेजसे तेजसां भर्त्रे नमस्ते सर्व्वरूपिणे ॥ २२
शाश्वताय वरिष्ठाय वारिगर्भाय योगिने ।
स्थिताय सामगेयाय आवयोर्ब्रह्मवर्च्चसे ॥ २३
आत्मने ऋषये तुभ्यं स्वामिने विष्णवे नमः ।
ओङ्काराय नमस्तुभ्यं सर्व्वज्ञाय नमो नमः ॥ २४
विररामेति तं स्तुत्वा ब्रह्मणा सहितो हरिः ।
इदं स्तोत्रं परं पुण्यं सर्व्वपापप्रणाशनम् ॥ २५
यः पठेच्छृणुयाद्वापि आवयोर्हा द्विजोत्तमान् ।
स याति ब्रह्मणो लोकं पापकर्म्मरतोऽपि सन् ॥ २६
कल्याणं वर्द्धते तस्य शुक्लपक्षे यथा शशी ।
सर्व्वपापविशुद्ध्यर्थं विष्णुना परिभाषितम् ॥ २७

सूत उवाच ।

अथोवाच महादेवः प्रीतोऽहं सुरसत्तमौ ।
पश्यतां मां महादेवं भयं सर्व्वं प्रमुच्यताम् ॥ २८
युवां प्रसूतौ प्रकृतेर्मदिच्छाया महाबलौ ।
मया रूपं त्रिधा भिन्नं निर्गुणं सगुणीकृतम् ॥ २९
अयं मे दक्षिणे पार्श्वे ब्रह्मा लोकपितामहः ।
वामपार्श्वे च मे विष्णुर्विश्वात्मा हृदयेपरः ॥ ३०
प्रीतोऽहं युवयोः सम्यग्वरं दद्मि यदीप्सितम् ।
एवमुक्त्वा तु मां विष्णुं कराभ्यां परमेश्वरः ।
पस्पर्श सुशुभाभ्यञ्च घृणया स घृणानिधिः ॥ ३१
ततः प्रहृष्टमनसा प्रणिपत्य महेश्वरम् ।
प्राह नारायणो नाथं लिङ्गस्थं लिङ्गवर्ज्जितम् ॥ ३२
यदि प्रीतिः समुत्पन्ना यदि देयो वरस्त्वया ।
भक्तिर्भवतु नौ नित्यं त्वयि चाव्यभिचारिणी ॥ ३३
देवः प्रसन्नवदनो भूत्वोवाच महामुने ।
कार्य्यार्थं निर्म्मितौ देवौ नादेयं विद्यते मम ॥ ३४
जानुभ्यामवनीं गत्वा मुने नारायणः स्वयम् ।
प्रणिपत्य च विश्वेशं प्राह मन्दतरं वशी ॥ ३५
आवयोर्देवदेवेश विवादमपि शोभनम् ।
इहागतो भवान् यस्माद्विवादशमनाय नौ ॥ ३६
तस्य तद्वचनं श्रुत्वा पुनः प्राह हरो हरिम् ।
प्रणिपत्य स्थितं मूर्द्ध्ना कृताञ्जलिपुटं स्मरन् ॥ ३७

महेश्वर उवाच ।

मयि भक्तिर्दृढ़ा भूयाद्युवयोरस्मनुज्ञया ।
पार्थिवीञ्चैव मूर्त्तिञ्च विधाय कुरुतं युवाम् ।
सेवाञ्च विधिवत् प्राज्ञौ कृत्वा सुखमवाप्स्यथः ॥ ३८
उपदिश्य विधानेऽस्मिन् धर्म्मान् दुःखहरो हरः ।
ददौ वराननेकांश्च तयोर्हितचिकीर्षया ॥ ३९
ब्रह्मन् सृष्टिं कुरु त्वं हि मदाज्ञापरिपालकः ।
वत्स वत्स हरे त्वञ्च पालयस्व चराचरम् ॥ ४०
त्रिधाभिन्नो ह्यहं विष्णो ब्रह्मविष्णुहराख्यया ।
सर्गरक्षालयगुणैर्निष्कलोऽयं सदा हरे ॥ ४१
मद्रूपं परमं ब्रह्मन्नीदृशं भवदङ्गतः ।
प्रकटीभविता लोके नाम्ना रुद्रः प्रकीर्त्तितः ॥ ४२
मदंशात् तस्य सामर्थ्यमूनं नैव भविष्यति ।
योऽयं सोऽहं न भेदोऽस्ति पूजाविधिविधानतः ॥

यथा च ज्योतिषः सङ्गाज्जलादेः स्पर्शता न वै ।
तथा ममागुणस्यापि संयोगाद्बन्धनं न हि ॥ ४४
शिवरूपं ममैतच्च रुद्रोऽपि शिववत् सदा ।
न तत्र परभेदो वै कर्त्तव्यश्च महामुने ॥ ४५
वस्तुतो ह्येकधा भिन्नं रूपं मे त्रिजगत्युत ।
सुवर्णस्य यथैकस्य वस्तुत्वं नैव गच्छति ॥ ४६
अलङ्कारे कृते देव नामभेदो न वस्तुतः ।
आरम्भस्यैव कार्य्यं च निदानञ्च निदर्शनम् ॥ ४७
यथैकस्या मृदो भेदो नाम्नि पात्रे न वस्तुतः ।
यथैकस्य समुद्रस्य विकारो नैव वस्तुतः ॥ ४८
एवं ज्ञात्वा भवद्भ्याञ्च न दृश्यं भेदकारणम् ।
वस्तुतः सर्व्वदृश्यञ्च शिवरूपं मतं मम ॥ ४९
अहं भवानयश्चैव रुद्रोऽयं यो भविष्यति ।
एकं रूपं न भेदोऽस्ति भेदे च बन्धनं भवेत् ॥ ५०
तथापीह मदीयं वै शिवरूपं सनातनम् ।
मूलभूतं सदा प्रोक्तं सत्यं ज्ञानमनन्तकम् ॥ ५१
एवं ध्यात्वा सदा ध्येयं तत्त्वजिज्ञासुना त्वया ।
विशेषोऽत्र कथं लक्ष्येच्छ्रूयतां कथ्यते मया ॥ ५२
भवन्तौ प्रकृतेर्जातौ नायं वै प्रकृतेः पुनः ।
मदाज्ञा जायतेऽप्यत्र ब्रह्मणो भ्रुकुटेरहम् ॥ ५३
गुणेष्वपि च यः प्रोक्तस्तामसः प्राकृतो हरे ।
वैकारिकश्च विज्ञेयो योऽहङ्कार उदाहृतः ॥ ५४
नामतो वस्तुतो नैव तामसः परिचक्ष्यते ।
एतस्मात् कारणाद्ब्रह्मन् करणीयमिदं त्वया ॥ ५५
अतोऽहं सर्व्वभूतेषु पालयैनं पितामह ।
एतस्याः प्रकृतेर्लक्ष्मीर्ह्येतदंशा भविष्यति ॥ ५६
ब्रह्माणी च तदंशा च महाकाली तदंशिका ।
भविष्यति परा नूनं कार्य्यार्थेऽनेकतां गता ॥ ५७
त्वञ्च लक्ष्मीमुपाश्रित्य कार्य्यं कर्त्तुमिहार्हसि ।
ब्रह्मन् त्वञ्च स्वरां देवीं कर्त्तुं कार्य्यमनन्तकम् ॥ ५८
अहं कालीं समाश्रित्य करिष्ये कार्य्यमुत्तमम् ।
चतुर्व्वर्णमयं लोकं तत्संख्यैराश्रमैर्ध्रुवम् ॥ ५९
तदन्यैर्विविधैः कार्य्यैः कृत्वा सुखमवाप्स्यथ ।
ज्ञान-विज्ञानसंयुक्ता लोकानां हितकारकाः ॥ ६०
मुक्तिदोऽत्र भवानद्य भव लोके सनातन ।
मद्दर्शने फलं यद्वै तदेव तव दर्शने ॥ ६१
ममैव हृदये विष्णुर्विष्णोश्च हृदये (क) ह्यहम् ।
उभयोरन्तरं यो वै न जानाति मतो मम ॥ ६२
इदं लिङ्गं सदा पूज्यं भवद्भ्यां सुखहेतवे ।
राजतं रत्नजातं वा हैमं वा पार्थिवं मुने ॥ ६३
एतस्माच्च विधेरन्यो वल्लभो न मतो मम ।
एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत ॥ ६४
तदाप्रभृति लोकेऽस्मिन् लिङ्गे पूजाविधिः स्मृतः ।
लिङ्गं देवी महादेवी लिङ्गं साक्षान्महेश्वरः ॥ ६५
यस्तु लिङ्गसमीपे तु कार्य्यं किञ्चित् करोति च ।
तत्फलस्य च संख्यातुं न शक्नोमि महामुने ॥ ६६
यस्तु लिङ्गसमाख्यानं पठते शिवसन्निधौ ।
षण्मासाच्छिवरूपो वै नात्र कार्य्या विचारणा ॥ ६७

इति श्रीशैवे महापुराणे ज्ञानसंहितायां शिवोत्पत्तिवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ।

ऋषय ऊचुः ।

सूत सूत महाभाग लिङ्गोत्पत्तिः श्रुता शुभा ।
श्रुत्वा यस्याः प्रभावेण दुःखनाशो भवेद्धि ॥ १
तदन्तरे च यज्जातं माहात्म्यञ्च शिवस्य च ।
सृष्टेश्चैव प्रकारन्तु कथय त्वं विशेषतः ॥ २

सूत उवाच ।

सम्यक् पृष्टं भवद्भिश्च यज्जातं तदनन्तरम् ।
कथयिष्यामि संक्षेपाद्यथापूर्व्वं श्रुतं मया ॥ ३
अन्तर्हिते तदा देवे शिवरूपे सनातने ।
ब्रह्मणा विष्णुना रूपं हंस-वाराहयोस्तदा ।
संधृतञ्च ततस्ताभ्यां यत् कृतं श्रूयतामिति ॥ ४

ऋषय ऊचुः ।

अस्माकं संशयं तावत् त्वं नाशयितुमर्हसि ।
हंस-वाराहयो रूपं ताभ्याञ्चैव धृतं कथम् ॥ ५
अन्यद्रूपं विहायैव किमत्र कारणं वद ।
इत्येतद्वचनं श्रुत्वा सूतः पौराणिकोऽब्रवीत् ॥ ६
गगने हंसरूपस्य गतिर्भवति निश्चला ।
हंसस्य च विवेकोऽस्ति जल-दुग्धविभागयोः ॥ ७

(क) हृदये इत्यत्र पूर्व्वत्र च हृदयमिति पाठान्तरम् ।

अज्ञान-ज्ञानयोस्तत्त्वं तद्विवेकाय हंसकः ।
विवेको नैव लब्धश्च ह्यतो हंसो विलीयते ॥ ८
सृष्टिप्रवृत्तिकामो वै कथं ज्ञानं प्रजायते ।
वाराहं कारणं रूपं कल्पार्थं च प्रकल्पितम् ॥ ९
यद्दिनं हि समारभ्य रूपञ्च धृतवान् हरिः ।
तद्दिनं प्रतिकल्पो वै कल्पो वाराहसंज्ञकः ॥ १०
तदिच्छा वा यथा जाता ताभ्यां रूपं धृतं तथा ।
नैवात्र विस्मयः कार्य्यो हंस-वाराहरूपिणोः ॥ ११
प्रस्तुतं श्रूयतां तत्र ब्रह्मैव विकृतञ्च यत् ।
अनन्ते निष्कले लिङ्गे निर्गुणे गुणरूपिणि (क) ॥ १२
विष्णवे च वरान् दत्त्वा गुणेषु सुखतां व्रज ।
गुणाः सत्त्वादयश्चेति.तेऽपि सर्व्वे विमोहिताः ।
तस्मात् त्वं सर्व्वलोकेषु मान्यः पूज्यो भविष्यसि ॥ १३
ब्रह्मणा निर्म्मिते लोके यदा दुःखं प्रजायते ।
तदा त्वं सर्व्वदुःखानां नाशने तत्परो भव ॥ १४
विविधानवतारांश्च गृहीत्वा कीर्त्तिमुत्तमाम् ।
विस्तारय हरे लोकतारणाय परेश्वर ॥ १५
गुणरूपोऽस्म्यहं रुद्रो ह्यनेन वपुषा पुनः ।
कार्य्यं करिष्ये लोकानां सर्व्वथा नात्र संशयः ॥ १६
मम ध्येयं भवांश्चैव तव ध्येयमहं पुनः ।
आवयोरन्तरं नैव ह्यणुमात्रं विचारतः ॥ १७
वस्तुत्वे चाप्यनेकत्वं चरतोऽपि तथैव च ।
मद्भक्तो यो नरो भूत्वा तव निन्दां करिष्यति ॥ १८
तस्याहं सकलं पुण्यं भस्मीकृत्याविशेषतः ।
नरके पातयिष्यामि तद्दोषात् पुरुषोत्तम ॥ १९
लोकेऽस्मिन् भुक्तिदो नृणां मुक्तिदश्च विशेषतः ।
ध्येयः पूज्यश्च सर्व्वेषां निग्रहानुग्रहं कुरु ॥ २०
इत्युक्त्वा चैव ब्रह्माणं हस्ते धृत्वा स्वयं हरिम् ।
कथयामास दुःखिषु सहायो भव सर्व्वदा ॥ २१
सर्व्वाध्यक्षश्च देवेषु भुक्ति-मुक्तिप्रदायकः ।
भव त्वं सर्व्वदा श्रेष्ठः सर्व्वकार्य्यप्रसाधकः ॥ २२
सर्व्वेषां प्राणरूपश्च भव त्वञ्च ममाज्ञया ।
त्वाञ्च समाश्रिता ये वै मामेव समुपाश्रिताः ॥ २३
अन्तरं यश्च जानाति निरये पतते ध्रुवम् ॥ २४

(क) अनन्तं निष्कलं लिङ्गं निर्गुणं गुणरूपिणं इति क्वचित् पाठः ।

इदं रूपं त्वया तावदीक्षणीयं मदाज्ञया ।
यावच्च ब्रह्मणोऽप्यायुः शतवर्षमुदाहृतम् ॥ २५
चतुर्युगसहस्राणां समूहं दिनमुच्यते ।
रात्रिश्च तावती तस्य मानमेतत् क्रमेण तु ॥ २६
तावत् सृष्टेश्च कार्य्यं वै कर्त्तव्यं विविधैर्गुणैः ।
गुणेषु च भवान् श्रेष्ठः सत्त्वात्मा पुरुषोत्तम ॥ २७
इत्येतद्वचनं सर्व्वं तथेत्योमिति वै हरिः ।
उवाच परमप्रीतः शङ्करप्रियकाम्यया ॥ २८

श्रीहरिरुवाच ।

शङ्कर श्रूयतां मत्तः कृपासिन्धो जगत्पते ।
सर्व्वञ्चैतत् करिष्यामि भवदाज्ञापरायणः ॥ २९
मम ध्येयः सदा त्वञ्च भविष्यसि न चान्यथा ।
भवतः सर्व्वसामर्थ्यं लब्धञ्चैव पुरा मया ॥ ३०
क्षणमात्रमपि च ते ध्यानं वै परमात्मनः ।
चेतसो दूरतश्चैव मा गच्छतु कदाचन ॥ ३१
मम भक्तश्च यो नित्यं तव निन्दां करिष्यति ।
तस्य वै निरये वासं प्रयच्छ नियतं ध्रुवम् ॥ ३२
त्वद्भक्तो यो भवेन्नित्यं मद्भक्तः समुदाहृतः ।
एवं यो वै विजानाति तस्य मुक्तिर्न दुर्लभा ॥ ३३
महिमा च मदीयश्च वर्द्धितो भवता ध्रुवम् ।
कदाचिदवगणना जायते क्षम्यतामिति ॥ ३४
ततः शम्भुस्तदीयं हि श्रुत्वा वचनमुत्तमम् ।
उवाच विष्णवे विप्राः क्षन्तव्यागणना तव ॥ ३५
इत्युक्त्वान्तर्दधे शम्भुः सर्व्वकल्याणकारकः ।
अन्तर्हिते तदा देवे ब्रह्मा लोकपितामहः ॥ ३६
तदीयं वचनं कर्त्तुं समाधानपरायणः ।
नमस्कृत्य तदा विष्णुं ज्ञानं प्राप्य हरेस्तदा ।
आनन्दं परमं गत्वा सृष्टिं कर्त्तुं मनो दधे ॥ ३७
विष्णुश्चापि तदा तत्र ह्यन्तर्द्धानमुपागतः ।
पूर्व्वं सृष्टं जलं यच्च तत्राञ्जलिमुपाक्षिपत् ॥ ३८
अतोऽण्डमभवत् तत्र चतुर्व्विंशतिसंज्ञकम् ।
विराड्रूपमभूद्विप्रा जड़रूपमपश्यत ॥ ३९
ततः संशयमापन्नस्तपस्तेपे सुदारुणम् ।
द्वादशाब्दं पुनस्तेपे विष्णुध्यानपरायणः ॥ ४०
तस्मिंश्च समये विष्णुः प्रादुर्भूतो हरिः स्वयम् ।
प्रसन्नोऽस्मि वरं ब्रूहि नादेयं विद्यते तव ॥ ४१

ब्रह्मोवाच।

युक्तमेतन्महाराज दत्तोऽहं शम्भुना च ते।
तदुक्तं यच्च तन्मेऽद्य जड़ीभूतं प्रदृश्यते।
प्राणभूतो भवानद्य भूत्वा चैतन्यमावह ॥ ४२
इत्युक्ते च तदा तेन शम्भोराज्ञापरायणः।
अनन्तरूपमास्थाय प्रविवेश हरिः स्वयम् ॥ ४३
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्व्वतः स्पृष्ट्वा तदण्डं व्याप्तवानिति ॥ ४४

इति श्रीशैवे महापुराणे ज्ञानसंहितायां सृष्टि-
निरूपणं नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठाः कथां पापप्रणाशिनीम्।
प्रविष्टे विष्णुना तस्मिन् ब्रह्मणा संस्तुतेन वै ॥ १
सचेतनमभूत् तच्च चतुर्व्विंशतिसंज्ञितम्।
पातालादि समारभ्य सत्यलोकावधि स्वयम् ॥ २
राजते स्म हरिस्तत्र वैराजः पुरुषः प्रभुः।
सत्यं पदमुपाश्रित्य स्थितोऽसौ पुरुषोत्तमः ॥ ३
तपोलोकं समास्थाय ब्रह्मातिष्ठत् तपोधनः।
अन्येषु सर्व्वलोकेषु यथायोग्यमवस्थितिः ॥ ४
ततश्च मानसाः पुत्रा निर्म्मिता ब्रह्मणा पुरा।
ते चोर्द्ध्वरेतसः सर्व्वे पश्चादन्यानृषीन् प्रभुः ॥ ५
ते विरक्ताश्च सञ्जाताः पश्चात् क्रोधमवाप सः।
तेनैव रोदनं चक्रे ततश्चैवाभवज्ज्वरः ॥ ६
रोदनाद्रुद्रनामेति प्रसिद्धो भगवान् भवः।
ब्रह्मन् दुःखं किमुत्पन्नं स्फोटयामि न संशयः ॥ ७
इत्येतद्वचनं श्रुत्वा ब्रह्मा वचनमब्रवीत्।
साधूक्तञ्च त्वया देव सृष्टौ विघ्नोदयो भवेत् ॥ ८
तथा कार्य्यं त्वया नित्यं सृष्टिः स्यादनपायिनी।
इत्येवं वचनं श्रुत्वा लोकानां दुःखहा हरः ॥ ९
वचनञ्चोक्तवांस्तत्र स्रष्टुः प्रियचिकीर्षया।
अद्यैव करिष्यामि सृष्टिमेतां सनातनीम् ॥ १०
इत्युक्त्वा ब्रह्मणे रुद्रो गुणरूपी हरः स्वयम्।
जगाम सगणो देवः कैलासमचलं ततः ॥ ११

ततो ब्रह्मा ऋषीन् सप्त भृग्वादीन् निर्म्ममे तदा।
उत्सङ्गान्नारदं श्रेष्ठं छायायां कर्द्दमं पुनः ॥ १२
अङ्गुष्ठाच्च तथा दक्षमेवं दश क्रमेण तु।
भृगोश्चैव तथा जातो मरीचिर्नाम वै ऋषिः ॥ १३
ततश्च कश्यपो जज्ञे तेनेदं पूरितं जगत्।
षष्टिकन्यास्तथा जाता दक्षाच्चैव महात्मनः ॥ १४
त्रयोदश तथा कन्याः कश्यपाय महात्मने।
दत्ता दक्षेण ताः कन्या विधिवदृषिसत्तमाः ॥ १५
ततः प्रसूतिभिर्व्याप्तं तासाञ्च कश्यपस्य च।
देवाश्च दनुजाश्चैव दैत्याश्च विविधास्तथा ॥ १६
वृक्षाश्च पक्षिणश्चैव सर्पपर्व्वतवीरुधः।
प्रसूता दक्षकन्याभिर्व्याप्तमेतच्चराचरम् ॥ १७
पातालतलमारभ्य सत्यलोकावधि ध्रुवम्।
ब्रह्माण्डं सकलं व्याप्तं शून्यं नैव कदाचन ॥ १८
सती नाम तथा कन्या रुद्राय च महात्मने।
दत्ता दक्षेण सा कन्या भवानीति प्रकीर्त्तिता ॥ १९
ब्रह्मा विष्णुश्च रुद्रश्च गुणास्त्रय उदाहृताः।
विष्णुः सत्त्वं रजो ब्रह्मा तमो रुद्र उदाहृतः ॥ २०
तथा गुणमयी देवी लक्ष्मीः सत्त्वमुपाश्रिता।
राजसी च तथा ब्राह्मी तमोरूपा तु सा सती ॥ २१
गुणरूपा महाकाली या च रुद्रमुपाश्रिता।
पुनश्च पार्व्वती जाता सा शिवं समुपागता ॥ २२
ततो नामान्यनेकानि प्राप सा पर्व्वतात्मजा।
कालिका चण्डिका भद्रा चामुण्डा विजया जया ॥ २३
गुणमय्यस्तथा देव्यो देवा गुणमयास्त्रयः।
मिलित्वा त्रिविधां सृष्टिं चक्रुस्ते कार्य्यमुत्तमम् ॥ २४
इत्येवं वचनं श्रुत्वा ऋषयस्तेऽमलाशयाः।
नारदाद्याश्च योगीन्द्रा हर्षनिर्भरमानसाः ॥ २५
शृण्वानाः परमां दिव्यां कथाञ्चैव पुरातनीम्।
अप्राप्य तृप्तिं ते सर्व्वे पप्रच्छुः पुनरेव तम् ॥ २६

ऋषय ऊचुः।

सूत सर्व्वं हि जानासि प्रतापाच्च गुरोरिह।
तन्मुखाम्भोजसंवृत्तं पीत्वा हरकथामृतम् ॥ २७
न तृप्यामः पुनस्ताञ्च पातुमिच्छामहे वयम्।
प्रथमं दक्षपुत्री च पश्चाच्च पर्व्वतात्मजा ॥ २८
कथमेकशरीरेण द्वयोः पुत्री प्रजायते।

कथं वै पार्व्वती पुण्या पुनः शिवमुपागता ॥ २९
एतत् सर्व्वं तथान्यच्च स त्वं कथितुमर्हसि।
तदुक्तन्तु तदा श्रुत्वा सूतो वचनमब्रवीत् ॥ ३०
इति श्रीशैवे महापुराणे ज्ञानसंहितायां सृष्टि-
निरूपणं नाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः।

सूत उवाच।

श्रूयतां ऋषयः श्रेष्ठाः कथयामि शुभां कथाम्।
यच्छ्रुत्वा सफलं जन्म भविष्यति न संशयः ॥ १
पूर्व्वं दक्षस्य रुद्रस्य स्पर्द्धा जाता महात्मनोः।
ततो दक्षः स्वयं यज्ञं कृतवान् देवसन्निधौ ॥ २
अनाहूय तदा रुद्रं पूर्व्वज्ञ्चर्षिसमन्वितः।
ततो देवी सतीनाम्नी पित्रानाकारिता यदा ॥ ३
तदा गता पुनस्तत्र नाहूतापि पितुर्गृहे।
शाप्यावज्ञा तु सा तत्र देहत्यागमथाकरोत् ॥ ४
यज्ञध्वंसे तथा जाते देवलोकेऽथ जीवति।
रुद्रस्यानुचरैस्तत्र वीरभद्रादिकैः कृते ॥ ५
रुद्रे क्रुद्धे कथं लोके सुखं भवति सत्तमाः।
पश्चाद्रुद्रः प्रसन्नोऽभूद्देवानां स्तवनादपि ॥ ६
पूर्व्ववच्च कृतं तेन कृपालुत्वान्महात्मना।
रुद्रश्च पूजितस्तत्र देवैर्देववरस्तदा ॥ ७
सतीदेहसमुत्पन्ना ज्वाला लोकभयावहा।
पतिता पर्व्वते तत्र पूजिता सुखदायिनी ॥ ८
ज्वालामुखीति सा प्रोक्ता सर्व्वकामफलप्रदा।
इदानीं पूज्यते लोकैः सर्व्वकामफलाप्तये ॥ ९
सा देवी शैलराजस्य पत्नी मेनेति विश्रुता।
पितॄणां मानसी कन्या तस्यां जन्म समादधे ॥ १०
ततश्च पार्व्वती नाम प्रसिद्धमभवत् तदा ॥
सा पुनः शिवमाराध्य भर्त्तारं शिवमाश्रिता।
भजतां सर्व्वलोकानां फलं यच्छत्यनेकशः ॥ ११
एतत् सर्व्वं समाख्यातं यत् पृष्टोऽहं पुरातनम्।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥ १२
इति श्रुत्वा वचस्तस्य नैमिषारण्यवासिनः।
पप्रच्छुर्ऋषयः श्रेष्ठाः कथां पापप्रणाशिनीम् ॥ १३

ऋषय ऊचुः।

सूत सूत महाभाग कथां पापप्रणाशिनीम्।
श्रुत्वा तु त्वन्मुखादेव न तृप्ताः स्मो वयं प्रभो॥
पुनः कथय तत् सर्व्वं शिवस्याराधनक्रमम्।
यस्य यस्य विधिः प्रोक्तो येनैवाराधितः शिवः॥
प्रसन्नेन शिवेनैव कस्मै दत्तं फलन्तु यत्।
पार्व्वत्याश्च तपश्चैव विवाहश्च तथानघ ॥ १६
त्रिपुरस्य वधश्चैव ज्योतिर्लिङ्गसमुद्भवः।
ज्योतिर्लिङ्गानि कतिधा किं तेषां दर्शने फलं
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैर्वा शम्भुपूजनम्।
कथं कार्य्यं तथा ब्रूहि यथा व्यासमुखाच्छ्रुतम्
तच्छ्रुत्वा वचनं तेषां वचनं श्रुतिसम्मतम्।
उवाच सकलं तत्र प्रश्नस्यानुक्रमेण तु ॥ १९

सूत उवाच।

सम्यक् पृष्टं भवद्भिश्च यद्रहस्यं मुनीश्वराः।
तदहं कथयाम्यद्य यथाबुद्धि यथाश्रुतम् ॥ २०
भवद्भिः पृच्छ्यते यद्वत् तथा व्यासेन वै पुरा।
पृष्टं सनत्कुमाराय तच्छ्रुतं ह्युपमन्युना ॥ २१
ततो व्यासेन वै श्रुत्वा शिवपूजादिकञ्च यत्।
मह्यञ्च पाठितं तेन लोकानां हितकाम्यया॥
यच्छ्रुतञ्चैव कृष्णेन ह्युपमन्योर्महात्मनः।
तदहं कथयिष्यामि श्रूयतामृषिसत्तमाः ॥ २३
वक्ष्यामि शृणु संक्षेपाल्लिङ्गार्च्चनविधिक्रमम्।
वक्तुं वर्षशतेनापि न शक्यं विस्तरेण तु ॥ २४
एवञ्च शाङ्करं रूपं सुखमीप्सुः सनातनम्।
पूजयेत् परया भक्त्या सर्व्वकामवराप्तये ॥ २५
दारिद्र्यं रोगदुःखञ्च सङ्कटं शत्रुसम्भवम्।
पापं चतुर्व्विधं तावद्यावन्नार्च्चयते शिवम्॥
सम्पूजिते शिवे देवे सर्व्वं दुःखं विलीयते॥
यो वै मानुषमाश्रित्य सुखसन्तानकामुकः।
तेन पूज्यो महादेवः सर्व्वकामार्थसाधकः॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च विधिवत्
प्रातःकाले समुत्थाय मुहूर्त्ते ब्राह्मसंज्ञिते ॥ २८
विष्णोश्च स्मरणं कृत्वा गुरोश्चैवाथवा पुनः।
तीर्थानां स्मरणं कृत्वा ध्यानञ्चैव हरेरिति॥
मेघश्याम चतुर्बाहो भक्तानामभयप्रद।

ते रूपं सुन्दरं सर्व्वं हृदि वसतु नित्यशः ॥ ३१
ततः स्तोत्रं शुभं नाम गृह्णीयाद्विधिपूर्व्वकम् ।
तत्रोत्थाय मलोत्सर्गं दक्षिणस्यां दिशि क्रमात् ॥ ३२
एकान्ते तु तदा कृत्वा मलोत्सर्गविधिं पुनः ।
शुद्धां मृदं समादाय पञ्चवारं विशुद्धये ॥ ३३
क्षत्रियश्च चतुर्व्वारं वैश्यो वारत्रयं तथा ।
शूद्रश्चैव द्विवारञ्च मृदान्तु ग्रहणं क्रमात् ॥ ३४
हस्तौ पादौ च प्रक्षाल्य पूर्व्ववन्मृदमाहरेत् ।
स्त्रीणान्तु शूद्रवत् कार्य्यं मृदादिग्रहणं तथा ॥ ३५
दन्तकाष्ठं तथा कुर्य्याद्द्वादशाङ्गुलमानतः ।
एकादशाङ्गुलं राजा तथा वैश्यो दशाङ्गुलम् ॥ ३६
शूद्रो नवाङ्गुलं कुर्य्यादिति मानमिदं स्मृतम् ।
कालदोषं विचार्य्यैवमनूच्छिष्टं विवर्ज्जयेत् ॥ ३७
स्नानन्तु विधिवत् कार्य्यं तीर्थादिषु क्रमेण च ।
देशकालाविरोधेन स्नानं कार्य्यं समन्त्रकम् ॥ ३८
आचम्य प्रथमं तत्र धौतवस्त्रन्तु धारयेत् ।
एकान्ते तु स्थले स्थित्वा सन्ध्याविधिमथाचरेत् ॥३९
यथायोग्यं विधिं कृत्वा पूजाविधिमथाचरेत् ॥ ४०
मनस्तु सुस्थिरं कृत्वा पूजागारं प्रविश्य च ।
पूजाद्रव्यं समास्थाय क्रमेण पूजयेद्धरम् ॥ ४१
प्रथमञ्च गणाधीशं द्वारपालं ततः परम् ।
दिक्पालास्तु ततः पूज्याः पश्चात् पीठं प्रकल्पयेत्॥४२
अथवाष्टदलं कृत्वा पूजाद्रव्यसमीपतः ।
उपविश्य ततस्तत्र उपलच्य शिवं प्रभुम् ॥ ४३
आचामत्रितयं कृत्वा प्रक्षाल्य च पुनः पुनः ।
प्राणायामत्रयं कृत्वा ध्यायेद्देवञ्च त्र्यम्बकम् ॥ ४४
पञ्चवक्त्रं दशभुजं शुद्धस्फटिकसन्निभम् ।
सर्व्वाभरणसंयुक्तं व्याघ्रचर्म्मोत्तरीयकम् ॥ ४५
तस्य सारूप्यमाश्रित्य दहेत् पापं नरस्तदा ।
शैवीं तनुं समास्थाय पूजयेत् परमेश्वरम् ॥ ४६
देहशुद्धिं ततः कृत्वा मूलमन्त्र न्यसेत् क्रमात् ।
सर्व्वत्र प्रणवेनैव षड़ङ्गन्यासमाचरेत् ।
कृत्वाद्यादिप्रयोगञ्च ततः पूजां समारभेत् ॥ ४७
तथाचाचमनीयार्थं कल्पितं पात्रमेव च ।
स्थापयेद्विधिवद्धीमान् नवकुम्भान् यथाविधि ॥४८
दर्भैराच्छाद्य तानेव संस्थाप्याभ्युक्ष्य वारिणा ।
तेषु तेषु च सर्व्वेषु क्षिपेत् तोयं सुशीतलम् ॥ ४९
प्रणवेन क्षिपेत् तेषु द्रव्याण्यालोक्य बुद्धिमान् ।
उशीरं चन्दनञ्चैव पाद्ये तु परिकल्पयेत् ॥ ५०
जातिकङ्कोलकर्पूरं वट्टमूलतमालकम् ।
चूर्णयित्वा यथान्यायं क्षिपेदाचमनीयके ॥ ५१
एलां सर्व्वेषु पात्रेषु दापयेच्चन्दनं तथा ।
पार्श्वतो देवदेवस्य नन्दीशन्तु समर्च्चयेत् ॥ ५२
गन्धैः पुष्पैस्तथा धूपैर्व्विविधैः पूजयेच्छिवम् ।
लिङ्गशुद्धिं ततः कृत्वा मुदा युक्तो नरस्तदा ॥ ५३
जप्त्वा सर्व्वाणि मन्त्राणि प्रणवादिनमोऽन्तकम् ।
कल्पयेदासनं पश्चात् पद्माख्यं प्रणवेन तु ॥ ५४
तस्य पूर्व्वं दलं साक्षादणिमामयमक्षरम् ।
लघिमा दक्षिणञ्चैव महिमा पश्चिमं तथा ॥ ५५
प्राप्तिश्चैवोत्तरं पत्रं प्राकाम्यं पावकस्य च ।
ईशित्वं नैर्ऋतं पत्रं वशित्वं वायुगोचरे ॥ ५६
सर्व्वज्ञत्वं तथैशान्यां कर्णिका सोम उच्यते ।
सोमस्याधस्तथा सूर्य्यस्तस्याधः पावकः स्वयम् ॥ ५७
धर्म्मादयोऽपि दिक्ष्वन्ते अनन्तं कल्पयेत् क्रमात् ।
अव्यक्तादिचतुर्द्दिक्षु सोमस्यान्ते गुणत्रयम् ॥ ५८
सद्योजातं प्रपद्यामीत्यावाह्य परमेश्वरम् ।
वामदेवेन मन्त्रेण तिष्ठेच्चैवासनोपरि ॥ ५९
सान्निध्यं रुद्रगायत्र्या अघोरेण निरुध्य च ।
ईशानः सर्व्वविद्यानामिति मन्त्रेण पूजयेत् ॥ ६०
पाद्यमाचमनीयञ्च विभोश्चार्घ्यं प्रदापयेत् ।
स्नापयेद्विधिना रुद्रं गन्धचन्दनवारिणा ॥ ६१
पञ्चगव्यविधानेन गृह्यपात्रेऽभिमन्त्र्य च ।
प्रणवेनैव गव्यैस्तु स्नापयेत् पयसा च तम् ॥ ६२
दध्नाथ मधुना चैव तथा चेक्षुरसेन च ।
घृतेन च तथा पूज्यं सर्व्वकामहितावहम् ॥ ६३
पुण्यैर्द्रव्यैर्महादेवं प्रणवेनाभिषिञ्चयेत् ।
जलभाण्डैः पवित्रैस्तु मन्त्रैस्तोयं क्षिपेत् ततः ॥ ६४
शुद्धीकृत्य यथान्यायं सितवस्त्रेण साधकः ।
तावद्दूरं न कर्त्तव्यं यावच्च चन्दनं क्षिपेत् ॥ ६५
तण्डुलैः सुन्दरैस्तत्र पूजयेच्छङ्करं मुदा ।
कुशापामार्ग-कर्पूर-जाति-चम्पक-पाटलैः ॥ ६६
करवीरैः सितैश्चैव मल्लिकाकमलोत्पलैः ।

अपूर्व्वपुष्पैर्विविधैश्चन्दनाद्यैश्च तज्जलम् ॥ ६७
जलेन जलधाराञ्च कल्पयेत् परमेश्वरे।
भावैश्च विविधैर्देवं स्नापयेच्च महेश्वरम् ॥ ६८
मन्त्रपूर्व्वञ्च कर्त्तव्या पूजा सर्व्वफलप्रदा।
मन्त्राणि ते प्रवक्ष्यामि शृणु सर्व्वार्थसिद्धये।
ऐर्लिङ्गं सकृदप्येवं स्नापयन्ति च मानवाः ॥ ६९

इति श्रीशैवे महापुराणे ज्ञानसंहितायां शिवपूजाविधानं नाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः।

सूत उवाच।

पावमानेन मन्त्रेण तथा वाङ्मीयकेन च।
रुद्रेण नीलरुद्रेण श्रीसूक्तेन शुभेन च ॥ १
रजनीसूक्तकेनैव चमकेन शुभेन च।
श्रीतारेणाथ शिरसा शुभेनाथर्व्वणेन च ॥ २
शान्त्या वाथ पुनः शान्त्या भारुण्डेनारुणेन च।
अथ ज्येष्ठेन साम्ना वा तदा देवव्रतेन च ॥ ३
रथन्तरेण पुष्पेण सूक्तेन पुरुषेण तु।
मृत्युञ्जयेन मन्त्रेण पञ्चाक्षरेण वा पुनः ॥ ४
जलधारा सहस्रेण शतमेकोत्तरेण वा।
कर्त्तव्या वेदमार्गेण नामभिर्वाऽथ वा पुनः ॥ ५
ततश्चन्दनपुष्पादि रोपणीयं शिवोपरि।
दापयेत् प्रणवेनैव मुखवासादिकानि वै ॥ ६
ततः स्फटिकसङ्काशं देवं निष्कलमक्षरम्।
कारणं सर्व्वलोकानां सर्व्वलोकमयं परम् ॥ ७
ब्रह्मेन्द्रविष्णुरुद्राद्यैरपि देवैरगोचरम्।
वेदविद्भिर्हि वेदान्ते त्वगोचरमिति स्मृतम् ॥ ८
आदिमध्यान्तरहितं भेषजं सर्व्वरोगिणाम्।
शिवतत्त्वमिति ख्यातं शिवलिङ्गे व्यवस्थितम् ॥ ९
प्रणवेनैव मन्त्रेण पूजयेल्लिङ्गमूर्द्धनि।
धूपैर्दीपैश्च ताम्बूलैरारात्रिकविधानतः ॥ १०
नमस्कारैः स्तवैश्चान्यैर्मन्त्रैर्नानाविधैरपि।
स्तोत्रं जपञ्च विधिना नमस्कारं प्रदक्षिणम् ॥ ११
अर्घं दत्त्वा तु पुष्पाणि पादयोस्तु विकीर्य्य च।
प्रणिपत्य च देवेशमात्मनाराधयेच्छिवम् ॥ १२
हस्ते पुष्पं गृहीत्वा च समुत्थाय कृताञ्जलिः।
प्रार्थयेत् पुनरीशानं मन्त्रेणानेन वै शिवम् ॥ १३
अज्ञानाद्यदि वा ज्ञानाज्जपपूजादिकं मया।
कृतं तदस्तु सफलं कृपया तव शङ्कर ॥ १४
पठित्वैवन्तु तत् पुष्पं शिवोपरि न्यसेत् तदा।
स्वस्त्ययनं ततः कृत्वा ह्याशिषो विविधास्तदा।
मार्ज्जनन्तु ततः कार्य्यं शिवस्योपरि वै पुनः।
नमस्कारं ततः क्षान्तिं पुनरागमनाय च ॥ १६
अघोच्चारणमुच्चार्य्य नमस्कारं प्रकल्पय च।
प्रार्थयेच्च पुनस्तत्र सर्व्वभावसमन्वितः ॥ १७
शिवे भक्तिः शिवे भक्तिः शिवे भक्तिर्भवे भवे।
अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ १८
इति सम्प्रार्थ्य देवेशं सर्व्वसिद्धिप्रदायकम्।
पूजयेत् परया भक्त्या गल्लनादैर्विशेषतः ॥ १९
नमस्कारं ततः कृत्वा परिवारगणैः सह।
प्रहर्षमतुलं लब्ध्वा कार्य्यं कुर्य्याद्यथासुखम् ॥ २०
एवं यः पूजयेन्नित्यं शिवभक्तिपरायणः।
तस्यैव सकला सिद्धिर्जायते तु पदे पदे ॥ २१
षण्मासाज्जायते सिद्धिर्मनोऽभीष्टफलं ध्रुवम्।
रोगं दुःखञ्च शोकञ्च उद्वेगं कृत्रिमं तथा ॥ २२
कौटिल्यञ्च गरञ्चैव यद्यद्दुःखमुपस्थितम्।
तद्दुःखं नाशयत्येव शिवः शिवकरः परः ॥ २३
कल्याणं जायते तस्य शुक्लपक्षे यथा शशी।
वर्द्धन्ते तद्गुणास्तत्र शिवस्य पूजनाद्ध्रुवम् ॥ २४
एवन्तु ते मया प्रोक्तं श्रुतं व्यासमुखादिह ॥ २५
अतः परं प्रवक्ष्यामि कथां पापप्रणाशिनीम्।
या पृच्छ्यते भवद्भिश्च तामहं विधिपूर्व्वकम् ॥ २६

इति श्रीशैवे महापुराणे ज्ञानसंहितायां शिवपूजाविधिर्नामाष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः।

ऋषय ऊचुः।

व्यासशिष्य महाभाग सम्यगुक्तं त्वयानघ।
त्रिपुरस्य जयं ब्रूहि कथं वै त्रिपुरो हतः ॥ १

किं रूपं त्रिपुरस्येह कुत्र वा विकृतिं गतः।
किं सैन्यं तस्य दुष्टस्य शिवस्य च महद्बलम् ॥ २
एतत् सर्व्वं प्रयत्नेन अन्यद्वा विविधं पुनः।
कथनीयं त्वया सम्यग्धन्यस्त्वं बुद्धिमानसि ॥ ३
एवं वचस्तदा श्रुत्वा सूतश्चैवाब्रवीत् पुनः ॥ ४

सूत उवाच।

साधु पृष्टं महाभागा लोकानां हितकाम्यया।
यच्छ्रुत्वा सर्व्वलोकानां दुःखहानिर्भविष्यति ॥ ५
तारपुत्रो महामायी मायिनामपि मोहकः।
सर्व्वदेवजयं कर्त्तुं तपस्तेपे सुदारुणम् ॥ ६
मधोर्वनमुपाश्रित्य गुर्व्वाज्ञापरिपालकः।
ऊर्द्ध्ववाहुश्चैकपादो रविं पश्यन् स चक्षुषा ॥ ७
शतवर्षं तथा तप्त्वा शतमङ्गुष्ठकेन च।
शतमेकं जलेनैव शतमेकन्तु वायुभुक् ॥ ८
...मेकं जले तिष्ठन् शतमेकञ्च स्थण्डिले।
...मेकं तथा चाग्नौ शतमेकमधोमुखः ॥ ९
...मेकन्तु हस्तस्य तलेन च भुवं स्पृशन्।
...मेकन्तु वृक्षाणां शाखामालम्ब्य वै मुने ॥ १०
अधोमुखन्तु वर्षाणां शतमेकं गतं तदा।
एवं कष्टतरं तप्तं शृण्वतामपि दुःसहम् ॥ ११
तस्यैव शिरसस्तत्र तेजश्च निःसृतं महत्।
तेनैव देवलोकास्ते दग्धप्राया बभूविरे ॥ १२
इन्द्रश्च भयमापेदे स्वपदं कर्षयिष्यति।
अत्यन्तदुःखमापन्नाः सर्व्वे देवास्तदा विदुः ॥ १३
अकाण्डे चैव ब्रह्माण्डं संहरिष्यति वै प्रभुः।
इति संशयमापन्ना निश्चयं नोपलेभिरे ॥ १४
एतस्मिन् समये ते वै ज्ञातवन्तोऽत्र कारणम्।
ब्रह्माणञ्च समुद्दिश्य तपस्तप्यति दारुणम् ॥ १५
इति निश्चयमापन्ना देवाश्चैव परस्परम्।
यदि ब्रह्मा वरं ह्यस्य न दास्यति सुदुष्करम्।
तथापि सर्व्वलोकानां नाशश्चैव भविष्यति ॥ १६
सर्व्वथा दुःखमुत्पन्नं यदि नैव प्रदास्यति।
दास्यति वा वरं तस्मै दुःखं वै सर्व्वथा ध्रुवम् ॥ १७
यदि न दीयते ह्यस्मै वरं दुःखहरं नृणाम्।
तथेदानीञ्च लोकानां नाशो भवितुमर्हति ॥ १८
यदि दत्तो वरस्तस्मै काले नाशो भविष्यति।
एतस्माच्च वरं तस्य दीयते नात्र संशयः ॥ १९
इति कृत्वा मतिं देवा ब्रह्माणं समुपस्थिताः।
नमस्कृत्य स्थितास्तत्र तस्मै सर्व्वं न्यवेदयन् ॥ २०
ब्रह्मा सर्व्वं सुनिश्चित्य देवाज्ञापरिसाधकः।
वरं दातुं तदा तत्र जगाम हंसवाहनः ॥ २१
यत्रैष तारको नाम तपस्तप्यति दारुणम्।
उवाच वचनं तस्मै वरं ब्रूहि यथेप्सितम्।
तपस्तप्तं त्वया घोरं नादेयं विद्यते तव ॥ २२
इत्येवन्तु तदा श्रुत्वा तारकाख्यो महासुरः।
ब्रह्माणं प्रणिपत्यैवं वरं वव्रे सुदारुणम् ॥ २३

दैत्य उवाच।

त्वयि प्रसन्ने वरदे किमसाध्यं भवेन्मम।
यदि प्रसन्नो देवेश यदि देयो वरो मम ॥ २४
वरद्वयं तदा देयं श्रूयताञ्च पितामह।
त्वया च निर्म्मिते लोके मत्तुल्यो बलवान् नहि ॥ २५
शिववीर्य्यसमुत्पन्नः पुत्त्रः सेनापतिर्यदा।
भूत्वा शस्त्रं क्षिपेन्मह्यं तदा मे मरणं भवेत् ॥ २६
इत्युक्ते च तदा तेन ब्रह्मा लोकपितामहः।
वरञ्च तादृशं दत्त्वा देवानुज्ञापरायणः।
जगाम भवनं स्वीयं दाहः शान्तिमुपागतः ॥ २७
दैत्योऽपि तपसस्तस्माद्विरराम महामुने।
वरं लब्ध्वा शुभं तत्र शोणिताख्यं पुरं गतः ॥ २८
इतस्ततश्च ते दैत्या मिलितास्तमथाब्रुवन्।
राजा भव त्वमस्माकं त्रिलोक्यां तारकासुर ॥ २९
अभिषिक्तो हि ते राज्ये दैत्याधीशोऽभवत् पुरा।
आज्ञां प्रवर्त्तयामास पृथिव्यां नान्यशासनम् ॥ ३०
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ये विजातयः।
सर्व्वे वै पीड़ितास्तेन तारकेण दुरात्मना ॥ ३१
देवाश्च दानवाश्चान्ये यक्षाः किम्पुरुषास्तदा।
पीड़िताः सर्व्व एवैते तेभ्यो रत्नान्युपाददे ॥ ३२
इन्द्रादिभिश्च दिक्पालैः स्वीयं रत्नं समर्पितम्।
इन्द्रेणोच्चैःश्रवास्तस्मै धर्म्मेण रत्नदण्डकम् ॥ ३३
कुबेरेण गदा तस्मै निधयो नव एव च।
वरुणेन हयाः शुभ्रा ऋषिभिः कामधुक् तथा ॥ ३४
यत्र यत्र शुभं दृष्टं तत्तदानीतवांस्तदा।
समुद्रश्च तथा रत्नान्यदात् तस्मै पुरा मुने ॥ ३५

सूर्य्यश्च तप्यते तावद्यावद्दुःखं न जायते ।
चन्द्रस्तत्र सदा दृश्यो वायुः सर्व्वानुकूलवान् ॥ ३६
देवानाञ्चैव यद्धव्यं पितॄणां कव्यमेव च ।
तत् सर्व्वं समुपादत्तमसुरेण बलीयसा ॥ ३७
त्रैलोक्यञ्चैव तत् सर्व्वं तारकाज्ञापरायणम् ।
ते देवाश्च सदा तत्र सेवामार्गपरायणाः ॥ ३८
ऋषयश्च तदा सर्व्वे तस्याज्ञापरिपालकाः ।
यक्षाः किम्पुरुषाश्चान्ये किं पुनर्मानुषा इमे ॥ ३९
देवोद्यानानि सर्व्वाणि तीर्थान्यपि महामुने ।
आनीतानि गृहे तेन न किञ्चिदवशेषितम् ॥ ४०
एवं वर्षाण्यनेकानि गतानि पीड़ितास्तदा ।
सर्व्वे देवा मिलित्वा च ब्रह्माणं शरणं गताः ॥ ४१

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
तारकोपाख्याने देवगमनं नाम
नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ।

सूत उवाच ।

ते सर्व्वे च तदा गत्वा ब्रह्माणं जगतः प्रभुम् ।
नमस्कृत्य स्थितास्तत्र नम्रीभूता ऋषीश्वराः ॥ १
तान् विषण्णांस्तदा तत्र दृष्ट्वोवाच पितामहः ।
यूयमत्र कथं प्राप्ताः किं दुःखं भवतां पुनः ।
तदहं स्फोटयाम्यद्य साध्यं यदि भवेदिह ॥ २
इत्येतद्वचनं श्रुत्वा ब्रह्माणं परमर्षयः ।
देवाः सानुचराः सर्व्वे वचनञ्चेदमब्रुवन् ॥ ३

देवा ऊचुः ।

भवतः किमविज्ञातं दुःखञ्च यदुपस्थितम् ।
तारकाच्चैव यद्दुःखं सम्भूतं परमेश्वर ॥ ४
तद्दुःखं नाशय त्वञ्च वयं सर्व्वे समागताः ।
इत्येवं वचनं श्रुत्वा ब्रह्मा वचनमाददे ॥ ५

ब्रह्मोवाच ।

मत्तो नैव वधो योग्यो मत्तो वृद्धिमुपागतः ।
उपायं वो दिशाम्यद्य श्रूयतामृषिसत्तमाः ॥ ६
शिववीर्य्यसमुत्पन्नः पुत्रश्चैनं हनिष्यति ।
तच्चैव दुर्लभं देवा विचार्य्यैवं निरन्तरम् ॥ ७
बुद्धिरेका समुत्पन्ना तथा च क्रियते यदि ।
हिमवच्छिखरे रम्ये शम्भुस्तप्यति नित्यशः ॥ ८
सखीभ्यां सहिता तत्र परिचर्य्यां शिवस्य ह ।
वचनान्नारदस्यैवमुमा पित्रानुशासिता ॥ ९
करोतीह ऋषिश्रेष्ठास्तस्याः संयोगतां व्रजेत् ।
यदा शिवस्तदा तत्र तस्यां वीर्य्यं समावपेत् ॥ १
ततश्चैवाथ वः कार्य्यं भविष्यति न चान्यथा ।
शिववीर्य्यं समाधातुं क्षमा नान्यापरा शिवा ॥
यथा वीर्य्यं मदीयं वै जलरूपधरः शिवः ।
समाधातुं समर्थोऽस्ति तस्मादन्यो न वै सुतः ॥
तथोपायं करिष्यध्वं तदा सिद्धिर्भविष्यति ।
इत्येवं वचनं तस्य श्रुत्वा ते सर्व्व एव हि ॥ १३
नमस्कृत्य सुरास्तत्र विचार्य्य तु परस्परम् ।
ते सर्व्वे तु मरुत्वन्तं सर्व्वं कार्य्यं न्यवेदयन् ॥ १
यथा यथा शिवायैव (क) रुचिरुत्पद्यते तथा ।
मघवंस्त्वया च कर्त्तव्यं ब्रह्मोक्तं सर्व्वमेव तत् ॥
इत्येवं सकलं देवं निवेद्य विधिवत् पुनः ।
जग्मुस्ते मुनयो देवाः स्वं स्वं स्थानं मुदान्विताः ॥
गतेषु तेषु देवेन्द्रः सस्मार मकरध्वजम् ।
आगतस्तत्क्षणादेव रत्या युक्तः स्वयं प्रभुः ॥ १
प्रणामञ्च ततः कृत्वा स्थित्वा प्राञ्जलिरब्रवीत् ।
किं कार्य्यं ते समुत्पन्नं स्मृतोऽहं केन हेतुना ॥ १
तत् त्वं कथय देवेश तत् कर्त्तुं समुपागतः ।
इत्युक्त्वा तु महेन्द्राय स्थितस्तूष्णीं तया सह ॥ १
इन्द्रोऽपि वचनं श्रुत्वा कन्दर्पस्य महात्मनः ।
उवाच वचनं तं वै युक्तं युक्तमिति स्तुवन् ॥ २०

इन्द्र उवाच ।

त्वया साधु समारब्धं यत् ते कार्य्यमुपस्थितम् ।
तत् कर्त्तुमुद्यतोऽसि त्वं धन्यस्त्वं मकरध्वज ॥ २१
प्रस्तुतं शृणु मद्वाक्यं कथयामि तवानघ ॥ २२
मदीयञ्चैव यत् कार्य्यं तत् त्वदीयं न चान्यथा ।
मित्राणि मम सन्त्येव त्वत्तुल्यानि कदा च न ॥ २
जयार्थं मम देवेन निर्म्मितं वज्रमुत्तमम् ।
अन्यदस्त्रं भवानेव देवेन निर्म्मितः पुरा ॥ २४
वज्रं हिंसात्मकं विद्धि भवान् सुखकरं मतम् ।

(क) शिवायां वै इति पाठान्तरम् ।

द्वयोरपि भवानद्य श्रेष्ठः सर्व्वेषु सत्तम ॥ २५
वचन्तु निष्फलं स्यादै त्वन्तु नैव कदापि हि ।
यतो हितं प्रजायेत ततः को नु प्रियः परः ॥ २६
तस्मान्मित्रवरस्त्वञ्च कार्य्यं कर्त्तुमिहार्हसि ॥ २७
मम दुःखं समुत्पन्नमसाध्यं बहु कालिकम् ।
केनापि नैव तच्छक्यं दूरीकर्त्तुं त्वया विना ॥ २८
ज्ञातुश्चैव परीक्षा वै दुर्भिक्षे ज्ञायते नृभिः ।
शूरस्यैव तु संग्रामे मित्रस्य च तथापदि ॥ २९
अशक्तौ च तथा स्त्रीणां विपत्तौ सुकुलस्य च ।
स्नेहस्य च परोक्षेण सत्यस्य सङ्कटे गते ।
परीक्षा तु त्वदीयाद्य मित्रवर्य्य भविष्यति ॥ ३०
न केवलं मदीयञ्च कार्य्यं देवसुखावहम् ।
यच्च याचितारः स्मः कार्य्यं कार्य्यं त्वया शुभम् ॥ ३१
इत्येवं मघवद्वाक्यं श्रुत्वा तु मकरध्वजः ।
…च प्रेमगम्भीरं गद्गद्स्मितपूर्व्वकम् ॥ ३२

काम उवाच ।

…र्थं भाषसे देव नान्तरं ह्यावयोरिह ।
…कृत् कृत्रिमो लोके दृश्यते कथनेन च ॥ ३३
…नैव च यो ब्रूयात् स किं कार्य्यं करिष्यति ।
…थापि च महाराज कथयामि शृणुष्व तत् ॥ ३४
मुक्तिमार्गं समापन्नं ते शत्रुं पातयाम्यहम् ।
…ते पदं कर्षितुं यो वै तपस्तप्स्यति दारुणम् ॥ ३५
क्षणेन पातयाम्यद्य कटाक्षेण स्त्रियास्तथा ।
देवं वा दानवं वापि ऋषिं वा देवसत्तम ॥ ३६
मानुषाणां न वै सेऽद्य गणना पातने मता ।
…च्चं तिष्ठतु दूरे वै शस्त्राण्यन्यान्यनेकशः ॥ ३७
…कें ते कार्य्यं करिष्यन्ति मयि मित्रे स्थिते प्रभो ।
अन्येषां गणना नास्ति पातयामि हरं यदि ॥ ३८
…वन्तु वचनं तस्य श्रुत्वा हर्षमुपागतः ।
उवाच प्रणयन् वाचं कामं कान्तासुखावहम् ॥ ३९

इन्द्र उवाच ।

यत् कार्य्यं मनसोद्दिष्टं तत् कार्य्यं कथितं त्वया ।
शृणु काम प्रवक्ष्यामि यदर्थं स्मरणं तव ॥ ४०
तारकाख्यो महादैत्यो ब्रह्मणो वरमुत्तमम् ।
सम्प्राप्य पौरुषे लोकान् नष्टधर्म्मा ह्यनेकशः ॥ ४१
दुःखिता देवताः सर्व्वा ऋषयश्च तथामलाः ।
देवानाञ्चायुधान्यत्र विफलान्यभवन् प्रभो ॥ ४२
मरणं नैव तस्येत्थं भविष्यति कदाचन ।
एतस्य मरणं प्रोक्तं शम्भुवीर्य्याद्दुरात्मनः ॥ ४३
एतत् कार्य्यं त्वया साध्यं देवानां परमं सुखम् ।
ममापि च हितं लोके कर्त्तुमर्हसि साम्प्रतम् ॥ ४४
शम्भुश्च गिरिराजे वै तपः परममास्थितः ।
तत्समीपे च सेवार्थं पार्व्वती सखिसंयुता ।
तिष्ठति च महाराज पित्राज्ञया मया श्रुतम् ॥ ४५
यथा तस्यां रुचिस्तस्य शिवस्य परमात्मनः ।
जायते नितरां काम तथा कार्य्यं त्वया ध्रुवम् ॥ ४६
इति कृत्वा कृती स्यास्त्वं दुःखञ्चैव गमिष्यति ।
लोकस्थास्थं प्रतापात् ते भविष्यति न चान्यथा ॥ ४७
इत्युक्तः स तु कामो वै प्रफुल्लमुखपङ्कजः ।
अब्रवीत् तं तदा तत्र हितमुत्पादयन् प्रभुम् ॥ ४८
प्रेम्णा स्निग्धञ्च देवेशं करिष्यामि न संशयः ॥ ४९
इत्युक्त्वा वचनं तस्मै तथेत्योमिति तद्वचः ।
गृहीत्वा शिरसा कामः सदारः सवसन्तकः ॥ ५०
यत्र चैव हरः साक्षात् तपते परमं तपः ।
तत्र गत्वा मधुश्चादौ धर्म्मं विस्तारयन् स्थितः ॥ ५१
वसन्तस्य च ये धर्म्मास्ते धर्म्मास्तद्वने गताः ।
वनानि च प्रफुल्लानि पलाशानाञ्च तद्वने ॥ ५२
पुष्पाणि सहकारेषु अशोकवनिकासु च ।
वकुलेषु च पुष्पाणि भ्रमराकुलितानि च ॥ ५३
तिलकेषु तथैकेषु कोकिलाकलकूजितम् ।
भ्रमराणां तथा शब्दो ह्यनेकोऽभून्महावने ॥ ५४
चन्द्रस्य विशदा ह्यासन् किरणा दूतिका इव ।
मानिनः प्रेरयामासुः काले कामपदार्पितान्(क)॥५५
मारुतश्च सुखश्चात्र ववौ विरहिणां प्रियः ।
वनौकसां तदा तत्र मुनीनां दुःसहो ह्यभूत् ॥ ५६
अचेतनानां तत्रासीत् कामासक्तिः सचेतसाम् ।
अकालिनीं प्रवृत्तिञ्च मधोर्वीक्ष्य हरस्तदा ॥ ५७
आश्चर्य्यं परमं गत्वा तपः परमदुष्करम् ।
तपयामास तत्रैव हरो दुःखहरः परः ॥ ५८
वसन्ते प्रसृते तत्र कामो रतिसमन्वितः ।
चूतं वाणं समाकृष्य स्थितः पार्श्वे तु वामतः ॥ ५९

(क) अकाले कामदर्पितामिति पाठान्तरम् ।

रत्या युक्तं तदा कामं दृष्ट्वा को वा न मोहितः।
एतस्मिन्नन्तरे देवी पुष्पाभरणभूषिता ॥ ६०
सखीभ्यां संयुता तत्र यत्रातिष्ठद्धरः स्वयम्।
जगाम शिवपूजार्थं नीत्वा पुष्पाण्यनेकशः ॥ ६१
पृथिव्यां यादृशं लोके सौन्दर्य्यं विविधं महत्।
तत् सर्व्वञ्चैकस्तस्यां पार्व्वत्यान्तु विनिश्चितम् ॥ ६२
आर्त्तवानि च पुष्पाणि धृतानि च तया तदा।
तत् सौन्दर्य्यं कथं वर्ण्यमपि वर्षशतैरपि ॥ ६३
यदा शिवसमीप तु गता सा पर्व्वतात्मजा।
तदैवाकर्षयच्चापं सज्यं शूलपाणिनः ॥ ६४
तच्चापं पतितं हस्तात् पार्श्वे तस्य च वै तदा।
तया गलोत्पलाच्चा वै दृष्टः शम्भुः स्वयं तदा ॥ ६५
नमस्कृत्य तदा पूजां कृत्वासीत् पुरतः स्थिता।
सा दृष्टा प्रभुणा तत्र सुन्दराङ्गं विवृण्वती ॥ ६६
शिवोऽपि वर्णयामास तदङ्गं सुन्दरं तदा।
किं मुखं किं शशाङ्कश्च किं नेत्रे चोत्पले मते।
भ्रुकुट्यौ धनुषी चैव कन्दर्पस्य महात्मनः ॥ ६७
अधरः किञ्च विम्बञ्च किं नासा शुकचञ्चुका।
किं स्वरः कोकिलालापः किं मध्यञ्चैव वेदिका ६८
किं गतिर्वर्ण्यते ह्यस्याः किं रूपं वर्ण्यते मुहुः।
पुष्पाणि वर्ण्यते किञ्च वस्त्राणि च पुनः पुनः ॥ ६९
लालित्यञ्चैव यत् सृष्टौ तदेकत्र विनिर्म्मितम्।
इत्येवं वर्णयित्वा तु तपसो विरराम ह ॥ ७०
हस्तं वस्त्राञ्चले यावत् तावच्च दूरतो गता।
स्त्रीस्वभावात् तदा सा च लज्जिता सुन्दरी स्वयम् ७१
विवृण्वती तथाङ्गानि पश्यन्ती च मुहुर्म्मुहुः।
एवं चेष्टां तदा दृष्ट्वा शम्भुर्मोहमुपागमत् ॥ ७२
यद्यालिङ्गनमेतस्याः करोमि किं पुनः सुखम्।
क्षणमात्रं विचार्य्यैवं किमहं मोहमागतः ॥ ७३
ईश्वरोऽहं यदीच्छेयं पराङ्गस्पर्शनं मुदा।
तर्हि कोऽन्यतमः क्षुद्रः किं किं नैव करिष्यति ॥ ७४
एवं विवेकमासाद्य पर्य्यङ्कबन्धनं दृढम्।
रचयामास सर्व्वात्मा ईश्वरः किं पतेदिह ॥ ७५

इति श्रीशैवे महापुराणे ज्ञानसंहितायां शिव-
तपोवर्णनं नाम दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः।

ऋषय ऊचुः।

सूत सूत महाभाग किं जातञ्च ततः परम्।
कथय त्वं प्रसादेन कथां पापप्रणाशिनीम् ॥ १

सूत उवाच।

श्रूयतामृषयः श्रेष्ठा यज्जातं तदनन्तरम्।
धैर्य्यस्य च्यवनं दृष्ट्वा विचारे तत्परः शिवः ॥ २
कारणं किञ्चिदुत्पन्नं नान्यथेदं भवेदिति।
दिशो विलोकयामास परितः शङ्करस्तदा ॥ ३
वामभागे स्थितं कामं ददर्श वाणकर्षितम्।
तं दृष्ट्वा क्रोधसंयुक्तः सञ्जातस्तत्क्षणादपि ॥ ४
अहो दुष्टेन कामेन न मुक्तोऽहं दुरासदः।
इत्येवं मनसा क्रुद्धः शिवः परमकोपनः ॥ ५
तृतीयात् तस्य नेत्राद्वै निःससाराग्निरुच्छिखः।
भस्मसात् कृतवांस्तेन मदनं तावदेव हि ॥ ६
यावच्च मरुतां वाचः क्षम्यतां वै प्रभो त्वया।
भवन्ति च ततः पूर्व्वं हतोऽसौ मकरध्वजः ॥ ७
हते तस्मिन् महावीर्य्ये देवा दुःखमुपागताः।
शिवोऽपि तत्क्षणादेव विहायाश्रममन्यतः ॥ ८
वेगदीर्घीकृतात्मा च गिरिराजसुता तदा।
समादाय सखीयुक्ता जगाम मन्दिरं स्वयम् ॥ ९
क्षणमात्रं रतिस्तत्र विसंज्ञा ह्यभवत् तदा।
भर्त्तृजन्यञ्च यद्दुःखं न ज्ञातमृषिसत्तमाः ॥ १०
जातायाञ्चैव संज्ञायां रतिर्दुःखसमन्विता।
विललाप तदा तत्र वनमासीत् सुदुःखितम् ॥ ११
मयूराश्चैव नृत्यं हि वृक्षाश्च चलनं जहुः।
मृगाश्च भ्रमणं ब्रह्मन् भृङ्गा गुञ्जारवं पुनः ॥ १२
पक्षिणश्च तदा विप्रा मूकाश्च मुनयो यथा।
वायवश्चलनं हित्वा वान्ति नैव दिशो दश ॥ १३

रतिरुवाच।

किं करोमि क्व गच्छामि किं कृतं दैवतैरिह।
स्वामिनन्तु समाहूय हा हा प्रिय प्रियेति च ॥ १४
हस्तौ पादौ तथास्फाल्य केशानत्रोटयत् तदा।
ब्रह्मणा सदृशो योगो न सोढ़ो मम कर्म्मणा (क)

(क) न न्यायेन न कर्म्मणेति पाठान्तरम्।

सुखदाता न कोऽप्यस्ति दुःखदाता न कश्चन।
सर्व्वोऽपि स्वकृतं भुङ्क्ते देवाः शोच्या मया वृथा॥ १६
तद्विलापं तदा श्रुत्वा देवाः शिवमुपाययुः।
स्तुत्वा देवं प्रपद्यैवं वचनञ्चेदमब्रुवन्॥ १७

देवा ऊचुः।

भगवन् श्रूयतामेतद्वचनञ्च शुभं प्रभो।
कामेनैव कृतं यच्च न स्वार्थं लोकशङ्कर।
दुष्टेन पीड़ितैर्देवैः कारितं तद्धि नान्यथा॥ १८
रतिस्त्वेकाकिनी देवी विलापं दुःखिता सती।
करोति शङ्कर त्वञ्च प्रसन्नो भव सर्व्वथा॥ १९
संहारं कर्त्तुकामोऽसि देवतैः सह शङ्कर।
दुःखं तस्यास्तथा दृष्ट्वा नष्टप्रायाश्च देवताः॥ २०
तस्मात् त्वया च कर्त्तव्यं रत्याः शोकापनोदनम्।
नमस्कृत्य तदा देवाः स्तुतिं कृत्वा विधानतः।
प्रसन्नं कृतवन्तस्ते शिवं लोकसुखावहम्। २१
प्रसन्नो भगवांस्तत्र वचनञ्चेदमब्रवीत्॥ २२

शिव उवाच।

देवाश्च ऋषयः सर्व्वे यज्जातं नान्यथा भवेत्॥ २३
अनङ्गस्तावद्देव स्याद्यावच्च रुक्मिणीपतिः।
द्वारकायां स्वयं स्थित्वा पुत्त्रानुत्पादयिष्यति॥ २४
ततः कृष्णास्तु रुक्मिण्यां काममुत्पादयिष्यति।
प्रद्युम्नो नाम तस्यैव भविष्यति न संशयः॥ २५
जातमात्रन्तु तं देवाः शम्बरः स हरिष्यति।
हृत्वा प्राप्य समुद्रे वै नगरं स गमिष्यति॥ २६
तावच्च नगरे तस्य रत्या स्थेयं यथासुखम्।
तत्र कामं मिलित्वा तु हत्वा शम्बरमाहवे॥ २७
तदीयञ्चव यद्द्रव्यं नीत्वा स्वनगरं पुनः।
गमिष्यति स्वयं सा वै देवाः सत्यं वचो मम।
इत्युक्त्वान्तर्दधे रुद्रो देवानां स्तुवतां तदा॥ २८
देवास्ताञ्च समासाद्य रुद्रस्य वचनाद्रतिम्।
उक्त्वा वचस्तदीयञ्च स्वं स्वं भुवनमाययुः॥ २९
कामपत्नी यथादिष्टं नगरं सा गता तदा
प्रतीचन्ती च तं कालं रुद्रादिष्टं मुनीश्वराः॥ ३०
देवाश्च दुःखिताः सर्व्वे हा हा किञ्च भविष्यति।
तारकस्य कथं नाशो भविष्यति परस्परम्॥ ३१
पितुर्गृहं तदा गत्वा मिलित्वा मातरं मुदा।
पुनर्जातं तदात्मानं मेने सा पर्व्वतात्मजा ३२
निनिन्द च स्वकं रूपं हा हतास्मि तदाब्रवीत्॥ ३३
स्वपन्ती च पिबन्ती च ह्यश्नन्ती गच्छती तदा।
तिष्ठन्ती च सखीमध्ये धिग्रूपञ्च मदीयकम्॥ ३४
इति सा दुःखिता तत्र स्मरन्ती हरचेष्टितम्।
सुखं न लेभे किञ्चिद्धि शिव शिवेति साब्रवीत्॥ ३५
एतस्मिन् समये तत्र नारदो ह्यगमत् तदा।
पूजितः सुखमासीनः पृष्टः प्राप्तौ शिवस्य च॥ ३६
उक्तवान् वचनं ह्येतत् तपःसाध्यो हरः स्वयम्।
नान्यथा लभ्यते देवि देवैर्ब्रह्मादिकैरपि॥ ३७
इत्येवं वचनं तस्यै नारदो भगवत्प्रियः।
जगाम स हरेर्नाम गृणन् नारायणेति च॥ ३८

इति श्रीशैवे महापुराणे ज्ञानसंहितायां पार्व्वतीपरावर्त्तनं नामैकादशोऽध्यायः॥ ११॥

द्वादशोऽध्यायः।

सूत उवाच।

पार्व्वती च तदा श्रुत्वा वचनं नारदस्य च।
तपःसाध्यं हरं मेने तपोऽर्थं मन आदधे॥ १
मातरं पितरञ्चैव सखीभ्यां पर्य्यपृच्छत।
लज्जमाना स्वयं वक्तुं पार्व्वतीविनयान्विता॥ २

सख्यावूचतुः।

हिमवन् श्रूयतां पुत्र्या वचनं कथ्यतेऽधुना।
साफल्यञ्चैव देहस्य रूपस्य च तथा पुनः॥ ३
भवतश्च कुलस्यास्य साफल्यं कर्त्तुमिच्छति।
तपसाराधनीयोऽसौ नान्यथा वश्यतां व्रजेत्॥ ४
तस्माच्च पर्व्वतश्रेष्ठ देयाज्ञा भवताधुना।
इत्येवञ्च तदा पृष्टो गिरिराजोऽब्रवीदिदम्॥ ५

हिमाचल उवाच।

मह्यञ्च रोचते सख्यौ मेनायै रोच्यतां पुनः।
यद्येवं भवितव्यञ्च किमतः परमुत्तमम्॥ ६
साफल्यञ्च मदीयस्य कुलस्य च न संशयः।
मात्रे च रोच्यतां चेद्धि ततः शुभतरं तु किम्॥ ७
इत्येवं वचनं पित्रा ह्युक्तं श्रुत्वा तु ते तदा।
जग्मतुर्मातरं सख्यौ तदाज्ञप्ते मुनीश्वराः॥ ८

गत्वा तु मातरं तस्या वचनं चाचतुस्तदा।
मातस्त्वं वचनं पुत्र्याः श्रुत्वा कर्त्तुमिहार्हसि ॥ ९
तपःकामास्ति ते पुत्री शिवार्थं परमं तपः।
तस्मात्तु पितुश्चैव तुश्यश्च परिपृच्छति ॥ १०
हृदयश्च रूपसाफल्यं कर्त्तुकामा पतिव्रता।
त्वदाज्ञा यदि जायेत तप्यते च तयाधुना ॥ ११
समाकर्ण्य वचस्त्वेतन्मेना दुःखमुपागता।
समाहूय तदा पुत्रीमुवाच विह्वला सती ॥ १२
दुःखितासि कथं पुत्रि तपस्तप्तं पुरा यदि।
प्राप्तं जन्म गृहे त्वत्र किं न्यूनं नु भवेदिह ॥ १३
कुत्र यासि तपः कर्त्तुं देवाः सन्ति गृहे मम।
तीर्थानि च विचित्राणि न सन्ति ते पितुर्गृहे ॥ १४
त्वयात्रैव तपः कार्य्यं सिद्धिः स्यादनपायिनी।
साधितं किं त्वया गत्वा पुनः किं साधयिष्यसि ॥ १५
शरीरं कोमलं वत्से तपस्तु कठिनं महत्।
एतस्माच्च त्वया कार्य्यं त्विल्वेतत् सुलभं भवेत् ॥ १६
इत्येवं बहुधा पुत्री मात्रापि वारिता सती।
सुखं नैवात्र सम्पेदे ह्यनाराध्य शिवं तदा ॥ १७
दुःखं ज्ञात्वा तदीयं सा मात्राज्ञप्ता जगाम सा।
मातरं पितरञ्चैव प्रणिपत्य पुनस्तदा ॥ १८
सखीभ्यां संयुता तत्र तपस्तप्तुमुपाययौ।
हित्वाभरणान्यनेकानि वस्त्राणि विविधानि च ॥ १९
वल्कलञ्च तदा धृत्वा मौञ्जीं(क)बद्ध्वा सुशोभनाम्।
हित्वाहारं तदा चर्म्म मृगस्य परमं शुभम् ॥ २०
जगाम तपसे तत्र शृङ्गे स्यात् तीर्थमुत्तमम्।
गौरीशिखरनामासीत् तपसः कारणादिह ॥ २१
सुन्दराश्च द्रुमास्तत्र पवित्राः फलभाजिनः।
भूमिशुद्धिं ततः कृत्वा विधाय वेदिकां शुभाम्।
तया तपः समारब्धं मुनीनामपि दुष्करम् ॥ २२
चाञ्चल्यञ्च तदा त्याज्य शरीरस्य विशेषतः।
सूर्य्ये दृष्टिं समाधिश्य चकार परमं तपः ॥ २३
दीप्तानाञ्च तथाग्नीनां मध्ये स्थित्वा तु घर्म्मके।
वर्षासु स्थण्डिले स्थित्वा शीते जलसमीपगा ॥ २४
एवं तपः प्रकुर्व्वाणा वृक्षानारोपयत् तदा।
सिञ्चती प्रत्यहं तत्र ह्यातिथ्यञ्चाप्यकल्पयत् ॥ २५

(क) सञ्जीमिति क्वचित् पाठः।

वातश्चैव तथा शीतो वृष्टिश्च विविधा तदा।
दुःखञ्च विविधं तत्र गणितं न तया तथा ॥ २६
तथा तपस्तया तप्तं मुनिभिश्च सुदुष्करम्।
श्रुत्वा तु ऋषयस्तत्र विस्मयं परमं गताः ॥ २७
दर्शनार्थं समाजग्मुः कीदृक् तप्तं तपोऽनया।
महतां धर्म्मवृद्धेषु गमनं श्रेय उच्यते ॥ २८
प्रमाणं वयसो नास्ति मान्यो धर्म्मः सदा बुधैः।
श्रुत्वा दृष्ट्वा तपस्तस्याः किमन्यैः क्रियते तपः ॥ २९
जल्पन्तस्ते तदा तत्र कठिनाङ्गाश्च ये पुनः।
तदाश्रमगता ये च विरोधरहितास्तदा ॥ ३०
सिंहा गावस्तथान्ये च रागादिदोषसंयुताः।
तन्महिम्नैव ते तत्र नाबाधन्त परस्परम् ॥ ३१
वृक्षाश्च सफलास्तत्र तृणानि विविधानि च।
पुष्पाणि च विचित्राणि तत्रासन्नृषिसत्तमाः ॥ ३२
तद्वनञ्च तदा सर्व्वं कैलासेन समन्वितम्।
जातञ्च तपसस्तस्याः सिद्धरूपमभूत् तदा ॥ ३३
इति श्रीशैवे महापुराणे ज्ञानसंहितायां पार्व्वती-
तपश्चर्य्यावर्णनं नाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः।

सूत उवाच।

एतस्मिन् समये देवा ऋषयो नारदादयः।
पार्व्वत्यास्तत् तपो दृष्ट्वा तेजसा व्यापितास्तथा।
जग्मुस्ते च तदा तत्र यत्रास्ते वृषभध्वजः।
तत्र गत्वा च ते देवा नारदं प्रेषयंस्तदा ॥ २
नारदोऽपि तदा गत्वा देवानाहूय तांस्ततः।
प्रणम्य शङ्करं देवं स्तुतिं चक्रुः परस्परम् ॥ ३

ऋषय ऊचुः।

शम्भुस्त्वं शङ्करोऽसि त्वं दयालुस्त्वं विशेषतः।
पार्व्वत्या वै तपस्तप्तं दारुणं लोकशोषणम् ॥ ४
अपूर्व्वदृष्टं नो भावि देव-दानवदुर्लभम्।
प्रीतो भव त्वमस्माकं कुरु कार्य्यं सदाशिव ॥ ५
इत्युक्तो नारदप्रख्यैः शम्भुर्वचनमब्रवीत्।
देवानामप्यदर्शोऽहं तपसा दुष्करेण च ॥ ६
तया पर्व्वतराजस्य सुतया तपसा ह्यहम्।

क्रीतोऽस्मि वचनं तस्याः करिष्यामि सदाप्रियम् ॥ ७
अवश्यमेतद्भविता नात्र कार्य्या विचारणा।
गच्छत स्वपुरं तावद्यूयमत्रास्मि संयतः ॥ ८
स्वयमेव करिष्यामि कर्त्तव्यं भवतां प्रियम्।
आश्वास्य च तथा शीघ्रं शिवस्तत्परिपालकः ॥ ९
इत्युक्त्वा च तदा देवान् विसृज्य शङ्करस्तदा।
जटिलं रूपमास्थाय जगाम पार्व्वतीवनम् ॥ १०
आगतञ्च तदा दृष्ट्वा शिवाप्यपूजयत् तदा।
वृक्षस्येव स्थितं देवी पूजां तस्य तदाकरोत् ॥ ११
फल-पुष्पादिभिस्तत्र पूजितं परया मुदा।
स्थितं तं निद्रया व्याप्तं जराजर्ज्जरितं तदा।
पार्व्वती कुशलं तं वै पप्रच्छ त्वं कुतो गतः ॥ १२
इति पृष्टे तया तत्र ह्युक्त्वा स्वीयञ्च तां पुनः।
पृष्टवान् कपटेनैव गोपयन् रूपमुत्तमम् ॥ १३
अयि देवि जलं ह्येतत् फलादि च निरन्तरम्।
अन्वच्छिन्नं भवेदत्र यथाशक्ति तपस्यसि ॥ १४
नवे वयसि यद्देवि कृतं वै तप उत्तमम्।
अतः किञ्चिद्धि पृच्छेयं कथनीयं त्वयाऽधुना ॥ १५
पूजाविधिस्त्वया देवि कृतो वै सर्व्वथात्मना।
तस्मान्मैत्री च सञ्जाता रहस्यं वद मे शुभे ॥ १६
किमिच्छसि वरं देवि प्रष्टुमिच्छाम्यतः परम्।
त्वय्येव तपसो देवि फलं सर्व्वं प्रदृश्यते ॥ १७
वरार्थं च तपश्चेद्वै तिष्ठतु तप एव तत्।
रत्नन्तु ग्रहीतारं वै न पृच्छति ग्रहीष्यति (क) ॥ १८
ईदृशञ्चैव सौन्दर्य्यं सर्व्वं व्यर्थीकृतं त्वया।
शिवाभरणान्यनेकानि चर्म्मादि च धृतं त्वया ॥ १९
तत् सर्व्वं कारणं ब्रूहि दृष्ट्वा हर्षमुपागमे ॥ २०
इति पृष्टा तदा तेन सखीं प्रेरयती तदा।
तन्मुखेनैव तत् सर्व्वं कथयामास सुव्रता ॥ २१

इति श्रीशिवे महापुराणे ज्ञानसंहितायां पार्व्वतीतपोवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

(क) रत्नन्तु तद्ग्रहीतारं स्वयं ज्ञात्वा ग्रहीष्यतीति क्वचित् पाठः।

चतुर्द्दशोऽध्यायः।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठाः कथां पापप्रणाशनीम्।
यज्जातञ्च ततः पश्चात् पार्व्वती-शिवयोस्तदा ॥ १
तया च प्रेरिता तत्र सखी जटिलमाह तत् ॥ २

सख्युवाच।

श्रूयतां विप्र वक्ष्यामि यदि त्वं श्रोतुमिच्छसि।
यदर्थमेतया सख्या ह्यारब्धं तप उत्तमम् ॥ ३
हित्वेन्द्रप्रमुखान् देवानैश्वर्य्यसंयुतानपि।
पतिं पिनाकपाणिं वै प्राप्तुमिच्छति साम्प्रतम् ॥ ४
इयं सखी मदीया वै वृक्षानारोपयत् पुरा।
तेषु वृक्षेषु सञ्जातं फलं पश्य पुरः प्रभो ॥ ५
मनोरथाङ्कुरस्त्वस्याः पश्यामि न कथञ्चन।
रूपहार्य्यं शिवं देवं मदनस्यानुचारिणम् ॥ ६
तस्माच्च नारदादेशात् तपस्तप्यति दारुणम्।
यत् ते पृष्टं मयाख्यातं सख्याश्च समभीप्सितम् ॥ ७
इत्येवं वचनं श्रुत्वा जटिलो वाक्यमब्रवीत् ॥ ८

जटिल उवाच।

सख्येदं कथितं सत्यं परिहास उतापि वा।
यथार्थं न कथं देवि सुखेन परिभाषसे ॥ ९
इत्युक्ते च तदा तेन स्वयं नैव सखी तदा।
उवाच पार्व्वती देवी तत् तथैव न चान्यथा ॥ १०
मनसा वचसा साक्षाद्वृतो वै शङ्करो मया।
जानामि दुर्लभं वस्तु कथं प्राप्यं मया भवेत् ॥ ११
तथापि मनसौत्सुक्यात् तप्यते च मयाधुना।
इत्युक्त्वा वचनं तस्मै स्थिता सा गिरिजा तदा ॥ १२
उवाच ब्राह्मणस्तत्र मया च गम्यतेऽधुना।
एतावत् कालपर्य्यन्तं ममेच्छा महती ह्यभूत् ॥ १३
किं वस्तु काम्यती देवी दृष्ट्वा यामि स्तुवन् व्रतम्।
अवगतं मया सम्यक् त्वन्मुखात् सुन्दरि श्रुतम् ॥ १४
इतो गच्छाम्यहं देवि यथेच्छसि तथा कुरु।
न कथ्यते मया तुभ्यं मित्रत्वं निष्फलं भवेत् ॥ १५
यथा कार्य्यं यथा भावि कथनीयं शुभेन च (क)।
इत्युक्त्वा वचनं तस्यै यावद्गन्तुमियेष सः ॥ १६

(क) शुभं न चेति पाठान्तरम्।

तावच्च पार्व्वती देवी ह्युवाच किं गमिष्यसि।
इत्युक्ते च तया तत्र स्थित्वोवाच स दण्डधृक् ॥ १७

दण्डधृगुवाच।

शृणु देवि प्रवक्ष्यामि मित्रत्वादुच्यते मया।
इतश्च प्रथमं त्वं मे मान्या पूज्या सदा शुभा ॥ १८
इदानीं तद्विपरीतं जातं मे नात्र संशयः।
इति कृतं त्वयाद्यैव तच्चैव श्रूयतामिति ॥ १९
हित्वा सुवर्णमुद्राञ्च काचं ग्रहीतुमिच्छसि।
हित्वा च चन्दनं शुभ्रं कर्द्दमं लेप्तुमीहसे ॥ २०
नागञ्च वाहनं हित्वा बलीवर्द्दं त्वमिच्छसि।
गाङ्गं जलम्परित्यज्य कूपोदकं समीहसे ॥ २१
सूर्य्यतेजः परित्यज्य खद्योतद्युतिमिच्छसि।
चीनांशुकं (क) विहायैव चर्म्माम्बरमुपाससे ॥ २२
गृहे वासश्च वै देवि त्यक्त्वा वनं समीहसे।
करोषि त्वञ्च देवेशि न युक्तं कर्त्तुमुद्यता ॥ २३
तथा त्वं सर्व्वदेवानां हित्वा च सन्निधिं पुनः।
इच्छसि त्वसुराणाञ्च न युक्तं क्रियते त्वया ॥ २४
इन्द्रादिलोकपालांश्च हित्वा शिवमनुव्रता।
नैतद्युक्तं हि लोकेषु विरुद्धं दृश्यतेऽधुना ॥ २५
क्व त्वं कमलपत्राक्षि क्व चाऽसौ च त्रिलोचनः।
शशाङ्कवदना त्वञ्च पञ्चवक्त्रः शिवः स्मृतः ॥ २६
अवर्ण्यश्चैव ते रूपं वर्णितुं नैव शक्यते।
जटाजटं शिवस्यैव प्रसिद्धं परिचक्षते ॥ २७
चन्दनञ्च त्वदीयेऽङ्गे चिताभस्म शिवस्य च।
क्व दुकूलं त्वदीयं वै गजाजिनमथाशुभम् ॥ २८
क्वाङ्गदादीनि दिव्यानि क्व सर्पाः शङ्करस्य च।
क्व चरा देवताः सर्व्वाः क्व च भूतावलिः प्रिये ॥ २९
क्वासौ मृदङ्गनादो वै क्व चापि डमरुस्तदा।
क्व च भेरीकलापश्च क्व च शृङ्गीरवोऽशुभः ॥ ३०
क्व च ढक्कमयः शब्दो गल्लनादः क्व चापि हि।
भवत्याश्च शिवस्यव न युक्तं रूपमुत्तमम् ॥ ३१
वपुश्चैव विरूपाक्षं जन्म न ज्ञायते कदा।
यदि धनं भवेत् तस्य कथं दिगम्बरो भवेत् ॥ ३२
वरेषु ये गुणाः प्रोक्ता एकोऽपि न शिवे स्मृतः।
वाहनञ्च बलीवर्द्दो वसनं चर्म्म एव च ॥ ३३

(क) चित्रांशुकमिति क्वचित् पाठः।

यदि ग्राह्यो भवेत् सो हि कथञ्च मदनं दहेत्।
सहायास्तु पिशाचाश्च विषं कण्ठे विराजते ॥ ३४
अनादरस्तथा दृष्टो हित्वा वनमुपागतः।
जातिर्न लभ्यते तस्य विद्याज्ञानं न दृश्यते ॥ ३५
एकाकी च सदा नित्यं विरागी च विशेषतः।
तस्मात् त्वन्तु शिवे नैव मनो योक्तुमिहार्हसि ॥ ३६
क्व च हारस्त्वदीयो वै क्व च वै रुण्डमालिका।
सर्व्वं विरोधि रूपञ्च तव चैव शिवस्य च ॥ ३७
मह्यं न रोचते देवि यदिच्छसि तथा कुरु।
स मया विदितो देवः श्मशाने वासमीहते ॥ ३८
असद्वस्तु च यत् किञ्चित् तत् सर्व्वं सेवते स्वयम्।
निवर्त्तय मनस्तस्मान्नो चेद्गच्छेः समीपतः ॥ ३९
इत्येतद्वचनं श्रुत्वा पार्व्वती क्रोधसंयुता।
उवाच क्रुध्यमाना सा शिवनिन्दापरञ्च तम् ॥ ४०

पार्व्वत्युवाच।

एतावद्धि मया ज्ञातं कश्चिदन्यो भविष्यति।
परन्तु सकलं ज्ञातमवध्यो दृश्यसेऽधुना ॥ ४१
श्रूयतां वचनं ह्येतत् कथयामि क्रमेण च।
त्वयोक्तं विदितो देवस्तद्वलीकं न चान्यथा ॥ ४२
यदि च विदितः स्याद्वै विरुद्धं नोच्यते त्वया।
कश्चिद्दृढः प्रदृश्येत वेशधारी न संशयः ॥ ४३
ब्रह्मचारिस्वरूपेण कश्चिद्धूर्त्तः समागतः।
शङ्करस्य स्वरूपन्तु प्रवक्ष्यामि शृणुष्व तत् ॥ ४४
वस्तुतो निर्गुणः साक्षात् सगुणः कारणेन च।
कुतो जातिर्भवेत् तस्य निर्गुणस्य गुणात्मनः ॥ ४५
सर्व्वासामपि विद्यानामधिष्ठानं सदाशिवः।
उच्छ्वासरूपिणो वेदा दत्तास्तु विष्णवे पुरा ॥ ४६
किं तस्य विद्यया कार्य्यं पूर्णस्य परमात्मनः।
सर्व्वेषाञ्चादिभूतस्य वयोमानं कुतः स्मृतम् ॥ ४७
प्रकृतिस्तु ततो जाता किं शक्तेस्तस्य कारणम्।
यो वै भजति नित्यं तं तस्य शक्तित्रयं सदा ॥ ४८
यस्यैव भजनाल्लोको मृत्युं जयति निश्चितम्।
तस्मान्मृत्युञ्जयं नाम प्रसिद्धं जगतीतले ॥ ४९
यस्य पूजाप्रभावेण आरोग्यं जायते नृणाम्।
तस्यारोग्यं कुतोऽपीह भविष्यति सुदुर्म्मते ॥ ५०
तस्यैव पक्षपातेन देवा देवत्वमागताः।

दर्शनार्थं शिवस्यैव यदा गच्छति देवराट् ॥ ५१
यदा भूताः पिशाचाश्च द्वारपालाः शिवस्य च ।
दण्डैश्च मुकुटं विद्धं खण्डं खण्डं व्रजेद्भुवि ॥ ५२
किं तस्य बहुपक्षेण स्वयमेव प्रभुः सदा ।
कल्याणरूपिणस्तस्य सेवया किं भवेदिह ।
किं न्यूनं देवदेवस्य मामिच्छति सदाशिवः ॥ ५३
प्रजन्मदरिद्रः स्यात् सेवते यदि शङ्करम् ।
स्यैव दुर्लभा लोके लक्ष्मीः स्यादनपायिनी ॥ ५४
द्ग्रे सिद्धयोऽष्टौ च नृत्यन्ति प्रतिवासरम् ।
वाङ्मुखाः सदा तत्र कुतो वित्तं सुदुर्लभम् ॥ ५५
द्यप्यमङ्गलानीह सेवते शङ्करः सदा ।
थापि मङ्गलं तस्य स्मरणादेव जायते ॥ ५६
शिवेति मङ्गलं नाम मुखे यस्य निरन्तरम् ।
स्यैव दर्शनादन्ये पवित्राः सन्ति नित्यशः ॥ ५७
पूतं भवेद्भस्म चितायाश्च त्वयोदितम् ।
स्यापगमे देवैः शिरोभिर्धार्यते कथम् ॥ ५८
स्यैव जगतश्चादिर्जगतश्चेश्वरो मतः ।
गत्संहारकर्त्ता च स ज्ञेयो वै कथं भवेत् ॥ ५९
गम्यं ब्रह्मणो रूपं शिवस्य परमात्मनः ।
थं तत्त्वं विजानन्ति त्वादृशा हि वहिर्मुखाः ॥ ६०
राचाराश्च पापाश्च वेदेभ्यस्ते वहिष्कृताः ।
त्त्वं नैते विजानन्ति शिवस्यागुणरूपिणः ॥ ६१
शिवनिन्दां करोतीह तत्त्वमज्ञाय यः पुमान् ।
जन्म सञ्चितं पुण्यं तस्माद्भस्मीभविष्यति ॥ ६२
या निन्दा कृता ह्यत्र हरस्यामिततेजसः ।
त्पूजा च कृता यस्मात् तस्मात् पापं भजाम्यहम् ॥ ६३
वविद्वेषिणं दृष्ट्वा सचेलं स्नानमाचरेत् ।
रे दुष्ट त्वया प्रोक्तं जानामि च महेश्वरम् ॥ ६४
श्चयेनैव न ज्ञातः शिव एव सनातनः ।
या तथा भवेत् सो वै ममाभीष्टतमो मतः ॥ ६५
तर्वचनमादातुं प्रक्रमे तावदेव हि ।
वाच गिरिजा देवी सखीं दुष्टमना ह्यसौ ॥ ६६
रणीयः प्रयत्नेन शिवनिन्दां करिष्यति ।
केवलं भजेत् पापं निन्दाकर्त्ता शिवस्य च ।
वै शृणोति तां निन्दां पापभाक् स भवेदिह ॥ ६७
यं दुष्टः पुनर्निन्दां करिष्यति शिवस्य च ।
स्थलमेतत् तथा हित्वा यास्यामोऽन्यत्नमाचिरम् ॥ ६८
इत्युक्त्वा चलनायासौ पदमुत्क्षिपते यदा ।
तदासौ च शिवः साक्षादाललम्बे प्रियां स्वयम् ॥ ६९
कृत्वा स्वीयं स्वरूपञ्च यथा ध्यातं तया तथा ।
दर्शयित्वा पुनस्ताञ्च ह्युवाचावाङ्मुखीं शिवाम् ॥ ७०
कुत्र यास्यसि मां हित्वा न त्वं त्याज्या मया पुनः ।
प्रसन्नोऽस्मि वरं ब्रूहि नादेयं विद्यते तव ॥ ७१
अद्यप्रभृति ते दासस्तपोभिः प्रेमनिर्भरैः ।
क्रीतोऽस्मि तव सौन्दर्य्यात् क्षणमेकं युगायते ॥ ७२
त्यज्यताञ्च त्वया लज्जा एहि यामो गृहं मम ।
इत्युक्ते देव देवेन जहौ दुःखं पुरातनम् ॥ ७३
तपसश्चैव यज्जातं महद्दुःखं गतं तदा ।
फले जाते श्रमः पूर्व्वं जातो नाशमवाप्नुयात् ॥ ७४

इति श्रीशैवे महापुराणे ज्ञानसंहितायां पार्व्वतीवरप्रदानं नाम चतुर्द्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ।

ऋषय ऊचुः ।

व्यासशिष्य महाभाग ततो जातञ्च यत् पुनः ।
तत् सर्व्वं कथय त्वं हि कथां लोकमलापहाम् ॥ १

सूत उवाच ।

मुनयः श्रूयतां सम्यक् कथयामि कथां मुदा ।
पार्व्वती वचनं श्रुत्वा हरस्य परमात्मनः ॥ २
उवाच व्रीडिता देवी वचः स्मृत्वा पुरातनम् ।
सखीमुखेन सा तत्र शिवं सम्यग्व्यवस्थितम् ॥ ३
एहि यामो गृहे देवि कथञ्चैवं विलम्बसे ।
एवं ब्रुवन्तं तं देवं पार्व्वतीवचनात् सखी ॥ ४

सख्युवाच ।

यदि प्रसन्नो देवेश करोषि च कृपां यदि ।
तदेवञ्च त्वया कार्य्यं कृपां कृत्वा ममोपरि ॥ ५
पितुर्गृहे मया सम्यग्गम्यते त्वदनुज्ञया ।
प्रसिद्धैः (क) क्रियते यद्विवाहः परमः शुभः ॥ ६
तथा चैव त्वया कार्य्यं लोकेषु ख्यापयन् यशः ।

(क) प्रसिद्ध इति वा पाठः ।

पितुर्मे सफलं सर्व्वं कुरुष्वेह गृहाश्रमम् ॥ ७
विवाहस्य यथा रीतिः कर्त्तव्यं तत् तथा ध्रुवम्।
जानाति हिमवान् सम्यक् कृतं पुत्र्या शुभं मम ॥ ८
इत्येवं वचनं श्रुत्वा शिवोऽपि च शिवां तदा।
उवाच वचनं त्वञ्च यदिच्छसि तथेति तत् ॥ ९
इत्युक्त्वान्तर्द्दधे शम्भुर्गत्वा काशीं विचारयन्।
सस्मार च ऋषीन् सप्त विरहाविष्टमानसः ॥ १०
पार्व्वत्यपि सखीयुक्ता रूपं कृत्वा तु सार्थकम्।
जगाम च स्वकं धाम पितुर्विरहकातरा ॥ ११
पिता चैव तथा माता सख्यश्चैवाप्यनेकशः।
सम्बन्धिनस्तथा चान्ये सम्मुखाः संययुस्तदा ॥ १२
जयेति च ब्रुवन्तस्ते दृढ़ालिङ्गनमादधुः।
साधितन्तु त्वया सम्यक् पाविताः स्मो वयं त्वया॥१३
चन्दनैः पुष्पवर्य्यैश्च पूजयित्वा शिवां मुदा।
गृहं प्रवेशयामासुर्वर्द्धमानपुरःसरम् ॥ १४
आश्रमं सफलं मेने कुपुत्त्रात् पुत्त्रिका वरा।
हिमवान् नारदं तत्र प्रस्तुवन् साधु साध्विति ॥ १५
ऋषयश्चैव ते सर्व्वे शम्भुना च स्मृता यदा।
तदा जग्मुः स्वयं सर्व्वे कल्पवृक्षा इवापरे ॥ १६
परंब्रह्म रणन्तश्च हैमवल्कलधारिणः।
मुक्ताफलैर्विचित्रैश्च भूषिता भूषणैः परैः ॥ १७
अरुन्धत्या तया युक्ताः साक्षात् सिद्धिरिवापरा।
यान् दृष्ट्वा सूर्य्यसङ्काशान् जहौ लज्जां हरः स्वयम्१८
स्थित्वाग्रे ऋषयः श्रेष्ठा नमस्कृत्य शिवं मुदा।
मेनिरे च तदात्मानं कृतार्थं ये तपस्विनः ॥ १९
सत्यं वा स्वप्नमाया वा नेत्राभ्यां दृश्यते यथा।
वयं क्व दर्शनञ्चास्य शिवस्य दुर्लभं कुतः ॥ २०
इति विस्मयमापन्ना नमस्कृत्य स्थिताः पुरः।
प्रोचुः प्राञ्जलयस्ते वै शिवं लोकमलापहम् ॥ २१

ऋषय ऊचुः।

नमस्तुभ्यं भगवते शिवायामिततेजसे।
कपर्द्दिने नमस्तुभ्यं पञ्चवक्त्राय ते नमः ॥ २२
हिरण्यबाहवे तुभ्यं शितिकण्ठाय ते नमः।
व्यापकाय नमस्तुभ्यं व्याप्यरूपाय ते नमः ॥ २३
पराय पररूपाय सर्व्वोत्कृष्टाय ते नमः।
शिवाय शिवरूपाय प्रणवाय नमो नमः ॥ २४
इत्येवञ्च स्तुवन्तस्ते पुनरूचुः परात्मने।
सर्व्वोत्कृष्ट महाराज सर्व्वानुग्रहकारक।
भाग्यं किं वर्ण्यतेऽस्माभिः स्वीयं किन्तु पुनः पुनः॥२
तपस्तप्तं त्रिधा पूर्व्वं वेदाध्ययनमुत्तमम्।
अग्नयश्च हुताः पूर्व्वं यज्ञाश्च विविधाः कृताः ॥ २
तपांसि च विचित्राणि पर्व्वण्यपि विशेषतः।
दानानि च तथापूर्व्वं तीर्थानि विविधानि च ॥ २
वाङ्मनःकायजं किञ्चित् पुण्यं स्मरणसम्भवम्।
तत् सर्व्वं सङ्गतञ्चाद्य स्मरणानुग्रहस्तव ॥ २८
यो वै भजति नित्यं त्वां कृतकृत्यो भवेन्नरः।
किं भाग्यं वर्ण्यते तेषां येषां नः स्मरणं त्वया ॥ २
सर्व्वोत्कृष्टास्तथा जाताः स्मरणात् ते सदा शिव
मनोरथपथं नैव गच्छसि त्वं वयं कुतः ॥ ३०
वामनस्य फलं यद्वज्जन्मान्धस्य च चक्षुषी।
वाचालत्वञ्च मूकस्य दरिद्रे निधिदर्शनम् ॥ ३१
पङ्गोर्गिरिपरावृत्तिर्वन्ध्यस्य पुत्त्रकास्तथा।
दर्शनं भवतो ह्येवं जातञ्च दुर्लभं प्रभो ॥ ३२
अद्यप्रभृति लोकेषु मान्याः पूज्या मुनीश्वराः।
जातास्तेऽनुग्रहादेव उच्चैःपदमुपाश्रिताः ॥ ३३
अत्र किं बहुनोक्तेन मान्यपात्रं वयं गताः।
पूर्णानां किञ्च कर्त्तव्यमस्ति चेत् परमा कृपा ॥ ३
सदृशं सेवकानान्तु देयं कार्य्यं शुभं त्वया।
इत्येवं वचनं तेषां श्रुत्वा वाक्यमुपाददे ॥ ३५

शिव उवाच।

ऋषयश्च सदा पूज्याः कारणात् स्मरणं कृतम्।
ममावस्था भवद्भिश्च ज्ञायन्ते ह्युपकारिकाः ॥ ३६
देवानां दुःखमुत्पन्नं तारकात् सुदुरात्मनः।
ब्रह्मणा च वरो दत्तः किं करोमि दुरासदः ॥ ३
मूर्त्तयोऽष्टौ च याः प्रोक्ता मदीयाः परमर्षयः।
ताः सर्व्वा उपकारार्थं न तु स्वार्थमिति स्फुटम्।
तथा च कर्त्तुकामोऽहं विवाहं शिवया सह।
तयापि च तपस्तप्तं दुष्करं परमर्षिभिः ॥ ३८
तस्याः फलं वरं देयमभीष्टं तद्धितावहम्।
तस्माद्भवन्तो गच्छन्तु हिमाचलगृहं ध्रुवम् ॥ ४०
तत्र गत्वा हितञ्चैतत् तत्पत्नीन्तु पुनस्तथा।
कथनीयं प्रयत्नेन यथा स्यात् कार्य्यमुत्तमम्।

उद्वाहं कर्त्तुमिच्छामि तत्पुत्र्या सह सत्तमाः ॥ ४१
हिमाचलगृहे पुत्री पार्व्वती च गुणान्विता ।
अस्मदर्थे च तां तत्र प्रार्थनीयो हिमालयः ॥ ४२
तं तथा च प्रवक्तव्यं देवानाञ्च हितं यथा ।
भवद्भिः कल्पितो यो वै विधिः स्यादविकल्पकः ॥ ४३
भवतां नैव कथ्येत भवन्तः कार्य्यभाजिनः ॥ ४४
इत्येवं वचनं श्रुत्वा मुनयस्तेऽमलाशयाः ।
आनन्दं लेभिरे सर्व्वे प्रभुणानुग्रहीकृताः ॥ ४५
वयं धन्या महान्तश्च कृतकृत्यास्तथा पुनः ।
ब्रह्मणा विष्णुना यो वै वन्द्यः सर्व्वार्थसाधकः ।
सोऽस्मान् संप्रेरयत्येष कार्य्ये लोकसुखावहे ॥ ४६
अयं वै जगतः स्वामी सोमापि जननी मता ।
अयं युक्तश्च सम्बन्धो वर्द्धतां चन्द्रवत् सदा ॥ ४७
इत्युक्त्वा ऋषयो दिव्या नमस्कृत्य शिवं मुदा ।
गताश्चाकाशमार्गेण यत्र स्याद्धिमवत्पुरम् ॥ ४८
चिन्तयन्तश्च ते चात्र किं पुरस्थं वै भविष्यति ।
अस्मादेवंविधे कार्य्ये शिवेन विनियोजिताः ॥ ४९
दृष्ट्वा तत् परमं दिव्यमृषयस्तेऽतिविस्मिताः ।
ऊचुः परस्परं सर्व्वे किमेतदिति सस्फुटम् ॥ ५०
अलकायाश्च स्वर्गीया भोगवत्यास्तथा पुनः ।
विशेषोऽत्रामरावत्या दृश्यते ऋषिसत्तमाः ॥ ५१
किं गृहाणि सुरम्याणि स्फाटिकैर्विविधैरिह ।
मणिभिर्वा विचित्राणि रचितान्यङ्गणानि च ॥५२
सूर्य्यकान्ताश्च मणयश्चन्द्रकान्तास्तथैव च ।
गृहे गृहे विचित्राश्च वृक्षाः स्वर्गसमुद्भवाः ॥ ५३
तोरणानां तथा लक्ष्मीर्दृश्यते च गृहे गृहे ।
चित्राणि च विचित्राणि शुभ्रहंसैर्विमानकैः ॥ ५४
वितानानि विचित्राणि चैलपल्लवतोरणैः ।
जलाशयान्यनेकानि दीर्घिका विविधास्तथा ॥ ५५
उद्यानानि विचित्राणि पुष्पैश्च भरितान्यथ ।
महिषाश्चाप्यनेकेऽत्र कलकण्ठरवास्तथा ॥ ५६
नराश्च देवताः सर्व्वे स्त्रियश्चाप्सरसस्तथा ।
परस्परविरुद्धास्ते तेषां रूपन्तु किं पुनः ॥ ५७
किं वर्ण्यते नगर्य्याश्च महिमा च ऋषीश्वराः ।
अन्ये च याज्ञिकाश्चैव पुण्यानि स्वर्गकाम्यया ॥ ५८
कुर्व्वते ते वृथा सर्व्वे विहाय हिमवत्पुरम् ।
यावन्न दृष्टमेतच्च तावत् स्वर्गपरा नराः ॥ ५९
इत्येवमृषिवर्य्यास्ते वर्णयन्तस्तथा पुरम् ।
गता हिमालयस्याथ गृहं सर्व्वसमृद्धिमत् ॥ ६०
तान् दृष्ट्वा सूर्य्यसङ्काशान् हिमवान् विस्मितस्तथा ।
सूर्य्याः सप्त कथञ्चात्र आयान्ति मे प्रियां प्रति ॥ ६१
कार्य्या पूजा प्रयत्नेन गृहस्थत्वात् सदा प्रिये ।
वयं धन्या गृहस्थाश्च सर्व्वेषां सुखदायिनः ॥ ६२
एतस्मिन्नन्तरे ते वै ह्याकाशादपतंस्तदा ।
सम्मुखो हिमवान् दृष्ट्वा ययौ मानपुरःसरम् ॥ ६३
पूजां विधाय तेषाञ्च दण्डवत् प्रपपात ह ।
हस्तेश्च हिमवन्तं ते गृहीत्वोचुः शुभं शुभम् ॥ ६४
अथाग्रतश्च तान् कृत्वा धन्यो मम गृहाश्रमः ।
इत्युक्त्वासनमानीय ददौ भक्तिपुरःसरम् ॥ ६५
आसनेषूपविष्टेषु तदाग्रतः स्वयं स्थितः ।
उवाच हिमवांस्तत्र ऋषीन् ज्योतिर्म्मयांस्तदा ॥ ६६

हिमाचल उवाच ।

धन्योऽहं कृतकृत्योऽहं सफलं जीवितं मम ।
लोकेषु दर्शनीयोऽहं बहुतीर्थसमो मतः ॥ ६७
यस्माद्भवन्तो मद्गेहं ह्यागता विष्णुरूपिणः ।
पूर्णानाञ्चैव किं कार्य्यं कृपणानां गृहे गृहे ॥ ६८
तेषाञ्च दुःखनाशार्थं गृहेष्वागमनं सताम् ।
मद्गेहपावनार्थञ्च भवन्तः समुपागताः ॥ ६९
तथापि किञ्चित् कार्य्यं हि सदृशं सेवकस्य च ।
कथनीयं भवद्भिश्च सफलस्तु ममाश्रमः ॥ ७०
महतामाज्ञया लोके मान्यतां गच्छति ध्रुवम् ।
तस्माच्च कुत्रचित् कार्य्ये योज्योऽहमृषिसत्तमाः ॥ ७१
एवं वचनमाकर्ण्य ऋषयश्च प्रहर्षिताः ।
ऊचुस्ते गिरिराजं वै स्तुत्वा स्तुत्वा शिवस्य च ॥७२
धन्योऽसि कृतकृत्योऽसि भाग्यवानसि साम्प्रतम् ।
शिवः परोपकाराय कर्त्तुकामः प्रजासुखम् ॥ ७३
अस्मन्मुखेन ते पुत्रीं याचते शङ्करः स्वयम् ।
जगद्गुरोर्गुरुस्त्वञ्च भविष्यसि न संशयः ॥ ७४
जगन्माता च ते पुत्री तस्यैवानुग्रहाद्भवेत् ।
जगत्पिता शिवः प्रोक्तो जगन्माता शिवा स्मृता ॥७
तस्मै देया त्वया कन्या सार्थकं ते भविष्यति ।
एवं वचनमाकर्ण्य गिरिराजोऽब्रवीदिदम् ॥ ७६५

मदीयञ्च शरीरं वै पत्नी मेना च या मता ।
ऋद्धिः सिद्धिश्च कीर्त्तिश्च श्रीर्मदीया न चान्यथा॥ ७७
एवं ज्ञात्वा तदा पुत्रीं विलोक्य मातरञ्च ताम् ।
भूषयित्वा तदङ्गञ्च ऋष्युत्सङ्गे न्यवेशयत् ।
इदं भैक्ष्यं मया नाम दातव्यमृषिसत्तमाः ॥ ७८

ऋषय ऊचुः ।

ईदृशा भिक्षुकास्तेऽद्य दाता चैव भवान् स्वयम् ।
भैक्ष्यञ्च पार्व्वती प्रोक्तं किमतः परमुत्तमम् ॥ ७९
हिमवन् शिखराणां ते मनसः सदृशी गतिः ॥ ८०
एवमुक्त्वा तु तां कन्यामृषयो विमलाशयाः ।
आशिषं दत्तवन्तस्ते शिवाय सुखदा भव ॥ ८१
स्पृष्ट्वा करेण तां तत्र कल्याणं ते भविष्यति ।
शुक्लपक्षे यथा चन्द्रो वर्द्धते लक्षणास्तथा ॥ ८२
मिलित्वा च गृहं तेऽद्य वर्द्धयिष्यन्ति नित्यशः ।
इत्युक्त्वा ऋषयः सर्व्वे गिरिराजं परस्परम् ॥ ८३
पुष्पाणि फलयुक्तानि व्यत्ययं चक्रिरे तदा ।
अरुन्धती तदा तत्र मेनां साश्रुमुखीं तदा ॥ ८४
गुणैश्च लोभयामास शिवस्य परमा सती ।
हरिद्रा कुङ्कुमैस्तत्र श्मश्रूणि परिमार्ज्जयत् ॥ ८५
ततश्च ते चतुर्थेऽह्नि निर्द्धार्य्य लग्नमुत्तमम् ।
परस्परञ्च संहृष्य जग्मुस्ते शिवसन्निधिम् ॥ ८६
महाकार्य्ये प्रयातास्ते यत्रास्ते शङ्करः स्वयम् ।
विवाहस्य विधिं सम्यक् चक्रुस्ते ऋषिसत्तमाः ॥ ८७
तदाज्ञप्ताश्च ते तत्र गताश्चागमनाय वै ।
यूयमप्यत्रैवः प्रोक्ता विवाहे च मया पुनः ॥ ८८
अतः शीघ्रं भवद्भिस्तु ऋषयो ब्रह्मवित्तमाः ।
आगन्तव्यं सशिष्यैस्तु भवन्तः कार्य्यकारकाः ॥ ८९
इत्युक्तास्ते गतास्तत्र तथेति परमं वचः ।
शिवोऽपि सगणस्तत्र प्रसन्नमुखपङ्कजः ॥ ९०
कैलासमगमद्देवो विवाहरचनाय वै ।
सस्मार नारदं देवः स्मरणादागतः क्षणात् ॥ ९१
निवेदितञ्च तत् सर्व्वं श्रुत्वा हृष्टोऽथ नारदः ।
शिवोऽपि कथयामास पार्व्वत्या वचनं तदा ॥ ९२
तया तपस्तथा तप्तं वशीभूतो ह्यहं तदा ।
एवं श्रुत्वा वचस्तस्य नारदो वाक्यमब्रवीत् ॥ ९३
भवतान्तु व्रतमिदं भक्तवश्यो भवाम्यहम् ।
सम्यक् कृतं त्वया देव पार्व्वतीमनसेप्सितम् ॥ ९४
कार्य्यं मत्सदृशं किञ्चित् कथनीयं त्वया प्रभो ।
इत्युक्तस्तु शिवस्तस्मै कथयामास वै तदा ॥ ९५
भवतो वचनं ह्यत्र कृतं मे नात्र संशयः ।'
इदं त्वया तु कर्त्तव्यं देवानाञ्च निमन्त्रणम्॥ ९६
ब्रह्माणञ्च तथा विष्णुमन्यान् देववरांस्तथा ।
कथनीयं प्रयत्नेन ऋषिवर्य्यांस्तथैव च ॥ ९७
सर्व्वान् मातृगणांश्चैव यक्षगन्धर्व्वकानथ ।
नागमिच्छन्ति येऽप्यत्र मदीया न कदाचन ॥ ९८
इत्युक्तो नारदो ब्रह्मन् प्रणिपत्य सदाशिवम् ।
जगाम सर्व्वतो देवान् यदुक्तं शम्भुना पुरा ।
कथयित्वा पुनस्तत्र मनोवेगसमागतः ॥ ९९

इति श्रीशैवे महापुराणे ज्ञानसंहितायां शिव-निमन्त्रणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

षोड़शोऽध्यायः ।

सूत उवाच ।

सर्व्वे देवास्तदा तत्र शिवसेवासमीहया ।
स्वीयान्येवोपकरणानि सेवार्थन्तु शिवस्य च ॥ १
सर्व्वे ते प्रेरयामासुर्द्देवा इन्द्रादयस्तदा ।
गन्धर्व्वाप्सरसस्तत्र वाद्यं नृत्यञ्च चक्रिरे ॥ २
मातरः सप्त तास्तत्र शिवभूषाविधिं परम् ।
चक्रिरे च मुदा युक्ता यथा योग्यं तथा पुनः ॥ ३
कर्त्तव्यं किञ्च पूर्णस्य सर्व्वं प्रियचिकीर्षया ।
तस्य स्वाभाविको वेशो भूषाविधिरभूत् तदा ॥ ४
तदेव कथयाम्यद्य श्रूयतामृषिसत्तमाः ।
चन्द्रस्तु मुकुटस्थाने सान्निध्यमकरोत् तदा ॥ ५
तिलकं सुन्दरं ह्यासीन्नयनन्तु तृतीयकम् ।
कर्णाभरणानि यान्यासंस्तान्येवाभरणानि च ॥ ६
भूतिश्च चन्दनं ह्यासीद्दुकूलं चर्म्म उच्यते ।
सर्पा ह्याभरणान्यासन् मणयो विविधाश्च ये ॥ ७
तत्प्रभावात् तदा सर्व्वं प्राप्नुता विकृतिं गताः ।
ईदृशं सुन्दरं रूपं जातं वर्णनदुष्करम् ॥ ८
ईश्वरोऽपि स्वयं साक्षादैश्वर्य्यं लब्धवानिह ।
गणास्तत्र च वाद्यानि चक्रिरे विविधान्यपि ॥ ९

स्मिन् समये देवा आजग्मुः प्रभुसेवया।
ह्मा तु हंसमारुह्य ऋषिभिः सहितस्तदा ॥ १०
ैयाटोपेन वै तत्र भूतानां पतिमीश्वरम्।
नमस्कृत्य स्थितास्तत्र तावद्विष्णुः समागतः ॥ ११
हनं पक्षिराजश्च निजसेवकसंयुतः।
चिह्नैर्भूषितश्चासौ नमस्कृत्य स्थितः पुरः ॥ १२
ावदिन्द्रादयो देवाः स्वीयाटोपसमन्विताः।
न्द्रश्चैव यमश्चैव कुबेरो वरुणस्तथा।
न्ये ते लोकपालाश्च स्वीयचिह्नसमन्विताः ॥ १३
सवश्च तथा सूर्या ऋषयश्च तथा शुभाः।
द्यो गङ्गादयः सर्व्वाः समुद्राः सर्व्व एव हि ॥ १४
स्वर्व्वाप्सरसस्तत्र नागाः सर्व्वे तथाविधाः।
नावसरमाज्ञाय समाजग्मुर्मुदान्विताः ॥ १५
स्मिन् दिने तदा तत्र शोभाभावसमन्विताः।
। व्यूहं तदा चक्रुः स्वीयं स्वीयन्तु भागशः ॥ १६
सार ततस्तस्मात् कैलासात् पर्व्वतोत्तमात्।
ः परमसन्तुष्टो देवान् कृत्वा पुरस्तदा ॥ १७
देवाश्च तदाज्ञप्ता यथायोग्यं पुरःसराः।
भवंस्ते तु वादित्रैर्युक्ता नादं परस्परम्।
देव कथयामासुर्येन तुष्येच्च शङ्करः ॥ १८
हमवानपि तत्रैव स्वानाहूय सुहृद्वृतः।
विधिवत् कारयामास मण्डपादिविधिं क्रमात् ॥ १९
विधानि विचित्राणि तोरणानि तथा पुनः।
जांश्चैव विचित्रांश्च चकार परया मुदा ॥ २०
र्व्वताश्च तथा रम्या जङ्गमं रूपमास्थिताः।
पत्न्यश्चैव पुत्राश्च पुत्र्यश्चैव तथाविधाः ॥ २१
स्वालङ्कारसंयुक्ताः सर्व्वे हर्षसमाकुलाः।
ार्थं चक्रुश्च तत्रत्यं हिमवद्गृहसम्भवम् ॥ २२
च्छोभां वर्णितुं नैव शक्नोमि ऋषिसत्तमाः।
न्याञ्चैव तु दानार्थं सुस्नाप्यालं चकार सः ॥ २३
वाहविधियोग्यञ्च वेश्म सम्पाद्य संस्थितः।
देवतापूजनं कृत्वा नानोपकरणानि च ॥ २४
विधाय तदा सर्व्वं प्रेषयन् गन्धमादनम्।
वकन्तु तथान्यञ्च शीघ्रमायातु वै शिवः।
तीक्षां वरवर्गस्य कृत्वा च हिमवान् स्थितः ॥ २५
स्मिन् समये रुद्रः समीपे स्वबलैर्वृतः।
आजगाम महावीर्य्यैः सर्व्वसिद्धिसमन्वितः ॥ २६
तमागतं तदा श्रुत्वा हिमवान् बलसंयुतः।
जगाम सम्मुखस्तत्र धन्योऽहमिति चिन्तयन् ॥ २७
देवसेनां तथा दृष्ट्वा हिमवान् विस्मयं गतः।
देवा हि तद्बलं दृष्ट्वा विस्मयं परमं गताः ॥ २८
पर्व्वतानां तथा सेना देवानाञ्च तथा पुनः।
मिलित्वा तु तथा रेजे मन्यते सागराम्बुधौ ॥ २९
परस्परं मिलित्वा तु देवाश्च पर्व्वतास्तथा।
कृतकृत्यं तथात्मानं मेनिरे परया मुदा ॥ ३०
रचित्वा शिविरं सम्यक् संस्थाप्य देवताबलम्।
जगाम पर्व्वतस्तत्र यत्र स्याद्विधिवेदिका ॥ ३१
कारयित्वा विशेषेण चतुष्कं तोरणैर्युतम्।
स्नानदानादिकं कृत्वा प्रतीक्षामकरोत् तदा ॥ ३२
मेनापि च तथा तत्र चन्द्रशालामुपागता।
हर्षभारसमायुक्ता शिवं भक्तसुखावहम्।
द्रष्टुकामाभवत् तत्र नारदेन समन्विता ॥ ३३
प्रथमञ्च निरीक्षामि हर्षनिर्भरमाश्रिता।
कीदृशं शिवरूपञ्च यदर्थं तप उत्तमम् ॥ ३४
तत्त्वज्ञानपरा सा च दर्शनार्थं शिवस्य च।
स्थिता शिरोगृहं देवी मेना मुनिवरस्तथा ॥ ३५
शिवोऽपि च तदा तस्या ज्ञात्वाहङ्कारमात्मनः।
तथैव दर्शयामास बुद्धिभ्रंशो भवेद्यथा ॥ ३६
एतस्मिन् समये सेनां देवानां परमां शुभाम्।
निरीक्षन्ती तदा मेना दृष्ट्वा हर्षसमाकुला।
एतत्पतिः शिवः साक्षात् कीदृशो वै भविष्यति ॥ ३७

सूत उवाच।

श्रूयतामृषयः श्रेष्ठाः कथाञ्च कौतुकावहाम्।
प्रथमञ्चैव गन्धर्व्वाः सुन्दराः सुभगास्तथा ॥ ३८
वस्त्रैश्च विविधैर्युक्ता नानालङ्कारभूषिताः।
नानावाहनयुक्ताश्च नानावाद्यपरायणाः।
पताकाभिर्विचित्राभिरप्सरोगणसंयुताः ॥ ३९
दृष्ट्वा विश्वावसुं तत्र तत्पतिं परमं शुभम्।
दृष्ट्वा च हर्षिता चासौ किं शिवोऽयमिति चाब्रवीत् ॥ ४०
देवानां गायकश्चायं कृतो देवः सनातनः।
इत्येवं नारदस्तस्यै ह्युवाच ऋषिसत्तमः ॥ ४१
एवं श्रुत्वा तदा मेना विचारे तत्पराभवत्।

इतश्चाप्यधिको यो वै शिवः कीदृग्भविष्यति ॥ ४२
एतस्मिन्नन्तरे यक्षा मणिग्रीवादयश्च ये ।
तेषां सेना तया दृष्टा शोभादिद्विगुणीकृता ॥ ४३
तत्पतिश्च कुबेरश्च दृष्ट्वा शोभासमन्वितम् ।
अयं रुद्रस्तथाऽन्वेति वरुणश्च समागतः ॥ ४४
ततोऽपि द्विगुणां शोभां दृष्ट्वा रुद्रस्तथा न हि ॥ ४५
जगाम धर्म्मराजश्च सर्व्वशोभासमन्वितः ।
शोभाञ्च द्विगुणां तस्य दृष्ट्वा सोऽयं तथा न हि ॥ ४६
तावदिन्द्रः समायातः सर्व्वदेववरः शुभः ।
किं वर्ण्यते तदीया च शोभा वै द्विगुणीकृता ॥ ४७
यो योऽप्यग्रे समायाति शोभया द्विगुणीकृतः ।
तं दृष्ट्वा शङ्करः सोऽयं नायं रुद्रस्य किङ्करः ॥ ४८
तावत् सूर्य्यः समायातः सर्व्वदेवमयः शुभः ।
तेजसा दीप्तिमान् लोके दृष्ट्वा रुद्रस्तथा न हि ॥४९
तावच्चन्द्रः समायातो ग्रहैः सर्व्वैः समन्वितः ।
ततश्च द्विगुणां शोभां रुद्रोऽयं नो भवेदिति ॥ ५०
मेना सेने च तां पुत्त्रीं धन्यां कुलसुखावहाम् ।
एतेषां यः पतिः सो वै तस्याः पतिर्भविष्यति ॥ ५१
तस्याः किं वर्ण्यते भाग्यमपिवर्षशतैरपि ॥ ५२
तावद्ब्रह्मा समायातस्तेजसां राशिरुत्तमः ।
ऋषिवर्य्ययुतः साक्षाद्धर्म्मपुञ्ज इव स्थितः ॥ ५३
अयं वै भविता नेति तावद्विष्णुः समागतः ।
मेघश्यामश्चतुर्व्वाहुः पीताम्बरधरः शुभः ॥ ५४
श्रीवत्सवक्षा लक्ष्मीशः शङ्खादिलक्षणैर्युतः ।
मुकुटादिविभूषणैर्युक्तः सिद्धाष्टकसमन्वितः ॥ ५५
कोटिकन्दर्पलावण्यः प्रसन्नमुखपङ्कजः ।
राजीवलोचनः शान्तो निजभक्तसमन्वितः ॥ ५६
पक्षीन्द्रवाहनः श्रीमानप्रमेयपराक्रमः ।
तं दृष्ट्वा चकिता चासीद्धन्याहं सत्पथं गता ॥ ५७
सोऽयं शिवो भवेत् साक्षान्नेति तां नारदोऽब्रवीत् ।
अतोऽधिको भवेत् सो वै वर्णितुं नैव शक्यते ॥ ५८
तावच्च ऋषयो याता भृग्वाद्याश्च मुनीश्वराः ।
गङ्गादिसर्व्वतीर्थैश्च शिष्यशाखासमन्विताः ॥ ५९
छायन्ते कल्पवृक्षाश्च गच्छन्तः कामपूरकाः ।
सुरभ्यादिपरैर्युक्तास्तेजसां राशयः परे ॥ ६०
रूपान्तस्ते परंब्रह्म ह्यनूचानाः सुखावहाः ।
तन्मध्ये चैव वागीशं दृष्ट्वा सोऽयं भविष्यति ॥ ६१
नायमन्यः समायाति निर्गुणो गुणवान् हरः ।
इत्येवं नारदाच्छ्रुत्वा मेना मानवती मुदा ॥ ६२
त्रैलोक्यसारं यच्चासीत् तद्दृष्टं हि मया पुनः ।
अतो रुद्रश्च यो वै स्यात् कीदृक् सोऽयं भविष्यति
तावद्रुद्रः समायातो नारदस्तामुवाच ह ।
अयं वै शङ्करः साक्षात् पश्यतां सुन्दरि त्वया ॥
हर्षिता सा तदा तत्र ददर्श शङ्करं मुदा ।
वात्यारूपधराः केचिदायाता मर्म्मरस्वराः ॥ ६५
अङ्गुल्या दर्शयामास नारदस्तां शुभाननाम् ।
हरस्य सेवकान् पश्य पुनरन्यान् विलोकय ॥ ६६
तावदन्ये समायाता भूत-प्रेत-पिशाचकाः ।
वक्रतुण्डास्तथा केचिद्विरूपाश्च तथापरे ॥ ६७
करालाः श्मश्रुलाः केचित् खञ्जाश्च लोमशाः परे
दण्डपाशधराः केचित् केचिन्मुद्गरधारकाः ॥ ६८
विरुद्धवाहनाः केचिद्दुरालापकरास्तथा ।
डमरून् वादयन्तो वै गल्लनादं तथापरे ॥ ६९
तालनादकृतः केचिच्छृङ्गीनादं तथापरे ।
असंख्यातास्तथायातास्तान् दृष्ट्वा त्राससंयुता ॥
भवन्ती तत्क्षणादेव तथा दृष्टास्तया तदा ।
तान् दृष्ट्वा हृदयं तस्याः शीर्णमासीत् समाकुलम्
तन्मध्ये शङ्करं देवं निर्गुणं गुणवत्तरम् ।
वृषभस्थं पञ्चवक्त्रं त्रिनेत्रं भूतिभूषितम् ॥ ७२
कपर्द्दिनं चन्द्रमौलिं दशहस्तं कपालिनम् ।
व्याघ्रचर्म्मोत्तरीयञ्च पिनाकपाणिनं शिवम् ॥ ७
खर्परेण तथा युक्तं शङ्खादिभूषणैर्युतम् ।
गजचर्म्म वृत्ते यस्य तीव्रमक्षिसमन्वितम् ॥ ७४
निद्रितं कम्पयुक्तञ्च शिवोऽयं मुनिरब्रवीत् ।
तदीयं वचनं श्रुत्वा वाताहतलता यथा ॥ ७५
सा पपात तदा भूमौ मेना दुःखभरा सती ।
किमिदञ्च कृतं दुष्टे धिक् त्वां माञ्च दुराग्रहे ॥
इत्युक्त्वा मूर्च्छिता तत्र विसंज्ञा ह्यभवत् क्षणात्
प्रयत्नैर्विविधैः सा वै संज्ञां लेभेऽथ मेनका ॥
इति श्रीशैवे महापुराणे ज्ञानसंहितायां विवर्ण्य
वर्णनं नाम षोड़शोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः।

सूत उवाच।

त्वां लब्ध्वा पुनः सा च तिरस्कारमथाकरोत्।
रदस्याथ पुत्र्याश्च निनिन्द चरितं तथा।
मं नारदस्यैव कथयामास दुर्व्वचः॥ १

मेनोवाच।

मन्तु त्वया ह्युक्तं शिवश्चेमां वरिष्यति।
ाद्धिमवतः कृत्यं पूजार्थं विनिवेशिता॥ २
ो दृष्टं फलं सद्यस्तथापि वञ्चिता त्वया।
स्तपस्तया तप्तं दुष्कृतं मुनिभिश्च यत्।
ालैर्ब्धं फलं ह्येतत् पश्यतां दुःखदायकम्॥ ३
करोमि क्व गच्छामि हतन्तु मम जीवितम्।
स्यापि किं गतं नैव ममापि च हतं गृहम्॥ ४
स्ते दीपं तथा गृह्य पतितं कूपके स्वयम्।
वञ्छिन्नमिदानीन्तु सर्व्वं व्यर्थीकृतं मम॥ ५
गता ऋषयो दिव्याः श्मश्रूण्युत्त्रोटयाम्यहम्।
त्यार्श्वे चैव या पत्नी सा धूर्त्ता स्वयमागता॥ ६
षाञ्चैवापराधो न सर्व्वं पुत्र्या कृतं स्वयम्।
म हित्वानया नीतं काचञ्च दुष्टया स्वयम्॥ ७
हित्वा तु चन्दनं सद्यो लेपितः कर्द्दमस्तया।
समुड्डीय काको वै गृहीतो हस्तपञ्जरे॥ ८
हित्वा ब्रह्मजलं दूरे पीतं कूपोदकं तया।
र्य्यं त्यक्त्वा तु खद्योतं गृहीत्वा सुखमीहते॥ ९
ण्डुलांश्च तथा हित्वा कृतन्तु तुषभक्षणम्।
तं त्यज्य तथा तैलमैरण्डं भोजितं स्वयम्॥ १०
ंहसेवां तथा मुक्त्वा शृगालः सेवितस्तया।
ब्रह्मविभूतिं हि दूरीकृत्य तया स्वयम्॥ ११
वितञ्च तथा भस्म चितासम्भवमित्युत।
र्वान् देववरांस्त्यक्त्वा शिवार्थं तप ईदृशम्॥ १२
िक् त्वाञ्च तव बुद्धिं धिक् चर्य्यांञ्च ऋषिसत्तम।
क् कुलं धिक् क्रियादाच्यं सर्व्वं तुच्छीकृतं तया१३
हन्तु शुचतु ह्येतन्मरणान्तु ममैव ह।
विवर्ज्जितानां तथा राजा नेक्षद्दरं कथं न हि॥ १४
ऋषयश्च किमर्थं मे दर्शयन्ति मुखं स्वयम्।
धितं किञ्च सर्व्वैस्तु मिलित्वा पातितं कुलम्॥ १५

बन्ध्याहं न कथं जाता गर्भो न गलितः कथम्।
अथवा न मृता चाहं मृता न पुत्रिका कथम्॥ १६
राक्षसैर्वा कथं नैव भक्षिता गहने वने।
हता वा न कथं केश्चिन्मृता व्याघ्रवरान्न किम्॥ १७
छेदयामि शिरस्तेऽद्य किं करोमि कलेवरम्।
त्यक्ष्यामि वा कुतो यामि हा हा च जीवितं हतम्१८
इत्युक्त्वा पतिता सा च नायाति भर्त्तृसन्निधौ।
एतस्मिन् समये ब्रह्मा ह्याजगाम स्वयं तदा॥ १९
नारदोऽपि वचस्तस्या उवाच ऋषिसत्तमः।
यथार्थं सुन्दरं रूपं न ज्ञातं शङ्करस्य च।
तिष्ठ दूरे तथा तच्च मेना वचनमब्रवीत्॥ २०
ब्रह्मा पुनस्तथागत्य कथयामास तां प्रति।
श्रोतव्यञ्च त्वया मेने मदीयं-वचनं शुभम्॥ २१
शङ्करो लोककर्त्ता च हर्त्ता पालयिता स्वयम्।
न त्वं जानासि तद्रूपं कथं दुःखं समीहसे॥ २२
इत्युक्त्वा च तथा सा तु ब्रह्माणं वाक्यमब्रवीत्।
किमर्थन्तु भवन्तश्च व्यर्थीकर्त्तुं समुद्यताः॥ २३
रूपं तस्याः परं नाम हन्यतां वा स्वयं पुनः।
न वक्तव्यं भवद्भिस्तु शिवाय दीयतामिति॥ २४
इत्युक्ते च तदा देवा इन्द्राद्या लोकपालकाः।
समागत्य तदा सर्व्वे वचनञ्चेदमब्रुवन्॥ २५
अयं वै परमः साक्षाच्छिवः परमदुःखहा।
कृपया च भवत्पुत्र्या दर्शनं शङ्करस्य च।
जातञ्चाद्य कृपाहेतु नान्यथा दर्शनं कुतः॥ २६
अथोवाच पुनर्म्मेना हन्यतां पुत्रिका शुभा।
न देया च मया सम्यक् शङ्कराय कुरूपिणे॥ २७
इत्युक्ते च तथा तत्र ऋषयः सप्त एव ते।
ऊचुस्ते वचनं सुभ्रु मध्ये वयमुपागताः॥ २८
विरुद्धञ्चैव यत् कार्य्यं वयं मन्यामहे कथम्।
अयं वै परमो लाभो दर्शनं शङ्करस्य च॥ २९
दानपात्रं तथा भूत्वागतश्च मन्दिरे तव।
अतः शुभतरं किं नु शिवो द्वारमुपागतः॥ ३०
इत्युक्ते च पुनर्म्मेना ऋषिवाक्यं निराकरोत्।
शस्त्रैर्वा घातयाम्यद्य न दास्ये शङ्कराय व॥ ३१
हिमालयः समागत्य विकलासि कथं प्रिये।
के के समागतास्तीहं कथञ्चैतान् विकत्थसे॥ ३२

शङ्करस्तु मया ज्ञातः सर्व्वेषां प्रतिपालकः।
निग्रहानुग्रहौ कर्त्ता सम्पूज्यो जगतामिह ॥ ३३
मुञ्च दुःखं तथा कार्य्यं कर्त्तुमिच्छसि साम्प्रतम्।
तेनोक्ते च तथा तस्मै मेना वाक्यमुपाददे ॥ ३४
हिमवन् श्रूयतामेतच्छ्रुत्वा कर्त्तुमिहार्हसि।
गृहीत्वा तनुजान्त्वेतां बद्ध्वा कण्ठे तु पर्व्वतात् ॥३५
गत्वा च सागरे स्वामिन् क्षिप्त्वा त्वञ्च सुखी भव।
न देया च शिवे पुत्री निश्चितं मे वचः पुनः ॥ ३६
यदि दास्यसि त्वं पुत्रीं त्यक्ष्याम्येतत् कलेवरम्।
इत्युक्ते च तया तत्र पार्व्वती स्वयमागता ॥ ३७

पार्व्वत्युवाच।

मातस्ते विपरीता वै बुद्धिस्त्वां समुपागता।
धर्म्मावलम्बना त्वन्तु कथं धर्म्मं प्रहास्यसि ॥ ३८
अयं वै परमः साक्षात् सर्व्वेषां योनिरुच्यते।
शम्भुश्च शङ्करश्चैव देवानां प्रभुरीश्वरः ॥ ३९
अधिष्ठानं तथा कर्त्ता पालकश्च सनातनः।
यदग्रे देवताः सर्व्वा आयाताः किङ्करीकृताः ॥ ४०
अतः शुभतरः को नु वद त्वं हितकारिणि।
उत्तिष्ठ त्वं प्रयत्नेन जीवितं सफलं कुरु ॥ ४१
देहि दानं शिवायैव ह्याश्रमं सार्थकं कुरु।
त्यज दुःखं परं तापं हित्वा सुखमवाप्नुहि ॥ ४२
यदि न दास्यसि त्वञ्च न वृणोऽन्यं तथोत्तमम्।
सिंहभागं कथं लभ्येच्छृगालः परमं शुभे ॥ ४३
मनसा वचसा देवि कर्म्मणा वा हरः स्वयम्।
वृतो वृतो वृतश्चैव यदिच्छसि तथा कुरु ॥ ४४
उमावचनमाकर्ण्य गृहीत्वा तत्कलेवरे।
मुष्टिभिः कूर्परैश्चैव दन्तान् घर्षयती तथा।
ताड़यामास तां पुत्रीं विकला इव सा तदा ॥ ४५
ये चान्ये ऋषयश्चैव नारदाद्याश्च ये पुनः।
तद्धस्तात् तां परिच्छिद्य नीत्वा दूरतरं स्थिताः।
ताञ्च तथाविधां दृष्ट्वा भर्त्सयामास वै तदा ॥ ४६
किमेनाञ्च करिष्यामि दुष्टां ग्रहवतीं ध्रुवम्।
गरं ददामि तां पुत्रीं क्षिपामि वाथ कूपके ॥ ४७
शस्त्रैर्वां छेदयाम्येतां सागरे वा क्षिपाम्यहम्।
स्वीयं वाथ शरीरं वै त्यक्ष्यामि वाथ कूपके ॥ ४८
वरश्च कीदृशो लोके लब्धश्च दुष्टया पुनः।

न माता न पिता बन्धुर्न भ्राता न च गोत्रजः।
न रूपं न च चातुर्य्यं न गृहञ्च शुभं पुनः।
न वस्त्रं नाप्यलङ्कारः सहाया न शुभास्तथा ॥ ५
वाहनं न शुभञ्चास्य न वयो न धनं तथा।
न पावित्र्यं न विद्या च किं दृश्यमेकमेव यत् ॥ ५
किं विलोक्य मया पुत्री दीयते किं करोम्यहम्।
एतस्मिन् समये विष्णुः समागत्याब्रवीदिदम् ॥ ५
पितॄणां त्वं शुभा पुत्री मानसी गुणसंयुता।
पत्नी हिमवतः साक्षाद्ब्रह्मकुलसमुद्भवा ॥ ५३
सहायाश्चेदृशा लोके धन्यासि किं वदाम्यहम्।
धर्म्मस्याधारभूतासि कथं धर्म्मं प्रहास्यसि ॥ ५४
देवैश्च ऋषिभिश्चैव ब्रह्मणा वा मया तथा।
विरुद्धं कथ्यते किञ्च त्वया शुभतरं नु किम् ॥ ५५
शिवं त्वञ्च न जानासि निर्गुणः सगुणो ह्यभूत्।
तेनैव निर्म्मिता देवी प्रकृतिर्मूलकारणम् ॥ ५६
तत्पार्श्वे च तथा तेन निर्म्मितः पुरुषोत्तमः।
ताभ्याञ्चाहं तथा ब्रह्मा ततश्च गुणरूपतः ॥ ५७
अवतीर्णः स्वयं शम्भुर्लोकानां हितकारकः।
ततो वेदास्ततो देवा यत् किञ्चिद्दृश्यते जगत् ॥
स्थावरं जङ्गमं यच्च तत् सर्व्वं शङ्करादभूत्।
तद्रूपं वर्ण्यते लोके ज्ञायते केन वा पुनः ॥ ५९
मया न ब्रह्मणा यो वै वर्षाणान्तु सहस्रकम्।
तस्य पारो न वै लब्धो ह्यन्येन वर्ण्यते कथम् ॥
सत्यज्ञानमयश्चैव व्याप्यव्यापक एव च।
अजरश्चामरश्चैव सर्व्वाध्यक्षः समीपगः ॥ ६१
अहं ब्रह्मा हरश्चैव देवाः सर्व्वे पुरातनाः।
सूर्य्यश्च चन्द्रमाश्चैव ग्रहाः सर्व्वे शुभावहाः।
पर्व्वताश्चैव नद्यश्च वृक्षाश्च धनदस्तथा ॥ ६२
ब्रह्मादि-तृणपर्य्यन्तं यत् किञ्चिद्दृश्यते जगत्।
तत् सर्व्वं शिवतो जातं नात्र कार्य्या विचारणा ॥
अरूपश्च सरूपश्च जायते शङ्करः स्वयम्।
वीजाद्वृक्षप्ररोहश्च नानात्वमुपजायते।
अन्ते च फलमेव स्यात् तस्मात् फलमुदाहृतम् ॥
आदौ मध्ये शिवश्चैव अन्ते शिव उदाहृतः।
सर्व्वं शिवमयञ्चैतच्छिवः सर्व्वमयस्तथा ॥ ६५
सूत्रे चैव तु पुष्पाणि पुष्पेषु सूत्रमुच्यते।

एवं शिवस्य सर्व्वेषु शिवे सर्व्वं तथा स्मृतम् ॥ ६६
अहं शिवः शिवश्चाहं त्वञ्चापि शिव एव च।
सर्व्वं शिवमयं ब्रह्म शिवात् परं न किञ्चन ॥ ६७
अज्ञानादन्यभावश्च ज्ञानिभ्यः समुदाहृतः।
कारणं कार्य्यवस्तुत्वे एक एव न चापरः ॥ ६८
कारणञ्च शिवः साक्षात् कार्य्यं दृश्यं मतं बुधैः।
अज्ञानाच्चैव कार्य्यं तु कारणे भेद इष्यते।
ज्ञानिनां नैव भेदोऽस्ति सर्व्वं शिवमयं जगत् ॥६९

इति श्रीशैवे महापुराणे ज्ञानसंहितायां मेना-
ज्ञानयोगो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः।

विष्णुरुवाच।

तस्माच्च शिवादन्यद्दृश्यं नैव भवेदिह।
स्तुतस्तु शिव इति प्रसिद्धं वेदसम्मतम् ॥ १
ज्ञानादन्यथाभावो ज्ञाने वस्तु प्रदृश्यते।
थाणौ तु पुरुषभ्रान्तिरज्ञानादथ जायते।
ने जाते तथा स्तम्भे वस्तुज्ञानप्रदर्शनम् ॥२
ज्वौ तु सर्पविज्ञानमज्ञानसम्भवं नृणाम्।
ज्ञाते चैव विज्ञाने रज्जुरेव न चान्यथा ॥ ३
क्तौ तु रजतज्ञानं ध्यायन् पश्यति कश्चन।
विके च समुत्पन्ने शुक्तिरेव न संशयः ॥ ४
थैवाज्ञानजा बुद्धिः शिवादन्यत्र या भवेत्।
वञ्च ज्ञानदृष्टीनां शिवः शिवशिवस्तथा ॥ ५
न्यन्निदर्शनं देवि श्रूयताञ्च वदाम्यहम् ॥ ६
था च नटकः कश्चिद्देशान्तरसमीहया।
ह्णाति विविधं वेशं वस्तुत्वे नट एव च ॥ ७
ह्मणां मनो हृत्वा प्रतार्थ्य धनमाहरेत्।
ाता विहसते तत्र नटिनैवाहृतं धनम् ॥ ८
थैव ज्ञानवान् देवि शिवादन्यं न पश्यति।
ज्ञानादिविधं रूपं पश्यतीति सुनिश्चितम् ॥ ९
टो वस्त्राण्यनेकानि दधाति विविधेच्छया।
स्त्राणि विविधानीह धारकस्त्वेक एव सः ॥ १०
थैव शिवरूपत्तु संयोगादिविधं भवेत्।
स्तुतो बन्धनं नास्ति ह्याकाररहिते शिवे ॥ ११
यावद्देहं प्रजावेत तावद्दे बन्धनं दृढ़म्।
निवृत्ते चाप्यहङ्कारे कर्त्ता शिव उदाहृतः ॥ १२
यथा च स्फटिकश्चैव संयोगादिविधो भवेत्।
तथा प्रकृतिसंयोगाच्छिवस्यानेकता मता ॥ १३
तथा विविक्तता तस्या ग्रहणे मोचने शिवे।
प्रकृतेश्च परंब्रह्म यत् तच्छिव उदाहृतम् ॥ १४
स एव गुणरूपेण ह्यवतीर्णो हरः स्वयम्।
तस्य तत्त्वं न जानीमो न जानीमो वयं प्रभोः ॥ १५
तस्मात् त्वं हिमवत्पत्नि दुःखं मुञ्च शिवं भज।
तस्यास्तु कोमलं किञ्चिन्मनो विष्णुप्रबोधितम् ॥१६
एतस्मिन्नन्तरे रुद्रो नारदेन प्रबोधितः ॥ १७
तावत् पार्श्वं गतो यावद्रुद्रेण रूपमुत्तमम्।
धृतन्तु भक्तवात्सल्यात् कृपालुत्वं प्रदर्शितम् ॥ १८
सुन्दरं सुभगं दृष्ट्वा मोहं प्राप्ता यथा पुरा।
शिवं पश्य पुनस्तत्र नारदो वाक्यमब्रवीत् ॥ १९
सा ददर्श शिवं तत्र श्रूयतां कीदृशं प्रभुम्।
सूर्य्यकोटिप्रतीकाशं सुनेत्रैर्भूषणैर्युतम् ॥ २०
मुकुटेन विराजन्तं विचित्रवसनं शुभम्।
वाहनस्य तथा शोभा वर्णितुं नैव शक्यते ॥ २१
सुप्रसन्नं सुहासञ्च सर्व्वैर्देवगणैर्युतम्।
सूर्य्येण च्छत्रितो योऽसौ चन्द्रेण वीजितस्तथा ॥२२
सिद्धयोऽष्टौ प्रनृत्यञ्च कुर्व्वन्ति स्म तदग्रतः।
गङ्गा च यमुना चैव चामरे दधतुः शुभे ॥ २३
ब्रह्मा चैव तथा विष्णुरिन्द्राद्या देवतास्तथा।
स्वीयं स्वीयं तथा वेशं सम्भूष्य पुरतोऽचरन् ॥ २४
जय जयेति भाषन्तो नानाऋषिगणास्तथा।
परंब्रह्म गणान्तस्ते पताकाभिरलङ्कृताः ॥ २५
विश्वावसुमुखास्तत्र ह्यप्सरोगणसंयुताः।
गायन्तोऽप्यग्रतस्तस्य शोभायुक्ताः परस्परम्।
गणास्तत्र च वाद्यानि मृदङ्गादिक्रमेण तु ॥ २६
ह्यकुर्व्वन्त परं तत्र तत्त्वानि पुरतो ययुः।
समुद्राश्च तथा नद्यो नानाभूषाविभूषिताः ॥ २७
तस्मिंश्च समये तत्र शोभा चास्य महात्मनः।
जाता तां वर्णितुं को वा शक्नोति ऋषिसत्तमाः ॥ २८
तं दृष्ट्वा च तथा मेना क्षणं चित्रगता इव।
यथा च वर्णितुं देवैर्यद्रूपं तत् तथैव हि ॥ २९

धन्या पुत्री मदीया च यथासौ परवान् कृतः।
वर्णनञ्च तदा तस्य कृत्वा लज्जापराभवत् ॥ ३०
शिवोऽपि च तथा द्वारि गतो देवगणैः सह।
मेना तं पूजयामास ब्रह्म-विष्णुसमन्वितम् ॥ ३१
तद्वत् स्त्रियः समाजग्मुर्हित्वा कामाननेकशः।
अञ्जनं कुर्वती काचिच्चूर्णेन संयुता ययौ ॥ ३२
काचित् तु स्वामिनः सेवां विहाय सखिसंयुता।
चामरेण तथा युक्ता दर्शनार्थं शिवस्य च ॥ ३३
काचित् तु बालकं हित्वा ह्यल्पं द्रष्टुमाययौ।
रशनां बध्नती काचित् तथैव संयुता ययौ ॥ ३४
वस्त्रञ्च विपरीतञ्च धृत्वा काचिदुपाययौ।
काचिद्धस्ते शलाकाञ्च धृत्वाञ्जनसमन्विताम् ॥ ३५
आदर्शञ्च तथान्यस्मिन् नीत्वा नेत्रमुपाययौ।
काचित् तु भोजनार्थञ्च स्थितञ्च स्वामिनं तदा ॥३६
हित्वान्नेन समायुक्ता दर्शनार्थं प्रभोरिति।
दोहनार्थं स्थिता काचित् तद्धित्वा ह्यपरा ययौ॥३७
काचित् तु कामिनी पादं रञ्जयन्ती यदा तदा।
शुलोद्घोषञ्च तद्धित्वा दर्शनार्थमुपागता ॥ ३८
इत्यादिविविधं कार्य्यं हित्वान्याः समुपागताः।
दृष्ट्वा च शाङ्करं रूपं मोहं प्राप्ताश्च पुत्तिकाः(क)॥३९
यथाऽचेतनास्तिष्ठन्ति तथा ताश्च स्थितास्तदा।
क्षणमात्रं तदा स्थित्वा वचनञ्चेदमब्रुवन् ॥ ४०
सम्यक् कृतन्तु पार्व्वत्या नान्यथा यद्भवेदिह।
अहो पश्यत किं रूपं वर्णनीयं कथं भवेत् ॥ ४१
यथार्थं नाम सत्यन्तु दृश्यते नान्यथा क्वचित्।
शिव इति च विख्यातं दर्शनाच्च लभेच्छिवम् ॥ ४२
नेत्राणि सफलान्यासन् हिमवत्पुरवासिनाम्।
यो व पश्यत्यदो रूपं तस्यैव सार्थकं भवेत् ॥ ४३
तस्यैव सफलं जन्म तस्यैव सफलाः क्रियाः।
येन दृष्टः शिवः साक्षात् सर्व्वपापप्रणाशकः ॥ ४४
पार्व्वत्या साधितं सर्व्वं शिवार्थन्तु तपः कृतम्।
धन्येयं कृतकृत्येयं शिवं प्राप्य पतिं सदा ॥ ४५
प्रीणयिष्यति सा नित्यमचिन्त्यसुखहेतुकम्।
यदीदं युगलं ब्रह्मा सङ्गमायाक्षमो भवेत् ॥ ४६
तदा च सकलोऽप्यस्य श्रमो निष्फलतामियात्।

(क) अत्र ताः पुनरिति पुत्रिका इति च क्वचित् पाठः।

सम्यक् कृतं तथा तेन मेलितं युग्ममुत्तमम्।
अनया यत् तपस्तप्तं सार्थकं सकलं कृतम्।
विना तु तपसा ह्येतत् प्राप्तञ्चैव सुदुर्लभम्।
लक्ष्मीर्नारायणं लेभे स्वामिनञ्च तथा शिवा
सुवर्णं मणियुक्तञ्च राजते नितरां यथा ॥
तथासौ पार्व्वती देवी हरं प्राप्य सुभूषिता
इत्येवं वचनं श्रुत्वा चन्दनैश्चाक्षतैरपि ॥ ५
शिवञ्चैवार्चयामासुर्धन्योऽयमिति चाब्रुवन्।
कथास्तथाविधाः शृण्वन् शिवो द्वारि समा
सर्व्वे देववरास्तत्र ह्यच्युताद्याः शिवं प्रति।
स्थितास्तत्र शिवस्यार्थे कश्चिच्च कौतुकं पुनः
करिष्यतीति तन्मत्वा सावधानतया तथा।
एतस्मिन्नन्तरे देवी मेना हर्षसमन्विता ॥ ५
परिधाय शुभं वेशं लज्जिता देवसन्निधौ।
आगत्य शिवपूजाञ्च कृत्वा शीघ्रमपावृता ॥ ५
वस्त्रं शिवस्य कण्ठे तु कृत्वा देवभिया शुभा
कर्षयन्ती ह्यणं तत्र हास्यं कृत्वा गृहं ययौ ॥
चतुष्के च तथा ब्रह्मा ऋषिभिर्वेष्टितः स्वयम्
तावदेव शिवस्तत्र ह्याजगाम प्रहर्षितः ॥ ५
तावच्च हिमवान् स्नात्वा सपत्नीकः स्वयं ग
ब्रह्मा सर्व्वञ्च तत्रत्यं कारयामास वै तदा ॥
प्रयोगादि विधायैव वेदोच्चारणतत्पराः।
ऋषयः पाठयामासुर्गोत्राणि परयोर्हिताः
आवाहनं तथा पाद्यं सर्व्वञ्च विधिपूर्व्वकम्
दुकूलं सुन्दरं तेन दत्तं तस्मै महात्मने ॥ ५९
तिलकं पुष्पहारञ्च काञ्चनस्य यथाविधि।
पुनश्चतुष्कमासाद्य दम्पती तौ मुदान्वितौ ॥
संस्थाप्याग्निं पुनस्तत्र वैवाहमकरोद्विधिम्।
अक्षतारोपणं तत्र स्त्रियश्चक्रुस्तदाज्ञया ॥ ६
प्रदक्षिणं तथा चाग्नेश्चतुर्द्धा च कृतं तदा।
ब्रह्मणः स्खलनं जातं शिवाङ्गुष्ठप्रदर्शनात् ॥
तद्गोपितं तदा तेन ह्युत्सङ्गे पतितञ्च यत्।
ततो जातास्त्वसंख्याता वटुका ब्रह्मसूत्रकाः
जटादण्डधरास्ते च बद्धकच्छाः सहस्रशः।
नमस्कृत्य च ब्रह्माणं स्थितास्ते तु तदग्रतः

(क) होचाणि विविधान्यपीति पाठान्तरम्।

शिवोऽपि वटुकान् दृष्ट्वा ब्रह्मणे कुपितस्तदा ।
सम्प्रार्थितस्तदा देवीं गङ्गां दत्त्वा तु पावितः ॥ ६५
अनुज्ञश्च पुनस्तत्र स्थापितश्च पितामहः ।
वटुकान् सूर्य्यशिष्यांश्च कृत्वा कार्य्यमथाकरोत् ॥ ६६
वटुका वर्ज्जितास्तत्र सूर्य्यसेवापरायणाः ।
रथपृष्ठे रथाग्रे च धावन्ति ते तपस्विनः ॥ ६७
ब्रह्मचारिस्वरूपेण स्थितास्ते वेदपारगाः ।
अवशिष्टञ्च यत् कृत्यं कारयामास वै तदा ॥ ६८
अनुज्ञाञ्चैव दत्त्वा तु कन्यायै स पितामहः ।
ध्रुवस्य दर्शनं तत्र कारयामास वै तदा ॥ ६९
पुनः स्वाप्यासने देवं चक्रुः स्वस्त्ययनं शुभम् ।
वेदोक्ता स्वाशिषो दत्त्वा वर्द्धाप्य च पुनः पुनः ॥ ७०
ते देवाश्च तदा देवीं जगतो मातरं शिवाम् ।
नमस्कृत्य पुनस्ते वै स्थितास्ते शङ्करं पुनः ॥ ७१
नमस्कृत्याब्रुवंस्तत्र शिव त्वं जगतः पिता ।
इयञ्च जगती माता त्वारभ्य दिनमद्यतः ॥ ७२
सर्व्वेव च पुनर्द्देवा गन्धर्व्वाप्सरसस्तदा ।
नृत्यं गानञ्च वाद्यञ्च चक्रुस्ते परया मुदा ॥ ७३
गिरिराजोऽपि तत्रैव सम्पाद्य विधिमुत्तमम् ।
मेने कृतार्थमात्मानं सफलञ्च गृहाश्रमम् ॥ ७४
तौ दम्पती तदा तत्र सम्पूज्य कुलदेवताम् ।
वर्द्धाप्य मण्डपं तत्र स्वहृद्य कौतुकौषधिम् ॥ ७५
ऋषीन् प्रणम्य सर्व्वांस्तांश्चकारानुग्रहं शिवः ।
हिमवानपि तत्रैव यथायोग्यमपूजयत् ॥ ७६
सर्व्वान् देवगणांस्तत्र सेवार्थं ये समागताः ।
यथा च मेनिरे देवा वयं को पर्व्वताग्रतः ॥ ७७
यथा पूजा च सेवा च कृता तेन महात्मना ।
यथा ते मनसि ग्लानिं गतास्ते देवसत्तमाः ॥ ७८
समागतेषु सर्व्वेषु न कश्चिद्दुःखमागतः ।
अहं धन्यः शिवेनैव गिरिणा चानुमानितः ॥ ७९
यथा न कोऽपि तत्रैव मानितश्च परस्परम् ।
ते देवाश्च तथा सर्व्वे वदन्तश्च तपोधनाः ॥ ८०
गिरिराजस्तदा तत्र प्रार्थयामास तांस्तथा ।
ममाद्य सफलं जातं जीवितं धन्यमेव च (क)॥ ८१
मेना चापि पुनस्तत्र स्तुतिं चक्रे शुभानना ।
निन्दां निवर्त्तयामास सर्व्वेषां प्राञ्जलिस्तदा ॥ ८२
धन्याहं कृतकृत्याहं यस्याश्च पुत्रिका शुभा ।
जाता मम कुलं धन्यं पावितन्त्वनया ध्रुवम् ॥ ८३
यदि न पुत्रिका चेयं यूयं वा शिव एव वा ।
कुतस्ते ऋषयो देवा विष्णुश्चैव सनातनः ॥ ८४
इयं वै पुत्रिका धन्या सर्व्वपापापनुत्तये ।
मदीयं दुष्टकृत्यञ्च क्षन्तव्यं जगदीश्वराः ॥ ८५
एवं सम्प्रार्थ्य तान् सर्व्वान् नमस्कृत्याक्षमापयत् ।
गिरिराजोऽपि तान् सर्व्वान् नमस्कृत्य तथावदत् ॥ ८६
ते देवाः पूजितास्तेन प्रसन्नाश्चेदमब्रुवन् ।
धन्योऽसि कृतकृत्योऽसि जीवितं सफलीकृतम् ॥ ८७
येनैव कन्यकादानं शिवायैव समर्पितम् ।
इत्युक्त्वा च पुनर्म्मेनामूचुस्ते विनयान्विताः ॥ ८८
धन्या त्वं गिरिराजस्य पत्नी मेनेति विश्रुता ।
यदुदरात् समुत्पन्नं शिवारत्नं शुभानने ॥ ८९
त्वदीयश्च तिरस्कारः सुखरूपोऽनुमानितः ।
सौभाग्यं वर्द्धतां तेऽद्य गच्छामः सुखमस्तु ते ॥ ९०
गिरिराजं तथैवात्र सम्भाष्य देवतागणाः ।
दत्त्वा च स्वाशिषस्तस्मै वन्दितास्ते ययुर्मुदा ॥ ९१
हिमवत्पुत्रिकां सर्व्वे वाद्य-गानपरायणाः ।
अन्वगच्छन्त ते तत्र गिरिराजादयश्च ये ॥ ९२
मेनाद्याश्चैव तत्पत्न्यो गच्छन्ति स्म शिवां प्रति ।
गन्धमादनपर्य्यन्तं गत्वानुज्ञामवाप्य च ॥ ९३
सोत्सुकाश्च पराजग्मुः स्वस्थानं ते गिरीश्वराः ।
तद्दिनं हि समारभ्य कृतार्थाः पर्व्वता इमे ॥ ९४
सुखञ्च परिवृद्धञ्च वर्णितं नैव शक्यते ।
अच्युताद्याश्च ये देवा ऋषयो निर्म्मलाशयाः ॥ ९५
समागताश्च ते तत्र वाद्य-नृत्यपरायणाः ।
समागत्य तु कैलासं संस्थाप्य मन्दिरे शिवम् ॥ ९६
पत्न्या युक्तञ्च सम्प्रार्थ्य दत्तानुज्ञा ययुश्च ते ।
प्रशंसन्तो विवाहञ्च कृपाञ्चैव शिवस्य च ॥ ९७
स्वपदञ्च तथा सर्व्वे य एतेऽत्र समागताः ।
दृष्ट्वा च शिवयोर्योगं देवानां प्रीतिरुत्तमा ॥ ९८
वर्णितं नैव शक्येत वर्षाणाञ्च शतेन च ।
एतच्चैव समाख्यातं यत् पृष्टोऽहं मुनीश्वराः ॥ ९९
विवाहस्य विधिं सम्यग्देवस्य परमात्मनः ।

(क) धनमेव चेति पाठान्तरम् ।

य एवं शृणुयान्नित्यं श्लोकं श्लोकार्द्धमेव वा ॥ १००
तस्य वै विपुला लक्ष्मीर्जायते नात्र संशयः।
अज्ञानं नाशमायाति वर्द्धन्ते सुखसम्पदः ॥ १०१
आरोग्यं जायते तस्य कन्यालाभो भवेदिह ॥१०२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां पार्व्वतीविवाहवर्णनं नाम अष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः।

ऋषय ऊचुः।

सूत सूत महाभाग किं जातन्तु ततः परम्।
तारकस्य वधश्चैव कथ्यतान्तु त्वयानघ ॥ १

सूत उवाच।

श्रूयतां कथयाम्यद्य कथां पापप्रणाशिनीम्।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यन्ते मानवाः कलौ ॥ २
कैलासमासाद्य शिवां समेत्य
शोभां प्रपेदेऽतितरां शिवोऽपि।
विचारयामास च देवकृत्यं
पीड़ां जनस्यापि स देवदेवः ॥ ३
विचार्य्य च कृतं तेन श्रूयतामृषिसत्तमाः।
शिवोऽपि भगवान् साक्षात् कैलासमगमद्यदा ॥ ४
गणाश्च सर्व्वे तत्रासन् प्रमथाद्या महाबलाः।
वाद्यञ्च विविधं चक्रुर्हर्षनिर्भरमानसाः ॥ ५
देवा अपि च ये तत्रागतास्ते हर्षमागताः।
अतः परं शिवोऽस्माकं कृपाञ्चैव करिष्यति ॥ ६
शिवस्तत्र शिवासार्द्धं नानारङ्गमथाकरोत्।
देवाश्च पीड़ितास्तेन (क) शिवः किं नु करिष्यति ॥७
विलम्बः क्रियते तेन कथञ्चाग्निं समीरयन्।
अग्निर्भूत्वा कपोतस्य रूपं तत्र जगाम ह ॥ ८
गत्वा शिवसमीपञ्च यदा चाग्निनिरीक्षयेत्।
तावदग्निं शिवो दृष्ट्वा भोगादुपरतः स्वयम् ॥ ९
कस्त्वं कपटरूपोऽसि गम्यतां शुक्रमेव मे।
इत्युक्त्वाप्यनघे वीर्य्यं दत्तं तेन महात्मना ॥ १०
कपोती वीर्य्यमादाय चञ्चुपुटगतं यदा।

(क) पीड़िताश्चान्ये इति वा पाठः।

वह्निर्गतो महावीर्य्यं धर्त्तुमक्षम एव सः ॥ ११
तद्वीर्य्यञ्चैव गङ्गायां प्राक्षिपद्दुःखपीड़ितः।
गङ्गयापि च तद्वीर्य्यं दुःसहं परमात्मनः ॥ १
निक्षिप्तञ्च शरस्तम्बे तत्र बालो व्यजायत।
सुन्दरः सुभगः श्रीमान् दर्शनात् सुखदायकः
एतस्मिन्नन्तरे तत्र राजकन्याः समागताः।
षट्संख्याश्चैव स्नानार्थं ताभिर्दृष्टस्तु बालकः
मदीयोऽयं मदीयश्च वदन्तश्च परस्परम्।
सम्पाद्य षण्मुखानीह पीतं स्तन्यं स्वयं तदा
षाण्मातुरस्तदा नाम प्रसिद्धन्तु महात्मनः।
पार्व्वतीनन्दनो नाम प्रथमञ्चाभवत् तदा ॥
अग्निभूश्च ततः पश्चात् ततः स्कन्दोऽभवत् पुर
गङ्गापुत्रस्तदा नाम शरजन्मा ततः परम् ॥ १९
षाण्मातुरस्ततश्चैव नामानि बहुधाभवन्।
ताः कन्यास्तु ततो गच्छ पुत्रं कृत्वा सुहर्षिताः
सर्व्वञ्च नारदाज्ज्ञात्वा शिवात्तुज्ञामवाप्य च।
ते देवाश्च ततो नीत्वा सेनां देवमयीं तदा ॥
स्कन्दञ्च तत्पतिं कृत्वा ययुर्देवास्ततश्च ते।
शोणिताख्यं पुरं गत्वा युद्धं चक्रुः सुदारुणम्।
दशाहन्तु तदा जातं संमर्द्दं कष्टमुत्कटम्।
ततो दैत्याधिपश्चैव हतस्तेन महात्मना ॥ २१
कियन्तोऽपि पलायन्त कियन्तश्चूर्णमागताः (ख)
पातालञ्च गताः केचित् सर्व्वे ते च क्षयं गताः
शोणिताख्ये पुरे तैश्च युद्धमेवाभवत् तदा।
सर्व्वं निष्कण्टकं ह्यासीद्धते तस्मिन् दुरात्मनि।
ते देवाः सुखमापन्नाः स्वं स्वं राज्यमकुर्व्वत।
आनन्दं परमं गत्वा नीत्वा स्कन्दं शिवाग्रतः ॥
आरोप्य प्रणिपातञ्च स्तुतिं कृत्वा पुरः स्थिताः
अकुर्व्वन् पुनरेवात्र प्रफुल्लमुखपङ्कजाः ॥ २५

देवा ऊचुः।

देवदेव महादेव भक्तानामभयप्रद।
तव रूपं न जानीमो गतिं नैव च नैव च ॥
विश्वेश्वर परो देव योऽसि सोऽसि नमोऽस्तु
वरद त्वां महादेव देवदेवं महेश्वरम् ॥ २७

(ख) कियन्तश्च हतास्तत्र कियन्तो वै प्र
इति क्वचित् पाठः।

ो भवाय भव्याय भुवनायोद्भवाय च ।
न्तबलवीर्य्याय भूतानां पतये नमः ॥ २८
हर्त्रे कपिशाङ्गाय अव्ययाय व्ययाय च ।
ाशलिलधाराय आधाराय युगात्मने (क)॥ २९
म्बकाय त्रिनेत्राय त्रिशूलवरधारिणे ।
त्पाय हुताशाय नमो वै परमात्मने ॥ ३०
ङ्कराय वृषाङ्काय गणानां पतये नमः ।
ण्डहस्ताय कालाय पाशहस्ताय वै नमः ॥ ३१
दमन्त्रप्रधानाय शतजिह्वाय ते नमः ।
तं भव्यं भविष्यञ्च स्थावरं जङ्गमञ्च यत् ॥ ३२
देहात् समुत्पन्नं देवसर्व्वमिदं जगत् ।
सि हंसि च भद्रं ते प्रसीद भगवंस्ततः (ख)॥ ३३

ऋषय ऊचुः ।

ो दिग्वाससे तुभ्यं कृतान्ताय त्रिशूलिने ।
कटाय करालाय करालवदनाय च ॥ ३४
रूपाय सरूपाय विश्वरूपाय ते नमः ।
ट्कराय रुद्राय स्वाहाकाराय ते नमः ॥ ३५
र्वप्रणतदेहाय स्वयमप्रणताय च ।
त्यं नीलशिखण्डाय श्रीकण्ठाय नमो नमः ॥ ३६
लकण्ठाय देवाय चिताभस्माङ्गधारिणे ।
ब्रह्मा सर्व्वदेवानां रुद्राणां नीललोहितः ॥ ३७
त्मा च सर्व्वभूतानां सांख्यः पुरुष उच्यते ।
वतानां महामेरुर्नक्षत्राणाञ्च चन्द्रमाः ॥ ३८
षीणाञ्च वशिष्ठस्त्वं देवानां वासवस्तथा ।
ङ्कारः सर्व्ववेदानां ज्येष्ठसाम च सामसु ॥ ३९
रण्यानां पशूनाञ्च सिंहस्त्वं परमेश्वर ।
कदुःखदग्धानां त्राता भव सुरेश्वर ॥ ४०
 लोकहितार्थाय भूतानि परिषिञ्चसि ।
श्वर महाभाग शुभाशुभनिरीक्षक ॥ ४१
ज्ञापय वयं नाथ कर्त्तारो वचनं तव ।
कोटिसहस्रेषु रूपकोटिशतेषु ते ॥ ४२
तं गन्तुं न शक्ताः स्म देवदेव नमोऽस्तु ते ।
 स्तुत्वा तदा देवाः स्कन्दं दत्त्वा स्थिताः पुरः॥ ४३
न्नो भगवान् रुद्र उवाच देवसत्तमान् ।
यदा यदा भवेद्दुःखं तदा यान्तु मुनीश्वराः ॥ ४४
देवाश्च सर्व्व एवैते भजन्तु मां ममाज्ञया ।
इत्याज्ञप्तास्तदा सर्व्वे शिवेन परमात्मना ॥ ४५
ओमित्युक्त्वा निजं धाम जग्मुस्ते देवतागणाः ।

ऋषय ऊचुः ।

अतः परञ्च यज्जातं कथनीयं त्वया सखे ॥ ४६

सूत उवाच ।

कथयामि श्रुतं सम्यग्व्यासाद्विश्वार्थसूचकात् ।
निहते तारके दैत्ये तारपुत्रे सबान्धवे ॥ ४७
स्कन्देन चाप्रयत्नेन तस्य पुत्रा महाबलाः ।
विद्युन्माली तारकाक्षः कमलाक्षश्च वीर्य्यवान् ॥ ४८
तपस्तेपुर्महात्मानो महाबलपराक्रमाः ।
तप उग्रं समास्थाय नियमे परमे स्थिताः ॥ ४९
तपसा कर्षयामासुर्देहान् स्वान् दानवोत्तमाः ।
वर्षाणां शतकञ्चैव पदमेकं निधाय च ॥ ५०
भूमौ स्थित्वा परं तत्र तेपुस्ते बलवत्तराः ।
ते सहस्रन्तु वर्षाणां वातभक्षाः सुदारुणाः ॥ ५१
तपस्तेपुर्दुरात्मानः परं तापमुपागताः ।
वर्षाणान्तु सहस्रं वै मस्तकेन स्थितास्तदा ॥ ५२
वर्षाणान्तु शतेनैव ऊर्द्ध्वबाहव आस्थिताः ।
ते तु दुःखतरं प्राप्ता दुराग्रहपरा इमे ॥ ५३
तेषां पितामहः प्रीतो वरदः प्रददौ वरम् ।
प्रसन्नोऽस्मि वरं ब्रूत दानवा बलदर्पिताः ॥ ५४

दानवा ऊचुः ।

यदि प्रसन्नो देवेश यदि देयो वरस्तदा ।
अवध्यत्वञ्च सर्व्वेषां सर्व्वभूतेषु सर्व्वदा (क)॥ ५५
ते सर्व्वे वरयामासुः सर्व्वलोकपितामहम् ।
तानब्रवीत् तदा देवो लोकानां प्रभुरव्ययः ॥ ५६
नास्ति सर्व्वामरत्वं वै निवर्त्तध्वमतोऽसुराः ।
अन्यं वरं वृणीध्वं वै यादृशः सम्प्ररोचते ॥ ५७
ततस्ते सहिताः सर्व्वे सम्प्रधार्य्य परस्परम् ।
ब्रह्माणमब्रुवन् दैत्याः प्रणिपत्य जगद्गुरुम् ॥ ५८
वरं पुराणि त्रीण्येव समास्थाय महीमिमाम् ।
चरिष्यामो हि लोकेश त्वत्प्रसादाज्जगद्गुरो ॥ ५९

(क) गुणात्मने इति वा पाठः ।
(ख) भगवन् स्तुतेरिति पाठान्तरम् ।

(क) अवध्यत्वञ्च देवानां सर्व्वभूतेषु संयतीति क्वचित् पाठः । तत्र संयति युद्धे ।

तथा वर्षसहस्रान्ते समेष्यामः परस्परम् ।
एकीभावं गमिष्यन्ति पुराण्येतानि चानघ ॥ ६०
यदा समानि चैतानि यो हन्याद्भगवंस्तदा ।
एकेनैवेषुणा देव स नो मृत्युर्भविष्यति ॥ ६१
एवमस्त्विति तान् देवः प्रत्यक्षं प्राविशद्दिवम् ।
आज्ञां दत्त्वा मयस्यापि कुरु त्वं नगरत्रयम् ॥ ६२
काञ्चनं राजतञ्चैव आयसञ्च तथा कुरु ।
इत्युक्त्वा च ततो ब्रह्मा जगाम स्वयमेव च ॥ ६३
ततो मयश्च तरसा चक्रे धीरः पुराण्यथ ।
काञ्चनं दिवि तत्रासीदन्तरीक्षे च राजतम् ॥ ६४
आयसञ्चाभवद्भूमौ पुरं तेषां महात्मनाम् ।
एकैकं योजनायामं सुन्दरं सुभगं पुनः ॥ ६५
काञ्चनं तारकाक्षस्य कमलाक्षस्य राजतम् ।
विद्युन्मालेश्चायसञ्च त्रिविधं दुर्गमुत्तमम् ॥ ६६
मयश्च तत्र बलवान् दैत्य-दानवपूजितः ।
दत्त्वा तेभ्यस्त्रयं तर्हि हितकामपरायणः ॥ ६७
पुरत्रयं प्रविश्यैव बभूवुस्ते बलाधिकाः ।
कल्पद्रुमैश्च सङ्कीर्णं गजवाजिसमाकुलम् ॥ ६८
नानाप्रासादसङ्कीर्णं मणिजालसमावृतम् ।
सूर्य्यमण्डलसङ्काशैर्विमानैर्विश्वतोमुखैः ॥ ६९
पद्मरागमयैश्चैव शोभितञ्चेन्दुसन्निभैः ।
प्रासादैर्गोपुरैर्दिव्यैः कैलासशिखरोपमैः ॥ ७०
दिव्यस्त्रीभिश्च सङ्कीर्णं गन्धर्व्वैः सिद्धचारणैः ।
रुद्रालयैः प्रतिगृहं ह्यग्निहोत्रैर्द्विजोत्तमैः ॥ ७१
वापी-कूप-तडागैश्च दीर्घिकाभिः सुशोभितम् ।
मत्तमातङ्गयूथैश्च तुरङ्गैश्च सुशोभनैः ॥ ७२
रथैश्च विविधाकारैः शिविकाभिरलङ्कृतम् ।
सभाप्रपादिभिश्चैव क्रीड़ास्थानैः पृथक् पृथक् ॥ ७३
वेदाध्ययनशालाभिर्विविधाभिः पृथक् पृथक् ।
अदृष्टं मनसाप्यन्यैः पुण्यवद्भिः प्रदृश्यते ॥ ७४
पतिव्रताभिः सर्व्वत्र पावितं मुनिपुङ्गवाः ।
दैत्येश्वरैर्महाभागैः सदारैः ससुतैर्द्विजैः ॥ ७५
श्रौतस्मार्त्तार्थधर्म्मज्ञैः स्वधर्म्मनिरतैः सदा ।
व्यूढोरस्कैर्वृषस्कन्धैः सामयुद्धधरैः सदा ॥ ७६
प्रशान्तैः कुपितैश्चैव कुब्जवामनकैस्तथा ।
नीलोत्पलदलप्रख्यैर्नीलकुञ्चितमूर्द्धजैः ॥ ७७
मयेन रचितैः सर्व्वैः शिक्षितैर्युद्धलालसैः ॥
अथ समररतैस्तदा समन्ता-
दज-शिवपूजनया सुलब्धवीर्य्यैः ।
रविमरुदमरेन्द्रसन्निकाशैः
सुरमथनैः सुदृढैः सुसेवितञ्च तत् ॥ ७९
शास्त्र-वेद-पुराणानि ये ये धर्म्माः सनातनाः
तैस्तैरविहितैश्चैव सेवितन्तु सदा शुभैः ॥ ८०
पृथिव्याञ्चैव ये धर्म्मास्ते धर्म्मास्तत्र तत्र ह ।
तेषाञ्च प्रभया दग्धा देवाः सेन्द्रादयस्तदा ॥
दुःखितास्तु तदा सर्व्वे ब्रह्माणं शरणं ययुः ।
ते तु ब्रह्माणमागत्य स्वं स्वं दुःखं न्यवेदयन् ।

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
जयो नामैकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः ।

सूत उवाच ।

त्रिपुरस्य च तद्दुःखं श्रुत्वोवाच पितामहः ।
मत्तो हि वर्द्धितो दैत्यो वधं मत्तो न चार्हति
तथापि पुण्यं वर्त्तेत नगरे त्रिपुरे पुनः ।
शिवञ्च प्रार्थयध्वं वै स वः कार्य्यं करिष्यति ॥
तदुक्तास्ते ययुस्तत्र यत्रास्ते वृषभध्वजः ।
तत्र गत्वा च तद्दुःखं निवेद्य संस्थिताः पुरः ॥
शिवोऽपि तद्वचः श्रुत्वा वचनञ्चेदमब्रवीत् ।
अयं वै त्रिपुराध्यक्षः पुण्यवान् वर्त्ततेऽधुना ॥
यत्र पुण्यं प्रवर्त्तेत न हन्तव्यं बुधैः पुनः ।
तावत् स वै न हन्तव्यो यावत् पुण्यं विवर्द्धते
तथा च विष्णवे देवा निवेद्य कारणन्त्विदम्
तदीयं तद्वचः श्रुत्वा देवा विष्णुं न्यवेदयन् ॥
ज्ञात्वा वृत्तञ्च तेषां वै विष्णुर्वचनमब्रवीत् ।
इदं सत्यं वचश्चैव यत्र धर्म्मः सनातनः ॥ ७
तत्र दुःखं न जायेत सूर्य्ये दृष्टे यथा तमः ।
इत्येतद्वचनं श्रुत्वा देवा दुःखमुपागताः ॥ ८
पुनरूचुस्तदा विष्णुं परिम्लानमुखाम्बुजाः ।
कथञ्चैव प्रकर्त्तव्यं कथं स्थास्यामहे वयम् ॥
कथं धर्म्मा भविष्यन्ति त्रिपुरे जीविते सति ।

। चेदकालिकी देव संहृतिः क्रियतां ध्रुवम् ॥ १०
थवा त्रिपुरस्येह वधश्चैव विधीयताम् ।
त्युक्त्वा ते तदा देवा दुःखं कृत्वा पुनः पुनः ॥ ११
श्यता नैव गतिं तेऽद्य चक्रुर्देववरादिह ।
ांस्तांस्तथाविधान् दृष्ट्वा विष्णुर्विनयसंयुतान् ॥१२
ऽपि नारायणः श्रीमांश्चिन्तयामास चेतसा ।
ं कार्य्यं देवकार्य्येषु भगवानिति सुव्रतः ॥ १३
तो यज्ञाः स्मृतास्तेन देवकार्य्यार्थमच्चयाः ॥ १४
ज्ञास्तं पुरुषं दिव्यं प्रणम्य तुष्टुवुस्तदा ।
गवानपि तान् दृष्ट्वा यज्ञान् प्राह सनातनान् ॥ १५
नातनस्तदा सेन्द्रान् देवानालोक्य चाच्युतः ।
नेनोपसदा देवा यजध्वं परमेश्वरम् ॥ १६
रत्रयविनाशाय जगत्त्रयविभूतये ।
च्युतस्य वचः श्रुत्वा देवदेवस्य धीमतः ॥ १७
ंहनादं महत् कृत्वा यज्ञेशं संस्तुवन् सुराः ।
ः सञ्चिन्त्य भगवान् स्वयमेव जनार्द्दनः ॥ १८
ः प्राहेति सर्व्वांस्तांस्त्रिदशांस्त्रिदशेश्वरः ।
पापा नैव हन्तव्याः पापा ये च न संशयः ॥ १९
न्तव्याः सर्व्वयत्नेन कथं वध्याः सुरोत्तमाः ।
सुरा दुर्म्मदाः पापा अपि देवैर्महाबलैः ॥ २०
श्चाच्च वध्या रुद्रस्य प्रभावात् परमेष्ठिनः ।
ो वा ब्रह्माथवा दैत्या देवा वा रिपुसूदनाः ॥२१
नयश्च महात्मानः प्रसादेन विना प्रभोः ।
एव सर्व्वदः शर्व्वः सर्व्वेषामपि शङ्करः ॥ २२
लया देवदेवश्च सर्व्वं कार्य्यं करिष्यति ।
शांशमेकं सम्पूज्य देवा देवत्वमागताः ॥ २३
ह्मा ब्रह्मत्वमापन्नो ह्यहं विष्णुत्वमेव च ।
नपूज्य जगत्यस्मिन् कः पुमान् सिद्धिमागतः ॥ २४
मात् तेनैव हन्तव्या लिङ्गार्च्चनविधेर्बलात् ।
दमिष्ट्वा यथान्यायं जेष्यामो दैत्यसत्तमान् ॥ २५
मुक्त्वा हरञ्चेष्ट्वा यज्ञेनोपसदा प्रभुम् ।
लयं पार्थिवं कृत्वा लक्षसंख्याविधायकम् ॥ २६
धपुष्पाक्षतैश्चैव विष्णुर्देवास्तथाऽयजन् ।
पातिष्ठन् ददर्शाथ भूतसङ्घान् सहस्रशः ॥ २७
ल-शक्ति-गदाहस्तान् दंष्ट्रा-चाप-शिलायुधान् ।
नाप्रहरणोपेतान् नानावेशधरांस्तथा ॥ २८

कालाग्निरुद्रसङ्काशान् कालसूर्य्योपमांस्तदा ।
प्राह देवो हरिः साक्षात् प्रणिपत्य स्थितान् पुरः २९
दग्ध्वा भित्त्वा च भङ्क्त्वा च गत्वा दैत्यपुरत्रयम् ।
पुनर्यथागतं भूता गन्तुमर्हथ भूतये ॥ ३०
ततः प्रणम्य देवेशं परमात्मानमीश्वरम् ।
तान् दृष्ट्वा चिन्तयामास भगवान् पुरुषोत्तमः ॥ ३१
किं कृत्यमिति सन्तप्तः सन्तप्तान् सेन्द्रकान् क्षणात् ।
कथञ्च तेषां दैत्यानां वलं हत्वा प्रयत्नतः ॥ ३२
देवकार्य्यं करिष्यामि प्रसादात् परमेष्ठिनः ।
नाशोऽभिचारतो नास्ति धर्म्मिष्ठानां न संशयः ॥३३
दैत्याश्च ते हि धर्म्मिष्ठाः सर्व्वे त्रिपुरवासिनः ।
तस्मादवध्यतां प्राप्ता नान्यथा सुरपुङ्गवाः ॥ ३४
कृत्वापि सुमहत् पापं रुद्रमभ्यर्च्चयन्ति ये ।
मुच्यन्ते पातकैः सर्व्वैः पद्मपत्रमिवाम्भसा ॥ ३५
पूजया भोगसम्पत्तिरवश्यं जायते भुवि ।
तस्मात् ते भोगिनो दैत्या लिङ्गार्च्चनपरायणाः ॥ ३६
तत्र कृत्वा धर्म्मविघ्नं क्षणादेवात्ममायया ।
दैत्यानां देहनाशार्थं हनिष्ये त्रिपुरं क्षणात् ॥ ३७
विचार्य्येत्थं ततस्तेषां भगवान् पुरुषोत्तमः ।
कर्त्तुं व्यवसितः पश्चाद्धर्म्मविघ्नं सुरारिणाम् ॥ ३८
यावच्च वेदधर्म्मास्तु यावच्च शङ्करार्च्चनम् ।
यावच्च शुचिकृत्यादि(क)स्तावन्नाशो भवेन्न हि ॥ ३९
तस्मादेवं प्रकर्त्तव्यं वेदधर्म्मस्ततो व्रजेत् ।
इति निश्चित्य ते विष्णुर्विघ्नार्थमकरोत् तदा ॥ ४०
दत्त्वा देवान् स्वयं तत्र आज्ञां मत्वा गता हरेः ।
ततश्चैवाकरोद्विष्णुर्देवार्थं विधिमुत्तमम् ।
तदेव श्रूयतां सम्यक् सर्व्वपापप्रणाशनम् ॥ ४१

इति श्रीशैवे महापुराणे ज्ञानसंहितायां त्रिपुर-
वर्णनं नाम विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः ।

सूत उवाच ।

असृजच्च महातेजाः पुरुषं स्वात्मसम्भवम् ।
मायीमायामयं तेषां धर्म्मविघ्नार्थमच्युतः ॥ १

(क) श्रुतिकृत्यादिरिति पाठान्तरम् ।

मुण्डं मलिनवस्त्रञ्च कुण्डिपात्रसमन्वितम् ।
दधानं पुञ्जिकां हस्ते चालयन्तं पदे पदे ॥ २
वस्त्रयुक्तं तथा हस्तं क्षियमाणं मुखे सदा ।
धर्म्मेति व्याहरन्तं तं नमस्कृत्य स्थितं हरेः ॥ ३
उवाच वचनं तत्र हरये प्राञ्जलिस्तदा ।
अरिहन्नुच्यतां पूज्य किं करोमि तदादिश ॥ ४
इत्येवं भगवान् श्रुत्वा वचनञ्चेदमब्रवीत् ।
यदर्थं निर्म्मितोऽसि त्वं निबोध कथयामि ते ॥ ५
ममाङ्गात् त्वं समुत्पन्नो मत्कार्य्यं कर्त्तुमर्हसि ।
मदीयस्त्वं सदा पूज्यो भविष्यसि न संशयः ॥ ६
मायिन् मायामयं शास्त्रं ग्रन्थं षोड़शसहस्रकम् ।
श्रौत-स्मार्त्तविरुद्धञ्च वर्णाश्रमविवर्ज्जितम् ॥ ७
इहैव स्वर्ग-नरकप्रत्ययान्नान्यथा पुनः ।
वेदभ्रंशमयं शास्त्रं कर्म्मवादपरं शुभम् ॥ ८
एतच्छास्त्रं त्वया ग्राह्यं विस्तारं तद्गमिष्यति ।
ददामि तव सामर्थ्यं निर्म्माणे च भविष्यति ॥ ९
माया च विविधा त्वत्तो वश्यावश्यकरी शुभा ।
रोधनारोधनञ्चैव भवतः सम्भविष्यति ॥ १०
इष्टानिष्टप्रदृश्यञ्च नानापिशुनकल्पनाः ।
विचित्रञ्चैव यत् कृत्यं तत् ते सर्व्वं भविष्यति ॥ ११
तच्छ्रुत्वा वचनं तस्य हरेश्च परमात्मनः ।
नमस्कृत्य स्थितं तत्र कर्त्तव्यमादिशाधुना ॥ १२
इत्युक्तो पाठयामास शास्त्रं (क) मायामयं तदा ।
तच्छास्त्रमुपदिश्यैव पुरुषायाच्युतः स्वयम् ॥ १३
तमुवाच पुनस्तत्र मोहनीया इमे त्वया ।
एते दैत्यास्त्वया सर्व्वे पाठनीया महाशया ॥ १४
धर्म्मास्तत्र प्रकाशन्ते श्रौत-स्मार्त्ता न संशयः ।
अनया विद्यया सर्व्वं स्फोटनीयं न संशयः ॥ १५
पुरत्रयविनाशार्थं प्राह तं पुरुषं हरिः ।
गन्तुमर्हसि नाशार्थं भो तूर्णं पुरवासिनाम् ॥ १६
ततो धर्म्मं प्रकाश्यैव नाशयित्वा पुरत्रयम् ।
ततश्चैव पुनर्गत्वा मरुस्थल्यां त्वया पुनः ॥ १७
स्थातव्यञ्च स्वधर्म्मेण कलिर्यावत् समाव्रजेत् ।
प्रवृत्ते च युगे तस्मिन् स्वीयो धर्म्मः प्रकाश्यताम् ॥ १८
शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वर्द्धनीयस्त्वया पुनः ।
मदाज्ञयाभवद्धर्म्मो विस्तारं यास्यति ध्रुवम् ।
मदनुज्ञापरा नित्यं गतिं प्राप्स्यथ मामकीम् ।
एवमाज्ञा तदा दत्ता विष्णुना प्रभविष्णुना ॥

ततः स मुण्डी परिपालयन् हरे-
राज्ञां तदा निर्म्मितवांश्च शिष्यान् ।
यथास्वरूपं चतुरश्च तांस्तदा
मायामयं शास्त्रमपाठयत् स्वयम् ॥ २१

यथा स्वयं तथा ते च चत्वारो मुण्डिनः शुभाः ।
नमस्कृत्य स्थितास्तत्र हरये परमात्मने ॥ २२
हरिश्चापि पुनस्तत्र चतुरस्तांस्तदा स्वयम् ।
उवाच परमप्रीतो धन्याः स्थ इति संस्तुवन् ।
यथा गुरुस्तथा यूयं भविष्यथ मदाज्ञया ।
चत्वारो मुण्डिनस्ते च धर्म्मं पाषण्डमाश्रिताः ।
हस्ते पात्रं दधानाश्च तुण्डे वस्त्रस्य धारकाः ।
मलिनान्येव वासांसि धारयन्तोऽल्पभाषिणः ।
धर्म्मो लाभः परं तत्त्वं वदन्तस्ते तथा स्वयम् ।
मार्ज्जनीं धार्य्यमाणास्ते वस्त्रखण्डविनिर्म्मिताम् ।
ते सर्व्वे च तदा देवं भगवन्तं मुदान्विताः ।
नमस्कृत्य पुनस्तत्र हर्षनिर्भरमानसाः ॥ २७
हरिणा च तदा हस्ते धृत्वा च गुरवेऽर्पिताः ।
यथा त्वञ्च तथैते वै मदीया नैव संशयः ॥ २[८]
आदिरूपञ्च तन्नाम पूज्यत्वात् पूज्य उच्यते ।
ऋषिर्यतिस्तथाचार्य्य उपाध्याय इति स्वयम् ।
इमान्यपि तु नामानि प्रसिद्धानि भवन्त्विति ।
ममापि च भवद्भिश्च नाम ग्राह्यं शुभं पुनः ॥ [३०]
अरिहन्निति तन्नाम ध्येयं पापप्रणाशनम् ।
भवद्भिश्चैव कर्त्तव्यं कार्य्यं लोकसुखावहम् ॥ ३[१]
ततः प्रणम्य तं मायी शिष्ययुक्तः स्वयं तदा ।
प्रविश्य तत्पुरं तूर्णमृषिर्मायां तदाकरोत् ॥ [३२]
निकटस्थे वने गत्वा शिष्यैर्युक्तः स्थितस्तदा ।
मायां प्रवर्त्तयामास मायिनामपि मोहिनीम् ।
ये ये गतास्तदा तत्र ते ते दीक्षामुपागताः ।
ये ये पश्यन्ति तांस्तत्र मोहमायापरायणाः ।
अभूवंस्तत्क्षणादेव दर्शनान्मायिनामपि ।
नारदोऽपि तदा माया नियोगान्मायिनः प्रभो[ः]
प्रविश्य तत् पुरं तेन मायिना सह दीक्षितः ।

(क) सूत्रमिति पाठः क्वाचित्कः ।

तत्र नारदो गत्वा राज्ञे सर्व्वं न्यवेदयत् ॥ ३६
श्चित् समागतश्चात्र यतिर्धर्म्मपरायणः ।
ष्टाश्च बहवो धर्म्मा नैतेन सदृशाः पुनः ॥ ३७
यञ्च दीक्षितास्तत्र दृष्ट्वा धर्म्मं सनातनम् ।
वेच्छा यदि वर्त्तेत ग्राह्या दीक्षा त्वयाधुना ॥ ३८
दीयं तद्वचः श्रुत्वा राजा तत्र जगाम ह ।
रदो दीक्षितो यस्मादयं दीक्षामवाप्नुमः ॥ ३९
त्येवञ्च विदित्वा वै जगाम स्वयमेव ह ।
हाटोपं तदा दृष्ट्वा मोहितो मायया तया ॥ ४०
वाच वचनं तस्मै नमस्कृत्य महात्मने ।
ीक्षा देया त्वया मह्यमृषयो निर्म्मलाशयाः ॥ ४१
त्येवं वचनं श्रुत्वा राज्ञोक्तं परमं वचः ।
वाच मुण्डिराजस्त्वं श्रूयतां परमं वचः ॥ ४२
द त्वं वचनं देहि न लोप्यं वचनं मम ।
ति श्रुत्वा वचस्तस्य राजा मायामयोऽभवत् ॥ ४३
दा च दास्यसि त्वञ्च तत् तथैव न चान्यथा ।
ीकृत्य मुखादस्त्रमुवाच ऋषिसत्तमः ॥ ४४
गच्छ राजशार्दूल मन्त्रमेनं गृहाण च ।
श्रुत्वा तं महाराजं विद्युन्मालिनमन्ततः ॥ ४५
थयामास स्वं तत्त्वं येन धर्म्मो विनश्यति ।
ीक्षतां वचनं श्रुत्वा दीक्षितस्तत्क्षणादपि ॥ ४६
र्व्वे च दीक्षितास्तत्र ये वै त्रिपुरवासिनः ।
ैः शिष्यैः प्रशिष्यैश्च व्यापितं त्रिपुरं महत् ॥ ४७
ति श्रीशैवे महापुराणे ज्ञानसंहितायां त्रिपुर-
दीक्षाविधानं नामैकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ।

सूत उवाच ।

ौधर्म्मं खण्डयामास श्राद्धधर्म्मांस्तथैव च ।
वपूजां तथा विष्णोर्यज्ञभागाननेकशः ॥ १
ान-दानादिकं तीर्थं सर्व्वकाले (क) सुशोभनम् ।
दधर्म्मांश्च ये केचित् ते सर्व्वे दूरतः कृताः ॥ २
ाया च देवदेवस्य विष्णोस्तस्याज्ञया प्रभोः ।
लक्ष्मीश्च स्वयं तस्य नियोगात् त्रिपुरं गता ॥ ३

(क) पर्व्वकाले इति पाठः क्वाचित्कः ।

या लक्ष्मीस्तपसा तेषां लब्धा देवेश्वराज्ञया ।
वहिर्गता परित्यज्य नियोगाद्ब्रह्मणः प्रभोः ॥ ४
बुद्धिमोहं तथाभूतं विष्णोर्मायाविनिर्म्मितम् ।
तेषां दत्त्वा क्षणादेव तेषां मायी च नारदः ॥ ५
नारदोऽपि तथारूपो यथा मायी तथैव सः ।
एवं नष्टे तदा धर्म्मे श्रौत-स्मार्त्ते सुशोभने ॥ ६
पाषण्डः स्थापितस्तेन विष्णुना विश्वयोनिना ।
त्यक्ते महेश्वरे देवैस्त्यक्ते लिङ्गार्च्चने तथा ॥ ७
स्त्रीधर्म्मे निखिले नष्टे दुराचारे व्यवस्थिते ।
कृतार्थ इव देवेशो देवैः सार्द्धमुमापतिम् ॥ ८
तरसा प्राप्य सर्व्वज्ञं तुष्टाव पुरुषोत्तमः ।
महेश्वराय देवाय नमस्ते परमात्मने ॥ ९
नारायणाय रुद्राय ब्रह्मणे ब्रह्मरूपिणे ।
एवं स्तुत्वा महादेवं दण्डवत् प्रणिपत्य ह ॥ १०
जजाप रुद्रमन्त्रञ्च दक्षिणामूर्त्तिसम्भवम् ।
जले स्थित्वा तदा कोटित्रयञ्चार्द्धं तथैव च ॥ ११
तावद्देवास्तदा सर्व्वे तुष्टुवुः परमेश्वरम् ।
नमः सर्व्वात्मने तुभ्यं शङ्करायार्त्तिहारिणे ॥ १२
रुद्राय नीलरुद्राय विरूपाय (क) प्रचेतसे ।
गतिर्नः सर्व्वदास्माभिर्वन्द्यो देवारिसूदनः ॥ १३
त्वमादिस्त्वमनादिश्च आनन्दश्चाक्षयः प्रभुः ।
प्रकृतेः पुरुषस्यापि साक्षात् स्रष्टा जगद्गुरुः ॥ १४
कर्त्ता हर्त्ता जगत्यस्मिन् सर्व्वेषां परिपालकः ।
वरदो वाङ्मयो वाच्यो वाच्य-वाचकवर्ज्जितः ॥ १५
याच्यो मुक्त्यर्थमीशानो योगिभिर्योगवित्तमः ।
हृत्पुण्डरीकशिखरे योगिनां संस्थितः सदा ॥ १६
वदन्ति वेदास्त्वां सन्तं परंब्रह्मस्वरूपिणम् ।
भवन्तं तत्त्वमित्याहुस्तेजोराशिं परात्परम् ॥ १७
परमात्मा त्वमित्याहुरस्मिन् जगति यत्प्रभो ।
दृष्टं श्रुतं स्तुतं सर्व्वं जायमानं जगद्गुरो ॥ १८
अणोरल्पतरं प्राहुर्महतोऽपि महत्तरम् ।
सर्व्वतःपाणिपादान्तं सर्व्वतोऽक्षिशिरोमुखम् ॥ १९
महादेवमनिर्द्देश्यं सर्व्वज्ञं त्वामनावृतम् ।
विश्वरूपं विरूपाक्षं सदाशिवमनुत्तमम् ॥ २०
कोटिभास्करसङ्काशं षड्विंशकमनीश्वरम् ।

(क) चिद्रूपायेति क्वचित् पाठः ।

प्रवर्त्तकं जगत्यस्मिन् प्रकृतेश्च पितामहम् ॥ २१
वदन्ति वरदं देवं सर्व्ववासं स्वयं प्रभुम्।
श्रुतयः श्रुतसारं त्वां श्रुतिसारञ्चमेव च ॥ २२

अदृष्टमस्माभिरनेकमूर्त्ते
त्वया कृतं यद्भव नाथ लोके।
त्वमेव देवासुरभूसुराश्च
दैत्याः सुराः स्थावरजङ्गमाश्च ॥ २३

पाहि नान्या गतिः शम्भो विनिहत्यासुरान् चणात्।
मायया मोहिताः सर्व्वे भवतः परमात्मनः ॥ २४
स्तुतश्चैवं सुरेन्द्राद्यैर्विष्णोर्जाप्येन चेश्वरः।
विष्णुमालिङ्ग्य तत्रैव प्रगृहीतकरः स्वयम् ॥ २५
प्राह गम्भीरया वाचा देवानालोक्य शङ्करः।
ज्ञातं मयेदमधुना देवकार्य्यं सुरेश्वर ॥ २६
विष्णो मायाबलञ्चैव नारदस्य च धीमतः।
तेषामधर्म्मनिष्ठानां दैत्यानां देवसत्तम ॥ २७
पुरत्रयविनाशञ्च करिष्येऽहं सुरोत्तम।
अथ सब्रह्मका देवाः सेन्द्रोपेन्द्राः समागताः ॥ २८
श्रुत्वा प्रभोस्तदा वाक्यं प्रणेमुस्तुष्टुवुश्च ते।
य इदं कीर्त्तयेत् स्तोत्रं शुचिर्भूत्वा सदा नरः ॥ २९
शृणुयाद्वा महापुण्यं सर्व्वान् कामानवाप्नुयात् ॥ ३०

इति श्रीशैवे महापुराणे ज्ञानसंहितायां त्रिपुर-
विजयो नाम द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः।

सूत उवाच।

अथैतदन्तरे देवाः पुत्त्रैः सह समन्विताः।
व्याजहार प्रियं वाक्यं जयेति शुभलक्षणम् ॥ १

ततः सनन्दी सह षण्मुखेन
तया च सार्द्धं गिरिराजपुत्त्र्या।
विवेश भव्यं भवनं ततोऽपि
सुरैः समस्तैरभिवन्द्यमानः ॥ २

द्वारस्य पार्श्वतस्तस्थुर्देवदेवस्य धीमतः।
किं कर्त्तव्यं क्व गन्तव्यं हा हताः स्मेतिवादिनः ॥ ३
किन्तु किन्त्विति चान्योन्यं प्रेक्ष्य चात्यन्तमाकुलाः।
पापा वयमितीहान्ये अभाग्याश्चेति चापरे ॥ ४
ते भाग्यवन्तो दैत्येन्द्रा इति चान्ये सुरेश्वराः।
इत्युक्त्वा तु पुनर्यावद्गन्तुमीषुः शिवालयम् ॥
एतस्मिन्नन्तरे तेषां श्रुत्वा शब्दाननेकशः।
कुम्भोदरो महातेजा दण्डेनाताड़यत् सुरान्।
दुद्रुवुस्ते भयाविष्टा देवा हा हेतिवादिनः।
अपतन्मुनयश्चान्ये इन्द्रश्च धरणीतले ॥ ७
अहो विधिबलञ्चैतन्मुनयः कश्यपादयः।
वदन्ति स्म तदा सर्व्वे हरिं लोकसुखावहम्।
अभाग्यान्न समाप्तन्तु कार्य्यमित्यपरे द्विजाः।
इत्येवं वचनं श्रुत्वा हरिर्वाक्यमुपाददे ॥ ८
किमर्थं दुःखमापन्ना दुःखन्तु त्यज्यतां पुनः।
महदाराधनं देवा ह्यसाध्यं भवति नृणाम् ॥
शिवः सर्व्वगणाध्यक्षः कथं वश्यो भवेदिति।
प्रणवं पूर्व्वमुच्चार्य्य नमः पश्चादुदाहरेत् ॥ ११
शिवायेति ततश्चैव शुभद्वयमतः परम्।
कुरुद्वयं पुनः प्रोक्तं शिवाय च ततः पुनः ॥
नमश्च प्रणवश्चैव मन्त्रमेतं सदा बुधाः।
आवर्त्तध्वं पुनर्यूयं यदा शिवकृपा तदा ॥ १३
कोटिमेकां तथा जप्त्वा शिवः कार्य्यं करिष्यति।
इत्युक्ते च तदा तेन हरिणा प्रभविष्णुना ॥
तथा देवाः पुनश्चक्रुर्हरस्याराधनं रहः।
शिव शिवेति भाषन्तो देवा धैर्य्यसमन्विताः ॥
कोटिसंख्याजपं कृत्वा सर्व्वे ते देवसत्तमाः।
एतस्मिन्नन्तरे साक्षाच्छिवः प्रादुरभूत् स्वयम्।
यथोक्तेन स्वरूपेण वचनञ्चेदमब्रवीत्।
प्रसन्नोऽस्मि वरं ब्रूत मनसोऽभीप्सितं परम् ॥
प्रसन्ने वरदे देवे शिवे माहेश्वरे हरे।
सर्व्वे देवास्तदा सर्व्वे स्तुतिं चक्रुः शुभावहाम्।

देवा ऊचुः।

शङ्कराय नमस्तेऽस्तु नमस्ते परमात्मने।
परावरस्वरूपाय नमस्ते शूलपाणये ॥ १८
नमो गणाधिदक्षाय कपर्द्दिने नमोऽस्तु ते।
नमोऽस्तु ते त्रिनेत्राय वेदानां पतये नमः ॥
कार्य्यकारणरूपाय मूलप्रकृतिहेतवे।
व्याप्याय च नमस्तुभ्यं व्यापकाय नमो नमः ॥
एवं स्तुतस्तदा देवैः प्रसन्नो जगदीश्वरः।

यदि प्रसन्नो देवेश हन्यतां त्रिपुराणि च ॥ २२
इत्युक्तं वचनं तेषां श्रुत्वा च पुनरब्रवीत् ।
रथञ्च सारथिं शम्भोः कार्म्मुकं शरमुत्तमम् ॥ २३
कर्त्तुमर्हसि यत्नेन नष्टं मत्वा पुरत्रयम् ।
इति श्रुत्वा वचस्तस्य कल्पनन्तु रथस्य च ॥ २४
सर्व्वदेवमयं दिव्यं रथं परमशोभनम् ।
रचयामास विश्वार्थं विश्वकर्म्मा स्वयं तथा ॥ २५
इति श्रीशैवे महापुराणे ज्ञानसंहितायां त्रिपुरोपाख्याने त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्व्विंशोऽध्यायः ।

सूत उवाच ।

अथ रुद्रस्य देवस्य निर्म्मितो विश्वकर्म्मणा ।
सर्व्वलोकमयो दिव्यो रथो यत्नेन सादरम् ॥ १
सर्व्वभूतमयश्चैव सौवर्णः सर्व्वतः स्मृतः ।
रथाङ्गं दक्षिणं सूर्य्यो वामाङ्गं सोम उच्यते ॥ २
दक्षिणं द्वादशारं हि षोड़शारं तथोत्तरम् ।
अरेषु तेषु विप्रेन्द्रा आदित्या द्वादशैव तु ॥ ३
शशिनः षोड़शारास्तु कला वामस्य सुव्रताः ।
ऋक्षाणि च तथा तस्य वामस्यैव विभूषणम् ॥ ४
नेम्यः षड्‌ऋतवश्चैव तयोर्वै विप्रपुङ्गवाः ।
पुष्करं चान्तरीक्षञ्च रथनीड़श्च मन्थरः ॥ ५
अस्ताद्रिरुदयाद्रिस्तु उभौ तौ कूबरौ स्मृतौ ।
वेगः संवत्सरस्तस्य अयने लोहधारके ॥ ६
समुद्रास्तस्य चत्वारो रथकुण्डलिकाः स्मृताः ।
गङ्गाद्याः सरितः श्रेष्ठाः सर्व्वाभरणभूषिताः ॥ ७
चामरासक्तहस्ताश्च दिव्यस्त्रीरूपधारिकाः ।
सारथिर्भगवान् ब्रह्मा देवो रश्मिधरः स्मृतः ॥ ८
प्रतोदो ब्रह्मणस्तस्य प्रणवो ब्रह्म दैवतम् ।
मेरुश्च महच्छत्रं मन्दरः पार्श्वदण्डकः ॥ ९
शैलेन्द्रः कार्म्मुकं तस्य ज्या भुजङ्गाधिपः स्वयम् ।
घण्टा सरस्वती देवी धनुषः श्रुतिरूपिणी ॥ १०
इषुर्विष्णुर्महातेजा अग्निः शल्यं प्रकीर्त्तितम् ।
हयास्तस्य तथा प्रोक्ताश्चत्वारो निगमास्तथा ॥ ११
ज्योतींषि भूषणं तेषामवशिष्टान्यतः परम् ।
ब्रह्माण्डे चैव यत् किञ्चिद्वस्तु सर्व्वं रथं स्मृतम् ॥ १२
एवं कृतं रथं दिव्यं कार्म्मुकञ्च शरास्तथा ।
सारथिर्जगताञ्चैव ब्रह्मा तु प्रभुरीश्वरः ॥ १३
आरुरोह रथं युक्तं रणमण्डनमद्भुतम् ।
सर्व्वदेवमयो भूत्वा कम्पयन्निव रोदसी ॥ १४
ऋषिभिः स्तूयमानस्तु वृतश्चाप्सरसां गणैः ।
अथाधः स रथस्यास्य भगवान् धरणीधरः ॥ १५
वृषेन्द्ररूपी चोत्थाय स्थापयामास वै रथम् ।
ततश्च चोदयामास मनोमारुतरंहसम् ॥ १६
पुराण्युद्दिश्य स्वस्थानि दानवानां तरस्विनाम् ।
अथालोक्य तथा रुद्रं देवा लोकस्य शङ्करम् ॥ १७
तथा च ऋषयः सर्व्वे तुष्टुवुश्च सदाशिवम् ।
जय जय पशुपते प्रसिद्धमभवत् तदा (क) ॥ १८
जय जयेति भाषन्तः सर्व्वे ऋषिगणास्तथा ।
तस्मिंश्च समये यच्च रूपं तस्य महात्मनः ॥ १९
जातं तद्वर्ण्यते किञ्चिदपि वर्षशतैरपि ।
शिवापि च तदा तत्र शिवेन सह सङ्गता ॥ २०
जगाम त्रिपुरं हन्तुं सर्व्वेषां सुखदायिनी ॥ २१

तं देवदेवं त्रिपुरं निहन्तुं
तदा तु देवेन्द्ररविप्रकाशाः ।
गजैर्हयैः सिंहवरै रथैश्च
वृषैर्ययुस्तेऽमरराजमुख्याः ॥ २२
हलैश्च शालैर्मुषलैर्भुशुण्डे-
र्गिरीन्द्रकूटैर्गिरिसन्निभैश्च ।
ययुः पुरस्ताद्धि महेश्वरस्य
तदेन्द्र-पद्मोद्भव-विष्णुमुख्याः ॥ २३

ननृतुर्मुनयः सर्व्वे दण्डहस्ता जटाधराः ।
ववृषुः पुष्पवर्षाणि खेचराः सिद्धचारणाः ॥ २४
पुरत्रये च विप्रेन्द्रा व्रजन् सर्व्वे गणेश्वराः ।
प्रक्रान्दुः कुन्ददन्तश्च कम्पनश्च प्रकम्पनः ॥ २५
दून्द्रश्चेन्द्रयवश्चैव यन्ता हिमकरस्तथा ।
शताक्षश्चैव पञ्चाक्षः सहस्राक्षो महोदरः ॥ २६
शतजिह्वः शतास्यश्च कङ्कटः कटपूतनः ।
द्विशिरास्त्रिशिराश्चैव तथाह्येकाननस्तथा ॥ २७

(क) तदारभ्य पशुपतिरिति नामाऽभवत् तदेति प्र पाठः क्वचित् ।

अजवक्त्रो हयवक्त्रो गजवक्त्रोऽर्द्धवक्त्रकः ।
इत्याद्याः परिवार्य्यैवं त्वचा लक्षणवर्ज्जिताः ॥ २८
समावृत्य महादेवं तदोचुस्ते महेश्वराः ।
दग्धुं समर्थो मनसा क्षणेन सचराचरम् ॥ २९
सर्व्वं किमर्थं त्रिपुरं पिनाकी
स्वयं गतश्चात्र गणैश्च सार्द्धम् ।
रथेन किश्चात्र शरेण तस्य
गणैश्च किं देवगणैश्च शम्भोः ॥ ३०
किन्त्वत्र कारणं ह्येतद्दुष्टानां प्रत्ययाय वै ।
लोकेषु ख्यापनार्थं वै यशः परमतापहम् ॥ ३१
अन्यच्च कारणं तुभ्यं वदामि ऋषिसत्तम ।
सर्व्वेष्वपि च देवेषु मन्ता (क) नान्यो विशिष्यते ॥३२
तस्मिन् स्थिते महादेवे रुद्रे विततकार्म्मुके ।
पुराणि तेन कालेन जग्मुरेकत्वमाशु वै ॥ ३३
एकीभावं गतेऽत्रैव त्रिपुरत्वमुपागते ।
वभूव तुमुलो हर्षो देवानां सुमहात्मनाम् ॥ ३४
ततो देवगणाः सर्व्वे सिद्धाश्च परमर्षयः ।
जयेति वाचो मुमुचुस्तुवन्तश्चाष्टमूर्त्तिनम् ॥ ३५
अथाह भगवान् ब्रह्मा विष्णुश्च जगतां पतिः ।
समयोऽपि तदा जात एकत्वमपि चागतम् ॥ ३६
अथाधिज्यं धनुः कृत्वा शर्व्वः सन्धाय तं शरम् ।
युज्य पाशुपतास्त्रेण त्रिपुरं तमचिन्तयत् ॥ ३७
यावन्नायान्ति देवेश विप्रयोगं पुराणि वै ।
अथ देवो महादेवः साउच्चं तदवैक्षत ॥ ३८
पुरत्रयं विरूपाक्षस्तत्क्षणाद्भस्मसात्कृतम् ।
दग्धुमप्यथ देवेश वीक्षणेन जगत्त्रयम् ॥ ३९
अस्मद्यशोविवृद्ध्यर्थं शरं मोक्तुमिहार्हसि ।
तत्क्षणात् त्रिपुरं दग्ध्वा त्रिपुरं तच्छरः क्षणात्॥४०
देवदेवं नमस्कृत्य समासाद्य व्यवस्थितः ।
रेजे पुरत्रयं दग्धं दैत्यकोटिशतैर्वृतम् ॥ ४१
इक्षुणा तेन कल्पान्ते रुद्रेणेव जगत्त्रयम् ।
ये पूजयन्ति तत्रापि दैत्या रुद्रं सवान्धवाः ॥ ४२
गाणपत्यं ययुः सर्व्वे भवपूजाविधेर्बलात् ।
न किञ्चिदब्रुवन् देवाः सेन्द्रोपेन्द्रादयस्तदा ॥ ४३
भयाद्देवं निरीक्ष्यैव देवीञ्च हिमवत्सुताम् ।

(क) यत इति वा पाठः ।

दृष्ट्वा भीतं तदानीकं देवानामृषिपुङ्गवाः ॥ ४
किञ्चेत्याहुस्तदा देवाः प्रणेमुस्ते समन्ततः ।
तुष्टाव तुष्टहृदयो ब्रह्मा देवैः समाहितः ॥ ४
विष्णुना च भवं देवं त्रिपुरारिं महेश्वरम् ।

पितामह उवाच ।

प्रसीद देवदेवेश प्रसीद परमेश्वर ॥ ४६
प्रसीद जगतां नाथ प्रसीदानन्ददायक ।
ओङ्काराय नमस्तुभ्यमगुणाय नमोऽस्तु ते ॥
सगुणाय नमस्तुभ्यं स्वर्गेशाय नमोऽस्तु ते ।
सदाशिवाय शान्ताय महेशाय पिनाकिने ॥
सर्व्वज्ञाय शरण्याय सद्योजाताय ते नमः ।
स्तुत्वैवं देवताः सर्व्वा नमस्कारं पृथक् तदा ॥
चक्रुस्ते परमप्रीताः प्रार्थयन्तः सदाशिवम् ।

ब्रह्मोवाच ।

भगवन् देवदेवेश त्रिपुरान्तक शङ्कर ॥ ५०
त्वयि भक्तिः परा मेऽद्य प्रसीद परमेश्वर ।
प्रसीद भक्तिर्देवेश सारथ्यञ्चास्तु सर्व्वदा ॥ ५
जनार्द्दनोऽपि भगवान् नमस्कृत्य महेश्वरम् ।
कृताञ्जलिपुटो भूत्वा प्राह देवञ्च शङ्करम् ॥
निर्गुणाय नमस्तुभ्यं पुनश्च सगुणाय च ।
पुनः प्रकृतिरूपाय पुनश्च पुरुषाय च ॥ ५३
पश्चाद्गुणस्वरूपाय ततो विश्वात्मने नमः ।
भक्तिप्रियाय शान्ताय शिवाय परमात्मने ॥ ५
सदाशिवाय रुद्राय जगतां पतये नमः ।
त्वयि भक्तिर्दृढ़ा मेऽद्य वर्द्धमाना भवत्विति ॥
सर्व्वे देवा प्रणम्योचुस्ततश्च परमेश्वरम् ।
प्रसीद जगतां नाथ प्रसीद परमेश्वर ॥ ५६
प्रसीद सर्व्वकर्त्ता त्वं नमामः शङ्करं मुदा ।
त्वयि भक्तिर्दृढ़ास्माकं नित्यं स्यादनपायिनी ।
इति स्तुतः स देवेशः शङ्करो लोकशङ्करः ।
प्रसन्नोऽस्मि वरं ब्रूत वचनं ह्युक्तवांस्तदा ॥ ५८

सर्व्वदेवा ऊचुः ।

यदि प्रसन्नो भगवान् यदि देयो वरस्त्वया ।
यदा दुःखन्तु देवानां जायते देवसत्तम ॥ ५९
तदा त्वं प्रकटीभूत्वा दुःखं नाशय सर्व्वदा ।
इत्युक्तो भगवान् रुद्रस्तथा चास्तु निरन्तरम्

तवेनानेन तुष्टोऽस्मि दास्यामि सर्व्वदा ध्रुवम् ।
यदभीष्टतमं लोके तत् सर्व्वञ्च प्रदत्तवान् ॥ ६१
एतस्मिन्नन्तरे ते वै मुण्डिनश्च समागताः ।
णम्योचुश्च तान् सर्व्वान् वयं किं करवामहे ॥ ६२
तेषां तद्वचनं श्रुत्वा विष्णुब्रह्मादयोऽब्रुवन् ।
ावन्भरतस्थली सेव्या यावत् कलिः समाव्रजेत् ॥ ६३
मस्कृत्य गतास्तत्र यथोद्दिष्टं समाश्रयम् ।
ते सर्व्वे च तदाहृष्टा देवा धाम स्वकं ययुः ॥ ६४
शृणोतीह सदा यो वै सर्व्वान् कामानवाप्नुयात् ॥ ६५

इति श्रीशैवे महापुराणे ज्ञानसंहितायां त्रिपुर-
वधो नाम चतुर्व्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः ।

सूत उवाच ।

गत्वा ब्रह्मा स्वकं धाम ऋषीनाहूय सर्व्वतः ।
अहस्याह सुरेन्द्राणां भगवान् पद्मसम्भवः ॥ १

ब्रह्मोवाच ।

यदि नित्यं शुभेच्छा वै यदि सिद्धेश्च कामुकाः ।
आतन्तव्यं मया सार्द्धं तीरं क्षीरपयोनिधेः ॥ २
आगन्तव्यमृषिश्रेष्ठा मया साधु विचारितम् ।
इत्येतद्वचनं श्रुत्वा गतास्ते ब्रह्मणा सह ॥ ३
यत्रास्ते भगवान् विष्णुः सर्व्वेषां हितकारकः ।
तत्र गत्वा जगन्नाथं देवदेवं जनार्द्दनम् ॥ ४
उपतस्थुस्तदा देवास्तोत्रैर्नानाविधैरपि ।

ब्रह्माद्या ऊचुः ।

देवदेव जगन्नाथ भक्तानामभयप्रद ॥ ५
लक्ष्मीकान्त नमस्तुभ्यं सदाभयविधायक ।
मेघश्याम चतुर्व्वाहो पीताम्बरधराव्यय ॥ ६
शङ्ख-चक्र-गदा-पद्मैर्युक्तस्त्वं पुरुषोत्तम ।
मुकुटादिभूषणैर्युक्त पुण्डरीकाक्ष सत्तम ॥ ७
श्रीवत्सलक्षण श्रीमन् कण्ठे कौस्तुभभूषण ।
कोटिकन्दर्पलावण्य कोटिसूर्य्यसुशोभन ॥ ८
शरण्य सर्व्वजन्तूनां भुक्ति-मुक्तिफलप्रद ।
माया च दूरतो यस्य नृत्यते किङ्करी यथा ॥ ९
सिद्धयोऽष्टौ च यस्यैव दासत्वं समुपागताः ।
निजभक्तैः सदा सेव्यो नानालङ्कारभूषितः ॥ १०
यस्यैव कृपया सर्व्वे मुक्तिं प्राप्ताः सुदुर्लभाम् ।
यस्य दुःखस्य नाशो वै कुतोऽपि न प्रजायते ॥ (क) ११
तस्य दुःखस्य हर्त्ता त्वं कृपां कुरु सदा हरे ।
इत्युक्त्वा ते तदा देवा उच्चैर्जय जयेति च ॥ १२
प्रसीद देवदेवेश प्रसीद पुरुषोत्तम ।
प्रसीद जगतां नाथ प्रसीद करुणाकर ॥ १३
इति स्तुतस्तदा देवैः प्रसन्नो जगदीश्वरः ।
दर्शयामास रूपं स्वं दर्शयन् भक्तवश्यताम् ॥ १४
ऊचुस्ते च तदा देवा जयेति च शुभं वचः ।
तान् दृष्ट्वा च तदा विष्णुरब्रवीत् परमं वचः ॥ १५
कथं समागता यूयं किं कार्य्यं विद्यतेऽधुना ।
इति पृष्टास्तदा तेन अब्रुवन् वचनं शुभम् ॥ १६

ब्रह्माद्या ऊचुः ।

कृपया तव देवेश सर्व्वं दुःखं व्यलीयत ।
तथापि पृच्छ्यते त्वाद्य सर्व्वदेवहिताय वै ॥ १७
नित्यं सेवा तु कस्यैव कार्य्या दुःखापहा ध्रुवम् ।
मया च दैवतैः सर्व्वैर्यत् सेव्यश्चोपदिश्यताम् ॥ १८
इत्येतद्वचनं श्रुत्वा भगवान् वाक्यमब्रवीत् ।

श्रीभगवानुवाच ।

भो ब्रह्मन् श्रूयतां सम्यक् श्रुतञ्च भवता पुरा ॥ १९
तथापि कथ्यते तुभ्यं देवेभ्यश्च तथा पुनः ।
दृश्यञ्च (ख) दृश्यतेऽद्यैव किं पुनः पृच्छ्यतेऽधुना ॥ २०
यदि सेव्यः सदा देवाः शङ्करः सर्व्वदुःखहा ।
ममापि कथितं तेन ब्रह्मणोऽपि विशेषतः ॥ २१
प्रस्तुतञ्चैव दृष्टञ्च सर्व्वं दृष्टान्तमद्भुतम् ।
सन्त्यज्य देवदेवेशं लिङ्गमूर्त्तिं महेश्वरम् ॥ २२
तारपुत्त्रास्तथैते वै नष्टास्ते चैव वान्धवाः ।
मया च मोहितास्ते वै मायया दूरतः कृताः ॥ २३
सर्व्वे विनष्टाः प्रध्वस्ताः शिवेन रहिता यदा ।
तस्मात् सदा पूजनीयो लिङ्गमूर्त्तिधरो हरः ॥ २४
यदि सुखं सुरेशाश्च नैरन्तर्य्यं भवेदिह ।
पूजनीयः शिवो नित्यं श्रद्धया देवपुङ्गवैः ॥ २५
सर्व्वलिङ्गमयो देवः सर्व्वलिङ्गे प्रतिष्ठितः ।

(क) हतेः पुण्यशतैरपीति पाठः क्वचित् ।
(ख) दृष्टमिति च पाठः क्वचिद्दृश्यते ।

तस्मात् सम्पूजयेन्नित्यं यदीच्छेत् सिद्धिमात्मनः॥२६
सर्व्वे लिङ्गार्चनादेव देवा दैत्याश्च दानवाः।
वयञ्चैव तथा ब्रह्मन् किमर्थं विस्मृतं त्वया॥ २७
अर्चय त्वं लिङ्गमूर्त्तिं संसिद्धे नात्र संशयः।
तस्माल्लिङ्गेऽर्चयेन्नित्यं येन केनापि वै सुराः (क) ॥२८
सा हानिस्तन्महच्छिद्रं सोऽधर्म्मः सा च मूढ़ता।
यन्मुहूर्त्तं क्षणं वापि शिवञ्चैव न चिन्तयेत्॥ २९
भवभक्तिपरा ये च भवप्रणतचेतसः।
भवसंस्मरणा ये च न ते दुःखस्य भाजनम्॥ ३०
भवनानि मनोज्ञानि विविधाभरणाः स्त्रियः।
धनञ्च तुष्टिपर्य्यन्तं पुत्रपौत्रादिसन्ततिम्॥३१
आरोग्यञ्च शरीरे च वस्त्राणि विविधानि च।
वाहनानि च दिव्यानि प्रतिष्ठाञ्चाप्यलौकिकीम्॥३२
ये वाञ्छन्ति महाभागा वस्तुञ्च त्रिदिवालये।
अयुवाँ च यथा मानं मित्राणि च शुभानि च॥ ३३
अन्ते मुक्तिफलञ्चैव तेऽर्चयन्ति सदाशिवम्।
लिङ्गं पूजयते नित्यं यो वै भक्तिपरायणः॥ ३४
तस्य वै सकला सिद्धिर्न स पापैर्विलिप्यते।
इत्युक्ताश्च तदा देवाः प्रणिपत्य हरिं स्वयम्॥ ३५
लिङ्गानि प्रार्थयामासुः सर्व्वकामाप्तये नृणाम्।
हरिरपि तथा ब्रह्मा विश्वकर्म्माणमब्रवीत्॥ ३६
लिङ्गानि च त्वया देव कल्पयित्वा शुभानि च।
देयानि सर्व्वदेवेभ्यो वचनान्मम सत्तम॥ ३७
लिङ्गानि कल्पयित्वैवञ्चाधिकारानुरूपतः।
विश्वकर्म्मा ददौ तेभ्यो नियोगाद्ब्रह्मणः प्रभोः॥ ३८
तदेव कथयाम्यद्य श्रूयतामृषिसत्तमाः।
पद्मरागमयं शक्रो हैमं विश्रवसः सुतः॥ ३९
पीतं मणिमयं धर्म्मो वरुणः श्यामलं शिवम्।
इन्द्रनीलमयं विष्णुर्ब्रह्मा हेममयं तथा॥ ४०
विश्वे देवास्तथा रौप्यं वसवश्च तथैव च।
आरकूटमयं वायुरश्विनौ पार्थिवं तदा॥ ४१
लक्ष्मीश्च स्फाटिकं देवी आदित्यास्ताम्रनिर्म्मितम्।
मौक्तिकं सोमराजो वै वज्रलिङ्गं विभावसुः॥ ४२
मृन्मयञ्चैव विप्रेन्द्रा विप्रपत्न्यस्तथैव च।
चन्दनेन कृतं यद्वै मयः पूजयते शिवम्॥ ४३

(क) वचनान्मम सत्तमा इति पाठान्तरम्।

अनन्ताद्यास्तथा नागाः प्रवालकमयं शिवम्।
दैत्याश्च गोमयं लिङ्गं राक्षसाश्च महाबलाः॥
लोहमयं तथा लिङ्गं पिशाचाः पूजयन्ति हि।
शिवा देवी सदा पूज्या नवनीतविनिर्म्मितम्।
दारुजं निर्ऋतिर्भक्त्या योगी भस्ममयं तथा।
सूर्य्यपत्नी पिष्टमयं ब्रह्माणी रत्नसम्भवम्॥ ४
दधिमयं तथा यक्षाः पूजयन्ति निरन्तरम्।
एवंविधानि लिङ्गानि दत्तानि विश्वकर्म्मणा।
ते पूजयन्ति सर्व्वे वै देवा ऋषिगणास्तथा।
ब्रह्मा चैव तथा विष्णुरन्ये देवाश्च ये पुनः॥
पूजयन्ति तदा देवं नित्यं सिद्धिसमीहया।
तथा कृत्वा च लिङ्गानि देवानां हितकाम्यया।
पूजाविधिं समाचख्यौ ब्रह्मणेऽनन्तशक्तये।
तच्छ्रुत्वा वचनं विष्णोर्ब्रह्मा देवगणैः सह॥
जगाम च स्वकं धाम हर्षनिर्भरमानसः।
विष्णुश्चान्तर्हितस्तत्र ह्युपदिश्य तथा विधिम्।
तत्रागत्य ऋषीन् सर्व्वान् देवांश्चैव तथा पुनः
शिवपूजाविधिं सम्यक् कथयामास निश्चलः।
यं विधिञ्च तथा कृत्वा लोकानां फलमुत्तमम्।
भवतीति सुनिश्चित्य तस्मात् पूज्यो हरः सदा

इति श्रीशैवे महापुराणे ज्ञानसंहितायां पू
विधानं नाम पञ्चविंशोऽध्यायः॥ २५॥

षड़्विंशोऽध्यायः।

ऋषय ऊचुः।

सूत सूत महाभाग किं जातं तदनन्तरम्।
ब्रह्मणा च कथं प्रोक्तः पूजाविधिः शिवस्य च
यथा च कथितस्तेन तथा त्वं कथयाऽधुना।
इत्येतद्वचनं श्रुत्वा सूतो वाक्यमथाब्रवीत्॥ २

सूत उवाच।

यथा च पृच्छ्यते मह्यं भवद्भिर्लोककाम्यया
तथा व्यासेन संपृष्टः कुमारः सनत्पूर्व्वकः (क)
तेनैव कथितस्तस्मै तेन मह्यं तथा पुनः।
तमहं कथयाम्यद्य भवद्भ्यश्च मुनीश्वराः॥ ४

(क) सनपूर्व्वक इति पाठान्तरम्।

ब्रह्मोवाच ।

श्रूयतामृषयः सर्व्वे शिवपूजाविधिः क्रमात् ।
मानुषं जन्म सम्प्राप्य दुर्लभं सर्व्वजन्तुषु ॥ ५
तत्रापि सत्कुले देवा दुष्प्रापञ्च मुनीश्वराः ।
प्रत्यङ्गञ्चैव सम्प्राप्य कर्म्म स्वोक्तं समाचरेत् ॥ ६
उद्दिश्य ज्ञातिसमुद्दिष्टं तत् तत् कर्म्म न लङ्घयेत् ।
ततश्च तत् समुत्पन्नं फलं भवति निश्चितम् ॥ ७
यावज्ज्ञानस्य सम्पत्तिस्तावत् कर्म्म समाचरेत् ।
कर्म्मयज्ञसहस्रेभ्यस्तपोयज्ञो विशिष्यते ॥ ८
तपोयज्ञसहस्रेभ्यो जपयज्ञो विशिष्यते ।
जपयज्ञसहस्रेभ्यो ध्यानयज्ञो विशिष्यते ॥ ९
ध्यानयज्ञात् परं नास्ति ध्यानं ज्ञानस्य साधनम् ।
यदासनं परंब्रह्म योगी ध्यानेन पश्यति ॥ १०
यदा समरसोऽभीष्टं योगी ध्यानेन पश्यति ।
ध्यानयज्ञरतस्यास्य सदा सन्निहितः शिवः ॥ ११
नास्ति विज्ञानिनाञ्चेति प्रायश्चित्तादि शोधनम् ।
विशुद्धा विद्यया सर्व्वे ब्रह्मविद्याविदो जनाः ॥ १२
नास्ति क्रिया च लोके च सुखं दुःखं विचारतः ।
धर्म्माधर्म्मौ जपो होमो ध्यानं ज्ञाननिधिः स्मृतः॥१३
परानन्दकरं लिङ्गं विशुद्धं शिवमक्षरम् ।
निष्कलं सर्व्वगं ज्ञेयं योगिनां हृदि संस्थितम् ॥१४
लिङ्गन्तु द्विविधं प्रोक्तं वाह्यमाभ्यन्तरं द्विजाः ।
वाह्यं स्थूलं मुनिश्रेष्ठाः सूक्ष्ममभ्यन्तरं शुभम् ॥ १५
कर्म्मयज्ञरता ये च स्थूललिङ्गार्च्चने रताः ।
असतां भावनार्थाय सूक्ष्मे तु स्थूलविग्रहम् ॥ १६
आध्यात्मिकन्तु यल्लिङ्गं प्रत्यक्षं यस्य नो भवेत् ।
तस्य लिङ्गे तथा स्थूले कल्पयेच्च न चान्यथा ॥ १७
ज्ञानिनां सूक्ष्ममलं भवेत् प्रत्यक्षमव्ययम् ।
यस्मात् स्थूलमयुक्तानां मृत्काष्ठादौ प्रकल्पितम् ॥१८
ग्रहो विचारतो नास्तीत्यन्ये तत्त्वार्थवादिनः ।
निष्कलं सकलं चित्ते सर्व्वं शिवमयं जगत् ॥ १९
एवं ज्ञानविमुक्तानां नास्ति दोषविकल्पना ।
विधिश्चैव तथा नास्ति विहिताविहिते तथा ॥ २०
यथा जले च कमलं जलेन च न लिप्यते ।
तथा ज्ञानी गृहे तिष्ठन् कर्म्मणा न स बध्यते ॥ २१
इति ज्ञानं समुत्पन्नं यावच्चैव नरस्य च ।
तावच्च कर्म्मणा देवं शिवमाराधयेन्नरः ॥ २२
प्रत्ययार्थञ्च जगतामेकस्थोऽपि दिवाकरः ।
एकोऽपि बहुधा दृष्टो जलाधारेषु सुव्रताः ॥ २३
दृश्यते श्रूयते यद्यत् तत्तद्विद्धि शिवात्मकम् ।
भेदो जनानां लोकेऽस्मिन् प्रतिभासो विचारतः॥२४
एवमाज्ञस्तदा चान्ये सर्व्वे वेदार्थतत्त्वगाः ।
हृदि संसारिणां साक्षात् सकलः परमेश्वरः ॥ २५
इति विज्ञानयुक्तस्य किं तस्य प्रतिमादिभिः ।
इति विज्ञानहीनस्य प्रतिमाकल्पना शुभा ॥ २६
पदमुच्चैः समारोढुं पुंसो नालम्बनं स्मृतम् ।
नालम्बनं विना तस्य पदमुच्चैः सुदुष्करम् ॥ २७
निर्गुणप्राप्तये नृणां प्रतिमालम्बनं स्मृतम् ।
सगुणान्निर्गुणप्राप्तिर्भवतीति सुनिश्चितम् ॥ २८
एवञ्च सर्व्वदेवानां प्रतिमा प्रत्ययावहा ।
देवस्यायं मदीयो वै तस्यार्थं पूजनन्त्विदम् ॥ २९
गन्ध-चन्दन-पुष्पादि किमर्थं प्रतिमां विना ।
तावच्च प्रतिमा पूज्या यावद्विज्ञानसम्भवः ॥ ३०
ज्ञानाभावे न पूज्येत पतनं तस्य निश्चितम् ।
एतस्मात् कारणाद्विप्राः श्रूयतां कथयामि च ॥ ३१
स्वजात्युक्तन्तु यत् कर्म्म कर्त्तव्यं तत् प्रयत्नतः ।
यत्र यत्र तथा भक्तिः कर्त्तव्यं पूजनादिकम् ॥ ३२
विना पूजन-दानादि पातकं न विदूरतः ।
यावच्च पातकं देहे तावत् सिद्धिर्न जायते ॥ ३३
गते च पातके तस्य सर्व्वञ्च सफलं भवेत् ।
यथा च मलिने वस्त्रे रङ्गः शुभतरो न हि ॥ ३४
क्षारादिना क्षते शुद्धे सर्व्वो रङ्गो विसृज्यते ।
तथा च निर्म्मले देहे देवानां पूजया तथा ॥ ३५
ज्ञानरङ्गः प्रजायेत विज्ञानं सम्भवेत् तदा ।
विज्ञानस्य च यन्मूलं ज्ञानं सम्यगुदाहृतम् ॥ ३६
ज्ञानस्यैव तु यन्मूलं भक्तिरव्यभिचारिणी ।
भक्तेर्मूलन्तु यत् कर्म्म देवादिपूजनं शुभम् ॥ ३७
तन्मूलं सद्गुरुः प्रोक्तस्तन्मूलं सङ्गतिः सताम् ।
सङ्गत्या गुरुर्लभ्येत गुरोर्मन्त्रादिपूजनम् ॥ ३८
पूजनाज्जायते भक्तिर्भक्त्या ज्ञानं प्रजायते ।
ज्ञानाद्विज्ञानसम्पत्तिः सत्यमेव न संशयः ॥ ३९
विज्ञानञ्च यदा जातं तदा भेदो निवर्त्तते ।

अहन्त्वायं पुनः पुत्रो मित्रं शत्रुर्धनं स्त्रियः ॥ ४०
माने चैवापमाने च लाभे चैवाप्यलाभके।
तथा जयाजयौ तस्य समौ स्यातां निरन्तरम् ॥ ४१
द्वन्द्वदुःखविहीनश्च शिवरूपो भवत्यसौ।
द्वन्द्वप्राप्तौ न जायते सुखदुःखे विजानतः ॥ ४२
विहिताविहिते तस्य नश्यतो ऋषिसत्तमाः।
ईदृशो विरलो लोके गृहाश्रमविवर्त्तिषु ॥ ४३
यदि भवति लोकेऽस्मिन् दर्शनात् पापहारकः।
तीर्थानि श्लाघयन्तीह तादृशमृषिसत्तमाः ॥ ४४
तादृशान्येव तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन विज्ञानी दर्शनादपि ॥ ४५
यावद्गृहाश्रमे तिष्ठेत् तावदाकारपूजनम्।
शिवस्य प्रतिमा वापि शिवायाः प्रतिमा तथा ॥ ४६
विष्णोश्चैव प्रयत्नेन सूर्य्यस्यैवाथ वा पुनः।
गणपतेर्वा पुनस्तत्र पञ्चायतनमुत्तमम् ॥ ४७
अथवा च शिवः पूज्यो मूलमेव विशिष्यते।
मूले सिक्ते यथा शाखास्तृप्ताः सन्ति मुनीश्वराः॥४८
शाखायाञ्चैव तृप्तायां मूलं तृप्तं न कर्हिचित्।
शिवे च पूजिते देवाः पूजिताः सर्व्वे एव हि ॥ ४९
तस्माच्च पूजयेद्देवं त्र्यम्बकं लोकशङ्करम्।
सर्व्वकामफलावाप्त्यै सर्व्वभूतहिते रतम् ॥ ५०

इति श्रीशैवे महापुराणे ज्ञानसंहितायां पूजाप्रकरणं नाम षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः।

सूत उवाच।

अतः परं प्रवक्ष्यामि पूजाविधिसुखावहाम्।
श्रूयतामृषयः श्रेष्ठाः कथां पापप्रणाशिनीम् ॥ १
ब्राह्मे मुहूर्त्ते उत्थाय स्मृत्वा देवं गदाधरम्।
उत्तिष्ठोत्तिष्ठ देवेश उत्तिष्ठ हृदयेशय ॥ २
उत्तिष्ठ कमलास्वामिन् ब्रह्माण्डे मङ्गलं कुरु।
इत्येवं वचनं श्रुत्वा स्मृत्वा च गुरुपादकौ ॥ ३
देहशुद्धिं तथा कृत्वा प्रक्षाल्य चरणौ मुदा।
हस्तौ च विधिवत् क्षाल्य दन्तधावनमाचरेत् ॥ ४
अनुदिते दिवानाथे कृत्वा तु दन्तधावनम्।
मुखं षोड़वारन्तु प्रक्षाल्याञ्जलिभिस्तथा ॥ ५
यथावकाशं सुस्नायान्नद्यादिष्वथवा गृहे।
देशकालाविरुद्धञ्च स्नानं कार्य्यं नरेण च ॥
रवेर्दिने तथा श्राद्धे सङ्क्रान्तौ ग्रहणे तथा।
महादाने तथा तीर्थे ह्युपवासदिने तथा ॥ ७
आशौचेऽप्यथवा विप्रा न स्नायादुष्णवारिणा।
तैलाभ्यङ्गं न कुर्व्वीत (क) वारान् दृष्ट्वा क्रमे
रवौ तापं तथा कुर्य्यात् सोमे कान्तिं लभेन्नरः।
भौमे मृत्युं लभेताथ बुधे लक्ष्मीं लभेन्नरः ॥
गुरौ दरिद्रताञ्चैव शुक्रे चाप्यसुखं भवेत्।
सुखं शनैश्चरे चैव वारादिफलमुत्तमम् ॥ १०
अशक्तौ च तथा कार्य्यं श्रूयतामृषिसत्तमाः।
अर्कं पुष्पं क्षिपेत् तैले गुरौ दूर्व्वां तथैव च ॥
भूमिपुत्रे रजश्चैव शुक्रे च जलबिन्दुकम्।
नित्यमभ्यङ्गके चैव वासिते नैवदूषणम् ॥ १२
केनापि च न कर्त्तव्यं श्राद्धे च ग्रहणे तथा।
उपवासे तथा प्राप्ते प्रतिपद्दिवसे तथा ॥ १
अथवा सार्षपं तैलं न दुष्येद्ग्रहणं विना।
देशं कालं विचार्य्यैव स्नानं कुर्य्याद्यथाविधि
उत्तराभिमुखश्चैव प्राङ्मुखोऽप्यथवा पुनः।
उच्छिष्टेनैव वस्त्रेण न स्नायान्मुनिसत्तमाः ॥
परधार्य्यं तथोच्छिष्टं रात्रौ च विधृतञ्च यत्।
तेन स्नानं तदा कार्य्यं क्षालितञ्च यदा भवेत्।
प्रक्षाल्य चरणौ प्राग्वै पश्चादाचमनं चरेत्।
पश्चादावाहनं कार्य्यं तीर्थानां स्मरणं तथा ॥
अद्यप्रयोगमुच्चार्य्य स्नानकाले सदा नरः।
प्रक्षिपेच्च जलं पूर्व्वं मस्तके ऋषिसत्तमाः ॥
तीर्थनामावलिं तत्र पठेच्च विधिपूर्व्वकम्।
पश्चादङ्गेषु च क्षेप्यं जलञ्च मार्ज्जनं पुनः ॥ १
कृत्वा मृदा शुचिं तत्र क्षालयेन्मतिमान् नरः
पश्चादाचमनं कृत्वा गङ्गां विष्णुं स्मरेत् पुनः ॥
धौतवस्त्रं ततो धार्य्यं पुनराचमनं चरेत्।
शुद्धदेशे ततो गत्वा गोमयाद्युपमार्ज्जिते ॥ २
आसनञ्च शुभं तत्र रचनीयं द्विजोत्तमाः।
शुद्धकाष्ठसमुत्पन्नमूर्णान्तरितमेव च ॥ २२

(क) तैलाभ्यङ्गन्तु कुर्व्वीतेति क्वचित् पाठः।

वेत्रासनं तथा कुर्य्यात् सर्व्वकामफलप्रदम्।
यथायोग्यं पुनर्ग्राह्यं मृगचर्म्मादिकञ्च यत् ॥ २३
तत्रोपविश्य कुर्व्वीत तिलकं मतिमान् नरः।
तिलकं पञ्चधा प्रोक्तं तेष्वेकं परिकल्पयेत् ॥ २४
त्रिपुण्ड्रञ्चोर्द्ध्वपुण्ड्रञ्च चार्द्धचन्द्रमथापि वा।
दृश्यं वंशपत्रेण पञ्चमञ्च निबोध मे ॥ २५
ष्यञ्च पारिजातस्य तेनैव सदृशं पुनः।
त्रिपुण्ड्रञ्चोर्द्ध्वपुण्ड्रञ्च शिवभक्ते विशिष्यते ॥ २६
ख्य-चन्त्र-विशां तत्र चत्वारि तिलकानि वै।
र्द्धचन्द्रं तथा शूद्रैरूर्द्ध्वपुण्ड्रमथापि वा ॥ २७
वैष्णुभक्तैर्विशेषेण तिलकं सुप्रतिष्ठितम्।
र्द्ध्वपुण्ड्रं तथा चात्र वंशपत्राकृतिर्यथा ॥ २८
स्माच्च तिलकं कार्य्यं कृत्वा सिद्धिमवाप्नुयात्।
पस्तपस्तथा दानं तिलकात् सफलं भवेत् ॥ २९
भावे तिलकस्यापि जलस्यापि प्रकीर्त्तितम्।
त्वा तिलकं वर्णोक्तं विधिं सम्पादयेन्नरः ॥ ३०
स्पाद्य च स्वकं कर्म्म पुनराराधयेच्छिवम्।
नराचमनं कृत्वा त्रिवारं मन्त्रपूर्व्वकम् ॥ ३१
कं वाथ प्रकुर्व्वीत गङ्गां विष्णुं ब्रुवन्निति।
त्मतत्त्वं शिवतत्त्वं विद्यातत्त्वं तथैव च ॥ ३२
तुर्थ्यन्तपदं ग्राह्यमाचमने विधौ नरैः।
र्घोदकं तथा तत्र पूजार्थञ्च समाहरेत् ॥ ३३
न्यद्वस्तु च यत् किञ्चिद्‌यथाशक्ति समीपगम्।
त्वा स्थेयञ्च तत्रैव धैर्य्यमास्थाय वै नरैः ॥ ३४
र्घपात्रं तथा चैकं जलगन्धाक्षतैर्युतम्।
च्चिणांशे तथा स्थाप्योपचारकल्पनाय वै ॥ ३५
रोश्च स्मरणं कृत्वा तस्मै नत्वा विशेषतः।
नं पूजां तथा कृत्वा तदनुज्ञामवाप्य च ॥ ३६
द्यादि पुनरुच्चार्य्य कामनां निप्रयुज्य च।
जयेत् परया भक्त्या शिवं सपरिवारकम् ॥ ३७
द्रामेकां प्रदर्श्यैव पूजयेद्विघ्नहारकम्।
सिन्दूरैः कुसुमैर्देवं सिद्धि-बुद्धिसमन्वितम् ॥ ३८
क्ष-लाभयुतं तत्र पूजयित्वा नमेत् पुनः।
मामाप्य नन्दिनं देवं भार्य्या सह समन्वितम् ॥ ३९
जयेत् परया भक्त्या नमस्कृत्य ततः पुनः।
रपालं सदा द्वारि तिष्ठन्तञ्च महोदरम् ॥ ४०

पूजयित्वा ततः पश्चात् पूजयेद्गिरिजां सतीम्।
चन्दनैः कुङ्कुमैश्चैव धूपैर्दीपैरनेकधा ॥ ४१
नैवेद्यैर्विविधैश्चैव पूजयित्वा ततः शिवाम्।
नमस्कृत्य पुनस्तत्र गच्छेच्च शिवसन्निधौ ॥ ४२
यदि गृहे पार्थिवी वा हैमी वा राजती तथा।
धातुजन्या तथा वान्या पारदी धातुसम्भवा ॥ ४३
तस्यान्तु पूजितायां वै सर्व्वे स्युः पूजितास्तथा।
स्थापितञ्च यदा लिङ्गं विधानं विधिपूर्व्वकम् ॥ ४४
कर्त्तव्यं सर्व्वथा तत्र गृहे नियमो न विद्यते।
जीवप्राणप्रतिष्ठाञ्च भूतशुद्धिं विधाय च ॥ ४५
दिक्पालान् पूजयेत् तत्र स्थापिते च शिवालये।
गृहे शिवः सदा पूज्यो मूलमन्त्राभियोगतः ॥ ४६
तत्र तु द्वारपालानां नियमो नास्ति सर्व्वथा।
गृहे लिङ्गञ्च सम्पूज्य तस्मिन् सर्व्वं प्रतिष्ठितम् ॥ ४७
पूजाकाले च साङ्गं वै परिवारयुतं तदा।
आवाह्य पूजयेद्देवं नियमोऽत्र न विद्यते ॥ ४८
शिवस्य सन्निधिं गत्वा ह्यासनं परिकल्पयेत्।
उदङ्मुखस्तदा स्थित्वाचमनं पुनरेव च ॥ ४९
प्रक्षाल्य हस्तौ पश्चाद्वै प्राणायामं प्रकल्पय च।
मूलमन्त्रेण तत्रैव दशावर्त्तं जपेन्नरः ॥ ५०
पञ्च मुद्राः प्रकर्त्तव्याः पूजादौ शुभमीप्सता।
एता मुद्राः प्रदर्श्यैव पूजाविधिं समाचरेत् ॥ ५१
दीपं कृत्वा तदा तत्र नमस्कारं गुरोरथ।
बद्ध्वा पद्मासनं तत्र भद्रासनमथापि वा ॥ ५२
उत्तानासनकं कृत्वा पर्य्यङ्कासनकेन च।
यथासुखं तथा स्थित्वा प्रयोगं पुनरेव च ॥ ५३
कृत्वा पूजां पुरा जातां वटुकेनैव कारयेत्।
यदि वा स्वयमेवेह गृहे नियमो न विद्यते ॥ ५४
पश्चाच्चैवार्घपात्रेण चालयेल्लिङ्गमुत्तमम्।
अनन्यमानसो भूत्वा पूजां कृत्वा यथाविधि ॥ ५५
पश्चादावाहयेद्देवं मन्त्रेणानेन वै नरः।
कैलासशिखरस्थञ्च पार्व्वतीपतिमुत्तमम् ॥ ५६
यथोक्तरूपिणं देवं निर्गुणं गुणरूपिणम्।
पञ्चवक्त्रं दशभुजं त्रिनेत्रं वृषभध्वजम् ॥ ५७
कर्पूरगौरकं दिव्यं चन्द्रमौलिं कपर्द्दिनम्।
व्याघ्रचर्म्मोत्तरीयञ्च गजचर्म्माम्बरं शुभम् ॥ ५८

वासुक्यादिपरीताङ्गं पिनाकादिविभूषितम्।
कपाल-डमरुयुक्तं कण्ठे गरलशोभितम्॥ ५९
सिद्धयोऽष्टौ च यस्याग्रे नृत्यन्तीह निरन्तरम्।
जय जयेति शब्दैश्च सेवितं निजभक्तकैः॥ ६०
तेजसा दुःसहेनैव सम्बद्धं देवसेवितम्।
शरण्यं सर्व्वसत्वानां प्रसन्नमुखपङ्कजम्।
वेदशास्त्रैर्यथा गीतं शिवमावाहयाम्यहम्॥ ६१

इति श्रीशैवे महापुराणे ज्ञानसंहितायां पूजा-विधानवर्णनं नाम सप्तविंशोऽध्यायः॥२७॥

अष्टाविंशोऽध्यायः।

सूत उवाच।

अर्घपात्रजलेनैव सेचयेल्लिङ्गमुत्तमम्।
अथवा च तत्पार्श्वे हि जलेनैव क्षिपेदिति॥ १
एवं ध्यानेऽप्यशक्तो हि मूलमन्त्रमुदीरयेत्।
यथोक्तरूपिणं शम्भुं शिवमावाहयाम्यहम्॥ २
इत्युक्त्वा उपचारादीन् कल्पयेद्विधिवत् तदा।
पूर्व्वोक्तेनैव ध्यानेन ह्यासनं परिकल्पयेत्॥ ३
चतुर्थ्यन्तपदेनैव सर्व्वं कुर्य्याद्यथाक्रमम्।
पश्चात् पाद्यं प्रदद्याद्वै शिवाय परमात्मने॥ ४
ततश्चाचमनं दत्त्वा शम्भवे गुणरूपिणे।
पश्चाच्च पञ्चभिर्द्रव्यैः स्नापयेच्छङ्करं मुदा॥ ५
वेदमन्त्रैर्यथायोग्यं नामभिर्वा स्वमन्त्रकैः।
चतुर्थ्यन्तपदेनैव द्रव्याण्येवार्पयेत् तदा॥ ६
दुग्धं दधि तथा चाज्यघृतं मधु च शर्करा।
तस्य तस्य च मन्त्रेण अर्पयेच्छङ्कराय वै॥ ७
यथाभिलाषं तद्द्रव्यमर्पयेच्छङ्करोपरि।
अथवा मन्त्रमुच्चार्य्य देयं जलमनुत्तमम्॥ ८
पश्चाच्च वारुणं स्नानं करणीयं शिवाय वै।
पश्चाच्च चन्दनं दत्त्वा स्वल्पहस्ते विदूरतः॥ ९
शुभेनैव जलेनैव जलधारां प्रसिञ्चयेत्।
वेदमन्त्रः षडङ्गैर्वा नामभी रुद्रसंख्यया॥ १०
यथावकाशं तां दत्त्वा वस्त्रेणामार्ज्जयेत् ततः।
तस्मै च माल्यं दत्त्वा शिवाय परमात्मने॥ ११
पश्चादाचमनीयञ्च ततो वस्त्रं परात्मने।
पश्चाच्च चन्दनं देयं शिवाय सुभगाय वै॥ १२
पश्चाच्च तण्डुलान् श्वेतानर्पयेत् परमात्मने।
अथवा कामनारूपं योग्यं धान्यं समर्पयेत्॥
तिलाश्चैव यवा वापि गोधूमा माषकास्तथा।
अर्पणीयाः शिवायैव मन्त्रैर्नानाविधैरपि॥
ततः पुष्पाणि दिव्यानि पञ्चवक्त्रमहात्मने।
प्रतिवक्त्रं यथा ध्यानं कृत्वा पुष्पं समर्पयेत्॥
पश्चान्मन्त्रैरनेकैश्च पुष्पाणि विविधानि च।
देयानि शम्भवे तत्र यथायोग्याभिलाषतः॥
कमलैः शतपत्रैश्च शङ्खपुष्पैस्तथैव च।
करवीरभवैश्चैव विल्वीदलपुरःसरैः॥ १७
कुशदूर्व्वादलैश्चैव धत्तूरकुसुमैस्तथा।
तुलसीदलैस्तथा देवं पूजयेत् परया मुदा॥
गृहे वा स्थापिते लिङ्गे पूजां वा पार्थिवे पुनः।
चूर्णं वा विविधं तत्र वासितं तैलमुत्तमम्॥
पश्चाद्धूपः प्रकर्त्तव्यो गुग्गुलागुरुभिस्तथा।
दीपो देयस्तथा तस्मै शिवाय परमात्मने॥
अर्घं दद्यात् पुनस्तस्मै मन्त्रेणानेन वै तदा।
रूपं देहि जयं देहि भाग्यं भगवन् देहि मे।
भुक्ति-मुक्तिफलं देहि गृहीत्वार्घं शिवाधुना।
पश्चाद्देयं शिवायैव नैवेद्यं विविधं तदा॥ २१
ततश्चारात्रिकं कुर्य्यान्मन्त्रेण परमात्मने।
पञ्चावर्त्तिं तु मन्त्रेण कृत्वा नैराजनं विधिम्।
कुर्य्याच्च मतिमांस्तत्र सङ्कल्पं पुनरेव च।
कर्त्तव्यश्च विधिस्तत्र नैराजन इति क्रमात्॥
पुनश्च ताम्बूलं दद्यात् तस्मै च परमात्मने (क)
पुनः प्रदक्षिणां तत्र शिवाय शिवरूपिणे॥
नमस्कारं ततः कुर्य्याच्छम्भवे शङ्कराय च।
ततो ध्यानं यथोक्तञ्च कृत्वा मन्त्रमुदीरयेत्॥
यथासंख्यं यथाज्ञानं कुर्य्यान्मन्त्रविधिं नरः।
गुरूपदिष्टमार्गेण कृत्वा जपमनुत्तमम्॥ २७
स्तोत्रैर्नानाविधैस्तत्र स्तुवीत वृषभध्वजम्।
ततश्चैव तु यत् कार्य्यं श्रूयतामृषिसत्तमाः॥
पुष्पाञ्जलिः प्रदातव्या मन्त्रेणानेन वै तदा।
अज्ञानाद्यदि वा ज्ञानाज्जपपूजादिकं मया

(क) एतद्युक्तं महात्मने इति च पाठः क्वचित्

तं तदस्तु सफलं कृपया तव शङ्कर।
वकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड़ ॥ ३०
पानिध इति ज्ञात्वा भूतनाथ प्रसीद मे।
ष्पाञ्जलिं समर्प्यैवं क्षमाप्य विधिपूर्व्वकम् ॥ ३१
जाकाले पुनर्देव त्वयागन्तव्यमेव हि।
वसर्ज्जयेत् ततस्तं वै यथोक्तरूपिणं शिवम् ॥ ३२
इति श्रीशैवे महापुराणे ज्ञानसंहितायां पूजा-
विधिवर्णनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः।

ऋषय ऊचुः।

ासशिष्य महाभाग कथय त्वं प्रमाणतः।
न वै पूजितः शम्भुः किं किं यच्छति वै फलम् ॥ १

सूत उवाच।

व्वं वै कथयास्यद्य श्रूयतामृषिसत्तमाः।
कमलैर्विल्वपत्रैश्च शतपत्रैस्तथा पुनः ॥ २
ङ्खपुष्पैस्तथा देवं लक्ष्मीकामो भवेद्द्यदा।
तैश्च लक्षसंख्याकैर्लक्ष्मीः स्यान्नात्र संशयः ॥ ३
वंशतिः कमलानान्तु प्रस्थमेकमुदाहृतम्।
वल्वीदलसहस्रेण प्रस्थमेकं पुरातनैः ॥ ४
तपत्रसहस्रेण प्रस्थार्द्धं परिभाषितम्।
लैः षोड़शभिः प्रस्थं पलं टङ्कदश स्मृतम् ॥ ५
नेनैव तु मानेन तुलामारोपयेद्द्यदा।
ाज्यस्य कामुको यो वै पार्थिवानाञ्च पूजया ॥ ६
ोषयेच्छङ्करं देवं दशकोट्या मुनीश्वराः।
तिशिवं तथा पुष्पमखण्डितदलं तथा ॥ ७
र्च्चितं चन्दनेनैव जलधारां तथा पुनः।
तिरूपं तथा मन्त्रं विल्वीदलमनुत्तमम् ॥ ८
थवा शतपत्रञ्च कमलं वा तथा पुनः।
ङ्खपुष्पं तथा प्रोक्तं विशेषेण पुरातनैः ॥ ९
पं दीपञ्च नैवेद्यमर्घमारात्रिकं तथा।
दक्षिणां नमस्कारं क्षमापणविसर्ज्जनम् ॥ १०
त्वा साङ्गं तथा भोज्यं कृतं येन भवेदिह।
स्य वै सर्व्वथा राज्यं शङ्करो लोकशङ्करः ॥ ११
धान्यकामुको यो वै तदर्द्धेनार्च्चयेत् पुमान्।
काराग्रहगतो यो वै लक्षेणैवार्च्चयेद्धरम् ॥ १२
रोगग्रस्तो यदा स्याद्वै तदर्द्धेनार्च्चयेच्छिवम्।
कन्याकामो भवेद्द्यो वै तदर्द्धेन शिवं पुनः ॥ १३
विद्याकामस्तथो यः स्यात् तदर्द्धेन शिवं तथा
शत्रूणां सङ्कटे जाते ह्ययुतेन शिवं तथा ॥ १४
उच्चाटनार्थं शत्रूणां तथैव पूजनं हरे।
मारणे चतुर्लक्षेण मोहने तु तदर्द्धकम् ॥ १५
सामन्तविजये चैव कोटिपूजा प्रशस्यते।
वशीकरणे तथा राज्ञामयुतञ्च प्रशस्यते ॥ १६
यशसे च तथा तत्र पूजयेच्छङ्करं मुदा।
वाहनाप्तेत्र तथा पूज्यः सहस्रेण शिवस्तथा ॥ १७
मुक्तिकामो भवेद्द्यो वै पञ्चकोट्या शिवं नरः।
ज्ञानार्थी च तदा देवं कोट्या वै पूजयेच्छिवम् ॥ १८
शिवदर्शनकामो वै तदर्द्धेन प्रपूजयेत्।
तथा मृत्युञ्जयो जाप्यः कामनाफलरूपतः ॥ १९
पञ्चलक्षो यदा जातः प्रत्यक्षन्तु सदा शिवः।
लक्षेण देहशुद्धिः स्याद्द्वितीये जातिसंस्मरः ॥ २०
तृतीये कामनाज्ञानं चतुर्थे स्वप्नदर्शनम्।
पञ्चमे तु शिवः साक्षादाविर्भवति चाग्रतः (क) ॥२१
अनेनैव तु मन्त्रेण दशलक्षे फलं भवेत्।
मुक्तिकामो भवेद्द्यो वै दर्भैश्च पूजनं चरेत् ॥ २२
लक्षसंख्या तु सर्व्वत्र ज्ञातव्या ऋषिसत्तमाः।
आयुष्कामो भवेद्द्यो वै दूर्व्वाभिः पूजनं चरेत् ॥२३
पुत्रकामो भवेद्द्यो वै धत्तूरकुसुमैर्नरः।
रक्तदण्डश्च धत्तूरः पूजने शुभदः स्मृतः ॥ २४
अगस्त्यकुसुमैर्यश्च तस्य वै विपुलं यशः।
भुक्ति-मुक्तिफलं तस्य तुलसीपूजनं चरेत् ॥ २५
अर्कपुष्पैः प्रतापैश्च कुब्जकह्लारकैस्तथा।
जपाकुसुमपूजा तु शत्रूणां मृत्युदा स्मृता ॥ २६
रोगोच्चाटनकानीह करवीराणि वै क्रमात्।
बन्धूकैर्भूषणावाप्तिर्जात्या वाहनसम्भवः ॥ २७
अतसीपुष्पकैर्देवो विष्णुर्वल्लभतामियात्।
शमीपत्रैस्तथा मुक्तिः प्राप्यते पुरुषेण च ॥ २८
मल्लिकाकुसुमैर्देवः स्त्रियं शुभतरां शिवः।

(क) पञ्चमन्तु यदा लक्षं फलं यच्छत्यसंशयमिति क्वचित् पाठः।

यूथिकाकुसुमैः शस्यं गृहं नैव विमुञ्चति ॥ २९
कर्णिकारैस्तथा वस्त्रसम्पत्तिर्जायते नृणाम्।
निर्गुण्डीकुसुमैर्लोके मनो निर्म्मलतां व्रजेत् ॥ ३०
तत् कुसुमं न विद्येत यच्चैव शिववल्लभम्।
चम्पकं केतकं हित्वा अन्यत् सर्व्वं शिवेऽर्पयेत् ॥ ३१
एतत् ते कथयिष्यामि कारणं दुष्करं नृणाम्।
यदा लक्षं शिवे दद्यात् तदा च विपुलं फलम् ॥ ३२
पुष्पाणि तिलजातानि मुक्तिदानि न संशयः।
राजिकाकुसुमानीह शत्रूणां मृत्युदानि च ॥ ३३
अतः परञ्च धान्यानां फलं शृणुत सत्तमाः।
तण्डुलारोपणे नृणां लक्ष्मीवृद्धिः प्रजायते ॥ ३४
प्रस्थानां षट्केनैव तदर्द्धेन तथा पुनः।
पलद्वयं तथा तत्र लक्षमानमुदाहृतम् ॥ ३५
पूजां रुद्रविधानेन कृत्वा वस्त्रञ्च सुन्दरम्।
शिवोपरि न्यसेत् तत्र तण्डुलार्पणमुत्तमम् ॥ ३६
उपरि श्रीफलन्त्वेकं गन्ध-पुष्पादिभिस्तथा।
रोपयित्वा च धूपादि कृत्वा पूजाफलं लभेत् ॥ ३७
प्राजापत्यद्वयं तत्र ब्राह्मणान् भोजयेत् ततः।
लक्षपूजा तथा जाता साङ्गा च मन्त्रपूर्व्वकम् ॥ ३८
शतमष्टोत्तरं तत्र मन्त्रे विधिरुदाहृतः।
तिलानाञ्च तथा लक्षं महापातकनाशनम् ॥ ३९
एकादशपलैरेव लक्षमानमुदाहृतम्।
पूर्व्ववत् पूजनं तत्र कर्त्तव्यं हितकाम्यया ॥ ४०
पूज्यास्तु ब्राह्मणास्तस्मादन्न कार्य्या नरेण ह।
महापातकजं दुःखं नश्यति तत्क्षणाद्ध्रुवम् ॥ ४१
यवपूजा तथा प्रोक्ता लक्षेण परमा शिवे।
प्रस्थानामष्टकञ्चैव प्रस्थार्द्धसंयुतं पुनः ॥ ४२
पलद्वययुतं तच्च मानमेतत् पुरातनम्।
यवपूजा तथा प्रोक्ता स्वर्गं सुखविवर्द्धिनी ॥ ४३
प्राजापत्यं ब्राह्मणानां कर्त्तव्यं फलमीप्सुना।
गोधूमानां तथा पूजा प्रशस्ता ऋषिसत्तमाः ॥ ४४
सन्ततिं वर्द्धयेत् सापि यदि लक्षावधि क्रमात्।
द्रोणार्द्धेन भवेल्लक्षं विधानं विधिपूर्व्वकम् ॥ ४५
पुनश्च ब्राह्मणानां हि प्राजापत्यं भवेदिह।
मुद्गानां पूजनादेव शिवो यच्छति वै सुखम् ॥ ४६
प्रस्थानां सप्तकेनैव प्रस्थार्द्धेनाथवा पुनः।
पलद्वययुतेनैव लक्षमेकं विदुर्बुधाः ॥ ४७
माषाणाञ्च तथा पूजा रोगनाशकरी तथा।
प्रस्थानामष्टकेनैव प्रस्थार्द्धेनाथवा पुनः ॥ ४८
प्रस्थानां सप्तकेनैव लक्षमुक्तं पुरातनैः।
ब्राह्मणानां तथा भोज्यं रुद्रसंख्यावधि स्मृतम्
प्रियङ्गुपूजनं देवे सर्व्वाध्यक्षे परात्मनि।
धर्म्मार्थवर्द्धनायैव पूजा सर्व्वसुखावहा ॥ ५०
प्रस्थमेकञ्च यत् प्रोक्तं लक्षमेकं पुरातनैः।
ब्रह्मभोज्यं तथा प्रोक्तमर्काणां संख्यया मुने ॥
राजिकापूजनं तस्य शत्रोर्म्मृतिकरं स्मृतम्।
प्रस्थेन पलयुक्तेन लक्षमेकं तथा स्मृतम् ॥ ५२
सर्षपाणां तथा लक्षं पलैर्विंशतिसंख्यया।
तेषाञ्च पूजनादेव शत्रोर्म्मृतिरुदाहृता ॥ ५३
विप्राणां भोजनं तत्र शतमेकोत्तरं स्मृतम्।
एका गौश्च प्रदातव्या बलिवर्द्दस्तथैव च ॥ ५
मरीचिसम्भवा पूजा शत्रोर्नाशकरी स्मृता।
अतोऽपि विविधैर्धान्यैः पूजनं शङ्करस्य च ॥ ५
आढ़कीनां दलैश्चैव रचयित्वार्चयेच्छिवम्।
नानासुखकरी पूजा ह्येषा च ऋषिसत्तमाः ॥
इत्येतद्वचनं श्रुत्वा पुनरूचुर्ऋषीश्वराः।
लक्षमानन्तु पुष्पाणां वद त्वं हि हितावहम्।
इति श्रुत्वा वचस्तेषां पुनर्वचनमाददे।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठाः कथयामि कथामिति (क)
प्रस्थमानन्तु लक्षाणां शङ्खीपुष्पसमुद्भवम्।
लक्षं प्रोक्तान्तु व्यासेन सूक्ष्ममानदिदृक्षुणा ॥
एकादशभिस्तथा प्रस्थैर्जातिमानमुदाहृतम्।
यूथिकायाश्च तथा मानं राजिकायास्तदर्द्धकम्।
प्रस्थैर्विंशतिकैश्चैव मल्लिकामानमुत्तमम्।
तिलपुष्पे तथा मानं प्रस्थन्यूनं तथैव च ॥ ६१
ततश्च द्विगुणं मानं करवीरभवे स्मृतम्।
निर्गुण्डीकुसुमे मानं तथैव कथितं बुधैः ॥ ६२
कर्णिकारे तथा मानं शिरीषकुसुमे पुनः।
बन्धुजीवे तथा मानं प्रस्थानां दशकेन च ॥ ६
इत्यादिविविधैर्मानैर्दृष्ट्वा च पूजनं चरेत्।

(क) यथामतीति पाठान्तरं क्वचित्।

सर्व्वकामसमृद्ध्यर्थं पूजयेत् परमेश्वरम् ॥ ६४
अतः परं प्रवक्ष्यामि धारापूजाफलं स्वहम् ।
यस्य श्रवणमात्रेण कल्याणं जायते नृणाम् ॥ ६५
विधानपूर्व्वकं पूजां कृत्वा चैव शिवस्य च ।
…याञ्च जलधारा हि कर्त्तव्याश्च मुनीश्वराः ॥ ६६
ज्वरप्रतापशान्त्यर्थं जलधारा शुभावहा ।
शतरुद्रीयमन्त्रेण रुद्रमेकादशेन तु ॥ ६७
रुद्रजाप्येन वा तत्र पुरुषसूक्तेन वा पुनः ।
षडङ्गेनाथवा तत्र सह मृत्युञ्जयेन च ॥ ६८
गायत्र्याप्यथवा विप्रा नामभिर्वा विशेषकैः ।
अथवाप्यागमोक्तैर्वा जलधारादिकं तथा ॥ ६९
सुखसन्तानवृद्ध्यर्थं धारापूजनमुत्तमम् ।
घृतधारा शिवे कार्य्या यावन्मन्त्रसहस्रकम् ॥ ७०
तदा वंशस्य विस्तारो जायते नात्र संशयः ।
एवमयुतमन्त्रेण कार्य्यं वै शिवपूजनम् ॥ ७१
प्रमेहरोगशान्त्यर्थं प्राप्नुयाच्च मनेप्सितम् ।
…ण्डलश्च यदा यातस्तदा घृतसुपूजनम् ॥ ७२
…ह्मा भोज्यं तदा प्रोक्तं प्राजापत्यं मुनीश्वरैः ।
…वलं दुग्धधारा च तदा कार्य्या विशेषतः ॥ ७३
शर्करामिश्रिता तत्र यदा बुद्धिर्जड़ा भवेत् ।
…नापि बुद्धिसम्वेदे शरीरे परिकीर्त्तितम् ॥ ७४
…वन्मन्त्रायुतं स्याद्वै तावद्धाराप्रपूजनम् ।
…दा चोच्चाटनं देहे जायते कारणं विना ॥ ७५
…ल कुत्रापि चाप्रेम दुःखञ्च परिवर्द्धते ।
गृहे कलहो नित्यं यदा चैव प्रजायते ॥ ७६
…याञ्चैव कृतायां वै सर्व्वदुःखं विलीयते ।
…त्रूणां तापनार्थं वै तैलधारा शिवाय वै ॥ ७७
…सितेनैव तैलेन भोगवृद्धिः प्रजायते ।
…र्षपेण च तैलेन शत्रूनाशो भवेदिह ॥ ७८
…ना यक्ष्मराजो (क) वै गच्छेद्वै शिवपूजनात् ।
…रसस्य वै धारा सर्व्वदुःखहरी मता ॥ ७९
…गजलसमुद्भूता धारा मोक्षफलप्रदा ।
…ः सर्व्वाय याः प्रोक्ता मृत्युञ्जयशुभावहाः ॥ ८०
…तेन कृतास्तास्तु कृत्वा चैव विधानकम् ।
…व्यं ब्राह्मणानान्तु भोज्यञ्च रुद्रसंख्यया ॥ ८१

(क) यचराज इति क्वचित् पाठः ।

तदा वै सफलं सर्व्वं भवेच्चैव न चान्यथा ।
एतत् ते सर्व्वमाख्यातं यत् पृष्टोऽहं मुनीश्वराः ॥ ८२
एवं पूजाविधिं कृत्वा सर्व्वपापैः प्रमुच्यते ।
एतद्वै सकलं (क) लोके सर्व्वकामहिताय वै ॥ ८३
स्कन्दोमासहितं लोके सम्पूज्य विधिना सकृत् ।
यत् फलं लभते मर्त्त्यस्तद्वदामि यथाक्रमम् ॥ ८४
अत्र सम्भोगजातं वै भुक्त्वा पुत्रादिकं शुभम् ।
अन्ते च जायते यच्च श्रूयतामृषिसत्तमाः ॥ ८५
सूर्य्यकोटिप्रतीकाशैर्विमानैः सर्व्वकामिकैः ।
रुद्रकन्यासमाकीर्णैर्गेयवाद्यसमन्वितैः ।
शिववत् क्रीड़ते भोगी यावदाभूतसंप्लवम् ॥ ८६

इति श्रीशैवे महापुराणे ज्ञानसंहितायां पूजाविधिवर्णनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः ।

ऋषय ऊचुः ।

धन्योऽसि कृतकृत्योऽसि महापुण्योऽसि वै पुनः ।
त्वया च कथितं सर्व्वं माहात्म्यं शङ्करस्य च ॥ १
तत्रैवं कथितं यच्च चम्पकं केतकं तथा ।
न योग्यञ्च शिवायैव किन्त्वत्र कारणं वद ॥ २

सूत उवाच ।

श्रूयतामृषयः श्रेष्ठाः कारणं कथयामि च ।
कदाचिद्राघवो यातः फल्गुतीरे सलक्ष्मणः ॥ ३
सीतया सहितस्तत्र तस्थौ पित्राज्ञया ध्रुवम् ।
श्राद्धकालं कदाचिद्वै ज्ञात्वाद्य करवाम किम् ॥ ४
ग्रामे च प्रेषयामास लक्ष्मणं शस्यकाम्यया ।
किञ्चिद्द्रव्यादिकं गृह्य लज्जितो गतवांस्तदा ॥ ५
ततश्चैवाज्ञया तत्र विलम्बं कृतवांस्तदा ।
अतिकालं तदा ज्ञात्वा रामोऽपि गतवांस्तदा ॥ ६
जानक्येकाकिनी तत्र दिवारूढ़ं कथं पुनः ।
विचारतत्परा ह्यासीन्नायाति देवरः कथम् ॥ ७
प्राणनाथोऽपि तत्रैव गतो नायाति वै कथम् ।
श्राद्धकालो गतश्चात्र आसुरं सम्भविष्यति ॥ ८
इति विचार्य्य सा तत्र स्नानं कृत्वा विधानतः ।

(क) सफलमिति पाठान्तरं क्वचित् ।

इङ्गुदीदीपनं कृत्वा पुलिने सा स्थिता तदा ॥ ९
नायाति लक्ष्मणश्चैव राघवश्च तथैव च।
मम पितृनहं दास्ये पिण्डानाह स्वयं तदा ॥ १०
किञ्चिद्वस्तु गृहीत्वा तु तेनैव पिण्डकास्तदा।
दत्ता यदा तया तत्र हस्ताश्च निःसृतास्तदा ॥ ११
वदन्तस्तर्पिता ह्यद्य धन्या त्वं जनकात्मजे।
तान् दृष्ट्वा सुन्दरी हस्तान् नानालङ्कारभूषितान्॥१२
उवाच जानकी तत्र के यूयं समुपस्थिताः (क)।
श्रुत्वा तु वचनं तस्या उवाच श्वशुरस्तदा ॥ १३
अहं दशरथो नाम श्वशुरस्ते च सुव्रते।
तृप्ताः स्म तव पिण्डेन श्राद्धं ते सफलं कृतम् ॥ १४
इत्युक्ता सा तदा तत्र जानकी वाक्यमब्रवीत्।
भर्त्ता मे नैव मन्येत हस्तस्य दर्शनादिकम् ॥ १५
इत्युक्ते च तया तत्र स्वाप्याः साक्ष्ये त्वयानघे।
इति वाणीं समुत्पन्नां श्रुत्वा सा जनकात्मजा ॥१६
फल्गुं नदीं तथा गाश्च ह्यग्निञ्च केतकीं तदा।
उवाच श्रूयतां सम्यक् ते सर्व्वे साक्षितां गताः ॥ १७
ततश्चान्तर्हितास्ते वै तावद्रामः समागतः।
शीघ्रं शिवतया साध्वि भवितव्यं त्वयाधुना ॥ १८
श्राद्धकालो गतश्चाद्य श्वशुरः समुपस्थितः।
इत्युक्ते च तदा तेन जानकी विस्मिता सती ॥ १९
नोवाच वचनं किञ्चित् तदा दृष्ट्वा तथाविधाम्।
विलम्बं क्रियमाणां तामुवाच राघवस्तदा ॥ २०
वैदेहि विस्मिता त्वञ्च दृश्यसे भामिनि कथम्।
इति पृष्टा तदा तेन सर्व्वञ्च कथितं तया ॥ २१
तच्छ्रुत्वा राघवस्तत्र भ्रातरं वाक्यमब्रवीत्।
भ्रातस्त्वया श्रुतं सम्यग्जानक्या कथितञ्च यत् ॥ २२
अस्माभिर्विधिना नैव दृष्टश्चैवाधुना तथा।
कार्य्यार्थं व्याकुला सा वै व्यलीकं ह्युच्यते तया ॥ २३
एवमुक्ते तदा तेन व्रीडिता साब्रवीदिदम्।
मया च स्थापिता ह्येते साक्षिणे रघुनन्दन ॥ २४
एवमस्त्विति सत्यं व यद्येते वचनं मम।
कथयिष्यन्ति ते सुभ्रु मन्ये सत्यं वचस्तथा ॥ २५
इत्युक्ते च तदा पृष्टाश्चत्वारः साक्षिणस्तदा।

(क) अत्र वचनं प्रभो इति वद नः प्रभो इति च पाठान्तरम्।

ते सर्व्वे मोहमापन्ना न जानीमो वयन्त्विदम्
इति श्रुत्वा वचस्तेषां रामश्च लक्ष्मणस्तदा।
ऊचतुर्भ्रातरौ तत्र हास्यं कृत्वा परस्परम् ॥
कार्य्यञ्च करणीयं ते दिवारूढं बुभुक्षता।
जानकी दुःखमापन्ना किं जातं किं कृतन्त्विह
पाकं कृतवती तत्र रामः श्राद्धं तदा त्वयम्।
आवाहने कृते तत्र वाणी सूर्य्यसमीपतः ॥ २
किमर्थं ह्रयते पुत्त्र ह्यनया तर्पिता वयम्।
तत्रत्यञ्च वचः श्रुत्वा न मन्येऽहं वचो विभो ॥
कृतं श्राद्धं पुनर्नैव कर्त्तव्यं हि त्वयानघ।
तथापि राघवस्तत्र न मेने परमं वचः ॥ ३
सूर्य्यश्च साक्षितां यातः किमर्थं क्रियते त्वया
जयेति च तदा तां वै रामश्च लक्ष्मणस्तदा।
धन्या वयं यथास्माकं साध्वी कुलवधूरिति।
पाकं कृत्वा तदा भुक्त्वा रामो लक्ष्मणमब्रवीत्
एते तु साक्षितां प्राप्ताः किं कृतं दुष्टवत् तव
एतस्मिन्नन्तरे देवी शापं तेभ्योऽददात् पुनः
नदि त्वया श्रुतं यच्च दृष्टं यच्च तथा पुनः।
सत्यं निवेदितं नैव पाताले त्वं वहाधुना ॥
केतकि त्वं शिवायेह न योग्या भव सर्व्वदा।
न सत्यं कथितञ्चाद्य तथा त्वं फलमाप्नुहि ॥
सन्निकृष्टे तथा गाश्च उवाच जनकात्मजा।
यदि सत्यं त्वया नोक्तमीदृशी त्वं भवाधुना।
पुच्छे शुद्धा मुखेऽयोग्या भव त्वं सर्व्वदानघे।
देवानां सुखमग्ने त्वं यदि सत्यं न भाषितम्
सर्व्वभक्षी भव त्वञ्च वचनान्मम सत्तम।
केतकि त्वं तथा नैव यथा दृष्टं श्रुतं तथा ॥
शिवाय वल्लभा मा भूः सर्व्वकालमुदाहृता।
इति शापं तदा प्राप्ता यथायोग्यं गतास्तदा
तद्दिनं हि समारभ्य नदी ह्यन्तरवाहिणी।
अग्निश्च सर्व्वभुक् तत्र केतकी शिवदुर्लभा ॥
गौश्चापि हि यथा चात्र यदुक्तं हि तया त
एतत् सर्व्वं समाख्यातं केतकीशापकारणम्।
अतः परं चम्पकस्य कारणं कथयामि च ॥

इति श्रीशैवे महापुराणे ज्ञानसंहिताया
त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः।

सूत उवाच।

गोकर्णेश इति ख्यातः शम्भुर्लोकसुखावहः।
दक्षिणस्यां दिशि चैव निकटे वर्त्ततेऽधुना ॥ १
तस्य दर्शनमात्रेण पातकं भस्मसाद्व्रजेत्।
तन्निकटे नारदो देवो दर्शनार्थं समाययौ ॥ २
कदाचिद्गम्यमानेन नारदेन महर्षिणा।
पुष्पितः सुरभिश्चैव पथि दृष्टश्च चम्पकः ॥ ३
तत्र कश्चिद्द्विजश्रेष्ठः पुष्पार्थञ्च समागतः।
स दृष्ट्वा नारदं तत्र वीणाञ्च महतीं तथा ॥ ४
नादयन्तं तथालोक्य क्षणमात्रं तदा स्थितः।
स पुष्पावचयार्थञ्च ह्याजगाम स्वयं तदा ॥ ५
यदर्थमागतं तेन न कृतं तेन तत् तथा।
करिष्यामि यदा कार्य्यं पृष्टश्चायं करिष्यति ॥ ६
इति ज्ञात्वा तदा तेन न कृतं कार्य्यमुत्तमम्।
हस्ते च वंशपात्रञ्च दृष्ट्वोवाच द्विजं तदा ॥ ७
किमर्थमागतं ब्रह्मन् किं पात्रं हस्तके तव।
तस्य तद्वचनं श्रुत्वा द्विजो वाक्यमुपाददे ॥ ८
भिक्षार्थञ्च गमिष्यामि यथार्थं नैव भाषितम्।
तद्गत्वा नारदस्तत्र ननाम शिवमन्दिरे ॥ ९
गत्वा शिवञ्च सन्तोष्य परिवर्त्तितवांस्तदा।
स द्विजोऽपि तदा कार्य्यं कृत्वाच्छाद्य च पात्रकम् ॥ १०
मिलितश्च तदा मार्गे पुनः पृष्टं कुतो गतः।
एवं श्रुत्वा पुनस्तत्र व्यलीकं परिभाषितम् ॥ ११
न लब्धा च मया भिक्षा गच्छामि च यथागतम्।
तच्छ्रुत्वा नारदः सर्व्वं रहस्यञ्च जगाम ह ॥ १२
चम्पकस्य समीपे च आगतो नारदः स्वयम्।
आगत्य च तदा पृष्टो ब्राह्मणश्च कुतो गतः ॥ १३
गृहीतानि च पुष्पाणि कियन्ति ऋषिसत्तमाः।
तमुवाच तदा वृक्षो निषिद्धश्च द्विजन्मना ॥ १४
को वा द्विजश्च किं पुष्पं को वा त्वं परिपृच्छसि।
ततश्च नारदो ज्ञात्वा परावृत्य शिवं गतः ॥ १५
सर्व्वाण्यपि च पुष्पाणि शतमेकोत्तराणि च।
गणितानि तदा तेन नारदेन महात्मना ॥ १६
अन्येन केनचित् तत्र कृता पूजा महात्मनः।

तं पप्रच्छ पुनस्तत्र को वा किं त्वं समीहसे ॥ १७
केनानीतानि पुष्पाणि कथमुत्तारितानि च।
इति श्रुत्वा वचस्तथ्यं ब्राह्मणोऽहं सदाशिवम् ॥ १८
पूजयित्वाऽर्थये मुक्तिं सत्यमेतद्ब्रवीमि ते।
अयं वै ब्राह्मणः कश्चित् प्रत्यहं परमेश्वरम् ॥ १९
चम्पकैः पूजयित्वा तु राज्ञो मोहं ददात्यसौ।
ततो धनं गृहीत्वा तु बहून् पीड़यते द्विजान् ॥ २०
राज्ञोऽधिश्रयणं गत्वा पूजाविधिबलेन च।
अन्धो भूत्वा द्विजश्चायं गणयेन्न परान् स्वकान् ॥ २१
पुष्पाण्युत्तारितानीह पूजार्थं च मया प्रभो।
इति श्रुत्वा वचस्तस्मै मुक्तिस्ते ह्यनपायिनी ॥ २२
भविष्यति न सन्देह इति सत्यं वचो मम।
चम्पकैस्तोषितः शम्भुस्तस्य राज्ञो वशं नयेत् ॥ २३
राजानञ्च वशे नीत्वा द्विजानन्यान् प्रपीड़येत्।
दानाध्यक्षं तथा लब्ध्वा ब्राह्मणान् पीड़यत्यसौ ॥ २४
एतत् सर्व्वं चम्पकेभ्यः फलं लब्धं तथा पुनः।
चम्पकैस्तोषितः शम्भुर्वश्यत्वञ्च प्रयच्छति ॥ २५
नारदः कथयामास शिवाय परमात्मने।
ईदृशं त्वं फलं स्वामिन् किं द्विजाय प्रयच्छसि ॥ २६
तमुवाच ततो देवः किं करोमीह नारद।
ईदृशं चम्पकाल्लब्धं फलञ्चैव द्विजन्मना ॥ २७
चम्पकैः पूजितश्चाहं वशीकुर्य्याज्जगत्त्रयम्।
एतस्मिन् समये काचिद्ब्राह्मणी दुःखिता शिवम् ॥ २८
हा हतास्मि महाराज वार्य्यतां दुष्टकस्त्वया ॥
मद्गृहस्थं धनं सर्व्वं हृतञ्चैव द्विजन्मना ॥ २९
एतस्मिन् समये तेन पृष्टा सा ब्राह्मणी स्वयम्।
किं दुःखं ते समुत्पन्नं कुतस्त्वञ्च विलप्यसे ॥ ३०
तदीयं तद्वचः श्रुत्वा ब्राह्मणी वाक्यमब्रवीत्।
श्रूयताञ्च द्विजश्रेष्ठ मदीयं दुःखकारणम् ॥ ३१
मत्स्वामी कर्म्मयोगाच्च पङ्गुश्च वर्त्ततेऽधुना।
कन्या चैका दानयोग्या वर्त्तते मद्गृहे द्विज ॥ ३२
प्रतिग्रहस्तदर्थं वै कुतो भर्त्रा ममाधुना।
तदर्थञ्च द्विजश्चायं हठाद्गृह्णाति किं पुनः ॥ ३३
राजा त्वन्धीकृतस्तेन न ब्रवीतीह किञ्चन।
किं करोमि क्व गच्छामि त्राता कश्चिन्न विद्यते ॥ ३४
नित्यमत्र समायाति शिवस्य पूजनाय व।

नारद उवाच ।

किं दत्तं तव भर्त्रा च राज्ञा दानं वरानने ॥ ३५
इत्युक्ता च पुनस्तत्र द्विजपत्नी वचोऽब्रवीत् ।
प्रसूयमाना गौर्दत्ता राज्ञा बहुधनान्विता ॥ ३६
तेनैव दापितात्रैव कथ्यते च मया पुनः ।
तदहं गृह्यते तेन किं करोमि कुतो व्रजे ॥ ३७
मद्भर्त्रा न गृहीतं वै दुष्टदानं कदापि ह ।
बलाद्गृहीतमस्माभिः कन्याकाले व्रजेद्द्विज ॥ ३८
इत्युक्त्वा ग्राहितं तेन तदहं गृह्यते कथम् ।
अस्माभिरुच्यते वार्त्ता धनं सर्व्वं विभज्यताम् ॥ ३९
तेनोच्यते धनञ्चैव गौश्चापि च विभज्यताम् ।
गोश्च विभजने पापं कुत्र वै चालयामहे ॥ ४०
तस्यास्तद्वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ।
शङ्करन्तु नमस्कृत्य श्रूयतां हि त्वया प्रभो ॥ ४१
ईदृशो यो भवेत् स्याद्वै तद्वस्तात् पूजनं कथम् ।
गृह्यते च त्वया देव दुष्टः को वा ह्यतः परम् ॥ ४२
राजप्रतिग्रहश्चैव दुष्करः प्रथमं भवेत् ।
ततश्चैव विभागश्च किं पुनर्गोविभागभुक् ॥ ४३
एतस्माच्च परो दुष्टः कोऽन्यो भवितुमर्हति ।
यस्याश्च दक्षिणे शृङ्गे गङ्गा च परितिष्ठति ॥ ४४
वामे च यमुना देवी मध्ये चैव सरस्वती ।
स्कन्धे ब्रह्मा तथा मध्ये रुद्रः सपरिवारकः ॥ ४५
कव्यां विष्णुः सदा तिष्ठेत् पश्चात् तीर्थान्यनेकशः ।
ऋषयो दक्षिणे कुक्षौ वामे सर्व्वाश्च देवताः ॥ ४६
नद्यः सर्व्वा ह्यधो भागे वेदाः खुरनिवासिनः ।
जधसि च समुद्राश्च जगत् तस्यां प्रतिष्ठितम् ॥ ४७
ईदृशीञ्चैव गां यो वै पूजयित्वा च प्रक्रमेत् ।
पृथ्वीप्रक्रमणाज्जातं फलं तस्य सुनिश्चितम् ॥ ४८
आसमुद्रां तां ह्याञ्चैव सुवर्णपूरितां यदा ।
ददाति पुरुषो यश्च गाञ्चैवात्र ददाति यः ॥ ४९
तयोः समफलं प्रोक्तं नात्र कार्य्या विचारणा ।
यस्या दुग्धं नरः पीत्वा गङ्गोदकफलं लभेत् ॥ ५०
शकृन्मूत्रञ्च यस्यास्तु पीतं पुनाति पातकात् ।
किमपूज्यं हि तस्या गोः स्पर्शनात् पापहारिका ॥ ५१
पृथिव्यां त्रीणि दानानि गावः पृथ्वी सरस्वती ।
नरकादुद्धरन्त्येते पूर्व्वानेकोत्तरं शतम् ॥ ५२
यस्य पापस्य प्रायश्चित्तं निःसरेत् तु न कुत्रचित् ।
तस्य पापस्य शुद्धिः स्याद्दानाद्यस्याः सुरेश्वर ॥ ५३
किं पुनर्वर्ण्यते तस्या दानं स्पर्शश्च दर्शनम् ।
सुवर्णं शृङ्गयोश्चैव खुरेषु रूप्यमेव च ॥ ५४
पृष्ठं ताम्रमयं कृत्वा प्रवालं नेत्रयोस्तथा ।
कण्ठे च भूषणं यस्या वस्त्रं सर्व्वाङ्गके तथा ॥ ५५
कांस्यदोहनपात्रेण सुशीलां वत्ससंयुताम् ।
तरुणीं रूपसम्पन्नां बहुदुग्धवतीं यदा ॥ ५६
अर्पयेद्देशकाले वै किं तस्य दुर्लभं भवेत् ।
एतादृशीन्तु गां लब्ध्वा दत्त्वा चाष्टगुणं फलम् ॥ ५७
मातुर्विक्रयणे पापं कन्याविक्रयणे तथा ।
वेदविक्रयणे चैव गवां विक्रयणे तथा ॥ ५८
प्रायश्चित्तं न लभ्येत किं पुनर्वर्ण्यते मया ।
अयं वै ब्राह्मणो दुष्टो गाञ्चैव विभजिष्यति ॥ ५९
किं वक्तव्यं मया देव तव भक्तो भवेदिह ।
इत्येतद्वचनं श्रुत्वा शिवो वाक्यमथाब्रवीत् ॥ ६०
त्वञ्चेतस्मि यथा स्याद्वै तथा कुरु प्रियोऽसि मे ।
भुक्त्वा पापं पुनश्चैव सद्गतिं प्राप्यते यथा ॥ ६१
तथा त्वया च कर्त्तव्यं मद्भक्तश्च भवेदिह ।
इत्युक्तो नारदस्तत्र यत्र तिष्ठति चम्पकः ॥ ६२
पुनः पृष्टं तदा तस्मै नित्यं पुष्पाण्यनेकशः ।
नीयते केन वृक्षेश सत्यं वद ममाग्रतः ॥ ६३
एवमुक्तस्तदा सो वै नोवाच परमं वचः ।
तदा च नारदस्तस्मै ददौ शापं शिवाज्ञया ॥ ६४
शृणु चम्पक वक्ष्यामि सत्यं साधनमुत्तमम् ।
ईदृशो गुणवाँल्लोके यदि सत्यं वदेदिह ॥ ६५
किं पुनर्दुर्लभं तस्य इह चापि परत्र च ।
तथा फलं मया देयमसत्यभाषणादिह ॥ ६६
अद्यप्रभृति लोकेषु शिवमान्यो भवेन्न हि ।
तव पुष्पं शिवस्यैव योग्यं भवतु न क्वचित् ॥ ६७
एतस्मिन्नन्तरे विप्रः समागच्छत वै तदा ।
तं दृष्ट्वा नारदो वाक्यमब्रवीच्च मुनीश्वराः ॥ ६८
राजप्रतिग्रहान्नूनं विभागो विहितस्त्वया ।
चम्पापुष्पबलेनैव वशीकृत्य महेश्वरम् ॥ ६९
विप्राश्च पीड़ितास्तेऽद्य राक्षसस्त्वं भवाधुना ।
इत्युक्तो नारदेनैव ब्राह्मणो भयविह्वलः ॥ ७०

क्षम्यतां क्षम्यतां स्वामिन्ननुग्रहं कुरुष्व मे।
इत्युक्त्वा चरणोपान्ते नारदस्य पपात च ॥ ७१
नारदो वचनं श्रुत्वा शिवस्य परमात्मनः।
विप्रश्चैव गतो दृष्ट्वा दयार्द्रहृदयोऽब्रवीत् ॥ ७२

नारद उवाच।

न मिथ्या मे कदाप्युक्तं वैरिष्वपि कदाचन।
तस्मान्मद्वचनाद्विप्र राक्षसत्वं गमिष्यसि ॥ ७३
विराधो नाम यस्मात्तीव्राद्राक्षसत्वं गतः क्षणात्।
अनुग्रहस्तदा तस्य दत्तस्तेन महात्मनः ॥ ७४
रामस्य दर्शनं प्राप्य तद्धस्तान्मरणं ध्रुवम्।
लब्ध्वा यास्यसि सद्रूपं प्रतापाच्छङ्करस्य च ॥ ७५
इत्युक्तो नारदेनैव सोऽपि रक्षोऽभवत् क्षणात्।
विराधो नाम विप्रेन्द्राः सर्व्वप्राणिभयङ्करः ॥ ७६
दृष्ट्वा तं राक्षसं तत्र नारदः प्राह शङ्करम्।
नमस्कृत्य पुनस्तत्र गोकर्णेशं तदा शुभम् ॥ ७७
चम्पकस्य महिमानं वर्णयित्वा पुनः पुनः।
ईदृशश्च भवेल्लोके सर्व्वं वश्यं नयेदिह ॥ ७८
इत्युक्त्वा नारदस्तस्मै ययौ खेचरगतिर्मुनिः।
एतत् सर्व्वं समाख्यातं यत् पृष्टोऽहं मुनीश्वराः ॥ ७९
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ ८०

इति श्रीशिवे महापुराणे ज्ञानसंहितायां चम्पकशापनिरूपणं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः।

ऋषय ऊचुः।

सूत सूत महाभाग त्वया भागवतोत्तम।
यत् पृष्टश्चैव तत् सर्व्वं निवेदितमतन्द्रितम् ॥ १
अस्माकं संशयं सर्व्वं कृतवान् दूरतो भवान्।
धन्यस्त्वं कृतकृत्यश्च किं पुनर्वर्णयामहे ॥ २
व्यासो वैराज ते यस्य गुरुः शिरसि राजते।
किं तस्य दुर्लभं लोकेऽसंशयात्मस्वरूपिणः ॥ ३
त्वया च कथितं यच्च पञ्चायतनमुत्तमम्।
पूजनं शुभदं लोके सर्व्वकामफलप्रदम् ॥ ४
विष्णुर्देवः श्रुतः पूर्व्वः प्रकृतिः परमा शुभा।
शङ्करस्त्वपरो देवः सूर्य्यस्तु त्रिगुणात्मकः ॥ ५
गणेशस्तत्र पङ्क्तौ हि पूज्यो जातः कथं प्रभो।
को वा गणपतिश्चायं कस्य पुत्त्रः कुतो बलम् ॥ ६
महत्पङ्क्तिं कथं प्राप्तः सर्व्वं कथय शोभनम्।
एवमेषां वचः श्रुत्वा सूतो वाक्यमथाब्रवीत् ॥ ७

सूत उवाच।

साधु पृष्टं महाभागा लोकानां हितकाम्यया।
स्वरूपञ्च गणेशस्य कथयामि यथाश्रुतम् ॥ ८
उद्वाहिते शिवे चात्र कैलासे च गते सति।
कियता चैव कालेन जया च विजया सखी ॥ ९
पार्व्वत्या च मिलित्वा च विचारतत्पराभवत्।
रुद्रस्य च गणाः सर्व्वे नन्दि-भृङ्गिपुरःसराः ॥ १०
प्रमथाश्च ह्यसंख्याता ह्यस्मदीयो न कश्चन।
द्वारि तिष्ठन्ति सर्व्वेऽपि शिवस्याज्ञापरायणाः ॥ ११
ते सर्व्वेऽप्यस्मदीयाश्च तथापि न मिलेन्मनः।
एकश्चैवास्मदीयो वै रक्षणीयस्त्वयानघे ॥ १२
इत्युक्ता पार्व्वती देवी सखीभ्यां रुचिरं वचः।
हितं मेने तदा तच्च कार्य्यतत्त्वावधारिणी ॥ १३
कदाचिन्मज्जमानायां पार्व्वत्यां वै सदाशिवः।
नन्दिनं परिभर्त्स्यैव आजगाम स्वयं तदा ॥ १४
उत्तस्थौ मज्जमाना सा लज्जिता सुन्दरी तदा।
तदीयं तद्वचश्चैव हितं मेने सुखावहम् ॥ १५
एवं जाते तदा काले कदाचित् पार्व्वती शुभा।
मदीयः सेवकः कश्चिद्भवेच्छुभतरस्तदा ॥ १६
मदाज्ञायाः परं नान्यद्रेखामात्रं चलेदिह।
इति विचार्य्य सा देवी करयोर्जलसम्भवम् ॥ १७
पङ्कमुत्साद्य तेनैव निर्म्ममे पुत्त्रकं शुभम्।
सर्व्वावयवनिर्द्दोषं सर्व्वावयवसुन्दरम् ॥ १८
प्रतिष्ठाप्य तदा द्वारि निवार्य्यो य इहागमेत्।
वस्त्राणि च तदा तस्मै दत्त्वा च विविधानि च ॥ १९
नानालङ्करणं तस्मै दत्त्वाशिषमनुत्तमाम्।
मत्पुत्त्रस्त्वं मदीयोऽसि नान्यथा क्वचिदस्ति मे ॥ २०
तया चैवं कृते सो वै नमस्कृत्य शिवां स्थितः।
किं कार्य्यं विद्यते तेऽद्य करवाणि तवोदितम् ॥ २१
इत्युक्ता सा तदा तेन द्वारपालो भवाद्य मे।
उक्त्वा च स्थापयामास यष्टिपाणिं गणाधिपम् ॥ २२

तद्रूपं सुन्दरं तस्य विलोक्य हर्षमागता ।
मुखमाचुम्ब्य सा तत्र ह्यालिङ्ग्यास्थापयत् तदा ॥२३
स्थितो द्वारि सदा तत्र पार्व्वतीहितकाम्यया ।
स्वयञ्च मज्जनार्थं सा स्थिता च सखिसंयुता ॥ २४
एतस्मिन्नेव काले तु शिवो द्वारि समागतः ।
गणैः सार्द्धं समायातो द्वारि च प्राविशद्यदा ॥ २५
तदा निषिद्धस्तेनैव गम्यते च त्वयाधुना ।
मज्जनार्थं स्थिता माता क्व यासि मा व्रजाधुना॥२६
इत्युक्त्वा यष्टिकां तत्र रोधनाय समाग्रहीत् ।
तद्दृष्ट्वा तु शिवः प्राह शिवोऽहमिति नान्यथा ॥ २७
इत्युक्त्वा गम्यमानं तं यष्ट्या चैवाप्यताडयत् ।
कः शिवः कुत्र यासि त्वं किमर्थं गम्यतेऽधुना ॥ २८

शिव उवाच ।

मूर्खोऽसि त्वं न जानासि शिवोऽहं गिरिजापतिः ।
इत्युक्त्वा प्रविशन्तं तं दण्डेनाताडयत् पुनः ॥ २९
ततः शिवश्च संक्रुद्धो गणानाज्ञापयत् तदा
को वायं वर्त्तते किञ्च क्रियते पश्यतां पुनः ॥ ३०
इत्युक्त्वा तु शिवस्तत्र स्थितः क्रोधसमन्वितः ।
गणास्ते क्रोधमापन्नाः पप्रच्छुर्द्वारपालकम् ॥ ३१
कोऽसि त्वं कुत आयातः किं वा त्वञ्च चिकीर्षसि ।
तदीयं तद्वचः श्रुत्वा द्वारपालोऽब्रवीदिदम् ॥ ३२
यूयं के कुत आयाता भवन्तः सुन्दरा इमे ।
यात दूरं किमर्थं वै स्थिता यूयं विरोधिनः ॥ ३३
एवं श्रुत्वा वचस्तस्य हास्यं कृत्वा परस्परम् ।
कश्चायं वर्त्तते किञ्च ब्रवीति शत्रुवत् पुनः ॥ ३४
तमूचुश्च तदा सर्व्वे श्रूयतां द्वारपालक ।
वयं शिवगणाः सर्व्वे शिवाज्ञापरिपालकाः ॥ ३५
त्वाञ्चैव तु गणं मत्वा न हन्यामोऽन्यथा हतः ।
तिष्ठ दूरे ह्यतस्त्वञ्च किमर्थं मृत्युमीहसे ॥ ३६
इत्युक्तोऽपि गणेशश्च द्वारं न मुक्तवांस्तदा ।
ते सर्व्वेऽपि गणास्तत्र शिवं गत्वा तथाब्रुवन् ॥ ३७
ततश्चैवं वचः श्रुत्वा गणानूचेऽथ शङ्करः ।
दूरतः क्रियतामेष षण्ढा इव स्थिताः कथम् ॥ ३८
स्वामिनोक्ता गणास्ते च पुनरागत्य तत्र ह ।
रे रे द्वारे कथं कोऽयं स्थितश्च स्थापितः कुतः ॥ ३९
अज्ञानवशगश्चैवं कथं जीवनमिच्छसि ।
द्वारपाला वयं सर्व्वे स्थिताः किं परिभाषसे ॥ ४०
सिंहासनं गृहीत्वा तु शृगालः शिवमीहते ।
तावद्गर्जसि मूर्ख त्वं यावद्गणपराक्रमः ॥ ४१
नानुभूतस्त्वया चात्र ह्यनुभूत्वा मरिष्यसि ।
इत्युक्तः क्रोधमापन्नो हस्ताभ्यां यष्टिकां तदा ॥ ४२
गृहीत्वा ताडयामास गणांस्तान् परिभाषिणः ।
यात यात ह्यतो दूरे नो चेच्च दर्शयाम्यहम् ॥ ४३

गणा ऊचुः ।

किं कर्त्तव्यं क्व गन्तव्यं क्रियते तेन किं पुनः ।
मर्य्यादा रक्षतेऽस्माभिरन्यथा किं ब्रवीति च ॥ ४४
ततस्ते वै गणाः सर्व्वे शिवं दूरे व्यवस्थितम् ।
क्रोशमात्रन्तु कैलासाद्गत्वा ते च तथाब्रुवन् ॥ ४५
शिवो विहस्य तान् सर्व्वान् गणाः किन्तु न शूकर
एकोऽपि च बहून् सर्व्वान् भर्त्सति किं वदेत् पुनः ॥ ४६
गम्यतां ताड्यताञ्चैष यः कश्चन भवेदिह ।
भर्त्सितास्तेन देवेन गतास्ते गणसत्तमाः ॥ ४७

गणा ऊचुः ।

रे रे त्वं श्रूयतां बाल बालवत् परिभाषसे ।
इतस्त्वं दूरतो याहि नो चेत् त्वं पश्यसेऽधुना ॥ ४८
इति श्रुत्वा वचस्तेषां किं करोमीति दुःखितः ।
एतस्मिन्नन्तरे देवी तेषां तस्य च वै पुनः ॥ ४९
श्रुत्वा तु कलकलं तत्र सखीं पश्याब्रवीदिदम् ।
समागत्य सखी तत्र वृत्तान्तं पश्यती तदा ॥ ५०
क्षणमात्रं तदा दृष्ट्वा हर्षिता सा गता तदा ।
तत्र गत्वा तु तत् सर्व्वं कथितं गिरिजाग्रतः ॥ ५१
अस्मदीयो भवेन्नैव सर्व्वे ह्यायान्ति वै ध्रुवम् ।
शिवश्चैव गणाः सर्व्वे निवासावसरः कथम् ॥ ५२
प्रविशन्ति हठादेव नैतच्छुभतरं तव ।
सम्यक् कृतं ह्यनेनैव कोऽपि प्रवेशितो न हि ॥ ५३
दुःखञ्चैवानुभूयापि तिरस्कारादिकं तथा ।
अतः परन्तु वाग्वादः क्रियते च परस्परम् ॥ ५४
वाग्वादश्च कृतो नैव तर्ह्यायान्तु सुखेन वै ।
कृते चैवात्र वाग्वादे जित्वा च विनयेन च ॥ ५५
प्रविशन्तु तदा सर्व्वे नान्यथा कर्हिचित् प्रिये ।
अयञ्चैवास्मदीयो वै भर्त्सिते भर्त्सिता वयम् ॥ ५६
तस्माद्देवि त्वया भद्रे न त्याज्यो मान उत्तमः ।

शिवो मर्कटवत् तेऽद्य वर्त्तते किं करिष्यति ॥ ५७
तदीयं तद्वचः श्रुत्वा पार्व्वती मानिनी तदा ।
अहो स्थितं त्वया नैव हठात्कारः कथं कृतः ॥ ५८
कथञ्चैवात्र कर्त्तव्यो विनयो वाथवा पुनः ।
भविष्यति भवत्त्वेव कृतं नैवान्यथा पुनः ॥ ५९
इत्युक्त्वा तु सखी तत्र प्रेषिता प्रियया तदा ।
समागत्य सखी सा च प्रियया कथितं शृणु ॥ ६०
सम्यक् कृतं त्वया भद्र बलात् प्रविशता न हि ।
भवदग्रे गणा एते जयन्ति किं भवान् पुनः ॥ ६१
कृतं चेद्दे कृतञ्चैव कर्त्तव्यं क्रियतां त्वया ।
जित्वा यान्तु पुनर्वापि विनयैरथवा ध्रुवम् ॥ ६२
इति श्रुत्वा वचस्तस्या मातुश्चैव गणास्तथा ।
बद्धकच्छस्तयोष्णीषं बद्धा जङ्गोरु नादयन् ॥ ६३
उ.ाच स गणान् सर्व्वान् श्रूयतां गणसत्तमाः ।
अहञ्च गिरिजासूनुर्यूयं शिवगणास्तथा ॥ ६४
उभये समतां प्राप्ताः कर्त्तव्यं क्रियतां पुनः ।
भवन्तो द्वारपालाश्च अहञ्चैव कथं न हि ॥ ६५
भवद्भिश्च स्थितं ह्यत्र यदा भवति निश्चितम् ।
तदा भवद्भिः कर्त्तव्यं शिवाज्ञापरिपालनम् ॥ ६६
इदानीन्तु मया चात्र शिवाज्ञापरिपालनम् ।
हठाद्वा विनयेनापि गन्तव्यं मन्दिरे पुनः ॥ ६७
इत्युक्ताश्च गणाः सर्व्वे ययुस्ते शिवसन्निधौ ।
लज्जितं लज्जितं गत्वा नमस्कृत्य पुरः स्थिताः ॥ ६८
स्थित्वा निवेदि...ं सर्व्वं शिवाग्रे गणसत्तमैः ।
तत् सर्व्वन्तु तदा श्रुत्वा शङ्करो वाक्यमब्रवीत् ॥ ६९
श्रूयताञ्च गणाः सर्व्वे युद्धयोग्यं भवेन्न हि ।
अहञ्चैवात्र यूयञ्च तत्र गौरीगणास्तथा ॥ ७०
विनयः क्रियते चेद्दे वश्यो वै शङ्करः स्त्रियाः ।
कृतञ्चैवात्र कर्त्तव्यमेकाकी किं करिष्यति ॥ ७१
भवन्तश्च गणा लोके युद्धे चैव विशारदाः ।
मदीयाश्च कथं युद्धं हित्वा यास्यथ लाघवम् ॥ ७२
स्त्रियाग्रहः कथं कार्य्यः कृत्वा फलमवाप्स्यति ।
कर्त्तव्यं सर्व्वथा युद्धं यद्भावि तद्भविष्यति ॥ ७३

इति श्रीशैवे महापुराणे ज्ञानसंहितायां गण-
युद्धं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः ।

सूत उवाच ।

इत्युक्तास्ते गणास्तेन निश्चयं परमं गताः ।
सन्नद्धास्ते तदा जग्मुः सर्व्वेऽपि शिवमन्दिरम् ॥ १
गणोऽपि च तथा दृष्ट्वा ह्यायातान् गणसत्तमान् ।
युद्धाटोपं विधायैव स्थितश्चैवाब्रवीदिदम् ॥ २
आयान्तु गणपाः सर्व्वे शिवाज्ञापरिपालकाः ।
अहमेकस्तु बालश्च शिवाज्ञापरिपालकः ॥ ३
तथापि पश्यतां देवी पार्व्वती सूनुजं बलम् ।
शिवश्चैव गणानान्तु बलं पश्यतु वै पुनः ॥ ४
बलवद्बालयुद्धञ्च मानिनी-शिवपक्षयोः ।
भवद्भिश्च कृतं पूर्व्वं युद्धं युद्धविशारदाः ॥ ५
मया पूर्व्वं कृतं नैव बालोऽस्मि क्रियतेऽधुना ।
तथापि भवतां लज्जा भविष्यति जयाजये ॥ ६
ममैवन्तु भवेन्नव वैपरीत्यं भविष्यति ।
ममैवं भवतां नैव गिरिजा-शिवयोरिह ॥ ७
एवं ज्ञात्वा च कर्त्तव्यं युद्धञ्चैव गणेश्वराः ।
भवद्भिः स्वामिनं दृष्ट्वा मया च मातरं पुनः ॥ ८
क्रियते कीदृशं युद्धं भवितव्यं भवत्विति ।
इत्येवं भर्त्सितास्ते तु क्रुद्धा लोहितचक्षुषः ॥ ९
विविधान्यायुधान्येवं धृत्वा ते च समुद्ययुः ।
घर्षयन्तस्तथा दन्तान् हुङ्कृत्य च पुनः पुनः ॥ १०
पश्य पश्य ब्रुवन्तश्च गणास्ते समुपागताः ।
नन्दी प्रथममागत्य धृत्वा पादं व्यकर्षयत् ॥ ११
धावन् भृङ्गी द्वितीयञ्च पादं धृत्वा तथैव च ।
यावत् पादं व्यकृषतां तावद्धस्तेन वै गणः ॥ १२
आहत्य तौ तु हस्ताभ्यामुत्तोल्य पादकौ स्वयम् ।
द्वारस्थं परिघं गृह्य सर्व्वानापोथयत् तदा ॥ १३
केषाञ्चित् कटयो भिन्नाः केषाञ्चित् पृष्ठकानि च ।
केषाञ्चित् तु शिरांस्येव केषाञ्चिन्मस्तकानि च ॥ १४
केषाञ्चिज्जानुनी तत्र केषाञ्चित् कन्धरास्तथा ।
सम्मुखञ्चागता ये वै ते सर्व्वे हृदये हताः ॥ १५
केचिच्च पतिता भूमौ केचिच्च विदिशो गताः ।
केचिच्च चरणौ नत्वा केचिच्छिवान्तिकं गताः ॥ १६
तेषां मध्ये तु कश्चिद्दे संग्रामे सम्मुखो न हि ।

सिंहं दृष्ट्वा यथा यान्ति मृगाश्चैव दिशो दश ॥ १७
तथा ते च गणाः सर्व्वे गताश्चैव सहस्रशः।
परावृत्य तथा सोऽपि द्वारि च समुपस्थितः ॥ १८
कल्पान्तकरणे कालो दृश्यते च तथा हि सः।
एतस्मिन् समये तत्र ब्रह्मा इन्द्रश्च देवताः ॥ १९
प्रेरिता नारदेनाथ देवाः सर्व्वे समागमन्।
विष्णुश्चापि समायातः शिवस्य हितकाम्यया ॥ २०
समागतास्तदा सर्व्वे समाश्वास्य पुरः स्थिताः।
ऋषयश्च तथा सर्व्वे अप्सरसां गणास्तथा ॥ २१
शिवञ्चैव नमस्कृत्य आज्ञां देहि प्रभो इति।
गणान् भिन्नांस्तदा दृष्ट्वा तेभ्यः सर्व्वं निवेदितम्॥२२
तेभ्यः सर्व्वं निवेद्यैव ब्रह्माणं समुवाच ह।
ब्रह्मंस्त्वया च गन्तव्यं प्रसाद्योऽयं महाबलः ॥ २३
यथा न प्रलयः स्याद्वै तथा कार्य्यं त्वया प्रभो।
इत्युक्तः स ययौ ब्रह्मा यत्रास्ते स महाबलः ॥ २४
तुन्दिलः श्मश्रुलश्चैव सर्व्वैरृषिवरैः सह।
समायातञ्च तं दृष्ट्वा गणः श्मश्रूण्यवाकिरत् ॥ २५
क्षम्यतां क्षम्यतां देव न युद्धार्थं समागतम्।
इत्येवं ब्रुवति तस्मिंस्तावत् परिघमाददे ॥ २६
गृहीतं परिघं दृष्ट्वा पलायनपरास्तदा।
यात यात ब्रुवन्तस्ते परिघेणाहतास्तदा ॥ २७
स्वयञ्च पतिताः केचित् केचित् तेन निपातिताः।
केचिच्च शिवसामीप्यं गतास्तत्क्षणमात्रतः ॥ २८
तथाविधांश्च तान् दृष्ट्वा शिवः कोपसमन्वितः।
इन्द्रादींश्च देवगणान् षण्मुखप्रमुखान् गणान् ॥ २९
भूत-प्रेत-पिशाचांश्च सर्व्वानादेशयत् तदा।
ते सर्व्वे च यथाटोपं गतास्ते सर्व्वतोदिशम् ॥ ३०
यस्य यस्यायुधं यच्च तत् तत् सर्व्वं विमोचितम्।
पृथिवी व्याकुला जाता संशयं परमं गता ॥ ३१
न जातं ब्रह्मणोऽप्यायुर्ब्रह्माण्डं संहरन्निव।
अकाले च तथाभूतं शिवश्चेच्छावशः स्वयम् ॥ ३२
ते सर्व्वे च गतास्तत्र षण्मुखाद्याश्च ये पुनः।
सर्व्वे व्यर्थायुधा जाता आश्चर्य्यं परमं गताः ॥ ३३
शक्तिद्वयं तथा तत्र निर्म्मितं गणहेतवे।
एका प्रचण्डरूपञ्च धृत्वातिष्ठन्महामुखी ॥ ३४
श्यामपर्व्वतसङ्काशं विस्तार्य्य मुखगह्वरम्।

एका विद्युत्स्वरूपा च वज्रहस्तयुता सती ॥ ३५
आयुधानि च सर्व्वाणि सर्व्वैश्च मोचितानि च।
गृहीत्वा तन्मुखे सा च न्यक्षिपत् सकलानि च।
देवा युद्धेन दृश्यन्ते परितः परिघं पुनः।
एकोऽपि सकलं सैन्यं लोड़यामास दुस्तरम्॥
यथा गिरिवरेणैव लोड़ितः सागरः पुरा।
एकेन निहताः सर्व्वे व्याकुला ह्यभवंस्तदा ॥ ३८
किं कर्त्तव्यं क्व गन्तव्यं न ज्ञायन्ते दिशो दश।
परिघं भ्रामयामास सव्यापसव्यमेव च ॥ ३९
रम्भा च मेनका चैव उर्व्वशी च तिलोत्तमा।
इत्याद्यप्सरसां श्रेष्ठाः पुष्पचन्दनपाणयः ॥ ४०
ऋषयो नारदाद्याश्च ये च युद्धेऽतिलालसाः।
ते सर्व्वे च समाजग्मुर्युद्धस्य दर्शनाय वै ॥ ४१
तेऽपि विस्मयमापन्ना ईदृशं न कदापि ह।
शुण्डरूपं तदा दृष्टं कालोऽयमपरः कुतः ॥ ४२
पृथिवी कम्पिता देवी समुद्रसहिता तदा।
पर्व्वताः प्रतिनादं वै चक्रुः संग्रामसम्भवम् ॥ ४३
द्यौश्चैव सग्रहा चीर्णा सर्व्वे व्याकुलतां गताः।
देवाः पलायिताः सर्व्वे गणाश्चैव पलायिताः ॥ ४४
षण्मुखश्च तदा सर्व्वानावार्य्य पुरतः स्थितः।
शक्तिद्वयेन तद्युद्धं सर्व्वञ्च निष्फलीकृतम् ॥ ४५
येऽवस्थिताश्च सर्व्वेऽपि शिवस्यान्तिकमागताः।
ते सर्व्वे मिलिताश्चैव नमस्कृत्य शिवं तदा ॥ ४६
अब्रुवन् वचनं सर्व्वे कोऽयं गणवरः शुभः।
पुरा चैव श्रुतं युद्धमिदानीं बहुधा पुनः ॥ ४७
दृश्यते न श्रुतं दृष्टमीदृशं न कदाचन।
किञ्चिद्विचार्य्यतां देव ह्यन्यथा प्रलयो भवेत् ॥ ४८
इत्येवं वचनं श्रुत्वा शिवः परमकोपनः।
कोपं जगाम तत्रैव गम्यताञ्च मयाधुना ॥ ४९
देवसैन्यञ्च तत् सर्व्वं शिवस्यानुजगाम ह।
एतस्मिन्नन्तरे देवं नमस्कृत्याथ नारदः ॥ ५०
अयञ्च जीवितश्चेत् स्यात् प्रलयञ्च करिष्यति।
यथा तथाप्ययं देव हन्तव्यः सर्व्वथा त्वया ॥ ५१
इत्युक्त्वा नारदस्तत्र ह्यन्तर्द्धानं गतस्तदा।
शिवोऽपि सह सैन्येन युद्धं चक्रे सुदारुणम् ॥ ५२
महादेवोऽपि तं दृष्ट्वा विस्मयं परमं गतः।

छलेनैव च हन्तव्यो नान्यथा हन्यते पुनः ॥ ५३
इति बुद्धिं समास्थाय सैन्यमध्ये व्यवस्थितः ।
शिवे दृष्टे तदा देवे निर्गुणे गुणरूपिणि ॥ ५४
विष्णौ चैवापि संग्राम आयाते सर्व्वदेवताः ।
गणाश्चैव तथा हर्षं जग्मुः सर्व्वे परस्परम् ॥ ५५
प्रथमं प्रेरयामास विष्णुः सर्व्वसुखावहः ।
अहञ्च मोहयिष्यामि हन्यताञ्च त्वया प्रभो ॥ ५६
छलं विना न हन्यादे तामसोऽयं दुरासदः ।
इति कृत्वा मतिं तत्र विष्णुर्मोहपरायणः ॥ ५७
शक्तिद्वयं तदा लीनं हरिं दृष्ट्वा तथाविधम् ।
गणेशोऽपि तदा तत्र यत्र विष्णुः स्थितः स्वयम् ॥ ५८
परिघं क्षिप्तवांस्तत्र गणोऽपि बलवत्तरः ।
एकतश्च मुखं दृष्ट्वा शिवोऽपि च जगाम ह ॥ ५९
त्रिशूलञ्च समादाय गतः कोपसमन्वितः ।
त्रिशूलं पातितं हस्तात् पिनाकं पुनराददे ॥ ६०
तदप्यपातयद्भूमौ परिघेण महात्मना ।
हताः पञ्च तथा हस्ताः पञ्चभिः शूलमाददे ॥ ६१
अहो दुःखतरं नूनं गणानां किं पुनर्भवेत् ।
परिघार्द्दिताश्च ते देवा यातास्चैव दिशो दश ॥ ६२
विष्णुस्तञ्च गणं दृष्ट्वा धन्योऽयमिति चाब्रवीत् ।
बहवो देवताश्चैव मया दृष्टास्तथा पुनः ॥ ६३
दैत्याश्च बहवश्चैव यक्ष-गन्धर्व्व-राक्षसाः ।
नैतेन समतां यान्ति रूप-शौर्य्य-गुणादिभिः ॥ ६४
एवं विष्णुं ब्रुवन्तञ्च परिघं भ्रामयंस्तदा ।
चिक्षेप विष्णवे तत्र चक्रे चूर्णतरस्तदा ॥ ६५
रहीला विष्णुश्चक्रन्तु युयुधाते परस्परम् ।
खण्डन्तु परिघस्यापि हरये प्राक्षिपत् तदा ॥ ६६
रहीला गरुड़ेनापि पक्षिणा विकलीकृतम् ।
यत्र यत्र क्षिपेत् तं वै परिघं तत्र तत्र ह ॥ ६७
शून्यञ्च कृतवान् सो वै विजयञ्चाप सत्तमः ।
विष्णुश्चैव गणश्चैव युयुधाते परस्परम् ॥ ६८
एतदन्तरमासाद्य शूलपाणिस्तयोत्तरे ।
आगत्य च त्रिशूलेन शिरस्तस्य न्यपातयत् ॥ ६९
छिन्ने शिरसि तस्यैवं देवसैन्यं सुनिश्चलम् ।
नारदोऽपि तदा गत्वा देव्यै सर्व्वं न्यवेदयत् ॥ ७०
मानिनि श्रूयतां मानस्त्वाज्यो नैव त्वयाधुना ।
इत्युक्त्वान्तर्हितस्तत्र नारदः कलहप्रियः ॥ ७१
जय जयेति भाषन्तो देवाः सुखमुपस्थिताः ।
यच्चकार तदा देवी श्रूयतामृषिसत्तमाः ॥ ७२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां गण-
युद्धभङ्गो नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः ।

सूत उवाच ।

श्रूयतां कथयाम्यद्य यज्जातं तदनन्तरम् ।
कोपयुक्ता यथा देवी चकार श्रूयतां तथा ॥ १
शिवोऽपि तच्छिरश्छित्त्वा यावद्दुःखमुपाददे ।
तावच्च गिरिजा देवी क्षोभ्यमाना च हा कथम् ॥ २
किं करोमि क्व गच्छामि प्रलयं किं करोम्यहम् ।
इत्येवं दुःखिता सा च शक्तीः सहस्रशस्तदा ॥ ३
निर्म्ममे निर्म्मितास्ताश्च नमस्कृत्य शिवां तदा ।
जाज्वल्यमानास्ताः सर्व्वा मातरादिश्यतामिति ॥ ४

पार्व्वत्युवाच ।

प्रलयश्चात्र कर्त्तव्यो नात्र कार्य्या विचारणा ।
देवांश्चैव गणांश्चैव यक्षराक्षसकानथ ॥ ५
अस्मदीयः परश्चैव विद्यते न ममापि ह ।
तदाज्ञप्ताश्च ताः सर्व्वाः संहारं चक्रिरे तदा ॥ ६
कल्पान्तकाले सम्प्राप्ते संहरणार्थमुद्यताः ।
यथा चात्र तृणानीह वह्निः संहरते तथा ॥ ७
एवं ताः शक्तयः सर्व्वाः संहारं कर्त्तुमुद्यताः ।
न गणयन्ति देवं वा ब्रह्माणं वाथ शङ्करम् ॥ ८
इन्द्रं वा यक्षराजं वा स्कन्दं वा सूर्य्यमेव वा ।
सर्व्वांस्ताश्चैव संहारं कुर्व्वन्ति स्म निरन्तरम् ॥ ९
यत्र यत्रानुपश्येत तत्र तत्रापि शक्तयः ।
करालाः कुब्जकाः खञ्जा लम्बशीर्षा ह्यनेकशः ॥ १०
हस्ते धृत्वाथ देवांश्च मुखेनैवाक्षिपंस्तदा ।
तं संहारं तदा दृष्ट्वा हरो हरिस्तथैव च ॥ ११
ब्रह्मा च ऋषयश्चान्ये देवा इन्द्रादयस्तदा ।
किं करिष्यति देवी सा संहारश्चाप्यकालतः ॥ १२
सर्व्वे संशयमापन्ना जीवनाय हिताय वा ।
सर्व्वे च मिलिताश्चेमे किं कर्त्तव्यं विचिन्त्यताम् ॥ १३

इति विचार्य्य ते सर्व्वे ह्यूचुस्ते च परस्परम् ।
यदि च गिरिजा देवी प्रसन्ना च भवेदिह ॥ १४
तदा चैव भवेत् स्वास्थ्यं नान्यथा भवति ध्रुवम् ।
शिवोऽपि दुःखमापन्नः कटिभग्ना यदा तदा ॥ १५
शिवां क्रोधमयीं साक्षाद्गन्तुं न पुनरुत्सहेत् ।
स्वीयो वा परकीयो वा यक्षो वा किन्नरस्तथा ॥ १६
देवो वा च तथा विष्णुर्ब्रह्मा वा शङ्करस्तथा ।
न कश्चिद्गिरिजाग्रे च स्थातुं शक्तश्च कोचन ॥ १७
जाज्वल्यमानं तत् तेजो दृष्ट्वा दूरतरं स्थिताः ।
एतस्मिन् समये तत्र नारदो देवदर्शनः ॥ १८
आजगाम तदा तत्र देवानां सुखहेतवे ।
ब्रह्माणञ्च तथा विष्णुं शङ्करप्रभृतीन् गणान् ॥ १९
समागत्य मिलित्वा तु विचार्य्य कार्य्यमेव च ।
यावच्च गिरिजा लोके कृपां नैव करिष्यति ॥ २०
तावन्नैव सुखं स्यादै नात्र कार्य्या विचारणा ।
ऋषयो नारदाद्याश्च गतास्ते शिवमन्दिरम् ॥ २१
तदा प्रसादयामासुर्मातरं जगतः शुभाम् ।
नमस्कृत्य तथा स्तुत्वा स्तोत्रैर्नानाविधैरपि ॥ २२
जगदम्ब नमस्तुभ्यं प्रकृत्यै ते नमोऽस्तु ते ।
अपर्णायै नमस्तुभ्यं गिरिजायै नमोऽस्तु ते ॥ २३
भवान्यै ते नमश्चैव दुर्गायै ते नमोऽस्तु च ।
भद्रायै ते नमस्तुभ्यं प्रकृत्यै ते नमोऽस्तु वै ॥ २४
चण्डिकायै नमस्तुभ्यं कात्यायन्यै नमोऽस्तु ते ।
एवं स्तुता तदा देवी ऋषिभिर्नारदादिभिः ॥ २५
उच्चैर्दृष्ट्वा तदा तांश्च नोवाच किञ्चिदम्बिका ।
तदा च ऋषयः सर्व्वे नत्वा तच्चरणाम्बुजम् ॥ २६
क्षम्यतां क्षम्यतां देवि संहारो जायतेऽधुना ।
तव स्वामी वयञ्चैव इमे देवास्तथैव हि ॥ २७
प्रजाश्च भवदीयाश्च क्षन्तव्यं परमेश्वरि ।
एवं श्रुत्वा वचस्तेषां प्रसन्ना चण्डिका तदा ॥ २८
मत्पुत्रो यदि जीवेत तदा संहरणं न हि ।
यथा च भवतां मध्ये पूज्योऽयञ्च भविष्यति ॥ २९
सर्व्वाध्यक्षो भवेदद्य नान्यथा सुखमाप्स्यथ ।
इत्युक्तास्ते तदा तेभ्यो गत्वा सर्व्वं न्यवेदयन् ॥ ३०
ते सर्व्वे च वचः श्रुत्वा शिवश्चायं तथा पुनः ।
कर्त्तव्यञ्च तथा सर्व्वं लोकस्वास्थ्यं भवेदिह ॥ ३१

एतच्छिरः कुतो यातमप्सरोभिश्च तद्धृतम् ।
एतत् कलेवरञ्चात्र प्रक्षाल्य सम्प्रपूज्य च ॥ ३२
उत्तरस्यां पुनर्यात प्रथमं य इहागच्छेत् ।
तच्छिरश्च समाहृत्य योजनीयं कलेवरे ॥ ३३
ततस्तैस्तत् कृतं सर्व्वं शिवाज्ञापरिपालकैः ।
कलेवरं समानीय प्रक्षाल्य विधिवच्च तत् ॥ ३४
पूजयित्वा पुनस्ते वै गताश्चोदङ्मुखास्तदा ।
प्रथमं मिलितस्तत्र हस्ती चाप्येकदन्तकः ॥ ३५
तच्छिरश्च तथा छित्त्वा नीत्वा तेनाप्ययोजयन्
संयोज्य देवताः सर्व्वाः शिवं विष्णुं विधिं तथा
ऊचुरनन्तरं कर्म्म भवतामवशेषितम् ।
ततस्ते तु वचः श्रुत्वा शिवाज्ञापरिपालकाः ॥ ३
ऊचुस्ते च ततः सर्व्वे शिवो विष्णुर्विधिस्तथा ।
यस्माच्च तेजसः सर्व्वे वयं जाता महात्मनः ॥ ३८
तत् तेजश्च समायातु वेदमन्त्राभियोगतः ॥
इत्येवमभिमन्त्रेण मन्त्रितञ्च यदा पुनः ॥ ३९
तदोत्तस्थौ पुनश्चायं शुभाङ्गः सुन्दरस्तदा ।
अभिषिक्तस्तदा देवैर्गणाध्यक्षैर्गजाननः ॥ ४०
तस्यै च दर्शयामास दृष्ट्वा हर्षसमन्विता ।
वस्त्रैश्च विविधैश्चैव नानालङ्करणैस्तथा ॥ ४१
पूजयित्वा तया देव्या सिद्धिभिश्चाप्यनेकशः ।
करेण स्पर्शितः सो वै दुःखितोऽसीह पुत्रक ॥ ४
धन्योऽसि कृतकृत्योऽसि सर्व्वपूज्यो भवाधुना ।
आनने तव सिन्दूरं दृश्यते साम्प्रतं यतः ॥ ४३
तस्मात् त्वं पूजनीयोऽसि सिन्दूरेण सदा नरः ।
पुष्पैर्वा चन्दनैर्वापि गन्धेनैव शुभेन च ॥ ४४
नैवेद्येन पुनस्त्वञ्च कृत्वा नीराजनाविधिम् ।
ताम्बूलैरर्घदानैश्च कृत्वा प्रक्रमणं तथा ॥ ४५
नमस्कारविधानेन पूजाञ्चैव विधास्यति ।
तस्य वै सकला सिद्धिर्भविष्यति न संशयः ॥ ४६
इत्युक्त्वा च तदा देवी शक्तिरावारयत् तदा ।
ततः समस्तास्ता देव्यो देहे देव्या लयं गताः ॥
ततः स्वास्थ्यञ्च देवानां जातं तत्क्षणमात्रतः ।
एतस्मिंश्च क्षणे देवा वासवाद्याः शिवां तदा ॥ ४
स्तुत्वा प्रसाद्य तं देवं नीत्वा चैव शिवान्तिकं ।
प्रसाद्य गिरिशं पश्चादुत्सङ्गे संन्यवेशयन् ॥ ४९

ऽपि तस्य शिरसि कृत्वा च करपङ्कजम् ।
च वचनं देवान् पुत्त्रोऽयमिति चापरः ॥ ५०
शोऽपि तदोत्थाय नमस्कृत्य शिवाय वै ।
त्यै च नमस्कृत्य ब्रह्माणं विष्णुमेव च ॥ ५१
हाद्यान्नृषीन् सर्व्वान् नमस्कृत्य पुरः स्थितः ।
व्यश्चापराधो मे मानश्चैवेदृशो नृणाम् ॥ ५२
। च शङ्करश्चैव विष्णुश्चैव तदा स्वयम् ।
वयं यथा चात्र तथायं प्रतिपूज्यताम् ॥ ५३
श्च प्राग्यथा पूज्यास्तथा पूज्यतरोऽप्यसौ ।
पूजां पुरा कृत्वा पश्चात् पूज्या वयं नरैः ॥ ५४
नु पूजिताः पूर्व्वं नायञ्च पूजितो यदा ।
च फलहानिः स्यान्नात्र कार्य्या विचारणा ॥ ५५
न पूजितः पूर्व्वं विष्णुना च प्रपूजितः ।
णा च तथैवात्र पार्व्वत्या च प्रपूजितः ॥ ५६
र्व्ववरैश्चैव पूजितः परया मुदा ।
र्मिलित्वा तत्रैव सार्व्वाध्यक्ष्ये नियोजितः ॥ ५७
श्चैव शिवेनैव वरा दत्ता ह्यनेकशः ।
गम विघ्नहर्त्तेति श्रेष्ठश्चैव भवत्विति ॥ ५८
सर्व्वगणाध्यक्षः पूज्यो वै त्वं भवाधुना ।
मुक्त्वा च वाद्यानि पूजयित्वा ह्यनेकशः ॥ ५९
शषश्चाप्यनेकाश्च कृताश्च तत्क्षणे ध्रुवम् ।
श्चैव तदा देवान् गीतवाद्यञ्च नृत्यकम् ॥ ६०
त्योमास तत्रैव ह्यप्सरसां गणैस्तदा ।
श्चैव वरो दत्तः शिवेनैव महात्मना ॥ ६१
र्थ्यां त्वं समुत्पन्न ऊर्ज्जे मासि गणेश्वर ।
हते च तथा पक्षे चन्द्रस्योदयने शुभे ॥ ६२
मे च तथा यामे जाते च गिरिजा सती ।
र्शयामास ते रूपं तस्मात् ते व्रतमुत्तमम् ॥ ६३
रात् तद्दिनमारभ्य व्रतं कार्य्यं सुशोभनम् ।
वत् पुनः समायाति वर्षान्ते च चतुर्थिका ॥ ६४
वद्व्रतञ्च कर्त्तव्यं तव चैव ममाज्ञया ।
ारे सुखमिच्छन्ति ह्यतुलञ्चाप्यनेकशः ॥ ६५
पूजयन्तु त्वां भक्त्या चतुर्थ्यां विधिपूर्व्वकम् ।
र्गशीर्षे तथा मासेऽसिता या वै चतुर्थिका ॥ ६६
तःस्नानं तदा कृत्वा विप्रं निमन्त्रयेत् ततः ।
र्व्वाभिः पूजनं कार्य्यमुपवासस्तथाविधः ॥ ६७

रात्रेश्च प्रहरे जाते स्नात्वा पूजनं नरः ।
मूर्त्तिं धातुमयीं कृत्वा प्रवालसम्भवां तथा ॥ ६८
श्वेतार्कसम्भवां वापि निर्म्मितां माईवीं पुनः ।
प्रतिष्ठाप्य तदा तत्र पूजयेत् प्रयतः पुमान् ॥ ६९
गन्धैर्नानाविधैर्दिव्यैश्चन्दनैः पुष्पकैरपि ।
वितस्तिमात्रां दूर्व्वाञ्च त्र्यग्रां मूलविवर्ज्जिताम् ॥ ७०
ईदृशानां दलानान्तु शतमेकोत्तरं तथा ।
एकविंशतिर्वा देवं पूजयेत् परमार्थतः ॥ ७१
धूपैर्दीपैश्च नैवेद्यैः पूजयेत् परमेश्वरम् ।
ताम्बूलाद्यर्घकैश्चैव प्रणिपातैः स्तवैस्तथा ॥ ७२
पूजयित्वा च तं तत्र बालचन्द्रञ्च पूजयेत् ।
पश्चाच्च ब्राह्मणं पूज्य भोजयेन्मधुरं मुदा ॥ ७३
स्वयञ्चैव तदा भोज्यं मधुरं लवणं विना ।
विसर्ज्जयेत् ततः पश्चाद्देवं पूज्यः सदा नरैः ॥ ७४
एवं व्रते च सम्पूर्णे वर्षे जाते नरस्तदा ।
उद्यापनविधिं कुर्य्याद्व्रतसम्पूर्णहेतवे ॥ ७५
द्वादश ब्राह्मणास्तत्र भोजनीया मदाज्ञया ।
कुम्भ एकश्च सम्पूज्यः स्थाप्य मूर्त्तिं त्वदीयिकाम् ॥ ७६
अष्टदलं तदा कृत्वा दीपं कृत्वा विधानतः ।
होमश्चैवात्र कर्त्तव्यो वित्तशाठ्यं न कारयेत् ॥ ७७
स्त्रीद्वयञ्च तदा चात्र वटुद्वयमथापि च ।
भोजयित्वा पूजयित्वा मूर्त्त्यग्रे विधिपूर्व्वकम् ॥ ७८
जागरणं ततः कार्य्यं पुनः प्रातश्च पूजयेत् ।
विसर्ज्जयेत् ततश्चैव पुनरागमनाय च ॥ ७९
तिलकञ्चाशिषो ग्राह्याः स्वस्तिवाचनमेव च ।
पुष्पाञ्जलिं प्रदद्याच्च व्रतसम्पूर्णहेतवे ॥ ८०
नमस्कारं ततः कुर्य्यान्नानाकार्य्यं प्रकल्पयेत् ।
एवं व्रतं कृतं येन यथेप्सितफलं लभेत् ॥ ८१
यो वै नित्यं त्वदीयाञ्च पूजाञ्चैव स्वभक्तितः ।
सिन्दूर-चन्दनैश्चैव तण्डुलैः श्वेतकैस्तथा ॥ ८२
उपचारैरनेकैश्च पूजयन्ति च ये नराः ।
तेषां सिद्धिर्भवेन्नित्यं विघ्ननाशो भवेदिह ॥ ८३
सर्व्ववर्णैः प्रकर्त्तव्यं स्त्रीभिश्च विविधेच्छया ।
उदयाभिमुखैश्चैव राजभिश्च तथैव च ॥ ८४
यं यं कामयते यो वै तेन सेव्यः सदा भवान् ।
शिवेनैवं सदा प्रोक्तं गणेशाय महात्मने ॥ ८५

तदानीं देवतैश्चैव सर्व्वैश्च ऋषिसत्तमैः।
तथेत्युक्ता तु तैः सर्व्वैर्गाणपत्यं प्रकल्पितम्॥ ८६
ततश्चैव गणाः सर्व्वे प्रणेमुस्तं गणेश्वरम्।
गिरिजायाः समुत्पन्नो यो वै हर्षस्तदा भृशम्॥ ८७
कथं ब्रुवेऽहं तं हर्षं मुखेनैकेन भो द्विजाः।
देवदुन्दुभयो नेदुः पुष्पवर्षं पपात ह।
जगत् स्वास्थ्यं तदा प्राप देवे तस्मिन् प्रतिष्ठिते॥ ८८

इति श्रीशैवे महापुराणे ज्ञानसंहितायां गणेशोत्पत्तिर्नाम चतुस्त्रिंशोऽध्यायः॥ ३४॥

पञ्चत्रिंशोऽध्यायः।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठाः किं जातन्तु ततः परम्।
येन श्रवणमात्रेण सर्व्वपापक्षयो भवेत्॥ १
ततो देवगणाः सर्व्वे ऋषीणाञ्च गणास्तथा।
समागताश्च ये तत्र जग्मुस्ते तु शिवाज्ञया॥ २
प्रशंसन्तः शिवां तत्र गणेशञ्च ततः पुनः।
शिवञ्चैव तथा प्रीतं कीदृशं युद्धमेव च॥ ३
जगत् स्वास्थ्यं तदा लेभे शिवोऽपि च गणास्तदा।
यदा च गिरिजा देवी कोपहीना बभूव ह॥ ४
शिवोऽपि गिरिजां तत्र प्रसाद्य पूर्व्ववत् तदा।
चकार विविधं सौख्यं लोकानां हितकाम्यया॥ ५
विष्णुश्च शिवमापृच्छ्य ब्रह्मापि च तथैव च।
जगाम भवनं स्वञ्च कृत्वा कार्य्यं सुदुष्करम्॥ ६
नारदो भगवांस्तत्र प्रशस्य गिरिजां तदा।
जगाम भगवांस्तत्र गायन् यश अनुत्तमम्॥ ७
एतद्वः सर्व्वमाख्यातं यत् पृष्टोऽहं मुनीश्वराः।
एतस्मिन्नन्तरे तत्र पप्रच्छुर्ऋषयस्तदा॥ ८

ऋषय ऊचुः।

गणेशस्य श्रुतं वृत्तं पुनः किञ्चिन्निवेद्यताम्।

सूत उवाच।

साधु पृष्टं भवद्भिश्च श्रूयतामृषिसत्तमाः॥ ९
शिवा चैव शिवश्चैव परं प्रेम समावहत्।
पित्रोर्लालयतोस्तत्र सुखञ्चैव विवर्द्धितम्॥ १०
तावपि च तयोस्तत्र परिचर्य्यां परां गतौ।
षण्मुखस्य गणेशस्य पित्रोरधितरं तथा॥
स्नेहश्चैव व्यवर्द्धतां शुक्लपक्षे यथा शशी।
कदाचित् तौ स्थितौ तत्र विचारे च पराङ्
विवाहस्य कथं कार्य्यं उभयोः पुत्रयोः शुभः
षण्मुखस्य प्रियतमो गणेशस्य तथैव च॥
अहञ्च परिणेष्यामि अहञ्चैव पुनः पुनः।
परस्परञ्च नित्यं वै वादे च तत्परावुभौ॥
तच्छ्रुत्वा वचनं तौ च विस्मयं परमं गतौ।
किं कर्त्तव्यं कथं कार्य्यौ विवाहविधिरेतयोः
इति निश्चित्य वै तत्र युक्तिश्च रचिता तदा।
कदाचित् समये स्थित्वा समाहूय स्वपुत्रकौ
कथयामासतुस्तत्र पुत्रयोः पितरौ तदा।
अस्माभिर्नियमः पूर्व्वं कृतश्च श्रूयतां पुनः॥
द्वावपि च समौ पुत्रौ विशेषो नात्र लभ्यते
तस्माच्चैवं कृतं येन पुत्रयोरुभयोरपि॥ १८
तस्यैव प्रथमं कार्य्यो विवाहः शुभलक्षणः॥
यश्चैव पृथिवीं सर्व्वां क्रान्त्वा शीघ्रमुपाव्रजेत्
तयोरेवं वचः श्रुत्वा शरजन्मा स्वयं तदा।
जगाम मन्दिरात् तूर्णं पृथिवीक्रमणाय वै।
गणपतिश्च तत्रैव विचार्य्य च पुनः पुनः।
किं कर्त्तव्यं क्व गन्तव्यं लङ्घितुं नैव शक्यते।
क्रोशमात्रं गतं स्याद्वै न गम्येत मया पुनः।
किं पुनः पृथिवीमेतां क्रान्त्वा सुखमचिन्त्य
इति विचार्य्य विप्रेन्द्राः श्रूयतां तदनन्तरम्।
विचार्य्यैवं गणेशस्तु यच्चकार परं शुभम्॥
स्नानं कृत्वा यथान्यायं समागत्य स्वयं गृहे
उवाच पितरं तत्र मातरं पुनरेव च॥ २४
आसने स्थापिते ह्यत्र पूजार्थं भवतोरिह।
इति श्रुत्वा वचस्तस्य पार्व्वती-परमेश्वरौ॥
अस्थातामासने तत्र पूजाया ग्रहणाय वै।
तेनैव पूजितौ तौ च प्रक्रान्तौ च पुनः पुनः।
एवञ्च कृतवान् सप्तकृत्वः प्रक्रमणन्तु सः।
बद्धाञ्जलिस्तदोवाच पितरौ प्रेमलालसौ॥
भो मातर्भोः पितस्त्वञ्च शृणु त्वं परमं वचः।
शीघ्रञ्चैवात्र कर्त्तव्यो विवाहः शोभनो मम॥
इत्येवं वचनं श्रुत्वा पितरावूचतुस्तदा।

त भवान् सम्यक् पृथिवीञ्च ससागराम् ॥ २९
री गतवांस्तत्र लब्ध्वापि पुनरेव च।
ह शीघ्रं तथा कृत्वागच्छ पूर्व्वं तवैव हि ॥ ३०
वं वचनं श्रुत्वा वचनं क्रोधसंयुतः।
भ्यां श्रूयतां सम्यग्वचनं मम सत्तमौ ॥ ३१
तु पृथिवी क्रान्ता सप्तवारं पुनः पुनः।
कथं समुच्येतां पुनश्च पितराविह ॥ ३२
स्तु तदा श्रुत्वा पितरावूचतुस्तदा।
क्रान्ता त्वया पुत्र पृथिवी गहनैर्युता ॥ ३३
रेवं वचः श्रुत्वा गणेशो वाक्यमब्रवीत्।
ोः पूजनं कृत्वा प्रक्रान्ता च मया पुनः ॥ ३४
ारन्तु यच्चैव किं तत् प्रक्रमणं न हि।
वं वचनं वेदे शास्त्रे वा धर्म्मसञ्चये ॥ ३५
े किञ्च तथ्यं न तर्हि किं सत्यमेव च।
ष पूजनं कृत्वा प्रक्रान्तिञ्च करोति यः ॥ ३६
पृथिवीजन्यं फलं भवति निश्चितम्।
हाय गृहे यो वै पितरौ तीर्थकं व्रजेत् ॥ ३७
पापं तथा प्रोक्तं हनने च तयोरिह।
स्य च महत् तीर्थं पित्रोश्चरणपङ्कजम् ॥ ३८
त् तीर्थन्तु दूरे वै गत्वा प्राप्येत तत् पुनः।
सन्निहितं तीर्थं सुलभं धर्म्मसाधनम् ॥ ३९
स्य च स्त्रियाश्चैव तीर्थं गेहे सुशोभनम्।
स्य पितरौ प्रोक्तौ स्त्रिया भर्त्ता उदाहृतः ॥४०
शास्त्रं तथा वेदो भाषते यन्निरन्तरम्।
दृशाश्च प्रकर्त्तव्यमसत्यं पुनरेव च ॥ ४१
ीयं तथा रूपमसत्यञ्च भवेदिह।
वेदो ह्यसत्यो वै भवेदिति न संशयः ॥ ४२
यथा च भवति विवाहः क्रियतां शुभः।
वा वेदशास्त्रस्थं व्यलीकं कथ्यतां पुनः ॥ ४३
श्रेष्ठतमं यच्च कर्त्तव्यं तत् तथैव च।
श्रुत्वा वचस्तस्य विज्ञयं परमं गतौ ॥ ४४
श्रीशिवे महापुराणे ज्ञानसंहितायां गणेश-
वचनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः।

सूत उवाच।

शिवश्च गिरिजा चापि पुत्रं बुद्धिविचक्षणम्।
ऊचतुस्तावृषिश्रेष्ठा यथार्थं भाषितं ध्रुवम् ॥ १
पुत्र ते विमला बुद्धिः समुत्पन्ना महात्मनः।
त्वयोक्तं यद्वचश्चैव तत् तथैव न चान्यथा ॥ २
समुत्पन्ने च दुःखे वै यस्य बुद्धिर्विशिष्यते।
तस्य दुःखं विनश्येत सूर्य्ये दृष्टे यथा तमः ॥ ३
वेदशास्त्रपुराणेषु यदुक्तं तत् त्वया कृतम्।
पित्रोः प्रक्रमणे जाते पृथिव्यास्तत् कृतं भवेत् ॥ ४
इति वेदपुराणेषु शास्त्रेषु विविधेषु च।
सम्यक् त्वया कृतं यच्च तत् केनापि भवेदिह ॥ ५
आवाभ्यां मानितं तच्च नान्यथा क्रियतेऽधुना।
इत्युक्त्वा तु समाश्वास्य गणेशं बुद्धिसागरम् ॥ ६
विवाहकरणे तौ च मतिं चक्रतुरुत्तमाम्।
एतस्मिन्नन्तरे तत्र विश्वरूपसुते उभे ॥ ७
सिद्धि-बुद्धी इति ख्याते सर्व्वाङ्गसुन्दरे शुभे।
ताभ्याञ्चैव गणेशस्य विवाहं चक्रतुर्मुदा ॥ ८
सन्तुष्टा देवताः सर्व्वा विवाहे समुपागमन्।
यथा चैव शिवस्यैव गिरिजाया मनोरथः ॥ ९
तथा च विश्वकर्म्माऽसौ विवाहं कृतवांस्तदा।
यथा च ऋषयो देवा लेभिरे परमां मुदम् ॥ १०
गणेशोऽपि तदा ताभ्यां सुखञ्चैवाप्यचिन्त्यकम्।
प्राप्तवांश्च तदा तत्र वर्णितुं नैव शक्यते ॥ ११
कियता चैव कालेन तस्य पुत्रौ बभूवतुः।
सिद्धेर्लक्षस्तथा बुद्धेर्लाभः परमशोभनः ॥ १२
एवं सुखमचिन्त्यं वै भुञ्जाने च गणेश्वरे।
आजगाम गुहश्चाथ क्रान्त्वा च पृथिवीं तदा ॥ १३
तावच्च नारदेनैव कैलासे प्रतिबोधितः।
त्वया च श्रूयतां सर्व्वं पितृभ्यान्तु कृतं हि यत् ॥१४
निष्क्राम्य त्वान्तु तीर्थार्थं मिषमुत्पाद्य वै शृणु।
गणेशस्य कृतोद्वाहो लब्धवान् स्त्रीद्वयं तथा ॥ १५
पुत्रद्वयं तथा लब्ध्वा सुखं भुङ्क्ते निरन्तरम्।
भवता पृथिवी क्रान्ता तस्यैवं कृतमुत्तमम् ॥ १६
पितृभ्यां क्रियते चेद्वै अन्यः किं न करोति च।

असम्यक् च कृतं ताभ्यां चित्तेन न शुभं मतम् ॥१७
दद्याद्यदि विप्रं माता पित्रा विक्रीयते यदि।
राज्ञा चेद्ध्रियते सर्वं कस्मै किञ्च ब्रवामहे ॥ १८
यैनेवञ्च कृतं स्यादे तन्मुखं न विलोकयेत्।
इति नीतिर्निवेदय्य यथेच्छसि तथा कुरु ॥ १९
इत्युक्त्वा नारदस्तस्मा अन्तर्द्धानमुपागतः।
स्कन्दोऽपि पितरौ नत्वा कोपाग्निज्वलितस्तदा ॥२०
जगाम पर्व्वते क्रौञ्चे पितृभ्यां वारितोऽपि सन्।
वाग्दानञ्च कृतं तेऽद्य कथञ्च गम्यते त्वया ॥ २१
इत्येवञ्च निषिद्धोऽपि एवमुक्त्वा जगाम सः।
न स्थातव्यं मया ह्यत्र यद्येवं कपटं कृतम् ॥ २२
एवमुक्त्वा गतस्तत्र ह्यद्यापि पर्व्वते शुभे।
वर्त्तते दर्शनेनैव लोकानां पापहारकः ॥ २३
तद्दिनं हि समारभ्य कुमारत्वं प्रतिष्ठितम्।
तन्नाम शुभदं लोके प्रसिद्धं भुवनत्रये ॥ २४
कार्त्तिक्याञ्च सदा देवा ऋषयश्च तपोधनाः।
गत्वा क्रौञ्चनगे तत्र कुर्व्वन्ति स्वामिदर्शनम् ॥ २५
कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात् स्वामिदर्शनम्।
तस्य पापं दहेत् सर्व्वं मनेप्सितफलं लभेत् ॥ २६
उमापि दुःखमापन्ना स्कन्दस्य विरहे सति।
तत्सुखार्थं स्वयं शम्भुरंशेन पर्व्वते गतः ॥ २७
मल्लिकार्ज्जुननामासीज्ज्योतिर्लिङ्गं सुखावहम्।
अद्यापि दृश्यते तत्र शिवया सहितः शिवः ॥ २८
तमागतं स विज्ञाय ततो गन्तुं समुत्सुकः।
देवैश्च प्रार्थितः सोऽपि दूरतो योजनत्रयम् ॥ २९
पर्व्वणि पर्व्वणि तत्र दर्शनार्थञ्च गच्छति।
अमावास्यादिने शम्भुः स्वयं गच्छति तत्र ह ॥ ३०
पार्व्वती गच्छते तत्र पूर्णमासीदिने शुभे।
एतत् तस्य च वृत्तान्तं पृष्टञ्च कथितं मया।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते सर्व्वथा नरः ॥ ३१

इति श्रीशैवे महापुराणे ज्ञानसंहितायां गणपति-
परिणयनं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः।

ऋषय ऊचुः।

सूत जानासि सकलं नाज्ञातं विद्यते त
शिवमाहात्म्यं विशेषेण कथनीयं त्वयाशु
धन्योऽसि कृतकृत्योऽसि सार्थकं देहधार
जातं तवैव संयोगात् किं पुनर्वर्णयाम
इत्येवं वचनं तेषां श्रुत्वा सूतोऽब्रवीदिद

सूत उवाच।

साधु पृष्टं भवद्भिश्च लोकानां हितकाम्या
भवन्तश्च तथा धन्याः पवित्राः कुलभूषण
येषाञ्चैव शिवः साक्षाद्दैवतं परमं शुभम्
सदाशिवकथा लोके वल्लभा भवतां सदा
ते धन्याश्च कृतार्थाश्च सफलं देहधारण
उद्धृतञ्च कुलं तैस्तु ये शिवं समुपासते।
यस्य मुखे शुभं नाम सदा शिव शिवेति
पापानि न स्पृशन्तीह खदिराङ्गारकं य
श्रीशिवाय नमस्तुभ्यं मुखाद्व्याहरते यदि
तन्मुखञ्च तदा यो वै पश्यति तत्त्वणी न
तीर्थजन्यं फलं तस्य भवतीति सुनिश्चि
यत्र त्रयं सदा तिष्ठेदेतच्छुभतरं नरे।
तस्य दर्शनमात्रेण वेणीस्नानफलं लभेत्।
शिवनाम विभूतिश्च रुद्राक्षा तृतीया शु
एतत् त्रयं शरीरे च यस्य तिष्ठति नित्य
तस्यैव दर्शनं लोके दुर्लभं पापहारकम्।
तद्दर्शनं गया वेणी गङ्गा चैव सरस्वती॥
एवं यो न विजानाति तस्यैव दर्शनादिह
नरो वाप्यथवा नारी पापिष्ठो भवति ह
विभूतिर्यस्य नो भाले गले रुद्राक्षधार
नहि शिवमयी वाणी तं त्यजेदन्त्यजं य
शैवं नाम तथा गङ्गा विभूतिर्यमुना तथा
रुद्राक्षा विधिजा प्रोक्ता सर्व्वपापप्रणा
शरीरे च त्रयं यस्य तत्फलञ्चैकतः स्मृतं
एकतो वेणिकायाश्च दर्शनेन फलन्तु यत्
तदेव तुलितं पूर्व्वं ब्रह्मणा हितकारिणा
समताञ्चैव तद्दयातं तस्माद्धार्य्यं सदा बुधैः

लिङ्गानि च ऋषिश्रेष्ठाः पृथिव्यां यानि तानि ह ॥८
पाताले चापि वर्त्तन्ते स्वर्गे चापि तथैव ह।
सर्व्वैश्च पूज्यते शम्भुः सदेवासुरमानुषैः ॥ ९
तथापि शम्भुना व्याप्तं सदेवासुरमानुषम्।
अनुग्रहाय लोकानां लिङ्गानि च महेश्वरः ॥ १०
दधाति विविधान्यत्र तीर्थे चैव स्थले पुनः।
यत्र यत्र यदा शम्भुर्भक्त्या भक्तैश्च संस्मृतः ॥ ११
तत्र तत्रावतीर्य्याथ कार्य्यं कृत्वा च संस्थितः।
लोकानामुपकारार्थं लिङ्गञ्चैवाप्यकल्पयत् ॥ १२
तल्लिङ्गं पूजयित्वा च सिद्धिं समधिगच्छति।
तेषाञ्चापि न विद्येत संख्या च ऋषिसत्तमाः ॥ १३
तथापि श्रूयतां सम्यग्यथाज्ञानं यथाश्रुतम्।
पृथिव्यां यानि लिङ्गानि तेषां संख्या न विद्यते ॥१४
तथापि च प्रधानानि कथ्यन्ते च मया पुनः।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ १५
प्रधानेषु च यानीह मुख्यानि वदाम्यहम्।
यल्लिङ्गानि ज्योतिषाख्यात्र विद्यन्ते ऋषिसत्तमाः ॥ १६
तान्यहं कथयाम्यद्य श्रुत्वा पापं व्यपोहति।
सौराष्ट्रे सोमनाथञ्च श्रीशैले मल्लिकार्ज्जुनम् ॥ १७
उज्जयिन्यां महाकालमोङ्कारपरमेश्वरम्।
केदारं हिमवत्पृष्ठे डाकिन्यां भीमशङ्करम् ॥ १८
वाराणस्याञ्च विश्वेशं त्र्यम्बकं गौतमीतटे।
वैद्यनाथं चिताभूमौ नागेशं दारुकावने ॥ १९
सेतुबन्धे च रामेशं घुश्मेशञ्च (क) शिवालये।
द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत् ॥ ॥ २०
सर्व्वपापविनिर्म्मुक्तो सर्व्वसिद्धिफलो भवेत्।
यं यं काममपेक्ष्यैव पठिष्यन्ति नरोत्तमाः ॥ २१
तस्य तस्य फलप्राप्तिर्भविष्यति न संशयः।
एतेषां दर्शनादेव पातकं नैव तिष्ठति ॥ २२
कर्मक्षयो भवेत् तस्य यस्य तुष्टो महेश्वरः।
ज्योतिषाञ्चैव लिङ्गानि दृष्टानि ऋषिसत्तमाः ॥२३
येषाञ्च जननीगर्भे वासो नैव भवेत् पुनः।
एतेषां पूजने नैव वर्णानां दूषणं स्मृतम् ॥ २४
नैवेद्यञ्चैव संग्राह्यं भोजनीयं प्रयत्नतः।
कृते सर्व्वाणि पापानि भस्मसाद्यान्ति तत्क्षणात्२५

(क) घृष्णेशञ्चेति पाठान्तरम्।

ज्योतिषाञ्चैव लिङ्गानां फलं वक्तुं न शक्यते।
एकञ्च पूजितं येन षण्मासञ्च निरन्तरम् ॥ २६
तस्य दुःखं न जायेत मातृगर्भसमुद्भवम्।
हीनयोनौ यदा जातो ज्योतिर्लिङ्गञ्च पश्यति ॥ २७
तस्य जन्म भवेत् तत्र विमले सत्कुले पुनः।
सत्कुले जन्म सम्प्राप्य धनाढ्यो वेदपारगः ॥ २८
शुभकर्म्म तदा कृत्वा मुक्तिं यात्यनपायिनीम्।
म्लेच्छो वाप्यन्त्यजो वापि षण्ढो वाथ मुनीश्वराः॥२९
द्विजो भूत्वा लभेन्मुक्तिं तस्मात्तद्दर्शनं चरेत्।
अतः परञ्च तीर्थेषु स्थले चैवाथवा पुनः ॥ ३०
प्रधानानि च वर्त्तन्ते तेषां नामानि वै तथा।
ज्योतिषाञ्चोपलिङ्गानि श्रूयतामृषिसत्तमाः ॥ ३१
सोमेश्वरस्य यल्लिङ्गमन्तकेशमुदाहृतम्।
मह्याः सागरसंयोगे तल्लिङ्गमुपलिङ्गकम् ॥ ३२
मल्लिकार्ज्जुनसम्भूतं भृगुकच्छेऽथ रुद्रकम्।
महाकालस्य यल्लिङ्गं दुग्धेशमिति विश्रुतम् ॥ ३३
ओङ्कारसम्भवं लिङ्गं कर्द्दमेशमिति स्वयम्।
केदारेश्वरसञ्जातं भूतेशं यमुनातटे ॥ ३४
भीमशङ्करसम्भूतं भीमेश्वर इति स्मृतम्।
विश्वेश्वराच्च यज्जातं शरण्येश्वरविश्रुतम् ॥ ३५
त्र्यम्बकस्य च यत् प्रोक्तं सिद्धेश्वर इति श्रुतम्।
वैद्यनाथेश्वराज्जातं वैजनाथ इति श्रुतम् ॥ ३६
नागेश्वरसमुद्भूतं भूतेश्वरमुदाहृतम्।
झिल्लिका-सरस्वतीतीरे दर्शनात् पापहारकम् ॥ ३७
रामेश्वराच्च यज्जातं गुप्तेश्वरमुदाहृतम्।
घुश्मेशाच्चैव यज्जातं व्याघ्रेश्वर इति स्वयम् ॥ ३८
एतानि च प्रधानानि मुख्यताञ्च गतानि च।
अन्यान्यपि च मुख्यानि श्रूयतामृषिसत्तमाः ॥ ३९
गङ्गातीरे च मुख्यत्वं प्राप्तं येन विमुक्तिदम्।
कृत्तिवासेश्वरः साक्षात् तत्तुल्यो वृद्धकालकः ॥ ४०
तिलभाण्डेश्वरश्चैव दशाश्वमेध एव च।
गङ्गासागरसंयोगे सङ्गमेश्वर इति स्मृतः ॥ ४१
यमुनातीरके यश्च गोभूमेश्वर एव च।
नीलेश्वर इति ख्यातो वृन्दावनसमीपगः ॥ ४२
भूतेश्वर इति प्रोक्तः सर्व्वार्थसाधको नृणाम्।
नारीश्वर इति ख्यातः कौशिक्यास्तु समीपतः ॥ ४३

कट्केश्वरनामासीद्वर्त्तते गल्लकीतटे।
पूरेश्वर इति ख्यातः पुष्करस्य समीपतः॥ ४४
मण्डकेश इति ख्यातः फल्गुतीरे सदाशिवः।
सिद्धनाथेश्वरस्यैव दर्शनात् सिद्धिदो नृणाम्(क)॥४५
दूरेश्वर इति ख्यातः पत्तने चोत्तरे तथा।
शृगीश्वरश्च नाम्ना वै जननाथस्तथैव च॥ ४६
नर्म्मदातीरके सन्ति तेषां संख्या न विद्यते।
सा च रुद्रस्वरूपा हि वर्त्तते पापहारिका॥ ४७
तस्यां स्थिताश्च ये केचित् पाषाणाः शिवरूपिणः।
तथापि च प्रवच्यामि नामानि च मुनीश्वराः॥ ४८
आवर्त्तेश्वरनामापि वर्त्तते पापहारकः।
पद्मेश्वर इति ख्यातः सिंहेश्वरस्तथैव च॥ ४९
सुमेश्वरस्तथा चात्र कुमारेश्वर एव च।
पुण्डरीकेश इति ख्यातो मण्डपेश्वर एव च॥ ५०
तीक्ष्णेशनामा तत्रासीद्दर्शनात् पापहारकः।
धुन्धरेश्वरनामापि वर्त्तते नर्म्मदातटे॥ ५१
शूलेश्वर इति ख्यातः कुम्भेश्वरस्तथापि च।
कुबेरेश्वरनाम्ना वै विख्यातो भुवनत्रये॥ ५२
ततः सोमेश्वरो देवो नीलकण्ठ इति स्वयम्।
मङ्गलेश इति प्रोक्तो मङ्गलायतनं महत्॥ ५३
ततश्च नन्दिको देवो हत्याकोटिनिवारकः।
नन्दिकेशञ्च यश्चैव पूजयेत् परया मुदा॥ ५४
तस्य तस्याखिला सिद्धिर्भविष्यति न संशयः।
तत्र तीरे च यः स्नाति तस्य पापं विनश्यति॥ ५५

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
ज्योतिर्लिङ्गनिरूपणं नामाष्ट-
त्रिंशोऽध्यायः॥ ३८॥

एकोनचत्वारिंशोऽध्यायः।

ऋषय ऊचुः।

एवं माहात्म्यकं तत्र कथ्यताञ्च त्वयाधुना।
अतः परञ्च यज्जातं तत्त्वं वक्तुमर्हसि॥ १

सूत उवाच।

सम्यगुक्तं भवद्भिश्च कथयामि यथाश्रुतम्।
पुरा युधिष्ठिरेणैव पृष्टश्च ऋषिसत्तमः॥ २
रेवायाः पश्चिमे तीरे कर्णकी नाम वै पुरी।
तत्र द्विजवरः कश्चिदुतथ्यकुलसम्भवः॥ ३
काश्यां गतश्च पुत्राभ्यामर्पयित्वा स्वपत्निकाम्।
कदाचित् स मृतस्तत्र पुत्राभ्याञ्च श्रुतं तदा॥
तदीयञ्चैव यत् कृत्यं सम्पाद्य पुत्रकावुभौ।
पत्नी च पालयामास पुत्रौ पुत्रहितैषिणी॥
पुत्रौ परिणयित्वा तौ विभक्तञ्च धनं तथा।
स्वीयञ्च रक्षितं किञ्चित् कियत् कालं स्थिता॥
कदाचिन्म्रियमाणा सा पुण्यञ्च विविधं तथा।
कृत्वा प्राणान् न मुञ्चेत कष्टं दृष्ट्वाथ पुत्रकौ।
ऊचतुर्मातरं तत्र किं न्यूनं विद्यते तव।
यन्न्यूनं क्रियतां मातस्तदावां करवावहै॥ ८
इत्युक्तञ्च तया तत्र न्यूनञ्च विद्यते बहु।
तदेव क्रियते चेद्धि सुखेन मरणं भवेत्॥ ९
ज्येष्ठपुत्रश्च यश्चासीत् तेनोक्तं कथ्यतां त्वया।
तया च प्रार्थितं ह्येतत् पुरा मे मनसः स्पृहा।
काश्यां गन्तुं तथा नासीदिदानीं म्रियते पुन
ममास्थीनि त्वया पुत्र क्षेपणीयान्यतन्द्रित
गङ्गाजले शुभं तेऽद्य भविष्यति न संशयः।
इत्युक्ते च तया पुत्रो वचनञ्चेदमब्रवीत्॥ १२
मातस्त्वया सुखेनैव प्राणास्त्याज्या न संशयः।
तव कार्य्यं पुरा कृत्वा पश्चात् कार्य्यं मदीयकं
इति हस्ते वचो (क) दत्त्वा यावत् पुत्रो गृहं
तावत् सा च मृता तत्र हरिस्मरणतत्परा॥
तस्याश्चैव च यत् कृत्यं तत् सर्व्वं संविधाय
मासिकञ्चैव कृत्वा तु गमनायोपचक्रमे॥ १५
तयोः श्रेष्ठतमो यो वै सुवादी नाम विश्रुतः
तदस्थीनि समादाय निःसृतस्तीर्थकाम्यया।
संगृह्य सेवकं कञ्चित् तेनैव सहितस्तदा।
आश्वास्य भार्य्यां पुत्रांश्च मातुः प्रियचिकीर्षया
श्राद्धं दानादिकं भोज्यं कृत्वा विधिमनुत्तमम्
मङ्गलस्मरणं कृत्वा निर्ज्जगाम द्विजः स्वयम्

(क) अत्र श्लोकान्तरम्,—
सिद्धनाथेश्वरश्चैव वगोमत्याः क्षीरसागरे।
दर्शनात् सिद्धिदो नृणां भुक्ति-मुक्तिप्रदो यक इति।

(क) जलमिति पाठान्तरम्।

तद्दिने योजनं गत्वा वसतिं ग्रामके शुभे।
द्विजगेहे तदा कृत्वा सन्ध्यादि विधिपूर्व्वकम् ॥ १९
यामिनी च गता तत्र मुहूर्त्तद्वयसम्मिता।
सेवकेन तदा युक्तो ब्राह्मणः संस्थितस्तदा ॥ २०
स्तवनं कृतवांस्तत्र हरेरद्भुतकर्म्मणः।
एतस्मिन्नेव समये ह्याश्चर्य्यञ्चाभवत् तदा ॥ २१
गौश्चैव चाभवत् तत्र ह्यङ्गणे बन्धिता शुभा।
एवं वै ब्राह्मणस्तत्र ह्याजगाम वहिर्गतः ॥ २२
गौनैव च प्रिये दुग्धा इत्युक्त्वा वत्समानयत्।
दोहनार्थं समाहूय स्त्रियं शीघ्रतरं तदा ॥ २३
वत्सं कोले स्वयं बन्धुं यत्नञ्चैवाकरोत् तदा।
वत्सोऽपि कर्षमाणश्च पादेन पादपीड़नम् ॥ २४
चकार ब्राह्मणस्यैव ब्राह्मणः क्रोधमूर्च्छितः।
वत्सञ्च ताड़यामास कूर्परेण दृढ़ं तदा ॥ २५
वत्सोऽपि पीड़ितस्तेन शान्तश्चैवाभवत् तदा।
दुग्ध्वा तु मोचितो नैव क्रोधेन च द्विजन्मना ॥ २६
गौर्दुःखञ्च महत् प्राप्ता रोदनञ्चाकरोत् तदा।
दृष्ट्वा च रोदनं तस्या वत्सो वाक्यमथाब्रवीत् ॥ २७
कथञ्च रुद्यते मातः किं दुःखं ते ह्युपस्थितम्।
पुत्रस्य वचनं श्रुत्वा गौश्च वाक्यमुपाददे ॥ २८
श्रूयतां पुत्र मे दुःखं वक्तुं शक्नोम्यहं न हि।
दुष्टेन ताड़ितस्त्वञ्च तेन दुःखं समागतम् ॥ २९
तद्वचस्तु तदा श्रुत्वा वत्सश्च वचनं पुनः।
किं कर्त्तव्यं क्व गन्तव्यं कर्म्मबद्धा वयं यतः ॥ ३०
कृतञ्चैव यथापूर्व्वं भुज्यते च तथाधुना।
एतद्दशे यदा जाता यदिच्छसि तथा कुरु ॥ ३१
हसता क्रियते कर्म्म रुदता परिभुज्यते।
सुखञ्च जायते तेन दुःखं तेनापि सम्भवेत् ॥ ३२
तस्माच्च पूज्यते कर्म्म सर्व्वञ्च कर्म्मणि स्थितम्।
त्वञ्चैवाथाप्यहञ्चैव इमे जीवाद्यश्च ये ॥ ३३
ते सर्व्वे कर्म्मणा बद्धा न मोच्याः कर्हिचित् त्वया।
एवं वचस्तु पुत्रस्य श्रुत्वा गौरिदमब्रवीत् ॥ ३४
वत्स सर्व्वं विजानामि कर्म्माधीनाः प्रजाः स्वयम्।
तथापि मायया ग्रस्ता दुःखं प्राप्तास्म्यहं पुनः ॥ ३५
रोदनञ्च तदा कृत्वा दुःखशान्तिर्भवेन्न हि।
इत्येतद्वचनं श्रुत्वा मातरं वाक्यमब्रवीत् ॥ ३६
यद्येवञ्च विजानासि पुनश्च रोदनं कथम्।
कृत्वा च साध्यसे किञ्च तस्माद्दुःखं त्यजाधुना ॥ ३७
एवं पुत्रवचः श्रुत्वा माता चैवाब्रवीदिदम्।
मम दुःखं तदा गच्छेद्यदा दुःखं तथाविधम् ॥ ३८
भवेच्च ब्राह्मणस्यैव दुःखं दास्यामि वै सुखम्।
तथा च ब्राह्मणस्यैव मनसि ज्ञास्यति स्वयम् ॥ ३९
पुत्रजन्यञ्च यद्दुःखमीदृशं तद्भवेत् पुनः।
प्रातश्चैव मया पुत्र शृङ्गेणैव हनिष्यते ॥ ४०
हतश्च जीवितं सद्यो हास्यति नात्र संशयः।
इत्युक्तास्तु पुनर्वत्सो मातरं वाक्यमब्रवीत् ॥ ४१
प्रथमञ्च कृतं कर्म्म तत् फलं भुज्यतेऽधुना।
अस्याश्च ब्रह्महत्याया मातः किं प्राप्स्यसे पुनः ॥ ४२
मारितस्ते पुनर्मातर्मार्य्यतां त्वं वृथा कृथाः।
शुभेन प्राप्यते स्वर्गो दुष्टेन पतते पुनः ॥ ४३
समाभ्याञ्च भवेज्जन्म हये मुक्तिरवाप्यते।
कदापि कर्म्मणो नाशे तत्र भोगः प्रजायते ॥ ४४
तस्माच्च पुनरेव त्वं मा कर्म्म कर्त्तुमुद्यता।
अहं क्व पुत्रतां तेऽद्य त्वं माता कुत एव च ॥ ४५
क्व माता क्व पिता बन्धुः क्व स्वामी क्व च बालकः।
न कोऽपि कस्य चास्तीह सर्व्वेऽपि स्वकृतभुजः ॥ ४६
एवं ज्ञात्वा त्वया मातर्दुःखं त्याज्यं शुभं कुरु।
पुत्रवाक्यं पुनः श्रुत्वा वचनञ्चेदमब्रवीत् ॥ ४७
एवं जानाम्यहं पुत्र माया बलवती प्रभोः।
अहं त्यजामि तां मायां माया मां न त्यजत्यसौ ॥ ४८
ते दुःखञ्च मया दृष्टं दुःखञ्च दहते मम।
पुनश्च ब्रह्महत्याया नाशो यत्र भवेदिह ॥ ४९
तत् स्थलञ्च मया दृष्टं हत्वा चैव गमिष्यति।
द्विजपुत्रं तदा हत्वा श्याममङ्गं भविष्यति ॥ ५०
पश्चाच्चैव पुनः श्वेतमभिज्ञानमिदं ध्रुवम्।
इत्येतद्वचनं श्रुत्वा वत्सेनोक्तं न किञ्चन ॥ ५१
तयोस्तदद्भुतं वृत्तं श्रुत्वा पान्थो द्विजस्तदा।
इदं दृष्ट्वा मया प्रातर्गन्तव्यं पुनरेव ह ॥ ५२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः ।

सूत उवाच ।

प्रातःकाले तथा जाते गृहस्वामी समुत्थितः ।
किमर्थं सुप्यते पान्थ ह्यतिकालो भवेदिह ॥ १
तेनोक्तं श्रूयतां ब्रह्मन् स्थित्वा मुहूर्त्तं गम्यते ।
व्यथा च परिवर्त्तेत शरीरे सेवकस्य च ॥ २
इत्येवञ्च मिषं कृत्वा सुष्वाप पुरुषस्तदा ।
दोहनस्य तदा काले ब्राह्मणः पुत्रकं प्रति ॥ ३
मया तु गम्यते पुत्र कार्य्यार्थं कुत्रचित् पुनः ।
पुत्रः समुत्थितस्तत्र वत्सञ्च मुक्तवांस्तदा ॥ ४
माता च तस्य दोहार्थमाजगाम स्वयं तदा ।
द्विजपुत्रस्तदा वत्सं बध्नन् कीलेन ताड़यन् ॥ ५
बन्धनार्थं यदा नीचैर्जातो हि द्विजबालकः ।
पुनर्गौश्च तदा क्रुद्धा शृङ्गेणाताड़यच्च तम् ॥ ६
मर्म्मणि ताड़ितः सोऽपि मूर्च्छां प्राप्य पपात ह ।
लोकाश्च मिलितास्तत्र गवा बालो विहिंसितः ॥ ७
जलं जलं वदन्तस्ते पित्राद्या ये च संस्थिताः ।
यत्नश्च क्रियते सर्व्वैस्तावद्बालो मृतस्ततः ॥ ८
मृते च बालके तत्र हाहाकारो महानभूत् ।
किङ्करोऽस्य तदा गाञ्च ताड़यित्वा व्यमोचयत् ॥ ९
सा गौश्च श्वेतवर्णाभूत् तदा श्यामा व्यदृश्यत ।
अहो च दृश्यतां लोका दृष्ट्वा चैव परस्परम् ॥ १०
ब्राह्मणश्च तदा पान्थो दृष्ट्वाश्चर्य्यं विनिर्गतः ।
यत्र गौश्च गता तत्र तामनु ब्राह्मणो गतः ॥ ११
ऊर्द्ध्वं पुच्छं तदा कृत्वा शीघ्रं गौर्नर्म्मदां प्रति ।
आगत्य नन्दिकेशस्य समीपे विमले जले ॥ १२
त्रिवारं मज्जयित्वा तु श्वेतत्वञ्च गता हि सा ।
यथा गतागता सा च ब्राह्मणो विस्मयं गतः ॥ १३
अहो महत्तमं तीर्थं ब्रह्महत्यानिवारकम् ।
स्वयञ्च मज्जितस्तत्र ब्राह्मणः सेवकस्तथा ॥ १४
मज्जयित्वा गतौ तौ च प्रशंसन्तौ नदीं तदा ।
मार्ग च मिलिता काचित् सुन्दरी भूषणान्विता ॥ १५
तयोक्तं त्वं कुतो यासि सत्यं ब्रूहि ममाग्रतः ।
एवं वचस्तदा श्रुत्वा द्विजेनोक्तं यथातथम् ॥ १६
पुनश्चायं द्विजस्तत्र तयोक्तः स्थीयतां त्वया ।
तयोक्तञ्च समाकर्ण्य स्थितः किं कथ्यते वद ॥ १
सा चाह पुनरेवात्र निवर्त्तस्व द्विजोत्तम ।
त्वया दृष्टं स्थलं यच्च तत्रास्थीनि क्षिपाधुना ॥
साक्षाद्दिव्यमयं देहं धृत्वा यास्यसि सद्गतिम् ।
वैशाखे चैव सम्प्राप्ते सप्तम्याश्च दिने शुभे ॥ १९
सिते पक्षे सदा गङ्गा आयाति द्विजसत्तम ।
अद्यैव सप्तमी सा च गङ्गाहं यामि तत्र वै ॥ २
इत्युक्त्वान्तर्द्दधे देवी द्विजोऽपि परिवर्त्तितः ।
आगत्यास्थि क्षिपेद्यावत् तावन्मातापदृश्यत ।
दिव्यदेहत्वमापन्ना दत्त्वाशिषं दिवं गता ।
धन्योऽसि कृतकृत्योऽसि पावितञ्च कुलं त्वया ॥
धनं धान्यं तथा चायुर्वंशश्च वर्द्धतां तव ।
इत्याशिषं पुनर्दत्त्वा गता सा ह्युत्तमां गतिम् ॥
ब्राह्मणश्च पुनस्तत्र क्षिप्त्वास्थीनि गृहं गतः ।
तद्दिनं हि समारभ्य प्रसिद्धं तीर्थमुत्तमम् ॥ २४
नन्दिकेशसमीपे तु कृत्वा स्नानन्तु तत्फलम् ।
प्राप्यते नात्र सन्देहो महतां वचनादिह ॥ २५
ब्राह्मणी ऋषिका नाम बालवैधव्यमागता ।
पार्थिवं पूजयित्वा तु तपस्तेपे सुदारुणम् ॥ २६
मूढ़ो नाम महादैत्यो पातयामास तां तदा ।
न मानितं तया चैव पश्चाच्छलमदर्शयत् ॥ २७
तदा सा भयसन्त्रस्ता शिवशिवेतिभाषिणी ।
शरणागतरक्षार्थं कर्त्तव्यं व्रतमाहितम् ॥ २८
आनन्दार्थं समायातं नन्दीशेन महात्मना ।
लोकानामुपकारार्थं स्थितश्च शङ्करस्तदा ॥ २९
तदानीं तीर्थसमायातं पार्थिवं शङ्करः स्वयम् ।
प्रसन्नश्च तया तत्र ह्यंशेन स्थापितस्तदा ॥ ३०
गङ्गापि च प्रसन्ना तां प्राह साध्वि वराधुना ।
मदर्थञ्चैव वैशाखे दिनमेकं त्वया पुनः ॥ ३१
सामीप्यं करणीयं वै तथेति च स्वयं वचः ।
तद्दिनं हि समारभ्य ईदृशं तीर्थमुत्तमम् ॥ ३२
तत्र स्नातो नरः सम्यक् पापैश्च मुच्यते ध्रुवम् ।
एतत् ते हि समाख्यातं यत् पृष्टोऽहं मुनीश्वराः

इति श्रीशैवे महापुराणे ज्ञानसंहितायां नन्दिकेशमाहात्म्यं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः ।

ऋषय ऊचुः ।

पुनश्च कथ्यतां सूत लिङ्गानि सत्तमानि च ।

सूत उवाच ॥ १

व्यासेश्वरश्च विख्यातो शुक्रेशश्च तथैव च ।
भण्डारेश्वरविख्यातो हुङ्कारेशस्तथैव च ॥ २
सुरेश्वरश्च विज्ञेयो भूतेश्वर इति स्वयम् ।
संयमेश्वर इति प्रोक्तो महापातकनाशनः ॥ ३
ततश्च तप्तिकातीरे कुमारेश्वर एव च ।
सिद्धेश्वरश्च विख्यातस्तन्नेश्वरस्तथैव च ॥ ४
रामेश्वरः पुनः प्रोक्तो दर्शनात् पापहारकः ।
ऋणेश्वरस्तथा प्रोक्तः कुम्भेश्वरः (क) परो मतः ॥ ५
नन्देश्वरस्तथा पञ्चपुञ्जेशश्च तथापि हि ।
पूर्णायां पूर्णको नाम वीरेश्वरस्तथा पुनः ॥ ६
गोदातीरे कपालेशश्चक्रेशश्च तथैव च ।
चन्द्रेश्वरश्च विज्ञेयश्चन्द्रकान्तिफलप्रदः ॥ ७
धौतपापेश्वरः साक्षाद्दर्शेन परमेश्वरः ।
भीमेश्वर इति प्रोक्तः सूर्य्येश्वरस्तथापि हि ॥ ८
त्र्यम्बकस्तप्तिकायान्तु गोकर्णेशस्तथापि च ।
नारूकेशो महापुण्यो रामेश्वरस्तथापि हि ॥ ९
नन्देश्वरश्च विज्ञेयो ज्ञानदो लोकपूजितः ।
विमलेश्वरनामा यः कण्टकेश्वर एव च ॥ १०
पूर्व्वसागरसंयोगे धर्म्मकेशस्तथैव च ॥ ११
पश्चिमे सागरे चैव सिद्धेश्वरः स्वयं स्थितः ।
विलेश्वरश्च विख्यातो ह्यन्धकेशस्तथैव च ॥ १२
यत्र वै अन्धको दैत्यो हतश्च शङ्करेण च ।
स्वयं स्वरूपमंशेन धृत्वा शर्व्वः पुनः स्थितः ॥ १३
शङ्करेश्वरविख्यातो (ख) लोकानां सुखदायकः ।
कर्द्दमेशः परः प्रोक्तः कोटीशश्चार्व्वुदाचले ॥ १४
अचलेश्वरश्च विख्यातो बहूनां दुःखहा मतः ।
नागेश्वरश्च कौशिक्यास्तीरे तिष्ठति नित्यशः ॥ १५
अनन्तेश्वरः सम्प्रोक्तः कल्याणसुखभाजनम् ।
योगेश्वरश्च विख्यातो वैद्यनाथेश्वरस्तथा ॥ १६
कोटीश्वरश्च विज्ञेयः सप्तेश्वरस्तथापि हि ।
भद्रेश्वरश्च विख्यातो भद्रनामहरः स्वयम् ॥ १७
चण्डीश्वरश्च यः प्रोक्तः सङ्गमेश्वर एव च ।
तस्यैव पश्चिमे तीरे गौतमेश्वर एव च ॥ १८
पूर्व्वस्याञ्च दिशि यानि तानीह कथितानि ते ।
दक्षिणस्यां दिशि कश्चिदत्रीश्वर इति स्वयम् ॥ १९
लोकानामुपकारार्थमनुसूयासुखाय च ।
प्रादुर्भूतः स्वयं देवोऽत्र्यनात्र्योः सुपूजितः ॥ २०
स एव शङ्करः साक्षाद्दर्शेन स्वयमेव हि ।
इत्येवं वचनं तस्य श्रुत्वा तु परमर्षयः ॥ २१
ऊचुस्ते वचनं तत्र कथमत्रीश्वरो हरः ।
उत्पन्नः परमो देवस्तत् त्वं कथय सुव्रत ॥ २२

सूत उवाच ।

साधु पृष्टमृषिश्रेष्ठाः कथयामि कथां शुभाम् ।
यां कथां परमां श्रुत्वा पातकैर्मुच्यते ध्रुवम् ॥ २३
दक्षिणस्यां दिशि यच्च कामदं नाम वै वनम् ।
विख्यातञ्च ऋषिश्रेष्ठास्तपसे हितदं नृणाम् ॥ २४
तत्र च ब्रह्मणः पुत्रो ह्यत्रिर्नाम ऋषिः स्वयम् ।
तपस्तपति यः साक्षादनुसूयासमन्वितः ॥ २५
पूर्व्वं कदाचिदत्रैव ह्यनावृष्टिरभूत् तदा ।
शतवार्षिकी तदा देवाद्दुःखिताः प्राणिनस्तदा ॥ २६
जलं नैव पृथिव्यान्तु दृश्यते ऋषिसत्तमाः ।
वृक्षाः शुष्कास्तदा सर्व्वे पल्लवानि फलानि च ॥ २७
नित्यार्थं न जलं क्वापि दृश्यते दुःखितो ऋषिः ।
सान्द्रं पर्णं न लभ्येत खरवाता दिशो दश ॥ २८
आवर्त्तञ्चैव भूतानां दृष्ट्वा च ऋषिसत्तमाः ।
साध्वी चैवाब्रवीद्देवी मया दुःखं न सह्यते ॥ २९
समाधौ च विलीनोऽभूदासने संस्थितः स्वयम् ।
प्राणायामं त्रिरावृत्तं कृत्वा मुनिवरस्तदा ॥ ३०
ध्यायति स्म परंज्योतिरात्मस्थमात्मना च सः ।
स्वामिनि ध्यानलीने च शिष्याश्च दूरतो गताः ॥ ३१
अन्नं विना तदा ते तु मुक्त्वा ते च गताः क्षणात् ।
तदैकाकिनी संजाता सेवयामास तं मुदा ॥ ३२
पार्थिवं सुन्दरं कृत्वा मन्त्रेण विधिपूर्व्वकम् ।
मानसैरुपचारैश्च पूजयित्वा शिवं पुरः ॥ ३३
संस्थाप्य स्वामिनञ्चैव सेवयामास वै तदा ।

(क) दुग्धेश्वर इति क्वचित् पाठः ।
(ख) शरण्येशश्च विख्यात इति पाठान्तरम् ।

बद्धाञ्जलिपुटा भूत्वा प्रणम्य स्वामिनं शिवम् ॥ ३४
दण्डवत् प्रणिपातेन प्रतिप्रणमणं तदा ।
दैत्याश्च दानवाः सर्व्वे दृष्ट्वा तु सुन्दरीं तदा ॥ ३५
विह्वलाश्चाभवंस्तत्र तेजसा दूरतः स्थिताः ।
अग्निं दृष्ट्वा यथा दूरे वर्त्तन्ते तद्वदेव हि ॥ ३६
तथैनाञ्च तदा दृष्ट्वा नायान्ति हि समीपगाः ।
अत्रेश्च तपसश्चैव अनुसूया विशिष्यते ॥ ३७
यावत् कालन्तु सा देवी परिचर्य्यां चकार ह ।
तौ दम्पती तदा तत्र नान्यः कश्चित् पुरः स्थितः ॥३८
एवं जाते तदा काले अत्रिश्च ऋषिसत्तमः ।
ध्याने च परमे लीनो न व्यबुध्यत किञ्चन ॥ ३९
अनुसूयापि सा साध्वी स्वामिनं वा शिवं तथा ।
भेजे नान्यत् परं किञ्चिज्जानीते स्म च सा सती ॥४०
तस्यैव तपसा सर्व्वे तस्याश्च भजनेन च ।
देवाश्च ऋषयश्चैव गङ्गाद्याः सरितस्तथा ॥ ४१
विस्मयं परमं मत्वा दर्शनार्थं समाययुः ।
तयोस्तदद्भुतं दृष्ट्वा जजल्पुस्ते च परस्परम् ॥ ४२
उभयोः किं विशिष्टञ्च तपसो भजनस्य च ।
अत्रेश्चैव तपः प्रोक्तमनुसूयाभजनं तथा ॥ ४३
एतत् सर्व्वञ्च ते दृष्ट्वा चूचुर्वै भजनं वरम् ।
पूर्व्वञ्च ऋषिभिश्चैव दुष्करन्तु तपः कृतम् ॥ ४४
एतादृशन्तु केनापि न भवत्येतदब्रुवन् ।
धन्योऽयञ्च तथा धन्या ताभ्याञ्च क्रियते पुनः ॥४५
एतादृशं शुभञ्चैव क्रियते केन साम्प्रतम् ।
तयोरेवं प्रशंसाञ्च कृत्वा ते तु यथागतम् ॥ ४६
गतास्ते च तदा तत्र गङ्गाञ्च गिरिशं विना ।
गङ्गा च भजने प्रीता साध्वीधर्म्मविमोहिता ॥ ४७
एनाञ्चैवोपकारञ्च कृत्वा गच्छाम्यहं पुनः ।
शिवोऽपि ध्यानवद्धो वै गतो नैव कृपां विना ॥ ४८
एवञ्च क्रियमाणे च यज्जातं श्रूयतामिति ।
पञ्चाशच्च तथा चात्र चत्वारि ऋषिसत्तमाः ॥ ४९
वर्षाणि च गतान्यासन् वृष्टिर्नैवाभवत् तदा ।
यावच्चाप्यत्रिणा ह्येवं तपसा ध्यानमाश्रितम् ॥ ५०
अनुसूया तदा नैव गच्छामीतीषणा कृता ।
कदाचिच्च ऋषिश्रेष्ठो ह्यत्रिर्ब्रह्मविदां वरः ॥ ५१
जाग्रतश्च जलं देहीत्युवाच च प्रियां प्रति ।
सापि साध्वीत्यवश्यञ्च गृहीत्वा च कमण्डलुम् ।
जगाम च वने तत्र जलञ्च नीयते कुतः ।
किं करोमि क्व गच्छामि कुतो नीयेत वै जलम् ।
इति विस्मयमापन्नां दृष्ट्वा गङ्गा सरिद्वरा ।
तामनुव्रजति यावत् साब्रवीच्च तदा हि ताम् ।
प्रसन्नास्मि च ते देवि तवाज्ञां हि करोम्यहम् ।
तद्वचश्च तदा श्रुत्वा ऋषिपत्नी वचः स्वयम् ॥ ५
का त्वं कमलपत्राक्षि कुतो वा त्वं समागता ।
इत्युक्ते च तया तत्र गङ्गा वाक्यमथाब्रवीत् ॥ ५

गङ्गोवाच ।

स्वामिनः सेवनं दृष्ट्वा शिवस्य च तथैव च ।
साध्वीं धर्म्मवतीं वीक्ष्य स्थितास्मि तव सन्निधौ
अहं गङ्गा समायाता भजनात् ते शुचिस्मिते ।
वशीभूता ह्यहं जाता यदिच्छसि वृणुष्व तत् ।
इत्युक्ते गङ्गया साध्वी नमस्कृत्वा पुरः स्थिता ।
उवाच च जलं देहि प्रसन्नासि त्वं ममाधुना ॥ ५९
इत्येतद्वचनं श्रुत्वा गर्त्तं कुर्व्विति चाब्रवीत् ।
शीघ्रं यावच्च तत् कृत्वा स्थितञ्च क्षणमात्रतः ॥
तत्र सा च प्रविष्टा च जलरूपमभूत् तदा ।
आश्चर्य्यं परमं गत्वा जलञ्च गृहीतं तया ॥ ६१
उवाच वचनं ह्येतल्लोकानां सुखहेतवे ।
यदि त्वञ्च प्रसन्ना मे कृपा च वर्त्तते मयि ॥ ६
तावत् त्वया च स्थातव्यं यावत् स्वामी समाग

गङ्गोवाच ।

शृणु देवि वचस्तथ्यं मया च स्थीयते तदा ॥
यदा त्वं मासमात्रस्य फलं दास्यसि मेऽनघे ।
इत्युक्ते च तया तत्र ह्यनयापि कृतं तथा ॥ ६
गृहीत्वा च जलं तच्च दुर्लभं सर्व्वदेहिनाम् ।
आनीय स्वामिने दत्तं दत्त्वा च पुरतः स्थिता ।
ऋषिश्चापि जलेनैव आचम्य विधिपूर्व्वकम् ।
पपौ शुभ्रं जलं तच्च पीत्वा सुखमवाप ह ॥
सुखमात्यन्तिकं लब्ध्वा परं विस्मयमागतः ।
अहो नित्यं जलं यच्च पीयते तज्जलं न हि ॥
इति विचार्य्य तेनैव परितश्चावलोकितम् ।
शुष्कान् वृक्षांस्तथालोक्य दिशो रूक्षतरास्त
उवाच तामृषिश्रेष्ठो न जातं वर्षणं पुनः ।

तदुक्तं तत् समाकर्ण्य नाथ नेति प्रिया तदा ॥ ६९
तामुवाच पुनः सोऽपि जलं नीतं कुतस्त्वया ।
इत्युक्ते च तदा तेन विस्मयं परमं गता ॥ ७०
निवेद्यते मया चेद्धि तदोत्कर्षो भवेन्मम ।
निवेद्यते यदा नैव व्रतभङ्गो भवेन्मम ॥ ७१
नोभयञ्च यथा स्याद्धि निवेद्यं तत् तथा मया ।
इति यावद्विचार्य्येत तावत् पृष्टा पुनः पुनः ॥ ७२
उवाच श्रूयतां स्वामिन् यथार्थं कथयामि वै ।

अनुसूयोवाच ।

शङ्करस्य प्रतापाच्च तथैव सेवनात् तव ॥ ७३
गङ्गा समागता चैव तदीयन्तु जलं शुभम् ।
एवं वचस्तदा श्रुत्वा मुनिर्विस्मितमानसः ॥ ७४
उवाच सुन्दरि त्वञ्च सत्यं वाथ व्यलीककम् ।
ब्रवीषि च यथार्थं त्वं न मन्ये दुर्लभन्त्विदम् ॥ ७५
असाध्यं योगिभिर्यच्च देवैरपि सदा शुभे ।
तच्चैवाद्य कथं जातं विस्मयः परमो मम ॥ ७६
यद्येवं दृश्यते चेद्धि तन्मन्येऽहञ्च नान्यथा ।
इति तस्य वचः श्रुत्वा स्वामिनो वचनं पुनः ॥ ७७
आगम्यतां त्वया नाथ द्रष्टुमिच्छा भवेद्यदि ।
इत्युक्त्वा तु समादाय गता यत्र सरिद्वरा ॥ ७८
दर्शयामास तां तत्र गर्त्ते च संस्थितां स्वयम् ।
तत्र गत्वा ऋषिश्रेष्ठो गर्त्तञ्च जलपूरितम् ॥ ७९
आकण्ठं सुन्दरं दृष्ट्वा धन्येयमिति चाब्रवीत् ।
किं मदीयं तपश्चैव किमन्येषां पुनस्तथा ॥ ८०
स्तुत्वा स्तुत्वा च संस्नातः सुभगे दुर्लभे जले ।
आचम्य पुनरेवात्र स्तुतिं चक्रे पुनः पुनः ॥ ८१
अनुसूयापि संस्नाता सुन्दरे च जले तदा ।
नित्यं कृत्वा पुनः सोऽपि सापि चैव तथा पुनः ॥ ८२
तदोवाच पुनर्गङ्गा गम्यते च मयाधुना ।
इत्युक्ते च पुनः साध्वी तामुवाच सरिद्वराम् ॥ ८३
यदि प्रसन्ना देवेशि यद्यस्ति च कृपा मयि ।
महताञ्च स्वभावश्च नाङ्गीकृतं परित्यजेत् ॥ ८४
यद्यपि चैव सम्यग्वा असम्यग्वा भवेदिह ।
तथा त्वञ्च कृपां कर्त्तुमर्हसि मे सरिद्वरे ॥ ८५
इत्युक्त्वा प्रणिपातेन स्तुत्वा स्तुत्वा पुनः पुनः ।
ऋषिरत्रिरिमां तत्र कृत्वा स्तवनमुत्तमम् ॥ ८६
ययाचे च पुनर्गङ्गां कृपां कुरु ममोपरि ।
तामुवाच पुनः साध्वी त्वया स्थेयं तपोवने ॥ ८७
ऋषिश्चापि तथा ह्यत्र स्थेयश्चैव सरिद्वरे ।
तदीयं तद्वचः श्रुत्वा गङ्गा वाक्यमथाब्रवीत् ॥ ८८
शङ्करार्चनसम्भूतं फलं वर्षस्य यच्छसि ।
स्वामिनश्च फलञ्चैव यच्छसि पूजनोद्भवम् ॥ ८९
तदा स्थास्ये वरारोहे लोकानामुपकारणात् ।
यथा दानेन मे तुष्टिः स्नानेनैव पुनः पुनः ॥ ९०
यज्ञैर्वाप्यथवा योगैर्यथा पातिव्रतेन च ।
पतिव्रतां यथा दृष्ट्वा मनसः प्रीणनं भवेत् ॥ ९१
तथा न तुष्यते देवि यथा साध्वीं प्रदृश्य च ।
ममापि पापनाशो वै दृष्ट्वा पातिव्रतं प्रिये ॥ ९२
तस्माच्च यदि लोकस्य हितार्थं त्वं प्रयच्छसि ।
तस्माच्च स्थिरतां यास्ये यदि कल्याणमिच्छसि ॥ ९३
इत्येवं वचनं श्रुत्वा ददौ वर्षसमुद्भवम् ।
महताञ्च स्वभावोऽस्ति परेषां हितमावहेत् ॥ ९४
सुवर्णं तत्र वै दृष्टं चन्दनेक्षुरसं तथा ।
आत्मानं पीड़यित्वा तु परेषामुपकारकम् ॥ ९५
मनो लग्नं भवेन्नूनं नात्र कुर्य्याद्विचारणाम् ।
पार्थिवे रूपके शम्भुः स्थितो यो वै तदा स्वयम् ॥ ९६
प्रसन्नोऽस्मि वरं ब्रूहि प्रिये प्रियतरासि मे ।
पञ्चवक्त्रादिसंयुक्तं हरं प्रेक्ष्य सुविस्मितौ ॥ ९७
यदि प्रसन्नो देवेश प्रसन्ना जगदम्बिका ।
तस्मात् त्वञ्च वने देव लोकानां सुखकारणात् ॥ ९८
तिष्ठ त्वं पूजया देव लोकानां सुखदो भव ।
प्रसन्ना च यदा गङ्गा तदा चैव महेश्वरः ॥ ९९
उभौ तौ च स्थितौ तत्र यत्रासीदृषिसत्तमः ।
अत्रीश्वरश्च नामासीदीश्वरः परदुःखहा ॥ १००
गङ्गा चापि तदा तत्र स्थितापि चोमया सह ।
तद्दिनं हि समारभ्य तत्राश्चर्य्यं जलं सदा ॥ १०१
हस्तमात्रञ्च तद्गर्त्तमुदकञ्चाश्चयं तदा ।
तत्रैव ऋषयो दिव्याः समाजग्मुः सहाङ्गनाः ॥ १०२
तीर्थात् तीर्थाच्च ये सर्व्वे ते सर्व्वे च समागताः ।
यवाश्च व्रीहयश्चैव फलानि विविधानि ह ॥ १०३
तत्रासंश्च मुनिश्रेष्ठा वनं कामफलप्रदम् ।
सर्व्वे ते ऋषयश्चैव यज्ञयागपरायणाः ॥ १०४

कर्म्मभिश्चैव सन्तुष्टा वृष्टिं चक्रुः सदा शुभाम् ।
आनन्दं परमं लोके यत्र ते व्रतमुत्तमम् ।
अत्रीश्वरस्य माहात्म्य श्रुत्वा कल्याणमाप्नुयात् ॥१०५

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
गङ्गामाहात्म्य वर्णनं नामैकचत्वा-
रिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः ।

सूत उवाच ।

शृयतामृषयः श्रेष्ठाः कथां पापप्रणाशिनीम् ।
व्यासस्यैव मुखाच्छ्रुत्वा कथयामि यथाश्रुतम् ॥ १

ऋषय ऊचुः ।

सूत जानासि सकलं वस्तु व्यासप्रसादतः ।
तवाज्ञानं न विद्येत तस्मात् पृच्छामहे वयम् ॥ २
लिङ्गञ्च पूज्यते लोकैस्तत् त्वया कथितञ्च यत् ।
तत् तथैव न चान्यद्वा कारणं विद्यते त्विह ॥ ३

सूत उवाच ।

कल्पभेदकथा चैव श्रुता चैव मया पुनः ।
तदेव कथयाम्यद्य शृयतामृषिसत्तमाः ॥ ४
पुरा दारुवणे जातं यद्वृत्तन्तु द्विजन्मनाम् ।
तदेव शृयतां सम्यक् कथयामि यथाश्रुतम् ॥ ५
दारु नाम वनं श्रेष्ठं तत्रासन्नृषिसत्तमाः ।
शिवभक्ताः सदा नित्यं शिवध्यानपरायणाः ॥ ६
त्रिकालं शिवपूजाञ्च कुर्व्वन्ति स्म निरन्तरम् ।
स्तोत्रैर्नानाविधैर्देवं मन्त्रैर्वा ऋषिसत्तमाः ॥ ७
एवं सेवां प्रकुर्व्वन्तो ध्यानमार्गपरायणाः ।
ते कदाचिद्वने याताः समिदाहरणाय च ॥ ८
एतस्मिन्नन्तरे साक्षाच्छङ्करो नीललोहितः ।
विरूपञ्च समास्थाय परीक्षार्थं समागतः ॥ ९
दिगम्बरोऽतितेजस्वी भूतिभूषणभूषितः ।
चेष्टाञ्चैव कटाक्षञ्च हस्ते लिङ्गञ्च धारयन् ॥ १०
मनांसि मोहयन् स्त्रीणामाजगाम हरः स्वयम् ।
तं दृष्ट्वा ऋषिपत्न्यस्ताः परं त्रासमुपागताः ॥ ११
विह्वला विस्मिताश्चैव समाजग्मुस्तथा पुनः ।
आलिलिङ्गुस्तदा चान्याः करं धृत्वा तथापराः ॥ १२

परस्परन्तु संघर्षाद्गतश्चैव द्विजन्मनाम् ।
एतस्मिन्नेव समये ऋषिवर्य्याः समागमन् ॥ १
विरुद्धं वृत्तकं दृष्ट्वा दुःखिताः क्रोधमूर्च्छिताः ।
तदा दुःखमनुप्राप्ताः कोऽयं कोऽयं तथाब्रुवन् ।
यदा च नोक्तवान् किञ्चित् तदा ते परमर्षयः ।
ऊचुस्तं पुरुषं ते वै विरुद्धं क्रियते त्वया ॥ १
त्वदीयञ्चैव लिङ्गञ्च पततां पृथिवीतले ।
इत्युक्ते तु तदा तैस्तु लिङ्गञ्च पतितं क्षणात् ।
तल्लिङ्गञ्चाग्निवत् सर्व्वं ददाह यत् पुरःस्थितम् ।
यत्र यत्र च तद्याति तत्र तत्र दहेत् पुनः ॥
पाताले च गतं तच्च स्वर्गे चापि तथैव च ।
भूमौ सर्व्वत्र तद्भ्रान्तं कुत्रापि तत् स्थितं न हि ।
लोकाश्च व्याकुला जाता ऋषयस्तेऽपि दुःखिताः ।
न शर्म्म लेभिरे क्वापि देवाश्च ऋषयस्तथा ॥
ते सर्व्वे च तदा देवा ऋषयो ये च दुःखिताः ।
न ज्ञातश्च शिवो यैस्तु ब्रह्माणं शरणं ययुः ॥ २
तत्र गत्वा तु तत् सर्व्वं कथितं ब्रह्मणे तदा ।
ब्रह्मा तद्वचनं श्रुत्वा प्रोवाच ऋषिसत्तमान् ॥ २

ब्रह्मोवाच ।

ज्ञातारश्च भवन्तो वै कुर्व्वन्ति गर्हितं पुनः ।
अज्ञातारो यदा कुर्य्युः किं पुनः कथ्यते तदा ॥
विरुध्यैवं शिवं देवाः कुशलं कः समीहते ।
गृहे समागतं दूरादतिथिं यः परामृशेत् ॥ २
तस्यैव सुकृतं नीत्वा स्वीयञ्च दुष्कृतं पुनः ।
संस्थाप्य चातिथिर्य्याति किं पुनः शिवमेव च ।
यावल्लिङ्गं स्थिरं नैव जगतां त्रितये शुभम् ।
जायते न तदा क्वापि सत्यमेतद्वदाम्यहम् ॥ २
भवद्भिश्च तथा कार्य्यं यथा स्वास्थ्यं भवेदिह ।
इत्युक्तास्ते प्रणम्योचुः किं कार्य्यं तत् समादिश ।
इत्युक्तश्च तदा ब्रह्मा तान् प्रोवाच तदा स्वयम् ।
आराध्य गिरिजां देवीं प्रार्थयध्वं शुभां तदा ।
योनिरूपं भवेच्चेद्वै तदा तत् स्थिरतां भजेत् ।
तदा प्रसन्नां तां दृष्ट्वा तदेवं कुरुते पुनः ॥ २८
कुम्भमेकं तदा स्थाप्य कृत्वाष्टदलमुत्तमम् ।
तदुपरि न्यसेत् तच्च ओषधीभिः समन्वितम् ॥
दूर्व्वा-यवाङ्कुरैस्तत्र तीर्थोदकं प्रपूरयेत् ।

मन्त्रैश्च वेदभूतैश्च मन्त्रयेत् कुम्भमुत्तमम् ॥ ३०
तल्लिङ्गं तज्जलैनैव सेचयेत् परमर्षयः।
शतरुद्रियमन्त्रैस्तु प्रोक्षितं शान्तिमाप्नुयात् ॥ ३१
गिरिजायोनिरूपञ्च वाणं स्थाप्य शुभं पुनः।
तत्र लिङ्गञ्च तत् स्थाप्यं पुनश्चैवाभिमन्त्रयेत् ॥ ३२
गन्धैश्च चन्दनैश्चैव पुष्प-धूपादिभिस्तथा।
दीपारात्रिकपूजाभिस्तोषयेत् परमेश्वरम् ॥ ३३
प्रणिपातैः स्तवैस्तञ्च वाद्यं गानं तदा पुनः।
स्वस्त्ययनं ततः कृत्वा जयेति व्याहरेत् ततः ॥ ३४
प्रसन्नो भव देवेश जगदाह्लादकारक।
कर्त्ता पालयिता त्वञ्च संहर्त्ता पुनरेव च ॥ ३५
जगदादिर्जगद्योनिर्जगदन्तर्गतोऽपि च।
पालयन् सर्व्वलोकांश्च शान्तो भव सदाशुभ ॥ ३६
एवं कृते च स्वास्थ्यं वै भविष्यति न संशयः।
युक्तास्ते तदा देवाः प्रणिपत्य पितामहम् ॥ ३७
शिवस्य शरणं गत्वा प्रार्थितः शङ्करस्तदा।
पूजितः परया भक्त्या प्रसन्नः शङ्करस्तदा ॥ ३८
पार्व्वतीञ्च विना नान्या लिङ्गं धारयितुं क्षमा।
तया धृतन्तु शान्तिञ्च गमिष्यति न संशयः ॥ ३९
वचौत्वा चैव ब्रह्माणं गिरिजा प्रार्थिता तदा।
प्रसन्नां गिरिजां कृत्वा वृषभध्वजमेव च ॥ ४०
पूर्व्वोक्तञ्च विधिं कृत्वा स्थापितं लिङ्गमुत्तमम्।
मन्त्रोक्तेन विधानेन देवैश्च ऋषिभिस्तदा ॥ ४१
स्तवनैः पूजनैर्मन्त्रैः सन्तोष्य वृषभध्वजम्।
स्थिताः सम्यक् परं कृत्वा सर्व्वेषां धर्म्महेतवे ॥ ४२
शिवोऽपि कृपया युक्तो ह्यब्रवीत् परमं वचः।
प्रसन्नं माञ्च जानीत सुखं स्यात् सर्व्वदा नृणाम् ॥ ४३
इत्युक्ते च तदा तेन प्रसन्नाः सर्व्वदेवताः।
ऋषयश्च प्रणम्यैव स्तुत्वा स्तुत्वा पुनः पुनः ॥ ४४
ब्रह्मणा विष्णुना चापि रुद्रेणैव पुनस्तथा।
कृतं सर्व्वं सुखञ्चात्र तैस्तदा च दयालुभिः ॥ ४५
लोकानां स्थापिते लिङ्गे कल्याणञ्चाभवत् तदा।
प्रसिद्धञ्चैव यल्लिङ्गं लिङ्गमेतत् तथा पुनः ॥ ४६
विशेषोऽत्र कथं लभ्येच्छ्रूयतामृषिसत्तमाः।
रुद्रेण स्थापितं यच्च तल्लिङ्गमिदमेव च ॥ ४७
अन्यच्च ज्योतीरूपञ्च नात्र कार्य्या विचारणा।
मक्षिकापादमात्रं हि शिवस्वं न स्पृशेत् क्वचित् ॥ ४८
तं पप्रच्छुस्तदा सर्व्वे शिवे निर्म्माल्यता कथम्।
तच्छ्रुत्वा वचनं तेषां सूतश्चैवाब्रवीदिदम् ॥ ४९
साधु पृष्टमृषिश्रेष्ठाः कथयामि यथाश्रुतम्।
दक्षशापाच्च यत् प्रोक्तं यच्चैव कथितन्त्विह ॥ ५०
रुद्रेणैव कृतं यच्च तल्लिङ्गे दूषणं स्मृतम्।
तत् सर्व्वञ्च तथा ज्ञेयं भक्तो नैव विदुष्यति।
रुद्रेण स्थापितं लिङ्गं सर्व्वं दूषणकृद्भवेत् ॥ ५१

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
लिङ्गविधानं नाम द्विचत्वा-
रिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः।

ऋषय ऊचुः।

अन्धकस्य वधः प्रोक्तो न श्रुतो विस्तरेण च।
तत् सर्व्वञ्च समासेन कथय त्वं सुशोभनम् ॥ १

सूत उवाच।

सम्यक् पृष्टं भवद्भिस्तु श्रूयतामृषिसत्तमाः।
हिरण्याक्षसुतः प्रोक्तो अन्धको नाम विश्रुतः ॥ २
ब्रह्माणञ्च समाराध्य वरं प्राप्य सुदुर्लभम्।
स्मृतिं प्राप्ते शरीरे मे ब्रह्माण्डं वर्त्तते यदा ॥ ३
तदा मे जीवितं नैव ह्यन्यथा जीवितं भवेत्।
एवं वरं तदा लब्ध्वा ब्रह्माणं प्रणिपत्य च ॥ ४
त्रिलोकीञ्चाजयत् कृत्स्नां देवाश्च विजितास्तदा।
सर्व्वे च दिक्पालाश्च जितास्तेन महात्मना ॥ ५
मन्दरञ्च समाश्रित्य कालक्षेपं तदानयन्।
अन्धकोऽपि तदा तांस्तु श्रुत्वा च मन्दराचले ॥ ६
जगाम सैन्यसंयुक्तो देवानां हननेच्छया।
तत्र युद्धमतीवासीद्देव-दानवयोरिह ॥ ७
देवैश्च पीड़िता दैत्याः परितश्च दिशो दश।
अन्धकोऽपि समुद्रस्य नैर्ऋतेश्च समीपतः ॥ ८
उपकण्ठे सुगर्त्तन्तु कृत्वा गर्त्ते न्यवेशयत्।
तस्माद्गर्त्ताच्च निःसृत्य पीड़यित्वा पुनः प्रजाः ॥ ९
प्राविशच्च पुनर्दैत्यो महाबलपराक्रमः।
गर्त्तं त्रियोजनं तत्र जातं नगरसन्निभम् ॥ १०

परः स्वर्ग इवाभाति तत्र तिष्ठति नित्यशः।
देवाश्च दुःखिताः सर्व्वं शिवं प्रार्थ्य पुनः पुनः॥ ११
निवेद्य तस्मै तत् सर्व्वं श्रुत्वा प्रीतो हरस्तदा।
सैन्यञ्च नीयतां देवा आयामि च गणैः सह॥ १२
निःसृते च तदा तस्मिन् देवो गर्त्तमुपाश्रितः।
दैत्यश्च देवताश्चैव युद्धं चक्रुः सुदारुणम्॥ १३
देवैश्च पीड़ितः सोऽपि यावद्गर्त्तमुपागतः।
तावच्छूलेन स प्रोतः शिवेन परमात्मना॥ १४
तत्रत्यश्च तदा शम्भुं ध्यात्वा सम्प्रार्थयत् तदा।
अन्तकाले च त्वां दृष्ट्वा त्वद्दशो भवति क्षणात्॥ १५
इत्येवं संस्तुतः सोऽपि प्रसन्नः शङ्करस्तदा।
उवाच वचनं तत्र वरं ब्रूहि ददामि ते॥ १६
इत्येवं वचनं श्रुत्वा स दैत्यः पुनरब्रवीत्।
यदि प्रसन्नो देवेश भक्तिं देहि शुभां तव॥ १७
इदानीन्तु वरो लब्धः परजन्मनि तत् तथा।
इत्युक्त्वा तु तदा दैत्यं गर्त्ते चैवाक्षिपत् तदा॥ १८
सोऽपि शम्भुः स्वयं तत्र संस्थितो लोककाम्यया।
दैत्याश्चैव तदा सर्व्वे हतास्तत्क्षणमात्रतः॥ १९
जगत् स्वास्थ्यं तदा लेभे देवानां परमं सुखम्।
स्वं स्वं कार्य्यं तदा सर्व्वे चक्रुर्वै देवताः पुनः॥ २०
तत्रेश्वरश्च सन्तस्थौ पूज्यश्चैवान्धकेश्वरः।
लोकानामुपकारार्थं स्थितः शम्भुः स्वयं तदा॥ २१
अन्धकेशञ्च यो नित्यं पूजयेत् परमेश्वरम्।
षण्मासाज्जायते तस्य मनसोऽभीष्टमेव च॥ २२
नित्यञ्च पूजयेद्यो वै शिवं लोकभयापहम्।
न दुःखी जायते सोऽपि सुखञ्चैवातुलं लभेत्॥ २३
परद्रव्याभिलाषेण शिवमाराधयेन्न तु।
वृत्त्यर्थं पूजयेद्देवं लोकस्य हितकारकः॥ २४
षण्मासं यो द्विजश्चैव स वै देवलकः स्मृतः।
यथा देवलकश्चैव तथासौ वै भवेदिह॥ २५
देवलकस्य यः प्रोक्तो नाधिकारे द्विजस्य च।
इत्येवं वचनं श्रुत्वा ऋषयश्च वचोऽब्रुवन्॥ २६

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
अन्धकेश्वरमाहात्म्यं नाम त्रिचत्वा-
रिंशोऽध्यायः॥ ४३॥

चतुश्चत्वारिंशोऽध्यायः।

ऋषय ऊचुः।

देवलकश्च यः प्रोक्तः किं कार्य्यं तस्य विद्यते।

सूत उवाच।

दधीचिर्नाम विप्रो वै धर्म्मिष्ठो वेदपारगः॥
शिवभक्तिरतो नित्यं शिवशास्त्रपरायणः।
यज्ञादिकर्म्मकर्त्ता च नित्यनैमित्तकारकः॥
तस्य पुत्रस्तथा ह्यासीन्नाम्ना सुदर्शनः स्मृतः।
तस्य भार्य्या च दुष्कल्या नाम्ना दुष्टकुलोद्भवा।
तद्वशे स च भर्त्तासीत् तस्याः पुत्त्रचतुष्टयम्।
सोऽपि नित्यं शिवस्यैव पूजाञ्चैव करोत्यसौ॥
दधीचिस्तु यथापूर्व्वमृषयो ब्रह्मणः सुतः।
तथा च शिवपूजायां नित्यकर्म्मपरायणः॥
यथा कर्म्मप्रवक्ता च तथा कर्त्ता च कारकः।
एवं जाते तदा काले तस्यैव ऋषिसत्तमाः॥
विपरीतं तदा तस्य दैवाच्चैवाभवत् तदा।
यज्जातं श्रूयतां श्रेष्ठाः कथयामि यथाश्रुतम्।
दधीचिस्तु तदा ह्यासीद्ग्रामान्तरमथापि ह।
ज्ञातिसंयोगतश्चैव ज्ञातिभिर्न स मोचितः॥
कथयित्वा च पुत्त्रं स शिवभक्तिपरो भव।
इत्युक्त्वा तु गतः सोऽपि पुत्त्रश्चापि तथा करो
एवञ्च शिवरात्रिश्च ह्यागता ऋषिसत्तमाः।
तस्यामुपोषिताः सर्व्वे स्वयं संयोगतस्तदा॥
पूजां कृत्वा ततः सोऽपि सुदर्शन इति श्रुतः।
तदा रात्रौ च स्त्रीसङ्गं कृत्वा पुनरिहागतः॥
न स्नातश्च तदा तेन कृता पूजा महात्मनः।
पश्चात् स च तदा प्रातर्जड़त्वं प्राप्तवान् क्षणा
शिवरात्र्यां त्वया दुष्ट सेवनञ्च स्त्रियाः कृतम्।
अस्नातश्च मदीयां त्वं पूजाञ्च कृतवांस्तदा॥
ज्ञात्वा चैवं कृतं यस्मात् तस्मात् त्वं जड़तां
मा स्पृश त्वञ्च पापिष्ठ दर्शनं दूरतः कुरु॥
इत्युक्तस्तु तथा जातो यथोक्तं शङ्करेण च।
द्विजोऽपि स समायातो वृत्तान्तं श्रुतवांस्तदा।
दुःखितस्तु तदा सोऽपि शिवेन परिभर्त्सितः।
हा हतोऽस्मीति दुःखेन कुपुत्त्रेण कुलं हतम्

ास्मिन् समये तस्य भार्य्या सुदर्शनस्य च ।
ना ययाच पतितः सोऽत्यन्तं दुःखमागतः ॥ १७
ता च दुःखितः सोऽपि शिवेन परिभर्त्सितः ।
न्तोष्य च शिवं सोऽपि शिवपूजां तदाकरोत् ॥ १८
त्रोऽपि च तदा भार्य्यां पुंश्चलीं कृतवांस्तदा ।
त्रापि गिरिजा तत्र पूजिता पुत्रहेतवे ॥ १९
सन्ना सा तदा देवी पुत्रमङ्गीचकार ह ।
दर्शनोऽपि गिरिजां पूजयामास च स्वयम् ॥ २०
ण्डीं पूजनमार्गेण प्रसन्नामकरोत् तदा ।
दर्शनञ्च पुत्रत्वे चकार गिरिजा तदा ॥ २१
वं प्रसादयामास पुत्रार्थं चण्डिका स्वयम् ।
त्वा कृत्वा पुनश्चण्डी प्रसन्नं वृषभध्वजम् ॥ २२
मस्कृत्य शिवं तत्र ह्युत्सङ्गे संन्यवेशयत् ।
तस्नानं तदा चक्रे पुत्रस्य गिरिजा स्वयम् ॥ २३
दात्तोपवीतञ्च ग्रन्थिनैकेन संयुतम् ।
पदिश्य शिवगायत्रीं षोड़शाक्षरसंयुताम् ॥ २४
ओं नमः शिवायेव श्रीशब्दपूर्व्वकाय च ।
ारान् षोड़श सङ्कल्प्य पूजां कुर्य्यादयं वटुः ॥ २५
मलादिनमस्कारान्तं पूजयेद्वृषभध्वजम् ।
न्त्र-वादित्र-पूजाभिः सन्निधावृषिणां तदा ॥ २६
ाममन्त्राननेकांश्च पाठयामास वै तदा ।
न्निमित्तञ्च यत् किञ्चित् तत् सर्व्वन्तु तथैव च ॥२७
ान्यं फलञ्च वस्त्रञ्च घृतं तैलं भवेच्च यत् ।
त् तत् सर्व्वं त्वया ग्राह्यं न दोषाय भवेत् पुनः ॥२८
मम कृत्ये भवान् मुख्यो देवीकृत्ये विशेषतः ।
ाजापत्यं भवेद्यर्हि तर्ह्येकोऽपि भवान् भवेत् ॥ २९
यदि भवान् न पूज्येत तत् सर्व्वं निष्फलं भवेत् ।
दा पूजा च सम्पूर्णा यदास्तु च भवान् वदेत् ॥ ३०
वत्वारो वटुकास्तस्य सुदर्शनमहात्मनः ।
अभिषिक्ताश्च ते दिक्षु शिवेन परमात्मना ॥ ३१
तिलकं वर्त्तुलं कार्य्यं स्नानं कार्य्यं सदा शुभैः ।
शिवसन्ध्या च कर्त्तव्या गायत्री च तदीयका ॥ ३२
मत्सेवाञ्चैव कृत्वा तु कार्य्यमन्यत् कुलोचितम् ।
वेदमन्त्रो न वाच्यो वै मन्त्राश्च भवदीयकाः ॥ ३३
चण्डी चैवाथ चण्डश्च पुत्रं स्थाप्य सुदर्शनम् ।
तत्पुत्रान् प्रेरयामास वरान् दत्त्वा ह्यनेकशः ॥ ३४

उभयोर्व्यूहयोर्यत्र वटुको वै भवेन्मम ।
तत्र स्याद्विजयो नित्यं नात्र कार्य्या विचारणा ॥३५
भवान् वै पूजितो येन तेनाहञ्च प्रपूजितः ।
एवं वरं तदा दत्त्वा वेदब्रह्मविवर्ज्जितम् ॥ ३६
कर्त्तव्यञ्च भवद्भिश्च स्वीयं कर्म्म सदा च यत् ।
शिवाभ्यां स्थापितायस्मात् तस्मात् ते वटुकाःस्मृताः३७
तपोभ्रष्टा यतो जातास्तस्मात् तपोधमा मताः ।
शिवयोः कृपया सर्व्वे विस्तारं बहुधा गताः ॥ ३८
तेषाञ्च प्रथमा पूजा ततः पूजा महात्मनः ।
तेन यावत् कृता नैव पूजा च शङ्करस्य च ॥ ३९
तावत् पूजा न कर्त्तव्या शिवस्य वचनादिह ।
शुभं वाप्यशुभं वापि वटुकं न परित्यजेत् ॥ ४०
प्राजापत्ये च भोज्ये च वटुरेको विशिष्यते ।
शिवयोश्च तथा कार्य्ये विशेषो दृश्यते लिह ॥ ४१
तस्यैव नगरे राज्ञो भद्रस्य नित्यभोजने ।
नियमे प्राजापत्यस्य ह्यन्धकेशसमीपतः ॥ ४२
यज्जातं श्रूयतां तच्च कथयामि यथाश्रुतम् ।
ध्वज एकश्च राज्ञो वै दत्तश्च शङ्करेण च ॥ ४३
प्रातश्च बध्यतां राजन् राज्ञौ चैव पतिष्यति ।
मम कृत्ये च सम्पूर्णे प्राजापत्ये तथा पुनः ॥ ४४
अन्यथा चेत् तदा तत्र रात्रावेव स्थिरो भवेत् ।
इति नियमस्तस्यासीच्छिवपूजाविधानतः ॥ ४५
प्राजापत्यं ततश्चैव कर्त्तव्यञ्च दिने दिने ।
प्रातर्ध्वजो निबध्येत स्वयञ्चैव (क) पतेदिति ॥ ४६
यदि कार्य्यञ्च सम्पूर्णं जातञ्चैव भवेदिह ।
अन्यथा न पतत्येव तथैव तिष्ठति ध्रुवम् ॥ ४७
एकस्मिन् समये चात्र वटोः कार्य्यं तथा ह्यभूत् ।
राज्ञा च भोजयित्वा तु प्रेषितो वटुरेव च ॥ ४८
अभोजितेषु विप्रेषु ध्वजश्च पतितो ह्यभूत् ।
दृष्ट्वा तच्च तदा तत्र पृष्टं राज्ञा कथं ध्वजः ॥ ४९
पतितो ब्राह्मणा ह्यत्र भुञ्जते नोत्थिता इति ।
कथं निपतितश्चात्र ब्राह्मणाः सत्यवादिनः ॥ ५०
ते पृष्टाश्च तदा प्रोचुर्वटुको भोजितः पुरा ।
चण्डीपुत्रः शिवस्यैव तस्माच्च पतितो ध्वजः ॥ ५१
एवञ्च महिमा तेषां वर्द्धितः शङ्करेण च ।

(क) सायञ्चैवेति पाठान्तरम्।

तस्माच्च वटुकाः श्रेष्ठाः पुराविद्भिः प्रकीर्त्तिताः ॥ ५२
शिवपूजा तु तैः पूर्व्वं कर्त्तव्या सर्व्वतः शुभा।
उत्तारणञ्च पूजायाः पूजा पूर्णा भवत्विति ॥ ५३
एतावदेव तेषान्तु कार्य्यं नान्यत् तथैव च।
एतत् सर्व्वं समाख्यातं यत् पृष्टञ्च मुनीश्वराः।
यच्छ्रुत्वा शिवपूजायाः फलन्तु लभते नरः ॥ ५४

इति श्रीशैवे महापुराणे ज्ञान-
संहितायां शिवमाहात्म्ये चतुश्चत्वा-
रिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः।

ऋषय ऊचुः।

ज्योतिषाञ्चैव लिङ्गानां माहात्म्यं कथयाधुना।
उत्पत्तिञ्च तथा तेषां ब्रूहि सर्व्वं यथाश्रुतम् ॥ १

सूत उवाच।

अहं सर्व्वं प्रवक्ष्यामि यथाबुद्धि यथाश्रुतम्।
एतेषाञ्चैव माहात्म्यं वक्तुं वर्षशतैरपि ॥ २
शक्यते न मुनिश्रेष्ठास्तथापि कथयामि वः।
सप्तविंशतिकन्याश्च दक्षस्य च महात्मनः ॥ ३
तेन चन्द्रमसे दत्ता अश्विन्याद्या मुनीश्वराः।
चन्द्रञ्च स्वामिनं प्राप्य शोभमाना विशेषतः ॥ ४
चन्द्रमा अपि ताः प्राप्य शोभते स्म निरन्तरम्।
हेम्ना चैव मणिर्भाति मणिना हेम एव च ॥ ५
एवञ्च समये तस्य यज्जातं श्रूयतामिति।
सर्व्वास्वपि च पत्नीषु एका प्रियतमा यथा ॥ ६
रोहिणी नाम या प्रोक्ता तथान्या न कदाचन।
अन्याश्च दुःखमापन्नाः पितरं शरणं ययुः ॥ ७
तदा तस्मै च यद्दुःखं ताभिर्निवेदितं तथा।
दक्षोऽपि च तथा श्रुत्वा दुःखञ्च प्राप्तवांस्तदा ॥ ८
समागत्य तदा दक्षश्चन्द्रं विज्ञापयत् तदा।
विमले च कुले लब्ध समुत्पन्नः कलानिधिः ॥ ९
आश्रितेषु च सर्व्वेषु न्यूनाधिक्यं कथं तव।
न कर्त्तव्यं त्वया तासु न्यूनाधिक्यं तथा पुनः ॥ १०
दक्षश्चैवञ्च समार्थ्य चन्द्रं जामातरं स्वयम्।
जगाम मन्दिरं स्वीयं निश्चयं परमं गतः ॥ ११

चन्द्रोऽपि वचनं तस्य न चकार विमोहितः।
भावि शुभं यदा यस्य तस्य भावि शुभं तदा।
यदा न जायते भावि कथं तस्य शुभं भवेत्।
चन्द्रोऽपि बलवद्भावि तदा मेने न तद्वचः ॥ १३
रोहिण्याञ्च समासक्तो नान्यां मेने कदाचन।
दक्षोऽपि पुनरागत्य स्वयं दुःखसमन्वितः ॥
श्रूयतान्तु मया पूर्व्वं प्रार्थितो बहुधा तथा।
न मानितं त्वया यस्मात् तस्मात् त्वञ्च क्षयी
इत्युक्ते चैव चन्द्रोऽपि क्षयी जातः क्षणादि
किं कर्त्तव्यं क्व गन्तव्यं दुःखितस्तत्क्षणादि
हाहाकारस्तदा ह्यासीच्चन्द्रे च क्षीणतां
देवाश्च दुःखिताः सर्व्वे ऋषयश्च पुरातनाः ॥
गन्धर्व्वाप्सरसश्चैव किं कार्य्यं हा कथं भवेत्।
इति दुःखं समापन्ना देवा इन्द्रादयस्तदा ॥
विज्ञापिताश्च चन्द्रेण ब्रह्माणं शरणं ययुः।
गत्वा ते तु तदा प्रोचुस्ते देवाश्च तदा पुनः॥
वृत्तान्तञ्च तदीयं वै ब्रह्मणे तं न्यवेदयन्।
ब्रह्मापि तद्वचः श्रुत्वा अहो दुष्टं कथं कृतम्।
चन्द्रस्तु सर्व्वदा दुष्टो दक्षश्च कृतवान् कथम्।
पूर्व्वं दुष्टेन दुष्टञ्च कृतं बहुतरं पुनः ॥ २१
श्रूयतामृषयः श्रेष्ठाश्चन्द्रकृत्यं पुरातनम्।
बृहस्पतेर्गृहे गत्वा तारा दुष्टेन वै हृता ॥
हृत्वा तारां पुनश्चैव युद्धाय समुपस्थितः।
समाश्रित्य तदा दैत्यान् स्पर्द्धां देवैश्चकार ह
मया चैवात्रिणा चैव निषिद्धस्तारकां ददौ।
ताञ्च गर्भवतीं सोऽपि न ग्रहीष्यामीति तद्वचः॥
अस्माभिर्वारितः सोऽपि जग्राह तारकां तदा
यदि गर्भं जहातीह तदैनाञ्चाग्रहीत् पुनः॥
गर्भं मया पुनस्तत्र त्याजिते ऋषिसत्तमाः।
कस्यायञ्च पुनर्गर्भः सोमस्येति वचः पुनः ॥
पश्चात् तेन गृहीता सा मया च वारितेन च
एवंविधानि चन्द्रस्य चरित्राण्यप्यनेकशः ॥
वर्ण्यन्ते किं पुनस्तानि इदानीं क्रियते कथम्।
यज्जातं तत् तु तज्जातं नान्यथा भवति ध्रुवम्।
अतः परं शुभे क्षेत्रे मृत्युञ्जयविधानतः।
शिवमाराधयेत् तत्र देवेशञ्च प्रभानिधिम्॥

ङ्करं लोककर्त्तारं भजेच्चन्द्रः प्रभासके।
सन्नश्च शिवः पश्चाद्दक्षयञ्च करिष्यति॥ ३०
ति श्रुत्वा वचस्तस्माद्ब्रह्मणः परमात्मनः।
न्द्राद्या देवताः सर्व्वा ऋषयश्च पुरातनाः॥ ३१
हीत्वा च तथा चन्द्रं दक्षञ्चाश्वास्य वै तदा।
ासे च ततो गत्वा गर्त्तं चक्रुस्तथा पुनः॥ ३२
वाच्च तीर्थवर्य्याणि सरस्वत्यामतः परम्।
र्थिवेन तदा पूजा मृत्युञ्जयविधानतः॥ ३३
देवाश्च तदा सर्व्वे ऋषयो निर्म्मलाशयाः।
ाप्य चन्द्रं प्रभासे च स्वं स्वं धाम ययुर्मुदा॥ ३४
द्रेण च तपस्तप्तं षण्मासञ्च निरन्तरम्।
ञ्जुञ्जयेन मन्त्रेण पूजितो वृषभध्वजः॥ ३५
ङ्कोव्या च मन्त्रैर्वै समावृत्य स्वयं प्रभुः।
न्नो भगवान् देवः शङ्करो लोकशङ्करः॥ ३६
, वृणीष्व भद्रं वै मनसो यत् समीप्सितम्।

चन्द्र उवाच।

दि प्रसन्नो देवेश किमसाध्यं भवेन्मम॥ ३७
थापि मे शरीरस्य क्षयं वारय शङ्कर।
न्तव्यो मेऽपराधश्च कल्याणं क्रियतां त्वया॥ ३८
युक्तो च तदा तेन शिवो वचनमब्रवीत्।

शिव उवाच।

े च क्षीयते चन्द्र कला ते च दिने दिने। ३९
ाश्च वर्द्धतां पक्षे ताः कलाश्च निरन्तरम्।
ं सति तदा देवा हर्षनिर्भरमानसाः॥ ४०
षयश्च तदा सर्व्वे समाजग्मुः परस्परम्।
गत्य च तदा सर्व्वे चन्द्रे चाशिषमावहन्॥ ४१
वञ्चैव तु सम्प्रार्थ्य स्वामिंस्त्वं हि स्थिरो भव।
नया सहितः शम्भुश्चन्द्रेण संस्तुतः पुरा॥ ४२
राकारश्च साकारः पुनश्चैवाभवत् पुरा।
नश्चैव देवानां क्षेत्रमप्यन्नहेतवे॥ ४३
द्रस्य यशसे तत्र नाम्ना चन्द्रस्य वै स्वयम्।
मेश्वरश्च नामासीद्विख्यातं भुवनत्रये॥ ४४
योऽयं कृतकृत्योऽयं यन्नाम्ना शङ्करः स्वयम्।
यतश्च जगतां नाथः पावयन् जगतीतलम्॥ ४५
कुण्डञ्चैव तैस्तत्र सर्व्वश्चैव प्रतिष्ठितम्।
वेन ब्रह्मणा तत्र ह्यभिव्यक्तान्तु तत् पुनः॥ ४६

चन्द्रकुण्डं प्रसिद्धञ्च पृथिव्यां पापनाशनम्।
तत्र स्नाति नरो यस्तु सर्व्वपापैः प्रमुच्यते॥ ४७
रोगाश्चैव क्षयं यान्ति ह्यसाध्या ये भवन्ति हि।
ते च सर्व्वे क्षयं यान्ति षण्मासं स्नपनादिह॥ ४८
कुष्ठी च जायते शुद्धः प्रायश्चित्ते कृते सति।
प्रभासञ्च परिक्रम्य पृथिवीसम्भवं फलम्॥ ४९
यद्यत् फलं समुद्दिश्य करोति तीर्थमुत्तमम्।
तत् तत् फलमवाप्नोति सर्व्वथा नात्र संशयः॥ ५०
इति ते ऋषयो देवाः फलं दृष्ट्वा तथाविधम्।
चन्द्रञ्चैव गृहीत्वा च नमस्कृत्य शिवं मुदा॥ ५१
परिक्रम्य च तत् तीर्थं ययुस्ते च प्रशंसयन्।
चन्द्रश्चापि स्वकीयञ्च कार्य्यं चक्रे पुरातनम्॥ ५२
इति सर्व्वं समाख्यातं सोमेशस्य कथानकम्।
एवं सोमेश्वरं लिङ्गं समुत्पन्नं मुनीश्वराः॥ ५३
यः शृणोति तदुत्पत्तिं स च पापैः प्रमुच्यते।
अतः परं प्रवक्ष्यामि मल्लिकार्ज्जुनसम्भवम्॥ ५४
पूर्व्वञ्च कथितं यच्च तदयं कथयाम्यहम्।
कुमारस्य वियोगेन माता च गिरिजा यदा॥ ५५
दुःखितासीत् तदा शम्भुस्तामुवाच कथं प्रिये।
आयाति पुत्रकस्ते च त्यज्यतां दुःखमुल्कटम्॥५६
सा यदा च न तन्मेने प्रेषिता देवतास्तदा।
ऋषयश्चैव गन्धर्व्वा अप्सरसो मुदान्विताः॥ ५७
ते सर्व्वे च समाजग्मुः कुमारस्यास्य हेतवे।
विज्ञाप्य बहुधा ह्येनं परावृत्य पुनर्गताः॥ ५८
तदा च गिरिजा देवी विरहं पुत्रसम्भवम्।
शम्भुश्च परमं दुःखं प्राप्य चाशु स्वपुत्रकम्॥ ५९
पुत्रश्चापि ततो दूरं योजनत्रयमेव च।
गतश्च दूरतस्तस्मात् क्रौञ्चे च पर्व्वते शुभे॥ ६०
तौ च तत्र समासीनौ ज्योतीरूपं समाश्रितौ।
तद्दिनं च समारभ्य मल्लिकार्ज्जुनसंज्ञितम्॥ ६१
लिङ्गञ्चैव शिवस्यैव सिद्धञ्च भुवनत्रये।
आसीत् तत्र महान् देवो ज्योतीरूपः सनातनः॥६२
तल्लिङ्गञ्च तथा दृष्ट्वा सर्व्वपापैः प्रमुच्यते।
दुःखञ्च दूरतो याति सुखमात्यन्तिकं लभेत्॥ ६३
जननीगर्भसम्भूतं फलमाप्नोति वै पुनः।
धनं धान्यं समुद्दिश्य प्रतिष्ठारोग्यमेव च॥ ६४

अभोष्टं सकलं तस्य जायते नात्र संशयः।
द्वितीयं ज्योतीरूपञ्च कथितं लोकहेतवे ॥ ६५

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

——

षट्चत्वारिंशोऽध्यायः।

ऋषय ऊचुः।

सूत सर्व्वं विजानासि वस्तु व्यासप्रसादतः॥
ज्योतिषाञ्च कथां श्रुत्वा तृप्तिर्नैव विजायते ॥ १
तस्मात् त्वया विशेषेण तदेव कथ्यतां पुनः।

सूत उवाच।

धन्योऽहं कृतकृत्योऽहं श्रीमतां सङ्गयोगतः ॥ २
श्रूयतां कथयिष्यामि कथां पापप्रणाशिनीम्।
अवन्ती नगरी रम्या मुक्तिदा सर्व्वदेहिनाम् ॥ ३
शिप्रा चैव महापुण्या वर्त्तते लोकपावनी।
तत्रासीद्ब्राह्मणश्रेष्ठः सर्व्वकर्म्मपरायणः ॥ ४
वेदाध्ययनकर्त्ता च वेदकर्म्मरतः सदा।
अग्न्याधानसमायुक्तः शिवपूजारतः सदा ॥ ५
पार्थिवीं प्रत्यहं मूर्त्तिं पूजयामास वै द्विजः।
सर्व्वकर्म्मफलं प्राप्य वेदप्रियद्विजस्तदा ॥ ६
सतां गतिं समालेभे सम्यग्ज्ञानपरायणः।
तत्पुत्रास्तादृशा ह्यासंश्चत्वार ऋषिसत्तमाः ॥ ७
देवप्रियश्च श्रेष्ठो वै प्रियमेधस्ततः परः।
तृतीयः सुव्रतो नाम धर्म्मवादी च सुव्रतः ॥ ८
ते धर्म्मधारका ह्यासन् शिवपूजापरायणाः।
पितुरनवमा नित्यं धर्म्माश्रयास्तथा शुभाः ॥ ९
तेषां पुण्यप्रतापाच्च पृथिव्यां सुखमैधत।
शुक्लपक्षे यथा चन्द्रो वर्द्धते च निरन्तरम् ॥ १०
तथा तेषां गुणास्तत्र वर्द्धन्ते स्म सुखावहाः।
ब्रह्मतेजोमयी सा वै नगरी याभवत् तदा ॥ ११
एतस्मिन्नन्तरे तत्र यज्जातं श्रूयतां पुनः।
पर्व्वते रत्नमाले च दूषणो वै महासुरः ॥ १२
बलवान् दैत्यराजश्च धर्म्मद्वेषी निरन्तरम्।
ब्रह्मणो वरदानाच्च जगत् तुच्छीकरोति च ॥ १३
पृथिव्यां वेदधर्म्माश्च स्मृतिधर्म्माश्च सर्व्वशः।
स्फोटितास्तेन दुष्टेन सिंहेन च मृगा इव ॥
यावन्तो वेदधर्म्माश्च तावन्तो दूरतः कृताः।
तीर्थं तीर्थं तदा क्षेत्रे अरण्ये चैव ये पुनः।
ते सर्व्वे दूरतो नीतास्तेनैकेन दुरात्मना।
न दृष्टः क्वापि धर्म्मो वै वेदसम्भव एव च॥
अवन्ती नगरी रम्या तत्राहस्थत वै पुनः।
इति विचार्य्य तेनेह यत् कृतं श्रूयतामतः॥
बहुसैन्यसमायुक्तो ब्राह्मणान् समुपाययौ।
किमेते ब्राह्मणाः पृष्टा न कुर्व्वन्ति वचो मम
सर्व्वे देवा मया लोके राजानश्च वशीकृताः
वशे किं ब्राह्मणाः शक्या न जेतुं दैत्यसत्तम
यदि जीवितुमिच्छा स्यात् तदा धर्म्मं शिवस्
देवानाञ्चैव धर्म्मञ्च त्यक्त्वा सुखविभागिनः॥
अन्यथा जीवने वासे संशयश्च भविष्यति।
इति निश्चित्य ते दैत्याश्चत्वारो वै महाबलाः
चतुर्द्दिक्षु तथा याताः प्रलये च यथा पुरः।
ते ब्राह्मणास्तथा श्रुत्वा वचनं रक्षसाञ्च हि
न दुःखं लेभिरे तत्र शिवध्यानपरायणाः।
धैर्य्यं समाश्रितास्ते च रेखामात्रं ततो द्विजाः
न चेलुः परमाज्ञानाद्दराकाः के शिवाग्रतः
एतस्मिन्नन्तरे तैस्तु व्याप्ता सा नगरी शुभा
लोकाश्च पीड़ितास्तेन ब्राह्मणान् समुपाययु
स्वामिनः किञ्च कर्त्तव्यं दुष्टाश्च समुपागताः॥
हिंसिता बहवो लोका आगताश्च समीपतः।
तेषाञ्च वचनं श्रुत्वा ह्यूचुस्ते ब्राह्मणाः परा
श्रूयतां विद्यते नैव बलं परभयावहम्।
न शस्त्राणि तथा सन्ति यैश्चैते विमुखाः पुनः
सामान्यस्यापि मानो वै आश्रयस्य भवेद्दि
किं पुनश्च समर्थस्य शिवस्यैव भवेन्न हि ॥
शिवो रक्षां करोत्वद्य नान्यथा शरणं शिवं
इति स्थैर्य्यं समास्थाय पूजान्तु पार्थिवस्य
कृत्वा चेतस्तथा सम्यक् स्थिता ध्यानपराय
प्राणायामपरास्ते च कुम्भ-पूरक-रेचकैः॥
दृष्ट्वा दैत्येन तावत्त हन्यतां बध्यतामिति।
तच्छ्रुतञ्च तदा नैव ध्यानमार्गपरायणैः॥
तावच्च पार्थिवे स्थाने गर्त्तमासीत् सशब्द

हाकालः समुत्पन्नो दृष्ट्वा तां तादृशीं गतिम् ॥३२
ा यान्तु ब्राह्मणानां हि समीपं दूरतो व्रज ।
त्युक्त्वा हुङ्कृतेनैव भस्मसात् कृतवांस्तदा ॥ ३३
क्रयत् सैन्यं हतं तेन किञ्चित् सैन्यं पलायितम् ।
षणश्च हतं तेन शिवेन परमात्मना ॥ ३४
र्यं दृष्ट्वा यथा याति तमश्च संचयं पुनः ।
थैव च शिवं दृष्ट्वा सैन्यं नाशमुपागमत् ॥ ३५
वदुन्दुभयो नेदुः पुष्पवृष्टिः पपात ह ।
ाह्मणांश्च समाश्वास्य प्रसन्नो हि शिवः स्वयम्॥३६
ऽपि देवं शिवं प्रोचुर्मुक्तिं देव प्रयच्छ नः ।
त्रैव लोकरक्षार्थं स्थातव्यं हि शिव त्वया ॥ ३७
त्युक्तस्तु शिवस्तत्र तस्थौ गर्त्ते सुशोभने ।
क्तानाञ्चैव रक्षार्थं दत्त्वा मुक्तिं द्विजांस्तदा ॥ ३८
ज्ञास्ते मुक्तिमापन्नाश्चतुर्दिक्षु शिवादनु ।
ोममात्रं तदा जाता लिङ्गरूपिण एव च ॥ ३९
हाकालेश्वरो नाम ख्यातश्च भुवनत्रये ।
दृष्ट्वा दुःखकं स्वप्ने नायाति ऋषिसत्तमाः ॥ ४०
यं काममपेक्ष्यैव सेवते तत् फलं लभेत् ।
तत् सर्व्वं समाख्यातं श्रूयतां परमं वचः ॥ ४१
ोङ्कारश्च यथा ह्यासीत् तथा च श्रूयतां पुनः ।
स्मिंश्च समये चात्र नारदो भगवांस्तदा ॥ ४२
ोकर्णाख्यं शिवं गत्वा आगतो विन्ध्यके स्वयम् ।
त्रैव पूजितस्तेन बहुमानपुरःसरम् ॥ ४३
यि सर्व्वञ्च विद्येत न न्यूनं हि कदाचन ।
ति मानं तदा श्रुत्वा नारदो मानहा तदा ॥ ४४
निश्वस्य संस्थितस्तत्र श्रुत्वा विन्ध्योऽब्रवीदिदम् ।
किं न्यूनञ्च त्वया दृष्टं मयि निश्वासकारणम् ॥ ४५
च्छ्रुत्वा नारदो वाक्यमुवाच श्रूयतां पुनः ।
यि तु विद्यते सर्व्वं मेरुरुच्चतरः पुनः ॥ ४६
विष्वपि विभागोऽस्य न तवास्ति कदाचन ।
त्युक्त्वा नारदस्तत्र जगाम च यथागतम् ॥ ४७
न्ध्यश्च परितप्तो वै धिगेव जीवितादिकम् ।
श्वेश्वरं तथा शम्भुमाराध्य च जयाम्यमुम् ॥ ४८
ति निश्चित्य तत्रैव ओङ्कारयन्त्रके स्वयम् ।
त्वा चैव पुनस्तत्र पार्थिवीं शिवमूर्त्तिकाम् ॥ ४९
ाराध्य च तदा शम्भुं षण्मासञ्च निरन्तरम् ।
न चचाल तदा स्थानाच्छिवध्यानपरायणः ॥ ५०
तस्मै च दर्शयामास दुर्लभं योगिनामपि ।
रूपं यथोक्तं वेदेषु भक्तानामीप्सितञ्च यत् ॥ ५१
प्रसन्नश्च तदा शम्भुर्ब्रूहि त्वञ्च ममेप्सितम् ।

विन्ध्य उवाच ।

यदि प्रसन्नो देवेश बुद्धिं देहि यथेप्सितम् ॥ ५२
किं करोमि यदेतेन व्रियते दीयते मया ।
न युक्तं परदुःखाय वरदानं मयाशुभम् ॥ ५३
तथापि दत्तवांस्तत्र यथेच्छसि तथा कुरु ।
एवञ्च समये देवा ऋषयश्च तथामलाः ॥ ५४
सम्पूज्य शङ्करं तत्र स्थातव्यमिति चाब्रुवन् ।
तथैव कृतवान् देवो लोकानां सुखहेतवे ॥ ५५
ओङ्कारे चैव यन्त्रे वै लिङ्गमेकं तथा पुनः ।
पार्थिवे च तथा रूपे लिङ्गमेकं तथा पुनः ॥ ५६
एवं द्वयं समुत्पन्नं लिङ्गमेकं द्विधाकृतम् ।
प्रणवे चोङ्कारश्च नामासीत् स सदाशिवः ॥ ५७
पार्थिवे चैव यज्जातं तदासीदमरेश्वरः ।
सम्पूज्य च तदा देवाः सन्तुष्य वृषभध्वजम् ॥ ५८
वरान् दत्त्वा ह्यनेकांश्च ऋषयो देवतास्तदा ।
य एनं पूजयेद्देवं न गर्भे वसते नरः ॥ ५९
यदभीष्टं फलं तच्च प्राप्नुयान्नात्र संशयः ।
इत्युक्त्वा च तदा देवा ह्यन्तर्द्धानं गता हि ते ॥ ६०
एतत् ते हि समाख्यातमोङ्कारसम्भवं फलम् ।
अतः परं प्रवक्ष्यामि केदारं पापनाशनम् ॥ ६१

इति श्रीशैवे महापुराणे ज्योतिर्लिङ्गोत्पत्ति-
वर्णनं नाम षट्चत्वारिंशोऽध्यायः ॥४६॥

सप्तचत्वारिंशोऽध्यायः ।

सूत उवाच ।

ब्रह्मणश्चैव सम्भूतो मनुः स्वायम्भुवः पुरा ।
तत्पुत्रश्च महातेजा नाम्ना प्रियव्रतस्तदा ॥ १
तस्यासन् पुत्रकाः सप्त पुत्रार्थी च स्वयं तदा ।
रथञ्च भ्रामयामास मेरोरनु पुनः पुनः ॥ २
सप्तप्रक्रमणं कृत्वा सप्त द्वीपानकल्पयत् ।
द्वीपसंख्यास्तदा जाताः समुद्राः सप्त एव च ॥ ३

सप्तानामपि पुत्त्राणां द्वीपमेकमदात् पुनः।
प्रत्येकञ्च तदा दत्तं राज्ञा तेन महात्मना ॥ ४
लब्ध्वा गतिर्मुनीनाञ्च विस्ताय्य वंशमुत्तमम्।
अग्नीध्रश्चैव तत्पुत्त्रो ज्येष्ठः प्रियव्रतस्य ह ॥ ५
जम्बूद्वीपे तदा तेन कृतं राज्यं यथासुखम्।
तत्पुत्त्रस्तु तदा नाभिर्नाम्ना लोकसुखावहः ॥ ६
तेन चापि तथा राज्यं पितृवत् परिपालितम्।
तस्य पुत्त्रास्तथा जाता ऋषभाद्या मुनीश्वराः ॥ ७
तस्य पुत्त्रशतं ह्यासीदृषभस्य महात्मनः।
सर्व्वेषाञ्चैव पुत्त्राणां ज्येष्ठो भरत एव च ॥ ८
नव योगीन्द्रतां प्राप्ता वीतरागास्तथाभवन्।
जनकस्य च विज्ञानं तैर्दत्तं सुमहात्मभिः ॥ ९
एकाशीतिस्तदा जाताः कर्म्ममार्गपरायणाः।
क्षत्रियाणां यथा कर्म्म कृत्वा मोक्षपरायणाः ॥ १०
ऋषभस्योर्व्वरितानां हिताय ऋषिसत्तमाः।
खण्डानि कल्पयामास नव नव हिताय च ॥ ११
तत्रापि भरतं ज्येष्ठं खण्डेऽस्मिन् स्वदत्तीयके।
तन्नाम्ना चैव विख्यातं खण्डञ्च भारतं तदा ॥ १२
सर्व्वेष्वपि च खण्डेषु श्रेष्ठं भारतमुच्यते।
अमरा जन्म इच्छन्ति सर्व्वकर्म्मसुखावहम् ॥ १३
सर्व्वेष्वपि च खण्डेषु ह्यवतारा: प्रकीर्त्तिताः।
विष्णुना लोकरक्षार्थं खण्डे खण्डे मुनीश्वराः ॥ १४
तत्रापि भारते खण्डे वदर्य्याश्रमसंज्ञके।
नृनारायणरूपेण तिष्ठति परमेश्वरः ॥ १५
तपस्तप्यति नित्यं वै लोकानां हितकाम्यया।
तत्र केदारसंज्ञं वै शृङ्गं हिमसमुद्भवम् ॥ १६
नरो नारायणश्चैव यत्रास्ते च निरन्तरम्।
ताभ्यां सम्प्रार्थितो देवः पार्थिवे पूजनाय वै ॥ १७
आयाति च ऋषिश्रेष्ठा भक्त्यधीनतया शिवः।
कस्मिंश्चित् समये तत्र प्रसन्नः परमेश्वरः ॥ १८
सम्यक् कृतं भवद्भ्यान्तु पूज्याभ्यां पूजितो ह्यहम्।
किं कार्य्यं विद्यते लोके भवतोस्तपसः फलम् ॥ १९
अवाप्तकामौ श्रेष्ठौ च किं कार्य्यं भवतोः पुनः।
तथापि पूजितश्चाहं प्रसन्नो व्रियतामिति ॥ २०
इत्युक्ते च तदा तेन नरो नारायणः स्वयम्।
उवाच वचनं तत्र लोकानां हितकाम्यया ॥ २१

यदि प्रसन्नो देवेश यदि देयो वरस्त्वया।
स्थीयतां स्वेन रूपेण पूजार्थं शङ्कर स्वयम् ॥
इत्युक्तास्तु तदा ताभ्यां केदारे हिमसंज्ञके।
स्वयञ्च शङ्करस्तस्थौ ज्योतीरूपी महेश्वरः ॥
ताभ्याञ्च पूजितश्चैव सर्व्वदुःखभयापहः।
लोकानामुपकारार्थं भक्तानां दर्शनाय वै ॥
स्वयं स्थितस्तदा शम्भुः केदारेश्वरसंज्ञकः।
देवाश्च पूजयन्तीह ऋषयश्च सनातनाः ॥ २५
भवस्य पूजनान्नित्यं वदर्य्याश्रमवासिनः।
पवित्रिताः सदा यो वै नाम्ना शिव उदाहृतः
तद्दिनं हि समारभ्य केदारेश्वर एव च।
पूजितो येन भक्त्या वै दुःखं स्वप्नेऽपि दुर्लभम्
तत्रत्यं वलयं यो वै दधाति हरिवल्लभः।
हरिरूपाङ्कितं तच्च हररूपसमन्वितः ॥ २८
तस्यैव रूपं दृष्ट्वा च सर्व्वपापैः प्रमुच्यते।
जीवन्मुक्तो भवेत् सो वै यो गतो वदरीवने ॥
दृष्ट्वा रूपं नरस्यैव तथा नारायणस्य च।
केदारेश्वरनाम्नश्च मुक्तिभाजी न संशयः ॥
एतद्वश्च समाख्यातं यत् पृष्टमृषिसत्तमाः।
श्रुत्वा पापं हरेत् सर्व्वं नात्र कार्य्या विचारणा
अतः परं प्रवक्ष्यामि माहात्म्यं भीमशङ्करे ॥

इति श्रीशैवे महापुराणे ज्ञानसंहितायां ज्योतिर्लिङ्गमहिमवर्णनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः।

सूत उवाच।

कामरूपेश्वरे देशे शङ्करो लोककाम्यया।
अवतीर्णः स्वयं साक्षात् कल्याणगुणभाजनः।
यदर्थमवतीर्णोऽसौ कथयामि मुनीश्वराः।
भीमो नाम महावीर्य्यो राक्षसो लोकनाशनः।
दुःखदः सर्व्वभूतानां धर्म्मनाशनतत्परः।
कुम्भकर्णात् समुत्पन्नः कर्क्कट्यां सुमहाबलः ॥
सह्ये च पर्व्वते सोऽपि मात्रा सह समन्वितः।
कुम्भकर्णे च रामेण हते लोकभयङ्करे ॥ ४

ाक्षसी पुत्त्रयुक्ता च सह्येऽतिष्ठत् स्वयं तदा।
बालो राक्षसो भीमः कर्कटीमातरं तदा ॥ ५
प्रच्छ मे पिता को वा कथञ्चैकाकिनी पुनः।
वं पृष्टा तदा तेन पुत्त्रेण राक्षसी वचः ॥ ६
वाच पुत्त्रं दुष्टा वै श्रूयतां कथयाम्यहम्।
ंता ते कुम्भकर्णश्च रावणानुज एव च ॥ ७
ामेण मारितः सोऽयं भ्राता सह महाबलः।
ागतः कदाचिद्व मद्भोगं कृतवान् पुरा ॥ ८
या न दृष्टा लङ्का वै ह्यत्रैव निवसाम्यहम्।
ाता मे कर्कटो नाम माता मे पुष्कसी मता ॥ ९
र्त्ता मे च विराधोऽभूद्रामेण च हतः पुरा।
वोः पार्श्वे स्थिताहञ्च स्वामिनि निहते सति ॥ १०
ितरौ मे मृतौ चात्र ऋषिणा भस्मसात्कृतौ।
क्षणार्थं गतौ तत्र क्रुद्धेन सुमहात्मना ॥ ११
ैक्ष्णो नाम विख्यातो तपसा दग्धकल्मषः।
नैव मारितौ पुत्त्र पितरौ मम वल्लभौ ॥ १२
काकिनी तदा जाता दुःखिता पर्व्वते पुरा।
तस्मिन् समये ह्यत्र राक्षसो रावणानुजः ॥ १३
ागत्य कृतवान् सङ्गं विहाय स गतस्तदा।
तस्त्वञ्च समुत्पन्नो महाबलपराक्रमः ॥ १४
वलम्ब्य पुनस्त्वाञ्च कालक्षेपं करोम्यहम्।
ति श्रुत्वा वचस्तस्या भीमो भीमपराक्रमः ॥ १५
ुद्धः सञ्चिन्तयामास किं करोमि हरिं प्रति।
ता मे च हतश्चैव मातामहस्तथा पुनः ॥ १६
राघश्च हतो ह्यत्र दुःखं बहुतरं कृतम्।
पुत्त्रोऽहं भवेयं चेद्धरिञ्च पीड़याम्यहम् ॥ १७
ते कृत्वा मतिं तत्र तपस्तप्तं सुदारुणम्।
ह्माणञ्च समुद्दिश्य वर्षसाहस्रकं तदा ॥ १८
र्द्धबाहुश्चैकपादः सूर्य्ये दृष्टिं दधत् पुरः।
ासा ध्यानमाश्रित्य तपश्चक्रे महत् तदा ॥ १९
रसस्तस्य सञ्जातं तेजः परमदारुणम्।
दग्धास्तदा देवा ब्रह्माणं शरणं गताः ॥ २०
ब्रह्मन् राक्षसस्तेजो लोकान् पीड़ितुमुद्यतम्।
प्रार्थ्यं तेन दुष्टेन तत् त्वं देहि पितामह ॥ २१
चेदद्य वयं दग्धास्तेनैव सुमहात्मना।
ास्यामः संक्षयं सर्व्वे तस्माद्देहि पितामह ॥ २२

इति तेषां वचः श्रुत्वा ब्रह्मा लोकपितामहः।
जगाम वरदानार्थं राक्षसाय दुरात्मने ॥ २३
तदग्रे च तदा यातो हंसवाहनसंयुतः।
प्रसन्नोऽस्मि वरं ब्रूहि यत् ते मनसि वर्त्तते ॥ २४
इति श्रुत्वा वचस्तस्य वचनं पुनरब्रवीत्।

राक्षस उवाच।

यदि प्रसन्नो देवेश यदि देयो वरस्तदा ॥ २५
अतुलञ्च बलं मेऽद्य देहि त्वं कमलासन।
इत्युक्त्वा तु नमश्चक्रे ब्रह्मणे परमात्मने ॥ २६
ब्रह्मा चापि तदा तस्मै वरं दत्त्वा गृहं ययौ।
राक्षसो बलवांस्तत्र मातरं प्रणिपत्य च ॥ २७
पश्य मातः करोम्यद्य देवानां प्रलयं ह्यहम्।
इत्युक्त्वा प्रथमं तत्र कामरूपेश्वरं शुभम् ॥ २८
बबन्ध ताड़यामास भीमो भीमपराक्रमः।
गृहीतञ्च धनं सर्व्वं हस्त्यश्वरथसङ्कुलम् ॥ २९
छत्त्रञ्च चामरञ्चैव सर्व्वोपस्करणानि च।
तेनैव गृहीतं राज्यं तदीयञ्च मुनीश्वराः ॥ ३०
राजा चापि शुचिः श्रेष्ठः प्रियधर्म्मा हरिप्रियः।
गृहीतो निगड़े तेन दुष्टेन सुरशत्रुणा ॥ ३१
एकान्ते तु तदा कृत्वा पार्थिवीं मूर्त्तिमुत्तमाम्।
भजनञ्च शिवस्यैव प्रारब्धं प्रियकाम्यया ॥ ३२
गङ्गायाः स्तवनं तेन बहुधा च तदा कृतम्।
मानसं स्नानकर्म्मादि कृत्वा च शिवपूजनम् ॥ ३३
पार्थिवेन विधानेन चकार नृपसत्तमः।
तद्ध्यानञ्च तथा स्वाहे कृत्वा च विधिपूर्व्वकम् ॥ ३४
प्रणिपातैः स्तवैः स्तोत्रैर्मुद्रासनपुरःसरम्।
कृत्वा च सकलं तत्र भेजे स शङ्करं मुदा ॥ ३५
पञ्चाक्षरमयीं विद्यां जजाप प्रणवान्विताम्।
नान्यत् कार्य्यञ्च वै कर्त्तुं लब्धवानन्तरं तदा ॥ ३६
इदमेव तदा तत्र चकार हितकाम्यया।
तत्पत्नी च तदा साध्वी दक्षिणा नाम विश्रुता ॥ ३७
पार्थिवञ्च विधानं हि चकार नृपवल्लभा।
दम्पती ह्येकभावेन शङ्करं प्रियकारकम् ॥ ३८
भजयामासतुस्तत्र नान्यथा मनसो गतिः।
राक्षसो वसुधां कृत्स्नां वशे च ऋषिसत्तमाः ॥ ३९
वेदधर्म्मं शास्त्रधर्म्मं स्मृतिधर्म्मं पुरातनम्।

लोपयित्वा च तत् सर्व्वं बुभुजे स्वयमात्मना ॥ ४०
देवाश्च पीड़ितास्तेन ऋषयः पीड़िता भृशम्।
अत्यन्तं दुःखमापन्नाः शिवस्य शरणं ययुः ॥ ४१
स्तुत्वा स्तोत्रैरनेकैश्च हरं लोकसुखावहम्।
प्रसन्नं कृतवन्तस्ते महाकोश्यास्तटे शुभे ॥ ४२
कृत्वा च पार्थिवीं मूर्त्तिं पूजयित्वा विधानतः।
स्तुत्वा च विविधैः स्तोत्रैर्नमस्कारादिभिः क्रमात्॥४३
एवं स्तुतस्तदा शम्भुर्देवान् वचनमब्रवीत्।
प्रसन्नोऽस्मि वरं ब्रूत किं कार्य्यं करवाणि वः ॥ ४४
इत्युक्ते च तदा तेन देवा ह्यूचुः शिवं पुरः।
सर्व्वं जानासि देवेश नाज्ञातं विद्यते तव ॥ ४५
तथापि श्रूयतां देव राक्षसो भीमरूपकः।
पीड़यत्यतितरां देवान् कृपां कुरु सदाशिव ॥४६
दुष्टञ्च राक्षसं त्वञ्च जहि शीघ्रं प्रियङ्कर।
इत्युक्तस्तु तदा शम्भुः करिष्यामि वचोऽब्रवीत् ॥४७
राजा चापि मदीयो वै भक्तो भवति नित्यशः।
तस्मात् प्रब्रूत वै देवाः कार्य्यं शीघ्रं भविष्यति ॥ ४८
इत्युक्तास्ते तदा देवा आनन्दं परमं गताः।
स्वं स्वमाश्रमकं सर्व्वं ययुस्ते च महर्षयः ॥ ४९
शिवोऽपि स्वगणैः सार्द्धं जगाम हितकाम्यया।
एतस्मिन्नन्तरे तत्र कामरूपेश्वरेण च ॥ ५०
अत्यन्तं ध्यानमारब्धं पार्थिवस्य पुरस्तदा।
कैश्चिच्च तत्र गत्वा च राक्षसाय निवेदितम् ॥ ५१
राजा किञ्चित् करोत्येवं त्वदर्थं राक्षसोत्तम।
अभिचारं करोति वै यथेच्छसि तथा कुरु ॥ ५२
राक्षसोऽपि च तच्छ्रुत्वा कुपितो हननेच्छया।
गृहीत्वा करवालञ्च ह्याजगाम नृपं प्रति ॥ ५३
तं दृष्ट्वा राक्षसो ह्यत्र पार्थिवादिस्थितञ्च यत्।
तदत्यन्तविरूपञ्च दृष्ट्वा किञ्चित् करोत्यसौ ॥ ५४
कुपितो राक्षसस्तत्र हन्यां सोपस्करं विभुम्।
विचार्य्योवाच तं तत्र क्रियते किं त्वयाधुना ॥ ५५
सत्यं वद न हन्यां त्वामन्यथा हन्मि निश्चितम्।
इति श्रुत्वा वचो ह्यस्य सत्यपाशेन यन्त्रितः ॥ ५६
उवाच वचनं सत्यं भविष्यन्तु भवेदिह।
कृपालुः शङ्करश्चात्र वर्त्तते पार्थिवे ध्रुवम् ॥ ५७
मदर्थं न करोतीह ह्यहं कियान् वराककः।

स्वरूपानुप्रतिज्ञाञ्च सत्यञ्चैव करिष्यति ॥ ५[illegible]
मद्भक्तञ्च यदा कश्चित् पीड़यत्यतिदारुण[illegible]
तदाहं तस्य रक्षार्थं दुष्टं हन्मि न संशयः ॥[illegible]
एवं धैर्य्यं समालम्ब्य ध्यात्वा देवञ्च शङ्कर[illegible]
त्वदीयोऽस्मि महाराज यथेच्छसि तथा कु[illegible]
एवं मनसि तं ध्यात्वा राक्षसञ्चावमानयन्।
सत्यञ्च वचनं ह्यत्र ह्यब्रवीत् प्रियकाम्यया [illegible]
भजामि शङ्करं देवं यथेच्छसि तथा कुरु।
इति तस्य वचः श्रुत्वा भीमो वचनमब्रवीत् [illegible]
शङ्करश्च मया ज्ञातः किं करिष्यति मामि[illegible]
यो मे पितृव्यकेनैव स्थापितः किङ्करो यथा [illegible]
तद्बलं हि समाश्रित्य विजेतुं त्वं समीहसे।
तर्हि त्वया जितं सर्व्वं नात्र कार्य्या विचारणा[illegible]
यावन्मया न दृष्टोऽस्ति शङ्करस्त्वत्प्रपालकः।
तावत् त्वं स्वामिनं मत्वा सेवसे नान्यथा क्वचि[illegible]
मया दृष्टेन सर्व्वं वै स्फुटं स्यात् सर्व्वथा नृ[illegible]
तस्मात् त्वया शिवस्येदं रूपं दूरतरं पुनः ॥ [illegible]
कर्त्तव्यं नान्यथा चेद्धि पश्यसि स्वामिनो मम [illegible]
इति तद्वचनं श्रुत्वा नृपो वाक्यमुपाददे ॥ [illegible]
अहञ्च पामरस्यैव मोक्ष्यामि शङ्करं पुनः।
सर्व्वोत्कृष्टश्च स स्वामी न मां मुञ्चति कर्हि[illegible]
एवं वचस्तदा श्रुत्वा विहस्य राक्षसोत्तमः।
मत्तो भोगीसदा भिक्षेत् स किं जानाति स्वा[illegible]
योगिनां का च निष्ठा च भक्तानां प्रतिपाल[illegible]
इति कृत्वा मतिं त्वञ्च दूरतो भव सर्व्वथा [illegible]
अहञ्च तव स्वामी च युद्धञ्च करवावहै।
इत्युक्तः स नृपश्रेष्ठो मया वक्तुं न शक्यते ॥ [illegible]
त्वया च क्रियते तर्हि कर्त्तव्यं शक्तिमानसि।
इत्युक्तः सैन्यमादाय राजानं परिभर्त्स्य त[illegible]
करालं करवालञ्च पार्थिवे प्राक्षिपत् तदा।
पश्य त्वं स्वामिनोऽद्यैव बलं भक्तसुखावह[illegible]

सूत उवाच।

इत्युक्त्वा तु विहस्यैव राक्षसः स महाबलः।
करवालं पार्थिवे यावत् स्पृशति न मुनीश्व[illegible]
तावच्च पार्थिवात् तस्मादाविरास स्वयं ह[illegible]
पश्य भीमेश्वरोऽहं स रक्षार्थं प्रकटाम्यह[illegible]

म पूर्व्वं व्रतं ह्येतद्रक्षणीयो नृपो मया ।
तस्मात् पश्य मे शीघ्रं बलं भक्तसुखावहम् ॥ ७६
द्दीयश्च पिनाकेन करालं शतधा कृतम् ।
नस्यैव त्रिशूलञ्च क्षिप्तं तेन दुरात्मना ॥ ७७
च्छूलं शतधा नीतं दुष्टस्य परमात्मना ।
नस्य शक्तिका क्षिप्ता सा चैव लक्षधा कृता ॥ ७८
दिखड्गञ्च ततस्तेन क्षिप्तं तस्मै महात्मने ।
नापि च त्रिशूलेन तिलशश्च कृतं क्षणात् ॥ ७९
तस्यैव गणानाञ्च राक्षसानां परस्परम् ।
द्धमासीत् तदा घोरं पश्यतां दुःखमावहम् ॥ ८०
तश्च पृथिवी सर्व्वा व्याकुला ह्यभवत् तदा ।
समुद्राश्च तदा सर्व्वे चुक्षुभुः समहीधराः ॥ ८१
ह-नक्षत्र-ताराश्च द्यौश्चैव च तथाविधा ।
वाश्च ऋषयः सर्व्वे दुःखिता ह्यभवंस्तदा ॥ ८२
दस्य समागत्य शङ्करं दुःखहारकम् ।
प्रार्थयामास तत्रैव हन्यतां शङ्कर त्वया ॥ ८३
खो कश्च कुठारो वै हन्यतां शीघ्रमेव च ।
इति सम्प्रार्थितः शम्भुः सर्व्वान् रक्षोगणानिति ॥ ८४
हुङ्कारेणैव चाक्ष्णेण भस्मसात् कृतवांस्तदा ।
सर्व्वे ते राक्षसा दग्धा भस्मराशय एव ते ॥ ८५
दावानलगतो वह्निर्यथा च वनमादहेत् ।
तथा शिवेन क्रुद्धेन राक्षसानां वनं(क) क्षणात् ॥ ८६
भीमस्यैव च किं भस्म न ज्ञातं केनचित् तदा ।
सपरिवारस्ततो दग्धो नाम न श्रूयते तदा ॥ ८७
ततः शिवस्य क्रोधो न शान्तिं प्राप मुनीश्वराः ।
क्रोधज्वाला च फुत्कारान्निःससार वनाद्वनम् ॥ ८८
राक्षसानाञ्च यद्भस्म सर्व्वं व्याप्तं वने तदा ।
तस्यौषधयो जाता नानाकार्य्यकरास्तथा ॥ ८९
रूपान्तरं ततो यावद्देशान्तरमथापि वा ।
भूत-प्रेत-पिशाचादि दूरतश्च ततो व्रजेत् ॥ ९०
तत् कार्य्यञ्च यच्चैव ततो न भवति द्विजाः ।
देवैः प्रार्थितः शम्भुः शान्तिं समधिगच्छत वै ॥ ९१
स्थातव्यं स्वामिना ह्यत्र लोकानां सुखहेतवे ।
यं वै कुत्सितो देश ओषध्यो लोकदुःखदाः ॥ ९२
भवन्तञ्च तदा दृष्ट्वा कल्याणं सम्भविष्यति ।
भीमशङ्करनामा त्वं भविता सर्व्वसाधकः ।
इत्येवं प्रार्थितः शम्भुस्तत्रैव स्थितवांस्तदा ॥ ९३

इति श्रीशैवे महापुराणे ज्ञानसंहितायां भीमशङ्करमाहात्म्यवर्णनं नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशोऽध्यायः ।

सूत उवाच ।

अतः परं प्रवक्ष्यामि श्रूयतामृषिसत्तमाः ।
विश्वेश्वरस्य माहात्म्यं महापातकनाशनम् ॥ १
यदिदं दृश्यते किञ्चिज्जगत्यां वस्तुमात्रकम् ।
तत् सर्व्वञ्च यदा नासीत् पञ्चक्रोशी तदा शुभा ॥ २
तदेव कथयाम्यद्य तन्निर्म्माणं मुनीश्वराः ।
यदा च निर्गुणं तेजः सत्यं ज्ञानमनन्तकम् ॥ ३
चिदानन्दस्वरूपञ्च निर्व्विकारं सनातनम् ।
ततश्च प्रकृतिर्देवी सा पूरुषसमन्विता ॥ ४
आवाभ्यां किञ्च कर्त्तव्यमावां केनैव निर्म्मितौ ।
इति संशयमापन्नौ प्रकृति-पुरुषौ यदा ॥ ५
ताभ्यां वाणी समुत्पन्ना निर्गुणात् परमात्मनः ।
तपश्चैव प्रकर्त्तव्यं ततः सृष्टिरनुत्तमा ॥ ६
प्रकृतिः पुरुषश्चैव तदेतदूचतुस्तथा ।
तपसश्च स्थलं नास्ति कुत्र वा स्थीयतेऽधुना ॥ ७
ततश्च तेजसः सारं पञ्चक्रोशात्मकं शुभम् ।
सर्व्वोपकारणैर्युक्तं सुन्दरं नगरं यथा ॥ ८
निर्म्माय प्रेषितं ताभ्यां निर्गुणेन विराजितम् ।
अन्तरीक्षे स्थितं तच्च अधिष्ठाय हरिः स्वयम् ॥ ९
तपश्चकार विविधं सृष्टिकामस्तदाज्ञया ।
तेनैव बहुकालञ्च तपस्तप्तं सुदारुणम् ॥ १०
तपसः करणाच्चैव श्रमस्तस्य महात्मनः ।
श्रमेण जलधाराश्च विविधाश्चाभवंस्तदा ॥ ११
ताभिर्व्याप्तञ्च सर्व्वं वै नान्यत् किञ्चित् प्रदृश्यते ।
ततश्च विष्णुना दृष्ट्वा अहो किमेतदद्भुतम् ॥ १२
इत्याश्चर्य्यं तदा दृष्ट्वा शिरसः कम्पनं कृतम् ।
ततश्च पतितः कर्णान्मणिश्च पुरतः प्रभोः ॥ १३
यत्रासौ पतितश्चैव तत्रासीन्मणिकर्णिका ।

(क) वलमिति वा पाठः ।

जलौघैः प्लाव्यमाना सा पञ्चक्रोशी पुरातना ॥ १४
निर्गुणेन शिवेनैव त्रिशूलेन धृता तदा।
विष्णुरपि च तत्रैव सुष्वाप प्रकृत्या सह ॥ १५
कियत् कालं जले तत्र सुप्तोऽसौ च जनार्द्दनः।
तन्नाभिकमलाज्जातो ब्रह्मा लोकपितामहः ॥ १६
शिवाज्ञाञ्च समासाद्य सृष्टिञ्च कृतवांस्तदा।
यत् किञ्चिद्दृश्यते ह्यत्र ब्रह्माण्डे सचराचरम् ॥ १७
तद्व्याप्तञ्च विशेषेण शिवेन तेजसा तदा।
चेतनाचेतनं यच्च व्याप्तमासीन्मुनीश्वराः ॥ १८
ततश्च सृष्टिकार्य्यञ्च प्रावर्त्तत समन्ततः।
चतुर्द्दशभुवनानीह जातानि गोलके तदा ॥ १९
योजनानाञ्च पञ्चाशत्कोटिसंख्यप्रमाणतः।
ब्रह्माण्डस्यैव विस्तारो मुनिभिः परिकीर्त्तितः ॥ २०
यथा चैव जले नौश्च तथा ब्रह्माण्डकं जले।
यथा च मध्यगो गोलस्तक्रे च परिदृश्यते ॥ २१
दिग्गजैश्च धृतं तच्च स्थिरञ्च परिवर्त्तते।
मध्ये प्रमाणात्स्वर्द्धञ्च युतास्य च ऋषीश्वराः ॥ २२
शेषस्यार्द्धं तथा चोर्द्ध्वं तथाधः परिभाषितम्।
मध्ये च भूर्लोकः स्यात् तदधः सप्तकं तथा ॥ २३
तलञ्चैवातलञ्चैव सुतलं वितलं तथा।
महातलञ्च पातालं रसातलमथापि च ॥ २४
भूर्लोकादुपरि यो वै भुवर्लोकः प्रकीर्त्तितः।
स्वर्लोकादुपरि यो वै महर्लोकः प्रकल्पितः ॥ २५
ततो जनपदश्चैव तपश्चैव ततः परम्।
सत्यञ्चैव ततः प्राङ्मर्य्यादा परिकीर्त्तिता ॥ २६
एकैकस्य च विस्तारो दृश्यते च मुनीश्वराः।
बहुतरस्य भयेनैव नोक्तो ग्रन्थस्य एव च ॥ २७
कथितश्च पुरा ग्रन्थे पुनः किं कथयाम्यहम्।
येषां यत्राधिकारोऽस्ति तत्र ते च निवासिनः ॥ २८
समुद्राः सप्त एवैते द्वीपानि च तथा पुनः।
मेर्व्वाद्या गिरयश्चान्ये नद्यश्च विविधास्तथा ॥ २९
वनानि च विचित्राणि विविधानि तथैव च।
ब्रह्माण्डे परिवर्त्तन्ते उक्तानि च पुरा मया ॥ ३०
ब्रह्मणो द्विविधं रूपं निर्गुणस्य परात्मनः।
एकञ्चैवाक्षरं ब्रह्म क्षरञ्च द्वितीयं मतम् ॥ ३१
द्दश्यञ्चैव क्षरं प्रोक्तं ह्यक्षरं निर्गुणं मतम्।

इदं भूतमयं यच्च रूपञ्च ब्रह्मणो विदुः ॥
तदेव सगुणं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः।
निर्गुणे सगुणञ्चैव सगुणे निर्गुणं तथा ॥
परस्परञ्च संलग्नं रूपद्वयमथापि च।
यथा च मणि-सूत्रञ्च संलग्नञ्च परस्परम् ॥
पुष्पञ्चैव सुगन्धश्च ज्योतिस्तेजस्तथैव च।
विवेकिनो हि जानन्ति तत्त्वभागविचक्षणाः।
यैर्ज्ञातं सगुणं ब्रह्म निर्गुणञ्च ततः परम्।
निर्गुणे ब्रह्मणि ज्ञाते सगुणाद्विनिवर्त्तते ॥
तावच्च सगुणं ध्यार्य्यं यावच्च निर्गुणं न हि।
निर्गुणे च तथा लब्धे ह्यहम्भावो निवर्त्तते।
निवृत्ते चाप्यहङ्कारे जीवभावो निवर्त्तते।
सर्व्वं ब्रह्ममयं पश्यन् मुच्यते सर्व्वकिल्बिषैः
सोऽहं सोऽहं सुविज्ञानं जायते योगिनस्तदा
विधि-निषेधराहित्यं भवतीति सुनिश्चितम् ॥
एवं वै चापि ब्रह्माण्डं निर्म्मितं गुणिना स्व
तदा शिवेन लोकानां हिताय परिचिन्तितम्
ब्रह्माण्डे कर्म्मणा बद्धाः प्राणिनो मां कथं पु
पश्यन्तीति विचार्य्यैव पञ्चक्रोशी विमोचिता।
इयञ्च शुभदा लोके कर्म्मनाशकरी मता।
अविमुक्तं स्वयं लिङ्गं स्थापितं परमात्मना।
न कदाचित् त्वया त्याज्यमिदं क्षेत्रं ममां
इत्युक्त्वा तु त्रिशूलाच्च अवतार्य्य हरः स्व
मोचयामास भुवने मृत्युलोके मुनीश्वराः।
ब्रह्मणोऽपि दिने विश्वं विनश्यति सुनिश्चि
तदा शिवस्त्रिशूलेन दधाति च मुनीश्वराः।
पुनश्च ब्रह्मणा सृष्टौ कृतायां स्थाप्यते पुनः।
कर्म्मणां कर्षणात् सा वै काशीति परिकथ्यते
अविमुक्तेश्वरं लिङ्गं काश्यां तिष्ठति नित्यशः
मुक्तिदाता च लोकानां महापातकिनामपि
अन्यत्र प्राप्यते मुक्तिः सारूप्या च मुनीश्वरः
अत्रैव प्राप्यते जीवैः सायुज्या मुक्तिरुत्तमा
येषां क्वापि गतिर्नास्ति तेषां वाराणसी पु
पञ्चक्रोशी मता पुण्या हत्याकोटिविनाशिनी
अमरा मरणं तत्र वाञ्छन्ति च मुनीश्वराः
ब्रह्मा च श्लाघ्यते चापि विष्णुश्चापि तथैव

नयश्च तथा चान्यं शिवाश्चैव तथा पुनः ॥ ५०
गच्छन्ति मानुषाश्चैव सर्व्वैश्च परिपिव्यते ।
ताश्चाश्चैव तु माहात्म्यं वक्तुं वर्षशतैरपि ॥ ५१
शक्नोमि सदा सर्व्वं तथापि च ब्रुवे पुनः ।
कैलासस्य पतिर्यो वै निर्गुणो गुणवान् भवः ॥ ५२
आजगाम कदाचिद्वै काश्यां देवो महेश्वरः ।
वाराणसीमनुप्राप्य दर्शयामास शङ्करः ॥ ५३
अविमुक्तेश्वरं लिङ्गं दर्शनात् पापहारकम् ।
अविमुक्तस्य माहात्म्यं यथाह भगवान् भवः ॥ ५४
विस्तरेण मया वक्तुं ब्रह्मणा च महात्मना ।
शक्यते नैव विप्रेन्द्रा वर्षकोटिशतैरपि ॥ ५५
अविमुक्तोऽपि तं दृष्ट्वा आनन्दं परमं गतः ।
पूजयामास तं देवं पार्व्वत्या सह शङ्करम् ॥ ५६
...रैः स्तवैर्मन्त्रैर्देवदेवं जगत्पतिम् ।
...तैरनेकैश्च त्वदीयोऽस्मि न संशयः ॥ ५७
...त्वं कुरु देवेश लोकानां हितकाम्यया ।
स्थातव्यञ्च त्वया देव प्रार्थयामि जगत्पते ॥ ५८
अविमुक्तोऽपि हि तदा सम्प्रार्थ्य च पुनः पुनः ।
त्वाश्रूणि प्रमुच्यैतच्चरणं नैव मोचितुम् ॥ ५९
काश्येव च त्वया देव राजधानी प्रगृह्यताम् ।
मया ध्यानितया स्थेयमचिन्त्यसुखहेतवे ॥ ६०
मुक्तिदाता भवान् लोके वर्त्तते नान्यथा क्वचित् ।
तस्मात् त्वमुपकाराय तिष्ठोमासहितः सदा ॥ ६१
अखिलान् जीवसङ्घातांस्तारय त्वं सदाशिव ।
इत्येवं प्रार्थितस्तेन तस्थौ देवो जगत्पतिः ॥ ६२
लोकानामुपकारार्थं कपालमुक्तिहेतवे ।
इत्येवं वचनं श्रुत्वा ऋषयो निर्म्मलाशयाः ॥ ६३
पप्रच्छुः परया भक्त्या कपालं किं ब्रवीषि नः ।

सूत उवाच ।

साधु पृष्टमृषिश्रेष्ठाः कथयामि यथाश्रुतम् ॥ ६४
पुरा कदाचिद्देवेशः शङ्करप्रियकाम्यया ।
बभ्राम गिरिजासार्द्धं ब्रह्मलोकमुपागतः ॥ ६५
ब्रह्मा चापि तदा तं वै बहुमानपुरःसरम् ।
पूजयामास देवेशमातिथ्येन धर्म्महेतवे ॥ ६६
पश्चात् तुष्टाव तं देवं चतुर्भिश्च मुखैस्तदा ।
एकेनैव मुखेनैव दुःशब्दं श्रुतवांस्तदा ॥ ६७
दृष्ट्वा चतुर्म्मुखाणीह सन्तुष्टो भगवान् भवः ।
पञ्चमं दुर्म्मुखं दृष्ट्वा दुःखितः शङ्करस्तदा ॥ ६८
अहो दुष्टं मुखं ह्येतच्छिनद्मि सुविचारयन् ।
इति विचार्य्य तत्रैव शिवोऽपि शिवकृन्नृणाम् ॥ ६९
चिच्छेद तच्छिरस्तत्र ब्रह्मणो दुर्विभाषिणः ।
अघोरया तदा दृष्ट्या ब्रह्माणञ्च प्रपीड़यन् ॥ ७०
जगाम पृष्ठतो लग्नं कपालं ब्रह्मणस्तदा ।
समर्थोऽपि शिवस्तस्य दहने च मुनीश्वराः ॥ ७१
लोकानामुपकारार्थं भ्रान्त्वा तां पृथिवीमिमाम् ।
बभ्राम सर्व्वलोकेषु तेनैव सहितः शिवः ॥ ७२
यत्र यत्र स वै याति तत्र तत्र गतं शिरः ।
विचार्य्य भगवांस्तत्र महिमानं प्रकाशयन् ॥ ७३
आजगाम यदा तत्र शिरश्च दूरतः स्थितम् ।
अहो ह्येतस्य माहात्म्यं कीदृशं मनसि स्वयम् ॥ ७४
विचारयंस्तदा लोके ख्यापयन् वृत्तमद्भुतम् ।
तस्थौ तत्रव लोकेश अविमुक्तेश्वराज्ञया ॥ ७५
इति तस्य वचः श्रुत्वा पुनस्तञ्च मुनीश्वराः ।
पप्रच्छुः संशयात्मानः कथं ब्रह्ममुखन्त्विदम् ॥ ७६

सूत उवाच ।

पुरा ब्रह्मा विमोहेन सरस्वत्या रूपमद्भुतम् ।
दृष्ट्वा जगाम तां पश्चात् तिष्ठेति विह्वलः स्वयम् ॥ ७७
तद्वचनं तदा पुत्री श्रुत्वा कोपसमन्विता ।
उवाच किं ब्रवीषि त्वं मुखेनाशुभभाषिणा ॥ ७८
ब्रवीषि चेदिदञ्चं वै विभाषी भव सर्व्वदा ।
तद्दिनं हि समारभ्य पञ्चमेन मुखेन च ॥ ७९
ब्रह्मा च भाषते दुष्टं शब्दं खरतरं तदा ।
पश्चाच्छिवेन तच्छिन्नं दुष्टभाषि यतोऽभवत् ॥ ८०
शिवोऽपि स्मरणेनैव भजनेन परस्य च ।
पापं दूरीकरोतीह स्वयं दूरीकृतं न हि ॥ ८१
तत्कारणञ्च श्रूयतामृषयः कथयाम्यहम् ।
श्रेष्ठश्चाचरति यच्च तदेव च नरः पुनः ॥ ८२
करोति चरति यच्च प्रमाणरक्षणाय वै ।
ईश्वरस्य तदा लग्नं पातकं किं नरेण हि ॥ ८३
शिवस्य तीर्थसंयोगाच्छिरश्च दूरतः स्थितम् ।
तस्मात् तीर्थवरं ह्येतन्महापातकनाशनम् ॥ ८४
इत्येव ख्यापितं लोके माहात्म्यं तीर्थसम्भवम् ।

अथवा ईश्वरस्येच्छां कश्च जानाति चेष्टितम् ॥ ८५
ज्ञानङ्गदहनश्चैव ह्याङ्गे युवतिधारणम् (क)।
कण्ठे विषं धृतं येन मृत्युञ्जय उदाहृतः ॥ ८६
दिगम्बरः स्वयञ्चैव भक्तेभ्यो ह्यचलां श्रियम्।
स्वसैन्यञ्च पिशाचाश्च भक्तानाञ्च चतुर्व्विधम् ॥ ८७
स्वाङ्गे च रुण्डमाला वै भक्तानां मौक्तिकानि च।
चिताभस्म निजस्यैव भक्तेभ्यश्चन्दनं ददेत् ॥ ८८
स्ववाहनं वृषश्चैव भक्तानां हस्तिकानथ।
स्ववाद्यञ्चैव गल्लादि भक्तानाञ्चानकानथ ॥ ८९
स्वशिरसि जटा दिव्या भक्तानां मुकुटादिकम्।
स्वभूषणञ्च सर्पादि भक्तानां कुण्डलादिकम् ॥ ९०
स्वस्य वस्त्रञ्च चर्म्मादि भक्तेभ्यः सुन्दराम्बरम्।
स्वयं ददाति चान्यच्च भक्तानाञ्चान्यदेव च ॥ ९१
यथाभिलाषं भक्तेभ्यः शङ्करः सम्प्रयच्छति।
तस्मात् तच्चेष्टितं नैव ज्ञातुं शक्यं मुनीश्वराः ॥ ९२
पञ्चक्रोश्याः परं नान्यत् क्षेत्रञ्च भुवनत्रये।
अथवा पापिनां पापस्फोटनाय स्वयं हरः ॥ ९३
मृत्युलोके शुभं क्षेत्रं समास्थाय स्थितः सदा।
यथातथापि धन्येयं पञ्चक्रोशी मुनीश्वराः ॥ ९४
यत्र विश्वेश्वरो देवो ह्यागत्य संस्थितः स्वयम्।
यद्दिनं हि समारभ्य हरः काश्यामुपागतः ॥ ९५
तद्दिनं हि समारभ्य काशी श्रेष्ठतरा ह्यभूत्।
एतदश्च समाख्यातं यत् पृष्टोऽहं मुनीश्वराः।
य इदं शृणुयान्नित्यं सर्व्वान् कामान् समाप्नुयात् ९६

इति श्रीशैवे महापुराणे ज्ञानसंहितायां काशी-
वर्णनं नामैकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

पञ्चाशोऽध्यायः।

ऋषय ऊचुः।

एवं वाराणसी पुण्या यदि सूत महामुने।
वक्तुमर्हसि चास्माकं प्रभावं तस्य साम्प्रतम् ॥ १

सूत उवाच।

वक्ष्ये संक्षेपतः सम्यग्वाराणस्याः सुशोभनम्।
विश्वेश्वरस्य माहात्म्यं श्रूयतामृषिसत्तमाः ॥ २

(क) क्वाह्वे युवतिधारणमिति पाठान्तरम्

कदाचित् पार्व्वती देवं शङ्करं परया मुदा।
पञ्चक्रोश्याश्च माहात्म्यं पप्रच्छ लोककाम्यया

पार्व्वत्युवाच।

अस्य क्षेत्रस्य माहात्म्यं वक्तुमर्हस्यशेषतः।
ममोपरि कृपां कृत्वा देवदेव वृषध्वज ॥ ४
देव्यास्तद्वचनं श्रुत्वा देवदेवो जगत्प्रभुः।
उवाच वचनं तत्र जीवानां प्रियहेतवे ॥ ५

श्रीभगवानुवाच।

साधु पृष्टं त्वया भद्रे लोकानां सुखदं शुभम्
कथयामि यथैतस्य माहात्म्यं श्रूयतां पुनः।
इदं गुह्यतमं क्षेत्रं सदा वाराणसी मम।
सर्व्वेषामेव जन्तूनां हेतुर्मोक्षस्य सर्व्वदा।
अस्मिन् सिद्धाः सदा देवि मदीयं व्रतमास्थिता
मम लिङ्गधरा (क) नित्यं मम लोकाभिकाङ्क्षिणः
अभ्यस्यन्ति परं योगं यतात्मानो जितेन्द्रियाः
नानावृक्षसमाकीर्णं नानाविहगसेवितम् ॥
कमलोत्पलपुष्पाद्यैः सरोभिः समलङ्कृतम्।
अप्सरोरगगन्धर्व्वैः सदा संसेव्यते शुभम् ॥
रोचते मे सदा वासो येन कार्य्येण तच्छृणु।
मन्मना मम भक्तश्च मयि सर्व्वार्पितक्रियः ॥
वीतराग-भय-क्रोधो निर्द्दन्द्वश्च विमत्सरः।
अध्यात्मनिरतो नित्यं तत्त्वानाञ्च विवेचकः ॥
सर्व्वञ्च मन्मयं पश्यन् योऽयं सोऽहं स्वयं हर
दुःखि दुःखी भवेन्नैव सुखि सुखी भवेन्न हि
शुभं प्राप्य न हृष्येत ह्यशुभे द्विषते न हि।
तस्य ममैव भेदो न स यत्र तीर्थमुत्तमम् ॥
तद्दर्शनं ह्यहं विष्णुर्ब्रह्मा चापि तथा पुनः।
कामयन्ति च तीर्थानि पावनायात्मनस्तदा।
सोऽन्तकाले च यस्यैव पार्श्वे परिविवर्त्तते।
तस्य मुक्तिर्भवेन्नूनं स्वस्य किं न भवेत् पुनः
तस्यापेक्षा न तीर्थस्य न ममैव हरेरपि।
जीवन्मुक्तः स विज्ञेयो विहिताविहिते समः।
यत्र यत्र मृतः सोऽपि मोक्षमाप्नोति निश्चितम्
अत्र तीर्थे विशेषोऽस्ति श्रूयतां सुन्दरि त्वया
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव तथा पुनः।

(क) नानालिङ्गधरा इत्यपि पाठः।

ह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तदा ॥ १९
ालश्चैव कुमारश्च यौवनान्वित एव च।
शुचिश्चैव बालापि कुमारी पतिता तथा ॥ २०
ंधवा वाथ बन्ध्या वा रजोदोषयुतापि वा।
ूतिकाले मृता ह्यपि संस्कारै रहिता तथा ॥ २१
पापश्च संपापो वा कर्म्मबन्धगतोऽथवा।
त्र चेह मृतः स्याद्वै मोक्षभाजी न संशयः ॥ २२
ेदजश्चाण्डजो वापि ह्युद्भिदोऽथ जरायुजः।
ृतो मोक्षमवाप्नोति अत्राऽन्यत्र तथा क्वचित् ॥ २३
र्म्मबन्धगतो यो वै देही मोक्षाय कल्पते।
ज्ञानापेक्षा न चात्रैव ध्यानापेक्षा न कर्हिचित् ॥ २४
ामापेक्षा न चात्रैव स्वजनानां तथा पुनः।
था तथा मृतः स्याच्चेन्मोक्षमाप्नोति निश्चितम् ॥२५
न्मम पुरं दिव्यं गुह्याद्गुह्यतमं महत्।
ादयो हि जानन्ति ये च सिद्धा मुमुक्षवः ॥ २६
तः प्रियमिदं क्षेत्रं यस्माच्चेह गतिः शुभा।
वमुक्तं न मया यस्मान्मोक्ष्येऽहं न कदाचन ॥ २७
हत् क्षेत्रमिदं तस्मादविमुक्तमिति स्मृतम्।
मिषे च कुरुक्षेत्रे गङ्गाद्वारेऽथ पुष्करे ॥ २८
ानात् संसेवनाद्वापि मृते मोक्षो भवेन्न हि।
ह सम्प्राप्यते यस्मात् तस्मादेतद्विशिष्यते ॥ २९
यागे वा भवेन्मोक्ष इह वा मत्परिग्रहात्।
यागादपि तीर्थाग्र्यादिदमेव विशिष्यते ॥ ३०
र्म्मस्योपनिषत् सत्यं मोक्षस्योपनिषच्छमः।
त्रतीर्थोपनिषदमविमुक्तं विदुर्बुधाः ॥ ३१
ामंभुञ्जन् स्वपन्क्रीडन्कुर्व्वन् हि विविधाःक्रियाः
विमुक्ते त्यजन् प्राणान् जन्तुर्मोक्षाय कल्पते ॥ ३२
त्वा पापसहस्राणि पिशाचत्वं वरं नृणाम्।
तु क्रतुसहस्रन्तु स्वर्गं काशीपुरीं विना ॥ ३३
स्मात् संसेवनीयं वै अविमुक्तं विमुक्तये।
व्यक्तलिङ्गैर्मुनिभिर्ध्यायते च सदाशिवः ॥ ३४
ह सम्प्राप्यते मोक्षो दुर्लभोऽन्यत्र कर्हिचित्।
द्दयत् फलं समुद्दिश्य तपन्ते च नराः प्रिये ॥ ३५
भ्यश्चाहं प्रयच्छामि विविधां फलकामनाम्।
ात्मनश्चैव सायुज्यमीप्सितं स्थानमेव च ॥ ३६
विरश्च महायक्षः सदा सर्व्वार्पितक्रियः।

क्षेत्रसंसेवनादेव गणेश्वर्य्यमवाप्तवान् ॥ ३७
पराशरस्तु यो योगी ऋषिर्व्यासो महातपाः।
मम भक्ता भविष्यन्ति वेदस्थानप्रवर्त्तकाः ॥ ३८
वैकुण्ठेशोऽपि पद्मापि क्षेत्रेऽस्मिन् मुनिपुङ्गवाः।
ब्रह्मा देवर्षिभिः सार्द्धं वसवोऽपि दिवाकरः ॥ ३९
देवराजस्तथा शक्रो ये चान्येपि दिवौकसः।
उपासते महात्मानः सर्व्वे मामिह सुव्रताः ॥ ४०
अन्येऽपि योगिनो ये वै छन्नरूपा महाव्रताः।
अनन्यमनसो भूत्वा मामिहोपासते सदा ॥ ४१
विषयासक्तचित्तोऽपि त्यक्तधर्म्मरुचिर्नरः।
इह क्षेत्रे मृतो यो वै संसारं न पुनर्विशेत् ॥ ४२
ये पुनर्निर्म्ममा धीराः सत्त्वस्था विजितेन्द्रियाः।
व्रतिनश्च निरारम्भाः सर्व्वेऽपि मयि भाविताः ॥ ४३
देहिभेदं (क) समासाद्य धीमन्तः सङ्गवर्ज्जिताः।
यान्ति ते परमं मोक्षं प्रसादान्मम सुव्रते ॥ ४४
जन्मान्तरसहस्रेषु यं न योगी समाप्नुयात्।
तमिहैव परं मोक्षं मरणादधिगच्छति ॥ ४५
गोप्रेक्षकमिदं क्षेत्रं ब्रह्मणा स्थापितं पुरा।
कैलासभवनञ्चात्र पश्य देवि वरानने ॥ ४६
गोप्रेक्षेश्वरमागम्य दृष्टमात्रे च मानवः।
न दुर्गतिमवाप्नोति कल्मषैश्च विमुच्यते ॥ ४७
कपिलाह्रदमिति ख्यातं ब्रह्मणा च तथा कृतम्।
तस्य दर्शनमात्रेण पातकात् प्रविमुच्यते ॥ ४८
रुद्ररूपञ्च पश्येमं ब्रह्मणा च कृतं पुरा।
सर्व्वदेवैरहं देवि अस्मिन् देशे प्रसादितः ॥ ४९
आजगाम पुरा देवि लिङ्गरूपी न संशयः।
तत्राहं ब्रह्मणा नीतः स्थापितः परमेष्ठिना ॥ ५०
ब्रह्मणश्चापि संरक्ष्य विष्णुना स्थापितः पुनः।
ब्रह्मणा सततो विष्णुरुक्तः संविग्नचेतसा ॥ ५१
मयानीतमिदं लिङ्गं त्वं किं स्थापितवानसि।
तमुवाच पुनर्विष्णुर्ब्रह्माणन्तु पितामहम् ॥ ५२
रुद्रे देवे पुरात्यन्तं मम भक्तिर्महत्तरा।
मयैव स्थापितं लिङ्गं तव नाम्ना भविष्यति ॥ ५३
हिरण्यगर्भ इत्येवमत्राहं समुपागतः।
दृष्ट्वैनमपि देवेशि मम लोकं व्रजेन्नरः ॥ ५४

(क) देहभेदमिति क्वचित् पाठः।

ततः पुनरपि ब्रह्मा मम लिङ्गमिदं शुभम्।
स्थापयामास विधिवद्भक्त्या च परया पुनः॥ ५५
स्वलीनेश्वर इत्येवमत्राहं स्वयमास्थितः।
प्राणानिह नरस्त्यक्त्वा न पुनर्जायते क्वचित्॥ ५६
अस्मिन्नेव मया देवि दैत्यो दैवतकण्टकः।
व्याघ्ररूपं समास्थाय निहतो दर्पितो बली॥ ५७
व्याघ्रेश्वरस्तथा ख्यातो महापातकनाशनः।
पित्रा ते शैलराजेन पुरा हिमवता स्वयम्॥ ५८
मम प्रियतमं स्थानं ज्ञात्वा लिङ्गं प्रतिष्ठितम्।
शैलेश्वर इति ख्यातं दृश्यतामिदमादरात्॥ ५९
यदा वाराणसी चेयं पुण्या पापविनाशिनी।
क्षेत्रमेतदलङ्कृत्य जाह्नव्या सह सङ्गता॥ ६०
तदा च ब्रह्मणा तत्र स्थापितं लिङ्गमद्भुतम्।
सङ्गमेश्वरविख्यातं दृश्यतां सुन्दरि त्वया॥ ६१
मध्यमेशं ततः पश्य जम्बूकेशं ततः पुनः।
शुक्रेश्वरञ्च लिङ्गञ्च शुक्रेण स्थापितं पुरा॥ ६२
कृत्तिवासेश्वरं पश्य वृद्धकालेश्वरं तथा।
इन्द्रादिदैवतैस्तत्र लिङ्गानि स्थापितान्यतः॥ ६३
तन्नाम्ना चैव विख्यातं लिङ्गं पापहरं तदा।
पश्य लिङ्गानि पुण्यानि सर्व्वकामप्रदानि च॥ ६४
अमून्येतानि पूज्यानि सन्ति स्थानानि पार्व्वति।
कथितानि मम क्षेत्रे गुह्यञ्चान्यदिदं शृणु॥ ६५
पञ्चक्रोशं चतुर्द्दिक्षु क्षेत्रमेतत् प्रकीर्त्तितम्।
समन्ताच्च तथा जन्तोर्म्मृतिकालेऽमृतप्रदम्॥ ६६
पण्डितः श्रोत्रियो वापि चण्डालः पतितोऽथवा।
सन्यासी वा मृतः स्याद्वै सर्व्वे मोक्षमवाप्नुयुः॥ ६७
इत्येतद्वचनं श्रुत्वा पार्व्वतीवाक्यमब्रवीत्।
अत्र मे विस्मयो ब्रह्मन् महांश्च परिवर्त्तते॥ ६८
सन्यासी कर्म्महीनश्च ह्यन्यः कर्म्मसमन्वितः।
एकश्च पुण्यवान् लोके एकः पापी भवेन्नरः॥ ६९
उभयोः समता प्रोक्ता तेषां भोगः कुतो गतः।
अन्यश्च संशयादेव श्रूयतां शङ्कर त्वया॥ ७०
अत्रैव म्रियमाणस्य मनश्चेच्च गृहे गतम्।
पुत्रे स्त्रियां धने वापि अन्याभीष्टतमे पुनः॥ ७१
श्रुतञ्चैव मया पूर्व्वं ह्यन्तकाले मनः स्वकम्।
गच्छति तत्र जन्म स्यान्नात्र कार्य्या विचारणा॥ ७२

तीर्थे चैव मृतस्यैव तीर्थयज्ञफलं भवे
उभयोः किञ्च तथ्यं स्यान्निर्वेद्यं शङ्कर
एतच्छ्रुत्वा वचस्तस्या उवाच शङ्करस्त

इति श्रीशैवे महापुराणे ज्ञानसं
ज्योतिर्लिङ्गनिरूपणे काशीवर्ण
नाम पञ्चाशोऽध्यायः॥५०॥

एकपञ्चाशोऽध्यायः।

शङ्कर उवाच।

साधु पृष्टं त्वया साध्वि श्रूयतां कथयामि
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते मानवः क्ष
अपापश्च मृतो यो वै सद्योऽमृतं समश्नुते
सपापश्च मृतो यः स्यात् कायव्यूहात् सम
यातनाद्यनुभूयैव पश्चान्मोक्षमवाप्नुयात्।
येन क्षेत्रे कृतं कर्म्म पिशाचो भवति ध्रुवम्
भैरवीं यातनां प्राप्य वर्षाणामयुतं पुनः
ततो मोक्षमवाप्नोति भुक्त्वा पापञ्च सुन्दरि
इति ते च समाख्यातं पापानां या गतिर्म
एवं ज्ञात्वा नरः सम्यक् संसेवेद्विमुक्तिक
यः सेवन् मृतकश्चैव अन्ते मोक्षमवाप्नुयात्
अन्यच्चापीह वक्ष्यामि श्रूयतामृषिसत्तमाः
कृतकर्म्मक्षयो नास्ति कल्पकोटिशतैरपि।
अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम्।
केवलञ्चाशुभं कर्म्म नरकाय भवेदिह।
शुभं स्वर्गाय जायेत उभाभ्यां क्षितिजन्म
जन्म सम्यगसम्यक् तु न्यूनाधिक्ये भवेदिह
उभयोश्च क्षये मुक्तिर्भवेच्च सुन्दरि ध्रुवम्॥
एकं क्षेत्रे कृतस्यैव कर्म्मणः संक्षयाय वै।
एकञ्चैव पुराजन्मकृतस्य संक्षयाय च॥ १
एकं सर्व्वक्षयायैव भवतीति सुनिश्चितम्।
कर्म्म च त्रिविधं प्रोक्तं किं तच्च श्रूयतां पुन
सञ्चितं क्रियमाणञ्च प्रारब्धञ्च त्रिधा मतम्।
पूर्व्वजन्मसमुद्भूतं सञ्चितं समुदाहृतम्॥ १
तेन जन्मान्तरं यच्च क्रियते कर्म्म साम्प्रतम्।
शुभाशुभञ्च यच्चैव क्रियमाणं विदुर्बुधाः॥ १

भुज्यते च शरीरेण प्रारब्धपरिकीर्त्तितम्।
भुज्यते च शरीरेण प्रारब्धं परिकीर्त्तितम्।
प्रारब्धकर्म्मणो भोगात् क्षयश्चैव न चान्यथा ॥ १४
पापं विना शरीरस्य दुःखं नास्ति पदे पदे।
यत् किञ्चिद्दृश्यते दुःखं सर्व्वं पापसमुद्भवम् ॥ १५
स्थूलञ्चैवाथ सूक्ष्मञ्च दुःखं पापसमुद्भवम्।
अपापश्च यदा स्याद्दे शरीरं सुखभाजनम् ॥ १६
क्वचिच्च सुखं वर्द्धेत् क्वचित् पापसञ्चयः।
सर्व्वेषां कर्म्मणां नाशो नास्ति काशीपुरीं विना ॥१७
सर्व्वञ्च सुलभं तीर्थं दुर्लभा काशिका पुरी।
अहं काशीं गमिष्यामि शतजन्मकृता मतिः ॥ १८
ततः काशीदर्शनञ्च जायते नान्यथा क्वचित्।
पृथिव्यां यानि तीर्थानि कृतानि पूर्व्वजन्मनि ॥ १९
तदा मुक्तिपुरी लभ्येत् प्रलभ्ये चैव काचन।
पूर्व्वजन्मकृताश्चेद्दे मुक्तिपुर्य्यः शुभानने ॥ २०
तदा काशी च लभ्येत नान्यथा सुलभा प्रिये।
परजन्मनि कृता चेद्दे काशी मुक्तिप्रदायिनी ॥ २१
प्राप्य काशीं तदा तत्र मृतिः स्यान्नान्यथा क्वचित्।
काशीं प्राप्य नरो यस्तु गङ्गायां स्नानमाचरेत् ॥२२
तदा च क्रियमाणस्य सञ्चितस्यापि कर्म्मणः।
क्षयश्चैव भवेत् तत्र प्रारब्धं न विनश्यति ॥ २३
भोगं विना न प्रारब्धं गच्छतीति सुनिश्चितम्।
तत्र मृतिश्च सञ्जाता तदा तस्य क्षयो भवेत् ॥ २४
अन्तकाले मनश्चेत् तदा गच्छति सुन्दरि।
यदा कर्म्म भवेन्नूनं चालने मनसो ध्रुवम् ॥ २५
कर्म्माणि मनसः पादाः शीर्णाश्चेत् तत् कुतो व्रजेत्।
तस्माद्विकाररहितं मनस्तीर्थे विलीयते ॥ २६
तदा तीर्थसमुद्भूतं फलं तस्य भवेदिह।
तीर्थजन्यं फलञ्चैव ध्यानजन्यं फलं पुनः ॥ २७
उभयं तेन सम्प्राप्तं श्रुतिरेषा सनातनी।
पूर्व्वञ्चैव कृता काशी पश्चात् पापं समाचरेत् ॥ २८
बलवता तेन वीर्य्येण नीयते काशिकां पुनः।
तदा सर्व्वाणि कर्म्माणि भस्मसाद्ध भवन्ति हि ॥ २९
तस्मात् काशीं नरः सेवेत् कर्म्मनिर्म्मूलनीं ध्रुवम्।
इति तस्य वचः श्रुत्वा गिरिजा वाक्यमब्रवीत् ॥ ३०
कश्चित् काशी नरः स्वामिन् स्त्रिया राज्यधनस्य च।
कामुकश्च तदा भूत्वा प्रयागे देहमुत्सृजेत् ॥ ३१
वेणीप्रवेशं वा कुर्य्याच्छिरसः पूजनं शिवे।
यन्निमित्तं कृतं तच्च तेन काश्यां मृतं यदा ॥ ३२
स्त्रिया वा पुरुषेणापि राज्यच्चोद्धरतां गतम्(क)।
तयोः संयोगता कुत्र स्यादेवं संशयो भवेत् ॥ ३३
एकश्च मोक्षतां प्राप्तस्त्वन्यश्च कामुकः स्मृतः।
मुक्तिदाता भव त्वञ्च कामदाता हरिः स्वयम् ॥ ३४
त्वं वा सदाशिवः साक्षात् कथं तस्य फलं भवेत्।
एवं मे संशयं छिन्धि देवदेव महेश्वर ॥ ३५
इत्येतद्वचनं श्रुत्वा हरो वाक्यमथाब्रवीत्।
त्वया च श्रूयतां भद्रे यदेतत् कथयाम्यहम् ॥ ३६
काश्यां यो वै मृतश्चैव तस्य जन्म पुनर्न हि।
प्रयागे च मृतो यो वै तस्य कामः सदा ध्रुवम् ॥ ३७
यदि संयोगतां प्राप्तः काशीजन्यं फलं वृथा।
यदि न प्राप्यते तच्च तीर्थराजफलं गतम् ॥ ३८
तस्माच्चैव हरिः साक्षान्नवीनां सृष्टिमुत्तमाम्।
विधाय मनसोद्दिष्टां सिद्धिं यच्छति नित्यशः ॥ ३९
स्त्रियं पुत्रं धनं वापि वाहनं राज्यमेव च।
यत् किञ्चित् कामयेद्वापि तत्तद्यच्छति वै हरिः ॥४०
उभयोः सिद्धिरर्थाय क्रियते हरिणा स्वयम्।
इत्युक्ता सा तदा देवी आनन्दं परमं गता ॥ ४१
तद्दिनं हि समारभ्य हरस्तस्थौ तया सह।
इति वश्च समाख्यातं काश्यागमनकारणम् ॥ ४२
अतः परं प्रवक्ष्यामि त्र्यम्बकस्य समुद्भवम्।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ ४३

इति श्रीशिवे महापुराणे ज्ञानसंहितायां विश्वेश्वरवर्णनं नामैकपञ्चाशोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशोऽध्यायः।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठाः कथां पापप्रणाशिनीम्।
कथयामि यथा व्यासाच्छ्रुता च ऋषिभिः सह ॥ १
पुरा ऋषिवरश्रेष्ठो गौतमो नाम विश्रुतः।
यस्य पत्नी परा साध्वी ह्यहल्या नाम विश्रुता ॥ २

(क) उद्वेगतां गतमित्यपि पाठः।

तया सह ऋषिश्रेष्ठस्तपश्चक्रे सुशोभनम्।
दक्षिणस्यां दिशि यो वै गिरिर्ब्रह्मेतिसंज्ञितः ॥ ३
तत्र तेन तपस्तप्तं वर्षाणामयुतं ध्रुवम्।
कदाचिदिह चानावृष्टिरभवत् सर्व्वदुःखदा ॥ ४
वर्षाणाञ्च शतं रौद्रं लोका दुःखमुपागताः।
आर्द्रञ्च पल्लवं नैव दृश्यते पृथिवीतले ॥ ५
जलं नव विद्यते जीवानां प्राणधारकम्।
तदा ते ऋषयश्चैव मनुष्याः पशवस्तथा ॥ ६
पक्षिणश्च मृताः सर्व्वे गताश्चैव दिशो दश।
तद्दृष्ट्वा ऋषयो विप्राः प्राणायामपरायणाः ॥ ७
ध्यानेनैव तदा केचित् कालं निन्युः सुदारुणम्।
गौतमोऽपि स्वयं तत्र वरुणार्थं तपः शुभम् ॥ ८
चकार चैव षण्मासं प्राणायामपरायणः।
तस्मै तदा वरं दातुं वरुणः स समागतः ॥ ९
प्रसन्नोऽस्मि वरं ब्रूहि ददामि ऋषिसत्तम।
ततश्च गौतमस्तं वै वृष्टिञ्चैवार्थयत् तदा ॥ १०
ततः सोऽपि वचस्तस्मा उवाच ऋषिसत्तमाः।

वरुण उवाच।

देवाज्ञा च समुल्लङ्घ्या ब्रह्मणा न कथं मया ॥ ११
अन्यत् प्रार्थय सुप्रीतोऽस्मि तदहं करवाणि ते।
इति तद्वचनं श्रुत्वा गौतमो वाक्यमब्रवीत् ॥ १२
यदि प्रसन्नो देवेश यदि देयो वरो मम।
तदहं प्रार्थयाम्यद्य कर्त्तव्यं हि त्वया तथा ॥ १३
महतामाश्रयः पुंसां महत्त्वायोपजायते।
महान्तश्च स्वरूपञ्च पश्यन्ति नेतरेऽशुभाः ॥ १४
शुभस्याश्रयतस्तुच्छो लभते विविधं फलम्।
दारिद्र्यं दूरतो याति सूर्य्यं दृष्ट्वा यथा तमः ॥ १५
दुःखं शोकं भयं पापमुत्कर्षं लभते नरः।
यथा नरञ्च सेवेत तादृशं फलमश्नुते ॥ १६
मृगेशमन्दिरे सेवा मुक्ताफलकरी मता।
शृगालमन्दिरे सेवा ह्यस्थिलाभकरी विदुः ॥ १७
उत्तमानां स्वभावोऽयं परदुःखसहिष्णुता।
स्वयं दुःखञ्च सम्प्राप्तं सह्यतेऽन्यस्य वार्य्यते ॥ १८
कल्पवृक्षस्वभावो हि सज्जनस्य जलाधिप।
वृक्षञ्च हाटकञ्चैव चन्दनञ्चेक्षुकं तथा ॥ १९
पश्येद्भुवि परार्थे तु कुशलाः सन्ति केन च।
दुःखदग्धस्य यद्दुःखनाशनं स्वसुखाय वै ॥ २
परोपकारिणं दृष्ट्वा पापं पापा विदूरतः।
भवन्ति च ऋषिश्रेष्ठाः श्रुतिरेषा सनातनी ॥
इयञ्च पृथिवी देवी चतुर्भिर्धार्य्यते शुभा।
ये दीनेषु दयां नित्यं कुर्व्वन्ति कृपया युताः ॥
येषाञ्चैव न दर्पो वै जायते च कदाचन।
उपकारपरा ये च जितेन्द्रियतया तथा ॥ २
महायौवनव्याधौ च स्वस्थास्तिष्ठन्ति नित्यशः।
एतैश्च पुण्यस्तम्भैश्च धार्य्यते पृथिवी पुनः ॥ २
न केवलञ्च शेषेण धृता चैव धरा स्वयम्।
तस्माच्च जलराजोऽसि देयं सर्व्वं त्वया मम ॥
इदञ्च प्रार्थ्यते मेघजलं नित्यफलप्रदम्।
देहि मे त्वं महाराज कृपां यदि करिष्यसि ॥
इति सम्प्रार्थिते तेन गौतमेन महात्मना।
उवाच वचनं तस्मै गर्त्तञ्च क्रियतां त्वया ॥ २७
इत्युक्तञ्च कृतं तेन जलेन पूरितं तदा।
अक्षयञ्च जलं तेऽस्तु तीर्थभूतं भवेदिह ॥ २८
तव नाम्ना च विख्यातं क्षेत्रञ्चैव भविष्यति।
अत्र दत्तं हुतं जप्तं श्राद्धञ्चैवाक्षयं भवेत् ॥ २९
इत्युक्त्वान्तर्दधे देवः स्तुतस्तेन महात्मना।
ततश्च गौतमस्तत्र जलं प्राप्य सुदुर्लभम् ॥ ३०
नित्यं नैमित्तिकं कर्म्म चकार विधिवत् तदा।
व्रीहींश्चैव यवांश्चैव नीवारानप्यनेकधा ॥ ३१
वापयामास तत्रैव हवनार्थं मुनीश्वराः।
जलञ्चैवाक्षयं तत्र स्वतश्चैव ऋषीश्वराः ॥ ३२
वृक्षाश्च विविधास्तत्र पुष्पाणि च फलानि च।
धान्यानि विविधानीह ह्यासंस्तत्राप्यनेकशः ॥
ऋषयो ह्यागतास्तत्र गौतमानुमतास्तदा।
पशवः पक्षिणश्चैव समाजग्मुः सुखाय वै ॥ ३४
तद्वनं सुन्दरं ह्यासीत् पृथिव्या मण्डले परम्।
ऋषयोऽपि वने तत्र शुभकर्म्मपरायणाः ॥ ३५
वासं चक्रुरनेके च पुत्त्रशिष्यसमन्विताः।
वापयामासुर्धान्यानि कालक्रमणहेतवे ॥ ३६
ततश्चैवात्र ते तस्य दुःखं कालस्य नाविदन्।
आनन्दं तद्वने ह्यासीत् प्रभावाद्गौतमस्य च ॥ ३
एवं जाते तदा तत्र यज्जातं श्रूयतां पुनः।

कदाचिद्गौतमेनैव जलार्थं प्रेषिता गताः ॥ ३८
शिष्यान् जलसमीपे तु गतान् दृष्ट्वा न्यषेधयन्।
ऋषिपत्न्यो वयं तत्र ग्रहीष्यामो विदूरतः ॥ ३९
पश्चाच्चैव जलं ग्राह्यमित्येवं पर्य्यभर्त्सयन्।
परावृत्य तदा तैश्च ऋषिपत्न्यै निवेदितम् ॥ ४०
सा चापि तान् समादाय समाश्वास्य च ताः स्वयम्।
जलं नीत्वा ददौ तस्मै गौतमाय तपस्विने ॥ ४१
नित्यं सम्पादयामास जलेन ऋषिसत्तमाः।
तास्तैव ऋषिपत्न्यश्च क्रुद्धास्तां पर्य्यभर्त्सयन् ॥ ४२
स्वाम्यग्रे विपरीतञ्च ताभिः सर्व्वं निवेदितम्।
अहल्या मानवी नाथ भर्त्स्यते चैव नित्यशः ॥ ४३
वयञ्च जीविता यूयं निःस्थलाः स्थलतां गताः।
अनृतं साहसं माया मूर्खत्वमतिलोभता ॥ ४४
अशौचत्वं निर्द्दयत्वं स्त्रीणां दोषाः स्वभावजाः।
धिग्जीवितञ्च भवतां तपश्च किं फलप्रदम् ॥ ४५
अस्माकं जीवितं धिक् चाहल्या नित्यं प्रकुप्यति।
इति तासां वचः श्रुत्वा गाम्भीर्य्यमवलम्बिताः ॥ ४६
तस्या वाक्यमिदं नैव भविष्यति भवेदिति।
सत्यं वदति सा नो चेज्जीवितञ्च कुतो भवेत् ॥ ४७
कृतघ्नाश्च वयं सर्व्वं यदेनां कुत्सितं वचः।
अब्रवीमश्च कथं पुष्टा यया च जीविता वयम् ॥ ४८
ताश्च परस्परं नित्यं तस्यै क्षेमपरायणाः।
सा चापि विनयेनैव तासाञ्च कोमलं वचः ॥ ४९
दुष्टास्ता ऋषिपत्न्यश्च स्वामिभ्यः पर्य्यभर्त्सयन्।
कदाचिद्वनचर्य्यायां ऋषयस्ते गताः स्वयम् ॥ ५०
दैवयोगात् तया तत्र तासां दुःखं निवेदितम्।
गौतमाग्रे वचः श्रुत्वा दुःखेन च समन्विताः ॥ ५१
सत्यं वदन्ति पत्न्यश्च मेनिरे ते वचस्तदा।
सर्व्वे ते च मिलित्वा तु पत्न्यः सर्व्वास्तथा पुनः।
विचारतत्परा ह्यासन् भाविकर्म्मप्रसङ्गतः ॥ ५२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
त्र्यम्बकेश्वरमहिमवर्णनं नाम
द्विपञ्चाशोऽध्यायः ॥५२॥

त्रिपञ्चाशोऽध्यायः।

सूत उवाच।

तैश्च विचारितं यच्च श्रूयतामृषिसत्तमाः।
मया च कथ्यमानं तद्ब्राह्मणस्य विचेष्टितम् ॥ १
यूयञ्च जीविता मेऽद्य मानश्चामानिनः कथम्।
तदा दुःखं भवेदेव नात्र कार्य्या विचारणा ॥ २
तस्मात् तथा च कर्त्तव्यं यथा मानो भवेन्न हि।
अन्तरायैश्च तपसां न हन्येत कदाचन ॥ ३
तस्माच्छलञ्च कर्त्तव्यं यथा स्वमाश्रमाद्बहिः।
अस्माभिर्वहुधा भर्त्स्य निष्कास्येत यथा तथा ॥ ४
एवं विचार्य्य तैस्तत्र पूजितोऽथ विनायकः।
उपासनञ्च तस्यैव चक्रुस्ते ऋषिसत्तमाः ॥ ५
दूर्व्वादलैरनेकैश्च शतपत्रैश्च तण्डुलैः।
सिन्दूरैश्चन्दनैश्चैव धूपारात्रिकपूजनैः ॥ ६
मोदकैर्विविधैश्चैव पूजयामासुर्वै तदा।
ततः प्रसन्नो हरजस्तेभ्यश्चेदं वचोऽब्रवीत् ॥ ७

गणपतिरुवाच।

प्रसन्नोऽस्मि वरं ब्रूत यूयं किं करवाणि वः।
तदीयं तद्वचः श्रुत्वा ऋषयो वाक्यमब्रुवन् ॥ ८
यदि प्रसन्नो देवेश देयोऽस्माकं वरस्त्वया।
तथा कार्य्यं त्वया देव गौतमो ह्याश्रमाद्बहिः ॥ ९
निष्कास्यते च ऋषिभिः परिभर्त्स्य पुनः पुनः।
एवं सम्प्रार्थितस्तैस्तु विहस्य वचनं पुनः ॥ १०
श्रूयतामृषयः श्रेष्ठा अयुक्तं क्रियतेऽधुना।
अपराधं विना तस्मै क्रुध्यते हानिरेव च ॥ ११
उपकृतं पुरा यैस्तु तेभ्यो दुःखं न दीयते।
यदा च दीयते दुःखं तदा नाशो भवेदिह ॥ १२
ईदृशञ्च तपः कृत्वा साध्यते फलमुत्तमम्।
शुभं फलं स्वयं हित्वा साध्यते न हितं पुनः ॥ १३
हित्वा तु काञ्चनञ्चैव गृह्यते काचमेव च।
पश्चाद्युक्तञ्च यत् स्याद्वै कर्त्तव्यं तत् तथा पुनः ॥ १४
इत्येवं वचनं श्रुत्वा तस्य ते ऋषिसत्तमाः।
बुद्धिमोहं तदा प्राप्ता इदमेव वचोऽब्रुवन् ॥ १५
कर्त्तव्यं हि त्वया स्वामिन्निदमेव न चान्यथा।
इत्युक्तस्तु तदा देवो गणेशो वाक्यमब्रवीत् ॥ १६

असाधुः साधुताञ्चैव याति चैव कदाचन।
साधुश्चासाधुतां नैव प्राप्नोतीति सुनिश्चितम्॥ १७
असाधुः साधवे दुःखं ददाति दुष्टयोगतः।
सुखञ्च मन्यते साधुरग्रे सुखविवृद्धये॥ १८
दुःखदातुस्तदा साधुः सुखञ्चैव प्रयच्छति।
यदा च भवतां दुःखं जातं नाशनमात्मनः॥ १९
तदा सुखं प्रदत्तञ्च गौतमेन महर्षिणा।
इदानीन्तु भवद्भिश्च तस्मै दुःखं प्रदीयते॥ २०
नैतद्युक्ततमं लोके सर्व्वथा ऋषिसत्तमाः।
स्त्रीबलान्मोहिता यूयं नूनमेवं करिष्यथ॥ २१
एतद्धिततमं तस्य भविष्यति न संशयः।
पुनश्चायमृषिश्रेष्ठो दास्यति वः सुखं ध्रुवम्॥ २२
इत्येवं वचनं तेन यद्यप्युक्तं न मेनिरे।
भक्ताधीनतया तेन कृतञ्च श्रूयतां पुनः॥ २३
भवद्भिः प्रार्थ्यते यच्च करिष्ये तत् तथा ह्यहम्।
पश्चाद्भावि भवेदेव इत्युक्त्वान्तरधीयत॥ २४
गौतमश्च न जानाति ऋषिकृत्यं दुराशयम्।
आनन्दमनसा तेन क्रियते नित्यकर्म्म च॥ २५
तदनन्तरं यज्जातं श्रूयतामृषिसत्तमाः।
गौतस्य च केदारस्तत्राजन् व्रीहयो यवाः॥ २६
गणपतिस्तत्र गौर्भूत्वा जगाम दुर्व्वलः किल।
कम्पमाना तदा गत्वा केदारे गौतमस्य च॥ २७
व्रीहींश्च भक्षयामास यवांश्च ऋषिसत्तमाः।
एतस्मिन्नन्तरे दैवाद्गौतमश्च समागतः॥ २८
केदारे चैव दृष्टायां दयालुर्गौतमः स्वयम्।
तृणस्तम्बं समादाय वारयामास तां तदा॥ २९
तृणस्तम्बेन स्पृष्टा सा पपात पृथिवीतले।
मृता च तत्क्षणादेव ऋषिश्च पश्यतस्तदा॥ ३०
ऋषयश्छन्नरूपास्ते ऋषिपत्न्यस्तथाऽशुभाः।
जजुस्ते च तदा सर्व्वं किं कृतं गौतमेन च॥ ३१
गौतमोऽपि स्वयं तत्र ह्यहल्या सापि विस्मिता।
किं जातञ्च कथं देवः कुपितो मधुसूदनः॥ ३२
किं कर्त्तव्यं क्व गन्तव्यं हत्या च समुपस्थिता।
एतस्मिन्नन्तरे विप्रा गौतमं पर्य्यभर्त्सयन्॥ ३३
विप्रपत्न्यस्तथाहल्यां दुर्व्वचोभिर्व्यथां ददुः।

ऋषिपत्न्य ऊचुः।

धिग् ज्ञानं ते ऋषिश्रेष्ठ धिक् तपस्त्व
धिग्घोमं ते त्रिकाले च धिक् कर्म्म विवि
धिग्ध्येतत् तव चातुर्य्यं धिक् त्वां ते तु व
सर्व्वां धिक्कारतां यातु त्वदीयो गुणस
इत्येवं परिभर्त्स्यैव ऋषयस्तेऽमलाशयाः॥
सुखं न दृश्यतां ह्यस्य गोघ्नस्योचुः परस्पर
अन्यच्चैव कृतं तैस्तु ऋषिभिः सुदुरात्मभिः।
श्रूयतामृषयः श्रेष्ठाः कथयामि यथाश्रुतम्।
ऋषयो ऋषिपत्न्यश्च शिष्याः पुत्रास्तथा पुनः
गौतमं पर्य्यभर्त्सन्त गम्यतां गम्यतामिति।
सुखं न दर्शनीयञ्च दृष्ट्वा न्यूनं भवेदिह॥
यावदाश्रमसमीपे त्वं तावदेव हविर्भुजः।
पितरश्चैव गृह्णन्ति ह्यस्मद्दत्तं न किञ्चन॥ ४०
तस्माद्गच्छ पुनस्त्वञ्च परिवारसमन्वितः।
इत्युक्त्वा ते तदा सर्व्वे पाषाणैः समताडयन्॥
गौतमोऽपि तदा तत्र हा हा किं किं भविष्य
सत्यञ्च ऋषयः श्रेष्ठा गच्छामीति वचोऽब्रवीत्।
इत्युक्त्वा गौतमस्तस्मात् स्थानाच्च निर्गतस्तदा
गत्वा क्रोशं तदा चक्रे आश्रमं तदनुज्ञया॥
यावच्चैवाभिशापो वै तावत् कार्य्यं न किञ्चन
कर्म्मणि नाधिकारोऽस्ति दैवे पित्र्ये च वैदिके
तत्रैव संस्थितश्चैव गौतमो ऋषिसत्तमः।
ऋषयो नैव भाषन्ते ऋषिपत्न्यस्तथैव च॥
यथा तेन न गच्छन्ति यत्रासौ ऋषिसत्तमः।
कदाचित् पथि दृष्टो वै दृष्ट्वा पत्न्यो यथा पुनः
वस्त्रं कृत्वान्तरीयञ्च गच्छन्ति मायिनस्तदा।
तदा दुःखं महत् प्राप्तं गौतमेन महर्षिणा॥
मासार्द्धञ्च ततो नीत्वा ऋषीन् सम्प्रार्थयत्
अनुकम्प्यो भवद्भिस्तु कथ्यते क्रियते मया॥
यथा मदीयं पापञ्च गच्छतीति निवेद्यताम्।
नोपदेशं विना सिद्धिर्जायते कर्म्मणो नृणाम्
इत्युक्तास्ते तदा विप्रा नोचुश्चैव परस्परम्।
अत्यन्तसेवया पृष्टा मिलित्वा ह्येकतः स्थिताः
गौतमो दूरतः स्थित्वा नत्वा च ऋषिसत्तमा
पप्रच्छ विनयाविष्टः किं कार्य्यं हि मयाधुना

(क) ऋषिश्च विस्मितस्तदेति पाठः क्वचित्कः।

…त्युक्तो ऋषिणा तेन ऋषयो वाक्यमब्रुवन्।

ऋषय ऊचुः।

…ष्कृतिं हि विना शुद्धिर्जायते न कदाचन॥ ५२
…स्मात् त्वं देहशुद्ध्यर्थं प्रायश्चित्तं समाचर।
…न्त्वा च पृथिवीं सर्व्वां पापं स्वञ्च प्रकाशय॥ ५३
…नरागत्य चात्रैव चर मासव्रतं तथा।
…तमेकोत्तरञ्चैव ब्रह्मणश्च गिरेस्तथा॥ ५४
…क्रमणं विधायैव शुद्धिस्तेन भविष्यति।
…थवा तु समानीय गङ्गास्नानं समाचर॥ ५५
…ार्थिवानां तथा कोटिं कृत्वा देवं विशेषतः।
…ङ्गायाञ्च ततः स्नात्वा पूतश्चैव भविष्यसि॥ ५६
…थमं दश तथा चैकं गिरेः प्रक्रमणं कुरु।
…तकुम्भैस्तथा स्नात्वा पार्थिवी निष्कृतिर्भवेत्॥ ५७
…येवमृषिभिः प्रोक्तं तथैवोमिति तद्वचः।
…र्थिवानां तथा पूजां गिरेः प्रक्रमणं तथा॥ ५८
…रिष्यामि ऋषिश्रेष्ठा आज्ञया श्रीमतामिह।
…त्युक्त्वा ऋषिवर्य्यश्च कृत्वा प्रक्रमणं गिरेः॥ ५९
…दाहस ऋषिस्तत्र पार्थिवानकरोत् तदा।
…विधानपूर्व्वकं तच्च चकार गौतमः स्वयम्॥ ६०
…ध्यानञ्चैव शिवस्यैव कृत्वा विधिविधानतः।
…अहल्या च तथा साध्वी युक्तं सर्व्वं चकार सा॥ ६१
…शिष्याश्च प्रतिशिष्याश्च चक्रुः सेवां तदा तयोः।
…शिवः प्रसन्नतां यातः कदाचिद्वृषिसत्तमाः॥ ६२
…कैलासशिखरात् तत्र गिरिजा-गणकैः सह।
…प्रागत्य वचनं तस्मै वरं ब्रूहि मनेप्सितम्॥ ६३
…दीयं सुन्दरं रूपं शिवस्य परमात्मनः।
…दृष्ट्वा हृदि मुदा युक्तो ह्यसाध्यं किं भवेन्मम॥ ६४
…नमस्कृत्य शिवायैव स्तुतिं चक्रे स्वयं तदा।
…निर्गुणाय नमस्तुभ्यं शङ्कराय नमः पुनः॥ ६५
…स्मात् प्रकृतिरूपाय पुरुषाय नमः पुनः।
…स्माद्विष्णुस्वरूपाय ततश्च ब्रह्मणे नमः॥ ६६
…ब्रह्मणा विष्णुना चैव पूज्याय संशयच्छिदे।
…पश्चाद्रुद्रस्वरूपाय ततश्च व्यापकाय च॥ ६७
…व्याप्याय च नमस्तुभ्यं ब्रह्मणे परमात्मने।
…अकारादि-चकारान्त-वीजरूपाय ते नमः॥ ६८
निर्गुणाय गुणायैव स्वरूपाय नमोऽस्तु ते।
नमस्कारं ततः कृत्वा बद्धाञ्जलिपुटः स्थितः॥ ६९
निष्पापं कुरु मे देव शिवो वाक्यमुपाददे।
धन्योऽसि कृतकृत्योऽसि निष्पापोऽसि सदा मुने॥ ७०
एभिर्दुष्टैः किल त्वञ्च च्छलितोऽसि महामुने।
तवैव दर्शनाल्लोका निष्पापाश्च भवन्ति च॥ ७१
कृतघ्नाश्च तथा जाता निष्कृत्या नैव शुद्धिताः।
दर्शनादेव येषां यत् (क) पापञ्च दूरतो गतम्॥ ७२
इत्युक्त्वा शङ्करस्तस्मै तेषां दुश्चरितं तदा।
सर्व्वं निवेदयामास श्रुत्वा विस्मितमानसः॥ ७३
आह पुनः शिवं सोऽपि उपकारः कृतो महान्।
यद्येवं न कृतं तैस्तु दर्शनं ते कुतो भवेत्॥ ७४
धन्याश्च ऋषयश्चैव मह्यं शुभतरं कृतम्।
इत्येवं वचनं श्रुत्वा प्रसन्नः शङ्करः पुनः॥ ७५
धन्योऽसि त्वमृषिश्रेष्ठ व्रियतां वरमुत्तमम्।
गौतमोऽपि विचार्य्यैवं लोके विश्रुतमित्यत॥ ७६
अन्यथा न भवेदेव तस्मादुक्तं समाचरेत्।
निश्चित्यैवं मुनिश्रेष्ठः शङ्करं वाक्यमब्रवीत्॥ ७७
सत्यं नाथ ब्रवीषि त्वं तथापि पञ्चभिः कृतम्।
नान्यथा भवतीत्यत्र यज्जातं जायतां कुतः॥ ७८
यदि प्रसन्नो देवेश गङ्गा च दीयतां मम।
इत्युक्त्वा वचनं तत्र धृत्वा चरणपङ्कजम्॥ ७९
नमश्चकार देवेशं गौतमो लोककाम्यया।
ततस्तु शङ्करो देवः पृथिव्याश्च दिवश्च सः॥ ८०
सारञ्चैव समुद्धृत्य रक्षितं पूर्व्वमेव यत्।
विवाहे ब्रह्मणे दत्तं ह्यवशिष्टञ्च किञ्चन॥ ८१
तत् तस्मै दत्तवान् शम्भुर्भक्तवत्सलतां स्वयम्।
ख्यापयन् भुवने तस्य गौतमस्य महात्मनः॥ ८२
गङ्गाजलं तदा तत्र स्त्रीरूपमभवत् परम्।
तस्याश्चैव ऋषिश्रेष्ठः स्तुतिं कृत्वा नतिं व्यधात्॥ ८३
धन्यासि कृतकृत्यासि पावितं भुवनं त्वया।
माञ्च पावय गङ्गे त्वं पतितं निरये ध्रुवम्॥ ८४
शम्भुरपि तदा तस्यै पावय त्वं मदाज्ञया।
ऊचिवान् वचनं तत्र सर्व्वेषां हितकृन्नृणाम्॥ ८५
इति श्रुत्वा वचस्तस्य शम्भोश्च गौतमस्य च।
उवाचैव पुनर्गङ्गा श्रूयतामृषिसत्तमाः॥ ८६

(क) मद्दर्शनाद्येषं यदिति क्वचित् पाठः।

ऋषिञ्च पावयित्वाहं सपरिवारन्तु शङ्करम्।
गमिष्यामि वचः सत्यं ब्रवीमि ऋषिसत्तमाः ॥ ८७
इत्युक्ते गङ्गया तत्र ईश्वरी वाक्यमब्रवीत्।
त्वया तत्रैव स्थातव्यं यावत् कलिः समाव्रजेत् ॥ ८८
वैवस्वते मनौ देवि ह्यष्टाविंशतिमे युगे।
तावत् त्वया च स्थातव्यं लोकानां हितकाम्यया ॥ ८९
एवं श्रुत्वा वचस्तस्य उवाच सा सरिद्वरा।
मया चैव स्थितश्चात्र काश्याञ्च पावनाय वै ॥ ९०
पुनरत्रैव किं स्थास्ये पावयित्वा ऋषिं व्रजे।
तदा नेति ऋषिश्चापि शङ्करश्चाह तां पुनः ॥ ९१
स्थित्वा किञ्चित् पुनर्गङ्गा वाक्यमूचे सुशोभनम्।
माहात्म्यमधिकं चेत् स्यात् सर्व्वेभ्यश्च मुनीश्वर ॥ ९२
अन्यच्चैव ऋषीनेतांश्छलकारणतत्परान्।
पावितुं न समर्थास्मि अन्तर्द्धानं व्रजे ह्यहम् ॥ ९३
इति चान्यच्छङ्करश्च वपुषा सुन्दरेण ह।
तिष्ठेच्च मत्समीपे हि सगणो गिरिजासह ॥ ९४
एवं तस्या वचः श्रुत्वा शङ्करो वाक्यमाददे।
धन्यासि श्रूयतां देवि अहं भिन्नो न कर्हिचित् ॥ ९५
तथापि स्थीयते ह्यत्र स्थीयताञ्च त्वया पुनः।
इत्येवं वचनं श्रुत्वा गङ्गा च प्रत्यपूजयत् ॥ ९६

इति श्रीशैवे महापुराणे ज्ञानसंहितायां त्र्यम्बकमहिमा नाम त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशोऽध्यायः।

सूत उवाच।

एतस्मिन्नन्तरे देवा ऋषयश्च पुरातनाः।
सुतीर्थान्यप्यनेकानि क्षेत्राणि विविधानि च ॥ १
आगत्य गौतमञ्चैव गङ्गाञ्च गिरिशं तथा।
जय जयेति भाषन्तो पूजयामासुः सादरम् ॥ २
स्तुतिञ्च विविधां तेषां चक्रुस्ते च मुदान्विताः।
गङ्गा प्रसन्ना तेभ्यश्च गिरिशश्च तथैव च ॥ ३
वरं ब्रूत ऋषिश्रेष्ठा ददामः प्रियकाम्यया।

ऋषय ऊचुः।

यदि प्रसन्नो देवेश प्रसन्ना त्वं सरिद्वरे ॥ ४
स्थातव्यमत्र युष्माभिः प्रियार्थं सत्कृतां नृणाम्।

गङ्गोवाच।

यूयं सर्व्वे प्रियार्थञ्च तिष्ठन्तु किं मया पुनः।
गौतमं पावयित्वाहं गमिष्यामि यथागतम्।
भद्रं वश्च सदाप्यस्तु पवित्रीक्रियतां जगत् ॥
इत्युक्तास्ते तदा सर्व्वे ऊचुः शुभतरं वचः।
अस्माकं पावनायैव स्थातव्यं भुवने त्विह ॥

गङ्गोवाच।

भवत्तु मे विशेषोऽत्र ह्येयश्चैव कथं भवेत्।

सूत उवाच।

इत्युक्तास्ते तदा देवा ऋषयः सरितस्तथा।
क्षेत्राणि तीर्थमुख्यानि प्रणिपत्याब्रुवंस्तदा।

सर्व्वे देवा ऊचुः।

सिंहराशौ यदा स्याद्वै गुरुः सर्व्वसुरोत्तमः।
तदा वयञ्च सर्व्वे वै आगमिष्यामस्त्वां पुनः।
एकादश च वर्षाणि लोकानां पातकन्त्विह ॥
क्षालितं यच्चवैदेव मलिनाः स्म सरिद्वरे।
तस्यैव क्षालनार्थञ्च यास्यामः सर्व्वथा प्रिये।
अनुग्रहाय लोकानामस्माकं प्रियकाम्यया।
स्थातव्यं शङ्करेणैव त्वया चैव सरिद्वरे ॥ १२
यावत् सिंहे गुरुश्चैव स्थास्यामस्तावदेव हि।
त्वयि स्नानं त्रिकालञ्च शङ्करस्य च दर्शनम्।
कृत्वा पापं विमोच्यामो नात्र कार्य्या विचारणा
इत्येवं प्रार्थिता तैस्तु गौतमेन महर्षिणा ॥
स्थितोऽसौ शङ्करश्चैव स्थिता सा च सरिद्वरा।
तद्दिनं हि समारभ्य सिंहस्थे च बृहस्पतौ ॥
आयान्ति सर्व्वतीर्थानि क्षेत्राणि देवतानि
पुष्करादयानि तीर्थानि गङ्गाद्याः सरितस्तथा
वासुदेवादयो देवा वसन्ति गौतमीतटे।
यावत् तत्र स्थितानीह तावत् तेषां फलं न हि
स्वप्रदेशे समायाते ह्येतेषाञ्च फलं लभेत्।
गङ्गां रेवां गयाञ्चैव गोमतीञ्च ऋषीश्वराः।
गन्तव्यं नान्यथा क्वापि यावत् सिंहे गुरुर्भवेत्
गोमतीं प्रथमं गत्वा गोदावरीं ततो व्रजेत्
पुनश्च गोमतीं गत्वा हत्याभिः परिमुच्यते।
त्र्यम्बकं नाम विख्यातं ज्योतिषां लिङ्गमुत्तमम्
गौतस्याश्च तटे प्रोक्तं महापातकनाशनम्।

एवं वश्च समाख्यातं यत् पृष्टोऽहं मुनीश्वराः ॥ २१
इत्येवं वचनं श्रुत्वा पुनरूचुस्तदा हि ते।

ऋषय ऊचुः।

गङ्गा च जलरूपेण कुतो जाता वद प्रभो ॥ २२
तन्माहात्म्यं विशेषेण वक्तुमर्हस्यशेषतः।
शैर्विप्रैर्गौतमायैव कृतं दुष्टं दुरात्मभिः ॥ २३
तेषां किञ्च ततो जातमुच्यतां व्यासशिष्य वै।
एवं श्रुत्वा वचस्तेषामुवाच रोमहर्षणः ॥ २४

सूत उवाच।

श्रूयतामृषयः सम्यक् कथयामि यथाश्रुतम्।
एवं सम्प्रार्थिता देवैर्गौतमेन तदा स्वयम् ॥ २५
ब्रह्मणश्च गिरेस्तस्मादवतार सरिद्वरा।
उदुम्बरस्य शाखायाः प्रवाहो निःसृतस्तदा ॥ २६
तत्र स्नात ऋषिश्रेष्ठो गौतमो नाम विश्रुतः।
आगताश्च ते सर्व्वे स्नानं चक्रुर्मुदान्विताः ॥ २७
गङ्गाद्वारञ्च तन्नाम प्रसिद्धमभवत् तदा।
पश्चात् चेत्रे च ऋषयो गौतमस्पर्द्धिनस्तदा ॥ २८
स्नानार्थमागतान् दृष्ट्वा ह्यन्तर्द्धानं गता स्वयम्।
मा मेति गौतमस्तत्र व्याजहार मुनीश्वराः ॥ २९

गौतम उवाच।

इमे चैव मदीयाश्च साधवो वाप्यसाधवः।
एतत्पुण्यप्रभावेण दर्शनं दीयते त्वया ॥ ३०

गङ्गोवाच।

इति दुष्टतमाश्चैव नैव द्रष्टा मया पुनः।
कृतघ्ना द्रोहिणश्चैव वराका मानिनो ध्रुवम् ॥ ३१
जाल्माः पाषण्डिनश्चैव वर्ज्यास्ते ऋषिसत्तम।
इति वाणी समुत्पन्ना ह्याकाशे ऋषिसत्तमाः ॥ ३२
तच्छ्रुत्वा वचनं तस्या ऋषिर्वाक्यमुपाददे।
मातश्च श्रूयतामेतन्महतां रीतिरेव च ॥ ३३
अपकारिषु ये लोक उपकारं चरन्ति वै।
तेन पूतो भवाम्यत्र भगवद्वाक्यतः श्रुतम् ॥ ३४
तस्मात् त्वया च तत् कार्य्यं सत्यञ्च भगवद्वचः।
पुनर्वाणी समुत्पन्ना सत्यञ्च कथ्यते त्वया ॥ ३५
तथापि संग्रहार्थञ्च प्रायश्चित्तं चरन्ति चेत्।
शतमेकोत्तरञ्चात्र कार्य्यं प्रक्रमणं गिरेः ॥ ३६
ततश्चैवाधिकारश्च जायते दुष्टकर्म्मणाम्।
इति श्रुत्वा वचस्तस्याश्चक्रुश्चैवं तथा पुनः ॥ ३७
गौतमश्च ततः श्रुत्वा चान्तव्यश्चापराधकः।
एवं कृते तदा तेन गौतमेन तदाज्ञया ॥ ३८
कुशावर्त्तं तदा चक्रे गङ्गाद्वारादधोगतम्।
ततः प्रादुरभूत् तत्र तथैव प्रीतये पुनः ॥ ३९
कुशावर्त्तञ्च विख्यातं तीर्थमासीदनुत्तमम्।
तत्र स्नातो नरो यस्तु मोक्षाय परिकल्पते ॥ ४०
तत्रैव ऋषयो दिव्यां स्तुतिं कृत्वा पुनः पुनः।
अहल्यायाः पुरः कृत्वा ऋषिपत्न्यस्तथा पुनः ॥ ४१
चक्रुस्ते तु तदा स्नानं कृतार्था ह्यभवंस्तदा।
शिवस्य दर्शनं कृत्वा आनन्दं परमं गताः ॥ ४२
गङ्गाद्वारे कुशावर्त्ते शिवस्य त्र्यम्बकस्य च।
निकटे कोटितीर्थे च स्नात्वा गर्भं न गच्छति ॥ ४३
गङ्गाञ्च सेवते विष्णुर्गङ्गाञ्च सेवते हरः।
गङ्गाञ्च सेवते ब्रह्मा को वा गङ्गां न सेवते ॥ ४४
सामान्यो यो भवेच्चैव सेवयित्वा सुखी भवेत्।
मुक्तिमायाति निकटे यश्चैव च व्यवस्थितः ॥ ४५
गङ्गाञ्चैव तदा दृष्ट्वा पञ्चवट्यां हरिः स्वयम्।
पावनार्थञ्च जगतां स्थितोऽसौ रघुनन्दनः ॥ ४६
पूर्व्वं गङ्गा ततो विष्णुः स्थितः किं दुर्लभं भवेत्।
आजन्म मरणाद्वासाद्वाराणस्याञ्च यत् फलम् ॥ ४७
तत् फलं याममात्रेण पञ्चवट्यां निवासिनः।
पूर्व्वं रामं ततो देवं त्र्यम्बकं लोकशङ्करम् ॥ ४८
गङ्गाद्वारञ्च तद्दृष्ट्वा कः पापी न प्रमुच्यते।
ये स्नातास्तत्र तत्रैव जीवन्मुक्ता भवन्ति ते ॥ ४९
इति वश्च समाख्यातं गौतम्या माहात्म्यमुत्तमम्।
गौतमो ऋषयश्चान्ये मिलिताश्च परस्परम् ॥ ५०
त्र्यम्बकस्य च माहात्म्यं कथितञ्च मुनीश्वराः।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥ ५१
अतः परं प्रवक्ष्यामि माहात्म्यं श्रूयतां पुनः।
वैद्यनाथेश्वरस्यैव शृण्वतां पापहारकम् ॥ ५२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां त्र्यम्बकमहिमवर्णनं नाम चतुः-पञ्चाशोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशोऽध्यायः।

सूत उवाच।

रावणो राक्षसश्रेष्ठो मानी मानपरायणः।
आराध्य च हरं तत्र कैलासे पर्व्वतोत्तमे ॥ १
कियत् कालं समाराध्य प्रसन्नो न हरो यदा।
ततश्चायं हिमवतो दक्षिणे वृक्षखण्डके ॥ २
भूमौ गर्त्तं तदा कृत्वा तत्राग्निञ्च समादधौ।
तन्निकटे शिवं स्थाप्य हवनं विविधं तथा ॥ ३
चकार राक्षसश्रेष्ठो न प्रसन्नस्तथापि ह।
तदा शिरांसि छित्त्वा स पूजनं शङ्करस्य च ॥ ४
आरब्धञ्च तदा तेन छिन्नानि नव वै यदा।
एकस्मिन्नवशिष्टे तु प्रसन्नः शङ्करस्तदा ॥ ५

शिव उवाच।

मनसश्चेप्सितं ब्रूहि ददामि तव राक्षस।

राक्षस उवाच।

यदि प्रसन्नो देवेश देहि मे बलमुत्तमम् ॥ ६
शिरांसि पूर्व्ववत् स्वामिन् कुरु मे शङ्कर प्रभो।
इति तस्य वचः श्रुत्वा भक्तिमत्त्वाच्चकार सः ॥ ७
यथेप्सितं ददौ तस्मै ह्यतुलं बलमुत्तमम्।
शिरांसि पूर्व्ववत् कृत्वा नीरुजानि तथा पुनः ॥ ८
प्रसादं तस्य सम्प्राप्य जगाम भवनं प्रति।
देवाश्च दुःखितास्तत्र ऋषयो ये च सत्तमाः ॥ ९
किं कुर्म्मः क्व च गच्छामः किं भविष्यति वा पुनः।
सार्थश्च पक्षतां प्राप्तः किं किं न साधयिष्यति ॥ १०
इति दुःखं समापन्नाः पप्रच्छुर्नारदं तदा।
सर्व्वकार्य्यसमर्थोऽसि दुःखं दुष्टः करिष्यति ॥ ११
क्व यास्यामो वयञ्चात्र दुष्टेन पीड़िताः प्रभो।
इति तद्वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ॥ १२

नारद उवाच।

दुःखं त्यजत भो देवा युक्तिञ्च कथयाम्यहम्।
इत्युक्त्वा च पथि तत्र यत्रैव गम्यतेऽमुना ॥ १३
वीणाञ्च प्रेरयन् यातस्तावत् स राक्षसो गतः।
तं राक्षसं तदा दृष्ट्वा नारदो वचनं पुनः ॥ १४
उवाच देवकार्य्यार्थं धन्यस्त्वं राक्षसोत्तम।
त्वां दृष्ट्वा तु मनो मेऽद्य प्रसन्नञ्च यथा मया ॥ १५
वक्तुं नैव विशक्येत पृच्छ्यते त्वं कुतो गतः।
शीघ्रं हृष्टतरो यासि किं हृष्टोऽसि ब्रवीषि
श्रोतुं कुतूहलं मेऽद्य कथ्यतां राक्षसोत्तम।
इति पृष्टस्तदा तेन राक्षसो वाक्यमब्रवीत्।

रावण उवाच।

श्रूयताञ्च ऋषिश्रेष्ठ कथयामि शृणुष्व तत्।
अहं शिवं समाराध्य प्रसन्नं तं विधाय च ॥
अतुलञ्च बलं लब्ध्वा गच्छामि च गृहं प्रभो।
पुनः पप्रच्छ तत्रैव कथमाराधितः शिवः ॥
तदेव कथय त्वञ्च आप्तत्वात् पृच्छ्यते मया।

रावण उवाच।

श्रूयताञ्च ऋषिश्रेष्ठ कथयामि यथा तथा ॥
पूर्व्वं मया तु कैलासे तपोऽर्थञ्च गतं मुने।
तत्रैव बहुकालं वै तपस्तप्तं सुदारुणम् ॥ २१
यदा न शङ्करस्तुष्टस्ततश्च परिवर्त्तितम्।
आगत्य वृक्षखण्डे वै तपस्तप्तं मया मुने ॥ २२
ग्रीष्मे पञ्चाग्निमध्ये तु वर्षासु स्थण्डिलेशयः।
शीते जलान्तरस्थायी कृतञ्चैव त्रिधा तपः ॥
एवं मया कृतं यर्हि तपश्चैव ऋषीश्वर।
तथापि शङ्करो मह्यं न प्रसन्नो मुनीश्वर ॥
तदा मया च क्रुद्धेन भूमौ गर्त्तं विधाय च।
तत्राग्निञ्च समाधाय पार्थिवं परिकल्प्य च ॥
गन्धैश्च चन्दनैश्चैव धूपैश्च विविधैस्तथा।
नैवेद्यैः पूजितः शम्भुरारात्रिकविधानतः ॥
प्रणिपत्य स्तवैः पुण्यैस्तोषितः शङ्करस्तथा।
नृत्यैर्गीतैश्च वादित्रैर्मुखाङ्गुलिसमर्पणैः ॥ २६
यज्ञैश्च विविधैश्चान्यैः पूजितो भगवान् हरः।
न तुष्टिसम्मुखो जातस्तदा च दुःखितो ह्यहम्
धिक् शरीरं बलञ्चैव धिक् तपःकरणं मम।
इत्युक्त्वा च मया ह्यत्र स्थापितेऽग्नौ हुतं बहु
पुनश्चैव शरीरं हि त्यक्ष्याम्यग्नौ विचार्य्य च।
शिरांसि च विशुद्धानि कृत्वा तु चन्दनादिभिः
छित्त्वैकैकं शिरः सर्व्वाण्यर्पितानि मया नव।
यावच्च दशमं छेत्तुं प्रारब्धमृषिसत्तम ॥ ३१
तावच्चैव स्वयं देवो ज्योतीरूपो हरः स्वयम्
आविरासीत् तदा तत्र मा मेति व्याहरन्

सन्नश्च वरं ब्रूहि ददामि ते समीप्सितम्।
त्युक्ते च ऋषिश्रेष्ठ मया दृष्टो महेश्वरः॥ ३३
ष्ट्वा वृत्तं मयैतच्च ह्यतुलं मे बलं प्रभो।
हि त्वञ्च प्रसन्नोऽसि दुर्लभं किं भवेन्मम॥ ३४
वेन परितुष्टेन सर्व्वं दत्तं यथेप्सितम्।
घोरया च दृष्ट्या वै पूर्व्ववद्दयोजितानि मे॥ ३५
ारांसि सन्धयित्वा तु दृष्टानि परमात्मना।
वं कृते तदा तत्र शरीरं पूर्व्ववन्मम॥ ३६
ातं तस्य प्रसादाच्च सर्व्वं प्राप्तं मया फलम्।
त्वा च प्रार्थितं सो वै स्थितोऽसौ वृषभध्वजः॥ ३७
द्यनाथेश्वरो लोके प्रसिद्धो हितकारकः।
ाधिपत्यागतश्चाहं विजेतुं भुवनत्रयम्॥ ३८

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
वैद्यनाथोत्पत्तिवर्णनं नाम पञ्च-
पञ्चाशोऽध्यायः॥ ५५॥

षट्पञ्चाशोऽध्यायः।

सूत उवाच।

दीयं तद्वचः श्रुत्वा विहस्य नारदोऽब्रवीत्।

नारद उवाच।

यतां राक्षसश्रेष्ठ कथयामि हितं तव॥ १
योक्तं यच्छिवेनैव हितं दत्तं ममाधुना।
त् सर्व्वञ्च त्वया सत्यं न मन्तव्यं कदाचन॥ २
यं वै मत्ततां प्राप्तः किं किं नैव ब्रवीति च।
त्यं भविष्यति नैव कथं ज्ञेयं प्रियो हि मे॥ ३
तो गत्वा पुनश्चैव कुरु त्वञ्च हिताय वै।
लासोद्धरणे यत्नः कर्त्तव्यश्च त्वया पुरः॥ ४
दि चैव धृतश्चायमुच्चैश्चैव भविष्यति।
दा वै सफलं सर्व्वं भविष्यति न संशयः॥ ५
ूर्व्ववत् स्थापयित्वा तं पुनरागच्छ वै सुखम्।
श्चयं परमं गत्वा यथेच्छसि तथा कुरु॥ ६
युक्तः स हितं मेने रावणो बलदर्पितः।
थ्यं मत्वा मुनेर्वाक्यं कैलासमगमत् तदा॥ ७
त्वा तत्र समुत्थानं चक्रे तस्य गिरेरपि।
तस्थञ्चैव तत् सर्व्वं विपर्य्यस्तं परस्परम्॥ ८

गिरीशोऽपि तदा दृष्ट्वा किं जातञ्च तदाब्रवीत्।
गिरिजा च तदा शम्भुं प्रत्युवाच विहस्य तम्॥ ९
तच्छिष्यस्य फलं प्राप्तं सम्यग्जातं सुशिष्यतः।
पश्चाच्छिवेन शप्तश्च रावणो बलदर्पितः॥ १०
शीघ्रञ्च तव हस्तानां दर्पघ्नश्च भविष्यति।
इति तस्य तदा जातं नारदः श्रुतवांस्तदा॥ ११
कैलासं पूर्व्ववत् स्थाप्य यथागतं तथा ययौ।
निश्चयं परमं गत्वा बले बलविमोहितः॥ १२
जगद्वशे तदा चक्रे रावणो लोकरावणः॥
इत्येतच्च समाख्यातं वैद्यनाथेश्वरस्य च॥ १३
माहात्म्यं शृण्वतां पापं गच्छति भस्मसान्नृणाम्।
अतः परं प्रवक्ष्यामि नागेशं परमात्मनः॥ १४
ज्योतीरूपं यथाजातं तथा च विनिवेद्यते।
दारुका राक्षसी काचित् पार्व्वत्या बलदर्पिता॥ १५
दारुकश्च तदा तस्याः स्वामी च बलवत्तरः।
बहुभी राक्षसैस्तत्र चकार कदनं महत्॥ १६
यज्ञध्वंसञ्च लोकानां धर्म्मध्वंसं तदाकरोत्।
पश्चिमे सागरे तस्य वनं सर्व्वसमृद्धिमत्॥ १७
योजनानां षोड़शैव विस्तृतं सर्व्वतोदिशम्।
दारुकायै तदा देवी वनस्य चलने बलम्॥ १८
दारुका यत्र सा याति तत्र गच्छति तद्वनम्।
भूम्या च तरुभिस्तत्र सर्व्वोपकरणैः सह॥ १९
प्रयाति तद्वनं देवि त्वया सह यथेच्छसि।
तत्र स्थित्वा तदा सोऽपि सर्व्वेषाञ्च भयं ददौ॥ २०
ते सर्व्वे पीड़िता लोका और्व्वस्य शरणं ययुः।
महर्षे शरणं देहि नो दुष्टेन मारिताः॥ २१
सर्व्वं कर्त्तुं समर्थोऽसि तेजसा दीप्तिमानसि।
पृथिव्यां वर्त्तते कश्चित् त्वां विना शरणं न हि॥ २२
यामो यस्य समीपे तु स्थिताः सुखमवाप्नमः।
दृष्ट्वा त्वां राक्षसाः सर्व्वे विलीयन्ते विदूरतः॥ २३
त्वयि शैवं तदा तेजो भासते ज्वलनो यथा।
दुष्टानां चन्द्रवत् त्वञ्च सुखं तेभ्यः प्रयच्छसि॥ २४
इत्येवं प्रार्थितः सोऽपि मुहुर्म्मुहुर्मुनीश्वराः।
सोऽपि मानी शरण्यश्च करिष्यामि वचोऽब्रवीत्॥ २५
इत्युक्त्वा च ऋषिश्रेष्ठाः शापं तेषां ददावृषिः।
पृथिव्यां यदि रक्षांसि हिंसन्ति प्राणिनो यदा॥ २६

तदा प्राणैर्वियुज्येरन् राक्षसा बलवत्तराः।
यदा यज्ञान् विहिंसन्ति तदा प्राणैर्वियुज्यते ॥ २७
इत्युक्त्वा वचनं तेभ्यः समाश्वास्य प्रजाः पुनः।
तपश्चकार विधिवन्नौर्व्वो लोकसुखावहम् ॥ २८
तदा देवास्तदाज्ञाय शापस्य कारणं हितम्।
युद्धाय च समुद्योगं चक्रुर्देवारिभिः सह ॥ २९
सर्व्वैश्चैव प्रयत्नैश्च युद्धार्थं समुपागताः।
तान् दृष्ट्वा राक्षसास्तत्र विचारे तत्पराः पुनः ॥३०
किं कर्त्तव्यं क्व गन्तव्यं सङ्कटं समुपागतम्।
युध्यते म्रियते चैव युध्यते न विहिंस्यते ॥ ३१
दारुका राक्षसी सापि ज्ञात्वा दुःखं समागतम्।
भवान्याश्च वरं तत्र कथयामास सा तदा ॥ ३२
मयाप्याराधिता पूर्व्वं भवपत्नी वरं ददौ।
वनञ्च गच्छति सार्द्धं यत्र गन्तुं त्वमिच्छसि ॥ ३३
तद्वरश्च मया प्राप्तः कथं दुःखं विषह्यते।
जले वनञ्च नीत्वा वै सुखं स्थेयन्तु राक्षसैः ॥ ३४
तस्यास्तद्वचनं श्रुत्वा राक्षसा हर्षमागताः।
धन्येयं कृतकृत्येयं रक्षिता वै जीविता वयम् ॥ ३५
और्व्वेण मारितानाञ्च का गतिः स्यान्न संशयः।
इति विचार्य्य ते सर्व्वे तां ज्ञात्वा हितकारिणीम्॥३६
तस्यै नत्वा च तत् सर्व्वं कथयामासुरादरात्।
यदि गन्तुं भवेच्छक्तिर्गम्यतां किं विचार्य्यते ॥ ३७
तत्र गत्वा जले देवि सुखं स्थास्याम निश्चयः।
एतस्मिन्नन्तरे लोका देवैः सार्द्धं समागताः ॥ ३८
युद्धाय विविधैर्दुःखैः पीड़िता राक्षसाः पुरा।
राक्षसी च तदा तस्या भवान्या बलमाश्रिता ॥ ३९
समग्रं तद्वनं नीत्वा जले स्थलसमन्वितम्।
जय जयेति तदा देवीस्तुतिमुच्चार्य्य राक्षसी ॥ ४०
उड्डयनन्तु कृत्वा सा सपक्षो गिरिराड्यथा।
समुद्रस्यैव मध्ये सा संस्थिता निर्भया तथा ॥ ४१
वनञ्चोपवनञ्चैव जलं दुर्गं तथा पुनः।
विहाररम्यस्थानानि हर्म्म्याणि विविधानि च ॥ ४२
स्वर्गादप्यधिकं तच्च राजते च मुनीश्वराः।
तत्र सिद्धौ च ते स्थित्वा नगरे च विलासिनः ॥ ४३
राक्षसाश्च सुखं प्रापुर्निर्भयाश्च विजह्रिरे।
राक्षसाः पृथिव्याञ्च नाजग्मुर्मुनिपुङ्गवाः ॥ ४४

मुनेः शापभयादेव जले च बभ्रमुस्तदा।
नौषु स्थितान् जनान् नीत्वा नगरे तत्र तांश्च
चिक्षिपुर्बन्धनागारे कांश्चिज्जघ्नुस्तदा हि ते।
यथा तथा पुनः पीड़ां चक्रुस्ते राक्षसास्तदा।
यथा पूर्व्वं स्थले लोके भयञ्चासीन्निरन्तरम्।
तथा जले भयं तेषां ह्यासीन्नित्यं मुनीश्वराः।
एवं जाते तदा काले कदाचिद्राक्षसा जले।
निःसृता लोकपीड़ार्थं रुद्ध्वा मार्गं जले तदा।
स्थितास्ते गुप्तरूपेण धरणार्थं मुनीश्वराः।
एतस्मिन्नन्तरे तत्र नावो बहुतराः शुभाः ॥
आगता बहुधा तत्र लोकैश्च सर्व्वतो वृताः।
ता नावश्च तदा दृष्ट्वा हर्षं प्राप्य तथा च तान्
जग्मुस्ते च तदा सर्व्वं भयञ्च राक्षसोद्भवम्।
गतास्ते च तदा तेषां कृत्वा च धरणं पुनः ॥
आजग्मुर्नगरं ते च चिक्षिपुर्नगरे पुनः।
ते दुःखितास्तदा दुःखमाजग्मुश्च मुनीश्वराः।
तेषां मध्ये च योऽधीशः शैवश्चासीत् तदा तु
विना च शिवपूजाञ्च न तिष्ठति कदाचन ॥
यदि पूजा न जायेत तदा वै भुज्यते न च।
कारागृहगतः सोऽपि बहूनशिक्षयत् तदा ॥
शिवमन्त्रञ्च पूजाञ्च पार्थिवीमृषिसत्तमाः।
ते सर्व्वे च तदा तत्र पूजां शिवसमुद्भवाम् ॥
चक्रुश्च विधिवत् तत्र यथादृष्टं यथाश्रुतम्।
केचित् तत्र स्थिता ध्याने बद्धासनमनुत्तमम्।
मानसीञ्च तदा पूजां कृत्वा दुःखं व्यपोहयन्
तद्धीशेन तत्रैव प्रत्यक्षं शिवपूजनम् ॥ ५७
कृतञ्च पार्थिवस्यैव विधानेन मुनीश्वराः।
अन्ये च ये न जानन्ति विधानस्मरणं परम् ॥
नमः शिवाय मन्त्रेण ध्यायन्तः शङ्करं स्थिताः
सुप्रियो नाम पश्चाद्वै वैश्यवर्य्यः शिवप्रियः ॥
ध्यानेन मनसा तत्र मानसं ह्युपचारकम्।
चकार प्रीतियुक्तोऽसौ प्रत्यक्षं शिव आददे
यथोक्तरूपी शम्भुश्च आगत्य सर्व्वमाददे।
सोऽपि स्वयं न जानाति रक्ष्यते च शिवेन वै
एवञ्च क्रियमाणस्य षण्मासाः संययुस्तदा।
कदाचित् सेवकैस्तस्य राक्षसस्य दुरात्मनः।

ग्रे सुन्दरं रूपं दृष्ट्वा तु शङ्करस्य च ।
वेदितं तदा तस्मै राज्ञे सर्व्वं यथार्थकम् ॥ ६३
ञापि पुनरागत्य वैश्याय पर्य्यपृच्छत ।
ध्यायसि च वैश्याद्य सत्यं वद न चान्यथा ॥ ६४
ोतां तच्च जानासि तच्छ्रुत्वा कुपितः पुनः ।
वशान् प्रेरयामास हन्यन्तां राक्षसा इमे ॥ ६५
तास्ते तदा हन्तुं नानायुधधरा गताः ।
ागतांस्तदा दृष्ट्वा भयवित्रस्तलोचनः ॥ ६६
हे शङ्कर देवेश पाहि शिव शिवेति च ।
स्त्वञ्च भवानद्य वर्त्तते देवसत्तम ॥ ६७
सम्प्रार्थितः शम्भुर्विवरान्निर्गतस्तदा ।
न सुन्दरेण चतुर्द्वारयुतेन च ॥ ६८
च ज्योतीरूपञ्च शिवरूपमहाद्भुतम् ।
वारसमायुक्तं दृष्ट्वा चापूजयत् तदा ॥ ६९
ः तदा शम्भुः प्रसन्नो ह्यभवत् स्वयम् ।
पतं तदास्त्रञ्च दत्त्वा च राक्षसोत्तमान् ॥ ७०
न सोपकरणान् सर्व्वांश्च राक्षसांस्तथा ।
ंस्तांश्च तदा हत्वा वरं प्रादाद्धरस्य च ॥ ७१
मन् वने सदा वर्णा धर्म्मांश्च सम्भवन्तु वै ।
ाण-क्षत्रिय-विशां शूद्राणां धर्म्म एव च ॥ ७२
त्र मुनिश्रेष्ठास्तामसा न कदाचन ।
स्मिन् समये देव्या राक्षसी तु स्तुतिं व्यधात्॥७३
ना च तदा सा च ह्युवाच किं करोम्यहम् ।
ुवाच पुनस्तत्र वंशश्च रक्ष्यतां मम ॥ ७४
यिष्यामि वंशं ते सत्यञ्च कथ्यते मया ।
क्त्वा च शिवेनैव विग्रहं सा चकार ह ॥ ७५
ऽपि कुपितो देवि यथेच्छसि तथा कुरु ।
श्रुत्वा वचस्तस्य पार्व्वती वाक्यमब्रवीत् ॥ ७६
ीयं वचस्तथ्यं युगान्ते च भविष्यति ।
व तामसी सृष्टिर्भवत्विति मतं मम ॥ ७७
था प्रलयः स्याद्धि सत्यं मे व्याहृतं शिव ।
दारुका देवी राक्षसी शक्तिका मम ॥ ७८
ष्ठा राक्षसनाञ्च राज्ञी राज्यं प्रशास्यति ।
राक्षसपत्न्यश्च प्रसविष्यन्ति पुत्रकान् ॥ ७९
र्व्वे मिलिताश्चैव वने वासाय वै मताः ।
वचनं श्रुत्वा भक्तानां पालनाय च ॥ ८०

स्थास्यामि च वने ह्यत्र शङ्करो वाक्यमब्रवीत् ।
यदा च वर्णधर्म्मस्थो दर्शनं मेऽत्र संस्थितम् ॥ ८१
करिष्यति तदा सो वै चक्रवर्त्ती भवेन्नरः ।
अन्यथा कलिपर्य्यासे सत्यस्यादौ मुनीश्वराः ॥ ८२
महासेनसुतो यो वै वीरसेनेति विश्रुतः ।
दर्शनं मम कृत्वा च चक्रवर्त्ती भविष्यति ॥ ८३
इत्येवं दम्पती तौ च कृत्वा हास्यं परस्परम् ।
स्थितौ तत्र स्वयं साक्षान्नागेशो नाम शङ्करः ॥ ८४

ऋषय ऊचुः ।

वीरसेनः कथं तत्र यास्यति दारुकावने ।

सूत उवाच ।

नैषधे सुन्दरे देशे क्षत्रियाणां कुले च सः ॥ ८५
महासेनसुतो वीरसेनो वै ह्यात्मसम्भवः ।
पार्थिवं भजनं कृत्वा तपः परमदुष्करम् ॥ ८६
चकार वीरसेनो वै (क) वर्षाणां द्वादशावधि ।
ततः प्रसन्नो देवेशः प्रत्यक्षं प्राह शङ्करः ॥ ८७
काष्ठस्य मक्षिकां कृत्वा त्रपुधातुविलेपनाम् ।
विधाय योगमायाञ्च दास्यामि वीरसेनक ॥ ८८
तां गृहीत्वा पुनश्चैकां नौभिः सह व्रजाधुना ।
अन्ये च म्लेच्छरूपा वै भविष्यन्ति वनौकसः ॥ ८९
एकस्त्वं तत्र गत्वा च विवरे च कृते मया ।
प्रविश्य च तदा पूजां कृत्वा नागेश्वरस्य च ॥ ९०
ततः पाशुपतं प्राप्य हत्वा च राक्षसीमुखान् ।
पार्व्वत्याश्च बलञ्चैव सम्पूर्णञ्च भविष्यति ॥ ९१
मयि दृष्टे तदा किञ्चिन्न्यूनं ते न भविष्यति ।
इति दत्तवरः सोऽपि शिवेन परमात्मना ॥ ९२
शक्तः सर्व्वं तदा कर्त्तुं भविष्यति न संशयः ।
एवं नागेश्वरो देवो ह्युत्पन्नो ज्योतिषां पतिः ॥ ९३
एवं यः शृणुयान्नित्यं महापातकनाशनम् ।
अतः परं प्रवक्ष्यामि लिङ्गं रामेश्वरस्य च ॥ ९४
उत्पन्नञ्च यथा पूर्व्वं तथाहं कथयाम्यहम् ॥ ९५

इति श्रीशिवे महापुराणे ज्ञानसंहितायां
नागेशमहिमनिरूपणं नाम षट्-
पञ्चाशोऽध्यायः ॥ ५६ ॥

(क) तपस्तताप सुमहदिति पाठान्तरम् ।

सप्तपञ्चाशोऽध्यायः।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठा माहात्म्यं शङ्करस्य च।
कदाचिद्राघवो देवो लक्ष्मणेन युतो यदा ॥ १
सुग्रीवप्रमुखैः पिङ्गैर्वानरैर्बलवत्तरैः।
पद्माष्टादशसंख्येश्च ययौ तीरं पयोनिधेः ॥ २
दक्षिणे सागरे यो वै दृश्यते लवणाकरः।
तत्र गत्वा स्वयं रामो वेलायां संस्थितो यदा ॥ ३
वानरैः सेव्यमानस्तु लक्ष्मणेन तथैव च।
जानकी च कुतो याता कदा चेयं मिलिष्यति ॥ ४
अगाधः सागरश्चैव तीर्णं सैन्यञ्च वानरम्।
राक्षसो गिरिदुर्गोऽस्ति किं वा किञ्च भविष्यति ॥ ५
इत्येव च विचार्य्यैव तीरे स्थित्वा सलक्ष्मणः।
आश्रितो वानरैः सर्व्वैरङ्गदादिपुरःसरैः ॥ ६
उवाच राघवस्तत्र जलार्थी लक्ष्मणाभवम्।
इत्युक्ता वानरास्तत्र ह्यधावन्त दिशो दश ॥ ७
नीत्वा जलं समाजग्मुः प्रणिपत्य पुरःस्थिताः।
जलञ्च गृह्यतां स्वामिन् समानीतं त्वदाज्ञया ॥ ८
तज्जलञ्च स्वयं नीत्वा पातुमारब्धवान् यदा।
तदा च स्मरणं जातं न कृतं दर्शनं मया ॥ ९
शिवस्य वानरश्रेष्ठाः कथञ्च गृह्यते जलम्।
इत्युक्त्वा च जलं मुक्तं रामेण परमात्मना ॥ १०
पश्चात्‌ पार्थिवीं पूजां चकार रघुनन्दनः।
आवाहनादिकाद्यैश्च ह्युपचारान् प्रकल्प्य च ॥ ११
प्रणिपातैस्तवैर्दिव्यैः सन्तोष्य शङ्करं पुनः।
प्रार्थयामास देवेशं शङ्करं परया मुदा ॥ १२
स्वामिन् जलमगाधञ्च राक्षसो बलवत्तरः।
वानराणां बलं ह्येतच्चञ्चलं युद्धसाधनम् ॥ १३
तस्माच्छम्भो त्वया कार्य्यं साहाय्यं मम सुव्रत।
त्वदीयो रावणश्चैव दुर्ज्जयः सर्व्वथा नृभिः ॥ १४
युद्धे च पक्षपातो वै त्वया कार्य्यः सदाशिव।
इत्येवञ्च नमस्कृत्य प्रणम्य च पुनः पुनः ॥ १५
जय जय तदाप्युच्चैरुद्घोषैः शङ्करेति च।
इति स्तुत्वा शिवं तत्र मन्त्रध्यानपरायणः ॥ १६
पुनः पूजां तदा कृत्वा गल्लनादं यदाकरोत्।
तदा च शङ्करो देवो ज्योतीरूपो महेश्वरः।
साङ्गः सपरिवारश्च यथोक्तं रूपमुत्तमम्।
धृत्वा च प्रकटीभूय शिवमस्तु तदाब्रवीत्।
तद्रूपञ्च तदा दृष्ट्वा सर्व्वपूजां पुनः स्वयम्।
कृतवान् राघवो देवः शिवधर्म्मपरायणः।
स्तुतिञ्च विविधां कृत्वा प्रणिपत्य शिवं मुदा।
जयञ्च प्रार्थयामास जयोऽस्तु पुनरब्रवीत्।
शिवदत्तं जलं प्राप्य ह्यनुज्ञां समवाप्य च।
पुनश्च प्रार्थयामास इह स्थेयं त्वया प्रभो ॥
लोकानामुपकारार्थं पावनाय शिव त्वया।
स्थातव्यमत्र देवेश करुणासागर प्रभो ॥ २
इत्युक्तस्तु शिवस्तत्र लिङ्गरूपोऽभवत् तदा।
रामेश्वरश्च नाम्ना वै प्रसिद्धो जगतीतले।
इति ते च समाख्यातं श्रूयतां पापहारकम्।

इति श्रीशैवे महापुराणे ज्ञानसंहितायां रामेश्वरमाहात्म्यं नाम सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशोऽध्यायः।

सूत उवाच।

अतः परञ्च घुश्मेशं ज्योतिर्लिङ्गमुदाहृतम् ॥
तस्यैव च सुमाहात्म्यं श्रूयतामृषिसत्तमाः ॥
दक्षिणस्यामृषिश्रेष्ठा गिरिर्देवेतिसंज्ञकः।
तस्यैव निकटे कश्चिद्भारद्वाजकुलोद्भवः ॥ २
सुधर्म्मा नाम विप्रश्च सर्व्वदा ब्रह्मवित्तमः ॥
तस्य प्रिया सुदेहा च साध्वी धर्म्मपराय‍णा
सुधर्म्मा च द्विजश्रेष्ठो देवतातिथिपूजकः।
वेदमार्गपरो नित्यमग्निसेवापरायणः ॥ ४
त्रिकालं श्रद्धया युक्तः सूर्य्यरूपसमद्युतिः।
शिष्याणां पाठकश्चैव वेदशास्त्रविचक्षणः ॥
धनवांश्च परो दाता सौजन्यगुणभाजनम्।
आयुर्वङ्ग व्यतीतञ्च तस्य धर्म्मं प्रकुर्व्वतः ॥
पुत्रश्च नाभवत् तस्य ऋतुः स्यादफलः किं
तेन दुःखं कृतं नैव वस्तुज्ञानपरायणः ॥
आत्मनस्तारकश्चात्मा ह्यात्मनः पावकश्च

श्चैवं मनसि धृत्वा दुःखं न कृतवांस्तदा ॥ ८
देहा हि तदा दुःखं चकार पुत्रसम्भवम्।
त्वञ्च स्वामिनं सा वै प्रार्थयद्दयततां कुरु (क) ॥ ९
ऽपि स्त्रियं तदा भर्त्ता किं पुत्रश्च करिष्यति।
माता कः पिता पुत्रः को वा बन्धुः प्रियश्च कः ॥ १०
वं स्वार्थपरं देवि जानीहि त्वं न संशयः।
माद्देवि त्वया दुःखं त्यजनीयं सुनिश्चितम् ॥ ११
त्यं मह्यं त्वया नैव कथनीयं शुभव्रते।
तां सन्निवार्य्यैव भगवद्धर्म्मतत्परः ॥ १२
सीत् परमसन्तुष्टो द्वन्द्वदुःखं समत्यगात्।
गचिच्च सुदेहा वै गेहे च सहवासिनाम् ॥ १३
ाम प्रियगोष्ठ्यर्थं विवादः सङ्गतस्ततः।
त्वा स्त्रीस्वभावाच्च भर्त्सिता सा तदागमत् ॥ १४
त्रपि कथनं गर्व्वं करोषि पुत्रिणी ह्यहम्।
भोक्ष्यते पुत्रस्ते धनं कस्य भोक्ष्यति ॥ १५
ञा हरिष्यति नूनं पिण्डान्नं तव वन्ध्यके।
ा च भर्त्सिता सा वै गृहमागत्य दुःखिता ॥ १६
मिनं कथयामास तदुक्तं सर्व्वमादरात्।
ह्मणोऽपि तदा दुःखं न चकार च बुद्धिमान् ॥ १७
थितं कथ्यतामेवं यद्भावि तद्भवेत् प्रिये।
विच्च तदा तेन ह्याग्रहस्तापि पुनः पुनः ॥ १८
जन्न तदा दुःखं ह्याग्रहं कृतवत्यसौ।
तया त्वया पुत्रः समुत्पाद्यः प्रियोऽसि मे ॥ १९
था च त्यजिष्यामि देहं देहभृतां वर।
दुक्तं तया श्रुत्वा ब्राह्मणश्चिन्तया पुनः ॥ २०
ग्रे तदा चित्तं पुष्पद्वयमतन्द्रितम्।
सि दक्षिणं पुष्पं धृतं पुत्रफलप्रदम् ॥ २१
कृत्वा स्वपत्नीञ्च उवाच ब्राह्मणस्तदा।
योरेकतरं ग्राह्यं त्वया पुष्पं फलाप्तये ॥ २२
च मनसि धृत्वा पुत्रश्चैव भवेन्मम।
च स्वामिना यच्च धृतं पुष्पं समेष्यतु ॥ २३
त्वा च तया तत्र नमस्कृत्य शिवं तदा।
चाक्षिं पुनः प्रार्थ्य गृहीतं पुष्पमेकतः ॥ २४
िण चिन्तितं यच्च तद्गृहीतं तया न हि।
द्वा पुरुषश्चैव निश्वासं पर्य्यमोचयत् ॥ २५

(क) पुत्रकारण्यादिति क्वचित् पाठः।

निर्म्मितश्चेश्वरेणैव कथञ्चैवान्यथा भवेत्।
आशां त्यज प्रिये त्वञ्च परिचर्य्यां हरेः कुरु ॥ २६
इत्युक्त्वा तु स्वयं विप्र आशां परिविहाय च।
धर्म्मकार्य्यरतः सोऽभूद्भगवद्ध्यानतत्परः ॥ २७
इयञ्चैवाग्रहं नैव मुमोच पुत्रकाम्यया।
मयि पुत्रो न चास्त्येव अन्यां कुरु मदाज्ञया ॥ २८
तस्यां भविष्यति नूनं पुत्रश्चैव न संशयः।
तयैव प्रार्थितः सो वै ह्युवाच सुप्रियां तदा ॥ २९
त्वदीयञ्च मदीयञ्च तदा दुःखं गतं ध्रुवम्।
तस्मात् त्वं धर्म्मविघ्नञ्च साम्प्रतं मा कुरु प्रिये ॥ ३०
इत्येवं वारिता सा च स्वभ्रातुः पुत्रिकां तदा।
कन्यामानीय भर्त्तारं वृणु ह्येनां न संशयः ॥ ३१
इदानीं वदसि त्वं मे प्रियेयञ्च ततः पुनः।
पुत्रसूश्च तदा स्याद्वै तदा स्पर्द्धां करिष्यसि ॥ ३२
इत्युक्ता सा वचस्तत्र प्रिया ज्येष्ठतमा मम।
घुश्मनामा स्वसा विप्र ह्यस्या दास्यमहं पुनः ॥ ३३
करिष्यामि न सन्देहस्त्वया कार्य्यं सुनिश्चितम्।
इत्येवं प्रार्थितः सोऽपि चचाल गृहीता प्रिया ॥ ३४
परिणाय्य ततस्तान्तु त्वदीयामिति तां पुनः।
प्रार्थयामास धर्म्मात्मा इयं पोष्या त्वयानघे ॥ ३५
उक्त्वैवं स चकाराशु धर्म्मसंग्रहमात्मनः।
सा चापि भ्रातुः पुत्रीञ्च दास्यवत् पर्य्यतिष्ठत ॥ ३६
कनिष्ठा चैव या पत्नी स्वाम्यनुज्ञामवाप्य च।
पार्थिवान् सा चकाराशु नित्यमेकोत्तरं शतम् ॥ ३७
विधानपूर्व्वकं तच्च ह्युपचारसमन्वितम्।
कृत्वा सा प्राक्षिपत् तत्र तड़ागे निकटे स्थिते ॥ ३८
विसर्ज्ज्य पुनरेवाशु पूजां कृत्वा विधानतः।
एवं जाते तदा काले लिङ्गं लक्षमभूत् तदा ॥ ३९
कृपया च शिवस्यैव पुत्रस्तस्यामजायत।
सुन्दरः सुभगश्चैव कल्याणगुणभाजनः ॥ ४०
तं दृष्ट्वा परमप्रीतो ब्राह्मणो धर्म्मवित्तमः।
अनासक्तः सुखं भेजे ज्ञानधर्म्मपरायणः ॥ ४१
सुदेहा तावदस्यान्तु स्पर्द्धाञ्चैव चकार सा।
प्रथमं शीतलं तस्या हृदयं ह्यभवत् पुनः ॥ ४२
तदन्तरञ्च यज्जातं श्रूयतामृषिसत्तमाः।
पुत्रं दृष्ट्वा कनिष्ठाया ज्येष्ठा दुःखमुपागता ॥ ४३

सूत उवाच ।

सर्व्वे पूत्रप्रसूश्चैव प्रशंसन्ति निरन्तरम् ।
न सह्यते तया तच्च रूपञ्चैव शिशोरथ ॥ ४४
सुदेहा तनयं दृष्ट्वा हृदयञ्चाग्निसंयुतम् ।
एतस्मिन्नन्तरे विप्राः कन्यां दातुं समागताः ॥ ४५
विवाहं तस्य चात्रैव चकार विधिवत् पुनः ।
सुधर्म्मा घुश्मया सार्द्धमानन्दं परमं गतः ॥ ४६
सर्व्वे सम्बन्धिनस्तस्या घुश्मायामानमादधुः ।
तद्दृष्ट्वा च सुदेहा वै मनसि ज्वलिता तदा ॥ ४७
गृहमागत्य सुधर्म्मा वै बधूं पुत्त्रं मुनीश्वराः ।
उत्सङ्गे दर्शयामास प्रियाभ्यां हर्षयन्निव ॥ ४८
मनसि हर्षिता घुश्मा सुदेहा दुःखमागता ।
गृहे चलन्तीं सालोक्य बधूं पुत्त्रं सुदेहिका ॥ ४९
अत्यन्तं दुःखमापन्ना हा हतास्मि तदापतत् ।
घुश्मावद्वधूश्चेयं त्वदीया न मदीयिका ॥ ५०
पुत्त्रश्चैव बधूश्चव श्वश्रूं ज्येष्ठाममन्यत ।
भर्त्ता चैव तथा ज्येष्ठां मेने नैव कनिष्ठिकाम् ॥ ५१
तथापि च तदा ज्येष्ठा ह्यन्तर्मलवती ह्यभूत् ।
तदा विचारयामास दुःखशान्तिः कथं भवेत् ॥ ५२
मदीयो हृदयाग्निश्च घुश्मानेत्रजलेन च ।
शान्तो भविष्यति नूनं नान्यथा शान्तिमाप्नुयात् ॥ ५३
एवञ्च मारयाम्यद्य सुप्रियं प्रियवादिनम् ।
अग्रे भावि भवेदेव निश्चयं परमं गता ॥ ५४
कदर्य्याणां विचारश्च कृत्याकृत्ये भवेन्न हि ।
एकस्मिन् दिवसे ज्येष्ठा सुप्तं पुत्त्रं बधूयुतम् ॥ ५५
छेदयामास चाङ्गेषु गृहीत्वा च्छुरिकाञ्च सा ।
सर्व्वाङ्गखण्डमादाय रात्रौ सरसि प्राक्षिपत् ॥ ५६
यत्र क्षिप्तानि लिङ्गानि घुश्मया नित्यमेव च ।
तत्र क्षिप्ता समायाता सुष्वाप सुखतां गता ॥ ५७
प्रातश्चैव समुत्थाय घुश्मा नित्यं तदाकरोत् ।
सुधर्म्मा च स्वयं श्रेष्ठो नित्यकर्म्म समाचरत् ॥ ५८
स्नानादिकं तदा तौ च कृत्वा नित्यं प्रचक्रतुः ।
एतस्मिन्नन्तरे सा च ज्येष्ठा कार्य्यं गृहस्य च ॥ ५९
चकारानन्दयुक्ता च ह्यग्निः शान्तोऽभवत् तदा ।
प्रातःकाले समुत्थाय बधूः शय्यां विलोक्य च ॥ ६०
रुधिरार्द्रां देहखण्डैर्युतां दुःखमुपागता ।

श्वश्रूं निवेदयामास पुत्त्रस्ते च कुतो गतः ।
शय्या च रुधिरार्द्रा वै दृश्यते देहखण्डकैः
हा हतास्मि कृतं केन दुष्टं कर्म्म शुचिव्रते
ज्येष्ठा दुःखं तदापन्ना हा हतास्मि किले
दुःखञ्च कारयामास मनसि हर्षसंयुता ॥
घुश्मापि तत् तदा तस्या बध्वा दुःखं नि
न चचाल तदा तस्मान्नित्यं पार्थिवपूजना
मनश्चैवोत्सुकं नैव जातं तस्या मुनीश्वराः
भर्त्तापि च तथैवासीद्यावद्व्रतविधिर्भवेत्
मध्याह्ने चैव सञ्जाते दृष्ट्वा शय्यां भयावह
न तथापि तया तत्र कृतं दुःखं मुनीश्वराः
येनैव प्रार्थितश्चायं सो वै सञ्जायते तदा ।
यदि न रक्षिता चैव ईश्वरः प्रभुरेव च
मालाकार इवासौ वै जातान् युङ्क्ते वियुन
अत्रैव चिन्तया मेऽद्य किं स्यात् कृत्वा विचा
न चकार तदा दुःखं शिवे धैर्य्यमुपागता ।
पार्थिवांश्च गृहीत्वा वै जगाम सरस्तटे ।
क्षिप्त्वा च पार्थिवांस्तत्र परावर्त्तत सा तदा
तदा पुत्त्रस्तडागस्थो दृश्यते स्म तटे तथा
मातरेहि मिलिष्यामि मृतश्च जीवितो
तं दृष्ट्वा हर्षिता नैव दुःखिता न पुरा य
तदा शिवश्च सन्तुष्टो ज्योतीरूपो महेश्वर
प्रसन्नोऽस्मि वरं ब्रूहि दुष्टया मारितो
एताञ्च मारयिष्यामि त्रिशूलेन वरानने ।
घुश्मा चैनं वरं वव्रे रक्षणीया स्वसा मम
अपकारः कृतस्तुभ्यमुपकारः कथं त्वया ।
क्रियते हननीया च पापिष्ठा दुष्टकारिणी
तव दर्शनमात्रेण पातकं नैव तिष्ठति ।
इदानीञ्चैव तां दृष्ट्वा तत् पापं भस्मसाद्भवे
अपकारिषु यश्चैव ह्युपकारं करोति वै ।
तस्य दर्शनमात्रेण पातकं नैव तिष्ठति ॥
इति श्रुतं मया चैव वेदविद्भिः पुरातनैः ।
लोकानाञ्चैव रक्षार्थं त्वया स्थेयं सदाशिव
इत्युक्ते तु तदा तत्र प्रसन्नः पुनरेव च ।
अन्यच्च व्रियतां घुश्मे ददामि च हितं तव
सोवाच वचनं श्रुत्वा यदि देयो वरस्त्वया

लोकानाञ्चैव रक्षार्थं त्वया स्थेयं सदाशिव ॥ ७९
हरोवाच शिवस्तत्र तव नाम्ना सुमध्यमे।
घुश्मेशं सुप्रसिद्धं वै नाम मे जायतां शुभम् ॥ ८०
इदं सरस्तु लिङ्गानामालयं समजायत।
तस्माच्छिवालयं नाम प्रसिद्धं भुवनत्रये ॥ ८१
तव वंशे सुतश्चैकं पुरुषावधि सुव्रते।
ईदृशाः पुत्त्रका वंशे भविष्यन्ति न संशयः ॥ ८२
मानिकाः सधनाश्चैव ह्यायुष्मन्तो विचक्षणाः।
वेद्यावन्तः सुदाराश्च स्वर्गमुक्तिफलाश्च ते ॥ ८३
ईदृशो वंशविस्तारो भविष्यति सुशोभनः।
इत्युक्त्वा च शिवस्तत्र लिङ्गरूपोऽभवत् तदा ॥ ८४
घुश्मेशो नाम विख्यातः सरश्चैव शिवालयम्।
सुधर्म्मा चैव घुश्मा च सुदेहाच्च शिवस्य च ॥ ८५
रमेकोत्तरञ्चैव पराक्रम्य तु वै तदा।
क्षणां शिवायाश्च कारयामासतुस्तदा ॥ ८६
पूजां कृत्वा समाश्वास्य मिलित्वा च परस्परम्।
हित्वा चान्तर्मलं तत्र सुखञ्च लेभिरे हि ते ॥ ८७
ईदृशञ्चैव लिङ्गञ्च दृष्ट्वा पापैः प्रमुच्यते।
सुखं संवर्द्धते नित्यं शुक्लपक्षे यथा शशी ॥ ८८
इति ते च समाख्यातं लिङ्गानां कारणं मया।
ज्योतिषां यानि लिङ्गानि कथितानि यथाश्रुतम् ॥ ८९
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते मानवः क्षणात्।
इति श्रुत्वा वचस्तस्य सूतस्य च मुनीश्वराः ॥ ९०
ऊचुस्तस्मै पुनस्तत्र लोकानां हितकाम्यया।

ऋषय ऊचुः।

अन्यान्यपि चरित्राणि शिवस्य परमात्मनः ॥ ९१
कथय त्वं प्रसादेन न तृप्ता वयमेव हि।
तस्मात् त्वञ्च विशेषेण ध्यात्वा देवं परं सदा ॥ ९२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां ज्योतिर्लिङ्गवर्णनं नामाष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठाश्चरितं परमात्मनः।
आकाशस्य च ताराणां भूमेश्च रेणूनां तथा ॥ १
वृष्टेरासारकाणाञ्च सङ्कल्पैश्च कदाचन।
संख्या विशक्यते कर्त्तुं न गुणानां शिवस्य च ॥ २
तथापि च यथाबुद्धि कथयामि यथाश्रुतम्।
नृसिंहश्च यदा क्रुद्धः क्रोधाच्च विरतो न हि ॥ ३
तदा शिवेन देवानां हितार्थं रूपमद्भुतम्।
शारभञ्च धृतं तत्र तं दृष्ट्वा लीनतां गतः ॥ ४
शिवाङ्गयञ्च सम्प्राप्य सर्व्वं त्रस्यन्ति वै तदा।

ऋषय ऊचुः।

चरितञ्च नृसिंहस्य वक्तुमर्हसि सुव्रत ॥ ५

सूत उवाच।

लब्ध्वा दृष्टुं समुत्पन्ना युद्धमिच्छा मुनीश्वराः।
कोमलेन शरीरेण कथं युद्धं चिकीर्षसि ॥ ६
इत्युक्ते प्रभुणाप्युक्तं दर्शयिष्यामि सुव्रते।
एकस्मिन् दिवसे विष्णुर्विचारे तत्परोऽभवत् ॥ ७
केन युद्धं प्रकर्त्तव्यं मया चैवं विचार्य्य च।
जयश्च विजयश्चैव कुमारैः शापितौ तदा ॥ ८
तेषां कोलाहले जाते भगवान् वाक्यमब्रवीत्।
आगत्य द्वारपालौ च कुमारान् श्रूयतां पुनः ॥ ९
अयुक्तञ्च कृतं सर्व्वैर्जातं नैवान्यथा भवेत्।
कुमारान् पुनरेवाह अनुग्राह्याविमौ शुभौ ॥ १०

कुमारा ऊचुः।

भक्तिभावं समासाद्य सप्तभिर्जन्मभिरिह।
वैरभावे तथा त्रिभिरिदं स्थानमवाप्स्यथः ॥ ११
इत्युक्ते च तदा तैस्तु विचार्य्य शीघ्रता वरा।
यथेच्छा च हरेरासीद्दत्तं ताभ्यां तथा पुनः ॥ १२
त्रिभिरेवावतारैश्च वैरभावेऽपि तद्वरम्।
इत्युक्त्वा पतितौ तत्र कश्यपस्य गृहे तदा ॥ १३
अवतीर्णौ च दैत्यौ वै प्रसिद्धौ तौ महाबलौ।
हिरण्यकशिपुश्चैव हिरण्याक्षो महाबलः ॥ १४
स्वयञ्चैव नृसिंहोऽपि कुमारा भक्तिसंयुताः।
प्रह्लादाद्यास्तदा जाताः पुनरन्यभवे यदा ॥ १५
रावणः कुम्भकर्णश्च तावेव च बभूवतुः।
रामश्चैव नृसिंहोऽपि कुमारश्च तदाभवत् ॥ १६
विभीषणः परे ये च त एव पुरतोऽभवन्।
अन्ये च बहवो देवाः सम्बभूवुर्मुनीश्वराः ॥ १७
शिशुपाल-दन्तवक्त्रौ भगवद्द्वेषतत्परौ।

दमघोषगृहे तत्र अवतीर्णौ महाबलौ ॥ १८
नृसिंहोऽपि तदा कृष्णो ह्यक्रूराद्याः कुमारकाः।
चरित्रन्तु नृसिंहस्य श्रूयतां पापहारकम् ॥ १९
हिरण्याक्षश्च बालो वै क्रीड़ार्थं सूर्य्यमानयत्।
सिंहञ्च दन्तिनञ्चैवं आरुह्याखेलयत् तदा ॥ २०
देवानां दुःखदानार्थं पृथिवीमाहरत् तदा।
मुखे धृत्वा च तां सो वै श्वा मुखे पिष्टपिण्डिकाम् २१
यथा गतो जले तस्मिन् ब्रह्मा दुःखमुपागतः।
ध्यानं चक्रे तदा विष्णोः स्तुतिं कुर्व्वन् मुहुर्म्मुहुः॥२२
समुत्पन्नस्तदा विष्णुर्नासारन्ध्राच्च ब्रह्मणः।
वाराहं रूपमास्थाय क्रमेण वृद्धितां गतः ॥ २३
ततः स्तुतश्च तेनैव गतश्चैव जले तदा।
नारदञ्च तदापश्यत् सन्ध्यया संयुतं हरिः ॥ २४
नारदोऽपि तदा स्तुत्वा ह्याज्ञा देया ममाधुना।

वराह उवाच।

यावच्च युध्यते तेन तावज्जलविशोषणम् ॥ २५
कर्त्तव्यञ्च त्वया चात्र इत्येवं कथ्यते मया।
ततश्चाञ्जलिना तेन जलं नीत्वा मुखे तदा ॥ २६
पीतञ्च ऋषिणा तावद्यावद्युद्धं समाप्यते।
ततश्च विष्णुना तत्र पञ्चवर्षशतं जले ॥ २७
स्थले पञ्चशतञ्चैव कृतं युद्धं महात्मना।
तं हत्वा च ततश्चैव मुखे धृत्वा च गां तदा ॥ २८
निःससार वराहश्च ब्रह्मणे प्रददौ च गाम्।
लयं यातो हरिस्तत्र कृत्वा कार्य्यं सुदुष्करम् ॥ २९
इति दुःखविनाशाय हिरण्यकशिपुस्तदा।
वर्षाणामयुतं तेपे ब्रह्मणो वरकाम्यया ॥ ३०
वृक्षाश्चैव समुत्पन्नाः पक्षिभिर्नीड़काः कृताः।
शरीरे च तदा तस्य विरराम परं न हि ॥ ३१
ततो ब्रह्मा च देवानां ह्यनुज्ञां समवाप्य च।
वरं दातुं समायातो यत्रास्ते दितिजोऽसुरः ॥ ३२
प्रसन्नोऽस्मि वरं ब्रूहि विचार्य्यासुरराट् तदा।
त्वया च निर्म्मितायां वै सृष्टौ कश्चिन्न मारयेत् ॥३३
एतदस्तु वरं दत्त्वा जगाम भवनं स्वकम्।
शोणिताख्ये पुरे गत्वा दैत्यानाहूय सर्व्वतः ॥ ३४
आज्ञां प्रवर्त्तयामास पृथिव्यां सर्व्वतो दिशम्।
न कृता मारितास्ते च कृता सुरचिता हि ते ॥३५

स्वर्गोऽपि च जितश्चैव पातालं वितलं तथा।
त्रैलोक्यं स्ववशे कृत्वा राज्यञ्चैवाप्यकारयत्।
चकार हरिविद्वेषी धर्म्मलोपपरायणः।
प्रह्लादोऽपि समुत्पन्नस्तत्कुले हरिसेवकः ॥ ३
रोदनेऽपि तदा तेन न त्यक्तं हरिसेवनम्।
पञ्चवर्षे तदा जाते पाठनार्थं नियोजितः ॥ ३
वाद्यमानेषु तूर्य्येषु पाठकस्य गृहं गतः।
पाठकेन तदा विद्या ह्यासुरी परिपाठिता।
प्रह्लादेन तथा चैव नमो नारायणेति च।
वारितः पाठकेनापि पपाठ च पुनः पुनः ॥
इदानीं गम्यतां तावत् पुनर्नैव करिष्यति।
यदा तदा तु प्रह्लादो हरिरेव न चान्यथा।
पित्रोत्सङ्गे च संस्थाप्य किमधीतं शिशो त्वयं
इति पृष्टः पुनः सोऽपि नमो नारायणेति च-
हा हतोऽस्मि तदा श्रुत्वा किमधीतं दुरात्मना।
गुरुमाहूय तत्रैव रे दुष्ट शिक्षितः कथम् ॥ ४
गुरुराह पुनस्तच्च सर्व्वं नष्टा दुरात्मना।
ततः पुत्रं प्रगृह्यैव कयाधुर्दैत्यसत्तमः ॥ ४४
कथयामास तां दुष्टः पुत्राधीतं शृणुष्व तत्।
तदधीतं पुनस्तेन श्रुत्वा माताब्रवीदिदम् ॥ ४
सर्व्वाञ्च पृथिवीं त्यक्त्वा कथं दुःखमवाप्यते।
त्यज दुष्ट हरेर्नाम ह्यासुरीं समुपाश्रय ॥ ४
पुत्रस्तु मातरं ह्यूचे श्रूयतां त्यज्यते न हि।
मशकस्य भयात् किं वै द्वारं राज्ञो महागजः।
वराकस्य भयेनैव त्यजिष्यामि हरिं पुनः।
जिह्वा चैवाद्य कर्णौ च मस्तकं करपादकम्।
सार्थकानीन्द्रियाणीह भजनाच्च हरेरपि।
यद्भव्यं तद्भवेदेव न त्याज्यं हरिकीर्त्तनम् ॥ ४
इत्येतद्वचनं श्रुत्वा माता दुःखमुपागता।
स्वामिने कथयामास ह्यसाध्यो बालको मया।
राजा च मन्त्रिणः सर्व्वान् समाहूयाब्रवीदिदम्।
कुलाङ्गारः समुत्पन्नः पुत्ररूपेण मन्त्रिणः ॥
तस्मादयञ्च हन्तव्यः सर्व्वथा कुलदूषणम्।
अग्नौ दाह्यश्च शस्त्रैश्च च्छेदनीयो ह्ययं पुनः ॥
विषैश्च कलनीयो वै मज्जनीयो जले पुनः।
अनेकैश्च प्रकारैश्च मारणीयः प्रयत्नतः ॥ ५२

दिं त्यजति प्राणान् वा इति मे निश्चयो मतः ।
याज्ञाञ्च समासाद्य प्रधाना बालकं तदा ॥ ५४
ोग्रञ्च दमयामासुर्यथाज्ञप्तं तथा हि ते ।
निश्च शीततां यातो जलञ्च स्थलतां गतम् ॥ ५५
लञ्च जलतां यातं विषञ्चामृततां गतम् ।
स्त्राणि पुष्पभावञ्च हरेर्नाम्नश्च कीर्त्तनात् ॥ ५६
थिव्यादीन् हरेश्चैव ह्युपकारैः प्रबोधयन् ।
प्राप्तवांस्तदा दुःखमानन्दं परमं गतः ॥ ५७
दा ते च प्रधाना वै विस्मयं परमं गताः ।
ध्यते नैव किं कार्य्यं गम्यताञ्च पुनः पुनः ॥ ५८
ज्ञोऽग्रे च कथञ्चैव गमिष्यामः परस्परम् ।
थाविधांश्च तान् दृष्ट्वा प्रह्लादः वाक्यमब्रवीत् ॥ ५९
यं वै विस्मयाविष्टा यूयञ्चैव भविष्यथ ।
पार्श्वे च तदस्तु यतो वै पीड़नं न हि ॥ ६०
ञ्च शयनं तस्य हरेश्च परमात्मनः ।
ह्निश्चैव मुखं तस्य विषञ्च मातुलो मम ॥ ६१
थिवी तु गुणांस्तस्य विस्मारयति किं पुनः ।
ना मत्पितुराज्ञां वै न किञ्चित् कर्त्तुमीहते ॥ ६२
श्चैव पराधीनं स्वतन्त्रो नैव कश्चन ।
त्येवं वचनं श्रुत्वा प्रधाना विफलक्रियाः ॥ ६३
आगत्य च तत् सर्व्वं राज्ञोऽग्रे विनिवेदितम् ।
ादृशं कदापीह श्रुतं दृष्टं न मे प्रभो ॥ ६४
साध्यं यातनायाश्च यत्नञ्च सामभिः कुरु ।
ीयं तद्वचः श्रुत्वा राजा दुःखमुपागतः ॥ ६५
मोहाय तदा पुत्रं लोभयन् वाहनादिभिः ।
था चैवं हरेर्नाम न मुक्तं तेन वै तदा ॥ ६६

सूत उवाच ।

प्राञ्च चेतसि ह्येतत् सुखं स्वप्नसमं मतम् ।
जनं सेवनं ध्यानं पूजनं स्मरणं प्रभोः ॥ ६७
नन्तसुखदं ते वै मन्यन्ते कृतनिश्चयाः ।
चलन्ति च ते धर्म्मात् प्राणान्तो यदि जायते ॥ ६८
पुनश्चैव प्रह्लादश्चलतीति सुनिश्चितम् ।
जा पुत्रं तदा श्रेष्ठः पुनश्च गुरवे ह्यदात् ॥ ६९
रुस्तस्य वचः श्रुत्वा गृहीत्वा बालकं पुनः ।
ठयामास भो विप्रास्तद्दिव्यां बालकैः सह ॥ ७०
ते बालाः कथं बाल पठन्ति दृश्यतां त्वया ।
त्वमेव पठ विद्याञ्च राजा दास्यति ते सुखम् ॥ ७१
पुत्रस्य च परो धर्म्मः पित्राज्ञापरिपालनम् ।
पितुर्धुरं पुनस्त्वञ्च वहिष्यसि न संशयः ॥ ७२
इत्येतद्वचनं श्रुत्वा नमो नारायणेति च ।
पाठयामास तान् सर्व्वान् पालयामास वै तदा ॥ ७३
परोक्षे च गुरोस्तेषां ज्ञानञ्चैवाप्यदर्शयत् ।
न माता न पिता बन्धुर्न भ्राता न च सौहृदः ॥ ७४
न मित्रं न कलत्रञ्च ह्येतत्सुखफलप्रदम् ।
स्वप्नतुल्यं सुखं ह्येतद्भजनीयो हरिः स्वयम् ॥ ७५
प्रह्लादस्य वचः श्रुत्वा तेऽपि नारायणेति च ।
ऊचुः परस्परं सर्व्वे ह्यानन्दं परमं गताः ॥ ७६
तच्छ्रुत्वा च गुरुर्दुःखं प्राप्तवांस्तमभर्त्सयत् ।
ताड़यामास क्रुद्धो वै जीवनं दूरतः कथम् ॥ ७७
तेऽपि तत्ताड़नादेव चलिताः सर्व्वबालकाः ।
प्रह्लादो नैव चलितो धैर्य्यं परममास्थितः ॥ ७८
गुरुश्चैव पुनः प्राह गण्यते न पिता त्वया ।
ताड़यिष्याम एवं चेत् त्यज्यताञ्च हरिस्त्वया ॥ ७९
इत्येवं वचनं श्रुत्वा प्रह्लादो वाक्यमब्रवीत् ।
त्वयोक्तञ्चैव तत् तथ्यं पिता न लङ्घ्यते मया ॥ ८०
तावदेव पिता चायं यावन्न प्राप्यते पिता ।
जगतां भाग्यसंयोगात् सर्व्वदुःखहरः परः ॥ ८१
दीपस्य शिखया तावन्मोदते ऋषिसत्तम ।
यावत् सूर्य्यो न दृश्येत पुनर्दीपः कथं पिता ॥ ८२
सुखकरश्च लोकानां जायते न कदाचन ।
इदञ्च मामकञ्चैव पितुर्वृत्तञ्च पुत्रकः ॥ ८३
करोति सर्व्वथा चेद्धि ह्यगस्त्यो जलहारकः ।
येनैव तु चरित्रेण प्राप्यते शाश्वतं पदम् ॥ ८४
तदेव च प्रकर्त्तव्यं नान्यथा कर्हिचित् पुमान् ।
एवञ्च ताड्यते चेद्धि ताड्यतां न निषिध्यते ॥ ८५
मत्पिता यो भवेन्नित्यं स वै रक्षां करिष्यति ।
प्राणाश्च यदि मे विप्र गमिष्यन्ति तथा पुनः ॥ ८६
गच्छन्तु च सुखेनैव न त्याज्यं हरिकीर्त्तनम् ।
इत्येवं वचनं श्रुत्वा गुरुः पीड़ां तथाकरोत् ॥ ८७
रोमापि वक्रं नैवासीत् प्रतापाच्च हरेः पुनः ।
सामान्यस्य मनुष्यस्य मानश्चैव भवेदिह ॥ ८८
किं पुनर्देहहरेरेव जायते ऋषिसत्तमाः ।

प्रयत्नं निष्फलं ज्ञात्वा गृहीत्वा बालकं गुरुः ॥ ८९
आजगाम गुरुर्दैत्य गृह्यतां पुत्त्रकस्त्वया।
अस्माकं बालका ये च ते सर्व्वे सद्वशीकृताः ॥ ९०
प्रयोजनं न पुत्त्रेण यथेच्छसि तथा कुरु।
इत्युक्त्वा च गतः सोऽथ राजा दुःखमुपागतः।
तदनन्तरञ्च यज्जातं श्रूयतामृषिसत्तमाः ॥ ९१

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
नृसिंहोपाख्याने वाक्यनिरूपणं नामै-
कोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः।

सूत उवाच।

समाहूय तदा सो वै मन्त्रिपुत्त्रानथाब्रवीत्।
धन्याः स्थ कृतकृत्याः स्थ न त्यक्तं पितृशासनम् ॥ १
मत्पुत्त्रञ्च तथा यूयं शिक्षयन्तु ममाज्ञया।
तथेति वचनं गृह्य नीत्वा तं रहसि स्वयम् ॥ २
ऊचुस्ते श्रूयतां मित्र क्रियतां वचनञ्च नः।
ईदृशं पितरं त्वञ्च रोषयित्वा कुतः सुखम् ॥ ३
तस्मात् त्वञ्च तदीयञ्च वचनं कुरु सर्व्वथा।
अस्माकञ्च मतं ह्येतद्द्यथेच्छसि तथा कुरु ॥ ४
बहुधा शिक्षितः सोऽपि न मेने वचनं पितुः।
प्रत्युवाच तदा तांस्तु श्रूयतां मित्रसत्तमाः ॥ ५
कः पिता कश्च बन्धुर्वै का माता भगिनी पुनः।
मित्रं किञ्च कलत्रं वा सर्व्वं स्वार्थपरन्त्विह ॥ ६
यथा सायञ्च वृक्षेषु पक्षिणो विविधाः स्थिताः।
प्रातःकाले च ते यत्र स्वीयं कार्य्यं भवेदिह ॥ ७
तत्रैव च गमिष्यन्ति उड्डयन्ति ततस्ततः।
तद्वद्देहेषु पित्रादि बध्यते सञ्ज्योगतः ॥ ८
कर्म्मयोगं स्वकं भुक्त्वा गच्छन्ति दैवयन्त्रिताः।
इदं सुखञ्च संसारे दृश्यते गृहसम्भवम् ॥ ९
सर्व्वं स्वप्नमयं तच्च नात्र कार्य्या विचारणा।
दिवा मनोरथो यादृक् क्रियते सुकृतेन च ॥ १०
तथा रात्रौ प्रदृश्येत तथेदं सुखमुत्तमम्।
एवं मत्वा तथा यूयं भजन्तु वै हरिं सदा ॥ ११
अन्यथा यमपाशे च पतिष्यथ न संशयः।
कतिधा च पिता पुत्त्रं पितृत्वं परिकल्पते।
पुनश्च कतिधा तं वै पुत्त्रत्वे परिकल्पते।
जीवस्तु कर्म्मबद्धो वै भ्रमते योनिसङ्कटे ॥
केवलं पातकं चेत्स्यात् तदा स नरकं व्रजेत्।
केवलञ्चैव पुण्यञ्च स्वर्गञ्च लभते तदा ॥ १४
उभयोः समतायां वै मनुष्यत्वं भवेदिह।
उभयोश्च क्षये मुक्तिर्भवतीति सुनिश्चितम् ॥
यावच्च कर्म्मसम्बन्धस्तावन्मुक्तिः सुदुर्लभा।
तस्माच्च कर्म्मनाशार्थं भजनीयो हरिः सदा।
हरेश्च भजनेनैव कर्म्म दूरीभवत्युत।
भोगेनैव तथा बालाः प्रायश्चित्तैः पुनस्तथा।
देही पवित्रतां याति ह्यन्यथा भ्रमणं भवेत्।
यावच्च मलिनं वस्त्रं तावद्रागो न सज्जते ॥
क्षालिते च पुनर्वस्त्रे रागः सज्जति वै दृढम्।
तथेदञ्च शरीरं वै पापैर्मलिनतां गतम् ॥
निर्म्मलं भजनेनैव जायते नात्र संशयः।
यूयञ्च बालिशाः सर्व्वे तदाज्ञापालका दृढ़ाः।
भवन्तश्च प्रकुर्व्वन्तु तदाज्ञां सर्व्वथा पुनः।
मयैव तु न कर्त्तव्यं वचनं राजसम्भवम् ॥ २
यदहञ्च करोम्यत्र करोमि गम्यतामितः।
इत्युक्तास्ते बलाच्चैव बोधितास्तं समागमन्।
समागत्य तदा ते च राजानञ्च तथाब्रुवन्।
राजापि वचनं तेषां श्रुत्वा तञ्च समाह्वयत्।
तमागते स्वयं सो वै बोधयामास सत्तमाः।
शृणु पुत्त्र प्रवक्ष्यामि मूढ़भावं त्यजाधुना ॥
यदर्थञ्च हरिं लोका भजन्त्येव निरन्तरम्।
तत् सर्व्वञ्च त्वया प्राप्तं मत्तोऽहं हरिरेव ॥
देवाश्च दानवाः सर्व्वे गन्धर्व्वा नागसत्तमाः।
ऋषयश्चापरे ये च वश्याः सन्ति ममाधुना।
मत्तश्चैव हरिं ह्यत्र भजसि त्वं वदाधुना।
निग्रहानुग्रहं कर्त्तुं सामर्थ्यं विद्यते मम ॥
तस्मान्माञ्च विहायैव हरिः कोऽत्र भविष्यति।
कथं न भजसे माञ्च बालभावाद्वदाधुना ॥
इत्येवं वचनं श्रुत्वा प्रह्लादो वाक्यमब्रवीत्।
शृणु दैत्य कथं ब्रूषि अहं विष्णुर्न चापरः ॥
अन्तरं बहुधा प्रोक्तं तवैव च हरेरथ।

पर्णे चैव यथा काचे कोकिले मण्डुके यथा ॥ ३०
कर्दमे चन्दने चैव सात्त्विके तामसे तथा।
सूर्य्ये चैवात्र खद्योते वेदे च प्राकृते तथा ॥ ३१
लोहे चैव सुवर्णे च गवि च शूकरे तथा।
युवयोरन्तरं तावन्नात्र कार्य्या विचारणा ॥ ३२
अहङ्कृतिपरस्त्वञ्च मल-मूत्रविदूषितः।
कामी मानी च क्षुद्रश्च नाशवान् परदूषकः ॥ ३३
त्वयि तुष्टेऽमृतं नास्ति तस्मिंस्तुष्टेऽमृतं परम्।
कस्मान्न लज्जसे त्वञ्च हरिं वक्तुन्तु साम्प्रतम् ॥ ३४
इत्येवं निश्चयं त्वञ्च जानीहि दैत्यसत्तम।
गजस्यारोहणं हित्वा शृगालं कः समारुहेत् ॥ ३५
तदा भजनीयो वै हरिर्हरिर्हरिः सदा।
[illegible]मिच्छसि यत् त्वञ्च कुरु त्वञ्च निरन्तरम् ॥ ३६
इत्येवं भर्त्सितः सो वै पुनश्चैवाब्रवीदिदम्।
यं पुत्र भजसि सो वै विद्यते कुत्र तद्वद ॥ ३७
इत्येवं वचनं श्रुत्वा प्रह्लादो वचनं तदा।
प्राहेदं श्रूयतां श्रेष्ठाः श्रुत्वा पापं भवेन्न हि ॥ ३८

इति श्रीशैवे महापुराणे ज्ञानसंहितायां प्रह्लादोपाख्यानं नाम षष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठास्तेनोक्तं यद्वचो ध्रुवे।

प्रह्लाद उवाच।

यत् पृष्टञ्च त्वया दैत्य श्रूयतां कथयामि ते ॥ १
पृथिव्याञ्चैव यत् किञ्चित् स्थूलं सूक्ष्मञ्च दृश्यते।
समुद्रे पर्व्वते वापि वृक्षे द्वीपे सरित्सु च ॥ २
चेतनाचेतने चैव ग्रामे च नगरे तथा।
सूर्य्ये चैवाप्यरण्ये च चैत्रे च पितृकानने ॥ ३
त्वयि चास्ति सदा यो वै मय्येव च न संशयः।
पश्चात् पूर्व्वञ्च मध्ये च ह्यन्ते चैव भविष्यति ॥ ४
तद्रूपं वर्णितुं नैव शक्यते दैत्यसत्तम।
इत्येवं वचनं श्रुत्वा दैत्यश्चैवाब्रवीदिदम् ॥ ५
शृणु पुत्र प्रवक्ष्यामि यदुक्तं हि त्वया पुनः।

प्रह्लाद उवाच।

न स्थलञ्चैव विद्येत यत्र नैव हरिः स्वयम् ॥ ६
इति श्रुत्वा वचस्तस्य उवाच दैत्यसत्तमः।
यदि हरिश्च सर्व्वत्र स्तम्भेऽस्मिन् वर्त्तते वद ॥ ७
इत्युक्तः सोऽवदत् तत्र वर्त्तते हि सुनिश्चितम्।
इत्युक्तस्तु पुनस्तं वै ह्यब्रवीत् पश्य पूजनम् ॥ ८
इत्युक्त्वा तु चकाराशौ श्रूयतामृषिसत्तमाः।
नेत्रे चारक्तके कृत्वा दन्तान् दन्तैश्च घर्षयन् ॥ ९
उच्चचालासनात् तस्मात् खड्गमादाय वै तदा।
बिभेद तं तथा स्तम्भं पश्य पूजां करोम्यहम् ॥ १०
तस्मिन् स्तम्भे यदा खड्गो लग्नः शब्दो महानभूत्।
पर्व्वताशनिसंयोगे यथा जातः पुरा तथा ॥ ११
तस्मात् स्तम्भात् स्वयं देवो विष्णुराविरभूत् तदा।
सन्ध्यायां क्रुध्यमानस्तु त्रासयन् दैत्यसत्तमान् ॥ १२
अर्द्धञ्चैव शरीरञ्च नरस्यार्द्धं हरेरपि।
नृसिंहञ्च तदा रूपं धृत्वा ध्वनिं चकार ह ॥ १३
महाकाले यथा मेघो गर्ज्जन्ति ऋषिसत्तमाः।
तथा हड़हड़ाशब्दं गड़गड़ेति पुनः पुनः ॥ १४
केशराः शोभमानाश्च ताभिर्मेघानखण्डयत्।
नादेन च दिशः सर्व्वाः प्रतिशब्दञ्च चक्रिरे ॥ १५
मुखस्य ज्वालया सर्व्वान् ज्वालयन् दैत्यपुङ्गवान्।
हुङ्कारेण तथा गर्भान् पातयन् सर्व्वथा तथा ॥ १६
महद्भिश्च नखैश्चैव करालं नृहरेर्वपुः।
तद्दृष्ट्वा भयमापन्ना दैत्याः सर्व्वे पुरःस्थिताः ॥ १७
युद्धाय च कृतोद्योगा युद्धं चक्रुः सुदारुणम्।
विष्णुना च तदा ते च हताः श्वासेन तत्क्षणम् ॥ १८
हिरण्यकशिपुश्चैव युद्धं चक्रे सुदारुणम्।
पृथिवी संशयं प्राप्ता समुद्राश्चचलास्तदा ॥ १९
द्यौश्चचाल सनक्षत्रा पर्व्वताश्चलतां गताः।
एवं युद्धं तयोरासीन्मुहूर्त्तमृषिसत्तमाः ॥ २०
पश्चात् सोऽपि स्वयं ज्ञात्वा लोकानां दुःखमद्भुतम्।
सायञ्च कर्षयामास देहल्यां दैत्यपुङ्गवम् ॥ २१
उत्सङ्गे च तदा धृत्वा नखैश्च हृदयं तदा।
विदार्य्य रुधिरं तस्य पपौ च गर्ज्जयंस्तदा ॥ २२
अन्त्राणि चापि तस्यैव कण्ठे चैव व्यधारयत्।
मारितश्च तदा तेन पश्यतां हि दिवौकसाम् ॥ २३

जय जयेति भाषन्तो पुष्पवृष्टिं पुरस्तदा।
चक्रुस्ते परमप्रीता नृत्यं गीतञ्च चक्रिरे ॥ २४
कियन्तो मारिता दैत्याः कियन्तश्च पलायिताः।
निर्दैत्या पृथिवी जाता दुःखञ्च दूरतो गतम् ॥ २५
जगत् स्वास्थ्यं तदा लेभे ह्यानन्दं परमं गताः।
लक्ष्मीश्चापि तदा तञ्च दृष्ट्वा विस्मयमागता ॥ २६
अहो हि कीदृशं रूपं प्रभुणा सम्प्रदर्शितम्।
देवदुन्दुभयो नेदुः सर्व्वं निश्चलतां गतम् ॥ २७
कयाधुश्चापि पुत्रञ्च सान्त्वयन्तीव दुःखिता।
प्रह्लादो विस्मयं प्राप्तो ह्यहो धन्यः स्वयं हरिः ॥ २८
यद्यपि च हतः सोऽपि ज्वाला न विनिवर्त्तिता।
तथा च व्याकुलं जातं सर्व्वञ्चैव जगत् तदा ॥ २९
देवाश्च दुःखमापन्नाः किं भविष्यति हा पुनः।
इत्येवञ्च वदन्तस्ते भयाद्दूरमुपस्थिताः ॥ ३०
परस्परं वदन्तस्ते गन्तव्यं हि त्वया पुरा।
इन्द्रश्चैव ब्रुवन्तस्ते गन्तव्यञ्च त्वया पुरः ॥ ३१
मया चैव कथं प्राप्यं दर्शनञ्च पुनः शुभम्।
ब्रह्मा वदति श्मश्रूणि दहन्ति न मया पुरः ॥ ३२
लक्ष्मीर्वदति रूपं न मया दृष्टं कथन्तु वै।
ऋषयश्च गता नैव देवाश्च न गतास्तदा ॥ ३३
क्रोधशान्तिः कथं तस्य जायते ऋषिसत्तमाः।
सर्व्वैर्मिलित्वा प्रह्लादः प्रार्थितो गतवान् पुरः ॥ ३४
तं दृष्ट्वा नृहरिस्तस्य गात्रञ्च जिह्वया लिहन्।
दुःखितं दुःखितं वत्सं जनेषु ख्यापयंस्तदा ॥ ३५
उरसालिङ्गयामास शीतलं हृदयं तदा।

श्रीनृसिंह उवाच।

दुष्टेन ज्वलितं मेऽद्य हृदयं शीतलं मम ॥ ३६
जातं ते पुत्र संयोगात् पुत्रस्याङ्गं सुशीतलम्।
पितुश्चैवाथ पुत्रस्य संयोगः सुखकारणम्।
तच्च ते पुत्र संयोगाद्भविष्यति च सन्ततिः ॥ ३७
इत्युक्त्वा च पुनस्तञ्च पुत्र पुत्रेति लालयन्।
राज्यं पुत्र कुरु त्वञ्च पुत्र-पौत्रविवर्द्धनम् ॥ ३८
भविष्यति च ते वंशो ह्यवध्यो मे सदा किल।
इति वरं तदा दत्त्वा फुत्कारान् मोचयत् तदा ॥ ३९
एतस्मिन्नन्तरे देवा गणेशं प्रार्थयन् पुनः।
त्वञ्च बुद्धिमतां श्रेष्ठो गच्छ देवं शमं नय ॥ ४०
इत्युक्तः सुमुखश्चाखुं समारुह्य प्रचक्रमे।
गजाननः स्वयं श्रेष्ठ आखुश्च वाहनं पुनः ॥
लम्बश्चैवोदरं तस्य रूपं हास्यकरं तदा।
दृष्ट्वा देवास्तदा ते च वर्णयन्तोऽतिविस्मिताः।
वाहनोत्फालने सोऽपि पतितो वाहनात् ततः।
हास्यं प्राप्तास्तदा देवा नृहरिश्च विशेषतः।
हसितञ्च तदा दृष्ट्वा देवाः सुखमुपागताः।
गतश्चैव हरेः क्रोधो हसिते च हरौ सुराः।
तथापि न निवर्त्तेत ज्वाला च नृहरेः पुनः।
दुःखं प्राप्तास्तदा देवाः शम्भोश्च शरणं ययुः।
गत्वा च स्तवयामासुर्लोकानां सुखहेतवे।
नमस्तेऽस्तु नमस्तेऽस्तु नमस्तेऽस्तु सदाशिव।
पूर्व्वं दुःखं यदा जातं तदा च रक्षिता वयम्।
समुद्रो मथितश्चैव रत्नानान्तु विभागशः ॥ ४
स्तुतो देवैस्तदा शम्भो गृहीत्वा गरलं त्वया।
रक्षिताः स्म तदा नाथ नीलकण्ठ इति स्मृतः।
प्रसिद्धञ्च यदा यस्य दुःखञ्च जायते प्रभो।
तदा तुभ्यञ्च नत्वा हि सर्व्वं दुःखं व्यलीयत।
इदानीं नृहरेर्ज्वाला पीड़ते नः सदाशिव।
शमयितुञ्च त्वं देव शक्तोऽसीति सुनिश्चितम् ॥
इति स्तुतस्तदा शम्भुर्गच्छन्तु देवसत्तमाः।
शमयिष्यामि वो दुःखं सर्व्वथा हि व्रतं मम।
मच्छरणं यो गतश्चैव तस्य दुःखं क्षयं गतम्।
इत्युक्तास्ते तदा देवा आनन्दं परमं गताः ॥
यथागतं तदा जग्मुः श्रूयतामृषिसत्तमाः।
शिवोऽपि च विचार्य्यैव शारभं रूपमद्भुतम् ॥
धृत्वा जगाम तत्रैव स्थितोऽसौ नृहरिः स्वयम्।
दूरतश्च तदीयं वै दृष्ट्वा रूपं भयङ्करम् ॥ ५४
उवाच वचनं तेऽद्य रक्षिता देवसत्तमाः।
जय जयेति शम्भुवैं नमस्कृत्य व्यलीयत ॥ ५५
वाद्यानि च विचित्राणि नृत्यानि विविधानि च।
पुष्पवर्षमनेकञ्च जातं तत्र महात्मनि ॥ ५६
इत्युक्ताश्च तदा देवा आनन्दं परमं गताः।
शिवं विष्णुञ्च प्रह्लादं नृहरेः रूपमद्भुतम् ॥ ५७
वर्णयित्वा ह्युपास्यञ्च गता धाम स्वकं स्वकम्।
शिवोऽपि च तदा देवान् नृहरिञ्च यदा पुनः।

ास्यति सकलान् कामानुक्त्वैवान्तरधीयत ।
ौ दैत्यौ च पुनः श्रेष्ठौ जातौ च राक्षसोत्तमौ ॥५९
ावणः कुम्भकर्णश्च रामेण निहतौ पुनः ।
ाविव दमघोषस्य कृष्णेन मारितौ पुनः ॥ ६०
कुण्ठञ्च पुनः प्राप्तौ शासनात् परमात्मनः ।
ति वश्च समाख्यातं चरितं नृहरेः पुनः ॥ ६१
िवस्य च महच्चित्रं कथितमृषिसत्तमाः ।
ि च एतन्महच्चित्रं विष्णोश्चैव शिवस्य च ॥ ६२
क्तादस्य सुभक्तस्य श्रोष्यन्ति ऋषिसत्तमाः ।
ते दुःखस्य पात्रं वै भविष्यति न संशयः ॥ ६३
नेकञ्च फलं तेषां पुत्र-पौत्रादिसम्पदः ।
विष्यन्ति न सन्देहस्तस्माच्च कथितं मया ।
तः परं प्रवक्ष्यामि श्रूयतामृषिसत्तमाः ॥ ६४

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
नृसिंहचरितवर्णनं नामैकषष्टि-
तमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः ।

ऋषय ऊचुः ।

ूत सूत महाबाहो ज्ञानवानसि सुव्रत ।
ुनरेव शिवस्यैव चरितं ब्रूहि विस्तरात् ॥ १
ुरातनाश्च राजान ऋषयो देवतास्तथा ।
ाराधनञ्च कस्यैव चक्रुस्ते परमर्षयः ॥ २

सूत उवाच ।

ाधु पृष्टमृषिश्रेष्ठाः श्रूयतां कथयामि वः ।
्रह्मा पितामहश्चैव तत्पुत्राः परमर्षयः ॥ ३
न्ये च ऋषयो ये च कश्यपादय एव ते ।
र्व्वे चैव शिवस्यैव पूजां चक्रुः पुरातनाः ॥ ४
ार्थिवीं धातुकीं वापि मानसीं वापि सत्तमाः ।
ृत्वा सिद्धिञ्च सम्प्राप्ता इदानीमपि पूज्यते ॥ ५
ारदोऽपि विशेषेण वशिष्ठ ऋषिसत्तमः ।
रुन्धती तथा साध्वी कश्यपो मुनिपुङ्गवः ॥ ६
दितिश्चापि नित्यं वै चकार पार्थिवं पुरा ।
नवस्स सदा चक्रुः स्वायम्भुवपुरःसराः ॥ ७
प्रियव्रतश्च तत्पुत्रश्चकार पूजनं शुभम् ।
इक्ष्वाकुश्चापि मान्धाता सगरो नहुषस्तथा ॥ ८
दिलीपश्चैव तत्पुत्रो राजा दशरथस्तथा ।
यदायुः सकलं तस्य किञ्चिन्न्यूनं न पुत्रता ॥ ९
तदा दुःखं समापन्नः पुत्रार्थी पार्थिवांस्तदा ।
पुत्रेष्टिञ्च चकारासौ तन्मध्ये च स्वयं हरिः ॥ १०
चतुर्भिश्चैव रूपैश्च सम्भूय च स्वयं तदा ।
कौशल्या पार्थिवांश्चक्रे ऋष्यादिष्टा स्वयं सती ॥ ११
रामश्चैव तथा नित्यं पार्थिवान् समपूजयत् ।
तद्वंशे च समुत्पन्नास्ते ते सर्व्वमपूजयन् ॥ १२
पुरूरवाश्च राजा वै ह्यैलः शर्व्वं स्वयं शुभः ।
पार्व्वतीशापसंयोगात् स्त्रीत्वं तस्य न्यवर्त्तत ॥ १३
मासं स्त्री मासमात्रञ्च पुरुष एव न संशयः ।
पूजने पार्थिवानाञ्च जातं तस्य महात्मनः ॥ १४
भरतश्च महापूजां शिवस्यैव तथाकरोत् ।
अन्येऽपि ये महाभागाः पाण्डवाः प्रत्यपूजयन् ॥ १५
अर्ज्जुनश्च विशेषेण व्यासस्य वचनात् तदा ।
कृष्णेन च तदा नित्यं वटुके पर्व्वतोत्तमे ॥ १६
पूजनन्तु शिवस्यैव सप्तमासावधि स्वयम् ।
प्रसन्नो भगवांस्तस्य वरानन्याननेकशः ॥ १७
सम्प्राप्य च जगत् सर्व्वं वशेऽनयत वै तदा ।
विल्वेश्वरस्य सम्पन्नो विल्वराशिर्मुनीश्वराः ॥ १८
नलेन च तथा पूजा कृता च शङ्करस्य च ।
पूर्व्वजन्मनि वै विप्रास्तेन राज्यं सुशोभनम् ॥ १९
प्राप्तञ्च रक्षितस्तेन यतिर्हरसमीपतः ।
तस्य पुण्यप्रभावेण राज्यं दत्तं हरेण च ॥ २०
इति तस्य वचः श्रुत्वा पुनरूचुर्ऋषीश्वराः ।
नलेन च कथं पूर्व्वं पूजितः शङ्करो मुदा ॥ २१
रक्षितश्च यतिः को वै तत् त्वं ब्रूहि सुविस्तरम् ।
अन्यच्चैवार्ज्जुनस्यैव सेवनं शङ्करस्य च ॥ २२
ब्रूहि तच्च विशेषेण व्यासस्यैवोपदेशतः ।
कथं जातञ्च तस्यैव कथञ्च पूजितस्तदा ॥ २३
इति तेषां वचः श्रुत्वा सूतो वाक्यमथाददे ।
शृणु विप्राः प्रवक्ष्यामि नलस्यामिततेजसः ॥ २४
अर्ब्बुदाचलसंज्ञे तु पर्व्वते भिल्लवंशजः ।
आहुकश्च तदाभ्याशे वसति स्म मुनीश्वराः ॥ २५
तत्पत्नी ह्याहुकीनाम्नी चकार शिवपूजनम् ।

निरन्तरञ्च कोटीशे कृत्वा च जलसेचनम् ॥ २६
यौवनञ्च तयोः श्रेष्ठं तत्सुखञ्च निरन्तरम् ।
आनन्देन समायुक्तौ भुञ्जानौ प्रीतमानसौ ॥ २७
कस्मिंश्च समये स्वामी आराधनार्थं गतो यदा ।
एतस्मिन्नन्तरे कश्चिद्द्यतिर्जटिल आगतः ॥ २८
सन्ध्यायां दर्शनं कृत्वा शङ्करस्य स्थलेच्छया ।
इमां रात्रिं समाक्रम्य प्रातश्चैव यथागतम् ॥ २९
गमिष्यामि च तत्रैव विचार्य्यैवमुपागतः ।
एकाकिनीं तदा दृष्ट्वा भयत्रस्तविलोचनः ॥ ३०
तयापि च पिता लब्ध ह्युक्तश्च स्थिरतां गतः ।
एतस्मिन् समये सो वै ह्याजगाम गृहाधिपः ॥ ३१
पूजनं तस्य कृत्वा च ब्रूहि कार्य्यं प्रभो इति ।

यतिरुवाच ।

अद्य स्थलञ्च मह्यं वै दीयतां प्रातरेव हि ॥ ३२
गमिष्ये सर्व्वथा भिल्ल इत्युक्तोऽन्यद्दृणु प्रभो ।
स्वल्पञ्चैव स्थलं मेऽद्य वर्त्तते नान्यथा कथम् ॥ ३३
इत्युक्तश्च तदा सो वै गमनाय मतिं दधे ।
तावद्भिल्लया वचः प्रोक्तं धर्म्मश्चैव गमिष्यति ॥ ३४
स्वामिनञ्च तदाब्रूत युवाभ्यां स्थीयतां गृहे ।
अहं वहिःस्थितिं कुर्य्यामायुधानि दधत्यपि ॥ ३५
तद्वचश्च श्रुतं तेन स्वामिना च विचारितम् ।
स्त्रियं वहिश्च निष्कास्य कथं स्थेयं मया गृहे ॥ ३६
यद्भावि तद्भवेद्देव मया स्थेयं वहिः स्वयम् ।
इत्याग्रहं तदा कृत्वा गृहे तौ च सुरक्षितौ ॥ ३७
स्वयञ्चैवायुधान्यत्र धृत्वातिष्ठद्वनेचरः ।
योगीन्द्रो ध्यानयोगेन स्थितः कोणान्तरे तदा ॥ ३८
सापि निद्रां करोति स्म स्थितो वहिर्वनेचरः ।
रात्रौ च पशवस्तं वै पीड़यामासुरुद्धताः ॥ ३९
तेनैव च यथाशक्ति कृतो यत्नश्च निश्चलः ।
तदनन्तरञ्च यज्जातं भिल्लो व्याघ्रैश्च भक्षितः ॥ ४०
प्रातःकालेऽथ योगीन्द्रो दृष्ट्वा भिल्लञ्च भक्षितम् ।
दुःखं प्राप तदा सा च किमर्थं खिद्यते प्रभो ॥ ४१
धन्योऽयं कृतकृत्योऽयं यज्जातमीदृशन्त्विह ।
अहं वै दग्धयिष्यामि स्त्रीणां धर्म्मः सनातनः ॥ ४२
इत्येवञ्च हितं मत्वा तथा कृत्वा स्वयं चितिम् ।
विचार्य्येत्थं स्वयञ्चाग्निं प्रविवेश हिताय वै ॥ ४३

एतस्मिन्नन्तरे साक्षाच्छिवः प्रादुरभूत् पुरः ।
धन्ये धन्ये इति साध्वि प्रसन्नोऽस्मि तवानघे ।

शिव उवाच ।

एतस्मिन्नवतारे वै सुखं प्राप्तं न किञ्चन ।
तस्माच्च जन्मतां याहि ह्येकवारं पुनर्न हि ॥
अयञ्चैव महायोगी हंसरूपो भविष्यति ।
परजन्मनि च युवयोः संयोगञ्च करिष्यति ॥
भिल्लश्च वीरसेनस्य नैषधे नगरे वरे ।
तत्पुत्रश्च नलो नाम भविष्यति न संशयः ॥ ४
त्वञ्चैव भीमराज्ञो वै वैदर्भे नगरे शुभे ।
दमयन्ती च विख्याता भविष्यसि गुणान्विता ।
युवाञ्चोभौ मिलित्वा च राज्यभोगं सुविस्तरात्
भुक्त्वा मुक्तिश्च योगीन्द्रैर्दुर्लभा वो भविष्यति ॥
इत्युक्त्वा च स्वयं शम्भुरचलेशोऽभवत् तदा ।
यस्मान्न चलितो धर्म्मादचलेश इति स्मृतः ॥ ५०
तदुक्तञ्च तदा ह्यासीत् तेषाञ्चैव महात्मनाम् ।
इति वश्च समाख्यातं श्रूयताञ्चार्ज्जुनस्य च ॥ ५

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

त्रिषष्टितमोऽध्यायः ।

सूत उवाच ।

दुर्य्योधनजितास्ते च पाण्डवाः पञ्च एव च ।
द्रौपद्या च तथा साध्व्या द्वैताख्यं वनमाययुः ।
तत्रैव सूर्य्यदत्तां वै स्थालीञ्चाश्रित्य ते तदा ।
कालञ्च वाहयामासुः सुखेन ऋषिसत्तमाः ॥
दुर्व्वासाः प्रेरितस्तेन च्छलार्थञ्च समागतः ।
शिष्यैश्चैवायुतैः सार्द्धं याचयामास तां तदा ॥ ३
मनोऽभीष्टञ्च भोज्यं वै श्रूयताम्ऋषिसत्तमाः ।
प्रेषितश्चैव स्नानार्थं तस्मिंश्च समये हि ते ॥ ४
दुःखिताश्च तदा पञ्च प्राणांस्त्यक्तुमुपादधुः ।
द्रौपद्या च स्मृतः कृष्णो ह्याजगाम त्वरादपि
शाकञ्च भक्षयित्वा तु तेषां सिद्धिं समादधत् ।
दुर्व्वासाश्च तदा शिष्यांस्तृप्तान् ज्ञात्वापलायत
यस्यैव भगवांस्तुष्टस्तस्य न्यूनं कथं भवेत् ।

...याश्चैव कृतार्थाश्च येषाञ्च भगवत्कृपा ॥ ७
...ुत्वा वचनं सोऽपि आनन्दं परमं गतः।
...ात् ते पाण्डवाः कृष्णं पप्रच्छुः किं भविष्यति ॥ ८
...वान् शत्रुस्त्पन्नः किं करिष्यामहे प्रभो।
...युक्तास्तु तदा कृष्णः पाण्डवानिदमब्रवीत् ॥ ९

श्रीकृष्ण उवाच।

...यतां पाण्डवाः श्रेष्ठाः श्रुत्वा कर्त्तव्यमेव हि।
...एकाञ्च मया गत्वा शत्रुणाञ्च जिगीषया ॥ १०
...ार्थ्ये चोपदेशाच्च ह्युपमन्योर्महात्मनः।
...ा ह्याराधितः शम्भुः प्रसन्नः परमेश्वरः ॥ ११
...के पर्व्वते श्रेष्ठे सप्तमासन्तु सेवितः।
...ान् कामांस्तदा दत्त्वा विल्वे विल्वेश्वरः स्थितः१२
...तापान्मया सर्व्वं सामर्थ्यं लब्धमुत्तमम्।
...ानीं सेव्यते देवो भुक्ति-मुक्तिफलप्रदः ॥ १३
...न सुसेवध्वं शिवं सर्व्वसुखावहम्।
...ुक्त्वान्तर्दधे कृष्ण आश्वास्य पाण्डवानथ ॥ १४
...ण्डवा अपि भिक्षञ्च प्रेषयामासुरोजसा।
...ानाञ्च परीक्षार्थं तस्य दुर्य्योधनस्य च ॥ १५
...पि सर्व्वञ्च तत्रत्यं दुर्य्योधनगुणोदयम्।
...ैचीनञ्च तज्ज्ञात्वा पुनः प्राप प्रभून् प्रति ॥ १६
...त्तं ते निशम्यैव दुःखं प्रापुर्मुनीश्वराः।
कर्त्तव्यं क्व गन्तव्यं सत्यपाशेन यन्त्रिताः ॥ १७
...स्मिन्तरे व्यासो जटाजूटविभूषितः।
...ासाञ्च स्वयं राशिः साक्षाद्धर्म्म इवापरः ॥ १८
...दृष्ट्वा ते तदा प्रीता उत्थाय पुरतः स्थिताः।
...वासनं तदा तस्मै कुशाजिनसुशोभितम् ॥ १९
...ोपविष्टं तं व्यासं पूजयन्ति स्म हर्षिताः।
...ां कृत्वा विधानेन स्तुतिञ्च विविधां तदा ॥ २०
...ा मुनिञ्च सन्तोष्य धन्याः स्म इति चाब्रुवन्।
...ा नः सफलं जन्म अद्य नः सफलाः क्रियाः ॥२१
...ा मे सफला देवा ब्राह्मणाः सत्यवादिनः।
...श्चैव तथा दानं योगाश्च सफलाः कृताः ॥ २२
...ञ्च विविधं मेऽद्य पूजाश्च विविधास्तथा।
...त् सर्व्वञ्च सफलं जातं ते दर्शनात् प्रभो ॥ २३
...ञ्च दूरतो यातं दर्शनात् ते पितामह।
...श्चैव महद्दुःखं दत्तञ्च क्रूरकर्म्मभिः ॥ २४

श्रीमतां दर्शने जाते दुःखञ्चैव गमिष्यति।
कदापि न गतं तच्च निश्चयं मे विचारितम् ॥ २५
महदाश्रये च सम्प्राप्ते समर्थे सर्व्वकारिणि।
यदि दुःखं न गच्छेत् तु दैवमत्रैव कारणम् ॥ २६
निश्चयञ्चैव गच्छेच्च दारिद्र्यं दुःखकारणम्।
महताञ्च स्वभावोऽयं यद्दीनप्रतिपालनम् ॥ २७
तद्गुणा नैव गण्यन्ते महिमा वस्तुमात्रतः।
आश्रयस्य वशादेव पुंसो वै जायते प्रभो ॥ २८
लघुत्वञ्च महत्त्वञ्च नात्र कार्य्या विचारणा।
उत्तमानां स्वभावोऽयं यद्दीनपरिपालनम् ॥ २९
रङ्कस्य रक्षणं लोके ह्यतिश्रेयस्करं मतम्।
पुरुषस्य प्रयत्नो वै सुजातानाञ्च सेवनम् ॥ ३०
अतः परञ्च भाग्यं वै दोषश्चैव न दीयते।
एतस्मात् कारणात् स्वामिंस्त्वयि दृष्टे शुभं सदा ॥३१
त्वदागमनमात्रेण सन्तुष्टं मानसं हि नः।
इत्येतद्वचनं श्रुत्वा व्यासश्चैवाब्रवीदिदम् ॥ ३२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः।

व्यास उवाच।

धन्याः स्थ कृतकृत्याः स्थ सत्यं नैव विलोपितम्।
सुजनानां स्वभावोऽयं प्राणान्तेऽपि सुशोभनः ॥ १
धर्म्मश्च त्यज्यते नैव सत्यं सत्फलसाधनम्।
अस्माकञ्चैव यूयञ्च ते चापि तुल्यतां गताः ॥ २
तथापि पक्षपातो वै धर्म्मिष्ठानां मतो बुधैः।
प्रथमञ्चैव दुष्टेन धृतराष्ट्रेण चक्षुषा ॥ ३
धर्म्मस्त्यक्तः स्वयं लोभाद्युष्माकं राज्यमाहृतम्।
तस्य यूयञ्च ते चापि पुत्रा एव न संशयः ॥ ४
पितरि च मृते बाला ह्यनुकम्प्या महात्मनः।
पश्चात् पुत्रश्च तेनैव वारितो न कदाचन ॥ ५
अनर्थश्चैव जायेत यद्येवञ्च कृतं तदा।
अतः परञ्च यज्जातं तज्जातं नान्यथा भवेत् ॥ ६
अयं दुष्टो भवन्तश्च धर्म्मिष्ठाः सत्यवादिनः।
तस्मादन्ते शुभस्यैव शुभञ्चैव पुनः पुनः ॥ ७

यत्रैव वापितं वीजं तत्प्ररोहो भवेदिह ।
तस्माद्दुःखं न कर्त्तव्यं भवद्भिः सर्व्वथा शुभाः ॥ ८
इत्युक्ताः पाण्डवास्तत्र पुनरेवाब्रुवन् वचः ।
सत्यमुक्तं त्वया नाथ दुष्टैर्दुःखं निरन्तरम् ॥ ९
दीयते च वनेऽत्रैव मुहुर्म्मुहुर्दुरात्मभिः ।
तन्नाशय शुभं किञ्चिद्ध्येयं देयं त्वया प्रभो ॥ १०
कृष्णेन कथितं पूर्व्वमाराध्यः शङ्करः सदा ।
प्रमादश्च कृतोऽस्माभिरिदानीमुपदिश्यताम् ॥ ११
इत्येतद्वचनं श्रुत्वा व्यासो हर्षसमन्वितः ।
उवाच श्रूयतां श्रेष्ठा मयैव सेव्यते शिवः ॥ १२
भवद्भिः सेव्यतां नित्यं सुखं स्यादचलं सदा ।
पञ्चसु पाण्डवेष्वेव विचार्य्य शङ्करार्च्चने ॥ १३
विचार्य्यैवार्ज्जुनं व्यासः पुरातनमुनिस्थिति ।
तपःस्थानं विचार्य्यैव पुनरेवाब्रवीदिदम् ॥ १४
श्रूयतां पाण्डवश्रेष्ठाः कथयामि हितं सदा ।
ब्रह्मादि-तृणपर्य्यन्तं यत् किञ्चित् दृश्यते जगत् ॥१५
तत् सर्व्वं शिवरूपञ्च दृश्यं ध्येयञ्च यत् पुनः ।
सर्व्वेषाञ्चैव सेव्यो वै शङ्करः सर्व्वदुःखहा ॥ १६
विष्णुश्च वर्त्तते यो वै तस्यैव रूपमद्भुतम् ।
परन्तु दीर्घकालेन प्रसन्नो भवति स्फुटम् ॥ १७
शिवश्चैव तु स्वल्पेन कालेनैव प्रसीदति ।
भुक्तिं दत्त्वा च मुक्तिं हि यच्छति च सुनिश्चितम्॥१८
तस्मात् सेव्यः सदा शम्भुर्भुक्ति-मुक्तिफलेप्सुभिः ।
क्षत्रियस्य परोक्षश्च इन्द्र एव सदा हितः ॥ १९
सुप्रसन्नश्च विघ्नं वै न करिष्यति सर्व्वदा ।
पुनश्चैव शिवस्यैव मन्त्रञ्चैव प्रदास्यति ॥ २०
इत्युक्त्वाऽर्ज्जुनमाहूय त्विन्द्रविद्यामुपादिशत् ।
स्नात्वा च प्राङ्मुखो भूत्वा जग्राह मुनिसत्तमात् ॥२१
पार्थिवञ्च विधानं वै ददौ च ऋषिपुङ्गवः ।
प्रथमञ्चेन्द्रमाराध्य तदाप्तः पुनः शिवम् ॥ २२
इतो गच्छाधुना पार्थ इन्द्रकीले सुशोभने ।
जाह्नव्याश्च समीपे वै स्थित्वा चैव तपः कुरु ॥ २३
आयुधानि च सर्व्वाणि धृत्वा मार्गं न दापयन् ।
तस्यापि च स्तवं नित्यं पठनीयं शिवस्य च ॥ २४
अदृश्याञ्चैव विद्याञ्च दत्त्वा च हितकारिणीम् ।
आशिषञ्च तदा सो वै ददौ तस्मै महामुनिः ॥ २५

धर्म्ममास्थाय सर्व्वे वै तिष्ठन्तु राजसत्तमाः ।
सिद्धिः स्यात् सर्व्वतः श्रेष्ठा नात्र कार्य्या वि…
इति दत्त्वाशिषं तेभ्यो व्यासश्चान्तरधीयत ।
अर्ज्जुनोऽपि तदा तत्र दीप्यमानो व्यदृश्यत ।
मन्त्रेण शिवरूपेण तेजश्चातुलमावहत् ।
ते सर्व्वे तस्य तेजश्च दृष्ट्वा तु निश्चयं गताः ।
इदं कार्य्यं त्वया साध्यं नान्यैश्चैव कदाचन ।
व्यासस्य वचनाद्भ्रातः सफलं कुरु जीवितम् ।
इति चैवार्ज्जुनं ते वै विरहोत्सुककातराः ।
अनिच्छन्तोऽपि तत्रैव प्रेषयामासुरर्ज्जुनम् ॥
द्रौपदी दुःखसंयुक्ता नेत्राश्रूणि निरुध्य च ।
प्रेषयन्ती शुभं राजंस्त्वया कार्य्यं प्रयत्नतः ॥
ते सर्व्वेऽपि च तं तत्र विसृज्यार्ज्जुनमादरात् ।
अत्यन्तदुःखमापन्ना मिलित्वा पञ्च एव ते ॥
स्थितास्तत्र वदन्ति स्म श्रूयतामृषिसत्तमाः ।
दुःखेऽपि प्रियसङ्गो वै न दुःखाय प्रजायते ।
वियोगे द्विगुणं तच्च कथं धैर्य्यं भवेदिह ।
कुर्व्वत्स्वेवं तदा दुःखमृषिवर्य्यः समागतः ।
तं नत्वा चैव सम्पूज्य दत्त्वासनं वचोऽब्रुवन् ।
श्रूयताञ्च ऋषिश्रेष्ठ दुःखदग्धा वयं प्रभो ।
दर्शनं ते च सम्प्राप्य ह्यानन्दं प्राप्नुमो मुने ।
कियत्कालं वसात्रैव दुःखनाशाय वै प्रभो ।
इत्युक्तः स ऋषिश्रेष्ठो ह्यवसत् तत्सुखाय वै
कथाभिर्विविधाभिश्च दुखञ्च नोदयंस्तदा ।
वार्त्तायां क्रियमाणायां धर्म्मराजो ब्रवीदिदं

धर्म्मराज उवाच ।

शृणु त्वञ्च ऋषिश्रेष्ठ दुःखशान्तिर्मता मम ।
पृच्छामि त्वां महाबाहो कथनीयं त्वया प्र…
ईदृशञ्चैव दुःखं हि पुरा प्राप्तस्तु कश्चन ॥
वयमेव परं दुःखभाजनं नापि कश्चन ।
इति पृष्ट ऋषिश्रेष्ठः प्रत्युवाच पुनस्तदा ॥
श्रूयतां धर्म्मराज त्वं तव दुःखं न किञ्चन ।
पूर्व्वञ्च नलराज्ञो वै जातं तस्य महात्मनः ।
हरिश्चन्द्रे तथा राजन् रामस्यैवाथ पाण्डव ।
यज्जातं वर्णितुञ्चैव शक्यते न मया पुनः ॥
शरीरं दुःखराशिञ्च मत्वा त्याज्यं त्वया…

दच्च धृतं तेन प्राप्तमेव न संशयः ॥ ४३
श्रमं मातृगर्भे वै जातस्य दुःखसम्भवः।
गोऽपि यौवने कामान् भुञ्जानो दुःखरूपिणः ॥४४
ागतैर्दिनस्यैव कार्य्यभारैरनेकशः।
युश्च क्षीयते नित्यं न जानाति हि तत् पुनः ॥ ४५
ते च मरणञ्चैव ह्यतो दुःखमतः परम्।
ादिदमसत्यञ्च त्वन्तु सत्यं समाचर ॥ ४६
व तुष्यते शम्भुस्तथा कार्य्यं नरेण च।
वे भजनेनैव सर्व्वं दुःखं विलीयते ॥ ४७
ञ्च विविधैर्ज्ञानैर्दिनातिवाहनं तदा।
स्ते भ्रातरः सर्व्वे मनोरथपथैः पुनः ॥ ४८
र्जुनोऽपि स्वयं गच्छन् दुर्गादि-शकुनानथ।
बुद्धा च तेनैव पश्यन् रम्याण्यनेकशः ॥ ४९
सा हर्षयुक्तो वै जगामाचलमुत्तमम्।
गत्वा च गङ्गायाः समीपं सुन्दरं स्थलम् ॥ ५०
ीकिकाननं यत्र तिष्ठति स्वर्गसन्निभम्।
तस्थौ स्वयं स्नात्वा नत्वा च गुरुसत्तमम् ॥ ५१
पदिष्टं वेशादि तथा चैवाकरोत् स्वयम्।
श्च पार्थिवं कृत्वा सुन्दरं समसूत्रकम् ॥ ५२
ग्रे च जपं कुर्व्वंस्तेजसो राशिमुत्तमम्।
ालञ्चैव संस्नातः पूजनं विविधं तथा ॥ ५३
रोपासनं तत्र तपस्तप्त्वा सुदारुणम्।
व शिरसस्तेजो निःसृतञ्च तदा सुराः ॥ ५४
भयं समापन्नाः प्रविष्टश्च कदा ह्ययम्।
ते च विचार्य्यैव कथनीयं बिडौजसे ॥ ५५
वणञ्च गतास्तत्र कथयामासुर्वै तदा।
वाथ ऋषिश्चैव सूर्य्यो वाथ विभावसुः ॥ ५६
तपस्यति देव न जानीमो वने तव।
व तेजसा दग्धा ह्यागतास्तव सन्निधिम् ॥ ५७
तस्तैः सुरैः सर्व्वैर्ज्ञात्वा पुत्रचिकीर्षितम्।
प्य तान् विसृज्यैव स्वयञ्च रूपमद्भुतम् ॥ ५८
जगाम तत्रैव वृद्धस्य जटिलो यथा।
यष्टिकां धृत्वा वृद्धो जर्ज्जरतां गतः ॥ ५९
ार्मोत्तरीयञ्च पतन् पतन् पदे पदे।
ातं तदा दृष्ट्वा पूजाञ्च कृतवान् स्वयम् ॥ ६०
ोऽग्रे च स्तुतिं कृत्वा क्वागतोऽसि वदाधुना।

इत्युक्तस्तु हरिः सो व धैर्य्यार्थञ्च वचोऽब्रवीत् ॥ ६१
नवे च वयसि स्वामिन् किं तपस्यसि साम्प्रतम्।
मुक्त्यर्थं न जयार्थं हि सर्व्वथा तप एव ते ॥ ६२
इति पृष्टस्तदा तेन सर्व्वं संवेदितं पुनः।
इन्द्रः श्रुत्वा पुनर्वाक्यमुवाच श्रूयतां त्वया ॥ ६३
युक्तं न क्रियतेऽप्येव सुखं स्वप्नसमं मतम्।
तदर्थं न तपो युक्तं मुक्त्यर्थं कुरु साम्प्रतम् ॥ ६४
इन्द्रश्च सुखदाता वै मुक्तिदाता भवेन्न हि।
तस्मात् त्वं सर्व्वथा श्रेष्ठ कर्त्तुमर्हसि सुव्रत ॥ ६५
इत्येतद्वचनं श्रुत्वा क्रोधं चक्रेऽर्ज्जुनस्तदा।
राज्यार्थी न च मुक्त्यर्थी किमर्थं भाषसे त्विदम्॥६६
व्यासस्य वचनेनैव क्रियते तप ईदृशम्।
इतो गच्छ किमर्थं मां पातयितुं त्वमिच्छसि ॥ ६७
इत्युक्तश्च प्रसन्नो वै रूपमद्भुतसुन्दरम्।
स्वोपकरणसंयुक्तं दर्शयामास वै तदा ॥ ६८
इत्येवञ्च तदा दृष्ट्वा लज्जितश्चार्ज्जुनस्तदा।
इन्द्रस्तञ्च समाश्वास्य पुनरेव वचोऽब्रवीत् ॥ ६९
धन्योऽसि कृतकृत्योऽसि सुस्थिरं हि मनस्तव।
बलिष्ठाः शत्रवस्ते च दुर्य्योधनपुरःसराः ॥ ७०
द्रोणो भीष्मश्च कर्णश्च सर्व्वे ते दुर्ज्जया ध्रुवम्।
ममासाध्या भवेयुर्वै सर्व्वथा च हितं शृणु ॥ ७१
एतज्जयन्तु कर्त्तुं वै समर्थः कश्च नाधुना।
वर्त्तते च शिवं वज्य तस्माच्छम्भुं भजाधुना ॥ ७२
सर्व्वं कर्त्तुं समर्थोऽस्ति भुक्ति-मुक्तिफलप्रदः।
अहमन्ये च ब्रह्माद्या विष्णुः सर्व्ववरप्रदः ॥ ७३
अन्ये जिगीषवो ये च ते सर्व्वे शिवपूजकाः।
अद्यप्रभृति मन्मन्त्रं हित्वा चैव शिवं भज ॥ ७४
पार्थिवेन विधानेन ध्यानेनैव शिवस्य च।
उपचारैरनेकैश्च सर्व्वभावेन भारत ॥ ७५
सिद्धिः स्यादचला तेऽद्य नात्र कार्य्या विचारणा।
इत्युक्त्वा च वरान् सर्व्वान् समाहूयाब्रवीदिदम् ॥७६
सावधानतया स्थेयमेतस्य रक्षणे ध्रुवम्।
राजंस्त्वया प्रमादो वै न कर्त्तव्यः कदाचन ॥ ७७
श्रेयसां बहवो विघ्ना भवन्ति राजसत्तम।
धैर्य्यञ्च वर्त्ततेऽप्येव तथैव रक्ष्यतां त्वया ॥ ७८
शिवः सम्यक् फलं तुभ्यं दास्यति नात्र संशयः ॥

इति दत्त्वा वरं तस्य जगाम भवनं स्वकम्।
अर्ज्जुनोऽपि तपस्तेपे शिवमुद्दिश्य वै तदा ॥ ७९

इति श्रीशैवे महापुराणे ज्ञानसंहितायामर्ज्जुनतपःकरणं नाम चतुःषष्टितमोऽध्यायः ॥६४॥

पञ्चषष्टितमोऽध्यायः।

सूत उवाच।

स्नानञ्च विधिवत् कृत्वा न्यासादि विधिवत् तथा।
ध्यानञ्चैव यथोक्तञ्च व्यासोक्तं यत् तथाकरोत् ॥ १
एकपादतलेनैव तिष्ठन् मुनिवरो यथा।
सूर्य्ये दृष्टिं निबध्यैव मन्त्रमावर्त्तयन् स्थितः ॥ २
तपसस्तेजसा व्याप्ता देवाश्च विस्मयं ययुः।
पुनश्चैव शिवं याताः स्वदर्थे तप आहितम् ॥ ३
यदिच्छति नरः सोऽयं किं न यच्छसि वै प्रभो।
इत्युक्त्वा च स्तुतिं चक्रुर्विविधां देवतास्तदा ॥ ४
तदीयन्तु वचः श्रुत्वा शिवो वचनमब्रवीत्।
गम्यतां वश्च कार्य्यं वै करिष्यामि न संशयः ॥ ५
परावृत्य गतास्ते वै निश्चयं परमं गताः।
एतस्मिन्नन्तरे दैत्यो मूकनामा समागतः ॥ ६
शौकरं रूपमास्थाय प्रेषितश्च दुरात्मना।
दुर्य्योधनेन विप्रेन्द्रा मायिना चार्ज्जुनं तदा ॥ ७
यत्रार्ज्जुनश्च तिष्ठेत तेन मार्गेण वै तदा।
शृङ्गञ्च पर्व्वतस्यैव च्छिन्दन् वृक्षाननेकशः ॥ ८
शब्दञ्च विविधं कुर्व्वन् शीघ्रवेगेण संयुतः।
अर्ज्जुनोऽपि च तं दृष्ट्वा विचारे तत्परो ह्यभूत् ॥ ९
कोऽयञ्च कुत आयातः क्रूरकर्म्मा च दृश्यते।
ममानिष्टं ध्रुवं कर्त्तुं समागच्छत्यसंशयम् ॥ १०
ममैवं मन आख्याति शत्रुरेव न संशयः।
इत्युक्त्वा मनसि पार्थो विचारपरमानसः ॥ ११
बहवो मे हताः पूर्व्वं दैत्याश्च दानवास्तदा।
तदीयः कश्चिदायाति वैरं शोधयितुं पुनः ॥ १२
समायाति न सन्देहो नात्र कार्य्या विचारणा।
अथवा च सखा कश्चिद्दुर्य्योधनहितावहः ॥ १३
यस्मिन् दृष्टे प्रसीदेत मनः स हितमावहेत्।
यस्मिन् दृष्टे तदेवेह कलुषं शत्रुरेव च ॥ १४
आचारः कुलमाख्याति वपुराख्याति भोजनम्।
वचनं श्रुतमाख्याति स्नेहमाख्याति लोचनम्।
आकारेण तथा गत्या चेष्टया भाषितैरिह।
मनसश्च तथा वृत्त्या ज्ञायतेऽन्तर्गतं मनः ॥ १५
उज्ज्वलं सरसञ्चैव वक्रमारक्तमेव च।
नेत्रं चतुर्व्विधं प्रोक्तं तस्य भावाः पृथग्विधाः।
उज्ज्वलं मित्रसंयोगे सरसं पुत्रदर्शने।
वक्रञ्च कामिनीयोगे चारक्तं शत्रुदर्शने ॥ १७
तस्मिन् मम तु सर्व्वाणि कलुषाणीन्द्रियाणि
अयं शत्रुर्भवेदेव मारणीयो न संशयः ॥ १८
गुरोश्च वचनं मेऽद्य वर्त्तते दुःखदस्त्वया।
हन्तव्यः सर्व्वथा राजन्नात्र कार्य्या विचारणा
एतदर्थं स्वायुधानि मया चैव न संशयः।
इति विचार्य्य तत्रैव बाणञ्च सन्धयन् स्थितः
शिवोऽपि स्वगणैः सार्द्धं भिल्लरूपं विधाय
अर्ज्जुनस्य च रक्षार्थं परीक्षार्थं समागतः।
बद्धकच्छश्च वल्लीभिर्बद्ध्वा केशान् हरस्तदा।
शरीरे श्वेतरेखाश्च धनुर्बाणयुतः स्वयम्।
बाणानां तूणकं पृष्ठे धृत्वा सो वै जगाम ह
गणाश्चैव तथा जाता भिल्लराजोऽभवच्छिवः
शब्दांश्च विविधान् कृत्वा जगाम वाहिनीपतिः
शूकरस्य च सेनायाः शब्दश्च प्रदिशो दिशः
व्यानशे वनशब्देन व्याकुलश्चार्ज्जुनस्तदा।
पर्व्वतस्थाश्च ये सर्व्वे ते सर्व्वे व्याकुलास्तदा
अहो किञ्च भवेदेव शिवः शुभं करोतु च।
मया चैव श्रुतं पूर्व्वं कृष्णेन कथितं पुनः ॥
व्यासेन कथितञ्चैव स्मृत्या वेदैस्तथा पुनः।
शिवः शुभकरः प्रोक्तः शिवः सुखकरः सदा।
भुक्तिदश्च परं प्रोक्तो मुक्तिदो नात्र संशयः।
तन्नाम स्मरतां पुंसां कल्याणं जायते ध्रुवम्।
भजतां सर्व्वभावेन दुःखं पापञ्च नश्यति।
यदि कदाचिज्जायेत तदा कर्म्मसमुद्भवम् ॥
बहूनि भाविनि नूनमल्पञ्चैव स यच्छति।
अथवा प्रारब्धस्यैव भोगश्चैव न संशयः ॥
तदा बहुफलेऽल्पेन भोगं निस्तीर्य्य शङ्करः

दाचिदिच्छया तच्च दूरीकुर्य्यान्न संशयः ॥ ३२
षञ्चैवामृतं कुर्य्यादमृतं विषमेव च।
दिच्छति करोत्येव समर्थः किं निषिध्यते ॥ ३३
था चैव शुभं तस्य भावि तच्च समाचरेत्।
तेन च व्रतं पूर्व्वं गृहीतं भक्तरक्षणम् ॥ ३४
तस्यैव शुभं भावि नात्र कार्य्या विचारणा।
भस्य मरणे मानो भवतीति सुनिश्चितम् ॥ ३५
ति विचार्य्य मयापि ह्येतैर्भक्तैः पुरातनैः।
विभिश्च सदा भक्तै रक्षणीयं मनः स्थिरम् ॥ ३६
ह्योर्गच्छतु वा तिष्ठेत् मरणं निकटे पुरः।
न्तां वाथ प्रकुर्व्वन्तु स्तुतिं वा दुःखसञ्चयः ॥ ३७
ायतां यदि जायेत शङ्करः सुखदः सदा।
दाचिच्च परीक्षार्थं दुःखं यच्छति वै शिवः ॥ ३८
न्ते च सुखदः प्रोक्तो दयालुत्वान्न संशयः।
था चैव सुवर्णञ्च शोधितं शुद्धतां व्रजेत् ॥ ३९
वञ्चैव मया पूर्व्वं श्रुतं मुनिमुखात् तदा।
ङ्गजनेन ममाद्यैव शुभं स्यान्नात्र संशयः ॥ ४०
ायेवञ्च विचारञ्च करोति यावदेव हि।
वच्च शूकरः प्राप्तो बाणस्य मोचनावधि ॥ ४१
वोऽपि पृष्ठतो लग्नो ह्यायाति शूकरस्य च।
योर्मध्ये तदा सोऽयं दृश्यते शृङ्गमद्भुतम् ॥ ४२
म भक्तञ्च मा हन्याच्छिवः शीघ्रतरं गतः।
कस्मिन् समये ताभ्यां कृतं बाणविमोक्षणम् ॥ ४३
ववाणश्च पुच्छे वै ह्यर्ज्जुनस्य मुखे तदा।
वस्य पुच्छतो गत्वा मुखे निःसृत्य शीघ्रगः ॥ ४४
मौ च लीनतां यातस्तस्य वै पुच्छतो गतः।
ात पार्श्वे तस्यैव बाणश्चैवार्ज्जुनस्य च ॥ ४५
करस्तत्क्षणं श्रेष्ठा मृतो भूमौ पपात च।
ा हर्षं परं प्रापुः पुष्पवृष्टिं प्रचक्रिरे ॥ ४६
वस्तुष्टमना ह्यासीदर्ज्जुनः सुखतां गतः।
पस्य च तदा रूपं क्रूरं दृष्ट्वा च तौ तदा ॥ ४७
ज्जुनस्य विशेषेण ह्यहो कपटमद्भुतम्।
ब्रवेण ममाद्यैव बुद्धिर्दत्ता न संशयः ॥ ४८
ति विचार्य्य तत्रैव तदा शिव शिवेति च ॥ ४९
ति श्रीशैवे ज्ञानसंहितायामर्ज्जुनदुःखशान्ति-
सम्भवो नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः।

सूत उवाच।

शिवोऽपि च स्वभृत्यं वै प्रेरयामास वै तदा।
बाणार्थं च ततः श्रेष्ठा अर्ज्जुनो ह्यागतस्तदा ॥ १
एकस्मिन् समये प्राप्तौ बाणार्थं च गणार्ज्जुनौ।
अर्ज्जुनस्तं पराभर्त्स्य बाणञ्चैवाग्रहीत् तदा ॥ २
गणः प्रोवाच तं तत्र किमर्थं गृह्यते त्वया।
बाणश्चैवास्मदीयो वै मुच्यतामृषिसत्तम ॥ ३
इत्युक्तश्चार्ज्जुनस्तर्हि वचनञ्चेदमब्रवीत्।
अज्ञात्वा वदसि किञ्च मूर्खोऽसि त्वं वनेचर ॥ ४
बाणश्च मोचितो मेऽद्य त्वदीयश्च कथं पुनः।
रेखा रूपञ्च पिच्छानि मन्नामाङ्कित एव च ॥ ५
त्वदीयश्च कथं जातः स्वभावो दुस्त्यजस्तव।
इत्येवञ्च तदा श्रुत्वा भिल्लो वाक्यमुपाददे ॥ ६
विप्रस्य श्रूयतां रे त्वं न तपः क्रियते त्वया।
वेशतश्च तपस्वि त्वं न यथार्थं प्रदृश्यते ॥ ७
तपस्वी च कथं मिथ्याभाषणं कुरुते नरः।
नैकाकिनञ्च मां त्वञ्च जानीहि वाहिनीपतिम् ॥ ८
बहुभिर्वनभिल्लैश्च युक्तः स्वामी स आसते।
समर्थः सर्व्वथा कर्त्तुं निग्रहानुग्रहौ पुनः ॥ ९
तस्य बाणश्च वर्त्तेत यो नीतश्च त्वयाधुना।
अयं बाणश्च ते पार्श्वे स्थास्यति न कदाचन ॥ १०
तपःफलं कथं त्वञ्च हातुमिच्छसि तापस।
चौर्य्याच्छलाच्च मानाच्च विस्मयात् सत्यमोचनात् ॥ ११
तपश्च क्षीयते सत्यमेतदेव श्रुतं मया।
तस्माच्च तपसस्तेऽद्य भविष्यति कुतः फलम् ॥ १२
तस्माच्च मुच्यतां बाणः कृतघ्नस्त्वं भविष्यसि।
ममैव स्वामिना बाणो तवार्थं मोचितो ध्रुवम् ॥ १३
शत्रुश्च मारितस्तेन पुनर्बाणश्च रक्षितः।
अत्यन्तञ्च कृतघ्नोऽसि तपः शुभतरं यथा ॥ १४
सत्यञ्च भाषसे त्वञ्च किमन्यां सिद्धिमिच्छसि।
प्रयोजनं ते बाणेन स्वामी च याच्यतां मम ॥ १५
ईदृशांश्च तथा बाणान् बहून् दातुं क्षमः स्वयम्।
राजा च वर्त्तते मेऽद्य किं नैव याच्यते त्वया ॥ १६
प्रार्थनीयो विशेषेण दास्यति विविधं फलम्।

उपकारं परित्यज्य ह्यपकारं समीहसे ॥ १७
न तद्युक्तं त्वयाद्यैव क्रियते त्यज चापलम् ।
इत्येवं वचनं श्रुत्वा पार्थो वाक्यमथाब्रवीत् ॥ १८
शृणु भिल्ल प्रवक्ष्यामि ह्यसत्यं तव भाषणम् ।
यथा जातिस्तथा त्वञ्च जानाम्येवं वनेचर ॥ १९
अहं राजा भवांश्चौरः कथं युद्धमयुक्तता ।
युद्धं मैत्र्यं समैः कार्य्यं नाधमैर्हि कदाचन ॥ २०
तस्मात् ते च तथा स्वामी भविष्यति भवादृशः ।
दातारश्च वयं प्रोक्ताश्चौराः प्रोक्ता वनेचराः ॥ २१
कथं याच्यो मया भिल्लो राजा एव च साम्प्रतम् ।
तमेव याचसे नैव बाणं मां त्वं वनेचर ॥ २२
ददामि ते तथा बाणं सन्ति मे बहवो ध्रुवम् ।
राजा च आग्रहेणैव न दास्यति कृपणं भवेत् ॥ २३
किं पुनश्च तथा बाणं प्रयच्छामि वनेचर ।
यदि चिकीर्षति बाणं कथं नागम्यतेऽधुना ॥ २४
वृथा गच्छति ते भर्त्ता किमर्थं भाषसेऽधुना ।
आगत्य च मया सार्द्धं युद्धे जित्वा च मां पुनः ॥ २५
नीत्वा बाणं सुखं यातु विलम्बः क्रियते कथम् ।
इत्येतद्वचनं श्रुत्वा भिल्लो वाक्यमथाब्रवीत् ॥ २६
अज्ञोऽसि लम्पटिर्नासि मरणन्त्वीहसे कथम् ।
देहि बाणं सुखं तिष्ठ ह्यन्यथा क्लेशभाजनम् ॥ २७
इत्युक्तश्च पुनः प्राह शृणु त्वञ्च वनेचर ।
आगमिष्यति यदा स्वामी दर्शयिष्ये फलं तदा ॥ २८
सिंह-शृगालयोर्युद्धमुपहासकरं महत् ।
श्रुतञ्च पश्यसि त्वञ्च यथेच्छसि तथा कुरु ॥ २९
इत्युक्तश्च गतस्तत्र यत्रास्ते वाहिनीपतिः ।
सर्व्वं निवेदयामास श्रुत्वा हर्षमुपागतः ॥ ३०
आजगाम ससैन्येन शङ्करो भिल्लरूपधृक् ।
अर्ज्जुनश्च तदा सेनां दृष्ट्वा सम्मुखमाययौ ॥ ३१
पुनर्गणं शिवश्चैव प्रेषयामास वै तदा ।
पश्य सैन्यं तपस्विन् नस्त्वञ्च बाणं त्यजाधुना ॥ ३२
मरणं स्वल्पकार्य्यार्थे कथमिच्छसि साम्प्रतम् ।
भ्रातरस्तव दुःखार्त्ताः कलत्रञ्च ततः परम् ॥ ३३
पृथिवी हस्ततस्तेऽद्य यास्यति च मतिर्मम ।
इत्युक्तस्तं तथागत्य ह्यर्ज्जुनाय निवेदितम् ॥ ३४
तच्छ्रुत्वा च पुनः प्राह विपरीतं भविष्यति ।
अद्याहञ्चैव ते बाणं ददामि च मदीयकम् ॥ ३
कुलस्य दूषणञ्चाहं भवामीति न संशयः ।
भ्रातरश्चैव दुःखार्त्ता भवन्ति नान्यथा ध्रुवम् ॥ ३
विद्याश्च निष्फला मे स्युस्तस्मादागच्छ वै प्र
सिंहश्चैव शृगालाद्वा भीतो नैव मया श्रुतः ॥
इत्युक्तश्च पुनर्गत्वा यदुक्तञ्च निवेदितम् ।
सोऽपि हर्षसमायुक्तमर्ज्जुनञ्चागमत् तदा ॥ ३

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
गमनं नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः ।

सूत उवाच ।

तमागतं तदा दृष्ट्वा ध्यानं कृत्वा शिवस्य च ।
गत्वा तत्र पुनः सोऽपि युद्धं चक्रे सुदारुणम् ।
गणाश्च विविधैस्तत्र ह्यायुधैस्तमपीड़यन् ।
शिवोऽपि च स्वयं तत्र युद्धं चक्रे सुदारुणम् ।
अर्ज्जुनश्च तदा तेषां बाणावलिमथाच्छिनत् ।
यदायुधञ्च तैः क्षिप्तं तत् सर्व्वञ्च पराभवत् ।
पीड़ितास्ते गणास्तेन ययुश्चैव दिशो दश ।
गणाश्च वारितास्तेन नाजग्मुरर्ज्जुनं प्रति ॥ ४
शिवश्चैवार्ज्जुनश्चैव युयुधाते परस्परम् ।
शिवोऽपि मनसा नूनं दयां कृत्वार्ज्जुनं ह्यगात्
अर्ज्जुनश्च दृढं तत्र प्रहारं कृतवांस्तदा ।
आयुधानि शिवस्यैव ह्यर्ज्जुनस्याहनत् तदा ॥
कवचञ्च हृतं तेन शरीरं केवलं स्थितम् ।
तदार्ज्जुनः शिवेनैव युद्धं मल्लसमुद्भवम् ॥ ७
चकार मेदिनी दुःखं प्राप्ता सा ससमुद्रका ।
देवा दुःखं समायाताः किं भविष्यति हा पुन
एतस्मिन्नन्तरे देवः शिवो गगनमास्थितः ।
युद्धं चकार तत्रस्थो ह्यर्ज्जुनश्च तथाकरोत् ॥ ८
उड्डीयोड्डीय तौ युद्धं चक्रतुर्देव-पार्थिवौ ।
अर्ज्जुनोऽप्यन्तरं ज्ञात्वा दधार पादयोः शिवम्
धृत्वा पादं तदा सो वै भ्रामयामास वै तदा ।
वत्सलदर्शनार्थाय शिवेनैवं कृतं तदा ॥ ११
पश्चाद्विहस्य तत्रैव शङ्करो रूपमद्भुतम् ।

दर्शयामास हस्ताच्च चलिला सुन्दरं शुभम् ॥ १२
यथोक्तं वेदशास्त्रेण पुराणपुरुषोत्तमम् ।
तं दृष्ट्वा च ऋषिश्रेष्ठा अर्ज्जुनो लज्जितः स्वयम् ॥ १३
अहो शिवः शिवः सोऽयं यो मे प्रभुतया वृतः ।
त्रिलोकीशः स्वयं साक्षाद्वा कृतं किं मयाधुना ॥ १४
बलवती च प्रभोर्माया मायिनामपि मोहिनी ।
किं कृतं रूपमाच्छाद्य प्रभुणा च्छलितो ह्यहम् ॥१५
इति विचार्य्य क्षन्तव्यं क्षन्तव्यञ्च पुनः पुनः ।
उवाच पादयोस्तस्य पतिला शङ्करस्य च ॥ १६
शङ्करोऽसि महादेव क्षन्तव्यञ्च मया कृतम् ।
इति श्रुत्वा तदा हास्यं कृत्वा च शङ्करः पुनः ॥ १७
अर्ज्जुनञ्च समाश्वास्य भक्तोऽसि पुत्रसत्तम ।
परीक्षार्थं मया तेऽद्य कृतमेवं शुचं जहि ॥ १८
इत्युक्त्वा तञ्च हस्ताभ्यामुत्थाप्यार्ज्जुनमेव च ।
विलज्जं कारयामास गणेश्च स्वामिनो गुणैः ॥ १९
पुनः शिवोऽर्ज्जुनं प्राह प्रसन्नोऽस्मि वरं वृणु ।
प्रहारैस्ताड़नं तेऽद्य पूजनं मानितं मया ॥ २०
इच्छया च कृतं मेऽद्य नापराधस्तवाधुना ।
नादेयं विद्यते तुभ्यं यदिच्छसि वृणुष्व तत् ॥ २१
शत्रुषु ते यशो राजन् स्थापनायाद्भुतं कृतम् ।
दुःखञ्चैव न कर्त्तव्यं वैक्लव्यञ्च त्यजाधुना ॥ २२
इत्युक्तश्च पुनस्तत्र सावधानतया स्थितः ।
उवाच शङ्करं सो वै प्रभुणा किं समीहितम् ॥ २३
वर्णनीयो महादेवः कृपालुस्त्वं सदाशिवः ।
इत्युक्त्वा च स्तुतिं तस्य चकार वेदसम्मताम् ॥ २४

अर्ज्जुन उवाच ।

नमस्ते देवदेवाय कैलासवासिने नमः ।
सदाशिव नमस्तुभ्यं पञ्चवक्त्राय ते नमः ॥ २५
कपर्द्दिने नमस्तुभ्यं त्रिनेत्राय नमोऽस्तु ते ।
कुण्डलिने नमस्तुभ्यं सुमुखाय नमोऽस्तु ते ॥ २६
प्रसन्नाय सदा तुभ्यं सहास्यवदनाय च ।
नीलकण्ठ नमस्तुभ्यं सद्योजाताय ते नमः ॥ २७
वृषध्वज नमस्तेऽस्तु वामाङ्गगिरिजाय च ।
दशभुजाय ते देव नमस्तुभ्यं परात्मने ॥ २८
डमरुकपालहस्ताय नमस्ते मुण्डमालिने ।
शुद्धस्फटिकसङ्काश-कर्पूरगौराय च ॥ २९
पिनाकपाणये तुभ्यं त्रिशूलवरधारिणे ।
व्याघ्रचर्म्मोत्तरीयाय गजाम्बरविधारिणे ॥ ३०
नागाङ्गाय नमस्तुभ्यं गङ्गाधर नमोऽस्तु ते ।
सुपादाय नमस्तेऽस्तु मुक्तिदाय नमोऽस्तु ते ॥ ३१
अगुणाय नमस्तेऽस्तु सगुणाय नमोऽस्तु ते ।
यत् किञ्चिद्दृश्यते रूपं तत् तेजस्तावकं स्मृतम् ॥ ३२
गुणांस्ते देव संख्यातुं वेदाश्च प्रभवन्ति न ।
किं पुनर्मन्दबुद्धिश्च वर्णयामि सदाशिव ॥ ३३
योऽसि सोऽसि नमस्तुभ्यं कृपां कर्त्तुं ममार्हसि ।
इति श्रुत्वा पुनः शम्भुः प्रोवाचार्ज्जुनमेव च ॥ ३४
किं वरं त्वं वृणोषीह शीघ्रं वद ददामि ते ।
इत्युक्तश्चार्ज्जुनस्तत्र प्रणिपत्य सदाशिवम् ॥ ३५
उवाच प्रीयतां त्वञ्च ह्यन्तर्यामितया स्थितः ।
तथापि क्रियते मेऽद्य श्रूयताञ्च प्रभो त्वया ॥ ३६
शत्रूणां सङ्कटं यच्च तन्नतं दर्शनात् तव ।
ऐहिकीञ्च परां सिद्धिं प्राप्नुयाञ्च तथा कुरु ॥ ३७
इत्युक्त्वा तं नमस्कृत्य बद्धाञ्जलिपुटः स्थितः ।
शिवोऽपि च तथाभूतं ज्ञात्वा स्वीयं तदा ह्यदात्॥३८
अस्त्रं पाशुपतं नाम ब्रह्माण्डे दुर्ज्जयं परैः ।
तस्मै ददौ तदा शम्भुर्दुर्ज्जयस्त्वं भविष्यसि ॥ ३९
अनेन सर्व्वशत्रूणां जयं कृत्वा शुभं कुरु ।
कृष्णञ्च कथयिष्यामि साहाय्यं ते करिष्यति ॥ ४०
सो वै ममांशभूतश्च स ते कार्य्यं करिष्यति ।
राज्यं निष्कण्टकं प्राप्य धर्म्मान्नानाविधान् कुरु॥४१
हस्तञ्च शिरसि धृत्वा पूजयित्वार्ज्जुनं तदा ।
हृदयालिङ्गनं कृत्वा भक्तवत्सलतां पुनः ॥ ४२
दर्शयित्वा जयं दत्त्वा पूजितोऽन्तरधीयत ।
शिवस्वान्तर्द्धिते तत्र ह्यर्ज्जुनोऽपि स्वमाश्रमम् ॥ ४३
गत्वा हर्षसमायुक्तः प्रणनाम युधिष्ठिरम् ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात ह ॥ ४४
अप्सरसां तथा नृत्यं जातं तत्र ऋषीश्वराः ।
देवाश्चैव तदा सर्व्वे ह्यायुधानि ददुः स्वयम् ॥ ५४
पूजितश्च वरं प्राप्य भ्रातृनेवागमत् तदा ।
सर्व्वे ते भ्रातरश्चैव तन्वाः प्राणमिवागतम् ॥ ४६
मिलित्वा च सुखं प्रापुर्द्रौपदी सुखमालभत् ।
आश्रमे पुष्पवृष्टिश्च चन्दनेन समन्विता ॥ ४७

पपात शकुनार्थं वै तेषाञ्चैव महात्मनाम्।
तेऽपृच्छन् सर्व्ववृत्तान्तं श्रुत्वा हर्षमुपागमन् ॥ ४८
शिवं परञ्च सन्तुष्टं पाण्डवाः सर्व्व एव हि।
धन्यश्च शङ्करश्चैव नमस्कृत्य शिवं मुदा ॥ ४९
अवधिश्चागतं ज्ञात्वा जयश्चैव भविष्यति।
एतस्मिन्नन्तरे कृष्णः श्रुत्वार्ज्जुनं समागतम् ॥ ५०
मिलनाय समायातः श्रुत्वा सुखमुपागतः।
अतश्चैव मया प्रोक्तः शङ्करः सर्व्वदुःखहा ॥ ५१
मया च सेव्यते सो वै भवद्भिरपि सेव्यताम्।
इत्युक्त्वा च गतस्तत्र कृष्णश्च द्वारकां प्रति ॥ ५२

इति श्रीशैवे महापुराणे ज्ञानसंहितायाम्-
अर्ज्जुनवरप्रदानं नाम सप्तषष्टि-
तमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः।

ऋषय ऊचुः।

सूत सूत महाभाग साधूक्तं हि त्वयानघ।
विधानं पार्थिवस्यैव यथोक्तमृषिणा तदा।
अर्ज्जुनाय सुखार्थञ्च तत् त्वं ब्रूहि विशेषतः ॥ १

सूत उवाच।

सम्यक् पृष्टमृषिश्रेष्ठास्तदहं कथयाम्यहम्।
यदा दुःखन्त्वसाध्यं वै जायते ऋषिसत्तमाः ॥ २
दुःखस्य नाशनायैव सुखार्थं मुक्तयेऽथवा।
सद्गुरुञ्च प्रपद्येत मन्त्रं प्राप्य पुनस्ततः ॥ ३
शुद्धिञ्चैव शरीरस्य कृत्वा सुविधिवन्नरः।
मलोत्सर्गं ततः कृत्वा दन्तधावनमाचरेत् ॥ ४
विश्वासं परमं लब्ध्वा शिवमाराधनं चरेत्।
ब्राह्मे मुहूर्त्ते उत्थाय नत्वा च गुरुमेव च ॥ ५
शिवस्यैवाथवा नाम तीर्थानामथवा शुभाः।
मुखं प्रक्षाल्य तत्रैव स्नानकालावधि स्वयम् ॥ ६
आचमनं ततः कृत्वा मन्त्रैर्नामपदैरपि।
तिलकञ्च तदा कृत्वा द्वादशाङ्गेषु वै नरः ॥ ७
शास्त्रोक्ताञ्च तथा नित्यं सम्पाद्य विधिवत् पुमान्।
भूतशुद्धिं विधायैव प्रतिष्ठां प्राणसम्भवाम् ॥ ८
कृत्वा च सेवनं तस्य सिद्धिदं सर्व्वदा नृणाम्।
मन्त्रेणानेन तत् सर्व्वं सम्पाद्य ऋषिसत्तमाः।
ज्योतीरूपस्तदा शम्भुर्हृदये तिष्ठते मम।
हृदयस्थः शरीरं मे पुनातु जपसिद्धये ॥ ९
एवं कृत्वा शिवस्यैव कृत्यञ्चैव समाचरेत्।
पितृकार्य्यञ्च प्रथमं सूर्य्यार्घञ्च ततः परम् ॥
गणपस्य ततः पूजां पश्चाद्विष्णोस्तथैव च।
भवानीपूजनञ्चैव कारयेद्विधिवत् पुमान् ॥
पश्चाच्च पार्थिवस्यैव विधानं विधिवच्चरेत्।
शुद्धदेशसमुद्भूतां मृदमाहारयेत् ततः ॥ १

ओं ओं अष्टमूर्त्तये नमः।

इत्यनेनैव मन्त्रेण मृदमादाय यत्नतः।
संशोध्य मृत्तिकां तत्र स्थापयेद्विधिवत् पु
अथवा कृष्णपक्षस्य चतुर्द्दश्यां समानयेत्।
पुनश्च मासमात्रेण ह्याहरेत् तावदेव च ॥
आचमनं विधायैव प्रयोगं तिथिपूर्व्वकम्।
कृत्वा न्यासविधिं कुर्य्यादङ्गानां करयोस्त

तत्र—शिवाय अङ्गुष्ठाभ्यां नमः। भवा
नीभ्यां नमः। शर्व्वाय मध्यमाभ्यां नमः।
पतये अनामिकाभ्यां नमः। महादेवाय
काभ्यां नमः। ईशानाय करतल-कर
नमः। एवं हृदयादिन्यासः। शिवा
याय नमः। भवाय शिरसे स्वाहा।
शिखायै वषट्। पशुपतये कवचाय
महादेवाय नेत्रत्रयाय वौषट्। ईशानाय
फट्॥ ततो ध्यानम्—

ओं ध्यायेन्नित्यं महेशं रजतगिरिनिभं
चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशु-मृग-वरा
भीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणै-
र्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं (क) निखिलभय
पञ्चवक्त्रं त्रिनेत्रम्॥
कर्पूरगौरं करुणावतारं
संसारसारं भुजगेन्द्रहारम्।

(क) विश्ववीजमिति प्रसिद्धः पाठः।

सदा वसन्तं हृदयारविन्दे
भवं भवानीसहितं नमामि ॥ १८
कैलासपीठासनमध्यसंस्थं
भक्तैश्च नन्द्यादिभिः सेव्यमानम्।
भक्तार्त्तिदावानलमप्रमेयं
ध्यायेदुमालिङ्गितविश्वरूपम् ॥ १९
एवं ध्यात्वा हरं पश्चात् पूजनञ्च समाचरेत्।
अथवा—
यथोक्तरूपिणं देवं ध्यायामि च शिवं मुदा ॥ २०
एवं ध्यात्वा च यत् कार्य्यं तदेव श्रूयतां द्विजाः।
हरो महेश्वरो देवः शूलपाणिः पिनाकधृक् ॥ २१
पशुपतिः शिवश्चैव यजमान इति क्रमात्।
मृदाहरणं सङ्घट्टं प्रतिष्ठाह्वानमेव च ॥ २२
स्नपनं पूजनञ्चैव क्षमस्वेति विसर्ज्जनम्।
हराय नम इति मृदाहरणम्। महेश्वराय
नम इति लिङ्गसङ्घट्टनम्। शूलपाणये नम इति
प्रतिष्ठापनम्। पिनाकपाणये नम इत्यावाहनम्।
कैलासशिखराद्रम्यात् समागच्छ मम प्रभो ॥ २३
पूजाञ्चेमां गृहीत्वा च यथोक्तवरदो भव।
यथोक्तरूपिणं शम्भुमहमावाहयामि च ॥ २४
आकृतिं तद्दशांशेन भोज्यञ्च तद्दशांशतः।
महोदयञ्च वृषभं गणान् प्रियतमानथ ॥ २५
पूजयित्वा च यत् कृत्यं कुर्य्याच्च शङ्करस्य च।
श्रीपशुपतये नम इति स्नपनम्।
नामभिर्विविधैः स्तोत्रैर्मृत्युञ्जयपुरःसरैः ॥ २६
स्नापयेच्च शिवं सम्यग्देहि ह्यर्घोदकेन च।
श्रीशिवाय नम इति विविधद्रव्योपसमर्पणम्।
धूपं दीपञ्च नैवेद्यमारात्रिकमतः परम् ॥ २७
यजमानाय नम इति क्षमस्वेति ततःपरम्।
पूर्व्वोक्तञ्च पुनर्ध्यानं कृत्वा तु जपमारभेत् ॥ २८
ओँ अस्य श्रीसदाशिवमन्त्रस्य वामदेव ऋषि-
र्देवी पङ्क्तिश्छन्दः श्रीशिवो देवता मम भुक्ति-
मुक्तिप्राप्तये जपे विनियोगः।
यथोक्तं गुरुणा मन्त्रं जपेच्च शिवसन्निधौ।
अनन्तफलसिद्ध्यर्थं जपेच्च विधिवत् पुमान् ॥ २९
अनन्यमनसा तत्र ध्यायेद्देवञ्च त्र्यम्बकम्।
यथाशक्ति जपं कृत्वा तर्पणं तद्दशांशकम् ॥ ३०
मार्ज्जनञ्च दशांशञ्च कुर्य्याच्छिवफलेच्छया।
अष्टमूर्त्तिश्च पूज्येत साङ्गपूजाफलाय च ॥ ३१
शर्व्वाय क्षितिमूर्त्तये नमः। भवाय जल-
मूर्त्तये नमः। रुद्राय तेजोमूर्त्तये नमः। उग्राय
वायुमूर्त्तये नमः। भीमायाकाशमूर्त्तये नमः।
पशुपतये यजमानमूर्त्तये नमः। महादेवाय
सोममूर्त्तये नमः। ईशानाय सूर्य्यमूर्त्तये नमः।
अक्षतैश्चन्दनैर्वापि पूजां कुर्य्यात् सदा बुधः।
पश्चान्नृत्यञ्च गीतञ्च गल्लनादादिकं तथा ॥ ३२
पुनश्चाक्षतपुष्पं वा गृहीत्वाञ्जलिना तदा।
प्रार्थयेच्छङ्करं तत्र मन्त्रैरेतैर्ऋषीश्वराः ॥ ३३
तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड।
कृपानिधे इति ज्ञात्वा भूतनाथ प्रसीद मे ॥ ३४
अज्ञानाद्यदि वा ज्ञानाज्जपपूजादिकं मया।
कृतं तदस्तु सफलं कृपया तव शङ्कर ॥ ३५
अहं पापी महानद्य पावनश्च महान् भवान्।
इति विज्ञाय देवेश यदिच्छसि तथा कुरु ॥ ३६
वेदैः पुराणैः सिद्धान्तैर्ऋषिभिर्विविधैरपि।
न ज्ञातोऽसि महादेव कुतोऽहं त्वां सदाशिव ॥ ३७
यथा तथा त्वदीयोऽस्मि सर्व्वभावैर्महेश्वर।
इत्येवञ्चाक्षतान् पुष्पाण्यारोप्य च शिवोपरि ॥ ३८
प्रार्थनां विविधां कृत्वा विसृजेच्च शिवं तदा।
यथेदानीञ्च देवेश कृपार्थं समुपागतः ॥ ३९
तथा त्वया पुनर्देव समागन्तव्यमेव च।
पुनर्मासं दिनं गृह्य प्रयोगञ्च समाप्य च ॥ ४०
संसारसम्भवं कार्य्यं कुर्य्याच्चैव विचक्षणः।
एवञ्चैव विधानेन कृता पूजा फलप्रदा ॥ ४१
अलाभे ब्राह्मणानाञ्च मन्त्रैः पूजां समाचरेत्।
स्वयञ्च पार्थिवीं कुर्य्यात् पूजासाङ्गं फलं लभेत् ॥ ४२
तदक्षताशिषञ्चैव गृह्णीयाच्छङ्कराज्ञया।
तस्य न्यूनं भवेन्नैव येनैव पूजितो हरः ॥ ४३
षण्मासं यो नरश्चैव पूजाञ्चैव शिवस्य च।
कुर्य्याच्च विधिवच्छ्रेष्ठो जीवन्मुक्तो भवेन्नरः ॥ ४४
शापानुग्रहता तस्य जायते नात्र संशयः।
तस्य दर्शनमात्रेण शिवदर्शनजं फलम् ॥ ४५

प्राप्नोति नात्र सन्देह ऋषीणां शासनन्त्विदम् ।
इत्येवञ्च समाख्यातं यथाबुद्ध्यनुसारतः ॥ ४६
एवञ्च क्रियते सर्व्वैः कृष्णेन्द्रमुनिसत्तमैः ।
इदं यः शृणुयात् पुण्यं सिद्धिः स्यादनपायिनी ॥ ४७

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
पार्थिवपूजाविधानं नामाष्टषष्टि-
तमोऽध्यायः ॥ ६८ ॥

एकोनसप्ततितमोऽध्यायः ।

ऋषय ऊचुः ।

श्रोतुमिच्छामहे सूत सर्व्वज्ञस्त्वं यतः स्मृतः ।
कृष्णेनोक्तं मया नित्यं सेव्यते शङ्करः प्रभो ॥ १
कदा च सेवितः सो वै तत् त्वं ब्रूहि विचक्षण ।

सूत उवाच ।

श्रूयतां कथयाम्यद्य यथा च सेवितः शिवः ॥ २
गोकुलान्मथुरां गत्वा मारिते मातुले स्वयम् ।
मोचित्वा वसुदेवादीनाहूय यादवानथ ॥ ३
राज्यञ्चैवोग्रसेनाय दत्त्वा कृष्णः शशास यत् ।
उपवीतं पितुः प्राप्य ह्यवन्तीं गतवांस्तदा ॥ ४
सान्दीपनिं समासाद्य ततश्च शिवमन्त्रकम् ।
सम्प्राप्य तत्प्रभावेण विद्याः सर्व्वाः स्वयं प्रभुः ॥ ५
स्वल्पेनैव च कालेन पुत्रं दत्त्वा गुरोरथ ।
मथुराञ्च समायातो दैत्यैर्युद्धं चकार सः ॥ ६
दैत्यैश्च सर्व्वतो व्याप्ता नगरी ऋषिसत्तमाः ।
एतस्मिन्नन्तरे तेन कारिता नगरी शुभा ॥ ७
समुद्रे योजनानान्तु संख्यया द्वादशावधि ।
तत्र तान् योगमायायाः प्रभावात् परमेश्वरः ॥ ८
गृहकार्य्यैश्च तत्रत्यान् सर्व्वोपकरणैः सह ।
आरोप्यानुग्रहं कृत्वा मुचुकुन्दं स्वयं गतः ॥ ९
दैत्यैश्च पीड़ितः सोऽपि तत्रैव बलवत्तरैः ।
कदाचित् पर्व्वते तत्र नाम्ना वै रैवते ततः ॥ १०
उपमन्युं शिवगणं भक्तञ्चैव शिवस्य च ।
पप्रच्छ परमं प्रीत्या कथं लोके जयाम्यहम् ॥ ११
इति श्रुत्वा तु तस्यैव वचनं गणसत्तमः ।
त्वमपि विष्णुरूपोऽसि कथं न सेवसे शिवम् ॥ १२
सदा सहायः शर्व्वश्च विद्यते तव निश्चितम् ।
सर्व्वं त्वं प्राप्यसे तस्मात् पूजां कुरु निरन्तरम् ।
इत्येवञ्च ततः प्राप्य मन्त्रमाराधनं कविः ।
सेवयामास विप्रेन्द्राः सप्तमासावधि स्वयम् ।
कुसुमैर्विविधैस्तं वै सेवयामास शङ्करम् ।
कमलैर्विल्वपत्रैश्च शतपत्रैः कुशैस्तथा ॥ १
करवीरैश्च दूर्व्वाभिरर्कपुष्पैः कुशेशयैः ।
शङ्खीपुष्पैस्तथा देवं सन्तोष्य पुरुषोत्तमम् ।
आसनैर्विविधैर्ध्यानैः प्रसन्नः शङ्करस्तदा ।
उवाच कृष्णं तत्रैव व्रियतां वरमुत्तमम् ॥ १
ततः प्रसन्नमनसा वासुदेवो ह्युवाच ह ।

श्रीभगवानुवाच ।

साम्प्रतं सकलं मेऽद्य प्रभावात् तव शङ्कर ॥
दैत्यैश्च पीड़ितश्चाहं त्वामहं शरणं गतः ।
पूर्व्वैश्च सेवितः शम्भुर्ब्रह्मणा सेव्यतेऽधुना ॥ १
एवञ्च प्रार्थितस्तेन पुनः प्रोवाच वै शिवः ।
धनं धान्यं तथा पुत्रान् स्त्रियश्च विविधास्
सामर्थ्यं ह्यतुलं तेऽद्य भवतु सर्व्वथा हरे ।
भवान्या विविधं तस्य फलं दत्तं मुनीश्वराः
तदीयं तद्वचः श्रुत्वा आनन्दं परमं गतः ।
पूर्व्वञ्चैव त्वयैवाहं पालितो देवसत्तम ॥ २२
चक्रं सुदर्शनं नाम दत्तञ्च प्रभुणा त्वया ।
तेनैव सर्व्वदेवादीन् जयामि च निरन्तरम् ॥
इदानीञ्च त्वया दत्तं फलञ्चैव मनेप्सितम् ।
इत्युक्त्वा पूजितस्तेन प्रसन्नः परमेश्वरः ॥ २
गच्छ कृष्ण शुभं तेऽद्य वर्द्धयिष्ये निरन्तरम् ।
तदाशप्तः स्वयं कृष्णो जगाम द्वारकां प्रति ॥
सन्तुष्टमनसा सर्व्वं पालयामास वै तदा ।
विल्वेश्वरश्च नाम्ना वै जातस्तत्र सुशोभनः ॥
अद्यापि वर्त्तते सो वै लोकानां सुखदायकः ।
सप्तमासावधिस्तेन नित्यं विल्वदलानि च ॥
समर्पितानि देवेश तस्माद्विल्वेश्वरः स्मृतः ।
उत्तार्य्य च शिवात् तत्र क्षिप्तानि ह्येकतः प्रमी
ततः खण्डात् स्वयं देवः सञ्जातोऽनुग्रहाय
तत्प्रार्थितस्तदा तत्र तस्थौ लोकहिताय च ॥
तद्दिनं हि समारभ्य कृष्णेन परमात्मना ।

यते शङ्करो नित्यं भुक्ति-मुक्तिफलप्रदः ॥ ३०
त् सर्व्वं समाख्यातं यत् पृष्टोऽहं सुनीश्वराः ।
श्रुत्वा सर्व्वपापेभ्यो मुच्यते मानवो ध्रुवम् ॥ ३१

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
शिवसाधनविधिर्नामैकोनसप्तति-
तमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः ।

ऋषय ऊचुः ।

त्वं सर्व्वं जानासि पुनः पृच्छामहे श्रृणु ।
सुदर्शनं प्राप्तं विष्णुना प्रभविष्णुना ॥ १
तुष्टस्तदा शम्भुश्चक्रञ्च दत्तवान् यदा ।
वं वचनं श्रुत्वा सूतो वचनमब्रवीत् ॥ २

सूत उवाच ।

ताञ्च ऋषिश्रेष्ठाः कथयामि यथाश्रुतम् ।
कस्मिंश्चित् समये दैत्याः सञ्जाता बलवत्तराः ॥ ३
ड़यामासुस्ताँल्लोकान् धर्म्मलोपं तथा पुनः ।
देवाः पीड़िता विष्णुं प्रार्थयामासुर्वै तदा ॥ ४
कुरु प्रभो त्वञ्च मारिता दैत्यकैर्वयम् ।
यामश्च किं कुर्म्मः शरणं त्वां समागताः ॥ ५
वं वचनं श्रुत्वा विष्णुर्वचनमाददे ।
ष्यामि वचःकार्य्यमाराध्य शङ्करं पुनः ॥ ६
ष्ठाः शत्रवो ह्येते विजेतव्याः प्रयत्नतः ।
त्तास्ते तदा तेन ययुर्धाम स्वकं स्वकम् ॥ ७
गुरपि सुराणान्तु जायार्थञ्चाभजच्छिवम् ।
सनिकटे गत्वा तपस्तेपे स्वयं हरिः ॥ ८
कुण्डञ्च संस्थाप्य जातवेदसमग्रतः ।
वैन विधानेन मन्त्रैर्नानाविधैरपि ॥ ९
र्श्चैवाप्यनेकैश्च भेजे च शङ्करं मुदा ।
तैः सरसो जातैर्मानसाख्यान्मुनीश्वराः ॥ १०
चैवासनं तत्र न चचाल हरिः स्वयम् ।
नावधिमेवात्र स्थेयञ्च सर्व्वथा मया ॥ ११
वं निश्चयं कृत्वा पूजयामास वै हरिः ।
नैव हरस्तुष्टो विचारे तत्परो हरिः ॥ १२
त्यव तपःकष्टं तेनैव बहुधा कृतम् ।
सेवनं बहुविधं कृत्वा पूजनं बहुधा कृतम् ॥ १३
तथापि न यदा तुष्टः सहस्रैर्नामभिस्ततः ।
प्रत्येकं कमलं तस्मै नाममन्त्रमुदीर्य्य च ॥ १४
समर्पयन् प्रभोर्मूर्द्ध्नि प्रत्यहं परया मुदा ।
पूजयामास वै शम्भुं तदा च शङ्करेण च ॥ १५
तद्भक्तेश्च परीक्षार्थं कृतं तच्छ्रूयतामिति ।
कमलानां सहस्रात् तु हृतमेकं हरेण च ।
न ज्ञातं विष्णुना तच्च मायाकरणमद्भुतम् ॥ १६
न्यूनं तच्चापि तज्ज्ञात्वा नेत्रमेकमुदाहृतम् ।
तं दृष्ट्वा च प्रसन्नोऽभूच्छङ्करः सर्व्वदुःखहा ॥ १७
प्रसन्नोऽस्मि वरं ब्रूहि नादेयं विद्यते तव ।
तदा हर्षं समापन्नो ह्यब्रवीद्वचनं पुनः ॥ १८
याच्यते किं त्वदग्रे च ह्यन्तर्यामितया स्थितः ।
दैत्यैश्च पीड़ितं विश्वं सुखं तस्मै सदाशिव ॥ १९
दैत्यान् हन्तुं कथं देव ह्यायुधं न प्रवर्त्तते ।
किं करोमि क्व गच्छामि शरणं त्वां समागतः ॥
इत्युक्त्वा च नमस्कृत्य शिवाय परमात्मने ।
स्थितश्चैवाग्रतो देवः स्वयञ्चासुरपीड़ितः ॥ २१
तदा तस्मै स्वयं शम्भुश्चक्रञ्च दत्तवान् प्रभुः ।
तेनैव पीड़ते विष्णुर्दैत्यांश्च बलवत्तरान् (क) ॥ २२
इति तस्य वचः श्रुत्वा पुनरूचुरृषीश्वराः ।
किं तन्नामसहस्रञ्च कथय त्वं सुशोभनम् ॥ २३
येन तुष्टः स्वयं देवो हरः साक्षान्महेश्वरः ।
चक्रञ्च दत्तवांस्तस्मै हरये प्रीतमानसः ।
इति तेषां वचः श्रुत्वा सूतो वचनमब्रवीत् ॥ २४

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
विष्णुसुदर्शनदानं नाम सप्तति-
तमोऽध्यायः ॥ ७० ॥

एकसप्ततितमोऽध्यायः ।

सूत उवाच ।

श्रूयतामृषयः श्रेष्ठाः कथयामि यथाश्रुतम् ।
विष्णुना प्रार्थितो येन सन्तुष्टः परमेश्वरः ।
तदहं कथयाम्यद्य पुण्यं नामसहस्रकम् ॥ १

(क) अनेन विष्णुना सर्व्वे नाशिता दैत्यपुङ्गवा इति वा पाठः।

श्रीविष्णुरुवाच।

शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः।
अर्थिगम्यः सदाचारः शर्व्वः शम्भुर्महेश्वरः॥ २
चन्द्रापीड़श्चन्द्रमौलिर्विश्वं विश्वामरेश्वरः।
वेदान्तसारसन्दोहः कपाली नीललोहितः॥ ३
ध्यानाधारोऽपरिच्छेद्यो गौरीभर्त्ता गणेश्वरः।
अष्टमूर्त्तिर्विश्वमूर्त्तिस्त्रिवर्गस्वर्गसाधनः॥ ४
ज्ञानगम्यो दृढ़प्रज्ञो देवदेवस्त्रिलोचनः।
वामदेवो महादेवः पटुः परिवृढ़ो दृढ़ः॥ ५
विश्वरूपो विरूपाक्षो वागीशः शुचिसत्तमः।
सर्व्वप्रमाणसंवादी वृषाङ्को वृषवाहनः॥ ६
ईशः पिनाकी खट्वाङ्गी चित्रवेशश्चिरन्तनः।
तमोहरो महायोगी गोप्ता ब्रह्मा च धूर्जटिः॥ ७
कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः।
उन्नध्रः पुरुषो जुष्यो दुर्व्वासाः पुरशासनः॥ ८
दिव्यायुधः स्कन्दगुरुः परमेष्ठी परात्परः।
अनादिमध्यनिधनो गिरीशो गिरिजाधवः॥ ९
कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमो मृदुः।
समाधिवेद्यः कोदण्डी नीलकण्ठः परश्वधी॥ १०
विशालाक्षो मृगव्याधः सुरेशः सूर्य्यतापनः।
धर्म्मधाम क्षमाक्षेत्रं भगवान् भगनेत्रभित्॥ ११
उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः परन्तपः।
दाता दयाकरो दक्षः कर्म्मन्दी कामशासनः॥ १२
श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः।
लोककर्त्ता मृगपतिर्महाकर्त्ता महौषधिः॥ १३
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः।
नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः सुखी॥१४
सोमपोऽमृतपः सौम्यो महातेजा महाद्युतिः।
तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः॥ १५
अजातशत्रुरालोकः सम्भाव्यो हव्यवाहनः।
लोककरो वेदकरः सूत्रकारः सनातनः॥ १६
महर्षिः कपिलाचार्य्यो विश्वदीप्तिर्विलोचनः।
पिनाकपाणिर्भूदेवः स्वस्तिदः स्वस्तिकृत् सुधीः॥१७
धातृधामा धामकरः सर्व्वगः सर्व्वगोचरः।
ब्रह्मसृग्विश्वसृक् सर्गः कर्णिकारः प्रियः कविः॥१८
शाखो विशाखो गोशाखः शिवो भिषगनुत्तमः।

गङ्गाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थि
विजितात्मा विषयात्मा भूतवाहनसारथिः
सगणो गणकायश्च सुकीर्त्तिश्छिन्नसंशयः
कामदेवः कामपालो भस्मोद्धूलितविग्रहः।
भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः
समावर्त्तो निवृत्तात्मा धर्म्मपुञ्जः सदाशिवः
अकल्मषश्चतुर्व्बाहुर्दुरावासो दुरासदः॥
दुर्लभो दुर्गमो दुर्गः सर्व्वायुधविशारदः।
अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्द्धनः॥
शुभाङ्गो लोकसारङ्गो जगदीशो जनार्द्दनः
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः॥
असाध्यः साधुसाध्यश्च भृत्यमर्कटरूपधृक्।
हिरण्यरेताः पौराणो रिपुजीवहरो बल
महाह्रदो महागर्त्तः सिद्धवृन्दारवन्दितः।
व्याघ्रचर्म्माम्बरो व्याली महाभूतो महानि
अमृतांशोऽमृतवपुः पाञ्चजन्यः प्रभञ्जनः।
पञ्चविंशतितत्त्वस्थः पारिजातः परावरः।
सुलभः सुव्रतः शूरो ब्रह्मवेदनिधिर्निधि
वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः॥
आश्रमः क्षपणः क्षामो ज्ञानवानचलेश्वरः
प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः।
धनुर्द्धरो धनुर्व्वेदो गुणराशिर्गुणाकरः।
सत्यः सत्यपरो दीनो धर्म्माङ्गो धर्म्मसाधनः
अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः
अभिवाद्यो महामायो विश्वकर्म्मा विशारद
वीतरागो विनीतात्मा तपस्वी भूतभावनः
उन्मत्तवेशः प्रच्छन्नो जितकामोऽजितप्रियः
कल्याणप्रकृतिः कल्पः सर्व्वलोकप्रजापतिः
तरस्वी तारको धीमान् प्रधानप्रभुरव्ययः
लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः
वेदशास्त्रार्थतत्त्वज्ञोऽनियमो नियताश्रयः
चन्द्रः सूर्य्यः शनिः केतुर्वराङ्गो विद्रुमच्छ
शक्तिवश्यः परब्रह्म-मृगवाणार्पणोऽनघः
अद्रिरद्र्यालयः कान्तः परमात्मा जगद्गुरुः
सर्व्वकर्म्मालयस्तुष्टो मङ्गल्यो मङ्गलावृतः
महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रु

हः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥ ३७
वत्सरकरो मन्त्र-प्रत्ययः सर्व्वदर्शनः।
जः सर्व्वेश्वरः सिद्धो महारेता महाबलः ॥ ३८
गी योग्यो महातेजाः सिद्धिः सर्व्वादिरग्रहः।
सुर्वसुमनाः सत्यः सर्व्वपापहरो हरः ॥ ३९
कीर्त्तिः शोभनः श्रीमानवाङ्मनसगोचरः।
मृतः शाश्वतः शान्तो वाणहस्तः प्रतापवान् ॥ ४०
मुण्डलुधरो धन्वी वेदाङ्गो वेदविन्मुनिः।
ाजिष्णुर्भोजनं भोक्ता लोकनाथो दुराधरः ॥ ४१
तीन्द्रियो महामायः सर्व्ववासश्चतुष्पथः।
ालयोगी महानादो महोत्साहो महाबलः ॥ ४२
हाबुद्धिर्महावीर्य्यो भूतचारी पुरन्दरः।
शाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥ ४३
निर्द्देश्यवपुः श्रीमान् सर्व्वाचार्य्यमनोगतिः।
हुश्रुतो महामायो नियतात्मा ध्रुवोऽध्रुवः ॥ ४४
ोजस्तेजोद्युतिधरो नर्त्तकः सर्व्वशासकः।
ृत्यप्रियो नृत्यनित्यः प्रकाशात्मा प्रकाशकः ॥ ४५
ष्टाचरो बुधो मन्त्रः समानः सारसंप्लवः।
ुगादिकृद्युगावर्त्तो गम्भीरो वृषवाहनः ॥ ४६
ष्टो विशिष्टः शिष्टेष्टः शलभः शरभो धनुः।
ीर्थरूपस्तीर्थनामा तीर्थादृश्यः स्तुतोऽर्थदः ॥ ४७
पांनिधिरधिष्ठानं विजयो जयकालवित्।
तिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥ ४८
मोचनः सुरगणो विद्येशो बिन्दुसंश्रयः।
ालरूपो बलोन्मत्तो विकर्त्ता गहनो गुहः ॥ ४९
रणं कारणं कर्त्ता सर्व्वबन्धविमोचनः।
वसायो व्यवस्थानः स्थानदो जगदादिजः ॥ ५०
रुदो ललितोऽभेदो भवात्मात्मनि संस्थितः।
रेश्वरो वीरभद्रो वीरासनविधिर्विराट् ॥ ५१
रचूड़ामणिर्वेत्ता तीव्रानन्दो नदीधरः।
ाज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः ॥ ५२
लखिल्यो महाचापस्तिग्मांशुर्बधिरः खगः।
भिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ॥ ५३
घवान् कौशिको गोमान् विरामः सर्व्वसाधनः।
लाटाक्षो विश्वदेहः सारः संसारचक्रभृत् ॥ ५४
मोघदण्डो मध्यस्थो हिरण्यो ब्रह्मवर्च्चसी।
परमार्थः परो मायी शम्बरो व्याघ्रलोचनः ॥ ५५
रुचिर्विरञ्चिः स्वर्व्वन्धुर्वाचस्पतिरहर्पतिः।
रविर्विरोचनः स्कन्दः शास्ता वैवस्वतो यमः ॥ ५६
युक्तिरुन्नतकीर्त्तिश्च सानुरागः परञ्जयः।
कैलासाधिपतिः कान्तः सविता रविलोकनः ॥ ५७
विद्वत्तमो वीतभयो विश्वभर्त्ताऽनिवारितः।
नित्यो नियतकल्याणः पुण्यश्रवणकीर्त्तनः ॥ ५८
दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः।
उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहोऽभवः ॥ ५९
अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः।
विश्वगोप्ता विश्वकर्त्ता सुवीरो रुचिराङ्गदः ॥ ६०
जननो जनजन्मादिः प्रीतिमान् नीतिमान् धवः।
विशिष्टः काश्यपो भानुर्भीमो भीमपराक्रमः ॥ ६१
प्रणवः सत्पथाचारो महाकाशो महाधनः।
जन्माधिपो महादेवः सकलागमपारगः ॥ ६२
तत्त्वं तत्त्वविदेकात्मा विभुर्विश्वविभूषणः।
ऋषिर्ब्राह्मण ऐश्वर्य्य-जन्म-मृत्यु-जरातिगः ॥ ६३
पञ्चयज्ञसमुत्पत्तिविश्वेशो विमलोदयः।
आत्मयोनिरनाद्यन्तो वत्सलो भक्तलोकधृक् ॥ ६४
गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः।
शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ॥ ६५
अमोघोऽरिष्टनेमिश्च कुमुदो विगतज्वरः।
स्वयंज्योतिस्तनुज्योतिरात्मज्योतिरचञ्चलः ॥ ६६
पिङ्गलः कपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः।
ज्ञानस्कन्दो महानीतिर्विश्वोत्पत्तिरुपप्लवः ॥ ६७
भगो विवस्वानादित्यो योगपारो दिवस्पतिः।
कल्याणगुणनामा च पापहा पुण्यदर्शनः ॥ ६८
उदारकीर्त्तिरुद्योगी सद्योगी सदसन्मयः।
नक्षत्रमाली नाकेशः स्वाधिष्ठानपदाश्रयः ॥ ६९
पवित्रः पापहारी च मणिपूरो नभोगतिः।
हृत्पुण्डरीकमासीनः शक्रः शान्तो वृषाकपिः ॥ ७०
उष्णो गृहपतिः कृष्णः समर्थोऽनर्थनाशनः।
अधर्म्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः ॥ ७१
ब्रह्मगर्भो बृहद्गर्भो धर्म्मधेनुर्धनागमः।
जगद्धितैषी सुगतः कुमारः कुशलागमः ॥ ७२
हिरण्यवर्णो ज्योतिष्मान् नानाभूतरतो ध्वनिः।

अरागी नयनाध्यक्षो विश्वामित्रो धनेश्वरः ॥ ७३
ब्रह्मज्योतिर्वसुधामा महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान् नागहारधृक् ॥ ७४
पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ।
निरावरणनिर्वारो वैरञ्च्यो विष्टरश्रवाः ॥ ७५
आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्त्तिर्महायशाः ।
लोकवीराग्रणीर्वीरश्चण्डः सत्यपराक्रमः ॥ ७६
व्यालाकल्पो महाकल्पः कल्पवृक्षः कलाधरः ।
अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोन्नतः ॥ ७७
आयुःशब्दपतिर्वेगी प्लवनः शिखिसारथिः ।
असंसृष्टोऽतिथिः शक्रप्रमाथी पादपासनः ॥ ७८
वसुश्रवा हव्यवाहः प्रतप्ता विश्वभोजनः ।
जप्यो जरादिशमनो लोहितात्मा तनूनपात् ॥ ७९
बृहदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
निदाघस्तपनो मेघः स्वक्षः परपुरञ्जयः ॥ ८०
सुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
वसन्तो माधवो ग्रीष्मो नभस्यो वीजवाहनः ॥ ८१
अङ्गिरा गुरुरात्रेयो विमलो विश्ववाहनः ।
पावनः सुमतिर्विद्वांस्त्रैविद्यो नरवाहनः ॥ ८२
मनो बुद्धिरहङ्कारः क्षेत्रज्ञः क्षेत्रपालकः ।
जमदग्निर्बलनिधिर्विगालो विश्वगालवः ॥ ८३
अघोरोऽनुत्तरो यज्ञः श्रेयो निःश्रेयसां पथः ।
शैलो गगनकुन्दाभो दानवारिररिन्दमः ॥ ८४
रजनीजनकश्चारु-विशल्यो लोककल्यधृक् ।
चतुर्व्वेदश्चतुर्भावश्चतुरश्चतुमप्रियः ॥ ८५
आम्नायोऽथ समाम्नायस्तीर्थदेवशिवालयः ।
बहुरूपो महारूपः सर्व्वरूपश्चराचरः ॥ ८६
न्यायनिर्म्मायको न्यायी न्यायगम्यो निरन्तरः ।
सहस्रमूर्द्धा देवेन्द्रः सर्व्वशस्त्रप्रभञ्जनः ॥ ८७
मुण्डो विरूपो विक्रान्तो दण्डी दान्तो गुणोत्तमः ।
पिङ्गलाक्षो जनाध्यक्षो नीलग्रीवो निरामयः ॥ ८८
सहस्रबाहुः सर्व्वेशः शरण्यः सर्व्वलोकधृक् ।
पद्मासनः परंज्योतिः परंपारः परंफलम् ॥ ८९
पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
चराचरज्ञो वरदो वरेशस्तु महाबलः ॥ ९०
देवासुरगुरुर्देवो देवासुरमहाश्रयः ।

देवादिदेवो देवाग्निर्देवाग्निसुखदः प्रभुः
देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ।
देवदेवमयोऽचिन्त्यो देवदेवात्मसम्भवः ॥
सद्योनिरसुरव्याघ्रो देवसिंहो दिवाकरः
विबुधाग्रवरश्रेष्ठः सर्व्वदेवोत्तमोत्तमः ॥
शिवज्ञानरतः श्रीमान् शिखिश्रीपर्व्वता
वज्रहस्तः सिद्धखड्गी नरसिंहनिपातनः
ब्रह्मचारी लोकचारी धर्म्मचारी धना
नन्दी नन्दीश्वरोऽनन्तो नग्नव्रतधरः शु
लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो यु
अधर्म्मा स्वर्गतः स्वर्गस्वरः स्वरमयस्वनः
वाणाध्यक्षो वीजकर्त्ता धर्म्मकृद्धर्म्मसम्भ
दम्भो लोभोऽर्थविच्छम्भुः सर्व्वभूतमहेश्व
श्मशाननिलयस्त्र्यक्षः सेतुरप्रतिमाकृ
लोकोत्तरस्फुटालोकस्त्र्यम्बको नागभूषण
अन्धकारिर्मखद्वेषी विष्णुकन्धरपातनः ।
हीनदोषोऽक्षयगुणो दक्षारिः पूषदन्त
धूर्जटिः खण्डपरशुः सकलो निष्कलोऽ
अकालः सकलाधारः पाण्डुराभो मृडो
पूर्णः पूरयिता पुण्यः सुकुमारः सुलोच
सामगेयप्रियोऽक्रूरः पुण्यकीर्त्तिरनामयः
मनोजवस्तीर्थकरो जटिलो जीवितेश्वर
जीवितान्तकरो नित्यो वसुरेता वसुप्रदः
सद्गतिः सत्कृतिः सिद्धिः सज्जातिः काल
कलाधरो महाकालो भूतसत्यपरायणः
लोकलावण्यकर्त्ता च लोकोत्तरसुखाल
चन्द्रसञ्जीवनः शास्ता लोकगूढो महाधि
लोकबन्धुर्लोकनाथः कृतज्ञः कीर्त्तिभूषण
अनपायोऽक्षरः कान्तः सर्व्वशस्त्रभृतां व
तेजोमयो द्युतिधरो लोकानामग्रणीर
शुचिस्मितः प्रसन्नात्मा दुर्ज्जयो दुरतिक्र
ज्योतिर्म्मयो जगन्नाथो निराकारो जले
तुम्बवीणो महाकोपो विशोकः शोकना
त्रिलोकपस्त्रिलोकेशः सर्व्वशुद्धिरधोक्ष
अव्यक्तलक्षणो देवो व्यक्ताव्यक्तो विशा
वरशीलो वरगुणः सारो मानधनो मय

विष्णुः प्रजापालो हंसो हंसगतिर्वयः ॥ १०९

विधाता धाता च स्रष्टा हर्त्ता चतुर्मुखः।
शिखरावासी सर्वावासी सदागतिः ॥ ११०
ण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः।
ोगी योगविद्व्योगी वरदो ब्राह्मणप्रियः ॥ १११
ायो देवनाथो देवज्ञो देवचिन्तकः।
ाचो विशालाचो वृषदो वृषवर्द्धनः ॥ ११२
मो निरहङ्कारी निर्मोहो निरुपद्रवः।
दर्पहा दृप्तः सर्व्वर्त्तुपरिवर्त्तकः ॥ ११३
जित् सहस्रार्च्चिः स्निग्धप्रकृतिदक्षिणः।
व्यभवन्नाथः प्रभवो भूतिनाशनः ॥ ११४
नर्थो महाकोशः परकार्य्यैकपण्डितः।
ण्टकः कृतानन्दो निर्व्याजो व्याजमर्द्दनः ॥ ११५
न सात्त्विकः सत्यकीर्त्तिः स्नेहकृतागमः।
भूषणः गुणग्राही नैकात्मा नैककर्म्मकृत् ॥ ११६
नः। ...मुखः सूक्ष्मः सुकरो दक्षिणानिलः।
स्कन्धधरो धुर्य्यः प्रकटः प्रीतिवर्द्धनः ॥ ११७
जितः सर्व्वसत्त्वो गोविन्दः सत्त्ववाहनः।
स्वधृतः सिद्धः पूतमूर्त्तिर्यशोधनः ॥ ११८
हशृङ्गधृक् शृङ्गी बलवानेकनायकः।
प्रकाशः श्रुतिमानेकबन्धुरनेककृत् ॥ ११९
सलशिवारम्भः शान्तभद्रः समो यशः।
े भूषणो भूतिर्भूतकृद्भूतभावनः ॥ १२०
ो भक्तिकायस्तु कालहा नीललोहितः।
तमहात्यागी नित्यशान्तिपरायणः ॥ १२१
वृत्तिर्वरदो विविक्तस्तु विशारदः।
शुभकर्त्ता च शुभनामा शुभः स्वयम् ॥ १२२
तोऽगुणः साक्षी ह्यकर्त्ता कनकप्रभः।
भद्रो मध्यस्थः शीघ्रगः शीघ्रनाशनः ॥ १२३
डी कवची शूली जटी मुण्डी च कुण्डली।
ः सर्व्वदृक् सिंहस्तेजोराशिर्महामणिः ॥ १२४
योऽप्रमेयात्मा वीर्य्यवान् वीर्य्यकोविदः।
व वियोगात्मा परावरमुनीश्वरः ॥ १२५
सो दुराधर्षो मधुरप्रियदर्शनः।
ः शरणं सर्व्वः शब्दब्रह्म सतां गतिः ॥ १२६
चः कालकारी कङ्कणीकृतवासुकिः।

महेष्वासो महीभर्त्ता निष्कलङ्को विशृङ्खलः ॥ १२७
द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धसाधनः।
विश्वतः संवृतः स्तुत्यो व्यूढोरस्को महाभुजः ॥ १२८
सर्व्वयोनिर्निरातङ्को नर-नारायणप्रियः।
निर्लेपो निष्प्रपञ्चात्मा निर्व्यङ्गो व्यङ्गनाशनः ॥ १२९
स्तव्यः स्तवप्रियः स्तोता व्यासमूर्त्तिर्निरङ्कुशः।
निरवद्यमयोपायो विद्याराशी रसप्रियः ॥ १३०
प्रशान्तबुद्धिरक्षुण्णः संग्रही नित्यसुन्दरः।
वैयाघ्रधुर्य्यो धात्रीशः शाकल्यः शर्व्वरीपतिः ॥ १३१
परमार्थगुरुर्दृष्टिः शरीराश्रितवत्सलः।
सोमो रसज्ञो रसदः सर्व्वसत्त्वावलम्बनः ॥ १३२
एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम्।
प्रार्थयामास शम्भुञ्च पूजयामास पङ्कजैः ॥ १३३
परीक्षार्थं हरेरीशः कमलेषु महेश्वरः।
गोपयामास कमलं तदेकं भुवनेश्वरः ॥ १३४
हृदि विचारितं तेन कुतो वै कमलं गतम्।
यातु यातु सुखेनैव नेत्रं किं कमलं न हि ॥ १३५
ज्ञात्वा तु नेत्रमुद्धृत्य सर्व्वसत्त्वावलम्बनम्।
पूजयामास भावेन स्तवेनानेन सर्व्वथा ॥ १३६
मा मेति व्याहरन्नेव प्रादुरासीज्जगद्गुरुः।
ततः स्तवमयो दृष्ट्वा तथाभूतं हरो हरिम् ॥ १३७
तस्मादवततारा शु मण्डलात् पार्थिवस्य सः।
यथोक्तरूपिणं शम्भुं तेजोराशिं समुत्थितम् ॥ १३८
नमस्कृत्य पुरः स्थित्वा स्तुतिं कृत्वा विशेषतः।
पूजयामास देवेशः पार्व्वत्या सहितं शिवम् ॥ १३९
प्रसन्नवदनो भूत्वा शम्भोश्च सम्मुखस्थितः।
इत्यद्भूतं हरो दृष्ट्वा कोटिभास्करभूषितः ॥ १४०
प्राणिनामीश्वरः शम्भुर्देवदेवो जनार्द्दनम्।
तदा प्राह महादेवः प्रहसन्निव शङ्करः।
शम्प्रेक्षमाणं तं विष्णुं कृताञ्जलिपुटं स्थितम् ॥ १४१

शङ्कर उवाच।

ज्ञातं मयेदं सकलं देवकार्य्यं जनार्द्दन।
सुदर्शनाख्यं चक्रञ्च ददामि तव शोभनम् ॥ १४२
यद्रूपं भवता दृष्टं सर्व्वलोकसुखावहम्।
हिताय तव देवेश कृतं भावय सुव्रत ॥ १४३
रणाजिरेऽपि संस्मृत्य देवानां दुःखनाशनम्।

इदं चक्रमिदं रूपमिदं नाम सहस्रकम् ॥ १४४
ये शृखन्ति सदा भक्त्या सिद्धिः स्यादनपायिनी।
एवमुक्त्वा ददौ चक्रं सूर्य्यायुतसमप्रभम् ॥ १४५
विष्णुरपि च स ज्ञात्वा जग्राहोदङ्मुखस्तदा।
नमस्कृत्य तदा देवं पुनर्वचनमब्रवीत् ॥ १४६
शृणु देव मया ध्येयं पठनीयञ्च मे प्रभो।
दुःखानां नाशनार्थं हि वद त्वं लोकशङ्कर ॥ १४७
इति पृष्टस्तदा तेन सन्तुष्टस्तु शिवोऽब्रवीत्।
रूपं ध्येयं मदीयं वै सर्व्वानर्थप्रशान्तये ॥ १४८
अनेकदुःखनाशार्थं पाठ्यं नामसहस्रकम्।
धार्य्यं चक्रं सदा सेव्य सर्व्वानर्थप्रशान्तये ॥ १४९
अन्ये च ये पठिष्यन्ति पाठयिष्यन्ति नित्यशः।
तेषां दुःखं न स्वप्नेऽपि जायते नात्र संशयः ॥ १५०
राज्ञाञ्च सङ्कटे प्राप्ते शतावर्त्तं चरेद्यदा।
साङ्गञ्च विधियुक्तो हि कल्याणं लभते नरः ॥ १५१
रोगनाशकरं ह्येतद्विद्यादायकमुत्तमम्।
समुद्दिश्य फलं श्रेष्ठं पठन्ति फलमुत्तमम् ॥ १५२
लभन्ते नात्र सन्देहः सत्यमेतद्व्रतं मम।
प्रातः समुत्थाय सदा पूजां कृत्वा मदीयिकाम् ॥१५३
पठतो मत्समत्वं वै नित्यं सिद्धिर्न दूरतः।
ऐहिकीं सिद्धिमासाद्य परलोकसमुद्भवाम् ॥ १५४
प्राप्नोति पाठको नित्यमष्टमासात् सुरेश्वर।
सायुज्यमुक्तिमायाति नात्र कार्य्या विचारणा ॥१५५
एवमुक्त्वा तदा विष्णुं शङ्करः प्रीतमानसः।
उपस्पृश्य कराभ्याञ्च उवाच शङ्करः पुनः ॥ १५६
वरदोऽस्मि सुरश्रेष्ठ वरान् वर यथेप्सितान्।
भक्त्या वशीकृतो नूनं स्तवेनानेन वै पुनः ॥ १५७
इत्युक्तो देवदेवेन देवदेवं प्रणम्य तम्।
यथेदानीं कृपा देव क्रियते चाप्यतः परम् ॥ १५८
कार्य्या चैव विशेषेण कृपालुत्वात् त्वया प्रभो।
त्वयि भक्तिं महादेव प्रयच्छ वरमुत्तमम् ॥ १५९
नान्यमिच्छामि भगवन् पूर्णोऽहं ते प्रसादतः।
तच्छ्रुत्वा वचनं तस्य दयावान् सुतरां भवः ॥ १६०
प्राह त्वेनं महादेवः परमात्मानमच्युतम्।
मयि भक्तिश्च वन्द्यस्त्वं पूज्यश्चैव सुरैरपि ॥ १६१
विश्वम्भरस्त्वदीयं वै नाम पापहरं परम्।
भविष्यति न सन्देहो मत्प्रसादात् सुरोत्तम
इत्युक्त्वान्तर्द्दधे रुद्रो भगवान् नीललोहि[तः]
जनार्द्दनोऽपि भगवान् वचनाच्छङ्करस्य च
प्राप्य चक्रं शुभं ध्यानं स्तोत्रमेतन्निरन्तरं
पपाठाध्यापयामास भक्तेभ्यस्तदुपादिशत्
अन्येऽपि ये पठिष्यन्ति ते विन्दन्तु तथा फ[लम्]
इति पृष्टं समाख्यातं शृखतां पापहारकम्
अतः परञ्च किं श्रेष्ठाः प्रष्टुमिच्छथ वै पुनः

इति श्रीशैवे महापुराणे ज्ञानसंहि[तायां]
शिवसहस्रनामकथनं नामैकसप्तति-
तमोऽध्यायः ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः।

ऋषय ऊचुः।

धन्योऽसि कृतकृत्योऽसि जीवितं सफलं तव
बहुभ्यश्च ऋषिभ्यश्च श्रुतं यद्यपि नो गतः
सन्देहश्च भवानद्य पृच्छ्यते हितमीप्सुभिः।
कुशलः शिवकृत्येषु तस्मात् पृच्छामहे वच
केन व्रतेन सन्तुष्टः शिवो यच्छति तत् शु[भम्]
यदनन्तं प्रचच्येत तत् त्वं ब्रूहि विशेषतः
भुक्तिर्मुक्तिश्च लभ्येत येन वै व्यासशिष्यक
एतद्वचस्त्वदीयं हि श्रुत्वा वचनमादरे ॥

सूत उवाच।

सम्यक् पृष्टमृषिश्रेष्ठाः कथयामि यथाश्रु[तम्]
यथा भवद्भिः पृष्टं वै तथा पृष्टञ्च वेधसा।
हरिणा च शिवायैव शिवया च तथा पुनः
कस्मिंश्चित् समये तैस्तु पृष्टञ्च परमात्मने
केन व्रतेन सन्तुष्टो भुक्तिं मुक्तिञ्च यच्छति
इति पृष्टस्तदा तैस्तु यदुक्तं तेन वै तदा
तदहं कथयास्यद्य शृखतां पापहरकम्।

शिव उवाच।

शृणु विष्णो प्रवच्यामि व्रतानामुत्तमं व्रतं
वेदानां ह्युपवेदानां स्मृतीनाञ्च तथा पुन:
पुराणानाञ्च सर्व्वेषां धर्म्माणां तत्त्वमेव
गुह्यानाञ्चैव सर्व्वेषां सारमेकं समुद्धृतम्।

ानाञ्चैव सर्व्वेषामेतदेव हितं मम ॥ १०
ेश्च प्रापकं ह्येतच्चतुष्टयमुदाहृतम्।
ार्च्चनं रुद्रजप उपोष्यञ्च दिनत्रयम् ॥ ११
ाणस्याञ्च मरणं मुक्तिरेषा चतुर्व्विधा।
मी सोमवारश्च कृष्णपक्षे चतुर्द्दशी ॥ १२
तुष्टिकरं ह्येतन्नात्र कार्य्या विचारणा।
र्व्वेपि बलिष्ठं हि शिवरात्रिव्रतं हरे ॥ १३
ादेतच्च कर्त्तव्यं भुक्ति-मुक्तिफलेप्सुभिः।
स्माच्च व्रतादन्यन्नास्ति हिततरं हरे ॥ १४
वं तद्वचः श्रुत्वा हरिराह शिवं प्रति।

विष्णुरुवाच।

देव महादेव कथय त्वं ममाधुना ॥ १५
कार्य्यं व्रतं ह्येतत् कस्मिन् मासेऽथवा पुनः।
व विधिना देव कथय त्वं ममाधुना ॥ १६
नानामुपकारार्थं पृच्छामि त्वां सदाशिव।
् कालं तदा कार्य्यं कथं पूजां समाचरेत्।
द्दशी कथं ते च वल्लभा च सदाशिव ॥ १७
त् सर्व्वं त्वया देव कथनीयं हिताय वै।
च वचनं श्रुत्वा शिवो वचनमब्रवीत् ॥ १८

शिव उवाच।

व्रतञ्च सर्व्वेषां धर्म्मसाधनमुत्तमम्।
ीनामाश्रमाणाञ्च स्त्रीणाञ्च शिशूनां तथा ॥ १९
ानां दासिकानाञ्च हितं व्रतमनुत्तमम्।
ानां दानवानाञ्च सर्व्वेषाञ्च शरीरिणाम् ॥ २०
ामानाञ्च सर्व्वेषां भुक्ति-मुक्तिप्रदायकम्।
स्यैवासिते पक्षे कृष्णा चैव चतुर्द्दशी ॥ २१
ार्द्धव्यापिनी(क) ग्राह्या हत्याकोटिविनाशिनी।
ने चैव यत् कार्य्यं श्रूयतां कथयामि ते ॥ २२
स्यैव समुत्थाय ह्यानन्दं परमं गतः।
भं मानुषं जन्म ह्यसारं चञ्चलं पुनः ॥ २३
किञ्च करोम्यद्य व्रतेनानेन वै पुनः।
निश्चित्य मनसा अन्यान् संप्रेरयेन्नरः ॥ २४
रात्रिव्रतन्त्वद्य कर्त्तव्यं हितमीप्सुभिः।
च्च दन्तकाष्ठञ्च कृत्वा कार्य्यं नरेण च ॥ २५
ादौ स्नानमात्रं हि देशकालाविरोधतः।

स्त्रीयं कर्म्म प्रकृत्यैव नैमित्तिकं समाचरेत् (ख) ॥ २६
शिवस्याग्रे तदा गत्वा ह्येवं कुर्य्यात् सुरोत्तम।
समीपे च शिवस्यैव यत् कृतं तदनन्तकम् ॥ २७
तस्मात् तत्सन्निधिं गच्छेदनन्तफलहेतवे।
पूजाञ्च प्रथमं कुर्य्यादुपचारैर्यथाक्रमम् ॥ २८
नमस्कृत्य शिवं पश्चात् प्रीतिपूर्व्वं नरोत्तमः।
देवदेव महादेव नीलकण्ठ सदाशिव ॥ २९
कर्त्तुमिच्छा च सञ्जाता शिवरात्रिव्रतस्य च।
तव प्रभावाद्देवेश निर्व्विघ्नेन भवत्विति ॥ ३०
कामाद्याः शत्रवो मह्यं पीड़ां ददतु मा पुनः।
दुरालापश्च दुःस्वप्नं वासनां विविधां पुनः ॥ ३१
दिवास्वापं हि देवेश जलं नैव व्रतावधि।
करिष्यामि च देवेश प्रतापात् तव सुव्रत ॥ ३२
एवं नियममास्थाय पूजाद्रव्यं समाहरेत्।
शुद्धे स्थले च यल्लिङ्गं प्रसिद्धं ह्यागमेषु च ॥ ३३
रात्रौ तत्र स्वयं गत्वा सम्पाद्य विधिमुत्तमम्।
शिवस्य पश्चिमे भागे दक्षिणे वा स्थलं शुभम् ॥ ३४
विधाय चैव तद्द्रव्यं निधाय शिवसन्निधौ।
पुनः स्नायात् तदा तत्र विधिपूर्व्वं नरोत्तमः ॥ ३५
मौनी व्रती भवेत् सद्यः कृत्वा स्नानादिकं मुदा।
परिधाय शुभं वस्त्रमन्तर्व्वासस्तथा पुनः ॥ ३६
आचम्य च त्रिवारं हि पूजारम्भं समाचरेत्।
लिङ्गपूजां प्रयत्नेन ह्युपचारैः समन्त्रकैः ॥ ३७
अमन्त्रकं न कर्त्तव्यं पूजनन्तु हरस्य च।
यस्य द्रव्यस्य यो मन्त्रस्तेन पूजां समाचरेत् ॥ ३८
गीतवाद्यैस्तथा नृत्यैर्भक्तिभावसमन्वितः।
पूजनं प्रथमं यामे कृत्वा मन्त्रं जपेद्बुधः ॥ ३९
पार्थिवञ्च तदा श्रेष्ठं विधाय मन्त्रवान् सुधीः।
नित्यञ्च क्रियते चेद्धि पार्थिवञ्च तदाचरेत् ॥ ४०
प्रथमं पार्थिवस्यैव पश्चाच्चास्थापिते चरेत्।
पार्थिवञ्च विधानं वै कर्त्तव्यं हितमिच्छता ॥ ४१
स्तोत्रैर्नानाविधैर्दिव्यैर्हर्षयेद्वृषभध्वजम्।
माहात्म्यं व्रतसम्भूतं श्रोतव्यं व्रतकारिणा ॥ ४२
चतुर्ष्वपि च यामेषु मूर्त्तीनाञ्च चतुष्टयम्।
कृत्वावाहनपूर्व्वं वै विसर्ज्जनावधि क्रमात् ॥ ४३

(क) नक्तव्यापिनीति क्वचित् पुस्तके पाठः।

(ख) कृत्यं पश्चात् समाचरेदिति पाठान्तरम्।

जागरणं तदा गत्वा महोत्सवसमन्वितम्।
प्रातःकाले पुनस्तत्र स्थापितं पूजयेच्छिवम् ॥ ४४
पुनः स्नात्वा शिवस्यैव नियमञ्च विमोचयेत्।
नियमोऽद्य मया देव कृतश्चैव त्वदाज्ञया ॥ ४५
विसृज्यते मया स्वामिन् जातं व्रतमनुत्तमम्।
व्रतेनानेन देवेश यथाशक्ति कृतेन च ॥ ४६
सन्तुष्टो भव देवेश जातं व्रतमनुत्तमम्।
शिव शङ्कर सर्व्वात्मन् कृपां कुरु ममोपरि ॥ ४७
पुष्पाञ्जलिं शिवे दत्त्वा नियमञ्च विसृज्य च।
नमस्कारं शिवायैव तदा दानं यथाविधि ॥ ४८
सङ्कल्पञ्च ततः कृत्वा जलं ग्राह्यं ततः परम्।
यामे यामे च या पूजा ताञ्चैव कथयाम्यहम् ॥ ४९
प्रथमे चैव यामे च स्थापितं पार्थिवं पुनः।
पूजयेत् परया भक्त्या ह्युपचारैरनेकशः ॥ ५०
प्रयोगादि विधायैव कामनां विनियुज्य च।
पञ्चद्रव्यैश्च प्रथमं पूजनीयो महेश्वरः ॥ ५१
दुग्धं दधि मधु सर्पिः शर्कराणां क्रमेण च।
तस्य तस्य च मन्त्रेण तत् तद्द्रव्यं समर्पयेत् ॥ ५२
तद्द्रव्यन्तु समर्प्यैव जलधारां प्रदापयेत्।
पश्चाच्च जलधाराभिर्द्रव्याण्युत्तार्य वै पुनः ॥ ५३
शतमष्टोत्तरं मन्त्रं पठित्वा जलधारया।
पूजयेच्च शिवं तत्र निर्गुणं गुणरूपिणम् ॥ ५४
गुरुदत्तेन मन्त्रेण पूजयेद्वृषभध्वजम्।
अन्यथा नाममन्त्रेण पूज्यश्चैव सदाशिवः ॥ ५५
चन्दनेन विचित्रेण तण्डुलैश्चाप्यखण्डितैः।
ततश्चैव तिलैः पूजा कार्य्या तस्य महात्मनः ॥ ५६
पुष्पैश्च शतपत्रैश्च करवीरैस्तथा पुनः।
अष्टाभिर्नाममन्त्रैश्च पुष्पाण्यारोपयेच्छिवे ॥ ५७
भवः शर्व्वस्तथा रुद्रः पुनः पशुपतिस्तथा।
उग्रश्चैव ततः प्रोक्तो महादेवस्ततः परम् ॥ ५८
भीमश्चैव तथेशानः श्रीपदं पूर्व्वतस्तथा।
चतुर्थ्यन्तपदेनैव पूजयेत् पञ्चवक्त्रकम् ॥ ५९
पश्चाद्धूपञ्च दीपञ्च नैवेद्यञ्च ततः परम्।
प्रथमे चैव नैवेद्यं पक्वान्नं कारयेत् तदा ॥ ६०
अर्घञ्च श्रीफलं दत्त्वा ताम्बूलं विनिवेदयेत्।
नमस्कारं ततो ध्यानं जपः प्रोक्तस्ततः परम् ॥ ६१

गुरूपदिष्टमन्त्रेण तोषयेत् परमेश्वरम्।
जपं कृत्वा ततः पश्चाद्धेनुमुद्रां प्रदर्शयेत् ॥
पश्चाच्च तर्पणं तत्र ब्राह्मणानां स्वशक्तितः।
एकस्त्वावश्यकः प्रोक्तो यतिरेकस्तथा पुनः।
सङ्कल्पञ्च तदा कृत्वा गीतं वाद्यं तथा पुनः।
नृत्यञ्चैव तथा चात्र गानञ्च विविधं तथा।
कर्त्तव्यं याममात्रेण यावद्यामो भवेदिह।
तत्तत्पूजाफलं तस्मै निवेद्य परमात्मने॥
नमस्कारं ततः कृत्वा सङ्कल्पं संविधाय च।
पुनश्च द्वितीये यामे विसृज्यान्यां समाचरेत्।
अथ चैकस्मिन् रूपे च पार्थिवे द्वितीये पुनः।
कुर्य्यात् पूजां तथा विष्णोर्भुक्ति-मुक्तिफलप्रदाम्।
एवं पूजाविधिं कृत्वा ततो धारां समर्पयेत्।
पूर्व्वतो द्विगुणं सर्व्वमुच्चार्य्य पूजयेच्छिवम्।
चन्दनेन ततः पूजा तण्डुलैः पूजनं पुनः।
यवैश्चैव ततः पूजा कर्त्तव्या शङ्करस्य च।
पुष्पैश्चैव प्रकर्त्तव्या कमलैः पूजयेच्छिवम्।
विल्वपत्रैस्तथा चात्र कर्त्तव्यं पूजनं शिवे॥
नैवेद्यं लड्डुकानां वै कर्त्तव्यं परमात्मने।
एवं कृतं व्रतं येन तज्जन्म सफलं भवेत्॥
भुक्तिं दत्त्वा च मुक्तिञ्च यच्छत्यन्यत्र न संशयः।
अर्घञ्च वीजपूरेण कुर्य्याद्द्यामे द्वितीयके।
मया सर्व्वं यथा पूर्व्वं कथितं तत् तथैव हि।
धूपं दीपञ्च नैवेद्यं पायसान्नं प्रकल्पयेत्॥
दत्त्वा ताम्बूलकं तत्र दक्षिणाञ्च समर्पयेत्।
ध्यानञ्चैव पुनस्तत्र कृत्वा जाप्यं ततः पुनः।
मन्त्रावृत्तिन्तु द्विगुणां पूर्व्वतोऽपि जनार्दन।
ततश्च ब्राह्मणानां हि भोज्यं सङ्कल्पमाचरेत्।
पूर्व्ववच्च नमस्कारं गीतं नृत्यं तथा पुनः।
कुर्य्यादानन्दसंयुक्तो यावच्च द्वितीयावधि।
यामे द्वितीये याते तु तृतीये च समागते।
विसृज्य च शिवं तत्र पुनर्मूर्त्तिं प्रकल्पयेत्॥
स्थापिते वा ततः कुर्य्यात् तत्तत्पूजाविधिं हि।
द्रव्यैः पूजां पुरा कृत्वा पश्चाद्धारां प्रदापयेत्।
पूर्व्वतो द्विगुणं कुर्य्यान्मन्त्रेण विधिपूर्व्वकम्।
ततश्च चन्दनेनैव सम्पूज्य तण्डुलैस्तथा॥

घूमैः पूजनं कुर्य्याच्छिवप्रीणनतत्परः ।
पिश्चैवार्कसम्भूतैः पूर्व्वोक्तैर्मन्त्रसत्तमैः ॥ ८०
ैश्च विविधैस्तत्र दीपैर्नानाविधैरपि ।
ाद्यं धूपकैस्तत्र शाकैर्नानाविधैरपि ॥ ८१
ा चैवाथ कर्पूरैरारात्रिकविधिं चरेत् ।
ेश्च दाडिमेनैव दद्याच्च शङ्कराय च ।
स्कारं ततो ध्यानं कृत्वा मन्त्रं जपेत् ततः ॥ ८२
ोऽपि द्विगुणं जाप्यं कृत्वा च ब्रह्मभोजनम् ।
क्त्यग्र दक्षिणां दत्त्वा पूजाविधिं समाचरेत् ॥ ८३
ीतं गीतं तथा कृत्वा यावद्यामावधिर्भवेत् ।
ामे च तृतीये जाते चतुर्थे च समागते ॥ ८४
ूज्य च पुनः पूजां कृत्वा च पार्थिवीं हरे ।
ागादि पुनः कृत्वा पूजाविधिं समाचरेत् ॥ ८५
स्य पूजनं कृत्वा जलधारां प्रदापयेत् ।
तो द्विगुणेनैव मन्त्रजाप्येन वा पुनः ॥ ८६
नादानसम्भूतां पूजाञ्च तण्डुलैस्तथा ।
ैश्चैवाथ मुद्गैश्च प्रियङ्गुभिश्च वा पुनः ॥ ८७
वा सप्तधान्यैश्च पूजयेत् परमेश्वरम् ।
स्य प्रथमं पूज्य जातिजैः प्रतियामकम् ॥ ८८
ेपुष्पैस्तथा पश्चाच्चम्पकैर्वा विधाय च ।
कृत्वा नरेणैव रुद्रस्य हितमिच्छता ॥ ८९
ीर्त्तैर्मन्त्रवर्गैश्च नामभिर्वा विशेषतः ।
ूज्य शङ्करं देवं धूपं दीपं क्रमेण च ॥ ९०
द्यं तत्र दद्याद्वै माधुर्य्यैर्विविधैरपि ।
ान्नेनाथवा तत्र तोषयेच्च सदाशिवम् ॥ ९१
दद्यात् कदल्याश्च फलेनैवाथवा हरे ।
ेधैश्च फलैस्तत्र दद्यादर्घं शिवाय च ॥ ९२
स्कारं ततो ध्यानं कृत्वा जाप्यं समाचरेत् ।
ातो द्विगुणं तत्र कुर्य्याज्जाप्यं नरोत्तमः ॥ ९३
स्कारं ततश्चैव सङ्कल्पं पूर्व्ववत् तथा ।
वाद्यं पुनश्चैव यावत् स्यादरुणोदयः ॥ ९४
ये च तथा जाते सम्प्रार्थ्य शङ्करं पुनः ।
त्वा पूजां पुनः कृत्वा नानापुष्पाक्षतैरपि ॥ ९५
ाधूपार्घनैवेद्यैरभिषेको यथा भवेत् ।
भावेन सम्पूज्य तोषयेच्छङ्करं मुदा ॥ ९६
ाविधानि दानानि भोज्यञ्च विविधं तदा ।
ब्राह्मणानां यतीनाञ्च कर्त्तव्यं प्रहरसंख्यया ॥ ९७
शङ्कराय नमस्कृत्य स्तुतिं नानाविधां तदा ।
पुष्पाञ्जलिं तदा तत्र मन्त्रैरेतैः सुरोत्तम ॥ ९८
दद्यादात्महितार्थाय शिवाय परमात्मने ।
तावकस्त्वद्गतप्राणस्त्वच्चितोऽहं सदा मृड ॥ ९९
कृपानिधे इति ज्ञात्वा यथा योग्यं तथा कुरु ।
अज्ञानाद्यद्दिवा ज्ञानाज्जपपूजादिकं मया ॥ १००
कृपानिधे इति ज्ञात्वा भूतनाथ प्रसीद मे ।
अनेनैवोपचारेण यज्जातं फलमेव च ॥ १०१
तेनैव प्रीयतां देवः शङ्करः सुखदायकः ।
अनेनैव च पुष्पाणामञ्जलिना प्रभो मम ॥ १०२
न्यूनं सम्पूर्णतां यातु व्रतञ्चैव महेश्वर ।
पुष्पाञ्जलिं समर्प्यैवं तिलकाशिषमेव च ॥ १०३
गृह्णीयाद्ब्राह्मणेभ्यश्च नत्वा तान् शङ्कराय च ।
विसर्ज्जयेच्छिवं पश्चात् पुनरागमनाय च ॥ १०४
मम कुले देवदेव भजनं तेऽस्तु सर्व्वदा ।
मानसान्मम देवेश दूरं नैव कदाचन ॥ १०५
अहर्निशं क्षणं वापि विना च स्मरणं तव ।
व्यसनं न भवेद्देव दूरं नैव कदाचन ॥ १०६
इत्येवञ्च नमस्कृत्य विसृज्य शङ्करं मुदा ।
ब्रह्मभोज्यं तदा कृत्वा सर्व्वपापक्षयो भवेत् ॥ १०७
एवं व्रतं कृतं येन तस्माद्दूरे हरो न हि ।
फलं वक्तुं न शक्येत वर्षाणामयुतैरपि ॥ १०८
अनादरतया चेद्वै कृतं व्रतमनुत्तमम् ।
तस्यैव मुक्तिबीजञ्च जातं नात्र विचारणा ॥ १०९
व्रतमेतत् प्रतिमासं कर्त्तव्यमृषिसत्तमाः ।
उद्यापनविधिं पश्चात् कृत्वा साङ्गं विधिं नयेत् ॥ ११०
व्रतस्य करणान्नूनं शङ्करः सर्व्वदुःखहा ।
भुक्तिं दत्त्वा च मुक्तिञ्च ददते नात्र संशयः ॥ १११
इति व्रतफलं श्रुत्वा देवा विष्णुमुखास्तदा ।
आनन्दं परमं प्राप्य स्वं स्वं धाम ययुस्तदा ॥ ११२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां शिवरात्रिमहिमनिरूपणं नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

चतुःसप्ततितमोऽध्यायः।

ऋषय ऊचुः।

उद्यापनविधिं ब्रूहि शिवरात्रिव्रतस्य च।
यत् कृत्वा शङ्करः साक्षात् प्रसन्नो भवति ध्रुवम् ॥ १
इति तेषां वचः श्रुत्वा सूतो वचनमाददे।

सूत उवाच।

श्रूयतामृषयः श्रेष्ठा विधिं वच्मि यथाश्रुतम् ॥ २
शिवरात्रिदिने प्राप्ते नित्यं सम्पाद्य वै तदा।
शिवालयं ततो गत्वा पूजां कृत्वा यथाविधि ॥ ३
गृह्णीयान्नियमं तत्र व्रतस्य विधिवन्नरः।
रात्रौ जागरणं कृत्वा पूजां यामचतुष्टये ॥ ४
लिङ्गे च पार्थिवे वापि कृत्वा च विधिपूर्व्वकम्।
प्रातःकाले समुत्थाय सङ्कल्पं शिवसन्निधौ ॥ ५
कुर्य्याच्छिवप्रसादाच्च करिष्ये व्रतमुत्तमम्।
प्रतिमासञ्च कर्त्तव्यं मया देव त्वदाज्ञया ॥ ६
निर्व्विघ्नेन व्रतं चेतज्जायतां कृपया तव।
इति शिवालये नियमं कृत्वा भोज्यादिकं चरेत् ॥ ७
विप्राशिषं ततो गृह्य नियमं परिसमाप्य च।
पश्चाच्चतुर्द्दशीं प्राप्य कृष्णपक्षसमुद्भवाम् ॥ ८
प्रातःकाले समुत्थाय तीर्थादौ वा गृहे पुनः।
स्नानादि सर्व्वनित्यञ्च समाप्य नियमं चरेत् ॥ ९
शिवस्य सन्निधिं गत्वा पूजां कृत्वा यथाविधि।
अद्य व्रतं मया देव कर्त्तव्यञ्च तवाज्ञया ॥ १०
निराहारतया देव निर्ज्जलं विधिवत् प्रभो।
कर्त्तुमिच्छा भवेदद्य धैर्य्यं रक्ष मम प्रभो ॥ ११
नमस्कृत्य तदा शम्भुं कामक्रोधविवर्ज्जितः।
दिनं नीत्वा तथा रात्रौ पूजां यामसमुद्भवाम् ॥ १२
कृत्वा जागरणं तत्र प्रातःकालावधि स्वयम्।
जपं मन्त्रवरेणैव गीतं नृत्यं तथा पुनः ॥ १३
कृत्वा पुनस्तदा स्नात्वा पूजाञ्चैव शिवस्य च।
विधाय ब्रह्मभोज्यञ्च भोजयेन्न्यासिनं तदा ॥ १४
अशक्त्यैकं तदा भोज्यं स्वयं भोज्यं ततः परम्।
तदाशिषं तदा गृह्य नाना कार्य्यं समाचरेत् ॥ १५
एवञ्च प्रतिमासञ्च कृत्वा च व्रतमुत्तमम्।
यावच्च शिवरात्रिर्वै पुनरायाति सत्तम ॥ १६

तस्मिन् दिने स्वयं कार्य्यमुद्यापनविधिं …
ब्राह्मणांश्च तदा पृष्ट्वा शास्त्रादौ परिशोध्य …
कर्त्तव्यं यच्च तत्रैव स यथा कारयेत् स्वयम् …
तदहं कथयाम्यद्योद्यापनं विधिपूर्व्वकम् …
उद्यापनदिने चैव कर्त्तव्यं श्रूयतां पुनः।
प्रातर्नित्यन्तु सम्पाद्य मण्डलं तत्र कारयेत् …
गौरीतिलकनाम्ना वै प्रसिद्धं भुवनत्रये।
कुम्भास्तत्र प्रकर्त्तव्याः प्राजापत्यविसंख्यया …
सवस्त्राः सफलास्तत्र दक्षिणासहिताः शु…
मण्डलस्य च पार्श्वे वै मोचनीयाः प्रयत्नतः …
मध्ये चैकञ्च संस्थाप्य तत्रोमासहितं शिवम् …
दीपञ्च दक्षिणे भागे कृत्वा रात्रौ प्रपूजये…
जागरणं तदा कृत्वा पूजां यामोद्भवां न…
रात्रिमाक्रामयेत् तत्र नृत्यगीतादिना व्रती…
सम्पूज्य विधिवद्देवं वेदोक्तविधिना दिवा।
सन्तोष्य प्रातरेवञ्च पुनः पूजा तदा भवेत् …
ऋषिभिश्च समान् विप्रान् ब्राह्मणान् वे…
यज्ञोपवीतवस्त्रैश्च उपानद्युगलेन च ॥ …
स्वर्णमुद्रास्वलङ्कारैर्दत्त्वा होमञ्च कारयेत् …
घृतेन पायसेनाथ मन्त्रैश्च रुद्रसम्भवैः ॥ …
प्रारम्भे च व्रती होमं नवग्रहपुरःसरम्।
तिलांश्च यवसम्मिश्रानाज्येन च परिप्लुता…
जुहुयाच्छिवमन्त्रेण शिवायाश्च ततः पर…
सौवर्णीं रुद्रमूर्त्तिञ्च रौप्यां गौरीं तथैव …
शय्याञ्च तूलिकाञ्चैव सप्तधान्यसमन्विता…
गोदानञ्च प्रदातव्यं ब्राह्मणाय व्रताप्तये …
एवं समाप्य होमन्तु तत्राचार्य्यं प्रपूजयेत् …
अर्घपुष्पप्रदानैश्च वस्त्रालङ्कारभूषणैः ॥ …
भक्त्या च दक्षिणा देया ब्राह्मणेभ्यो वि…
धेनुं सदक्षिणां दद्यात् सुशीलाञ्च पयस्वि…
सुवर्णशृङ्गीं रौप्यखुरां कारयेद्दोहनसंयु…
रत्नपुच्छां वस्त्रयुतां ताम्रपृष्ठीमलङ्कृताम् …
सुवर्णेन समोपेतामाचार्य्याय च साधवे।
ब्राह्मणान् भोजयेच्चैव घृत-पायस-शर्क…
दानानि च विचित्राणि कुर्य्यात् तत्र शि…
यथाशक्ति विधानञ्च प्राजापत्यविधिं त…

णान् भोजयित्वा तु शिवाय फलमर्पयेत्।
देव महादेव शम्भो शङ्कर वै हर ॥ ३५
ानेन देवेश कृपां कुरु ममोपरि।
शक्त्यनुसारेण व्रतमेतत् कृतं शिव ॥ ३६
नाद्यदि वा ज्ञानाज्जपपूजादिकं मया।
तदस्तु सफलं कृपया तव शङ्कर ॥ ३७
पुष्पाञ्जलिं दत्त्वा शिवाय परमात्मने।
कारं ततः कृत्वा प्रार्थनां पुनरेव च ॥ ३८
ौ च त्वदीयौ मे चित्ते दूरं न कर्हिचित्।
व्रतं कृतं येन न्यूनं तस्य न किञ्चन ॥ ३९
व्रताच्च सिद्धिं वै लभते नात्र संशयः।
ाख्यं व्रतं ह्येतन्मुक्तिवीजं प्रचक्षते ॥ ४०
नाज्ज्ञानतो वापि व्रतेन तुष्यति शिवः।
ः कुरुते विप्राः प्राप्नोति परमं पदम् ॥ ४१
ं मानसं वापि वाचिकं यच्च दुष्कृतम्।
र्व्वं विलयं यान्ति व्रतस्यास्य प्रभावतः ॥ ४२
स्नानं प्रकर्त्तव्यममावास्यां द्विजोत्तमाः।
क्षे च प्रदातव्यं पिण्डदानं विधाय च ॥ ४३
द्दिश्यामावास्यां द्विजभोज्यं समाचरेत्।
पक्षे भवेत् तृप्तिः पितॄणां युगसंख्यया ॥ ४४
ाय प्रदातव्यं मिष्टान्नं व्याकृताय च।
ाय कुलीनाय स्वदाराभिरताय च ॥ ४५
स्य यतेश्चापि देयमन्नं जलं तथा।
ैव प्रदातव्यं मिष्टान्नं दक्षिणा तथा ॥ ४६
नैरभिपाकान्नं भोक्तव्यं बन्धुभिः सह।
कथितं ब्रह्मन् व्रतराजविधिर्मया ॥ ४७
सर्व्वप्रयत्नेन कर्त्तव्यं फलमीप्सुभिः।
श्रवणादपि स याति परमां गतिम् ॥ ४८
शैवे ज्ञानसंहितायां शिवरात्र्युद्यापन-
निरूपणं नाम त्रिसप्ततितमोऽध्यायः ॥७३॥

चतुःसप्ततितमोऽध्यायः।

ऋषय ऊचुः।

वचनं श्रुत्वा ह्यानन्दं परमं गताः।
व्रतस्यास्य श्रुतो विस्तरशः पुनः ॥ १
कथय त्वं महाबाहो केनैव फलमुत्तमम्।
अज्ञानतश्च कृत्वा हि प्राप्तं किञ्च वदाधुना ॥ २

सूत उवाच।

श्रूयतामृषयः श्रेष्ठाः कथयामि पुरातनम्।
इतिहासं निषादस्य सर्व्वपापप्रणाशनम् ॥ ३
पुरा कश्चिद्वने भिल्लो ह्यासीन्नाम्ना सुरद्रुहः।
कुटुम्बी बलवान् क्रूरः क्रूरकर्म्मपरायणः ॥ ४
निरन्तरं वने गत्वा मृगान् हन्यादनेकशः।
चौर्य्यञ्च विविधं तत्र करोति स वनेचरः ॥ ५
बाल्यादारभ्य तेनेह शुभं कृतं न किञ्चन।
महान् कालो व्यतीयाय वने तस्य दुरात्मनः ॥ ६
कदाचिच्छिवरात्रिश्च ह्यासीत् तत्र सुशोभना।
न दुरात्मा स जानाति महाव्रतमनुत्तमम् ॥ ७
एतस्मिन् दिवसे भिल्लो मात्रा पित्रा स्त्रिया तथा।
प्रार्थितः क्षुद्धर्म्मैश्च भक्ष्यं देहि वनेचर ॥ ८
इति सम्प्रार्थितः सो वै धनुरादाय सत्वरम्।
जगाम मृगहिंसार्थं बभ्राम सकलं वनम् ॥ ९
दैवयोगात् तदा तेन न प्राप्तं किञ्चिदेव हि।
अस्तं प्राप्तस्तदा सूर्य्यः स वै दुःखमुपागतः ॥ १०
किं कर्त्तव्यं क्व गन्तव्यं न प्राप्तं वेतनं मया।
बालाश्च ते गृहे ये वै पित्रोश्च किं भविष्यति ॥ ११
मदीयञ्च कलत्रञ्च तस्य किं तु भविष्यति।
किञ्चिद्गृहीत्वा च मया गन्तव्यञ्च तथा व्रजे ॥ १२
इति विचार्य्य तत्रैव जलाशयसमीपगः।
जलावतरणं यत्र तत्र गत्वा स्वयं स्थितः ॥ १२
अवश्यमत्र कश्चिद्वै जीवस्त्वेवागमिष्यति।
इति मत्वा तदा वृक्षमेकं बिल्वेतिसंज्ञितम् ॥ १४
समारुह्य स्थितस्तत्र जलमादाय वै तदा।
रात्रौ तत्र तदा स्थित्वा दृष्टिं बद्ध्वा तु सत्वके ॥ १५
कदायास्यति कश्चिद्वै कदा हन्यामहं पुनः।
इति बुद्धिं समास्थाय स्थितोऽसौ क्षुधया युतः ॥ १६
दिवसे चोपवासश्च न प्राप्तं वेतनं तदा।
प्रथमे चैव यामे च मृगी ह्येका समागता ॥ १७
तृषार्त्ता चकिता सा वै ह्युत्फालं कुर्व्वती तदा।
तां दृष्ट्वा च तदा तेन शरो धनुषि सन्दधे ॥ १८
तस्यैवं कुर्व्वतस्तत्र जलं बिल्वदलानि च।

पतितानि ह्यधस्तत्र शिवलिङ्गमभूद्ध्रुवाः ॥ १९
यामस्य प्रथमस्यैव पूजा जाता शिवस्य च।
तन्महिम्ना च तस्यैव पातकं ज्वलितं तदा ॥ २०
तत्रत्यञ्चैव तच्छब्दं श्रुत्वा सा हरिणी भिया।
व्याकुला व्याधकं दृष्ट्वा हा वाणेन वधिष्यति ॥ २१
किं करोमि क्व गच्छामि उपायं रचयाम्यहम्।
इति विचार्य्य सा तत्र वचनञ्चेदमब्रवीत् ॥ २२
मृग्युवाच।
किं कर्त्तुमिच्छसि व्याध श्रुत्वा व्याधोऽब्रवीदिदम्।
व्याध उवाच।
कुटुम्बं क्षुधितं मेऽद्य हत्वा त्वां तर्पयाम्यहम् ॥ २३
दारुणं तद्वचः श्रुत्वा दुर्द्धरं तं वनेचरम्।
तच्छ्रुत्वा सा मृगी दृष्ट्वा धन्याहं व्याधसत्तम ॥ २४
मृग्युवाच।
मन्मांसेन सुखं स्याद्धि देहस्यानर्थकारिणः।
उपकारकरस्यैव यत् पुण्यं जायते त्विह ॥ २५
तत् पुण्यं शक्यते नैव वक्तुं वर्षशतैरपि।
असारस्य शरीरस्य साफल्यं मे भविष्यति ॥ २६
परन्तु शिशवो मेऽद्य वर्त्तन्ते ह्याश्रमे मम।
भगिनीञ्च समर्प्यैव स्वामिने विधिवत् तदा ॥ २७
आयास्ये च पुनर्मांसात् तृप्तिस्ते सर्व्वथा शुभा।
इत्युक्तोऽपि तदा व्याधो न मेने वचनं ततः ॥ २८
सङ्कटे समनुप्राप्ते सर्व्वे मिथ्याभिशंसिनः।
इत्येवं वचनं श्रुत्वा मृग्याह वचनं पुनः ॥ २९
सत्येन सर्व्वथा देवाः सत्येनैव समुद्रकाः।
सत्येन जलधाराश्च सत्ये सर्व्वं प्रतिष्ठितम् ॥ ३०
न मे मिथ्या वचस्त्वञ्च जानीहि पशुघातक।
इत्युक्तोऽपि न मेने तद्वचनं पुनरब्रवीत् ॥ ३१
शृणु व्याध प्रवक्ष्यामि पापं मे शिरसि भवेत्।
यद्यहं नागमे ह्यत्र एतेषां पातकं मम ॥ ३२
ब्राह्मणो वेदविक्रेता सन्ध्याहीनस्त्रिकालकम्।
स्त्रियाश्च स्वामिनो ह्याज्ञां समुल्लङ्घ्य भवेच्च यत् ॥ ३३
कृतघ्ने चैव यत् पापं यत् पापं विमुखे हरेः।
द्रोहिणाञ्चैव यत् पापं यत् पापं धर्म्मलङ्घने ॥ ३४
तेन पापेन लिप्यामि यद्यहं नागमे पुनः।
इत्यादीनि ह्यनेकानि कृत्वा मृगी स्थिता तदा ॥ ३५

व्याधोऽपि च स्वयं तत्र गच्छ शीघ्र वने
मृगी हृष्टा जलं पीत्वा गता ह्याश्रममण्
तावच्च प्रथमो यामो गतो निद्रां विना
तदीया भगिनी या वै मृगी च परिभ्रा
तस्या मार्गं विचिन्वन्ती ह्याजगाम जल
तां दृष्ट्वा तु स्वयं भिल्लश्चक्रे वाणस्य कर्ष
पूर्व्ववज्जलपत्राणि पतितानि शिवोपरि।
यामस्य द्वितीयस्यैव पूजा जाता महात्
सा मृग्यपि च तं दृष्ट्वा किं करोषि वनेच
पूर्व्ववत् कथितं तेन श्रुत्वा हर्षसमन्विता
धन्याहं श्रूयतां श्रेष्ठ सफलं देहधारण
अनित्येन शरीरेण ह्युपकारी भविष्यति।
परन्तु मम बालाश्च गृहे तिष्ठन्त्यथार्भका
भर्त्रे तान् वै समर्प्यैव ह्यागमिष्याम्यहं
तवोक्तञ्च न मन्येऽहं हन्यामिति न संश
शृणु व्याध प्रवक्ष्यामि यद्यहं नागमे पु
एतेषां पातकं मेऽद्य भवत्विति न संशयः
वाचो विचलिता यस्य सुकृतं तेन हारि
मेदिनी तस्य पापेन कम्पते च मुहुर्म्मुहुः
पतिव्रतां स्त्रियं हित्वा ह्यन्यां गच्छति
तत्पापं शिरसि मेऽद्य यद्यहं नागमे पु
वेदधर्म्मान् समुल्लङ्घ्य कल्पितेन पथा
विष्णुभक्तिसमायुक्तः शिवनिन्दां करो
पित्रोः क्षयाहमासाद्य शून्यञ्चैवाक्रमेदि
दत्त्वा च परितापञ्च करोति वञ्चनं पुनः
तेन पापेन लिप्यामि यद्यहं नागमे पुन
इत्युक्तश्च तदा व्याधो गच्छ त्वं पुनरा
सा मृगी च जलं पीत्वा ह्यष्टा सा च स्व
जगाम तावत् स मृगः क्व मृग्यौ चिन्त
तावच्च द्वितीयो यामो गतो निद्रां विना
मृगोऽपि च मृगीं पश्यन् जलमार्गं सम
पुष्टं मृगञ्च तं दृष्ट्वा हृष्टो वचनमब्रवीत्
वह्व मांसञ्च विद्येत तृप्तिः स्यादनपायि
वाणमाकृष्य भिल्लोऽपि प्रयत्नं कृतवान्
तदा च जलयुक्तानि पत्राणि च शिवो
तेनैव च तृतीयस्य यामस्य कृपिसत्तमा

ा जाता शिवस्यैव कृपालुत्वञ्च पश्यत।
ायञ्चैव तं शस्त्रं किं करोषि मृगोऽब्रवीत्॥ ५४
धोऽपि वचनं तत्र पूर्व्ववद्युक्तवान् पुनः।
श्रुत्वा हरिणः सोऽपि हृष्टो वचनमाददे॥ ५५
योऽहं पुष्टिमानद्य येन तृप्तिर्भवाद्दृशाम्।
याङ्गं नोपकारार्थं गतं वै परमार्थतः॥ ५६
य सर्व्वञ्च व्यर्थं वै नात्र कार्य्या विचारणा।
वै सामर्थ्ययुक्तोऽपि नोपकारं करोति च॥ ५७
तामर्थ्यं भवेद्व्यर्थं नात्र कार्य्या विचारणा।
यग्ज्ञातशरीरेण तृप्तिस्तव भविष्यति॥ ५८
न्तु बालकांश्चाहं समप्य जननीं पुनः।
श्वास्याप्यथ तान् सर्व्वानागमिष्याम्यहं ध्रुवम्॥५९
ुक्तो वै पुनस्तत्र व्याधो वचनमब्रवीत्।
ये समागता ह्यत्र ते ते सर्व्वे त्वया यथा॥ ६०
थला तु गतास्ते वै नायान्त्यद्यापि वञ्चितः।
ञ्चापि सङ्कटे ह्युक्त्वा व्यलीकञ्च गमिष्यसि॥ ६१
नैव जीवनञ्चाद्य भविष्यति कथं मृग।
शिवं वचनं श्रुत्वा मृगो वाक्यमुपाददे॥ ६२
शृणु व्याध प्रवक्ष्यामि नानृतं विद्यते मयि।
येन सर्व्वं ब्रह्माण्डं तिष्ठति तु चराचरम्॥ ६३
स्य वाणी व्यलीका हि तत्पुण्यं ज्वलितं क्षणात्।
श्चापि मन्यते नैव प्रतिज्ञां मम भिक्षुक॥ ६४
ध्यायां मैथुने चैव शिवरात्रिभोजने कृते।
ट्साक्ष्ये न्यासहारे सन्ध्याहीने द्विजेऽथवा॥ ६५
विहीनं मुखं यस्य नोपकुर्य्यात् क्षमोऽपि सन्।
वा मैथुनकारी च तस्यैव पातकञ्च यत्॥ ६६
र्वणि च कलादौ च व्रतस्यैव दिने तथा।
भक्ष्यकारके यच्च तत् पापं शिरसा मम॥ ६७
यहं नागमे ह्यत्र वञ्चयित्वा च त्वां पुनः।
ति वचस्तदा श्रुत्वा गच्छ शीघ्रं समाव्रज॥ ६८
ाधेनैवं समुक्तास्तु जलं पीत्वा गतो मृगः।
सर्व्वे मिलितास्तत्र ह्याश्रमे ऋषिसत्तमाः॥ ६९
तान्तञ्चैव तत् सर्व्वं श्रुतञ्चैव परस्परम्।
तव्यं निश्चयेनैव सत्यपाशेन यन्त्रिताः॥ ७०
श्वास्य बालकांस्तत्र गन्तुमुत्कण्ठितास्तदा।
गी ज्येष्ठा च या तत्र स्वामिनं वाक्यमब्रवीत्॥ ७१

अनाथा बालका ह्यत्र कथं स्थास्यन्ति वै मृग।
प्रथमञ्च मया तत्र प्रतिज्ञा च कृता प्रभो॥ ७२
तस्मान्मया च गन्तव्यं भवद्भ्यां स्थीयतान्त्विह।
इति वचस्तदा श्रुत्वा कनिष्ठा वाक्यमब्रवीत्॥ ७३
अहञ्च सेवकी वाञ्च गच्छामि स्थीयतां त्वया।
मृगोऽपि वचनं श्रुत्वा गम्यते च मया पुनः॥ ७४
इति श्रुत्वा वचस्तस्य वैधव्यं जीवितं हि धिक्।
बालानाश्वास्य तांस्तत्र समप्य सहवासिनः॥ ७५
गतास्ते सर्व्वे एवात्र यत्रास्ते व्याधसत्तमः।
प्रतीक्षां क्रियमाणश्च मार्गञ्चैव निरीक्षते॥ ७६
तावद्गताश्च ते सर्व्वे सत्यपाशेन यन्त्रिताः।
तान् दृष्ट्वा हर्षितो व्याधो धनुषि चादधे शरम्॥ ७७
बाला अपि च ते सर्व्वे पित्रोरनु समागताः।
एतेषां या गतिः स्याद्वै ह्यस्माकं सा भवेत् सदा॥ ७८
पुनश्च जलपत्राणि पतितानि शिवोपरि।
तेन जाता चतुर्थस्य पूजा यामस्य वै शुभा॥ ७९
तस्य पापं तदा सर्व्वं भस्मसादभवत् क्षणात्।
मृगो मृगीभ्यां प्रोवाच शीघ्रं त्वं व्याधसत्तम॥ ८०
अस्माकं सार्थकं देहं कुरुष्व मांसभक्षणात्।
इति तेषां वचः श्रुत्वा व्याधो विस्मयमागतः॥ ८१
शिवपूजाप्रभावेण ज्ञानं तस्य समागतम्।
धन्या एते मृगाश्चैव ज्ञानहीनाः सुसम्मताः॥ ८२
स्वीयेनैव शरीरेण परोपकरणे रताः।
मानुष्यं जन्म सम्प्राप्य साधितं किं मयाधुना॥ ८३
परकायञ्च सम्पीड्य शरीरं पोषितं मया।
कुटुम्बं पोषितं मेऽद्य पूर्व्वञ्च बहुपीड़ितम्॥ ८४
कृत्वा च पोषितं सर्व्वं का गतिश्च भविष्यति।
कां कां गतिं गमिष्यामि पातकं जन्मनः कृतम्॥ ८५
इदानीं चिन्तयाम्येव धिक्कारो जीवने मम।
इति ज्ञानसमापन्नो वाणं संवारयंस्तदा॥ ८६
गम्यताञ्च मृगश्रेष्ठा धन्याः स्थ इति चाब्रवीत्।
इत्युक्ते च तदा तेन प्रसन्नः शङ्करस्तदा॥ ८७
पूजितश्च स्वरूपं हि दर्शयामास सम्मतम्।
पञ्चवक्त्रादिकं यच्च मुनिभिर्ध्यायते सदा॥ ८८
तद्रूपं कृपया देवः करुणामृतसागरः।
दर्शयित्वा वरं ब्रूहि प्रसन्नोऽस्मि वनेचर॥ ८९

व्याधोऽपि शिवरूपश्च जीवन्मुक्तोऽभवत् चणात्।
पपात शिवपादाग्रे सर्व्वं प्राप्तं मयाधुना ॥ ९०
शिवोऽपि तं गुहं नाम स्थापयित्वा वरं ह्यदात्।
शृणु व्याध इदानीं त्वं भुक्तिं भुङ्क्ष्व मनेप्सिताम् ॥ ९१
राजधानीञ्च सम्भुङ्क्ष्व वंशवृद्धिस्तथा शुभा।
अनपायिनी भवेन्नित्यं श्लाघनी दैवतैरपि ॥ ९२
गृहे रामस्तव व्याध समायास्यत्यसंशयः।
तत्पूजां तस्य भक्तिञ्च कृत्वा यास्यस्यसंशयम् ॥ ९३
मुक्तिं सर्व्वजनैः सद्भिर्दुर्लभा मुनिसत्तमैः।
मम पूजारतास्ते च वंश्याः स्युर्बलवत्तराः ॥ ९४
एतस्मिन्नन्तरे तैस्तु शिवस्य दर्शनं कृतम्।
सबालास्ते तदा मुक्ता मृगयोनेर्ययुर्दिवम् ॥ ९५
विमानञ्च समारुह्य दिव्यदेहं गतास्तदा।
शिवदर्शनमात्रेण पाशान्मुक्ता दिवं गताः ॥ ९६
व्याधेश्वरः शिवो जातः पर्व्वते ह्यर्बुदाचले।
व्याधोऽपि तद्दिनान्नूनं भुक्तिञ्चैव ऋषीश्वराः ॥ ९७
भुक्त्वा रामकृपां प्राप्य शिवसायुज्यमागतः।
अज्ञानाच्च व्रतं ह्येतत् कृत्वा सायुज्यतां गतः ॥ ९८
किं पुनर्भक्तिसम्पन्ना यान्ति तन्मयतां शुभाम्।
विचार्य्य सर्व्वशास्त्राणि धर्मांश्चैवाप्यनेकशः ॥ ९९
व्रतानि विविधान्यत्र तीर्थानि विविधान्यथ।
दानानि च विचित्राणि विविधानि फलानि च॥१००
एतेन समतां यान्ति शिवरात्रिव्रतेन च।
तस्माच्छुभतरं ह्येतत् कर्त्तव्यं हितमीप्सुभिः ॥ १०१
एतत्सर्व्वं समाख्यातं पुनश्च कथयाम्यहम्।
इतिहासमृषिश्रेष्ठा व्रतं पापहरं परम् ॥ १०२

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः।

सूत उवाच।

अवन्तीनगरे रम्ये दीक्षितो ऋषिसत्तमाः।
सत्कुलीनः सदाचारः शुभकर्मपरायणः ॥ १
वेदेषु चैव शास्त्रेषु परिष्णातो विचक्षणः।
तस्य भार्य्या कुलीनासीत् पतिधर्मपरायणा ॥ २
आज्ञाञ्च पालयामास भक्तिभावसमन्वि
तस्य पुत्त्रद्वयं ह्यासीत् सुनिधिर्वेदनिधि
ज्येष्ठश्चैव सुनिधिस्तु माता-पितृपराय
वेदनिधिश्च यः प्रोक्तो वेदशास्त्रविशार
दुर्व्यसनञ्च तस्यासीन्नर्त्तक्या क्रीड़नादि
भक्ष्यं भोज्यञ्च तत्रैव करोति स निरन्त
पित्राज्ञातं निषिद्धोऽपि निवृत्तो न त
मात्रा चापि तथा भ्रात्रा भर्त्सितोऽपि
न त्यक्तं व्यसनं तेन पापिष्ठेन दुरात्मना।
कदाचिद्दीक्षितायैव दत्तं राज्ञा स्वल
अङ्गुल्याभरणं श्रेष्ठं प्रसन्नेन तदा स्वयम्
दीक्षितेन गृहं गत्वा स्त्रियै दत्तं सुगो
स्त्रिया सुप्तं गृहे चैव तेन दृष्टं दुरात्म
हृत्वा रात्रौ च तच्चैव नर्त्तक्यै विनिवेदि
कदाचिन्नर्त्तकी सा च राज्ञे नृत्यं ह्यद
तत् तस्मिन् समये राज्ञा दृष्टञ्च भूषणं
राज्ञा तस्यै तदा पृष्टं कुतो लब्धं त्वया
तया प्रतारितः सोऽपि भर्त्सयामास तां
अत्याग्रहतया पृष्टा यथार्थं कथितं त
बलात् ततो गृहीत्वा तु स्थापितं पार्श्वे
प्रातर्विप्रं समाहूय वलयं दीयतां पुनः
कार्य्यञ्च वर्त्तते किञ्चित् पुनश्चानीयतां
इत्युक्तश्च द्विजश्चैव गृहमागत्य तां पुनः।
उवाच रे प्रिये दत्तं मया तद्दीयतां त्व
तथेति सा वचः श्रुत्वा गता मुक्तवती
सापि गवेषयामास न लब्धं वलयं तदा
स्वामिने कथयामास लभ्यते न मया
श्रुत्वा दुःखं समापन्नो राज्ञोऽग्रे तन्नि
न लब्धन्तु मया राजन् किं करोमि कु
तच्छ्रुत्वा च तदा राज्ञा सर्व्वञ्च विनिवे
दुःखितो ब्राह्मणः श्रुत्वा गृहं गत्वा स्त्रि
भर्त्सयामास पापिष्ठे कुभार्य्ये किं कृतं
उभाभ्यां भर्त्सितः सोऽपि पुत्त्र गच्छ
त्वया प्रयोजनं नैव ह्यस्माकं कुलदूषण
निष्कासितश्च पुत्त्रो वै नाम्ना वेदनिधि
गतो वहिस्तथा सोऽपि कुत्रचिद्दिनमा

धितस्तृषितश्चैव नर्त्तक्यापि तिरस्कृतः।
ात्रिर्जाता यदा तत्र क्षुधितस्तृषितस्तदा ॥ २१
द्दिने शिवरात्रिश्च लोकानां पावनी शुभा।
ाचिदाढ्यो बहुविधां पूजामादाय सत्वरम् ॥ २२
वेद्यं विविधं गृह्य गतवान् शिवमन्दिरम्।
दृष्ट्वा च तदा हृष्टो भक्षयिष्याम्यहं पुनः ॥ २३
ति विचार्य्य तुष्टोऽपि जगामानुपदं तदा।
ति बुद्ध्या तदा यातो दुष्टश्च क्षुधितस्तदा ॥ २४
ावस्य मन्दिरं गत्वा पूजां लोकजनैः सह।
दर्श क्षुधयाविष्टो अन्नभक्ष्यपरायणः ॥ २५
दैव ते गमिष्यन्ति कदान्नं भक्षयाम्यहम्।
था तथा मया चान्नं ग्रहीतव्यं तथाधुना ॥ २६
ति बुद्ध्या तदा तेन जाग्रतन्तु परार्थतः।
ऽपि लोकास्तदा तत्र पूजां यामसमुद्भवाम् ॥ २७
त्वा नृत्यञ्च गीतञ्च यामे चैव सुनिद्रिताः।
ाचिद्गता गृहे तत्र सुप्ताः केचन मन्दिरे ॥ २८
ान्द्रितांश्च तदा दृष्ट्वा विप्रो वेदनिधिस्तदा।
ान्नं निवेदितं तत्र पक्वान्नं विविधं तथा ॥ २९
जग्रहीषुस्तदा तत्र समीपे तु शिवस्य च।
ानैः शनैः समागच्छद्विच्छाया दीपकास्तदा ॥ ३०
ास्यगन्नं न दृश्येत दीपच्छाया शिवोपरि।
ानेव वस्त्रखण्डं हि शिरोवेष्टनजं तदा ॥ ३१
ीपश्च रोचितस्तत्र ह्यन्नार्थेन परार्थतः।
अन्धकारः शिवे यो वै दूरीभूतस्तदा शुभः ॥ ३२
अन्दीप्य दीपकं तत्र ह्यन्नं दृष्टं सुसुन्दरम्।
सर्व्वञ्चैव गृहीत्वाथ शनैः शनैरुपागमत् ॥ ३३
ायानेषु पदा स्पृष्टा विह्वला ह्युत्थितास्तदा।
कोऽयं कोऽयं ब्रुवन्तश्च चौरोऽयमिति चापरे ॥ ३४
ेषां तद्वचनं श्रुत्वा भीतो विप्रः पलायितः।
ाऽपि पश्चाद्गतास्तत्र राज्ञश्च सेवकास्तदा ॥ ३५
ालायमानं तं दृष्ट्वा बाणांश्च प्राक्षिपंस्तदा।
ाणास्तत्र तदा लग्नास्तस्मात् सोऽपि पपात ह॥३६
ातितश्च मृतः सो वै श्रूयतामृषिसत्तमाः।
अज्ञानतो व्रतं जातं रात्रौ जागरणं तथा ॥ ३७
ापालुत्वाच्छिवस्यैव सर्व्वं जातं सुशोभनम्।
ास्मिंश्च समये प्राप्ता दूता वैवस्वतस्य ह ॥ ३८

शङ्करस्य गणास्तत्र ह्याजग्मुर्बलवत्तराः।
उभयेषां तदा वादः समजायत वै भृशम् ॥ ३९
गणाः शिवस्य ये तत्र वचनञ्चेदमब्रुवन्।
कथं समागता यूयं दण्डेनाघट्टिता इति ॥ ४०
ते चोचुर्भगवद्भक्ता यूयं किञ्च समागताः।

यमगणा ऊचुः।

जन्मप्रभृति पापञ्च पुण्यन्तु ह्यणुमात्रकम् ॥ ४१

शिवगणा ऊचुः।

पापं बहुतरञ्चासीद्भस्मसादभवत् क्षणात्।
शिवस्य च व्रतेनैव रात्रौ जागरणेन च ॥ ४२
अद्यापि पातकं तिष्ठेद्गतं सर्व्वं दुरासदाः।
इत्येवं विवदन्तश्च धर्म्मराजं गतास्तदा ॥ ४३
यमेनोक्तञ्च सत्यं वै पापञ्च भस्मतां गतम्।
नमस्कारञ्च तान् कृत्वा कलिङ्गाधिपतिं तदा ॥ ४४
ब्राह्मणञ्च चकारासौ प्रणम्य भाग्यवानसि।
कलिङ्गाधिपतिर्भूत्वा शिवपूजापरायणः ॥ ४५
शिवपूजापरो नित्यं शिवरात्रिव्रते परः।
स्वराज्ये शिवपूजाञ्च दीपांश्चैव तदालये ॥ ४६
कारयित्वा तदा मुक्तिं लेभे च ऋषिसत्तमाः।
पश्यन्तु व्रतमाहात्म्यमनायासेन वा कृतम् ॥ ४७
ये पुनः परया भक्त्या कुर्व्वन्ति व्रतमुत्तमम्।
ते लभन्ते परां मुक्तिं किं तत्र विस्मयः पुनः ॥ ४८
चौर्य्यार्थेन सुबुद्ध्या च दीपन्तु कृतवान्न हि।
ज्ञात्वा दीपञ्च ये कुर्य्युर्लभन्ते ते शुभं पदम् ॥ ४९
एतस्मात् कारणाच्छ्रेष्ठा व्रतत्वेतादृशं न हि।
शिवात् परो दयालुर्न पावनो न परः स्मृतः ॥ ५०
एतद्वश्च समाख्यातं यत् पृष्टोऽहमृषीश्वराः।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ ५१
अतः परन्तु नास्त्येव मुक्तिः स्यादनपायिनी।
शिव एव परो देवः शिव एव परं पदम् ॥ ५२
शिव एव परा मुक्तिर्नातः परतरं व्रतम् ॥ ५३

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
शिवरात्रिव्रतमाहात्म्यवर्णनं नाम
पञ्चसप्ततितमोऽध्यायः ॥७५॥

षट्सप्ततितमोऽध्यायः।

ऋषय ऊचुः।

मुक्तिर्नाम त्वया प्रोक्ता तस्यां किन्तु भवेदिह।
अवस्था कीदृशी सूत भवेदिति वदस्व नः॥ १

सूत उवाच।

मुक्तिश्चतुर्व्विधा प्रोक्ता श्रूयतां कथयामि वः।
सारूप्या चैव सालोक्या सान्निध्या च तथा पुनः॥ २
सायुज्या च ऋषिश्रेष्ठा व्रतेनानेन या भवेत्।
किंलक्षणा हि सा चैव श्रूयतामृषिसत्तमाः॥ ३
यतः सर्व्वं समुत्पद्येद्येनैव पाल्यते हि तत्।
यस्मिंश्च लीयते सर्व्वं येन सर्व्वमिदं ततम्॥ ४
तदेव शिवरूपं हि प्रोच्यते च मुनीश्वराः।
विष्णुना तच्च न ज्ञातं ब्रह्मणा न तथैव च॥ ५
कुमारैर्नारदेनैव मार्कण्डेयादिभिस्तथा।
शुकेन व्यासशिष्येण व्यासेनैवाथवा पुनः॥ ६
तत्पुत्रैश्च तदा वेदैर्न ज्ञातं नेति नेति च।
सत्यं ज्ञानमनन्तश्च चिदानन्द उदाहृतः॥ ७
निर्गुणो निरुपाधिश्च निरञ्जनोऽव्ययस्तथा।
न रक्तो न च पीतश्च न श्वेतो नील एव च॥ ८
यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह।
तदेवं प्रथमं प्रोक्तं ब्रह्मैव शिवसंज्ञितम्॥ ९
आकाशं व्यापकं यद्वदिदं ब्रह्म तथा स्मृतम्।
न स्थूलं न च तत् सूक्ष्मं द्वन्द्वातीतं विमत्सरम्॥ १०
विकाररहितं तच्च इहास्ति च परत्र च।
तत्प्राप्तिश्च भवेदत्र शिवस्य भजनादिह॥ ११
तस्माच्छिवञ्च सेवेत मुक्त्यर्थमृषिसत्तमाः।
इति पृष्टं भवद्भिश्च तदेव कथितं मया॥ १२
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः॥ १३

इति श्रीशैवे षट्सप्ततितमोऽध्यायः॥ ७६॥

सप्तसप्ततितमोऽध्यायः।

ऋषय ऊचुः।

शिवः को वा हरिः को वा रुद्रः को वा समाहितः।
ब्रह्मा को वा भवेद्वयो वै कर्त्ता च जगतः स्मृतः॥ १
एतेषु निर्गुणः को वा संशयं छेत्तुमर्हसि।
निर्गुणश्च गुणी चैव सर्व्वञ्च कथ्यतां त्वया।

सूत उवाच।

अतः सर्व्वं समुत्पन्नं निर्गुणात् परमात्मनः।
तदेव शिवसंज्ञं हि वेदवेदान्तिनो विदुः॥
तस्मात् प्रकृतिरुत्पन्ना पुरुषेण समन्विता।
ताभ्यां तपः कृतं तत्र मूलस्थे च स्थले शुभे
पञ्चक्रोशीति विख्याते ह्यर्षाच्च प्रसृते...
व्याप्तञ्च सकलं ह्येतत् तत्र सुप्तो हरिः स्व...
नारायणेति विख्यातं वदन्ति मुनयस्तथा।
नारायणीति विख्याता प्रकृतिर्या पुरोगता
तन्नाभिकमले यो वै जातः स च पितामहः।
तेनैव तपसा दृष्टः स वै विष्णुः सनातनः।
वैकुण्ठवासी यः प्रोक्तो महालये विलोक...
उभयोर्वादनाशार्थं यद्रूपं दर्शितं बुधाः॥ ८
महादेवेति विख्यातं शिवाच्च निर्गुणादिह।
तेन चोक्तं ह्यहं रुद्रो भविष्यामि कपोलतः
रुद्रो नाम स विख्यातो लोकानुग्रहकारकः
ध्यानार्थञ्चैव सर्व्वेषामरूपो रूपवानभूत्।
स एव च शिवः साक्षाद्भक्तवात्सल्यकारकः
अन्ये च ये समुत्पन्ना यथानुक्रमतो लयम्
यान्ति नैव तथा रुद्रः शिवे रुद्रो विलीय...
सर्व्वे रुद्रं मिलित्वा च न यान्ति प्राकृता...
रुद्र इमान् मिलित्वा तु नयति श्रुतिशासन...
सर्व्वे रुद्रं भजन्त्येव रुद्रः कञ्चिद्भजेन्न हि।
अन्यं भजन्ति ये नित्यं तस्मिंस्ते लीनतां या...
तेनैव महत्त्वं प्राप्ताः कालेन महता पुनः।
रुद्रभक्तास्तु ये केचित् तत्क्षणं शिवतां या...
अन्यापेक्षा न तेषां वै श्रुतिरेषा सनातनी।
अज्ञानं विविधं ह्येतद्विज्ञानं विविधं न हि
ब्रह्मादितृणपर्य्यन्तं यत् किञ्चिद्दृश्यते किल
तत् सर्व्वं शिव एवास्ति नात्र कार्य्या विचा...
सृष्टेः पूर्व्वं शिवः प्रोक्तः सृष्टेर्मध्ये शिवस्तथा
सृष्टेरन्ते शिवः प्रोक्तस्तेन प्रोक्तः सदाशिवः
तस्माच्च निर्गुणः प्रोक्तः शिव एव ऋषीश्वराः
येनैव विष्णवे दत्ता श्वासेन वेदसंज्ञिता।

णी मन्त्रा ह्यनेके च ध्यानञ्च पूजनं बुधाः ॥ १९
मानः सर्व्वविद्यानां श्रुतिरेषा सनातनी ।
एव शङ्करः साक्षात् सर्व्वानुग्रहकारकः ॥ २०
र्त्ता च पालिता साक्षी संहर्त्ता स उदाहृतः ।
न्येषां कालमानञ्च कालस्य कलना तथा ॥ २१
स्य मानं न कालस्य कालस्य कलना न हि ।
हाकालः स्वयं साक्षान्महाकाली समाश्रिता ॥ २२
या च ब्रह्मणो रुद्रस्तथा काली प्रचक्षते ।
र्वस्य कारणं सो वै कार्य्यभूताच्युतादयः ॥ २३
र्वं ताभ्यां तथा व्याप्तमिच्छयोत्पत्तिलीनता ।
त्यादकश्च कश्चिद्वै न हर्त्ता कश्च नाप्रियः ॥ २४
यश्च कारणञ्चैव स्वस्य नैव कदाचन ।
तो ह्यनेकतां यातो ह्यनेकोऽप्येकतां व्रजेत् ॥ २५
वीजं बहु भूत्वा पुनर्वीजञ्च जायते ।
े च स्वयं सर्व्वं शिवरूपी महेश्वरः ॥ २६
ाति ज्ञानवानेव नान्यः कश्चिदृषीश्वराः ।
र्थ्वं वचनं श्रुत्वा पुनरूचुर्मुनीश्वराः ॥ २७

ऋषय ऊचुः ।

नस्य लक्षणं ब्रूहि यज्ज्ञात्वा शिवतां व्रजेत् ।
थं शिवश्च सर्व्वं वै सर्व्वञ्च शिव एव च ॥ २८
त् सर्व्वं त्वया सूत कथनीयं हिताय वै ॥ २९

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः ।

सूत उवाच ।

तामृषयः श्रेष्ठाः कथयामि यथाश्रुतम् ।
ह्म-नारद-कुमाराणां व्यासस्य कपिलस्य च ॥ १
षाञ्च समाजे वै निश्चित्य समुदाहृतम् ।
ता ज्ञानं तथा ज्ञेयं सर्व्वं शिवमिदं जगत् ॥ २
ह्मादितृणपर्य्यन्तं यत् किञ्चिद्दृश्यते जगत् ।
त् सर्व्वं स एवास्ति नात्र कार्य्या विचारणा ॥ ३
इच्छा तस्य जायेत तदा च क्रियते त्विदम् ।
र्वं स एव जानाति तं जानाति न कश्चन ॥ ४
चला च स्वयञ्चैव प्रविश्य दूरतः स्थितः ।
यथा च ज्योतिषश्चैव जलादौ प्रतिबिम्बता ॥ ५
वस्तुतो न प्रवेशो वै तथैव च स्वयं शिवः ।
वस्तुतस्तु स्वयं सर्व्वरूपेणैव तु भासते ॥ ६
अज्ञानञ्च मतेर्भेदो नास्त्यन्यस्य द्वयं पुनः ।
दर्शनेषु च सर्व्वेषु मतिभेदः प्रदृश्यते ॥ ७
परं वेदान्तिनो नित्यमद्वैतप्रतिपादिनः ।
स्वस्यैवांशश्च जीवो वै अविद्यामोहितो वशः ॥ ८
अहमन्यच्च जानाति तया मुक्तो भवेच्छिवः ।
सर्व्वं व्याप्य शिवः साक्षाद्व्यापकः सर्व्वजन्तुषु ॥ ९
चेतनाचेतने सो वै सर्व्वत्र शङ्करः स्वयम् ।
उपायं यः करोत्यस्य दर्शनं स लभेद्ध्रुवम् ॥ १०
यथाग्निर्व्यापकश्चैव काष्ठे काष्ठे च तिष्ठति ।
यो वै मथ्नाति तत् काष्ठं स वै पश्यत्यसंशयम् ॥ ११
भक्त्यादिसाधनानीह करोति ऋषिसत्तमाः ।
स वै पश्यत्यवश्यं वै नात्र कार्य्या विचारणा ॥ १२
शिवः शिवः शिवश्चैव नान्यदस्तीह किञ्चन ।
नाना भाति स्वरूपो हि भासते शङ्करः सदा ॥ १३
यथा समुद्रो मृच्चैव सुवर्णमथवा पुनः ।
उपाधितो हि नानात्वं लभते च तथैव च ॥ १४
कार्य्य-कारणयोर्भेदो वस्तुतो न प्रवर्त्तते ।
यथा वीजात् प्ररोहश्च नानाविधः प्रकाशते ॥ १५
अन्ते च वीजमेव स्यान्नात्र कार्य्या विचारणा ।
ज्ञाने वीजं प्रदृश्येत ह्यज्ञाने विविधं जगत् ॥ १६
सर्व्वं शिवः शिवः सर्व्वं नात्र भेदोऽस्ति कश्चन ।
कथञ्च विविधं पश्येदेकत्वं न कथं पुनः ॥ १७
यथैकं चन्द्रसूर्य्याख्यं ज्योतिर्नानाविधं पुमान् ।
जलादौ च विशेषेण दृश्यते च तथैव सः ॥ १८
सर्व्वत्र व्यापकः सो वै स्पर्शत्वेन निवध्यते ।
तथैव व्यापको देवो न वध्नाति पुनः क्वचित् ॥ १९
अहङ्कारतया जीवस्तन्मुक्तः शङ्करः स्वयम् ।
यथैकञ्च सुवर्णं हि ताम्रेण मिलितं यदा ॥ २०
अल्पमूल्यं प्रजायेत तथा जीवो ह्यहं पुनः ।
तदेव च सुवर्णं हि क्षारादिशोधितं यदा ॥ २१
पूर्व्ववन्मूल्यतां याति तथा जीवस्य सम्मतम् ।
यथा च सद्गुरुं प्राप्य भक्तिभावसमन्वितः ॥ २२
शिवबुद्ध्या करोत्युच्चैः पूजनं स्मरणं शुभम् ।

ध्यानं स्तवञ्च तद्बुद्ध्या पापादि दूरतो गतम् ॥ २३
तदाज्ञानञ्च नश्येत शरीरञ्चास्थिरं बुधः।
मत्वा च नित्यरूपं हि शिवस्यैव सनातनम् ॥ २४
अज्ञानाद्विरतो भूत्वा ज्ञानवान् जायते यदा।
तदाहङ्कारनिर्मुक्तो याति भङ्गुरतान्तु सः ॥ २५
यथादर्शे स्वरूपञ्च स्वीयञ्चैव प्रदृश्यते।
तथा सर्व्वगतं शम्भुं पश्यतीति सुनिश्चितम् ॥ २६
जीवन्मुक्तः स एवादौ देहे शीर्णे शिवे लयेत्।
शुभं लब्ध्वा न हृष्येत लब्ध्वाशुभं न कुप्यति ॥ २७
सुखदुःखे समे कृत्वा ज्ञानवान् जायते तदा।
अथवा आत्मयोगेन तत्त्वानाञ्च विवेकतः ॥ २८
यथेष्टचारी सो वै स्याच्छरीरञ्च पतेद्यदा।
तदा शिवे विलीयेत मुक्तो विरह एव च ॥ २९
ज्ञानमूलं तथाध्यात्मं तस्य भक्तिः शिवस्य च।
भक्तेश्च प्रेम सम्प्रोक्तं प्रेम्णस्तु श्रवणं मतम् ॥ ३०
श्रवणस्य सतां सङ्गः सङ्गस्य सद्गुरुः स्मृतः।
सम्पन्ने च तथा ज्ञाने मुक्तिर्भवति निश्चितम् ॥ ३१
इति विज्ञानवान् सो वै शम्भुमेव सदा भजेत्।
अनन्यया च भक्त्या वै शम्भुं प्राप्नोत्यसंशयम् ॥ ३२
भवेद्भक्त्यन्तरायश्चेत् पुनर्बीजेन संयुतः।
उत्पद्यते च भक्त्या वै युक्तः शम्भुं भजेत् पुनः ॥ ३३
अन्ते च मुक्तिमायाति नात्र कार्य्या विचारणा।
अतोऽधिको न देवोऽस्ति यं प्राप्य न निवर्त्तते ॥ ३४
सहस्रजन्मपर्य्यन्तं तपो-दान-व्रतादिकम्।
कृतं पूर्व्वं भवेच्चेद्धि शिवे भक्तिः प्रजायते ॥ ३५
जायते च तथा भक्तो जीवन्मुक्तो भवेत् तु सः।
इति मे विविधं वाक्यमृषीणाञ्च समागमे ॥ ३६
निश्चित्य च पुनश्चैव कुमारैर्नारदादिभिः।
व्यासाग्रे कथितं तैस्तन्मह्यं व्यासेन पाठितम् ॥ ३७
प्रथमं विष्णवे दत्तं शिवेन लिङ्गसम्भवे।
विष्णुना ब्रह्मणे दत्तं तेनैव सनकादिषु ॥ ३८
ततस्तैर्नारदायैव कथितं नारदेन च।
व्यासाय च ऋषिश्रेष्ठास्तेन मह्यं कृपालुना ॥ ३९
मया चैव भवद्भ्यश्च भवद्भिर्लोकहेतवे।
स्थापनीयं प्रयत्नेन शिवप्राप्तिकरं परम् ॥ ४०
इति वश्च समाख्यातं यत् पृष्टोऽहं मुनीश्वराः।

एतच्छ्रुत्वा च ते सर्व्वे आनन्दं परमं गताः।
हर्षगद्गदया वाचा प्रणेमुस्तं पुनः पुनः॥
अस्माकं चेतसो भ्रान्तिर्गता च कृपया तव।
तच्छ्रुत्वा च पुनर्वाक्यमुवाच ऋषिसत्तमान्
व्यासशिष्यस्तदुक्तं हि कथयामास तांस्तदा
नास्तिकाय न वक्तव्यं श्रद्धाहीनाय वा क्व
अभक्ताय न वाच्यं हि न चाशुश्रूषवे बुधाः
अष्टादश पुराणानि इतिहासान्यनेकशः।
वेदार्थांश्चाप्यनेकांश्च विचार्य्य च पुनः पुनः
सारमेतत् समुद्धृत्य व्यासेन परिभाषिता
अभक्तो भक्तिमायाति भक्तस्य भक्तिवर्द्धनं
एकवारं यदा श्रुत्वा पापानि भस्मतां नयेत्
पुनः श्रुते च भक्तिश्च जायते पुरुषस्य च
पुनः श्रुते विरक्तिश्च भक्तेश्चैव न संशयः।
पुनः श्रुते शिवं साक्षात् पश्यन्ति च मुनीश्वराः।
पुनः श्रुते भवन्तो वै पश्यन्तीति सुनिश्चितम्।
तस्मात् पुनः पुनः श्राव्यं भुक्ति-मुक्तिफलेप्सु
पश्चावृत्तिः प्रकर्त्तव्या व्यासस्य वचनन्त्विदं
समुद्दिश्य फलं श्रेष्ठं तत् तत् प्राप्नोत्यसंशयः
न दुर्लभन्तु तस्यैव येनेदं श्रुतमुत्तमम्।
इत्युक्तास्ते ऋषिश्रेष्ठाः शुश्रुवुः परया मुदा
पञ्चकृत्वस्तु तच्छ्रुत्वा लब्ध्वा च शिवदर्शनम्
पुरातनाश्च राजानः श्रुत्वा सिद्धिं परां गताः
इदानीं श्रोष्यते यो वै स वै सिद्धिं परां व्र
इति तस्य वचः श्रुत्वा ह्यानन्दं परमं गताः
तञ्चैव पूजयामासुर्नानावस्त्रैः सुशोभनैः।
चन्दनैश्च विचित्रैश्च नानालङ्करणैस्तथा॥
नमस्कारैः स्तवैश्चैव स्वस्तिवाचनपूर्व्वकम्।
आशीर्भिर्विविधैश्चैव वर्द्धयामासुरञ्जसा॥
सन्तुष्टाश्चैव ते सर्व्वे सन्तुष्टः सूत एव च।
परस्परञ्च संहृष्टाः शिवभक्तिपरायणाः॥
एतदेव परं मत्वा नमन्ति च भजन्ति च।
एवञ्च शृणुयादत्र सर्व्वान् कामानवाप्नुयात्
अन्ते भक्तिं परां प्राप्य मुक्तिं वै प्राप्नुयान्न
लिखित्वा यस्तु दद्याद्वै पुराणं शिवसंज्ञि
हेमवृषसमायुक्तं चतुर्व्वेदेश्च सम्मतम्।

तस्य वासो भवेन्नित्यं शिवलोके न संशयः ॥ ५९
स तु शिवसमाकारं लभते नात्र संशयः।
तस्मात् सर्व्वप्रयत्नेन दीयतां शैवकं द्विजाः ॥ ६०
तत्रापि दक्षिणा देया सुवर्णानां चतुष्टयम्।
एवं ददाति यो भक्त्या शिवलोके महीयते ॥ ६१
तत्रस्थो न च्यवेत् क्वापि शिवसायुज्यमाप्नुयात्।
वाचकं तोषयेद्दानैर्वस्त्रालङ्कारभूषणैः ॥ ६२
मिष्टान्नभोजनैर्भक्त्या सर्व्वकामार्थसिद्धये।
शिवे भक्तिः शिवे भक्तिः शिवे भक्तिर्भवे भवे ॥ ६३

इति श्रीशैवे महापुराणे ज्ञानसंहितायां
ज्ञानप्रकरणनिरूपणं नामाष्ट-
सप्ततितमोऽध्यायः ॥ ७८ ॥

समाप्तेयं ज्ञानसंहिता।

शिवपुराणम् ।

विद्येश्वरसंहिता ।

प्रथमोऽध्यायः ।

ओँ नमो भगवते वासुदेवाय ।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

आद्यन्तमङ्गलमजातसमानभाव-
माद्यन्तविश्वमजरामरमात्मदेवम् ।
पञ्चाननं प्रबलपञ्चविनोदशीलं
सम्भावये मनसि शङ्करमम्बिकेशम् ॥ १
धर्म्मक्षेत्रे महाक्षेत्रे गङ्गा-कालिन्दीसङ्गमे ।
प्रयागे परमे पुण्ये ब्रह्मलोकस्य वर्त्मनि ॥ २
मुनयः संशितात्मानः सत्यव्रतपरायणाः ।
महौजसो महाभागा महासत्रं वितेनिरे ॥ ३
तत्र सत्रं समाकर्ण्य व्यासशिष्यो महामुनिः ।
आजगाम मुनीन् द्रष्टुं सूतः पौराणिकोत्तमः ॥ ४
तं दृष्ट्वा सूतमायान्तं पूजां चक्रुर्यथाविधि ।
वेदान्तसारसर्व्वस्वं पुराणं श्रावयाशु नः ॥ ५

सूत उवाच ।

शृण्वन्तु ऋषयः सर्व्वे पुराणं वेदसारजम् ।
पुरा कालेन महता कल्पेऽतीते पुनः पुनः ॥ ६
अस्मिन्नुपस्थिते कल्पे प्रवृत्ते सृष्टिकर्म्मणि ।
मुनीनां षट्कुलीयानां ब्रुवतामितरेतरम् ॥ ७
इदं परमिदं नेति विवादः सुमहानभूत् ।
तेऽभिजग्मुर्विधातारं ब्रह्माणं प्रष्टुमव्ययम् ॥ ८
वाग्भिर्विनयगर्भाभिः सर्व्वे प्राञ्जलयोऽब्रुवन् ।

मुनय ऊचुः ।

त्वं हि सर्व्वजगद्धाता सर्व्वकारणकारणम् ॥ ९
कः पुमान् सर्व्वतत्त्वेभ्यः पुराणः परतः परः ।

ब्रह्मोवाच ।

यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह ॥ १०
यस्मात् सर्व्वमिदं ब्रह्म-विष्णु-रुद्रेन्द्रपूर्व्वकम् ।
सह भूतेन्द्रियैः सर्व्वैः प्रथमं सम्प्रसूयते ॥ ११
एष देवो महादेवः सर्व्वज्ञो जगदीश्वरः ।
अयन्तु परया भक्त्या दृश्यते नान्यथा क्वचित् ॥ १२
रुद्रो हरिर्हरश्चैव तथान्ये च सुरेश्वराः ।
भक्त्या परमया तस्य नित्यं दर्शनकाङ्क्षिणः ॥ १३
बहुनात्र किमुक्तेन शिवे भक्त्या विमुच्यते ।
प्रसादाद्देवताभक्तिः प्रसादो भक्तिसम्भवः ।
यथेहाङ्कुरतो वीजं वीजतो वा यथाङ्कुरः ॥ १४
तस्मादीशप्रसादार्थं यूयं गत्वा भुवं द्विजाः ।
दीर्घसत्रं समाकुर्ध्वं यूयं वर्षसहस्रकम् ॥ १५

असृष्येवाध्वरेशस्य शिवस्यैव प्रसादतः।
वेदोक्तविद्यासारन्तु ज्ञायते साध्यसाधनम्॥ १६

मुनय ऊचुः।

अथ किं परमं साध्यं किं वा तत्साधनं परम्।
साधकः कीदृशस्तत्र तदिदं ब्रूहि तत्त्वतः॥ १७

ब्रह्मोवाच।

साध्यं शिवपदप्राप्तिः साधनं तस्य सेवनम्।
साधकस्तत्प्रसादाद्यो नित्यादिफलनिस्पृहः॥ १८
कर्म्म कृत्वा तु वेदोक्तं तदर्पितमहाफलम्।
परमेशपदप्राप्तिः सालोक्यादि क्रमात् ततः॥ १९
तत् तद्भक्त्यनुसारेण सर्व्वेषां परमं फलम्।
तत्साधनं बहुविधं साक्षादीशेन बोधितम्॥ २०
सङ्क्षिप्य तत्र वः सारं साधनं प्रब्रवीम्यहम्।
श्रोत्रेण श्रवणं तस्य वचसा कीर्त्तनं तथा॥ २१
मनसा मननं तस्य महासाधनमुच्यते।
श्रोतव्यः कीर्त्तितव्यश्च मन्तव्यश्च महेश्वरः॥ २२
इति श्रुतिः प्रमाणं नः साधनेनामुना परम्।
साध्यं व्रजत सर्व्वार्थे-साधनैकपरायणाः॥ २३
प्रत्यक्षं चक्षुषा दृष्ट्वा तत्र लोकः प्रवर्त्तते।
अप्रत्यक्षं हि सर्व्वत्र ज्ञात्वा श्रोत्रेण चेष्टते॥ २४
तस्माच्छ्रवणमेवादौ श्रुत्वा गुरुमुखाद्बुधः।
ततः संसाधयेदन्यत् कीर्त्तनं मननं सुधीः॥ २५
क्रमान्मननपर्य्यन्ते साधनेऽस्मिन् सुसाधिते।
शिवयोगो भवेत् तेन सालोक्यादि क्रमाच्छनैः॥ २६
सर्व्वाङ्गव्याधयः पश्चात् सर्व्वानन्दश्च लीयते (क)।
अभ्यासात् क्लेशमेतद्वै पश्चादाद्यन्तमङ्गलम्॥ २७

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
साध्यसाधनखण्डे प्रथमोऽध्यायः॥ १॥

द्वितीयोऽध्यायः।

मुनय ऊचुः।

मननं कीदृशं ब्रह्मन् श्रवणञ्चापि कीदृशम्।
कीर्त्तनं वा कथं तस्य कीर्त्तयैतद्यथायथम्॥ १

ब्रह्मोवाच।

पूजाजपेशगुणरूपविलासनाम्नां
युक्तिप्रियेण मनसा परिशोधनं यत्।
तत् सन्ततं मननमीश्वरदृष्टिलभ्यं
सर्व्वेषु साधनवरेष्वपि मुख्यमुख्यम्॥ २
गीतात्मना श्रुतिपदेन च भाषया वा
शम्भुप्रताप-गुण-रूप-विलास-नाम्नाम्।
वाचा स्फुटन्तु रसवत् स्तवनं यदस्य
तत् कीर्त्तनं भवति साधनमत्र मध्यम्॥ ३
येनापि केन करणेन च शब्दपुञ्जं
यत्र क्वचिच्छिवपरं श्रवणेन्द्रियेण।
स्त्रीकेलिवद्दृढतरं प्रणिधीयते यत्
तद्वै बुधाः श्रवणमत्र जगत्प्रसिद्धम्॥ ४
सत्सङ्गमेन भवति श्रवणं पुरस्तात्
सङ्कीर्त्तनं पशुपतेरथ तद्दृढं स्यात्।
सर्व्वोत्तमं भवति तन्मननं तदन्ते
सर्व्वं हि सम्भवति शङ्करदृष्टिपाते॥ ५

सूत उवाच

अस्मिन् साधनमाहात्म्ये पुरावृत्तं मुनीश्वराः।
युष्मदर्थं प्रवक्ष्यामि शृणुध्वमवधानतः॥ ६
पुरा मम गुरुर्व्यासः पराशरमुनेः सुतः।
तपश्चचार सम्भ्रान्तः सरस्वत्यास्तटे शुभे॥ ७
गच्छन् यदृच्छया तत्र विमानेनार्करोचिषा।
सनत्कुमारो भगवान् ददर्श मम दैशिकम्॥
ध्यानारूढः प्रबुद्धोऽसौ ददर्श तमजात्मजम्।
प्रणिपत्याह सम्भ्रान्तः परं कौतूहलं मुनिः॥
दत्त्वार्घमस्मै प्रददौ देवयोग्यञ्च विष्टरम्।
प्रसन्नः प्राह तं प्रह्वं प्रभुर्गम्भीरया गिरा॥

सनत्कुमार उवाच।

सत्यं वस्तु मुने ध्येयः साक्षात्करणगोचरः।
स शिवोऽथासहायोऽत्र तपश्चरसि किङ्कृते॥
एवमुक्तः कुमारेण प्रोवाच स्वाशयं मुनिः।
धर्म्मार्थ-काम-मोक्षाश्च वेदमार्गे कृतादराः॥
बहुधा स्थापिता लोके मया त्वत्कृपया तथा।
एवम्भूतस्य मेऽप्येवं गुरुभूतस्य सर्व्वतः॥ ११
मुक्तिसाधनकं ज्ञानं नोदेति परमाद्भुतम्।

(क) सर्व्वदुःखक्षयः पश्चात् सर्व्वानन्दश्च लभ्यते इति क्वचित् पाठान्तरम्।

...पश्यामि मुक्त्यर्थं न जाने तत्र कारणम् ॥ १४
...थं कुमारो भगवान् व्यासेन मुनिनार्थितः ।
...मर्थः प्राह विप्रेन्द्रा निश्चयं मुक्तिकारणम् ॥ १५
...वणं कीर्त्तनं शम्भोर्मननञ्च महत्तरम् ।
...यं साधनमुक्तञ्च विद्यते वेदसम्मतम् ॥ १६
...हमथ सम्भ्रान्तो ह्यन्यसाधनसम्भ्रमः ।
...चले मन्दरे शैले तपश्चरणमाचरम् ॥ १७
...वाज्ञया ततः प्राप्तो भगवान् नन्दिकेश्वरः ।
...से दयालुर्भगवान् सर्व्वसाक्षी गणेश्वरः ॥ १८
...ाच मह्यं सस्नेहं मुक्तिसाधनमुत्तमम् ।
...वणं कीर्त्तनं शम्भोर्मननं वेदसम्मतम् ॥ १९
...कञ्च साधनं मुक्तौ शिवेन मम भाषितम् ।
...वणादित्रिकं ब्रह्मन् कुरुष्वेति मुहुर्मुहुः ॥ २०
...मुक्त्वा ततो व्यासं सानुगो विधिनन्दनः ।
...ाम स्वविमानेन पदं परमशोभनम् ॥ २१
...मुक्तं समासेन पूर्व्ववृत्तान्तमुत्तमम् ।

ऋषय ऊचुः ।

...वणादित्रयं सूत मुक्त्युपायस्त्वयेरितः ॥ २२
...वणादित्रिकेऽशक्तः किं कृत्वा मुच्यते जनः ।
...कर्म्मेणैव मुक्तिः स्यात् कर्म्मणा केन हेतुना ॥ २३

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
साध्यसाधनखण्डे द्वितीयोऽध्यायः ॥२॥

तृतीयोऽध्यायः ।

सूत उवाच ।

...वणादित्रिकेऽशक्तो लिङ्गं बेरञ्च शाङ्करम् ।
...स्थाप्य नित्यमभ्यर्च्य तरेत् संसारसागरम् ॥ १
...पि द्रव्यं वहेदेव यथा बलमवञ्चयन् ।
...र्पयेल्लिङ्गबेरार्थमर्च्चयेदपि सन्ततम् ॥ २
...डपं गोपुरं तीर्थं मठं क्षेत्रं तथोत्सवम् ।
...स्त्रं गन्धञ्च माल्यञ्च धूपं दीपञ्च भक्तितः ॥ ३
...विधान्नञ्च नैवेद्यमपूपव्यञ्जनैर्युतम् ।
...त्रं ध्वजञ्च व्यजनं चामरञ्चापि साङ्गकम् ॥ ४
...राजोपचारवत् सर्व्वं धारयेल्लिङ्ग-बेरयोः ।
...प्रदक्षिणं नमस्कारं यथाशक्ति जपं तथा ॥ ५
आवाहनादि-सर्गान्तं नित्यं कुर्यात् सुभक्तितः ।
इत्थमभ्यर्च्चयन् देवं लिङ्गे बेरे च शाङ्करे ॥ ६
सिद्धिमेति शिवप्रीत्या हित्वापि श्रवणादिकम् ।
लिङ्गबेरार्च्चणामात्राद्मुक्ताः पूर्व्वं महाजनाः ॥ ७

मुनय ऊचुः ।

बेरमात्रे तु सर्व्वत्र पूज्यन्ते देवतागणाः ।
लिङ्गे बेरे च सर्व्वत्र कथं सम्पूज्यते शिवः ॥ ८

सूत उवाच ।

अहो मुनीश्वराः पुण्यं प्रश्नमेतन्महाद्भुतम् ।
अत्र वक्ता महादेवो नान्योऽस्ति पुरुषः क्वचित् ॥ ९
शिवेनोक्तं प्रवक्ष्यामि क्रमाद्गुरुमुखाच्छ्रुतम् ।
शिवैको ब्रह्मरूपत्वान्निष्कलः परिकीर्त्तितः ॥ १०
रूपित्वात् सकलस्तद्वत् तस्मात् सकलनिष्कलः ।
निष्कलत्वान्निराकारं लिङ्गं तस्य समागतम् ॥ ११
सकलत्वात् तथा बेरं साकारं तस्य सङ्गतम् ।
सकलाकलरूपत्वाद्ब्रह्मशब्दाभिधः परः ॥ १२
अपि लिङ्गे च बेरे च नित्यमभ्यर्च्यते जनैः ।
अब्रह्मत्वात् तदन्येषां निष्कलत्वं न हि क्वचित् ॥१३
तस्मात् ते निष्कले लिङ्गे नाराध्यन्ते सुरेश्वराः ।
अब्रह्मत्वाच्च जीवत्वात् तथान्ये देवतागणाः ॥ १४
तूष्णीं सकलमात्रत्वादर्च्यन्ते बेरमात्रके ।
जीवत्वं शङ्करान्येषां ब्रह्मत्वं शङ्करस्य च ॥ १५
वेदान्तसारसंसिद्धं प्रणवार्थं प्रकाशनात् ।
एवमेव पुरा पृष्टो मन्दरे नन्दिकेश्वरः ॥ १६
सनत्कुमारमुनिना ब्रह्मपुत्रेण धीमता ।

सनत्कुमार उवाच ।

शिवान्यदेववश्यानां सर्व्वेषामपि सर्व्वतः ॥ १७
बेरमात्रञ्च पूजार्थं श्रुतं दृष्टञ्च भूरिशः ।
शिवमात्रस्य पूजायां लिङ्गं बेरञ्च दृश्यते ॥ १८
अतस्तद्ब्रूहि कल्याण तत्त्वं मे साधु बोधनम् ।

नन्दिकेश्वर उवाच ।

अनुत्तरमिमं प्रश्नं रहस्यं ब्रह्मलक्षणम् ॥ १९
कथयामि शिवेनोक्तं भक्तियुक्तस्य तेऽनघ ।
शिवस्य ब्रह्मरूपत्वान्निष्कलत्वाच्च निष्कलम् ॥ २०
लिङ्गं तस्यैव पूजायां सर्व्ववेदेषु सम्मतम् ।
तस्यैव सकलत्वाच्च तथा सकलनिष्कलम् ॥ २१

सकलञ्च तथा वेरं पूजायां लोकसम्मतम्।
शिवान्येषाञ्च जीवलात् सकललाच्च सर्व्वतः॥ २२
वेरमात्रञ्च पूजायां सम्मतं वेदनिर्णये।
स्वाविर्भावे च देवानां सकलं रूपमेव हि॥ २३
शिवस्य लिङ्गं वेरञ्च दर्शने दृश्यते खलु।

सनत्कुमार उवाच।

उक्तं लया महाभाग लिङ्ग-वेरप्रचारणम्॥ २४
शिवस्य च तदन्येषां विभज्य परमार्थतः।
तस्मात् तदेव परमं लिङ्ग-वेरादिसम्भवम्॥ २५
श्रोतुमिच्छामि योगीन्द्र लिङ्गाविर्भावलक्षणम्।

नन्दिकेश्वर उवाच।

शृणु वत्स भवत्प्रीत्या वक्ष्यामि परमार्थतः॥ २६
पुराकल्पे महाकाले प्रपन्ने लोकविश्रुते।
अयुध्यतां महात्मानौ ब्रह्म-विष्णू परस्परम्॥ २७
तयोर्मानं निराकर्त्तुं तन्मध्ये परमेश्वरः।
निष्कलस्तम्भरूपेण स्वरूपं समदर्शयत्॥ २८
ततः स्वलिङ्गचिह्नलात् स्तम्भतो निष्कलं शिवः।
स्वलिङ्गं दर्शयामास जगतां हितकाम्यया॥ २९
तदाप्रभृति लोकेषु निष्कलं लिङ्गमैश्वरम्।
सकलञ्च तथा वेरं शिवस्यैव प्रकल्पितम्॥ ३०
शिवान्येषान्तु देवानां वेरमात्रं प्रकल्पितम्।
तत् तद्वेरन्तु देवानां तत्तद्भोगप्रदं शुभम्॥ ३१

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
ततीयोऽध्यायः॥ ३॥

चतुर्थोऽध्यायः।

नन्दिकेश्वर उवाच।

पुरा कदाचिद्योगीन्द्र विष्णुर्विषधरायणः।
सुष्वाप परया भूत्या स्वानुगैरपि संवृतः॥ १
तदृच्छया गतस्तत्र ब्रह्मा ब्रह्मविदां वरः।
अपृच्छत् पुण्डरीकाक्षं शयानं सर्व्वसुन्दरम्॥ २
कस्त्वं पुरुषवच्छेषे दृष्ट्वा मामपि दृप्तवत्।
उत्तिष्ठ वत्स मां पश्य तव नाथमिहागतम्॥ ३
आगतं गुरुमाराध्यं दृष्ट्वा यो दृप्तवच्चरेत्।
द्रोहिणस्तस्य मूढस्य प्रायश्चित्तं विधीयते॥ ४
इति श्रुत्वा वचः क्रुद्धो वहिःशान्तवदाचरन्
स्वस्ति ते स्वागतं वत्स तिष्ठ पीठमितो वि
किमु ते व्यग्रवद्वक्त्रं विभाति विप्रेक्षणम्।

ब्रह्मोवाच।

वत्स विष्णो महामानमागतं कालवेगतः।
पितामहश्च जगतः पाता च तव वत्सक।

विष्णुरुवाच।

मत्स्थं जगदिदं वत्स मनुषे त्वं हि चोरवत्
मन्नाभिकमलाज्जातः पुत्त्रस्त्वं भाषसे वृथा।

नन्दिकेश्वर उवाच।

एवं हि वदतोस्तत्र मुग्धयोरजयोस्तदा।
अहमेव वरो न त्वमहं प्रभुरहं प्रभुः।
परस्परं हन्तुकामौ चक्रतुः समरोद्यमम्॥
युयुधातेऽमरौ वीरौ हंस-पक्षीन्द्रवाहनौ।
वैरञ्चा वैष्णवाश्चैव मिथो युयुधिरे तदा॥
तावद्विमानगतयः सर्व्वा वै देवजातयः।
दिदृक्षवः समाजग्मुः समरं तं महाद्भुतम्।
क्षिपन्तः पुष्पवर्षाणि पश्यन्तः स्वैरमम्बरे।
सुपर्णवाहनस्तत्र क्रुद्धो वै ब्रह्मवक्षसि॥
मुमोच बाणानसहानस्त्रांश्च विविधान् बहू
मुमोचाथ विधिः क्रुद्धो विष्णोरुरसि दुःस
बाणाननलसङ्काशानस्त्रांश्च बहुशस्तदा।
तदाश्चर्य्यमिति स्पष्टं तयोः समरगोचरम्।
समीक्ष्य दैवतगणाः शशंसुभृशमाकुलाः।
ततो विष्णुः सुसंक्रुद्धः श्वसन् व्यसनकर्शित
माहेश्वरास्त्रं मतिमान् सन्दधे ब्रह्मणोपरि
ततो ब्रह्मा भृशं क्रुद्धः कम्पयन् विश्वमेव
अस्त्रं पाशुपतं घोरं सन्दधे विष्णुवक्षसि।
ततस्तदुत्थितं व्योम्नि तपनायुतसन्निभम्।
सहस्रमुखमत्युग्रं चण्डवातभयङ्करम्।
अस्त्रद्वयमिदं तत्र ब्रह्मविष्ण्वोर्भयङ्करम्॥
इत्थं बभूव समरं ब्रह्मविष्ण्वोः परस्परम्।
ततो देवगणाः सर्व्वे विषण्णा भृशमाकुला
ऊचुः परस्परं तात राजक्षोभे यथा द्विज
सृष्टिः स्थितिश्च संहारस्तिरोभावोऽप्यनुग्र
यस्मात् प्रवर्त्तते तस्मै ब्रह्मणे च त्रिशूलिने

अशक्यमन्यैर्मदनुग्रहं विना
त्वणाहयोऽप्यत्र यदृच्छया क्वचित् ॥ २१
ति देवा भयं कृत्वा विचिन्वन्तः शिवहयम्।
स्मुः कैलासशिखरं यत्रास्ते चन्द्रशेखरः ॥ २२
ष्ट्वैवममरा हृष्टाः पदं तत् पारमेश्वरम्।
ग्मुः प्रणवाकारं प्रविष्टास्तत्र सद्मनि ॥ २३
पि तत्र सभामध्ये मण्डपे मणिविष्टरे।
राजमानसुमया ददृशुर्देवपुङ्गवम् ॥ २४
योत्तरेतरपदं तदर्पितकराम्बुजम्।
गणैः सर्व्वतो जुष्टं सर्व्वलक्षणलक्षितम् ॥ २५
ज्यमानं विशेषज्ञैः स्त्रीजनैस्तीव्रभावनैः।
श्यमानं सदा वेदैरनुगृह्णन्तमीश्वरम् ॥ २६
वमीशममराः सन्तोषसलिलेक्षणाः।
डवद्दूरतो वत्स नमश्चक्रुर्महागणाः ॥ २७
वेक्ष्य पतिर्देवान् समीपे चाह्वयद्गणैः।
थ संह्लादयन् देवान् देवो देवशिखामणिः।
गोचदर्थगम्भीरं वचनं मधुमङ्गलम् ॥ २८
इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः।

ईश्वर उवाच।

रकाः स्वस्ति वः कच्चिद्वर्त्तते मम शासनात्।
च्च देवतावंशः स्वस्वकर्मणि किं न वा ॥ १
णैव विदितं युद्धं ब्रह्मविष्ण्वोर्मया सुराः।
तामभितापेन पौनरुक्तेन भाषितम् ॥ २
सस्मितया माध्व्या कुमार परिभाषया।
तोषयदम्बायाः स पतिस्तत्सुरव्रजम् ॥ ३
युद्धाङ्गणं गन्तुं हरिधात्रोरधीश्वरः।
ज्ञापयद्गणेशानां शतं तत्रैव संसदि ॥ ४
वाद्यं बहुविधं प्रयाणाय परेशितुः।
श्वराश्च सन्नद्धा नानावाहनभूषणाः ॥ ५
वाकारमाद्यन्तं पञ्चमण्डलमण्डितम्।
हरोह रथं भद्रमम्बिकापतिरीश्वरः।
तुगणमिन्द्राद्याः सर्व्वेऽप्यनुययुः सुराः ॥ ६

चित्रध्वज-व्यजन-चामर-पुष्पवर्ष-
सङ्गीत-नृत्यनिवहैरपि वाद्यवर्गैः।
सम्मानितः पशुपतिः परया च देव्या
साकं तयोः समरभूमिमगात् ससैन्यः ॥ ७
समीक्ष्य तु तयोर्युद्धं निगूढोऽभ्रंशमास्थितः।
समाप्तवाद्यनिर्घोषः शान्तोरुगणनिःस्वनः ॥ ८
अथ ब्रह्माच्युतौ वीरौ हन्तुकामौ परस्परम्।
माहेश्वरेण चास्त्रेण तथा पाशुपतेन च ॥ ९
अस्त्रज्वालैरथो दग्धं ब्रह्मविष्ण्वोर्जगत्त्रयम्।
ईशोऽपि तं निरीक्ष्याथ ह्यकालप्रलयं भृशम् ॥ १०
महानलस्तम्भविभीषणाकृति-
र्बभूव तन्मध्यतले स निष्कलः ॥ ११
ते अस्त्रे चापि सज्वाले लोकसंहरणक्षमे।
निपेततुः क्षणेनैव ह्याविर्भूते महानले ॥ १२
दृष्ट्वा तदद्भुतं चित्रमस्त्रशान्तिकरं शुभम्।
किमेतदद्भुताकारमित्यूचुश्च परस्परम् ॥ १३
अतीन्द्रियमिदं स्तम्भमग्निरूपं किमुत्थितम्।
अस्योर्द्ध्वमपि चाधश्च आवयोर्लक्ष्यमेव हि ॥ १४
इति व्यवस्थितौ वीरौ मिलितौ वीरमानिनौ।
तत्परौ तत्परीक्षार्थं प्रतस्थातेऽथ सत्वरम् ॥ १५
आवयोर्मिश्रयोस्तत्र कार्य्यमेकं न सम्भवेत्।
इत्युक्त्वा शूकरतनुर्विष्णुस्तस्यादिमीयिवान् ॥ १६
तथा ब्रह्मा हंसतनुस्तदन्तं वीक्षितुं ययौ।
भित्त्वा पातालनिलयं गत्वा दूरतरं हरिः ॥ १७
नापश्यत् तस्य संस्थानं स्तम्भस्यानलवर्च्चसः।
श्रान्तः स शूकरहरिः प्राप पूर्व्वं रणाङ्गणम् ॥ १८
अथ गच्छंस्तु व्योम्ना च विधिस्तात पिता तव।
ददर्श केतकीपुष्पं किञ्चिद्विच्युतमद्भुतम् ॥ १९
अतिसौरभ्यसम्मानं बहुवर्षच्युतं तथा।
अन्वीक्ष्य च तयोः कृत्यं भगवान् परमेश्वरः ॥ २०
परिहासन्तु कृतवान् कम्पनाच्चलितं शिरः।
तस्मात् तावनुगृह्णातु च्युतं केतकमुत्तमम् ॥ २१
किं त्वं पतसि पुष्पेश पुष्पराट् केन वा धृतम्।
आदिमस्याप्रमेयस्य स्तम्भमध्याच्च्युतश्चिरम् ॥ २२
न संपश्यामि तस्मात् त्वं जह्याशामन्तदर्शने।
अस्यान्तस्य च सेवार्थं हंसमूर्त्तिरिहागतः ॥ २३

इतः परं सखि सेऽद्य त्वया कर्त्तव्यमीप्सितम्।
मया सह त्वया वाच्यमेतद्विष्णोश्च सन्निधौ ॥ २४
स्तम्भान्तो वीक्षितो धात्रा तत्र साक्ष्यहमच्युत।
इत्युक्त्वा केतकं तत्र प्रणनाम पुनः पुनः।
असत्यमपि शस्तं स्यादापदीत्यनुशासनम् ॥ २५

समीक्ष्य तत्राच्युतमायतश्रमं
प्रनष्टहर्षन्तु ननर्त्त हर्षात्।
उवाच चैनं परमार्थमच्युतं
षण्ढात्तवादः स त्रिधिस्ततोऽच्युतम् ॥ २६
स्तम्भाग्रमेतत् समुदीक्षितं हरे
तत्रैव साक्षी ननु केतकन्त्विदम्।
ततोऽवदत् तत्र हि केतकं मृषा
तथेति तद्धात्रवचस्तदन्तिके ॥ २७
हरिश्च तत् सत्यमितीव चिन्तयं-
श्चकार तस्मै विधये नमः स्वयम्।

षोड़शरुपचारैश्च पूजयामास तं विधिम् ॥ २८

विधिं प्रहर्त्तुं शठमग्निलिङ्गतः
स ईश्वरस्तत्र बभूव साकृतिः।
समुत्थितः स्वामिविलोकनात् पुनः
प्रकम्पपाणिः परिगृह्य तत्पदम् ॥ २९
आद्यन्तहीनवपुषि त्वयि मोहबुद्धा
भूयान् विमर्श इह नावतिकामनोत्थः।
स त्वं प्रसीद करुणाकर कश्मलं नौ
मृष्टं क्षमस्व विहितं भवतैव केल्या ॥ ३०

ईश्वर उवाच।

वत्स प्रसन्नोऽस्मि हरे यतस्त्व-
मीशत्वमिच्छन्नपि सत्यवाक्यम्।
ब्रूयास्ततस्ते भविता जनेषु
साम्यं मया सत्कृतिरप्यलप्सि ॥ ३१
इतः परं ते पृथगात्मनश्च
क्षेत्रप्रतिष्ठोत्सवपूजनञ्च।

इति देवः पुरा प्रीतः सत्येन हरये परम्।
ददौ स्वसाम्यमत्यर्थं देवसङ्घे च पश्यति ॥ ३२

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः।

नन्दिकेश्वर उवाच।

ससर्ज्जाथ महादेवः पुरुषं कञ्चिदद्भुतम्।
भैरवाख्यं भ्रुवोर्मध्याद्ब्रह्मदर्पजिघांसया ॥ १
स वै तदा तत्र पतिं प्रणम्य शिवमङ्गणे।
किं कार्य्यं करवाण्यत्र शीघ्रमाज्ञापय प्रभो ॥ २
वत्स योऽयं विधिः साक्षाज्जगतामाद्यदैवतम्।
नूनमर्च्चय खड्गेन तिग्मेन जवसा परम् ॥ ३

स वै गृहीत्वैककरेण केशं
तत् पञ्चमं दृप्तमसत्यभाषणम्।
छित्त्वा शिरांस्यस्य निहन्तुमुद्यतः
प्रकम्पयन् खड्गमतिस्फुटं करैः ॥ ४
पिता तवोत्सृष्टविभूषणाम्बर-
स्रगुत्तरीयामलकेशसंहतिः।
प्रवातरम्भेव लतेव चञ्चलः
पपात वै भैरवपादपङ्कजे ॥ ५
तावद्विधिं तात दिदृक्षुरच्युतः
कृपालुरस्मत्पतिपादपल्लवम्।
निषिच्य वाष्पैरवदत् कृताञ्जलि-
र्यथा शिशुः स्वं पितरं कलाहरम् ॥ ६

अच्युत उवाच।

त्वया प्रयत्नेन पुरा हि दत्तं
यदस्य पञ्चाननमीश चिह्नम्।
तस्मात् क्षमस्वाद्यमनुग्रहार्हं
कुरु प्रसादं विधये ह्यमुष्मै ॥ ७

इत्यर्थितोऽच्युतेनेशस्तुष्टः सुरगणाङ्गणे।
निवर्त्तयामास तदा भैरवं ब्रह्मदण्डतः ॥ ८
अथाह देवः कितवं विधिं विगतकन्धरम्।
ब्रह्मंस्त्वमर्हणाकाङ्क्षी शठमीशत्वमास्थितः।
नातस्ते सत्कृतिर्लोके भूयात् स्थानोत्सवादिकम् ॥

ब्रह्मोवाच।

स्वामिन् प्रसीदाद्य महाविभूते
मन्ये वरं वरद मे शिरसः प्रमोक्षम्।
नमस्तुभ्य भगवते बन्धवे विश्वयोनये।
सहिष्णवे सर्व्वदोषाणां शम्भवे शैलधन्वने ॥

ईश्वर उवाच ।

प्रराजभयमेतद्धि जगत् सर्व्वं न शिष्यति ।
तस्त्वं जहि दण्डार्हं वह लोकधुरं शिशो ॥ १२
रं ददामि ते तत्र गृहाण दुर्लभं परम् ।
तानिकेषु गृह्येषु यज्ञेषु च भवान् गुरुः ॥ १३
निष्फलस्त्वदृते यज्ञः साङ्गश्च सदक्षिणः ।
थाह देवः कितवं केतकं कूटसाक्षिणम् ॥ १४
रे केतक दुष्टस्त्वं शठ दूरमितो व्रज ।
मापि प्रेम ते पुष्पे मा भूत् पूजास्वितः परम् ॥ १५
युक्ते तत्र देवेन केतकं देवजातयः ।
र्व्वां निवारयामासुस्तत्पार्श्वादन्यतस्तदा ॥ १६

केतक उवाच ।

मस्ते नाथ मे जन्म निष्फलं भवदाज्ञया ।
फलं क्रियतां तात क्षम्यतां मम किल्बिषम् ॥ १७
ज्ञानकृतं पापं नाशयत्येव ते स्मृतिः ।
दृशे त्वयि दृष्टे मे मिथ्यादोषः कुतो भवेत् ॥ १८
था स्तुतस्तु भगवान् केतकेन सभातले ।
मे त्वद्धारणं योग्यं सत्यवागहमीश्वरः ॥ १९
दीयास्त्वां धरिष्यन्ति जन्म ते सफलं ततः ।
वै वितानव्याजेन ममोपरि भविष्यसि ॥ २०
ह्यनुगृह्य भगवान् केतकं विधिमाधवौ ।
रराज सभामध्ये सर्व्वदेवैरभिष्टुतः ॥ २१

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ।

नन्दिकेश्वर उवाच ।

न्तरे तौ च नाथं प्रणम्य विधि-माधवौ ।
ञ्जलिपुटौ तूष्णीं तस्थतुर्दक्षवामगौ ॥ १
संस्थाप्य तौ देवं सकुटुम्बं वरासने ।
यामासतुः पूज्यं पुण्यैः पुरुषवस्तुभिः ॥ २
षं प्राकृतं वस्तु ज्ञेयं दीर्घाल्पकालिकम् ।
-नूपुर-केयूर-किरीट-मणिकुण्डलैः ॥ ३
सूत्रोत्तरीय-स्रक्-क्षौम-माल्याङ्गुलीयकैः ।
-ताम्बूल-कर्पूर-चन्दनागुरुलेपनैः ॥ ४
धूप-दीप-सितच्छत्र-व्यजन-ध्वज-चामरैः ।
अन्यैर्दिव्योपहारैश्च वाङ्मनोऽतीतवैभवैः ॥ ५
पतियोग्यैः पशुलभ्यैस्तौ समार्चयतां पतिम् ।
यद्यच्छ्रेष्ठतमं वस्तु पतियोग्यं हितध्वज ॥ ६
तद्दत्खिलमीशोऽपि पारम्पर्यचिकीर्षया ।
सभ्यानां प्रददौ हृष्टः पृथक् तत्र यथाक्रमम् ॥ ७
कोलाहलो महानासीत् तत्र तद्वस्तु गृह्णताम् ।
तत्रैव ब्रह्मविष्णुभ्यामर्च्चितः शङ्करः पुरा ॥ ८
प्रसन्नः प्राह तौ नम्रौ सस्मितं भक्तिवर्द्धनः ।

ईश्वर उवाच ।

तुष्टोऽहमद्य वां वत्सौ पूजयास्मिन् महादिने ॥ ९
दिनमेतत् ततः पुण्यं भविष्यति महत्तरम् ।
शिवरात्रिरिति ख्याता तिथिरेषा मम प्रिया ॥ १०
एतत् काले तु यः कुर्य्यात् पूजां मल्लिङ्ग-वेरयोः ।
कुर्य्यात् तु जगतः कृत्यं स्थितिसर्गादिकं पुमान् ॥ ११
शिवरात्रावहोरात्रं निराहारो जितेन्द्रियः ।
अर्च्चयेद्वा यथान्यायं यथाबलमवञ्चकः ॥ १२
यत् फलं मम पूजायां वर्षमेकं निरन्तरम् ।
तत् फलं लभते सद्यः शिवरात्रौ मदर्च्चनात् ॥ १३
मद्धर्मवृद्धिकालोऽयं चन्द्रकाल इवाम्बुधेः ।
प्रतिष्ठाद्युत्सवो यत्र मामको मङ्गलायनः ॥ १४
यत् पुनः स्तम्भरूपेण स्वाविरासमहं पुरा ।
स कालो मार्गशीर्षे तु स्यादार्द्रा ऋक्षमर्भकौ ॥ १५
आर्द्रायां मार्गशीर्षे तु यः पश्येन्मामुमासखम् ।
मद्वेरमपि वा लिङ्गं स गुहादपि मे प्रियः ॥ १६
अलं दर्शनमात्रेण फलं तस्मिन् दिने शुभे ।
अभ्यर्च्चनञ्चेदधिकं फलं वाचामगोचरम् ॥ १७
रणरङ्गतलेऽमुष्मिन् यदहं लिङ्गवर्ष्मणा ।
जृम्भितो लिङ्गवत् तस्माल्लिङ्गस्थानमिदं भवेत् ॥ १८
अनाद्यन्तमिदं स्तम्भमणुमात्रं भविष्यति ।
दर्शनार्थं हि जगतां पूजनार्थं हि पुत्रकौ ॥ १९
भोगावहमिदं लिङ्गं भुक्ति-मुक्त्येकसाधनम् ।
दर्शन-स्पर्शन-ध्यानाज्जन्तूनां जन्ममोचनम् ॥ २०
अनलाचलसङ्काशं यदिदं लिङ्गमुत्थितम् ।
अरुणाचलमित्येव तदिदं ख्यातिमेष्यति ॥ २१
अत्र तीर्थञ्च बहुधा भविष्यति महत्तरम् ।

मुक्तिरप्यत्र जन्तूनां वासेन मरणेन च ॥ २२
रथोत्सवादिकल्याणं जनावासन्तु सर्व्वतः ।
अत्र दत्तं हुतं जप्तं सर्व्वं कोटिगुणं भवेत् ॥ २३
मत्क्षेत्रादपि सर्व्वस्मात् क्षेत्रमेतन्महत्तरम् ।
अत्र संस्मृतिमात्रेण मुक्तिर्भवति देहिनाम् ॥ २४
तस्मान्महत्तरमिदं क्षेत्रमत्यन्तशोभनम् ।
सर्व्वकल्याणसम्पूर्णं सर्व्वमुक्तिकरं शुभम् ॥ २५
अर्च्चयित्वात्र मामेव लिङ्गे लिङ्गिनमीश्वरम् ।
सालोक्यञ्चैव सामीप्यं सारूप्यं सार्ष्टिरेव च ॥ २६
सायुज्यमिति पञ्चैते क्रियादीनां फलं मतम् ।
सर्व्वेऽपि यूयं सकलं प्राप्स्यथाशु मनोरथम् ॥ २७

नन्दिकेश्वर उवाच ।

इत्यनुगृह्य भगवान् विनतौ विधि-माधवौ ।
यत् पूर्व्वं प्रहृतं युद्धे तयोः सैन्यं परस्परम् ॥ २८
तदुत्थापयदत्यर्थं स्वशक्त्यामृतधारया ।
तयोर्मौढ्यञ्च वैरञ्च व्यपनेतुमुवाच तौ ॥ २९
सकलं निष्कलञ्चेति स्वरूपद्वयमस्ति मे ।
नान्यस्य कस्यचित् तस्मादन्यः सर्व्वोऽप्यनीश्वरः ॥ ३०
पुरस्तात् स्तम्भरूपेण पश्चाद्रूपेण चार्भकौ ।
ब्रह्मत्वं निष्कलं प्रोक्तमीशत्वं सकलं तथा ॥ ३१
द्वयं ममैव संसिद्धं न मदन्यस्य कस्यचित् ।
तस्मादीशत्वमन्येषां युवयोरपि न क्वचित् ॥ ३२
तदज्ञानेन वां वृत्तमीशमानं महाद्भुतम् ।
तन्निराकर्त्तुमत्रैवमुत्थितोऽहं रणक्षितौ ॥ ३३
त्यजतं मानमात्मीयं मयीशे कुरुतं मतिम् ।
मत्प्रसादेन लोकेषु सर्व्वोऽप्यर्थः प्रकाशते ॥ ३४
गुरूक्तिर्व्यञ्जकं तत्र प्रमाणं वा पुनः पुनः ।
ब्रह्मतत्त्वमिदं गूढं भवत्प्रीत्या भणाम्यहम् ॥ ३५
अहमेव परंब्रह्म मत्स्वरूपं कलाकलम् ।
ब्रह्मत्वादीश्वरश्चाहं कृत्यं मेऽनुग्रहादिकम् ॥ ३६
बृहत्त्वाद्बृंहणत्वाच्च ब्रह्माहं ब्रह्म-केशवौ ।
समत्वाद्व्यापकत्वाच्च तथैवात्माहमर्भकौ ॥ ३७
अनात्मानः परे सर्व्वे जीवा एव न संशयः ।
अनुग्रहाद्यं सर्गान्तं जगत् कृत्यञ्च पञ्चकम् ॥ ३८
ईशत्वादेव मे नित्यं न मदन्यस्य कस्यचित् ।
आदौ ब्रह्मत्वबुद्ध्यर्थं निष्कलं लिङ्गमुत्थितम् ॥ ३९
तस्मादज्ञातमीशत्वं व्यक्तं द्योतयितुं हि वाम् ।
सकलोऽहमतो जातः साक्षादीशस्तु तत्क्ष
सकलत्वमतो ज्ञेयमीशत्वं मयि सत्वरम् ।
यदिदं निष्कलं स्तम्भं मम ब्रह्मत्वबोधकम् ।
लिङ्गलक्षणयुक्तत्वान्मम लिङ्गं भवेदिदम् ।
तदिदं नित्यमभ्यर्च्यं युवाभ्यामत्र पुत्रकौ ॥
मदात्मकमिदं नित्यं मम सान्निध्यकारणम् ।
महत् पूज्यमिदं नित्यमभेदाल्लिङ्ग-लिङ्गिनोः ।
यत्र प्रतिष्ठितं येन मदीयं लिङ्गमीदृशम् ।
तत्र प्रतिष्ठितः सोऽहमप्रतिष्ठोऽपि वत्सकौ ।
मत्साम्यमेकलिङ्गस्य स्थापने फलमीरितम् ।
द्वितीये स्थापिते लिङ्गे मदैक्यं फलमेव हि
लिङ्गं प्राधान्यतः स्थाप्यं तथा बेरन्तु गौण
लिङ्गाभावे न तत् क्षेत्रं सबेरमपि सर्व्वतः ।

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

ब्रह्मविष्णू ऊचतुः ।

सर्गादिपञ्चकृत्यस्य लक्षणं ब्रूहि नौ प्रभो ।

शिव उवाच ।

मत्कृत्यबोधनं गुह्यं कृपया प्रब्रवीमि वाम् ।
सृष्टिः स्थितिश्च संहारस्तिरोभावोऽप्यनुग्रहः ।
पञ्चैव मे जगत्कृत्यं नित्यसिद्धमजाच्युतौ ।
सर्गः संसारसंरम्भस्तत्प्रतिष्ठा स्थितिर्मता ।
संहारो मर्द्दनं तस्य तिरोभावस्तदुत्क्रमः ।
तन्मोक्षोऽनुग्रहस्तन्मे कृत्यमेवं हि पञ्चकम् ।
कृत्यमेतद्वहत्यन्यस्तूष्णीं गोपुरबिम्बवत् ।
सर्गादि यच्चतुःकृत्यं संसारपरिजृम्भणम् ।
पञ्चमं मुक्तिहेतुर्वै नित्यं मयि च सुस्थिरम् ।
तदिदं पञ्चभूतेषु दृश्यते मामकैर्जनैः ।
सृष्टिर्भूमौ स्थितिस्तोये संहारः पावके त
तिरोभावोऽनिले तद्वदनुग्रह इहाम्बरे ।
सृज्यते धरया सर्व्वमद्भिः सर्व्वं प्रवर्द्धते ।
अर्द्यते तेजसा सर्व्वं वायुना चापनीयते ।

व्योम्नानुग्रहश्चेति सर्व्वं ज्ञेयमेवं हि सूरिभिः ॥ ८
पञ्चकृत्यमिदं वोढुं ममास्ति मुखपञ्चकम् ।
चतुर्दिक्षु चतुर्वक्त्रं तन्मध्ये पञ्चमं मुखम् ॥ ९
युवाभ्यां तपसा लब्धमेतत् कृत्यद्वयं सुतौ ।
सृष्टिस्थित्यभिधं भाग्यं मत्तः प्रीतादतिप्रियम् ॥ १०
तथा रुद्रमहेशाभ्यामन्यत् कृत्यद्वयं परम् ।
अनुग्रहाख्यं केनापि लब्धुं नैव हि शक्यते ॥ ११
तत् सर्व्वं पौर्व्विकं कर्म्म युवाभ्यां कालविस्मृतम् ।
न तद्रुद्र-महेशाभ्यां विस्मृतं कर्म्म तादृशम् ॥ १२
रूपे वेशे च कृत्ये च वाहने चासने तथा ।
आयुधादौ च मत्साम्यमस्माभिस्तत्कृते कृतम् ॥ १३
मद्ध्यानविरहाद्वत्सौ मौढ्यं वामेवमागतम् ।
मज्ज्ञाने सति नैवं स्यान्मानं रूपं महेशवत् ॥ १४
तस्मान्मज्ज्ञानसिद्ध्यर्थं मन्त्रमोङ्कारनामकम् ।
इतः परं प्रजपतं मामकं मानभञ्जनम् ॥ १५
उपादिशं निजं मन्त्रमोङ्कारमुरुमङ्गलम् ।
ओङ्कारो मन्मुखाज्जज्ञे प्रथमं मत्प्रबोधकः ॥ १६
वाचकोऽयमहं वाच्यो मन्त्रोऽयं हि मदात्मकः ।
तदनुस्मरणं नित्यं ममानुस्मरणं भवेत् ॥ १७
अकार उत्तरात् पूर्व्वमुकारः पश्चिमाननात् ।
मकारो दक्षिणमुखाद्विन्दुः प्राङ्मुखतस्तथा ॥ १८
नादो मध्यमुखादेवं पञ्चधासौ विजृम्भितः ।
एकीभूतः पुनस्तद्वदोमित्येकाक्षरोऽभवत् ॥ १९
नामरूपात्मकं सर्व्वं वेदभूतकुलद्वयम् ।
व्याप्तमेतेन मन्त्रेण शिव-शक्त्योश्च बोधकः ॥ २०
अस्मात् पञ्चाक्षरं जज्ञे बोधकं सकलस्य तत् ।
अकारादिक्रमेणैव नकारादि यथाक्रमम् ॥ २१
अस्मात् पञ्चाक्षराज्जाता मातृकाः पञ्च भेदतः ।
तस्माच्छिरश्चतुर्वक्त्रात् त्रिपाद्गायत्रिरेव हि ॥ २२
वेदः सर्व्वस्ततो जज्ञे ततो वै मन्त्रकोटयः ।
तत्तन्मन्त्रेण तत्सिद्धिः सर्व्वसिद्धिरितो भवेत् ॥ २३
अनेन मन्त्रकन्देन भोगो मोक्षश्च सिध्यति ।
सकला मन्त्रराजानः साक्षाद्भोगप्रदाः शुभाः ॥ २४

नन्दिकेश्वर उवाच ।

पुनस्तयोस्तत्र तिरः पटं गुरुः
प्रकल्प्य मन्त्रञ्च समादिशत् परम् ।
निधाय तच्छीर्ष्णि कराम्बुजं शन-
रुदङ्मुखं संस्थितयोः सहाम्बिकः ॥ २५
त्रिरुच्चार्य्याग्रहीन्मन्त्रं यन्त्रतन्त्रोक्तिपूर्व्वकम् ।
शिष्यौ च तौ दक्षिणायामात्मानञ्च समर्पयत् ॥ २६
प्रबद्धहस्तौ किल तौ तदन्तिके
तमेव देवं जगदतुर्जगद्गुरुम् ॥ २७

ब्रह्माच्युतावूचतुः ।

नमो निष्कलरूपाय नमो निष्कलतेजसे ।
नमः सकलनाथाय नमस्ते सकलात्मने ॥ २८
नमः प्रणववाच्याय नमः प्रणवलिङ्गिने ।
नमः सृष्ट्यादिकर्त्रे च नमः पञ्चमुखाय ते ॥ २९
पञ्चब्रह्मस्वरूपाय पञ्चकृत्याय ते नमः ।
आत्मने ब्रह्मणे तुभ्यमनन्तगुणशक्तये ॥ ३०
सकलाकलरूपाय शम्भवे गुरवे नमः ।
इति स्तुत्वा गुरुं पद्यैर्ब्रह्मा विष्णुश्च नेमतुः ॥ ३१

ईश्वर उवाच ।

वत्सकौ सर्व्वं तत्त्वञ्च कथितं दर्शितञ्च वाम् ।
जपतं प्रणवं मन्त्रं देवीदिष्टं मदात्मकम् ॥ ३२
ज्ञानञ्च सुस्थिरं भाग्यं सर्व्वं भवति शाश्वतम् ।
आर्द्रायाञ्च चतुर्द्दश्यां तज्जाप्यन्त्वक्षयं भवेत् ॥ ३३
सूर्य्यगत्यामहार्द्रायामेकं कोटिगुणं भवेत् ।
मृगशीर्षान्तिमो भागः पुनर्वस्वादिमस्तथा ॥ ३४
आर्द्रासमं सदा ज्ञेयं पूजा-होमादि-तर्पणे ।
दर्शनन्तु प्रभाते च प्रातःसङ्गवकालयोः ॥ ३५
चतुर्द्दशी तथा ग्राह्या निशीथव्यापिनी भवेत् ।
प्रदोषव्यापिनी चैव परयुक्ता प्रशस्यते ॥ ३६
लिङ्गं वेरञ्च मे तुल्यं यजतां लिङ्गमुत्तमम् ।
तस्माल्लिङ्गं परं पूज्यं वेरादपि मुमुक्षुभिः ॥ ३७
लिङ्गमोङ्कारमन्त्रेण वेरं पञ्चाक्षरेण तु ।
स्वयमेव हि सद्द्रव्यैः प्रतिष्ठाप्यं परैरपि ॥ ३८
पूजयेदुपचारैश्च मत्पदं सुलभं भवेत् ।
इति शास्य तथा शिष्यौ तत्रैवान्तर्हितः शिवः ॥ ३९

इति श्रीशैवे महापुराणे विद्येश्वरसंहिताया-
मष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः।

ऋषय ऊचुः।

कथं लिङ्गं प्रतिष्ठाप्यं कथं वा तस्य लक्षणम्।
कथं वा तत् समभ्यर्च्यं देशे काले च केन हि ॥ १

सूत उवाच।

शुभदर्थं प्रवक्ष्यामि बुध्यतामवधानतः।
अनुकूले शुभे काले पुण्ये तीर्थे तटे तथा ॥ २
यथेष्टं लिङ्गमारोप्य यत्र स्यान्नित्यमर्चनम्।
पार्थिवेन तथाप्येन तैजसेन यथारुचि ॥ ३
कल्पलक्षणसंयुक्तं लिङ्गं पूजाफलं लभेत्।
सर्व्वलक्षणसंयुक्तं सद्यः पूजाफलप्रदम् ॥ ४
चरे विशिष्यते सूक्ष्मं स्थावरे स्थूलमेव हि।
सलक्षणं सपीठञ्च स्थापयेच्छिवनिर्म्मितम् ॥ ५
मण्डलं चतुरस्रं वा त्रिकोणमथवा तथा।
खट्वाङ्गवन्मध्यसूक्ष्मं लिङ्गपीठं महाफलम् ॥ ६
प्रथमं मृच्छिलादिभ्यो लिङ्गं लोहादिभिः कृतम्।
येन लिङ्गं तेन पीठं स्थावरे हि विशिष्यते ॥ ७
लिङ्गं पीठं चरे त्वेकं लिङ्गं बाणकृतं विना।
लिङ्गप्रमाणं कर्त्तॄणां द्वादशाङ्गुलमुत्तमम् ॥ ८
न्यूनञ्चेत् फलमल्पं स्यादधिकं नैव दुष्यति
कर्त्तुरेकाङ्गुलन्यूनं चरेऽपि च तथैव हि ॥ ९
आदौ विमानं शिल्पेन कार्य्यं देवगणैर्युतम्।
तत्र गर्भगृहे रम्ये दृढे दर्पणसन्निभे ॥ १०
भूषिते नवरत्नैश्च दिग्द्वारे च प्रधानके।
नीलं रक्तञ्च वैदूर्य्यं श्याम मरकतं तथा ॥ ११
मुक्ता-प्रवाल-गोमेद-वज्राणि नवरत्नकम्।
मध्ये लिङ्गं महद्द्रव्यं निक्षिपेत् सहवेदिके ॥ १२
सम्पूज्य लिङ्गं सद्याद्यैः पञ्चस्थाने यथाक्रमम्।
अग्नौ च हुत्वा बहुधा हविषा सकुलञ्च माम् ॥ १३
अभ्यर्च्य गुरुमाचार्य्यमर्थैः कामैश्च बान्धवम्।
दद्यादैश्वर्य्यमर्थिभ्यो जड़मप्यजड़ं तथा ॥ १४
स्थावरं जङ्गमं जीवं सर्व्वं सन्तोष्य यत्नतः।
सुवर्णपूरिते श्वभ्रे नवरत्नैश्च पूरिते ॥ १५
सद्यादि ब्रह्म चोच्चार्य्य ध्यात्वा देवं परं शुभम्।
उदीर्य्य च महामन्त्रमोङ्कारं नादघोषितम् ॥ १६

लिङ्गं तत्र प्रतिष्ठाप्य लिङ्गं पीठेन योजयेत्।
लिङ्गं सपीठं निक्षिप्य नित्यलेपेन बन्धयेत्।
एवं बेरञ्च संस्थाप्यं तत्रैव परमं शुभम्।
पश्चाच्चरेण बेरन्तु उत्सवार्थं बहिस्तथा ॥
बेरं गुरुभ्यो गृह्णीयात् साधुभिः पूजितन्तु वै।
एवं लिङ्गे च बेरे च पूजा शिवपदप्रदा ॥
पुनश्च द्विविधं प्रोक्तं स्थावरं जङ्गमं तथा।
स्थावरं लिङ्गमित्याहुस्तरुगुल्मादिकं तथा।
जङ्गमं लिङ्गमित्याहुः कृमिकीटादिकं तथा।
स्थावरस्य च शुश्रूषा जङ्गमस्य च तर्पणम् ॥
तत्तत्सुखानुरागेण शिवपूजां विदुर्बुधाः।
पीठमम्बामयं सर्व्वं शिवलिङ्गञ्च चिन्मयम् ॥
यथा देवीमुमामङ्के धृत्वा तिष्ठति शङ्करः।
तथा लिङ्गमिदं पीठं धृत्वा तिष्ठति सन्ततम्।
एवं स्थाप्य महालिङ्गं पूजयेदुपचारकैः।
नित्यपूजा यथाशक्ति ध्वजादिकरणं तथा ॥
इति संस्थापयेल्लिङ्गं साक्षाच्छिवपदप्रदम्।
अथवा चरलिङ्गे तु षोड़शैरुपचारकैः ॥
पूजयेच्च यथान्यायं क्रमाच्छिवपदप्रदम्।
आवाहनञ्चासनञ्च अर्घ्यं पाद्यं तथैव च ॥
तदङ्गाचमनञ्चैव स्नानमभ्यङ्गपूर्व्वकम्।
वस्त्रं गन्धं तथा पुष्पं धूपं दीपं निवेदनम् ॥
नीराजनञ्च ताम्बूलं नमस्कारो विसर्ज्जनम्।
अथवार्घ्यादिकं कृत्वा नैवेद्यान्तं यथाविधि।
अथाभिषेकं नैवेद्यं नमस्कारञ्च तर्पणम्।
यथाशक्ति सदा कुर्य्यात् क्रमाच्छिवपदप्रदम्।
अथवा मानुषे लिङ्गेऽप्यार्षे दैवे स्वयम्भुवि।
स्थापितेऽपूर्व्वके लिङ्गे सोपचारं यथा तथा।
पूजोपकरणे दत्ते यत् किञ्चित् फलमश्नुते।
प्रदक्षिणनमस्कारैः क्रमाच्छिवपदप्रदम् ॥
लिङ्गदर्शनमात्रं वा नियमेन शिवप्रदम्।
मृत्पिष्टगोशकृत्पुष्पैः करवीरेण वा फलैः ॥
गुड़ेन नवनीतेन भस्मनान्नैर्यथारुचि।
लिङ्गं यत्नेन कृत्वान्ते यजेत् तदनुसारतः ॥
अङ्गुष्ठादावपि तथा पूजामिच्छन्ति केचन।
लिङ्गकर्म्मणि सर्व्वत्र निषेधोऽस्ति न कर्हिचित्

त्वैव फलदाता हि प्रयासानुगुणं शिवः ।
अथवा लिङ्गदानं वा लिङ्गमौल्यमथापि वा ॥ ३५
श्रद्धया शिवभक्ताय दत्तं शिवपदप्रदम् ।
अथवा प्रणवं नित्यं जपेद्दशसहस्रकम् ॥ ३६
सन्ध्ययोश्च सहस्रं वा ज्ञेयं शिवपदप्रदम् ।
जपकाले मकारान्तं (क) मनःशुद्धिकरं भवेत् ॥ ३७
समाधौ मानसं प्रोक्तमुपांशु सार्व्वकालिकम् ।
समानप्रणवञ्चेदं बिन्दु-नादयुतं विदुः ॥ ३८
अथ पञ्चाक्षरं नित्यं जपेदयुतमादरात् ।
सन्ध्ययोश्च सहस्रं वा ज्ञेयं शिवपदप्रदम् ॥ ३९
प्रणवेनादिसंयुक्तं ब्राह्मणानां विशिष्यते ।
दीक्षायुक्तं गुरोर्ग्राह्यं मन्त्रं ह्यथ फलाप्तये ॥ ४०
कुम्भस्नानं मन्त्रदीक्षा मातृकान्यासमेव च ।
ब्राह्मणः सत्यपूतात्मा गुरुर्ज्ञानी विशिष्यते ॥ ४१
द्विजानाञ्च नमःपूर्व्वमन्येषाञ्च नमोऽन्तकम् ।
स्त्रीणाञ्च क्वचिदिच्छन्ति नमोऽन्तञ्च यथाविधि ॥ ४२
विप्रस्त्रीणां नमःपूर्व्वमिदमिच्छन्ति केचन ।
पञ्चकोटिजपं कृत्वा सदाशिवसमो भवेत् ॥ ४३
एक-द्वि-त्रि-चतुःकोट्या ब्रह्मादीनां पदं व्रजेत् ।
जपेदक्षरलक्षं वा अक्षराणां पृथक् पृथक् ॥ ४४
अथवाक्षरलक्षं वा ज्ञेयं शिवपदप्रदम् ।
सहस्रन्तु सहस्राणां सहस्रेण दिनेन हि ॥ ४५
जपेन्मन्त्रादिष्टसिद्धिर्नित्यं ब्राह्मणभोजनात् ।
अष्टोत्तरसहस्रं वै गायत्त्रीं प्रातरेव हि ॥ ४६
ब्राह्मणस्तु जपेन्नित्यं क्रमाच्छिवपदप्रदाम् ।
वेदमन्त्रांस्तु सूक्तानि जपेन्नियममास्थितः ॥ ४७
एकं दशार्णमन्त्रञ्च शतोनञ्च तदूर्ध्वकम् ।
अयुतञ्च सहस्रञ्च शतमेकं विना भवेत् ॥ ४८
वेदपारायणञ्चैव ज्ञेयं शिवपदप्रदम् ।
अन्यान् बहुतरान् मन्त्रान् जपेदक्षरलक्षतः ॥ ४९
एकाक्षरांस्तथा मन्त्रान् जपेदक्षरकोटितः ।
ततः परं जपेच्चैव सहस्रं भक्तिपूर्व्वकम् ॥ ५०
एवं कुर्य्याद्यथाशक्ति क्रमाच्छिवपदं लभेत् ।
नित्यं रुचिकरन्त्वेकं मन्त्रमामरणान्तिकम् ॥ ५१
जपेत् सहस्रमोमिति सर्व्वाभीष्टं शिवाज्ञया ।
पुष्पारामादिकं वापि तथा सम्मार्जनादिकम् ॥ ५२
शिवाय शिवकार्य्यार्थे कृत्वा शिवपदं लभेत् ।
शिवक्षेत्रे तथा वासं नित्यं कुर्य्याच्च भक्तितः ॥ ५३
जड़ानामजड़ानाञ्च सर्व्वेषां भुक्ति-मुक्तिदम् ।
तस्माद्वासं शिवक्षेत्रे कुर्य्यादामरणं बुधः ॥ ५४
लिङ्गाद्धस्तशतं पुण्यं क्षेत्रे मानुषके विदुः ।
सहस्रारत्निमात्रन्तु पुण्यं क्षेत्रे तथार्षके ॥ ५५
देवलिङ्गे तथा ज्ञेयं सहस्रारत्निमानतः ।
धनुःप्रमाणसाहस्रं पुण्यं क्षेत्रे स्वयम्भुवि ॥ ५६
पुण्यक्षेत्रे स्थिता वापी कूपाद्यं पुष्कराणि च ।
शिवगङ्गेति विज्ञेयं शिवस्य वचनं यथा ॥ ५७
तत्र स्नात्वा तथा दत्त्वा जपित्वा हि शिवं व्रजेत् ।
शिवक्षेत्रं समाश्रित्य वसेदामरणं तथा ॥ ५८
दाहं दशाहं मास्यं वा सपिण्डीकरणन्तु वा ।
आब्दिकं वा शिवक्षेत्रे क्षेत्रे पिण्डमथापि वा ॥ ५९
सर्व्वपापविनिर्म्मुक्तः सद्यः शिवपदं लभेत् ।
अथवा सप्तरात्रं वा वसेद्वा पञ्चरात्रकम् ॥ ६०
त्रिरात्रमेकरात्रं वा क्रमाच्छिवपदं लभेत् ।
स्ववर्णानुगुणं लोके स्वाचारात् प्राप्नुते नरः ॥ ६१
वर्णोद्धारेण भक्त्या च तत्फलातिशयं नरः ।
सर्व्वं कृतं कामनया सद्यः फलमवाप्नुयात् ॥ ६२
सर्व्वं कृतमकामेन साक्षाच्छिवपदप्रदम् ।
प्रातर्मध्याह्नसायाह्नमहस्त्रिष्वेकतः क्रमात् ॥ ६३
प्रातर्विधिकरं ज्ञेयं मध्याह्नं कामिकं तथा ।
सायाह्नं शान्तिकं ज्ञेयं रात्रावपि तथैव हि ॥ ६४
कालो निशीथो वै प्रोक्तो मध्ययामद्वयं निशि ।
शिवपूजा विशेषेण तत्कालेऽभीष्टसिद्धिदा ॥ ६५
एवं ज्ञात्वा नरः कुर्व्वन् यथोक्तफलभाग्भवेत् ।
कलौ युगे विशेषेण फलसिद्धिस्तु कर्म्मणा ॥ ६६
उक्तेन केनचिद्वापि अधिकारविभेदतः ।
सद्वृत्तिः पापभीरुश्चेत् तत्तत्फलमवाप्नुयात् ॥ ६७

ऋषय ऊचुः ।

अथ क्षेत्राणि पुण्यानि समासात् कथयस्व नः ।
सर्व्वाः स्त्रियश्च पुरुषा यान्याश्रित्य पदं लभेत्(क) ६८
सूत योगिवर श्रेष्ठ शिवक्षेत्रागमांस्तथा ।

(क) प्रणवाख्यं ब्रह्मेत्यर्थः ।

(क) व्यत्ययैकवचनमार्षम् ।

सूत उवाच ।

शृणुत श्रद्धया सर्व्वं क्षेत्राणि च तदागमान् ॥ ६९

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ।

सूत उवाच ।

शृणुध्वमृषयः प्राज्ञाः शिवक्षेत्रं विमुक्तिदम् ।
तदागमांस्ततो वच्मे लोकरक्षार्थमेव हि ॥ १
पञ्चाशत्कोटिविस्तीर्णा सशैलवनकानना ।
शिवाज्ञया हि पृथिवी लोकं धृत्वा च तिष्ठति ॥ २
तत्र तत्र शिवक्षेत्रं तत्र तत्र निवासिनाम् ।
मोक्षार्थं कृपया देवः क्षेत्रं कल्पितवान् प्रभुः ॥ ३
परिग्रहादृषीणाञ्च देवानाञ्च परिग्रहात् ।
स्वयम्भूतान्यथान्यानि लोकरक्षार्थमेव हि ॥ ४
तीर्थे क्षेत्रे सदा कार्य्यं स्नान-दान-जपादिकम् ।
अन्यथा रोग-दारिद्र्य-मूकत्वाद्याप्नुयान्नरः ॥ ५
अथास्मिन् भारते वर्षे प्राप्नोति मरणं नरः ।
स्वयम्भूस्थानवासेन पुनर्मानुष्यमाप्नुयात् ॥ ६
क्षेत्रे पापस्य करणं दृढं भवति भूसुराः ।
पुण्यक्षेत्रे निवासे हि पापमण्वपि नाचरेत् ॥ ७
येन केनाप्युपायेन पुण्यक्षेत्रे वसेन्नरः ।
सिन्धोः शतनदीतीरे सन्ति क्षेत्राण्यनेकशः ॥ ८
सरस्वती नदी पुण्या प्रोक्ता षष्टिमुखा तथा ।
तत्तत्तीरे वसेत् प्राज्ञः क्रमाद्ब्रह्मपदं लभेत् ॥ ९
हिमवद्गिरिजा गङ्गा पुण्या शतमुखा नदी ।
तत्तीरे चैव काश्यादि पुण्यक्षेत्राण्यनेकशः ॥ १०
तत्र तीरं प्रशस्तं हि मृगे मृग-वृहस्पतौ ।
शोणभद्रो दशमुखः पुण्योऽभीष्टफलप्रदः ॥ ११
तत्र स्नानोपवासेन पदं वै नायकं लभेत् ।
चतुर्व्विंशमुखा पुण्या नर्म्मदा च महानदी ॥ १२
तस्यां स्नानेन वासेन पदं वैष्णवमाप्नुयात् ।
तमसा द्वादशमुखा रेवा दशमुखा नदी ॥ १३
गोदावरी महापुण्या ब्रह्म-गोवधनाशिनी ।
एकविंशमुखा प्रोक्ता रुद्रलोकप्रदायिनी ॥ १४

कृष्णावेणी पुण्यनदी सर्व्वपापक्षयावहा ।
साष्टादशमुखा प्रोक्ता विष्णुलोकप्रदायिनी ।
तुङ्गभद्रा दशमुखा ब्रह्मलोकप्रदायिनी ।
सुवर्णमुखरी पुण्या प्रोक्ता नवमुखा तथा ।
तत्रैव सुप्रजायन्ते ब्रह्मलोकच्युतास्तथा ।
सरस्वती च पम्पा च कन्या श्वेतनदी शुभा ।
एतासां तीरवासेन इन्द्रलोकमवाप्नुयात् ।
सह्याद्रिजा महापुण्या कावेरीति महानदी ।
सप्तविंशमुखा प्रोक्ता सर्व्वाभीष्टप्रदायिनी ।
तत्तीराः स्वर्गदाश्चैव ब्रह्म-विष्णुपदप्रदाः ।
शिवलोकप्रदाः शैवास्तथाभीष्टफलप्रदाः ।
नैमिषे वदरे स्नायान्मेषगे च गुरौ रवौ ।
ब्रह्मलोकप्रदं विद्यात् तपःपूजादिकं तथा ।
सिन्धुनद्यां तथा स्नानं सिंहे कर्कटगे रवौ ।
केदारोदकपानञ्च स्नानञ्च ज्ञानदं विदुः ।
गोदावर्य्यां सिंहमासे स्नायात् सिंह-वृहस्पतौ ।
शिवलोकप्रदमिति शिवेनोक्तं तथा पुरा ।
यमुना-शोणयोः स्नायाद्गुरौ कन्यागते रवौ ।
धर्म्मलोके दन्तिलोके महाभोगप्रदं विदुः ।
कावेर्य्याञ्च तथा स्नायात् तुलागे तु रवौ ।
विष्णोर्वचनमाहात्म्यात् सर्व्वाभीष्टप्रदं विदुः ।
वृश्चिके मासि सम्प्राप्ते तथार्के गुरुवृश्चिके ।
नर्म्मदायां नदीस्नानाद्विष्णुलोकमवाप्नुयात् ।
सुवर्णमुखरीस्नानं चापगे च गुरौ रवौ ।
शिवलोकप्रदमिति ब्रह्मणो वचनं यथा ।
मृगमासि तथा स्नायाज्जाह्नव्यां मृगगे गुरौ ।
शिवलोकप्रदमिति ब्रह्मणो वचनं यथा ।
ब्रह्म-विष्ण्वोः पदे भुक्त्वा तदन्ते ज्ञानमाप्नुयात् ।
गङ्गायां माघमासे तु तथा कुम्भगते रवौ ।
श्राद्धं वा पिण्डदानं वा तिलोदकमथापि वा ।
वंशद्वयपितॄणाञ्च कुलकोट्युद्धरं विदुः ।
कृष्णावेण्यां प्रशंसन्ति मीनगे च गुरौ रवौ ।
तत्तत्तीर्थे च तन्मासि स्नानमिन्द्रपदप्रदम् ।
गङ्गां वा सह्यजां वापि समाश्रित्य वसेद्बुधः ।
तत्कालकृतपापस्य क्षयो भवति निश्चितम् ।
रुद्रलोकप्रदान्येव सन्ति क्षेत्राण्यनेकशः ।

ाम्रपर्णी वेगवती ब्रह्मलोकफलप्रदे ।
ायोस्तीरे हि सन्त्येव क्षेत्राणि स्वर्गदानि च ॥ ३३
न्ति क्षेत्राणि तन्मध्ये पुण्यदानि च भूरिशः ।
त्र तत्र वसन् प्राज्ञस्तादृशञ्च फलं लभेत् ॥ ३४
दाचारेण सद्वृत्त्या सदा भावनयापि च ।
ीदयालुः प्राज्ञो वै नान्यथा तत्फलं लभेत् ॥३५
ण्यक्षेत्रे कृतं पुण्यं बहुधा ऋद्धिमृच्छति ।
ण्यक्षेत्रे कृतं पापं महदण्वपि जायते ॥ ३६
त्कालं जीवनार्थश्चेत् पुण्येन क्षयमेष्यति ।
ण्यमैश्वर्य्यदं प्राज्ञः कायिकं वाचिकं तथा ॥ ३७
ानसञ्च तथा पापं तादृशं नाशयेद्द्विजाः ।
ानसं वज्रलेपन्तु कल्पकल्पानुगं तथा ॥ ३८
यानादेव हि तन्नश्येन्नान्यथा नाशमृच्छति ।
ाचिकं जपजालेन कायिकं कायशोषणात् ॥ ३९
दानकृतं नश्येन्नान्यथा कल्पकोटिभिः ।
चित् पापेन पुण्यञ्च वृद्धिपूर्व्वेण नश्यति ॥ ४०
ीजांशश्चैव वृद्ध्यंशो भोगांशः पुण्य-पापयोः ।
ज्ञाननाश्यो हि बीजांशो वृद्धिरुक्तप्रकारतः ॥ ४१
ोगांशो भोगनाश्यस्तु नान्यथा पुण्यकोटिभिः ।
ीजप्ररोहे नष्टे तु शेषो भोगाय कल्पते ॥ ४२
ेवानां पूजया चैव ब्राह्मणानाञ्च दानतः ।
पोधिक्याच्च कालेन भोगः सह्यो भवेन्नृणाम् ।
स्मात् पापमकृत्वैव वस्तव्यं सुखमिच्छता ॥ ४३

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः ।

ऋषय ऊचुः ।

सदाचारं श्रावयाशु येन लोकान् जयेद्बुधः ।
धर्म्माधर्म्ममयान् ब्रूहि स्वर्ग-नारकदांस्तथा ॥ १

सूत उवाच ।

सदाचारयुतो विद्वान् ब्राह्मणो नाम नामतः ।
वेदाचारयुतो विप्रो ह्येतैरेकैकवान् द्विजः ॥ २
अल्पाचारोऽल्पवेदश्च क्षत्रियो राजसेवकः ।
किञ्चिदाचारवान् वैश्यः कृषि-वाणिज्यकृत् तथा ॥३
शूद्रब्राह्मण इत्युक्तः स्वयमेव हि कर्षकः ।
असूयालुः परद्रोही चण्डालद्विज उच्यते ॥ ४
पृथिवीपालको राजा इतरे क्षत्रिया मताः ।
धान्यादिक्रयवान् वैश्य इतरो वणिगुच्यते ॥ ५
ब्रह्म-क्षत्रिय-वैश्यानां शुश्रूषुः शूद्र उच्यते ।
कर्षको वृषलो ज्ञेय इतरे चैव दस्यवः ॥ ६
सर्व्वो ह्युषः प्राचीमुखश्चिन्तयेद्देवपूर्व्वकान् ।
धर्म्मानर्थांश्च तत्क्लेशानायञ्च व्ययमेव च ॥ ७
आयुर्द्वेषश्च मरणं पापं भाग्यं तथैव च ।
व्याधिः पुष्टिस्तथा शक्तिः प्रातरुत्थानदिक्फलम् ॥८
निशान्त्ययामोषा ज्ञेया यामार्द्धं सन्धिरुच्यते ।
तत्काले तु समुत्थाय विण्मूत्रे विसृजेद्द्विजः ॥ ९
गृहाद्दूरं ततो गत्वा बाह्यतः प्रावृतस्तथा ।
उदङ्मुखः समाविश्य प्रतिबन्धेऽन्यदिङ्मुखः ॥ १०
जलाग्निब्राह्मणादीनां देवानां नाभिमुख्यतः ।
लिङ्गं पिधाय वामेन मुखमन्येन पाणिना ॥ ११
मलमुत्सृज्य चोत्थाय न पश्येच्चैव तन्मलम् ।
उद्धृतेन जलेनैव शौचं कुर्य्याज्जलाद्बहिः ॥ १२
अथवा देवपित्रार्ष-तीर्थावतरणं विना ।
सप्त वा पञ्च वा तिस्रो गुदं संशोधयेन्मृदा ॥ १३
लिङ्गे कर्कोटमात्रन्तु गुदे प्रसृतिरिष्यते ।
तत उत्थाय पद्धस्तशौचं गण्डूषमष्टकम् ॥ १४
येन केन च पत्रेण काष्ठेन च जलाद्बहिः ।
कार्य्यं सन्तर्ज्जनीं त्यज्य दन्तधावनमीरितम् ॥ १५
जलदेवान् नमस्कृत्य मन्त्रेण स्नानमाचरेत् ।
अशक्तः कण्ठदघ्नं वा कटिदघ्नमथापि वा ॥ १६
आजानु जलमासिच्य मन्त्रस्नानं समाचरेत् ।
देवादींस्तर्पयेद्विद्वांस्तत्र तीर्थजलेन च ॥ १७
धौतवस्त्रं समादाय पञ्चकच्छेन धारयेत् ।
उत्तरीयञ्च किञ्चैव धार्य्यं सर्व्वेषु कर्म्मसु ॥ १८
नद्यादितीर्थस्नाने तु स्नानवस्त्रं न शोधयेत् ।
वापी-कूप-गृहादौ तु स्नानादूर्द्ध्वं नयेद्बुधः ॥ १९
शिला-दार्व्वादिके वापि जले वापि स्थलेऽपि वा ।
संशोध्य पीडयेद्वस्त्रं पितृणां तृप्तये द्विजाः ॥ २०
जाबालकोक्तमन्त्रेण भस्मना च त्रिपुण्ड्रकम् ।
अन्यथा चेज्जले पात इतस्तन्नरकमृच्छति ॥ २१

आपो हि ष्ठेति शिरसि प्रोक्षयेत् पापशान्तये ।
यस्येति मन्त्रं पादे तु सन्धिप्रोक्षणमुच्यते ॥ २२
पादे मूर्द्ध्नि हृदि चैव मूर्द्ध्नि हृत्पाद एव च ।
हृत्पादमूर्द्ध्नि सम्प्रोक्ष्य मन्त्रस्नानं विदुर्बुधाः ॥ २३
ईषत्स्पर्शे च दौःस्वास्थ्ये राजराष्ट्रभयेऽपि च ।
अगत्या गतिकाले च मन्त्रस्नानं समाचरेत् ॥ २४
प्रातः सूर्य्यानुवाकेन सायमग्न्यनुवाकतः ।
अपः पीत्वा तथा मध्ये पुनः प्रोक्षणमाचरेत् ॥ २५
गायत्र्या जपमन्त्रान्ते त्रिरूर्द्ध्वं प्राग्विनिक्षिपेत् ।
मन्त्रेण सह चैकं वै मध्येऽर्घ्यन्तु रवेर्द्विजाः ॥ २६
अथ जाते च सायाह्ने भुवि पश्चिमदिङ्मुखः ।
उद्धृत्य दद्यात् प्रातस्तु मध्याह्नेऽङ्गुलिभिस्तथा ॥ २७
अङ्गुलीनाञ्च रन्ध्रेण लम्बं पश्येद्दिवाकरम् ।
आत्मप्रदक्षिणं कृत्वा शुद्धाचमनमाचरेत् ॥ २८
सायं मुहूर्त्तादर्वाक् तु कृता सन्ध्या वृथा भवेत् ।
अकालात् काल इत्युक्तो दिनेऽतीते यथाक्रमम् ॥२९
दिवातीते च गायत्रीं शतं नित्ये क्रमाज्जपेत् ।
आदशाहात् परातीते गायत्रीं लक्षमभ्यसेत् ॥ ३०
मासातीते तु नित्ये हि पुनश्चोपनयं चरेत् ।
ईशो गौरी गुहो विष्णुर्ब्रह्मा चेन्द्रश्च वै यमः ॥ ३१
एवंरूपांश्च वै देवांस्तर्पयेदर्थसिद्धये ।
ब्रह्मार्पणं ततः कृत्वा शुद्धाचमनमाचरेत् ॥ ३२
तीर्थदक्षिणतः शस्ते मठे मन्त्रालये बुधः ।
तत्र देवालये वापि गृहे वा नियतस्थले ॥ ३३
सर्व्वान् देवान् नमस्कृत्य स्थिरबुद्धिः स्थिरासनः ।
प्रणवं पूर्व्वमभ्यस्य गायत्रीमभ्यसेत् ततः ॥ ३४
जीवब्रह्मैक्यविषयं बुद्ध्वा प्रणवमभ्यसेत् ।
त्रैलोक्यसृष्टिकर्त्तारं स्थितिकर्त्तारमच्युतम् ॥ ३५
संहर्त्तारं तथा रुद्रं स्वप्रकाशमुपास्महे ।
ज्ञानकर्मेन्द्रियाणाञ्च मनोवृत्तीर्धियस्तथा ॥ ३६
भोगमोक्षप्रदे धर्म्मे ज्ञाने च प्रेरयेत् सदा ।
इत्यमर्थं धिया ध्यायन् ब्रह्म प्राप्नोति निश्चयः ॥३७
केवलं वा जपेन्नित्यं ब्राह्मण्यस्य च पूर्त्तये ।
सहस्रमभ्यसेन्नित्यं प्रातर्ब्राह्मणपुङ्गवः ॥ ३८
अन्येषाञ्च यथाशक्ति मध्याह्ने च शतं जपेत् ।
सायं द्विदशकं ज्ञेयं शिखाष्टकसमन्वितम् ॥ ३९

मूलाधारं समारभ्य द्वादशान्तस्थितांस्तथा
विद्येशब्रह्मविष्ण्वीश-जीवात्मपरमेश्वरान्
ब्रह्मबुद्ध्या तदैक्यञ्च सोऽहंभावनया जपेत्
तानेव ब्रह्मरन्ध्रादौ कायाद्वाह्ये च भावयेत्
महत्तत्त्वं समारभ्य शरीरन्तु सहस्रकम् ।
एकैकस्माज्जपादेकमतिक्रम्य शनैः शनैः ॥
परस्मिन् योजयेज्जीवं जपतत्त्वमुदाहृतम् ।
शतद्विदशकं देहं शिखाष्टकसमन्वितम् ॥
मन्त्राणां जप एवं हि जपमादिक्रमाद्विदुः ।
सहस्रं ब्राह्मदं विद्याच्छतमैन्द्रं पदं विदुः
इतरत् त्वात्मरक्षार्थं ब्रह्मयोनिषु जायते ।
दिवाकरमुपस्थाय नित्यमित्थं समाचरेत् ॥
लक्षद्वादशयुक्तस्तु पूर्णब्राह्मण ईरितः ।
गायत्र्या लक्षहीनन्तु वेदकार्य्ये न योजयेत्
आ सप्ततेस्तु नियमं पश्चात् प्रव्राजनं चरेत् ।
प्रातर्द्वादशसाहस्रं प्रव्राजी प्रणवं जपेत् ॥
दिने दिने त्वतिक्रान्ते नित्यमेवं क्रमाज्जपेत्
मासादौ क्रमशोऽतीते सार्द्धलक्षजपेन हि
अत ऊर्द्ध्वमतिक्रान्ते पुनः प्रैषं समाचरेत् ।
एवं कृत्वा दोषशान्तिरन्यथा रौरवं व्रजेत्
धर्म्मार्थयोस्ततो यत्नं कुर्य्यात् कामी न चे
ब्राह्मणो मुक्तिकामः स्याद्ब्रह्मज्ञानं सदा
धर्म्मादर्थोऽर्थतो भोगो भोगाद्वैराग्यसम्भ
धर्म्मार्ज्जितार्थभोगेन वैराग्यमुपजायते ॥
विपरीतार्थभोगेन राग एव प्रजायते ।
धर्म्मश्च द्विविधः प्रोक्तो द्रव्य-देहद्वयेन च
द्रव्यमिज्यादिरूपं स्यात् तीर्थस्नानादि दै
धनेन धनमाप्नोति तपसा दिव्यरूपताम्
निष्कामः शुद्धिमाप्नोति शुद्ध्या ज्ञानं न सं
कृतादौ हि तपः श्लाघ्यं द्रव्यधर्म्मः कलौ
कृते ध्यानाज्ज्ञानसिद्धिस्त्रेतायां तपसा त
द्वापरे यजनाज्ज्ञानं प्रतिमापूजया कलौ
यादृशं पुण्यं पापं वा तादृशं फलमेव हि
द्रव्य-देहाङ्गभेदेन न्यून-वृद्धि-क्षयादिकम्
अधर्म्मो हिंसिकारूपो धर्म्मस्तु सुखरूप
अधर्म्माद्दुःखमाप्नोति धर्म्माद्वै सुखमेधते

ग्याहुर्वृत्तितो दुःखं सुखं विद्यात् सुवृत्तितः ।
स्मार्ज्जनमतः कुर्य्याद्भोग-मोक्षप्रसिद्धये ॥ ५८
कुटुम्बस्य विप्रस्य चतुर्ज्जनयुतस्य च ।
तवर्षस्य वृत्तिन्तु दद्यात् तद्ब्रह्मलोकदम् ॥ ५९
न्द्रायणसहस्रन्तु ब्रह्मलोकप्रदं विदुः ।
हस्रस्य कुटुम्बस्य प्रतिष्ठां क्षत्रियश्चरेत् ॥ ६०
द्रलोकप्रदं विद्यादयुतं ब्रह्मलोकदम् ।
देवतां पुरस्कृत्य दानमाचरते नरः ॥ ६१
तल्लोकमवाप्नोति इति वेदविदो विदुः ।
र्थहीनः सदा कुर्य्यात् तपसामर्ज्जनं तथा ॥ ६२
र्थाच्च तपसा प्राप्यं सुखमक्षयमश्नुते ।
र्थार्ज्जनमथो वक्ष्ये न्यायतः सुसमाहितः ॥ ६३
नात् प्रतिग्रहाच्चैव याजनाच्च विशुद्धतः ।
न्यादनतिक्लेशाद्ब्राह्मणो धनमर्ज्जयेत् ॥ ६४
यो बाहुवीर्य्येण कृषिगोरक्षणादिशः ।
न्यायार्ज्जितस्य वित्तस्य दानात् सिद्धिं समश्नुते ॥ ६५
ज्ञानसिद्ध्या मोक्षसिद्धिः सर्व्वेषां गुर्व्वनुग्रहात् ।
क्षात् स्वरूपसिद्धिः स्यात् परानन्दं समश्नुते ॥ ६६
सङ्गात् सर्व्वमेतद्धि नराणां जायते द्विजाः ।
धान्यादिकं सर्व्वं देयं वै गृहमेधिना ॥ ६७
यत् काले वस्तुजातं फलं वा धान्यमेव च ।
तत् सर्व्वं ब्राह्मणेभ्यो देयं वै हितमिच्छता ॥ ६८
ह्येव सदा देयमन्नं क्षुद्व्याधिशान्तये ।
धान्यं तथामान्नमन्नमेव चतुर्व्विधम् ॥ ६९
त् कालं यदन्नं वै भुक्त्वा श्रवणमेधते ।
वत् कृतस्य पुण्यस्य लब्धं दातुर्न संशयः ॥ ७०
तीता हि गृहीतस्य दानाद्धि तपसा तथा ।
संशोधनं कुर्य्यादन्यथा रौरवं व्रजेत् ॥ ७१
वित्तं त्रिधा कुर्य्याद्धर्म्मवृद्ध्यात्मभोगतः ।
यं नैमित्तिकं काम्यं कर्म्म कुर्य्यात् तु धर्म्मतः ॥ ७२
तस्य वर्द्धनं कुर्य्याद्वृद्ध्यंशेन हि साधकः ।
तेन मितमेध्येन भोगं भोगांशतश्चरेत् ॥ ७३
र्ज्जिते दशांशं हि देयं पापस्य शुद्धये ।
ण कुर्य्याद्धर्म्मादि अन्यथा रौरवं व्रजेत् ॥ ७४
वा पापबुद्धिः स्यात् क्षयं वा शस्यमेष्यति ।
वाणिज्यके देयं षडंशं हि विचक्षणैः ॥ ७५

शुल्कप्रतिग्रहे देयं चतुर्थांशं द्विजोत्तमैः ।
अकस्मादुत्थितेऽर्थे हि देयमर्द्धं द्विजोत्तमैः ॥ ७६
असत्प्रतिग्रहे सर्व्वं दुर्द्दानं सागरे क्षिपेत् ।
आहूय दानं कर्त्तव्यमात्मभोगसमृद्धये ॥ ७७
पृष्टं सर्व्वं सदा देयमात्मशक्त्यनुसारतः ।
जन्मान्तरे ऋणी हि स्याददत्ते पृष्टवस्तुनि ॥ ७८
परेषाञ्च तथा दोषं न प्रशंसेद्विचक्षणः ।
विशेषेण तथा ब्रह्मन् श्रुतं दृष्टञ्च नो वदेत् ॥ ७९
न वदेत् सर्व्वजन्तूनां हृदि रोषकरं बुधः ।
सन्ध्ययोरग्निकार्य्यञ्च कुर्य्यादैश्वर्य्यसिद्धये ॥ ८०
अशक्तस्त्वेककाले वा सूर्य्याग्नी च यथाविधि ।
तण्डुलं धान्यमाज्यं वा फलं कन्दं हविस्तथा ॥ ८१
स्थालीपाकं तथा कुर्य्याद्यथान्यायं यथाविधि ।
प्रधानहोममात्रं वा हव्याभावे समाचरेत् ॥ ८२
नित्यसन्धानमित्युक्तं तमजस्रं विदुर्बुधाः ।
अथवा जपमात्रं वा सूर्य्यवन्दनमेव च ॥ ८३
एवमात्मार्थिनः कुर्य्युरर्थार्थी च यथाविधि ।
ब्रह्मयज्ञरता नित्यं देवपूजारतास्तथा ॥ ८४
अग्निपूजापरा नित्यं गुरुपूजारतास्तथा ।
ब्राह्मणानां तृप्तिकराः सर्व्वे स्वर्गस्य भागिनः ॥ ८५

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां-
मेकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

ऋषय ऊचुः ।

अग्नियज्ञं देवयज्ञं ब्रह्मयज्ञं तथैव च ।
गुरुपूजां ब्रह्मतृप्तिं क्रमेण ब्रूहि नः प्रभो ॥ १

सूत उवाच ।

अग्नौ जुहोति यद्द्रव्यमग्नियज्ञः स उच्यते ।
ब्रह्मचर्य्याश्रमस्थानां समिदाधानमेव हि ॥ २
समिदग्नौ व्रताद्यञ्च विशेषयजनादिकम् ।
प्रथमाश्रमिणामेवं यावदौपासनं द्विजाः ॥ ३
आत्मन्यारोपिताग्नीनां वनिनां यतिनां द्विजाः ।
हितञ्च मितमेध्यान्नं स्वकाले भोजनं हुतिः ॥ ४
औपासनाग्निसन्धानं समारभ्य सुरक्षितम् ।

कुण्डे वाप्यथ भाण्डे वा तदजस्रं समीरितम् ॥ ५
अग्निमात्मन्यरण्यां वा राजदैववशाद्ध्रुवम् ।
अग्नित्यागभयादुक्तं समारोपितमुच्यते ॥ ६
सम्पत्करी तथा ज्ञेया सायमग्न्याहुतिर्द्विजाः ।
आयुष्करीति विज्ञेया प्रातः सूर्य्याहुतिस्तथा ॥ ७
अग्नियज्ञो ह्ययं प्रोक्तो दिवा सूर्य्यनिवेशनात् ।
इन्द्रादीन् सकलान् देवानुद्दिश्याग्नौ जुहोति यत् ॥ ८
देवयज्ञं हि तं विद्यात् स्थालीपाकादिकान् क्रतून् ।
चौलादिकं तथा ज्ञेयं लौकिकाग्नौ प्रतिष्ठितम् ॥ ९
ब्रह्मयज्ञं द्विजः कुर्य्याद्देवानां तृप्तये सकृत् ।
ब्रह्मयज्ञ इति प्रोक्तो वेदस्याध्ययनं भवेत् ॥ १०
नित्यानन्तरमासायं ततस्तु न विधीयते ।
अनग्नौ देवयजनं शृणुत श्रद्धयादरात् ॥ ११
आदिसृष्टौ महादेवः सर्व्वज्ञः करुणाकरः ।
सर्व्वलोकोपकारार्थं वारान् कल्पितवान् प्रभुः ॥ १२
संसारवैद्यः सर्व्वज्ञः सर्व्वभेषजभेषजम् ।
आदावारोग्यदं वारं स्ववारं कृतवान् प्रभुः ॥ १३
सम्पत्करं स्वमायाया वारञ्च कृतवांस्ततः ।
जनने दुर्गतिक्रान्ते कुमारस्य ततः परम् ॥ १४
आलस्यदुरतिक्रान्त्यै वारं कल्पितवान् प्रभुः ।
रक्षकस्य तथा विष्णोर्लोकानां हितकाम्यया ॥ १५
पुष्ट्यर्थञ्चैव रक्षार्थं वारं कल्पितवान् प्रभुः ।
आयुष्करं ततो वारमायुषां कर्त्तुरेव हि ॥ १६
त्रैलोक्यसृष्टिकर्त्तुर्हि ब्रह्मणः परमेष्ठिनः ।
जगदायुष्यसिद्ध्यर्थं वारं कल्पितवान् प्रभुः ॥ १७
आदौ त्रैलोक्यवृद्ध्यर्थं पुण्यपापे प्रकल्पिते ।
तयोः कर्त्रोस्ततो वारमिन्द्रस्य च यमस्य च ॥ १८
भोगप्रदं मृत्युहरं लोकानाञ्च प्रकल्पितम् ।
आदित्यादीन् स्वस्वरूपान् सुखदुःखस्य सूचकान् ॥ १९
वारेशान् कल्पयित्वादौ ज्योतिश्चक्रे प्रतिष्ठितान् ।
स्वस्ववारे तु तेषान्तु पूजा स्वस्वफलप्रदा ॥ २०
आरोग्यं सम्पदश्चैव व्याधीनां शान्तिरेव च ।
पुष्टिरायुस्तथा भोगो मृतेर्हानिर्यथाक्रमम् ॥ २१
वारक्रमफलं प्राहुर्देवप्रीतिपुरःसरम् ।
अन्येषामपि देवानां पूजायाः फलदः शिवः ॥ २२
देवानां प्रीतये पूजा पञ्चधैव प्रकल्पिता ।
तत्तन्मन्त्रजपो होमो दानञ्चैव तपस्तथा ।
स्थण्डिले प्रतिमायाञ्च ह्यग्नौ ब्राह्मणविग्रहे ।
समाराधनमित्येवं षोडशैरुपचारकैः ॥
उत्तरोत्तरवैशिष्ट्यात् पूर्व्वभावे तथोत्तरम् ।
नेत्रयोः शिरसो रोगे तथा कुष्ठस्य शान्तये ।
आदित्यं पूजयित्वा तु ब्राह्मणान् भोजयेत् ।
दिनं मासं तथा वर्षं वर्षत्रयमथापि वा ॥
प्रारब्धं प्रबलञ्चेत् स्यान्नश्येद्रोगजरादिकम् ।
जपाद्यमिष्टदेवस्य वारादीनां फलं विदुः ।
पापशान्तिर्विशेषेण ह्यादिवारे निवेदयेत् ।
आदित्यस्यैव देवानां ब्राह्मणानां विशिष्टदः ।
सोमवारे च लक्ष्म्यादीन् सम्पदर्थं यजेद्बुधः ।
आज्यान्नेन तथा विप्रान् सपत्नीकांश्च भोजयेत् ।
काल्यादीन् भौमवारे तु यजेद्रोगप्रशान्तये ।
माषमुद्गाढकान्नेन ब्राह्मणांश्चैव भोजयेत् ॥
सौम्यवारे तथा विष्णुं दध्यन्नेन यजेद्बुधः ।
पुत्र-मित्र-कलत्रादि-पुष्टिर्भवति सर्व्वदा ।
आयुष्कामो गुरुवारे देवानां पुष्टिसिद्धये ।
उपवीतेन वस्त्रेण क्षीराज्येन यजेद्बुधः ।
भोगार्थं भृगुवारे तु यजेद्देवान् समाहितः ।
षड्रसोपेतमन्नञ्च दद्याद्ब्राह्मणतृप्तये ॥
स्त्रीणाञ्च तृप्तये तद्वद्देयं वस्त्रादिकं शुभम् ।
अपमृत्युहरे मन्दे रुद्रादींश्च यजेद्बुधः ॥
तिलहोमेन दानेन तिलान्नेन च भोजयेत् ।
इत्थं यजेच्च विबुधानारोग्यादिफलं लभेत् ।
देवानां नित्ययजने विशेषयजनेऽपि च ।
स्नाने दाने जपे होमे ब्राह्मणानाञ्च तर्पणे ।
तिथि-नक्षत्र-योगे च तत्तद्देवप्रपूजने ।
आदिवारादिवारेषु सर्व्वज्ञो जगदीश्वरः ।
तत्तद्रूपेण सर्व्वेषामारोग्यादिफलप्रदः ।
देशकालानुसारेण तथा पात्रानुसारतः ।
द्रव्यश्रद्धानुसारेण तथा लोकानुसारतः ।
तारतम्यक्रमाद्देवस्त्वारोग्यादीन् प्रयच्छति ।
शुभादावशुभान्ते च जन्मर्क्षेषु गृहे गृहे ।
आरोग्यादिसमृद्ध्यर्थमादित्यादीन् ग्रहान् ।
तस्माद्वै देवयजनं सर्व्वाभीष्टफलप्रदम् ।

मन्त्रकं ब्राह्मणानामन्येषाञ्चैव तान्त्रिकम् ॥ ४१
यथाशक्त्यनुरूपेण कर्त्तव्यं सर्व्वदा नरैः।
सस्वपि च वारेषु नरैः शुभफलेप्सुभिः ॥ ४२
दरिद्रस्तपसा देवान् यजेदाढ्यो धनेन हि।
नश्चैवंविधं धर्म्मं कुरुते श्रद्धया सह ॥ ४३
नश्च भोगान् विविधान् भुक्त्वा भूमौ प्रजायते।
यां जलाशयं ब्रह्म-प्रतिष्ठां धर्म्मसञ्चयम् ॥ ४४
ञ्च वित्तवान् कुर्य्यात् सदाभोगप्रसिद्धये।
लाच पुण्यपाकेन ज्ञानसिद्धिः प्रजायते ॥ ४५
इमं शृणुतेऽध्यायं पठते वा नरो द्विजाः।
वणस्योपकर्त्ता च देवयज्ञफलं लभेत् ॥ ४६

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः।

ऋषय ऊचुः।

मादीन् क्रमशो ब्रूहि सूत सर्व्वार्थवित्तम।

सूत उवाच।

द्धं यहं समफलं देवयज्ञादिकर्म्मसु ॥ १
तो दशगुणं गोष्ठं जलतीरं ततो दश।
तो दशगुणं विल्व-तुलस्यश्वत्थमूलकम् ॥ २
तो देवालयं विद्यात् तीर्थतीरं ततो दश।
ती दशगुणं नद्यास्तीर्थनद्यास्ततो दश ॥ ३
सगङ्गानदीतीरं तस्या दशगुणं भवेत्।
ङ्गा गोदावरी चैव कावेरी ताम्रपर्णिका ॥ ४
स्सुश्च सरयू रेवा सप्तगङ्गाः प्रकीर्त्तिताः।
तोऽब्धितीरं दश च पर्व्वताग्रे ततो दश ॥ ५
र्व्वस्मादधिकं ज्ञेयं यत्र वा रोचते मनः।
ति पूर्णफलं ज्ञेयं यज्ञदानादिकं तथा ॥ ६
तायुगे त्रिपादञ्च द्वापरेऽर्द्धं सदा स्मृतम्।
लौ पादन्तु विज्ञेयं तत्पादोनं ततोऽर्द्धके ॥ ७
द्धात्मनः शुद्धदिनं पुण्यं समफलं विदुः।
स्मादशगुणं ज्ञेय रविसंक्रमणे बुधाः ॥ ८
षुवे तद्दशगुणमयने तद्दश स्मृतम्।
दश मृगसंक्रान्तौ तच्चन्द्रग्रहणे दश ॥ ९

ततश्च सूर्य्यग्रहणे पूर्णं कालोत्तमे विदुः।
जगद्रूपस्य सूर्य्यस्य विषयोगाच्च रोगदम् ॥ १०
अतस्तद्विषशान्त्यर्थं स्नान-दान-जपांश्चरेत्।
विषशान्त्यर्थकालत्वात् स कालः पुण्यदः स्मृतः ॥ ११
जन्मर्क्षे च व्रतान्ते च सूर्य्यरागोपमं विदुः।
महतां सङ्कालञ्च कोव्यर्कग्रहणं विदुः ॥ १२
तपोनिष्ठा ज्ञाननिष्ठा योगिनो यतयस्तथा।
पूजायाः पात्रमेते हि पापसंक्षयकारणम् ॥ १३
चतुर्व्विंशतिलक्षं वा गायत्र्या जपसंयुतः।
ब्राह्मणस्तु भवेत् पात्रं सम्पूर्णफलभोगदम् ॥ १४
पतनात् त्रायत इति पात्रं शास्त्रे प्रयुज्यते।
दातुश्च पातकात् त्राणात् पात्रमित्यभिधीयते ॥ १५
गायकं त्रायते पाताद्गायत्रीत्युच्यते हि सा।
यथार्थहीनो लोकेऽस्मिन् परस्यार्थं न यच्छति ॥ १६
अर्थवानिह यो लोके परस्यार्थं प्रयच्छति।
स्वयं शुद्धो हि पूतात्मा नरान् सन्त्रातुमर्हति ॥ १७
गायत्रीजपशुद्धो हि शुद्धब्राह्मण उच्यते।
तस्माद्दाने जपे होमे पूजायां सर्व्वकर्म्मणि ॥ १८
दानं कर्त्तुं तथा त्रातुं पात्रन्तु ब्राह्मणोऽर्हति।
अन्नस्य क्षुधितं पात्रं नारीनरमयात्मकम् ॥ १९
ब्राह्मणं श्रेष्ठमाहूय यत्काले सुसमाहितम्।
तदर्थं शब्दमर्थं वा सद्बोधकमभीष्टदम् ॥ २०
इच्छावतः प्रदानञ्च सम्पूर्णफलदं विदुः।
यत् प्रश्नानन्तरं दत्तं तदर्द्धफलदं विदुः ॥ २१
यत् सेवकाय दत्तं स्यात् तत् पादफलदं विदुः।
जातिमात्रस्य विप्रस्य दीनवृत्तेर्द्विजर्षभाः ॥ २२
दत्तमर्थं हि भोगाय भूर्लोके दशवार्षिकम्।
वेदयुक्तस्य विप्रस्य स्वर्गे हि दशवार्षिकम् ॥ २३
गायत्रीजपयुक्तस्य सत्ये हि दशवार्षिकम्।
विष्णुभक्तस्य विप्रस्य दत्तं वैकुण्ठदं विदुः ॥ २४
शिवभक्तस्य विप्रस्य दत्तं कैलासदं विदुः।
तत्तल्लोकोपभोगार्थं सर्व्वेषां दानमिष्यते ॥ २५
दशाङ्गमन्नं विप्रस्य भानुवारे ददन्नरः।
परजन्मनि चारोग्यं दशवर्षं समश्नुते ॥ २६
बहुमानमथाह्वानमभ्यङ्गं पादसेवनम्।
वासोगन्धाद्यर्च्चनञ्च घृतापूपरसोत्तरम् ॥ २७

षड्रसं व्यञ्जनञ्चैव ताम्बूलं दक्षिणोत्तरम्।
नमश्चानुगमश्चैव स्वन्नदानं दशाङ्गकम् ॥ २८
दशाङ्गमन्नं विप्रेभ्यो दशभ्यो वै ददन्नरः।
अर्कवारे तथारोग्यं शतवर्षं समश्नुते ॥ २९
सोमवारादिवारेषु तत्तद्वारगुणं फलम्।
अन्नदानस्य विज्ञेयं भूर्लोके परजन्मनि ॥ ३०
सप्तस्वपि च वारेषु दशभ्यश्च दशाङ्गकम्।
अन्नं दत्त्वा शतं वर्षमारोग्यादिकमश्नुते ॥ ३१
एवं शतेभ्यो विप्रेभ्यो भानुवारे ददन्नरः।
सहस्रवर्षमारोग्यं सर्व्वलोके समश्नुते ॥ ३२
सहस्रेभ्यस्तथा दत्त्वायुतवर्षं समश्नुते।
एवं सोमादिवारेषु विज्ञेयं हि विपश्चिता ॥ ३३
भानुवारे सहस्राणां गायत्रीपूतचेतसाम्।
अन्नं दत्त्वा सत्यलोके ह्यारोग्यादि समश्नुते ॥ ३४
अयुतानां तथा दत्त्वा विष्णुलोके समश्नुते।
अन्नं दत्त्वा तु लक्षाणां रुद्रलोके समश्नुते ॥ ३५
बालानां ब्रह्मबुद्ध्या हि देयं विद्यार्थिभिर्नरैः।
यूनाञ्च विष्णुबुद्ध्या हि पुत्रकामार्थिभिर्नरैः ॥ ३६
वृद्धानां रुद्रबुद्ध्या हि देयं ज्ञानार्थिभिर्नरैः।
बालस्त्री भारतीबुद्ध्या बुद्धिकामैर्नरोत्तमैः ॥ ३७
लक्ष्मीबुद्ध्या युवस्त्रीषु भोगकामैर्नरोत्तमैः।
वृद्धासु पार्व्वतीबुद्ध्या देयमात्मार्थिभिर्जनैः ॥ ३८
शिलवृत्त्योञ्छवृत्त्या च गुरुदक्षिणयार्ज्जितम्।
शुद्धद्रव्यमिति प्राहुस्तत् पूर्णफलदं विदुः ॥ ३९
शुल्कप्रतिग्रहाद्दत्तं मध्यमं द्रव्यमुच्यते।
कृषि-वाणिज्यकोपेतमधमं द्रव्यमुच्यते ॥ ४०
क्षत्रियाणां विशाञ्चैव शौर्य्यवाणिज्यकार्ज्जितम्।
उत्तमं द्रव्यमित्याहुः शूद्राणां भृतकार्ज्जितम् ॥ ४१
स्त्रीणां धर्म्मार्थिनां द्रव्यं पैतृकं भर्तृकं तथा।
गवादीनां द्वादशानां चैत्रादिषु यथाक्रमम् ॥ ४२
सम्भूय वा पुण्यकाले दद्यादिष्टसमृद्धये।
गो-भू-तिल-हिरण्याज्य-वासो-धान्य-गुडानि च ॥ ४३
रौप्यं लवणकुष्माण्डे कन्या द्वादशकं तथा।
गोदानाद्दत्तगव्येन गोमयेनोपकारिणा ॥ ४४
धनधान्याद्याश्रितानां दुरितानां निवारणम्।
जलस्नेहाद्याश्रितानां दुरितानान्तु गोजलैः ॥ ४५

कायिकादित्रयाणान्तु क्षीरदध्याज्यकैस्तथा
तथा तेषाञ्च पुष्टिश्च विज्ञेया हि विपश्चिता
भूदानन्तु प्रतिष्ठार्थमिह चामुत्र च द्विजाः।
तिलदानं बलार्थं हि सदा मृत्युजयं विदुः।
हिरण्यं जाठराग्नेस्तु वृद्धिदं वीर्य्यदं तथा।
आज्यं पुष्टिकरं विद्याद्वस्त्रमायुष्करं विदुः।
धान्यमन्नं समृद्ध्यर्थं मधुराहारदं गुडम्।
रौप्यं रेतोऽभिवृद्ध्यर्थं षड्रसार्थन्तु लावणम्
सर्व्वं सर्व्वसमृद्ध्यर्थं कुष्माण्डं पुष्टिदं विदुः।
प्राप्तिदं सर्व्वभोगाणामिह चामुत्र च द्विजाः।
यावज्जीवनमुक्तं हि कन्यादानन्तु भोगदम्
पनसाम्रकपित्थानां वृक्षाणां फलमेव च।
कदल्याद्यौषधीनाञ्च फलं गुल्मोद्भवं तथा।
माषादीनाञ्च मुद्गानां फलं शाकादिकं तथा।
मरीचसर्षपाद्यानां शाकोपकरणं तथा।
यद्दतौ यत् फलं सिद्धं तद्देयं हि विपश्चिता।
श्रोत्रादीन्द्रियतृप्तिश्च सदा देया विपश्चिता।
शब्दादिदशभोगार्थं दिगादीनाञ्च तुष्टिदा
वेदशास्त्रं समादाय बुद्ध्वा गुरुमुखात् स्वयम्
कर्म्मणां फलमस्तीति बुद्धिरास्तिक्यमुच्यते
बन्धुराजभयाद्बुद्धिः श्रद्धा सा च कनीयसी।
सर्व्वाभावे दरिद्रस्तु वाचा वा कर्म्मणा यजेत्
वाचिकं यजनं विद्यान्मन्त्र-स्तोत्र-जपादिकम्
तीर्थयात्रा व्रताद्यं हि कायिकं यजनं विदुः
येन केनाप्युपायेन ह्यल्पं वा यदि वा बहु।
देवतार्पणबुद्ध्या च कृतं भोगाय कल्पते।
तपश्चर्य्या च दानञ्च कर्त्तव्यमुभयं सदा।
प्रतिश्रयं प्रदातव्यं स्ववर्णगुणशोभितम् ॥
देवानां तृप्तये त्यर्थं सर्व्वभोगप्रदं बुधैः।
इहामुत्रोत्तमं जन्म सदा भोगं लभेद्बुधः।
ईश्वरार्पणबुद्ध्या हि कृत्वा मोक्षफलं लभेत्
य इमं पठतेऽध्यायं यः शृणोति सदा नरः
तस्य वै धर्म्मबुद्धिश्च ज्ञानसिद्धिः प्रजायते

इति श्रीशैवे महापुराणे विद्येश्वरसंहि
त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्द्दशोऽध्यायः ।

ऋषय ऊचुः ।

ार्थिवप्रतिमापूजाविधानं ब्रूहि सत्तम ।
ोन पूजाविधानेन सर्व्वाभीष्टमवाप्यते ॥ १

सूत उवाच ।

ुसाधु पृष्टं युष्माभिः सदा सर्व्वार्थदायकम् ।
द्यो दुःखस्य शमनं शृणुत प्रब्रवीमि वः ॥ २
पमृत्युहरं कालमृत्योश्चापि विनाशनम् ।
द्यः कलत्र-पुत्रादि-धन-धान्यप्रदं द्विजाः ॥ ३
न्नादिभोज्यं वस्त्रादि सर्व्वमुत्पद्यते यतः ।
तो मृदादिप्रतिमा-पूजाभीष्टप्रदा भुवि ॥ ४
ुरुषाणाञ्च नारीणामधिकारोऽत्र निश्चितम् ।
द्यां तड़ागे कूपे वा जलान्तर्मृदमाहरेत् ॥ ५
ध्य गन्धचूर्णेन पेषयित्वा सुमण्डपे ।
स्तेन प्रतिमां कुर्य्यात् चीरेण च सुसंस्कृतम् ॥ ६
ङ्गप्रत्यङ्गकोपेतामायुधैश्च समन्विताम् ।
ासनस्थितां कृत्वा पूजयेदादरेण हि ॥ ७
ेघ्नेशादित्यविष्णूनामम्बायाश्च शिवस्य च ।
शिवस्य शिवलिङ्गञ्च सर्व्वदा पूजयेद्द्विजः ॥ ८
ोड़शैरुपचारैश्च कुर्य्यात् तत्फलसिद्धये ।
ष्पेण प्रोक्षणं कुर्य्यादभिषिकं समन्त्रकम् ॥ ९
ाल्यन्नेनैव नैवेद्यं सर्व्वं कुड़वमानतः ।
हे तु कुड़वं ज्ञेयं मानुषे प्रस्थमिष्यते ॥ १०
वे प्रस्थत्रयं योग्यं स्वयम्भोः प्रस्थपञ्चकम् ।
वं पूर्णफलं विद्यादधिकं वै द्वयत्रयम् ॥ ११
हस्रपूजया सत्यं सत्यलोकं लभेद्द्विजः ।
ादशाङ्गुलमायामं द्विगुणञ्च ततोऽधिकम् ॥ १२
माणमङ्गुलस्यैकं तदूर्द्ध्वं पञ्चकत्रयम् ।
योदारुकृतं पात्रं शिवमित्युच्यते बुधैः ॥ १३
ष्टभागः प्रस्थः स्यात् तच्चतुः कुड़वं मतम् ।
प्रस्थं शतप्रस्थं सहस्रप्रस्थमेव च ॥ १४
ल-तैलादि-गन्धानां यथायोग्यञ्च मानतः ।
ानुषार्षस्वयम्भूनां महापूजेति कथ्यते ॥ १५
भिषेकादात्मशुद्धिर्गन्धात् पुण्यमवाप्यते ।
ायुस्तृप्तिश्च नैवेद्याद्धूपादर्थमवाप्यते ॥ १६
दीपाज्ज्ञानमवाप्नोति ताम्बूलाद्भोगमाप्नुयात् ।
तस्मात् स्नानादिकं षट्कं प्रयत्नेन प्रसाधयेत् ॥ १७
नमस्कारो जपश्चैव सर्व्वाभीष्टप्रदावुभौ ।
पूजान्ते च सदा कार्य्यौ भोग-मोक्षार्थिभिर्नरैः ॥ १८
सम्पूज्य मनसा पूर्व्वं कुर्य्यात् तत्तत् सदा नरः ।
देवानां पूजया चैतत् तत्तल्लोकमवाप्नुयात् ॥ १९
तदवान्तरलोके च यथेष्टं भोग्यमाप्यते ।
तद्विशेषान् प्रवक्ष्यामि शृणुत श्रद्धया द्विजाः ॥ २०
विघ्नेशपूजया सम्यग्भूर्लोकेऽभीष्टमाप्नुयात् ।
शुक्रवारे चतुर्थ्याञ्च सिते श्रावण-भाद्रके ॥ २१
भिषगृक्षे धनुर्मासे विघ्नेशं विधिवद्यजेत् ।
शतं पूजासहस्रं वा तत्संख्याकदिनैर्व्रजेत् ॥ २२
देवाग्निश्रद्धया नित्यं पुत्रदञ्चेष्टदं नृणाम् ।
सर्व्वपापप्रशमनं तत्तद्दुरितनाशनम् ॥ २३
वारपूजां शिवादीनामात्मशुद्धिप्रदां विदुः ।
तिथि-नक्षत्र-योगाणामाधारं सार्व्वकामिकम् ॥ २४
तथा वृद्धि-क्षयाभावात् पूर्णब्रह्मात्मकं विदुः ।
उदयादुदयं वारो ब्रह्मप्रभृतिकर्म्मणाम् ॥ २५
तिथ्यादौ देवपूजा हि पूर्णभोगप्रदा नृणाम् ।
पूर्व्वभागः पितृणान्तु निशि युक्तः प्रशस्यते ॥ २६
परभागस्तु देवानां दिवा युक्तः प्रशस्यते ।
उदयव्यापिनी ग्राह्या मध्याह्ने यदि सा तिथिः ॥२७
देवकार्य्ये तथा ग्राह्यास्तिथिऋक्षादिकाः शुभाः ।
सम्यग्विचार्य्य वारादीन् कुर्य्यात् पूजाजपादिकम्॥२८
पूर्ज्यते ह्यनेनेति वेदेष्वर्थस्य योजना ।
पूर्भोगफलसिद्धिश्च जायते तेन कर्म्मणा ॥ २९
मनोभावांस्तथा ज्ञानमिष्टभोगार्थयोजनात् ।
पूजाशब्दार्थ एवं हि विश्रुतो लोक-वेदयोः ॥ ३०
नित्यनैमित्तिकं कालात् सद्यः काम्ये स्वनुष्ठिते ।
नित्यं मासञ्च पक्षञ्च वर्षञ्चैव यथाक्रमम् ॥ ३१
तत्तत्कर्म्मफलप्राप्तिस्तादृक्पापक्षयः क्रमात् ।
महागणपतेः पूजा चतुर्थ्यां कृष्णपक्षके ॥ ३२
पक्षपापक्षयकरी पक्षभोगफलप्रदा ।
चैत्रे चतुर्थ्यां पूजा च कृता मासफलप्रदा ॥ ३३
वर्षभोगप्रदा ज्ञेया कृता वै सिंहभाद्रके ।
श्रावणादित्यवारे च सप्तम्यां हस्तभे दिने ॥ ३४

माघशुक्ले च सप्तम्यामादित्ययजनं चरेत् ।
ज्येष्ठभाद्रकसौम्ये च द्वादश्यां श्रवणार्च्चके ॥ ३५
द्वादश्यां विष्णुयजनमिष्टसम्पत्करं विदुः ।
श्रावणे विष्णुयजनमिष्टारोग्यप्रदं भवेत् ॥ ३६
गवादीन् द्वादशानर्थान् साङ्गान् दत्त्वा तु यत् फलम्
तत् फलं समवाप्नोति द्वादश्यां विष्णुतर्पणात् ॥ ३७
द्वादश्यां द्वादशान् विप्रान् विष्णोर्द्वादशनामतः ।
षोड़शैरुपचारैश्च यजेत् तत्प्रीतिमाप्नुयात् ॥ ३८
एवञ्च सर्व्वदेवानां तत्तद्द्वादशनामकैः ।
द्वादशब्रह्मयजनं तत्तत्प्रीतिकरं भवेत् ॥ ३९
कर्कटे सोमवारे च नवम्यां मृगशीर्षके ।
अम्बां यजेद्भूतिकामः सर्व्वभोगफलप्रदाम् ॥ ४०
आश्वयुक् शुक्लनवमी सर्व्वाभीष्टफलप्रदा ।
आदित्यवारे चतुर्द्दश्यां कृष्णपक्षे विशेषतः ॥ ४१
आर्द्रायाञ्च महार्द्रायां शिवपूजा विशिष्यते ।
माघकृष्णचतुर्द्दश्यां सर्व्वाभीष्टफलप्रदा ॥ ४२
आयुष्करी मृत्युहरा सर्व्वसिद्धिकरी नृणाम् ।
ज्येष्ठमासे महार्द्रायां चतुर्द्दशीदिनेऽपि च ॥ ४३
मार्गशीर्षार्द्रिकायां वा षोड़शैरुपचारकैः ।
तत्तन्मूर्त्तिशिवं पूज्य तस्य वै पाददर्शनम् ॥ ४४
शिवस्य यजनं ज्ञेयं भोगमोक्षप्रदं नृणाम् ।
वारादिदेवयजनं कार्त्तिके हि विशिष्यते ॥ ४५
कार्त्तिके मासि सम्प्राप्ते सर्व्वान् देवान् यजेद्बुधः ।
दानेन तपसा होमैर्जपेन नियमेन च ॥ ४६
षोड़शैरुपचारैश्च प्रतिमाविप्रमन्त्रकैः ।
ब्राह्मणानां भोजनेन निष्कामार्त्तिकको भवेत् ॥४७
कार्त्तिके देवयजनं सर्व्वभोगप्रदं भवेत् ।
व्याधीनां हरणञ्चैव भवेद्भूतग्रहक्षयः ॥ ४८
कार्त्तिकादित्यवारेषु नृणामादित्यपूजनात् ।
तैलकार्पासदानात् तु भवेत् कुष्ठादिसंक्षयः ॥ ४९
हरीतकीमरीचानां वस्त्रक्षीरादिदानतः ।
ब्रह्मप्रतिष्ठया चैव क्षयरोगक्षयो भवेत् ॥ ५०
दीपसर्षपदानाच्च अपस्मारक्षयो भवेत् ।
कृत्तिका सोमवारेषु शिवस्य यजनं नृणाम् ॥ ५१
महादारिद्र्यशमनं सर्व्वसम्पत्करं भवेत् ।
गृहक्षेत्रादिदानाच्च गृहोपकरणादिना ॥ ५२

कृत्तिका भौमवारेषु स्कन्दस्य यजनान्नृणाम्
दीपघण्टादिदानाद्वै वाक्सिद्धिरचिराद्भवेत्
कृत्तिका सौम्यवारेषु विष्णोर्वै यजनं नृणाम्
दध्योदनस्य दानञ्च सत्सन्तानकरं भवेत् ॥
कृत्तिका गुरुवारेषु ब्रह्मणो यजनाद्धनैः ।
मधुस्वर्णाज्यदानेन भोगवृद्धिर्भवेन्नृणाम् ॥
कृत्तिका शुक्रवारेषु गजकोमेड़याजनात् ।
गन्धपुष्पान्नदानेन भोग्यवृद्धिर्भवेन्नृणाम् ॥
वन्ध्या सुपुत्त्रं लभते स्वर्णरौप्यादिदानतः ।
कृतिका शनिवारेषु दिक्पालानाञ्च वन्दनम्
दिग्गजानाञ्च नागानां सेतुपानाञ्च पूजनम् ।
त्र्यम्बकस्य च रुद्रस्य विष्णोः पापहरस्य
ज्ञानदं ब्रह्मणश्चैव धन्वन्तर्य्यश्विनोस्तथा ।
रोगापमृत्युहरणं तत्कालव्याधिशान्तिदम्
लवणायसतैलानां माषादीनाञ्च दानतः ।
त्रिकटुफलगन्धानां जलादीनाञ्च दानतः ।
द्रवाणां कठिनानाञ्च प्रस्थेन फलमानतः ।
स्वर्गप्राप्तिर्धनुर्मासि ह्युषःकाले च पूजनम् ॥
शिवादीनाञ्च सर्व्वेषां क्रमाद् सर्व्वसिद्धये ।
शाल्यन्नस्य हविष्यस्य नैवेद्यं शस्तमुच्यते ।
विविधान्नस्य नैवेद्यं धनुर्मासे विशिष्यते ।
मार्गशीर्षेऽन्नदस्यैव सर्व्वमिष्टफलं भवेत् ॥
पापक्षयञ्चेष्टसिद्धिञ्चारोग्यं धर्म्ममेव च ।
सम्यग्वेदपरिज्ञानं सदनुष्ठानमेव च ॥ ६४
इहामुत्र महाभोगानन्ते योगञ्च शाश्वतम्
वेदान्तज्ञानसिद्धिञ्च मार्गशीर्षान्नदो लभेत्
मार्गशीर्षे ह्युषःकाले दिनत्रयमथापि वा ।
यजेद्देवान् भोगकामो नाधनुर्मासिको भवेत्
यावत्सङ्गवकालन्तु धनुर्मासे विधीयते ।
धनुर्मासे निराहारो मासमात्रं जितेन्द्रियः
आमध्याह्नं जपेद्विप्रो गायत्त्रीं वेदमातरम् ।
पञ्चाक्षरादिकान् मन्त्रान् पश्चादासुप्तिकं
ज्ञानं लब्ध्वा च देहान्ते विप्रो मुक्तिमवाप्नुयात्
अन्येषां नरनारीणां त्रिःस्नानेन जपेन च ।
सदा पञ्चाक्षरस्यैव विशुद्धं ज्ञानमाप्यते ।
इष्टमन्त्रान् सदा जप्त्वा महापापक्षयं लभेत्

...नुर्मासि विशेषेण महानैवेद्यमाचरेत्।
...ालितखुलभारेण मरीचप्रस्थकेन च ॥ ७१
...ाणनाद्ध द्वादशं सर्व्वं मध्वाज्यकुडवेन हि।
...ेणयुक्तेन मुद्गेन द्वादशव्यञ्जनेन च ॥ ७२
...तपक्वैरपूपैश्च मोदकैः शालिकादिभिः।
...दशैश्च दधिक्षीरैर्द्वादशप्रस्थकेन च ॥ ७३
...ारिकेलफलादीनां तथा गणनया सह।
...दशक्रमुकैर्युक्तं षट्त्रिंशत्पत्रकैर्युतम् ॥ ७४
...पूरखुरचूर्णेन पञ्चसौगन्धिकैर्युतम्।
...ाम्बूलयुक्तन्तु यदा महानैवेद्यलक्षणम् ॥ ७५
...हानैवेद्यमेतद्वै देवतार्पणपूर्व्वकम्।
...र्णानुक्रमपूर्व्वेण तद्भक्तेभ्यः प्रदापयेत् ॥ ७६
...वत्त्वौदननैवेद्याद्भूमौ राष्ट्रपतिर्भवेत्।
...ानैवेद्यदानेन नरः स्वर्गमवाप्नुयात् ॥ ७७
...द्यदानेन सहस्रेण द्विजर्षभाः।
...यलोकञ्च तल्लोके पूर्णमायुरवाप्नुयात् ॥ ७८
...हस्राणाञ्च त्रिंशत्या महानैवेद्यदानतः।
...दूर्ध्वलोकमाप्यैव न पुनर्जन्मभाग्भवेत् ॥ ७९
...हस्राणाञ्च षट्त्रिंशज्जन्मनैवेद्यमीरितम्।
...वन्नैवेद्यदानन्तु महापूर्णं तदुच्यते ॥ ८०
...हापूर्णस्य नैवेद्यं जन्मनैवेद्यमिष्यते।
...मनैवेद्यदानेन पुनर्जन्म न विद्यते ॥ ८१
...र्जे मासि दिने पुण्ये जन्मनैवेद्यमाचरेत्।
...ान्ति-पात-जन्मर्क्ष-पौर्णमास्यादिसंयुते ॥ ८२
...दजन्मदिने कुर्य्याज्जन्मनैवेद्यमुत्तमम्।
...मान्तरेषु जन्मर्क्षपूर्णयोगदिनेऽपि च ॥ ८३
...ने च शनैर्वापि तावत्साहस्रमाचरेत्।
...मनैवेद्यदानेन जन्मार्पणफलं लभेत् ॥ ८४
...मार्पणाच्छिवः प्रीतः स्वसायुज्यं ददाति हि।
... तज्जन्मनैवेद्यं शिवस्यैव प्रदापयेत् ॥ ८५
...नेलिङ्गस्वरूपेण शिवो जन्मनिरूपकः।
...ाज्जन्मनिवृत्त्यर्थं जन्मपूजा शिवस्य हि ॥ ८६
...दुनादात्मक सर्व्वं जगत् स्थावरजङ्गमम्।
...दुः शक्तिः शिवो नादः शिवशक्त्यात्मकं जगत्॥८७
...ाधारमिदं बिन्दुर्बिन्द्वाधारमिदं जगत्।
...दाधारभूतौ हि बिन्दु-नादौ व्यवस्थितौ ॥ ८८

बिन्दु-नादयुतं सर्व्वं सकलीकरणं भवेत्।
सकलीकरणाज्जन्म जगत् प्राप्नोत्यसंशयः ॥ ८९
बिन्दु-नादात्मकं लिङ्गं जगत्कारणमुच्यते।
बिन्दुर्देवी शिवो नादः शिवलिङ्गन्तु कथ्यते ॥ ९०
तस्माज्जन्मनिवृत्त्यर्थं शिवलिङ्गं प्रपूजयेत्।
माता देवी बिन्दुरूपा नादरूपः शिवः पिता ॥ ९१
पूजिताभ्यां पितृभ्यान्तु परमानन्द एव हि।
परमानन्दलाभार्थं शिवलिङ्गं प्रपूजयेत् ॥ ९२
सा देवी जगतां माता स शिवो जगतः पिता।
पित्रोः शुश्रूषके नित्यं कृपाधिक्यं हि वर्द्धते ॥ ९३
कृपयान्तर्गतैश्वर्यं पूजकस्य ददाति हि।
तस्मादन्तर्गतानन्दलाभार्थं मुनिपुङ्गवाः ॥ ९४
पितृमातृस्वरूपेण शिवलिङ्गं प्रपूजयेत्।
भर्गः पुरुषरूपो हि भर्गा प्रकृतिरुच्यते ॥ ९५
अव्यक्तान्तरधिष्ठानं गर्भः पुरुष उच्यते।
सुव्यक्तान्तरधिष्ठानं गर्भः प्रकृतिरुच्यते ॥ ९६
पुरुषस्त्वादिगर्भो हि गर्भवान् जनको यतः।
पुरुषात् प्रकृतौ युक्तं प्रथमं जन्म कथ्यते ॥ ९७
प्रकृतेर्व्यक्ततां यातं द्वितीयं जन्म कथ्यते।
जन्म जन्तुर्मृत्युजन्म पुरुषात् प्रतिपद्यते ॥ ९८
अन्यतो भाव्यतेऽवश्यं मायया जन्म कथ्यते।
जीर्य्यते जन्मकालाद्यत् तस्माज्जीव इति स्मृतः ॥९९
जन्यते तन्यते पाशैर्जीवशब्दार्थ एव हि।
जन्मपाशनिवृत्त्यर्थं जन्मलिङ्गं प्रपूजयेत् ॥ १००
भं वृद्धिं गच्छतीत्यर्थाद्भगः प्रकृतिरुच्यते।
प्राकृतैः शब्दमात्राद्यैः प्राकृतेन्द्रियभोजनात् ॥१०१
भगस्येदं भोगमिति शब्दार्थो मुख्यतः श्रुतः।
मुख्यो भगस्तु प्रकृतिर्भगवान् शिव उच्यते ॥ १०२
भगवान् भोगदाता हि नान्यभोगप्रदायकः।
भगस्वामी च भगवान् भर्ग इत्युच्यते बुधैः। १०३
भगेन सहितं लिङ्गं भगं लिङ्गेन संयुतम्।
इहामुत्र च भोगार्थं नित्यभोगार्थमेव च ॥ १०४
भगवन्तं महादेवं शिवलिङ्गं प्रपूजयेत्।
लोकप्रसविता सूर्य्यस्तच्चिह्नं प्रसवाद्भवेत् ॥ १०५
लिङ्गे प्रसूतिकर्त्तारं लिङ्गिनं पुरुषो यजेत्।
लिङ्गार्थगमकं चिह्नं लिङ्गमित्यभिधीयते ॥ १०६

लिङ्गमर्थं हि पुरुषं शिवं गमयतीत्यदः।
शिव-शक्त्योश्च चिह्नस्य मेलनं लिङ्गमुच्यते ॥ १०७
स्वचिह्नपूजनात् प्रीतश्चिह्नकार्य्यं न वीयते।
चिह्नकार्य्यन्तु जन्मादि जन्माद्यं विनिवर्त्तते ॥ १०८
प्राकृतैः पुरुषैश्चापि वाह्याभ्यन्तरसम्भवैः।
षोड़शैरुपचारैश्च शिवलिङ्गं प्रपूजयेत् ॥ १०९
एवमादित्यवारे हि पूजा जन्मनिवर्त्तिका।
आदिवारे महालिङ्गं प्रणवेनैव पूजयेत् ॥ ११०
आदिवारे पञ्चगव्यैरभिषिक्तो विशिष्यते।
गोमयं गोजलं चीरं दध्याज्यं पञ्चगव्यकम् ॥ १११
क्षीराद्यञ्च पृथक् चैव मधुना चेक्षुसारकैः।
गव्यक्षीरान्ननैवेद्यं प्रणवेनैव कारयेत् ॥ ११२
प्रणवं ध्वनिलिङ्गन्तु नादलिङ्गं स्वयम्भुवः।
बिन्दुलिङ्गन्तु यन्त्रं स्यान्मकारन्तु प्रतिष्ठितम् ॥ ११३
उकारं चरलिङ्गं स्यादकारं गुरुविग्रहम्।
षड़्लिङ्गपूजया नित्यं जीवन्मुक्तो न संशयः ॥ ११४
शिवस्य भक्त्या पूजा हि जन्ममुक्तिकरी नृणाम्।
रुद्राक्षधारणात् पादमर्द्धं वै भूतिधारणात् ॥ ११५
त्रिपादं मन्त्रजाप्याच्च पूजया पूर्णभक्तिमान्।
शिवलिङ्गञ्च भक्ताञ्च पूज्य मोक्षं लभेन्नरः ॥ ११६
य इमं पठतेऽध्यायं शृणुयाद्वा समाहितः।
तस्यैव शिवभक्तिश्च वर्द्धते सुदृढ़ा द्विजाः ॥ ११७

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
चतुर्द्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः।

ऋषय ऊचुः।

प्रणवस्य च माहात्म्यं षड़्लिङ्गस्य महामुने।
शिवभक्तस्य पूजाञ्च क्रमशो ब्रूहि नः प्रभो ॥ १

सूत उवाच।

तपोधनैर्भवद्भिश्च सम्यक् प्रश्नमिदं कृतम्।
अस्योत्तरं महादेवो जानाति स न चापरः ॥ २
अथापि वच्मे तमहं शिवस्य कृपयैव हि।
शिवोऽस्माकञ्च युष्माकं रक्षां गृह्णातु भूरिशः ॥ ३
प्रो हि प्रकृतिजातस्य संसारस्य महोदधेः।
नवं नावान्तरमिति प्रणवं वै विदुर्बुधाः ॥ ४
प्रः प्रपञ्चो न नास्ती वो युष्माकं प्रणवं विदुः।
प्रकर्षेण नयेद्‌यस्मान्मोक्षं वा प्रणवं विदुः ॥ ५
स्वजापकानां योगिनां स्वमन्त्रपूजकस्य च।
सर्व्वकर्म्मक्षयं कृत्वा दिव्यज्ञानन्तु नूतनम् ॥ ६
तमेव मायारहितं नूतनं परिचक्षते।
प्रकर्षेण महात्मानं नवं शुद्धस्वरूपकम् ॥ ७
नूतनं वै करोतीति प्रणवं तं विदुर्बुधाः।
प्रणवं द्विविधं प्रोक्तं सूक्ष्म-स्थूलविभेदतः ॥
सूक्ष्ममेकाक्षरं विद्यात् स्थूलं पञ्चाक्षरं विदुः।
सूक्ष्ममव्यक्तपञ्चार्णं सुव्यक्तार्णं तथेतरत् ॥
जीवन्मुक्तस्य सूक्ष्मं हि सर्व्वसारं हि तस्य...
मन्त्रेणार्थानुसन्धानं स्वदेहविलयावधि ॥
स्वदेहे गलिते पूर्णं शिवं प्राप्नोति निश्चयः।
केवलं मन्त्रजापी तु योगं प्राप्नोति निश्चयः ॥
षट्‌त्रिंशत्कोटिजापी तु निश्चयं योगमाप्नुयात्।
सूक्ष्मञ्च द्विविधं ज्ञेयं ह्रस्व-दीर्घविभेदतः ॥
अकारश्च उकारश्च मकारश्च ततः परम्।
बिन्दुनादयुतं तद्धि शब्दकालकलान्वितम्।
दीर्घप्रणवमेवं हि योगिनामेव हृद्गतम्।
मकारं तं त्रितत्त्वं हि ह्रस्वप्रणव उच्यते ॥
शिवः शक्तिस्तयोरैक्यं मकारन्तु त्रिकाल...
ह्रस्वमेवं हि जाप्यं स्यात् सर्व्वपापक्षयैषि...
भू-वायु-कनकार्णों-द्यो-शब्दाद्याश्च तथा...
आशान्वयी दश पुनः प्रवृत्ता इति कथ्यते।
ह्रस्वमेव प्रवृत्तानां निवृत्तानान्तु दीर्घकम्।
व्याहृत्यादौ च मन्त्रादौ कामं शब्दकलाद्...
वेदादौ च प्रयोज्यं स्याद्वन्दने सन्ध्ययोर...
नवकोटिजपाज्जप्त्वा संशुद्धः पुरुषो भवेत्।
पुनश्च नवकोट्या तु पृथिवीजयमाप्नुयात्।
पुनश्च नवकोट्या तु ह्यपां जयमवाप्नुयात्।
पुनश्च नवकोट्या तु तेजसां जयमाप्नुयात्।
पुनश्च नवकोट्या तु वायोर्जयमवाप्नुयात्।
आकाशजयमाप्नोति नवकोटिजपेन वै ॥
गन्धादीनां क्रमेणैव नवकोटिजपेन वै।
अहङ्कारस्य च पुनर्नवकोटिजपेन व ॥

सहस्रमन्त्रजप्तेन नित्यशुद्धो भवेत् पुमान् ।
ततः परं स्वसिद्ध्यर्थं जपो भवति हि द्विजाः ॥ २२
एवमष्टोत्तरशत-कोटिजप्तेन वै पुनः ।
प्रणवेन प्रबुद्धस्तु शुद्धयोगमवाप्नुयात् ॥ २३
शुद्धयोगेन संयुक्तो जीवन्मुक्तो न संशयः ।
सदा जपन् सदा ध्यायन् शिवं प्रणवरूपिणम् ॥ २४
समाधिस्थो महायोगी शिव एव न संशयः ।
ऋषि-च्छन्दो-देवतादि न्यस्य देहे पुनर्जपेत् ॥ २५
प्रणवं मातृकायुक्तं देहे न्यस्य ऋषिर्भवेत् ।
दशमातृषडध्वादि सर्व्वं न्यासफलं लभेत् ॥ २६
प्रवृत्तानाञ्च मिश्राणां स्थूलप्रणवमिष्यते ।
क्रिया-तपो-जपैर्युक्तास्त्रिविधाः शिवयोगिनः ॥ २७
धनादिविभवैश्चैव कराद्यङ्गैर्नमादिभिः ।
क्रियया पूजया युक्तः क्रियायोगीति कथ्यते ॥ २८
युक्तश्च मितभुग्बाह्येन्द्रियजयान्वितः ।
रद्रोहादिरहितस्तपोयोगीति कथ्यते ॥ २९
एतैर्युक्तः सदा शुद्धः सर्व्वकामादिवर्ज्जितः ।
सदाजपपरः शान्तो जपयोगीति तं विदुः ॥ ३०
उपचारैः षोड़शभिः पूजया शिवयोगिनाम् ।
सालोक्यादिक्रमेणैव शुद्धो मुक्तिं लभेन्नरः ॥ ३१
जपयोगमथो वक्ष्ये वदतः शृणुत द्विजाः ।
तपःकर्त्तुर्जपः प्रोक्तो यज्जपन् परिमार्ज्जते ॥ ३२
शिवनाम नमःपूर्व्वं चतुर्थ्यां पञ्चतत्त्वकम् ।
स्थूलप्रणवरूपं हि शिवपञ्चाक्षरं द्विजाः ॥ ३३
पञ्चाक्षरजपेनैव सर्व्वसिद्धिं लभेन्नरः ।
प्रणवेनादिसंयुक्तं सदा पञ्चाक्षरं जपेत् ॥ ३४
गुरूपदेशं सङ्गम्य सुखवासे सुभूतले ।
पूर्व्वपक्षे समारभ्य कृष्णभूतावधि द्विजाः ॥ ३५
माघं भाद्रं विशिष्टन्तु सर्व्वकालोत्तमोत्तमम् ।
एकवारं मिताशी तु वाग्यतो नियतेन्द्रियः ॥ ३६
स्वस्य राजपितृणाञ्च शुश्रूषणञ्च नित्यशः ।
सहस्रजपमात्रेण भवेच्छुद्धोऽन्यथा ऋणी ॥ ३७
पञ्चाक्षरं पञ्चलक्षं जपेच्छिवमनुस्मरन् ।
पद्मासनस्थं शिवदं गङ्गा-चन्द्रकलान्वितम् ॥ ३८
वामोरुस्थितशक्त्या च विराजन्तं महागणैः ।
मृगटङ्कधरं देवं वरदाभयपाणिकम् ॥ ३९
सदानुग्रहकर्त्तारं सदाशिवमनुस्मरन् ।
सम्पूज्य मनसा पूर्व्वं हृदि वा सूर्य्यमण्डले ॥ ४०
जपेत् पञ्चाक्षरीं विद्यां प्राङ्मुखः शुद्धकर्म्मकृत् ।
प्रातः कृष्णचतुर्द्दश्यां नित्यकर्म्म समाप्य च ॥ ४१
मनोरमे शुचौ देशे नियतः शुद्धमानसः ।
पञ्चाक्षरस्य मन्त्रस्य सहस्रं द्वादशं जपेत् ॥ ४२
वरयेच्च सपत्नीकान् शैवान् वै ब्राह्मणोत्तमान् ।
एकं गुरुवरं शिष्टं वरयेत् साम्बमूर्त्तिकम् ॥ ४३
ईशानञ्चाथ पुरुषमघोरं वाममेव च ।
सद्योजातञ्च पञ्चैव शिवभक्तान् द्विजोत्तमान् ॥ ४४
पूजाद्रव्याणि सम्भाव्य शिवपूजां समारभेत् ।
शिवपूजाञ्च विधिवत् कृत्वा होमं समारभेत् ॥ ४५
मुखान्तञ्च स्वसूत्रेण कृत्वा होमं समाचरेत् ।
दशैकं वा शतैकं वा सहस्रैकमथापि वा ॥ ४६
कापिलेन घृतेनैव जुहुयात् स्वयमेव हि ।
कारयेच्छिवभक्तैर्वाप्यष्टोत्तरशतं बुधः ॥ ४७
होमान्ते दक्षिणा देया गुरोर्गोमिथुनं तथा ।
ईशानादिस्वरूपांस्तान् गुरुं साम्बं विभाव्य च ॥ ४८
तेषां यत् सिक्ततोयेन स्वशिरःस्नानमाचरेत् ।
षट्त्रिंशत्कोटितीर्थेषु सद्यःस्नानफलं लभेत् ॥ ४९
दशाङ्गमन्नं तेषां वै दद्याद्वै भक्तिपूर्व्वकम् ।
पराबुद्ध्या गुरोः पत्नीमीशानादिक्रमेण तु ॥ ५०
परमान्नेन सम्पूज्य यथाविभवविस्तरम् ।
रुद्राक्षवस्त्रपूर्व्वञ्च वटकापूपकैर्युतम् ॥ ५१
बलिदानं ततः कृत्वा भूरिभोजनमाचरेत् ।
ततः सम्प्रार्थ्य देवेशं जपं तावत् समापयेत् ॥ ५२
पुरश्चरणमेवन्तु कृत्वा मन्त्री भवेन्नरः ।
पुनश्च पञ्चलक्षेण सर्व्वपापक्षयो भवेत् ॥ ५३
अतलादि समारभ्य सत्यलोकावधि क्रमात् ।
पञ्चलक्षजपात् तत्तल्लोकैश्वर्य्यमवाप्नुयात् ॥ ५४
मध्ये मृतश्चेद्भोगान्ते भूमौ तज्जापको भवेत् ।
पुनश्च पञ्चलक्षेण ब्रह्मसामीप्यमाप्नुयात् ॥ ५५
पुनश्च पञ्चलक्षेण सारूप्यैश्वर्य्यमाप्नुयात् ।
आहृत्य शतलक्षेण साक्षाद्ब्रह्मसमो भवेत् ॥ ५६
कार्य्यब्रह्मण एवं हि सायुज्यं प्रतिपद्य वै ।
यथेष्टं भोगमाप्नोति तद्ब्रह्मप्रलयावधि ॥ ५७

पुनः कल्पान्तरे वृत्ते ब्रह्मपुत्रः स जायते ।
पुनश्च तपसा दीप्तः क्रमान्मुक्तो भविष्यति ॥ ५८
पृथ्व्यादिकार्यभूतेभ्यो लोका वै निर्म्मिताः क्रमात् ।
पातालादि च सत्यान्तं ब्रह्मलोकाश्चतुर्द्दश ॥ ५९
सत्यादूर्ध्वं क्षमान्तं वै विष्णुलोकाश्चतुर्द्दश ।
क्षमालोके कार्य्यविष्णुर्वैकुण्ठे वरपत्तने ॥ ६०
कार्य्यलक्ष्म्या महाभोगी रक्षां कुलाधितिष्ठति ।
तदूर्ध्वगाश्च शुच्यन्ता लोकाष्टाविंशतिः स्थिताः ॥ ६१
शुचौ लोके तु कैलासे रुद्रो वै भूतहृत् स्थितः ।
षडुत्तराश्च पञ्चाशदहिंसान्तास्तदूर्ध्वगाः ॥ ६२
अहिंसालोकमास्थाय ज्ञानकैलासके पुरे ।
कार्य्येश्वरस्तिरोभावं सर्व्वान् कुलाधितिष्ठति ॥ ६३
तदन्ते कालचक्रं हि कालातीतस्ततः परम् ।
शिवेनाधिष्ठितस्तत्र कालश्चक्रेश्वराह्वयः ॥ ६४
माहिषं धर्म्ममास्थाय सर्व्वान् कालेन युञ्जति ।
असत्यश्चाशुचिश्चैव हिंसा चैवाथ निर्घृणा ॥ ६५
असत्यादिचतुष्पादः सर्व्वांशः कामरूपधृक् ।
नास्तिक्यलक्ष्मीर्दुःसङ्गो वेदबाह्यध्वनिः सदा ॥ ६६
क्रोधसङ्गः कृष्णवर्णो महामहिषवेशवान् ।
तावन्महेश्वरः प्रोक्तस्तिरोधास्तावदेव हि ॥ ६७
तदर्व्वाक् कर्म्मभोगो हि तदूर्ध्वं ज्ञानभोगकम् ।
तदर्व्वाक् कर्म्ममाया हि ज्ञानमाया तदूर्ध्वकम् ॥ ६८
मा लक्ष्मीः कर्म्मभोगो वै याति मायेति कथ्यते ।
मा लक्ष्मीर्ज्ञानभोगो वै याति मायेति कथ्यते ॥ ६९
तदूर्ध्वं नित्यभोगो हि तदर्व्वाङ्नश्वरं विदुः ।
तदर्वाक् च तिरोधानं तदूर्ध्वं न तिरोधनम् ॥ ७०
तदर्व्वाक् पाशबन्धो हि तदूर्ध्वं न हि बन्धनम् ।
तदर्व्वाक् परिवर्त्तन्ते काम्यकर्म्मानुसारिणः ॥ ७१
निष्कामकर्म्मभोगस्तु तदूर्ध्वं परिकीर्त्तितः ।
तदर्व्वाक् परिवर्त्तन्ते बिन्दुपूजापरायणाः ॥ ७२
तदूर्ध्वं हि व्रजन्त्येव निष्कामा लिङ्गपूजकाः ।
तदर्व्वाक् परिवर्त्तन्ते शिवान्यसुरपूजकाः ॥ ७३
शिवैकनिरता ये च तदूर्ध्वं सम्प्रयान्ति ते ।
तदर्व्वाग्जीवकोटिः स्यात् तदूर्ध्वं परकोटिका ॥ ७४
सांसारिकास्तदर्व्वाक् च मुक्ताः खलु तदूर्ध्वगाः ।
तदर्व्वाक् परिवर्त्तन्ते प्राकृतद्रव्यपूजकाः ॥ ७५

तदूर्ध्वं हि व्रजन्त्येते पौरुषद्रव्यपूजकाः ।
तदर्व्वाक् शक्तिलिङ्गन्तु शिवलिङ्गं तदूर्ध्वकम् ।
तदर्व्वागावृतं लिङ्गं तदूर्ध्वं हि निरावृति ।
तदर्व्वाक् कल्पितं लिङ्गं तदूर्ध्वं वै न कल्पित
तदर्व्वाग्बाह्यलिङ्गं स्यादन्तरङ्गं तदूर्ध्वकम् ।
तदर्व्वाक् शक्तिलोका हि शतं वै द्वादशाधिक
तदर्व्वाग्बिन्दुरूपं हि नादरूपं तदुत्तरम् ।
तदर्व्वाक् कर्म्मलोकस्तु तदूर्ध्वं ज्ञानलोकक
नमस्कारस्तदूर्ध्वं हि मदाहङ्कारनाशनः ।
जनिजं वै तिरोधानं नानिषिध्यातते इति ।
ज्ञानशब्दार्थ एवं हि तिरोधाननिवारणात् ।
तदर्व्वाक् परिवर्त्तन्ते ह्याधिभौतिकपूजकाः ।
आध्यात्मिकार्च्चका एव तदूर्ध्वं सम्प्रयान्ति
तावद्वै वेदिभागं तन्महालोकात्मलिङ्गके ।
प्रकृत्याद्यष्टबन्धोऽपि वेद्यन्ते सम्प्रतिष्ठितः ।
एवमेतादृशं ज्ञेयं सर्व्वं लौकिक-वैदिकम् ।
अधर्म्ममहिषारूढं कालचक्रं तरन्ति ते ।
सत्यादिधर्म्मयुक्ता ये शिवपूजापराश्च ये ।
तदूर्ध्वं वृषभो धर्म्मो ब्रह्मचर्य्यस्वरूपधृक् ।
सत्यादिपादयुक्तस्तु शिवलोकाग्रतः स्थितः ।
क्षमाशृङ्गः शमश्रोत्रो वेदध्वनिविभूषितः ।
आस्तिक्यचक्षुर्निश्वास-गुरुबुद्धिमना वृषः ।
क्रियादिवृषभा ज्ञेयाः कारणादिषु सर्व्वदा ।
तं क्रियावृषभं धर्म्मं कालातीतोऽधितिष्ठति ।
ब्रह्म-विष्णु-महेशानां स्वस्वायुर्दिनमुच्यते ।
तदूर्ध्वं न दिनं रात्रिर्न जन्ममरणादिकम् ।
पुनः कारणसत्यान्ताः कारणब्रह्मणस्तथा ।
गन्धादिभ्यस्तु भूतेभ्यस्तदूर्ध्वं निर्म्मिताः सदा
सूक्ष्मगन्धस्वरूपा हि स्थिता लोकाश्चतुर्द्दश ।
पुनः कारणविष्णोर्वै स्थिता लोकाश्चतुर्द्दश ।
पुनः कारणरुद्रस्य लोकाष्टाविंशका मताः ।
पुनश्च कारणेशस्य षट्पञ्चाशत् तदूर्ध्वगाः ।
ततः परं ब्रह्मचर्य्यलोकाख्यं शिवसम्मतम् ।
तत्रैव ज्ञानकैलासे पञ्चावरणसंयुते ॥
पञ्चमण्डलसंयुक्तं पञ्चब्रह्मकलान्वितम् ।
आदिशक्तिसमायुक्तमादिलिङ्गन्तु तत्र वै ।

शिवालयमिदं प्रोक्तं शिवस्य परमात्मनः।
…शक्त्या समायुक्तस्तत्रैव परमेश्वरः॥ ९४
सृष्टिः स्थितिश्च संहारस्तिरोभावोऽप्यनुग्रहः।
…कृत्यप्रवीणोऽसौ सच्चिदानन्दविग्रहः॥ ९५
…ध्यानधर्म्मैः सदा यस्य सदानुग्रहतत्परः।
…माध्यासनमासीनः स्वात्मारामो विराजते॥ ९६
…स्य सन्दर्शनं साध्यं कर्मध्यानादिभिः क्रमात्।
…त्यादिकर्मयजनाद्भवकर्ममतिर्भवेत्॥ ९७
…क्रियादिशिवकर्मभ्यः शिवज्ञानं प्रसाधयेत्।
…दर्शनगताः सर्व्वे मुक्ता एव न संशयः॥ ९८
…क्तिरात्मस्वरूपेण स्वात्मारामत्वमेव हि।
…दया-तपो-जप-ज्ञान-ध्यान-धर्म्मेषु सुस्थितः॥ ९९
…शिवस्य दर्शनं लब्ध्वा स्वात्मारामत्वमेव हि।
… रविः स्वकिरणादशुद्धिमपनेष्यति॥ १००
…पापविचक्षणः शम्भुरज्ञानमपनेष्यति।
…ज्ञानविनिवृत्तौ तु शिवज्ञानं प्रवर्त्तते॥ १०१
…शिवज्ञानात् स्वस्वरूपमात्मारामत्वमेष्यति।
…त्मारामत्वसंसिद्धौ कृतकृत्यो भवेन्नरः॥ १०२
…नश्च शतलक्षेण ब्रह्मणः पदमाप्नुयात्।
…नश्च शतलक्षेण विष्णोः पदमवाप्नुयात्॥ १०३
…नश्च शतलक्षेण रुद्रस्य पदमाप्नुयात्।
…नश्च शतलक्षेण ऐश्वर्य्यपदमाप्नुयात्॥ १०४
…श्चैवंविधेनैव जपेन सुसमाहितः।
…वलोकादिभूतं हि कालचक्रमवाप्नुयात्॥ १०५
…लचक्रं पञ्चचक्रमेकैकेन क्रमोत्तरे।
…ष्टि-मोक्षौ ब्रह्मचक्रं भोग-मोक्षौ तु वैष्णवम्॥ १०६
…प-मोक्षौ रौद्रचक्रं भ्रमणञ्चेश्वरं विदुः।
…शिवचक्रं ज्ञान-मोक्षौ पञ्चचक्रं विदुर्बुधाः॥ १०७
…श्च दशकोट्या हि कारणब्रह्मणः पदम्।
…श्च दशकोट्या हि तत्पदैश्वर्य्यमाप्नुयात्॥ १०८
… क्रमेण विष्ण्वादेः पदं लब्ध्वा महौजसः।
…ण तत्पदैश्वर्य्यं लब्ध्वा चैव महात्मनः॥ १०९
…कोटिमनुं जप्त्वा पञ्चोत्तरमतन्द्रितः।
…लोकमवाप्नोति पञ्चमावरणाद्बहिः॥ ११०
…जसं मण्डपं तत्र नन्दीसंस्थानमुत्तमम्।
…रूपश्च वृषभस्तत्रैव परिदृश्यते॥ १११

सद्योजातस्य तत् स्थानं पञ्चमावरणं परम्।
वामदेवस्य च स्थानं चतुर्थावरणं पुनः॥ ११२
अघोरनिलयं पश्चात् तृतीयावरणं परम्।
पुरुषस्यैव साम्बस्य द्वितीयावरणं शुभम्॥ ११३
ईशानस्य परस्यैव प्रथमावरणं ततः।
ध्यानधर्म्मस्य च स्थानं पञ्चमं मण्डपं ततः॥ ११४
बलिनाथस्य संस्थानं तत्र पूर्णामृतप्रदम्।
चतुर्थं मण्डपं पश्चाच्चन्द्रशेखरमूर्त्तिमत्॥ ११५
सोमस्कन्दस्य च स्थानं तृतीयं मण्डपं परम्।
द्वितीयं मण्डपं नृत्यमण्डपं प्राङ्गरास्तिकाः॥ ११६
प्रथमं मूलमायायाः स्थानं तत्रैव शोभनम्।
ततः परं गर्भगृहं लिङ्गस्थानं परं शुभम्॥ ११७
नन्दीसंस्थानतः पश्चान्न विदुः शिववैभवम्।
नन्दीश्वरो बहिस्तिष्ठन् पञ्चाक्षरमुपासते॥ ११८
एवं गुरुक्रमाल्लब्धं नन्दीशाच्च मया पुनः।
ततः परं स्वसंवेद्यं शिवेनैवानुभावितम्॥ ११९
शिवस्य कृपया साक्षाच्छिवलोकस्य वैभवम्।
विज्ञातुं शक्यते सर्व्वैर्नान्यथेत्याङ्गरास्तिकाः॥ १२०
एवं क्रमेण मुक्ताः स्युर्ब्राह्मणा वै जितेन्द्रियाः।
अन्येषाञ्च क्रमं वक्ष्ये गदतः शृणुतादरात्॥ १२१
गुरूपदेशाज्जाप्यं वै ब्राह्मणानां नमोऽन्तकम्।
पञ्चाक्षरं पञ्चलक्षमायुष्यं प्रजपेद्द्विजः॥ १२२
स्त्रीत्वापनयनार्थन्तु पञ्चलक्षं जपेत् पुनः।
मन्त्रेण पुरुषो भूत्वा क्रमान्मुक्तो भवेद्बुधः॥ १२३
क्षत्रियः पञ्चलक्षेण क्षत्त्रत्वमपनेष्यति।
पुनश्च पञ्चलक्षेण क्षत्रियो ब्राह्मणो भवेत्॥ १२४
मन्त्रसिद्धिर्जपाच्चैव क्रमान्मुक्तो भवेन्नरः।
वैश्यस्तु पञ्चलक्षेण वैश्यत्वमपनेष्यति॥ १२५
पुनश्च पञ्चलक्षेण मन्त्रक्षत्त्रिय उच्यते।
पुनश्च पञ्चलक्षेण क्षत्त्रत्वमपनेष्यति॥ १२६
पुनश्च पञ्चलक्षेण मन्त्रब्राह्मण उच्यते।
शूद्रश्चैवं नमोऽन्तेन पञ्चविंशतिलक्षतः॥ १२७
मन्त्रविप्रत्वमापद्य पश्चाच्छुद्धो भवेद्द्विजः।
नारी वाथ नरो वाथ ब्राह्मणो वान्य एव वा॥ १२८
नमोऽन्तं वा नमःपूर्व्वमातुरः सर्व्वदा जपेत्।
तत्र स्त्रीणां तथैवोक्तं गुरुर्निर्द्देशयेत् क्रमात्॥ १२९

साधकः पञ्चलक्षान्ते शिवप्रीत्यर्थमेव हि।
महाभिषेकनैवेद्यं कृत्वा भक्तांश्च पूजयेत् ॥ १३०
पूजया शिवभक्तस्य शिवः प्रीततरो भवेत्।
शिवस्य शिवभक्तस्य भेदो नास्ति शिवो हि सः॥१३१
शिवस्वरूपमन्त्रस्य धारणाच्छिव एव हि।
शिवभक्तशरीरे हि शिवे तत्परमो भवेत् ॥ १३२
शिवभक्ताः क्रियाः सर्वा वेदसर्वक्रिया विदुः।
यावद्यावच्छिवमन्त्रं येन जप्तं भवेत् क्रमात् ॥ १३३
तावद्वै शिवसान्निध्यं तस्मिन् देहे न संशयः।
देवीलिङ्गं भवेद्रूपं शिवभक्तस्त्रियास्तथा ॥ १३४
यावन्मन्त्रं जपेद्देव्यास्तावत् सान्निध्यमस्ति हि।
शिवं सम्पूजयेद्धीमान् स्वयं वै शब्दरूपभाक् ॥ १३५
स्वयञ्चैव शिवो भूत्वा परां शक्तिं प्रपूजयेत्।
शक्तिं वेरञ्च लिङ्गञ्च ह्यालेख्यामायया यजेत् ॥ १३६
शिवलिङ्गं शिवं मत्वा स्वात्मानं शक्तिरूपकम्।
शक्तिलिङ्गञ्च देवीञ्च मत्वा स्वं शिवरूपकम् ॥ १३७
शिवलिङ्गं नादरूपं बिन्दुरूपन्तु शक्तिकम्।
उपप्रधानभावेन अन्योन्यासक्तलिङ्गकम् ॥ १३८
पूजयेच्च शिवं शक्तिं स शिवो मूलभावनात्।
शिवभक्तान् शिवमन्त्ररूपकाञ्छिवरूपकान् ॥ १३९
षोडशैरुपचारैश्च पूजयेदिष्टमाप्नुयात्।
येन शुश्रूषणाद्यैश्च शिवभक्तस्य लिङ्गिनः ॥ १४०
आनन्दं जनयेद्विद्वाञ्छिवः प्रीततरो भवेत्।
शिवभक्तान् सपत्नीकान् पत्न्या सह सदैव तत् ॥ १४१
पूजयेद्भोजनाद्यैश्च पञ्च वा दश वा शतम्।
धने देहे च मन्त्रे च भावनाशामवञ्चकः ॥ १४२
शिव-शक्तिस्वरूपेण न पुनर्जायते भुवि।
नाभेरधो ब्रह्मभागमाकण्ठं विष्णुभागकम् ॥ १४३
मुखं लिङ्गमिति प्रोक्तं शिवभक्तशरीरकम्।
मृतान् दाहादियुक्तान्वादाहादिरहितान्मृतान्१४४
उद्दिश्य पूजयेदादिपितरं शिवमेव हि।
पूजां कृत्वादिमातुश्च शिवभक्तांश्च पूजयेत् ॥ १४५
पितृलोकं समासाद्य क्रमान्मुक्तो भवेन्मृतः।
क्रियायुक्तदशभ्यश्च तपोयुक्तो विशिष्यते ॥ १४६
तपोयुक्तशतेभ्यश्च जपयुक्तो विशिष्यते।
जपयुक्तसहस्रेभ्यः शिवज्ञानी विशिष्यते ॥ १४७
शिवज्ञानिषु लक्षेभ्यो ध्यानयुक्तो विशिष्यते।
ध्यानयुक्तेषु कोटिभ्यः समाधिस्थो विशिष्यते।
उत्तरोत्तरवैशिष्ट्यात् पूजायामुत्तरोत्तरम्।
फलं वैशिष्ट्यरूपञ्च दुर्विज्ञेयं मनीषिभिः ॥
तस्माद्वै शिवभक्तस्य महिमानं वेत्ति को नरः।
शिव-शक्त्योः पूजनञ्च शिवभक्तस्य पूजनम् ॥
कुरुते यो नरो भक्त्या स शिवः शिवमेधते।
य इमं पठतेऽध्यायमर्थवद्वेदसम्मितम् ॥ १५१
शिवज्ञानी भवेद्विप्रः शिवेन सह मोदते।
श्रावयेच्छिवभक्तांश्च विशेषज्ञो मुनीश्वराः ॥
शिवप्रसादसिद्धिः स्याच्छिवस्य कृपया बुधाः।

इति श्रीशैवे महापुराणे विद्येश्वरसंहि
पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः।

ऋषय ऊचुः।

बन्ध-मोक्षस्वरूपं हि ब्रूहि सर्वार्थवित्तम।

सूत उवाच।

बन्ध-मोक्षं तथोपायं वक्ष्येऽहं शृणुतादरात्।
प्रकृत्याद्यष्टबन्धेन बद्धो जीवः स उच्यते।
प्रकृत्याद्यष्टबन्धेन निर्मुक्तो मुक्त उच्यते ॥ २
प्रकृत्यादिवशीकारो मोक्ष इत्युच्यते स्वतः।
बद्धजीवस्तु निर्मुक्तो मुक्तजीवः स कथ्यते।
प्रकृत्यग्रे ततो बुद्धिरहङ्कारो गुणात्मकः।
पञ्चतन्मात्रमित्येते प्रकृत्याद्यष्टकं विदुः ॥ ४
प्रकृत्याद्यष्टजो देहो देहजं कर्म्म उच्यते।
पुनश्च कर्म्मजो देहो जन्मकर्म्म पुनः पुनः ॥
शरीरं त्रिविधं ज्ञेयं स्थूलं सूक्ष्मञ्च कारणं
स्थूलं व्यापारदं प्रोक्तं सूक्ष्ममिन्द्रियभोगदं
कारणन्त्वात्मभोगार्थं जीवकर्म्मानुरूपतः।
सुखं दुःखं पुण्यपापैः कर्म्मभिः फलमश्नुते।
तस्माद्धि कर्म्मरज्ज्वा हि बद्धो जीवः पुनः पु
शरीरत्रयकर्म्मभ्यां चक्रवद्भ्राम्यते सदा ॥ ८
चक्रभ्रमनिवृत्त्यर्थं चक्रकर्त्तारमीडयेत्।
प्रकृत्यादि महाचक्रं प्रकृतेः परतः शिवः ॥

चक्रकर्त्ता महेशो हि प्रकृतेः परतो यतः।
पिबति वाथ वमति जीवाबालो जलं यथा ॥ १०
शिवस्तथा प्रकृत्यादि वशीकृत्याधितिष्ठति।
सर्व्वं वशीकृतं यस्मात् तस्माच्छिव इति स्मृतः।
शिव एव हि सर्व्वज्ञः परिपूर्णश्च निःस्पृहः ॥ ११

सर्व्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च महेश्वरस्य
यन्मानसैश्वर्य्यमवैति वेदः ॥ १२

अतः शिवप्रसादेन प्रकृत्यादि वशं भवेत्।
शिवप्रसादलाभार्थं शिवमेव प्रपूजयेत् ॥ १३
निःस्पृहस्य च पूर्णस्य तस्य पूजा कथं भवेत्।
शिवोद्देशकृतं कर्म्म प्रसादजनकं भवेत् ॥ १४
...ङ्गे बेरे भक्तजने शिवमुद्दिश्य पूजयेत्।
... मनसा वाचा धनेनापि प्रपूजयेत् ॥ १५
पूजया तु महेशो हि प्रकृतेः परमः शिवः।
प्रसादं कुरुते सत्यं पूजकस्य विशेषतः ॥ १६
शिवप्रसादात् कर्म्माद्यं क्रमेण स्ववशं भवेत्।
कर्म्मारभ्य प्रकृत्यन्तं यदा सर्व्वं वशं भवेत् ॥ १७
तदा मुक्त इति प्रोक्तः स्वात्मारामो विराजते।
प्रसादात् परमेशस्य कर्म्मदेहो यदा वशः ॥ १८
तदा वै शिवलोके तु वासः सालोक्यमुच्यते।
सामीप्यं याति साम्बस्य तन्मात्रे च वशं गते ॥ १९
तदा तु शिवसायुज्यमायुधाद्यैः क्रियादिभिः।
महाप्रसादलाभे च बुद्धिश्चापि वशा भवेत् ॥ २०
बुद्धिस्तु कार्य्यं प्रकृतेस्तत् सार्ष्टिरिति कथ्यते।
पुनर्महाप्रसादेन प्रकृतिर्वशमेष्यति ॥ २१
शिवस्य मानसैश्वर्य्यं तदाऽयत्नं भविष्यति।
सार्व्वज्ञाद्यं शिवैश्वर्य्यं लब्ध्वा स्वात्मनि राजते ॥ २२
तत् सायुज्यमिति प्राहुर्व्वेदागमपरायणाः।
एवंक्रमेण मुक्तिः स्याल्लिङ्गादौ पूजया स्वतः ॥ २३
अतः शिवप्रसादार्थं क्रियाद्यैः पूजयेच्छिवम्।
शिवक्रिया शिवतपः शिवमन्त्रजपः सदा ॥ २४
शिवज्ञानं शिवध्यानमुत्तरोत्तरमभ्यसेत्।
आ सुप्तेरा स्मृतेः कालं नयेद्धै शिवचिन्तया ॥ २५
सद्यादिभिश्च कुसुमैरर्च्चयेच्छिवमेष्यति।

ऋषय ऊचुः।

लिङ्गादौ शिवपूजाया विधानं ब्रूहि सुव्रत ॥ २६

सूत उवाच।

लिङ्गानाञ्च क्रमं वक्ष्ये यथावच्छृणुत द्विजाः।
तदेव लिङ्गं प्रथमं प्रणवं सार्व्वकामिकम् ॥ २७
सूक्ष्मप्रणवरूपं हि सूक्ष्मरूपन्तु निष्कलम्।
स्थूललिङ्गं हि सकलं तत् पञ्चाक्षरमुच्यते ॥ २८
तयोः पूजा तपः प्रोक्तं साक्षान्मोचप्रदे उभे।
पौरुषप्रकृतिभूतानि लिङ्गानि सुबहूनि च ॥ २९
तानि विस्तरतो वक्तुं शिवो वेत्ति न चापरः।
भूविकाराणि लिङ्गानि ज्ञातानि प्रब्रवीमि वः ॥ ३०
स्वयम्भूलिङ्गं प्रथमं विन्दुलिङ्गं द्वितीयकम्।
प्रतिष्ठितं चरञ्चैव गुरुलिङ्गन्तु पञ्चमम् ॥ ३१
देवर्षितपसा तुष्टः सान्निध्यार्थन्तु तत्र वै।
पृथिव्यन्तर्गतः शर्व्वो वीजं वै नादरूपतः ॥ ३२
स्थावराङ्कुरवद्भूमिमुद्भिद्य व्यक्त एव सः।
स्वयं भूतं जातमिति स्वयम्भूरिति तं विदुः ॥ ३३
तल्लिङ्गपूजया ज्ञानं स्वयमेव प्रवर्द्धते।
सुवर्णरजतादौ वा पृथिव्यां स्थण्डिलेऽपि वा ॥ ३४
स्वहस्ताल्लिखितं लिङ्गं शुद्धप्रणवमन्त्रकम्।
यन्त्रलिङ्गं समालिख्य प्रतिष्ठावाहनं चरेत् ॥ ३५
बिन्दु-नादमयं लिङ्गं स्थावरं जङ्गमञ्च यत्।
भावनामयमेतद्धि शिवदृष्टं न संशयः ॥ ३६
यत्र विश्वस्यते शम्भुस्तत्र तस्मै फलप्रदः।
स्वहस्ताल्लिखिते यन्त्रे स्थावरादावकृत्रिमे ॥ ३७
आवाह्य पूजयेच्छम्भुं षोड़शैरुपचारकैः।
स्वयमैश्वर्य्यमाप्नोति ज्ञानमभ्यासतो भवेत् ॥ ३८
देवैश्च ऋषिभिश्चापि स्वात्मसिद्ध्यर्थमेव हि।
समन्त्रेणात्महस्तेन कृतं यच्छुद्धमण्डले ॥ ३९
शुद्धभावनया चैव स्थापितं लिङ्गमुत्तमम्।
तल्लिङ्गपौरुषं प्राहुस्तत् प्रतिष्ठितमुच्यते ॥ ४०
तल्लिङ्गपूजया नित्यं पौरुषैश्वर्य्यमाप्नुयात्।
महद्भिर्ब्राह्मणैश्चापि राजभिश्च महाधनैः ॥ ४१
शिल्पिना कल्पितं लिङ्गं मन्त्रेण स्थापितञ्च यत्।
प्रतिष्ठितं प्राकृतं हि प्राकृतैश्वर्य्यभोगदम् ॥ ४२
यदूर्ज्जितञ्च नित्यञ्च तद्धि पौरुषमुच्यते।

यद्दुर्ब्बलमनित्यञ्च तद्धि प्राकृतमुच्यते ॥ ४३
लिङ्गं नाभिस्तथा जिह्वा नासाग्रञ्च शिखा क्रमात्।
कव्यादिषु त्रिलोकेषु लिङ्गमाध्यात्मिकं चरम् ॥ ४४
पर्व्वतं पौरुषं प्रोक्तं भूतलं प्राकृतं विदुः।
वृक्षादि पौरुषं ज्ञेयं गुल्मादि प्राकृतं विदुः ॥ ४५
षाष्टिकं प्राकृतं ज्ञेयं शालिगोधूमं पौरुषम्।
ऐश्वर्य्यं पौरुषं विद्यादणिमाद्यष्टसिद्धिदम् ॥ ४६
सुस्त्रीधनादिविषयं प्राकृतं प्राहुरास्तिकाः।
प्रथमं चरलिङ्गेषु रसलिङ्गं प्रकथ्यते ॥ ४७
रसलिङ्गं ब्राह्मणानां सर्व्वाभीष्टप्रदं भवेत्।
वाणलिङ्गं क्षत्रियाणां महाराज्यप्रदं शुभम् ॥ ४८
स्वर्णलिङ्गन्तु वैश्यानां महाधनपतित्वदम्।
शिलालिङ्गन्तु शूद्राणां महाशुद्धिकरं शुभम् ॥ ४९
स्फाटिकं वाणलिङ्गञ्च सर्व्वेषां सर्व्वकामदम्।
स्वीयाभावेऽन्यदीयन्तु पूजायां न निषिध्यते ॥ ५०
स्त्रीणान्तु पार्थिवं लिङ्गं सभर्त्तॄणां विशेषतः।
विधवानां प्रवृत्तानां स्फाटिकं परिकीर्त्तितम् ॥ ५१
विधवानां निवृत्तानां रसलिङ्गं विशिष्यते।
बाल्ये वा यौवने वापि वार्द्धके वापि सुव्रताः ॥ ५२
शुद्धस्फटिकलिङ्गन्तु स्त्रीणां तत् सर्व्वभोगदम्।
प्रवृत्तानां पीठपूजा सर्व्वाभीष्टप्रदा भुवि ॥ ५३
पात्रेणैव प्रवृत्तस्तु सर्व्वपूजां समाचरेत्।
अभिषेकान्ते नैवेद्यं शाल्यन्नेन समाचरेत् ॥ ५४
पूजान्ते स्थापयेल्लिङ्गं सम्पुटेषु पृथग्गृहे।
करपूजानिवृत्तानां स्वभोज्यन्तु निवेदयेत् ॥ ५५
निवृत्तानां परं सूक्ष्मं लिङ्गमेव विशिष्यते।
विभूत्याभ्यर्च्चनं कुर्य्याद्विभूतिञ्च निवेदयेत् ॥ ५६
पूजां कृत्वाथ तल्लिङ्गं शिरसा धारयेत् सदा।
विभूतिस्त्रिविधा प्रोक्ता लोक-वेद-शिवाग्निभिः ॥५७
लोकाग्निजमथो भस्म द्रव्यशुद्ध्यर्थमावहेत्।
मृद्दारुलोहरूपाणां धान्यानाञ्च तथैव च ॥ ५८
तिलादीनाञ्च द्रव्याणां वस्त्रादीनां तथैव च।
तथा पर्य्युषितानाञ्च भस्मना शुद्धिरिष्यते ॥ ५९
श्वादिभिर्दूषितानाञ्च भस्मना शुद्धिरिष्यते।
सजलं निर्ज्जलं भस्म यथायोग्यन्तु योजयेत् ॥ ६०
वेदाग्निजं तथा भस्म तत्कर्म्मान्तेषु धारयेत्।
मन्त्रेण क्रियया जन्यं कर्म्माग्नौ भस्मरूपधृ
तद्भस्मधारणात् कर्म्म स्वात्मन्यारोपितं भवे
अघोरेणात्ममन्त्रेण विल्वकाष्ठं प्रदाहयेत्॥
शिवाग्निरिति सम्प्रोक्तस्तेन दग्धं शिवाग्नि
कपिलागोमयं पूर्व्वं केवलं गव्यमेव वा॥ ६
शम्यश्वत्थपलाशान् वा वटारग्वधविल्वकान्
शिवाग्निना दहेच्छुद्धं तद्वै भस्म शिवाग्निज
दर्भाग्नौ वा दहेत् काष्ठं शिवमन्त्रं समुच्चरन्
सम्यक् संशोध्य वस्त्रेण नवकुम्भे निधापयेत्
दीप्त्यर्थं तत् तु संग्राह्यं मन्यते पूज्यतेऽपि च
भस्मशब्दार्थ एवं हि शिवः पूर्व्वं तथाकरोत्
यथा स्वविषये राजा सारं गृह्णाति यत् कर
यथा मनुष्याः शस्यादीन् दग्ध्वा सारं भजन्ति
यथा हि जाठराग्निश्च भक्ष्यादीन् विविधान्
दग्ध्वा सारतरं सारात् स्वदेहं परिपुष्यति॥ ६
तथा प्रपञ्चकर्त्तापि स शिवः परमेश्वरः।
स्वाधिष्ठेयप्रपञ्चस्य दग्ध्वा सारं गृहीतवान्
दग्ध्वा प्रपञ्चं तद्भस्म स्वात्मन्यारोपयच्छिवः
उद्धूलनेन व्याजेन जगत्सारं गृहीतवान्॥
स्वरत्नं स्थापयामास स्वकीये हि शरीरके।
केशमाकाशसारेण वायुसारेण वै मुखम्॥
हृदयञ्चाग्निसारेण त्वपां सारेण वै कटिम्
जानु चावनिसारेण तद्वत् सर्व्वं तदङ्गकम्॥
ब्रह्म-विष्ण्वोश्च रुद्राणां सारञ्चैव त्रिपुण्ड्रकम्
यथा तिलकरूपेण ललाटान्ते महेश्वरः॥
भवृद्धा सर्व्वमेतद्धि मन्यते स्वयमित्यसौ।
प्रपञ्चसारसर्व्वस्वमनेनैव वशीकृतम् ॥ ७४
तस्मादस्य वशीकर्त्ता नास्तीति स शिवः स्मृतः
यथा सर्व्वमृगाणाञ्च हिंसको मृगहिंसकः।
अस्य हिंसामृगो नास्ति तस्मात् सिंह इतीरि
शं नित्यं सुखमानन्दमिकारः पुरुषः स्मृतः।
वकारः शक्तिरमृतं मेलनं शिव उच्यते।
तस्मादेवं स्वमात्मानं शिवं कृत्वार्च्चयेच्छिवम्।
तस्मादुद्धूलनं पूर्व्वं त्रिपुण्ड्रं धारयेत् परम्
पूजाकाले हि सजलं शुद्ध्यर्थं निर्ज्जलं भवेत्
दिवा वा यदि वा रात्रौ नारी वाथ नरोऽपि

ूजार्थं सजलं भस्म त्रिपुण्ड्रं शैव धारयेत् ॥ ७९
त्रिपुण्ड्रं सजलं भस्म धृत्वा पूजां करोति यः ।
शिवपूजाफलं साङ्गं तस्यैव हि सुनिश्चितम् ॥ ८०
स्म वै शिवमन्त्रेण धृत्वा ह्यत्याश्रमी भवेत् ।
शिवाश्रमीति सम्प्रोक्तः शिवैकपरमो यतः ॥ ८१
शिवव्रतैकनिष्ठस्य नाशौचं न च सूतकम् ।
ललाटाग्रे सितं भस्म तिलकं धारयेन्मृदा ॥ ८२
वहस्ताद्गुरुहस्ताद्वा शिवभक्तस्य लक्षणम् ।
ुणान् रुन्ध इति प्रोक्तो गुरुशब्दस्य विग्रहः ॥ ८३
विकारान् राजसादीन् गुणान् रुन्धे व्यपोहति ।
ुणातीतः परशिवो गुरुरूपं समाश्रितः ॥ ८४
ुणत्रयं व्यपोह्याग्रे शिवं बोधयतीति सः ।
विश्वस्तानान्तु शिष्याणां गुरुरित्यभिधीयते ॥ ८५
्माद्गुरुशरीरन्तु गुरुलिङ्गं भवेद्बुधः ।
ुलिङ्गस्य पूजा तु गुरुशुश्रूषणं भवेत् ॥ ८६
ृतं करोति शुश्रूषा कायेन मनसा गिरा ।
्तं यद्गुरुणा पूर्व्वं शक्यं वाशक्यमेव वा ॥ ८७
करोत्येव हि पूतात्मा प्राणैरपि धनैरपि ।
स्माद्धि शासने योग्यः शिष्य इत्यभिधीयते ॥ ८८
रीराद्यर्थकं सर्व्वं गुरोर्दत्त्वा सुशिष्यकः ।
ग्रपाकं निवेद्याग्रे भुञ्जीयाद्गुर्व्वनुज्ञया ॥ ८९
शिष्यः पुत्र इति प्रोक्तः सदा शिष्यत्वयोगतः ।
मन्त्रलिङ्गाख्यमन्त्रशुक्रं कर्णयोनौ निषिच्य वै ॥ ९०
ातः पुत्रो मन्त्रपुत्रः पितरं पूजयेद्गुरुम् ।
मज्जयति पुत्रं वै संसारे जनकः पिता ॥ ९१
तारयति संसाराद्गुरुर्वै बोधकः पिता ।
भयोरन्तरं ज्ञात्वा पितरं गुरुमर्चयेत् ॥ ९२
ङ्गशुश्रूषया चापि धनाद्यैः स्वार्ज्जितैर्गुरुम् ।
ादादिकेशपर्य्यन्तं लिङ्गान्यङ्गानि यद्गुरोः ॥ ९३
्नरूपैः पादुकाद्यैः पादसंग्रहणादिभिः ।
स्नानाभिषेकनैवेद्यैर्भोजनैश्च प्रपूजयेत् ॥ ९४
ुरुपूजैव पूजा स्याच्छिवस्य परमात्मनः ।
ुरुशेषन्तु यत् सर्व्वमात्मशुद्धिकरं भवेत् ॥ ९५
्रोः शेषः शिवोच्छिष्टं जलमन्नादिनिर्म्मितम् ।
शिष्याणां शिवभक्तानां ग्राह्यं भोज्यं भवेद्द्विजाः ॥ ९६
र्व्वनुज्ञाविरहितं चौरवत् सकलं भवेत् ।
गुरोरपि विशेषज्ञं यत्नाद्गृह्णीत वै गुरुम् ॥ ९७
अज्ञानमोचनं साध्यं विशेषज्ञो हि मोचकः ।
आदौ च विघ्नशमनं कर्त्तव्यं कर्म्मपूर्त्तये ॥ ९८
निर्व्विघ्नेन कृतं साङ्गं कर्म्म वै सफलं भवेत् ।
तस्मात् सकलकर्म्मादौ विघ्नेशं पूजयेद्बुधः ॥ ९९
सर्व्वबाधानिवृत्त्यर्थं सर्व्वान् देवान् यजेद्बुधः ।
ज्वरादिग्रन्थिरोगाश्च बाधा ह्याध्यात्मिका मताः १००
पिशाचजम्बुकादीनां वल्मीकाद्युद्भवे तथा ।
अकस्मादेव गोधादिजन्तूनां पतनेऽपि च ॥ १०१
गृहे कच्छप-सर्प-स्त्री-दुर्ज्जनादर्शनेऽपि च ।
वृक्ष-नारी-गवादीनां प्रसूतिविपर्य्ययेऽपि च ॥ १०२
भावि दुःखं समायाति तस्मात् ते भौतिका मताः ।
अमेध्याश्मनिपातश्च महामारी तथैव च ॥ १०३
ज्वरमारी विसूचिश्च गोमारी च मसूरिका ।
जन्मर्क्ष-ग्रहसंक्रान्ति-ग्रहयोगाः खराशिके ॥ १०४
दुःस्वप्नदर्शनाद्याश्च मता वै ह्यधिदैविकाः ।
शव-चाण्डाल-पतितस्पर्शाद्येऽन्तर्गृहे गते ॥ १०५
एतादृशे समुत्पन्ने भाविदुःखस्य सूचके ।
शान्तियज्ञन्तु मतिमान् कुर्य्यात् तद्दोषशान्तये ॥ १०६
देवालयेऽथ गोष्ठे वा चैत्ये वापि गृहाङ्गणे ।
प्रादेशोन्नतधिष्ण्ये वै द्विहस्ते च स्वलङ्कृते ॥ १०७
भारभाव्रीहिधान्यं प्रस्थाप्य परिस्तृत्य च ।
मध्ये विलिख्य कमलं तथा दिक्षु विलिख्य वै ॥ १०८
तन्तुना वेष्टितं कुम्भं नवगुग्गलुधूपितम् ।
मध्ये स्थाप्य महाकुम्भं तथा दिक्ष्वपि विन्यसेत् ॥ १०९
सनालाम्रककूर्च्चादीन् कलशांश्च तथाष्टसु ।
पूरयेन्मन्त्रपूतेन पञ्चद्रव्ययुतेन हि ॥ ११०
प्रक्षिपेन्नवरत्नानि नीलादीन् क्रमशस्तथा ।
कर्म्मज्ञञ्च सपत्नीकमाचार्य्यं वरयेद्बुधः ॥ १११
सुवर्णप्रतिमां विष्णोरिन्द्रादीनाञ्च निक्षिपेत् ।
सशिरस्के मध्यकुम्भे विष्णुमावाह्य पूजयेत् ॥ ११२
प्रागादिषु यथामन्त्रमिन्द्रादीन् क्रमशो यजेत् ।
तत्तन्नाम्ना चतुर्थ्या च नमोऽन्तेन यथाक्रमम् ॥ ११३
आवाहनादिकं सर्व्वमाचार्य्येणैव कारयेत् ।
आचार्य्यं ऋत्विजा सार्द्धं तन्मन्त्रान् प्रजपेच्छतम् ११४
कुम्भस्य पश्चिमे भागे जपान्ते होममाचरेत् ।

कोटिं लक्षं सहस्रं वा शतमष्टोत्तरं बुधाः ॥ ११५
एकाहं वा नवाहं वा तथा मण्डलमेव वा ।
यथायोग्यं प्रकुर्व्वीत कालदेशानुसारतः ॥ ११६
शमीहोमश्च शान्त्यर्थं वृत्त्यर्थं च पलाशकम् ।
समिदन्नाज्यनैर्द्रव्यैर्नाम्ना मन्त्रेण वा हुनेत् ॥ ११७
प्रारम्भे यत् कृतं द्रव्यं तत् क्रियान्तं समाचरेत् ।
पुण्याहं वाचयित्वान्ते दिने सम्प्रोक्षयेज्जलैः ॥ ११८
ब्राह्मणान् भोजयेत् पश्चाद् यावदाहुतिसंख्यया ।
आचार्य्यश्च हविष्याशी ऋत्विजश्च भवेद्बुधाः ॥ ११९
आदित्यादीन् ग्रहान् यजेत् सर्व्वहोमान्त एव हि ।
ऋत्विग्भ्यो दक्षिणां दद्यान्नवरत्नं यथाक्रमम् ॥ १२०
दशदानं ततः कुर्य्याद्भूरिदानं ततः परम् ।
बालानामुपनीतानां दक्षिणां वनिनां धनम् ॥ १२१
कन्यानाञ्च सभर्त्तॄणां विधवानां ततः परम् ।
तन्त्रोपकरणं सर्व्वमाचार्य्याय निवेदयेत् ॥ १२२
उत्पातानाञ्च मारीणां दुःखस्वामी यमः स्मृतः ।
तस्माद्यमस्य प्रीत्यर्थं कालदानं प्रदापयेत् ॥ १२३
शतनिष्केण वा कुर्य्याद्दशनिष्केण वा पुनः ।
पाशाङ्कुशधरं कालं कुर्य्यात् पुरुषरूपिणम् ॥ १२४
तत्स्वर्णप्रतिमादानं कुर्य्याद्दक्षिणया सह ।
तिलदानं ततः कुर्य्यात् पूर्णायुष्यप्रसिद्धये ॥ १२५
आज्यावेक्षणदानञ्च कुर्य्याद्रोगविनिवृत्तये ।
सहस्रं भोजयेद्विप्रान् दरिद्रः शतमेव वा ॥ १२६
वित्ताभावे दरिद्रस्तु यथाशक्ति समाचरेत् ।
भैरवस्य महापूजां कुर्य्याद्भूतादिशान्तये ॥ १२७
महाभिषेकं नैवेद्यं शिवस्यान्ते तु कारयेत् ।
ब्राह्मणान् भोजयेत् पश्चाद्भूरिभोजनरूपतः ॥ १२८
एवं कृतेन यत्नेन दोषशान्तिमवाप्नुयात् ।
शान्तियज्ञमिमं कुर्य्याद्वर्षे वर्षे तु फाल्गुने ॥ १२९
दुर्दर्शनादौ सद्यो वै मासमात्रे समाचरेत् ।
महापापादिसम्प्राप्तौ कुर्य्याद्भैरवपूजनम् ॥ १३०
महाव्याधिसमुत्पत्तौ सङ्कल्पं पुनराचरेत् ।
सर्व्वाभावे दरिद्रस्तु दीपदानमथाचरेत् ॥ १३१
तदप्यशक्तः स्नात्वा वै यत्किञ्चिद्दानमाचरेत् ।
दिवाकरं नमस्कुर्य्यान्मन्त्रेणाष्टोत्तरं शतम् ॥ १३२
सहस्रमयुतं लक्षं कोटिं वा कारयेद्बुधः ।

नमस्कारात्मयज्ञेन तुष्टाः स्युः सर्व्वदेवताः
त्वत्स्वरूपेऽर्पिता बुद्धिर्नतेऽशून्ये च रो…
या चास्यस्मदहन्तेति त्वयि दृष्टे विवर्जि…
नष्टोऽहं हि स्वदेहेन भो महांस्त्वमपि …
न शून्यो मत्स्वरूपो वै तव दासोऽस्मि सा…
यथायोग्यं स्वात्मयज्ञं नमस्कारं प्रकल्पये…
अथात्र शिवनैवेद्यं दत्त्वा ताम्बूलमाहरेत्
शिवप्रदक्षिणां कुर्य्यात् स्वयमष्टोत्तरं शतम्
सहस्रमयुतं लक्षं कोटिमन्येन कारयेत् ॥
शिवप्रदक्षिणात् सर्व्वं पातकं नश्यति क्षणा…
दुःखस्य मूलं व्याधिर्हि व्याधेर्मूलं हि पात…
धर्म्मेणैव हि पापानामपनोदनमीरितम् ।
शिवोद्देशकृतो धर्म्मः क्षमः पापविनोदने ।
अध्यक्षं शिवधर्म्मेषु प्रदक्षिणमितीरितम् ।
क्रियया जपरूपं हि प्रणवन्तु प्रदक्षिणम् ॥
जननं मरणं द्वन्द्वं मायाचक्रमितीरितम् ।
शिवस्य मायाचक्रं हि बलिपीठं तदुच्यते ।
बलिपीठं समारभ्य प्रादक्षिण्यक्रमेण वै ।
पदे पदान्तरं गत्वा बलिपीठं समाविशेत् ।
नमस्कारं ततः कुर्य्यात् प्रदक्षिणमितीरि…
निर्गमाज्जननं प्राप्तं नमस्त्वात्मसमर्पणम् ॥
जननं मरणं द्वन्द्वं शिवमायासमर्पितम् ।
शिवमायार्पितद्वन्द्वो न पुनस्त्वात्मभाग्भवे…
यावद्देहं क्रियाधीनः स जीवो बद्ध उच्यते
देहत्रयवशीकारे मोक्ष इत्युच्यते बुधैः ॥
मायाचक्रप्रणेता हि शिवः परमकारणम् ।
शिवमायार्पितद्वन्द्वं शिवस्तु परिमार्ज्जति ॥
शिवेन कल्पितं द्वन्द्वं तस्मिन्नेव समर्पयेत् ।
शिवस्यातिप्रियं विद्यात् प्रदक्षिणं नमो बु…
प्रदक्षिणनमस्काराः शिवस्य परमात्मनः ।
षोडशैरुपचारैश्च कृतपूजा फलप्रदा ॥ १…
प्रदक्षिणविनाश्यं हि पातकं नास्ति भूतले
तस्मात् प्रदक्षिणेनैव सर्व्वपापं विनाशयेत् ।
शिवपूजापरो मौनी सत्यादिगुणसंयुतः ।
क्रिया-तपो-जप-ज्ञान-ध्यानेष्वेकैकमाचरेत्
ऐश्वर्यं दिव्यदेहश्च ज्ञानमज्ञानसंक्षयः ।

शिवसान्निध्यमित्येते क्रियादीनां फलं भवेत् ॥ १५१
तरयोन फलं याति तमसः परिहापनात् ।
जन्मनः परिमार्ज्जिवाज्ज्ञबुद्धा जनितानिव ॥ १५२
यथादेशं यथाकालं यथादेहं यथाधनम् ।
यथायोग्यं प्रकुर्व्वीत क्रियादीन् शिवभक्तिमान्॥१५३
न्यायार्ज्जितसुवित्तेन वसेत् प्राज्ञः शिवस्थले ।
जीवहिंसादिरहितमतिक्लेशविवर्ज्जितम् ॥ १५४
गन्धाम्बरेण जप्तञ्च तोयमन्नं विदुः सुखम् ।
अथवाङ्गदरिद्रस्य भिक्षान्नं ज्ञानदं भवेत् ॥ १५५
शिवभक्तस्य भिक्षान्नं शिवभक्तिविवर्द्धनम् ।
शम्भुसत्रमिति प्राहुर्भिक्षान्नं शिवयोगिनः ॥ १५६
येन केनाप्युपायेन यत्र कुत्रापि भूतले ।
शुद्धान्नभुक् सदामौनी रहस्यं न प्रकाशयेत् ॥ १५७
प्रकाशयेत् तु भक्तानां शिवमाहात्म्यमेव हि ।
रहस्यं शिवमन्त्रस्य शिवो जानाति नापरः ॥ १५८
शिवभक्तो वसेन्नित्यं शिवलिङ्गं समाश्रितः ।
स्थाणुलिङ्गाश्रयेणैव स्थाणुर्भवति भूसुराः ॥ १५९
पूजया चरलिङ्गस्य क्रमान्मुक्तो भवेद्ध्रुवम् ।
सर्व्वमुक्तं समासेन साध्यसाधनमुत्तमम् ॥ १६०
व्यासेन यत् पुरा प्रोक्तं यच्छ्रुतं हि मया पुरा ।
भद्रमस्तु हि वोऽस्माकं शिवभक्तिर्दृढ़ास्तु सा ॥ १६१
य इमं पठतेऽध्यायं यः शृणोति नरः सदा ।
शिवज्ञानं स लभते शिवस्य कृपया बुधाः ॥ १६२

इति श्रीशैवे महापुराणे विद्येश्वरसंहितायां
साध्यसाधनखण्डे शिवलिङ्गमहिमवर्णनं
नाम षोड़शोऽध्यायः ॥ १६ ॥

समाप्तेयं विद्येश्वरसंहिता ।

शिवपुराणम्।

कैलाससंहिता।

प्रथमोऽध्यायः।

ओं नमो भगवते वासुदेवाय।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥

मः शिवाय साम्बाय सगणायससूनवे।
धानपुरुषेशाय सर्गस्थित्यन्तहेतवे॥ १
हेमवच्छिखरे पूर्व्वं तपस्यन्तो महौजसः।
ाराणसीं गन्तुकामाः मुनयः कृतसंविदः॥ २
र्गत्य तस्मात् सम्प्राप्य गिरेः काशीं समाहिताः।
ातव्यमेवेति तदा ददृशुर्मणिकर्णिकाम्॥ ३
त स्नात्वा सुसन्तर्प्य देवादीनथ जाह्नवीम्।
ष्ट्वा स्नात्वा मुनीन्द्रास्ते विश्वेशं त्रिदशेश्वरम्॥ ४
मस्कृत्याथ सम्पूज्य भक्त्या परमयान्विताः।
तरुद्रादिभिः स्तुत्वा स्तुतिभिर्वेदपारगाः॥ ५
ात्मानं मेनिरे सर्व्वे कृतार्था वयमित्युत।
स्मिन्नवसरे सूतं पञ्चक्रोशदिदृक्षया॥ ६
ला समागतं वीक्ष्य मुदा ते तं ववन्दिरे।
ोऽपि विश्वेश्वरं साक्षाद्देवदेवमुमापतिम्॥ ७
मस्कृत्याथ तैः साकं मुक्तिमण्डपमाविशत्।
ासीनं महात्मानं सूतं पौराणिकोत्तमम्॥ ८
र्घ्यादिभिस्तदा सर्व्वे मुनयः समुपाचरन्।
तः सूतः प्रसन्नात्मा मुनीनालोक्य सुव्रतान्॥ ९

पप्रच्छ कुशलं तेऽपि प्रोचुः कुशलमात्मनः।
ते सुसन्तुष्टहृदयं ज्ञात्वा सर्व्वे मुनीश्वराः॥ १०
प्रणवार्थावगत्यर्थमूचुः प्रस्तावकं वचः।

मुनय ऊचुः।

व्यासशिष्य महाभाग सूत पौराणिकोत्तम॥ ११
भवन्तमेव भगवान् व्यासः सर्व्वजगद्गुरुः।
अभिषिच्य पुराणानां गुरुत्वे समयोजयत्॥ १२
तस्मात् पौराणिकी विद्या भवतो हृदि संस्थिता।
पुराणानि च सर्व्वाणि वेदार्थं प्रवदन्ति हि॥ १३
वेदाः प्रणवसम्भूताः प्रणवार्थो महेश्वरः।
अतो महेश्वरस्थानं त्वयि शिष्यात्र प्रतिष्ठितम्॥१४
त्वन्मुखाब्जात् परिस्यन्दन्मकरन्दमनोहरम्।
अपूर्व्वार्थामृतं पीत्वा भविष्यामो गतज्वराः॥ १५
विशेषतो गुरुस्त्वं हि नान्योऽस्माकं महामते।
इति तेषां वचः श्रुत्वा सूतो व्यासतपःफलम्॥ १६
गणेशं षण्मुखं साक्षान्महेशानीं महेश्वरम्।
शिलादतनयं देवं नन्दीशं सुयशापतिम्॥ १७
सनत्कुमारं व्यासञ्च प्रणिपत्येदमब्रवीत्।

सूत उवाच।

साधु साधु महाभागा मुनयः क्षीणकल्मषाः ॥ १८
मतिर्दृढतरा जाता दुर्लभा सापि दुष्कृताम्।
पाराशर्य्येण गुरुणा नैमिषारण्यवासिनाम् ॥ १९
मुनीनामुपदिष्टं यद्वक्ष्येऽहं मुनिपुङ्गवाः।
सावधाना भवन्तो यच्छृण्वन्तु परया मुदा ॥ २०
स्वारोचिषेऽन्तरे पूर्व्वं तपस्यन्तो दृढव्रताः।
ऋषयो नैमिषारण्ये सर्व्वसिद्धनिषेविते ॥ २१
दीर्घसत्रं वितन्वन्तो रुद्रमध्वरनायकम्।
प्रीणयन्तः परं भावमैश्वरं ज्ञातुमिच्छवः ॥ २२
निवसन्ति स्म ते सर्व्वे व्यासदर्शनकाङ्क्षिणः।
तेषां भावं समालोक्य भगवान् बादरायणः ॥ २३
नारायणांशसम्भूतः साक्षात् सर्व्वजगद्गुरुः।
प्रादुर्बभूव सर्व्वात्मा पराशरतपःफलम् ॥ २४
तं दृष्ट्वा मुनयः सर्व्वे प्रहृष्टवदनेक्षणाः।
अभ्युत्थानादिभिः सर्व्वैरुपचारैरुपाचरन् ॥ २५
आसनं प्रददुस्तस्मै सौवर्णं विष्टरं शुभम्।
सुखोपविष्टः स तदा तस्मिन् सौवर्णविष्टरे ॥ २६
प्राह गम्भीरया वाचा पाराशर्य्यो महामुनिः।

व्यास उवाच।

कुशलं किं नु युष्माकं प्रवृत्तेऽस्मिन् महामखे ॥ २७
अर्चितः किन्तु युष्माभिः सम्यगध्वरनायकः।
किमर्थमत्र युष्माभिरध्वरे परमेश्वरः ॥ २८
अर्च्चितो भक्तिभावेन साम्बः संसारमोचकः।
युष्मत्प्रवृत्तिर्मे भाति शुश्रूषा पूर्व्वमेव हि ॥ २९
एवमुक्ता मुनीन्द्रेण व्यासेनामिततेजसा।
मुनयो नैमिषारण्यवासिनः परमौजसः ॥ ३०
प्रणिपत्य महात्मानमिदं वचनमब्रुवन्।

ऋषय ऊचुः।

भगवन् मुनिशार्दूल साक्षान्नारायणांशज ॥ ३१
त्वं हि सर्व्वजगद्भर्त्तुर्महादेवस्य वेधसः।
साम्बस्य सगणस्यास्य प्रसादानां निधिः स्वयम् ॥ ३२
त्वत्पादाब्जरसास्वाद-मधुपायितमानसाः।
कृतार्था वयमद्यैव भवत्पादाब्जदर्शनात् ॥ ३३
त्वदीयचरणाम्भोजदर्शनं खलु पापिनाम्।
दुर्लभं लब्धमधुना तस्मात् सुकृतिनो वयम् ॥ ३४
अस्मिन् देवे महाभाग नैमिषारण्यसंज्ञके।
दीर्घसत्रं वितन्वन्तः प्रणवार्थप्रकाशकः ॥
ज्ञातव्यः परमेशान इति ज्ञात्वा विनिश्चिताः।
परस्परं वितन्वन्तः परं भावं महेशितुः ॥
अज्ञातवन्त एवैते वयं तस्माद्भवान् प्रभो।
छेत्तुमर्हति नः सर्व्वान् संशयान् हृदयस्थि
त्वदन्यः संशयस्यास्य छेत्ता न हि जगत्त्र
तस्मादपारगम्भीर-व्यामोहाब्धिनिमज्जिता
तारयस्व शिवज्ञान-प्लवेनास्मान् दयानिधे
एवमभ्यर्थितस्तत्र मुनिभिर्वेदपारगैः ॥
सर्व्ववेदार्थविन्मुख्यः शुकतातो महामुनिः।
वेदान्तसारसर्व्वस्वं प्रणवं परमेश्वरम् ॥
ध्यात्वा हृत्कर्णिकामध्ये साम्बं संसारमोच
प्रहृष्टमानसो भूत्वा व्याजहार तपोनिधिः

इति श्रीशैवे महापुराणे कैलाससंहितायां
प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः।

व्यास उवाच।

साधु पृष्टमिदं विप्रा भवद्भिर्भाग्यवित्तमैः।
दुर्लभं हि शिवज्ञानं प्रणवार्थप्रकाशकम्
येषां प्रसन्नो भगवान् साक्षाच्छूलवरायु
तेषामेव शिवज्ञानं प्रणवार्थप्रकाशकम्
जायते न हि सन्देहो नेतरेषामिति श्रु
दीर्घसत्रेण युष्माभिर्भगवानम्बिकापतिः
उपासित इतीदं मे दृष्टमद्य विनिश्चित
तस्माद्वक्ष्यामि युष्माकमितिहासं पुरातन
उमा-महेशसंवादरूपमद्भुतमास्तिकाः।
पुरा किल जगन्माता सती दाक्षायणी
शिवनिन्दाप्रसङ्गेन त्यक्त्वा हिमवतो गिरे
तपःप्रभावात् सा देवी सुताभून्मुनिसत्त
तस्मिन् भूधरवर्य्ये तु स्वयं वरविधानतः
देवेऽपि च कृतोद्वाहे देवी देवमभाषत ॥

श्रीदेव्युवाच।

भगवन् परमेशान पञ्चकृत्यविधायक।

सर्व्वज्ञ भक्तिसुलभ परमामृतविग्रह ॥ ८
ाचायणीं तनुं त्यक्त्वा पुत्त्री हिमवतो गिरेः ।
प्रासाद्य महेशान मन्त्रदीक्षाविधानतः ॥ ९
ां विशुद्धात्मतत्त्वस्थां कुरु नित्यं महेश्वर ।

व्यास उवाच ।

इति सन्नोदितो देव्या देवः शीतांशुभूषणः ॥ १०
त्युवाच ततो देवीं यदि स्यात् तादृशी मतिः ।
कैलासशिखरं गत्वा करिष्ये तादृशीमिति ॥ ११
ततो हिमवतो गत्वा कैलासं भूधरेश्वरम् ।
त्र दीक्षाविधानेन प्रणवादीननुक्रमात् ॥ १२
त्त्वा मन्त्रान् महादेवीं कृत्वा शुद्धात्मनि स्थिताम् ।
ार्द्धं देव्या महादेवो देवोद्यानं गतोऽभवत् ॥ १३
तः सुमालिनीमुख्यैर्देव्याः प्रियसखीजनैः ।
माहृतैः प्रफुल्लैस्तैः पुष्पैः कल्पतरूद्भवैः ॥ १४
कृत्य ततो देवीं स्वाङ्कमारोप्य शङ्करः ।
हृष्टवदनस्तस्थौ विलोक्य चतुराननम् ॥ १५
तः प्रियकथा वृत्ताः पार्व्वती-परमेशयोः ।
हिताय सर्व्वलोकानां साक्षाच्छ्रुत्यर्थसम्मिताः ॥ १६
दा सर्व्वजगन्माता भर्त्तुरङ्कं समाश्रिता ।
विलोक्य वदनं भर्त्तुरिदमाह तपोधनाः ॥ १७

श्रीदेव्युवाच ।

पदिष्टास्त्वया देव मन्त्राः सप्रणवा मताः ।
दादौ श्रोतुमिच्छामि प्रणवार्थविनिश्चयम् ॥ १८
कथं प्रणव उत्पन्नः कथं प्रणव उच्यते ।
मन्त्राः कति समाख्याताः कथं वेदादिरुच्यते ॥ १९
देवता वा कति प्रोक्ताः कथं देवादिभावना ।
याः कतिविधाः प्रोक्ता व्याप्यव्यापकता कथम् ॥ २०
ह्माणि पञ्चमन्त्रेऽस्मिन् कथं तिष्ठन्त्यनुक्रमात् ।
न्त्राः कति समाख्याताः प्रपञ्चात्मकता कथम् ॥ २१
च्य-वाचकसम्बन्धः स्थानानि च कथं शिव ।
तोऽत्राधिकारी विज्ञेयो विषयः क उदाहृतः ॥ २२
म्बन्धश्चैव कः प्रोक्तः किं प्रयोजनमुच्यते ।
नुष्ठानविधिः को वा पूजास्थानञ्च किं प्रभो ॥ २३
जायां मण्डलं किं वा किं वा ऋष्यादिकं हर ।
ासजातविधिः को वा को वा पूजाविधिक्रमः ॥ २४
तत् सर्व्वं वदेशान यद्यस्ति मयि ते कृपा ।

इति देव्या समादिष्टो भगवानिन्दुभूषणः ।
तां विलोक्य महेशानीं वक्तुं समुपचक्रमे ॥ २५

इति श्रीशैवे महापुराणे कैलाससंहितायां
द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण जीवः साक्षाच्छिवो भवेत् ॥ १
प्रणवार्थपरिज्ञानमेव ज्ञानं मदात्मकम् ।
वीजं तत् सर्व्वविद्यानां मन्त्रं प्रणवनामकम् ॥ २
अतिसूक्ष्मं महार्थञ्च ज्ञेयं तद्वटवीजवत् ।
देवो गुणत्रयातीतः सर्व्वज्ञः सर्व्वकृत् प्रभुः ॥ ३
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतः शिवः ।
यदस्ति वस्तु तत् सर्व्वं गुणप्राधान्ययोगतः ॥ ४
समस्तं व्यस्तमपि च प्रणवार्थं प्रचक्षते ।
सर्व्वार्थसाधकं तस्मादेकं ब्रह्मैतदक्षरम् ॥ ५
तेनोमिति जगत् कृत्स्नं कुरुते प्रथमं शिवः ।
शिवो वा प्रणवो ह्येष प्रणवो वा शिवः स्मृतः ॥
वाच्य-वाचकयोर्भेदो नात्यन्तं विद्यते यतः ।
तस्मादेकाक्षरं देवं मां ब्रह्म ऋषयो विदुः ॥ ७
वाच्य-वाचकयोरैक्यं मन्यमाना मनस्विनः ।
अतस्तदेव जानीयान्मुमुक्षुः परमेश्वरि ॥ ८
तत्रादौ सम्प्रवक्ष्यामि प्रणवोद्धारमम्बिके ।
निवृत्तिमुद्धरेत् पूर्व्वमिन्धनाच्च ततः परम् ॥ ९
कालं समुद्धरेत् पश्चाद्दण्डमीश्वरमेव च ।
वर्णपञ्चकरूपोऽयमेवं प्रणव उद्धृतः ॥ १०
ब्रह्मादिस्थावरान्तानां सर्व्वेषां प्राणिनां खलु ।
प्राणः प्रणव एवायं तस्मात् प्रणव ईरितः ॥ ११
अकारश्चाप्युकारोऽथ मकारश्च त्रयं क्रमात् ।
तिस्रो मात्राः समाख्याता अर्द्धमात्रा ततः परम् ॥ १२
अर्द्धमात्रा महेशानि विन्दु-नादस्वरूपिणी ।
ईशानः सर्व्वविद्यानामित्याद्याः श्रुतयः प्रिये ॥ १३
मत्त एव भवन्तीति वेदाः सत्यं वदन्ति हि ।
तस्माद्वेदादिरेवाहं प्रणवो मम वाचकः ॥ १४

वाचकत्वात्मशेषोऽपि वेदादिरिति कथ्यते ।
अकारस्तु महद्बीजं रजःस्रष्टा चतुर्मुखः ॥ १५
उकारः प्रकृतिर्योनिः सत्त्वं पालयिता हरिः ।
मकारः पुरुषो बीजी तमःसंहारको हरः ॥ १६
बिन्दुर्महेश्वरो देवस्तिरोभाव उदाहृतः ।
नादः सदाशिवः प्रोक्तः सर्व्वानुग्राहकः प्रभुः ॥ १७
नादमूर्द्धनि सञ्चिन्त्यः परात्परतरः शिवः ।
सर्व्वज्ञः सर्व्वकर्त्ता च सर्व्वेशो निर्म्मलोऽद्वयः ॥ १८
अकारादिषु वर्णेषु व्यापकश्चोत्तरोत्तरम् ।
व्याप्यन्त्वधस्तनं वर्णमेवं सर्व्वत्र भावयेत् ॥ १९
सद्यादीशानपर्य्यन्तान्यकारादिषु पञ्चसु ।
स्थितानि पञ्च ब्रह्माणि तानि मन्मूर्त्तयः क्रमात्॥२०
अष्टौ कलाः समाख्याता अकारे सद्यजाः शिवे ।
उकारे वामरूपिण्यस्त्रयोदश समीरिताः ॥ २१
अष्टावघोररूपिण्यो मकारे संस्थिताः कलाः ।
बिन्दौ चतस्रः सम्भूताः कलाः पुरुषगोचराः ॥ २२
नादे पञ्च समाख्याताः कला ईशानसम्भवाः ।
षड्विधैक्यानुसन्धानात् प्रपञ्चात्मकतोच्यते ॥ २३
मन्त्रो यन्त्रं देवता च प्रपञ्चो गुरुरेव च ।
शिष्यश्च षट्पदार्थानामेषामर्थं शृणु प्रिये ॥ २४
पञ्चवर्णसमष्टिः स्यान्मन्त्रः पूर्व्वमुदाहृतः ।
स एव यन्त्रतां प्राप्तो वक्ष्ये तन्मण्डलक्रमम् ॥ २५
यन्त्रन्तु देवतारूपं देवता विश्वरूपिणी ।
विश्वरूपो गुरुः प्रोक्तः शिष्यो गुरुवपुः स्मृतः ॥ २६
ओमितीदं सर्व्वमिति सर्व्वं ब्रह्मेति च श्रुतेः ।
वाच्य-वाचकसम्बन्धोऽप्ययमेवार्थ ईरितः ॥ २७
आधारो मणिपूरश्च हृदयञ्च ततः परम् ।
विशुद्धिराज्ञा च ततः शक्तिः शान्तमिति क्रमात् ॥२८
स्थानान्येतानि देवेशि शान्त्यतीतं परात्परम् ।
अधिकारी भवेद्यस्य वैराग्यं जायते दृढम् ॥ २९
विषयः स्यामहं देवि जीव-ब्रह्मैक्यभावनात् ।
जीवात्मनो मया सार्द्धमैक्यस्य प्रणवस्य च ॥ ३०
बोध्य-बोधकभावोऽत्र सम्बन्धः समुदीरितः ।
व्रतादिनिरतः शान्तस्तपस्वी विजितेन्द्रियः ॥ ३१
शौचाचारसमायुक्तो भूदेवो वेदनिष्ठितः ।
विषयेषु विरक्तः सन्नैहिकामुष्मिकेषु च ॥ ३२

सर्व्वं शास्त्रार्थतत्त्वज्ञं वेदान्तज्ञानपारगम् ।
आचार्य्यमुपसङ्गम्य यतिं मतिमतां वरम् ॥
दीर्घदण्डप्रणामाद्यैस्तोषयेद्यत्नतः सुधीः ।
यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः
इति निश्चित्य मनसा स्वविचारं निवेदय च ।
लब्धानुज्ञस्तु गुरुणा द्वादशाहं पयोव्रती ॥
समुद्रतीरे नद्यां वा पर्व्वते वा शिवालये ।
शुक्लपक्षे तु पञ्चम्यामेकादश्यामथापि वा ॥
प्रातः स्नात्वा विशुद्धात्मा कृतनित्यक्रियः सुधीः
गुरुमाहूय विधिना नान्दीश्राद्धं विधाय च
क्षौरञ्च कारयित्वाथ कक्षोपस्थविवर्ज्जितम् ।
केश-श्मश्रु-नखानान्तु स्नात्वा नियतमानसः
शक्तं प्राश्याथ सायाह्ने स्नात्वा सन्ध्यामुपास्य
सायमौपासनं कृत्वा गुरुणा सहितो द्विजः ।
वस्त्रादिदक्षिणां दद्याच्छिवाय गुरुरूपिणे ।
होमद्रव्याणि सम्पाद्य स्वसूत्रोक्तविधानतः ।
अग्निमाधाय विधिवल्लौकिकादिविभेदतः ।
आहिताग्निस्तु यः कुर्य्यात् प्राजापत्येष्टिम
श्रौते वैश्वानरे सम्यक् सर्व्ववेदसदक्षिणाः
अथाग्निमात्मन्यारोप्य ब्राह्मणः प्रव्रजेद्गृहा
श्रपयित्वा चरुं तस्मिन् समिदन्नाज्यभेदतः
पौरुषेणैव सूक्तेन हुत्वा प्रत्यृचमात्मवान् ।
हुत्वा च सौविष्टकृतीं स्वसूत्रोक्तविधानतः ।
हुत्वोपरिष्टात् तन्त्रञ्च तेनाग्नेरुत्तरे बुधः ॥
स्थित्वासने जपेन्मौनी चीराजिनकुशोत्तरे ।
यावद्ब्राह्ममुहूर्त्तन्तु गायत्रीं दृढमानसः ॥
ततः स्नात्वा यथापूर्व्वं श्रपयित्वा चरुं तत
पौरुषं सूक्तमारभ्य विरजान्तं हुनेद्बुधः ॥
वामदेवमतेनापि शौनकादिमतेन वा ।
तत्र मुख्यं वामदेव्यं गर्भमुक्तो यतो मुनिः ॥
होमशेषं समाप्याथ प्रातरौपासनं हुनेत् ।
ततोऽग्निमात्मन्यारोप्य प्रातःसन्ध्यामुपास्य
सवितर्य्युदिते पश्चात् सावित्रीं प्रविशेत् क्र
एषणानां त्रयं त्यक्त्वा प्रैषमुच्चार्य्य च क्रमात्
शिखोपवीते सन्त्यज्य कटिसूत्रादिकं ततः ।
विसृज्य प्राङ्मुखो गच्छेदुत्तराशामुखोऽथ

गृह्णीयाद्दण्डकौपीनाद्युचितं लोकवर्त्तने।
विरक्तत्वेन गृह्णीयाल्लोकवृत्तिविचारणे ॥ ५१
गुरोः समीपं गत्वाथ दण्डवत् प्रणमेत् त्रयम्।
समुत्थाय ततस्तिष्ठेद्गुरुपादसमीपतः ॥ ५२
ततो गुरुः समादाय विरजानलजं सितम्।
भस्म तेनैव तं शिष्यं समुद्धूल्य यथाविधि ॥ ५३
अग्निरित्यादिभिर्मन्त्रैस्त्रिपुण्ड्रान् धारयेत् ततः।
हृत्पङ्कजे समासीनं मां त्वया सह चिन्तयेत् ॥ ५४
हस्तं निधाय शिरसि शिष्यस्य प्रीतमानसः।
ऋष्यादिसहितं तस्य दक्षकर्णे समुच्चरेत् ॥ ५५
णव-त्रिप्रकारन्तु ततस्तस्यार्थमादिशेत्।
ड्विधार्थं परिज्ञाय गुरुं प्रणम्य दण्डवत् ॥ ५६
दधीनो भवेन्नित्यं वेदान्तं सम्यगभ्यसेत्।
मेव चिन्तयेन्नित्यं परमात्मानमात्मनि ॥ ५७
दिधर्म्मनिरतो वेदान्तज्ञानपारगः।
ऽधिकारी स प्रोक्तो यतिर्विगतमत्सरः ॥ ५८
त्पुण्डरीकं विरजं विशोकं विशदं परम्।
ष्टपत्रं केशराढ्यं कर्णिकोपरिशोभितम् ॥ ५९
धारशक्तिमारभ्य त्रितत्त्वान्तमयं पदम्।
चिन्त्य मध्यतस्तस्य दहरं व्योम भावयेत् ॥ ६०
मित्येकाक्षरं ब्रह्म व्याहरन् मां त्वया सह।
न्तयेन्मध्यतस्तस्य नित्यमुद्युक्तमानसः ॥ ६१
वंविधोपासकस्य मल्लोकगतिरेव च।
तो विज्ञानमासाद्य मत्सायुज्यफलं प्रिये ॥ ६२
ह्मे मुहूर्त्ते उत्थाय शिरसि श्वेतपङ्कजे।
हस्रारे समासीनं गुरुं सञ्चिन्तयेद्यतिः ॥ ६३
द्धस्फटिकसङ्काशं द्विनेत्रं वरदाभयं।
नं शिवसद्भावं भावनातिमनोहरम् ॥ ६४
वोपनीतैः सम्पूज्य गन्धादिभिरनुक्रमात्।
ाञ्जलिपुटो भूत्वा नमस्कृत्य गुरुं ततः ॥ ६५
तःप्रभृति सायान्तं सायादिप्रातरन्ततः।
् करोमि जगन्नाथ तदस्तु तव पूजनम् ॥ ६६
ते विज्ञाप्य गुरवे लब्धानुज्ञस्ततो गुरोः।
दक्प्राण आसीनो विजितात्मा जितेन्द्रियः ॥ ६७
ादिब्रह्मरन्ध्रान्तं प्रणवं परिचिन्तयेत्।
सूर्यकोटिसमं धीमान् शिरोनासिकया सह ॥ ६८

विशोध्य देहं विधिवत् तृणमाधाय भूतले।
गृहीतशिश्न उत्थाय ततो गच्छेज्जलाशयम् ॥ ६९
उद्धृत्य वा यथान्यायं शौचं कुर्यादतन्द्रितः।
हस्तौ पादौ च संशोध्य द्विराचम्योमिति स्मरन् ॥ ७०
उत्तराभिमुखो मौनी दन्तधावनमाचरेत्।
तृणपर्णैः सदा कुर्य्यादमा एकादशीं विना ॥ ७१
अपां द्वादशगण्डूषैर्मुखं संशोधयेत् ततः।
द्विराचम्य मृदा तोयैः कटिशौचं विधाय च ॥ ७२
अरुणोदयकाले तु स्नानं कुर्य्यान्मृदा सह।
गुरुं संस्मृत्य मान्त्वैव स्नानसन्ध्याद्यमाचरेत् ॥ ७३
आबध्य शङ्खमुद्राञ्च प्रणवेनाभिषिञ्चयेत्।
शिरसि द्वादशावृत्त्या तदर्द्धं वा तदर्द्धकम् ॥ ७४
तीरमागत्य कौपीनं प्रक्षाल्याचम्य च द्विधा।
प्रोञ्छयेत् प्रणवेनैव वस्त्रमङ्गोपमार्ज्जनम् ॥ ७५
मुखं प्रथमतो मृज्य शिर आरभ्य सर्व्वतः।
तेनैव मार्ज्जयेद्देहं स्थित्वा च गुरुसन्निधौ ॥ ७६
आबध्य वाग्यतः शुद्धं कौपीनञ्च सडोरकम्।
द्विराचम्य समादाय भस्म सद्यादिमन्त्रतः ॥ ७७
अग्निरित्यादिभिर्मन्त्रैरभिमन्त्र्य स्पृशेत् तनुम्।
आपो वेत्यभिमन्त्र्याथ जलं तेनैव सेचयेत् ॥ ७८
ओमापो ज्योतिरित्युक्त्वा मानस्तोकेति मन्त्रतः।
संमर्द्द्य कवलद्वन्द्वं कुर्य्यादेकन्तु पञ्चधा ॥ ७९
शिरो-वदन-हृद्गुह्य-पादेषु परमेश्वरि।
ईशानादि समारभ्य सद्यान्तं पञ्चभिः क्रमात् ॥ ८०
उद्धूल्य कवलं पश्चात् प्रणवेनाभिषेचयेत्।
सर्व्वाङ्गञ्च ततो हस्तौ प्रक्षाल्यान्यत् समाहरेत् ॥ ८१
संमर्द्द्य पूर्व्ववत् तत् तु त्रिपुण्ड्रांस्तेन धारयेत्।
त्रियायुषैस्त्र्यम्बकैश्च प्रणवेन शिवेन च ॥ ८२
शिरस्यथ ललाटे च वक्षसि स्कन्ध एव च।
नाभौ बाह्वोः सन्धिषु च पृष्ठे चैव यथाक्रमम् ॥ ८३
प्रक्षाल्य हस्तौ च ततो द्विराचम्य यथाविधि।
पञ्चीकरणमुच्चार्य्य भावयेत् स्वं गुरुं बुधः ॥ ८४
वक्ष्यमाणप्रकारेण प्राणायामान् षडाचरेत्।
ऋष्यादिकञ्च कृत्वाथ वक्ष्यमाणविधानतः ॥ ८५
दक्षहस्तेन संगृह्य जलं वामेन पाणिना।
समारुध्येन्द्रियद्वारं प्रणवेनाभिमन्त्रयेत् ॥ ८६

एवं त्रिवारं सम्प्रोक्ष्य शिरसि त्रिः पिबेत् ततः।
समाहितेन मनसा ध्यायन्नोङ्कारमीश्वरम् ॥ ८७
सौरमण्डलमध्यस्थं सर्व्वतेजोमयं परम्।
अष्टबाहुं चतुर्व्वक्त्रमर्द्धनारीक्रमद्भुतम् ॥ ८८
सर्व्वाश्चर्य्यगुणोपेतं सर्व्वालङ्कारशोभितम्।
एवं ध्यात्वाथ विधिवद्दद्यादर्घ्यत्रयं ततः ॥ ८९
अष्टोत्तरशतं जप्त्वा द्विषड्वारन्तु तर्पयेत्।
पुनराचम्य कुर्व्वीत प्राणायामत्रयं ततः ॥ ९०
ऋष्यादिकञ्च विधिवत् कृत्वा मौनं समाश्रितः।
पूजासदनमासाद्य पादौ प्रक्षाल्य वाग्यतः ॥ ९१
द्विराचम्य विधानेन दक्षपादपुरःसरम्।
प्रविश्य मण्डपं तत्र मण्डलं रचयेत् क्रमात् ॥ ९२

इति श्रीशैवे महापुराणे कैलाससंहितायां
तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः।

ईश्वर उवाच।

परीक्ष्य भूमिं विधिवद्गन्ध-वर्ण-रसादिभिः।
मनोऽभिलषिते तत्र वितानविततांम्बरे ॥ १
सुप्रलिप्ते महीपृष्ठे दर्पणोदरसन्निभे।
अरत्निशुम्ममानेन चतुरस्रं प्रकल्पयेत् ॥ २
तालपत्रं समादाय तत्समायामविस्तरम्।
तस्मिन् भागान् प्रकुर्व्वीत त्रयोदश समांशकम् ॥ ३
तत् पत्रं तत्र निक्षिप्य पश्चिमाभिमुखः स्थितः।
तत्पूर्व्वभागे सुदृढं सूत्रमादाय रञ्जितम् ॥ ४
प्राक्प्रत्यग्दक्षिणोदक् च चतुर्द्दश निपातयेत्।
सूत्राणि देवदेवेशि नवषष्ठ्युत्तरं शतम् ॥ ५
कोष्ठानि स्युस्ततस्तस्य मध्यकोष्ठन्तु कर्णिका।
कोष्ठाष्टकं बहिस्तस्य दलाष्टकमिहोच्यते ॥ ६
दलानि श्वेतवर्णानि श्यामाग्राणि प्रकल्पयेत्।
पीतरूपां कर्णिकाञ्च कृत्वा रक्ताञ्च पीतकम् ॥ ७
वनभिद्दलदन्तु समारभ्य सुरेश्वरि।
रक्तकृष्णाः क्रमेणैव दलसन्धीर्विचित्रयेत् ॥ ८
कर्णिकायां लिखेद्यन्त्रं प्रणवार्थप्रकाशकम्।
अधःपीठं समालिख्य श्रीकण्ठञ्च तदूर्द्ध्वतः ॥ ९

तदुपर्य्यमरेशञ्च महाकालञ्च मध्यतः।
तन्मस्तकस्थं दण्डञ्च तत ईश्वरमालिखेत्।
श्यामेन पीठं पीतेन श्रीकण्ठञ्च विचित्रयेत्।
अमरेशं महाकालं रक्तकृष्णाञ्च तौ क्रमात्।
कुर्य्यात् सुधूम्रं दण्डञ्च धवलञ्चेश्वरं बुधः।
एवं यन्त्रं समालिख्य रक्तं सद्येन वेष्टयेत्।
तदुत्थेनैव नादेन भिन्द्यादीशानमीश्वरि।
तद्बाह्यपङ्क्तौ गृह्णीयादाग्नेयादिक्रमेण वै।
कोष्ठानि कोणभागेषु चत्वार्य्येतानि सुन्दरि।
शुक्लेनापूर्य्य वर्णादिचतुष्कं रक्तधातुभिः।
आपूर्य्य तानि चत्वारि द्वाराणि परिकल्प[illegible]
ततस्तत्पार्श्वयोर्द्दन्द्वं पीतेनैव प्रपूरयेत्॥
आग्नेयकोष्ठमध्ये तु पीताभे चतुरस्रके।
अष्टपत्रं लिखेत् पद्मं रक्ताभं पीतकर्णिकम्।
हकारं विलिखेन्मध्ये बिन्दुयुक्तं समाहितः।
पद्मस्य नैऋते कोष्ठे चतुरस्रान्तरा लिखे[illegible]
पद्ममष्टदलं रक्तं पीतकिञ्जल्ककर्णिकम्।
शवर्गस्य तृतीयन्तु षष्ठस्वरसमन्वितम्॥
चतुर्द्दशस्वरोपेतं बिन्दु-नादविभूषितम्।
एतद्बीजवरं भद्रे पद्ममध्ये समालिखेत्॥
पद्मस्यैशानकोष्ठे तु तथा पद्मं समालिखे[illegible]
कवर्गस्य तृतीयन्तु पञ्चमस्वरसंयुतम्॥ [illegible]
विलिखेन्मध्यतस्तस्य बिन्दुकण्ठन्त्वलङ्कृत[illegible]
तद्बाह्यपङ्क्तित्रितये पूर्व्वादिपरितः क्रमात्
कोष्ठानि पञ्च गृह्णीयाद्गिरिराजसुते शुभे
मध्यन्तु कर्णिकां कुर्य्यात् पीतां रक्तञ्च द[illegible]
दलानि रक्तवर्णानि कल्पयेत् कल्पवित्त[illegible]
दलबाह्ये तु कृष्णेन रन्ध्राणि परिपूरयेत्।
आग्नेयादीनि चत्वारि शुक्लेनैव प्रपूरयेत्।
पूर्व्वे षड्बिन्दुसहितं षट्कोणं कृष्णमा[illegible]
रक्तवर्णं दक्षिणतस्त्रिकोणञ्चोत्तरे ततः।
श्वेताभमर्द्धचन्द्रञ्च पीतवर्णञ्च पश्चिमे॥ [illegible]
चतुरस्रं क्रमात् तेषु लिखेद्बीजचतुष्टयम्।
पूर्व्वे बिन्दु समालिख्य शुभ्रं कृष्णन्तु द[illegible]
उकारमुत्तरे रक्तं मकारं पश्चिमे ततः।
अकारं पीतमेवन्तु कृत्वा वर्णचतुष्टयम्।

सर्व्वोर्द्ध्वपङ्क्त्यधःपङ्क्तौ समारभ्य च सुन्दरि ।
पीतं श्वेतञ्च रक्तञ्च कृष्णञ्चेति चतुष्टयम् ॥ २८
तदधो धवलं श्यामं पीतं रक्तं चतुष्टयम् ।
अधस्त्रिकोणके रक्तं शुक्लं पीतं वरानने ॥ २९
एवं दक्षिणमारभ्य कुर्य्यात् सोमान्तमीश्वरि ।
तद्बाह्यपङ्क्तौ पूर्व्वादिमध्यमान्तं विचित्रयेत् ॥ ३०
पीतं रक्तञ्च कृष्णञ्च श्यामं श्वेतञ्च पीतकम् ।
आग्नेय्यादि समारभ्य रक्तं श्यामं सितं प्रिये ॥ ३१
रक्तं कृष्णञ्च रक्तञ्च षट्कमेवं प्रकीर्त्तितम् ।
दक्षिणाद्यं महेशानि पूर्व्वावधि समीरितम् ॥ ३२
नैऋताद्यन्तु विज्ञेयमाग्नेयावधि चेश्वरि ।
वारुणन्तु समारभ्य दक्षिणावधि चेरितम् ॥ ३३
वायव्याद्यं महादेवि नैऋतावधि चेरितम् ।
सोमाद्यं परमेशानि वारुणावधि चेरितम् ।
ईशानाद्यन्तु विज्ञेयं वायव्यावधि चाम्बिके ॥ ३४
एवं मण्डलमालिख्य नियतात्मा यतिः स्मृतः ।
सौरपूजां प्रकुर्व्वीत स खलु ब्रह्मतत्परः ॥ ३५

इति श्रीशिवे महापुराणे कैलाससंहितायां
चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ।

ईश्वर उवाच ।

दक्षिणे मण्डलस्याथ वैयाघ्रं चर्म्म शोभनम् ।
आस्तीर्य्य शुद्धतोयेन प्रोक्षयेदस्त्रमन्त्रतः ॥ १
प्रणवं पूर्व्वमुद्धृत्य पश्चादाधारमुद्धरेत् ।
तत्पश्चाच्छक्तिकमलं चतुर्थ्यन्तं नमोऽन्तकम् ॥ २
मनुमेनं समुच्चार्य्य स्थित्वा तस्मिन्नुदङ्मुखः ।
प्राणानायम्य विधिवत् प्रणवोच्चारपूर्व्वकम् ॥ ३
अग्निरित्यादिभिर्मन्त्रैर्भस्म सन्धारयेत् ततः ।
शिरसि श्रीगुरुं नत्वा मण्डलं रचयेत् पुनः ॥ ४
त्रिकोणं वृत्तं वाह्ये तु चतुरस्रान्तकं क्रमात् ।
आमप्रच्यौमिति साधारं स्थाप्य शङ्खं समर्च्चयेत् ॥ ५
आपूर्य्य शुद्धतोयेन प्रणवेन सुगन्धिना ।
अभ्यर्च्च गन्धपुष्पाद्यैः प्रणवेन च सप्तधा ॥ ६
अभिमन्त्र्य ततस्तस्मिन् धेनुमुद्रान्तु दर्शयेत् ।
शङ्खमुद्रान्तु तेनैव प्रोक्षयेदस्त्रमन्त्रतः ॥ ७
आत्मानं गन्धपुष्पादि-पूजोपकरणानि च ।
प्राणायामत्रयं कृत्वा ऋष्यादिकमथाचरेत् ॥ ८
अस्य श्रीसौरमन्त्रस्य देवभाग ऋषिस्ततः ।
छन्दो गायत्रमित्युक्तं देवः सूर्य्यमहेश्वरः ॥ ९
देवता स्यात् षडङ्गानि ह्रामित्यादीति विन्यसेत् ।
ततः सम्मोचयेत् पद्ममस्त्रेणाग्नेयगोचरम् ॥ १०
तस्मिन् समर्च्चयेद्विद्वान् प्रभूतां विमलामपि ।
सारांश्चाथ समाराध्य पूर्व्वादिपरितः क्रमात् ॥ ११
अथ कालाग्निरुद्रञ्च शक्तिमाधारसंज्ञिताम् ।
अनन्तं पृथिवीञ्चैव रत्नद्वीपं तथैव च ॥ १२
सङ्कल्पवृक्षोद्यानञ्च गृहं मणिमयं ततः ।
रत्नपीठञ्च सम्पूज्य पादेषु प्रागुपक्रमात् ॥ १३
धर्म्मं ज्ञानञ्च वैराग्यमैश्वर्य्यञ्च चतुष्टयम् ।
अधर्म्माद्यग्निकोणादिकोणेषु च समर्च्चयेत् ॥ १४
मायाधश्छदनं पश्चाद्विद्योर्द्ध्वच्छदनं ततः ।
सत्त्वं रजस्तमश्चैव समभ्यर्च्य यथाक्रमम् ॥ १५
पूर्व्वादिदिक्षु मध्ये च दीप्तां सूक्ष्मां जयामपि ।
भद्रां विभूतिं विमलाममोघां वैद्युतामपि ॥ १६
सर्व्वतोमुखसंज्ञाञ्च कन्दनालं तथैव च ।
शुषिरञ्च ततस्तन्तु कण्टकांस्तदनन्तरम् ॥ १७
मूलच्छदनकिञ्जल्क-प्रकाशसकलात्मनः ।
पञ्चग्रन्थिकर्णिकाञ्च दलानि तदनन्तरे ॥ १८
केशरान् ब्रह्म-विष्णू च रुद्रमात्मानमेव च ।
अन्तरात्मानमपि च ज्ञानात्मपरमात्मनि ॥ १९
सम्पूज्य पश्चात् सौराख्यं योगपीठं समर्च्चयेत् ।
पीठोपरि समाकल्प्य मूर्त्तिं मूलेन मूलवित् ॥ २०
निरुद्धप्राण आसीनो मूलेनैव स्वमूलतः ।
शक्तिमुत्थाप्य तत् तेन प्रभावात् पिङ्गलाध्वना ॥ २१
पुष्पाञ्जलौ निर्गमय्य मण्डलस्थस्य भास्वतः ।
सिन्दूरारुणदेहस्य वामार्द्धदयितस्य च ॥ २२
अक्ष-स्रक्-पाश-खट्वाङ्ग-कपालाङ्कुश-पङ्कजम् ।
शङ्ख-चक्रं दधानस्य चतुर्व्वक्त्रस्य लोचनः ॥ २३
राजितस्य द्वादशभिस्तस्य हृत्पङ्कजोदरे ।
प्रणवं पूर्व्वमुद्धृत्य ह्रां ह्रीं सस्तदनन्तरम् ॥ २४
प्रकाशशक्तिसहितं मार्त्तण्डञ्च ततः परम् ।

आवाहयामि नम इत्यावाह्यावाहनाख्यया ॥ २५
मुद्रया स्थापनाद्याश्च मुद्राः सन्दर्शयेत् क्रमात्।
विन्यस्याङ्गानि ह्रां ह्रीं हूमन्तेन मनुना ततः ॥ २६
पञ्चोपचारान् सङ्कल्प्य मूलेनाभ्यर्च्चयेत् त्रिधा।
केशरेषु च पद्मस्य षडङ्गानि महेश्वरि ॥ २७
वह्नीश-रक्षो-वाय्वश्च परितः क्रमशः सुधीः।
द्वितीयावरणे पूज्यास्ततस्तो मूर्त्तयः क्रमात् ॥ २८
पूर्व्वाद्युत्तरपर्य्यन्तं दलमूलेषु पार्व्वति।
आदित्यो भास्करो भानू रविश्चेत्यनुपूर्व्वशः ॥ २९
अर्को ब्रह्मा तथा रुद्रो विष्णुश्चेति पुनः प्रिये।
ईशानादिषु सम्पूज्यास्तृतीयावरणे पुनः ॥ ३०
सोममङ्गारकञ्चैव बुधं बुद्धिमतां वरम्।
बृहस्पतिं बृहद्बुद्धिं भार्गवं तेजसां निधिम् ॥ ३१
शनैश्वरं तथा राहुं केतुं धूम्रंभयङ्करम्।
समन्ततो यजेदेतान् पूर्व्वादिदलमध्यतः ॥ ३२
अथवा द्वादशादित्यान् द्वितीयावरणे यजेत्।
तृतीयावरणे चैव राश्यादीनेव पूजयेत् ॥ ३३
सप्तसागरगङ्गाश्च बहिरस्य समन्ततः।
ऋषीन् देवांश्च गन्धर्व्वान् पन्नगानप्सरोगणान् ॥ ३४
ग्रामण्यश्च तथा यक्षान् यातुधानांस्तथा हयान्।
सप्तच्छन्दोमयांश्चैव वालखिल्यांश्च पूजयेत् ॥ ३५
एवं त्र्यावरणं देवं समभ्यर्च्य दिवाकरम्।
विलिख्य मण्डलं पश्चाच्चतुरस्रं समाहितः ॥ ३६
स्थाप्य साधारकं ताम्रपात्रं प्रस्थोदविस्तृतम्।
पूरयित्वा जलैः शुद्धैर्वासितैः कुसुमादिभिः ॥ ३७
अभ्यर्च्य गन्धपुष्पाद्यैर्जानुभ्यामवनीं गतः।
अर्घ्यपात्रं समादाय भ्रूमध्यान्तं समुद्धरेत्।
ततो ब्रूयादिमं मन्त्रं सावित्रं सर्व्वसिद्धिदम् ॥ ३८

सिन्दूरवर्णाय सुमण्डलाय
नमः सुवज्राभरणाय तुभ्यम्।
पद्माभनेत्राय सुपङ्कजाय
ब्रह्मेन्द्रनारायणकारणाय ॥ ३९
सरत्नचर्णं ससुवर्णतोयं
स्रक्कुङ्कुमाढ्यं सकुशं सपुष्पम्।
प्रदत्तमादाय सहेमपात्रं
प्रशस्तमर्घ्यं भगवन् प्रसीद ॥ ४०

एवमुक्त्वा ततो दत्त्वा तदर्घ्यं सूर्य्यमूर्त्तये।
नमस्कुर्य्यादिमं मन्त्रं पठित्वा तु समाहितः।
नमः शिवाय साम्बाय सगणायादिहेतवे।
रुद्राय विष्णवे तुभ्यं ब्रह्मणे सूर्य्यमूर्त्तये ॥
एवमुक्त्वा नमस्कृत्य स्वासने समुपस्थितः।
ऋष्यादिकं पुनः कृत्वा करं संशोध्य वारि
पुनश्च भस्म सन्धार्य्य पूर्व्वोक्तेनैव वर्त्मना।
न्यासजातं प्रकुर्व्वीत शिवभावविवृद्धये ॥
पञ्चोपचारैः सम्पूज्य शिरसा श्रीगुरुं बुधः
प्रणवं श्रीचतुर्थ्यन्तं (क) नमोऽन्तं प्रणमेत्
पञ्चात्मकं बिन्दुयुतं पञ्चमस्वरसंयुतम्।
तदेव बिन्दुसहितं पञ्चमस्वरवर्ज्जितम् ॥
पञ्चमस्वरसंयुक्तं मन्त्रीशञ्च सबिन्दुकम्।
उद्धृत्य बिन्दुसहितं संवर्त्तकमथोच्चरेत् ॥
एतैरेवंक्रमाद्बीजैरुद्धृतैः प्रणमेद्बुधः।
भुजयोरूरुयुग्मे च गुरुं गणपतिं तथा ॥ ४८
दुर्गाञ्च क्षेत्रपालञ्च बद्धाञ्जलिपुटः स्वयम्।
ओमस्त्राय फड़ित्युक्त्वा करौ संशोध्य षट्क्र
अपसर्पन्त्विति प्रोच्य प्रणवं तदनन्तरम्।
अस्त्राय फड़िति प्रोच्य पार्ष्णिघातत्रयेण
उद्वास्य विघ्नान् भूमिष्ठान् करतालत्रयेण
अन्तरीक्षगतान् दृष्ट्वा विलोक्य दिवि संस्थि
निरुद्धप्राण आसीनो हंसमन्त्रमनुस्मरन्।
हृदिस्थं जीवचैतन्यं ब्रह्मनाड्या समानयेत्।
द्वादशान्तःस्थविशद-सहस्रारमहाम्बुजे।
चिच्चन्द्रमण्डलान्तःस्थचिद्रूपं परमेश्वरम् ॥
शोष-दाह-प्लवान् कुर्य्याद्रेचकादिक्रमेण तु।
सषोड़शचतुःषष्टिद्वात्रिंशद्गणनायुतैः ॥ ५४
वाय्वग्निसलिलार्णैस्तैः स्ववेदाद्यैरनुक्रमात्।
प्राणप्रतिष्ठां विधिवत् कुर्य्यादत्र समाहितः।
एकाग्रमानसो योगी विसर्गान्ताञ्च मातृका
पुटितां प्रणवेनाथ न्यसेदाद्ये च मातृकाम्।
पुनश्च संयतप्राणः कुर्य्यादृष्यादिकं बुधः।
प्रणवस्य ऋषिर्ब्रह्मा देवि गायत्रमीरितम्।
छन्दोऽत्र देवताहं वै परमात्मा सदाशिवः।

(क) संयुक्तमचौशमिति पाठान्तरं क्वचित्।

अकारो वीजमाख्यातमुकारः शक्तिरुच्यते ॥ ५८
मकारः कीलकं प्रोक्तं मोक्षार्थं विनियुज्यते।
अङ्गुष्ठद्वयमारभ्य तलान्तं परिमार्ज्जयेत् ॥ ५९
ओमित्युक्त्वाथ देवेशि करन्यासं समारभेत्।
दक्षहस्तस्थिताङ्गुष्ठं समारभ्य यथाक्रमम् ॥ ६०
वामहस्तकनिष्ठान्तं विन्यसेन्नवसु क्रमात् (क)।
अकारमप्युकारञ्च मकारं विन्दुसंयुतम् ॥ ६१
नमोऽन्तं प्रोच्य सर्व्वत्र हृदयादौ न्यसेदथ।
अकारं पूर्व्वमुद्धृत्य ब्रह्मात्मानमथोच्चरेत् ॥ ६२
ऽन्तं नमोऽन्तं हृदये विनियुञ्ज्यात् तथा पुनः।
उकारं विष्णुसहितं शिरोदेशे प्रविन्यसेत् ॥ ६३
मकारं रुद्रसहितं शिखायान्तु प्रविन्यसेत्।
एवमुक्त्वा मुनिर्मन्त्री कवचं नेत्रमस्त्रकम् ॥ ६४
विन्यसेद्देववद्देवेशि सावधानेन चेतसा।
…लाभेदात् पञ्च ब्रह्माणि विन्यसेत् ॥ ६५
…दन-हृद्गुह्य-पादेष्वेतानि विन्यसेत्।
…शानस्य कलाः पञ्च पञ्चस्वेतेषु च क्रमात् ॥ ६६
…तस्रश्चतुर्षु वक्त्रेषु पुरुषस्य कला अपि।
…तस्रः प्रणिधातव्याः पूर्व्वादिक्रमयोगतः ॥ ६७
…त्कण्ठांसेषु नाभौ च कुक्षौ पृष्ठे च वक्षसि।
…घोरस्य कलाश्चाष्टौ पूजनीया यथाक्रमम् ॥ ६८
…श्चात् त्रयोदश कलाः पायुमेढ्रोरुजानुषु।
…ङ्घास्फिक्कटिपार्श्वेषु वामदेवस्य भावयेत् ॥ ६९
…स्यापि कला ह्यष्टौ पादयोरपि हस्तयोः।
…णे शिरसि बाह्वोश्च कल्पयेत् कल्पवित्तमः ॥ ७०
…ष्टत्रिंशत् कलान्यासमेवं कृत्वा तु सर्व्वशः।
…श्चात् प्रणवविद्धीमान् प्रणवन्यासमाचरेत् ॥ ७१
…ङ्हृदये कुर्परयोस्तथात्र मणिबन्धयोः।
…र्श्वतोदरजङ्घेषु पादयोः पृष्ठतस्तथा ॥ ७२
…त्थं प्रणवविन्यासं कृत्वा न्यासविचक्षणः।
…सन्यासं प्रकुर्व्वीत परमात्मप्रबोधिनि ॥ ७३

इति श्रीशैवे महापुराणे कैलाससंहितायां
पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः।

ईश्वर उवाच।

स्ववामे चतुरस्रन्तु मण्डलं परिकल्पयेत्।
ओमित्यभ्यर्च्य तस्मिंस्तु शङ्खमस्त्रोपशोधितम् ॥ १
स्थाप्य साधारकं तन्तु प्रणवेनार्च्चयेत् ततः।
आपूर्य्य शुद्धतोयेन चन्दनादिसुगन्धिना ॥ २
अभ्यर्च्य गन्धपुष्पाद्यैः प्रणवेन च सप्तधा।
अभिमन्त्र्य ततस्तस्मिन् धेनुमुद्रां प्रदर्शयेत् ॥ ३
शङ्खमुद्राञ्च पुरतश्चतुरस्रं प्रकल्पयेत्।
तदन्तरेऽर्द्धचन्द्रञ्च त्रिकोणञ्च तदन्तरे ॥ ४
षट्कोणवृत्तमेवेदं मण्डलं परिकल्पयेत्।
अभ्यर्च्य गन्धपुष्पाद्यैः प्रणवेनाथ मध्यतः ॥ ५
साधारमर्घ्यपात्रञ्च स्थाप्य गन्धादिनार्च्चयेत्।
आपूर्य्य शुद्धतोयेन तस्मिन् पात्रे विनिक्षिपेत् ॥ ६
कुशाग्राण्यक्षतांश्चैव यव-व्रीहि-तिलानपि।
आज्य-सिद्धार्थ-पुष्पाणि भसितञ्च वरानने ॥ ७
सद्योजातादिभिर्मन्त्रैः षड्ङ्गैः प्रणवेन च।
अभ्यर्च्य गन्धपुष्पाद्यैरभिमन्त्र्य च वर्म्मणा ॥ ८
अवगुण्ठ्यास्त्रमन्त्रेण संरक्ष्याय प्रदर्शयेत्।
धेनुमुद्राञ्च तेनैव प्रोक्षयेदस्त्रमन्त्रतः ॥ ९
स्वात्मानं गन्धपुष्पादिपूजोपकरणान्यपि।
पद्मस्येशानदिक्पद्मे प्रणवोच्चारपूर्व्वकम् ॥ १०
गुर्व्वासनाय नम इत्यासनं परिकल्पयेत्।
गुरोर्मूर्त्तिञ्च तत्रैव कल्पयेदुपदेशतः ॥ ११
प्रणवं गुं गुरुभ्योऽन्ते नमः प्रोच्याथ देशिकम्।
समाहूय ततो ध्यायेद्दक्षिणाभिमुखं स्थितम् ॥ १२
सुप्रसन्नमुखं सौम्यं शुद्धस्फटिकनिर्म्मलम्।
वरदाभयहस्तञ्च द्विनेत्रं शिवविग्रहम् ॥ १३
एवं ध्यात्वा यजेद्गन्ध-पुष्पादिभिरनुक्रमात्।
पद्मस्य नैर्ऋते पद्मे गणपस्यासनोपरि ॥ १४
मूर्त्तिं प्रकल्प्य तत्रैव गणानां त्वेति मन्त्रतः।
समावाह्य ततो देवं ध्यायेदेकाग्रमानसः ॥ १५
रक्तवर्णं महाकायं सर्व्वाभरणभूषितम्।
पाशाङ्कुशेष्टदशनान् दधानं करपङ्कजैः ॥ १६
गजाननं प्रभुं सर्व्वविघ्नौघास्त्रसुपाशितुः।

(क) पर्व्वसु क्रममिति वा पाठः।

एवं ध्यात्वा यजेद्गन्ध-पुष्पाद्यैरुपचारकैः ॥ १७
कदली-नारिकेलाम्रफललड्डुकपूर्व्वकम्।
नवैद्यञ्च समर्प्याथ नमस्कृत्य गजाननम् ॥ १८
पद्मस्य वायुदिक्पद्मे सङ्कल्प्य स्कान्दमासनम्।
स्कन्दमूर्त्तिं प्रकल्प्याथ स्कन्दमावाहयेद्बुधः ॥ १९
उच्चार्य्य स्कन्दगायत्रीं ध्यायेदादौ कुमारकम्।
उद्यदादित्यसङ्काशं मयूरवरवाहनम् ॥ २०
चतुर्भुजमुदाराङ्गं मुकुटादिविभूषितम्।
वरदाभयहस्तञ्च शक्तिकुक्कुटधारिणम् ॥ २१
एवं ध्यात्वाथ गन्धाद्यैरुपचारैरनुक्रमात्।
सम्पूज्य पूर्व्वद्वारस्य दक्षशाखामुपाश्रितम् ॥ २२
अन्तःपुराधिपं साक्षान्नन्दिनं सम्यगर्च्चयेत्।
चामीकराचलप्रख्यं सर्व्वाभरणभूषितम् ॥ २३
बालेन्दुमुकुटं सौम्यं त्रिनेत्रञ्च चतुर्भुजम्।
दीप्तशूल-मृगी-टङ्क-हेमवेत्रधरं विभुम् ॥ २४
चन्द्रबिम्बाभवदनं हरिवक्त्रमथापि वा।
उत्तरस्यां तथा तस्य भार्य्याञ्च मरुतां सुताम् ॥ २५
सुयशां सुव्रतामम्बां पादमण्डनतत्पराम्।
सम्पूज्य विधिवद्गन्ध-पुष्पाद्यैरुपचारकैः ॥ २६
ततः सम्प्रोक्षयेत् पद्मं शास्त्रशङ्खोदबिन्दुभिः।
कल्पयेदासनं पश्चादाधारादि यथाक्रमम् ॥ २७
आधारशक्तिं कल्याणीं श्यामां ध्यायेदधोभुवि।
तस्याः पुरस्तादुल्लम्बमनन्तं कुण्डलाकृतिम् ॥ २८
धवलं पञ्चफणिनं लेलिहानमिवाम्बरम्।
तस्योपर्य्यासनं भद्रं कण्ठीरवचतुष्पदम्।
धर्म्मो ज्ञानञ्च वैराग्यमैश्वर्य्यञ्च पदानि वै ॥ २९
आग्नेय्यादिश्वेतपीतरक्तश्यामानि वर्णतः।
अधर्म्मादीनि पूर्व्वादीन्युत्तरान्तान्यनुक्रमात् ॥ ३०
राजावर्त्तमणिप्रख्यान्यस्य गात्राणि भावयेत्।
अधोर्द्ध्वच्छदनं पश्चात् कन्दं नालञ्च कण्टकान् ॥ ३१
दलादिकं कर्णिकाञ्च विभाव्य क्रमशोऽर्च्चयेत्।
दलेषु सिद्धयः कल्प्याः केशरेषु सशक्तिकाः ॥ ३२
रुद्रा वामादयस्त्वष्टौ पूर्व्वादि परितः क्रमात्।
कर्णिकायाञ्च वैराग्यं वीजेषु नव शक्तयः ॥ ३३
वामाद्या एव पूर्व्वादि तदन्तश्च मनोन्मनी।
कन्दे शिवात्मको धर्म्मो नाले ज्ञानं शिवाश्रयम् ॥ ३४

कर्णिकोपरि वाह्नेयं मण्डलं सौरमैन्दवम्।
आत्म-विद्या-शिवाख्यञ्च तत्त्वत्रयमतः परम्।
सर्व्वासनोपरि सुखं विचित्रकुसुमोज्ज्वलम्।
परव्योमावकाशाख्यविद्ययातीवभास्वरम् ॥
परिकल्प्यासनं मूर्त्ति-पुष्पविन्यासपूर्व्वकम्।
आधारशक्तिमारभ्य शुद्धविद्यासनावधि ॥
ओङ्कारादिचतुर्थ्यन्तं नाममन्त्रं नमोऽन्तकम्।
उच्चार्य्य पूजयेद्विद्वान् सर्व्वत्रैवं विधिक्रमः।
अङ्गवक्त्रकलाभेदात् पञ्च ब्रह्माणि पूर्व्ववत्।
विन्यसेत् क्रमशो मूर्त्तौ तत्तन्मुद्राविचक्षणः।
आवाहयेत् ततो देवान् पुष्पाञ्जलिपुटस्थि
सद्योजातं प्रपद्यामीत्यारभ्योमन्तमुच्चरन् ॥
आधारोत्थितनादन्तु द्वादशग्रन्थिभेदतः।
ब्रह्मरन्ध्रान्तमुच्चार्य्य ध्यायेदोङ्कारगोचरम्।
शुद्धस्फटिकसङ्काशं देवं निष्कलमक्षरम्।
कारणं सर्व्वलोकानां सर्व्वलोकमयं परम्।
अन्तर्वहिःस्थितं व्याप्यमणोरणु महत्तरम्
भक्तानामप्रयत्नेन दृश्यमीश्वरमव्ययम् ॥
ब्रह्मेन्द्र-विष्णु-रुद्राद्यैरपि देवैरगोचरम्
वेदसारञ्च विद्वद्भिरगोचरमिति श्रुतम् ॥
आदिमध्यान्तरहितं भेषजं भवरोगिणाम्।
समाहितेन मनसा ध्यात्वैवं परमेश्वरम् ॥
आवाहनं स्थापनञ्च सन्निरोधं निरीक्षणम्
नमस्कारञ्च कुर्व्वीत बद्ध्वा मुद्राः पृथक् पृ
ध्यायेत् सदाशिवं साक्षाद्देवं सकलनिष्कल
शुद्धस्फटिकसङ्काशं प्रसन्नं शीतलद्युतिम्।
विद्युद्वलयसङ्काशं जटामुकुटभूषितम्।
शार्दूलचर्म्मवसनं किञ्चित्स्मितमुखाम्बुजम्।
रक्तपद्मदलप्रख्यपाणिपादतलाधरम्।
सर्व्वलक्षणसम्पन्नं सर्व्वाभरणभूषितम् ॥
दिव्यायुधवरैर्युक्तं दिव्यगन्धानुलेपनम्।
पञ्चवक्त्रं दशभुजं चन्द्रखण्डशिखामणिम्।
अस्य पूर्व्वमुखं सौम्यं बालार्कसदृशप्रभम्।
त्रिलोचनारविन्दाढ्यं बालेन्दुकृतशेखरम्।
दक्षिणं नीलजीमूतसमानरुचिरप्रभम्।
भ्रुकुटीकुटिलं घोरं रक्तवृत्तत्रिलोचनम्।

दंष्ट्राकरालं दुष्प्रेक्ष्यं स्फुरिताधरपल्लवम् ।
उत्तरं विद्रुमप्रख्यं नीलालकविभूषितम् ॥ ५३
सद्विलासं त्रिनयनं चन्द्रार्द्धकृतशेखरम् ।
पश्चिमं पूर्णचन्द्राभं लोचनत्रितयोज्ज्वलम् ॥ ५४
चन्द्रलेखाधरं सौम्यं मन्दस्मितमनोहरम् ।
पञ्चमं स्फटिकप्रख्यमिन्दुरेखासमुज्ज्वलम् ॥ ५५
अतीवसौम्यमुत्फुल्ल-लोचनत्रितयोज्ज्वलम् ।
दक्षिणे शूल-परशु-वज्र-खड्गानलोज्ज्वलम् ॥ ५६
सव्ये पिनाक-नाराच-घण्टा-पाशाङ्कुशोज्ज्वलम् ।
निवृत्त्या जानुपर्य्यन्तमा नाभेश्च प्रतिष्ठया ॥ ५७
आकण्ठं विद्यया तद्वल्ललाटन्तु शान्तया ।
तदूर्द्ध्वं शान्त्यतीताख्यकलया परया तथा ॥ ५८
पञ्चाध्वव्यापिनं तस्मात् कलापञ्चकविग्रहम् ।
ईशानमुकुटं देवं पुरुषास्यं पुरातनम् ॥ ५९
अघोरहृदयं तद्वद्वामगुह्यं महेश्वरम् ।
सद्यपादञ्च तन्मूर्त्तिमष्टत्रिंशत्कलामयम् ॥ ६०
मातृकामयमीशानं पञ्चब्रह्ममयं तथा ।
ओङ्काराख्यमयञ्चैव हंसन्यासमयं तथा ॥ ६१
पञ्चाक्षरमयं देवं षड़क्षरमयं तथा ।
अङ्गषट्कमयञ्चैव जातिषट्कसमन्वितम् ॥ ६२
एवं ध्यात्वाथ मद्वामभागे त्वाञ्च मनोन्मनीम् ।
गौरीमिमायमन्त्रेण प्रणवाद्येन भक्तितः ॥ ६३
आवाह्य पूर्व्ववत् कुर्य्यान्नमस्कारान्तमीश्वरि ।
ध्यायेत् ततस्त्वां देवेशि समाहितमना मुनिः ॥ ६४
प्रफुल्लोत्पलपत्राभां विस्तीर्णायतलोचनाम् ।
पूर्णचन्द्राभवदनां नीलकुञ्चितमूर्द्धजाम् ॥ ६५
नीलोत्पलदलप्रख्यां चन्द्रार्द्धकृतशेखराम् ।
अतिवृत्तघनोत्तुङ्ग-स्निग्धपीनपयोधराम् ॥ ६६
तनुमध्यां पृथुश्रोणीं पीतसूक्ष्मतराम्बराम् ।
सर्व्वाभरणसम्पन्नां ललाटतिलकोज्ज्वलाम् ॥ ६७
विचित्रपुष्पसङ्कीर्ण-केशपाशोपशोभिताम् ।
सर्व्वतोऽनुगुणाकारां किञ्चिल्लज्जानताननाम् ॥ ६८
हेमारविन्दं विलसद्दधानां दक्षिणे करे ।
दण्डवच्चापरं हस्तं न्यस्यासीनां महासने ॥ ६९
एवं मां त्वाञ्च देवेशि ध्यात्वा नियतमानसः ।
स्नापयेच्छुद्धतोयेन प्रणवप्रोक्षणक्रमात् ॥ ७०

भवे भवे नातिभव इति पाद्यं प्रकल्पयेत् ।
वामाय नम इत्युक्त्वा दद्यादाचमनीयकम् ॥ ७१
ज्येष्ठाय नम इत्युक्त्वा शुभ्रवस्त्रं प्रकल्पयेत् ।
श्रेष्ठाय नम इत्युक्त्वा दद्याद्यज्ञोपवीतकम् ॥ ७२
रुद्राय नम इत्युक्त्वा पुनराचमनीयकम् ।
कालाय नम इत्युक्त्वा गन्धं दद्यात् सुसंस्कृतम् ॥ ७३
कलविकरणाय नमोऽक्षतं परिकल्पयेत् ।
बलविकरणाय नम इति पुष्पाणि दापयेत् ॥ ७४
बलाय नम इत्युक्त्वा धूपं दद्यात् प्रयत्नतः ।
बलप्रमथनायेति सुदीपञ्च प्रदापयेत् ॥ ७५
ब्रह्मभिश्च षड़ङ्गैश्च ततो मातृकया सह ।
प्रणवेन शिवेनैव शक्तियुक्तेन च क्रमात् ॥ ७६
मुद्राः सन्दर्शयेन्मह्यं तुभ्यञ्च वरवर्णिनि ।
मयि प्रकल्पयेत् पूर्व्वमुपचारांस्ततस्त्वयि ॥ ७७
यदा त्वयि प्रकुर्व्वीत स्त्रीलिङ्गं योजयेत् तदा ।
पञ्चावरणपूजान्तु प्रारभेत यथाक्रमम् ॥ ७८
प्रथमं पूजितौ यत्र तत्रैव क्रमशः सुधीः ।
गन्धाद्यैरर्च्चयेत् पूर्व्वं देवौ हेरम्ब-षण्मुखौ ॥ ७९
पञ्च ब्रह्माणि परितो वृत्तं सम्पूजयेत् क्रमात् ।
ईशानदेशे पूर्व्वे च दक्षिणे चोत्तरे सदा ॥ ८०
पश्चिमे च ततस्तस्मिन् षड़ङ्गानि समर्च्चयेत् ।
आग्नेये च तथेशाने नैर्ऋते वायुदेशके ॥ ८१
मध्येनेत्रं तदस्त्रं पूर्व्वादिपरितः क्रमात् ।
प्रथमावरणं प्रोक्तं द्वितीयावरणं शृणु ॥ ८२
अनन्तं पूर्व्वदिक्पत्रे सूक्ष्मं दक्षिणतस्ततः ।
शिवोत्तमं पश्चिमत एकनेत्रं तथोत्तरे ॥ ८३
एकरुद्रं तथेशाने त्रिमूर्त्तिं वह्निदिग्दले ।
श्रीकण्ठं नैर्ऋते वायौ शिखण्डीशं समर्च्चयेत् ॥ ८४
द्वितीयावरणे चैवं पूज्यास्ते चक्रवर्त्तिनः ।
पूर्व्वद्वारस्य मध्ये तु वृषेशानं प्रपूजयेत् ॥ ८५
तद्दक्षिणे नन्दिनञ्च महाकालं तदुत्तरे ।
भृङ्गीशं दक्षिणद्वारपश्चिमे सम्प्रपूजयेत् ॥ ८६
तत्पूर्व्वकोष्ठे गन्धाद्यैः सम्पूज्य च विनायकम् ।
पश्चिमोत्तरकोष्ठे च वृषभं दक्षिणे गुहम् ॥ ८७
उत्तरद्वारपूर्व्वे तु प्रदक्षिणविधानतः ।
भवं शर्व्वं तथेशानं रुद्रं पशुपतिं पुनः ॥ ८८

उग्रं भीमं महादेवं तृतीयावरणान्त्विदम् ।
यो वेदादौ स्वर इति समावाह्य महेश्वरम् ॥ ८९
पूजयेत् पूर्व्वदिग्भागे कमले कर्णिकोपरि ।
ईश्वरं पूर्व्वदिक्पत्रे विश्वेशं दक्षिणे ततः ॥ ९०
सौम्ये तु परमेशानं सर्व्वेशं पश्चिमे यजेत् ।
दक्षिणे तु यजेद्रुद्रमा वो राजानमित्यृचा ॥ ९१
आवाह्य गन्धपुष्पाद्यैः कर्णिकायां दलेषु च ।
शिवः पूर्व्वे दक्षिणतो हर उत्तरतो मृडः ॥ ९२
भवः पश्चिमदिक्पत्रे पूज्या एते यथाक्रमम् ।
उत्तरे विष्णुमावाह्य गन्धपुष्पादिभिर्यजेत् ॥ ९३
प्रतद्विष्णुरिति प्रोच्य कर्णिकायां दलेषु च ।
वासुदेवं पूर्व्वभागे दक्षिणे चानिरुद्धकम् ॥ ९४
सौम्ये सङ्कर्षणञ्चैव प्रद्युम्नं पश्चिमे यजेत् ।
ब्रह्माणं पश्चिमे पद्मे समावाह्य समर्च्चयेत् ॥ ९५
हिरण्यगर्भः समवर्त्ततेति मन्त्रेण मन्त्रवित् ।
हिरण्यगर्भं पूर्व्वस्यां विराजं दक्षिणे ततः ॥ ९६
उत्तरे पुरुषञ्चैव कालं पश्चिमतो यजेत् ।
सर्व्वांश्चैपङ्क्तौ पूर्व्वादिप्रदक्षिणविधानतः ॥ ९७
तत्तत्स्थानेषु सम्पूज्या लोकपाला अनुक्रमात् ।
रान्तं यान्तं तथा वान्तं लान्तं लान्तमपूर्व्वकम्॥९८
षान्तं सान्तञ्च वेदाद्यं (क) श्रीवीजञ्च दश क्रमात् ।
वीजानि लोकपालानामेतैरेतान् समर्च्चयेत् ॥ ९९
नैर्ऋते उत्तरे तद्वदीशानस्य च दक्षिणे ।
ब्रह्मविष्णू च विधिना पूजयेदुपचारकैः ॥ १००
वाह्यरेखासु देवेशि पञ्चमावरणं यजेत् ।
श्रीमत् त्रिशूलमीशाने वज्रं माहेन्द्रदिङ्मुखे ॥ १०१
परशुं वह्निदिग्भागे याम्ये शायकमर्च्चयेत् ।
नैर्ऋते तु यजेत् खड्गं पाशं वरुणगोचरे ॥ १०२
अङ्कुशं मारुते भागे पिनाकञ्चोत्तरे यजेत् ।
पश्चिमाभिमुखं रौद्रं क्षेत्रपालं समर्च्चयेत् ॥ १०३
कृताञ्जलिपुटाः सर्व्वे चिन्त्याः स्मितमुखाम्बुजाः ।
सादरं प्रेक्षमाणाश्च देवं देवीञ्च सर्व्वदा ॥ १०४
इत्थमावरणाभ्यर्च्चां कृत्वा व्याक्षेपशान्तये ।
पुनरभ्यर्च्च्य देवेशं प्रणवञ्च शिवं वदेत् ॥ १०५
एवमभ्यर्च्च्य विधिवद्गन्धाद्यैरुपचारकैः ।
उपचर्य्य ततो दद्यान्नैवेद्यं विधिसाधितम् ॥
पुनराचमनीयञ्च दद्यादर्घ्यं यथा पुरा ।
ततो निवेद्य पानीयं ताम्बूलञ्चोपदंशकैः ॥ १
नीराजनादिकं कृत्वा पूजाशेषं समापयेत् ।
ध्यात्वा देवञ्च देवीञ्च मनुमष्टोत्तरं जपेत् ॥ १
तत उत्थाय रचितपुष्पाञ्जलिपुटः स्थितः ।
जपेद्ध्यात्वा महादेवं यो देवानामिति क्रमात् ।
यो वेदादौ स्वरः प्रोक्त इत्यन्तं परमेश्वरि ।
पुष्पाञ्जलिं ततो दत्त्वा त्रिः प्रदक्षिणमाचरेत् ।
साष्टाङ्गं प्रणमेत् तञ्च भक्त्या परमयान्वितः ।
पुनः प्रदक्षिणं कृत्वा प्रणमेत् पुनरेकधा ॥ १
स्थिरासने समभ्यर्च्च्य देवं नामाष्टकेन च ।
साधु वासाधु वा कर्म्म यद्यदाचरितं मया ।
तत् सर्व्वं भगवन् शम्भो भवदाराधनं परम् ।
इति शङ्खोदकेनैव सपुष्पेण समर्च्चयेत् ॥ ११३
पूज्यां पुनः समभ्यर्च्च्य सार्थं नामाष्टकं जपेत् ।
शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः ।
संसारवैद्यः सर्व्वज्ञः परमात्मेति मुख्यतः ।
नामाष्टकमिदं नित्यं शिवस्य प्रतिपादकम् ॥
आद्यन्तु पञ्चकं तत्र शान्त्यतीताद्यनुक्रमात् ।
संज्ञा सदाशिवादीनां पञ्चोपाधिपरिग्रहात् ।
उपाधिविनिवृत्तौ तु यथास्वं विनिवर्त्तते ।
पदमेव हि तन्नित्यमनित्याः पदिनः स्मृताः ॥
पदानां परिवृत्तिः स्यान्मुच्यन्ते पदिनो यतः ।
परिवृत्त्यन्तरे त्वेवं भूयस्तस्याप्युपाधिना ॥ १
आत्मान्तराभिधानं स्याद्यदाद्यं नाम पञ्चकम् ।
अन्यत् तु त्रितयं नाम्नामुपादानादियोगतः ।
त्रिविधोपाधिवचनाच्छिव एव तु वर्त्तते ।
अनादिमलसंश्लेष-प्रागभावात् स्वभावतः ॥ १
अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते ।
अथवाशेषकल्याणगुणैकघन ईश्वरः ॥ १२
शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः ।
त्रयोविंशतितत्त्वेभ्यः परा प्रकृतिरुच्यते ॥ १
प्रकृतेस्तु परं प्राहुः पुरुषं पञ्चविंशकम् ।
यं वेदादौ स्वरं प्राहुर्वाच्यवाचकभावतः ॥ १
वेदैकवेद्यं याथात्म्याद्वेदान्ते च प्रतिष्ठितम् ।

(क) प्रणव इत्यर्थः ।

स एव प्रकृतौ लीनो भोक्ता यः प्रकृतेर्यतः ॥ १२४
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।
तदधीनप्रवृत्तित्वात् प्रकृतेः पुरुषस्य च ॥ १२५
अथवा त्रिगुणं तत्त्वं मायेयमिदमव्ययम् ।
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ॥ १२६
मायाविक्षोभकोऽनन्तो महेश्वरसमन्वयात् ।
सद्दुःखं दुःखहेतुर्वा तद्द्रावयति यः प्रभुः ॥ १२७
रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ।
शिवतत्त्वादिभूम्यन्तं शरीरादि घटादि च ॥ १२८
व्याप्याधितिष्ठति शिवस्तस्माद्विष्णुरुदाहृतः ।
जगतः पितृभूतानां शिवो मूर्त्त्यात्मनामपि ॥ १२९
पितृभावेन सर्व्वेषां पितामह उदीरितः ।
निदानज्ञो यथा वैद्यो रोगस्य विनिवर्त्तकः ॥ १३०
उपायैर्भेषजैस्तद्वल्लयभोगाधिकारतः ।
संसारस्येश्वरो नित्यं स्थूलस्य विनिवर्त्तकः ॥ १३१
...गरवैद्य इत्युक्तः शिवतत्त्वार्थवेदिभिः ।
दशार्थज्ञानसिद्ध्यर्थमिन्द्रियेषु च सत्स्वपि ॥ १३२
त्रिकालभाविनो भावान् स्थूलान् सूक्ष्मानशेषतः ।
अणवो नैव जानन्ति मायार्णवमलावृताः ॥ १३३
असत्स्वपि च सर्व्वेषु सिद्धसर्व्वार्थवेदिषु ।
यद्वद्यथावस्थितं वस्तु तत् तथैव सदाशिवः ॥ १३४
अयत्नेनैव जानाति तस्मात् सर्व्वज्ञ उच्यते ।
सर्व्वात्मा परमैरेभिर्गुणैर्नित्यसमन्वयात् ॥ १३५
स्वस्मात् परात्मविरहात् परमात्मा शिवः स्वयम् ।
इति स्तुत्वा महादेवं प्रणवात्मानमव्ययम् ॥ १३६
दत्त्वा पराङ्मुखार्घ्यञ्च पश्चादीशानमस्तके ।
पुनरभ्यर्च्य देवेशं प्रणवेन समाहितः ॥ १३७
हस्तेन वद्धाञ्जलिना पूजापुष्पं प्रगृह्य च ।
उन्मनान्तं शिवं नीत्वा वामनासापुटाध्वना ॥ १३८
देवीसुहास्य च ततो दक्षनासापुटाध्वना ।
शिव एवाहमस्मीति तद्देवमनुभूय च ॥ १३९
सर्व्वावरणदेवांश्च पुनरुद्वासयेद्धृदि ।
विद्यापूजां गुरोः पूजां कृत्वा पश्चाद्यथाक्रमम् ॥ १४०
शङ्खार्घ्यपात्रमन्त्रांश्च हृदये विन्यसेत् क्रमात् ।
निर्म्माल्यञ्च समर्प्याथ चण्डेशायेशगोचरे ॥ १४१
पुनश्च संयतप्राण ऋष्यादिकमथोच्चरेत् ।

कैलासप्रस्तरो नाम मण्डलं परिभाषितम् ॥ १४२
अर्च्चयेन्नित्यमेवैतत् पक्षे वा मासि मासि वा ।
षण्मासे वत्सरे वापि चातुर्म्मास्यादिपर्व्वणि ॥ १४३
असमर्थः समभ्यर्च्येन्नित्यं मल्लिङ्गमास्तिकः ।
तस्मिन् क्रमे महादेवि विशेषः कोऽपि कथ्यते ॥ १४४
उपदेशदिने लिङ्गं पूजितं गुरुणा सह ।
गृह्णीयादर्च्चयिष्यामि शिवमाप्राणसंचयम् ॥ १४५
एवं त्रिवारमुच्चार्य्य शपथं गुरुसन्निधौ ।
ततः समर्च्चयेन्नित्यं पूर्व्वोक्तविधिना प्रिये ॥ १४६
अर्घ्यं समर्पयेल्लिङ्गमूर्द्धन्यर्घ्योदकेन च ।
प्रणवेन समभ्यर्च्य धूप-दीपौ समर्पयेत् ॥ १४७
ऐशान्यां चण्डमाराध्य निर्म्माल्यञ्च निवेदयेत् ।
प्रक्षाल्य लिङ्गं वेदीञ्च वस्त्रपूतैर्जलैस्ततः ॥ १४८
निक्षिप्य पुष्पं शिरसि लिङ्गस्य प्रणवेन तु ।
आधारशक्तिमारभ्य शुद्धविद्यासनावधि ॥ १४९
विभाव्य सर्व्वं मनसा स्नापयेत् परमेश्वरम् ।
पञ्चगव्यादिभिर्गव्यैर्यथाविभवसम्भृतैः ॥ १५०
केवलैर्वा जलैः शुद्धैः सुरभिद्रव्यवासितैः ।
पावमानेन रुद्रेण नीलेन त्वरितेन च ॥ १५१
लिङ्गसूक्तादिसूक्तैश्च शिरसाथर्व्वणेन च ।
ऋग्भिश्च सामभिर्वापि ब्रह्मभिश्चैव पञ्चभिः ॥ १५२
स्नापयेद्देवदेवेशं प्रणवेन शिवेन च ।
विशेषार्घ्योदकेनापि प्रणवेनाभिषिञ्चयेत् ॥ १५३
विशोध्य वाससा पुष्पं लिङ्गमूर्द्धनि विन्यसेत् ।
पीठे लिङ्गं समारोप्य सूर्य्याद्यर्च्चां समाचरेत् ॥ १५४
आधारशक्त्यनन्तौ द्वौ पीठाधस्तात् समर्च्चयेत् ।
सिंहासनं तदूर्द्धन्तु समभ्यर्च्य यथाक्रमम् ॥ १५५
अधोर्द्ध्वच्छदनं पीठपादे कन्दं समर्च्चयेत् ।
मूर्त्तिं लिङ्गे समाकल्प्य मां त्वया स हरं जयेत् ॥ १५६
एवं मया ते कथितमतिगुह्यमिदं प्रिये ।
गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित् ॥ १५७
मम भक्ताय दातव्यं यतये वीतरागिणे ।
गुरुभक्ताय शान्ताय मदर्थोद्योगभागिने ॥ १५८
ममाज्ञामतिलङ्घ्यैतद्यो ददाति विमूढधीः ।
स नारकी मम द्रोही भविष्यति न संशयः ॥ १५९
मद्भक्तदानाद्देवेशि मत्प्रियश्च भवेद्ध्रुवम् ।

व्यास उवाच।

एतच्छ्रुत्वा महादेवी देवेन परिभाषितम् ॥ १६०
स्तुत्वा तु विविधैः स्तोत्रैर्देवं वेदार्थगर्भितैः।
श्रीमत्पादाब्जयोः पत्युः प्रणम्य परमेश्वरी ॥ १६१
अतिप्रहृष्टहृदया मुमोद मुनिसत्तमाः।
अतिगुह्यमिदं विप्राः प्रणवार्थप्रकाशकम् ॥ १६२
शिवज्ञानं परं ह्येतद्भवतामार्त्तिनाशनम्।

सूत उवाच।

इत्युक्त्वा मुनिशार्दूलः पाराशर्य्यो महातपाः ॥ १६३
पूजितः परया भक्त्या मुनिभिर्वेदवादिभिः।
कैलासाद्रिमनुस्मृत्य ययौ तस्मात् तपोवनात् ॥ १६४
तेऽपि प्रहृष्टहृदयाः स्वान्ते परमेश्वरम्।
सम्पूज्य परया भक्त्या सोमं सोमार्द्धशेखरम् ॥ १६५
यमादियोगनिरताः शिवध्यानपराभवन्।
गुहाय कथितं ह्येतद्देव्या तेनापि नन्दिने ॥ १६६
सनत्कुमारसुनये प्रोवाच भगवानपि।
तस्माल्लब्धं मद्गुरुणा व्यासेनामिततेजसा ॥ १६७
तस्माल्लब्धमिदं पुण्यं मयापि मुनिपुङ्गवाः।
भवद्भिरपि दातव्यमेतद्गुह्यं शिवप्रियम् ॥ १६८
यतिभ्यः शान्तचित्तेभ्यो भक्तेभ्यः शिवपादयोः।
एतदुक्त्वा महाभागः सूतः पौराणिकोत्तमः ॥ १६९
तीर्थयात्राप्रसङ्गेन चचार पृथिवीमिमाम्।
एतद्रहस्यं परमं लब्ध्वा सूतान्मुनीश्वराः।
काश्यामेव समासीना मुक्ताः शिवपदं ययुः ॥ १७०

इति श्रीशैवे महापुराणे कैलाससंहितायां षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः।

व्यास उवाच।

गतेऽथ सूते मुनयः सुविस्मिता
विचिन्त्य चान्योन्यमिदन्तु विस्मृतम्।
यद्वामदेवस्य मतं मुनीश्वर-
प्रसूचितं तत् खलु कष्टमद्य नः ॥ १
कदा नु भूयान्मुनिवर्य्यदर्शनं
भवाब्धिदुःखौघहरं परं हि तत्।
महेश्वराराधनपुण्यतोऽधुना
मुनीश्वरः सत्वरमाविरस्तु नः ॥ २
इति चिन्तासमाविष्टा मुनयो मुनिपुङ्गवम्।
व्यासं सम्पूज्य हृत्पद्मे तस्थुस्तद्दर्शनोत्सुकाः।
संवत्सरान्ते च पुनः काशीं प्राप महामुनिः।
तं दृष्ट्वा सूतमायान्तं मुनयो हृष्टचेतसः ॥ ४
अभ्युत्थानासनार्घ्यादिपूजया समपूजयन्।
सोऽपि तान् मुनिशार्दूलानभिनन्द्य सितोद॥
अथ स्नात्वा जाह्नवीये जले परमपावने।
ऋषीन् सन्तर्प्य च सुरान् पितॄंश्च तिलतण्डु
तीरमागत्य सम्प्रोक्ष्य वाससी परिधाय च।
द्विराचम्य समादाय भस्म सद्यादिमन्त्रतः॥
उद्धूलनादिक्रमतो विधायाथ मुनीश्वरः।
रुद्राक्षमालाभरणः कृतनित्यक्रियः सुधीः॥
विश्वेश्वरमुमाक्रान्तं सस्तुतं सगणाधिपम्।
सम्पूज्य परया भक्त्या स्तुत्वा नत्वा मुहुर्मुहुः॥
कालभैरवनाथञ्च सम्पूज्याथ विधानतः।
प्रदक्षिणीकृत्य पुनस्त्रेधा नत्वा च पञ्चधा॥
पुनः प्रदक्षिणीकृत्य प्रणम्य भुवि दण्डवत्।
श्रीमत्पञ्चाक्षरीं विद्यामष्टोत्तरसहस्रकम्॥
संजप्य पुरतः स्थित्वा क्षमाप्य च महेश्वर
चण्डेशं सम्पूज्याथ मुक्तिमण्डपमध्यतः॥
निर्द्दिष्टमासनं भेजे मुनिभिर्वेदपारगैः।
एवं स्थितेषु सर्व्वेषु नमस्कृत्य समन्तकम्॥
अथ प्राह मुनीन्द्राणां भाववृद्धिकरं वचः।

सूत उवाच।

इतो निर्गत्य सम्प्राप्य तीरं दक्षपयोनिधेः॥
स्नात्वा सम्पूज्य विधिवद्देवीं कन्यामयीं
पुनरागत्य विप्रेन्द्राः सुवर्णमुखरीतटे॥
श्रीकालहस्तिशैलाख्यनगरे परमाद्भुते।
सुवर्णमुखरीतोये स्नात्वा देवानृषीनपि॥
सन्तर्प्य कालहस्तीशं चन्द्रकान्तसमप्रभम्।
पश्चिमाभिमुखं पञ्चशिरसं परमाद्भुतम्॥
सकृद्दर्शनमात्रेण सर्व्वाघक्षयकारकम्।
सम्पूज्य परया भक्त्या तस्य दक्षिणगां शि
ज्ञानप्रसूनकलिकामपि सम्पूज्य भक्तितः।

श्रीमत्पञ्चाक्षरीं विद्यामष्टोत्तरसहस्रकम् ॥ १९
त्वणं प्रदक्षिणीकृत्य स्तुत्वा नत्वा मुहुर्मुहुः ।
प्रदक्षिणीकृत्य गिरिं प्रत्यहं परया मुदा ॥ २०
एवं नियममास्थाय स्थितोऽहं क्षेत्रनायके ।
नीत्वा च चतुरो मासानेतदन्ते मुनीश्वराः ॥ २१
ज्ञानप्रसूनकलिकामहादेव्याः प्रसादतः ।
एकदा तु समास्तीर्य चैलाजिनकुशोत्तरम् ॥ २२
आसनं परमं तस्मिन् स्थित्वा रुद्धेन्द्रियो मुनिः ।
समाधिमास्थाय सदा परमानन्दचिद्घनः ॥ २३
परिपूर्णः शिवोऽस्मीति निर्व्यग्रहृदयोऽभवम् ।
एतस्मिन्नेव समये मद्गुरुः करुणानिधिः ॥ २४
नीलजीमूतसङ्काशो विद्युत्पिङ्गजटाधरः ।
प्रांशुः कमण्डलु-दण्ड-कृष्णाजिनधरः स्वयम् ॥ २५
भस्मावदातसर्व्वाङ्गः सर्व्वलक्षणलक्षितः ।
त्रिपुण्ड्रविलसद्भालो रुद्राक्षालङ्कृताकृतिः ॥ २६
पद्मपत्रारुणायाम-विस्तीर्णनयनद्वयः ।
प्रादुर्भूय हृदम्भोजे तदानीमेव सत्वरम् ॥ २७
विमोहितश्च भगवानेतदद्भुतमास्तिकाः ।
आसीदुन्मील्य नयने विलापं कृतवानहम् ॥ २८
आसीन्ममाश्रुपातश्च गिरिनिर्झरसन्निभः ।
एतस्मिन्नेव समये श्रुत्वा वागशरीरिणी ॥ २९
व्योम्नः सूत महाभाग गच्छ वाराणसीं पुरीम् ।
तत्रासन् मुनयः पूर्व्वमुपदिष्टास्त्वयाधुना ॥ ३०
त्वदुपागमकल्याणं काङ्क्षन्ते विवशा भृशम् ।
तिष्ठन्ति ते निराहारा इति सा विरराम च ॥ ३१
तत उत्थाय तरसा देवं देवीञ्च भक्तितः ।
प्रदक्षिणीकृत्य पुनः प्रणम्य भुवि दण्डवत् ॥ ३२
द्विषड्वारं गुरोराज्ञां विज्ञाप्य शिवयोरथ ।
क्षेत्रान्निर्गत्य तरसा चत्वारिंशद्दिनान्तरे ॥ ३३
आगतोऽस्मि मुनिश्रेष्ठा अनुगृह्णन्तु मामिह ।
मया किमद्य वक्तव्यं भवन्तस्तद्ब्रुवन्तु मे ॥ ३४
इति सूतवचः श्रुत्वा ऋषयो हृष्टमानसाः ।
अवोचन् मुनिशार्दूलं व्यासं नत्वा मुहुर्मुहुः ॥ ३५

ऋषय ऊचुः ।

सूत सूत महाभाग त्वमस्मद्गुरुसत्तमः ।
अतस्त्वां परिपृच्छामः शिष्येषु गुरवः सदा ॥ ३६
स्निग्धीभावा इति पुरा दर्शितं भवताधुना ।
विरजाहोमसमये वामदेवमतं पुरा ॥ ३७
सूचितं भवतास्माभिर्न श्रुतं विस्तरान्मुने ।
तदिदानीं श्रोतुकामा वयं तद्वक्तुमर्हसि ॥ ३८
इति तेषां वचः श्रुत्वा सूतो हृष्टतनूरुहः ।
नमस्कृत्वा महादेवं देवीं व्यासञ्च भक्तितः ॥ ३९
प्राह गम्भीरया वाचा मुनीनाह्लादयन्निदम् ।

सूत उवाच ।

स्वस्त्यस्तु मुनयः सर्व्वे सुखिनः सन्तु सर्व्वदा ॥ ४०
तदतीव विचित्रं हि श्रुतं गुरुमुखाम्बुजात् ।
इतः पूर्व्वं मया नोक्तं गुह्यप्राकट्यशङ्कया ॥ ४१
यूयं खलु महाभागा भवभक्ता दृढव्रताः ।
इति निश्चित्य युष्माकं वक्ष्यामि श्रूयतां मुदा ॥ ४२
पुरा रथन्तरे कल्पे वामदेवो महामुनिः ।
गर्भमुक्तः शिवज्ञानविदां गुरुतमः स्वयम् ॥ ४३
वेदागमपुराणादि-सर्व्वशास्त्रार्थतत्त्ववित् ।
देवासुरमनुष्यादि-जीवानां जन्मकर्म्मवित् ॥ ४४
भस्मावदातसर्व्वाङ्गो जटामण्डलमण्डितः ।
निराश्रयो निःस्पृहश्च निर्द्वन्द्वो निरहङ्कृतिः ॥ ४५
दिगम्बरो वीतभयो महेश्वर इवापरः ।
शिष्यभूतैर्मुनीन्द्रैश्च तादृशैः परिवारितः ॥ ४६
पर्य्यटन् पृथिवीमेनां स्वपादस्पर्शपुण्यतः ।
पवित्रयन् परे धाम्नि निमग्नहृदयोऽन्वहम् ॥ ४७
कुमारशिखरं मेरोर्दक्षिणं प्राविशन्मुदा ।
तत्रास्ते भगवानीशतनयः शिखिवाहनः ॥ ४८
ज्ञानशक्तिधरो वीरः सर्व्वासुरविमर्द्दनः ।
गजावल्लीसमायुक्तः सर्व्वदेवैर्नमस्कृतः ॥ ४९
तत्र स्कन्दसरो नाम सरः सागरसन्निभम् ।
शिशिरस्वादु पानीयं स्वच्छागाधबहूदकम् ।
सर्व्वाश्चर्य्यगुणोपेतं विद्यते स्वामिसन्निधौ ॥ ५०
तत्र स्नात्वा वामदेवः सह शिष्यैर्महामुनिः ।
कुमारशिखराधीशं मुनिवृन्दनिषेवितम् ॥ ५१
उद्यदादित्यसङ्काशं मयूरवरवाहनम् ।
चतुर्भुजमुदाराङ्गं मुकुटादिविभूषितम् ॥ ५२
शक्तिरत्नहृदयोपास्यं शक्तिकुक्कुटधारिणम् ।
वरदाभयहस्तञ्च दृष्ट्वा स्कन्दं मुनीश्वरः ।

सम्पूज्य परया भक्त्या स्तोतुं समुपचक्रमे ॥ ५३

वामदेव उवाच ।

ओं नमः प्रणवार्थाय प्रणवार्थविधायिने ।
प्रणवाक्षरपीठाय प्रणवाय नमो नमः ॥ ५४
वेदान्तार्थस्वरूपाय वेदान्तार्थविधायिने ।
वेदान्तार्थविदां नित्यं विदिताय नमो नमः ॥ ५५
नमो गुहाय भूतानां गुहासु निहिताय च ।
गुह्याय गुह्यरूपाय गुह्यागमविदे नमः ॥ ५६
अणोरणीयसे तुभ्यं महतोऽपि महीयसे ।
नमः परावरज्ञाय परमात्मस्वरूपिणे ॥ ५७
स्कन्दाय स्कन्दरूपाय सिन्दूरारुणतेजसे ।
नमो मन्दारमालोद्यन्मुकुटादिभृते सदा ॥ ५८
शिवशिष्याय पुत्राय शिवस्य शिवदायिने ।
शिवप्रियाय शिवयोरानन्दनिधये नमः ॥ ५९
गाङ्गेयाय नमस्तुभ्यं कार्त्तिकेयाय धीमते ।
मातृपुत्राय महते शरकाननशायिने ॥ ६०
षडक्षरशरीराय षड्विधार्थविधायिने ।
षडध्वातीतरूपाय षण्मुखाय नमो नमः ॥ ६१
द्वादशायतनेत्राय द्वादशायतबाहवे ।
द्वादशायुधधाराय द्वादशात्मन् नमोऽस्तु ते ॥ ६२
चतुर्भुजाय शान्ताय शक्तिकुक्कुटधारिणे ।
वरदाभयहस्ताय नमोऽसुरविदारिणे ॥ ६३
गजावल्लीकुचालिप्त-कुङ्कुमाङ्कितवक्षसे ।
नमो गजाननानन्द-गरिमानन्दितात्मने ॥ ६४
ब्रह्मादिदेव-ऋषि-किन्नरगीयमान-
गाथाविशेषसुविचित्रितकीर्त्तिधाम्ने ।
वृन्दारकामलकिरीटविभूषणस्रक्-
पुञ्जाभिरामपदपङ्कज ते नमोऽस्तु ॥ ६५
इति स्तुत्वा वामदेवो देवं सेनापतिं प्रभुम् ।
प्रदक्षिणत्रयं कृत्वा प्रणम्य भुवि दण्डवत् ॥ ६६
साष्टाङ्गञ्च पुनः कृत्वा प्रदक्षिणनमस्कृतीः ।
अभवत् पार्श्वतस्तस्य विनयावनतो द्विजाः ॥ ६७
तमुवाच महासेनः प्रीतोऽस्मि तव पूजया ।
भक्त्या स्तुत्या च भद्रं ते किमद्य करवाण्यहम् ॥ ६८
मुने त्वं योगिनां मुख्यः परिपूर्णश्च निःस्पृहः ।
भवादृशां हि लोकेऽस्मिन् प्रार्थनीयं न विद्यते ॥ ६९
तथापि लोकरक्षार्थं विचरन्ति हि साधवः ।
श्रोतव्यमस्ति चेद्ब्रह्मन् वक्तुमर्हसि साम्प्रतम् ॥
तदिदानीमहं वक्ष्ये लोकानुग्रहहेतवे ।
इति स्कन्दवचः श्रुत्वा वामदेवो महामुनिः ॥
प्रश्रयावनतः प्राह प्रेमगद्गदया गिरा ।
भगवन् परमेशस्त्वं परावरविभूतिदः ॥ ७२
सर्व्वज्ञः सर्व्वकर्त्ता च सर्व्वशक्तिधरः प्रभुः ।
जीवा वयन्तु ते वक्तुं सन्निधौ परमेशितुः ॥
तथाप्यनुग्रहीतव्या विज्ञानलवमात्रतः ।
प्रेरितः परिपृच्छामि क्षन्तव्योऽतिक्रमो मम ॥
प्रणवो हि परः साक्षात् परमेश्वरवाचकः ।
वाच्यः पशुपतिर्देवः पशूनां पाशमोचकः ॥
वाचकेन समाहूतः पशून् मोचयति क्षणात् ।
तस्माद्वाचकतासिद्धिः प्रणवेन शिवं प्रति ॥
ओमितीदं सर्व्वमिति श्रुतिराह सनातनी ।
ओमिति ब्रह्म सर्व्वं वै ब्रह्मेति च समब्रवीत् ॥
देवसेनापते तुभ्यं देवानां पतये नमः ।
नमः पतीनां पतये परिपूर्णाय ते नमः ॥
एवं स्थिते जगत्यस्मिन् शिवादन्यन्न विद्यते ।
समष्टि-व्यष्टिभावेन प्रणवार्थः श्रुतो मया ॥
न जातु चिन्महासेन तमर्थं वक्तुमर्हसि ।
उपदेशविधानेन सदाचारक्रमेण च ॥ ८०
स्वाम्येव सर्व्वजन्तूनां पाशच्छेदकरो गुरुः ।
अतस्त्वत्कृपया सोऽर्थः श्रोतव्यो हि मया गुरो
इति स मुनिना पृष्टः स्कन्दः प्रणम्य सदाशि-
प्रणववपुषं साष्टत्रिंशत्कलास्वतिलाञ्छितम् ।
सहितमुमया शश्वत् पार्श्वे मुनिप्रवरार्थितं
गदितुमुपचक्राम श्रेयः श्रुतिष्वपि गोपितम् ।

इति श्रीशैवे महापुराणे कैलाससंहिता-
सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

श्रीसुब्रह्मण्य उवाच ।

साधु साधु महाभाग वामदेव मुनीश्वर ।
त्वमतीव शिवे भक्तः शिवज्ञानवतां वरः ॥

त्वया ह्यविदितं किञ्चिन्नास्ति लोकेषु कुत्रचित् ।
तथापि तव वक्ष्यामि लोकानुग्रहकारिणः ॥ २
लोकेऽस्मिन् पशवः सर्व्वे नानाशास्त्रविमोहिताः ।
वञ्चिताः परमेशस्य माययातिविचित्रया ॥ ३
न जानन्ति परं साक्षात् प्रणवार्थं महेश्वरम् ।
दक्षिणं बाहुमुद्धृत्य शपथं प्रब्रवीमि ते ॥ ४
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ।
प्रणवार्थः शिवः साक्षात् प्राधान्येन प्रकीर्त्तितः ॥ ५
यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह ।
आनन्दं यस्य वै विद्वान् न बिभेति कुतश्चन ॥ ६
यस्माज्जगदिदं सर्व्वं विष्णुरुद्रेन्द्रपूर्व्वकम् ।
सह भूतेन्द्रियग्रामैः प्रथमं सम्प्रसूयते ॥ ७
न सम्प्रसूयते यो वै कुतश्चन कदाचन ।
यस्मिन् न भासते विद्युन्न सूर्य्यो न च चन्द्रमाः ॥ ८
यस्य भासा विभातीदं जगत् सर्व्वं समन्ततः ।
सर्व्वैश्वर्य्येण सम्पन्नो नाम्ना सर्व्वेश्वरः स्वयम् ॥ ९
यो वै मुमुक्षुभिर्ध्येयः शम्भुराकाशमध्यगः ।
यस्य पुंसः परा शक्तिर्भावगम्या मनोहरा ॥ १०
निर्गुणा स्वगुणैरेव निगूढा निष्कला शिवा ।
तदीयं त्रिविधं रूपं स्थूलं सूक्ष्मं परं ततः ॥ ११
निष्कलः सर्व्वदेवानामादिदेवः सनातनः ।
ज्ञानक्रियास्वभावो यः परमात्मेति गीयते ॥ १२
तस्य देवाधिदेवस्य मूर्त्तिः साक्षात् सदाशिवः ।
पञ्चमन्त्रतनुर्देवः कलापञ्चकविग्रहः ॥ १३
शुद्धस्फटिकसङ्काशः प्रसन्नः शीतलद्युतिः ।
पञ्चवक्त्रो दशभुजस्त्रिपञ्चनयनः प्रभुः ॥ १४
ईशानमुकुटोपेतः पुरुषास्यः पुरातनः ।
अघोरहृदयो वामदेव गुह्यः प्रदेशवान् ॥ १५
सद्यपादश्च तन्मूर्त्तिः साक्षात् सकलनिष्कलः ।
सर्व्वज्ञत्वादिषट्शक्ति-षड़ङ्गीकृतविग्रहः ॥ १६
शब्दादिशक्तिस्फुरित-हृत्पङ्कजविराजितः ।
स्वशक्त्या वामभागे तु मनोन्मन्या विभूषितः ॥ १७
मन्त्रादिषड़्विधार्थानामर्थोपन्यासमार्गतः ।
समष्टि-व्यष्टिभावार्थं वक्ष्यामि प्रणवात्मकम् ॥ १८
उपदेशक्रमो ह्यादौ वक्तव्यः श्रूयतामयम् ।
मातुर्व्वैर्ण्यं हि लोकेऽस्मिन् प्रसिद्धं मानुषि मुने ॥ १९
त्रैवर्णिकानामेवात्र श्रुत्याचारसमन्वयः ।
शुश्रूषामात्रसारा हि शूद्राः श्रुतिबहिष्कृताः ॥ २०
त्रैवर्णिकानां सर्व्वेषां स्वस्वाश्रमरतात्मनाम् ।
श्रुति-स्मृत्युदितो धर्म्मोऽनुष्ठेयो नापरः क्वचित् ॥ २१
श्रुति-स्मृत्युदितं कर्म्म कुर्व्वन् सिद्धिमवाप्स्यति ।
वर्णाश्रमाचारपुष्पैरभ्यर्च्य परमेश्वरम् ॥ २२
तत्सायुज्यं गताः सर्व्वे बहवो मुनिसत्तमाः ।
ब्रह्मचर्य्येण ऋषयो देवा यज्ञक्रियाध्वना ॥ २३
पितरः स्वधया तृप्ता इति हि श्रुतिरब्रवीत् ।
एवमृणत्रयान्मुक्तो वानप्रस्थाश्रमं गतः ॥ २४
शीतोष्ण-सुखदुःखादिसहिष्णुर्विजितेन्द्रियः ।
तपस्वी विजिताहारो यमाद्यं योगमभ्यसेत् ॥ २५
यथा दृढ़तरा बुद्धिरविचाल्या भवेत् तथा ।
एवं क्रमेण शुद्धात्मा सर्व्वकर्म्माणि विन्यसेत् ॥ २६
सन्न्यस्य सर्व्वकर्म्माणि ज्ञानपूजापरो भवेत् ।
सा हि साक्षाच्छिवैक्येन जीवन्मुक्तिफलप्रदा ॥ २७
सर्व्वशास्त्रार्थतत्त्वज्ञं वेदान्तज्ञानपारगम् ।
आचार्य्यमुपसङ्गम्य यतिं मतिमतां वरम् ॥ २८
दीर्घदण्डप्रणामाद्यैस्तोषयेद्बुयत्नतः सुधीः ।
यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ॥ २९
इति निश्चित्य मनसा स्वविचारं निवेद्य च ।
लब्धानुज्ञस्तु गुरुणा द्वादशाहं पयोव्रती ॥ ३०
शुक्लपक्षे चतुर्थ्यां वा दशम्यां वा विधानतः ।
प्रातः स्नात्वा विशुद्धात्मा कृतनित्यक्रियः सुधीः ॥ ३१
गुरुमाहूय विधिना नान्दीश्राद्धं समारभेत् ।
विश्वेदेवाः सत्यवसुसंज्ञावन्तः प्रकीर्त्तिताः ॥ ३२
देवश्राद्धे ब्रह्म-विष्णु-महेशाः कथितास्त्रयः ।
ऋषिश्राद्धे तु सम्प्रोक्ता देवक्षेत्रमनुष्यजाः ॥ ३३
दिव्यश्राद्धे तु वसुरुद्रादित्याः सम्प्रकीर्त्तिताः ।
चत्वारो मानुषश्राद्धे सनकाद्या मुनीश्वराः ॥ ३४
भूतश्राद्धे पञ्च महाभूतानि च ततः परम् ।
चक्षुरादीन्द्रियग्रामो भूतग्रामश्चतुर्विधः ॥ ३५
पितृश्राद्धे पिता तस्य पिता तस्य पिता त्रयः ।
मातृश्राद्धे मातृ-पितामह्यौ च प्रपितामही ॥ ३६
आत्मश्राद्धे तु चत्वार आत्मा पितृ-पिता महौ ।
प्रपितामहनामा च सपत्नीकाः प्रकीर्त्तिताः ॥ ३७

मातामहात्मकश्राद्धे त्रयो मातामहादयः ।
प्रतिश्राद्धं ब्राह्मणानां युग्मं क्लृप्तोपकल्पितान् ।
आहूय पादौ प्रक्षाल्य स्वयमाचम्य यत्नतः ॥ ३८

समस्तसम्पत्समवाप्तिहेतवः
समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः
पुनन्तु मां ब्राह्मणपादपांशवः ॥ ३९
आपद्घनध्वान्तसहस्रभानवः
समीहितार्थार्पणकामधेनवः ।
समस्ततीर्थाम्बुपवित्रमूर्त्तयो
रक्षन्तु मां ब्राह्मणपादपांशवः ॥ ४०

इति जप्त्वा नमस्कृत्य साष्टाङ्गं भुवि दण्डवत् ।
स्थित्वाथ प्राङ्मुखः शम्भोः पादाब्जयुगलं स्मरन् ॥ ४१
सपवित्रकरः शुद्ध उपवीती दृढासनः ।
प्राणायामत्रयं कृत्वा स्मृत्वा तिथ्यादिकं पुनः ॥ ४२
मत्सन्न्यासाङ्गभूतं यद्वैश्वदेवादिकं क्रमात् ।
श्राद्धमष्टविधं मातामहान्तं पार्व्वणेन वै ॥ ४३
विधानेन करिष्यामि युष्मदाज्ञापुरःसरम् ।
एवं विधाय सङ्कल्पं दर्भानुत्तरतस्त्यजेत् ॥ ४४
उपस्पृश्याथ उत्थाय वरणक्रममारभेत् ।
पवित्रपाणिः संस्पृश्य पाणी ब्राह्मणयोर्वदेत् ॥ ४५
विश्वेदेवार्थ इत्यादि भवद्भ्यां क्षण इत्यपि ।
प्रसादनीय इत्यन्तं सर्व्वत्रैवं विधिक्रमः ॥ ४६
एवं समाप्य वरणं मण्डलानि प्रकल्पयेत् ।
उदगारभ्य दक्ष च कृत्वाभ्यर्च्चनमक्षतः ॥ ४७
तेषु क्रमेण संस्थाप्य ब्राह्मणान् पादयोः पुनः ।
विश्वेदेवस्वरूपस्य ब्राह्मणस्येदमासनम् ॥ ४८
इति दर्भासनं दत्त्वा दर्भपाणिः स्वयं स्थितः ।
अस्मिन् नान्दीमुखश्राद्धे विश्वेदेवार्थ इत्यपि ॥ ४९
भवद्भ्यां क्षण इत्युक्त्वा क्रियतामिति संवदेत् ।
प्राप्नुतामिति सम्प्रोच्य भवन्ताविति संवदेत् ॥ ५०
वदेतां प्राप्नवावेति तौ च ब्राह्मणपुङ्गवौ ।
सम्पूर्णमस्तु सङ्कल्पसिद्धिरस्त्विति तान् प्रति ॥ ५१
भवन्तोऽनुगृह्णन्त्विति प्रार्थयेद्द्विजपुङ्गवान् ।
ततः शुद्धकदल्यादिपात्रेषु क्षालितेषु च ॥ ५२
अन्नादिभोज्यद्रव्याणि दत्त्वा दर्भैः पृथक् पृथक् ।

परिस्तीर्य्य स्वयं तत्र परिषिच्योदकेन च ॥
हस्ताभ्यामवलम्ब्याथ पात्रं प्रत्येकमादरात्
पृथिवि ते पात्रमित्यादि कृत्वा तत्र व्यवस्थित
देवादींश्च चतुर्थ्यन्ताननूद्याक्षतसंयुतम् ।
इदं गृहीत्वा स्वाहेति देवायान्नं त्यजेत् पु
न ममेति वदेदन्ते सर्व्वप्रायं विधिक्रमः ।
यत्पादपद्मस्मरणाद्यस्य नामजपादपि ॥
न्यूनं कर्म्म भवेत् पूर्णं तं वन्दे साम्बमीश्वर
इति जप्त्वा ततो ब्रूयान्मया कृतमिदं पुनः ॥
नान्दीमुखश्राद्धमिति यथोक्तञ्च वदेत् ततः ।
अस्त्विति ब्रूतेति च तान् प्रसाद्य द्विजपुङ्ग
विसृज्य स्वकरस्थोदं प्रणम्य भुवि दण्डवत् ।
उत्थाय च ततो ब्रूयादमृतं भवतु द्विजान् ॥
श्रीरुद्रं चमकं सूक्तं पौरुषञ्च यथाविधि ।
चित्ते सदाशिवं ध्यात्वा जपेद्ब्रह्माणि पञ्च च
भोजनान्ते रुद्रसूक्तं समापय्य द्विजान् पुनः ।
तन्मन्त्रेण ततो दद्यादुत्तरापोशनं पुनः ॥
प्रक्षालिताङ्घ्रिराचम्य पिण्डस्थानं व्रजेत्
आसीनः प्राङ्मुखो मौनी प्राणायामत्रयं च
नान्दीमुखोक्तश्राद्धाङ्गं करिष्ये पिण्डदान
इति सङ्कल्प्य दक्षादि समारभ्योदगन्तक
नव रेखाः समालिख्य प्रागग्रा दक्षिणः प्र
सुस्तीर्य्य दर्भान् दक्षादि देवादिस्थानपञ्च
तूष्णीं दद्यात् साक्षतोदं त्रिषु स्थानेषु च
स्थानेष्वन्येषु मातृषु मार्जयन्तां ततः प
अत्रेति पितरः पश्चात् साक्षतोदं समर्प्य
दद्यात् ततः क्रमेणैव देवादिस्थानपञ्चके ।
तत्तद्देवादिनामानि चतुर्थ्यन्तान्युदीर्य्य च ।
पिण्डवर्य्यं ततो दद्यात् प्रत्येकं स्थानपञ्चके
तूष्णीं दद्यात् साक्षतोदं पित्रादिस्थानप
स्वगृह्योक्तेन मार्गेण दद्यात् पिण्डान् पृथक्
दद्यादुदं साक्षतञ्च ततः साद्गुण्यहेतवे ।
ध्यात्वा सदाशिवं देवं हृदयाम्भोजमध्यतः
यत्पादपद्मस्मरणादिति श्लोकं पठेत् पुनः
नमस्कृत्य ब्राह्मणेभ्यो दक्षिणाञ्च स्वशक्ति
दत्त्वा क्षमापय्य च तान् विसृज्य च तत

पिण्डानुत्सृज्य गोग्रासं दद्यादग्नौ चेज्जले क्षिपेत् ७१
पुण्याहवाचनं कृत्वा भुञ्जीयादुचितैः सह।
अन्येद्युः प्रातरुत्थाय कृतनित्यक्रियः सुधीः ॥ ७२
उपोष्य क्षौरकर्म्मादि कक्षोपस्थविवर्ज्जितम्।
केश-श्मश्रु-नखान्येव कर्म्मावधि विसृज्य च ॥ ७३
सप्ताष्टकेशान् विधिवत् कारयित्वा विधानतः।
स्नात्वा धौतपटः शुद्धो द्विराचम्याथ वाग्यतः ॥ ७४
भस्म सन्धार्य्य विधिना कृत्वा पुण्याहवाचनम्।
तेन सम्प्रोक्षणं प्राप्य शुद्धदेहस्वभावतः ॥ ७५
होमद्रव्यार्थमाचार्य्यदक्षिणार्थं विहाय च।
द्रव्यजातं महेशाय द्विजेभ्यश्च विशेषतः ॥ ७६
भक्तेभ्यश्च प्रदद्याथ शिवाय गुरुरूपिणे।
वस्त्रादिदक्षिणां दत्त्वा प्रणम्य भुवि दण्डवत् ॥ ७७
डोर-कौपीन-वसनं दण्डाद्यं क्षालितं शुचि।
आदाय होमद्रव्याणि समिदादीनि च क्रमात् ॥ ७८
समुद्रतीरे नद्यां वा पर्व्वते वा शिवालये।
अरण्ये वाथ गोष्ठे वा विचार्य्य स्थानमुत्तमम् ॥ ७९
स्थित्वाचम्य ततः पूर्व्वं कृत्वा मानसमञ्जरीम्।
ब्राह्मोङ्कारसहितं नमो ब्रह्मण इत्यपि ॥ ८०
जपित्वा त्रिस्ततो ब्रूयादग्निमीड़े पुरोहितम्।
अथ महाव्रतमित्यग्निर्वै देवानामवमः ॥ ८१
अथैतस्य समाम्नायमिषे त्वोर्ज्जे त्वा चेति तत्।
अग्न आयाहि वीतये शन्नो देवीरभिष्टये ॥ ८२
पश्चात् प्रोच्य मयरसतजभनगलैः सह।
सम्मितञ्च ततः पञ्चसंवत्सरमयं ततः ॥ ८३
समाम्नायः समाम्नातः अथ शिक्षां वदेत् पुनः।
प्रवक्ष्यामीत्युदीर्य्याथ वृद्धिरादैच संवदेत् ॥ ८४
अथातो धर्म्मजिज्ञासेत्युच्चार्य्य पुनरञ्जसा।
अथातो ब्रह्मजिज्ञासा वेदादीनमपि संजपेत् ॥ ८५
ब्रह्माणमिन्द्रं सूर्य्यञ्च सोमञ्चैव प्रजापतिम्।
आत्मानमन्तरात्मानं ज्ञानात्मानमतः परम् ॥ ८६
परमात्मानमपि च प्रणवाद्यं नमोऽन्तकम्।
चतुर्थ्यन्तं नमित्वाथ शक्तुमुष्टिं प्रगृह्य च ॥ ८७
प्राश्याथ प्रणवेनैव द्विराचम्याथ संस्पृशन्।
नाभिं मन्त्रानृवक्ष्यमानान्प्रणवाद्यान्नमोऽन्तकान् ८८
आत्मानमन्तरात्मानं ज्ञानात्मानं परं पुनः।
आत्मानञ्च समुच्चार्य्य प्रजापतिमतः परम् ॥ ८९
स्वाहान्तान् प्रजपेत् पश्चात् पयो-दधि-घृतं पृथक्।
त्रिवारं प्रणवेनैव प्राश्याचम्य द्विधा पुनः ॥ ९०
प्रागास्य उपविश्याथ प्राणायामत्रयं चरेत् ॥ ९१

इति श्रीशैवे महापुराणे कैलाससंहिताया-
मष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः।

श्रीसुब्रह्मण्य उवाच।

अथ मध्याह्नसमये स्नात्वा नियतमानसः।
गन्धपुष्पाक्षतादीनि पूजाद्रव्याण्युपाहरेत् ॥ १
नैर्ऋते पूजयेद्देवं विघ्नेशं विधिपूजितम्।
गणानां त्वेति मन्त्रेण समावाह्य विधानतः ॥ २
रक्तवर्णं महाकायं सर्व्वाभरणभूषितम्।
पाशाङ्कुशाक्षाभीष्टञ्च दधानं करपङ्कजैः ॥ ३
गजाननं प्रभुं ध्यात्वा गन्धादिभिरनुक्रमात्।
अभ्यर्च्य पायसापूप-नारिकेलगुड़ादिभिः ॥ ४
परितोष्य नमस्कृत्य निर्व्विघ्नं प्रार्थयेत् ततः।
औपासनाग्नौ कर्त्तव्यं स्वगृह्योक्तविधानतः ॥ ५
आज्यभागान्तमग्नेर्यैन्मखतन्त्रमतः परम्।
भूः स्वाहेति स्रुचा पूर्णाहुतिं हुत्वा समाप्य च ॥ ६
गायत्रीं प्रजपेद्भूयावदपराह्णमतन्द्रितः।
अथ सायन्तनीं सन्ध्यामुपास्य स्नानपूर्व्वकम् ॥ ७
सायमोपासनं हुत्वा गुरुं विज्ञाप्य वाग्यतः।
श्रपयित्वा चरुं तस्मिन् समिदन्नाज्यभेदतः ॥ ८
हुत्वा रौद्रेण सूक्तेन सद्योजातादि पञ्चभिः।
ब्रह्मभिश्च महादेवं साम्बं वह्नौ विभावयेत् ॥ ९
गौरीमिमाय मन्त्रेण हुत्वा गौरीमनुस्मरन्।
ततोऽग्नये स्विष्टकृते स्वाहेति जुहुयात् सकृत् ॥ १०
हुत्वोपरिष्टात् तन्त्रन्तु ततोऽग्नेरुत्तरे बुधः।
स्थित्वासने जपेन्मौनी चैलाजिनकुशोत्तरे ॥ ११
यावद्ब्राह्ममुहूर्त्तन्तु गायत्रीं दृढ़मानसः।
ततः स्नात्वा त्वशक्तश्चेद्भस्मना वा विधानतः ॥ १२
श्रपयित्वा चरुं तस्मिन्नग्नावेवाभिघारितम्।
उदगुद्वास्य वर्हिष्यासाद्याज्येन ततश्चरुम् ॥ १३

अभिघार्य्य व्याहृतीश्च रौद्रसूक्तञ्च पञ्च च।
जपेद्ब्रह्माणि सन्धार्य्य चित्तं शिवपदाम्बुजे ॥ १४
प्रजापतिमथेन्द्रञ्च विश्वान् देवांस्ततःपरम्।
ब्रह्माणञ्च चतुर्थ्यन्तं स्वाहान्तान् प्रणवादिकान् ॥१५
संजप्य वाचयित्वाथ पुण्याहञ्च ततः परम्।
परस्तात् तन्त्रमग्नये स्वाहेत्यग्निमुखावधि ॥ १६
निर्व्वर्त्य पश्चात् प्राणाय स्वाहेत्यारभ्य पञ्चभिः।
हुत्वा ततश्च रौद्रेण सूक्तेन ब्रह्मभिः क्रमात् ॥ १७
स्वशाखाक्रमतो हुत्वा समिदन्नाज्यभेदतः।
महेशादिचतुर्व्यूहं स्वस्वव्यूहनमन्त्रतः ॥ १८
सशक्तिकमयो हुत्वा समिदन्नाज्यभेदतः।
साज्येन चरुणा पश्चादग्निं स्विष्टकृतं हुनेत् ॥ १९
पुनश्च प्रजपेत् सूक्तं रौद्रं ब्रह्माणि पञ्च च।
महेशादिचतुर्व्यूहमन्त्रांश्च प्रजपन् पुनः ॥ २०
हुत्वोपरिष्टात् तन्त्रन्तु स्वशाखोक्तेन वर्त्मना।
तत्तद्देवान् समुद्दिश्य त्यागं कुर्य्याद्विचक्षणः ॥२१
एवमग्निमुखाद्यं तत् कर्म्मतन्त्रं प्रवर्त्तितम् ॥
अतः परं प्रजुहुयाद्विरजाहोममात्मनः ॥ २२
षड्विंशतत्त्वरूपेऽस्मिन् देहे लीनस्य शुद्धये।
तत्त्वान्येतानि मद्देहे शुध्यन्तामित्यनुस्मरन् ॥ २३
तत्रात्मतत्त्वशुद्ध्यर्थं मन्त्रैरारुणकेतुकैः।
पव्यमानैः पृथिव्यादिपुरुषान्तक्रमान्मुने ॥ २४
साज्येन चरुणा मौनी शिवपादाम्बुजं स्मरन्।
पृथिव्यादि च शब्दादि वागाद्यं पञ्चकं पुनः ॥ २५
श्रोत्राद्यञ्च शिरः पार्श्व-पृष्ठोदरचतुष्टयम्।
जङ्घाञ्च योजयेत् पश्चात् त्वगाद्यं धातुसप्तकम् ॥२६
प्राणाद्यं पञ्चकं पश्चादन्नाद्यं कोशपञ्चकम्।
मनो रेतश्च बुद्धिश्चाहङ्कृतिः ख्यातिरेव च ॥ २७
सङ्कल्पञ्च गुणाः पश्चात् प्रकृतिः पुरुषस्य तु।
भोक्तृत्वं प्रतिपन्नस्य भोजने च प्रयत्नतः ॥ २८
अन्तरङ्गतया तत्त्वपञ्चकं परिकीर्त्तितम्।
नियतिः कालरागश्च विद्या च तदनन्तरम् ॥ २९
कला च पञ्चकमिदं मायोत्पन्नं मुनीश्वर।
मायान्तु प्रकृतिं विद्यान्मायां श्रुतिरितीरिता ॥ ३०
तज्जान्येतानि तत्त्वानि श्रुत्युक्तानि न संशयः।
कालः स्वभावो नियतिरिति च श्रुतिरब्रवीत् ॥ ३१

एतत् पञ्चकमेवास्य पञ्चकञ्चुकमुच्यते।
अजानन् पञ्चतत्त्वानि विद्वानपि विमूढधीः।
नियत्यधस्तात् प्रकृतेरुपरिस्थः पुमानयम्।
काकाक्षिन्यायमाश्रित्य वर्त्तते पार्श्वतोऽन्वहम्।
विद्यातत्त्वमिदं प्रोक्तं शुद्धविद्या महेश्वरौ।
सदाशिवश्च शक्तिश्च शिवश्चेदन्तु पञ्चकम् ॥ ३
शिवतत्त्वमिदं ब्रह्मन् प्रज्ञानब्रह्मवाक्यतः।
पृथिव्यादिशिवान्तं यत् तत्त्वजातं मुनीश्वर।
स्वकारणलयद्वारा शुद्धिरस्य विधीयताम्।
एकादशानां मन्त्राणां परस्मैपदपूर्व्वकम् ॥ ३
शिवज्योतिश्चतुर्थ्यन्तमिदं पदमथोच्चरेत्।
न ममेति वदेत् पश्चादुद्देशत्याग ईरितः ॥ ३
अतः परं विविटीति कषोत्कायेति मन्त्रयोः।
व्यापकाय पदस्यान्ते परमात्मन इत्यपि ॥ ३
शिवज्योतिश्चतुर्थ्यन्तं विश्वभूतपदं पुनः।
घसनोत्सुकशब्दञ्च चतुर्थ्यन्तमथो वदेत् ॥ ३८
लोकत्रयपदस्यान्ते व्यापिने परमात्मने।
परस्मैपदमुच्चार्य्य देवाय पदमुच्चरेत् ॥ ४०
उत्तिष्ठस्वेति मन्त्रस्य विश्वरूपायशब्दतः।
पुरुषायपदं ब्रूयादों स्वाहेत्यस्य संवदेत् ॥
लोकत्रयपदस्यान्ते व्यापिने परमात्मने।
शिवायेदं न मम च पदं ब्रूयादतः परम् ॥
स्वशाखोक्तप्रकारेण पुरस्तात् तन्त्रकर्म्म च।
निर्व्वर्त्य सर्पिषा मिश्रं चरुं प्राश्य पुरोधसे।
प्रदद्याद्दक्षिणां तस्मै हेमादिपरिबृंहिताम्।
ब्रह्माणमुद्वास्य ततः प्रातरौपासनं हुनेत् ॥
सं मा सिञ्चन्तु मरुत इति मन्त्रं जपन् मुनिः।
या ते अग्न इत्यनेन मन्त्रेणाग्नौ प्रताप्य च।
हस्तमग्नौ समारोप्य स्वात्मन्यद्वैतधामनि।
प्राभातिकीं ततः सन्ध्यामुपास्यादित्यमप्यथ।
उपस्थाय प्रविश्याशु नाभिदघ्नं प्रवेशयेत्।
आहिताग्निस्तु यः कुर्य्यात् प्राजापत्येष्टिमा
श्रौते वैश्वानरे सम्यक् सर्व्ववेदसदक्षिणाम्
अथाग्निमात्मन्यारोप्य ब्राह्मणः प्रव्रजेद्
सावित्रीप्रथमं पादं सावित्रीमित्युदीर्य्य च
[illegible]न्तं भूरोमिति च संवदेत्।

द्वितीयं पादमुच्चार्य्य सावित्रीमितिपूर्व्वकम्।
प्रविशयामिशब्दान्ते भुवरोमिति संवदेत् ॥ ५०
तृतीयं पादमुच्चार्य्य सावित्रीमिति पूर्व्ववत्।
प्रविशयामिशब्दान्ते सुवरोमिति संवदेत् ॥ ५१
पादद्वयमथोच्चार्य्य सावित्रीमित्यतः परम्।
प्रविशयामिशब्दान्ते भूरोमिति वदेदथ ॥ ५२
तृतीयं पादमुच्चार्य्य सावित्रीमित्यतः परम्।
प्रविशयामीति वदन् भुवरोमिति संवदेत् ॥ ५३
त्रिपादमुच्चरेत् पूर्व्वं सावित्रीमित्यतः परम्।
प्रविशयामिशब्दान्ते सुवरोमित्युदीरयेत् ॥ ५४
इयं भगवती साक्षाच्छङ्कराद्धशरीरिणी।
पञ्चवक्त्रा दशभुजा त्रिपञ्चनयनोज्ज्वला ॥ ५५
नवरत्नकिरीटोद्यच्चन्द्रलेखावतंसिनी।
शुद्धस्फटिकसङ्काशा दशायुधधरा शुभा ॥ ५६
हार-केयूर-कटक-रशना-नूपुरादिभिः।
भूषितावयवा देवऋषि-गन्धर्व्व-दानवैः ॥ ५७
मानवैश्च सदा सेव्या सर्व्वात्मव्यापिका शिवा।
सदाशिवस्य देवस्य धर्म्मपत्नी मनोहरा ॥ ५८
यो ह्यन्यथा नयेत् पापी गायत्रीं शिवरूपिणीम्।
स पच्यते महाघोरे नरके कल्पसंख्यया ॥ ५९
सा व्याहृतिभ्यः संजाता तास्वेव विलयं गता।
ताश्च प्रणवसम्भूताः प्रणवे विलयं गताः ॥ ६०
प्रणवः सर्व्ववेदादिः प्रणवः शिववाचकः।
शिवो वा प्रणवो ह्येष प्रणवो वा शिवः स्मृतः ॥ ६१
वाच्य-वाचकयोर्भेदो नात्यन्तं विद्यते यतः।
तस्मादेकाक्षरं देवं शिवं परमकारणम् ॥ ६२
उपासते यतिश्रेष्ठा हृदयाम्भोजमध्यगम्।
एवं विलाप्य गायत्रीं प्रणवे शिववाचके ॥ ६३
अहंवृक्षस्य रेरिवेत्यनुवाकं जपेत् पुनः।
यश्छन्दसामृषभ इत्यनुवाकमुपक्रमात् ॥ ६४
गोपायान्तं जपन् पश्चादेषणानां त्रयं त्यजेत्।
पुत्रैषणायाश्च ततो व्युत्थितोऽहमिति क्रमात् ॥ ६५
वित्तैषणायाश्च तथा व्युत्थितोऽहमिति ब्रुवन्।
लोकैषणायाश्च तथा व्युत्थितोऽहमितीरयेत् ॥ ६६
वदेज्जपेत् त्रिधा मन्दमध्योच्चक्रमान्मुने।
प्रणवं पूर्व्वमुद्धृत्य सृष्टि-स्थिति-लयक्रमात् ॥ ६७

तेषामथ क्रमाद्ब्रूयाद्भूः सन्न्यस्तं भुवस्तथा।
सन्न्यस्तं सुवरित्युक्त्वा सन्न्यस्तं पदमुच्चरन् ॥ ६८
सर्व्वमन्त्राधःप्रदेशे मयीति च पदं वदेत्।
प्रणवं पूर्व्वमद्धृत्य समष्टिव्याहृतीर्वदेत् ॥ ६९
सन्न्यस्तमित्यतो ब्रूयान्मयीति च समब्रवीत।
सदाशिवं हृदि ध्यात्वा मन्दादीति ततो मुने ॥ ७०
प्रैषमन्त्रांश्च जप्त्वैवं सावधानेन चेतसा।
अभयं सर्व्वभूतेभ्यो मत्तः स्वाहेति संजपन् ॥ ७१
प्राच्यां दिश्यप उद्धृत्य प्रक्षिपेदञ्जलिं ततः।
शिखां यज्ञोपवीतञ्च गायत्र्योत्पाट्य पाणिना ॥ ७२
गृहीत्वा प्रणवं भूश्च समुद्रं गच्छ संवदेत्।
वह्निजायां समुच्चार्य्य सोदकाञ्जलिना ततः ॥ ७३
अप्सु जुहुयादथ प्रैषैरभिमन्त्र्य त्रिधा लपः।
प्राश्या(क)चम्य समागम्य भूमौ वस्त्रादिकं त्यजेत् ७४
उदङ्मुखः प्राङ्मुखो वा गच्छेत् सप्तपदाधिकम्।
किञ्चिरमद्भूथाचार्य्यस्तिष्ठ तिष्ठेति संवदेत् ॥ ७५
लोकस्य व्यवहारार्थं कौपीनं दण्डमेव च।
भगवन् स्वीकुरुष्वेति दद्यात् स्वेनैव पाणिना ॥ ७६
शुत्वा सडोरं कौपीनं काषायवसनं ततः।
आच्छाद्याचम्य च द्वेधा तं शिष्यमिति संवदेत् ॥ ७७
इन्द्रस्य वज्रोऽसि तत इति मन्त्रमुदाहरन्।
सम्मार्थ्य दण्डं गृह्णीयात् सखा मा इति संजपन् ॥ ७८
अथ गत्वा गुरोः पार्श्वं शिवपादाम्बुजं स्मरन्।
प्रणम्य दण्डवद्भूमौ त्रिवारं पुनरुत्थितः ॥ ७९
कृताञ्जलिपुटस्तिष्ठेद्गुरुपादसमीपतः।
कर्म्मारम्भात् पूर्व्वमेव गृहीत्वा गोमयं शुभम् ॥ ८०
स्थूलामलकमात्रेण कृत्वा पिण्डान् विशोष्य च।
सौरैस्तु किरणैरेव होमारम्भाग्निमध्यगान् ॥ ८१
निक्षिप्य होमसम्पूर्त्तौ भस्म संगृह्य गोपयेत्।
ततो गुरुः समादाय विरजानलजं सितम् ॥ ८२
भस्म तेनैव तं शिष्यमग्निरित्यादिभिः क्रमात्।
मन्त्रैरङ्गानि संस्पृश्य मूर्द्धादिचरणान्ततः ॥ ८३
ईशानाद्यैः पञ्चमन्त्रैः शिर आरभ्य सर्व्वतः।
समुद्धूल्य विधानेन त्रिपुण्ड्रं धारयेत् ततः ॥ ८४
त्रियायुषैस्त्र्यम्बकैश्च मूर्द्धारभ्य यथाक्रमम्।

(क) प्राश्येति क्वचित् पुस्तकेऽधिकः पाठो दृश्यते।

हृत्पङ्कजे समासीनं ध्यात्वा शिवमुमासखम् ॥ ८५
हस्तं निधाय शिरसि शिष्यस्य प्रीतमानसः।
ऋष्यादिसहितं तस्य दक्षकर्णे समुच्चरेत् ॥ ८६
प्रणवं त्रिप्रकारन्तु ततस्तस्यार्थमादिशेत्।
षड्विधार्थपरिज्ञानसहितं गुरुसत्तमः ॥ ८७
द्विषट्प्रकारं स गुरुं प्रणम्य भुवि दण्डवत्।
तदधीनो भवेन्नित्यं वेदान्तार्थानुसारतः ॥ ८८
शिवज्ञानपरो भूयाच्छ्रवणाद्यङ्गपूर्व्वकम्।
प्राभातिकाद्यनुष्ठानं जपान्तं कारयेद्गुरुः ॥ ८९
पूजाञ्च मण्डले तस्मिन् कैलासप्रस्तराह्वये।
शिवोदितेन मार्गेण शिष्यस्तत्रैव पूजयेत् ॥ ९०
देवं निश्चमशक्तश्चेत् पूजितं गुरुणा शुभम्।
स्फाटिकं पीठिकोपेतं गृह्णीयाल्लिङ्गमैश्वरम् ॥ ९१
वरं प्राणपरित्यागश्छेदनं शिरसोऽपि मे।
न त्वनभ्यर्च्य भुञ्जीयां भगवन्तं त्रिलोचनम् ॥ ९२
एवं त्रिवारमुच्चार्य्य शपथं गुरुसन्निधौ।
तस्मिन्नेव महादेवं दृढ्यमुद्युक्तमानसः।
पूजयेत् परया भक्त्या पञ्चावरणमार्गतः ॥ ९३

इति श्रीशैवे महापुराणे कैलाससंहितायां
नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः।

वामदेव उवाच।

भगवन् षण्मुखाशेषविज्ञानामृतवारिधे।
विश्वामरेश्वरसुत प्रणतार्त्तिप्रभञ्जन ॥ १
षड्विधार्थपरिज्ञानमिष्टदं किमुदाहृतम्।
के तत्र षड्विधा ह्यर्थाः परिज्ञानञ्च किं प्रभो ॥ २
प्रतिपाद्यश्च कस्तस्य परिज्ञाने च किं फलम्।
एतमर्थमविज्ञाय पशुशास्त्रविमोहितः ॥ ३
अहं शिवपदाद्वैतज्ञानामृतरसायनम्।
पीत्वा विगतसम्मोहो भविष्यामि यथा तथा ॥ ४
कृपामृतार्द्रया दृष्ट्या विलोक्य सुचिरं मयि।
कर्त्तव्योऽनुग्रहः श्रीमत्पादाब्जशरणागते ॥ ५
इति श्रुत्वा मुनीन्द्रोक्तं ज्ञानशक्तिधरो विभुः।
शाहान्यदर्शनमहासन्त्रासजनकं वचः ॥ ६

श्रीसुब्रह्मण्य उवाच।

श्रूयतां मुनिशार्द्दूल त्वया यत् पृष्टमादरात्।
समष्टि-व्यष्टिभावेन परिज्ञानं महेशितुः ॥ ७
प्रणवार्थपरिज्ञानरूपं तद्विस्तरादहम्।
वदामि षड्विधार्थैक्यपरिज्ञानेन सुव्रत ॥ ८
प्रथमो मन्त्ररूपः स्याद्द्वितीयो यन्त्रभावितः।
देवतार्थस्तृतीयोऽर्थः प्रपञ्चार्थस्ततः परम् ॥ ९
चतुर्थः पञ्चमोऽर्थः स्याद्गुरुरूपप्रदर्शकः।
षष्ठः शिष्यात्मरूपोऽर्थः षड़र्थाः परिकीर्त्तिताः।
तत्र मन्त्रस्वरूपं तं वदामि मुनिसत्तम।
आद्यः स्वरः पञ्चमश्च पवर्गान्तस्ततः परः ॥ ११
बिन्दु-नादौ च पञ्चार्णाः प्रोक्ता वेदैर्न चान्यथा
एतत्समष्टिरूपो हि वेदादिः समुदाहृतः ॥ १
नादः सर्व्वसमष्टिः स्याद्बिन्द्वाद्यं यच्चतुष्टयम्।
व्यष्टिरूपेण संसिद्धं प्रणवे शिववाचके ॥ १३
यन्त्ररूपं शृणु प्राज्ञ शिवलिङ्गं तदेव हि।
सर्व्वाधस्ताल्लिखेत् पीठं तदूर्द्ध्वं प्रथमं स्वरम्।
उवर्णञ्च तदूर्द्ध्वस्थं पवर्गान्तं तदूर्द्ध्वगम्।
तन्मस्तकस्थं बिन्दुञ्च तदूर्द्ध्वं नादमालिखेत् ॥
एवं यन्त्रं समालिख्य प्रणवेनैव वेष्टयेत्।
तदुत्थेनैव नादेन भिन्द्यान्नादावसानकम् ॥
देवतार्थं प्रवक्ष्यामि गूढं शङ्करभाषितम्।
सद्योजातं प्रपद्यामीत्युपक्रम्य सदाशिवोम् ॥
इति प्राह श्रुतिः साक्षाद्ब्रह्मपञ्चकवाचकम्।
प्रणवं ब्रह्मरूपिण्यः सूक्ष्माः पञ्चैव देवताः ॥
एता एव शिवस्यापि मूर्त्तित्वेनोपबृंहिताः।
शिवस्य वाचको मन्त्रः शिवमूर्त्तेश्च वाचकः ॥
मूर्त्ति-मूर्त्तिमतोर्भेदो नात्यन्तं विद्यते यतः।
ईशानमुकुटोपेत इत्यारभ्य पुरोदितः ॥ २०
शिवस्य विग्रहः पञ्च वक्त्राणि शृणु साम्प्रतम्।
पञ्चमादि समारभ्य सद्योजाताद्यनुक्रमात् ॥
ऊर्द्ध्वान्तमीशानान्तञ्च मुखपञ्चकमीशितुः।
ईशानस्यैव देवस्य चतुर्व्यूहपदे स्थितम् ॥
पुरुषाद्यञ्च सद्यान्तं ब्रह्मरूपचतुष्टयम्।
पञ्चब्रह्मसमष्टिः स्यादीशानं ब्रह्म विश्रुतम्।
पुरुषाद्यन्तु तद्व्यष्टिः सद्योजातान्तकं मुने।

अनुग्रहमयं चक्रमिदं पञ्चार्थकारणम् ॥ २४
अनुग्रहोऽपि द्विविधस्तिरोभावादिगोचरः ।
एकश्चान्यस्तु जीवानां परापरविमुक्तिदः ॥ २५
एतत् सदाशिवस्यैव कृत्यद्वयमुदाहृतम् ।
अनुग्रहेऽपि सृष्ट्यादिकृत्यानां पञ्चकं विभोः ॥ २६
अस्ति तत्रापि सद्याद्या देवताः परिकीर्त्तिताः ।
अनुग्रहमयं चक्रं शान्त्यतीतकलामयम् ॥ २७
सदाशिवाधिष्ठितञ्च परमं पदमुच्यते ।
एतदेव पदं प्राप्यं यतीनां भावितात्मनाम् ॥ २८
सदाशिवोपासकानां प्रणवासक्तचेतसाम् ।
एतदेव पदं प्राप्य तेन साकं मुनीश्वराः ॥ २९
भुक्त्वा सुविपुलान् भोगान् देवेन ब्रह्मरूपिणा ।
महाप्रलयसम्भूतौ शिवसाम्यं भजन्ति हि ॥ ३०
ते ब्रह्मलोक इति च श्रुतिराह सनातनी ।
ऐश्वर्य्यं सदाशिवस्यापि समष्टिरिदमेव हि ॥ ३१
सर्व्वैश्वर्य्येण सम्पन्न इत्याहाथर्व्वणी शिखा ।
सर्व्वैश्वर्य्यप्रदातृत्वमस्यैव प्रवदन्ति हि ॥ ३२
चमकस्य पदं नान्यदधिकं विद्यते पदम् ।
ब्रह्मपञ्चकविस्तारः प्रपञ्चः खलु दृश्यते ॥ ३३
ब्रह्मभ्य एव सञ्जाता निवृत्त्याद्याः कला मताः ।
सूक्ष्मभूतस्वरूपिण्यः कारणत्वेन विश्रुताः ॥ ३४
स्थूलरूपस्वरूपस्य प्रपञ्चस्यास्य सुव्रत ।
पञ्चधावस्थितं यत् तद्ब्रह्मपञ्चकमिष्यते ॥ ३५
पुरुषः श्रोत्र-वाण्यौ च शब्दाकाशौ च पञ्चकम् ।
व्याप्तमीशानरूपेण ब्रह्मणा मुनिसत्तम ॥ ३६
प्रकृतिस्त्वक् च पाणिश्च स्पर्शो वायुश्च पञ्चकम् ।
व्याप्तं पुरुषरूपेण ब्रह्मणैव मुनीश्वर ॥ ३७
अहङ्कारस्तथा चक्षुः पादौ रूपञ्च पावकः ।
अघोरब्रह्मणा व्याप्तमेतत् पञ्चकमञ्चितम् ॥ ३८
बुद्धिश्च रसनापायू रस आपश्च पञ्चकम् ।
ब्रह्मणा वामदेवेन व्याप्तं भवति नित्यशः ॥ ३९
मनो नासा तथोपस्थ-गन्धौ भूमिश्च पञ्चकम् ।
सद्येन ब्रह्मणा व्याप्तं पञ्चब्रह्ममयं जगत् ॥ ४०
यन्त्ररूपेणोपदिष्टः प्रणवः शिववाचकः ।
समष्टिः पञ्चवर्णानां बिन्द्वाद्यं यचतुष्टयम् ॥ ४१
शिवोपदिष्टमार्गेण यन्त्ररूपं विभावय ।

सदाशिवः समष्टिः स्यादाकाशाधिपतिः प्रभुः ॥ ४२
अस्यैव व्यष्टितापन्नं महेशादिचतुष्टयम् ।
सदाशिवसहस्रांशान्महेशस्य समुद्भवः ॥ ४३
पुरुषानन्यरूपत्वाद्वायोरधिपतिश्च सः ।
मायाशक्तियुतो वामे सकलश्च क्रियाधिकः ॥ ४४
अस्यैव व्यष्टिरूपं स्यादीश्वरादिचतुष्टयम् ।
ईशो विश्वेश्वरः पश्चात् परमेशस्ततः परम् ॥ ४५
सर्व्वेश्वर इतीदन्तु तिरोधाचक्रमुत्तमम् ।
तिरोभावो द्विधा भिन्न एको रुद्रादिगोचरः ॥ ४६
अन्यश्च देहभावेन पशुवर्गस्य सन्ततम् ।
भोगानुरञ्जनपरः कर्म्मसाम्यक्षणावधि ॥ ४७
कर्म्मसाम्ये च एकः स्यादनुग्रहमयो विभोः ।
अस्ति सर्व्वेश्वराद्यास्ते देवताः परिकीर्त्तिताः ॥ ४८
तिरोभावात्मकं चक्रं भवेच्छान्तिकलामयम् ।
महेश्वराधिष्ठितञ्च पदमेतदनुत्तमम् ॥ ४९
एतदेव पदं प्राप्यं महेशपदसेविनाम् ।
माहेश्वराणां सालोक्यक्रमादेतच्च मुक्तिदम् ॥ ५०
महेश्वरसहस्रांशाद्रुद्रमूर्त्तिरजायत ।
अघोरवदनाकारस्तेजस्तत्त्वाधिपश्च सः ॥ ५१
गौरीशक्तियुतो वामे सर्व्वसंहारकृत् प्रभुः ।
अस्यैव व्यष्टिरूपं स्याच्छिवाद्यश्च चतुष्टयम् ॥ ५२
शिवो हरो मृड-भवौ विदितं चक्रमद्भुतम् ।
संहाराख्यन्तु संहारस्त्रिधा नित्यादिभेदतः ॥ ५३
नित्यो जीवसुषुप्त्याख्यो विधेर्नैमित्तिकः स्मृतः ।
विलयस्तस्य सुमहानिति वेदनिदर्शितः ॥ ५४
जीवानां जन्मदुःखादिश्रान्तानां सुषितात्मनाम् ।
विश्रान्त्यर्थं मुनिश्रेष्ठाः कर्म्मणां पाकहेतवे ॥ ५५
संहारः कल्पितस्त्रेधा रुद्रेणामिततेजसा ।
रुद्रस्यैव तु कृत्यानां त्रयमेतदुदाहृतम् ॥ ५६
संहृतावपि सृष्ट्यादिकृत्यानां पञ्चकं विभोः ।
अस्ति तत्र भवाद्यास्ते देवताः परिकीर्त्तिताः ॥ ५७
संहाराख्यमिदं चक्रं विद्यारूपकलामयम् ।
अधिष्ठितञ्च रुद्रेण पदमेतन्निरामयम् ॥ ५८
एतदेव पदं प्राप्यं रुद्राराधनकाङ्क्षिणाम् ।
रौद्राणां तद्धि सालोक्यक्रमात् सायुज्यदं मुने ॥ ५९
रुद्रमूर्त्तेः सहस्रांशाद्विष्णोरेवाभवज्जनिः ।

स वामदेवचक्रात्मा वारितत्त्वैकनायकः ॥ ६०
रमाशक्तियुतो वामे सर्व्वरक्षाकरो महान् ।
अस्यैव वासुदेवादिचतुष्कं व्यष्टितां गतम् ॥ ६१
वासुदेवोऽनिरुद्धश्च ततः सङ्कर्षणः परः ।
प्रद्युम्नश्चेति विख्यातं स्थितिचक्रमिदं परम् ॥ ६२
स्थितिः सृष्टस्य जगतस्तत्कर्त्तृणाञ्च पालनम् ।
आरब्धकर्म्मभोगान्तं जीवानां फलभोगिनाम् ॥ ६३
विष्णोरेवेदमाख्यातं कृत्यं रक्षाविधायिनः ।
स्थितावपि तु सृष्ट्यादिकृत्यानां पञ्चकं विभोः ॥ ६४
अपि प्रद्युम्नमुख्यास्ते देवतास्तत्र कीर्त्तिताः ।
स्थितिचक्रमिदं ब्रह्मन् प्रतिष्टारूपमुत्तमम् ॥ ६५
जनार्द्दनाधिष्ठितञ्च परमं पदमुच्यते ।
एतदेव पदं प्राप्यं विष्णुपादप्रसेविनाम् ॥ ६६
वैष्णवानामिदं चक्रं सालोक्यादिपदप्रदम् ।
विष्णोरेव सहस्रांशात् सम्बभूव पितामहः ॥ ६७
सद्योजातमुखात्मा यः पृथिवीतत्त्वनायकः ।
वाग्देवीसहितो वामे सृष्टिकर्त्ता जगत्प्रभुः ॥ ६८
हिरण्यगर्भाद्यस्यैव व्यष्टिरूपं चतुष्टयम् ।
हिरण्यगर्भोऽथ विराट् पुरुषः काल एव च ॥ ६९
सृष्टिचक्रमिदं ब्रह्मपुत्रादिऋषिसेवितम् ।
सृष्टिस्तु संहृतस्यास्य जीवस्य प्रकृतौ वहिः ॥ ७०
आनीय कर्म्मभोगार्थं साधनाङ्गफलैः सह ।
संयोजनमितीदन्तु कृत्यं पैतामहं विदुः ॥ ७१
जगत्सृष्टावपि मुने कृत्यानां पञ्चकं विभोः ।
अस्ति कालादयस्तत्र देवताः परिकीर्त्तिताः ॥ ७२
निवृत्तिरूपमाख्यातं सृष्टिचक्रमिदं बुधैः ।
पितामहाधिष्ठितञ्च पदमेतद्धि शोभितम् ॥ ७३
एतदेव पदं प्राप्यं ब्रह्मार्पितधियां नृणाम् ।
पैतामहानामेतद्धि सालोक्यादिविमुक्तिदम् ॥ ७४
अस्मिन्नपि चतुष्के तु चक्राणां प्रणवो भवेत् ।
महेशादिक्रमादेव गौण्या वृत्त्या स वाचकः ॥ ७५
इदं खलु जगच्चक्रं श्रुतिविश्रुतवैभवम् ।
पञ्चारं चक्रमिति हि स्तौति श्रुतिरिदं मुने ॥ ७६
एकमेव जगच्चक्रं शम्भोः शक्तिविजृम्भितम् ।
सृष्ट्यादिपञ्चावयवं पञ्चारमिति कथ्यते ॥ ७७
अलातचक्रभ्रमिवद्विच्छिन्नं सर्वदेदयम् ।
परितो वर्त्तते यस्मात् तस्माच्चक्रमितीरितम् ॥
सृष्ट्यादेः पृथुशस्यलात् पृथुलेनोपदिश्यते ।
हिरण्मयस्वरूपस्य शम्भोरमितवर्च्चसः ॥ ७९
शक्तिकार्य्यमिदं चक्रं हिरण्यज्योतिविश्रुतम् ।
सलिलेनावृतमिदं सलिलं वह्निनावृतम् ॥ ८०
आवृतो वायुना वह्निराकाशेनावृतो मरुत् ।
भूतादिना खमावातं भूतादिर्महतावृतः ॥ ८१
अव्यक्तेनावृतस्तद्वन्महानित्येवमास्तिकैः ।
उक्तानि सप्तावरणान्यस्य चक्रस्य गुप्तये ॥ ८२
चक्राद्दशगुणाधिक्यं सलिलस्य विधीयते ।
उपर्य्युपरि चान्योन्यमेवं दशगुणाधिकम् ॥ ८३
इममर्थं हृदीकृत्य चक्रसामीप्यवर्त्तनात् ।
सलिलस्य च तन्मध्ये इति प्राह श्रुतिः स्वयम् ॥
अनुग्रह-तिरोभाव-संहृति-स्थिति-सृष्टिभिः ।
करोत्यविरतं लीलामेकः शक्तियुतः शिवः ॥
बहुनेह किमुक्तेन मुने सारं वदामि ते ।
शिव एवेदमखिलं शक्तिमानिति निश्चितम् ॥

सूत उवाच ।

शुलोपदिष्टं गुरुणा वेदार्थं मुनिपुङ्गवः ।
परमात्मनि सन्दिग्धमर्थं पप्रच्छ सादरम् ॥

वामदेव उवाच ।

ज्ञानशक्तिधर स्वामिन् परमानन्दविग्रह ।
प्रणवार्थामृतं पीतं श्रीमुखाब्जपरिस्रुतम् ॥
दृढ़प्रज्ञश्च जातोऽस्मि सन्देहो विगतो मम ।
सदाशिवादिकीटान्तरूपस्य जगतः स्थितिः ।
स्त्रीपुंरूपेण सर्व्वत्र दृश्यते न हि संशयः ।
एवंरूपस्य जगतः कारणं यत् सनातनम् ॥
स्त्रीरूपं तत् किमाहोस्वित् पुरुषं वा नपुंसकम् ।
उत मिश्रं किमन्यद्वा न जातस्तत्र निर्णयः ॥
बहुधा विवदन्तीह विद्वांसः शास्त्रमोहिताः ।
जगत्सृष्ट्यभिधायिन्यः श्रुतयो जगता सह ॥
यथैक्यभावं गच्छेयुरेतदन्यच्च वेदय ।
जानामीति करोमीति व्यवहारः प्रदृश्यते ॥
स हि सर्व्वात्मसंसिद्धो विवादो नात्र कस्यचित् ।
स च देहेन्द्रियमनो-बुद्ध्यहङ्कारसम्भवः ॥
आहोस्विदात्मनो रूपं महानत्रापि संशयः

इयमेतद्धि सर्व्वेषां विवादास्पदमद्भुतम् ॥ ९५
उत्पाद्याज्ञानसम्भूतं संशयाख्यविषद्रुमम् ।
शिवाद्वैतमहाकल्प-वृक्षभूमिर्यथा भवेत् ॥ ९६
चित्तं मम तथा देव बोध्योऽस्मि कृपया तव ।

सूत उवाच ।

श्रुत्वैवं मुनिना पृष्टं वचो वेदान्तनिर्व्वृतम् ॥ ९७
रहस्यं प्रभुराहेदं किञ्चित्प्रहसिताननः ।

श्रीसुब्रह्मण्य उवाच ।

एतदेव मुने गुह्यं शिवेन परिभाषितम् ॥ ९८
अम्बायाः शृण्वतस्तस्याः स्तन्यं पीत्वा मुहुर्मुहुः ।
ममापि निश्चितं तत् ते वदामि शृणु साम्प्रतम् ॥ ९९
कर्त्तृत्वास्तितात्वमारभ्य शास्त्रवादः सुविस्तरः ।
त्वयोपदिष्टा ये शिष्यास्तत्र को वा भवत्समः ॥ १००
कापिलादिषु शास्त्रेषु भ्रमन्त्यद्यापि तेऽधमाः ।
ये शप्ता मुनिभिः षड्भिः शिवनिन्दापराः पुरा॥१०१
न श्रोतव्या हि तद्वार्त्ता तेऽन्यथावादिनो यतः ।
अनुमानप्रयोगस्याप्यवकाशोऽत्र विद्यते ॥ १०२
पञ्चावयवयुक्तस्य स तु धूमस्य दर्शनात् ।
पर्व्वतस्याग्निमद्भावं वदत्यत्रापि सुव्रत ॥ १०३
प्रत्यक्षस्य प्रपञ्चस्य दर्शनालम्बनत्वतः ।
ज्ञातव्यः परमेशानः परमात्मा न संशयः ॥ १०४
स्त्रीपुंरूपमयो विश्वः प्रत्यक्षेणैव दृश्यते ।
षट्कोषरूपपिण्डो हि तत्र चाद्यत्रयं भवेत् ॥ १०५
पित्र्यंशजं पुनश्चान्यन्मात्रंशजमिति श्रुतिः ।
एवं सर्व्वशरीरेषु स्त्रीपुंभावविदो जनाः ॥ १०६
परमात्मन्यपि तथा स्त्रीपुंभावं विदुर्बुधाः ।
सच्चिदानन्दरूपत्वं वदति ब्रह्मणः श्रुतिः ॥ १०७
असन्निवर्त्तकः शब्दः सदात्मेति निगद्यते ।
निवर्त्तनं जड़त्वस्य चिच्छब्देन विधीयते ॥ १०८
त्रिलिङ्गवर्त्तिसच्छब्दः पुंरूपोऽत्र विधीयताम् ।
प्रकाशवाची स भवेत् सन् प्रकाश इति स्फुटम् ॥१०९
ज्ञानशब्दस्य पर्य्यायश्चिच्छब्दः स्त्रीत्वमागतः ।
प्रकाशश्चिच्च मिथुनं जगत्कारणतां गतम् ॥ ११०
सच्चिदात्मन्यपि तथा जगत्कारणतां गते ।
एकत्वेव शिवः शक्तिरिति भावो विधीयते ॥ १११
तैलवर्त्त्यादिमालिन्यात् प्रकाशस्यापि विद्यते ।
मालिन्यमशिवत्वञ्च चिताग्न्यादिषु दृश्यते ॥ ११२
एतन्निवर्त्तनत्वेन शिवत्वं श्रुतिचोदितम् ।
जीवाश्रितायाश्चिच्छक्तेर्दौर्व्वल्यं विद्यते सदा ॥ ११३
तन्निवृत्त्यर्थमेवात्र शक्तित्वं सार्व्वकालिकम् ।
बलवान् शक्तिमांश्चेति व्यवहारः प्रदृश्यते ॥ ११४
एवं शिवत्वं शक्तित्वं परमात्मनि दर्शितम् ।
शिव-शक्त्योस्तु संयोगादानन्दः सततोदितः ॥ ११५
प्रकाशते तमुद्दिश्य मुनयः क्षीणकल्मषाः ।
शिवे मनः समाधाय प्राप्ताः शिवमनामयम् ॥ ११६
सर्व्वात्मत्वं तयोरेव ब्रह्मेत्युपनिषत्सु च ।
गीयते ब्रह्मशब्देन बृंहिधात्वर्थगोचरः ॥ ११७
बृहत्त्वं बृंहणत्वञ्च यथा सादाख्यविग्रहे ।
पञ्चब्रह्ममये विश्वप्रतीतिर्ब्रह्मशब्दिता ॥ ११८
प्रतिलोमात्मके हंसे वक्ष्यामि प्रणवोद्भवम् ।
व्यञ्जनस्य सकारस्य हकारस्य च वर्ज्जनात् ॥ ११९
ओमित्येव भवेत् स्थूलो वाचकः परमात्मनोः ।
महामन्त्रो भवेत् सूक्ष्मस्तदुद्धारं वदामि ते ॥ १२०
आद्ये त्रिपञ्चरूपे च स्वरे षोड़शके त्रिषु ।
महामन्त्रो भवेदादौ ससकारो भवेद्द यदा ॥ १२१
हंसश्च प्रतिलोमः स्यात् सकारार्थः शिवः स्मृतः ।
शक्त्यात्मको महामन्त्रवाच्यः स्यादिति निर्णयः॥१२२
गुरूपदेशकाले तु सोऽहं शक्त्यात्मकः शिवः ।
इति जीवपरो भूयान्महामन्त्रस्तदा पशुः ॥ १२३
शक्त्यात्मकः शिवांशश्च शिवैक्याच्छिवसाम्यभाक् ।
प्रज्ञानं ब्रह्मवाक्ये तु प्रज्ञानार्थः प्रदृश्यते ॥ १२४
प्रज्ञानशब्दश्चैतन्यपर्य्यायः स्यान्न संशयः ।
चैतन्यमात्मेति मुने शिवसूत्रं प्रवर्त्तितम् ॥ १२५
चैतन्यमिति विश्वस्य सर्व्वज्ञानक्रियात्मकम् ।
स्वातन्त्र्यं तत्स्वभावो यः स आत्मा परिकीर्त्तितः१२६
इत्यादिशिवसूत्राणां वार्त्तिकं कथितं मया ।
ज्ञानं बन्ध इतीदन्तु द्वितीयं सूत्रमीशितुः ॥ १२७
ज्ञानमित्यात्मनस्तस्य किञ्चिज ज्ञानक्रियात्मकम् ।
इत्याहाद्यपदेनेशः (क) पशुवर्गस्य लक्षणम् ॥ १२८
एतद्द्वयं पराशक्तेः प्रथमस्पन्दतां गतम् ।
एनामेव परां शक्तिं श्वेताश्वतरशाखिनः ॥ १२९

(क) इत्याह ह्येष देवेश इति पाठान्तरं क्वचित् ।

स्वाभाविकी ज्ञानबलक्रिया चेत्यस्तुवन् मुदा।
ज्ञानक्रियेच्छारूपं हि शम्भोर्दृष्टिवयं मतम् ॥ १३०
एतन्मनोमध्यगं सदिन्द्रियद्वारगोचरम्।
अनुप्रविश्य जानाति करोति च पशुः सदा ॥ १३१
तस्मादात्मन एवेदं रूपमित्येव निश्चितम्।
प्रपञ्चार्थं प्रवक्ष्यामि प्रणवैक्यप्रदर्शकम् ॥ १३२
ओमितीदं सर्व्वमिति श्रुतिराह सनातनी।
तस्माद्धेतोरित्युपक्रम्य जगत्सृष्टिः प्रकीर्त्तिता ॥ १३३
तस्याः श्रुतेस्तु तात्पर्य्यं वक्ष्यामि श्रूयतामिदम्।
शिव-शक्तिसमायोगः परमात्मेति निश्चितम् ॥ १३४
पराशक्तेस्तु संजाता चिच्छक्तिस्तु तदुद्भवा।
आनन्दशक्तिस्तज्जा स्यादिच्छाशक्तिस्तदुद्भवा ॥१३५
ज्ञानशक्तिस्ततो जाता क्रियाशक्तिस्तु पञ्चमी।
एताभ्य एव संजाता निवृत्त्याद्याः कला मुने ॥ १३६
चिदानन्दसमुत्पन्नौ नाद-बिन्दू प्रकीर्त्तितौ।
इच्छाशक्तेर्मकारस्तु ज्ञानशक्तेस्तु पञ्चमः ॥ १३७
स्वरः क्रियाशक्तिजातो अकारस्तु मुनीश्वर।
शिवादीशान उत्पन्नस्ततस्तत्पुरुषोद्भवः ॥ १३८
ततोऽघोरस्ततो वामः सद्योजातोद्भवस्ततः।
एतस्मान्मातृकादष्टत्रिंशन्मातृसमुद्भवः ॥ १३९
ईशानाच्छान्त्यतीताख्या कला जाताथ पूरुषात्।
उत्पद्यते शान्तिकला विद्याऽघोरसमुद्भवा ॥ १४०
प्रतिष्ठा च निवृत्तिश्च वाम-सद्योद्भवे मते।
ईशचिच्छक्तिमुखतो विभोर्मिथुनपञ्चकम् ॥ १४१
अनुग्रहादिकृत्यानां हेतुः पञ्चकमिष्यते।
वाच्य-वाचकसम्बन्धान्मिथुनत्वमुपेयुषि ॥ १४२
कला-वर्णस्वरूपेऽस्मिन् पञ्चके भूतपञ्चकम्।
वियदादि क्रमादासीदुत्पन्नं मुनिपुङ्गव ॥ १४३
आद्यं मिथुनमारभ्य पञ्चकं यन्मयं विदुः।
शब्दैकगुण आकाशः शब्द-स्पर्शगुणो मरुत् ॥ १४४
शब्द-स्पर्श-रूप-गुणप्रधानो वह्निरुच्यते।
शब्द-स्पर्श-रूप-रस-गुणकं सलिलं मतम् ॥ १४५
शब्द-स्पर्श-रूप-रस-गन्धाढ्या पृथिवी मता।
व्यापकत्वञ्च भूतानामिदमेवं प्रकीर्त्तितम् ॥ १४६
व्याप्यत्वं वैपरीत्येन गन्धादिक्रमतो भवेत्।
भूतपञ्चकरूपोऽयं प्रपञ्चः परिकीर्त्यते ॥ १४७

विराट् सर्व्वसमष्ट्यात्मा ब्रह्माण्डमिति च कु
पृथिवीतत्त्वमारभ्य शिवतत्त्वावधि क्रमात् ॥
निलीय तत्त्वसन्दोहं जीव एव विलीयते।
सशक्तिकः पुनः सृष्टौ शक्तिद्वारा विनिर्गतः ॥
स्थूलप्रपञ्चरूपेण तिष्ठत्याप्रलयं सुखम्।
निजेच्छया जगत्सृष्टमुद्युक्तस्य महेशितुः ॥
प्रथमो यः परिस्पन्दः शिवतत्त्वं तदुच्यते।
एषैवेच्छा शक्तितत्त्वं सर्व्वकृत्यानुवर्त्तनात् ॥
ज्ञानक्रियाशक्तियुग्मे ज्ञानाधिक्ये सदाशिवः।
महेश्वरं क्रियोद्रेके तत्त्वं विद्धि मुनीश्वर ॥
ज्ञानक्रियाशक्तिसाम्यं शुद्धविद्यात्मकं मतम्।
स्वाङ्गरूपेषु भावेषु मायातत्त्वविभेदधीः ॥
शिवो यदा निजं रूपं परमैश्वर्य्यपूर्व्वकम्।
निगूह्य माययाखिल-पदार्थग्राहको भवेत् ॥
तदा पुरुष इत्याख्या तत् सृष्टेत्यभच्छ्रुतिः।
अयमेव हि संसारी मायया मोहितः पशुः ॥
शिवादभिन्नं न जगदात्मानं भिन्नमित्यपि।
जानतोऽस्य पशोर्देवमोहो भवति न प्रभोः।
यथैन्द्रजालिकस्यापि योगिनो न भवेद्भ्रमः।
गुरुणा ज्ञापितैश्वर्य्यः शिवो भवति चिद्घनः।
सर्व्वकर्त्तृत्वरूपा च सर्व्वज्ञत्वस्वरूपिणी।
पूर्णत्वरूपा नित्यत्व-व्यापकत्वस्वरूपिणी ॥
शिवस्य शक्तयः पञ्च सङ्कुचद्रूपभास्कराः।
अपि सङ्कोचरूपेण विभान्त्य इव नित्यशः ॥
पशोः कलाख्य विद्येति राग-कालौ नियत्यपि
तत्त्वपञ्चकरूपेण भवन्त्यत्र कलेति सा ॥
किञ्चित् कर्त्तृत्वहेतुः स्यात् किञ्चित् तत्त्वैकक
सा विद्या तु भवेद्रागो विषयेष्वनुरञ्जकः ॥
कालो हि भावाभावानां भासनाभासनात्मकः
क्रमावच्छेदको भूत्वा भूतादिरिति कथ्यते ॥
इदन्तु मम कर्त्तव्यमिदं नेति नियामिका।
नियतिः स्याद्विभोः शक्तिस्तदाक्षेपात् पतेत् प
एतत् पञ्चकमेवास्य स्वरूपावारकत्वतः।
पञ्चकञ्चकमाख्यातमन्तरङ्गञ्च साधनम् ॥

वामदेव उवाच।

नियत्यधस्तात् प्रकृतेरुपरिस्थः पुमानिति।

पूर्व्वत्र भवता प्रोक्तमिदानीं कथमन्यथा ॥ १६५
माययासङ्कुचद्रूपस्तदधस्थ इति प्रभो ।

श्रीसुब्रह्मण्य उवाच ।

अद्वैतशैववेदोऽयं द्वैतं न सहते क्वचित् ॥ १६६
सर्व्वज्ञः सर्व्वकर्त्ता च शिव एव स्वमायया ।
सङ्कुचद्रूप इव सन् पुरुषः सम्बभूव ह ॥ १६७
कलादिपञ्चकेनैव भोक्तृत्वेन प्रकल्पितः ।
प्रकृतिस्थः पुमानेष भुङ्क्ते प्रकृतिजान् गुणान् ॥ १६८
इति स्थानद्वयान्तस्थः पुरुषो न विरोधकः ।
सङ्कुचन्निजरूपाणां ज्ञानादीनां समष्टिमत् ॥ १६९
सत्त्वादिगुणसाध्यञ्च बुद्ध्यादित्रितयात्मकम् ।
चित्तं प्रकृतितत्त्वं तदासीत् सत्त्वादिकारणात् ॥१७०
सात्त्विकादिविभेदेन गुणाः प्रकृतिसम्भवाः ।
गुणेभ्यो बुद्धिरुत्पन्ना वस्तुनिश्चयकारिणी ॥ १७१
अहङ्कारस्ततो बुद्धेः सञ्जातस्त्रिविधश्च सः ।
जीवनञ्चाथ संरम्भो गर्व्वश्चास्य त्रिधा वपुः ॥ १७२
सत्त्वादिभेदात् स पुनस्तैजसादित्रिभेदवान् ।
अहङ्कारात् तैजसात् तु मनोबुद्धीन्द्रियाणि च॥१७३
जातानि मनसो रूपं स्यात् सङ्कल्पविकल्पकम् ।
बुद्धीन्द्रियाणि श्रोत्रं त्वक्चक्षुर्जिह्वा च नासिका १७४
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च गोचरः ।
बुद्धीन्द्रियाणां कथिताः श्रोत्रादिक्रमतस्ततः ॥ १७५
वैकारिकादहङ्कारात् कर्म्माक्षाणि प्रजज्ञिरे ।
तानि वाक् पाणिपादौ च पायूपस्थौ च तत्क्रियाः१७६
वदनादानगमन-विसर्गानन्दसंज्ञिताः ।
भूतादिकादहङ्कारात् तन्मात्राण्यभवन् क्रमात्॥१७७
तानि सूक्ष्माणि रूपाणि शब्दादीनामिति स्थितिः ।
तेभ्यस्त्वाकाश-वाय्वग्नि-पाथो-भूमिजनिः क्रमात् ॥१७८
अवकाशप्रदानत्वं वाहकत्वञ्च पाचनम् ।
संरम्भो धारणं तेषां व्यापाराः परिकीर्त्तिताः॥१७९

वामदेव उवाच ।

भूतसृष्टिः पुरा प्रोक्ता कलादिभ्यः कथं पुनः ।
आत्मतत्त्वमकारः स्याद्विद्या स्यादुस्ततः परम् ॥ १८०
शिवतत्त्वं मकारः स्यात् सर्व्वतत्त्वार्थकावुभौ ।
बिन्दु-नादौ तु तत्रत्या देवताः शृणु साम्प्रतम् ॥ १८१
ब्रह्मा विष्णुश्च रुद्रश्च महेश्वर-सदाशिवौ ।
ते हि साक्षाच्छिवस्यैव मूर्त्तयः श्रुतिविश्रुताः ॥१८२
तन्मात्रेभ्यो भवन्तीति सन्देहोऽत्र महान् प्रभो ।

श्रीसुब्रह्मण्य उवाच ।

तस्माद्वेति समारभ्य भूतसृष्टिक्रमे मुने ॥ १८३
जातानि पञ्च भूतानि कलाभ्य इति निश्चितम् ।
स्थूलप्रपञ्चरूपाणि तानि भूतपतेर्वपुः ॥ १८४
शिवतत्त्वादिपृथ्व्यन्त-तत्त्वानामुदयक्रमे ।
तन्मात्रेभ्यो भवन्तीति वक्तव्यानि क्रमान्मुने ॥ १८५
तन्मात्राणां कलानामप्यैक्यं स्याद्भूतकारणात् ।
अविरुद्धत्वमेवात्र विद्धि ब्रह्मविदां वर ॥ १८६
स्थूलसूक्ष्मात्मके विश्वे चन्द्रसूर्य्यादयो ग्रहाः ।
सनक्षत्राश्च सञ्जातास्तथान्ये ज्योतिषां गणाः॥१८७
ब्रह्म-विष्णु-महेशादिदेवता भूतजातयः ।
इन्द्रादयोऽपि दिक्पाला देवाश्च पितरोऽसुराः॥१८८
राक्षसा मानुषाश्चान्ये जङ्गमत्वविभागिनः ।
पशवः पक्षिणः कीटाः पन्नगादिप्रभेदिनः ॥ १८९
तरु-गुल्म-लतौषध्यः पर्व्वताश्चाष्ट विश्रुताः ।
गङ्गाद्याः सरितः सप्त सागराश्च महर्द्धयः ॥ १९०
यत् किञ्चिद्वस्तुजातं तत् सर्व्वमत्र प्रतिष्ठितम् ।
स्त्रीपुंरूपमिदं विश्वं शिवशक्त्यात्मकं बुधैः ॥ १९१
भवादृशैरुपास्यं स्याच्छिवज्ञानविदां वरैः ।
सर्व्वं ब्रह्मेत्युपासीत सर्व्वो वै रुद्र इत्यपि ॥ १९२
श्रुतिराह मुने तस्मात् प्रपञ्चात्मा सदाशिवः ।
अष्टत्रिंशत् कलान्याससामर्थ्याद्वितभावनात् ॥ १९३
सदाशिवोऽहमेवेति भावितात्मा गुरुः शिवः ।
प्रपञ्चदेवतायन्त्रमन्त्रात्मा न हि संशयः ॥ १९४
एवंविधाचार्य्यकृपापाटिताखिलबन्धनः ।
शिष्यः शिवपदासक्तो गुर्व्वात्मा भवति ध्रुवम् ॥ १९५
यदस्ति वस्तु तत् सर्व्वं गुणप्राधान्ययोगतः ।
समस्तं व्यस्तमपि च प्रणवार्थं प्रचक्षते ॥ १९६
रागादिदोषरहितं वेदसारं शिवोदितम् ।
यो ह्यन्यथैतन्मनुते मद्वचो मदगर्व्वितः ॥ १९७
देवो वा मानवः सिद्धो गन्धर्व्वो मनुजोऽपि वा ।
दुरात्मनस्तस्य शिरश्छिन्द्यामसनया ध्रुवम् ॥ १९८
मच्छक्त्या रिपुकालाग्निकल्पया न हि संशयः ।
भवानेव मुने साक्षाच्छिवाद्वैतविदां वरः ॥ १९९

भवल्लाटाचसम्पर्कात् पशुः पशुपतिश्शिवम्।
इदं रहस्यं परमं प्रतिष्ठितमतस्त्वयि ॥ २००
त्वमपि श्रद्धया भक्त्या प्रणवेश्वेव सादरम्।
उपदिश्य च तान् सर्व्वान् संयोज्य परमेश्वरे।
विचरन् लोकरक्षार्थे सुखमक्षयमाप्नुहि ॥ २०१

सूत उवाच।

श्रुत्वमद्भुतमतं हि षड़ाननोक्तं
वेदान्तनिष्ठितमृषिस्तु विनम्रमूर्त्तिः।
भूत्वा प्रणम्य बहुशो भुवि दण्डवत् तत्-
पादारविन्दविहरन्मधुमत्त्वमाप ॥ २०२

इति श्रीशिवे महापुराणे कैलासंहितायां
दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः।

वामदेव उवाच।

भगवन् सर्व्वतत्त्वज्ञ षण्मुखामृतवारिधे।
गुरुत्वं कथमेतेषां यतीनां भावितात्मनाम् ॥ १
जीवानां भोगमोक्षादिसिद्धिः सिध्यति यद्वशात्।
पारम्पर्य्यं विना नैवामुपदेशाधिकारिता ॥ २
एतच्च क्षौरकर्म्माङ्गं स्नानञ्च कथमीदृशम्।

श्रीसुब्रह्मण्य उवाच।

योगपट्टं प्रवक्ष्यामि गुरुत्वं येन जायते ॥ ३
वैशाखे श्रावणे वा स्यान्मास्याश्वयुजि कार्त्तिके।
मार्गशीर्षे च माघे वा शुक्लपक्षे शुभे दिने ॥ ४
पञ्चम्यां पौर्णमास्यां वा कृतप्राभातिकक्रियः।
लब्धानुज्ञस्तु गुरुणा स्नात्वा नियतमानसः ॥ ५
पर्य्यङ्कशौचं कृत्वा तद्वासमाङ्गं प्रमृज्य च।
द्विगुणं डोरमाबध्य परिधाय च वाससी ॥ ६
क्षालिताङ्घ्रिर्द्विराचम्य भस्म सद्यादिमन्त्रतः।
समादायाथ सम्धार्य्य समुद्धूलनमार्गतः ॥ ७
गृहीतहस्तो गुरुणा हस्ताभ्यां प्राङ्मुखो यथा।
तथोपवेशितस्तिष्ठेन्मण्डपे समलङ्कृते ॥ ८
गुर्व्वासनवरे शुद्धे चैलाजिनकुशोत्तरे।
अथ देशिक आदाय शङ्खं साधारमस्त्रतः ॥ ९
शोध्य तत्पुरतः स्थाप्य सम्पूज्य कुसुमादिभिः।
साधारं शङ्खमप्यस्त्र-वर्म्मभ्यां शोधितं जलम्।
आपूर्य्य पूर्व्ववत् पूज्य षड़ङ्गोक्तक्रमेण च।
सप्तधैवाभिमन्त्र्याथ प्रणवेन पुनश्च तत् ॥ १०
अभ्यर्च्य गन्धपुष्पाद्यैर्धूपदीपौ प्रदर्श्य च।
संरक्ष्यास्त्रेणावगुण्ठ्य वर्म्मणाथ प्रदर्शयेत् ॥ ११
धेनु-शङ्खाख्यमुद्रे च देशिकः स्वपुरः पुनः।
शङ्खदक्षिणदेशे तु पूजार्थ्योक्तविधानतः ॥ १२
मण्डलं कृतमभ्यर्च्य सुगन्धकुसुमादिभिः।
साधारं शोधितं शुद्धघटं तन्तुपरिष्कृतम् ॥ १३
धूपितं स्थापितं शुद्धवासितोदप्रपूरितम्।
पञ्चत्वक्पल्लपत्रैश्च मृत्तिकाभिश्च पञ्चभिः ॥ १४
मीलितञ्च सुगन्धेन लोलितं समलङ्कृतम्।
वस्त्राम्रदलकूर्च्चाग्रनारिकेलसुमैस्ततः ॥ १५
पञ्चरत्नानि विन्यस्य नीलं माणिक्य-हेमनी।
प्रवाल-गोमेदके च रत्नाभावे हिरण्मयम् ॥ १६
नृस्लुस्कमिति सम्प्रोच्य ग्लूमित्यन्ते समर्च्चयेत्।
आधारशक्तिमारभ्य यजनोक्तविधानतः ॥ १७
देवमावाह्य सम्पूज्य पञ्चावरणमार्गतः।
निवेद्य पायसान्नञ्च ताम्बूलादि यथा पुरा।
नामाष्टकार्च्चनान्तञ्च कृत्वा तमभिमन्त्र्य च।
प्रणवाष्टोत्तरशतं ब्रह्मभिः पञ्चभिः क्रमात् ॥ १८
सद्यादीशान्तमप्यस्त्ररक्षितं वर्म्मणा पुनः।
अवगुण्ठ्य प्रदर्श्याथ धूप-दीपौ प्रदर्श्य च ॥ १९
धेनु-योन्याख्यमुद्रे च दर्भैराच्छाद्य मस्तकम्।
मण्डपस्यैशदिग्भागे चतुरस्रं प्रकल्पयेत् ॥ २०
तदुपर्य्यासनं कल्पत्र तत्र संस्थाप्य तं शिशुम्।
ततः कुम्भं समुत्थाप्य स्वस्तिवाचनपूर्व्वकम् ॥ २१
अभिषिञ्चेद्गुरुः शिष्यं प्रादक्षिण्येन मस्तके।
प्रणवं पूर्व्वमुच्चार्य्य सप्तधा ब्रह्मभिस्ततः ॥ २२
पञ्चभिश्चाभिषिकञ्च शङ्खोदेनाभिवेष्टयेत्।
चरुं दीपं प्रदर्श्याथ वाससा परिमृज्य च ॥ २३
नूतनं डोरकौपीनं वाससी परिधाय च।
क्षालिताङ्घ्रिर्द्विराचम्य धृतभस्मा गुरुः शिशुम्।
हस्ताभ्यामवलम्ब्याथ हस्तौ मण्डपमध्यतः।
आसने सम्प्रवेश्याथ कल्पिते सुखमास्थितम्।
पूर्व्वाभिमुखमात्मीयतत्त्वज्ञानाभिलाषिणम्।

आसनस्थो गुरुर्ब्रूयादमलात्मा भवेति तम् ॥ २८
गुरुश्च परिपूर्णोऽस्मि शिव इत्यचलस्थितिः ।
समाधिमास्थाय ततो मुहूर्त्तं गूढमानसः ॥ २९
पश्चादुन्मील्य नयने पश्यन् शिष्यमनाकुलः ।
स्वहस्तं भसितालिप्तं विन्यस्य शिशुमस्तके ॥ ३०
दक्षश्रुतावुपदिशेद्धंसः सोऽहमिति स्फुटम् ।
तत्राद्योऽहंपदस्यार्थः शक्त्यात्मा स शिवः स्वयम् ॥३१
स एवाहं शिवोऽस्मीति स्वात्मानं संविभावय ।
य इत्यणोरर्थतत्त्वमुपदिश्य ततो वदेत् ॥ ३२
अवान्तराणां वाक्यानामर्थतातार्थ्यमादरात् ।
वाक्यानि वच्मि ते ब्रह्मन् सावधानमतिः शृणु ॥ ३३

प्रज्ञानं ब्रह्म । अहं ब्रह्मास्मि । तत्त्वमसि । अयमात्मा ब्रह्म । ईशा वास्यमिदं सर्व्वम् । प्राणोऽस्मि प्रज्ञानात्मा । यदेवेह तदमुत्र यदमुत्र तदन्विह । अन्यदेव तद्विदितादथो अविदितादधि । एष त आत्मान्तर्याम्यमृतः । स यश्चायं पुरुषे यश्चासावादित्ये स एकः ।

अहमस्मि परं ब्रह्म परापरपरात्परम् ।
वेदशास्त्रगुरुत्मा (क) तु स्वयमानन्दलक्षणम् ॥ ३४
सर्व्वभूतस्थितं ब्रह्म तदेवाहं न संशयः ।
तत्त्वस्य प्राणोऽहमस्मि पृथिव्याः प्राणोऽहमस्मि ॥३५

अपाञ्च प्राणोऽहमस्मि तेजसश्च प्राणोऽहमस्मि । वायोश्च प्राणोऽहमस्मि आकाशस्य प्राणोऽहमस्मि । त्रिगुणस्य प्राणोऽहमस्मि । सर्व्वोऽहं सर्व्वात्मकोऽहं संसारी यद्भूतं यच्च भव्यं यद्वर्त्तमानं सर्व्वात्मकत्वादद्वितीयोऽहम् ॥ ३६ ॥ सर्व्वं खल्विदं ब्रह्म । सर्व्वोऽहं विमुक्तोऽहम् । योऽसौ सोऽहं हंसः सोऽहमस्मि इत्येवं सर्व्वत्र सदा ध्यायेदिति ॥ ३७

प्रज्ञानं ब्रह्मवाक्यार्थः पूर्व्वमेव प्रबोधितः ।
अहंपदस्यार्थभूतः शक्त्यात्मा परमेश्वरः ॥ ३८
अकारः सर्व्ववर्णाग्र्यः प्रकाशः परमः शिवः ।
हकारो व्योमरूपः स्याच्छक्त्यात्मा सम्प्रकीर्त्तितः ३९
शिव-शक्त्योस्तु संयोगादानन्दः सततोदितः ।
ब्रह्मेति शिव-शक्त्योस्तु सर्व्वात्मत्वमिति स्फुटम् ॥ ४०

पूर्व्वमेवोपदिष्टं तत् सोऽहमस्मीति भावयेत् ।
तत्त्वमित्यत्र तदिति स शब्दार्थः प्रबोधितः ॥ ४१
अन्यथा सोऽहमित्यत्र विपरीतार्थभावना ।
अहंशब्दस्तु पुरुषस्तदिति स्यान्नपुंसकम् ॥ ४२
एवमन्योन्यवैरुद्ध्यादन्वयो न भवेत् तयोः ।
स्त्रीपुंरूपस्य जगतः कारणाच्चान्यथा भवेत् ॥ ४३
स तत्त्वमसि इत्येवमुपदेशार्थभावना ।
अयमात्मेति वाक्ये च पुंरूपं पदयुग्मकम् ॥ ४४
ईशेन रक्षणीयत्वादीशा वास्यमिदं जगत् ।
प्रज्ञानात्मा यदेवेह तदमुत्रेति चिन्तयेत् ॥ ४५
यः स एवेति विद्वद्भिः सिद्धान्तिभिरिहोच्यते ।
उपरिस्थितवाक्ये च योऽमुत्र स इह स्थितः ॥ ४६
इति पूर्व्ववदेवार्थः पुरुषो विदुषां मतः ।
अन्यदेव तद्विदितादथो अविदितादधि ॥ ४७
अस्मिन् वाक्ये फलस्यापि वैपरीत्यविभावना ।
यथा स्यात् तदेवात्र वक्ष्यामि श्रूयतां मुने ॥ ४८
अयथाविदिताच्छब्दो अपूर्व्वविदितादिति ।
प्रवृत्तः स्यात् तद्विदितात् तथैवाविदितात् परम्॥४९
अन्यदेव हि संसिद्धे न भवेदिति निश्चितम् ।
एष त आत्मान्तर्यामी योऽमृतश्च शिवः स्वयम् ॥ ५०
यश्चायं पुरुषे शम्भुर्यश्चादित्ये व्यवस्थितः ।
स चासौ सेति पार्थक्यं नैक एव स ईरितः ॥ ५१
सोपाधिद्वयमस्यार्थे उपचारात् तथोच्यते ।
तं शम्भुनाथं श्रुतयो वन्दति हि हिरण्मयम् ॥ ५२
हिरण्यबाहव इति सर्व्वाङ्गस्योपलक्षणम् ।
अन्यथा तत्पतित्वन्तु न भवेदिति यत्नतः ॥ ५३
य एषोऽन्तरिति शम्भुश्छान्दोग्ये श्रूयते शिवः ।
हिरण्यश्मश्रुवांस्तद्वद्धिरण्यमयकेशवान् ॥ ५४
नखमारभ्य केशाग्रात् सर्व्वत्रापि हिरण्मयः ।
अहमस्मि परं ब्रह्म परापरपरात्परम् ॥ ५५
इति वाक्यस्य तात्पर्य्यं वदामि श्रूयतामिदम् ।
अहंपदस्यार्थभूतः शक्त्यात्मा शिव ईरितः ॥ ५६
स एवास्मीति वाक्यार्थयोजना भवति ध्रुवम् ।
सर्व्वोत्कृष्टश्च सर्व्वात्मा परब्रह्मत्व ईरितः ॥ ५७
परश्चापरश्चेति परात्परमिति त्रिधा ।
रुद्रो ब्रह्मा च विष्णुश्च प्रोक्ताः श्रुत्येव नान्यथा ॥५८

(क) वेदशास्त्रगुरुत्व एवात्मा ब्रह्म यस्येति विग्रहे ऽत्राकारलोप आर्षः ।

तेभ्यश्च परमो देवः परशब्देन बोधितः ।
वेदशास्त्रगुरूणाञ्च वाक्याभ्यासवशाच्छिवः ॥ ५९
पूर्णानन्दमयः शम्भुः प्रादुर्भूतो भवेद्धृदि ।
सर्व्वभूतस्थितः शम्भुः स एवाहं न संशयः ॥ ६०
तत्त्वजातस्य सर्व्वस्य प्राणोऽस्म्यहमहं शिवः ।
इत्युक्त्वा पुनरप्याह शिवस्तत्त्वत्रयस्य च ॥ ६१
प्राणोऽस्मीत्यत्र पृथ्व्यादि गुणान्तग्रहणान्मुने ।
आत्मतत्त्वानि सर्व्वाणि गृहीतानीति भावय ॥ ६२
पुनश्च सर्व्वग्रहणं विद्यातत्त्व-शिवात्मनोः ।
तत्त्वयोश्चास्म्यहं प्राणः सर्व्वः सर्व्वात्मको ह्यहम् ॥६३
जीवस्य चान्तर्यामित्वाज्जीवोऽहं तस्य सर्व्वदा ।
यद्भूतं यच्च भव्यं यद्भविष्यत् सर्व्वमेव च ॥ ६४
मन्मयत्वादहं सर्व्वः सर्व्वो वै रुद्र इत्यपि ।
श्रुतिराह मुने सा हि साक्षाच्छिवमुखोद्गता ॥ ६५
सर्व्वात्मा परमैरेभिर्गुणैर्नित्यसमन्वयात् ।
स्वस्मात् परात्मविरहादद्वितीयोऽहमेव हि ॥ ६६
सर्व्वं खल्विदं ब्रह्मेति वाक्यार्थः पूर्व्वमीरितः ।
पूर्णोऽहं भावरूपत्वान्नित्यमुक्तोऽहमेव हि ॥ ६७
पशवो मत्प्रसादेन मुक्ता मद्भावमाश्रिताः ।
योऽसौ सर्व्वात्मकः शम्भुः सोऽहंहंसः शिवोऽस्म्यहम् ॥६८
इतीशश्रुतिवाक्याभ्यामुपदिष्टार्थमादरात् ।
साक्षाच्छिवैक्यदं पुंसामुपदिश्य शिष्योर्गुरुः ॥ ६९
आदाय शङ्खं साधारमस्त्रमन्त्रेण भस्मना ।
शोध्य तत्पुरतः स्थाप्य चतुरस्रे समर्च्चिते ॥ ७०
ओमित्यभ्यर्च्च्य गन्धाद्यैरस्त्रवस्त्रोपशोधितम् ।
वासितं जलमापूर्य्य सम्पूज्योमिति मन्त्रतः ॥ ७१
सप्तधैवाभिमन्त्र्याथ प्रणवेन पुनश्च तत् ।
यस्त्वन्तरं किञ्चिदस्ति कुरुते स तु भीतिभाक् ॥ ७२
इत्याह श्रुतिरातस्त्वं दृढ़ात्मा गतभीर्भव ।
इत्याभाष्य स्वयं शिष्यं देवं ध्यायन् समर्च्चयेत् ॥ ७३
शिष्यासनं सम्प्रपूज्य षडुत्थासनमार्गतः ।
शिवासनञ्च सङ्कल्प्य शिवमूर्त्तिं प्रकल्प्य च ॥ ७४
पञ्च ब्रह्माणि विन्यस्य शिरःपादावसानकम् ।
मुण्डवक्त्रकलाभेदैः प्रणवस्य कला अपि ॥ ७५
अष्टत्रिंशन्मन्त्ररूपाः शिष्यदेहेऽथ मस्तके ।
समावाह्य शिवं शान्तं स्थापनीयाः प्रदर्श्य च ॥ ७६

मुद्राश्चाङ्गानि विन्यस्य सर्व्वज्ञानीत्यनुक्र…
उपचारांश्च सङ्कल्प्य षोड़शासनपूर्व्वका…
पायसान्नञ्च नैवेद्यं समर्प्योमग्निजायया ।
गण्डूषाचमनार्घ्यादि धूपदीपान्तिकं क्रम…
नामाष्टकेन सम्पूज्य ब्राह्मणैर्वेदपारगैः ।
जपेद्ब्रह्मविदाप्नोति भृगुर्वै वारुणिस्ततः ।
यो देवानामुपक्रम्य यः परः स महेश्वरः
इत्यन्तं तस्य पुरतः कह्लारादिविनिर्म्मिता…
आदाय मालामुत्थाय श्रीविरूपाक्षनिर्म्मि…
शास्त्रे पञ्चाशिके रूपे सिद्धिस्कन्धं जपन्…
ख्यातिः पूर्णाङ्गमित्यन्तं कण्ठदेशे समर्प…
मनोहरसुगन्धाढ्यामागुल्फान्तावलम्बिनीं…
तिलकं चन्दनेनाथ सर्व्वाङ्गालेपनं पुनः ।
स्वसम्प्रदायानुगुणं नाम श्रीपादसंज्ञितम् ।
छत्रञ्च पादुकां दद्यादूर्व्वीकल्पविकल्पनम्…
व्याख्यातत्वञ्च कर्म्मादि-गुर्व्वासनपरिग्रहम्…
अनुगृह्य गुरुस्तस्मै शिष्याय शिवरूपिणे ।
शिवोऽहमस्मीति सदा समाधिस्थो भवेदि…
सम्प्रोच्याथ स्वयं तस्मै नमस्कारं समाचरे…
सम्प्रदायानुगुण्येन नमस्कुर्य्युस्ततोऽपरे ॥
शिष्यस्तथा समुत्थाय नमस्कुर्य्याद्गुरुं क्रमा…
गुरोरपि गुरुं तस्य शिष्यांश्च स्वगुरोरपि…
एवं कृतनमस्कारं शिष्यं जल्वा गुरुः स्वय…
अद्यप्रभृति लोकानामनुग्रहपरो भव ॥
परीक्ष्य वत्सरं शिष्यमङ्गीकुरु विधानतः ।
रागादिदोषान् सन्त्यज्य शिवध्यानपरो भ…
सत्सम्प्रदायसंसिद्धैः सङ्गं कुरु न चेतरैः ।
अनभ्यर्च्च्य शिवं जातु मा भुङ्क्ष्वप्राणसङ्क…
गुरुभक्तिं समास्थाय सुखी भव सुखी भव…
इति क्रमाद्गुरुवरः समं शिष्यं समाचरेत् ॥
योगपट्टप्रकारस्ते कथितो मुनिसत्तम ।

सूत उवाच ।

इत्युक्त्वा षण्मुखस्तस्मै क्षौरं स्नानविधिं…
वक्तुमारभते येन शुद्धिः स्याद्यतिनः प…

श्रीसुब्रह्मण्य उवाच ।

[illegible] लब्धानुज्ञस्ततो गुरो…

ेरः सङ्गात्य वाचम्य सवासाः चौरमाचरेत् ।
वालनं कारयेद्दासी-मृदम्भोभिः क्षुरादिकम् ॥ ९४
हस्तौ च मृदालिप्य क्षालयेति मृदं ददेत् ।
यापितं प्रोक्षितं तोयैः शिवं शिवमितीरयन् ॥ ९५
नेत्रे पिहिते चैवानामाङ्गुष्ठाभिमन्त्रिते ।
स्त्रेणोन्मील्य संदृश्य क्षुरादिचौरसाधनम् ॥ ९६
भिमन्त्र्य द्वादशाय प्रोचयेदस्त्रमन्त्रतः ।
रं गृहीत्वा तारेण दक्षभागे निकृन्तयेत् ॥ ९७
यांश्च कांश्चिदग्रेषु वद्ध्वा सर्व्वञ्च वापयेत् ।
थिव्यां पर्णमादाय विकिपेन्न भुवः स्थले ॥ ९८
मश्रूणि हस्तपादस्थनखानि च निकृन्तयेत् ।
ल्वाश्वत्थतुलस्यादिस्थाने संगृह्य मृत्तिकाम् ॥ ९९
षड्वारं निमज्याप्सु तीरं गत्वोपविश्य च ।
ददेशे तु संस्थाप्य मृदं त्रेधा विभज्य च ॥ १००
कां पुनस्त्रिधा कृत्वा प्रोक्ष्यास्त्रेणाभिमन्त्र्य च ।
त्रैकां मृदमादाय दापयित्वान्यपाणिना ॥ १०१
री द्वादशधालिप्य प्रत्येकं क्षाल्य वारिणा ।
तरेकां पादयोश्च सुखे चान्यां करक्रमात् ॥ १०२
ाल्य संक्षाल्य चाम्भोभिः पुनश्च जलमाविशेत् ।
न्यां मृदं भागयित्वा शिरसि द्वादश क्रमात् ॥१०३
ालिप्य मृदमास्यान्तं निमज्ज्य च पुनः पुनः ।
रं गत्वा तु गण्डूषं षोडशाचमनं द्विधा ॥ १०४
णानायस्य च पुनः प्रणवाद्यष्टसंख्यया ।
दमन्यां पुनस्त्रेधा विभजेच्च तदेकया ॥ १०५
टिशौचं पादशौचं विधायाचम्य च द्विधा ।
णवेनाथ षोढा च प्राणानायस्य वाग्यतः ॥ १०६
नरन्यां स्वोरुदेशे त्रिधा विन्यस्य चोमिति ।
ोच्याभिमन्त्रयेत् सप्त स्वपाण्योस्तलमेकया ॥ १०७
धालिप्याथ संदृश्य सूर्य्यमूर्त्तिः स्वकक्षयोः ।
मालिप्य च पाणिभ्यां व्यत्यस्ताभ्यामथान्यया॥१०८
र आरभ्य पादान्तं विलिप्यादित्यदृष्ट्या ।
हीत्वान्यां समुत्थाय दण्डमादाय भूतले ॥ १०९
रुन् शिवञ्च संस्मृत्य साष्टाङ्गं प्रणमेत् त्रयम् ।
ाङ्गेनैकवारञ्च समुत्थाय च वन्दयेत् ॥ ११०
ीर्थं प्रविश्य तन्मध्ये निमज्ज्योन्मज्ज्य तां मृदम् ।
न्ये संस्थाप्य पूर्व्वोक्तप्रकारेण विलिप्य च ॥ १११

तत्रावशिष्टां संगृह्य जलमध्ये विलोड्य च ।
त्रिवारमोमिति स्नात्वा शिवपादाम्बुजं स्मरन् ॥११२
अथाभिषिच्य शङ्खाख्यमुद्रया द्वादशोमिति ।
तीरमागत्य संशोध्य करौ पादौ मृदान्यया ॥ ११३
पुनश्च संशोध्य करौ द्विराचम्योमिति स्मरन् ।
अभिषिच्योमिति जलं विरजाभस्मलोलितम् ॥ ११४
अङ्गोपमार्जनं कृत्वा सुस्नातो भस्मना ततः ।
त्रिपुण्ड्रञ्च विधायाथ कृतमाध्यन्दिनक्रियः ॥ ११५
गुरुं तीर्थञ्च संवन्द्य नमस्कृत्य महेश्वरम् ।
सम्पूज्य परमेशानं पञ्चधा परिकल्पिते ॥ ११६
भैक्षं यथोचितं कुर्य्याद्दूषितान्नं विवर्ज्जयेत् ।
चौरस्नानविधिः प्रोक्तः किं भूयः श्रोतुमिच्छसि॥११७

इति श्रीशैवे महापुराणे कैलाससंहितायाम्-
मेकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

वामदेव उवाच ।

ये मुक्ता यतयस्तेषां दाहकर्म्म न विद्यते ।
खननं खलु तेषां तत् कर्म्माचक्ष्व गुरो मम ॥ १
पूर्णाहंभावमाश्रित्य ये मुक्ता देहपञ्जरात् ।
ये तूपासनमार्गेण देहमुक्ताः परं गताः ॥ २
तेषां गतिविशेषञ्च भगवन् वक्तुमर्हसि ।

सूत उवाच ।

मुनिविज्ञप्तिमाकर्ण्य शक्तिपाणिः सुरारिहा ॥ ३
प्राहात्यन्तरहस्यञ्च स्वभुणा श्रुतमीश्वरात् ।

श्रीसुब्रह्मण्य उवाच ।

इदमेव मुने गुह्यमभवे शिवयोगिने ॥ ४
उक्तं भगवता साक्षात् सर्व्वज्ञेन पिनाकिना ।
वक्ष्ये तदद्य ते ब्रह्मन् न देयं यस्य कस्यचित् ॥ ५
समाधिस्थो यतिः कश्चिच्छिवभावेन देहमुक् (क)।
अस्ति चेत् स महाधीरः परिपूर्णः शिवो भवेत् ॥ ६
अधैर्य्यचित्तो यः कश्चित् समाधिं न च विन्दति ।
त्रिपदार्थपरिज्ञानं वेदान्तगमवाक्यजम् ॥ ७
श्रुत्वा गुरुमुखाद्योगं समभ्यस्य यमादिकम् ।

(क) देहभागिति पाठान्तरं क्वचित् ।

शिवध्यानपरो नित्यं प्रणवासक्तमानसः ॥ ८
देहदौर्व्बल्यगमनो यद्यवैर्य्यस्तनुं त्यजेत्।
सदाशिवानुग्रहतो नन्दिना प्रेरिता मुने ॥ ९
आतिवाहिकरूपिण्यो देवताः पञ्च विश्रुताः।
अग्न्यहन्ताऽग्रतः काश्चिज्ज्योतिःपुञ्जवपुष्मती ॥ १०
अह्नोऽभिमानिनी काचिच्छुक्लपक्षाभिमानिनी।
उत्तरायणरूपा च पञ्चानुग्रहतत्पराः ॥ ११
धूमा तमस्विनी रात्रिः कृष्णपक्षाभिमानिनी।
दक्षिणायनरूपा च कर्म्मानुष्ठानतत्परान् ॥ १२
गृहीत्वा त्रिदिवं यान्ति ते तु पुण्यक्षये पुनः।
मानुषं लोकमासाद्य भजन्ते जन्म पूर्व्ववत् ॥ १३
ताः पुनः पञ्चधा मार्गं विभज्यारभ्य भूतलम्।
अग्न्यादिक्रमतो गत्वा सदाशिवपदं यतिम् ॥ १४
निनीय वन्द्य चरणौ देवदेवस्य पृष्ठतः।
तिष्ठन्त्यनुग्रहाकारकर्म्मण्येव प्रयोजिताः ॥ १५
समागतमभिप्रेक्ष्य देवदेवः सदाशिवः।
विरक्तायेन्महामन्त्रतात्पर्य्यमुपदिश्य च ॥ १६
खगटङ्कत्रिशूलाग्र-वरदानविभूषितम्।
त्रिनेत्रं चन्द्रशकलगङ्गोल्लासिजटाधरम् ॥ १७
स्वसाम्यञ्च वपुर्दत्त्वा गाणपत्येऽभिषिच्य च।
अनुगृह्य विमानाग्र्यं सर्व्वाङ्गं सर्व्वकामदम् ॥ १८
इतिशाखाविरक्तस्य रुद्रकन्यासमावृतम्।
नृत्य-गीत-मृदङ्गादिवाद्यघोषमनोऽरम् ॥ १९
दिव्याम्बरस्रगालेप-भूषणैरभिभूषितम्।
दिव्यामृतघटैः पूर्णं दिव्यपर्य्यङ्कपूरितम् ॥ २०
सूर्य्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम्।
मनोवेगं सर्व्वगञ्च विमानमनुगृह्य च ॥ २१
भुक्तभोगस्य तस्यापि भोगकौतूहलक्षये।
निपात्य शक्तिं तीव्रतरां प्रक्रान्त्याद्यतिदुर्गमम् ॥ २२
कान्तारं दग्धुकामानां प्रलयानलसप्रभाम्।
अनुगृह्य महामन्त्रतात्पर्य्यं परमेश्वरः ॥ २३
पूर्णाहंभावनारूपः शम्भुरस्मीति निश्चलम्।
अनुगृह्य समाधिञ्च स्वदास्यसन्दरूपिणीः ॥ २४
रव्यादिकर्म्मसामर्थ्यरूपाः सिद्धीरनर्गलाः।
आयुःक्षये पद्मयोनेः पुनरावृत्तिवर्ज्जिताम् ॥ २५
मुक्तिञ्च परमां तस्मै प्रयच्छति जगद्गुरुः।

एतदेव पदं तस्मात् सर्व्वैश्वर्य्यसमन्वितम्।
मुक्तिघण्टापथश्चेति वेदान्तानां विनिश्चयः॥
मुमूर्षोंस्तत्र मन्दस्य यतेः सत्सम्प्रदायिनः
यतयः परितः स्थित्वा प्रणवादीन्यनुक्रमात्
उपदिश्य च वाक्यानि तात्पर्य्यञ्च समासतः
वर्णयेयुर्यतिस्तस्य प्राणस्य विलयावधि।
एतेषां समसेवात्र संस्कारक्रम उच्यते॥
असंस्कृतशरीराणां दौर्गत्यं नैव जायते।
सन्न्यस्य सर्व्वकर्म्माणि शिवाश्रयपरा
देहं दूषयतस्तेषां राज्ञो राष्ट्रञ्च नश्यति
तद्ग्रामवासिनस्तेऽपि भवेयुर्भृशदुःखिनः॥

तद्दोषपरिहाराय—

नम इरिण्याय चेति समारभ्यान्तं
ओमित्यन्ते जपन् देवयजनं पूरयेत् ततः
पुत्रादयो यथान्यायं कुर्य्युः संस्कारमुत्त
अभ्यज्य स्थाप्य शुद्धोदैरभ्यर्च्य कुसुमादि
श्रीरुद्र-चमकाभ्याञ्च रुद्रसूक्तेन च क्रमा
शङ्खञ्च पुरतः स्थाप्य तज्जलेनाभिषिच्य
पुष्पं निधाय शिरसि प्रणवेन प्रमृज्य
कौपीनादीनि सन्त्यज्य पुनरन्यानि धा
भस्मनोद्धूल्य सर्व्वाङ्गं तदुक्तविधिना त
त्रिपुण्ड्रञ्च विधानेन तिलकं चन्दनेन च
विरच्य पुष्पैर्मालाभिरलङ्कृत्य कलेवरम्।
उरः-कण्ठ-शिरो-बाहु-प्रकोष्ठ-श्रुतिषु
रुद्राक्षमालाभरणैरलङ्कृत्य च मन्त्रतः।
धूपितं समनुत्थाप्य शिक्योपरि निधाय
पञ्चब्रह्ममयी स्थाप्य रथे सम्पूज्य तं
ओमाद्यैः पञ्चभिर्ब्रह्ममन्त्रैः सम्पादितैः
सुगन्धिकुसुमैर्माल्यैरलङ्कृत्य समन्ततः।
नृत्यवाद्यैर्ब्राह्मणानां वेदघोषैश्च सर्व्व
ग्रामं प्रदक्षिणीकृत्य ग्रामप्राच्यामथापि
उदीच्यां पुण्यदेशे तु पुण्यवृक्षसमीपतः
खनित्वा देवयजनं दण्डमात्रप्रमाणतः।
प्रणव-व्याहृतिभ्याञ्च प्रोक्ष्य चास्तीर्य्य
शमीपत्रैश्च सकुशैरुत्तराग्रांस्ततोऽर्द्धतः।
आस्तीर्य्य दर्भांस्तत्पीठं चैलाजिनकुशै

वेन ब्रह्मभिश्च पञ्चगव्येन तां तनुम्।
व्याभिषिच्य रौद्रेण सूक्तेन प्रणवेन च॥ ४४
तोयेनाभिषिच्य मूर्द्ध्नि पुष्पं विनिक्षिपेत्।
मित्यथ समुद्धृत्य स्वस्तिवाचनपूर्व्वकम्॥ ४५
तं योगासने स्थाप्य प्राङ्मुखं स्याद्यथा यथा।
धपुष्पैरलङ्कृत्य धूपं गुग्गुलुना ततः॥ ४६
णो हव्यमिति प्रोच्य रक्षस्वेति वदन् ददेत्।
ण्डं दक्षिणहस्ते तु वामे दद्यात् कमण्डलुम्॥ ४७
ापतेन लदेतान्यन्यमन्त्रेण सोदकम्।
ब्रजज्ञानं प्रथममिति मन्त्रेण मस्तके॥ ४८
शन् जप्त्वा रुद्रसूक्तं भ्रुवोर्मध्ये स्पृशन् जपेत्।
नो महान्तमित्यादिचतुर्भिर्मस्तकं ततः॥ ४९
रिकेलेन निर्भिद्यादवटं पूरयेत् ततः।
ह्मभिः पञ्चभिः स्पृष्ट्वा जपेत् स्थलमनन्यधीः॥ ५०
देवानामुपक्रम्य यः परः स महेश्वरः।
ते जप्त्वा महादेवं संसारभेषजं शिवम्॥ ५१
व्वज्ञमपराधीनं सर्व्वानुग्राहकं परम्।
कारत्निसमुत्सेधमरत्निद्वयविस्तृतम्॥ ५२
दा पीठं प्रकल्प्याथ गोमयेनोपलेपयेत्।
तुरस्रञ्च तन्मध्ये गन्धाक्षतसमन्वितैः॥ ५३
गन्धिकुसुमैर्विल्वैस्तुलस्या च समर्च्चयेत्।
णवेन ततो दत्त्वा धूप-दीपौ पयो हविः॥ ५४
त्वा प्रदक्षिणीकृत्य नमस्कृत्य च पञ्चधा।
णवं द्वादशावृत्त्या सञ्जप्य प्रणमेत् ततः॥ ५५
श्विदिक्क्रमतो दद्याद्ब्रह्माघ्र्यं प्रणवेन च।
वं दशाहपर्य्यन्तं विधिरेकादशेऽहनि॥ ५६
श्राज्जैत्र वेदिमालिप्य कृत्वा पुण्याहवाचनम्।
श्च पश्चिममारभ्य पूर्व्वान्तं पञ्च च क्रमात्॥ ५७
ण्डलान्युत्तराशास्यः कुर्य्यात् स्वयमवस्थितः।
देशमात्रं सङ्कल्प्य चतुरस्रञ्च मध्यतः॥ ५८
न्दु-त्रिकोण-षट्कोण-वृत्ताकाराणि च क्रमात्।
ङ्खञ्च पुरतः स्थाप्य पूजोक्तक्रममार्गतः॥ ५९
णानायम्य सङ्कल्प्य पूजयिष्ये सुरेश्वरीः।
वताः पञ्च पूर्व्वोक्ता आतिवाहिकरूपिणीः॥ ६०
त्यज्योत्तरतो दर्भानपश्च संस्पृशेत् ततः।
श्चिमादि समारभ्य षडङ्गन्यासमार्गतः॥ ६१

मण्डलानि च तेष्वन्तः पुष्पाण्याधाय पीठवत्।
ओं क्लीमित्युच्चार्य्यान्निरूपामातिवाहिकदेवताम्॥ ६२
आवाहयामि नम इत्यन्तं सर्व्वत्र भावयेत्।
स्थापनाद्यास्तु संदृश्य मुद्राः प्रत्येकमादरात्॥ ६३
क्रां क्लीमित्यादिना कुर्य्यादासामङ्गानि च क्रमात्।
पाशाङ्कुशाभयाभीष्टपाणिचन्द्रोपलप्रभा॥ ६४
रत्नाङ्गुलीयकच्छाया-रञ्जिताखिलदिङ्मुखाः।
रक्ताम्बराधर-कर-पदपङ्कजशोभिताः॥ ६५
त्रिनेत्रोल्लासिवदन-पूर्णचन्द्रमनोहराः।
माणिक्यमुकुटोद्भासि-चन्द्रलेखावतंसिनीः॥ ६६
कुण्डलामृष्टगण्डाश्च पीनोन्नतपयोधराः।
हार-केयूर-कटक-काञ्चीदाममनोहराः॥ ६७
तनुमध्याः पृथुश्रोण्यो रक्तदिव्याम्बरावृताः।
माणिक्यमयमञ्जीर-शिञ्जत्पदसरोरुहाः॥ ६८
पादाङ्गुलीयकश्रेणी-मञ्जुलातिमनोहराः।
अनुग्रहेणामूर्त्तेन शिववत् किन्तु साध्यते॥ ६९
तस्माच्छक्त्यात्ममूर्त्तेन सर्व्वं साध्यं महेशवत्।
सर्व्वानुग्रहकर्त्त्रैव स्वीकृताः पञ्च मूर्त्तयः॥ ७०
एवं ध्यात्वा तु ताः सर्व्वा अनुग्रहपराः शिवाः।
पादयोः पाद्यमेतासां दद्याच्छङ्खोदबिन्दुभिः॥ ७१
हस्तेष्वाचमनीयञ्च मौलिष्वर्घ्यं प्रदापयेत्।
शङ्खोदबिन्दुभिस्तासां स्नानकर्म्म च भावयेत्॥ ७२
रक्ताम्बराणि दिव्यानि सोत्तरीयाणि दापयेत्।
मुकुटादीन्यनर्घ्याणि दद्यादाभरणानि च॥ ७३
सुवासितञ्च श्रीगन्धमक्षतांश्चातिशोभनान्।
सुरभीणि मनोज्ञानि कुसुमानि च दापयेत्॥ ७४
धूपञ्च परमामोदं साज्यवर्त्तिञ्च दीपकम्।
सर्व्वं समर्पयामीति प्रणवं क्लीमुपक्रमात्॥ ७५
नमोऽन्तञ्च ततो दद्यात् पायसं मधुना युतम्।
साज्यशर्करयापूप-कदली-गुड़पूरितम्॥ ९६
प्रत्येकं कदलीपत्रे भरितञ्च सुवासितम्।
ओं भूर्भुवः स्वरिति च प्रोक्षणादीनि कारयेत्॥ ७७
ओं क्लीमिति समुच्चार्य्य नैवेद्यं वह्निजायया।
पानीयं नम इत्युक्त्वा समर्प्याहास्य पूर्व्वतः॥ ७८
स्थलं विशोध्य गण्डूषाचमनार्घ्याणि दापयेत्।
ताम्बूलं धूप-दीपौ च प्रदक्षिण-नमस्कृती॥ ७९

विधाय प्रार्थयेदेताः शिरस्यञ्जलिमादधत्।
श्रीमातरः सुप्रसन्ना यतिं शिवपदेषिणम्॥ ८०
रक्षणीयं प्रब्रुवन्तु परमेशपदाब्जयोः।
इति सम्प्रार्थ्य ताः सर्वा विसृज्य च यथागतम्॥८१
तासां प्रसादमुद्धृत्य कन्यकाभ्यः प्रदापयेत्।
गवां वा जलमध्ये वा विक्षिपेन्नान्यथा क्वचित्॥ ८२
अत्रैव पार्व्वणं कुर्यान्नैकोद्दिष्टं यतेः क्वचित्।
अत्रायं पार्व्वणश्राद्धे नियमः प्रोच्यते मया॥ ८३
कर्त्ता स्नात्वा धृतप्राण उपवीती समाहितः।
सपवित्रकरस्त्वस्यां पुण्यतिथ्यामिति ब्रुवन्॥ ८४
करिष्ये पार्व्वणश्राद्धमिति सङ्कल्प्य चोत्तरे।
दत्त्वा दर्भानुपस्पृश्य साभ्यङ्गकृतमज्जनान्॥ ८५
आहूय चतुरो विप्रान् शिवभक्तान् दृढ़व्रतान्।
विश्वेदेवार्थे भवता प्रसादः क्रियतामिति॥ ८६
आत्मने भवता पश्चादन्तरात्मन इत्यपि।
परमात्मन इत्येवं कृत्वा वरणमादरात्॥ ८७
पादौ प्रक्षाल्य तेषान्तु प्राङ्मुखानुपवेश्य च।
गन्धादिभिरलङ्कृत्य भोजयित्वा शिवाग्रतः॥ ८८
गोमयेनोपलिप्याथ दर्भान् प्रागग्रकल्पितान्।
आस्तीर्य्य संयतप्राणः पिण्डानाञ्च प्रदानकम्॥ ८९
करिष्य इति सङ्कल्प्य मण्डलत्रयमभ्य च।
आत्मानमन्तरात्मानं परमात्मानमप्यतः॥ ९०
चतुर्थ्यन्तं वदन् पश्चादिदं पिण्डमितीरयन्।
ददामीति च सम्प्रोच्य दद्यात् पिण्डान् कुशोदकम्॥९१
दत्त्वोत्थाय विधायाथ प्रदक्षिण-नमस्कृती।
कृत्वा दत्त्वा ब्राह्मणेभ्यो दक्षिणाञ्च यथाविधि॥ ९२
नारयणबलिं कुर्य्यात् तस्मिन्नेव स्थले दिने।
रक्षार्थमेव सर्व्वत्र विष्णोः पूजाविधिः स्मृतः॥ ९३
कुर्य्याद्विष्णोर्महापूजां पायसान्नं निवेद्य च।
द्वादशाथ समाहूय ब्राह्मणान् वेदपारगान्॥ ९४
केशवादिभिरभ्यर्च्य गन्धपुष्पाक्षतादिभिः।
उपानच्छत्रवस्त्रादि दत्त्वा तेभ्योऽथ भूतले॥ ९५
आस्तीर्य्य दर्भान् पूर्व्वाग्रान् भूः स्वाहा च भुवः सुवः।
प्रणवादि समुच्चार्य्य पायसान्नं बलिं हरेत्॥ ९६
द्वादशाहे समुत्थाय प्रातः स्नात्वा कृताह्निकः।
शिवभक्तान् यतीन्वापि ब्राह्मणान्वा शिवप्रियान्॥९७

निमन्त्र्य तान् समाहूय मध्याह्नेऽभ्यञ्ज
सन्निधौ परमेशस्य पञ्चावरणमार्गतः॥
सम्पूज्य तस्य संस्थाप्य प्राणानायम्य च
महासङ्कल्पमार्गेण सङ्कल्प्याऽस्मद्गुरोरि
पूजां करिष्य इत्युक्त्वा ततो दर्भानुपस्पृ
पादौ प्रक्षाल्य चाचम्य स्वयं कर्त्ता च वा
तानासनेषु संस्थाप्य प्राङ्मुखान् भस्मभूषि
सदाशिवादिक्रमतो ध्यात्वाष्टौ तत्र चैतरा
गुरुञ्च परमं तस्मात् परात्परगुरुं ततः।
परमेष्ठिगुरुं ध्यात्वा साम्बबुद्ध्या स्वनामत
इदमासनमित्युक्त्वा चासनानि समर्पयेत्।
प्रणवादिद्वितीयान्तं स्वस्वनाम समुच्चरन्
आवाहयामि नम इत्यावाह्यार्घ्योदकेन
पाद्यमाचमनञ्चार्घ्यं वस्त्रगन्धाक्षतानपि
दत्त्वा पुष्पैरलङ्कृत्य प्रणवाद्यैः स्वनामभि
सचतुर्थीनमोऽन्तैश्च सुगन्धिकुसुमैस्ततः
धूप-दीपौ प्रदत्त्वा च सकलाराधनं कृत
सम्पूर्णमस्त्विति प्रोच्य नमस्कृत्य समुत्थि
पात्राणि कदलीपत्राण्यास्तीर्य्याद्भिर्वि
शुद्धान्न-पायसापूप-सूप-व्यञ्जनपूर्व्वका
दत्त्वा पदार्थान् कदली-नारिकेल-गुडा
पात्रासनानि च पृथग्दत्त्वा सम्प्रोच्य च
परिषिच्य च सम्प्रोच्य विष्णो हव्यमिति
रक्षस्वेति करस्पर्शं कारयित्वा समुत्थित
आपोऽशनं समर्प्याथ प्रार्थयेत् तानिदं
सदाशिवादयः प्रीता वरदाश्च भवन्तु
ये देवा इति च ततो जप्त्वेदं साक्षतं
नमस्कृत्य समुत्थाय सर्व्वत्रामृतमस्त्विति
उक्त्वा प्रसाद्य च जपेद्गणानां त्वेत्युपक
वेदादीन् रुद्र चमकौ रुद्रसूक्तञ्च पञ्च
ब्रह्माणि भोजनान्तञ्च यावन्मन्त्रांश्च
दत्त्वोत्तरापोऽशानञ्च हस्ताङ्घ्रिमुखशो
कृत्वाचान्तांश्चासनेषु स्थापयित्वा यथा
शुद्धोदकं प्रदत्त्वाथ कर्पूरादि यथोचि
मुखवासं दक्षिणाञ्च पादुकामातपत्र
व्यजनं फलकान् दण्डं वैणवञ्च प्रदा

द्विगणनमस्कारैः सन्तोष्याशिषमावहन् ।
नः प्रणम्य सम्प्रार्थ्य गुरुभक्तिमचञ्चलाम् ॥ ११६
द्याशिवादयः प्रीता गच्छन्तु च यथासुखम् ।
त्युदास्य द्वारदेशावधि सम्यगनुव्रजन् ॥ ११७
सृष्टैः परावृत्य द्वाःस्थैर्विप्रैश्च बन्धुभिः ।
नानाथैश्च सहितो भुक्त्वा तिष्ठेद्यथासुखम् ॥ ११८
ब्दमेवं कुर्व्वाणो गुर्व्वाराधनमुत्तमम् ।
ह भुक्त्वा महाभोगान् शिवलोकमवाप्नुयात् ॥ ११९

सूत उवाच ।

एवं कृत्वानुग्रहमात्मशिष्यं
श्रीवामदेवं पुनराह देवः ।
यन्नैमिषारण्यमुनीश्वराणां
प्रोक्तं पुरा व्याससुनीश्वरेण ॥ १२०
तस्माद्दसावादिगुरुर्भवांस्तु
द्वितीय आर्य्यो भवतो मुखाब्जात् ।
श्रुत्वा मुनीन्द्रस्तु सनत्कुमारः
शुकाय वक्ता भविता च भूमौ ॥ १२१
त्येकं मुनिशार्दूल शिष्यवर्गचतुष्टयम् ।
शम्पायन एव स्यात् पैलो जैमिनिरेव च ॥ १२२
सन्तुश्चेति चत्वारो व्यासशिष्या महौजसः ।
गस्त्यश्च पुलस्त्यश्च पुलहः क्रतुरेव च ॥ १२३
शिष्या महात्मानो वामदेव महामुने ।
नकश्च सनन्दश्च सनातनमुनिस्ततः ॥ १२४
नत्सुजात इत्येते योगिवर्य्याः शिवप्रियाः ।
नत्कुमारशिष्यास्ते सर्व्ववेदार्थवित्तमाः ॥ १२५
रुश्च परमश्चैव परात्परगुरुस्ततः ।
रमेष्ठिगुरुश्चैते पूज्याः स्युः शुक्रयोगिनः ॥ १२६
ं प्रणवविज्ञानं स्थितं वर्गचतुष्टये ॥ १२७
एतन्मण्डलमद्भुतं परशिवा-
धिष्ठानरूपं सदा
वेदान्तार्थविचारपूर्णमतिभिः
पूज्यं यतीन्द्रैः परम् ।
वेदादिप्रविभागकल्पितमहा-
काव्यादिनाप्यावृतं
त्वत्सन्तोषकरं तथास्तु जगतां
श्रेयस्करं श्रीपदम् ॥ १२८

इदं रहस्यं परमं शिवोदितं
वेदान्तसिद्धान्तविनिश्चितं परम् ।
मत्तः श्रुतं यद्भवता ततो मुने
भवन्मतं प्राज्ञतमा वदन्ति ॥ १२९
तस्मादनेनैव पथागतः शिवं
शिवोऽहमस्मीति शिवो भवेद्यतिः ।
पितामहादिप्रविभागमुक्तयो
नद्यो यथा सिन्धुमिमाः प्रयान्ति ॥ १३०

सूत उवाच ।

एवं मुनीश्वरायैतदुपदिश्य सुरेश्वरः ।
स्मृत्वा श्रीचरणाम्भोजं पित्रोः सर्व्वसुरार्च्चितम् ॥ १३१
कैलासशिखरं प्राप कुमारः शिखरावृतम् ।
वामदेवोऽपि सच्छिष्यैः संवृतः शिखिवाहनम् ॥ १३२
गत्वा कैलासशिखरं दृष्ट्वा चरणमीशयोः ।
भक्त्या वेपितसर्व्वाङ्गो विस्मृत्य स्वकलेवरम् ॥ १३३
पपात सन्निधौ भूयो नत्वा नत्वा समुत्थितः ।
स्तुत्वा बहुविधैः स्तोत्रैर्वेदागमरसोत्कटैः ॥ १३४
निधाय चरणाम्भोजं देव-देव्योः स्वमूर्द्धनि ।
पूर्णानुग्रहमासाद्य तत्रैव न्यवसत् सुखम् ॥ १३५
भवन्तोऽपि विदित्वैवं प्रणवार्थं महेश्वरम् ।
अत्रैव सुखमासीनाः श्रीविश्वेश्वरपादयोः ॥ १३६
सायुज्यरूपामतुलां भजध्वं मुक्तिमुत्तमाम् ।
अहं गुरुपदाम्भोजसेवायै बादराश्रमम् ॥ १३७
गमिष्ये भवतां भूयः सत्सम्भाषणमस्तु मे ।
इति वश्च समाख्यातं यत्पृष्टोऽहं मुनीश्वराः ॥ १३८
पुराणं रुद्रसाहस्रं शिवसंज्ञं शिवप्रदम् ।
सर्व्वपापप्रशमनं सर्व्वारिष्टनिवारणम् ॥ १३९
सर्व्वाभीष्टप्रदं नृणां परत्रेह च सौख्यदम् ।
एतच्छ्रुत्वा च ते सर्व्वे आनन्दं परमं गताः ॥ १४०
हर्षगद्गदया वाचा प्रणेमुस्तं पुनः पुनः ।
अस्माकं चेतसो भ्रान्तिर्गता वै कृपया तव ॥ १४१
तच्छ्रुत्वा च पुनर्वाक्यमुवाच ऋषिसत्तमान् ।
व्यासशिष्यस्तदुक्तं हि कथयामास तांस्तदा ॥ १४२
नास्तिकाय न वक्तव्यं श्रद्धाहीनाय वै सदा ।
अभक्ताय न वाच्यं हि न चाशुश्रूषवे तथा ॥ १४३
अष्टादश पुराणानि इतिहासान्यनेकशः ।

वेदार्थांश्चाप्यनेकांश्च विचार्य्य च पुनः पुनः ॥ १४४
सारमेतत् समुद्धृत्य व्यासेन परिभाषितम् ।
अभक्तो भक्तिमाप्नोति भक्तो भक्तिश्च वर्द्धते ॥ १४५
एकवारं श्रुतवतः पापं निर्भस्मतां व्रजेत् ।
पुनः श्रुते च तद्भक्तिर्जायते पुरुषस्य हि ॥ १४६
पुनः श्रुते विवृद्धिः स्याद्भक्तेश्चैव न संशयः ।
पुनः श्रुते शिवं साक्षात् पश्यन्ति ज्ञानचक्षुषः ॥१४७
पुनः श्रुते सोऽहमिति पश्यन्तीति सुनिश्चितम् ।
तस्मात् पुनः पुनः श्राव्यं भुक्ति-मुक्तिफलेप्सुभिः ॥१४८
पञ्चावृत्तिः प्रकर्त्तव्या व्यासस्य वचनन्त्विदम् ।
यदुद्दिश्य फलं श्रेष्ठं तत् प्राप्नोति सुनिश्चितम् ॥१४९
न दुर्लभं भवेत् तस्य येनेदं श्रुतमुत्तमम् ।
इत्युक्तास्ते मुनिश्रेष्ठाः शुश्रुवुः परया मुदा ॥ १५०
पञ्चकृत्वस्तु तच्छ्रुत्वा लब्ध्वा च शिवदर्शनम् ।
पुरातनाश्च मुनयः सिद्धिञ्च परमां गताः ॥ १५१

इत्येवं पञ्चशः श्रुत्वा ह्यानन्दं परमं गताः ।
तत्रैव पूजयामासुर्नानावस्त्रैः सुशोभनः ॥
चन्दनैः सुविचित्रैश्च नानालङ्करणैस्तथा ।
नमस्कारैः स्तवैश्चैव स्वस्तिवाचनपूर्व्वकम् ॥
आशीर्भिर्विविधैश्चैव वर्द्धयामासुरञ्जसा ।
सन्तुष्टाश्चैव ते सर्व्वे सन्तुष्टः सूत एव च ॥
परस्परञ्च सन्तुष्टाः शिवभक्तिपरायणाः ।
एतदेव परं मत्वा नमन्ति च भजन्ति च ॥
एवं यः शृणुयादत्र सर्व्वान् कामानवाप्नुय
अन्ते भक्तिं परां प्राप्य मुक्तिं वै प्राप्नुयात् ॥
शिवे भक्तिः शिवे भक्तिः शिवे भक्तिर्भवे

इति श्रीशैवे महापुराणे कलासंहि
द्वादशोऽध्यायः ॥ १२ ॥

समाप्तेयं कैलाससंहिता ।

शिवपुराणम्।

सनत्कुमारसंहिता।

प्रथमोऽध्यायः।

ओं नमो भगवते वासुदेवाय।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥

प्रपद्ये देवमीशानं सर्व्वज्ञमपराजितम्।
सम्भवं सर्व्वभूतानामनादिं विश्वतोमुखम्॥ १
वेदादौ यः स्वरः प्रोक्त ओङ्काराख्यो महेश्वरः।
सृजते सर्व्वभूतानि पञ्चभूतैः सदाशिवः॥ २
सांख्यानां परमं योगं व्रतैः पाशुपतैस्तथा।
सर्व्वज्ञानस्य कर्त्तारमादिदेवमुमापतिम्॥ ३
सृजते भगवान् देवो मूर्त्तित्रयविकारजान्।
रक्षार्थं सर्व्वजन्तूनां त्रिधात्मानं सृजत्यजः॥ ४
ससंज्ञया तु भगवानेक एव महेश्वरः।
त्रैलोक्यहितकारार्थी नित्यमुक्तः शिवोऽव्ययः॥ ५
प्रज्वलन्तं महाशूलं घोररूपं महाशनिम्।
नानाक्रीड़नकैर्देवः क्रीड़ते योगमायया॥ ६
दयिताङ्गं वपुः कृत्वा नृत्यारम्भे स्थितो हरः।
जगत्स्थितिञ्च कुरुते लोकस्यानुग्रहं शिवः॥ ७
तस्य चिन्ताप्रभावेण न तस्य विदितं जगत्।
तज्ज्ञतया सम्प्रवक्ष्यामि पुराणं शिवभाषितम्॥ ८
नैमिषस्याश्रमपदे पुण्ये पूर्व्वं मयोदिते।
पराशरस्य दायादः श्रीमान् सत्यवतीसुतः॥ ९

ब्रह्मर्षिः स च धर्म्मात्मा कालयोगविदां वरः।
गुरुर्लोकस्य धर्म्मात्मा ब्रह्मचारी तपोनिधिः॥ १०
ऋषिसङ्घैः परिवृतः सुतैरिव पितामहः।
भारते शतसाहस्रां संहितायां कवीश्वरः॥ ११
देवो यो ब्रह्मणा प्रोक्तं ब्रह्मैव पुनरन्यथा।
चतुर्द्धा व्यस्य मतिमान् शिष्यांश्चाध्यापयत् पृथक्॥ १२
तेषां सुखोपविष्टानां कथां कथयतां परम्।
तत्र चाध्यात्मधर्म्मात्मा ब्रह्मणस्तनयः शुभः॥ १३
अनुग्रहार्थमृषीणां दर्शनं कृतवानृषिः।
स ददर्श सुखासीनान् ब्रह्मर्षीनमितौजसः॥ १४
प्रतिजग्राह विधिवत् स चापि मुनिपुङ्गवः।
अर्घ्यमाचमनीयञ्च तेषां दत्तञ्च धर्म्मवित्॥ १५
ततः सम्पूजयामास ब्रह्मर्षीन् संशितव्रतान्।
विधिना ब्रह्मणोक्तेन भगवान् ब्रह्मणः सुतः॥ १६
अनुज्ञातश्च तैः सर्व्वैरुपविष्टः कुशासने।
पृष्टस्तु ऋषिभिस्तत्र ब्रह्मपुत्रो महामुनिः॥ १७
लिङ्गार्च्चनविधिञ्चैव देवदेवस्य पूजनम्।
प्रासादस्य च यत् पुण्यं देवदेवस्य धीमतः॥ १८

संवत्सरस्य यत् पूजां शिवस्य परमं फलम्।
आवर्त्तकविधिञ्चैव पुनरावर्त्तकं तथा ॥ १९
मूर्त्तीनान्तु विभागस्य मन्त्रस्य परमं विधिम्।
स्थानानि ह्यष्टावस्यापि रुद्रस्य तु महात्मनः ॥ २०
उपविष्टेषु भगवान् योगीशो ब्रह्मणः सुतः।
तपोवेशानुरूपेषु आसनेषु यथायथम् ॥ २१
सनत्कुमारस्तैः सर्व्वैर्दिवाकरसमप्रभैः।
विराजत्यधिकं ब्रह्मा तैश्च ब्रह्मर्षिभिः सदा ॥ २२
सतां मध्ये च धर्म्मात्मा भगवान् सूक्ष्मयोगवित्।
कृताञ्जलिपुटाः सर्व्वे ऋषयस्तमथाब्रुवन् ॥ २३

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः।

ऋषय ऊचुः।

त्वत्तश्च श्रोतुमिच्छामस्त्वत्र पुण्यं सनातनम्।
शैवं पुराणं देवस्य यद्वृत्तं तद्ब्रवीहि नः ॥ १
न हि किञ्चिदविदितं त्रैलोक्ये ज्ञानवानसि।
स एवमुक्तस्तैर्विप्रैर्ब्रह्मपुत्त्रोऽब्रवीत् तदा ॥ २

सनत्कुमार उवाच।

शैवं पुराणं भवतः शृणुध्वं द्विजसत्तमाः।
मयोच्यमानं तत्त्वेन देवगुह्यं सनातनम् ॥ ३
यच्छ्रुत्वा निर्म्मलाः सन्तस्तच्चित्तास्तत्परायणाः।
भवन्ति भावितात्मानः कृतकृत्या विशेषतः ॥ ४
धन्यं यशस्यमायुष्यं स्वर्ग्यमारोग्यमेव च।
स्वर्गकामप्रदं पुण्यं पुराणं वेदसम्मितम् ॥ ५
कीर्त्तनं देवदेवस्य हरस्य परमं शिवम्।
पावनं श्रद्दधानानामिह लोके परत्र च ॥ ६
प्रकृत्यार्थाधिकारेण प्रधानपुरुषेश्वरम्।
कीर्त्तयिष्यामि वो विप्राः पुराणं शिवभाषितम् ॥ ७
श्रुतं पुरा मया व्यासाद्देवदेवस्य धीमतः।
यदहं तत् प्रवक्ष्यामि यथा पूर्व्वं श्रुतं मया ॥ ८
न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि।
संक्षेपाच्चैव वक्ष्यामि पृथिव्यादि यथा तथा ॥ ९
ब्रह्म-विष्णुसमुत्पत्तिं संवादं हरि-ब्रह्मणोः।
सप्तद्वीपस्य चाख्यानं वर्षाणाञ्च तथैव च।
अधस्तादथ चोर्द्ध्वञ्च चन्द्रसूर्य्यग्रहादि च।
सनत्कुमारविक्रान्तं रुद्रस्य विहितं कृतम्।
आराधितं महादेवं ब्रह्मणस्तनयेन तु।
वरदानेन सम्बन्धो मुनिशिष्यसमागमः ॥
भवनं मेरुशृङ्गस्य ब्रह्म-विष्णु-महेश्वरान्।
विभीषणस्य संवादं रुद्रस्य च महात्मनः।
सर्व्वतीर्थफलं पुण्यं शिवलिङ्गस्य पूजनम्।
शिवलिङ्गसमुत्पत्तिं लिङ्गे प्रलयमेव च ॥
लिङ्गार्च्चनविधिञ्चैव देवस्य पूजनं तथा।
प्रासादस्य च यत् पुण्यं महादेवस्य धीमः
संवत्सरस्य यत् सूक्ष्मं शिवस्य परमं फल
आवर्त्तनविधिञ्चैव पुनरावर्त्तिकं तथा ॥
मूर्त्तीनां प्रविभागेन रुद्रस्य परमं विधि
स्थानादिज्यैष्ठ्यमस्यापि रूपस्य तु महात्म
शिवस्य परमं दिव्यं तत्त्वञ्च परमात्मनः।
देवस्य च पवित्रन्तु गुह्यञ्चैव तथाष्टकम्।
लिङ्गोद्भवञ्च देवस्य ब्रह्म-विष्ण्वोश्च मो
लिङ्गसंस्थापने पुण्यं पुष्पदानस्य यत्
धूपस्य च विधिञ्चैव मासानाञ्च परं फल
अनाशकविधिञ्चैव दानस्य विधिमुत्तम
चतुर्द्दश्यामथाष्टम्यां विधाने विहिते
नामाष्टमीविधानञ्च तथा वैलक्षणाष्टमी
विभूतिं देवदेवस्य ईश्वरस्य च धीमतः।
शौचाचारविधिं प्रोक्तं योगस्य विधिमु
योगनाड्यास्तथाख्यानं मया प्रोक्तं पुरा
अविमुक्तस्य माहात्म्यं तथा चोङ्कारव
यज्ञेश्वरस्य माहात्म्यं तथा तीर्थानुव
भगवदाराधनं नन्देस्तथा नन्द्यभिषेच
नीलकण्ठस्य माहात्म्यं त्रिपुरस्य तथा
वासुदेवस्य माहात्म्यं विधानञ्चैव तस्य
सर्व्वधर्म्मं हरस्यापि महादेवस्य कीर्त्त
ज्ञानप्रशंसनञ्चैव मोक्षं परमसम्पदम् ॥
इति संग्रहणं प्रोक्तं तथा वस्तुपरिग्रह
इदानीं विस्तरं चित्रं विभागं रूपमेव
आसीत् तमोमयं सर्व्वमप्रज्ञातमलक्ष

तत्र रक्तो महायोगी रुद्रः परमकारणम् ॥ २८
आत्मना सर्व्वमात्मानं सञ्चिन्त्य भगवान् हरः।
मनः संसृजते पूर्व्वमहङ्कारन्तु पृष्ठतः ॥ २९
अहङ्कारात् प्रजातानि महाभूतानि पञ्च च।
अष्टौ प्रकृतयः प्रोक्ता विकाराश्चैव षोड़श ॥ ३०
शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च।
प्राणोऽपानः समानश्च उदानो व्यान एव च ॥ ३१
सत्त्वं रजस्तमश्चैव गुणाः प्रोक्तास्तु ते त्रयः।
तस्माद्भगवतो ब्रह्मा तस्माद्विष्णुरजायत ॥ ३२
ब्रह्म-विष्ण्वोर्मोहनार्थं ततः सम्भवति महान्।
अशरीरो महादेवो अनुत्पत्तिरयोनिजः ॥ ३३
व्यामोहयित्वा तत् सर्व्वं तेजसा मोहितं जगत्।
तस्मात् परतरं नास्ति नास्ति तस्मात् परं शिवम्॥३४
ब्रह्मा विष्णुश्च द्वावेतावुद्भूतौ शङ्करात् तु तौ।
कल्पे कल्पे तु तत् सर्व्वं सृजतो मोहयन् जगत् ॥३५
तपसा हरते (क) चैव नानाभूतानि सर्व्वशः।
एकसप्ततियुगान्येव मन्वन्तर इति स्मृतः ॥ ३६
चतुर्द्दश तु तान्येव कल्पमेकं विधीयते।
दिनैकं ब्रह्मणः प्रोक्तं निशा कल्पस्तथोच्यते ॥ ३७
एवं मासञ्च वर्षञ्च तथा वर्षशतं द्विजाः।
एवमादिपरार्द्धान्तो हरस्य निमिषः स्मृतः ॥ ३८
ब्रह्मादिस्तम्बपर्य्यन्तं निमिषश्च महेश्वरः।
निमिषं जीवितं सर्व्वं चन्द्रादीनां ग्रहैः सह ॥ ३९
निमिषार्द्धं प्रसुप्तस्य दैवतैर्ऋषिभिः सह।
एवं विश्वमिदं सर्व्वं सप्तलोकं चराचरम् ॥ ४०
भूर्लोकोऽथ भुवर्लोकः स्वर्लोकश्च महस्तथा।
जनस्तपश्च सत्यञ्च ब्रह्मलोकश्च सप्तमः ॥ ४१
पातालं सुतलं तालं वितलं तलमेव च।
पञ्चमं विद्धि पातालं रुक्मसौवर्णिकं स्मृतम् ॥ ४२
सप्तमं शर्कराभूमिरष्टमं विजयं स्मृतम्।
तेषु धर्म्मप्रख्याता अष्टौ पातालवासिनः ॥ ४३
एषामादौ च मध्ये च अन्ते रुद्रः प्रकीर्त्तितः।
एवं प्रकुरुते लोकान् क्रीड़ार्थन्तु महेश्वरः ॥ ४४
ब्रह्मलोकपरीमाणगतिरूर्द्ध्वं विवर्णिता।
पृथिवी चान्तरिक्षञ्च दिशश्च विदिशस्तथा ॥ ४५

समुच्चयं गिरीणाञ्च अनुक्रमणसंख्यया।
समुद्राणाञ्च विस्तारं प्रमाणञ्च तथा शृणु ॥ ४६
स्थावराणां चराणाञ्च देवानाञ्च दिवौकसाम्।
चतुष्पादद्विपादानां धार्म्मिकान् कर्म्ममोक्षकान् ॥४७
सहस्रगुणमाख्यातं स्थावराणां प्रकीर्त्तितम्।
सहस्रं पादहीनाश्च इत्याह भगवान् शिवः ॥ ४८
महेश्वरः परस्तेषां सर्व्वेषां देवमानुषात्।
एवं संख्यात्र संख्याता सर्व्वज्ञेन स्वयम्भुवा ॥ ४९
एषां माहेश्वरं ज्ञानं भक्तिमन्त्रैः प्रकीर्त्तितम्।
सर्व्वकर्म्मसु वर्त्तन्ते यतस्तु शिवमव्ययम् ॥ ५०
एकं ज्ञानं नमस्यन्ति अभूतं भूतसंज्ञकम्।
निर्गुणं निर्म्मलं ज्ञानं शङ्करेण प्रचोदितम् ॥ ५१
ऋषीणां श्रोतुकामानां भक्तानाञ्च दृढ़व्रत।
आवितं ज्ञानसर्व्वस्वं पुराणेषु च गीयते ॥ ५२
ततो ज्ञानं परं श्रेष्ठं प्रोक्तमीशेन धीमता।
ब्राह्मणानां हितार्थाय सर्व्ववर्णे विशेषतः ॥ ५३
यथा सम्भवति ज्ञानं तथा ईशः प्रवर्त्तते।
अहमादिश्च मध्यञ्च अहश्चान्ते च संस्थितः ॥ ५४
क्रीड़ार्थमीहते व्यास उत्पन्नमतिरव्ययः।
एक एव शिवस्तत्र तस्मात् कालो यथाभवत् ॥ ५५
काल एव हि तत् सर्व्वं कालादन्यो न विद्यते।
ततः कालो हि भगवान् सोऽभिध्याय शिवाज्ञया॥५६
सृष्टिन्तु प्रथमं कुर्व्वन् प्रकृतिं नाम नामतः।
तस्माद्ब्रह्मा प्रकृत्यास्तु उत्पन्नः सह विष्णुना ॥ ५७
ततः स्वमुखतो ब्रह्मा ब्राह्मणान् समकल्पयत्।
पादहीनान् क्षत्रियांश्च तस्माद्धीनांस्तु वैश्यकान्॥५८
चतुर्थपादहीनांश्च शाचारैश्च वहिष्कृतान्।
समुद्रान् पर्व्वतान् ब्रह्मा चोद्यमानः शिवेन वै ॥ ५९
पृथिवीञ्चान्तरिक्षञ्च दिशश्चैवमकल्पयत्।
लोकालोकस्य संस्थानं द्विपदासुदधेस्तथा ॥ ६०
सरितां सागराणाञ्च तीर्थान्यायतनानि च।
विद्युत्स्तनितनिर्घोष-रोहितेन्द्रधनूंषि च ॥ ६१
उल्कानिपातं केतुञ्च ज्योतिषां पतनान्यपि।
सस्वेदजसहस्राणि यूकमक्षिकमत्कुणान् ॥ ६२
एवं सर्व्वार्थस्रष्टा वै चोद्यमानः शिवेन वै।
उत्पन्नञ्चैव तत् सर्व्वं भूयः कालेन प्रोज्यते ॥ ६३

(क) उपसंहरते इति पाठः क्वाचित्कः।

व्यास उवाच ।

कथं ब्रह्मा समुत्पन्नः कथं सृष्टिः प्रवर्त्तते ।
कथं भूमिधरो देवः कथं ब्रह्मत्वमागतः ॥ ६४

सनत्कुमार उवाच ।

आसीत् तमोमयञ्चैवन्न प्राज्ञायत किञ्चन ।
ततः शिवो महादेवो योगदृक् स तु सर्व्वशः ॥ ६५
क्रीड़ार्थमभियुक्तश्च तेजो गुह्यमकल्पयत् ।
तत् तेजो वह्निमाधत्त आत्मना चैव संस्थितम् ॥ ६६
तस्मात् पृथ्वीत्वमापन्नं तस्मादापस्ततो भुवः ।
तस्मात् कालत्वमापन्नो यस्य भासा तु बोध्यते ॥ ६७
तत् तमो दारयामास आपो भूत्वा तु शङ्करः ।
तस्मात् तु तेजसा चैव वायुना च सदा क्षिपन् ॥ ६८
तस्मादण्डसमुत्पत्तिस्ततो नारायणः स्मृतः ।
अपाञ्चाग्नेश्च संयोगादग्निस्तेजश्च सम्भवः ॥ ६९
वायोरपि विकुर्व्वाणादाकाशमभवत् तदा ।
सङ्घातश्चाभवत् पृथ्वी एषा माहेश्वरी तनुः ॥ ७०
अत्र प्रविश्य हि जलं निमिषार्द्धप्रमाणतः ।
ततो ब्रह्मा समुत्पन्नो अग्निर्नारायणः स्मृतः ॥ ७१
ततोऽण्डमभवद्धैमं सहस्रादित्यसम्प्रभम् ।
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरान् ॥ ७२
ततो वै ब्राह्मणो जज्ञे काले कालेन चोदितः ।
अथ व्योम दिशश्चाष्टौ अपां स्थानञ्च शाश्वतम् ॥ ७३
ततः स कालमध्ये तु सोऽथ सृष्टिमथाकरोत् ॥ ७४

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

सनत्कुमार उवाच ।

अव्यक्तं महदुत्पन्नं ब्रह्माण्डममितौजसम् ।
महतस्तु ततो ब्रह्मा तस्माद्ब्रह्माण्डतां गतः ॥ १
समुद्रास्तस्य रुधिरमाकाशमुदरं तथा ।
पवनश्चैव निश्वासस्तेजोऽग्निर्निम्नगा रसः ॥ २
आकाशतमसी श्रोत्रे चन्द्राकौं नयनौ स्मृतौ ।
ऊरू चैवाभवन्मेरुर्वचस्तस्य तु मेदिनी ॥ ३
पृथिव्यन्ते समुद्राश्च समुद्रान्ते तमः स्मृतम् ।
तमसोऽन्तेऽग्निरुत्पन्नो जलं प्राङ्मनीषिणः
रसातलान्ते सलिलं तस्यान्ते पन्नगाधिप
तदन्ते पुनराकाशं तस्याप्यन्ते पुनर्जलम् ।
जलस्यान्ते तमः प्राहुस्तमसोऽन्तेऽग्निरेव
तेजसोऽन्ते तदा पृथ्वी पृथ्वी सप्तभिरावृ
अण्डस्य धारणात् सद्म महतश्च महात्म
एवं ब्रह्माण्डमित्युक्तं महाधारणमुच्यते ।
यो यथा यस्य योनित्वे तं प्रवक्ष्याम्यशे
आपो नरेण वै सृष्टा आपो वै नरसूनवः
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृ
द्वावेतौ पुरुषौ लोके चरश्चाचर एव च ।
कल्पे कल्पे तथातीते युगसाहस्रसंख्यया ।
तदा लोकास्ततो जीवाः सत्त्वाः पञ्चात्मक
जरायुजाण्डजोद्भिज्जाः स्वेदजाश्च चतुर्वि
अष्टविधा देवयोनिर्मानुषास्त्वेकविधया ।
मानुष्यञ्चैकविधन्तु चातुर्व्वर्ण्यमनेकधा ।
पृथिवी चान्तरीक्षञ्च त्रिदिवं भुवनं स्मृ
पृथिव्यास्तु परीमाणे भूयस्तुल्यो विधि
समुद्राः सरितश्चैव सचराचरमेव च ॥
एकञ्च दिव्यं भुवनं त्रिधा देवैरुपास्यते ।
एकन्तु कोट्या विख्यातमेवं त्रिभुवनं मत
रुद्राणां कोटिरेका तु पुरे चान्तर्व्यवस्थि
ब्रह्मा विष्णुश्च द्वावेतौ उपासाते महेश
पृथिव्यादिप्रसंख्यानं तपसा समुदाहृतम् ।
तदिदं संप्रवक्ष्यामि पुरुषान् लोकविश्रुत
शिवक्रीड़नसंस्थानं शिवेन परिकल्पितम्
तत्र तत्र महेशस्य लिङ्गार्च्चनमनुत्तमम् ।
कामाराधनकं शम्भोः पूजनं द्वीपवासि
सार्द्धपञ्चाशीतिशत-योजनादिविशारिषु ।
जम्बूद्वीपादिद्वीपेषु मया व्याप्तमिदं द्वि
जम्बूद्वीपे महादेवो गोमेदे गिरिजेश्वर
शाल्मलिद्वीपमध्यस्थो देवः पशुपतिः स्व
कुशद्वीपे हरो भूत्वा क्रौञ्चे प्रोक्तो वृषध्व
शाके शङ्करनामायं पुष्करे भाललोचन
तत्र तत्र महादेवं पूजयन्तः स्थिरान् व
भोगान् महौषधीस्तेभ्यः प्राप्नुवन्ति हि

म्बूद्वीपश्च गोमेदः शाल्मलिश्च कुशस्तथा ॥ २२
ञ्चद्वीपस्तथा शाकः पुष्करः सप्तमः स्मृतः ।
तः परं प्रवच्चामि द्वीपानान्तु पृथक् पृथक् ॥ २३
माणञ्च संख्याञ्च द्वीपप्रवरसेव च ।
म्बूद्वीपे जम्बुवृक्षो योजनैस्तं निबोधत ॥ २४
हस्रं शतमेकञ्च योजनानां समुच्छ्रितः ।
य जम्बूफलरसश्चामृतस्वादुरुच्यते ॥ २५
णाद्दायतो द्वीपो द्विगुणः परिणाहतः ।
गुणेन समुद्रेण लवणेन समावृतः ॥ २६
य वर्षाणि सप्तेह कामगाश्च यथार्हतः ।
रतस्य तु वर्षस्य नव भेदाः प्रकीर्त्तिताः ॥ २७
न वर्गाः प्रसंख्याताः सप्तैव कुलपर्व्वताः ।
थमस्य तु वर्षस्य प्राक्प्रतीच्यां निबोधत ॥ २८
क्षणेन विसंख्यातमिलावृतं प्रकीर्त्तितम् ।
रं दक्षिणञ्चैव इन्द्रधन्वाकृतिर्यथा ॥ २९
वारो द्रोणसंस्थानां वर्षाणाञ्च प्रमाणतः ।
रवो हिमवांश्चैव रम्यः क्रौञ्चो भवस्तथा ॥ ३०
रिवर्षः किम्पुरुषो भारतं दक्षिणेन तु ।
र्वेण माल्यवांश्चैव पश्चिमे गन्धमादनः ॥ ३१
तुरस्रं ततो द्वारं मध्यमं परिमण्डलम् ।
लः पर्व्वतराजश्च श्वेतः शुक्लो महागिरिः ॥ ३२
श्चादुत्तरतः पार्श्वे समन्तात् समुपोत्थितौ ।
हस्राणां प्रसंख्यानं कालज्ञानविशारदैः ॥ ३३
स्मिन् जम्बूदकेऽप्येव कनकं देवभूषणम् ।
स्य जम्बूत्तरे पार्श्वे मेरुर्नाम महागिरिः ॥ ३४
यं प्रदक्षिणं कृत्वा जम्बूमूले विशेत् पुनः ।
स्य द्वीपस्य मध्ये तु कर्णिकेव विराजते ॥ ३५
जनानां सहस्राणि चतुरशीतिरुच्छ्रयः ।
धस्ताद्दश सहस्राणि षड्विंशश्चैव पार्श्वतः ॥ ३६
यं प्रदक्षिणं कृत्वा कैलासाख्यस्ततो गिरिः ।
तुरशीतिस्ततो व्यासो गिरीन्द्रस्य महात्मनः ॥ ३७
स्य सानुषु चित्रेषु कन्दरेषु दरीषु च ।
तत्र सूर्य्यस्तपति न चन्द्रो नैव तारकाः ॥ ३८
च वर्षति पर्ज्जन्यो गिरेस्तस्य प्रभावतः ।
वायान्ति जितक्रोधा जितलोभा जितेन्द्रियाः ॥ ३९
द्रे निरुद्धहृदया रुद्रसक्ता जितक्लमाः ।

ये गृहस्थाः स्वधर्मज्ञा गो-ब्राह्मणहिते रताः ॥ ४०
ते यान्ति परमं स्थानं प्रसादात् परमेष्ठिनः ।
शतं शतसहस्राणि योजनानां समन्ततः ॥ ४१
नीलश्च निषधश्चैव हेमकूटश्च पर्व्वतः ।
हिमवान् दक्षिणे पार्श्वे तावत् परमुच्छ्रितः ॥ ४२
पञ्चविंशत्सहस्राणि विस्तरेण सदोच्यते ।
तथैव वृक्षसिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ॥ ४३
नलिनी ह्रदिनी चैव प्लावनी चैव पूर्व्वगाः ।
गङ्गा या तु समं तासां जम्बूद्वीपसरिद्वरा ॥ ४४
तस्यां नद्युपनद्यश्च शतशोऽथ सहस्रशः ।
गङ्गासमानरूपाश्च पुण्यतीर्थशिलोच्चयाः ॥ ४५
देवतीर्थाः सुपुण्याश्च पृथिव्यामनुकीर्त्तिताः ।
जम्बूद्वीपः प्रसंख्यातो याथातथ्येन वै द्विजाः ॥ ४६
शक्यामितरद्वीपानां शेषं प्रामाण्यतः शृणु ।
जम्बूद्वीपप्रमाणेन द्विगुणान्तरतः स्मृतः ॥ ४७
उत्तरेण स्मृताः सर्व्वे अन्तरे स्वर्गवासिनः ।
द्वीपाद्द्वीपसमानस्य नामधेयानि सर्व्वशः ॥ ४८
क्षार इक्षुः सुरा सर्पिर्दध्योदा नाम नामतः ।
मण्डोदश्च प्रसंख्यातस्ततः स्वादूदकोत्तरः ॥ ४९
द्वीपानान्तु सहस्राणि अविज्ञातानि तानि तु ।
सप्तैव तु समासेन व्याख्यातानि मया द्विजाः ॥ ५०
अपि वर्षशतैर्विप्रा न शक्यं कथितुं मया ।
प्लक्षद्वीपे प्लक्षवृक्षः शाल्मले शाल्मलिः स्मृतः ॥ ५१
कुशद्वीपे कुशस्तम्बः क्रौञ्चद्वीपे महागिरिः ।
शाकद्वीपे शाकवृक्षः पुष्करे पुष्करः स्मृतः ॥ ५२
जम्बूवृक्षप्रमाणेन द्विगुणोत्तरतः स्मृताः ।
सर्व्वेषामेव वृक्षाणाममृतस्वाद उच्यते ॥ ५३
तन्तु पीत्वामृतरसं दीर्घायुष्टञ्च गच्छति ।
न तत्र रोगो न जरा न शोको न परिश्रमः ॥ ५४
समञ्चैव तु जायन्ते समेन म्रियते तथा ।
नान्यं प्रियं विजानन्ति चक्रवाकसधर्म्मिणः ॥ ५५
सर्व्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका ।
सर्व्वकालफला वृक्षाः स्वस्वगन्धफलाश्रयाः ॥ ५६
सर्व्वेषाञ्चैव द्वीपानां सप्तानां कुलपर्व्वताः ।
सप्तैव नद्यस्तेषान्तु सप्तैव कल्पिताः शुभाः ॥ ५७
तासां नद्युपनद्यस्तु शतशोऽथ सहस्रशः ।

तेषां पर्व्वतराजानं परिवार्य्य समन्ततः ॥ ५८
रञ्जिताः शृङ्गवन्तश्च शोभन्ते गिरयस्तथा ।
ततः सिद्धाश्च ऋषयो गन्धर्व्वा दानवाः खगाः ॥ ५९
विद्याधरोरगा यक्षा रमन्ते तत्र तत्र च ।
न च वर्षति पर्ज्जन्यो न च कालस्य पर्य्ययः ॥ ६०
महाकल्पे तु दह्यन्ते इत्याह भगवान् शिवः ।
तेषां पर्व्वतजालानि दीप्यन्ति प्रभया स्वया ॥ ६१
वृताः पर्व्वतराजानं परिवार्य्य समन्ततः ।
षष्टिं गिरिसहस्राणि एते तस्य समं तदा ॥ ६२
तेभ्यः सहस्रशश्चान्ये परिसंख्या न विद्यते ।
तत्र ते पुरुषा दिव्याः शुक्लदन्ताः प्रियंवदाः ॥ ६३
तेषां न दुःखं न ग्लानिर्न कश्चित् परिबाधते ।
तेषु द्वीपेषु जायन्ते पुरुषास्ते तपोधनाः ॥ ६४
दीर्घायुष्यं व्रतं तेषां विद्यते कामगा गतिः ।
जम्बूद्वीपस्य पर्य्यायं कथयिष्यामि वै द्विजाः ॥ ६५
कृतं त्रेता द्वापरश्च कलिश्चैव चतुर्य्युगम् ।
मानुषाणाञ्च वर्षाणां युगानाञ्चैव संख्यया ॥ ६६
कीर्त्तयिष्यामि वो विप्राः पुराणे यद्विभाव्यते ।
लक्षाः सप्तदश प्रोक्ता अयुते द्वे तथैव च ॥ ६७
अष्टवर्षसहस्रान्तकालं कृतयुगं विदुः ।
लक्षा द्वादश वै प्रोक्ताः षट्सहस्राणि वत्सराः ॥ ६८
त्रेतायुगस्य प्रामाण्यं पुराणे परिकीर्त्तितम् ।
अष्टवर्षसहस्रान्ता लक्षाश्चाष्टौ प्रकीर्त्तिताः ॥ ६९
द्वापरेति युगञ्चैव पुराणे परिकीर्त्तितम् ।
लक्षाश्चाष्टौ च लक्षौ द्वौ अयुते द्वे तथैव च ॥ ७०
अष्टवर्षसहस्रान्ते कालः कलियुगी,स्मृतः ।
द्वासप्ततियुगान्तेन मन्वन्तरमिति स्मृतम् ॥ ७१
चतुर्द्दश तु तान्येव कल्पमेकं विधीयते ।
दिनैकं ब्रह्मणः प्रोक्तं तथा निशि कलोच्यते ॥ ७२
एवमादि च वर्षञ्च तथा वर्षशतं द्विजाः ।
एवमायुर्जितेन्द्रस्य हरस्य निमिषः स्मृतः ॥ ७३
ब्रह्मादिस्तम्बपर्य्यन्तं निमिषोत्पत्तिरीश्वरः ।
निमेषजीविनः सर्व्वे चन्द्रादित्यौ ग्रहैः सह ॥ ७४
महाकल्पञ्च विख्यातं शिवस्य निमिषस्तथा ।
द्वीपानाञ्चैव वर्षाणां कथयामि समासतः ॥ ७५
अन्येषाञ्चैव द्वीपानां विविधा विहिता गतिः ।
भारतस्य तु वर्षस्य नव भेदाः प्रकीर्त्तिताः ।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णी गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्व्वश्चारणस्तथा ।
अयन्तु नवमस्तेषां द्वीपः सागरसङ्गतः ।
स्वादूदको नाम नाम्ना सागरोत्तरतो महान् ।
तस्य चाद्या परा पृथ्वी द्विगुणेन प्रमाणतः ।
तस्मात् परश्च वै लोको लोकालोकश्च नामतः ।
लोकान् बिभर्ति,तल्लोकप्रमाणं लोकविस्तरात् ।
मनसा सिद्धिसम्पन्ना नीरोगाश्चिरजीविनः ।
प्राकारस्त्रितयश्चैव सौवर्णाश्च महार्णवाः ।
लोकेशाश्चैव चत्वारो लोकालोके स्थितास्तथा ।
एवं स भुवि विस्तारस्त्रिगुणः परिमाणतः ।

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
सप्तद्वीपवर्णनं नाम तृतीयोऽध्यायः ॥ ३

चतुर्थोऽध्यायः ।

सनत्कुमार उवाच ।

पृथिव्यास्तु मयाख्यातो विस्तारो दीर्घता ।
अधस्तादूर्द्ध्वत् प्रवक्ष्यामि पातालतलवासिनः ।
तत्र भोगवती रम्या नानारत्नोपशोभिता ।
सर्व्वे च नागराजानो विभ्रमन्ते मुदान्विताः ।
तत्र सिद्धा मुनिगणा भरताद्याः प्रकीर्त्तिताः ।
वासुकिस्तक्षकश्चैव कर्कोटक-धनञ्जयौ ॥
कालियः पवनो नाम नागः पूरण एव च ।
मणिमालश्चैव भद्रो नागश्चैवाथ कौशिकः ।
वसुश्च बन्धुमारश्च कम्बलाश्वतरावुभौ ।
तित्तिरिर्हैरिभद्रश्च जम्बुभद्रो बलाहकः ।
करवीर-पुण्डरीकौ संवृतोऽथ महोरगः ।
ये चान्ये नागपतयो अनन्ताद्याः प्रकीर्त्तिताः ।
पुरी भोगवती रम्या नानारत्नोपशोभिता ।
विचित्राभिः पताकाभिर्विमानैश्च सहस्रशः ।
दोलालम्बितवासाश्च मुक्तादामैरलङ्कृताः ।
हास्यनाट्यविचित्राभिर्गानवादित्रनिस्वनैः ।
सर्व्वकामप्रसिद्धार्थैः स्त्रियश्चाप्सरसोपमाः ।
नैव तेषां भवेद्ग्लानिर्न शोको न जरा ॥

ईर्ष्यायाश्च भयं नास्ति सर्व्वकामहिते रताः।
पुष्टिदानस्य रहिताः सर्व्वकामेषु पूजिताः॥ १०
तत्र भोगवती रम्या प्रभालोकादिभिश्यते।
तत्र स्तम्भसहस्राणि सौवर्णानि समन्ततः॥ ११
वज्रवैदूर्य्यकल्पानि महारत्नानि शोभिता।
इन्द्रनील-महानीलैः सर्व्वतश्चाभिमण्डिता॥ १२
सर्व्वकालफला नद्यः सर्व्वपायसकर्द्दमाः।
कुल्याश्च घृतसम्पूर्णाः सदा वृक्षोपशोभिताः॥ १३
अन्नपर्व्वतकूटाश्च शङ्खकुन्देन्दुपाण्डुराः।
कल्पिता ब्रह्मणा पूर्णाः शङ्करस्याज्ञया पुरा॥ १४
पयसा नित्यपूर्णानि भाजनानि समन्ततः।
मधुकुल्याश्च संन्यस्ता रक्तदन्तातिशोभिताः॥ १५
प्रियंवदास्तथा चान्या भार्य्या यौवनसम्पदः।
युक्ता भुक्ताः प्रियैस्तत्र योनिस्तासां न च क्षता॥१६
प्रसूतायास्तु कन्याया यौवनं नापि क्षीयते।
परस्त्रियो न जानन्ति स्वदारनिरताः सदा॥ १७
इष्टभुक्स्वजनाकीर्णा नागलोके प्रकीर्त्तिताः।
ऊर्द्ध्वं तिर्य्यग्गतिः ख्याता तासां तेषामनेकशः॥ १८
नागलोकस्य विस्तारं द्विगुणं परिकीर्त्तितम्।
एकदेशप्रमाणेन मयाख्यातं यथा तथा॥ १९
योजनैः कोटिरेका तु नागलोकः प्रकीर्त्तितः।
ऊर्द्ध्वं तिर्य्यक् प्रसंख्यातं चतुरस्रं तथा द्विजाः॥ २०
अनन्तरं प्रवक्ष्यामि हिरण्यपुरवासिनाम्।
तत्रापि कोटिः संख्याता योजनैः परिमाणतः॥ २१
तत्रासन् सफला वृक्षाः पुष्पैश्चैव सुगन्धिनः।
नानात्रिचित्रनिर्घोष-निस्वनैः पूर्णकन्दरैः॥ २२
यौवनस्थाः स्त्रियस्तत्र सुकुमाराः प्रियंवदाः।
पुरुषा रूपसम्पन्नाः स्वदारनिरतेन्द्रियाः॥ २३
सौवर्णाश्च गृहास्तत्र मानशुभ्रैर्विभूषिताः।
विमानचारिणः सर्व्वे सर्व्वे च स्थितयौवनाः॥ २४
प्रचलप्रतिमास्तत्र स्त्रियश्चाप्सरसोपमाः।
कुन्ददन्ताम्बरधराश्चन्द्रांशुविमलप्रभाः॥ २५
मनोरमाः सुसिद्धार्थाश्चक्रवाकसधर्म्मिणः।
नोद्वेगो न च कोपस्तु ईर्ष्यासूयाविवर्ज्जिताः॥ २६
तोरणैश्च सुसम्पन्नैर्मणि-मौक्तिकमालिभिः।
सर्व्वैर्वैड्र्मयैः सिद्धैर्मोदन्ते प्रमदैः सह॥ २७

वर्षैरनेकैः संख्याता गुणास्तस्मिन् परोत्तमे।
दैत्यास्तत्र वसन्त्येते प्रह्लादाद्याः प्रकीर्त्तिताः॥ २८
तेषां प्रसादाज्जीवन्ति सर्व्वलोका न संशयः।
ब्रह्माद्या देवताः सर्व्वा धार्य्यन्ते समनन्तरम्॥ २९
परापराणां लोकानां धारणैर्लोकधारणैः।
सर्व्वानिमान् धारयति सुरभिर्नाम नामतः॥ ३०
पृथ्वीं धारयति सर्व्वां सुधन्वा नाम नामतः।
सर्व्वाङ्गश्च सुसर्व्वाङ्गः सुलभा चोत्तरां दिशम्॥ ३१
दक्षिणां चषका नाम धारयन्ति दिशं सदा।
तेषां प्रसादाज्जीवन्ति ब्रह्माद्याखिलदिवौकसः॥ ३२
तस्मिन् दिव्यानि वेश्मानि चित्राणि च लघूनि च।
पताकाध्वजचित्राणि प्रासादानाञ्च पङ्क्तयः॥ ३३
सर्व्वकामफला वृक्षा रम्याश्चित्राश्च पादपाः।
स्वर्गादतितरां रम्या सुखस्पर्शा जलाशयाः॥ ३४
काम्या नाम पुरी ह्येषा सदा सम्पूर्णमानसा।
ब्रह्मणा विहिता पूर्व्वं कामरूपगुणान्विता॥ ३५
पायसैन च पूर्णानि भाजनानि सहस्रशः।
सर्व्वे चव सुखस्पर्शाश्चारणस्यापि वेश्मनि॥ ३६
असुरस्यापि विप्रेन्द्रशोभिता लघवोऽपि च।
प्रासादपङ्क्तयो भान्ति शरदीव छदाः शुभाः॥ ३७
अमृतानि च कुण्डानि दिशो दिव्याः प्रकीर्त्तिताः।
पायसैन च पूर्णानि भाजनानि सहस्रशः॥ ३८
संन्यस्तानि च दृश्यन्ते अम्बु दिव्यामृतोपमम्।
भक्ता नानाविधास्तत्र भूषणाः पूर्णकल्पिताः॥ ३९
अपि वर्षशतैर्विप्रा गुणास्तस्मिन् सुरोत्तमैः।
न शक्या नाममात्रेण आख्यातुं सुसमाहितैः॥ ४०
उद्देशमात्रं कथिताः पातालेऽस्मिन् गुणा मया।
तेषां वक्ष्यामि वै विप्रा नाग-पातालवासिनाम्॥ ४१
चित्रा विचित्राः कुर्व्वाणाः सद्मानि च गृहाणि च।
दृश्यन्ते तानि नित्यं हि अव्यक्ताव्यक्तसंस्थिताः॥ ४२
पुरी गुह्या अनन्तस्य पाताले परिकीर्त्तिता।
गुणाः संख्यानरहितास्तस्मिन् पुरवरे तदा॥ ४३
यथा ब्राह्मी च विष्णोश्च पुरीन्द्रस्य तु तत्त्वतः।
अनन्तस्याप्यनन्तस्य सर्व्वकामसुपूजिता॥ ४४
अतः परन्तु विप्रेन्द्र शृणुष्वैकमनाः कथाम्।
यमस्य विषयं दिव्यं मन्वन्तरमुपस्थितम्॥ ४५

नरको रौरवो बोधः शूकरो बाल एव च।
कुम्भीपाकश्च नरकस्तथा चैव गलग्रहः॥ ४६
प्रवाह्यधोमुखी चैव नदी वैतरणी यतः।
असिपत्रवनञ्चैव यमशूली भयावहा॥ ४७
भैरवाणि च रूपाणि एकपाषाणमेव च।
असितालवनं विप्रा असिपत्रवनं तथा॥ ४८
ऊर्द्धकञ्च तथा शूलं तथा वैतरणी नदी।
करम्भबालुका चैव शृङ्गाटकवनं तथा॥ ४९
अन्धकारं तमोघोरं नरको मक्षिका तथा।
नरका बहुशः प्रोक्ता यमस्य विषये स्मृताः॥ ५०
स्वेन कर्म्मविपाकेण प्राप्यन्ते च पृथक् पृथक्।
सर्व्वाधारैरनेकैश्च क्लिश्यन्ते च पुनः पुनः॥ ५१
आशीभिस्तक्षणैश्चैव क्रकचैश्चैव पाटनम्।
वैतरण्यास्तथा क्षारं शाल्मलीकर्षणं तथा॥ ५२
आदानं यन्त्रसूत्रस्य कुम्भीपाके च मर्द्दनम्।
रौरवे कूटसाक्षिणां पातनं नात्र संशयः॥ ५३
परहिंसानिविष्टानां बोधके पतनं भवेत्।
शूकरेऽथ विभेदे च तारे च नरकाधमे॥ ५४
ब्रह्मस्वहरणाच्चैव कुम्भीपाके च पातनम्।
परदत्तं स्वयं हृत्य गलग्रहं विशेन्नरः॥ ५५
वर्षाणाञ्च सहस्राणि पीड्यते च नराधमः।
वर्षाणां शतसाहस्रं पीड्यमानः पुनः पुनः॥ ५६
स्त्रीघाती पूतिमांसे च निक्षिप्तः पच्यते ध्रुवम्।
धन-धान्य-सुवर्णानि हिरण्यं वा विशेषतः॥ ५७
हृत्वा नरकमाप्नोति यमशूलं भयावहम्।
मातृघ्नः सूचिमुखेन शतं वर्षाणि पीड़नम्॥ ५८
पितृहन्ता ह्यधोमुखे पीड्यते च सुदुःखितः।
सर्पेषु वैतरण्याञ्च देवद्रव्यविनाशकः॥ ५९
पच्यते नरके घोरे वर्षाणामेकविंशतिम्।
असिपत्रवने घोरे पुरघ्नः पच्यते नरः॥ ६०
मलापहस्य मूलानि हिंस्यमानो हि मानवः।
भैरवाणि च रूपाणि घोरं परमदारुणम्॥ ६१
अधोमुखेन पतति वर्षाणाञ्च सहस्रशः।
एकपाषाणनरके मित्रभार्य्याभिलाषिणः॥ ६२
तथा चास्याभयं दत्त्वा भयमुत्पादयते पुनः।
असितालवने घोरे पच्यते नात्र संशयः॥ ६३

परस्त्रीगामिणश्चैव परद्रव्याभिलाषुकाः।
असिपत्रवने घोरे पच्यते नात्र संशयः॥ ६४
साक्षीभूतस्तु यः कश्चिन्मिथ्या सम्भाषते तथा।
ऊर्द्धपादस्तथा शूले महानरकपातने॥ ६५
जिह्वा चोत्पाट्यते तस्य हलैस्तीक्ष्णैश्च पा...
ब्राह्मणानाञ्च लिङ्गानां निन्दां यश्च करोति...
वैतरण्यां महानद्यां पच्यते स नराधमः।
शृङ्गाटकवने तीव्रे कष्यते यमशासनैः॥ ६७
हस्तच्छेदञ्च यः कुर्य्यात् स्त्रिया वा पुरुषस्य...
करम्भबालुकाश्चैव घोरं परमदारुणम्॥ ६८
गृहदाहञ्च कुर्व्वाणः पच्यते स नराधमः।
अन्धकारे महाघोरे नरके माक्षिके तथा॥...
पच्यते च महाघोरे दुःखार्णवमहालये।
वर्षाणाञ्च सहस्राणि असिभिः कल्पकोटयः...
एवं शुभप्रदञ्चैव नानारूपमवस्थितम्।
पापानामतिदूरस्थं दुर्व्वहमतिदारुणम्॥ ...
जनानां पुण्यकर्म्मणां क्षणेन गमनं प्रति।
सौम्यपथश्च शोभाश्च गमनं ध्रुववर्णितम्॥
संक्षेपान्नरकाः ख्याता दुस्तराश्च महामुने।
गर्भवासे च यः क्लेशो म्रियमाणेऽपि वै तथा...
जायमानस्य यत् क्लेशमज्ञानस्य च यद्भयम्।
अविद्या बाधते दुःखमज्ञानां वनवासिनाम्।
यद्दुःखं याज्ञिकानान्तु यद्दुःखं सांख्ययोगि...
यद्दुःखं मोक्षकाङ्क्षिणां रागादीनामवर्ज्जना...
तस्मात् सर्व्वप्रयत्नेन दुःखमेव विवर्ज्जयेत्।
शिवज्ञानेन यजेद्दृयज्ञं तस्माद्दृयज्ञं समाचरेत्।
ज्ञानमेवाश्रयेद्विद्वान् जातिदोषविनाशकम्।
जातिदोषविनाशेन सर्व्वक्लेशविनाशनम्॥
रौरवे कूटसाक्षिणां पातनं नात्र संशयः।
आयुर्घ्नश्चापि निष्पातो वैतरण्यामुदीरितः॥
स्थितिभेदनकारी च असिपत्रवनं व्रजेत्।
शिवेन यजते यज्ञं हिंसादोषमवाप्नुवन्॥
अहिंसादोषमाप्नोति महापाशुपते स्थितः।
अन्येऽपि दुर्वृत्ताः प्रोक्ता मोहिताः शिवमा...
यया प्राणा हि गच्छन्ति नरकं स्वर्गमेव...
प्रविशन्ति तमोघोरमविद्याकर्म्मसम्भवम्॥

ीचं धर्म्मविदो यान्ति विद्याधर्म्मफलोदयम् ।
र्व्वे ब्रह्माण्डका देवा स्थावराणाञ्च कारकाः ॥ ८२
ज्ञा वेदयन्ते धर्म्मं न सुखं प्राप्नुवन्ति ते ।
ःखा दुःखं विमन्यन्ते अविद्यातमसाकुलाः ॥ ८३
र्ज्जयं काममोहाणामविद्याकर्म्मसम्भवाः ।
ीचं धर्म्मविदो विप्रा मन्यन्ते ब्रह्मचोदिताः ॥ ८४
मस्य विषयं सर्व्वं दुःखं प्राप्य पुनः सुखम् ।
था येनेह भुञ्जन्ति नरकं स्वर्गमेव वा ॥ ८५
यं मानुषभावोऽयं क्लेशः संसर्गवासिनाम् ।
र्भवासविनिर्म्मुक्तो नरकञ्चैव पश्यति ॥ ८६
रकाच्च विनिर्म्मुक्तो देव-मानुष-तिर्य्यगाः ।
र्व्वे हि परिवर्त्तन्ते सर्व्वं नरकमुच्यते ॥ ८७
स्मादेवं प्रवृत्तानां ब्राह्मणानां हितैषिणाम् ।
ुखानां खलु कर्त्तव्याः सर्व्वज्ञानसमा द्विजाः ॥ ८८
रकाच्च विनाशाय जातिदुःखविनाशनम् ।
संसारचक्रमारूढ़ा भ्रमन्ते यन्त्रचक्रवत् ॥ ८९
स्माच्चक्रविनाशाय शिवचक्रं समाश्रयेत् ।
शिवचक्रं समारूढ़ो ज्ञानी दोषैर्न लिप्यते ॥ ९०
अविद्याकर्म्मजान् दोषान् वञ्चयामास मायया ।
एवं माहेश्वरे ज्ञाने भक्तिमान् यः प्रियो भवेत् ॥ ९१
ापराशिं दहेदेवं तृणराशिमिवानलः ॥ ९२

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ।

सनत्कुमार उवाच ।

पृथिव्यां प्राक्प्रतीच्यान्तु दक्षिणस्यां तथैव च ।
सप्त द्वीपसमुद्राश्च व्याख्याता हि मया द्विज ॥ १
ऊर्द्ध्वं तावत् प्रवक्ष्यामि यावद्ब्रह्मकुलं भवेत् ।
प्रथमं भवनं भूयो व्याख्यातं तद्विजन्मनाम् ॥ २
द्वितीयं भवनं भूमेर्व्याख्यास्यामि यथा भवेत् ।
महीतले सहस्राणां शतेनोर्द्ध्वं विभाव्यते ॥ ३
तत्र भानुश्च चन्द्रश्च ग्रहास्तारागणैः सह ।
उपर्य्युपरिसंदृष्टं यथोक्तं ग्रहतारकाः ॥ ४
एककल्पान्तरं विप्रा यस्य वै ग्रहतारकाः ।
यथान्तरीक्षे तिष्ठन्ति भान्ति वान्ति यथा ग्रहाः ॥ ५
सर्व्वे नानाविधास्तत्र मेघा नानाविधाः स्मृताः ।
द्वययोजनसाहस्रं द्वययोजनमुन्नतम् ॥ ६
आग्नेया नव जानन्ति पर्ज्जन्याश्च प्रकीर्त्तिताः ।
वसुधास्य घनाः प्रोक्ता विचरन्ति यथा पुरे ॥ ७
एतेषामुपरिष्टात् तु भानोर्लोको विभाव्यते ।
तस्माद्भानोर्महोत्साहल्लोकाः सुरनमस्कृताः ॥ ८
तत्र देवविमानानि सर्व्वे ते सूर्य्यवर्च्चसः ।
षष्टिश्चैव सहस्राणि ऋषीणां भावितात्मनाम् ॥ ९
उपासते रथवरं भानोरक्लिष्टकर्म्मणः ।
तत्र तेषां महात्मानो नाग-गन्धर्व्व-राक्षसाः ॥ १०
षष्टिश्चैव सहस्राणि अप्सरायां प्रसंख्यया ।
गीतगन्धर्व्वघोषश्च हाहा हूहूरनेकशः ॥ ११
शतशोऽथ विमानानि शतघण्टायुतानि च ।
नानारत्नविचित्राणि पताकैः शोभितानि च ॥ १२
किङ्किणीजालचित्राणि नानारत्नोज्ज्वलानि च ।
सर्व्वकामसमृद्धानि काव्यशब्दान्वितानि च ॥ १३
स्त्रीसहस्रैरुपेतानि कल्पवृक्षयुतानि च ।
एते वायुरथा रम्या अन्तरीक्षचराः स्मृताः ॥ १४
विचरन्ति परा ह्येते चरन्ति सलिलं बहु ।
वायव्याः शतशस्तत्र सप्तस्कन्धेषु वै तथा ॥ १५
एवं गणा यान्ति तान् स्वान् भागानाकाशमेव च ।
स्वर्गपन्थानमाश्रित्य चरन्ति विमलोदकाः ॥ १६
देवैः सहाप्सरोभिश्च सिद्धैश्चाप्सरसान्वितैः ।
तत्र दिव्यानि वेश्मानि विचित्राणि बहूनि च ॥ १७
पुष्पस्रग्भिरुपेतानि भास्वराणि सहस्रशः ।
तत्र देवा विमानस्था रमन्ते केलिकारकाः ॥ १८
दिव्यभोगयुताः सर्व्वे अन्तरीक्षे विराजते ।
यत् तद्वारि दिवि ख्यातं आदित्यं तैजसं वदेत् ॥ १९
यत्र गच्छन्ति सुकृतः सर्व्वसङ्गजितो नराः ।
एते लोका मयाख्याता आदित्यस्य महात्मनः ॥ २०
आदित्यस्योपरिष्टात् तु लोका वैवस्वताः स्मृताः ।
तत्र दिव्याः शुचिमया विमानशतशोभिताः ॥ २१
सञ्चरन्ति स्वके लोके पुण्यकृद्भिर्निषेविते ।
तस्माद्दिव्यश्च सुमहान् सोमलोकः स्मृतस्ततः ॥ २२
क्षत्रियाश्चैव यज्वानो मन्त्रिणः सोमपायिनः ।

वसन्ति तत्र सुखिनः शस्य-वस्त्र-हिरण्यदाः ॥ २३
तस्मादूर्द्ध्वं ततो लोको भास्वरः समवस्थितः।
विप्रा भवन्ति यज्वानो विमानशतशोभिताः ॥ २४
यान्ति लोकाश्च तत्रस्था ऋषीणां सुमहात्मनाम्।
दिव्याम्बरधराः सर्व्वे उपरिष्टाद्विभूषिताः ॥ २५
आकाशगङ्गा तत्रस्था सर्व्वे चैव ग्रहास्तथा।
तस्मादूर्द्ध्वमृषीणां वै लोकः परमपूजितः ॥ २६
तत्र शूरा रणे प्राणान् परित्यज्य महाहवे।
त्रिविष्टपे च विख्याते शक्रस्येवामरावती ॥ २७
उपरिष्टादृषीणान्तु शक्रलोकन्तु तत् स्मृतम्।
तस्मादूर्द्ध्वं ध्रुवं लोकं सूर्य्यकोटिसमप्रभम् ॥ २८
कोटिशतसहस्रेण साध्यानां परिवारितम्।
चतुर्गुणन्तु विख्यातं देवलोकप्रमाणतः ॥ २९
अतः सनत्कुमारस्य कार्त्तिकेयस्य नन्दनः।
एवं भवन्ति सुखिनः शय्या-वस्त्र-हिरण्यदाः ॥ ३०
तस्मादूर्द्ध्वं जनलोको योऽत्यन्तं भुवि भाव्यते।
उपरिष्टात् तारकाणां ब्रह्मलोकेति तत् स्मृतम् ॥३१
तत्र सिद्धा मुनिगणा ब्रह्मा चैव चतुर्म्मुखः।
सप्तर्षयो ध्रुवश्चैव विष्णुश्चैव महामतिः ॥ ३२
ब्रह्मलोकात् परं सत्यं सत्यमेतद्ब्रवीम्यहम् ॥
तस्योर्द्ध्वं विष्णुलोकश्च गोलोकश्च प्रतिष्ठितः ॥ ३३
पृथिवीमण्डलादूर्द्ध्वं योजनावर्णितं तथा।
अथाण्डस्योर्द्ध्वभागे तु ब्रह्मलोक इति स्मृतः ॥ ३४
ऊर्द्ध्वमेकन्तु वै लोकं कोटीनां शतयोजनम्।
एषोऽध्वगप्रचारो वै ज्ञानं ज्ञानं तथैव च ॥ ३५
न शक्यं प्राप्यते गन्तुं वर्ज्जयित्वा शिवानुगान्।
अनुग्रहाद्वा योगाद्वा नैष्ठिकाद्वा तथा द्विजाः ॥ ३६
स्वयं मूर्त्त्या च भगवान् ब्रह्मा भवन् विराजते।
एतस्मिन्नन्तरे देवाः सर्व्वे इन्द्रपुरोगमाः ॥ ३७
पादयोः पतिताः सर्व्वे ब्रह्माणमृषयस्तथा।
ब्रह्मणा चाप्यनुज्ञाताः सर्व्वे सुखमयाः स्थिताः ॥३८

ब्रह्मोवाच।

स्वागतं वो महाभागाः शृणुध्वं किमिहेच्छथ।
येन कार्य्येण वायातास्तद्ब्रुवन्तु सुरोत्तमाः ॥ ३९

देवा ऊचुः।

कृतं वरेण पर्य्याप्तं सृष्ट्वा त्वं प्रतिमस्मद्विभो।
वराणां वै सहस्रात् तु दर्शनं देव शस्यते ॥ ४०
महान् नः संशयोऽत्यन्तं भगवान् वक्तुमर्हति।
दुर्लभं परमं गुह्यं प्रष्टव्यं प्रश्नमुत्तमम् ॥ ४१

सनत्कुमार उवाच।

यदहं पृष्टवान् पूर्व्वं रुद्रस्य परमात्मनः।
तदिदं सम्प्रवक्ष्यामि इतिहासं पुरातनम् ॥ ४२
नैमिषीयास्तु ऋषयो जितक्रोधा जितेन्द्रियाः।
इच्छाद्वेषविनिर्म्मुक्ता ध्यानयोगपरायणाः ॥ ४३
ईश्वरज्ञानसम्पन्ना गता ब्रह्मसभां पराम्।
भृग्वङ्गिरसवृद्धौ च पुरस्तात् कृतवान् शुचिः ॥ ४४
तत्र काममया नाम सभा परमभाविणी।
पुरुषास्तत्र पश्यन्ति परमात्मैक्यतां गताः ॥ ४५
न सूर्य्यस्तत्र तपति न चन्द्रो नैव तारकाः।
वर्ज्जयित्वा शिवं देवं कः शक्तस्तमसः परः ॥ ४६
सर्व्वे पापसमाचाराः सदाचारविवर्ज्जिताः।
तमसा पिहितं कृत्वा निर्णयं पाप-पुण्ययोः ॥ ४७
योग एव महामायां सर्व्वं हरति किल्बिषम्।
जन्मान्तरगतस्यापि योगध्यानात् क्षयो भवेत् ॥ ४८

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
भुवनकोषवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः।

सूत उवाच।

विनयाद्वागतो व्यासः सद्भावं भक्तिमाश्रितः।
सनत्कुमारं सर्व्वज्ञं सन्देहमथ पृष्टवान् ॥ १
भगवन् श्रोतुमिच्छामि त्वत्प्रसादाद्द्विजोत्तम।
एष मे संशयो ब्रह्मन् ब्रूहि मे त्वं महामुने ॥ २
कश्चिद्दृयस्त्रिषु लोकेषु पृष्टो मयैवमर्थतः।
समर्थो वेदितुं लोके कः पुमान् कथयिष्यति ॥ ३
भगवन् भूतभव्येशशक्त्या श्रावयितुं क्षमः।
आख्याहि रुद्रमाहात्म्यं शृणुमः संशितव्रताः ॥ ४

सनत्कुमार उवाच।

इदं सर्व्वं पुरा भूतं सर्व्वमासीन्महार्णवम्।
नाग्निर्न वायुरादित्यो न भूमिर्न दिशो दश।
न चन्द्रो न च नक्षत्रं मुहूर्त्तकरणी तथा।

न देवासुरगन्धर्व्वा न पिशाचा न राक्षसाः ॥ ६
छादितास्तेजसा तस्य न किञ्चिदत्तुमुत्सहे ।
दृष्ट्वाहं मोहमापन्नो निश्चेष्टश्चिरमास्थितः ॥ ७
ब्रह्मकोटिसहस्राणां लोकानां हितकामया ।
कृत्वा करालं दंष्ट्रान्तं मुखपद्मं सुशोभनम् ॥ ८
दुन्दुभिस्वरनिर्घोष-पर्ज्जन्यनिनदोपमम् ।
प्रहस्य भगवान् रुद्र इदं वचनमब्रवीत् ॥ ९

रुद्र उवाच ।

अहमेकस्तु नान्यो वै मम सर्व्वं युगे युगे ।
समभायान्ति संमूढ़ाः किमर्थं परिशुष्यथ ॥ १०
लोकान् ससर्ज्ज रुद्रो वै मायार्थं निर्म्मितो मया ।
एवमुक्त्वा तदा रुद्रस्तत्रैवान्तरधीयत ॥ ११
श्रूयतां वो महाभागा उपदेशं यथाक्रमम् ।
यथावस्थानि भूतानि स्थावराणि चराणि च ॥ १२
प्राजापत्यं भवेदन्नमन्ने प्राणाः प्रतिष्ठिताः ।
अन्नाद्भवन्ति भूतानि अन्नं वै यज्ञसम्भवम् ॥ १३
यज्ञाद्भवति पर्ज्जन्यो यज्ञः कर्म्मसमुद्भवः ।
तत्र सर्व्वमिदं यज्ञं ब्रह्मयज्ञे प्रतिष्ठितम् ॥ १४
ऋचो यजूंषि सामानि कल्पोपनिषदस्तथा ।
मन्त्राख्यारण्यकञ्चैव रहस्याथर्व्वणं तथा ॥ १५
एकाक्षरं परंब्रह्म ओङ्कारः पर उच्यते ।
षड़ङ्गैः सह सम्प्रोक्तः सांख्ययोगविशारदैः ॥ १६
सावित्रीसम्भवो ह्येष ब्रह्माक्षरमयो महान् ।
मया शक्त्या ब्रह्मणा च विष्णुनापि स इज्यते ॥ १७
यज्ञलोकस्तदा साम्नां प्रतिपत्तिः स्वयम्भुवा ।
उपदेशं ततः कृत्वा महादेवो महेश्वरः ॥ १८
उक्त्वा वचनमीशानस्तत्रैवान्तरधीयत ।
तस्य तद्वचनं श्रुत्वा ब्रह्मा कमलसम्भवः ॥ १९
आप्तवानप्रयत्नेन नित्यमुक्तं महेश्वरम् ।
तस्य वै मूर्त्तयः पञ्च ब्रुवतस्ता निबोध मे ॥ २०
एका भगवतो मूर्त्तिरूर्द्धरोमा भयावहा ।
द्वितीया तस्य वै मूर्त्तिः सूर्य्यज्योतिःसमप्रभा ॥ २१
तृतीया भगवतो मूर्त्तिः शशिनः परमात्मनः ।
चतुर्थी भगवतो मूर्त्तिः कुबेरस्य महातनुः ॥ २२
पञ्चमी भगवतो मूर्त्तिस्तद्वै ब्रह्म परंपदम् ।
तत् तु पश्यन्ति विद्वांसः सूक्ष्मध्यानविचिन्तकाः ॥२३
इत्येष भगवान् रुद्रः पञ्चधा परिपच्यते ।
लोके वेदे च संयुक्ता शैवी चैव पृथक् पृथक् ॥ २४
क्रीड़ते प्रथमा मूर्त्तिर्द्वितीया तप्यते तपः ।
तृतीया हरते लोकांश्चतुर्थी सृजते प्रजाः ॥ २५
पञ्चमी ज्ञानसद्भावं सर्व्वमावृत्य तिष्ठति ।
सर्व्वेशः सर्व्वभूतस्थः सर्गप्रलयविक्रमः ॥ २६
स एष सर्व्वभूतानां गोप्ता ईशान उच्यते ।
उत्पत्तिं प्रलयञ्चैव भूतानां सङ्गतिं गतिम् ॥ २७
वेत्ति विद्यामविद्याञ्च तेनोक्तो भगवानिह ।
महांश्च महतो यस्मान्महद्भिश्च महीयते ॥ २८
यस्मादिदं महन्नित्यं महादेव इति स्मृतः ।
यस्मान्नाशयते पूर्णं त्रैलोक्यं सचराचरम् ॥ २९
पशूनां पाशनञ्चैव तस्मात् पशुपतिः स्मृतः ।
स्वयं माता स्वयं भूत्वा प्रियो लोकैरनुत्तमः ॥ ३०
लोकेषु च स्वयं भूत्वा स्वयम्भूरिति हि स्मृतः ।
यस्मादेकं शिरश्छित्त्वा तत्कपालमधारयत् ॥ ३१
कपालीति ततः प्रोक्तो ब्रह्माद्यैर्ऋषिभिस्तथा ।
यस्मात् क्षयान्ते त्रैलोक्यं शङ्करे याति संक्षयम् ॥३२
तस्मात् संवर्त्तको धाता शङ्करेत्यभिधीयते ।
यस्मादिमानि भूतानि पश्यन्ते नाधिकं ततः ॥ ३३
सर्व्वं विश्वेश्वरो देवस्तस्मादीशानतोऽभवत् ।
महद्भ्यो महतो यस्मान्महद्भिश्च महीयते ॥ ३४
महदैश्वर्य्यमिच्छन्ति महेश्वर इति स्मृतः ।
ब्रह्मविज्ञायते यस्मात् त्रैलोक्यं सचराचरम् ॥ ३५
बृहत्त्वाद्बृंहणत्वाच्च तस्माद्ब्रह्मेति संस्मृतः ।
यत्तद्सूक्ष्मतमं ब्रह्म निर्द्देष्टुं नैव शक्यते ॥ ३६
अक्षरं प्रति तस्मात् तं ब्रुवन्ति नीललोहितः ।
एतत् समावृतं ब्रह्म यावत् प्राणमयो ध्रुवः ॥ ३७
यं दृष्ट्वा देवदेवेशमुपगच्छति निर्व्वृतिम् ।
अक्षराद्वा परो रुद्रो ह्यक्षराश्च वयं पुरा ॥ ३८
अस्माकं देवता रुद्रो वयं देवेषु देवताः ।
देवा देवा द्विजातीनां द्विजाः शेषस्य देवताः ॥ ३९
इत्येवं देवदेवस्य रुद्रः परमदैवतम् ।
य एवं वेत्ति तत्त्वेन नित्यञ्च परिकीर्त्तयेत् ॥ ४०
आपद्भावः समापन्नो मुच्यते नात्र संशयः ॥ ४१

इति श्रीशैवे षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः।

सनत्कुमार उवाच।

क्षपणो द्रुपदश्चैव तपनो लवणस्तथा।
एतत् कारणसंजातं निश्चलं केवलं ध्रुवम् ॥ १
सर्व्वमेतद्विरूपाक्षाज्जगत् सर्व्वं प्रवर्त्तते।
विष्णुः पार्श्वात् तु सम्भूतो लिङ्गे भूताः सुरास्तथा॥२
लिङ्गात् प्रसवधर्म्मेण जगत् स्थावर-जङ्गमम्।
लिङ्गमूर्त्तिश्च भगवाननादिनिधनः शिवः ॥ ३
बहुवाक्यप्रसक्तेन हेतुनानेन वै द्विजाः।
अल्पाक्षरमिदं गुह्यं समैकान्ते निशम्यताम् ॥ ४
अहं विष्णुः पुरा शक्रो अन्ये वा सुरपुङ्गवाः।
विरूपाक्षस्य नेत्राभ्यां निमिषोन्मेषणे स्थिताः ॥ ५
यन्न शक्यं मया कर्त्तुं यदेव परमं ध्रुवम्।
तच्च वक्ष्यामि विप्रेन्द्रा ईश्वरं सम्प्रचक्षते ॥ ६
अचिन्त्यनियमो रुद्रो अचिन्त्यबलपौरुषः।
अचिन्त्यश्च तदज्ञानं न शक्यं भक्तिवत्सलम् ॥ ७
रुद्रं संस्मरते नित्यं रुद्रे च परमं पदम्।
रुद्रेण सदृशं देवं नान्यं पश्यामहे वयम् ॥ ८
सर्व्वथा वर्त्तमानाश्च ये भक्ताः परमेश्वरे।
तेऽवश्यवासिनां तुल्या मुनीनां भावितात्मनाम् ॥ ९
सर्व्वपातकसंयुक्ता ये प्रपन्ना महेश्वरे।
भवपापं न विन्दन्ति ते यान्ति परमां गतिम् ॥ १०
अजस्रञ्चाश्वमेधेन ये यजन्ति द्विजोत्तमाः।
तान् लोकांस्ते न गच्छन्ति रुद्रभक्तास्तु यान् व्रजेत्११
न देवासुरगन्धर्व्वा न यक्षा न च राक्षसाः।
निर्भयाः सर्व्वलोकेऽस्मिन् सञ्चरन्ति हि नित्यशः॥१२
विष्णुत्वं वासवत्वञ्च अमरत्वं सुरैः सह।
त्रैलोक्ये चाधिपत्यं वा तुष्टो रुद्रः प्रयच्छति ॥ १३
अनल्पा वसतिस्तस्य रुद्रभक्तस्य सुव्रताः।
रुद्रभक्तास्तु विप्रेन्द्राः प्राप्नुवन्ति शिवालयम् ॥ १४
अशुभाः पापकर्म्माणो ये नराः कल्मषीकृताः।
ईश्वरं प्रतिपश्यन्ते द्विजा भावितभावनाः ॥ १५
आदिदेवं महादेवं प्रभुं प्रभवतामपि।
ये स्मरन्ति सदा रुद्रं भयं तेषां न विद्यते ॥ १६
ये कीर्त्तयन्ति सततं देवदेवं महेश्वरम्।
न मोहमधिगच्छन्ति येऽपि स्युः पापयोनयः।
कीर्त्तनाद्देवदेवस्य तेजस्वी ब्राह्मणो भवेत्।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकमवाप्नुयात् ॥ १
रुद्र रुद्रेति त्रिसन्ध्यं यश्च ब्रूयाद्दिचक्षणः।
कीर्त्तनान्नीलकण्ठस्य सर्व्वपापैः प्रमुच्यते ॥ १
सर्व्वलक्षणहीनोऽपि युक्तो वा सर्व्वपातकैः।
सर्व्वं तरति तत्पापं भावतः शिवमाश्रितः ॥
संसारे भ्रममाणानां पापयोनिषु यद्भवेत्।
महादेवप्रपन्नानां भयं तेषां न विद्यते ॥ २
मनसापि शिवं देवं ये प्रपद्यन्ति मानवाः।
विधूताः सर्व्वपापेभ्यो देवैः सह रमन्ति ते ॥
अग्निहोत्रञ्च ये नित्यं यज्ञांश्चैव सुदक्षिणान्।
रुद्रभक्तस्य विप्रेन्द्राः कलां नार्हन्ति षोड़शीम्
सर्व्वेषां ध्यानयोगानां ये चान्ये मोक्षकाङ्क्षि
महादेवप्रसादेन प्राप्नुवन्ति परां गतिम् ॥ २
सांख्ययोगोद्भवकरं सञ्चितं ध्रुवमव्ययम्।
अप्राप्य च विरूपाक्षं कः पुमान् सिद्धिमर्हति
तीर्थानाञ्च महातीर्थं मङ्गलानाञ्च मङ्गलम्।
यत् पवित्रं पवित्राणां सम्प्रपद्ये तमीश्वरम्।
एष देवो विरूपाक्षः सर्व्वभूतपतिर्भवः।
हृदिस्थः सर्व्वभूतानामोङ्कारमधिगच्छति।
निष्कलं पुरुषवरं स महालिङ्गलक्षणम्।
अशाम्यशमनकरं कथं तत् फलं विद्महे ॥ २
यथा घृतञ्च पयसि यथाग्निश्चैव दारुणि।
क्षितौ जलं जले सत्यं यथा हि सर्व्वतो
यथा वयं तथा चान्ये तथा सनत्कुमारादयः
आध्यात्मिकैः सुरवरैर्ब्रह्मणः स्वात्मसम्भवैः

प्रकृत्य जाप्यं स्तुति-होमलिङ्गं
नतो ब्रवीम्यत्र महामहेश्वरम्।
पुनस्तु तत्रापि ददर्श लिङ्ग-
मनामयं लिङ्गमलक्षणञ्च ॥ ३१
न देव-गन्धर्व्व न भूतसङ्घा
सिद्ध-यक्षाधिप-पन्नगाधिपाः।
विभुं प्रपश्यन्ति महेश्वरं परं
महाविषं योऽजरयत् क्षणेन ॥ ३२
पितृ-मानुष-नागानां न भयं विद्यते क्वचित्

वैवस्वतं न पश्यन्ति न पच्यन्ते च कुम्भिषु ॥ ३३
कामगेषु विमानेषु विचरन्ति हि मानवाः।
यत्रैव च ब्रह्मलोकः सर्व्वे च सुरपुङ्गवाः ॥ ३४
अर्च्चयन्ति विरूपाक्षं लिङ्गमूर्त्तिं महेश्वरम् ॥ ३५

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः।

ऋषय ऊचुः।

कथं प्रसाद्यते रुद्रः कथं वापि प्रसीदति।
सर्व्वं कथय चास्माकमेतदिच्छाम वेदितुम् ॥ १

ब्रह्मोवाच।

षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च।
हृषीकेशेन विप्रेन्द्रा वर्षकोटिं प्रसादितः ॥ २
आराधितो महादेवः शूलपाणिर्महेश्वरः।
तुष्टेन च तथा विष्णुर्वरैः श्रेष्ठैस्तु योजितः ॥ ३
साम्ना च दुन्दुभिर्नाम महाचक्रधरो बली।
मम तुल्यबलो भूया भक्त्या च बहुशो हरे ॥ ४
ईश्वरस्य प्रसादेन विष्णुः परमतेजसः।
रक्ष्यते पृथिवीं सर्व्वामजेयश्च बली ततः ॥ ५
प्रसादितो विरूपाक्षः पुष्कराक्षो महेश्वरः।
इष्टाभिः स्तुतिपूजाभिर्विविधैः कर्म्मभिस्तथा ॥ ६
आराधितो महादेवः शूलपाणिर्हिरण्मयः।
तुष्टेन च कृतो ब्रह्मा संहर्त्ता विश्वतोमुखः ॥ ७
दाता हर्त्ता च गोप्ता च संहर्त्ता च युगे युगे ॥ ८

पितामहत्वञ्च सुरासुराणां
ब्रह्माधिपत्यं परमव्ययञ्च।
अनागतं वर्त्तमानञ्च विश्वं
सर्व्वेषु लोकेषु चराचरत्वम् ॥ ९
सर्व्वे च वेदाः सह षड्भिरङ्गैः
सांख्यञ्च योगञ्च सपारिभाषम्।
विप्र प्रसादेन च निष्कलत्वं
प्राप्तं मया ब्रह्मलोकञ्च दिव्यम् ॥ १०

शक्रेणापि पुरा चीर्णं दिव्यं पाशुपतं महत्।
वायुभक्षोऽम्बुभक्षश्च दुर्व्वासाश्चर्म्मसंवृतः ॥ ११
एवमासीद्विरूपाक्षो रुद्रः शृङ्गाट्टहासतः।
कपर्द्दी तस्य तुष्टो वै कृत्तिवासाः पिनाकधृक् ॥ १२
गणेशो वै कृतः शक्रो महावज्रधरो बली।
भूयश्च क्रतुराजेन दत्तञ्चैव त्रिविष्टपम् ॥ १३
ईश्वरस्य प्रसादेन स्वर्गे मोदति वृत्रहा।
सनत्कुमारः पुत्त्रो मे व्याख्यातो मानसो द्विजाः ॥ १४
सहस्रञ्च विमानानां सप्तसंख्यासु यत् पुरा।
चन्द्रसूर्य्यप्रकाशेषु विमानेषु प्रतिष्ठितः ॥ १५
स्त्रीसहस्रसमाकीर्णो दीप्यमानः सुतेजसा।
गायद्भिर्नृत्यमानैश्च वादयद्भिश्च सर्व्वशः ॥ १६
क्रीड़न्नप्सरसां मध्ये तद्दत्तबलगर्व्वितः।
वज्रहाटकसर्व्वाङ्गैरप्रमेयमहोत्तमैः ॥ १७
पुरुषैः सूर्य्यसङ्काशैर्दीप्यमानैः स्वतेजसा।
उपविष्टः स्थितस्तत्र गिरिं पादेन पीड़यन् ॥ १८
यजमानाश्च ये दृष्टा लोकयात्राकराश्च ये।
पार्थिवास्ते तमासाद्य सर्व्वविषयेष्वधिष्ठिताः ॥ १९
उद्योगिनाञ्च तज्जिलं भीरूणाञ्च निवारणम्।
पुष्पकाले च पुष्प्यन्ति फलकाले फलप्रदाः ॥ २०
पाककाले च पच्यन्ते द्वारेषु च सुसंवृताः।
शैलेषु निरता ये च पाताले च समाश्रिताः ॥ २१
अन्तरीक्षे चरा ये च चरन्ति दिवि संश्रिताः।
ये च नक्षत्रमार्गेषु नक्षत्राणि समाश्रिताः ॥ २२
ह्रासवृद्धिकरा ये च चन्द्र-सूर्य्यौ ग्रसन्ति ये।
स्वस्थाने प्रस्थितास्त्वन्ये सांख्ययोगमनुव्रताः ॥ २३
असंख्याता ह्यनेकाश्च जङ्गमाजङ्गमाः स्थिताः।
रुद्रस्य पार्श्वे ये चान्ये देवदेवस्य धीमतः ॥ २४
ज्वलन्तमुष्णं मुञ्चन्ति न भयं ते समाश्रिताः।
दिव्याः पार्श्वगताः सर्व्वे ग्रहास्तु पादपास्तथा ॥ २५
कुन्देन्दुकुमुदप्रख्यां मालां पद्मसुगन्धिनीम्।
जिघ्रन्ति चैव धावन्ति रुद्रपार्श्वगता गणाः ॥ २६
तेषां वर्णविशेषोऽस्ति प्रमाणञ्चैव दृश्यते।
एकैकस्य गणेशस्य शरीरं प्रतितिष्ठति ॥ २७
मेरुमन्दरशैलानां गणानां परिमाणतः।
तेषां परिवृतो देवो ग्रहाणामिव भास्करः ॥ २८
सनत्कुमारो देवेशो गणेशाय महात्मने।
एवं दृष्टं मयाख्यातं भीमस्यामिततेजसः ॥ २९

शृणुयाद्गणसंख्यानं मनसापि सदा स्मरेत्।
प्रयतमानसो भूत्वा पठेत् पर्व्वणि पर्व्वणि ॥ ३०
सर्व्वान् कामानवाप्नोति अमृतत्वञ्च विन्दति।
शतं शतसहस्राणि रुद्रलोके महीयते ॥ ३१
ऋतुकाले च नारीणां तथैव समुदाहरेत्।
अमोघरेता भवति संग्रामे च जयो भवेत् ॥ ३२
आहारकाले तु पठेद्ब्राह्मणानाञ्च सन्निधौ।
नित्यमेवं पठति यः श्रद्दधानो जितेन्द्रियः ॥ ३३
शतरुद्रफलं तस्य लभते नात्र संशयः।
वेदकोटिफलं यच्च सर्व्वं प्राप्नोत्यसंशयम् ॥ ३४
अनन्तपापयुक्तो वा स गच्छेद्रुद्रलोकताम्।
पठतस्तु ततः पुण्यं गणसंख्याञ्च नित्यशः ॥ ३५
शृणुयादपि यो भक्त्या सर्व्वपापैः प्रमुच्यते।
प्रभातसमये काले समुत्थाय महामनाः ॥ ३६
ब्रह्माणं देवकर्त्तारं सर्व्वशास्त्रविशारदम्।
उवाच विधिना देवो ब्रह्मणे भगवान् वचः ॥ ३७
इमां सिद्धिं प्रपश्यन्तः सिद्धास्ते गर्व्विताः पुरा।
अहङ्काराभिभूतेन वरं तत्त्वं न बुध्यते ॥ ३८
ऊर्द्धञ्च नयनं दृष्ट्वा देवतेजोमयं स्थितम्।
पिता च पितरो मेऽद्य दृष्ट्वा पात्रमुपागताः ॥ ३९
वाषिता देवदेवेन न किञ्चिदनुमुत्थहे।
एवं दृष्ट्वा स मां पुत्त्रो व्याजहार ससम्भ्रमः ॥ ४०

सनत्कुमार उवाच।

निगृहीतोऽस्मि भद्रं ते बालेनाकृतकर्म्मणा।
विमानानि च रत्नानि अजस्रञ्च सुसंस्कृतम् ॥ ४१
तेनाहं दुःखसन्तापाद्देहं त्यक्ष्ये न संशयः।
पुत्त्रस्य वचनं श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥ ४२
आत्मानं शमयामास ध्यानयोगेन दृष्टवान्।
स पार इति तं ज्ञात्वा ततो हृष्टतरोऽभवत् ॥ ४३
उत्थाय चासनाद्ब्रह्मा प्राञ्जलिः प्रणतः स्थितः।
नमस्कृत्वा महादेवमीश्वरं सर्व्वतोमुखम् ॥ ४४
प्रभवं निधनञ्चैव भूतानां पतिमव्ययम्।
इदमाह महातेजा ब्रह्मा लोकपितामहः ॥ ४५
अपि देवो महादेवः प्रभुः प्रभवतामपि।
तस्मात् कृत्स्नमिदं सर्व्वं जगत् स्थावर-जङ्गमम् ॥ ४६
योगानामधिको योगी देवानामम्बिकापतिः।

दृष्ट्वा पुरा नन्दिमुखं देवदेवेन भाषितम्।
पुत्त्रशोको न कर्त्तव्यो जातः कस्त्वजरोऽ
अनुग्रहं महादेवः कर्त्तुकामो महेश्वरः।
सर्व्वं वै दर्शयामास आत्मा चैव सुदुर्लभः।
गाणपत्यं लभन्त्वेते विष्णुना च प्रकीर्त्ति
न किञ्चिद्ब्रह्मचारी च पश्यत्यकृतबुद्धयः।
भक्तिमानपि देवस्य स्तुतिश्चापि महीयते।
ऐकान्तेन च सौख्ये वा नास्ति तत्र विचार
गच्छ प्रपद्यस्वेशानं स ते योगं प्रदास्यति।
वृणीष्वात्मं महादेवं गाणपत्यं सुदुर्लभम्।
गाणपत्यञ्च भद्रन्ते विष्णुनासादितं पुरा।
जपन् प्रयत्नवान् भूत्वा यतो द्रक्ष्यसि शङ्क
ब्रह्मणो वचनं श्रुत्वा प्रयतो मानसं जपन्।
प्रसन्नश्च महादेवः शूलपाणिर्महेश्वरः।
स सम्यक् स्तुतिभिर्मन्त्रैरृग्यजुःसामभिस्त
तुष्टः प्रसन्नो देवेशः कर्म्मभिश्चामितौजसः।
स्थितः प्रदक्षिणं कृत्वा देवदेवस्य धीमतः।
चराचरप्रीतिचारी धर्म्मिष्ठो वरदो वर
धारणं सर्व्वभूतानां धराधरपतिर्यमः।
भूतसंसारकरणो गोपतिस्त्रिदशेश्वरः।
सांख्ययोगेश्वरः कर्म्मकुमारः कमलेक्षणः।
शतसूर्य्याग्निनेत्रश्च चारुनेत्रविभूषितः।
चतुर्म्मुखश्चतुर्द्दंष्ट्रश्चतुर्व्वाङ्गश्चतुर्युगः ॥ ५८
चतुर्म्मूर्त्तिश्चतुर्व्वक्त्रश्चतुर्नेत्रश्चतुष्पथः।
वायुकालाग्निरुद्रश्च दिग्वासा मेघवाहनः।
जलाधारो ह्यनन्तश्च धर्म्माधर्म्मभृतेश्वरः।
कार्त्तिकः शुभकर्त्ता च श्रीकण्ठः कलिना
विष्णुप्रसादरश्चैव समुद्रे वड़वामुखः।
देवासुरविनिर्ज्जिता देवासुरपरायणः ॥
कपर्द्दी शूलहस्तश्च अजातः परमा गतिः।
तापसानां परंतत्त्वं तथा च परमं पदम्।
परावरज्ञो लोकानां सर्व्वदा हरिवाहन
असिताङ्गः सिताङ्गश्च असितायतलोचनः।
ब्रह्मणा धीयते ब्रह्मा संस्थितो नाभिपद्म
नीलोग्रजटिलः श्रीमान् शङ्ख-चक्र-गदाधर
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भि

ऋचो यजूंषि सामानि कल्पोपनिषदस्तथा ॥ ६५
मन्त्राणां भवनञ्चैव परस्यार्थव्वचस्य च ।
सर्व्वलोकेश्वरो देवो विभुः सर्व्वस्य सम्भवः ॥ ६६
सहस्रवाट् पशुपतिः सहस्रशतयोजनः ।
भूतं भव्यं भविष्यञ्च भगवानेव सर्व्वशः ॥ ६७
त्वद्गात्रेभ्यः प्रसूयन्ते त्रयो लोकाः सनातनाः ।
न हि चैवं विजानन्ति गतिं वचनमेव च ॥ ६८
योगीश्वरो महायोगी योगीशोऽसि नमोऽस्तु ते ।
एवं संस्तूयमानः स व्यक्तीभूतो महेश्वरः ॥ ६९
उपगम्य मुदा युक्तस्तदा हृष्टः स हृष्टिमान् ।
कमण्डलुधरो दण्डी शशाङ्ककृतशेखरः ॥ ७०
व्याघ्रचर्म्माम्बरधरः सिंहचर्म्माम्बरच्छदः ।
नागयज्ञोपवीती च अक्षमालाविभूषितः ॥ ७१
जटी शिखण्डी खट्वाङ्गी पट्टिशासिनिशूलधृक् ।
पुरः शरधरो देवः शक्तिचापसमुद्गरैः ॥ ७२
शङ्ख-चक्र-गदापाणिः पद्म-शूल-हलायुधः ।
अग्निकृष्णाजिनधरः कपाली घोरचापधृक् ॥ ७३
वृषारूढ़ो दीप्यमानो गणैः परिवृतो हरः ।
नन्दिना शूलहस्तेन पुरस्ताद्दर्शितः प्रभुः ॥ ७४
ददर्श भगवान् देवः सूर्य्याग्निशशिना दृशा ।
ततस्तु भगवानीश इदं वचनमब्रवीत् ॥ ७५
सनत्कुमार प्रीतोऽस्मि पश्य मां द्विजसत्तम ।
दृढव्रतोऽसि भद्रं ते अतिशुद्धोऽसि भो द्विज ॥ ७६
वरयस्वेप्सितं कामं मत्तः श्रेयो ह्यवाप्स्यसि ।
प्रसन्नसुमुखो भूत्वा त्वामेवेदं ब्रवीम्यहम् ॥ ७७

सनत्कुमार उवाच ।

वर एष महादेव यत् त्वां द्रक्ष्ये महेश्वरम् ।
ब्रह्मणा कथितं पूर्व्वं यथागुह्यं यथोद्भवम् ॥ ७८
यदि चाहमनुग्राह्यो यदि देयो वरो मम ।
भक्तिर्भवतु देवेश त्वयि नित्यं महेश्वरे ॥ ७९
अन्यथा मनसि ध्यातं त्वमेव हन्तुमर्हसि ।
मनसः काम-लोभौ मे लोभान् मे हर्षणञ्च यत् ॥ ८०
इन्द्रियाणाञ्च सर्व्वेषामिन्द्रियाणि मनांसि च ।
प्राणायामे समानेषु उदनोदानमेव च ॥ ८१
कालेन सर्व्वभूतानां निष्पत्तिः समुदाहृता ।
नाश्नन्ति तर्पिता देवाः सदा विशदमानसः ॥ ८२
त्वया च विहितो ब्रह्मा ब्रह्मत्वमपि नीतस्त्वहे ।
त्वमेवोरग-गन्धर्व्व-पिशाच-यक्ष-राक्षसाः ॥ ८३
प्रभुस्त्वमसि देवेश जगत् सर्व्वमिदं प्रभो ।
त्वदृते नान्यभक्तोऽस्मि मनसा कर्म्मणा गिरा ॥ ८४
तस्यैवं वचनं श्रुत्वा उमापतिर्महेश्वरः ।
इत्युवाच महादेवः सर्व्वभूतपतिर्भवः ॥ ८५
महायोगीश भद्रं ते महामुनिपतिस्तथा ।
मम नामानि सर्व्वाणि गोचराणि भवन्तु ते ॥ ८६
दीप्यन्ते मम लोकस्य नाम गुह्यानि तत्त्वतः ।
सुसंग्रहाणि सर्व्वाणि नास्ति काचिद्विचारणा ॥ ८७
पाराशर्य्य इति ख्यात उत्पत्स्यति महातपाः ।
वेदव्यासः स धर्म्मात्मा ज्ञानवान् दीर्घदर्शनः ॥ ८८
व्यासः कमलपत्राक्षः स ते शिष्यो भविष्यति ।
निर्म्मलं विमलं शुद्धं ज्ञानं चन्द्रसमप्रभम् ॥ ८९
रथं कामगमं दिव्यं सारत्नविभूषितम् ।
मुक्ताजालपरिच्छन्नं हेमजालसमावृतम् ॥ ९०
सुवर्णवेदिरचितं दिव्यधूपसुधूपितम् ।
पताकैः रमणैः तत्र सेव्यमानं सुरासुरैः ॥ ९१
विमानं सूर्य्यसङ्काशं सर्व्वलोकोज्ज्वलं शुभम् ।
तेन यास्यसि तं तेन पूज्यमानं सुरासुरैः ॥ ९२
अक्षरं तत्र ऐश्वर्य्यं भविष्यति ममाज्ञया ।
इत्युक्त्वा भगवान् देवस्तत्रैवान्तरधीयत ॥ ९३

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायामष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ।

सनत्कुमार उवाच ।

सनत्कुमारोऽपि तदा देवेन कृतविग्रहः ।
स सञ्चचार लोकांस्त्रीन् ब्रह्मपुत्रोऽम्बिकासुतः ॥
एष दाता च कर्त्ता च संहर्त्ता च युगे युगे ।
एतस्य त्रिविधं सर्व्वमीशानस्य महात्मनः ॥ २
एष यज्ञपतिर्देवः कृतान्तः स उमापतिः ।
एष होता च होम्यश्च एवं यज्ञविदो विदुः ॥ ३
इन्द्रियाणीन्द्रियार्थेषु सर्व्व एव महेश्वरः ।
एवं ज्ञानं परंब्रह्म प्रशान्तं निर्म्मलं शिवम् ॥ ४

अव्यक्तञ्चैव व्यक्तञ्च ज्ञानञ्चाज्ञानमेव च ।
सांख्यं योगं परं साख्यं यः पश्यति स पश्यति ॥ ५
ततो ज्ञानेन शुद्धास्तु प्राणायामजितेन्द्रियाः ।
ध्यायन्ति परमोङ्कारं योगिनां परमं पदम् ॥ ६
भवभोगपतिं नित्यं प्रयोगं योगमेव च ।
तपसाञ्च प्रसादेन लभन्ते योगचिन्तकाः ॥ ७

शुभममलमतीत्य योगधर्म्मं
त्रिदशयतेरपि दुर्लभं यदेतत् ।
व्यवसितचरितं व्रतं चरन्ति
शिववदने विगतक्लमं विशन्ति ॥ ८
कमलमिव पुष्करेण च यद्वत्तु
महासरोगतं न लिप्यते तत् ।
श्रुतिरियं परमा शिवस्य गुह्यं
श्रुत्वा परमैनसा न लिप्यते सः ॥ ९

एवं श्रुत्वा ततः सर्व्वे ऋषयो धर्म्मवत्सलाः ।
पादयोः पतिताः सर्व्वे सदसि ब्रह्मणोऽवदन् ॥ १०
ध्यानं हि परमं धर्म्मं कथितं परमं पदम् ।
अभ्यनुज्ञाप्यतां देव गच्छामो विगतैषणाः ॥ ११
जयैर्धूपैरलङ्कारैः स्तूयते विविधैः शिवः ।
ओङ्कारादिनमस्कारैः सहितैर्गीतवादनैः ॥ १२
अथ सव्यापसव्यैश्च वामदेवन्तु सुव्रताः ।
आराधयन्ति मुनयो रुद्रस्य हृदयप्रियैः ॥ १३
न ज्ञानेन न तपसा चिन्तनाद्भावितात्मनाम् ।
सांख्यादेव परं मोक्षं यच्चान्यैर्विविधैस्तथा ॥ १४
ऋषिभिर्विप्र युक्तान् वै ऋषीणां प्रददौ वरान् ।
एवमन्येऽपि ये भक्ता महेश्वरे शिवेऽव्यये ॥ १५
तेषामपि यथाकामं मनसा ईप्सितं ददेत् ।
सर्व्वकामवरो देवः सर्व्वथा भक्तवत्सलः ॥ १६
सर्व्ववर्णानुकम्पी च सर्व्वतीर्थमयोऽव्ययः ।
त्रिरात्रमपि यो भक्त ईश्वरं शिवमव्ययम् ॥ १७
चित्ताकुलप्रवृत्तोऽपि नासौ निष्फलतां व्रजेत् ।
येषान्तु कलुषा बुद्धिर्नराणां भावितात्मनाम् ॥ १८
ते वै सूक्ष्मां योगमूर्त्तिं विशन्ति विदुषो जनाः ।
निष्कला विरजाः ख्याता भविष्यन्ति शिवाश्रिताः ॥ १९
यतीनां ब्रह्मगीता च ब्रह्मणा समुदाहृता ।
यश्चैनां पठते नित्यं यश्चैनां शृणुयात् सदा ॥ २०

एवं हि ब्राह्मणो ब्रह्मन् रुद्रलोकं स ग
देवागारे पठेन्नित्यं सदा ब्राह्मणसन्नि
नित्यमेवं सदा कार्य्यं पठमानस्य सिद्धि

इदमखिलमिहार्थतो विदित्वा
पठति यः प्रयतो महेश्वरस्य भक्तः
स भवति जरामरणनिर्म्मुक्तबन्धः
स शिवमुपैति गतक्लमस्ततः सः ॥

इति श्रीशैवे महापुराणे सनत्
संहितायां ब्रह्मगीता नाम
नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ।

व्यास उवाच ।

ब्रह्मलोकं विष्णुलोकं रुद्रस्य भुवनोत्तम
तदहं ज्ञातुमिच्छामि विस्तरेण महा

सनत्कुमार उवाच ।

आसीद्गिरिवरो व्यास योजनानां समन्ता
अष्टाशीतिसहस्राणि नदी प्रस्रवणैर्युतः
विष्कम्भेण स्थितो ब्रह्मन् तावानेवोच्छ्रि
पातालमपि स व्याप्य तिर्य्यगूर्द्ध्वमिव स्थि
सुरस्य स गिरिश्रेष्ठश्चामीकरसमप्रभः ॥
तस्य कुम्भेषु कुम्भेषु कन्दरेषु दरीषु च ।
नानाकुसुमचित्रेषु शिखिनां मधुरा गिर
भेरुण्डैः स्वर्णयूथैश्च चकोरैरन्वितेषु च ।
गजवृन्दावकीर्णेषु मदेन वासितेषु च ॥
व्याघ्राणाञ्चैव ऋक्षाणां खगानां भवनेषु
हर्म्यप्रस्तम्भेषु कीर्णेषु सिंहानां रूपशालि
शोभिते गिरिवर्य्ये च देवानाञ्च सुरा
कुबेरप्रमुखा यक्षाः क्रीडन्ति च समन्ता
चित्रसेनादयस्तत्र योषिद्भिः सहिताः
विचरन्ति मुदा युक्ता विद्याधरगणा
हाहा हूहूश्च गन्धर्व्वास्तुम्बुरुप्रमुखा
समेत्य विश्वावसुना विचरन्ति मुदा
यन्त्रधारानिपातेषु निनदन्ति शिखण्डि
तासु चन्द्रांशुभाः कामं ज्योत्स्नायाः

यत्र सा पतते गङ्गा देवतानां कुलानि वै ।
तेषु चात्मनि वाभान्ति उदितानि समन्ततः ॥ ११
तं प्राप्य सर्व्वभूतानि सौवर्णानि महान्ति वै ।
वर्द्धितान्यप्रमेयस्य गिरिराजस्य मूर्द्धनि ॥ १२
यत्र पुण्यो ववौ वायुः सुरभिर्मधुरस्वनः ।
स्वर्गं परमकं तत्र त्वप्राप्यं यत् सुरैरपि ॥ १३
न तत्र भास्करो भाति न चन्द्रो न च वै ग्रहाः ।
न चापि सप्त ऋषयो वान्ति वै मारुताः शुभाः ॥ १४
न तत्र मेघा विद्यन्ते न च वर्षति वासवः ।
मनसा तत्र पश्यन्ति देवताद्या महर्षयः ॥ १५
तत्र देवातिदेवस्य न्यस्तकर्म्ममहात्मनः ।
भुवनं काञ्चनश्रीमदियं विजया नदी ॥ १६
योजनानां सहस्राणि दश चाष्टौ प्रकीर्त्तिताः ।
तापनीयेन महता प्राकारेण समावृताः ॥ १७
गृहास्तत्र सुरम्याश्च पताकाशोभिमालिकाः ।
दिवाकरकराभाश्च सुप्रभा अमितौजसः ॥ १८
तत्र द्वारसहस्राणि तावन्तश्च द्विजोत्तमाः ।
सर्व्वाणि पुण्यकर्म्माणि तरुणार्कसमप्रभाः ॥ १९
गृहनि स्वस्तिकादीनि स्रग्दामकलितानि च ।
चैन्यस्तैः पूर्णकुम्भैश्च शोभितानि यथा तथा ॥ २०
मुक्तादामैः सुविपुलैर्भूषितानि समन्ततः ।
धूपोपहारैर्विविधैर्धूपैश्चागरुसम्भवैः ॥ २१
वेदिभिश्च समागुप्तं विपुलैश्चर्य्यशालिभिः ।
प्राकारप्रतिसञ्छन्न-प्रासादैर्गृहपङ्क्तिभिः ॥ २२
कैलासशिखरप्रख्या विराजन्ते सहस्रशः ।
अन्या जाम्बूनदमयाः प्रासादानाञ्च पङ्क्तयः ॥ २३
पावका इव दीप्यन्ते ज्वालाविपुलमालिनः ।
मणिचित्रमयास्तत्र प्रासादा भवनोत्तमाः ॥ २४
द्योतयन्ति दिशः सर्व्वाः शरदीवोदिता ग्रहाः ।
तस्मिन् सुरवरश्रेष्ठे शिवस्य भवनं महत् ॥ २५
मध्ये चितितलस्यास्य सर्व्व एव नरोत्तमाः ।
स्तम्भसहस्राणि सहस्रेण समुत्थितम् ॥ २६
दीर्घिकाभिः परिच्छिन्नं काननैश्च समन्ततः ।
हेमचमालाकलितं मुक्तादामैर्विभूषितम् ॥ २७
विचित्रैर्भूषितैर्नद्धं शिवेन मनसा कृतम् ।
वितानैः सुविपुलैश्चित्रैः शोभितं सपरिच्छदैः ॥ २८
नानारत्नशतैश्चित्रैः पताकाशतशोभितैः ।
वृक्षैः पुष्पैः फलाद्यैश्च फलानाञ्च सुवर्णितैः ॥ २९
पारिजातकवर्णैश्च सौवर्णकदलीवनैः ।
नदीभिश्च तड़ागैश्च पल्वलैश्च समन्ततः ॥ ३०
वापीभिर्दीर्घिकाभिश्च ह्रदैः कूपैश्च शोभितैः ।
पद्मोत्पलपरिच्छन्नैर्मत्तषट्पदनादितैः ॥ ३१
कदम्बपल्लवैश्चापि बलाकानाञ्च पङ्क्तिभिः ।
मयूरैश्चक्रवाकैश्च तथैव शुकसारिकैः ॥ ३२
तस्मिन् द्वारपुराण्यष्टौ पुरश्रेष्ठे द्विजोत्तम ।
श्रीद्वारं प्रथमं तत्र महासिद्धो व्यवस्थितः ॥ ३३
पूर्व्वस्यां दिशि वै शैवः पद्ममालाविभूषितः ।
पुरान्तराले रुद्रस्याखिलस्य तपसो निधिः ॥ ३४
लक्ष्मीद्वारं ततस्तस्य यत्राम्बुदसमप्रभः ।
महाकालो महाकायः स्थितः शूली महाबलः ॥ ३५
शिवं नाम पुरं तत्र दक्षिणेन व्यवस्थितम् ।
गण्डकर्णः स्थितस्तत्र महावीर्य्यः शिवाज्ञया ॥ ३६
सन्निधाने तथा चान्ये तस्यामेव दिशि द्विजाः ।
पालितं भीमनादेन गणेशेन महात्मना ॥ ३७
पश्चिमं वारुणं द्वारं तत्र नन्दीश्वरः श्रुतः ।
पालित हविर्ज्जिह्वेन गणनाथेन धीमता ॥ ३८
कीर्त्तिद्वारं तथोदीच्यां तस्यामेव दिशि द्विजाः ।
यत्रार्कवरुणप्रख्यो द्वाराध्यक्षो महेश्वरः ॥ ३९
उपक्रीड़नकैश्चित्रैः क्रीड़ते भगवान् प्रभुः ।
यत्र यान्ति जितक्रोधा जितलोभा जितेन्द्रियाः ॥ ४०
श्रूयन्ते पशुपतेर्भक्त्या रुद्रभक्तिपरा द्विजाः ।
ये चैवागमसंयुक्ताः सांख्याश्च श्रुतबुद्धयः ॥ ४१
ये गृहस्थाश्च धर्म्मस्था रुद्रभक्ता जितक्षमाः ।
न्यायतो युध्यमानाश्च संग्रामाभिमुखे हताः ॥ ४२
क्षत्रियो गोग्रहस्यार्थे मित्रार्थे राष्ट्रपालने ।
वैश्याश्च निरता धर्म्मे सत्यवाचो जितेन्द्रियाः ॥ ४३
रुद्रेन्द्रविष्णुहृदया ये ब्राह्मणहिते रताः ।
गोसहस्रप्रदातारो भूमिदातार एव च ॥ ४४
ये सुवर्णस्य दातारस्तथा सर्व्वप्रियंवदाः ।
वेदाध्ययनसम्पन्ना ध्यायिनो व्रतचारिणः ॥ ४५
यजन्ति विधिना यज्ञैः क्रतुभिश्चारुदक्षिणैः ।
ते तत्र गत्वा हृष्टास्तु निवसन्ति यथासुखम् ॥ ४६

कल्पायुतसहस्राणां सहस्राणि चतुर्द्दश ।
विचरित्वा सुरपुरे पुनः प्राप्य महीतलम् ॥ ४७
जायन्ते श्रेष्ठवर्णेषु सुखैश्च परमैर्युताः ।
जगतीञ्चाभिनन्दन्ति चिरं प्रमुदितास्तथा ॥ ४८
तत् पुरं देवदेवस्य सर्व्वकामसमन्वितम् ।
सर्व्वर्द्धिकामदञ्चैव समासेन प्रकीर्त्तितम् ॥ ४९
ततः परं प्रवक्ष्यामि रौप्यशृङ्गनिवासितम् ।
पद्मपत्रायताक्षस्य विष्णोर्भुवनमुत्तमम् ॥ ५०
यत् तत्प्रभावमुदितं चन्द्रार्क्ककिरणप्रभम् ।
राजतं गिरिराजस्य शृङ्गं श्रीसागरं महत् ॥ ५१
योजनानां सहस्राणि त्रीण्येवन्तु परं स्थितम् ।
प्राकारेणाथ महता राजतेन समावृतम् ॥ ५२
अलङ्कृतेन दिव्येन पताकाध्वजमालिना ।
यत्र गोपुरचित्रेण मणिरत्नान्वितेन च ॥ ५३
राजतद्वारशाहस्रैर्मणिचित्रैश्च चित्रितम् ।
यत्र स्तम्भसहस्राढ्यां द्वाभ्यां प्रासादमुत्तमम् ॥ ५४
पुरमध्ये स्थितं कान्तं राजतं धातुभूषितम् ।
नाम्ना विष्णुपदं नाम तत् सुरैरपि कीर्त्तितम् ॥ ५५
चतुर्द्वारं चतुःशृङ्गं कैलासशिखरप्रभम् ।
नानारत्नसमाकीर्णं नानाद्रुमलतावृतम् ॥ ५६
तस्य मूर्द्ध्नि स्थिते द्वारे कृष्णरूपः प्रतापवान् ।
द्वाराध्यक्षः स्थितस्तत्र हृदयङ्करो बली ॥ ५७
प्रतीहारो महाकायो हरिप्राणसमो जवे ।
पश्चिमे च ततो द्वारे हरिभद्र इति स्मृतः ॥ ५८
तस्मिन् मधुमती नाम नदी स्वार्थप्रकाशिका ।
काञ्चनैः कमलैश्चापि नानापक्षिनिनादिता ॥ ५९
ते वसन्ति च तत्रस्थाः पुरमध्ये निवासिनः ।
अग्निहोत्ररता नित्यं देवदैवतपूजकाः ॥ ६०
तत्राथ सुचिरं कालं भय-शोकविवर्ज्जिताः ।
सम्प्राप्य मानुषे लोके जायन्ते च सुकर्म्मसु ॥ ६१
पुनरेव च तान् लोकान् व्रजन्ति न चिरादिव ।
तैस्तैः कर्म्मभिरादिष्टाः शक्तितः समनुष्ठितैः ॥ ६२
एतत् सविस्तरं नोक्तं समासेन प्रकीर्त्तितम् ।
प्राजापत्यं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥ ६३
तृतीयं सुस्थिरं शृङ्गं मणिरत्नमयप्रभम् ।
नगरं पद्मगर्भस्य पद्माकारं व्यवस्थितम् ॥ ६४

योजनानां सहस्रे द्वे विशोकं नाम नाम...
प्राकारेण सुवर्णेन मणिरत्नमयेन च ॥ ६...
चन्द्रार्कग्रहसङ्काशं प्रभाकरमनुत्तमम् । ...
त्रिभिश्चित्रैः सुविपुलैः शिखरैश्चाप्यलङ्कृ...
तस्मिन् नगवरे श्रेष्ठे मध्ये शोभवनोत्तम...
स्थितं स्तम्भसहस्रेण प्रासादपुरमालिनम् ...
हर्म्म्याट्टालकसंयुक्तं वलभीनां शतेन च । ...
गवाक्षाणां सहस्रेण शोभितं पङ्क्तिमाल...
द्वारैश्चतुर्भिः संयुक्तं स्वप्रमाणैः सुशोभित...
अलङ्कारैर्विशिष्टाढ्यैः सर्व्वतः परिविक्ष...
नाम्ना द्वाराधिपः श्रीमान् ज्वलनार्कसम...
द्वाराध्यक्षो द्विजश्रेष्ठः सजलाम्बुदसन्निभः...
उत्तरे तु शुभे द्वारे ब्रह्मयोनिरिति स्मृत...
नाम्ना परमयस्तस्मिन् स्थितः सन्ध्यारु...
तस्मिन् पुरवरे श्रेष्ठे रराम भगवान् प्रभुः...
प्रजापतिः सुरश्रेष्ठो वेदसांख्यविशारदः ...
अमृता नाम विख्याता नदी तस्मिन् पुरं...
पद्मनीलोत्पलयुता शुभकाञ्चनबालुका...
पिबन्ति ते सुसंहृष्टास्तत्तोयं पुरवासि...
तत् पीत्वा च जरा नैव न शोको न ...
तत्र यान्ति महात्मानो वेदाध्ययनचिन्त...
सुप्रभाः शुभकर्म्माणः सत्यसिद्धा जितेन्द्रि...
क्रतुदानप्रसक्ताश्च गुरूणाञ्च प्रिये रता...
ये च भिक्षामुपासन्ते तीर्थायतनवासि...
धर्म्मेषु निरता ये च विप्राः क्रोधविवर्ज्जि...
ये च ध्यानपरा नित्यं योगे च निरता...
सांख्यध्यानपरा विप्रास्तेषां वै प्रत्यक्षे...
विशुद्धानि च कर्म्माणि ये चरन्ति तद्...
ते यान्ति परमं स्थानं शोक-मोहविव...
कल्पायुतसहस्राणि वर्त्तयन्ति सुखानि...
कर्म्मलोकान्तरं प्राप्य यजन्ति विधिपू...
शौचाचारसमायुक्तास्ते लभन्ते परं ...
ज्ञानेनैव च तत् स्थानं प्रयान्ति परं...
सत्त्वयुक्ता महात्मानो जितक्रोधा जि...
प्राजापत्यमिदं स्थानं कीर्त्तितञ्च समा...
एवमेतानि विप्रर्षे भूधरेन्द्रस्य धीम...

वीणि त्रिभिश्च भुवनैरात्मस्थानीकृतानि वै।
ते वै भद्रादिकयुता यावद्गान्ति सुरेश्वराः ॥ ८३
मेघा भूत्वानुगर्ज्जन्ति विद्युन्माला इवाम्बरे।
ग्रहनक्षत्रताराश्च ते भवन्ति महेश्वराः ॥ ८४
कामगाः सर्व्वसिद्धार्था रमन्ते भवने सुराः।
इदं स्वयम्भुवाख्यातं पठेत् पर्व्वणि पर्व्वणि ॥ ८५
लभतेऽभीप्सितान् कामान् मोहशोकविवर्ज्जितः ॥८६
इदं परमं पवित्रं शुभं तच्च
कथितं विपुलं मया मुनीन्द्र।
पठति स महापातकोऽपि ब्रह्मन्
परमपदमुपैति शिवप्रसादात् ॥ ८७

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां शिवपुरवर्णनं नाम
दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः।

व्यास उवाच।

भगवन् श्रोतुमिच्छामि माहात्म्यं पुण्यकर्म्मणः।
तानि स्थानानि रुद्रस्य यथावदनुपूर्व्वशः ॥ १
भूराद्या ब्रह्मलोकान्ताः सत्यलोकाः प्रकीर्त्तिताः।
ण्डस्याभ्यन्तरे सर्व्वमुत्पन्नं तद्ब्रवीहि मे ॥ २

सनत्कुमार उवाच।

एवं शतसहस्राणि योजनानां प्रमाणतः।
स्थितं ब्रह्मसदनं द्विधा वैष्णवमुच्यते ॥ ३
णावात् कोटि विज्ञेयं योजनानां प्रमाणतः।
हेश्वरपदं व्यास यत्र देव उमापतिः ॥ ४
ह्मलोकञ्च वै षष्ठं विष्णुलोकन्तु सप्तमम्।
अष्टमं रुद्रलोकन्तु एतदुक्तं त्रिविष्टपम् ॥ ५
एवं त्रिविष्टपं तत्र देवानाममितौजसाम्।
ब्रह्म-विष्णु-महेशानां मनुभिश्च समन्वितम् ॥ ६
तस्मात् त्रिविष्टपस्यैव द्विजार्द्धेन प्रमाणतः।
रुद्रलोकेतिविख्याते योगिनां गतिरुच्यते ॥ ७
शतं रुद्रसहस्राणि विष्णुकोटिशतानि च।
शिवप्रसादात् क्रीड़न्ति सर्व्वे विगतकल्मषाः ॥ ८
सर्व्वे कुसुमगन्धाढ्याः खड्ग-यष्टिधरा अपि।
शूलिनो दंष्ट्रिणश्चैव सर्व्वे विगतमत्सराः ॥ ९
चन्द्रार्द्धमौलिनः सर्व्वे सर्व्वे वृषभगामिणः।
सर्व्वे ब्रह्मपुरस्थाश्च सर्व्वे विष्णुपुरस्य च ॥ १०
अमलास्ते महात्मानस्त्रैलोक्ये सुविशारदाः।
सर्व्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका ॥ ११
न तत्र चन्द्राकौं वायुश्च प्रकाशेते न वाति च।
न यान्ति देवतास्तत्र चन्द्राङ्कितविभूषणाः ॥ १२
स्वयं प्रत्यक्षवरदाः सर्व्वे एव प्रकाशन्ते।
प्रासादहर्म्यप्रमालानि गोपुरे लक्षणानि च ॥ १३
तत्र वै ब्राह्मणैः सार्द्धं गृहस्थाः सत्पथे स्थिताः।
अर्च्चयन्ति महादेवं जपन्ति शतरुद्रियम् ॥ १४
गन्धधूपादिभिश्चैव सदा यजन्ति शूलिनम्।
सर्व्वपापविनिर्म्मुक्ता गृहस्थाः सूर्य्यवर्च्चसः ॥ १५
महादेवप्रसादेन रुद्रलोकं व्रजन्ति ते।
सर्व्वे लोका अधस्तात् तु द्विगुणेन प्रमाणतः ॥ १६
भुवनानां प्रभुस्थानं द्वितीयं समुदाहृतम्।
तृतीये तु महायोगी भूतैः परिवृतोऽरमत् ॥ १७
तत्रापि भवनं दिव्यं मायिशवसतिः स्मृता।
गृहाणि चैव दिव्यानि प्रचुराणि महान्ति च ॥ १८
भवलोको हरेश्चैव द्विगुणेन प्रमाणतः।
सर्व्वं नाम प्रभुस्थानं चतुर्थं समुदाहृतम् ॥ १९
अग्निस्थानं परं दिव्यं पञ्चमं समुदाहृतम्।
अग्निप्रवेशं यः कुर्य्यात् सिद्धेऽग्नौ जुहुयाच्चिरम् ॥२०
अग्निस्थानात् परत्वेन द्विगुणं तत्प्रमाणतः।
उग्रं नाम प्रभुस्थानं षष्ठं तत् समुदाहृतम् ॥ २१
तत्र पाशुपतैः सार्द्धं योगिभिः परमेश्वरः।
अनुग्रहार्थं लोकानां क्रीड़ते भस्मगुण्ठितः ॥ २२
दम-प्रशमसंयुक्ता भूतानामभयप्रदाः।
यथोक्तकारिणो दान्ता योगिनस्तत्परायणाः ॥ २३
भैक्षचर्य्याव्रता नित्यं ध्यानतत्परपूजकाः।
यान्ति पाशुपतं स्थानं पुनरावृत्तिदुर्लभम् ॥ २४
तस्मात् पाशुपतात् स्थानाद्द्विगुणेन प्रमाणतः।
माहेश्वरं परं स्थानं सप्तमं समुदाहृतम् ॥ २५
तत्र देवो महादेवो महाकालो महेश्वरः।
माहेश्वरैः परिवृतो वसते भूतभावनः ॥ २६
तत्र वै सर्व्वलोकेश ईश्वरः कामरूपधृक्।

आविश्य सर्व्वभूतानि लोकानन्दं करोति वै ॥ २७
न तेषां परिसंख्यानं प्रमाणं वापि विद्यते ।
देवलोकसहस्राणि ब्रह्मलोकशतानि च ॥ २८
ईप्सितांस्तु सृजत्येष भूतानामीश्वरो यतः ।
अतःपरं द्विजश्रेष्ठ शिवस्थान(क)मिति स्मृतम् ॥२९

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायामेकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

ऋषय ऊचुः ।

यत् परं तच्छिवस्थानं त्वया प्रोक्तं महामुने ।
तदहं श्रोतुमिच्छामि यदि गुह्यं न ते प्रभो ॥ १

सनत्कुमार उवाच ।

शृणु विप्रा इदं स्थानं शिवस्य परमात्मनः ।
यन्न पश्यन्ति दुर्वृत्ता ब्रह्माद्या देवसत्तमाः ॥ २
सांख्या वाप्यथवा योगा न विदुस्तद्विदो जनाः ।
न च विन्दन्ति ब्रह्मास्तु उमा न च गणेश्वरः ॥ ३
न विष्णुर्न च रुद्रश्च न चान्ये द्विजसत्तमाः ।
तस्यैव च प्रसादेन यथा ज्ञातं तथा शृणु ॥ ४
शतं कोटिसहस्राणां योजनानां प्रमाणतः ।
तत्रोपपीठं देवस्य यत्र युक्तः शिवोऽव्ययः ॥ ५
तस्योन्नते शुभे नेत्रे सितासितसमप्रभे ।
सद्भावप्रभवेणादौ उमा चैव यशस्विनी ॥ ६
वामनेत्राद्विनिष्क्रान्ता उमा देवी च सुव्रता ।
वामपार्श्वोपविष्टा च तस्मादै वामलोचना ॥ ७
दक्षिणान्नयनान्मुक्तो जलबिन्दुः सितप्रभा ।
सा सर्व्वेषु च लोकेषु गता वै भूर्भुवादिकम् ॥ ८
उपस्थायिमां गां प्राप्ता तस्माद्गङ्गेति चोच्यते ।
नेत्राभ्यां प्रथमाज्जाता गङ्गेति द्विजसत्तमाः ॥ ९
हरस्य योगयुक्तस्य द्वितीयं कामखोद्भवः ।
ब्रह्मणो यत्नशीलस्य ईश्वरेण महात्मना ॥ १०
तत् तृतीयन्तु विज्ञेयं कपालवदनं मया ।
विष्णुचक्रं चतुर्थन्तु पञ्चमं दक्षसम्भवः ॥ ११
षष्ठकन्तु यदा देवी हिमवन्तं महामुने ।

(क) शिवस्थानमिति पुस्तकान्तरे पाठः ।

तरुणादित्यसङ्काशैः रुद्रैः परिवृतोऽव…
द्वितीयन्तु परीवारं ततो द्विगुणविस्तर…
रुद्राणां हेमवर्णानां त्रिंशत्कोट्यः प्रकी…
अपरा कृष्णवर्णानां कोट्योऽशीतिर्द्विजो…
पञ्चमन्तु परीवारं ततो द्विगुणविस्तरम्…
षष्ठन्तु सप्तमञ्चैवं ये रुद्रास्तान् निबोधत…
मनःशिलाभा विमला दृष्टा निर्द्दिश्यते…
एवमष्टपरीवारं मानसन्तु महात्मनः ।
न शक्यं तस्य विज्ञानं दृष्टान्ते तद्विचार…
सर्व्वे ब्रह्मपुरोगाश्च सर्व्वे विष्णुपुरःसरा…
समर्थास्ते महात्मानस्त्रैलोक्यस्य सुरेश्वरा…
एवं यो वदति स्थानं शुद्धं परमनामयम्…
सुरापोऽथ पितृघ्नो वा गोघ्नो वा गुरुतल्प…
सोऽपि गच्छेत् परं स्थानं लिङ्गं शिवमना…
किं पुनः शुचयो दान्ता महेश्वरपरायणा…
एवं ब्रह्मक्रियायोगी लोकानां भूतिवर्द्धि…

इति श्रीशैवे महापुराणे सनत्कु…
संहितायां शिवमाहात्म्यं नाम…
द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ।

व्यास उवाच ।

माहात्म्यं सर्व्वभूतानां प्रभुत्वं वर्त्तते शि…
विधिना तुष्येत केन कपर्द्दी वृषवाहनः…

सनत्कुमार उवाच ।

शृणु व्यास इमां वाणीं सर्व्वपापभयाप…
विधिना येन तुष्येत लोकानां भुवनेश्वर…
तमहं कीर्त्तयिष्यामि शृणु तत्त्वेन मे…
मेरुपर्व्वतमासाद्य देवा यत्र महोरगा…
ईश्वरस्य च माहात्म्यं श्रोतुकामाः…
नमस्कृत्वा प्रवक्ष्यामि पुराणं ब्रह्मनिर्मि…
तस्मिन् विभीषणो गत्वा सत्यशान्ती…
विनीतवेशो भवनमीशानं परिपृच्छति…
विधिना केन धर्मेण तुष्येत् स परमेश…
एतन्मे संशयं देव ब्रूहि त्वं वृषभध्वज…

ईश्वर उवाच।
सत्यं शृणु महाबाहो यस्मात् त्वं परिपृच्छसि।
विभीषण महाराज शृणु गुह्यं परं मम ॥ ७
छागलाङ्गं भद्रकर्णं गोकर्णञ्च विशेषतः।
अविमुक्तञ्च ओङ्कारं पञ्चायतनमुत्तमम् ॥ ८
एतान् दृष्ट्वा लभेन्मोक्षं गुह्यमेतदुदाहृतम्।
अविमुक्ते विशेषेण सदा सन्निहितो ह्यहम् ॥ ९
ओङ्कारं चिन्तयानस्य तस्य तुष्टोऽस्म्यहं सदा।
सोऽश्वमेधफलञ्चैव लभते नात्र संशयः ॥ १०
यत्र साक्षात् स्थितो देवो रुद्रावासे तु मुक्तिदः।
मम चैव पुरं तत्र दुर्लभञ्चाकृतात्मभिः ॥ ११
अग्निप्राकारसंयुक्तं परिक्षिप्तं समन्ततः।
हरिश्चन्द्रपदे रम्ये रुद्रकोटिर्महामुनिः ॥ १२
योगीश्वरे सुवर्णाख्ये तथैव वाति केशवः।
भद्रदण्डी महाकालो देवस्तरुवने सदा ॥ १३
भैरवे कमले चैव विल्लिकारोहणे तथा।
कालञ्जरे उग्रसं वै कर्कटेश्वरनाम च ॥ १४
भूतेश्वरे वामकूटो विश्वस्थानेश्वरेति च।
गुह्यातिगुह्यकेदारे तयोर्मध्ये महेश्वरः ॥ १५
देवदारुवने पुण्ये वासो यत्र सदा मम।
गुह्यस्थानपवित्राणि ममैतानि विभीषण ॥ १६
ये तु व्रजन्ति मच्चित्ता मद्भक्ता मत्परायणाः।
ते श्रेष्ठाः सर्व्वभूतानां भवन्तीह विभीषण ॥ १७
अयुतान्यर्व्वुदान् कोटीस्तथा पद्मायुतानि च।
क्रीड़न्ति रुद्रलोकांस्तान् स धर्म्मो यैस्तु राध्यते॥१८
तेषां समस्तयुक्तानां पुरुषाणां विशेषण।
म्लेच्छ-स्त्री-नपुंसकानान्तु क्रूराणां पापकर्म्मणाम् १९
यत्र तत्र मृतानान्तु ध्रुवं माहेश्वरी गतिः।
अष्टौ गुह्यपवित्राणि ये यजन्ति क्षितौ नराः ॥२०
तेषां तुष्टः प्रयच्छामि गाणपत्यं विभीषण।
ते तु मां प्रतिपद्यन्ते मद्भक्ता मत्परायणाः ॥ २१
सर्व्वपापविनिर्म्मुक्ता लभन्ते परमां गतिम्।
किं तेषां यज्ञदानेन क्रियाभिश्च विभीषण ॥ २२
मां प्रपद्य लभन्त्येव यज्ञदानफलान्यपि।
कृत्वा तपो महाघोरं यत् फलं लभते नरः ॥ २३
स वै ममार्च्चनादेव लभते फलमुत्तमम्।
प्रयागे माघमासस्य स्नात्वा यल्लभते फलम् ॥ २४
तत् फलं व्यास सकलं लभते नात्र संशयः।
अहोरात्रशतं स्नात्वा यत् फलं लभते नरः ॥ २५
चान्द्रायणशतं कृत्वा यत् फलं लभते नरः।
तत् फलं लभते मर्त्यो मम लिङ्गादिपूजने ॥ २६
हिरण्यानां सहस्रेण यत् फलं प्राप्यते नरैः।
गोमूत्रयावकाहार-शाकभिक्षाशनैस्तथा ॥ २७
यत् फलं लभते मर्त्यो लभते तन्ममार्च्चनात्।
तिलप्रस्थशतान्यष्टौ दत्त्वा विप्राय यत् फलम् ॥ २८
तत् फलं लभते मर्त्यो मम लिङ्गार्च्चने कृते।
ब्रह्मघ्नः पितृहा गोघ्नः सुरापो गुरुतल्पगः ॥ २९
लिङ्गार्च्चनरतास्ते ये प्राप्नुवन्ति गतिमुत्तमाम्।
पुण्यन्तु लभते नित्यं लिङ्गार्च्चनाद्विभीषण ॥ ३०
तपसा मनसा चैव दानेनैव तु यत् सदा।
अभ्यासेनैव तत्त्वज्ञैर्व्रतैर्योगपरायणैः ॥ ३१
तत् सर्व्वं लभते प्राज्ञो मम लिङ्गार्च्चने रतः।
अहं कर्त्ता च हर्त्ता च स्रष्टा चापि युगे युगे ॥ ३२
प्रभवः सर्व्वभूतानां महात्मा नात्र संशयः।
अहं ब्रह्मा च विष्णुश्च सोमश्चाहं महामुने ॥ ३३
यत्किञ्चिद्दृश्यते लोके सर्व्वञ्चाहं विभीषण।
कामश्चैवाथ वायुश्च नाना ऋषय एव च ॥ ३४
पूज्यमाने प्रमाणे च अहं कृतिरसंशयः।
एवं हि धनदो वह्नी भास्करः सोम एव च ॥ ३५
वृषो धर्म्मश्च स्कन्दश्च सर्व्वञ्चाहं विभीषण।
वसन्तो ग्रीष्मकालश्च हेमन्तः शिशिरस्तथा ॥ ३६
प्रावृट्कालश्च विज्ञेयः शरत्कालो महानदी।
वासुकी तक्षकश्चैव अनन्तो नागराट् तथा ॥ ३७
पर्व्वतो मन्दरो मेरुः कैलासो गन्धमादनः।
मेरुश्चाहं त्रिकूटश्च पारियात्रश्च पर्व्वतः ॥ ३८
चन्द्रो बुधश्च शैलेन्द्रो मैनाकश्च विभीषण।
प्रह्लादश्च गतह्रादः क्षीरोदेक्षुरसस्तथा ॥ ३९
लवणश्चैव विज्ञेयो लोहितश्च विभीषण।
स्थावरं जङ्गमश्चैव अहमेको न संशयः ॥ ४०
वर्षं मासाश्च पक्षश्च अहोरात्रं विभीषण।
ममार्च्चनरतो नित्यं यश्च कामयते नरः ॥ ४१
मम सत्यपरो यश्च लभते तद्विभीषण।

दीपप्रदानं यो दद्याद्विप्राय शुद्धमानसः ॥ ४२
तेन दीपप्रदानेन मत्पुरं याति मानवः ।
स्वर्णदानन्तु यो दद्याद्गाणपत्यं नयाम्यहम् ॥ ४३
अर्घ्यपात्रप्रदानेन धूपदानेन यत् फलम् ।
दास्यामि च गतिं पुण्यां गाणपत्यञ्च दुर्लभम् ॥ ४४
यज्ञैर्बहुविशिष्टान्नैर्यत् फलं लभते द्विज ।
तत् फलं लभते विप्रो मम लिङ्गाभिषेचनात् ॥ ४५
यथाभिलषितं पुण्यं ततः सत्फलवान् भवेत् ।
एवं प्रक्षाल्य दोषांस्तु नेष्यामि परमां गतिम् ॥ ४६
कर्म्मणा मनसा वाचा देहेनापि च यत् कृतम् ।
ममार्च्चनरतानाञ्च तेषां पापं न विद्यते ॥ ४७
यस्तु संवत्सरं पुण्यं पूजयेदेकलिङ्गकं ।
तस्य तुष्टः प्रयच्छामि गाणपत्यं न संशयः ॥ ४८
प्रभासञ्च प्रयागञ्च नैमिषं पुष्करं तथा ।
मनो यस्य न मुच्येत तस्य तीर्थं स्वके गृहे ॥ ४९
तीर्थकोटिसहस्रेषु न कदाचिन्नराधमाः ।
ममार्च्चनगतं पुण्यं लभन्ते च विभीषण ॥ ५०
न मां पश्यन्ति ते मूढ़ा मनसा ये मलीकृताः ।
अग्निप्रवेशनं कृत्वा तथा मासोपवासकम् ॥ ५१
यत् फलं लभते मर्त्यो लभते तन्ममार्च्चनात् ।
कन्दरेष्वथवारण्ये गृहे वापि समाहितः ॥ ५२
यो मामर्च्चयते नित्यं तस्य गाणेश्वरी गतिः ।
यश्चैनं पठते नित्यं यश्चैनं कीर्त्तयेन्नरः ॥ ५३
सर्व्वपापविनिर्म्मुक्तो रुद्रलोके गतिं लभेत् ।
यश्चैवं नियतो भूत्वा माहात्म्यं धारयिष्यति ॥ ५४
न गच्छेन्नरकं विद्वान् महाघोरं भयावहम् ।
चन्द्रार्कौ न प्रकाशेते यस्मिन् देशे पुरा सदा ॥ ५५
प्रकाशन्ते हि मनुजास्तस्मिन् देशे सुतेजसा ।
एष मन्त्रो हि जप्यश्च हव्यकव्ये विभीषण ॥ ५६
माहात्म्यन्तु सुरश्रेष्ठ सर्व्वभूतनमस्कृतम् ।
माहात्म्यं मे ततः पुण्यं पठिष्यन्ति नराः शुचि ॥ ५७
धारयिष्यन्ति ये चान्ये खड्गधारसुधाशुचि ।
न तेषां किल्बिषं किञ्चिन्मयि तुष्टे भविष्यति ॥ ५८

विभीषण उवाच ।

नमस्ते सर्व्वभूतेश सर्व्वतो विश्वतोमुख ।
अव्ययस्याप्रमेयस्य पुराणः पुरुषोत्तमः ॥ ५९
त्वं वायुस्त्वं हुताशश्च त्वं शिवो दक्षिणाशु...
त्वं शुचिः सागरश्चैव भक्तानाञ्च सुरेश्वरः ॥
एषोऽहं ते सुरश्रेष्ठ सर्व्वभूतनमस्कृत ।
अष्टौ कामान् प्रयच्छस्व अक्षहस्त महा...
त्वं गतिः सर्व्वभूतानां शरणं त्वं न संशयः
रक्षस्व वरमुख्यैस्त्वं परमोऽस्यृषिपूजितः ॥
भवान् मोक्षो भवानिन्द्रो भवानग्निः सना...
भवान् धर्म्मेषु पुण्येषु सङ्कल्पश्च मनीषिणाम्
त्वञ्च तुष्टिर्वपुर्मेधा बुद्धिः काम्ये मनस्तथा ।
शिवं पुण्यं प्रपश्यन्ति देवा ऋषिगणास्तथा
भवान् मोक्षश्च शान्तिश्च भवान् क्षेत्रञ्च शा...
भवांस्तु सर्व्वलोकानां नित्यं हर्षविवर्द्धनः ।
भवान् क्षेत्रं विनिर्ज्जित्य सिद्धत्वाय गमि...
नमस्ते भगवन् रुद्र नमस्ते भगवन् शिव ॥
नमस्ते त्रिषु लोकेषु नमस्ते परतन्त्रिषु ।
सर्व्वतःपाणिपादान्त सर्व्वतोऽक्षिशिरोमुख ॥
सर्व्वतःसर्व्वतोमूर्त्तिरप्रमेय नमोऽस्तु ते ।
अनागतं न जानामि गतिं नैव च नैव च ।
योगेश्वर महादेव योऽसि सोऽसि नमोऽ...

महेश्वर उवाच ।

यश्चैनं पठते नित्यं शिवप्रोक्तमनिन्दितः ॥
विभीषण यथान्यायं नित्यं देवेन पूजितम्
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ।
व्रतं ब्रह्मसमायुक्तो लिङ्गं योऽभ्यर्च्चयेत् स...
पठेद्वा शृणुयाच्चैव चतुर्द्दश्यष्टमीषु च ॥ ...
यस्तु लिङ्गे भवेद्भक्तः श्रद्दधानश्च यो भवेत्
तस्य देयमिदं शास्त्रमन्यथा न प्रकाशयेत् ।
महेश्वरस्तवं श्रुत्वा स्वर्गं गच्छेन्न संशयः ।

इति श्रीशैवे महापुराणे सनत्कुमारसं...
त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्द्दशोऽध्यायः ।

व्यास उवाच ।

देवयज्ञफलानीह दानतीर्थफलानि च ।
उपवासफलञ्चैव दानानां तपसः फलम् ॥

अकृत्वा फलमेतेषां ब्राह्मणो विन्दते कथम्।
एतन्मे संशयञ्चैव तत् सर्व्वं वक्तुमर्हसि ॥ २

सनत्कुमार उवाच।

यत्र वा कौशिकी गङ्गा देवी कामार्थमोक्षदा।
कुरुक्षेत्रं प्रयागञ्च नैमिषं पुष्करं तथा ॥ ३
त्रिस्रोता च पयोष्णी च तृतीया गण्डकी तथा।
ब्रह्मावर्त्ता नदी शुभ्रा यमुना चातिपावनी ॥ ४
गङ्गाद्वारं सहस्राख्यं भद्रकर्णह्रदस्तथा।
दृषद्वती करतोया लोहिता च महानदी ॥ ५
सरयूर्गण्डकी चैव सागरः सरितां पतिः।
कोका नद्यारुणा ताम्रा रम्यः शोणो महाह्रदः ॥ ६
गोदावरी नर्म्मदा च नदी वेत्रवती तथा।
कावेरी कृष्णवर्णा च वितस्ता च महानदी ॥ ७
सारस्वतानि तीर्थानि कीर्त्तितानि मनीषिभिः।
शिवलिङ्गप्रणामस्य कलां नार्हन्ति षोड़शीम् ॥ ८
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च।
षष्टितीर्थसहस्राणि परिसंख्या प्रकीर्त्तिता ॥ ९
विविधानि च तीर्थानि ब्राह्मणो योऽधिगच्छति।
अक्रोधनः शुचिर्दक्षः सर्व्वं तीर्थफलं लभेत् ॥ १०
सर्व्वेषामेव तीर्थानां यत् फलं परिकीर्त्तितम्।
मासेन तदवाप्नोति लिङ्गं योऽर्च्चयते ध्रुवम् ॥ ११
मुच्यते विधिना युक्तो मुहूर्त्तात् तदवाप्नुयात्।
लिङ्गोद्भवमिदं दिव्यं त्रैलोक्यं सचराचरम् ॥ १२

व्यास उवाच।

कथं लिङ्गोद्भवं नाम त्रैलोक्यं सचराचरम्।
कथञ्च प्रलयं वापि लिङ्गे गच्छति नित्यशः ॥ १३
लिङ्गार्च्चनविधिः को वा गतिर्वा कुत्र शाश्वती।
कथञ्च तुष्यते देवो भक्तिमान् भक्तिवत्सलः ॥ १४
कस्माच्च दक्षिणां मूर्त्तिमीश्वरस्यामितौजसः।
ऋषयः पितरो देवा यजन्ते संशितव्रताः ॥ १५
रुद्रलोकं नरो गत्वा पुनरावर्त्तते कथम्।
कथं न पुनरावृत्तिर्ज्ञातुमिच्छामि तत्त्वतः ॥ १६

सनत्कुमार उवाच।

अहं ते कथयिष्यामि श्रूयतां मे द्विजोत्तम।
यथा लिङ्गोद्भवं व्यास त्रैलोक्यं सचराचरम् ॥ १७
लिङ्गञ्च यादृशं तस्य देवदेवस्य धीमतः।
प्रलयञ्च यथा लिङ्गे तन्मे निगदतः शृणु ॥ १८
यथा च पुनरावृत्तिर्यथा नावर्त्तते पुनः।
मया श्रुतं यथा पूर्व्वं गदतो ब्रह्मणः स्वयम् ॥ १९
महेश्वरस्य सृष्ट्यादौ प्रकृत्या सह सङ्गतः।
प्रादुर्भूतो महावायुः तस्मादग्निरजायत ॥ २०
लिङ्गं तस्मात् समुद्भूतं सूर्य्यराशिसमप्रभम्।
तच्च सम्भवते लिङ्गं काञ्चनं रत्नभूषितम् ॥ २१
शतयोजनविस्तीर्णं शतशाहस्रमुत्थितम्।
लिङ्गराजं सुविपुलं प्रशान्तादित्यवर्च्चसम् ॥ २२
तत्र ब्रह्मादयो देवा यज्ञाश्च सह विष्णुना।
तल्लिङ्गं समनुप्राप्ता हृतसंज्ञाः सुदुःखिताः ॥ २३
उमापतिविरूपाक्षो नीलकण्ठो विलोहितः।
सत्त्वं रजस्तमश्चैव क्षेत्रज्ञः प्रकृतिस्तथा ॥ २४
सांख्ययोगस्तथा नद्यो गिरयः सागरा ह्रदाः।
पृथिवी ह्यन्तरिक्षञ्च दिशश्च विदिशस्तथा ॥ २५
नक्षत्राणि ग्रहाश्चैव मासाः संवत्सरास्तथा।
लीयन्ते तत्र लिङ्गे च ईश्वरस्य महात्मनः ॥ २६
लिङ्गादुत्पादयामास त्रीन् लोकान् सचराचरान्।
ब्रह्माणमसृजत् पुत्त्रं प्रजापत्येऽभ्यषिञ्चयत् ॥ २७
कृत्वा प्रजापतिं देवो देवलोकाग्र्यमीश्वरम्।
पुनर्विष्णुञ्च सृजते लीलया गर्भसम्भवम् ॥ २८
स्तुतिं संक्षिप्य सर्व्वेषां तत्र वान्तरधीयत।
एवं लिङ्गोद्भवं सर्व्वं त्रैलोक्यं सचराचरम् ॥ २९
प्रलयञ्च यथा लिङ्गे तन्मे निगदतः शृणु।
पुरा ह्येकार्णवे व्यास हरस्यामिततेजसः ॥ ३०
प्रभूतं मध्यवृत्तञ्च जले लिङ्गमदृश्यत।
ज्वालामालार्च्चिभिर्व्याप्तं सर्व्वभूतभयङ्करम् ॥ ३१
यो ह्यग्निरूपमत्यर्थं बिभर्त्यपि च रोदसी।
एवंभूतञ्च विष्टभ्य तिष्ठति ज्वालमण्डले ॥ ३२
ज्वालाभिस्तस्य लिङ्गस्य त्रैलोक्यं सचराचरम्।
दह्यन्ते सर्व्वभूतानि रुद्रमायाविमोहिताः ॥ ३३
ससुरासुरगन्धर्व्वाः सयक्षोरगराक्षसाः।
पृथिव्यापस्तथा वायुराकाशस्तेज एव च ॥ ३४
यानि यानि च भूतानि स्थावराणि चराणि च।
तान्याक्रम्यन्ते सर्व्वाणि चराणि च भयस्थले ॥ ३५
तेषामाक्रम्यमाणानां वेगार्थं मूर्च्छितोऽनिलः।

करोति भैरवं नादमाकाशं पूरयन्निव ॥ ३६
जीवमात्राणि सर्व्वाणि दग्धानि तु यथाग्निना ।
संवृत्तानीह तिष्ठन्ति धान्यानि च दहन्निव ॥ ३७
ततो ब्रह्मा सुरश्रेष्ठो देवाश्च सह विष्णुना ।
लिङ्गं ते समनुप्राप्ता नष्टसंज्ञाः सुदुःखिताः ॥ ३८
भीताश्चैव निरीक्षन्तः शिवमायाविमोहिताः ।
अवशास्तत्र ते सर्व्वे चन्द्रादित्यैर्ग्रहैः सह ॥ ३९
दिवौकसश्च ब्रह्मा च रुद्रस्यामिततेजसः ।
ततः सुप्ताश्च ते देवाश्चतुरन्तो यशस्विनः ॥ ४०
उपलभ्य स्मृतिं देवास्तत्रैव शरणं गताः ।
स्तुवन्ति च महादेवं सर्व्वभूतपतिं शिवम् ॥ ४१
ब्रह्मा विष्णुश्च शक्रश्च जगुस्तत्र उमापतिम् ।
त्वं कुमारः कुमारस्त्वं जातस्त्वं सर्व्वतोमुखः ॥ ४२
ओङ्कारस्त्वं वषट्कारो दण्डनीतिस्तथैव च ।
विशन्ति हृदयं सर्व्वे वृहस्पतिपुरोगमाः ॥ ४३
ब्रह्मा देवाश्च यज्ञाश्च शक्रश्च सह विष्णुना ।
त्वत्तः प्रसूता देवेश सर्व्वभूतभवोद्भव ॥ ४४
एवं माया परा सूक्ष्मा यया पश्याम ईश्वरम् ।

शिव उवाच ।

योगिनश्च महारूपा ज्ञानैश्वर्य्यसमन्विताः ॥ ४५
अजराश्चामराश्चैव मत्प्रसादाद्भविष्यथ ।
स्वच्छन्दगतयो नित्यं स्वर्गलोके महेश्वराः ॥ ४६
एवमुक्त्वा तु भगवांस्तत्रैवान्तरधीयत ।
एवमेकार्णवे घोरे सर्व्वभूतविनाशने ॥ ४७
आत्मभावप्रयुक्तांस्तु भगवान् व्यथते ध्रुवम् ।
सर्गान्ते प्रलये वृत्ते सर्गकाल उपस्थिते ॥ ४८
पुनः सृष्टेषु लोकेषु ब्रह्मा तत्र प्रजापतिः ।
वाजपेयशतैरिष्ट्वा यल्लभेत द्विजोत्तम ॥ ४९
विप्रो लिङ्गं त्रिरात्रेषु रुद्रभक्त्या तदश्नुते ।
अश्वमेधसहस्रस्य सम्यगिष्टस्य यत् फलम् ॥ ५०
मासेन तदवाप्नोति रुद्रलिङ्गार्च्चने रतः ।
राजसूयसहस्रस्य सम्यगिष्टस्य यत् फलम् ॥ ५१
त्रिभिर्मासैरवाप्नोति शिवलिङ्गार्च्चने रतः ।
सर्व्वतीर्थाभिषेकञ्च सर्व्वदानफलानि च ॥ ५२
सर्व्वयज्ञफलञ्चैव उपवासफलानि च ।
ततोऽपि विधिना व्यास व्रतानि विविधानि च ॥ ५३

सश्वग्यष्टुश्च यत् पुण्यं त्रिभिर्मासैर्लभेन्नरः ।
सम्यक् फलमवाप्नोति शिवलिङ्गार्च्चने र[तः]
सम्यगिष्टफलाः सर्व्वे शान्ता दान्ताः स[र्व्व]
नव मासान् समाराध्य ब्राह्मणो विजितेन्द्रि[यः]
सर्व्वमेव तदाप्नोति लिङ्गं योऽर्च्चयते भवम् ।
हिमवान् मन्दरो मेरुः कैलासो गन्धमादन
विन्ध्योऽर्ब्बुदः पुरश्चन्द्रो महेन्द्रो मलयस्त[था]
बालखिल्याश्च ऋषयो नैमिषेयास्तपोधनाः ।
याश्चैवाप्सरसो दिव्या ये च मातृगणास्तथा
तारागणा ग्रहगणाः सर्व्वे पितृगणास्तथा ।
चारणोदुम्बराश्चैव विद्याधिज्ञास्तथैव च ।
प्रमाणं परमं ज्ञात्वा लिङ्गं योऽर्च्चयते नरः ।
तस्मिन् बहुगुणां प्रीतिं करोति वृषभध्वज
यत् फलं पाकयज्ञेषु हविर्यज्ञेषु यत् फल[म्]
एकाह्नि तदवाप्नोति विप्रो लिङ्गार्च्चने रतः
तीर्थ्यष्टौ यानि स्थानानि यत् फलं लभते
एकाहं तदवाप्नोति विप्रो लिङ्गार्च्चने रतः
कुमारो ब्रह्मणः पुत्त्रः पुलस्त्यः पुलहः क्र[तुः]
नन्दीश्वरो गणश्रेष्ठो महाकालश्च वीर्यवा[न्]
भृग्वङ्गिरा मरीचिश्च दधीचिश्च यमस्तथा
संवर्त्तः षड्गिगौषुश्च तथा शुक्र-वृहस्पती ।
च्यवनो जमदग्निश्च उतोङ्कोऽगस्तिरेव च ।
दक्षः प्रजापतिः श्रेष्ठो दक्षपुत्त्रास्तु सप्त वै
तथा मनुश्च भगवान् प्रह्लादो नमुचिस्तथा
अत्रिर्वशिष्ठो भगवान् काश्यपश्च महातपाः
गौतमश्च भरद्वाजो विश्वामित्रश्च कोविदः ।
आदित्या वसवो रुद्रा मरुतश्च तथाश्विनौ
साध्या विद्याधरा नागा ऋषयो विश्वदे[वाः]
अर्थो धर्म्मश्च कामश्च वासुकिस्तक्षकस्तथा
कम्बलाश्वतरौ नाग एलापत्त्रस्तथैव च ।
क्षारोदः पुष्करो गङ्गा श्मशानानि च स[र्व्वे]
एवं ते कथितो व्यास उद्भव-प्रलयौ तथा
क्रीडते भगवान् भूतैर्बालः क्रीडनकैरि[व]
एष कारयते कर्म्म तेन स्मो व्याकुलीकृताः
यजामहे तमेवेशं तस्मादिच्छाम वेदितु[म्]
ब्रह्माद्या ऋषयो देवास्तन्मे निगदतः श्रु[णु]

ब्रह्मा विष्णुश्च शक्रश्च चन्द्रादित्यौ समीरणः ।
यमः कालश्च मृत्युश्च वरुणो धनदोऽनलः ॥ ७२
ऋग्वेदः सामवेदश्च यजुर्व्वेदस्तथैव च ।
इतिहासोऽथर्व्ववेदस्तथा गायत्रिरेव च ॥ ७३
संवत्सरं तपो भक्त्या वल्मीकमृत्तिकासु च ।
कर्त्तव्यमुपलेपञ्च शिवलिङ्गस्य चाग्रतः ॥ ७४
शतं सम्मार्ज्जने विद्धि सहस्रमुपलेपने ।
पुष्पोपहारधूपश्च तुल्यं फलमवाप्नुयात् ॥ ७५
दशापराधांस्तोयेन क्षीरेणैव शतं क्षमेत् ।
अपराधसहस्रे तु सर्पिषा स्नपनं भवेत् ॥ ७६
क्षीरस्नानं घृताभ्यङ्गः सघृतं गुग्गुलं तथा ।
एतद्भवाय दातव्यं सदैव वरमिच्छता ॥ ७७
दशसौवर्णिकं पुष्पं यो भवाय प्रयच्छति ।
यं यं कामयते कामं तं तं पूरयते शिवः ॥ ७८
मालया शतसाहस्रया जाप्यं दशगुणं स्मृतम् ।
विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः ॥ ७९
उपांशु स्याच्छतगुणः सहस्रो मानसः स्मृतः ।
तृणान्योषधिगुल्मानि लतावल्लीस्तथैव च ॥ ८०
देवार्थं यस्तु हिंसेत धार्म्मिको न तु हिंसकः ।
तथैव सर्व्ववृक्षाणां पुष्पं पत्रं फलं त्वचम् ॥ ८१
कालजानि सुपुष्पाणि वीजानि शतधा तथा ।
महादेवोपयुक्तानि स्वर्गं यान्ति न संशयः ॥ ८२
श्रद्दधानस्तु यः कुर्य्याच्छुचिः प्रयतमानसः ।
सर्व्वमेतदवाप्नोति लिङ्गे योऽर्च्चयते भवम् ॥ ८३
प्राप्य दुःखं न ते सर्व्वे स्वर्गं यान्ति द्विजोत्तमाः ।
विश्वेदेवाश्च कार्य्येण श्रुतं पूर्व्वं यथा नरैः ॥ ८४
लिङ्गञ्च स्थापयेत् तत्र विधिपूर्व्वं समाहितः ।
संवत्सरन्तु शुश्रूषां कृत्वा तत्र शुचिर्नरः ॥ ८५
पूजाश्च कारयेन्नित्यं तस्य भक्त्या शिवेन वै ।
कल्पकोटिसहस्राणि रुद्रलोके महीयते ॥ ८६
पूजार्थं प्रत्यहं यस्तु गन्धमाल्याहृतं शुभम् ।
यो न सम्पादयेन्मोहात् पापकृन्न स धार्म्मिकः ॥ ८७
सम्पादयेदतः पूजां प्रहृष्टेनान्तरात्मना ।
तस्याः परिचयं कुर्य्यात् तदेव फलमश्नुते ॥ ८८
तञ्च सर्व्वगतं भक्तो भक्तानां भक्तिवत्सलम् ।
सर्व्वभूतोद्भवं सर्व्वं सर्व्वभूतपतिं शिवम् ॥ ८९
अर्च्चयेत् सततं लिङ्गे यदीच्छेत् सिद्धिमात्मनः ।
चिरपर्य्युषितं माल्यं भवस्यापनयेच्च यः ॥ ९०
गोसहस्रफलं पुण्यं प्राप्नुयान्नात्र संशयः ।
अपूर्व्वस्य च लिङ्गस्य शुचिः प्रयतमानसः ॥ ९१
शतजाप्योपहारेण तदेव फलमश्नुते ।
स्त्रियः शूद्राश्च म्लेच्छाश्च ये यान्ये पापयोनयः ॥ ९२
नमस्कारसहस्रेण तदेव फलमाप्नुयुः ।
नमस्कारोऽप्यनुज्ञातो मन्त्रप्रणववर्ज्जितः ॥ ९३
शूद्राणां देवभक्तानां महादेवेन धीमता ।
पुण्याभिरद्भिः स्नानञ्च चन्दनेनानुलेपनम् ॥ ९४
मनोरमैश्च सततं गन्धमाल्यैर्विभूषितम् ।
कुर्य्याद्वै सततं रुद्रे यदीच्छेच्छुभमात्मनः ॥ ९५
धर्म्मलुब्धश्च सततं शिवमभ्यर्च्चयेत् ततः ।
पुष्पवासोपहारैश्च सततञ्च निवेदनैः ॥ ९६
तस्मै प्रीतो महादेवः सर्व्वान् कामान् प्रयच्छति ।
सौवर्णै राजतैः कुम्भैर्मृण्मयोदुम्बरैस्तथा ॥ ९७
स्नापयेद्भगवन्तं हि नियतात्मा च यद्भवेत् ।
अर्घ्यैश्च विविधैः शुद्धैः सशृङ्गारैर्हिरण्मयैः ॥ ९८
इन्द्रनीलैर्महानीलैर्वज्र-वैदूर्य्यकैस्तथा ।
सुकेतकैः प्रवालैश्च तथा मारकतैरपि ॥ ९९
अर्च्चयेच्च सदा रुद्रं सर्व्वभूतसुखावहम् ।
सर्व्ववादित्रनिर्घोषैर्गीतैर्वा विविधैस्तथा ॥ १००
स्तुति-वाद्य-नमस्कारैर्मुखवाद्यैस्तथैव च ।
पशुभिर्धनधान्यैश्च इष्टदारैश्च यैः प्रियैः ॥ १०१
प्राप्तभावप्रयत्नैश्च इष्टदानैर्महेश्वरम् ।
एभिश्चान्यैश्च बहुभिर्विविधैर्नियमैस्तथा ॥ १०२
सततञ्चार्च्चयेद्देवं शुचिः प्रयतमानसः ।
सर्व्वपापविशुद्धात्मा सर्व्वदुःखविवर्ज्जितः ॥ १०३
लोकान् कामानिह प्राप्य रुद्रलोके महीयते ।
एतैश्चान्यैश्च बहुभिर्विचित्रनियमव्रतैः ॥ १०४
त्रिकालमर्च्चयेद्देवं शुचिः प्रयतमानसः ।
सर्व्वपापविशुद्धात्मा सर्व्वदुःखविवर्ज्जितः ॥ १०५
शिवेन कथितं सर्व्वमुपपन्नाय ब्रह्मणे ।
स तेन विधिना युक्तोऽपूजयच्च महेश्वरम् ॥ १०६
मूर्त्तयोऽपि शिवस्यैतास्तन्मे निगदतः शृणु ।
योगमूर्त्तिश्च प्रथमा ऐन्द्री इन्द्रसमा स्थिता ॥ १०७

द्वितीया दक्षिणा मूर्त्तिर्या समावृत्य तिष्ठति ।
तृतीया वारुणीमूर्त्तिः पश्चिमा तुष्टिदा मम ॥ १०८
चतुर्थी स्यात् तु वरदा धनदा सुसुखावहा ।
अधस्तात् पञ्चमी मूर्त्तिश्चचार विधिना तपः ॥ १०९
वेदयज्ञगतिः षष्ठो वैष्णवी गतिरिष्यते ।
उर्द्ध्वा च मूर्त्तिराग्नेयी सर्व्वभूतप्रमर्द्दिनी ॥ ११०
प्रशान्ता निष्कला मूर्त्तिः सर्व्वभूतसुखावहा ।
यतिभिः सेव्यते व्यास जरा-मरणभीरुभिः ॥ १११
अनेन विधिना व्यास यश्च जानाति ईश्वरम् ।
तेन पाशुपतं चीर्णं विमलं व्रतमव्ययम् ॥ ११२
शिवं सर्व्वगतं ज्ञात्वा सर्व्वदुःखैः प्रमुच्यते ।
एवं विज्ञाय मेधावी भैचवृत्तिं समाचरेत् ॥ ११३
एष ते कथितस्तात सम्भवः प्रलयस्तथा ।
मूर्त्तीनां प्रविभागश्च शिवलिङ्गार्चनं तथा ॥ ११४
विषयो विविधाः श्रेष्ठा यैश्च तुष्यति शङ्करः ।
सर्व्वासामपि मूर्त्तीनां पूजार्हा दक्षिणा परा ॥ ११५
सा च सृजति भूतानि तथा संहरते प्रजाः ।
वृत्तिं श्रद्धां सुखं कामं मेधाञ्चैव प्रयच्छति ॥ ११६
विविधान् विन्दते कामान् मूर्त्तिः सा दक्षिणा परा ।
पाराशर्य्य सदा युक्तो दक्षिणामूर्त्तिमर्च्चयेत् ॥ ११७
भावो नयति सर्व्वत्र निष्कलं चाद्वयं ददेत् ।
एतत् ते कथितं व्यास शिवलिङ्गार्च्चनं परम् ॥ ११८
श्रद्धा-कामसमायुक्तास्ते यान्ति परमां गतिम् ।
सर्व्वव्याधिप्रशमनं सर्व्वदुःखविनाशनम् ॥ ११९
दर्शनाच्छ्रवणाद्वापि नामसङ्कीर्त्तनादपि ।
प्रमाणञ्चैव लिङ्गस्य श्रुत्वा पापैः प्रमुच्यते ॥ १२०
स्त्रियः शूद्राश्च म्लेच्छाश्च ये चान्ये पापयोनयः ।
अश्वमेधफलं सम्यग्लभन्ते नात्र संशयः ॥ १२१
श्रद्धाकामसमायुक्तास्ते यान्ति परमां गतिम् ।
शिवनामेतिहासोऽयं ब्रह्मणा समुदाहृतः ॥ १२२
क्रोधमोहप्रशमनो महापातकनाशनः ।
सकृदावर्त्तयेद्देवं भवस्य भवने शुचिः ॥ १२३
अश्वमेधफलं सम्यग्लभते नात्र संशयः ।
यश्चैनं पठते नित्यं यश्चैनं शृणुयान्नरः ॥ १२४
वियुक्तः सर्व्वपापेभ्यो रुद्रलोकमवाप्नुयात् ॥ १२५
इति शैवे चतुर्द्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ।

व्यास उवाच ।

भगवन् श्रोतुमिच्छामि त्र्यम्बकस्य महात्म
स्थानानि यानि लोकेऽस्मिन् येषु सन्निहि
प्रमाणञ्चैव सर्व्वेषां तेषु यच्छत्यनुग्रहम् ।
सतान्तु भजने सम्यक् तुष्यते वा कथं ततः
सनत्कुमार उवाच ।
नमस्ते आदिदेवाय पिङ्गलाय कपर्द्दिने ।
भक्तानुकम्पिने नित्यं सर्व्वदेवस्तुताय च ॥
शृणु व्यास परां वाणीं सर्व्वलोकहितां शु
येषु स्थानेषु भगवान् सान्निध्यं कुरुते सदा ।
नानारूपधरो देवः सर्व्वभूतेषु वर्त्तते ।
नामभिर्विविधैश्चैव स्वयं वै प्राप्यते सदा ॥
ब्रह्मा दिवाकरो विष्णुः स्कन्दश्चाग्निः पुरु
अर्कः सोमः कुबेरश्च वरुणश्चाप्युमापतिः ॥
मरुतः कपिलश्चैव अव्यक्तं बुद्धिरेव च ।
एतैर्नामभिरन्यैश्च अर्च्चयन्ति सदा भवम् ।
यो हि यां देवतां भक्त्या आराधयति स
तस्य तां मूर्त्तिमास्थाय महादेवः प्रसीदति
स्थानानां परिसंख्यानं वक्तुं शक्तो न च
अपि वर्षसहस्रैर्वा समासेन तु मे शृणु ॥ ८
इह लोके तु यान्यष्टौ स्थानानि शृणु तानि
प्रमाणञ्चैव सर्व्वेषां तेषु यो वाप्यनुग्रहः ॥
माहेश्वरीमिमां सृष्टिं शुचिर्भूत्वा निशाम
नाम्ना रुद्रपदं श्रेष्ठं तथा माहेश्वरं पदम्
श्लेष्मातकं तथा प्रोक्तमविमुक्तं महालयम् ।
गोकर्णं भद्रकर्णञ्च स्वर्णाख्यं स्थानमष्टमम् ।
स्थानेष्वेतेषु सततं सान्निध्यं कुरुते भवः ।
अनुग्रहञ्च कुरुते भक्तानां भक्तवत्सलः ॥
देवैर्देवर्षिभिः सिद्धैस्तथान्यैः परमर्षिभिः ।
माहेश्वरे तु भगवान् नित्यं पूज्यस्तु म
द्वियोजनन्तु तत् क्षेत्रं दक्षिणोत्तरतः स्मृत
विस्तरेण तु तावद्धि एवं माहेश्वरं पदम्
प्रविशन्ति मृतास्तत्र परां माहेश्वरीं तनुं
तस्य देवस्य तोषिणा उमया विहितं पुरा ।

अपि पापप्रसक्तोऽपि रुद्रलोकं व्रजेन्नरः ।
यक्षैश्च राक्षसैश्चैव पिशाचैः पन्नगैस्तथा ॥ १७
श्लेष्मातकै च वै देवो नित्यमेवमुपास्यते ।
चतुर्द्दिशं योजनञ्च तत् तु श्लेष्मातकं स्मृतम् ॥ १८
रुद्रसायुज्यमाप्नोति तत्र यस्त्यजते तनुम् ।
देव-दानव-गन्धर्व्वा ऋषयश्च तपोधनाः ॥ १९
सम्पूज्य सततं श्रेष्ठाः सदा रुद्रपदे भवम् ।
द्वियोजनन्तु तत् क्षेत्रं समन्तात् स्थानमुच्यते ॥ २०
गाणपत्यं स लभते मृतो रुद्रपदे नरः ।
त्रिसन्ध्यं तत्र भगवान् सान्निध्यं कुरुते सदा ॥ २१
विष्णुः सोमश्च शक्रश्च आदित्या मरुतोऽश्विनौ ।
अर्च्चयन्ति सुवर्णाख्ये मेरौ नित्यं त्रिलोचनम् ॥ २२
अर्द्धयोजनविस्तीर्णं सुवर्णाख्यं विदुर्बुधाः ।
वाराणस्यान्तु ओङ्कारगम्यो विश्वेश्वरः सदा ॥ २३
पूज्यते भगवान् देवः परमात्मा सनातनः ।
लिङ्गन्तु देवदेवस्य सर्व्वतेजोमयं शुभम् ॥ २४
दुर्लभन्तु सुरैः सिद्धैस्तस्मिन् स्थाने तु तिष्ठति ।
अन्तर्भूतः कलौ व्यास तस्मिन्नायतने प्रभुः ॥ २५
अनुग्रहञ्च कुरुते भक्तानामतिवत्सलः ।
विश्वेश्वरन्तु ओङ्कारं प्रणमन्ति स्तुवन्ति च ॥ २६
अविमुक्ते च ओङ्कारो नित्यं सन्निहितो हरः ।
देवाश्च ऋषयश्चैव तथा राजर्षयः सदा ॥ २७
ध्यानिनो नित्ययोगाश्च प्रशान्ता वीतकल्मषाः ।
वेदविद्याव्रतपराः सिद्धाश्च परमर्षयः ॥ २८
उपासते सदा व्यास पञ्चायतनवासिनम् ।
अचिन्त्या नाम तत्रस्था तनुर्देवस्य निर्व्वृतिः ॥ २९
विशन्ति च महात्मानः परां माहेश्वरीं तनुम् ।
द्वियोजनं ततः क्षेत्रं समन्तात् सर्व्वतोमुखम् ॥ ३०
अतुल्यमिति तत् क्षेत्रमविमुक्तं ततः स्मृतम् ।
ब्रह्मा चाग्निश्च सोमश्च विष्णुरिन्द्रो बृहस्पतिः ॥ ३१
समुद्राश्चैव सरितो द्वीपा ओषधयस्तथा ।
उपासते महाभागं भद्रकर्णं सदाशिवम् ॥ ३२
उज्ज्वलञ्च सुपुण्यञ्च कथितं पूर्व्वमेव च ।
तस्मान्न सदृशं किञ्चित् स्थानमन्यत्र विद्यते ॥ ३३
पुण्यत्वादथ रम्यत्वात् संयोगाच्छङ्करस्य तु ।
तवाहं नियतो व्यास गङ्गाद्वारे भवप्रिये ॥ ३४
ईशानदैवते तस्मिन् नित्यं सिद्धगणैर्वृते ।
अधर्म्ममनसो वापि नाधर्म्मी वसते नरः ॥ ३५
सिद्धास्तपस्यनुरता ब्रह्मावर्त्तस्य दक्षिणे ।
एतन्महाधनं नाम पुराणं पुण्यमुत्तमम् ॥ ३६
तेषु स्थानेषु वै पूर्व्वमृषयः सिद्धिमागताः ।
दिव्या माहेश्वरा भोगाः शक्तिर्यत्राचया परा ॥ ३७
एतत् ते कथितं व्यास यन्मां त्वं परिपृच्छसि ।
स्थानमाहात्म्यमतुलं पुण्यं पापप्रणाशनम् ॥ ३८
अध्येतव्यं ब्राह्मणेन यो वा भक्तो महेश्वरे ।
यथैव वेदाध्ययनं तथा चेदं प्रशस्यते ॥ ३९
नान्यभक्ताय दातव्यं पिशुनाय शठाय च ।
श्लाघिने श्लाघमानाय इमं धर्म्मं प्रकाशयेत् ॥ ४०

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां पञ्चदशोऽध्यायः ॥ १५ ॥

षोड़शोऽध्यायः ।

व्यास उवाच ।

ब्रूह्यन्यद्भगवन् सम्यक् स्थानमाहात्म्यमुत्तमम् ।
सर्व्वाणि यानि तीर्थानि गुप्तान्यायतनानि च ॥ १
अनुग्रहञ्च यत् तेषां पुण्यञ्चैव हि शंस मे ।
न हि मे तृप्तिरस्तीह शृण्वतो वाक्यमुत्तमम् ॥ २
माहात्म्यं देवदेवस्य शङ्करस्य महात्मनः ।
श्रोष्यामि सततं ब्रह्मन् परं कौतूहलं हि मे ॥ ३
स एवमुक्तो भगवान् व्यासेनामिततेजसा ।
सनत्कुमारः प्रोवाच वाचा मधुरया तदा ॥ ४

सनत्कुमार उवाच ।

शृणु व्यास परां वाणीं विचित्रां पापनाशिनीम् ।
मङ्गल्याञ्च पवित्राञ्च पठेत् पर्व्वसु पर्व्वसु ॥ ५
इन्द्रलोकं स गच्छेत् तु धारयंस्तु सदा शुचिः ।
यान्युक्तानि पवित्राणि स्वयं देवेन धीमता ॥ ६
तानि ते कथयिष्यामि तस्मादेकमनाः शृणु ।
छागलाण्डं कुरुण्डं वा मुकुटं मण्डलेश्वरम् ॥ ७
कालञ्जरं वनञ्चैव गदगण्डं स्थलेश्वरम् ।
एतेषु च सदा व्यास भूतसङ्घैर्वृतः प्रभुः ॥ ८
वसते परया प्रीत्या पूज्यमानो दिवौकसैः ।

चतुर्दशप्रयोजनानां सर्व्वेषां हि परिग्रहः ॥ ९
ऋषि-गन्धर्व्वजुष्टानि सिद्धैर्वा चरितानि च ।
स्थानान्येतानि गुह्यानि रुद्रेण सगणेन वै ॥ १०
उषितानि सदा व्यास देवदेवेन शम्भुना ।
प्रथममधिगच्छेत् तु शुचिर्विगतकिल्बिषः ॥ ११
अहोरात्रं वसेच्चैव रुद्रे चैव निवेदयेत् ।
पितृंश्च तर्पयेत् तत्र शृणु तस्यापि यत् फलम् ॥ १२
राजसूयाश्वमेधानि प्राप्नुवन्ति न संशयः ।
उक्तो ह्यनुग्रहस्तेषां पुण्यं वै मुक्तिरेव च ॥ १३
यो वै पातयते प्राणान् शृणु तस्यापि या गतिः ।
असुरो वा सुरो वापि देवेशस्य हितश्च सः ॥ १४
अनौपम्यमथैश्वर्यमिहलोके तु प्राप्य वै ।
विशन्ति तु महादेवं पतितास्त्यक्तजीविताः ॥ १५
मुनिगणपरिवृतं महाविद्यगणैरभिष्टुतं प्रियम् ।
सदैव भवमिह शृण्वतो भवेत् सुदुर्लभा गतिः ॥ १६

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां श्रेष्ठाख्यानं नाम
षोड़शोऽध्यायः ॥१६॥

सप्तदशोऽध्यायः ।

व्यास उवाच ।

उक्तं भगवता सम्यक् पवित्रं स्थानमुत्तमम् ।
फलभोगाः सकामानां बहुशश्च महायशाः ॥ १
प्रोक्तानि यानि गुह्यानि तानि वै वक्तुमर्हसि ।

सनत्कुमार उवाच ।

गुह्यानामपि गुह्यानि शृणु व्यास समाहितः ॥ २
यथा च भगवान् देवः कृतवांश्चाप्यनुग्रहम् ।
पुरा वै ऋषयो व्यासं पप्रच्छुर्दग्धकिल्बिषाः ॥ ३
बालखिल्याश्च मुनयस्तथा भागवताभवन् ।
भक्त्या तुतोष भगवान् भक्तानां भक्तवत्सलः ॥ ४
कृतवाननुग्रहं तेषां दर्शनेन महेश्वरः ।
ते प्रणम्य महात्मानो भूतानामीश्वरं प्रभुम् ॥ ५
जग्मुः प्राञ्जलयो भूत्वा बालखिल्यास्तपोधनाः ।
मनसा प्रार्थितं यच्च तल्लब्धास्ते न संशयः ॥ ६
ततस्ते प्रीतमनसो दृष्ट्वा देवं वृषध्वजम् ।
एष देव परः पारो यद्दृष्टो भगवान् ...
वरैर्वरसहस्रैर्वा दुर्लभं तव दर्शनम् ।
अनुग्राह्या यदि वयं यदि देयो वरः पर...
इच्छामो भगवन् ज्ञातुं गुह्यान्यायतनानि ...
नित्यमुक्तोऽव्ययो देवो भक्तैर्भक्तजनप्रियः ...
एवं प्रसादितस्तैस्तु मुनिभिः पुण्यकाङ्क्षि...
उवाच तानृषीन् सर्व्वान् वाक्येन जीवव...

श्रीमहारुद्र उवाच ।

श्रूयतां परमं गुह्यं येषु नित्यं वसाम्यहम् ।
सृजामि ह्यनुगृह्णामि भक्त्या परमया सन्...
तानि वः सम्प्रवक्ष्यामि तीर्थानि च महौ...
शृण्वन्तु ऋषयः सर्व्वे शुचिश्रद्धासमन्विताः ...
महापुरं चक्रपुरं गुह्यं श्रीपर्व्वतं तथा ।
जाप्येश्वरं ततो गुह्यं गुह्यमाम्राड़िकेश्वरम् ...
तथा महाकालपुरं गुह्यं मध्यमकेश्वरम् ।
देवदारुवनं गुह्यं महाभैरवमेव च ॥ १४
गुह्यान्येतानि विप्रेन्द्रा यः कश्चिदधिगच्छे...
भक्त्या परमया युक्तो भक्तो वै श्रद्धयान्वि...
एतान् दृष्ट्वा तु यो भक्त्या तस्य तुष्याम्यहं ...
गुह्यस्थानेऽर्च्चयेद्यो मां भक्त्या वै श्रद्धयान्वि...
बलिपुष्पोपहारैर्वा गन्धपुष्पैर्विलेपनैः ।
प्रणिपातेन चैवान्यो यो मां समधिगच्छति ...
अकामो वा सकामो वा गुह्येष्वेषु च यो न...
ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रस्तथैव ...
म्लेच्छो वा क्रूरकर्म्माणः स्त्रियो वापि न...
गाणपत्यं ध्रुवस्थानमिन्द्रलोके महीयते ॥ ...
अक्षय्यस्तस्य लोको वै तथाप्यन्ये म्रियन्ति...
पितृणाञ्चैवमभ्यर्च्य स्थानेष्वेतेषु यो नरः ...
श्राद्धं दद्यान्महाभागो दद्याद्वापि तिलोद...
दर्भास्तरणसङ्कीर्णे पिण्डं स्थाने निवेश्य ...
स्वयं स्वपितृभिः सार्द्धं स्वर्गलोके महीयते ...
एतत् सर्व्वं समाख्यातं दुर्लभं सर्व्वदेहिना...
य इदं नियमात् कश्चिद्देवस्याग्रे तु श्रावये...
श्रुत्वेवं गुह्यमाख्यानं ये नराः पापयोनयः ...
स्त्रियः शूद्राश्च म्लेच्छाश्च प्राप्नुवन्ति परां ...
तस्माद्विद्वानधीयीत श्रावयेच्च समाहितः ...

नाप्रशान्ताय दातव्यं न चान्याहितकारिणे।
कर्कशायाविशुद्धाय पिशुनाय शठाय च ॥ २५
चपलाय नृशंसाय न देयं स्यात् कथञ्चन।
इदन्तु श्रेष्ठपुत्राय शिष्याय च हिताय च ॥ २६
श्लाघिने श्लाघमानाय प्रशान्ताय तपस्विने।
प्रियंवदाय श्रोत्रियाय भक्ताय च महेशितुः ॥ २७
यतिने च तथा देयं तथा ज्ञानवते सदा।
श्रावयेद्यस्तु विप्राय सदा पर्व्वसु पर्व्वसु ॥ २८
रुद्रलोकं स गच्छेत् तु धारयेद्यस्तु वै पुमान्।
सम्योक्तं वेदशास्त्रेषु तस्माद्गुह्यमिति स्मृतम् ॥ २९
रहस्यन्तु रहस्यानामिति गुह्यविदो विदुः।
रहस्यं देवदेवस्य गुह्यमित्यभिसंज्ञितम् ॥ ३०
तस्मादिप्र महन्नित्यं कीर्त्तितं गुह्यमुत्तमम्।
स्थानेष्वेतेषु सततमभिगम्य महेश्वरः ॥ ३१
गत्वा तपस्यतो नित्यं मानसं विमलं शिवम्।
तत्राहं नियतो विप्र गङ्गाद्वारे च नित्यशः ॥ ३२
आद्यस्थानेषु एतेषु पूजयन्ति सदाशिवम्।
गच्छन्ति विमलाः शुद्धाः पदं माहेश्वरं हि ते ॥ ३३
न तेषां पुनरावृत्तिर्भवमृत्युर्महात्मनाम्।
एष ईश्वरसद्भावः कथितस्ते समासतः ॥ ३४
यं श्रुत्वा क्रूरकर्म्माणः प्राप्नुवन्ति परां गतिम्।
य इमां श्रावयेदापि ब्राह्मणः सत्पथे स्थितः ॥ ३५
सर्व्वकामादिकं वक्तुः श्रोतुस्तस्योपतिष्ठति।
एतत् ते कथितं पुण्यं गुह्यानाञ्चैव कीर्त्तनम् ॥ ३६
देवदेवस्य यत् स्थानं गुह्यानां गुह्यमुत्तमम्।
कीर्त्तितं सुमहापुण्यं सत्येनैव महामुने ॥ ३७
य इदं श्रावयेद्विप्रः सदा पर्व्वसु पर्व्वसु।
न दुर्गतिमवाप्नोति रुद्रलोकञ्च गच्छति ॥ ३८

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः।

व्यास उवाच।

महादेवश्च विष्णुश्च ब्रह्मा चैव हि सुव्रत।
प्रभावैः कर्म्मणाञ्चैव कोऽधिको वद ईश्वरः ॥ १
एतन्मे संशयं तात ब्रूहि बुद्धिमतां वर।
अनागतमतिक्रान्तं वर्त्तमानञ्च बुध्यसे ॥ २

सनत्कुमार उवाच।

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
पुरा त्रैलोक्यविजये विष्णुना प्रभविष्णुना ॥ ३
बलिर्बद्धो महाराजस्त्रैलोक्यं प्राप्तवांस्तदा।
सन्त्रस्तेषु च दैत्येषु प्रह्लादप्रमुखासुराः ॥ ४
अथाजग्मुः प्रभुं द्रष्टुं देवदेवं सनातनम्।
यत्रासौ विश्वरूपाक्षः क्षीरोदस्य समीपतः ॥ ५
सिद्धा विद्याधरा नागा नद्यः सर्व्वाश्च पर्व्वताः।
साध्या ब्रह्मर्षयो ये च गन्धर्व्वाप्सरसस्तथा ॥ ६
दृष्ट्वाम्बरगता विष्णुं देवदेवं सनातनम्।
स्तुवन्ति वरदं देवं प्रहृष्टेनान्तरात्मना ॥ ७
त्वं धाता त्वं हि कर्त्ता त्वं कामं क्रोधं भयं मदम्।
त्वं धारयसि लोकांस्त्रींस्त्वमेव सृजसि प्रभो ॥ ८
त्वत्प्रसादाच्च कल्याणं प्राप्तं त्रैलोक्यमव्ययम्।
असुराश्च हताः सर्व्वे बद्धश्चैव बलिस्तथा ॥ ९
स्थापितञ्च त्वया पूर्व्वं जगत् स्थावरजङ्गमम्।
त्वं गतिः सर्व्वदेवानां त्वं योगी प्रभुरव्ययः ॥ १०
एवमुक्तः सुरैर्विष्णुः सिद्धैश्च परमर्षिभिः।
प्रत्युवाच ततो विष्णुः सर्व्वगः पुरुषोत्तमः ॥ ११

विष्णुरुवाच।

श्रूयतामभिधास्यामि कारणं सुरपुङ्गवाः।
यस्तुष्टः सर्व्वभूतानां स्रष्टृत्वमददाच्छिवः ॥ १२
सृष्टाश्च ब्रह्मणा चैव सप्त लोकाश्च मायया।
तस्यैव च प्रभावेण अहं श्रेष्ठत्वमागतः ॥ १३
पुरा तमसि अव्यक्ते त्रैलोक्यं ग्रसितं मया।
तदवस्थेषु भूतेषु एकोऽहं शयितस्तथा ॥ १४
सहस्रशीर्षो वै भूत्वा सहस्राक्षः सहस्रपात्।
शङ्ख-चक्र-गदापाणिर्मायया विमलाशयि ॥ १५
एतस्मिन्नन्तरे दूरात् पश्यामि विमलं प्रभुम्।
कृष्णाजिनधरं देवं कमण्डलुविभूषितम् ॥ १६
निमिषान्तरमात्रेण प्राप्तवान् पुरुषोत्तमः।
ततो मामब्रवीद्ब्रह्मा सर्व्वलोकपितामहः ॥ १७
कस्त्वं कुतो वा किं शेषे तत्त्वतो वद किं चिरम्।
अहं कर्त्तास्मि लोकानां स्वयम्भूर्विश्वतोमुखः ॥ १८

मयाप्युदाहृतं ब्रह्मन्नहं नारायणः प्रभुः।
धाता कर्त्ता च लोकानां संहर्त्ता च जगत्प्रभुः ॥१९
एवं सम्भाषमाणौ तु परस्परमिति तदा।
उत्तरां दिशमास्थाय ज्वालां पश्यामि तिष्ठतीम्॥२०
ततस्तां ज्वालामालोक्य विस्मयाविष्टमानसः।
तेजसा तस्य ज्वालस्य सर्व्वं ज्योतिस्ततोऽज्वलत्॥२१
वर्त्तमाने महाज्वाले अत्यर्थं परमाद्भुते।
तद्दृष्ट्वा परमाश्चर्य्यमुभौ विस्मितमानसौ ॥ २२
दिवं भुवञ्च विष्टभ्य तिष्ठते ज्वालमण्डलम्।
तस्य मध्ये तु पश्यावो लिङ्गन्तु विमलप्रभम् ॥ २३
प्रादेशमात्रं दुर्ज्ञेयं दुर्निरूप्यञ्च दुःसहम्।
महाकायं महातेजो वर्द्धमानमिवौजसा ॥ २४
ज्वालमालादिभिर्व्याप्तं सर्व्वभूतभयङ्करम्।
घोरं दारुणमत्युग्रं निर्द्दहन्निव रोदसी ॥ २५
ततो मां प्राब्रवीद्ब्रह्मा अप्यहं लक्षमन्वितः।
अत्यन्तञ्च विजानीयां लिङ्गस्यास्य महात्मनः ॥ २६
अहमूर्द्ध्वं गमिष्यामि यावदन्तोऽस्य विद्यते।
त्वञ्चाधस्ताद्विजानीहि अन्तं तस्य महात्मनः ॥ २७
एवञ्च समयं कृत्वा गत ऊर्द्ध्वं ह्यधो ह्यहम्।
मनोजवगतिर्भूत्वा योगयुक्तो महाव्रती ॥ २८
वर्षाणान्तु सहस्राणि विसृपन्तौ परस्परम्।
न च पश्यामि तस्यान्तं ततः श्रमवशादहम् ॥ २९
तथैव ब्रह्मा संश्रान्तो ह्यन्तञ्चैव न पश्यति।
समागतो मया सार्द्धं तथैव विमलात्मसि ॥ ३०
ततो विस्मयमापन्नौ भीतौ चापि महाबलौ।
मायया मोहितौ तेन नष्टसंज्ञावुभौ तथा ॥ ३१
ध्यानाद्दृष्ट्वा महादेवमीश्वरं सर्व्वतोमुखम्।
प्रभवं निधनञ्चैव भूतानां भूतमव्ययम् ॥ ३२
ब्रह्माञ्जलिपुटो भूत्वा तस्मै शर्व्वाय शूलिने।
अव्यक्ताय अनन्ताय नमस्कारं प्रचक्रमे ॥ ३३
नमस्त्रैलोक्यनाथाय सुरेश्वर नमोऽस्तु ते।
भूतपतयेऽनन्ताय सत्त्वाय सत्त्वयोनये ॥ ३४
परमेष्ठि परंब्रह्म परमात्मा परं पदम्।
तेजस्त्वं कामदेवस्त्वं रुद्र स्कन्द विभोऽव्यय ॥ ३५
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परं पदम्।
स्वाहाकारो नमस्कारः सर्व्वकर्म्मसु सत्कृतः ॥ ३६

स्वाहाकारश्च जाप्यश्च व्रतानि नियमानि च
वेदे सांख्ये च योगे च भगवानेव सर्व्वगः ॥
कामः क्रोधोद्भवं दुःखमिच्छा द्वेषो दमः श
क्रिया च व्याधयश्चैव त्वं पश्चात् सुखदुःखदे
ऋतवो वत्सराश्चैव विद्याविद्येऽनलस्तथा।
इन्द्रियाणाञ्च सर्व्वेषामिन्द्रियार्थाश्च ते स्मृ
स्थविष्ठाश्चैव सूक्ष्माश्च भगवानेव सर्व्वशः।
विश्वरूपी महारूपः सर्व्वरूपस्तथैव च ॥
तेजसां ते परं तेजः स्पर्शानां स्पर्शमेव च।
रूप-गन्ध-रसा आपोऽधिपश्च भुवनेश्वरः ॥
आकाशस्त्वञ्च वै स्कन्दो भूतानां प्रभुरव्ययः।
त्वं कर्त्ता सर्व्वभूतानां लोकेषु प्रलयान्तकृ
त्वं धारयसि लोकांस्त्रींस्त्वमेव सृजसि प्रभो
पश्चिमेन तु वक्त्रेण वरुणस्त्वं प्रकाशसे ॥
उत्तरेण तु सौम्येन भूर्भुवस्त्वं प्रजानिधिः।
रमसे बहुधा देव प्रजानां प्रवरो ह्यसि ॥
आदित्या वसवो रुद्रा वरुणश्च तथाश्विनौ
सिद्धा विद्याधरा नागा अप्सरो-यक्ष-रा
सिद्धा ब्रह्मर्षयश्चैव चारणाश्च तपोधनाः।
बालखिल्याश्च ऋषयस्तपःसिद्धाः सहस्रशः
त्वत्तः प्रसूता देवेश अप्सराश्च महाबलाः।
सहस्रशीर्षोऽनन्तश्च वसुर्वासुकिरेव च ॥
वरुणश्च महातेजा गरुडश्च महाबलः।
अर्थो धर्म्मश्च कामश्च यशो मोहः समीरणः
अग्निश्चैव महाब्धिश्च प्रजातास्ते महेश्वर।
रमा सीता तथा काली देवी गायत्रिरेव च
लक्ष्मीः कीर्त्तिर्धृतिः सिद्धिर्मेधा लज्जा वपुः
तुष्टिः पुष्टिस्तथा नन्दा जया देवी सरस्व
त्वत्तो जाता महाभाग अन्ये चापि महाब
ऋतुः संवत्सरो मासः पक्षोऽहोरात्र एव
कला काष्ठा निमेषाश्च मुहूर्त्ताश्च लवास्त
नक्षत्राणि ग्रहाश्चैव अश्वा गावो अजावि
यच्चान्यच्च यत् किञ्चित् त्वत्तो जातं सुरेश
रजोभिर्माययाच्छन्नं न त्वां पश्यन्ति केवलं
योगिनो नित्यमुक्ता ये पश्यन्ति त्वां बुधाः
मायया मोहितं लोकं त्वत्प्रदञ्च सनातन

न त्वां पश्यन्ति संमूढ़ा मग्नास्तमसि दारुणे ।
त्वत्तो ब्रह्मा अहञ्चैव प्रसूतः पुरुषोत्तमः ॥ ५५
आदौ मध्ये तथा चान्ते न विदन्ति कदाचन ।
न वेदयन्ति त्वां केचित् पुराणञ्च महेश्वरम् ॥ ५६
ध्येयं पुराणं परमं पवित्रं-
परात्परस्त्वं पुरुषोत्तमस्त्वम् ।
परञ्च सूक्ष्मं मुनिभिश्च गीतं
परात्परस्त्वं परमञ्च शाश्वतम् ॥ ५७
नमोऽस्तु आदित्यसमानवक्त्र
नमोऽस्तु आदित्यसमानमौलिन् ।
नमोऽस्तु ते वज्रपिनाकधारिन्
नमोऽस्तु ते भूतपतेऽंशुधारिन् ॥ ५८
नमोऽस्तु ते भस्मविभूतिशील
नमोऽस्तु ते कामशरीरनाशिन् ।
नमोऽस्तु ते सूक्ष्म अनन्तरूपिन्
नमोऽस्तु ते विधे अनन्तरूपिन् ॥ ५९
नमोऽस्तु ते यमानन्तरूपिन्
नमोऽस्तु ते भूत-भविष्य-भाव्य ।
नमोऽस्तु तेऽपूर्व्वनिकेतवास
नमोऽस्तु ते वै अविमुक्तवासिने ॥ ६०
नमोऽस्तु ते परमम्मूर्द्ध्नि वासिन्
नमोऽस्तु ते लोकसमुद्रवासिन् ।
नमोऽस्तु ते आत्मशरीरवासिन्
नमोऽस्तु ते सर्व्वहिरण्यगर्भ ॥ ६१
नमोऽस्तु ते देव हिरण्यरेतो
नमोऽस्तु ते देव हिरण्यवासिन् ।
नमोऽस्तु ते देव हिरण्यपाद
नमोऽस्तु ते देव हिरण्यमौले ॥ ६२
नमोऽस्तु ते देव हिरण्यवर्ण
नमोऽस्तु ते देव हिरण्यकर्ण ।
नमोऽस्तु ते देव हिरण्यनेत्र
नमोऽस्तु ते देव हिरण्यपाणे ॥ ६३
नमोऽस्तु ते देव हिरण्यदंष्ट्र
नमोऽस्तु ते देव हिरण्यकर्म्मन् ।
नमो नगेन्द्रात्मज देव नित्यं
नमोऽस्तु ते शङ्कर नीलकण्ठ ॥ ६४
नमोऽस्तु ते देव सहस्रधार
नमोऽस्तु ते पिङ्गलनीललोचन ।
नमोऽस्तु ते सर्व्वजगद्गुरो भव
नमोऽस्तु ते भूतगणात्मशोभित ॥ ६५
नमोऽस्तु ते कर्म्मसहस्रपूजित
नमोऽस्तु ते चारणसिद्धसेवित ।
नमोऽस्तु ते ऋषिगणैः सुपूजित
नमोऽस्तु ते यज्ञसहस्रकल्प ॥ ६६
नमोऽस्तु ते कल्पसहस्रभूषित ।
नमोऽस्तु ते ऋषभ पद्मनाभाव्ययात्मन् ॥ ६७
एवं संस्तूयमानो हि कीर्त्त्यमानो महेश्वरः ।
बभाषे च तथा तुष्ट ईशानो वरदः प्रभुः ॥ ६८
वज्रकोटिसहस्रेण ग्रसमान इवाम्बरम् ।
आदिदेवो महायोगी सूर्य्यकोटिसमप्रभः ॥ ६९
एकग्रीवः सुजठरो नानाभरणभूषितः ।
नानामणिविचित्राङ्गो नानागन्धानुलेपनः ॥ ७०
पिनाकदीपितकरः पट्टिशाशनिशूलधृक् ।
व्यालयज्ञोपवीती च चीरवस्त्रभयङ्करः ॥ ७१
दुन्दुभिस्तननिर्घोषः पर्ज्जन्यनिनदोपमः ।
मुक्तो हासस्तदा तेन लोकास्तत्र प्रकम्पिताः ॥ ७२
तेन शब्देन महता भयत्रस्ता महात्मनः ।
ततः प्रोवाच भगवान् प्रीतोऽथाप्यावयोस्तथा ॥ ७३
पश्यध्वं वै महात्मानो भयं सर्व्वत्र मुच्यताम् ।
अयं मे दक्षिणो बाहुर्ब्रह्मा त्वं हि ममात्मजः ॥ ७४
वामबाहुश्च मे विष्णुः संयुगे त्वपराजितः ।
मुनयः सदृशं सम्यग्वरं वृणुतं सुव्रतौ ॥ ७५
ततः प्रहृष्टमनसौ पादयोः पतितावुभौ ।
यदि प्रीतोऽसि भगवन् यदि देयो वरश्च मे ॥ ७६
भक्तिर्भवेद्भवे नित्यं त्वयि देव सुरेश्वर ।
एवमुक्तः सुरश्रेष्ठः सृजध्वं विपुलाः प्रजाः ॥ ७७
इत्युक्त्वा भगवान् देवस्तत्रैवान्तरधीयत ।
एवं संक्षेपतः प्रोक्तः प्रभावस्तस्य योगिनः ॥ ७८
तेन सर्व्वमिदं दृष्टं हेतुर्भूत्वा तु सर्व्वजित् ।
इदञ्च स्वर्ग्यमायुष्यमिदं शान्तिकरं तथा ॥ ७९
तस्य विघ्नं न कुर्व्वन्ति दानवा ग्रहराक्षसाः ।
पिशाचा यातुधानाश्च गुह्यका भुजगास्तथा ॥ ८०

यः पठेत शुचिः प्रातर्ब्रह्मचारी जितेन्द्रियः।
अभक्तयोगमाहात्म्यः सोऽश्वमेधफलं लभेत् ॥ ८१

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां लिङ्गोद्भवनामाष्टा-
दशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः।

व्यास उवाच।

लिङ्गस्य स्थापने किञ्च पुष्पदाने च किं फलम्।
अभ्यङ्गे चैव किं प्रोक्तं क्षीरस्नाने च किं फलम् ॥ १
एतन्मे तत्त्वतो ब्रूहि प्रश्नं बुद्धिमतां वर।
अनागतमतिक्रान्तं वर्त्तमानञ्च बुध्यसे ॥ २
त्वत्समो नास्ति लोकेऽस्मिन् संशयं ब्रूहि तत्त्वतः।

सनत्कुमार उवाच।

सप्तानां सोमसंस्थानां यत् फलं समुदाहृतम् ॥ ३
फलं वै सर्व्वकाम्याणां फलं बहुसुवर्णकम्।
तत् फलं देवदेवस्य लिङ्गसंस्थापनाद्भवेत् ॥ ४
अयुतार्व्वुदकोटीनां तेषामष्टौ युतानि च।
क्रीड़न्ते रुद्रपार्श्वे तु पुत्रवत् परिपालिताः ॥ ५
स्त्रियो वा पुरुषो वापि यदि वाथ नपुंसकः।
स्थापयेल्लिङ्गमेकन्तु वियोगं नैव गच्छति ॥ ६
मासे मासे तु यः स्नायाद्यावज्जीवं व्रती शुचिः।
गन्धदानेन तत्पुण्यं प्राप्नुयान्नात्र संशयः ॥ ७
भूमिदानेन यत् पुण्यं कनकञ्च प्रयच्छति।
चतुर्गुणं सहस्रन्तु गन्धदानस्य तत् फलम् ॥ ८
गन्धादभ्यङ्गदानेन षष्टिकोट्यस्तथैव च।
रुद्रलोके वसेत् सोऽपि घृताभ्यङ्गेन मानवः ॥ ९
चतुःषष्टिसहस्राणि गवां वै हेममालिनाम्।
यो दद्यात् कपिलानान्तु क्षीरस्नानस्य यत् फलम् ॥ १०
मासे मासे त्रिषवणं यः स्नायान्मुनिपुङ्गवः।
यावज्जीवन्तु तत् कुर्व्वन् देवदेवस्य यत् फलम् ॥ ११
पक्षे पक्षे च यः स्नायाद्यावज्जीवं द्विजः शुचिः।
उदकस्नापनं कुर्य्यान्मुखवाद्यैस्तथैव च ॥ १२
अपराधशतं देवः क्षमते नात्र संशयः।
गवां शतसहस्रस्य सम्यग्दत्तस्य यत् फलम् ॥ १३
पुष्पदानेन तत् पुण्यं प्राप्नुयान्नात्र संशयः।
उत्पलं करवीरञ्च अर्कपल्लवकांस्तथा ॥ १४
चम्पकं विल्वपत्रञ्च देवे देयं सदा नरैः।
कालञ्च तेषां सम्प्रोक्तस्तन्मे निगदतः शृणु।
श्रावणे प्रथमे पक्षे उत्पलन्तु निवेदयेत्।
भाद्रे तु प्रथमे पक्षे पद्मञ्चैव निवेदयेत् ॥ १
अपामार्गं कुशांश्चैव आश्वयुक्ते निवेदयेत्।
सदा सितानि पुष्पाणि यावत् कालं निवे
वकस्य करवीरस्य अर्कस्योन्मत्तकस्य च।
चतुर्णां पुष्पजातीनां गन्धमाघ्राति शङ्करः।
वकपुष्पञ्च पद्मञ्च निर्म्माल्यं नव गच्छति।
करवीरसहस्रे तु उतालञ्च विशिष्यते ॥ १
उत्पलानां सहस्रेण अर्कमेकं विशिष्यते।
चम्पकानां सहस्रेण धत्तूरञ्च विशिष्यते ॥
धत्तूरकसहस्रेण नागपुष्पं विशिष्यते।
सिन्धुपुष्पसहस्रेण पुन्नागन्तु विशिष्यते ॥
पुन्नागानां सहस्रेण कर्णिकारं विशिष्यते।
सिन्धुपुष्पसहस्रैस्तु वृहतीनां विशिष्यते।
विल्वपत्रात् परं नास्ति येन तुष्यति शङ्करः।
सर्व्वे शुक्लाः सुगन्धाढ्या कृष्णां नैव निवेदये
यत्रैकं विल्वपत्रस्य चतुःषष्टिरुदाहृतम्।
यथालाभं यथापक्षं पुष्पाणि तु निवेदयेत्।
अलाभेन तु पुष्पाणां पर्णानि तु निवेदयेत्।
विशेषेण तु यो भक्त्या तेषामेकफलं शृणु।
न दुर्गतिमवाप्नोति पुष्प-पत्रनिवेदने।
तस्माच्चैव रुद्रपरः कुर्य्यात् पुष्पनिवेदनम् ॥
यो दद्याद्दीश्वरे दीपं रुद्रं समधिगच्छति।
ईश्वरस्य तु नैवेद्यं स्वर्गलोके महीयते ॥
ईश्वरं येन भावेन पूजयेत् तस्य तत् फल
यस्तु सर्व्वगतं ज्ञात्वा तत्र तत्रार्च्चयेच्छिवम्।
स विन्दति महापुण्यं रुद्रसायुज्यमाप्नुयात्।

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां पुष्पसारसमुद्देशो नामैकोन-
विंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः।

व्यास उवाच।

भूय एवाहमिच्छामि ईश्वराराधनं कथम्।
कथञ्च तुष्यते देवः कर्म्मणा चैव भक्तिमान्॥ १
एतन्मे संशयं तात ब्रवीहि भगवन् मम।

सनत्कुमार उवाच।

नन्दिने पृच्छते ब्रह्मन् कथितञ्चाप्यनुग्रहात्॥ २
[ग]णेश्वरपतिर्नन्दी सूर्य्यायुतसमप्रभः।
[म]हेश्वरस्य तु माहात्म्यं पृच्छते नन्दिकेश्वरः॥ ३
यथोक्तं पृच्छते देव्या ईश्वरेण महात्मना।
श्रोतुर्मम परा तुष्टिर्भगवन् वक्तुमर्हसि॥ ४

नन्दिकेश्वर उवाच।

श्रूयतामभिधास्यामि तव स्नेहान्महामुने।
महेश्वरेण पार्व्वत्याः पुरतोऽभिहितं पुरा॥ ५
ङ्गतया स्थापयेल्लिङ्गं यथोक्तं वरवर्णिनि।
मर्पयेत् परमं रम्यं गृहं कैलाससप्रभम्॥ ६
स्य देवकुलं देवात् कुर्य्यान्मे कुसुमेक्षणे।
वाहं तत्र सो नित्यं भवेदष्टगुणान्वितः॥ ७
ो मे प्रयच्छति देवि त्रुटिमात्रञ्च काञ्चनम्।
स्य हैमवते शृङ्गे गृहं बालार्कसन्निभम्॥ ८
स्य देवि प्रयच्छामि गृहं बालार्कसन्निभम्।
स्तु गावो हिरण्यं वा समुद्दिश्य प्रदापयेत्॥ ९
स्य कामदुघां पृथ्वीं ददामि निरुपद्रवाम्।
षभं स प्रयच्छेत अन्नं क्षरमेव च॥ १०
नेन वृषयुक्तेन तस्य पापं न किञ्चन।
पहारैश्च जाप्यैश्च भावितैश्चापि नित्यशः॥ ११
पोपवासनियमैर्बलिभिश्चैव पुष्कलम्।
ीत-वादित्रशब्देन यो मामर्च्चयते सदा॥ १२
ह्मलोकमवाप्नोति पूज्यते ब्रह्मवादिभिः।
ग्निष्टोमादिभिर्यज्ञैर्यो मार्च्चयति शोभने॥ १३
क्रस्यार्द्धासनं प्राप्य सुरलोके महीयते।
र्वां सन्ध्यां श्रिया देवि कैवल्यमधिगच्छति॥ १४
यक्षाणां गुरुर्भूत्वा यक्षो भवति वीर्य्यवान्।
ध्यां मध्यन्दिने चैव योऽभिगच्छति शङ्करम्॥ १५
कपालगुरुर्भूत्वा पूज्यते दैवतैः सह।
स्नापनाभ्यर्च्चनामाल्यैर्धूपगन्धानुलेपनैः॥ १६
यो मामर्च्चयते देवि स मायामतिवर्त्तते।
संमार्ज्जने पञ्चशतं सहस्रमुपलेपने॥ १७
जातरूपैश्च रूप्यैश्च अर्च्चयन्ति सुरेश्वरम्।
लिङ्गे पूजान्तु यो देवि करोति मम शोभने॥ १८
गाणपत्यमवाप्नोति रुद्रलोकञ्च गच्छति।
अभ्यङ्गेन पञ्चशतं स्नापने द्विगुणं भवेत्॥ १९
गन्धोदके पञ्चगव्ये कर्पूरे च चतुर्गुणम्।
क्षीरे पञ्चशतं देवि स्नापने तु चतुर्गुणम्॥ २०
माल्ये पञ्चशतं देवि गीत-वाद्यवराप्रिये।
रुद्रलोकमनुप्राप्य गाणपत्ये नियोजयेत्॥ २१
अगरुं शतसाहस्रं दशगुणं चन्दनं भवेत्।
गन्धं दशगुणं सर्व्वं यथोक्तं तदनन्तरम्॥ २२
माल्यं पञ्चशतं देवि निर्म्माल्यं तदनन्तरम्।
चतुर्गुणसहस्राणि धूपः कृष्णागुरुः स्मृतः॥ २३
अनेन द्विगुणञ्चैव सघृतञ्च चतुर्गुणम्।
अपराधसहस्रञ्च क्षमते मृदुभाषिणि॥ २४
यदिदं कृष्णसारन्तु गुग्गुलं सघृतं दहेत्।
देवि संवत्सरे पूर्णे ततो नन्दिसमो भवेत्॥ २५
दक्षिणायान्तु मन्मुक्तौ दिव्यानाञ्च घृतप्रदौ।
निवेदयति गायत्र्या ततः स्कन्द निवेदिता॥ २६
पुनन्ति पितरः सर्व्वे भैक्ष्यं देवि निवेदितम्।
घृतमन्नमसंख्येयमिह प्रत्यक् च शाश्वतम्॥ २७
अक्षभक्तसमानन्तु देवं सर्व्वहरं शिवम्।
घृताभिषिक्तं यः कुर्य्यात् संवत्सरमतन्द्रितः॥ २८
नासौ मृत्युवशं गच्छेद्गाणपत्यन्तु भोक्ष्यते।
यस्तु दीपं प्रयच्छेत ममार्क्कैनैककौशिकम्॥ २९
रुद्राणां सदृशो भूत्वा वृषेण विचरेद्भुवि।
यस्तु छत्त्रं प्रयच्छेत मम भावाहिषादिने॥ ३०
तेजोमण्डलसङ्काशं दिव्यं व्रजति शक्रवत्।
चतुर्द्दश्यामथाष्टम्यामुभौ पक्षौ विधानतः॥ ३१
अनियमयुक्तस्यापि ब्रह्मचर्य्यपुरःसरम्।
ब्राह्मणस्य सुवासिन्या मम भक्तिपदस्य च॥ ३२
तस्य पुण्यफलं देवि मत्प्रसादादिदं शृणु।
स्वच्छन्दनिरतो भूत्वा व्योमचारी विहङ्गवत्॥ ३३
अजितः सर्व्वभूतेषु सुरलोके महीयते।

श्रुतिमात्रेण ये देवि मम भक्तिपरायणाः ॥ ३४
गाणपत्यं हि तेषां वै ददामि कमलानने ।
यथा स्थानानि सर्व्वाणि मयाभिरचितानि वै ॥३५
महेश्वरि तथा तेषु मृत्युतो न कदा भयम् ।
यस्तु कामकृतं त्यक्त्वा एकभक्तिकृतो नरः ॥ ३६
कायवाङ्मनःसंयुक्तो यावज्जीवन्तु गच्छति ।
देवि तिष्ठति तावच्च यावदाभूतसंप्लवम् ॥ ३७
अनेकविघ्नसम्भूतास्तमसा बहुलीकृताः ।
व्याधिता नित्ययोगस्थाः सत्यसन्धा जितेन्द्रियाः ॥३८
एकाग्रमनसो नित्यं पश्यन्ति निश्चिताश्च ये ।
तेषां न प्रलयो देवि युगकोटिशतैरपि ॥ ३९
नराणामल्पवित्तानां विधिना भावनां विना ।
यथा भक्त्यार्च्चितो देवि तस्य दास्यामि नान्यथा॥४०
एतद्गुह्यतरं देवि दुर्व्विज्ञेयं सुरैरपि ।
अर्च्चनञ्च यथोक्तं वै गुह्यं वापि मतं शृणु ॥ ४१
अर्च्चार्च्चितो न तुष्यामि तव स्कन्दस्य च प्रिये ।
लिङ्गार्च्चितो यथा तस्य तुष्यामि हरिणेक्षणे ॥ ४२
अर्च्चितोऽहं वरारोहे पूजितः सर्व्वदैवतैः ।
सत्यं देवि प्रयच्छामि जरामृत्युविवर्ज्जितः ॥ ४३
धूपैर्गन्धैश्च माल्यैश्च रक्तकाञ्चनवाससैः ।
यो माञ्च यजते देवि गाणपत्ये नियुज्यते ॥ ४४
एकरात्रोषितो मर्त्यः पुण्डरीकफलं लभेत् ।
सर्व्वयज्ञफलं तस्य स्वर्गं च विपुलं फलम् ॥ ४५
शुचिस्तु स्नापनं कृत्वा यो मे भक्त्या नियच्छति ।
त्रींस्तु लोकानतिक्रम्य रुद्रलोकं स गच्छति ॥ ४६
भक्त्या परमया युक्ताः सांख्ययोगविशारदाः ।
गच्छन्ति मम लोकांस्तु भिन्नो मत्तः सुदारुणः॥४७
तपसा तु न शक्नोति द्रष्टुं मां देवता अपि ।
ध्यानेनैव नियुक्ता मां पश्यन्ति देवि नान्यथा ॥ ४८
सर्व्वलोकेषु सर्व्वेषां सांख्या नारायणी स्तुतिः ।
मद्भक्तानान्तु सर्व्वेषां संख्या देवि न विद्यते ॥ ४९
चीयन्ते सर्व्वभूतानि स्थावराणि चराणि च ।
विनाशो मम भक्तानां संहारेऽपि न विद्यते ॥ ५०
यो भूयो देवतायुक्तः श्रद्धयार्च्चयते नरः ।
तस्य तां मूर्त्तिमास्थाय प्रसीदामि न संशयः ॥ ५१
यो हि सर्व्वगतं पश्येत् सर्व्वञ्च मयि पश्यति ।

तस्याहं न प्रणश्यामि स च मे न प्रणश्य[ति]
सत्यार्पितमनोबुद्धिर्मयि भावेन भावितः ।
ममैव च प्रसादेन नरः पापात् प्रमुच्यते
सर्व्वथा वर्त्तमानोऽपि यो मां देवि स्मरे[त्]
रुद्रलोकं समाप्नोति पश्यते तु वृषध्वज[म्]
सर्व्वारम्भे तु यो नित्यं सततं ध्यानकर्म[णि]
यदि वाञ्छति मां देवि चतुर्व्वर्गसमो भ[वेत्]
षडङ्गेन तु योगेन यो मामर्च्चयते सदा ।
स मां प्रविशते देवि नास्ति तत्र विचार[णा]
धत्तूरकैश्च पुष्पैश्च विल्वपत्रैश्च शोभनैः ।
चम्पकैश्च महाभागे यो मे कुर्य्यान्निवेद[नम्]
चम्पकपुष्पैश्च मां देवि अर्च्चयेद्यो ह्यतन्द्रि[तः]
गाणपत्यमवाप्नोति उग्रैर्भीमगणैः सह ।
पुष्पैः पद्मार्च्चितैर्वापि कुर्य्याद्योऽप्यर्च्च[नम्]
अर्कपुष्पैस्तथा देवि यो मामर्च्चयते न[रः]
करवीरसहस्रं वा यो मे दद्याद्विशेष[तः]
करवीरसहस्रे तु यत् फलं शृणु सा[म्प्रतम्]
अर्काणान्तु सहस्रेण पद्ममेकं विशिष्य[ते]
पद्मानान्तु सहस्रेण फलं तस्यैव यद्[भवेत्]
वकस्य कुन्दपुष्पस्य तत् फलन्तु निवे[दने]
कुन्दपुष्पसहस्रन्तु वकपुष्पन्तु तत्समम् ।
वकानान्तु सहस्रेण उत्पलन्तु निवेद[येत्]
एकतो विल्वपत्रस्य तत् फलं समुदा[हृतम्]
चम्पकस्य महाभागे पुष्पं धत्तूरकैः [सह]
एवमेतानि सर्व्वाणि निवेदयति यस्तु [...]
तथा पर्व्वसु सुश्रोणि तस्य पुण्यफलं [...]
संवत्सरेण चैकेन पुष्पाणां यत् फलं [...]
दिवसेन तु तत् सर्व्वं विख्यातञ्च वरान[ने]
शोभनैर्दिव्यगन्धाढ्यैः शृणु तस्यापि [...]
वकपुष्पप्रदानेन अशीतिस्वर्गजं फल[म्]
कामेनाभ्यर्च्चमानस्य शृणु चैव फलं [...]
मम तुल्यो नरो भूत्वा त्रिशूली वृषध्व[जः]
न हन्यते गतिस्तस्य अनिलस्याम्बरे [...]
यस्तु शङ्करनिर्म्माल्यं पादेनाक्रमते [...]
षष्टिवर्षसहस्राणि तिर्य्यग्योनिषु [...]
वर्षाणां शतसहस्राणि देव-दानव-[...]

जयन्ति तु मां नित्यं धर्म्मकामार्थसिद्धये ॥ ७०
कामात् पठते नित्यं यश्चैवं शृणुयान्नरः।
द्रलोकमवाप्नोति तुष्टस्तस्य वृषध्वजः ॥ ७१

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
पुष्पसमुद्देशो नाम विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः।

व्यास उवाच।

तुमिच्छामि भगवन् येन तुष्यति शङ्करः।
श्च कीदृशं प्रोक्तं पुष्पमूल्यन्तु कीदृशम् ॥ १
न पुष्पेण किं पुण्यं परिमाणं प्रकीर्त्तितम्।
प्राञ्च कीदृशं योगमुपयुक्तं महत् फलम् ॥ २
न केन प्रकारेण आर्घ्ये पूर्ध्येश्च शङ्करः।
स्यैव विधिं कृत्स्नमुपोष्ये चैव कीदृशम् ॥ ३

सनत्कुमार उवाच।

हात्मानं महादेवं स्वयं देवी तपःस्थिता।
ज्ञापयति देवेशं भूतानामादिमव्ययम् ॥ ४
नाथ देवदेवेश येन तुष्यसि शङ्कर।
ावर्त्तं भवेद्वयेन मनसा कर्म्मणापि वा ॥ ५
दिच्छाम्यहं श्रोतुं सर्व्वदेवनमस्कृत।
त्प्रश्नवरं ब्रूहि यथापृष्टं महर्षिभिः ॥ ६
ः प्रहस्य भगवान् देवदेवो महेश्वरः।

शङ्कर उवाच।

ु साधु महाभागे यथोक्तं प्रश्नमुत्तमम् ॥ ७
ानामनुकम्पार्थं यथा त्वं हि निबोध मे।
ाणि रक्तपीतानि असितानि तथापरे ॥ ८
मशा दम्भमाये च दुर्गन्धाश्च सुगन्धिनः।
न्धा वा सुगन्धाश्च नानागन्धास्तथैव च ॥ ९
ां प्रसंख्या वच्यामि देवि एकमनाः शृणु।
ानां शुक्लपुष्पे तु दुर्गन्धा दानवेषु च ॥ १०
ेशा लोमशाश्चैव राक्षसानां प्रकीर्त्तिताः।
रेहाप्यवेलायां ये चान्ये पुष्पिता वने ॥ ११
ताश्ते च पितॄणां सत्यं देवि ब्रवीम्यहम्।

देव्युवाच।

च्छन्ति च ये मर्त्त्याः पुष्पाणि विविधानि च ॥ १२
तेषान्तु कीदृशो धर्म्मः सम्मार्ज्जनोपलेपने।
धूपस्य स्थापनेऽभ्यङ्गे गीत-वादित्रनिःस्वने ॥ १३
एतत् सर्व्वं समाख्याहि यदि चेद्भक्तिरस्ति मे।

शङ्कर उवाच।

शृणु देवि यथातथ्यं कीर्त्यमानमिदं शृणु ॥ १४
सर्व्वद्रव्येषु येऽपि स्युः सुवर्णं श्रेष्ठमुच्यते।
शक्तितोऽस्य प्रदानेन भक्तिमानीश्वरे द्विजः ॥ १५
तस्मादेव प्रसादेन मम लोके महीयते ॥
दश चैव सहस्राणि अप्सरोभिश्च क्रीड़ते ॥ १६
रुद्रलोकमुपाश्रित्य पतति कालपर्य्ययात्।
कर्षाशीतिका विज्ञेया माषा एकादशाप्यथ ॥ १७
एतद्देवि प्रमाणेन सुवर्णाशीतिं भक्तिमान्।
एतत् ते देवि मन्तव्यं भक्तानां भक्तिवत्सले ॥ १८
प्रतिसौवर्णिकं पुष्पं तत्रैव कथयाम्यहम्।
द्रोणपुष्पञ्च कुन्दञ्च कुरुते शङ्करार्च्चनम् ॥ १९
प्रतिसौवर्णिकं देवि विल्वपत्रञ्च पार्व्वति।
जपाकुसुमसौवर्णं तथा उरगमेव च ॥ २०
द्विसौवर्णञ्च विज्ञेयं सत्यञ्च कथयाम्यहम्।
जातिमल्लिकपुष्पाश्च पञ्चसौवर्णिकाः स्मृताः ॥ २१
वर्षकोटिं शतगुणं मम लोके महीयते।
तैलेनापि प्रियो दद्याद्घृताभावे तु मानवः ॥ २२
तेन दीपप्रदानेन शशिवद्भ्राजते द्विजः।
शतं संमार्ज्जने विद्धि सहस्रमुपलेपने ॥ २३
पुष्पोपहार-धूपैश्च शतं योगिनमुत्तमम्।
मालाशतसहस्रस्य जप्यं शतगुणं स्मृतम् ॥ २४
अगुरुं गन्ध-धूपञ्च चन्दनञ्च विलेपनम्।
एकविंशत् सुवर्णानि मया ते कीर्त्तितं पृथक् ॥ २५
चन्दनेनानुलिम्पेत सघृतेनापि धूपयेत्।
क्षीरेण स्नापयेल्लिङ्गं घृताभ्यङ्गञ्च कारयेत् ॥ २६
एष एव विधिर्देवि कर्त्तव्यो देवमानुषैः।
पितृ-गन्धर्व्व-यक्षाणां नागानां रक्षसां तथा ॥ २७
सर्व्वलोकहितार्थाय मया ते कीर्त्तितं तथा।
तथा नन्दी महाकाले गणैः सह वृषध्वजः ॥ २८
त्रिलोचनो भवेद्देवि यो मां विधिवदर्च्चते।

सनत्कुमार उवाच।

एष पुष्पविधिः प्रोक्तः स्वयमीशेन वै द्विज ॥ २९

लोकानां हितकामाय किमन्यच्छ्रोतुमिच्छसि ॥ ३०
य इदं पठते नित्यं श्रावयेत् सर्व्वपर्व्वसु ।
विमुक्तः सर्व्वपापेभ्यो रुद्रलोकं स गच्छति ॥ ३१

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायामेकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ।

व्यास उवाच ।

भगवन् श्रोतुमिच्छामि उपवासस्य यो विधिः ।
तीर्थानाञ्चैव मासानां विधानं परमं तथा ॥ १
तत्त्वेन कथय स्वामिन् ब्रह्मणस्तनय प्रभो ।

सनत्कुमार उवाच ।

श्रुत्वा पूर्व्वतरं गुह्यमुपवासविधिं परम् ॥ २
हिमवत्पर्व्वते शैले सिद्ध-गन्धर्व्वसेविते ।
उपविष्टास्तु देवाद्यास्त्र्यक्षं त्रिपुरनाशनम् ॥ ३
देव-गन्धर्व्वसहिता मुनिसङ्घसमाकुलाः ।
अस्तुवन् परमेशानं परमं ऋषिपूजितम् ॥ ४
परेशो भगवानिन्द्रो भवानग्निः सनातनः ।
भवान् धर्म्मस्य कामस्य सङ्कल्पस्य मनीषिणः ॥ ५
त्वं तुष्टिस्त्वं धृतिर्मेधा श्रद्धा कामो मनस्तथा ।
न गच्छेन्नरकं विद्वान् महाघोरं भयावहम् ॥ ६
चन्द्रार्कौ न प्रकाशेते यस्मिन् देशे गता मम ।
प्रकाशन्ते च भक्तास्तस्मिन् देशे सुतेजसा ॥ ७
एष मन्त्रो हि जप्यश्च हव्यकव्ये मनीषिभिः ।
माहात्म्यं ते सुरश्रेष्ठ यः पठेन्नियतो नरः ॥ ८
धारयिष्यन्ति ये चान्ये श्रद्दधानाश्च मानवाः ।
न तेषां किल्बिषं किञ्चित् त्वयि तुष्टे भविष्यति ॥ ९
नमोऽस्तु सर्व्वभूतेश सर्व्वतो विश्वतोमुख ।
अव्ययश्चाप्रमेयश्च पुराणपुरुषोत्तम ॥ १०
त्वं वायुरनलश्चैव त्वं जलं त्वं मही स्मृता ।
जाति-मल्लिक-यूथ्यश्च पञ्चसौवर्णिकाः स्मृताः ॥ ११
रक्तोत्पलं तथा चान्ये सप्तसौवर्णिकाः स्मृताः ।
दशसौवर्णिका ज्ञेया बिल्वाशोकमिति स्मृताः ॥ १२
एकादश सुवर्णानि नागपुष्पं सकेशरम् ।
नीलोत्पलन्तु विज्ञेयं सुवर्णानि तु द्वादश ॥ १३

कनकस्य च गन्धस्य सुवर्णानि त्रयोद
द्वात्रिंशत्सुवर्णानि पद्मपुष्पं प्रकीर्त्तितम्
अष्टाशीतिसहस्राणि कुशपुष्पं प्रकीर्त्ति
द्विसहस्रन्तु विज्ञेयं मन्दारं वै निगद्यते
त्रिसुवर्णसहस्राणि अर्कपुष्पं निगद्यते
सहस्राशीति विज्ञेयं बकपुष्पं निगद्यते
शतसाहस्रिको ज्ञेयो धत्तूरक इति
अर्कस्य करवीरस्य कुशोन्मत्तबकस्य
यो मे प्रयच्छते देवि लभते गाणपत्य
एतावत्पुष्पजातीनां गन्धमाघ्राय
अष्टमी चापराह्णे तु तथा कृष्णचतुर्द
एतैः पुष्पविशेषैश्च कुर्य्यान्नामार्च्चनं
तस्य पुण्येन यांल्लोकान् मम लोकान्
यथेष्टमर्च्चते सोऽपि यत्र देवः शिवो
आद्यमार्गं सिंहारूढमाच्छतो व्यापकं
शैवात् तरन्त्येकमनाः पूजयेन्मान्तु यो
न तस्य देवताः काश्चिद्विघ्नं कुर्व्वन्ति
इहलोके सुखं तस्य पुनस्तस्य च जा
किं व्रतैः किं तपोभिर्वा महाशास्त्रै
बध्यन्ते तु महात्मानो न चैव मुनिवा
आकाशेनैव पाशेन बध्यन्ते ब्रह्मवादि
धारोष्णेन तु क्षीरेण पूजयित्वा मया
निवेदयेद्यथाकामं तस्य पुण्यफलं
कोटिशतसहस्राणि वर्षाणान्तु हिमा
कृष्णाष्टमीमर्च्चयित्वा यत्र तत्र यथा
सर्व्वेषाञ्चैव पुष्पाणां विशेषेणोपलक्ष
तस्य बिन्दुं नरो यस्तु लिङ्गमर्च्चयते
एकाहं मत्प्रियो देवि युगकोटि
वसते मम लोके च यदि दीक्षान्व
सवलं देवदारुं वा भक्त्या धूपं प्रदा
सहस्रं देवि लिङ्गानां तस्य पुण्यफलं
द्वात्रिंशत् तु सुवर्णानि सार्द्धशीति
षष्टिवर्षसहस्राणि मोदते च ममालये
सघृतं गुग्गुलं वापि अगुरुञ्चैव यो द
युगकटिसहस्राणि मम लोके महीय
काकदीपं तमो दद्यात् संवत्सरं

यस्थं शिवस्यैव भक्तानान्तु सुरेश्वरः ।
ने हस्ते सुरश्रेष्ठ सर्व्वभूतनमस्कृतः ॥ ३२
नी कामान् प्रयच्छस्व अक्षयाणि महामते ।
गतिः सर्व्वभूतानां शरणं त्वं न संशयः ॥ ३३
भिः स्नापयेद्धर्म्मं लभते महतीं श्रियम् ।
पार्श्वमुपागम्य प्राञ्जलिः प्रयताकरैः ॥ ३४
वासं परं धर्म्मं स्मशन्ति मनसा स्मृताः ।

देव्युवाच ।

लोकपते देव सर्व्वलोकनमस्कृत ॥ ३५
लोकहितं वाक्यं त्वं समर्थोऽसि भाषितुम् ।
षामेव वर्णानां किं फलं लभते नरः ॥ ३६
: कथय मे देव विधिं विस्तरतस्तथा ।
त्सर्व्वविधिं सम्यक् श्रोतुमिच्छामि तत्त्वतः ॥ ३७

श्रीमहादेव उवाच ।

देवि यथान्यायमुपवासफलं शुभम् ।
। बालखिल्यानां नैमिषारण्यवासिनाम् ॥ ३८
फलं दिव्यं कथितं भावितात्मनाम् ।
ज्ञानां दरिद्राणां जन्तूनां दुःखजीविनाम् ॥ ३९
ाश्वं मया देवि इदमाख्यानमुच्यते ।
ु वक्ष्यामि तत्त्वेन ममवक्त्राद्विशेषतः ॥ ४०
वासफलञ्चैव मोक्षं वापि विशेषतः ।
मेतदशेषेण प्रवक्ष्याम्यनुपूर्व्वशः ॥ ४१
ापि देवि सम्प्रोक्तास्तथात्वेकमनाः शृणु ।
मी चैव षष्ठी च पौर्णमासी तथैव च ॥ ४२
ोष्या मम भक्तेन शृणु तस्यापि यत् फलम् ।
गी दर्शनीयश्च ज्ञानभागी भविष्यति ॥ ४३
ायाञ्च चतुर्द्दश्यां तथैव चाष्टमी भवेत् ।
ोष्या एकरात्रेण शृणु तस्यापि यत् फलम् ॥ ४४
ाढ्यो बहुपुत्रश्च विद्याभागी च जायते ।
ां चतुर्द्दशीञ्चैव यावच्छुक्लाष्टमी भवेत् ॥ ४५
ोष्या एकरात्रेण शृणु तस्यापि यत् फलम् ।
गी दर्शनीयश्च ज्ञानभागी भवेन्नरः ॥ ४६
स्यान्तु सदा व्यास एकभक्तेन पूजयेत् ।
भागी धनाढ्यश्च बहुपुत्रो भवेन्नरः ॥ ४७
स्यान्तु सदा व्यास एकभक्तेन पूजयेत् ।
ाभागी धनाढ्यश्च धनभागी तु निर्द्दिशेत् ॥ ४८

अमावास्यां त्रिरात्रेण यस्तु संवत्सरं क्षिपेत् ।
शतं वर्षसहस्राणि स्वर्गलोके महीयते ॥ ४९
मासे मासे त्रिरात्रेण यस्तु संवत्सरं क्षिपेत् ।
अप्सरोगणसंघुष्टे विमाने दिवि राजते ॥ ५०
यदि कालात् क्षयं प्राप्य जायते विपुले कुले ।
एतत् ते कथितं व्यास उपवासस्य यत् फलम् ॥ ५१
यो दीपो दीप्यमानस्तु कार्त्तिके च विचक्षणः ।
संयमैरुपवासैश्च एकभक्तेन यः क्षिपेत् ॥ ५२
अपश्चैव पिबेन्मासं निवृत्तो भोजनान्तरे ।
पौषमासं महाभागे तस्यापि त्वं विधिं शृणु ॥ ५३
एकभक्तन्तु यः कुर्य्याद्देवं परिचरेन्नरः ।
तस्मिन् मासे समस्ते तु प्रिये शृणु ततान्यपि ॥ ५४
विधिना तेन पानेन तर्पयित्वा च ब्राह्मणान् ।
शक्त्या तु दक्षिणां दद्याच्छृणु तस्यापि यत् फलम् ॥ ५५
हंस-सारससंयुक्त-विमानेन स गच्छति ।
महात्मानः शुभान् लोकान् सर्व्वदेवेन वन्दिताः ॥ ५६
शतवर्षसहस्राणां सुखं तत्र वसन्ति च ।
ततश्चापि च्युतो भूयो जायते विपुले कुले ॥ ५७
जातिस्मरत्वमाप्नोति स धर्म्मं कुरुते सदा ।
स तथा दुर्गतिं नैव तेन मासस्य मे प्रियः ॥ ५८
त्रिरात्रं क्षपयेद्यस्तु माघे मासि तु यो नरः ।
तस्मिन् मासे समाप्ते तु पूजयेच्च मम प्रिये ॥ ५९
विविधेनान्नपानेन तर्पयित्वा तु ब्राह्मणान् ।
शक्तितो दक्षिणां दद्याच्छृणु तस्यापि यत् फलम् ॥ ६०
नियोगाद्दपरं विद्वान् किं न पश्यतु मां प्रिये ।
षष्टिवर्षसहस्राणि त्रिंशद्वर्षशतानि च ॥ ६१
भागशः कामचारी स कामरूपीव लोकते ।
दीप्यतेऽस्मिन् लोकेषु सलोकश्चैव नित्यशः ॥ ६२
तत्र चापि च्युतो भूयो ब्रह्मत्वं लभते नरः ।
सर्व्वेषामेव सम्मानं राजराजेन पूजितः ॥ ६३
फाल्गुनन्तु यदा मासमेकभक्तेन यः क्षिपेत् ।
तस्मिन् मासे समाप्ते तु पूजयित्वा तु मां प्रिये ॥ ६४
शक्तितो दक्षिणां दद्याच्छृणु तस्यापि यत् फलम् ।
दिव्येनाग्निसुवर्णेन विस्तीर्णे शतयोजने ॥ ६५
दीप्यते चारविन्दाक्षि ब्रह्मलोकगतो नरः ।
तत्र वा विच्युतो भूयो सुखतस्तत्र जायते ॥ ६६

ब्रह्मत्वं लभते चैव चतुर्व्वेदश्च जायते ।
ज्ञान-विज्ञानसम्पन्ना विनीताश्च भवन्ति ते ॥ ६७
धर्म्मज्ञाश्च सुभार्य्याश्च अनेकक्रतुयाजकाः ।
चैत्रमासं महाभागे एकभक्तेन यः क्षिपेत् ॥ ६८
तस्मिन् मासि समाप्ते तु पूजयित्वा तु मां प्रिये ।
विधिनान्नेन पानेन तर्पयित्वा तु ब्राह्मणान् ॥ ६९
शक्त्या तु दक्षिणां दद्याच्छृणु तस्यापि यत् फलम् ।
अशीतिन्तु सहस्राणि शतवर्षाणि पञ्च च ॥ ७०
वारुणं लोकमाप्नोति यानेन मम तेजसा ।
वैशाखन्तु यदा मासमेकभक्तेन यः क्षिपेत् ॥ ७१
तस्मिन् मासि समाप्ते तु पूजयित्वा तु मां प्रिये ।
विधिनान्नेन पानेन तर्पयित्वा तु ब्राह्मणान् ॥ ७२
शक्त्या तु दक्षिणां दद्याच्छृणु तस्यापि यत् फलम् ।
त्रिंशद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ७३
ततश्चापि च्युतो भूयो गवां कोटिप्रदो भवेत् ।
ज्यैष्ठमासे चैकभक्तं मद्भक्तेनान्तरात्मना ॥ ७४
एकाहञ्चैव कुर्व्वाणो मुच्यते सर्व्वकिल्बिषैः ।
भ्रूणहा ब्रह्महा चैव तथैव गुरुतल्पगः ॥ ७५
तस्मिन् मासि समाप्ते तु पूजयित्वा तु मां प्रिये ।
विधिनान्नेन पानेन तर्पयित्वा च ब्राह्मणान् ॥ ७६
न तेषां पुनरावृत्तिर्विद्यते तु महात्मनाम् ।
एष ईश्वरसद्भावः कथितस्ते समासतः ॥ ७७
उपवासस्य यत् पुण्यं सांवत्सरं यथोदितम् ।
यच्छ्रुत्वा शुभकर्म्माणः प्राप्स्यन्ते धर्म्ममुत्तमम् ॥ ७८
इदन्तु श्रावयेद्वापि ब्रह्मसंसद्यथोदितम् ।
सार्व्वकामिकमक्षय्यं पितृश्चस्योपतिष्ठति ॥ ७९
गाञ्चैव कपिलां यश्च दद्यादेकस्य ब्राह्मणः ।
तत्र सूर्य्यप्रतीकाशमप्सरोगणसेवितम् ॥ ८०
विमानं लभते शुभ्रं स नरो नात्र संशयः ।
दशवर्षसहस्राणि स्वर्गलोके महीयते ॥ ८१
सुखं वसति धर्म्मज्ञः सर्व्वदुःखविवर्ज्जितः ।
तत्र चापि च्युतो भूयो जायते विपुले कुले ॥ ८२
राजत्वं लभते मर्त्त्यः संवत्सरशतान्यपि ।
सर्व्वबन्धविनिर्म्मुक्तः सर्व्वदुःखविवर्ज्जितः ॥ ८३
इत्येतत् परमं देवि गुह्यं सर्व्वसनातनम् ।
एकविंशतिकल्पानि जातिमेवं न नाप्नुयात् ॥ ८४

न जहाति च तं धर्म्मं राजधर्म्मं समा
आषाढमासे सप्तम्यामेकभक्त उपोषि
शृङ्गाटकं तदा पार्श्वं दक्षिणां मूर्त्तिमा
लभते बहुशो धर्म्मं यो ह्युपोषति चा
श्रावणन्तु यदा व्यास एकभक्तेन यः क्षि
तस्मिन् मासि समाप्ते तु पूजयित्वा तु मां
विविधान्नेन पानेन तर्पयित्वा च ब्राह्म
शक्त्या तु दक्षिणां दद्याच्छृणु तस्यापि
दशवर्षसहस्राणि सोमलोके महीयते
हंस-सारसयुक्तेन विमानेन स गच्छति
पितरस्तस्य तुष्यन्ति विंशद्वर्षशतानि च
तत्र चापि च्युतो भूयो जायते विपुले कु
गन्धर्व्व-देवविनुतं सर्व्वभूतसमन्वितम्
ब्रह्मत्वञ्चैव ब्रह्मत्वं विज्ञानञ्चैव जायते
यस्तु भाद्रपदं व्यास एकभक्तेन संक्षिपे
तस्मिन् मासि समाप्ते तु पूजयित्वा तु मां
विविधेनान्नपानेन तर्पयित्वा च ब्राह्मणा
शक्त्या तु दक्षिणां दद्याच्छृणु तस्यापि
शतवर्षसहस्राणि वायुलोके महीयते
ततो वापि च्युतो भूत्वा जायते विपुले
गन्धर्व्व-देवं निखिलं सर्व्वभूतसमन्वि
प्रमाणेन चतुर्व्वेदाध्यापनीयश्च यो भवे
आश्विनन्तु यदा व्यास एकभक्तेन यः
तस्मिन् मासि समाप्ते तु पूजयित्वा तु
शक्त्या तु दक्षिणां दद्याच्छृणु तस्यापि
श्रद्धा तु राजसूयस्य त्रिगुणं लभते फ
षष्टिवर्षसहस्राणि सुरलोके महीयते
तत्र चापि च्युतो भूयो जायते विपुले
मेधावी वीर्य्यसम्पन्नो धनी भवति धा
मासि मासि यदा व्यास अनुकूलेन की
अष्टवर्षस्य कालस्य पञ्चधा स भवेन्नरः
मम भक्तिरतादीनाञ्चैकान्तरोपवासि
पक्षोपवासिनाञ्चैव तथा मासोपवासि
शाकभक्षाम्बुभक्षाणां वसेत् तु जल
ब्रह्मचारिव्रतानाञ्च फलमूलाशिनां
यस्तु षष्ठे तु काले तु संवत्सरमुपो

एवंविधं प्रवक्ष्यामि शृणु तस्यापि यत् फलम् ।
अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ १०३
वाजपेयस्य धर्म्मज्ञ फलं प्राप्नोति मानवः ।
यस्तु कल्यञ्च सायञ्च भुञ्जानो नान्तरं पिबेत् ॥१०४
अहिंसानिरतश्चैव शृणु तस्यापि यत् फलम् ।
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १०५
यस्तु चत्वारि मासानि वीरासनगतो भवेत् ।
अहिंसानिरतश्चैव शृणु तस्यापि यत् फलम् ॥ १०६
दशवर्षसहस्राणि स्वर्गलोके महीयते ।
यदि काले क्षयं गच्छेज्जायते विपुले कुले ॥ १०७
अव्याधितो निरोगश्च दीर्घायुश्चैव जायते ।
यस्तु द्वादशवर्षाणि एकाहारी भवेन्नरः ॥ १०८
अहिंसानिरतश्चैव शृणु तस्यापि यत् फलम् ।
सर्व्वयज्ञफलञ्चैव लभते नात्र संशयः ॥ १०९
हंस-सारसयुक्तेन विमानेन स गच्छति ।
शतवर्षसहस्राणि षष्टिवर्षशतानि च ॥ ११०
इहलोके सुखं प्राप्य पश्चात् स्वर्गे महीयते ।
यदि कालक्षयं गत्वा जायते विपुले कुले ॥ १११
अव्याधितो निरोगश्च दीर्घायुश्चैव जायते ।
स नरो व्याधिरहितः स भवेत् सुखभागिनः ॥ ११२
पदे पदे यज्ञफलं लभते चानुपूर्व्वशः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ११३
पुष्पकेण विमानेन देवलोकं प्रतिक्रमेत् ।
स्त्रीसहस्रवृते रम्ये रमते नात्र संशयः ॥ ११४
काञ्ची-नूपुरशब्दैश्च सुप्तः सम्प्रतिबुध्यते ।
मृदङ्ग-वेणुशब्देन वंशैश्च ध्रुवमुत्थितः ॥ ११५
तपसश्च कृतस्यापि फलमस्याप्यनुत्तमम् ।
व्याधिञ्च स विनिर्ज्जित्य शोक-रागविवर्ज्जितः ॥११६
दिवसं पञ्चशतिकं रात्रौ साहस्रिकं जपेत् ।
रत्न-वैदूर्य्ययुक्तेन विमानेन स गच्छति ॥ ११७
यदि कालक्षयं गत्वा जायते विपुले कुले ।
बलवान् रूपसम्पन्नो लभते विपुलां श्रियम् ॥ ११८
दीपप्रदानं यो दद्याद्देवते ब्राह्मणेषु च ।
तेन दीपप्रदानेन अक्षय्याञ्च गतिं लभेत् ॥ ११९
अत ऊर्द्ध्वं प्रवक्ष्यामि शृणु तस्यापि यत् फलम् ।
ब्राह्मणेभ्यो ददातीह पानीयं श्रद्धयान्वितः ॥ १२०
तेन पुण्योदकानामनदीमध्ये वसन्ति ते ।
चन्द्रप्रदानं यो दद्याद्द्विजाय ज्वलितानि च ॥ १२१
गृहाणि हर्म्यप्रयूथानि लभते नात्र संशयः ।
धेनुप्रदानं यो दद्याद्ब्राह्मणेषु विशेषतः ॥ १२२
यावन्ति रोमकूपाणि तस्या गात्रेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ १२३
रूपवान् शीलसम्पन्नो विद्यावांश्च भवेन्नरः ।
वस्त्रदानञ्च यो दद्याद्ब्राह्मणेषु विशेषतः ॥ १२४
नववस्त्रप्रदानेन लभते अक्षयं फलम् ।
नववर्षसहस्राणि स्वर्गे मोदति मानवः ॥ १२५
यदि कालक्षयं गत्वा जायते विपुले कुले ।
कपिलादानं यो दद्याद्ब्राह्मणेषु विशेषतः ॥ १२६
यावन्ति रोमकूपाणि तस्या गात्रेषु वै द्विज ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ १२७
यदि कालक्षयं गत्वा जायते विपुले कुले ।
कन्यादानन्तु यो दद्याद्ब्राह्मणेभ्यो विशेषतः ॥ १२८
ब्राह्मणानां विवाहे च विधिना द्विजसत्तम ।
तस्य स्वर्गे भवेद्वासो देवलोके महीयते ॥ १२९
यदि कालक्षयं याति जायते विपुले कुले ।
शय्याप्रदानं यो दद्याद्ब्राह्मणेषु विशेषतः ॥ १३०
षष्टिवर्षसहस्राणि स्वर्गलोके महीयते ।
यदि कालक्षयं गत्वा जायते विपुले कुले ॥ १३१
यत् तु दानं मया व्यास तव स्नेहाददीरितम् ।
उपवासस्य यत् पुण्यं सारञ्चैव सनातनम् ॥ १३२
एतत् पुण्यमवाप्नोति यः पठेत् सर्व्वपर्व्वसु ।
धर्म्मञ्च लभते नित्यं मुच्यते पापकर्म्मभिः ॥ १३३
श्रुत्वा च नियतो धर्म्मं नरो रोगविवर्ज्जितः ।
न तु दुर्गमवाप्नोति दुःखं न तु भयाद्भयम् ॥ १३४
बहुधर्म्मं समाश्रित्य अहिंसाः सत्यवादिनः ।
स तु स्वर्गमवाप्नोति देवलोके महीयते ॥ १३५
यः पठेत् तु सदा सम्यक् कल्यमुत्थाय मानव ।
धर्म्मञ्च लभते नित्यं सर्व्वकामसमन्वितः ॥ १३६
न च दुःखमवाप्नोति पुत्र-पौत्रप्रतिष्ठितः ॥ १३७

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायामुपवासविधिर्नाम
द्वाविंशोऽध्यायः ॥२२॥

त्रयोविंशोऽध्यायः ।

देव्युवाच ।

त्वञ्च त्रिभुवनश्रेष्ठ त्र्यम्बक त्रिदशेश्वर ।
त्रिपुरस्य रणे जेतर्हर त्रिपथगाधर ॥ १
यज्ञरक्षःप्रमथन शूलपाणे रिपुञ्जय ।
प्रमथाधिपते देव नीलकण्ठ वसूत्तम ॥ २
कपर्द्दिन् भूतसङ्घेश व्याघ्रचर्म्मनिवासक ।
भगवन् तुष्यसि केन भक्तानां भक्तवत्सलः ॥ ३
को वा विधिः किं व्रतञ्च कथञ्चैव अनामकः ॥ ४
परिचर्य्या नियमा यमाः कथं
पुष्पाणि गन्धानि फलानि किंस्वित् ।
कस्यां तिथौ वा तव पूजनं स्यात्
प्रब्रूहि देवेश्वर शूलपाणे ॥ ५

श्रीमहादेव उवाच ।

चतुर्द्दशीमष्टमीञ्च मद्भक्तो यः क्षिपेन्नरः ।
नैवेद्यैर्विविधैश्चैव श्रूयतां चारुलोचने ॥ ६
अष्टम्यान्तु वरारोहे गवां क्षीरेण यो मम ।
स्नापयेच्च निराहारः प्रसन्नात्मा जितेन्द्रियः ॥ ७
देवस्योत्पादनं कृत्वा असुना विविधाः क्रियाः ।
गन्धमाल्यमथ स्नानं जप्यं वाथ प्रचिन्तयेत् ॥ ८
सिद्धमन्नं साधयेत शाक-मूल-फलानि च ।
अग्रमुद्धृत्य विधिना ईश्वराय निवेदयेत् ॥ ९
चतुर्व्विधायां मूर्त्तौ तु स्थण्डिले वाथ चिन्तयेत् ।
जानुभ्यां जानुना वापि मह्यीं गत्वा समाश्रितः ॥ १०
यथाश्रितोपविष्टो वा श्रद्धया परया युतः ।
तावन्नत्वेन गृह्णाति भक्तानां भक्तिवत्सले ॥ ११
श्रद्धया ईदृशी चेष्टा भक्तिसम्बोधलक्षणा ।
खण्डखाद्यविचित्राणि दिव्यान्यन्नानि यानि च ॥१२
भक्तिहीनान्यदेयानि सद्योद्भूतरसानि च ।
तस्याहं नैव तुष्यामि विमुखोऽहं वरानने ॥ १३
मन्त्रञ्चैव प्रवक्ष्यामि शृणुष्वायतलोचने ।
यस्य सिंहरथैर्युक्तं व्याघ्रस्यान्युअगामिनः ॥ १४
तमहं पुण्डरीकाक्षं सद्रमोङ्कारयाम्यहम् ।
आयान्तु देवाः सगणा उमा देवी महेश्वरी ॥ १५
भगवते महादेवाय पार्श्वगताय अनुचराय स्वाहा ।

आमलकं सूक्ष्ममयं शिवस्नानं पुनर्भव
प्रदक्षिणां परावर्त्तं सर्व्वमेव उमायुते
इमा आपः शान्ताः शान्ततमा
अमृता अमृततमा आपः पूताः ॥ १७
ब्रह्मपवित्रेण पूताः सूर्य्यस्य रश्मिभिः ।
आहारः सर्व्वदेवानां गन्धोऽयं प्रतिगृह्य
गन्धं दत्तं मया भक्त्या प्रतिगृह्य नमोऽस्तु
सुगन्धं सुमनो दिव्यैः सर्व्वगन्धैरलङ्कृतम्
पूतं ब्रह्मपवित्रेण पूतं सूर्य्यस्य रश्मिभिः
पुष्पं दत्तं मया भक्त्या प्रतिगृह्य नमोऽस्तु
नमः प्रजानांपतये नमो भक्तगणार्च्चित
प्रतिगृह्य इमं धूपं शिवलिङ्ग नमोऽस्तु ते
आपो ज्योतिश्च तेजश्च देवानां प्रभवः
पूतो ब्रह्मपवित्रेण पूतः सूर्य्यस्य रश्मि
प्रतिगृह्य इमं दीपं शिवलिङ्ग नमोऽस्तु
निवेद्य मनसा युक्तं देवानां गन्धमुत्तमम्
पूतो ब्रह्मपवित्रेण पूतः सूर्य्यस्य रश्मि
आहारः सर्व्वदेवानां नैवेद्यं प्रतिगृह्य
अर्च्चितः पूजितश्चैव मया भक्त्या निवेदि
गन्धपुष्पोपहारेण तत् कृपां कर्त्तुमर्हसि
चतुर्द्दशीं प्रवक्ष्यामि नैवेद्यस्य विधिं शृ
रक्तचन्दनगन्धैश्च हरितालानुलेपनैः ॥
मम मूर्त्तिं वरारोहे मद्भक्तश्च समालभेत्
अर्च्चयेत् करवीरेण सुगन्धकुसुमैस्तथा
कदम्बैः किंशुकाशोकैर्गन्धपुष्पातिमुक्तकैः
पत्रैश्च मम सान्निध्यं फलैः पुष्पैस्तथैव
आपद्भावे न नैवेद्यमद्भिः क्रियां करिष्य
मन्त्रेण च दहेद्धूपं घृतेन सह गुग्गुलम्
ओं नमोऽस्तु महादेव भक्तानां भक्तिवत्सल
त्रैलोक्याधिपते विष्णो नमो हरिहरेश्वर
नमः श्रीवत्सधाराय नमो ज्येष्ठभुजाय
नमः पिनाकधारिंस्ते नमश्चक्रगदाधर
गङ्गाधर नमस्यामि देवं त्रिभुवनेश्वरम्
उमापतिं नमस्यामि जम्बूद्वीपपते प्रभो
द्वावेतौ देवसङ्घातौ प्रसीदेतामनेकधा
यश्चैनं पठते नित्यमुभे सन्ध्ये यशस्विनि

यद्गत्वा क्रियते पापं तद्रात्रौ प्रतिमुच्यते ।
न वेदं तत्र वक्तव्यं यत्र नारी रजस्वला ॥ ३४
शृणुयात् कुत्सितो वापि यत्र वा सूतसूतकम् ।
स्वर्गे वा प्रवासे वा यत्र तत्र पठेत् तु यः ॥ ३५
तस्याहं सततं प्रीतो भविष्यामि यशस्विनि ।
न हि तस्याशुभं किञ्चिद्भुवि स्वर्गे च विद्यते ॥ ३६
एतत् ते कथितं देवि चतुर्दश्यष्टमीषु च ।
ब्रूहि ब्रूहि विशालाक्षि किमन्यच्छ्रोतुमिच्छसि ॥ ३७

व्यास उवाच ।

भगवन् श्रोतुमिच्छामि देवदेवस्य धीमतः ।
उपवासः कथञ्चैव कथं देवस्य पूजनम् ॥ ३८
नामाष्टमी कथञ्चैव कर्त्तव्या मानुषेण वै ।
तदहं श्रोतुमिच्छामि त्वत्प्रसादान्महामुने ॥ ३९

सनत्कुमार उवाच ।

श्रुतं पूर्वं मया व्यास रुद्रस्य तु महात्मनः ।
देव्या च संशयं पृष्टो हिमवति नगोत्तमे ॥ ४०
यथा श्रुतं मया व्यास कथयामि च सुव्रत ।
नामाष्टमीं प्रवक्ष्यामि देवस्य विधिमुत्तमम् ॥ ४१
यां श्रुत्वा निर्मलं याति रुद्रस्य च महात्मनः ।
मार्गशीर्षे तु वै मासे अष्टम्यां शङ्करं नरः ॥ ४२
पूजयित्वा च विविधैर्गन्धपुष्पोपशोभितैः ।
गोमूत्रप्राशनं कृत्वा सर्व्वपापैः प्रमुच्यते ॥ ४३
लभते चाक्षयं पुण्यं य उपोष्यति चाष्टमीम् ।
पौषमासे तथाष्टम्यां देवदेवं प्रपूजयेत् ॥ ४४
घृतञ्चैव सदा प्राश्य धर्मञ्च लभते बहु ।
अक्षयं लभते पुण्यं यदुपोष्यति चाष्टमीम् ॥ ४५
माघमासे तथाष्टम्यां महेश्वरं प्रपूजयेत् ।
क्षीरञ्च पायसञ्चैव दक्षिणामूर्त्तिमाश्रितः ॥ ४६
लभते बहुशः पुण्यं य उपोष्यति चाष्टमीम् ।
फाल्गुने च तथाष्टम्यां त्र्यम्बकञ्चैव पूजयेत् ॥ ४७
तिलस्य प्राशनं कृत्वा दक्षिणामूर्त्तिमाश्रितः ।
लभते बहुशो धर्मं य उपोष्यति चाष्टमीम् ॥ ४८
चैत्रे मासे तथाष्टम्यां सनातनन्तु पूजयेत् ।
यवांश्च प्राशयेत् तत्र दक्षिणामूर्त्तिमाश्रितः ॥ ४९
लभते बहुशो धर्मं य उपोष्यति चाष्टमीम् ।
वैशाखे च तथाष्टम्यां सदाशिवेति पूजनम् ॥ ५०
जलस्य प्राशनं कुर्य्याद्दक्षिणामूर्त्तिमाश्रितः ।
लभते बहुशो धर्मं य उपोष्यति चाष्टमीम् ॥ ५१
ज्यैष्ठमासे तथाष्टम्यां भगवानिति पूजयेत् ।
गोमयप्राशनं कुर्य्याद्दक्षिणामूर्त्तिमाश्रितः ॥ ५२
लभते बहुशो धर्मं य उपोष्यति चाष्टमीम् ।
आषाढ़े तु तथाष्टम्यां नीलकण्ठं प्रपूजयेत् ॥ ५३
शृङ्गाटकप्राशनञ्च दक्षिणामूर्त्तिरेव च ।
लभते बहुशो धर्मं य उपोष्यति चाष्टमीम् ॥ ५४
श्रावणे तु सदा व्यास अष्टम्यां स्थाणुमेव च ।
पूजाञ्च महतीं कृत्वा प्राशयेल्लवणोदकम् ॥ ५५
दक्षिणामूर्त्तिमास्थाय प्राशयेच्च विचक्षणः ।
लभते बहुशो धर्मं य उपोष्यति चाष्टमीम् ॥ ५६
भाद्रपदे यदा व्यास अष्टम्यां शम्भुमेव च ।
दध्नश्च प्राशनं कृत्वा दक्षिणामूर्त्तिमाश्रितः ॥ ५७
लभते बहुशो धर्मं य उपोष्यति चाष्टमीम् ।
आश्विने तु यदा व्यास अष्टम्यामीश्वरेति च ॥ ५८
तण्डुलोदकमश्नीयाद्दक्षिणामूर्त्तिमाश्रितः ।
लभते बहुशो धर्मं यदुपोष्यति चाष्टमीम् ॥ ५९
कार्त्तिके तु यदा व्यास अष्टम्यां रुद्रमर्चयेत् ।
दधि चैवेह प्राश्नीयाद्दक्षिणामूर्त्तिमाश्रितः ॥ ६०
लभते बहुशो धर्मं य उपोष्यति चाष्टमीम् ।
अहन्यहनि यो भक्त्या देवदेवमुमापतिम् ॥ ६१
अर्चयेत् सततं रुद्रं प्रसन्नात्मा समाहितः ।
गन्धैर्माल्यैश्च धूपैश्च पुष्पैश्चैव विशेषतः ॥ ६२
समाप्ते भोजयेद्विप्रान् दद्यात् सौवर्णदक्षिणाम् ।
महयेच्च यथाशक्त्या शिवयोगी विशेषतः ॥ ६३
ततो मृत्युवशं प्राप्य शिवलोकं स गच्छति ।
चन्द्रार्द्धमौलिनस्तत्र त्रिनेत्रवृषभध्वजाः ॥ ६४
सङ्गच्छन्ति शिवं लोकं स्वच्छन्दोगतिमुत्तमाम् ।
रुद्राख्या चैव सहितो गच्छेत् तु परमं पदम् ॥ ६५
दिव्याप्सरःसमाकीर्णे क्रीड़ते च महात्मना ।
वसते च अनुद्विग्नः शिवलोकमनुत्तमम् ॥ ६६
वृषयुक्तेन यानेन स्वच्छन्दोललितः सदा ।
तत्र पुण्यक्षयं प्राप्य जायते विपुले कुले ॥ ६७
सर्व्वसौभाग्यसंयुक्तः सर्व्वलोकपरायणः ।
प्रार्थितं लभते राज्यं प्रज्ञायुक्तो बहुश्रुतः ॥ ६८

शृणु मानी तु धर्म्मज्ञो मिथ्यादम्भविवर्ज्जितः।
पूजाञ्च स्मरते नित्यं देवं पूजयते पुनः ॥ ६९
स गच्छति पुनः स्वर्गं रुद्रलोके महीयते ॥ ७०

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायां नामाष्टमीविधिकथनं नाम
त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः।

व्यास उवाच।

रहस्यं श्रोतुमिच्छामि हरस्य वक्तुमर्हसि।
कुब्जाश्च रोगिणो रौद्रा जायन्ते येन मानवाः ॥ १
सर्व्वलक्षणसम्पन्नाः सौभाग्याः शिवदर्शनाः।
केन वा कर्म्मणा देव जायन्तेऽपूर्व्वलक्षणाः ॥ २
ब्रूहि तत्त्वेन कथय प्रमाणं लक्षणाष्टमीम्।

सनत्कुमार उवाच।

श्रुतं पूर्व्वं मया व्यास यद्देव्यै प्रोक्तवान् हरः ॥ ३

महेश्वर उवाच।

शृणु देवि परं दिव्यमुपवासं परं मम।
लक्षणाष्टमीं प्रवक्ष्यामि तच्छृणु त्वं त्रिलोचने ॥ ४
कार्त्तिकस्य तथाष्टम्यामुपोष्य मम भक्तिमान्।
अहोरात्रोषितो भूत्वा शिवेति च प्रपूजयेत् ॥ ५
गन्ध-माल्यैश्च विविधैः पूजयेद्भक्तिमान् हरम्।
रोचनं तस्य देवस्य मुखेनैव निवेदयेत् ॥ ६
ततो विष्णुपदं देवि रुद्रस्य भवनोत्तमम्।
यत्र वै रमणं दिव्यं मत्प्रसादाद्भविष्यति ॥ ७
सर्व्वसर्व्वाङ्गयुक्तास्य यावद्दे शिव उच्यते।
ततो यजेत मां देवि मम भक्तस्तु सर्व्वशः ॥ ८
सर्व्वलक्षणसंयुक्तो जायते मानवोत्तमः।

देव्युवाच।

त्वया प्रोक्तं देवदेव संक्षेपेण तथैव च ॥ ९
नैवं बुध्यामि मूलाङ्ग निखिलं तद्ब्रवीहि मे।
नाम नाम तथाष्टम्यां विस्तरेण ब्रवीहि मे ॥ १०

महेश्वर उवाच।

विस्तरं ते प्रवक्ष्यामि शृणु देवि नगात्मजे।
नाथं शिरसि वै देवि पादे शङ्करमेव च ॥ ११
जङ्घेऽतिरुद्रं मे देवि ईशानं कटिरुच्यते।
त्र्यम्बकेति च मेढ्रं तु यथोक्तेन विधानतः।
त्र्यम्बकञ्च ततो देवि कपर्द्दिनष्टाङ्गमेव च।
शूलपाणिस्तु वक्षोगः स्कन्धे तु वृषभध्वजः।
त्र्यम्बकेति च कक्षं देवि श्रोत्रे त्र्यम्बक उच्यते।
उमापतिश्च मे देवि नासा पशुपतिस्तथा।
पुरहा कर्णयोर्देवि त्रिपुरघ्नश्च चक्षुषी।
श्मशानवासी भ्रूमध्ये भूतेशेति कपोलयोः।
दक्षयज्ञविनाशी तु दन्तसेवनमेव च।
जटिलं जिह्वया देवि शिरः पशुपतीति च।
शशाङ्काङ्केति च मूर्द्धि ललाटे तु उमाप्रियः।
गङ्गाधरेति केशेषु सर्व्वाङ्गे शिवमेव च ॥
अहन्यहनि यो भक्त्या उपोष्य विधिनाष्टमीम्।
अर्च्चयेन्मां ततो रुद्रं प्रयतात्मा समाहितः।
गन्ध-दीपैश्च माल्यैश्च धूपैश्चैव विशेषतः।
समाप्ते भोजयेद्विप्रान् यथाविभवमेव च।
दद्यात् ताम्रघटान् पूर्णान् ब्राह्मणाय ...
दक्षिणाञ्च यथाशक्त्या सुवर्णानां यथार्ह...
मृण्मयं भाजनं पूर्णं तैलेन च विशेषतः।
ततः स्वर्गं समारुह्य वसेद्दासवसन्निधौ।
दिव्यवर्षसहस्राणि वसतेऽप्सरसैः सह।
स्वर्गलोके उषित्वा तु दिव्यैर्भवनभूषणैः।
ततः कालक्षयं प्राप्य जायते च पुनः ...
महाभागकुले चैव जन्म लोके विधीयते।
सर्व्वलक्षणसम्पन्नो जायते मानवोत्तमः।
न कश्चिल्लक्षणैर्हीनो भवति पुरुषोत्तमः।

इति श्रीशैवे महापुराणे सनत्कुमार-
तायां नामलक्षणाष्टमीकथनं नाम
चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः।

महेश्वर उवाच।

अत्र चैव हितार्थाय लोकानाञ्चैव सुव्रते।
कथयिष्याम्यहं धर्म्मं यथावदनुपूर्व्वशः।
अन्नदानात् परं दानं नैव किञ्चिद्विशि...

अन्नाद्भवन्ति भूतानि तस्मात् तदधिकं स्मृतम् ॥ २
अन्नं यस्तु सुसंस्कृत्य प्रार्थकेभ्यः प्रयच्छति ।
मयूर-हंससंयुक्तं सर्व्वकामसमृद्धिमत् ॥ ३
विमानं सूर्य्यसङ्काशमन्नदो लभते शुभम् ।
यदि मानुष्यमायाति कदाचित् पुरुषोत्तमः ॥ ४
धनधान्यसमाकीर्णे कुले याति सुरूपवान् ।
यथाशक्त्या तु यो दद्याद्विप्रायान्नं वरो नरः ॥ ५
स तेन कर्म्मणाप्नोति प्रजापतिसलोकताम् ।
कदाचिदपि यो दद्यादन्नं विप्राय संस्कृतम् ॥ ६
तस्य शतगुणं पुण्यं सहस्रगुणमेव च ।
उपतिष्ठति लोकेषु इह चापि सुखी भवेत् ॥ ७
अवघ्रातमवज्ञातमसंस्कृतमथापि वा ।
अन्नं प्रदद्याद्यो देवि यादृशं तादृशं शुभे ॥ ८
तस्यापि नरके घोरे पात्यमानस्य राक्षसैः ।
उपतिष्ठेद्बहुविधा सिद्धिर्य्येनास्य जायते ॥ ९
यदि मानुष्यमायाति कदाचित् स नरः पुनः ।
म्लेच्छेषु भोगी भवति रमते च यथा नरः ॥ १०
अन्नमेव विशिष्टं हि तस्मात् परतरं न हि ।
अन्नं प्रजापतिः प्रोक्तं स च संवत्सरः पुनः ॥ ११
संवत्सरश्च यज्ञोऽसौ यज्ञे सर्व्वं प्रतिष्ठितम् ।
तस्माद्भवन्ति भूतानि स्थावराणि चराणि च ॥ १२
तस्मादन्नं विशिष्टं वै सर्व्वस्य इति विश्रुतिः ।
अन्नदानात् परं दानं नैव किञ्चिद्विशिष्यते ॥ १३
अन्नाद्भवन्ति भूतानि तस्मात् तद्वै विशिष्यते ।
सुगन्धाः शीतलाश्चापो रसैर्दिव्यैः समन्विताः ॥ १४
यः प्रयच्छति विप्रेभ्यस्तस्य दानफलं शृणु ।
विमानं सूर्य्यसङ्काशमप्सरोगणनादितम् ॥ १५
सोऽधिरुह्य दिवं याति वरुणस्य सलोकताम् ।
तत्रासावयुतान्यष्टौ उषित्वा देववत् सुखी ॥ १६
कुले महति सङ्कीर्णे जायते धनधान्यवान् ।
तथान्नपूर्णं यो भाण्डं ब्राह्मणाय प्रयच्छति ॥ १७
रसास्तस्योपतिष्ठन्ति पूज्यते च दिवं गतः ।
भाजनानि च यो दद्यादन्नपूर्णं शुभानने ॥ १८
भोजनस्यार्थभोगानां तारयेच्च पितॄन् भयात् ।
तड़ागं यस्तु कुर्व्वीत वापिकाञ्च समृद्धिमान् ॥ १९
गावः पिबन्ति वै तत्र सर्व्वे जन्तव एव च ।
तारयित्वा च स पितॄंस्तथैव च पितामहान् ॥ २०
प्रपितामहलोकेषु कामगेषु विहङ्गमः ।
वसते देववन्नित्यं वर्षायुतशतानि च ॥ २१
पुनश्च मानुषे लोके सर्व्वरोगविवर्ज्जितः ।
भोगी भवति भोग्यानां राजामात्यश्च जायते ॥ २२
दाता यज्वा च बलवान् सुभगः प्रियदर्शनः ।
अवटं यो नरः कुर्य्यादपां पूर्णं शुचिस्मिते ॥ २३
दद्याच्च ब्राह्मणेभ्यस्तु भोजयित्वा यथार्थवत् ।
अष्टभिः सुविचित्राभिः पताकाभिरलङ्कृतम् ॥ २४
ध्वजेन वैजयन्त्या तु पुष्पैश्च समलङ्कृतम् ।
सन्तर्पयित्वा तु पितॄन् विमानेन नरोत्तमः ॥ २५
यात्यप्सरोपगीतेन वरुणस्य सलोकताम् ।
हिरण्यं हेमभूमिञ्च तिलान् रत्नानि वापि यः ॥ २६
प्रदद्यात् सर्व्वभूतेभ्यस्तस्य पुण्यफलं शृणु ।
स विमानेन महता सर्व्वकामसमन्वितः ॥ २७
इन्द्रस्य लोकं सम्प्राप्य मोदते विबुधो यथा ।
ततश्च्युतश्च धर्म्मात्मा सर्व्वकामसमृद्धिमान् ॥ २८
कुले महति लोकेशो जायतेऽदुःखतापसः ।
यस्तु वृक्षञ्च कुरुते च्छायापुष्पफलान्वितम् ॥ २९
पथि देवनरः सौम्य स तारयति वै पितॄन् ।
तथैव दद्याद्विप्रेभ्यो निष्कलञ्च पुनर्नरः ॥ ३०
यत् फलं समवाप्नोति तच्छृणुष्व महामते ।
यावद्वृक्षस्य पत्राणि उपयुञ्जन्ति देहिनः ॥ ३१
फलानि चैव भक्ष्यन्ते जन्तुभिः फलितस्य च ।
तावद्वर्षसहस्राणि तारयित्वा पितॄनपि ॥ ३२
सोमलोकं समासाद्य समृद्धं फलमाप्नुयात् ।
फलानि यः प्रयच्छेत हेमरत्नसमन्वितम् ॥ ३३
फलानां स तु भागी स्याद्रूपवान् सुभगश्च ह ।
भाजनं यः प्रयच्छेत् तु हेमरत्नसमन्वितम् ॥ ३४
सोऽप्सरःशतसङ्कीर्णे विमाने दिवि मोदते ।
राजतं यः प्रयच्छेत विप्रेभ्यो भाजनं शुभम् ॥ ३५
स गन्धर्व्वपदं प्राप्य उर्व्वश्या सह मोदते ।
ताम्रं यो भाजनं दद्याद्ब्राह्मणेभ्यो विशेषतः ॥ ३६
लभते यक्षराजस्य पदं बलसमन्वितः ।
गृहं यस्तु प्रयच्छेत सर्व्वकामसमृद्धिमत् ॥ ३७
स लोकं ब्रह्मणः प्राप्य सर्व्वकामैश्च संवृतः ।

वर्षकोटिशतञ्चैव तत्फलस्तेन कर्म्मणा ॥ ३८
गृहमेधी सदा दाता भोगवांश्चैव जायते ।
ओषधीर्यः प्रयच्छेत ब्राह्मणाय महात्मने ॥ ३९
सर्व्वकामसमृद्धस्तु सोमलोकं समश्नुते ।
तत्र वर्षसहस्राणि सप्त स्थित्वा पुनर्नरः ॥ ४०
इह सत्त्वं ततः प्राप्तो भोगवानभिजायते ।
भूमिञ्चैव प्रयच्छेत ब्राह्मणेभ्यो महामुने ॥ ४१
सर्व्वलोकेषु सुमुखो विमानेन सुवर्च्चसा ।
बहुवर्षसहस्राणि चरते कामरूपवान् ॥ ४२
यदि मानुषमायाति स नरः कालपर्य्ययात् ।
सर्व्वकामदुघा तस्य मही भवति सर्व्वशः ॥ ४३
पशुं यस्तु प्रयच्छेत ब्राह्मणाय समाहितः ।
स सोमलोकमाप्नोति क्रीड़ते कालमक्षयम् ॥ ४४
अन्नं यस्तु प्रयच्छेत संस्कृतं ब्राह्मणाय च ।
राज्यस्थानमवाप्नोति स्वर्गञ्चाप्नोति विज्वरः ॥ ४५
यस्तु शय्यां प्रयच्छेत ब्राह्मणाय स्वलङ्कृताम् ।
स गत्वा पितृलोके वै वर्षायुतशतं वसेत् ॥ ४६
इह वापि कुले जातः सर्व्वकामसमन्वितः ।
भार्य्यां प्राप्नोति भद्राङ्गीं प्रजावांश्चोपजायते ॥ ४७
अश्वं यस्तु प्रयच्छेत हेमचित्रं सलक्षणम् ।
स तेन कर्म्मणा देवि मारुतं लोकमश्नुते ॥ ४८
रथमश्वयुजं दासीं कन्यां गृहमथापि वा ।
भूमिं यश्च प्रयच्छेत स राजा भुवि जायते ॥ ४९
विधिना मन्त्रयुक्तेन तस्य धर्म्मफलं भवेत् ।
सर्व्वकामदुघा तस्य धेनुभूत्वोपतिष्ठते ॥ ५०
जलधेनुञ्च यो दद्यात् तस्य दानफलं शृणु ।
प्रपां गवां तड़ागं वा कूपं तस्य सुपुष्कलम् ॥ ५१
कृत्वा कुम्भांश्च सम्पूर्णान् माल्यैश्च समलङ्कृताम् ।
पुष्पैश्च विविधाकारैरभ्यर्च्य द्विजसत्तमान् ॥ ५२
भक्ष्यभोज्यैः सुसंतृप्तान् तिलपात्राणि दापयेत् ।
दक्षिणां पुष्कलां दद्यात् तेभ्यस्तान् दर्शयेद्बुधः ॥ ५३
आपः शिवाश्च सौम्याश्च तर्पयन्ति पितॄन् यथा ।
कामदाः कामदातारो भवन्ति च पदे पदे ॥ ५४
एवं दत्त्वा च गां धेनुं पुरस्कृत्य च वै तदा ।
वाहयेच्च प्रपां देवि ब्रह्मलोकसमर्पिणीम् ॥ ५५
तिलपात्राणि यो दद्यात् तथा वस्त्रयुगं नरः ।

सुवर्णस्य च सान्निध्यं फलानि विविधानि च ।
ततो घृतं प्रदद्याद्वै ब्राह्मणेभ्यो यथाविधि ।
घृतं गावः प्रसूयन्ते घृतं भूम्यां प्रतिष्ठितम् ।
घृतमग्निश्च देवाश्च घृतं मे सम्प्रदीयताम् ।
ब्राह्मणांस्तर्पयित्वा तु गन्धमाल्यैरलङ्कृतान् ।
दानकाले ततस्तस्यां सुरा गात्राणि संश्रिताः ।
ब्रह्मा तस्याः स्थितो मूर्द्ध्नि शक्रो भालं समाश्रितः ।
चन्द्रादित्यौ नेत्रदेशे प्राणे वायुः प्रभञ्जनः ।
मुखं तस्याः स्थितो वह्निर्जिह्वां सोमः स्वयम्भूः ।
कर्णयोश्चाश्विनौ देवौ शिरो रुद्राः समाश्रिताः ।
पादयोर्लोकपालाश्च सर्व्वे चैव तु पन्नगाः ।
समुद्राः सप्त जठरे ग्रीवायां तपनाः स्थिताः ।
स्तने गङ्गा सरिच्छ्रेष्ठा पार्श्वे तु वसवस्तथा ।
उपस्थञ्च गुदं तीर्थाः प्रजापतिसमाश्रितः ।
पुरीषं श्रीर्वभूवास्या नागाः श्वासानिलाश्रिताः
साध्या विश्वेऽथ लोकाश्च पुच्छमेव तु संश्रिताः
मन्त्रा यज्ञाश्च दानानि यमश्च ऋषिभिः सह ।
नक्षत्राणि ग्रहाश्चैव तारारूपाणि यानि च ।
गायत्री चैव विष्णुश्च जगती पङ्क्तिरेव च ।
अनुष्टुप् चैव यज्ञश्च सामान्याथर्व्वणस्तथा ।
लोकस्य मातरश्चैव मेघवर्षमथापि वा ॥
धर्म्मो नारायणश्चैव भूतानि सरितस्तथा ।
रोमकूपाणि संश्रित्य तस्यां देव्यां व्यवस्थिताः ।
यक्षाश्च राक्षसाश्चैव पिशाचाश्चैव पक्षिणः ।
यज्ञस्तथा दक्षिणाश्च तथा अप्सरसः शुभाः ।
गन्धर्व्वाश्च महात्मानो ये चान्येऽप्येवमादयः ।
तस्या विषाणयोर्व्यास सर्व्वे एव समाश्रिताः ।
फलानि सर्व्वदानानां पतयश्च पृथग्विधाः ।
समाश्रिताः सर्व्वे एव सर्व्वदेवमयी भुवि ॥
विप्रेभ्यो मेध्यधेनुं तां प्रदद्यात् सुसमाहितः ।
कुशाः सुवर्णबीजानि तिलाः सिद्धार्थकास्तथा
प्रदेयास्तु ततोऽद्भिस्तु मन्त्रेणानेन सुव्रते ।
सर्व्वदेवमयीं दोग्ध्रीं सर्व्वलोकमयीं तथा ।
सर्व्वलोकनिमित्ताञ्च सर्व्वलोकनमस्कृताम् ।
प्रयच्छामि महामूर्त्तिमक्षयां मे शुभार्थिनी ।
एवं स दत्त्वा तां गान्तु यत्र यत्र प्रजायते ।

तत्र तत्र गता सा तं तारयेत् तु भयात् तथा ॥ ७४
सर्व्वान् कामान् संप्राप्नोति गोदानेन यथामरः।
इह जातश्च तामेव कामगां प्रतिपद्यते ॥ ७५
मनसा मानुषो भूत्वा गोसहस्री महाबलः।
रूपवान् बलवांश्चैव बहुपुत्रश्च जायते ॥ ७६
प्रसूयमानां यो गान्तु दद्यादुभयतोमुखीम्।
हेमशृङ्गीं रौप्यखुरीं स जातिस्मरतां लभेत् ॥ ७७
यस्तु गां सम्प्रयच्छेत ब्राह्मणेभ्यो यथाविधि।
तस्य सा गौर्महाघोरैस्त्रायते नरकादिभिः ॥ ७८
कृष्णाजिनन्तु यो दद्याद्व्रतिने ब्रह्मचारिणे।
पृथिवीफलमाप्नोति योगश्चास्य प्रवर्त्तते ॥ ७९
योगिभ्यो ब्रह्मचारिभ्यो गृहस्थेभ्यो यथा तथा।
यः प्रयच्छति आवासमश्वमेधफलं लभेत् ॥ ८०
प्राप्नुयात् पुण्डरीकन्तु गोसहस्रन्तु विन्दति।
स स्मृतिञ्च परां लब्ध्वा योगमाप्नोति सुव्रते ॥ ८१
कमण्डलुञ्च यो दद्याद्ब्राह्मणाय नरोत्तमः।
स तेन कर्म्मणा देवि धर्म्मं नित्यमवाप्नुयात् ॥ ८२
व्याधितं यस्तु विप्रर्षिं दीनं मूढ़मचेतनम्।
उद्धरेत् तु यथाशक्त्या स मुच्येद्ब्रह्महत्यया ॥ ८३
यः सुवर्णं प्रयच्छेत दरिद्राय द्विजातये।
दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ ८४
यश्चैतानि रम्याणि दानान्युक्तानि कृत्स्नशः।
सर्व्वाणि युगपच्चैव पृथिव्यामेकराड्भवेत् ॥ ८५
इदं यः शृणुयान्नित्यं दद्याच्चैव स्वशक्तितः।
पश्यति च महाभागः सोऽपि गच्छेत् त्रिविष्टपम् ॥ ८६

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां दानधर्म्मविधिनिरूपणं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः।

ईश्वर उवाच।

देवि शृणुष्व भूयोऽपि यथा दानं विना शुभम्।
लोकमेवोपवासेन यथा धर्म्मोऽपि लभ्यते ॥ १
एकभक्तेन यो देवि मासं मार्गशिरे क्षिपेत्।
स तेन कर्म्मणा देवि मां भजन्निव नित्यशः ॥ २
पौषे मासे तु यो देवि ब्रह्मशब्दाभिधायकम्।
माघमासे तु कुर्व्वाणः श्रियमाप्नोति वै प्रिये ॥ ३
एकभक्तन्तु कुर्व्वाणः फाल्गुने मासि नित्यशः।
स्त्रीषु सौभाग्यमाप्नोति स्त्रियश्च परमां श्रियम् ॥ ४
यः क्षिपेदेकभक्तेन चैत्रमासं नरोत्तमः।
धनधान्यसमृद्धे च कुले जायति रूपवान् ॥ ५
वैशाखं यः क्षिपेन्मासमेकभक्तेन मानवः।
ज्ञातिसंश्रेष्ठतां प्राप्य पूजितो धनवानपि ॥ ६
ज्यैष्ठमासं क्षिपेद्यो वै एकभक्तं समाचरन्।
ज्येष्ठो भवति भ्रातॄणां भोगानाप्नोति पुष्कलान् ॥ ७
आषाढ़ं वापि यो मासमेकभक्तं समाचरेत्।
स राज्ञो मान्यतां प्राप्य कामानाप्नोति पुष्कलान् ॥ ८
श्रावणे देवि यो मासे एकभक्तं समाचरेत्।
सैनापत्यञ्च सम्प्राप्य बलवानपि जायते ॥ ९
यस्तु भाद्रपदं मासमेकभक्तं समाचरेत्।
स तेन कर्म्मणा देवि धनवानपि जायते ॥ १०
योऽपि चाश्वयुजं मासमेकभक्तेन तिष्ठति।
वाणिज्यं लभते तस्य कृषिः पशुगणास्तथा ॥ ११
कार्त्तिकं वापि यो मासमेकभक्तेन तिष्ठति।
सोऽश्वमेधफलं प्राप्य वह्निलोके महीयते ॥ १२
यः क्षिपेदेकभक्तेन मार्गशीर्षं न संशयः।
विमानेनार्कवर्णेन स गच्छेच्छक्रलोकताम् ॥ १३
संवत्सरन्तु यः पूर्णमेकभक्तेन तिष्ठति।
स पार्थिवसमो भूत्वा महीं पाति महेन्द्रवत् ॥ १४
अहोरात्रन्तु यो देवि कुर्य्यादेकं नरोत्तमः।
दशानां स सुवर्णानां फलमाप्नोति मानवः ॥ १५
मासे मासे अहोरात्रं सर्व्वपापविवर्ज्जितः।
न याति नरकं घोरं यमञ्च स न पश्यति ॥ १६
मासे मासे च यः कुर्य्यात् त्रिरात्रं क्षेपयेन्नरः।
कौबेरं लोकमासाद्य स विन्देत् परमं सुखम्(क) ॥ १७
चतुर्थेऽहनि यो भुङ्क्ते प्रयतात्मा शुचिर्नरः।
स गन्धर्व्वपदं प्राप्य मोदते स्वर्गिवद्बुधः ॥ १८
पञ्चमेऽहनि यो भुङ्क्ते प्रतिमासमतन्द्रितः।
वायुलोकं समासाद्य स्वर्गलोकञ्च गच्छति ॥ १९
यो भुङ्क्ते दिवसे षष्ठे नित्यं नियममास्थितः।

(क) पदमिति पाठान्तरं क्वचिद्दृश्यते।

वारुणं लोकमासाद्य स च विन्देन्महापदम् ॥ २०
सप्तमेऽहनि यो भुङ्क्ते जितद्वन्द्वो दृढव्रतः।
आदित्यलोकं प्राप्नोति सर्व्वदेवं महाफलम् ॥ २१
अष्टमेऽहनि यो भुङ्क्ते प्रतिमासमतन्द्रितः।
वायुलोकं समासाद्य स्वर्गलोकं स गच्छति ॥ २२
यो भुङ्क्ते नवमेऽहनि नित्यं नियममास्थितः।
वारुणं लोकमास्थाय स च विन्देन्महत् फलम् ॥ २३
दशमेऽहनि यो भुङ्क्ते दशाहस्य फलं लभेत्।
अग्निस्थाने समो भूत्वा सूर्य्यवज्ज्वलते सदा ॥ २४
मानुष्यञ्च पुनः प्राप्य दश भार्य्या लभेत सः।
एकादशे तु यो भुङ्क्ते दिवसे मानवः शुचिः ॥ २५
एकादश्याः फलं प्राप्य यशवानिह जायते।
दिने द्वादशमे देवि भुङ्क्ते यस्तु सदा नरः ॥ २६
वसेत् स भार्गवस्थाने प्राप्तदिव्यसुखान्वितः।
अथेह मानुषो भूत्वा स नरो जायते शुचिः ॥ २७
धनधान्यसमायुक्तो जायते सुकुले शुभे।
चतुर्द्दश च यो रात्रीर्नित्यसुत्क्षिपते नरः ॥ २८
नैमिषं लोकमास्थाय भवेद्गणपतिर्नरः।
अर्द्धमासं क्षिपेद्यस्तु नित्यमेव ह्यतन्द्रितः ॥ २९
देवराजेन तुल्योऽसौ भूत्वा स्वर्गं च तिष्ठति।
इह राजा महान् भूमौ यत्र तत्राभिजायते ॥ ३०
यस्तु मासं क्षिपेद्धीरो जितक्रोधो जितेन्द्रियः।
विमानेन स दिव्येन अप्सरोभिः समन्वितः ॥ ३१
पूज्यमानो यथा देवः स्तूयमानोऽथ सर्व्वशः।
ज्वलनादित्यसङ्काशः स नित्यं सुखमश्नुते ॥ ३२
सर्व्वलोकेषु वसते राजन्यवसनानि च।
ततः पद्मासनं प्राप्य दश भार्य्या लभेत सः ॥ ३३
ब्रह्मलोकनिवासेन यथा ब्रह्मा नरोत्तमः।
अथवा पुनरावृत्तिर्ब्राह्मणो भवतीश्वरः ॥ ३४
योगञ्च तत्र लभते येनैश्वर्य्यं लभेत् तु सः।
स्नातश्च शुचिरथवा जुह्वन्नग्निं समाहितः ॥ ३५
दीक्षयित्वा तथात्मानमुपवासं चरेद्द्विजः।
तं यान्ति शरणञ्चैव दुर्गपालोऽग्निदेव च ॥ ३६
यो जपन् देवगायत्रीं पवित्राणि च नित्यशः।
रुद्रनामगुणान् वापि रात्रौ च स्थण्डिलेशयः ॥ ३७
कुशानास्तीर्य्य विधिवत् स्त्रीशूद्रपरिवर्ज्जितः।

समश्नीयात् तु वै रात्रौ वीतरागो विमत्सरः।
यावन्त्यहानि सन्तिष्ठेत् तावद्विप्रांस्तु भोजयेत्
ततः पूर्णे तु काले वै ब्राह्मणानां शतं गवाम्
सहस्रमथवा शक्त्या पूजयित्वा तु सर्व्वशः।
हविष्यं भोजनं दद्याद्गावो वासांसि च क्रमात्
सुवर्णं तिलपात्रं वा एकैकस्य तु दापयेत्।
ततस्तु वरमाप्नोति यदन्यैर्दुर्लभं भवेत् ॥ ४१
वृषभं यस्तु नीलाङ्गं गां दद्याच्च पयस्विनीम्
यावद्रोमसहस्राणि वर्षाणां दिवि मोदते ॥ ४
तिलपात्राणि यो दद्याद्विप्रेभ्यः श्रद्धया नरः।
अमावास्यां समासाद्य कृष्णाष्टमीं समाहितः
यस्तु चान्द्रायणं कुर्य्याद्यथोक्तं सुसमाहितः
स पितॄंस्तर्पयित्वा तु अक्षयं नरपुङ्गवः ॥ ४
पितृलोकमवाप्नोति देववत् सुखमश्नुते।
उपवासविधिस्त्वेष कथितो मे सुशोभने ॥ ४
पवित्राणां विधिं भूय एकचित्तावधारय।
प्रजापतिसमो भूत्वा तस्य लोके महीयते।
यस्तु सान्तपनं कृच्छ्रं करोति नरसत्तमः।
आत्मानमुद्धरेत् कृच्छ्रादग्निलोकं स गच्छति
महासान्तपनं यस्तु करोति सुमहामनाः।
सर्व्वज्ञानमवाप्नोति ब्रह्मलोकं स गच्छति
तुलापुरुषकं यश्च ददाति द्विजसत्तमे।
विमुक्तः सर्व्वपापैस्तु स्वच्छन्दो देवपूजितः।
अतिकृच्छ्रेण तु नरः शर्व्वस्य भुवनं व्रजेत्।
कृच्छ्रातिकृच्छ्रेण तथा गाणपत्यमवाप्नुयात्
यश्च सर्व्वाणि दानानि कुरुते नरसत्तमः।
यं यं प्रार्थयते कामं तं तमेव समश्नुते ॥ ५
यस्य कस्यचिदेवेह कृच्छ्रस्य सुसमाहितः।
स तेन सिद्धो भवति देवत्वञ्चापि विन्दति ॥
जपी भजंस्तपो नित्यं नरः संवत्सरं वसेत्।
यावकञ्चोपयुञ्जानो गोमूत्रेणापि संस्कृतम्
पिण्याकमात्रभक्षो वा वायुभक्षोऽथवा पुनः
अश्वमेधफलं भुक्त्वा ब्रह्मलोकं समश्नुते ॥ ५
सर्व्वपापविनिर्म्मुक्तो विमुक्तः सर्व्वबन्धनैः।
विमानेनार्कवर्णेन ब्रह्मवच्चरते सदा ॥ ५
यस्त्वेतानि च सर्व्वाणि व्रतानि नरस

यावदुक्तं समासेन महात्मा नष्टकिल्बिषः ॥ ५६
सालोक्यं वा महाभद्रं यथेष्टं मोक्षमेव च ।
ऐश्वर्य्यञ्च महत् प्राप्य दीप्यमानोऽवतिष्ठति ॥ ५७
वरं प्राप्य च सर्व्वाणि दानानि च यथेप्सितम् ।
विना मन्त्रेण सततं शूद्राणामिह सर्व्वशः ॥ ५८
विधीयन्ते न सन्देह एवमाह प्रजापतिः ।
अमन्त्रास्ते स्मृताः सर्व्वे शूद्रा विगतकल्मषाः ॥ ५९
स्त्रीणाञ्च दैवतं भर्त्ता ततो नान्यो विधीयते ।
स गतिः परमो धर्म्मः स धाम परमं स्मृतम् ॥ ६०
तेन सा अभ्यनुज्ञाता इदं धर्म्मं समाचरेत् ।
साफल्यं तस्य धर्म्मस्य प्राप्नोति सुसमाहिता ॥ ६१
या तु तेनाननुज्ञाता धर्म्मं कुर्य्याच्छुचिस्मिता ।
न तत्फलं सा लभते लभते च सतीफलम् ॥ ६२
या च भर्त्राभ्यनुज्ञाता कृत्वा धर्म्मं सुपुष्कलम् ।
ददाच्च पठते नारी तस्यानन्तं हि तत्फलम् ॥ ६३
यच्च प्रार्थयते किञ्चिदिहलोके परत्र च ।
तत् सर्व्वं प्राप्यते चैव सुभगा चापि जायते ॥ ६४
वश्यश्चास्या भवेद्भर्त्ता प्रिया तस्य च सा तथा ।
पुत्त्रप्रजा च भवति न च दुःखं समश्नुते ॥ ६५
एष धर्म्मो मयाख्यातस्तव स्नेहाद्वरानने ॥ ६६

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः ।

देव्युवाच ।

लोककर्त्तारमीशानं सर्व्वज्ञमपराजितम् ।
प्रणमामि त्रिनयनं भवन्तं शूलपाणिनम् ॥ १
भूतं भव्यं भविष्यञ्च यच्च वेद्यं परं हर ।
विदितं तव तत् सर्व्वं तेन सर्व्वगतो ह्यसि ॥ २
यदि तेऽहमनुग्राह्या यदि ते मयि सौहृदम् ।
यत् पृच्छामि महादेव तन्मे ब्रूहि यथातथा ॥ ३
यांश्च वै नियमांश्चक्रुर्ब्राह्मणाः क्षत्त्रिया विशः ।
ये चान्ये नियमाः केचित् तेषां वै ब्रूहि यत् फलम् ॥ ४
येषु तीर्थेषु सर्व्वेषां समृद्धाः फलवृद्धयः ।
दृश्यन्ते नियमानाञ्च योग-ध्यान-तपो-लयाः ॥ ५
एष मे संशयो देव चित्तव्याकुलकारकः ।
शमयस्व महाबुद्धे नीहारमिव भास्करः ॥ ६

श्रीमहेश्वर उवाच ।

एक एवात्र नियमो नियमार्थप्रदर्शनैः ।
बहुधा दृश्यते लोके नियमो नियमाद्भवेत् ॥ ७
नियमन्तु नरः कृत्वा नियमान्नियतेन्द्रियः ।
दुष्करं देवि कुरुते स तस्य फलमश्नुते ॥ ८
अनित्यं सुखमित्येवं मानुष्यं बुद्बुदोपमम् ।
दुष्करं नियमं कर्त्तुं मनुष्येण विशेषतः ॥ ९
नरा लोभाभिभूताश्च नरा धर्म्मोपहिंसकाः ।
वर्त्तमानसुखासक्ता न धर्म्मरुचयोऽभवन् ॥ १०
उच्यमानञ्च नियमं करोत्यभिमतं नरः ।
स तु वर्षसहस्राणि बहु वै फलमश्नुते ॥ ११
असिपत्रवने यत् तु नियमस्य कुशीलता ।
तेन धारणतुल्येन नियमस्यानुपालनम् ॥ १२
देवलं देवताः प्राप्ता नियमान्नियमान्विते ।
तारारूपी ज्वलज्ज्योतिर्नियमश्च तपोधने ॥ १३
नियमेन वरारोहे वेलां नाक्रमते नरः ।
नियमाज्ज्वलते चाग्निस्तपते नियमाद्रविः ॥ १४
नियमात् प्रववौ वायुर्नियमाद्ध्रियते मही ।
निष्कल्मषा तपः कृत्वा नियमश्च यथा तथा ॥ १५
मम पत्नीत्वमायासि त्वं शुभे नात्र संशयः ।
वर्षञ्च नियमं यश्च कुरुते नियमांस्ततः ॥ १६
स ब्रह्माद्येषु लोकेषु चरते देववत् सुखम् ।
नियमस्य फलं प्राप्तं यथा तु नियमान्विते ॥ १७
द्विजातीनां प्रियं तन्मे निशामय नगात्मजे ।
वाराणस्यामभूद्विप्रः केवलं नामधारकः ॥ १८
विकृतः कर्म्ममूढश्च परद्रव्यापहारकः ।
निष्ठुरोऽकरुणो देवि जाति-कर्म्मविघट्टकः ॥ १९
सूचको ह्यात्मजः पापोऽविशुद्धो भाति मत्सरः ।
मिथ्याविनीतो दुर्म्मेधा देव-दानवधिक्कृतः ॥ २०
विकत्थनोऽधर्म्मरुचिर्नास्तिको वेदनिन्दकः ।
परद्रव्येण सन्तुष्टः परद्रव्याविचारकः ॥ २१
उद्वेजनीयः सर्व्वस्य दुष्टाहिरिव पार्व्वति ।
अशुद्धो निर्नमस्कारो निरोङ्कारो ह्यपङ्क्तिभाक् ॥ २२
मिथ्याविनीतो दुर्म्मेधा वेदवादबहिष्कृतः ।

च्छिन्नदंष्ट्रो यथा सर्पः शृङ्गहीनो यथा वृषः ॥ २३
लुनपक्षो यथा पक्षी विपुष्प इव पादपः ।
वाराणस्यां स वै विप्रो विप्रकोटिशताधिकः ॥ २४
आस्ते स शतपत्राद्धि सोऽलसस्वार्थहारकः ।
तस्यां पुर्य्यां न सोऽस्तीह पुरुषः प्रमदोत्तमे ॥ २५
यस्येष्टः स भवेद्धीरदुष्टाहिरिव दुःखदः ।
वणिगापणगः सोऽथ नियतं रुचिरानने ॥ २६
तस्य वर्षशतान्येव वणिगापणगस्य वै ।
अतिक्रान्तानि विप्रस्य नवाशिष्टस्य पार्व्वति ॥ २७
अथाम्बुजपदः सिद्धः सिद्ध-गन्धर्व्वपूजितः ।
वाराणसीं गतो द्रष्टुमोङ्कारं सिद्धवन्दितम् ॥ २८
शतमास्थाय काश्यां तु मुनिसिद्धैस्तु सत्कृतः ।
आगच्छति तथा तस्मिन् पञ्चायतनदर्शने ॥ २९
आर्त्तभूताः कलावासन् सर्व्वे तं प्रणमन्ति च ।
मत्स्योदर्य्यास्तटे दिव्यं पञ्चायतनसंस्थितम् ॥ ३०
प्रदक्षिणं प्रकुर्व्वन्ति जन्मपापक्षयावहम् ।
रुद्रावासे तु पानीयं पिबन्ति विहरन्ति च ॥ ३१
वाराणस्यां विशालाक्षि भ्रमन्ते त्रिदिवालयाः ।
स तत्र भ्रममाणश्च सिद्धो विकृतरूपधृक् ॥ ३२
तमायान्तमनुप्राप्तो यत्रास्तेऽसौ द्विजाधमः ।
स तं विकृतमायान्तं सिद्धरूपं समागतम् ॥ ३३
प्रहसन्निव चाहेदमभ्युत्थायाभिवादयन् ।
अपूर्व्वदर्शनं त्वान्तु पृच्छाम्यहमथो भवान् ॥ ३४
कुतः कथन्तु प्राप्तोऽसि शङ्के स्वर्गात् समागतः ।
न हीदृशेन रूपेण कान्तेन चतुरेण तु ॥ ३५
दृश्यतेऽन्यस्ततः शङ्के स्वर्गभ्रष्टो भवानिति ।

सिद्ध उवाच ।

साधु भोः स्वर्गविज्ञात महाज्ञानमयो ह्यसि ॥ ३६
स्वर्गादहमनुप्राप्तः सत्यं सत्यं न संशयः ।
प्रियं ते कथयिष्यामि वद सर्व्वं तथेप्सितम् ॥ ३७

ब्राह्मण उवाच ।

यदि स्वर्गेऽस्ति वसतिस्तिष्ठ सद्विजसत्तम ।
रम्भामप्सरसां श्रेष्ठां यदि जानासि कथ्यताम् ॥ ३८

सिद्ध उवाच ।

अभिज्ञां स्वर्गसंस्थानामप्सरसां न संशयः ।
प्रियं वा कथयाम्येष जाने सर्व्वं यथेप्सितम् ॥ ३९

ब्राह्मण उवाच ।

यदि त्वमेवावससि कथयस्व ममाग्रतः ।
को हि स्वर्गालयां रम्भां न विन्देच्चेन्दुर्वदि
परियासि पुनः स्वर्गं कदाचिद्ब्राह्मणर्षभ ।
रम्भामनामयं पृच्छ वचनान्मम सत्तम ॥ ४

सिद्ध उवाच ।

यदि यास्ये दिवं ब्रह्मन् द्रष्टुमप्सरसोत्तमा
अपक्रामन् दिवं कान्तां वायुरव्याहतो यथा
स तु गृहादिनिष्क्रान्तां चन्द्रलेखां यथाम्ब
अपश्यत् सुकृतीं रम्भां भ्रष्टपद्मामिव श्रिय
पूर्णचन्द्राभवदनां मदनाङ्गमयीमिव ।
गजकुम्भनिभाभ्याञ्च स्तनाभ्यामुपशोभिता
पीनविस्तीर्णजघन-वक्षोरु-मुख-नासिका
फुल्लताम्रारविन्दाभ्यां पादाभ्यां समर्चि
रम्भां वीणान्वितां तेषां सुराणां स्वान्त
सिद्धो दृष्ट्वानवद्याङ्गीमिदं वचनमब्रवीत् ।
वाराणस्यां निवसति ब्राह्मणो हि वरा
स त्वां पृच्छति सुश्रोणि यदि जानासि

रम्भोवाच ।

तं न जानाम्यहं विप्र चिन्तयन्त्यपि सत
इत्येवमुक्तोऽप्सरसा उवाच सिद्धवन्दितः
स्वमेवावसथं तूर्णं माभिवेशाब्जलोचने ।
अथ भूतः स सिद्धो वै सिद्धः सिद्धशतस्तुत
वाराणसीमनुप्राप्तः पञ्चायतनमास्थितः ।
द्विजातिना च संपृष्टश्चिरेण पुनरागतः ॥
स तं प्रहस्य प्रोवाच वाराणस्यांनिकेतनः ।
कथं ब्राह्मण दृष्टा सा त्वया रम्भा वरा
कानि सा वदते दृष्टा पृच्छतो वा सुरा

सिद्ध उवाच ।

रम्भा दृष्टा ततस्तुभ्यं प्रहस्य वचनान्मम
चिरं विचिन्त्य मामाह नैव जानामि कोऽ

ब्राह्मण उवाच ।

ब्राह्मणोऽस्मि पुनः स्वर्गं यदा नाम महा
गच्छ सिद्ध ततो वाच्या न वेत्ति भवती
एवं भवतु चेत्युक्त्वा स सिद्धस्तं द्विजोत्तम
स्वर्गे सुकृतीनां वासे सङ्गतो रम्भया

शा रम्भा पृथुसुश्रोणिस्तनभारानता मुदा ॥ ५५
अपश्यत् पश्यतां चित्तं हरन्तीमिव सुभ्रुवम्।
स तां पद्मरागवर्णामुन्नतस्तनशालिनीम् ॥ ५६
उवाच सिद्धः प्रहसन् रम्भां भावप्रचञ्चलाम्।
पृच्छति त्वाप्सरो रम्भे ब्राह्मणस्ते प्रियो वरः ॥५७
वाराणस्यां पुनश्चाहं नाद्रिये तु पुनः कथम्।
स्मितं विहसितं कृत्वा ततः सर्व्वाप्सरोवरा ॥ ५८
रम्भा सिद्धं सहस्राणामुवाचामन्त्र्य कारणम्।
सिद्ध तं ब्राह्मणं ब्रूहि यदि त्रातुं किलेच्छसि ॥ ५९
नियमं कुरु विज्ञानं ततः स्वर्गं भविष्यसि।
इत्युक्त्वा सिद्धमामन्त्र्य नमस्कृत्वा तु साप्सराः ॥ ६०
नन्दनं वनमागत्य सङ्गता तत्र चाप्सराः।
स वै सिद्धः पुनरपि देव-गन्धर्व्वसेवितः ॥ ६१
रुद्रावासमनुप्राप्य तं ब्राह्मणमपश्यत।
अथैनं ब्राह्मणं प्राह स्मरित्वा सुखसम्पदः ॥ ६२

सिद्ध उवाच।

यदीच्छसि परित्रातुमात्मानं किल रम्भया।
देवैश्च नियमं त्रात्वा नियमं कुर्व्वसंशयम् ॥ ६३

ब्राह्मण उवाच।

अद्यप्रभृति पाषाणं न खादामि द्विजोत्तम।
प्राप्स्यसे यदि चोपेतां रम्भामप्सरसं दिवि ॥ ६४
पाषाणं खादति न यः स त्वां पृच्छति ब्राह्मणः।
इतीदं वचनं श्रुत्वा सिद्धस्तस्मै द्विजातये ॥ ६५
एवमेव गतस्तूर्णं वायुरव्याहतो यथा।
रम्भामब्रवीद्देवि स त्वां पृच्छति ब्राह्मणः ॥ ६६
रम्भे तं वै विजानीहि पाषाणं यो न खादति।
तमेव दिवसं तेन नियमेषु कृता मतिः ॥ ६७
तमेव दिवसं रम्भा तां पुरीमस्य चिन्तयत्।
अस्यायाप्रकृतेनापि नियमेन द्विजन्मनः ॥ ६८
छाया जज्ञिरे देवि प्रदीपेन यथा निशि।
यस्य यस्याप्रियो ह्यासीत् तस्यां पुर्य्यां स वै द्विजः॥६९
तस्य तस्य प्रियो जज्ञे नियमेन प्रभावितः।
यस्य नायाति गृहं यस्य वा याति वै गृहात्॥७०
कथं जीवामि को वाहमिति तस्याभवन्मतिः।
नियमं सततं विप्रो ह्यवाप्यमनुपाल्य च ॥ ७१
सिद्धिं पारमिकां प्राप्य ब्रह्मलोकमयं गतः।

नियमो वा यमो देवि अल्पो वा यदि वा बहुः ॥७२
तनोत्युपासितः स्वर्गं नयते नरमम्बिके।
नियमाद्ब्रह्मलोकं वा प्राप्यते नापि पार्व्वति ॥ ७३
प्राप्नुवन्ति नराः शुभ्रं कृत्वा चिरमयन्त्रणाः।
वचनं किमिति ते च
शतपत्रमुखि पर्व्वतात्मजे ॥ ७४
नियममनिन्द्यलोचने
गतः समुत्पत्य ब्राह्मणः।
कमलपूरगृहं गतो रतो
वसति शचीपतिवद्दिवि ॥ ७५
इति च तपनेन्दुसन्निभे नियम-
फलं गदितं मया चाब्जलोचने।
कुरु कुरु सदा हि नियमे
नियमानिन्दितभावबन्धनम् ॥ ७६

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां नियमनिरूपणं नाम
सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः।

सनत्कुमार उवाच।

नियमस्य फलञ्चोक्तं श्रुत्वा प्रीताभवत् सती।
भर्त्तारं लोककर्त्तारं पुनरप्याह पार्व्वती ॥ १
भगवन् नियमानां हि फलं प्रोक्तं महोदयम्।
केन कर्म्मकृतेनापि ब्रह्मलोकं गतो द्विजः ॥ २
नियमस्य फलं देव श्रुतं नित्यं मया प्रभो।
यथा चोङ्कारदेवस्य प्रसङ्गेन त्वयेरितम् ॥ ३
एकन्तु श्रोतुमिच्छामि रहस्यं भुवनेश्वर।
धार्य्यते चन्द्रवर्णाभ चन्द्रस्याद्धं त्वया कथम् ॥ ४
कारणञ्चैव कथय येन त्वं चन्द्रशेखर।
बिभर्त्ति उत्तमाङ्गेन मां देहार्द्धे भवान् यथा ॥ ५
कथमेतत् कृतो ह्येष तव चन्द्रः शिरोगतः।
एतदाख्याहि भगवन् सहधर्म्मचरीति मे ॥ ६

सनत्कुमार उवाच।

एवमम्बिकया प्रोक्तस्तदर्थं नीललोहितः।
उमामाह परिष्वज्य शृणु देवि शुभानने ॥ ७

महादेव उवाच ।

त्वया सद्यो विनिर्मुक्तो ह्यरण्यार्ब्बुदितस्तथा ॥ ८
निर्व्वेदं परमं गत्वा मोहसेनान्तरात्मना ।
अहं तपसि सन्नार्थं चरामि विनिकेतनः ॥ ९
गुहासु रमणीयासु नदीनां पुलिनेषु च ।
वृक्षवाटिषु वृक्षेषु देवोद्यानवनेषु च ॥ १०
अहमिन्दीवराभ्यासे वसामि विचरामि च ।
नियमं तीव्रमास्थाय घनपीनोन्नतस्तनि ॥ ११
यत्र यत्र च तिष्ठामि गिरौ वृक्षे च पार्व्वति ।
स स वृक्षो गिरिश्चापि दह्यते स्म तपोऽग्निना ॥ १२
क्वचिद्दमायमानानि क्वचित् प्रज्वलितानि च ।
शृङ्गाणि धरणीधारा दह्यन्ते मम तेजसा ॥ १३
निष्प्रभं ग्रहचन्द्रार्कं जराहितमिवान्तकम् ।
त्रैलोक्यमभवत् सर्व्वं पर्य्युत्सुकसुरासुरम् ॥ १४
ततो देवगणाः सर्व्वे सशक्राः सपितामहाः ।
समीयुर्मन्दरस्याग्रे मम तेजःपरिप्लुते ॥ १५
अथ ब्रह्माणमामन्त्र्य महेन्द्रो देवताधिपः ।
किमिदं भगवन् केन वयमग्न्यभिराधिताः ॥ १६
कथयस्व भवेद्भिः क्षयमव्यय सत्तम ।
इतीन्द्रे वदमाने तु नदमाने यथाम्बुदे ॥ १७
चतुर्म्मुखस्त्रिलोकेशमाहेदन्न पितामहः ।
न रुद्रस्य गतिं ज्ञातुं प्रभवामि महात्मनः ॥ १८
शक्रा यस्य प्रभावेण दह्यते जगदाखिलम् ।
न वयं प्रमुखादस्य न च वार्य्योऽस्य निश्चयः ॥ १९
अवश्यञ्च मया तुभ्यं हितं कार्य्यं जगद्धितम् ।
हरेर्येन्दुर्न लब्धो हि सौम्यं पश्यति नैव सः ॥ २०
प्रगच्छ याम तत्रेदं यदि निर्व्वाणमिच्छसि ।
स हि जायाविरहितो दिवा दीप्त इवानलः ॥ २१
प्रदहिष्यति नः सर्व्वानेकं भूतन्तु दैवतम् ।
वहिष्यतीदं शिरसा सौम्य प्रीतं न संशयः ॥ २२
तेजोऽभिभविता सौम्यं चन्द्रचूडाश्रितो मणिः ।
एवं नः सुकृतं कार्य्यं स च प्रीतो भविष्यति ॥ २३
प्रभावाच्छशिनश्चापि स शीतश्च भविष्यति ।
एतत् पितामहेनोक्तमुपायं जनितं हितम् ॥ २४
गृहीतं दैवतैः सेन्द्रैर्मेणिवर्णं शुभं स्थितम् ।
तेन सब्रह्मकाः सेन्द्रा देवा दैवतवन्दिते ॥ २५

एवं कुर्म्मः प्रयामोऽथ इति कृत्वा प्रचक्रिरे ।
ततोऽमृतसमापूर्णमेकमेकं विषस्य च ॥ २६
कुम्भात् कुम्भादुपादाय देवास्ते समुपस्थिताः ।
तौ सापिधानौ कलशावुदग्रौ निम्नदृश्यतौ ।
असुञ्चेतां शुभं गन्धं चन्दनाविव पुष्पितौ ।
ततो देवाः सप्रसृतः प्रसन्नेन्द्रियमानसाः ॥ २७
देवेति पूर्व्वमामन्त्र्य प्राह देवं पितामहः ।
देवामृतमिदञ्चापि कुम्भं हालाहलमिष्य
ततो ग्राह्यं गृहाण त्वं ततः पश्यन्तु देवताः
ततो मयामृतं देवी प्रथमं प्रमथाचितै ॥ २
पुनश्चन्द्रं शिरोभागी लेखामात्रो विनिर्मितः
ततोऽपि च पुनर्देवि विषं जलरुहानने ॥ २
स्कन्ध ग्रीवा समालब्धा प्रदेशिन्या मयानघे
अमृतेनैव चन्द्रश्च कण्ठश्चैव विषेण मे ॥ ३
युगपज्जनितौ मूर्द्ध्नि ललाटे देहजाविव ।
सौम्यासौम्येन चन्द्रेण उत्तमाङ्गगतेन वै ॥
तत् तेजोऽमृततां नीतं महीरज इवाम्बु
तेन हालाहलेनापि विषेण मम पार्व्वति
कण्ठो मम कृतः श्यामो यस्य मे वामलो
ततः शिवश्च सौम्यश्च देवानामस्मि सुन्दरि
दर्शनीयश्च संवृत्तो वृत्तपीनकुचोदरि ।
इत्येवं ते मया प्रोक्तं यथा चन्द्रः शिरोग
य इदं शृणुयाद्देवि चन्द्रार्द्धोत्पत्तिसम्भवं
गाणपत्यं महत् तस्य दिव्यं देहविपर्य्यये ।
कलिकलुषं निहन्ति यश्चेदं पुण्यफलदं
सर्व्वकालं पितॄणां सुखप्रापकम् ।
चन्द्रजन्माद्भुतं यो द्विजोऽधीतेऽधीयते
स्तस्य दद्याच्छरीरात्यये गाणपत्यं मह
इति श्रीशैवे महापुराणे सनत्कुमार
तायामष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः ।

सनत्कुमार उवाच ।

विषदोषफलं श्रुत्वा गिरीशतनयाव्यया
इदमाह महाभागा सर्व्वदेवपतिं पति

आशावसन देवेश नास्ति धन्यतरा मया।
यस्या एव महादेवो भूतदेवपतिः पतिः ॥ २
विभूत्या परया युक्तं भूत्या च सुविभूषितम्।
पश्यामि त्वां श्मशानस्थं नृत्यन्तं प्रमथैः सह ॥ ३
एवं विदितवेशस्य प्रभूतवरदस्य च।
कथं ते लेपनं जातं तव भस्म रजोऽन्वितम् ॥ ४
गोशीर्षकनकश्यामैरन्यैश्च वरचन्दनैः।
मत्तः प्रियतरा देव भूतिरेषा हि वै कथम् ॥ ५
कुत एषा कथञ्चैषा वल्लभत्वमुपागता।
भूतिर्भूतिविदां श्रेष्ठ वद बालेन्दुभूषण ॥ ६
एवमुक्तः प्रभुर्देवः सोमया सोमभूषणः।
उवाच सम्परिष्वज्य गौरीं दीप्ताग्निसन्निभाम् ॥ ७
चन्द्राभे चन्द्रवदने चन्द्रपङ्कजहासिनि।
शृणु देवि यथा भूतिर्विलेपनमभून्मम ॥ ८
ब्रह्मणो ब्राह्मणो ह्यासीद्भृगुवंशे प्रभावतः।
नियमं तीव्रमास्थाय तताप विपुलं तपः ॥ ९
ग्रीष्मे पञ्चतपा भूत्वा हेमन्ते च जलेशयः।
वर्षास्वाकाशगश्चापि सोऽभवच्च बुभुक्षितः ॥ १०
चतुर्थे पञ्चमे षष्ठे सप्तमे दशमेऽपि च।
काले काले मितालापेऽपूर्णमाहारमाहरत् ॥ ११
तमृक्षाः शरभाः सिंहाः शृगालाद्याश्च जन्तवः।
फलान्यादाय सर्व्वे वै तत्र गच्छन्ति दूतवत् ॥ १२
ये च शस्यकुशाहारा ये च मांसाशिनो मृगाः।
ते ते प्रभावात् तस्याथ निर्व्वैराः सहचारिणः ॥ १३
स चापि तपसा दीप्तो दीप्ताग्निसदृशप्रभः।
तताप लोकान् ब्रह्मर्षिस्तापयन् स यथा पुरा ॥१४
शाकमक्षारलवणं तस्याहारमतः प्रियम्।
नाम्ना पर्णाद इत्येव ततो लोकेषु विश्रुतः ॥ १५
एकपर्णाशिनस्तस्य यथा पूर्णाशिनस्तथा।
बह्वन्यहानि यातानि वर्षाण्यमृतवर्षिणि ॥ १६
तस्य धर्म्मरतेरासीन्मानसं सम्प्रतिष्ठितम्।
तपश्चरणयुक्तस्य सत्यधर्म्मरतात्मनः ॥ १७
यदा शाकरसाभासं भवेद्धि रुधिरं मम।
तदा सिद्धस्य धर्म्मस्य भवेन्निष्कल्मषं तथा ॥ १८
अथ धर्म्मप्रसङ्गेन कदाचित् स तपोधनः।
लुनवान् पद्मगर्भाभे दर्भान् वैदूर्य्यसन्निभान् ॥ १९
तस्य लुनवतो दर्भान् दर्भच्छेदेन पार्व्वति।
असितीक्ष्णेन दर्भेण पाटिताथ प्रदेशिनी ॥ २०
ततोऽङ्गुलीव्रणात् तस्य शाकनिर्याससन्निभम्।
सुस्राव शोणितं तावद्रसं दृष्ट्वा प्रहृष्य च ॥ २१
स हसन् नृत्यमानश्च नर्द्दमानश्च ब्राह्मणः।
त्रासयामास सहसा मृगांस्तानलुगानपि ॥ २२
तस्यापूर्व्वविकारन्तु दृष्ट्वा सर्व्वमृगाम्बिके।
त्रस्ता भूत्वा समुत्सृष्टा मृगाः सिंहाहिता इव ॥ २३
तस्य मा चित्तविभ्रंशो भवेदिति ततोऽम्बिके।
मयात्मा विप्ररूपेण तस्य विप्रस्य दर्शितः ॥ २४
अहं भो इति चाप्युक्तो मया विप्रः स पार्व्वति।
स नृत्यन् निनदंश्चापि न च मामभ्यभाषत ॥ २५
यदा तस्यानुवृत्त्या च विरराम तपोधनः।
ततो मया करे गृह्य इदमुक्तो वचोऽङ्गने ॥ २६
किमिदं वर्त्तते विप्र विकारेऽपूर्व्व एव ते।
न हि लक्ष्यमिदं तुभ्यं चन्द्रादिव यथा तमः ॥ २७
तपोधनं महद्धित्वा प्रशंसामश्रमं लभेत्।
तपो यशश्च कीर्त्तिश्च मा हिंसीश्चिरसञ्चिताम् ॥ २८
न सौम्योऽहमितीन्दुर्नोष्णोऽहमिति भास्करः।
न दहामीति वाप्यग्निः स्वयं कुर्व्वन्ति कर्हिचित्॥२९
तत् तु धर्म्मतपोदानैर्धौतं ते जन्मसञ्चितम्।
तेजसा कलुषं सर्व्वं तपोमदमिमं जहि ॥ ३०
अनन्तरात्मा पृथिवी मा ते भूद्विस्मयो मुने।
तपस्विनः स्थिता ह्येते भवतोऽपि तपोधनाः ॥ ३१
निष्कल्मषं शरीरं मे तपसा पश्य ब्राह्मण।
अहं तवानुपश्यामि किल्बिषस्त्वं सकिल्बिषम् ॥ ३२
शरीरं स्रवते भस्म दह्यमानं तृणं यथा।
ततः प्रदेशिनी देवी मया सुन्दरसुन्दरि ॥ ३३
स्वकैः कररुहैश्छिन्ना समक्षं ब्राह्मणस्य च।
क्षीरधाराः पतन्त्यस्मादङ्गुल्यां तादृशी सिता ॥ ३४
भूतिधारा प्रसुस्रात्र वसुधारा इवाध्वरे।
ममाङ्गुलिव्रणात् तस्माद्भस्मधारां समीक्ष्य सः ॥ ३५
साध्वित्युच्चैरिति प्रोक्ता इदमाह सविस्मयः।
अनन्तवर्या पृथिवी यदुक्तं तदिदं तथा ॥ ३६
स्वयं शाकरसोद्भूतं भूत्वा प्रशमितं हि मे।
को भवान् किञ्च ते गोत्रं नाम किं किञ्च ते तपः ॥३७

यस्य ते स्रवते भस्म अङ्गुल्यग्रे निकृन्तनात् ।
नूनं वर्षसहस्राणि बहूनि मम ब्राह्मण ॥ ३८
महादेवप्रसादाच्च कुर्व्वतः परमं तपः ।
मेघश्यामाच्युतो वापि भवान् मेघरथो हरः ॥ ३९
एवमेव ब्रुवाणस्य मया तस्य ततोऽम्बिके ।
शीतं दर्शनीयाभिरूपं रूपसहस्रदे ॥ ४०
ततः सुवलितैर्गात्रैः सम्भ्रमाच्चलितेक्षणे ।
स मे पङ्गगं पपाताशु तुष्टाव च स मां प्रिये ॥ ४१

पर्णाद उवाच ।

नमो ब्राह्मणरूपाय महादेवाय शूलिने ।
ब्रह्मेन्द्रविष्णुपूज्याय शङ्कराय नमोऽस्तु ते ॥ ४२
नमो भस्माङ्गरागाय भस्मोत्पत्तिविकारिणे ।
भस्मलिप्ताङ्गदेहाय दुःखान्तफलदायिने ॥ ४३
देवि स्तोत्रेण तुष्टाव तमब्रुवमहं द्विजम् ।
हं भावशुद्धभावं तं भावशुद्धेन चेतसा ॥ ४४
त्वया सन्तोषितोऽस्म्यद्य स्तोत्रस्य शृणु मे फलम् ।
अमराश्च रमायुक्ताः सर्व्वदुःखविवर्ज्जिताः ॥ ४५
गणाधिपपतिर्मेऽद्य भवस्व परमप्रियः ।
ममाद्य वै यथाचेष्टं ममेष्टोऽसि गणाधिपः ॥ ४६
गोषु विप्रेषु भक्तेषु देवेष्वस्तु च ते दया ।
योगात् प्रमुदितो भूत्वा मां प्रणम्य गणेश्वर ॥ ४७
ममैव दत्तमावासं सुमेरौ सुरसन्निभम् ।
एतस्मात् कारणाद्देवि ममामृतसुगन्धिनि ॥ ४८
भूतिविलेपनं जाता स्नानञ्चानुत्तमं प्रिये ।
पुण्ये कनखले यच्च प्रयागे यच्च सुन्दरि ॥ ४९
तत् फलं सकलं देवि भूतिस्नाने विधीयते ।
पुष्करे च प्रभासे च यच्च सप्तमले फलम् ॥ ५०
भूतिस्नानेन तत् पुण्यं लभते यततो नरः ।
तत् फलं लभते देवि भूतिस्नाने विधीयते ॥ ५१
पुष्करे च प्रभासे च यच्च सप्तमके फलम् ।
भूतिस्नानेन तच्चैव लभते शतगुणं प्रिये ॥ ५२
ब्रह्मा विष्णुरनन्तश्च शक्रोऽग्निर्वरुणो यमः ।
स्नानेनानेन सम्पन्नाः सर्व्वेषामुपरि स्थिताः ॥ ५३
आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ।
एतत् स्नानमुपासन्तो देवा देवत्वमागताः ॥ ५४
तपोधनाश्च ये चान्ये सिद्धाश्चोरग-चारणाः ।
स्नानस्य च प्रभावेण जाता जातिविवर्ज्जिताः ॥
पिशाचेभ्यो राक्षसेभ्यो यक्षेभ्यश्चापि पार्व्वति ।
न भवेत् तद्भयं देवि भूतिस्नानेन सर्व्वशः ॥ ५५
ये चैते मद्विधा योगी मम तुल्यप्रभाः प्रिये ।
ममानुगा भवन्त्येते भस्मस्नानेन पार्व्वति ॥ ५६
तुलयैव धृतं स्वर्गं मम भूतेश्च सम्भवम् ।
भूतिलक्षणवस्त्राणि धनानि विविधानि च ॥ ५७
राक्षसानामहिंस्याश्च भवन्ति गिरिनन्दिनि ।
ये जनास्तूपजीवन्ति भूतिं पारमिकां द्विजाः ॥
ते चरिष्यन्ति गणपा मम लोके सदाज्ञया ।
भूतिस्नानसमं स्नानं नास्ति वै वामलोचने ॥
स्नानस्य च फलं यच्च तद्वदन्ति गणेश्वराः ।
नास्ति गङ्गासमं तीर्थं नास्ति वेदसमा श्रुतिः ॥
नास्ति मृत्युसमः शास्ता नास्ति भूतिसमं तपः ।
उच्छिष्टं वा प्रमत्तं वा हिंसते न च हिंसकाः ॥
न नरं भूतिसंसृष्टं धर्षयन्ति विनायकाः ।
एवं पर्णादसुहृच्च ममैषा शुभगन्धिनि ॥ ६३
भूतिर्विलेपनं जाता देवि तामरसेक्षणे ।
एतत् ते कथितं देवि मयाऽपूर्व्वं शुचिस्मिते ॥
यथोत्पन्ना च जाता च मम भूतिर्विलेपनम् ॥

अवनिधरवरात्मजे
यो हि कश्चित्स्नानवासुदेषु च ॥ ६६
निषेवेत वै भस्मस्नानं ममैतत् प्रियं
स हि जलरुहपत्रतुल्येक्षणे ।
स नो गणेशत्वमापद्यते सूर्य्याग्निसोमद्युति
देवगन्धर्व्वसिद्धार्च्चितो रम्योऽतीव ॥ ६७

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायां विभूतिकीर्त्तनं नामैकोन-
त्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः ।

सनत्कुमार उवाच ।

भूत्युत्पत्तिं शुभां श्रुत्वा ततो गिरिवरालया ।
पतिं पतिव्रता प्राह विकसत्कमलेक्षणा ॥ १
लोकनिष्ठाग्रहे चैव अवधूमारणेक्षणी ।

चिताशतसहस्रेषु प्रज्वलिते चितानले ॥ २
सिद्धचारणसम्पत्तौ सङ्कुलीकृतसन्ततौ ।
आन्त्रगन्धवसाधारे निन्दिते भूतभूषिते ॥ ३
प्रेतभूतसमाक्रान्ते मेदोरुधिरपङ्किले ।
शिवारुदितगम्भीरे काकोलूकशताकुले ॥ ४
नानापक्षिमृगाकीर्णे सारमेयकृतस्वने ।
पशुहतवपुःपृष्ठ-शवमाल्यैरलङ्कृते ॥ ५
कुशकाशकृतोद्देशे ब्रह्मसूत्रानुभूषिते ।
मुषलोलूखलयुते शिवाशतरवोत्कटे ॥ ६
आज्याहुतिनिपातैश्च वर्द्धमानचिताकुले ॥ ७
खट्वाभिः पिटकैः शूर्पैरपवित्रैर्निरन्तरे ।
नानाभरणवस्त्रैश्च भूषणैश्च विभूषिते ॥ ८
रौद्रैरद्भुतबीभत्सैर्भयदैः सर्व्वदेहिनाम् ।
दुरन्तकालप्रतिमे दुर्व्विगाह्ये दुरासदे ॥ ९
बालहस्तकृतापीड़े भूषिते वनमालया ।
गजचर्म्मावृततनुस्त-व्याघ्रचर्म्मविभूषिते ॥ १०
वसापूर्णकपालैश्च चिताग्नौ मद्विषं पचन् ।
नृत्यमानोऽट्टहासांश्च सृजमानो भयङ्करान् ॥ ११
त्रासयन् सर्व्वभूतानि पातयन्निव दानवान् ।
उन्मत्तवदनुन्मत्तः प्रभुः प्रभवतामपि ॥ १२
रात्रौ श्मशाने सुप्तोऽसि किं कर्म्मैतत् तवेश्वर ।
श्रुतौ त्रैलोक्यनाथस्य विश्रुतस्य हरस्य च ॥ १३
तव नाम महादेव चिन्तितं वृत्तमीश्वर ।
तव भार्य्या नियुक्ताहं भार्य्या त्रैलोक्यभाविनी ॥ १४
भ्रमतीव हि मे चित्तं दूयतेव हि मे मनः ।
साध्वाचारस्य विकृतं तवाचारं निशाम्य हि ॥ १५
सर्व्वदैवतपूज्यस्य सर्व्वदेवमयस्य च ।
तव नाम महादेव गर्हितं वृत्तमीश्वर ॥ १६
ईशः को नाम जगतस्तव देवमसाधनम् ।
एवमत्र महादेव कारणं महदस्ति वै ॥ १७
कौतूहलमतीवेदं ममायत्तमिदं प्रभो ।
देवगुह्य महागुह्यं पृच्छन्त्या मम वेदय ॥ १८
इत्येवमभियुक्तस्तु स तयाथ पतिर्भवः ।
हासोत्फुल्लमुखो देवो हासोत्फुल्लहृदब्रवीत् ॥ १९
अहं शोणितपः कालः करालवदनोऽम्बिके ।
रौद्रे मुहूर्त्ते सम्भूते देवि रोदिमि विस्वरम् ॥ २०

ततो मामवदद्देवः पुराणोऽनादिरव्ययः ।
कुमार किमिदं घोरं रोदिषीति भयातुर ॥ २१
तदावोचमहं देवं वदन्तं वदतां वरम् ।
देहि मे नाम सद्दृशं तेन त्वं देव रोदिषि ॥ २२
रुद्रस्त्वमिति तेनाहं मुक्तो वै मत्तकाशिनि ।
न तिष्ठामि रुदास्येव ततो मां पुनरब्रवीत् ॥ २३
किमिदं रुद्यते भूयो नीललोहित मा रुद ।
ब्रूहि मां किमतो भूयः करवाणि तवानघ ॥ २४
नाम मे देहि तमहं रुदन्नेव तदाब्रुवम् ।
सप्त नामानि मे तेन जनितानि शुहारणि ॥ २५
अन्यानि तैरपि कृते रोदिम्येव ततोऽम्बिके ।
ततो मां पाणिना स्पृष्ट्वा लोकेशः प्राह केशवः ॥ २६
किमिदं रुद्यतेऽत्यर्थं रोदन्तं रोदनस्य ते ।
तथैव चान्यान् सोऽदान्मे नामधेयानि पार्व्वति ॥ २७
स मां विदितवेद्यस्तु विदितात्माब्रवीद्वचः ।
महादेवोऽसि देवानां ततोऽहं नारुदं प्रिये ॥ २८
अशुचीन् प्रार्थये यस्मात् सुभुवाश्च समन्ततः ।
द्रावयामि च यल्लोकं तेन रुद्रोऽस्मि विश्रुतः ॥ २९
संहरामि च संहारे हरस्तेनास्मि नामतः ।
कालो भूत्वा महाकालस्तेनाहं कालसंज्ञितः ॥ ३०
धातुद्वयमिति प्रोक्तं लक्षणाग्रसितात्मकम् ।
सर्व्वलोकान् ग्रसास्यन्ते तेन सर्व्वोऽहमम्बिके ॥ ३१
यच्छुक्रमिममादाय लोकान् सज्जनपण्डितान् ।
भयं करोमि भावाय भवस्तेनास्मि पार्व्वति ॥ ३२
छागानृपवसादिग्धे यत् हिणोमि त्वयि वरम् ।
यदुग्रशान्तिमाप्नोति तेनोग्रोऽहमनिन्दिते ॥ ३३
महत्स्वपि महांश्चाहं मह्यादिपतिरेव च ।
महाशब्देन निरतो महादेवस्ततो ह्यहम् ॥ ३४
अहं पीनायतश्रोणि ईश्वराणामपीश्वरः ।
कर्त्तुं हर्त्तुञ्च दातुञ्च तेनाहं परमेश्वरः ॥ ३५
गुह्यान्येतानि नामानि ममेष्टानीह पार्व्वति ।
येन चापि हितात्मा वै स्तुतस्तुष्याम्यतीव हि ॥ ३६
अन्यथाहं यदा कुर्य्यां प्रजामनु मम प्रिये ।
रौद्रभावं यदा कुर्य्यां रौद्रकर्म्मा ततो ह्यहम ॥ ३७
ततस्त्वितास्तु मां देवि योऽप्यर्च्चयति नामभिः ।
[illegible] विशेषैरेव तुष्यताम् ॥ ३८

य एतानि तु नामानि धारयेत मम प्रिये ।
शाश्वतं पदमाप्नोति गाणपत्यञ्च संव्रये ॥ ३९
यः कर्म्मणि विसृष्टोऽस्ति विधिना देवि भाविनि ।
स कर्म्म कुरुते नात्र दृश्यादृश्ये नियोज्यते ॥ ४०
यद्यदभ्युदितं कर्म्म पुरुषस्य गिरेः सुते ।
तत् तेनावश्यकर्त्तव्यं मृदु वा यदि वेतरत् ॥ ४१
प्रजापतेश्च कः शक्त आदेशं कर्त्तुमन्यथा ।
निदेशे तस्य भूतानि स करोत्युपदेशताम् ॥ ४२
सोऽहं तेन वरारोहे पुरुषेण वरानने ।
नियुक्तः कलिकालेन कर्म्मादेशं ततः प्रिये ॥ ४३
अहं संवत्सरः कालः प्रजासंहारकारकः ।
कालरात्रिश्च भवती सहधर्म्मचरी मम ॥ ४४
अहं हि त्वां विजानामि माञ्च त्वं पर्व्वतात्मजे ।
त्वन्मयं मन्मयञ्चैव नारायणपदत्रयम् ॥ ४५
ममैतत् कर्म्म उचितं विधात्रा हि समाहितम् ।
नयनान्नयनाच्चैव यथा नास्ति व्यतिक्रमः ॥ ४६
पुण्यञ्च रमणीयञ्च सिद्धक्षेत्रञ्च पार्व्वति ।
दृष्टं श्मशानमेवं मे तत्र तत्र रमाम्यहम् ॥ ४७
इमे चात्र गणाध्यक्षा रमणीयायतेक्षणे ।
रमयन्ति रमन्तो मां श्मशानं तेन मे मतम् ॥ ४८
यो यस्य रोचते देवि विषयो विषयैषिणि ।
स तत्र रमते जन्तुभूतिरेषा प्रकीर्त्तिता ॥ ४९
स तस्मिन् पश्यमानस्तु गुणांश्च गुणवर्णिनि ।
स्नेहं सदा च कुरुते श्मशानेऽहमिहानघे ॥ ५०
यच्चागमेषु तीर्थेषु श्रुतिषु च फलं विदुः ।
फलञ्च स्नानचर्य्यायामनघे प्रवदाम्यहम् ॥ ५१
असौ हि साधकश्चाहं वेदादिरनुकीर्त्तितः ।
तेन दृष्टो मयैवैष देवदेवो जगत्पतिः ॥ ५२

सनत्कुमार उवाच ।

उवाच पुनरप्याशु प्रमथार्त्तिहरं हरम् ।
कालकाल कलेशान वचो मे वदतां वर ॥ ५३
अहो कालत्वमापन्न त्वया हेतुरुदीरितः ।
ज्वालाज्वाले क्षितौ व्योम्नि सूर्य्येन्दुपवने गतौ ॥ ५४
लिङ्गे च येऽर्च्चां कुर्व्वन्ति सदा भक्तियुता नराः ।
अन्ये तु येऽर्च्चयन्ति त्वां [illegible] मानवाः ॥ ५५
अन्ये तु ये नमस्कारं कुर्व्वन्त्यनिमिषेक्षणाः ।
घृतेन दध्ना क्षीरेण जलेन च सुगन्धिना ॥
गोमयेन तथा चान्ये नरास्त्वां स्नापयन्ति
गन्धैर्धूपैश्च माल्यैश्च उपहारैश्च पुष्कलैः ॥
पूजयन्ति फलं तेषां किं भवेद्धि त्रिलोचन ।
ये च पर्य्युषितं माल्यं न ददति तवानघ ॥
तेषामपि फलं देव वद वाचस्पतेः पते ।
इत्येवं देवीवचनं निशम्योमापतिर्हरः ॥
सम्बोध्य वाचया भार्य्यामार्थां वचनमब्रवीत्
वामोत्तासम्भवे देवि गजनासोरु मे शृणु
यदेव प्रश्नं विविधं यन्मां संपरिकीर्त्तितम्
त्वद्भक्तो मयि भक्तेषु योगश्च नियमादयः
त्वमेव वेद वेदाद्ये नान्यो वेदविदां वरः ।
यथा यो भक्तिमान् भक्तो मम भक्तिमतां
तं तथा विपुलश्रोणि तारयामि भवाम्बुधेः
यथाप्येतत् त्वया प्रश्नं स्नापनार्च्चनपूर्व्वकम्
सम्भावितं मया सम्यगुच्यमानं निशामय
जलेन साधिवासेन स्नपयेद्यो हि मां
अग्निष्टोमफलं तस्मै ददामि मदनावनि ।
सुगन्धेन च तैलेन स्नपनं यः करोति दे
अतिरात्रफलं तस्य स सुगन्धो ददास्यहं
स्नपनं यस्तु मधुना करोति यदि मानवः
वाजपेयस्य यज्ञस्य फलं प्राप्नोति मानवः
सोऽश्वमेधफलं प्राप्य गवां लोके महीयते
योऽर्च्चयार्च्चयते देवि पुरुषो मां गिरेः सु
लोकं लिङ्गात्मकं ज्ञात्वा लिङ्गे योऽर्च्चयते
न मे तस्मात् प्रियतरः प्रियो वा विद्यते
घृतेन पयसा दध्ना तैलेन च जलेन वा ॥
गोक्षीरेण चतुर्द्दश्यां लिङ्गस्नापनकार
तेन मेष्टाश्च जायन्ते अक्षयास्ते जराम
तथा विश्वजितो देवि ये लिङ्गार्च्चनतत्पर
ब्रह्मलोकं विष्णुलोकं गोलोकं मामकं
अव्याहताश्चरन्त्येव लिङ्गार्च्चनरता नराः
इन्द्रः सोमो भगः पूषा वायुरग्निर्दिवा
अर्च्चयन्ति तमभ्रान्ता लिङ्गार्च्चनरता न
यो मामर्च्चयते लिङ्गे मानवो मम च
गन्धर्व्वाप्सरसां वृन्दैः सेव्यन्ते गीतवादि

नरनारायणौ देवि जैगीषव्यो बलिः सदा ॥ ७४
तुष्टिमेतां विजानन्ति लिङ्गे मामर्चयन्ति ये।
योऽर्चायामर्चयेन्मां हि पूर्णं वर्षशतं नरः ॥ ७५
एकञ्च दिवसं लिङ्गं सममेतन्न संशयः।
उपहारानुपहरेद्यस्तु मे पुरुषोऽम्बिके ॥ ७६
सोपहारैः शुभैरिष्टैर्महागणपतिर्भवेत्।
यस्तु पर्य्युषितं माल्यं ममापनयते नरः ॥ ७७
स भवेत् स्वर्गलोकस्थो अनन्तसुखभाजनः।
बहुमाल्यप्रदा ये च उपहारपराश्च ये ॥ ७८
दधिक्षीरघृतैर्ये च स्नपनं मम कुर्व्वते।
यश्चापि प्रयतो भूत्वा लिङ्गमेवार्चयेत् पुनः ॥ ७९
ते च स्वर्गगणा भूत्वा शुचयो विप्रवत्सले।
रमन्ते च प्रियासार्द्धं रमेऽहञ्च यथा त्वया ॥ ८०
ततो वै पिङ्गलं रुद्रं रुद्रं यः पूजयेत् सदा।
स भवेद्देवदेवस्य सुपुत्रो मे मृगेक्षणे ॥ ८१

अभ्यर्च्च्यै लिङ्गार्चनतोषितो ह्यहं
ददे द्विजत्वं किमु यत् ततः परम्।
तदेवमुक्तापितहाटकप्रभे
शुभानने चन्द्रदिवाकरप्रभ ॥ ८२
मया तवाख्यातमनिन्दितेक्षणे
मनोहरप्रश्नकुतूहलञ्च।
नमोऽर्चया पर्व्वसु पर्व्वतात्मजे
पठेत् सहब्राह्मणवेदसंसदि ॥ ८३
स देहपर्य्यायमवाप्य पूजितो
वसेच्चिरं चारुतमे मया सह ॥ ८४

इति श्रीशैवे महापुराणे सनत्कुमार-संहितायां त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः।

व्यास उवाच।

अष्टषष्टिस्तु या प्रोक्ता शिवस्य परमात्मनः।
तामहं श्रोतुमिच्छामि तत्त्वेन कथय प्रभो ॥ १

सनत्कुमार उवाच।

मन्दरस्थं सुखासीनं ब्रह्मा पृच्छति शङ्करम्।
केषु केषु च भावेषु द्रष्टव्योऽसि मया प्रभो ॥ २

महेश्वर उवाच।

वाराणस्यां महादेवं प्रयागे तु महेश्वरम्।
नैमिषे देवदेवन्तु गयायां प्रपितामहम् ॥ ३
कुरुक्षेत्रे तु कालेशं प्रभासे शशिभूषणम्।
पुष्करे तु अयोगन्धं विश्वञ्च विमलेश्वरे ॥ ४
अट्टहासे महानादं मरुकोटे महोत्कटम्।
शङ्कुकर्णे महातेजं गोकर्णे तु महाबलम् ॥ ५
रुद्रकोट्यां महायोगी महालिङ्गं स्थलेश्वरे।
अवन्त्यान्तु महाकालं सर्व्वं मध्यमकेश्वरे ॥ ६
केदारे देवमीशानं रुद्रञ्चैव हिमालये।
सुवर्णाक्षे सहस्राक्षं वृषे तु वृषभध्वजम् ॥ ७
भैरवे भैरवाकारं भद्रं भद्रपथे विदुः।
उग्रं कनखले चैव भद्रकर्णह्रदे शिवम् ॥ ८
देवदारुवने भिन्नं चण्डञ्च कभिजङ्गले।
ऊर्द्धकेतुं सुरखण्डे तु मङ्गलाण्डे कपर्द्दिनम् ॥ ९
कृत्तिवासे तु वरदं सूक्ष्ममाम्राड़िकेश्वरे।
कालञ्जरे नीलकण्ठं श्रीकण्ठं नण्डलेश्वरे ॥ १०
ध्यानसिद्धेश्वरे योगं गायत्रञ्चोत्तरेश्वरे।
विजयञ्चैव काश्मीरे जयञ्च मरुकेश्वरे ॥ ११
यमस्याङ्गे विदुः स्थाणुं कापिलं करवीरके।
कायावतारे लगुडिं देविकायामुमापतिम् ॥ १२
हरिश्चन्द्रेश्वरञ्चैव पुरचन्द्रे तु शङ्करम्।
जटिं कालेश्वरे विद्यात् सौम्यं कुक्कुटकेश्वरे ॥ १३
ताम्रकञ्चैव सन्ध्यायां बदर्याञ्च त्रिलोचनम्।
जलेश्वरे त्रिशूलन्तु श्रीशैले त्रिपुरान्तकम् ॥ १४
लेपने वै पशुपतिं दीप्तमङ्गेश्वरे विदुः।
गङ्गासागरे ह्यमरमोङ्कारममरकण्टके ॥ १५
सप्तगोदावरी भीमं पाताले ह्याटकेश्वरम्।
कर्णिकारे गणाध्यक्षं कैलासे त्रिपुरान्तकम् ॥ १६
हेमकूटे विरूपाक्षं भूर्भुवं गन्धमादने।
दिड़ीश्वरेऽनलं प्राङ्गर्ज्वलल्लिङ्गं स्थलेश्वरे ॥ १७
भूतेश्वरे गणाध्यक्षं कैरातञ्च किरातके।
दानवानां विनाशाय वाराहं विन्ध्यपर्व्वते ॥ १८
गङ्गाह्रदे हिमस्थानं मानवं वड़वामुखे।
श्रेष्ठिकोटीश्वरं तीर्थे विशिष्टञ्चेष्टकापथे ॥ १९
कुक्कुसपुरे प्रहासं लङ्कायामलकेश्वरम्।

अष्टषष्टिस्तु नामानि तत्र देवस्य चाश्रयात्॥ २०
पुराणे चोपगीतानि ब्रह्मणा च महात्मना।
यः शुचिः प्रयतो भूत्वा उभे सन्ध्ये पठेन्नरः॥ २१
दशानामश्वमेधानां फलं प्राप्नोति मानवः।

व्यास उवाच।

श्रुतं ब्रह्मन् मया सर्व्वं रहस्यं द्विजसत्तम॥ २२
विभूतिं देवदेवस्य श्रोतुमिच्छाम्यहं द्विज।

सनत्कुमार उवाच।

आसीनं मन्दरस्याग्रे नानारत्नविभूषिते॥ २३
तत्र नन्दीश्वरो देवं विभूतिं पर्य्यपृच्छत।

नन्दीश्वर उवाच।

भगवन् देवदेवेश त्रिपुरान्त सुराधिप॥ २४
विभूतिं मे महादेव प्रच्छतो वक्तुमर्हसि।

महेश्वर उवाच।

शृणु नन्दीश्वर मत्तो विभूतिर्यादृशी मम॥ २५
एकाग्रमानसो भूत्वा निशामय समाहितः।
अग्निप्राकारकोटिस्थ आवृतोऽहं न संशयः॥ २६
चरामि पृथिवीं सर्व्वामासमुद्रं सुरासुरम्।
यथेष्टञ्चैव तिष्ठामि चलदेषु ध्रुवस्थितः॥ २७
पर्व्वतेषु सदा हृष्टो देव्या सह वसाम्यहम्।
प्रदक्षिणं सदा कुर्य्याच्छैशतस्य फलं लभेत्॥ २८
गवां शतसहस्रस्य फलं प्राप्नोति मानवः।
चन्द्रोऽस्मि वरुणश्चाहं वहामि पृथिवीमहम्॥ २९
दिनं क्षपा च सन्ध्या च कालोऽहं मृत्युना सह।
प्रलयेऽस्मि ध्रुवश्चैव छन्दोऽहं वेदवादिनाम्॥ ३०
इन्द्रियाणीन्द्रियार्थेषु चयश्चैवाहमव्ययम्।
वृत्तीनां वृत्तिरेवाहं जयोऽहं सर्व्वभूतेषु॥ ३१
विनाशश्च सुरा दैत्याः पवनो दहनस्तथा।
मारुतोऽहं जलश्चाहं क्षिपामि बलवत् सदा॥ ३२
अहं सृजामि भूतानि संक्षिपामि युगे युगे।
योनिशतसहस्रेषु भ्राम्यते ह्यात्मलीलया॥ ३३
मया क्रुद्धेन तत् सर्व्वं खेचरलं प्रदह्यते।
मया ते निहता दैत्यास्तारकाद्या महाबलाः॥ ३४
येषां निःश्वासवातेन त्रयो लोकाः प्रकम्पिताः।
सर्व्वभूतक्षयं चैवं कृतवान् नात्र संशयः॥ ३५
सर्व्वभूतेषु वै नित्यं वसामि सुहितः सदा।

इतिहास-पुराणेषु वेदे चैव वसाम्यहम्।
न तं देशं विजानामि मया शून्यं हि यद्
भक्तानां सर्व्वभूतानां ये च मां शरणागता
अनन्यमानसो भूत्वा यो मां पूजयते नरः
सन्तुष्टोऽहं प्रदास्यामि गाणपत्यं सुदुर्लभम्
वसाम्यहं पुष्पितेषु वृक्षेषु च लतासु च।
नन्दिकेश्वर नारीणां स्थितोऽहं रूपयौवने
समं जीवश्च हासश्च सर्व्वेषां नियमैः सह।
अहङ्कारोऽस्मि दर्पोऽस्मि रजः सत्त्वं तमस्तथा
सर्व्वतीर्थाभिगमनं कृतं भवति भारत।
सर्व्वोपवासं यः कृत्वा तत् फलं प्रतिपद्यते
न तस्य भवते व्याधिर्न च कामं जहेन्नरः।
ब्रह्मचारिषु यत् पुण्यं सत्यवादिषु यत् फ
तत् फलं लभते नन्दिन् विभूतिं मम यः
महात्मा स जनश्रेष्ठो जरा-मरणवर्ज्जितः
विमुक्तः सर्व्वपापेभ्यो रुद्रलोके महीयते

सनत्कुमार उवाच।

सुखासीना यथाशान्ति क्रीड़न्ते च यथा
यथा हि भगवान् पक्षैः सर्व्वदानस्य यत्
प्राप्नुवन्ति शुभान् लोकान् कृतैव कर्मभिः
चण्डालाद्याश्च मां भक्ताः शूकरीपक्षिपोष
मत्स्यपन्नाश्च क्रव्यादाः सर्पदंशोपजीवनः
तेऽपि सर्व्वं प्रमुञ्चन्ति प्राप्यन्ते गतिमुत्तमा
ब्रह्मपुत्त्रस्य तद्वाक्यं श्रुत्वा नन्दी गणाधिप
प्रत्युवाच शुभं वाक्यं यथापूजं यथाविधि।
अध्यात्मध्यानयुक्ताश्च येन सिध्यन्ति मानवा
तत् सर्व्वं सम्प्रवक्ष्यामि नमस्कृत्वा पिनाकि
मानवास्तेषु तत्त्वेषु तुल्यकर्मवशानुगाः॥
तावद्भ्रमन्ति संसारे यावज्ज्ञानं न विन्दति।
असुराश्चैव देवाश्च ऋषयः पितरस्तथा॥
यथा ब्रह्मादयो देवा दीप्यन्ते ध्यानतेज
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षु
एते ध्यानेन दीप्यन्ते न च लिप्यन्ति कर्म
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राद्या वर्णक
एते ध्यानेन द्योतन्ते न च लिप्यन्ति कर्म
चाण्डालाश्च अन्त्यजाश्च सर्व्वे ते पापकर्म

ते चरन्ति शुभान् लोकान् ध्यानं दहति किल्बिषम्।
अल्पग्रन्थमिमं गुह्यं सारभूतं समुच्चयम् ॥ ५४
सर्व्वपापेषु सक्ता ये ते च सिध्यन्ति मानवाः।
तत् सर्व्वं सम्प्रवक्ष्यामि तव स्नेहान्महामुने ॥ ५५
ध्यानयोगविधिं कृत्स्नं मोक्षद्वारविधिं शृणु।
अवज्ञानं गुरुषु यो करोति न च विन्दति ॥ ५६
अगम्यागामी ब्रह्मघ्नः सुरापो गुरुतल्पगः।
शतं शकटभाराणां जन्तूनां येन हिंसितम् ॥ ५७
तत् पापं हरते ध्यानी काष्ठराशिमिवानलः।
कुमारीदूषणं कृत्वा मातङ्गीगमनं तथा ॥ ५८
एकेन ध्यानरूपेण तत् पापं नयते क्षयम्।
अभक्ष्यभक्षणं कृत्वा अपेयं पीतमेव च ॥ ५९
तद्विशोधयते ध्यानी दीप्ताग्निरिव काञ्चनम्।
उदधिं प्राप्य नद्यास्तु यथा मार्गं न पश्यति ॥ ६०
तत्त्वज्ञानान्तरं प्राप्य सर्व्वपापैः प्रमुच्यते।
ध्यानयोगविधिं ज्ञात्वा यदि मोक्षं न गच्छति ॥ ६१
ब्रह्मलोकेऽपि वा वासो विष्णुलोके यदृच्छया।
सोमसूर्य्याग्निदेवेन्द्राविशेषं स्थानमाप्नुयात् ॥ ६२
यमलोकेऽपि वा वासः पूज्यमानस्य दैवतैः।
यथोक्तेन विधानेन विशुद्धेनान्तरात्मना ॥ ६३
एवं ध्यानयुक्तस्य शिवं प्राप्नोति नान्यथा।
अधीत्य चतुरो वेदान् साङ्गोपनिषदो द्विजः ॥ ६४
ध्यानस्य देवगुह्यस्य कलां नार्हति षोडशीम्।
विना देववरं ध्यानं शौचाचारसमन्वितम् ॥ ६५
अश्वमेधसहस्रेण राजसूयशतेन च।
सहस्रमुपवर्त्तन्ते ध्यानमेकं विशिष्यते ॥ ६६
न तच्छक्यं फलं प्राप्तुं क्रतुकोटिशतैरपि।
यत् फलं ध्यानयोगेन एकेन तु समाधिना ॥ ६७
अधीत्य चतुरो वेदान् ध्यानयोगं विशिष्यते।
आकाशमिव पङ्केन न स पापैर्विलिप्यते ॥ ६८
यः सहस्रं सहस्राणां भोजयेद्वै द्विजांस्तथा।
एकस्तु मन्त्रवित् प्रीतः सर्व्वमर्हति वै द्विजः ॥ ६९
यः सहस्रं सहस्राणां भोजयेत् सत्यवादिनाम्।
एकस्तु मन्त्रवित् प्रीतः सर्व्वमर्हति ब्राह्मणः ॥ ७०
सन्न्यासिनां सहस्रेण स्नातकानां शतेन च।
एकस्तु मन्त्रवित् प्रीतः सर्व्वमर्हति वै द्विजः ॥ ७१

गृहस्थानां सहस्रेण ब्रह्मचारिशतेन च।
वानप्रस्थसहस्रेण यतिरेको विशिष्यते ॥ ७२
सांख्ययोगविशुद्धानां भुञ्जानो यस्य योगवित्।
पवित्रो ग्रसते पिण्डांस्तावत् तस्य हविर्मखः ॥ ७३
सर्व्वपापरतिस्तस्य यस्य ध्यानं न विद्यते।
प्रतिग्रहेण मूढात्मा न विमुच्येत किल्बिषम् ॥ ७४
यस्य वै क्रुध्यते ध्यानी नास्ति तस्य समुद्भवः।
यस्य तुष्यति वै ध्यानी कुलं तस्य प्रवर्द्धते ॥ ७५
नियतो ध्यानयोगेन गच्छते वै दिशो दश।
पुनाति ध्यानिनस्तेषामिति ज्ञानपरिग्रहे ॥ ७६
न स लिप्यति पापेन तपसा कल्मषेण च।
यथा पर्व्वतमासाद्य आश्रयन्ति मृगाधिपाः ॥ ७७
तत्त्वविश्वविदो योगमाश्रयन्ति द्विजोत्तमाः।
ग्रामवाटे यथा वह्निः सर्व्वं दग्ध्वा न लिप्यते ॥ ७८
विश्ववित् सर्व्वकर्म्माणि तथा कृत्वा न लिप्यते ॥ ७९

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायामेकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः।

सनत्कुमार उवाच।

नन्दिन् यदुक्तं देवेन ध्यानस्य फलमुत्तमम्।
तदहं श्रोतुमिच्छामि केन मन्त्रेण ध्यायते।
ध्यानं कतिविधं देव प्रतिगृह्णन्ति तत् तथा।
अक्षराश्च कथं देवा रुद्र-विष्णु-पितामहाः ॥ २
एतन्मे संशयं देव तत्त्वमाख्याहि सुव्रत।

नन्दीश्वर उवाच।

ब्रह्मा वै वामपार्श्वे तु दक्षपार्श्वे तु केशवः ॥ ३
उभाभ्यां मध्यतो रुद्रस्तिष्ठते ह्येकविग्रहः।
पूर्व्वाह्णे ध्यायते ब्रह्मा मध्याह्ने च जनार्द्दनः ॥ ४
पश्चिमायां स्थितो रुद्रस्त्रयस्ते चैकविग्रहाः।
त्रैलोक्यं देवदेवस्य रुद्र-विष्णु-पितामहाः ॥ ५
अनुग्रहार्थं लोकानां भक्तानामनुकम्पया।
आत्मदेहं त्रिधा देवः स करोति पृथक् पृथक् ॥ ६
एकमेव त्रयं ह्येतद्यदि ध्यायन्ति ध्यायिनः।
रुद्रसायुज्यतां यान्ति इत्याह भगवान् शिवः ॥ ७

ये नित्यं देवदेवस्य हृदयेन स्मरन्ति वै।
न तान् संक्रमते पापं म्रियते चेद्दिवं गतः॥ ८
अकारो भगवान् विष्णुरुकारश्च पितामहः।
मकारश्च स्वयं रुद्रो विज्ञेया ध्यानतत्परैः॥ ९
अकारञ्च लघः कृत्वा ओङ्कारञ्च प्रयोजयेत्।
उकारञ्च मकारञ्च मात्रया सह योजयेत्॥ १०
अकारे हृदि उत्पन्न उकारं विनियोजयेत्।
मकारन्तु शनैः कृत्वा योजयेत् त्रिविधं तथा॥ ११
अकारोकारसंयुक्तमकारो बुद्धिरुच्यते।
अकारोकारनिर्म्मुक्तो मकारः प्रत्यवस्थितः॥ १२
गच्छेत परमं स्थानं पुनर्जन्म न विद्यते।
अक्षरं स्मृतमोङ्कारस्तस्माद्ब्रह्म प्रकीर्त्तितम्॥ १३
ब्रह्मा विष्णुश्च रुद्रश्च द्वाभ्यामेकतरं सदा।
ओङ्कारं हृदये कृत्वा ध्यानं युञ्जीत योगवित्॥ १४
ओङ्कारं वैदिकानान्तु योगिनाञ्च तथैव च।
ओङ्कारं ध्यायमानस्य जन्मसूत्रं न विद्यते॥ १५
तथा प्रवृत्तमोङ्कारं प्रत्यवस्थितमूर्द्धनि।
तत ओङ्कारयोगी च अक्षरादक्षरं भवेत्॥ १६
एवं प्रयोज्यमानस्तु मनो विजयते परम्।
निगृह्य सर्व्वेन्द्रियाणि ध्यानं युञ्जीत योगवित्॥ १७
अङ्गुष्ठमात्रं पुरुषं हृदि कृत्वा शिवं प्रभुम्।
भ्रुवोर्मध्ये च विख्यातं सांख्यतत्त्वगुणान्वितम्॥ १८
ललाटमध्ये चन्द्राभमच्युतं लोकपावनम्।
अव्ययं सूक्ष्मभावं तं मूर्द्ध्नि कृत्वा शिवं प्रभुम्॥ १९
ओमिति ब्रह्म युञ्जीत विश्रान्तो योगमास्थितः।
उच्चार्य्यमाणं क्षरते प्रशान्तं ब्रह्म उच्यते॥ २०
तस्मान्नोच्चारयेद्ब्रह्म मा ब्रह्म क्षरतां व्रजेत्।
त्रिब्रह्म त्रिगुणञ्चैव त्रिस्थानं त्र्यक्षरं तथा॥ २१
त्रिमात्रं सार्द्धमात्रञ्च यस्तं वेद स वेदवित्।
उच्चार्य्यमाणमपि चेत् संयम्यात्मानमात्मवित्॥ २२
प्राणायामे चिरं प्राणं संयम्य च पुनः पुनः।
निमेषमात्रमपि चेद्ध्यानं युञ्जीत योगवित्॥ २३
ओङ्कारे प्रथमं योगं नित्यं ध्यायीत मानवः।
विमुक्तः सर्व्वसंसारात् प्राप्नोति शिवमव्ययम्॥ २४
कूर्म्मोऽङ्गानीव संहृत्य इन्द्रियाणि सुखानि च।
प्रकाशयेत् तदात्मानं निर्व्वाते दीपवद्बुधः॥ २५

तैलधारामिवाच्छिन्नां सुप्रस्तनितनि...
ओङ्कारं ध्यायते धीरो विशुद्धेनान्तरा...
न कम्पयेन्नोच्छ्वसेच्च न च गात्राणि वि...
धारयित्वा यथाशक्त्या ततः प्रत्याहरे...
प्राणायामैर्वशं कृत्वा मनश्च स्थिरमेव च...
अकारश्च उकारश्च मकारश्चैव ते त्रयः...
एकैकशस्त्रयो देवा विष्णु-रुद्र-पितामह...
नन्दीश्वरं परिष्वज्य हृष्टः पृष्टस्तपोध...
अभिवाद्य तु वाग्भिस्तं तं रुद्रं चन्द्रमौ...
योगं गुह्यतमं श्रुत्वा स्थानेषु च यथात...

इति श्रीशैवे महापुराणे सनत्कुमा...
तायां नन्दीश्वरयोगाख्यानं ...
द्वात्रिंशोऽध्यायः॥ ३२॥

त्रयस्त्रिंशोऽध्यायः।

व्यास उवाच।

भगवन् श्रोतुमिच्छामि ध्यानयोगस्य ...
कथयस्व महाब्रह्मन् नैपुण्येन महामु...

सनत्कुमार उवाच।

महेश्वरेण यत् प्रोक्तं यत् तद्धर्म्मं सनात...
तत् सर्व्वं क्रमयोगेण कथ्यमानं निबोध...
प्राणायामं यथाध्यानं प्रत्याहारञ्च धार...
योगञ्च परमं प्रोक्तं पञ्चधर्म्मं प्रकीर्त्तित...
तेषां क्रमविशेषेण योगानां लक्षणं पर...
प्रवक्ष्यामि यथातत्त्वं स्वयं रुद्रेण भाषित...
प्रणायामस्तथा चापि प्राणस्यायाम उ...
सर्व्वन्तु त्रिविधं प्रोक्तं मन्दं मध्यममुत्तम...
प्राणापाननिरोधैस्तु मन्दैर्द्वादशभिस्तथा...
मन्दं द्वादशमात्रन्तु उद्घातः प्रथमं स्मृतम्...
मध्यमश्च द्विरुद्घातश्चतुर्व्विंशतिमात्रकः।
उत्तमस्तु त्रिरुद्घातो मात्राः षट्त्रिंशतिः...
इत्येष त्रिविधः प्रोक्तः प्राणायामस्य ल...
सिंहो वा कुञ्जरो वापि तथान्यो वा व...
नैव ग्राह्यो न वान्यो वा दुराधर्षश्च जा...
योगं निविशमानस्तु न दोषं प्राप्नुया...

यथैव तुरगः सिंहः कुञ्जरो वाथ दुर्म्मदः ।
कालान्तरवशाद्योगादभीक्ष्णं परिमर्द्दनात् ॥ १०
परिचीयमानः कालेन वशत्वञ्चैव गच्छति ।
परिचीयमानयोगस्य तथा जायेत मारुतः ॥ ११
वशित्वञ्च तथा चापि गच्छते योगमास्थितः ।
यथा स्वयं दत्तप्राणो नयन्तमनुगच्छति ॥ १२
यथा सिंहो मृगो वापि नीयमानो व्यवस्थितः ।
अभयञ्च मनुष्याणां मृगीभ्यः सम्प्रवर्त्तते ॥ १३
तथा परिचीयमानः शरीरे किल्बिषं दहेत् ।
प्राणायामेन युक्तस्य विप्रस्य नियतात्मनः ॥ १४
सर्व्वदोषाः प्रणश्यन्ति सत्त्वस्थश्चैव जायते ।
तीर्थानि यानि पश्यन्ते नियमानि व्रतानि च ॥ १५
सर्व्वयज्ञफलञ्चैव प्राणायामस्य तत् समम् ।
प्राणायामैर्द्दहेद्दोषान् धारणाभिश्च किल्बिषम् ॥१६
प्रत्याहारेण विषयान् ध्यानेनानश्वरान् गुणान् ।
तस्माद्युक्तः सदा योगी प्राणायामान् समाचरेत्१७
सर्व्वपापविशुद्धात्मा परंब्रह्माधिगच्छति ।
अतः परं प्रवक्ष्यामि प्राणायामस्य लक्षणम् ॥ १८
आसनं स्वस्तिकं कुर्य्यात् पद्मं भद्रासनं तथा ।
समजानुमेकपादं पार्श्वोत्तानञ्च संस्थितः ॥ १९
मनो-ग्रीवासमो भूत्वा संयम्य चरणावुभौ ।
जानूर्व्वोरन्तरे विप्र कृत्वा पादतले उभे ॥ २०
समग्रीवशिरस्कस्य स्वस्तिकं तत् प्रचक्षते ।
अङ्गुष्ठावपि गृह्णीयाद्धस्ताभ्यां व्युत्क्रमेण तु ॥ २१
ऊर्व्वोरुपरि विप्रेन्द्र कृत्वा पादतलद्वयम् ।
पद्मासनं भवेदेतत् पाप-रोग-भयापहम् ॥ २२
गुल्फौ तु वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
पार्श्वे पादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलः ॥ २३
भद्रासनं भवेदेतद्विषरोगविनाशनम् ।
संवृतास्यो मौलिताक्ष उपविष्टश्च वाग्यतः ॥ २४
पार्ष्णिभ्यां वृषणं रक्षेत् तथा शिश्नेन नित्यशः ।
किञ्चिदुन्नामितमुखो दन्तैर्दन्तान् न संस्पृशेत् ॥ २५
जिह्वां न चालयेत् क्वापि पाषाण इव निश्चलः ।
तमः प्रच्छाद्य रजसा रजः सत्त्वेन संस्थितौ ॥ २६
कृत्वा भूत्वा स्थिरो योगी संयुक्तः सुसमाहितः ।
इन्द्रियाणीन्द्रियार्थांश्च मनः प्रत्यमवायवः ॥ २७
निरुध्य समभावेन कूर्म्मोऽङ्गानीव सर्व्वशः ।
निवृत्तिं विषयाणान्तु प्रत्याहारमुपक्रमेत् ॥ २८
ततो मात्रास्तु विज्ञेया निमेषोन्मेषमेव च ।
तथा द्वादशमात्रस्तु प्राणायामो विधीयते ॥ २९
धारणाद्वादशायामे सेवेच्च धारणा द्वयम् ।
द्वश-द्वादश-विंशत्या चतुर्व्विंशतिधारणाः ॥ ३०
धारणा धारयेद्योगी नित्यमध्यात्मचिन्तकः ।
पश्यते परमात्मानं दिव्यमेवं कुतो जनिः ॥ ३१
धारयित्वा यथाशक्त्या शनैः प्रत्याहरेत् पुनः ।
जित्वा जित्वा शनैर्भूय आरभेच्च सदा मुनिः ॥ ३२
अजितो हि सदा भूमिं दोषं वा कुरुते महान् ।
विवर्द्धयति संमूढं तस्मादेव जिता मही ॥ ३३
प्राणायामस्य संरोधात् प्राणायामस्तु पश्यते ।
धारयेच्चापि यद्वायुं धारणामिति निर्द्दिशेत् ॥ ३४
निवृत्तविषयाणान्तु प्रत्याहारं न संशयः ।
सर्व्वेषां समवायेन सिद्धिः स्याद्योगलक्षणा ॥ ३५
ध्यानयुक्तास्तु पश्यन्ति आत्मानं जलचन्द्रवत् ।
तथा सन्दर्शनं प्राप्ते क्षेमप्राप्तिं विनिर्द्दिशेत् ॥ ३६
देशकालविदे शस्तं विज्ञेयं तत्त्वलक्षणम् ।
आदेशकाले तत्त्वस्य दर्शनन्तु न विद्यते ॥ ३७

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां योगविधिर्नाम त्रय-
स्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः ।

व्यास उवाच ।

श्रोतुमिच्छामि भगवन् योगस्य परमं विधिम् ।
तदहं श्रोतुमिच्छामि त्वत्प्रसादाद्द्विजोत्तम ॥ १

सनत्कुमार उवाच ।

सुखोपविष्टमासीनं महादेवं स्वयम्भुवम् ।
पप्रच्छ मुनिशार्दूलो दुर्व्वासास्तु महामुनिः ॥ २
भगवन्तं भवोद्भिन्न इदमाह कृताञ्जलिः ।
भगवन् केन मुच्यन्ते नराः पापेषु ये रताः ॥ ३
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव तथा विभो ।
श्वपाका म्लेच्छ-मातङ्गाः शूकराः पक्षिघातकाः ॥४

पापाश्रयाः कृतघ्नाश्च लोलुपाश्च हविघ्नकाः ।
कन्यानां दूषकाश्चैव कुलघ्नाः स्त्रीनपुंसकाः ॥ ५
मातृत्यागी पितृत्यागी राजघ्नाश्चैव ये नराः ।
परद्रव्यापहारी च युद्धे चापि पराङ्मुखाः ॥ ६
अभक्ता ब्रह्मघ्नश्चैव भक्त्या वृत्तिभुजश्च ये ।
चाण्डाला मत्स्यबद्धाश्च अगम्यागमने रताः ॥ ७
एते चान्ये च बहवः सर्व्वपापेषु ये नराः ।
गच्छन्ते न कथं तात पापिष्ठां गतिमेव च ॥ ८
एतन्मे संशयं तात वक्तुमर्हसि तत्त्वतः ।

महेश्वर उवाच ।

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव तथा परे ॥ ९
श्वपाका म्लेच्छ-मातङ्गा ये चान्ये पापकर्म्मिणः ।
एवं ते ध्यानिनो विप्रा दहन्ते पापकं क्षणात् ॥ १०
पितृपत्नीं भ्रातृपत्नीं भगिनीं गावमेव च ।
ध्यानिनां शुद्धबुद्धीनां ध्यानेन विदितात्मनाम् ॥ ११
लभ्यते ब्रह्मनिर्व्वाणं शुद्धध्यानेन साध्यते ।
ध्यानं चिन्तयमानस्य एकचित्तेन ध्यानिनः ॥ १२
एकेन ध्यानयोगेन तत् पापं निर्द्दहेत् क्षणात् ।
पितृपत्नीं भ्रातृपत्नीं भगिनीं गावमेव च ॥ १३
शुद्धाशुद्धो नरो विप्र ध्यानेन तु न संशयः ।
ध्यानहीनो यस्तु नित्यं दृढ़युक्तो दृढ़व्रतः ॥ १४
लभते धारणाद्योगं येन सिध्यति वै यतिः ।
लब्धा सर्व्वप्रयत्नेन स यतिस्तत्परो भवेत् ॥ १५
अतत्त्यागेन सिध्यन्ति तस्मादितत्परो भवेत् ।
तन्मनास्तत्परश्चैव मूर्द्ध्नि निर्व्वाणमृच्छति ॥ १६
अथवा रुद्रलोकेषु सूर्य्यलोके तथैव च ।
अग्निलोकं वायुलोकमिन्द्रलोकं प्रजापतिः ॥ १७
विष्णुलोकान्तरं गत्वा ब्रह्मलोकात् परां गतिम् ॥ १८

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः ।

दुर्व्वासा उवाच ।

किञ्च ध्यानं सुरश्रेष्ठ कश्च ध्याता च नित्यशः ।
एतदिच्छाम्यहं श्रोतुं त्वत्प्रसादाद्ब्रवीहि मे ॥ १

महेश्वर उवाच ।

ध्यानयोगविधिं कृत्स्नं मोक्षद्वारविष
अहं वच्यामि तत् सर्व्वं शृणुष्वावहितो
ओङ्कारं परमं ध्यानं योगं युञ्जीत यो
गुरवश्च नमस्कार्य्या मन्त्रमेवमनुस्मरेत् ।
उपविश्यासनं तत्र सोममण्डलकं तथा ।
आसने तु प्रयत्नेन बुद्धा युञ्जीत योगि
पद्ममण्डलकञ्चैव स्वस्तिकं समुदाहृतम् ।
रुद्रपीठञ्च वज्रञ्च वज्रदण्डोन्नतं तथा ।
इत्येते आसनाः प्रोक्ता नानारूपगुणा
एतेषामेकमास्थाय आसनन्तु विचक्षणः ।
लब्धाहारो जितक्रोध एकान्ते च नि
शिष्टसंसर्गवर्ज्जिते दर्शनाभ्यागमं तथा ।
चिन्तयेद्ध्यानिनो नित्यं शास्त्रदृष्टेन क
यमस्तेनैव मार्गेण एकाग्रमानसो भवेत् ।
एकाग्रमानसो भूत्वा उत्पत्तिं प्रलयं
युञ्जीत स्वशरीरस्य युञ्जानो न च हिं
यथा ह्यहं शरीरस्य शुक्र-शोणितसम्भ
किमस्माकं शरीरार्थेऽनित्ये चैव शरीर
मज्जामेदोऽस्थिसम्पूर्णे शिराजालेन सं
नवद्वारपुरे देहे मम चैव शरीरके ॥
श्लेष्म-मूत्र-पुरीषेषु दुर्गन्धे जन्मसम्भवे ।
व्याधिशोकगणे घोरे ममत्वं हि शरीर
चिन्तयित्वा शरीरस्य नित्यानित्यं हि
योगमेतत् प्रवच्यामि वाह्याभ्यन्तरमेव
अविमुक्ते स्थितो देवो रुद्रावासे तु
प्राणास्तु रुद्रा विज्ञेया अविमुक्तं परं
तस्मिन् स्थाने वसेद्देवो रुद्रवासेति
एष आभ्यन्तरो योगो मया ते कथितो
वाह्यन्तु कथयिष्यामि हितार्थं सर्व्वजन्तु
आन्तरं शृणुयाद्योगं योगविदां वरं
श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव
अव्यक्तं बुद्ध्यहङ्कारं मनश्चेति च पञ्चमी ।
पृथिव्यापस्तथा तेजो वायुराकाशपञ्चम
महाभूतानि कर्त्तव्यं ज्ञानार्थं ज्ञानमेव
अव्यक्तं परिसंख्यातुं प्राणायामस्तु धार

प्रायामैर्वशं कृत्वा सर्व्वामिन्द्रियवाहिणीम् ॥१९
युञ्जीत मेधावी प्राणञ्च मनसा मुनिः।
पूर्व्वं मनः सर्व्वं मनस्तस्मान्न लङ्घयेत् ॥ २०
भावन तत्त्वानां पश्चाद्युञ्जीत मूर्द्धनि।
वं प्राण-मनसोरिन्द्रियाणां समन्वितः ॥ २१
नैवात्मनो विप्र धारयन्नात्मनोमिति ॥ २२

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां दुर्व्वासउपनिषन्नाम
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः।

महेश्वर उवाच।

ोऽपानः समानश्च उदानो व्यान एव च।
हिता वायवः पञ्च धारयन्त्यात्मनात्मनि ॥ १
ङ्गुलिषु सर्व्वासु सर्व्वासु पर्व्वसन्धिषु।
चैवोरुजङ्घासु शिश्ने वृषणयोस्तथा ॥ २
पृष्ठ-कटी-बाह्वोर्हृदये पार्श्वयोस्तथा।
ये विपुले मध्ये पृष्ठे चाथ ललाटयोः ॥ ३
ाग्रे तालुमध्ये तु चक्षुर्नासिकयोस्तथा।
मध्ये तथा श्रोणौ ललाटे तु समूर्द्धनि ॥ ४
मध्ये शरीरस्य विदितं सूर्य्यमण्डलम्।
ामात्मासहस्रैस्तु आप्यमानेषु तेजसा ॥ ५
मध्ये तु विहितं सौम्यं सोमस्य मण्डलम्।
मण्डलमध्ये तु परमात्माभितिष्ठति ॥ ६
-स्नायु-शिरा-मांसवर्ज्जितो दुःखवर्ज्जितः।
श्यामो न च रक्तो न कृष्णो न च पाण्डुरः ॥७
ङ्गलो न पिङ्गश्च लोहितो न न शाबलः।
त्यवर्णं पुरुषं स तं विद्याद्विचक्षणः ॥ ८
रश्च भवश्चैव चिन्त्यः कर्त्ता स कीर्त्त्यते।
स्फटिकवर्णाभो दृश्यते न च चक्षुषा ॥ ९
सर्व्वमिदं व्याप्तं पयोदधि व सर्पिषा।
ार्थं सृजते लोकान् ख्यात्यर्थञ्च महेश्वरः ॥ १०
षु क्रीड़ते नित्यं बालः क्रीड़नकैरिव।
शस्य यथा पत्रं सर्व्वं व्याप्तं हि तन्तुभिः।
ात्मा तथा लोकान् जगत् कृत्स्नं हि तिष्ठति॥११

सूर्य्यं रश्मिर्यथा चैव सर्व्वतेजांसि धारयन्।
एवं तेन तथा व्याप्तं शरीरं परमात्मना ॥ १२
परमात्मेति विज्ञेयो ध्यानाभ्यासेन भो द्विज।
अभ्यासात् पश्यते सर्व्वं परमात्मानमात्मनि ॥ १३
इमं योगविधिं कृत्वा शृणु तत्त्वं मनीषिणः।
दश प्राणवहा नाड्यो देहिदेहेषु संस्थिताः ॥ १४
चतस्रोऽधस्तु विज्ञेया द्वे च नाड्यौ च पार्श्वयोः।
ऊर्द्धन्तु चतुरो ज्ञेया नाड्यस्तु परिकीर्त्तिताः ॥ १५
नाड़ीनान्तु सहस्राणि द्वासप्ततिरिति श्रुतिः।
शरीरं व्याप्य तिष्ठन्ते स्नेहेन पल्लवं यथा ॥ १६
पद्मसङ्काशसंस्थानं हृदये तत्र दृश्यते।
सूक्ष्मो हि पुरुषो ज्ञेयः परात्मा हृदि संस्थितः॥१७
शुद्धस्फटिकवर्णाभं निर्गुणं शाश्वतं ध्रुवम्।
निरञ्जनोऽथ मन्नक्तः परमक्षरमव्ययम् ॥ १८
त्वं सर्व्वाङ्गेषु सर्व्वगामी
तीर्थस्रष्टा धाता च प्रयुक्तवान् प्रसूतः।
प्रथिता भावानां स्रष्टा हर्त्ता प्रसविता
धर्म्मोत्सुकस्तदेवाग्निस्तदादित्यः ॥ १९

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः।

महेश्वर उवाच।

प्राणाद्याश्चतस्रो ज्ञेया याताः प्रोक्तास्तु ऊर्द्धगाः।
नाभिः सञ्चरते विप्र परमात्मानमव्ययम् ॥ १
ऊर्णे प्रोक्ता तदा योगी नित्यध्यानपरायणः।
एवं हि परमात्मानं पापकर्म्मा न पश्यति ॥ २
पापकर्म्मापि यो नित्यं नित्यं ध्यानपरायणः।
ध्यानाग्निः सर्व्वकर्म्माणि दहत्यग्निरिवेन्धनम् ॥ ३
न वेदयज्ञैर्न जपैर्न योगै-
र्नशौच-जप्यैर्न च वेदचर्य्यया।
प्राप्तं वरं तत् तु नरेण लोके
ध्यानार्णवं यस्तु निषेवते ध्रुवम् ॥ ४
न नदीस्नानमात्रेण न तीर्थाभिगमेन च।
न च दीक्षाविधानेन न शिरोमुण्डनेन च।

न वेदार्च्चनमात्रेण विद्ग्धानां विचारणात् ॥ ५
प्राप्तं प्रदं कस्य नरेण लोके
ध्यानार्णवं यस्तु न सेवते बुधः ॥ ६
सर्व्वतः समचित्तस्तु सर्व्वमात्मन एव च ।
चिन्तयन् सर्व्वभूतानि तदा सिध्यति स द्विजः ॥ ७

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अष्टत्रिंशोऽध्यायः ।

दुर्व्वासा उवाच ।

ज्ञापयामि पुनर्देव प्रसादं कुरु शङ्कर ।
कीदृशोऽथ भवेद्देव षड़ङ्गो योग उच्यते ॥ १

महेश्वर उवाच ।

प्राणायामस्तथा ध्यानं धारणा योग उच्यते ।
प्राणस्य ग्रहणं नित्यं प्राणायामः स उच्यते ॥ २
ओङ्कारं मनसा ध्यायेदेकाग्रे मनसा स्मरन् ।
ध्यानेन तु सदा योगी ध्यानसंवित्ततापरः ॥ ३
सर्व्वेषामिन्द्रियाणान्तु विषयाणां तथैव च ।
प्रतिपत्त्या हरं कृत्वा प्रत्याहारः स उच्यते ॥ ४
दशानामिन्द्रियाणान्तु ओङ्कारे प्रीतमानसः ।
योजनानां जपेश्चैव योगो वै कीर्त्तितो बुधैः ॥ ५
अहिंसा सत्यवचनमस्तेयञ्चाप्यकल्पता ।
पञ्चमं ब्रह्मचर्य्यं च इत्येते नियमाः स्मृताः ॥ ६
अक्रोधो गुरुशुश्रूषा शौचं सन्तोषमर्थवत् ।
एते तु नियमाः पञ्च विज्ञेया ब्रह्मवादिषु ॥ ७
षड़ङ्गो योग इत्येष शुद्धे विज्ञान उच्यते ।
स गच्छेत् परमं स्थानं शाश्वतं पदमव्ययम् ॥ ८
अतिशून्यन्तु यस्यार्थे शरीरं कीर्त्तितं बुधैः ।
तस्य चान्ते शरीरस्य सशरीरः स उच्यते ॥ ९
ज्ञानं निरञ्जनञ्चैव अव्यक्तं त्रिगुणः स्मृतः ।
द्रष्टा स्रष्टा च स पिता मन्ता बोद्धा तथैव च ॥ १०
पुरुषं शाश्वतं सूक्ष्मं द्रष्टव्यं ध्यानचक्षुषा ।
यतते ध्यानयोगेन यदि लक्ष्येत पश्यति ॥ ११
शरीरे च स्थिता बुद्धिर्मनोऽहङ्कार एव च ।
अव्यक्तं त्रिगुणं भद्र पुरुषश्चात्र शाश्वतः ॥ १२

रजस्तमोभ्यां संछन्नो यदा किञ्चिन्न वि-
वर्त्तमानस्तु विज्ञेयश्चतुर्थी गतिरेव च ॥
पञ्चविंशत् तु विज्ञेयमीशमीशानमव्यय-
सम्भूतिञ्च विनाशञ्च भावाभावौ तथैव च
यस्तु वेत्ति नरः प्राज्ञः सर्व्वं द्रष्टार्थवि-
न तु मानैस्तु विज्ञेया चतुर्थगतिरेव च
पञ्चविंशकतत्त्वानि ज्ञायन्ते तु सदा नरैः
पञ्चविंशत् तदा ज्ञेयमीशानमव्ययं परम्
पुरुषः सञ्चरन्तं तं यस्तु वेत्त्युपरिस्थितम्
रुद्रवासे तु ओङ्कारं त्वविमुक्तः स उच्यते
माहात्म्यं तस्य तत् प्रोक्तं सम्पन्नं तव हि-
यं विदित्वा च ज्ञात्वा च स गच्छेत् परमं
स एवं पञ्चविंशतिकः षड़्विंशकस्तथैव
ऊनविंशतिकं विद्यात् तत्त्वज्ञानार्थचिन्त-
विंशकन्तु तदा ज्ञात्वा अमृतत्वाय कल्प-
चतुर्व्विंशगृहं योग एष वै पञ्चविंशकः
षड़्विंशतिस्तथा ज्ञेया अध्यक्षः सप्तविं-
अष्टविंशकः पुरुषस्त्रिंशत् पुरुषलोक-
यं विदित्वा न शोचन्ति तं शिवं कथयं-
एष वै कथितो ब्रह्मन् मया हि तव-
अच्छेद्योऽपि हि यो नित्यं स्वर-व्यञ्जन-
यं चिन्तयेद्दृयतिर्नित्यं मात्राक्षरविवर्ज्जि-
अविमुक्ते स्थितो देवो मत्स्योदर्य्यास्तु -
ओङ्कारं परमं देवं पञ्चायतनवासिनम्
तस्य चैव प्रसादेन निष्कलत्वं प्रपद्यते ।
चिन्तयेद्दृयोगवान् नित्यमेष वै निष्कलः

दुर्व्वासा उवाच ।

कथं ज्ञेयं हि भगवन् मात्राक्षरविवर्ज्जि-
एतन्मे वद गुह्यञ्च ब्रूहि तत्त्वं वृषध्वज

महेश्वर उवाच ।

शृणु विप्र यथान्यायं मात्राक्षरविवर्ज्जि-
शरीरं हि तदा ब्रह्म यज्ज्ञात्वा मुच्यते
ओङ्कारं परमं ब्रह्म किञ्चिदन्यन्न विद्य-
तद्ब्रह्म मुच्यते पञ्चमात्रञ्च परिकीर्त्तित-
प्रथमा वै द्वितीया च विज्ञेयाक्षरमा-
तृतीयाऽनिमिषा चैव विज्ञेया योगवि-

पिपीड़ितार्थमात्रा वै विज्ञया गुणवर्ज्जिता।
प्रशान्ता चाक्षरश्चैव तां विदित्वा तु मुच्यते ॥ ३०
अकारो वैद्युता चैव उकारोऽक्षरगामिणी।
मकारो निमिषा नाम प्रशान्तन्तु पिपीड़िता ॥ ३१
अकारो ब्रह्म इत्याह उकारो विष्णुरुच्यते।
मकारस्तु उमा ज्ञेया प्रशान्तं शाश्वतं ध्रुवम् ॥ ३२
प्रोङ्कारन्तु यदा योगी युञ्जानः समुदाहरेत्।
वेशानाख्या तदा ज्ञेया नित्यमक्षरगामिणी ॥ ३३
चिन्त्यमानन्तु बहुशो मणिसूत्रनिदर्शनैः।
इषुकार इवासक्तो यथाग्निं न तु पश्यति ॥ ३४
...ादृशं भावयेद्ब्रह्म तदा विन्दति तत्परम् ॥ ३५

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां दुर्व्वासउपनिषत्सु अष्टत्रिंशोऽध्यायः ॥३८॥

एकोनचत्वारिंशोऽध्यायः।

महेश्वर उवाच।

इदं शरीरं विप्रेन्द्र सर्व्वदेवमयं शृणु।
...दहं ते प्रवक्ष्यामि तस्मिंस्तस्मिंश्च दैवतम् ॥ १
विष्णुस्तु पादे विज्ञेयो जङ्घयोर्मरुतस्तथा।
...ानुभ्यामश्विनौ ज्ञेयौ ऊरुभ्यां वरुणस्तथा ॥ २
...ायौ मित्रोऽथ वरुण उपस्थे तु प्रजापतिः।
...वेरो हि कटिस्थाने यक्षैश्च सहितस्तथा ॥ ३
...न्ते समुद्रा विप्रेन्द्र उदरे पञ्च देवताः।
...दि स्थाने तु सावित्री उरः सोमस्तथैव च ॥ ४
...स्तयोरिन्द्रमित्याहुस्त्वचि वै विद्युतस्तथा।
...ोषध्यश्च वनस्पत्यो नखि केशेषु वै द्विज ॥ ५
...ोमकूपे धर्म्म एव मूर्द्ध्न्यादित्यो न संशयः।
...न्धिसप्तर्षयो ज्ञेयाश्चक्षुर्भ्यां सूर्य्य एव च ॥ ६
...ोत्राणि च दिशः सर्व्वा विज्ञेया ब्रह्मवादिभिः।
...ुवोस्तु पर्व्वता ज्ञेया ललाटे वसवस्तथा ॥ ७
...ुवः स्वयम्भूर्विज्ञेयो नित्यमेव प्रतिष्ठितः।
...परान्ते यमश्चैव तथा वेधाः प्रतिष्ठितः ॥ ८
...पराङ्गे रात्रयश्च देवताश्चैव पार्श्वयोः।
...ुभे प्राणगतिः कण्ठे भवन्ति वृषभध्वजः ॥ ९
...महङ्कारे तथा रुद्रो बुद्धौ ब्रह्मा प्रजापतिः।
इत्येवं हि मया प्रोक्तं सर्व्वदेवमयं परम् ॥ १०
एतज्ज्ञात्वा च बुद्ध्वा च गच्छन्ति परमां गतिम्।

दुर्व्वासा उवाच।

एते प्रोक्ताः शरीरस्था देवता ऋषयस्तथा ॥ ११
प्राणाहुति कथं सर्व्वे लभन्ते वृषभध्वज ॥ १२

महादेव उवाच।

प्राणोऽपानः समानश्च उदानो व्यान एव च।
इत्येते वायवः पञ्च शरीरे च प्रतिष्ठिताः ॥ १३
एतेभ्यो जुह्वते यस्तु प्रथमामाहुतिं द्विजः।
सावित्री चतुरो वेदाः सषड़ङ्गपदक्रमाः ॥ १४
ओषध्यश्च वनस्पत्यः सोम-भास्कर-मारुताः।
तेनान्नेन तु तृप्यन्ति यत् प्राणे जुह्वति द्विजाः ॥१५
अपाने जुह्वते यस्तु द्वितीयामाहुतिं द्विजः।
तेन नागाः समुद्राश्च सरितः सागरास्तथा ॥ १६
ऋषयः पितरश्चैव सर्व्वे देवाः सवासवाः।
तेनान्नेन तु तृप्यन्ते अपाने जुह्वते यदि ॥ १७
समाने जुह्वते यस्तु तृतीयामाहुतिं द्विजः।
अश्विनौ मरुतो विष्णुर्वरुणश्च यमस्तथा ॥ १८
प्रजापतिः कुबेरश्च सर्व्वे देवगणास्तथा।
तेनान्नेन तु तृप्यन्ते समाने जुह्वते यदि ॥ १९
उदाने जुह्वते यस्तु चतुर्थीमाहुतिं द्विजः।
तेनाहञ्च भवश्चैव स्कन्दो नन्दी गणेश्वरः ॥ २०
उमा ब्रह्मापि विप्रेन्द्र मनः प्राणास्तथैव च।
तेन तेन तु तृप्यन्ते उदाने जुह्वते यदि ॥ २१
व्याने वै जुह्वते यान्तु पञ्चमीमाहुतिं द्विजः।
तेन सर्व्वा सनद्युत्वा सप्तद्वीपा च मेदिनी ॥ २२
सप्तलोकाश्च ब्रह्माण्डाः सयक्षोरगराक्षसाः।
तेनान्नेन तु तृप्यन्ते व्याने वै जुह्वते यदि ॥ २३
एवन्तु सततं विप्रा जुह्वते प्रणवेन वै।
श्वपाकस्यापि भुञ्जानो न स पापेन लिप्यते ॥ २४
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा यदि वा पठेत्।
वियुक्तः सर्व्वपापेभ्यः श्रद्दधानस्ततो भवेत् ॥ २५

वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वा न भवेन्मृत्यु-
र्नान्यः पन्था विद्यतेऽयनाय ॥ २६

यदि जीवं परिरक्षेदमृतवस्तु समीहते।
विषं हालाहलं पीत्वा न ध्रुवं मृत्युमाप्नुयात् ॥ २७
एतमेवमिदं ज्ञात्वा अमृतत्वमवाप्नुयात् ॥ २८

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां दुर्व्वासउपनिषत्सु एकोन-
चत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः।

व्यास उवाच।

यत् त्वयोक्तं भगवता सांख्ययोगविशारद।
योगनाड़ीमिमां ब्रह्मन् श्रोतुमिच्छामि तद्व्रतम् ॥ १

सनत्कुमार उवाच।

प्रणम्य शिरसा देवमव्ययं भुवनेश्वरम्।
कात्यायनीं नमस्कृत्वा रुद्रपत्नीं विशेषतः ॥ २
हरि-हर-हिरण्यगर्भैर्योगशास्त्रमुदाहृतम्।
पारमेष्ठ्यमिदं ज्ञानं नाड़ीसञ्चारसंस्थितम् ॥ ३
विश्वमूर्त्तिर्यदा श्रीमान् देहस्थः क्रीड़ते तदा।
अनन्ता रश्मयस्तस्य जगद्देहाश्रितास्तथा ॥ ४
योगनाड़ीः प्रवक्ष्यामि हृदयस्थानमाश्रिताः।
पूर्व्व-दक्षिण-पश्चार्द्धमुत्तरां मूर्त्तिमाश्रिताः ॥ ५
अधस्तादेव नाड्यस्तु तासां वर्णान् निबोध मे।
पीत-लोहित-कृष्णाश्च उत्तराः पाण्डु-पिङ्गलाः ॥ ६
पूर्व्वाः श्वेतास्तथा नाड्यो दक्षिणाः कृष्णपिङ्गलाः।
ऊर्द्ध्वन्तु निष्ठिता यास्तु कृष्णा नाड्यस्तु चोन्दिताः॥७
पञ्च पञ्च स्मृता नाड्यो हृदि संस्थानसंश्रिताः।
शतमेकोत्तरं नाड़ीमुपासन्ते च योगिनः ॥ ८
सर्व्वाश्च ताः समुत्सृज्य ब्रह्मनाड़ीं समाश्रयेत्।
रश्मयो ये तु सूर्य्यस्य दृश्यन्ते च नभःस्थले ॥ ९
परमात्मा हृदिस्थो हि स च सर्व्वं प्रकाश्यते।
नाभिनाड़ीभिरत्यर्थं क्रीड़ा-मोक्षविसर्ज्जनम् ॥ १०
षष्ठवत्यः सहस्राणि नाड़ीनां हृदिसंस्थिताः।
पूर्व्वनाड्यस्तु याः पञ्च प्राणाद्याः परिकीर्त्तिताः ॥ ११
दक्षिणा याः स्थिता नाड्यस्तासां पञ्चजला इति।
पश्चिमोत्तरनाड्योस्तु उदानश्चोत्तराणि च ॥ १२
समानस्थानि बोध्यानि अधस्तादुयाः समाश्रिताः।
द्विगुणन्तु प्रविष्टास्तु हृदयानन्तरं ततः॥ १
एतन्नाड़ीप्रमाणन्तु विश्वं यत्र प्रतिष्ठितम्।

उक्ताश्चतुर्भिः संयुक्तामणोरणीयो
नाड़ी ह्यधस्तात् स तु विश्वकर्म्मणा।
तेनैव नाड्यन्तरसञ्चरेण
शुद्धस्य नाड़िं हृदि मूर्द्ध्नि लक्षयेत् ॥
सा ब्रह्मनाड़ीति वदन्ति तज्ज्ञाः
परापरज्ञाननिधानभूताः ॥ १६

बुद्धीन्द्रियाणि रक्षति मनस्तत्र प्रयोजितम्।
पञ्चेन्द्रियाणि संयुक्ता पञ्चकर्म्मभिरिन्द्रियैः।
सर्व्वं ते हृदि सम्बद्धा योगेन हृदि पार्श्वे
सर्व्वनाड़ीसहस्राणां गुणानेव चतुष्टयम्।
ध्रुवं न दृश्यते स्वाङ्गे वसुसप्त चतुष्टयम्।
नाड़ी रश्मिस्तथा चैव सर्व्वेभ्यो नश्वरं
यज्ञाश्च सर्व्ववेदाश्च हृदि सर्व्वं व्यवस्थिताः।
ताभिर्भावयते विश्वं प्रणवेनोर्द्ध्वमृच्छति॥
मूर्द्ध्नि भित्त्वा नभो याति नासिकामूर्द्ध
शुक्र-मूत्रवहा नाड़ी एकीभूता तु मिलि
रेतसा सम्प्रसूयन्ते मूत्रञ्चैव तथैव च।
ब्रह्मनाड़ी मुखे यस्य मनसा हृदि चैव
त्रीणि चाष्टिसहस्राणि वर्षसृष्टिः प्रकी
स्वायूनान्तु सहस्राणि परं संवत्सरं स्मृतम्
लभ एवैति वै विश्वं मनसः सर्व्वतोमुखम्
एकचित्तपरो नित्यं स्मरतो निष्कली भवे
सूक्ष्मात् सूक्ष्मतरो भावो यं विदित्वा न
सोमसूर्य्यांशुभिः पीतं पद्मञ्चैव स विन्दति।
तत्रोपरि नयन्त्येव योगिनां मूर्द्ध्नि शायिनः

तेनैव मार्गेण वियोजितं भवान्
अनेकशस्त्वा दिवि देवसर्व्वान्।
ज्ञानेन विज्ञाय निवृत्तकल्मषा
भित्त्वा स्थितिं ब्रह्मविदः प्रयान्ति॥

सनत्कुमारेणेदन्तु नाड़ीसञ्चारसूचितम्।
योगशास्त्रमिदं पुण्यं मोक्षशास्त्रं सुनिश्चि
ब्रह्माद्यैर्ऋषिभिर्गीतं योगशास्त्रं विनिर्दि
पुण्यात् पुण्यतरं ह्येतत् पवित्रं पापनाशनम्
नाड़ीमुखे तु चिन्तात्मा सर्व्वपापैः प्रमुच्य

नाडीमध्यगतं विश्वं शुध्यति पितृ-मातृजम् ॥ ३०
गोमूत्रं सप्तमे पापं दहते चाष्टमे तथा ।
तेनापि अन्यया नाडी मूर्द्धन्यधस्ताद्विनिःसृता ॥ ३१
स नाडीतोऽथ मन्तव्यो येन विश्वं हृदि व्रजेत् ।
पूर्व्वास्ते हृदि तिष्ठन्ति तन्मनस्तत्परायणाः ॥ ३२
तावत् सञ्चिन्तयेदुग्रं यावता तन्मतो मतः ।
एवं चिन्तनयोगेन यावद्भावयते परम् ॥ ३३
नाडीसूक्ष्मेण मार्गेण ऊर्द्ध्वं यात्युत्तरायणम् ।
ताभ्यामधस्ताद्वयत् कार्य्यं तद्गतं तस्य संस्मृतम् ॥ ३४
उभौ मार्गौ तु विज्ञेयौ दैवं संवत्सरं स्मृतम् ।
स गत्वा तेन मार्गेण जायते न कदाचन ॥ ३५
नित्याश्च उत्तमश्चैव अविमुक्तं परं पदम् ।
विधानञ्चैव नाड्यास्तु शरीरे याः प्रकीर्त्तिताः ॥ ३६
स्नायुश्च ये सहस्राणि सर्व्वास्ता नाभिजाः स्मृताः ।
प्रशवल्यः सहस्राणि शिराणां हृदि संस्थिताः ॥ ३७
ते वै शिवानि मार्गाणि विष्णो यत्र प्रतिष्ठितः ।
सर्व्वनाडीः परित्यज्य ब्रह्मनाडीं समाश्रयेत् ॥ ३८
सा नाडी सर्व्वदुर्गाणि तारयेन्नौरिवार्णवम् ।
एकनाडी निरालम्बा तालुमध्ये शिरोगता ॥ ३९
सा नाडी योगयुक्तानां मोक्षदा सा दिवं गता ।
शुक्र-मज्जा-वसा-मेदः कफं पित्तं शरीरयोः ॥ ४०
शिरांसि तस्य स्रोतांसि एकैकं शुक्ररन्ध्रयोः ।
धूतपापा दिवं यान्ति मूर्द्ध्नि भित्त्वा तमीश्वरम् ॥ ४१
सूर्य्याग्निसुपरिस्थानसुपैति द्युतिमानिव ॥ ४२

दैवैः सदिव्यैर्ऋषयः समग्रा
ब्रह्मा च विष्णुश्च महेश्वरश्च ।
वायुर्यमोऽग्निर्वरुणः शशाङ्कः
सर्व्वान् निरीक्ष्यैव दिवं प्रयान्ति ॥ ४३
गुणैः स्तुवन्तोऽपि मुखाभिमुख्ये-
र्ध्यायन्ति गायन्ति च पूजयन्ति ।
स युक्तयोगः स च पूज्यमानः
परं पदं गच्छति चेश्वरालयम् ॥ ४४

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायां चत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः ।

व्यास उवाच ।

अविमुक्तस्य माहात्म्यं श्रोतुमिच्छामि तत्त्वतः ।
तथा चोङ्कारदेवस्य महाभाग्यं वदस्व मे ॥ १

सनत्कुमार उवाच ।

अविमुक्तस्य माहात्म्यं श्रोतुमिच्छसि तत्त्वतः ।
शृणु व्यास परं गुह्यं रहस्यं योगमुत्तमम् ॥ २
यद्देवापि न विदन्ति काङ्क्षमाणाः परं पदम् ।
दुर्लभापि कथा तस्य अविमुक्तस्य सुव्रत ॥ ३
सत्ये प्रसादसर्व्वस्य बुद्धिस्तत्र न जायते ।
तदहं संप्रवक्ष्यामि यन्मया तु श्रुतं पुरा ॥ ४
पार्व्वत्या सह संवादं देवदेवस्य शूलिनः ।

देव्युवाच ।

कथय देवदेव त्वं रहस्यज्ञानमुत्तमम् ॥ ५
तीर्थोपनिषदं पुण्यं मोक्षदं सर्व्वदेहिनाम् ।
कथयामास देवेशो रहस्यं ज्ञानमुत्तमम् ॥ ६
स्वपुरं चिन्तयामास सोऽविमुक्तगणाधिपः ।
वाराणसीं विना देवो न रतिं प्राप्य कुत्रचित् ॥ ७
उवाच वाक्यं वरदो जगन्नाथ-पिनाकधृक् ।
तस्मिन्नवसरे नित्यं रतिर्मे वर्द्धते पुनः ॥ ८
येन कार्य्येण सुश्रोणि तदिहैकमनाः शृणु ।
सिद्धान्तानाञ्च सर्व्वेषां श्रुतीनाञ्चैव सुन्दरि ॥ ९
चतुर्द्दशानां भुवनानां यश्च सारः प्रकीर्त्तितः ।
आत्मज्ञानं परं गुह्यं यज्ज्ञात्वा मोक्षमश्नुते ॥ १०
सोऽयं देवि स्थितः साक्षाद्रुद्रावासे स्वयं प्रभुः ।
तेनैव च तु सुश्रोणि तस्मिन् स्थाने स्थितं सदा ॥ ११
पञ्चायतनमासाद्य मनस्तपति तं यजेत् ।
त्रिधास्थानं त्रिभोक्तारं त्रिभोज्यञ्च तथा परम् ॥ १२
यतयोऽत्र परं विद्यात् सिद्धान्ते प्रणवं विभुम् ।
येषु पाशुपताः श्रेष्ठा मयपुत्रा दृढव्रताः ॥ १३
तेऽविमुक्तं परं स्थानं रुद्रावासं हि सर्व्वदा ।
द्रक्ष्यन्ति परया भक्त्या सद्भावं परमास्थिताः ॥ १४
ओङ्कारं परमं ब्रह्म परमञ्च विदुर्बुधाः ।
पञ्चब्रह्मसमायुक्तं पञ्चायतनवासिनाम् ॥ १५
ये द्रक्ष्यन्ति शिवं तत्र ते द्रक्ष्यन्ति परं पदम् ।

ब्राह्मणास्तत्र मुञ्चन्ति वेदवेदाङ्गपारगाः ॥ १६
यतयः पुण्यकर्म्माणो ये चान्ये वेदसंस्थिताः ।
नानालिङ्गधरा विप्र वेदशास्त्रपरायणाः ॥ १७
गृहस्थाश्चैव यतयस्तस्मात् तीर्थे उपासकाः ।
एकदण्डास्त्रिदण्डाश्च हंसव्रतधराश्च ये ॥ १८
शैवाः पाशुपता ये च कपालव्रतचारिणः ।
उपासते च मां नित्यं सूक्ष्मञ्च व्रतमाश्रिताः ॥ १९
अविमुक्ते परे क्षेत्रे उभागवतमानसाः ।
कर्म्मभेदेन तेषान्तु सर्व्वेषामाश्रितो ह्यहम् ॥ २०
विभजामि परं स्थानं तन्मोक्षं परमं पदम् ।
श्मशानं तत्र विख्यातमविमुक्तस्य मुक्तिदम् ॥ २१
द्विजैः पाशुपतैर्जुष्टं देव-गन्धर्व्वसेवितम् ।
यत्र नित्यं शिवः साक्षादविमुक्तेश्वरः प्रभुः ॥ २२
नित्यं सन्निहितो देवो जन्तूनाञ्चैव तारकः ।
तस्यां पृथ्व्यां व्यवस्थानात् प्रख्याता सेऽविमुक्तता ॥२३
अव्यक्तलिङ्गं भित्त्वैव तथा संसारभीरुभीः ।
तत्र विश्वेश्वरं दृष्ट्वा संसारे न पतेत् पुनः ॥ २४
विश्वेश्वरञ्च ओङ्कारमेतत् सारं प्रकीर्त्तयेत् ।
सिद्धक्षेत्रं तपःक्षेत्रं यथा वाराणसी मुने ॥ २५
अविमुक्तेश्वरं देवं संस्मरेद्भवमोचनम् ।
वापीजलन्तु तत्रस्थं देवदेवस्य सन्निधौ ॥ २६
स्पर्शनाद्दर्शनात् तस्य कृतार्था मानवा भुवि ।
दुर्लभन्तु कलौ दिव्यैस्तज्जलं ह्यमृतोपमम् ॥ २७
तारणं सर्व्वजन्तूनां नानापापस्य नाशनम् ।
जैगीषव्येण मुनिना यत्र क्रुद्धोऽपयोधितः ॥ २८
यत्र सन्ध्यामुपासित्वा ब्रह्म लचरदेवता ।
सन्ध्योपासिता भवति स कृत्वा दशमासकृत् ॥ २९
देवदेवो नदी गङ्गा दृष्टिमन्त्रः स्तुता पतिः ।
वाराणस्यां महापुण्यं कस्य वासो न रोचते ॥ ३०

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायामेकचत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः ।

सनत्कुमार उवाच ।

पूर्णभद्रसुतः श्रीमानासीद्दयत्रप्रतापवान् ।
हरिकेश इति ख्यातो ब्राह्मणो धर्म्मकश्च ह ॥ १

तस्य जन्मप्रभृत्यैव शर्व्वे भक्तिरनुत्तमा ।
तदाशी तन्नमस्कारस्तद्भक्तस्य परायणः ॥ २
आसीनश्च शयानश्च गच्छन् तिष्ठन्ननुव्रजन् ।
भुञ्जानो वापि धावंश्च रूपमेवानुचिन्तयन् ॥
तस्यैवं युक्तमनसः पूर्णभद्रः पिताब्रवीत् ।
न त्वां पुत्रमहं मन्ये प्रजातो यस्त्वमन्यथा ॥
न हि यक्षकुलीनानामेवं वृत्तिर्भवेत् सुत ।
गुह्यकारत्न यूयं वै स्वभावात् क्रूरचेतसः ॥
क्रव्यादाश्चैव किं तत्र हिंसाशीलाश्च पुत्रक ।
नैव कार्य्या न ते वृत्तिरेवं दृष्टा महात्मनाम् ।
स्वयम्भुवा यथा दृष्टा त्यक्तवान् महिते भवे ।
आश्रमान्तरजं कर्म्म न कुर्य्याद्गृहिणस्ततः ॥
हित्वा मनुष्यभावञ्च कर्म्मभिर्विविधैश्च ह ।
देवत्वं नोऽधिमार्गेषु मानुष्यं जातिमेव च ॥
अनुविद्धि इदं तेषां धर्म्मस्तत्प्राप्तिचेतसा ।
न मया विहितं तस्य कर्म्म तन्नात्र संशयः ॥

सनत्कुमार उवाच ।

इत्येवमुक्त्वा पुत्रन्तु पूर्णभद्रः प्रतापवान् ।
उवाच निष्क्रम क्षिप्रं गच्छ यत्र त्वमिच्छसि ।
ततः स निर्गतस्तस्य गृहाभ्यन्तरतस्तथा ।
वाराणसीं समासाद्य तपस्तेपे महात्मवान् ।
स्थाणुभूतो ह्यविशेषः शुष्ककाष्ठोपलोपमः ।
त्यक्त्वा गोत्रकृतां वृत्तिं तथा जातिकृतात्मकः
इहागत्य च धर्म्मात्मा गोकर्णायतने शुभे ।
आराधयन् ये योगीशं गोकर्णं देवमीश्वरम् ।
तस्मिन् स्थाने स्थितो व्यास एकचित्तः प्रसन्न
संनियम्येन्द्रियग्राममवातिष्ठत निश्चलः ॥
अथ तस्यैवं वसतस्तस्य रक्तः सदा शिवः ।
सहस्रमेकं वर्षाणां दिव्यं संन्यतिवर्त्तत ॥
वाल्मीकेन समाक्रान्तो भक्ष्यमाणः पिपीलैः
राजसूचीमुखैस्तीक्ष्णैर्विध्यमानस्तथैव च ।
निर्म्मांसरुधिरोऽन्नं वै कुन्द-शङ्खेन्दुसप्रभः
अस्ति गोपा भवेत् सर्व्वं देवं वै चिन्तयन्
एतस्मिन्नन्तरे देवी विज्ञापयति शङ्करम्
उद्यानं पुनरेवेदं द्रष्टुमिच्छामि ते वरम्
इति विज्ञापितो देवः पार्व्वत्या परमेश्वर

सर्व्वैः पृष्टो यथान्यायमाख्यातुमुपचक्रमे ॥ १९
निर्ज्जगाम च देवेशः पार्व्वत्या सह शङ्करः।
उद्यानं दर्शयामास देव्या देवः पिनाकधृक् ॥ २०

देवदेव उवाच।

प्रज्वालनानाद्रुमगुल्मशोभितं
लताप्रतानावनतं मनोरमम्।
विरूढ़पुष्पैः परितः सुगन्धितं
सुपुष्पितैः कण्टकिभिश्च केतकैः ॥ २१
तमालगुल्मैर्निचितं सुगन्धिभिः
सकर्णिकारैर्वकुलैश्च सर्व्वतः।
अशोकपुन्नागवनैः सुपुष्पितै-
र्द्विरेफमालाकुलसञ्चयैः क्वचित् ॥ २२
क्वचित् प्रफुल्लाम्बुजरेणुभूषितै-
र्विहङ्गमैश्चारुफलप्रणादिभिः।
निनादितं सौरभमत् सुनादितैः
प्रसन्नजम्बूहरितैश्च पर्णिभिः ॥ २३
क्वचिद्विहङ्गाकुलतोपनादितं
क्वचित् तु कादम्बरवेण शोभितम्।
क्वचिच्च कारण्डवरावनादितं
क्वचिच्च मत्तालिकुलाकुलीकृतम् ॥ २४
महाकलाभिर्भ्रमराङ्गनाभि-
र्निषेवितं चारु सुगन्धि पुष्पितम्।
क्वचित् सपुष्पैः सहकारवृक्षै-
र्नतप्रसूनैस्तिलकैश्च वृक्षैः ॥ २५
प्रगीतविद्याधरचारणञ्च
प्रवृत्तनृत्यानुगताप्सरोगणम्।
प्रहृष्टनानाविधपक्षिसेवितं
प्रमत्तहारीतकुलोपमोदितम् ॥ २६
मृगेन्द्रनानाकुलमानसैः क्वचि-
न्नजैः क्वचिद्वद्धकदम्बकं मृगैः।
प्रफुल्लनानाविधचारुपङ्कजैः
सरस्तड़ागैरुपशोभितं क्वचित् ॥ २७
निविड़निचुलनीलं नीलकण्ठाभिवासं
मदमुदितविहङ्गव्रातनादाभिरामम्।
कुसुमिततरुशाखालीनमत्तद्विरेफं
नवकिसलयशाखाशोभितं प्रान्तशाखम् ॥ २८

क्वचिच्च दन्तक्षतचारुवीरुधं
क्वचिल्लतालिङ्गितचारुवृक्षम्।
क्वचिद्विशालालसगामिनीभि-
र्निषेवितं किम्पुरुषाङ्गनाभिः ॥ २९
पारावतध्वनिनिकूजितचारुशृङ्गै-
रभ्रङ्कषः सितमनोहरचारुरूपैः।
आकीर्णपुष्पनिकरैः प्रविमुक्तहासै-
र्विभ्राजितं त्रिदशदेवकुलैरनेकैः ॥ ३०
फुल्लोत्पलैः सारसहंसयुक्तै-
स्तोयाशयैः समनुशोभितदेवमार्गम्।
मालान्तरागलितपुष्पविचित्रभक्तिं
सम्बद्धगुल्म-विटपैर्विहगैश्च युक्तम् ॥ ३१
नीलैः पुष्पस्तवकतरलप्रान्तशाखैरशोकै-
र्मत्तालिव्रातगीतश्रुतिसुखजनकै-
र्भासितान्तं मनोज्ञैः।
रात्रौ चन्द्रस्य भासा कुसुमिततिलकै-
रेकभासं प्रयातं
छायासुप्तप्रबुद्धस्थितहरिणकुला-
लुप्तदर्भाङ्कुराग्रम् ॥ ३२
हंसानां पक्षवातप्रचलितकमल-
स्वच्छविस्तीर्णतोयं
तोयानां तीरजातप्रविकचकदली-
वाटनृत्यन्मयूरम्।
मायूरैः पक्षचन्द्रैः क्वचिदपि पतितै-
रञ्चितं क्ष्माप्रदेशं
देशे देशे मुदितविलसन्मत्तहारीतनृत्यम् ॥ ३३
सारङ्गैः क्वचिदुपशोभितप्रदेशं
स्वच्छन्दं कुसुमचयैः क्वचिद्विचित्रैः।
कृष्णाभिः क्वचिदपि किन्नराङ्गनाभिः
क्षीराभिः समधुपपीतवृक्षखण्डम् ॥ ३४
संसृष्टैः क्वचिदुपलिप्तकर्णपुष्पै-
रावासैः परिवृतपादपं मुनीनाम्।
आश्रान्तोत्पलनिचितैः क्वचिद्विशालैः
स्वीकर्त्तुं सरलमहीरुहैरुपेतम् ॥ ३५
फुल्लातिमुक्तकलतागृहलाव्यसिद्धं
सिद्धाङ्गनाजनविकस्वरचाटरम्यम्।

फुल्लप्रियङ्गुतरुमञ्जरिसक्तभृङ्गं
भृङ्गावलीसरलिताङ्कदम्बपुष्पम् ॥ ३६
पुष्पोत्करानिलविघूर्णितपादपाग्रं
अग्रेसरैर्भुवि निपातितवंशगुल्मम्।
गुल्मान्तरप्रसृततीरमृगीसमूहं
वल्लीलतातनुसृतामपवर्गदं तम् ॥ ३७
चन्द्रांशुजालधवलैस्तिलकैर्मनोज्ञैः
सिन्दूरकुङ्कुमकुसुम्भनिभैरशोकैः।
चामीकरप्रतिसमैर्नवकर्णिकारैः
फुल्लारविन्दपदचित्रविशालशाखैः ॥ ३८
क्वचिद्रजनवर्णाभैः क्वचिद्वैदूर्य्यसन्निभैः।
क्वचित् सकाशैः शोभाढ्यैः पुष्पैराचितभूतलम् ॥ ३९
पुन्नागेषु द्विजगणविरुतं
रक्ताशोकस्तवकतरलितम्।
रम्योपान्तश्रमहपवनं
फुल्लाब्जेषु भ्रमरविलसितम् ॥ ४०
सकलभुवनकर्त्ता लोकनाथस्तदानीं
तुहिनशिखरसंवास्यद्वनिष्ठैर्गणेशैः।
विविधतरुविशालं मत्तहृष्टान्यरूपे-
रुपवनतरुरम्यं दर्शयामास देव्याः ॥ ४१

देव्युवाच।

उद्यानं दर्शितं देव शोभया परया युतम्।
क्षेत्रस्य तु गुणान् सर्व्वान् पुनर्वक्तुमिहार्हसि ॥ ४२
अस्य क्षेत्रस्य माहात्म्यमविमुक्तस्य तां कथाम्।
श्रुत्वापि न हि मे तृप्तिरथ भूयो वदस्व मे ॥ ४३

देवदेव उवाच।

इदं गुह्यतरं क्षेत्रं सदा वाराणसी मम।
सर्व्वेषामेव जन्तूनां हेतुर्मोक्षस्य सर्व्वदा ॥ ४४
अस्मिन् सिद्धाः सदा देवि मदीयं व्रतमाश्रिताः।
नानालिङ्गधरा नित्यं मम लोकाभिकाङ्क्षिणः ॥ ४५
अभ्यस्यन्ति परं योगं युक्तात्मानो जितेन्द्रियाः।
नानावृक्षसमाकीर्णे नानाविहगराजिते ॥ ४६
कमलोत्पलपुष्पाढ्यैः सरोभिः समलङ्कृते।
अप्सरोगणगन्धर्व्वैः सदा संशोभिते शुभे ॥ ४७
रोचते मे सदा वासो येन कार्य्येण तच्छृणु।
मन्मना मम भक्तश्च मयि सर्व्वार्पितक्रियः ॥ ४८

यथा मोक्षमिहाप्नोति अन्यथा न तथा क्वचित्।
एतन्मम पुरं दिव्यं गुह्याद्गुह्यतरं महत् ॥ ४९
ब्रह्मादयो विजानन्ति ये च सिद्धा मुमुक्षवः।
नातः प्रियतरं क्षेत्रं तस्मान्मे हरते मनः ॥ ५०
विमुक्तं न मया यस्मान्मोक्ष्यते न कदाचन।
महाक्षेत्रमिदं तस्मादविमुक्तमिति स्मृतम् ॥ ५१
नैमिषेषु कुरुक्षेत्रे गङ्गाद्वारे तु पुष्करे।
स्नानात् संसेवनाद्वापि न मोक्षः प्राप्यते यतः।
इह सम्प्राप्यते येन तत एतद्विशिष्यते।
प्रयागे वा भवेन्मोक्ष इह वा मत्परिग्रहात् ॥
प्रयागादपि तीर्थाग्र्यादिदमेव महत् स्मृतम्।
जैगीषव्यः परां सिद्धिं योगतः स महातपाः।
अस्य क्षेत्रस्य माहात्म्यं तद्भक्त्या मम भारत।
जैगीषव्यो महाश्रेष्ठो योगिनां स्थानमिच्छति।
ध्यायते तत्र मां नित्यं योगाग्निर्दीप्यते भृशम्।
कैवल्यं परमं याति देवानामपि दुर्लभम् ॥
अव्यक्तलिङ्गं मुनिभिः सर्व्वसिद्धान्तवेदिभिः।
इह सम्प्राप्यते मोक्षो दुर्लभोऽन्यत्र कुत्रचित्।
तेभ्यश्चाहं प्रयच्छामि योगैश्वर्य्यमनुत्तमम्।
आत्मनश्चैव सायुज्यमीप्सितं स्थानमेव च ॥
कुवेरः स महायक्षस्तथा सर्व्वार्पितप्रियः।
क्षेत्रस्य वन्दनादेव गणेशत्वमवाप ह ॥
संवर्त्तो भाविताथश्च सोऽपि भक्त्या ममैव हि।
इहैवाराध्य मां देवि सिद्धिं यास्यत्यनुत्तमाम्।
पराशरसुतो योगी ऋषिर्व्यासो महातपाः।
धर्म्मवक्ता भविष्यश्च वेदशास्त्रप्रवर्त्तकः ॥
रमते सोऽपि पद्माक्षि क्षेत्रेऽस्मिन् मुनिपुङ्गवः।
ब्रह्मा च ऋषिभिः सार्द्धं विष्णुर्वायुर्दिवाकरः।
देवराजस्तथा शक्रो ये चान्ये च दिवौकसः।
उपासते महात्मानः सर्व्वेषामिह सुव्रते।
अन्ये च योगिनः सिद्धाश्छन्नरूपा महाव्रताः।
अनन्यमनसो भूत्वा मामिहोपासते सदा।
अलङ्कारपुरीमेनां मत्प्रसादादवाप्स्यसि।
तेनैवं पूर्व्वतः कृत्वा चतुर्व्वर्णसमाकुलाम्।
स्फीतां जनपदाकीर्णां भूत्वा च वर्त्तिनी।
मयि सर्व्वार्पितप्राणो मामेव प्रतिपद्य

ततः प्रभृति चार्व्वङ्गि ये ये क्षेत्रनिवासिनः।
अहिणो लिङ्गिनो वापि मद्भक्ता मत्परायणाः ॥ ६७
मत्प्रसादाद्गमिष्यन्ति मोक्षं परमदुर्लभम्।
विषयाचित्तसक्तोऽपि त्यक्तधर्म्मश्च यो नरः ॥ ६८
इह क्षेत्रे मृतः सोऽपि संसारे न पुनर्विशेत्।
ये पुनर्निर्ममा धीराः सत्त्वस्था विजितेन्द्रियाः ॥ ६९
व्रतिनश्च निरावस्थाः सर्व्वथा मयि भाविताः।
देहभङ्गं समासाद्य धीमन्तः सङ्गवर्ज्जिताः ॥ ७०
गता एव परं मोक्षं प्रसादान्मम सुव्रताः।
जन्मान्तरसहस्रेषु युञ्जन् योगी समाप्नुयात् ॥ ७१
तमिहैव परं मोक्षं मरणादपि गच्छति।
एतत् संक्षेपतो देवि क्षेत्रस्य च महाफलम् ॥ ७२
अविमुक्तस्य कथितं मया ते गुह्यमुत्तमम्।
अतः परतरं नास्ति सिद्धगुह्यं महेश्वरि ॥ ७३
एतद्बुध्यन्ति योगं ते ये च योगेश्वरा भुवि।
एतदेव परं ज्ञानमेतदेव परं शिवम् ॥ ७४
एतदेव परं ब्रह्म एतदेव परं पदम् ॥ ७५

वाराणसी तु भुवनत्रयसारभूता
रम्या पुरी मम सदा गिरिराजपुत्रि।
अत्रागता विविधदुष्कृतकारिणोऽपि
पापक्षयाद्विरजसः प्रतिभान्ति मर्त्त्याः ॥ ७६
एतत् स्मृतं प्रियतमं मम देवि नित्यं
पुण्यं पवित्रतरु-गुल्मनिकायजुष्टम्।
यस्मिन् मृतास्तनुभृतः पदमाप्नुवन्ति
मूर्खागमेन रहिता न हि संशयोऽत्र ॥ ७७

सनत्कुमार उवाच।

एतस्मिन्नन्तरे देवो देवीं प्राह गिरीन्द्रजाम्।
दातुं प्रसादं यक्षाय वरभक्ताय भावितम् (क) ॥ ७८
भक्तो मम वरारोहे तपसा हतकिल्बिषः।
अहो असौ वरं लब्धा अस्मत्तो भुवनेश्वरि ॥ ७९

सनत्कुमार उवाच।

एवमुक्त्वा ततो देवः सह देव्या जगत्पतिः।
जगाम यक्षो यत्रास्ते कृशो धमनिसन्ततः ॥ ८०
तं दृष्ट्वा प्रणतं भक्त्या हरिकेशं वृषध्वजः।
दिव्यं चक्षुरदात् तस्मै येनापश्यत शङ्करम् ॥ ८१

(क) भामिनीति वा पाठः।

अथ यक्षस्तदा तत्र शनैरुन्मील्य लोचने।
अपश्यत् सगणं देवं वृषयुक्तमुमापतिम् ॥ ८२

देवदेव उवाच।

वरं ददामि ते पुत्र त्रैलोक्ये दुर्लभं प्रभो।
सामग्र्यञ्च शरीरस्य याहि मां विगतज्वरः ॥ ८३

सनत्कुमार उवाच।

अतः स लब्ध्वा तु वरं शरीरेणाक्षतेन तु।
पादयोः प्रणतस्तस्थौ कृत्वा शिरसि चाञ्जलिम् ॥ ८४
उवाचाथ तथा चैनं वरदोऽस्मीति चोदितः।
भगवन् भक्तिमव्यग्रां त्वय्यनन्यां विधत्स्व मे ॥ ८५
अन्नदत्वञ्च लोकानां गाणपत्यं तथाक्षयम्।
अविमुक्ते वने स्थानं पश्येयं सर्व्वदा यदा ॥ ८६
एतदिच्छामि देवेश वरं दत्तमनुत्तमम्।

देवदेव उवाच।

जरा-मरणनिर्म्मुक्तः सर्व्वशोकविवर्ज्जितः ॥ ८७
भविष्यसि गणाध्यक्षो वरदः सर्व्वपूजितः।
अजेयश्चापि सर्व्वेषां योगैश्वर्य्यसमन्वितः ॥ ८८
अन्नदश्चापि लोकेभ्यः क्षेत्रपालो भविष्यसि।
महाबलो महासत्त्वो ब्रह्मणो मम च प्रियः ॥ ८९
त्र्यक्षश्च दण्डपाणिश्च महायोगी तथैव च।
उद्भ्रमः सम्भ्रमश्चैव गणौ ते परिचारकौ ॥ ९०
तवाज्ञया करिष्येते लोकस्योद्भ्रम-सम्भ्रमौ।

सनत्कुमार उवाच।

एवञ्च भगवांस्तत्र यक्षं कृत्वा गणेश्वरम् ॥ ९१
जगाम वासं देवेशो रुद्रावासं सुरेश्वरः ॥ ९२

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां दण्डपाणिवरप्रदाने
द्विचत्वारिंशोऽध्यायः॥४२॥

त्रिचत्वारिंशोऽध्यायः।

सनत्कुमार उवाच।

आश्चर्य्यं तत्र यद्वृत्तं पञ्चायतनमुत्तमम्।
पुरा कल्पे द्विजश्रेष्ठ तदिहैकमनाः शृणु ॥ १
चरते तत्र मण्डूकी पञ्चायतनमुत्तमम्।
निर्म्माल्यं देवदेवस्य ओङ्कारेश्वरसन्निधौ ॥ २

पञ्चत्वमागता ब्रह्मन् कालेन कतिनाप्यसौ।
जातिस्मरत्वं सम्प्राप्ता राज्ञः सुमनसो गृहे ॥ ३
यौवनन्तु यदा जाता तदा राजा सविस्मयः।
दातुकामस्तदा राजा तया च विनिवारितः ॥ ४
वैराग्यं मनसा गत्वा वाराणस्यामुपागता।
ओङ्कारं दृष्टवान् देवं पञ्चायतनवासिनम् ॥ ५
तत्रैव च तनुं त्यक्त्वा शिवलोकमुपागता।
मण्डूकी चापि तत्रैव सिद्धिश्चैवमुपागता ॥ ६
एतत् ते कथितं ब्रह्मन् यद्वृत्तं तत्र वै पुरा।
अन्यच्चैव तु यद्वृत्तं तस्मिन्नायतने महत् ॥ ७
आसीत् प्रतापमुकुटो राजा परमधार्म्मिकः।
तस्य पुत्रस्तु धर्म्मात्मा आत्मज्ञानसमन्वितः ॥ ८
कालेन गच्छता शश्वद्राजा पुत्रं तमुक्तवान्।
दारसंग्रहणं पुत्र त्वया कार्य्यञ्च शाश्वतम् ॥ ९
येनाहं निर्वृतो वत्स भवामि च यथासुखम्।
एवमुक्तस्तदा तेन स पुत्रः पितरं ब्रवीत् ॥ १०
मया न शक्यते कर्त्तुं तवाज्ञापरिपालनम्।

राजोवाच।

कुरु मद्वचनं पुत्र प्रभुरस्मि पिता तव ॥ ११
मा निमज्जीः कुलं मह्यं नरके सततं क्षणात्।
स हि तं पितुरादेशं श्रुत्वा नृपसुतो बली ॥ १२
प्राह संस्मृत्य पौराणीं संसारस्य विचित्रताम्।
शृणु तात वचो मह्यं तत्त्ववाक्यं सहेतुकम् ॥ १३
मया जन्मसहस्राणि जरामृत्युशतानि च।
प्राप्तानि दारसंयोग-वियोगानि च सर्व्वशः ॥ १४
तृण-गुल्म-लता-वल्ली-सरीसृप-मृग-द्विजाः।
पशु-स्त्री-पुरुषाद्यानि प्राप्तानि गतयो मया ॥ १५
गणाः किन्नर-गन्धर्व्व-विद्याधर-महोरगाः।
यक्ष-गुह्यक रक्षांसि दानवाप्सरसस्तथा ॥ १६
तत्रेश्वरेश्वरत्वञ्च प्राप्तं तात पुनः पुनः।
सृष्टस्तु बहुशः सृष्टौ संहारे चापि संहृतः ॥ १७
दारसंयोगयुक्तस्य जाता चैव विडम्बना।
न राज्यं द्रव्यमुत्सृज्य सिद्धिर्भवति सर्व्वदा।
शरीरं द्रव्यमुत्सृज्य सिद्धिर्भवति सर्व्वदा।
राज्यद्रव्यविमुक्तस्य शरीरे तात गृह्यते।
यो धर्म्मो यत् सुखं तात द्विषतां यत्र तु तत्र वा ॥ १८

द्व्यक्षरस्तु भवेन्मृत्युरक्षरं ब्रह्म शाश्वतम्।
ब्रह्म-मृत्यू उभौ राजन् तस्मान्मन्ये व्यव...
अतर्क्यमाणौ भूतानि योजयेतामसंशयम्।
अविनाशोऽस्य सर्व्वस्य निधनं यदि वा...
भित्त्वा शरीरं भूतानामहिंसां प्रतिपद्यते।
लब्ध्वा वा पृथिवीं सर्व्वां सहस्थावरजङ्गमा...
ममत्वं यस्य नैव स्यात् किं तया स करिष्य...
अथवा सततं राजन् वने वन्येन जीवतः॥
द्रव्ये तु ममता यस्य मृत्योर्वश्ये स वर्त्तते।
वीतान्तराणां शत्रूणां स्वभावा यस्य मे...
यस्तु पश्यति तद्भूतं मुच्यते महतो भयात्।
कामात्मानं प्रशंसन्ति लोके कामात्मनो...
तीर्थानि वेदाध्ययनं काचिदस्ति प्रवर्त्तना।
केचित् तपश्च कामेन कर्म्मणा वाऽमृतोत्सु...
ततोऽहं कामये नित्यं पञ्चायतनमीश्वरम्।
अविमुक्ते स्थितं देवमोङ्कारं परमं पदम्॥
तत्र मां प्रस्थितं विद्धि पञ्चायतनमीश्वरम्।
इतस्ततीये यद्वृत्तं तस्मिन्नायतने मम॥ २४
कथयामि समासेन तीर्थमाहात्म्यमुत्तमम्।

अतीत्य जन्मानि बहूनि तात
भूदेव-गन्धर्व्व-महोरगाणाम्।
विद्याधराणां खग-किन्नराणां
जातोऽस्म्यहं वैश्यकुले विशुद्धे॥ २८
ततो ममाभूदचला च भक्तिः
शर्व्वे शिवे शङ्करे त्रिपुरघ्ने।
व्रतोपवासैर्विविधैः स्तवैश्च
सन्तोषितः शूलभृताक्षधारी॥ ३०
एवं हि सुमहत् कालं भ्रमतस्तीर्थकारण...
ततः कदाचिद्दृष्टं तदविमुक्तं गतोऽस्म्यह...
ओङ्कारं दृष्टवांस्तत्र पञ्चायतनवासिनम्।
रुद्रावासकृतस्थानं देवदेवस्य चाग्रतः॥ ३...
रात्रिजागरणं तत्र वैशाखे च कृतं मया।
तत् सर्व्वञ्च मया दृष्टं देव-गन्धर्व्व-किन्नर...
तेनैव कर्म्मणा जातो भवतोऽहं गृहे शुभे।
तत्र यास्याम्यहं शीघ्रं रचितोऽयं मया...
ओङ्कारेश्वरदेवस्य प्रसादेन मया पितः।

प्रादुर्भूतं महाज्ञानं दुर्लभं यत् सुरैरपि ॥ ३५
संसारे च प्रपश्यामि आत्मानं प्रकृतेः परम् ।
तत्र चैव गमिष्यामि अविमुक्ते तु ईश्वरम् ॥ ३६
ओङ्कारं निष्कलं ब्रह्म पञ्चायतनवासिनम् ।
द्रक्ष्यामि शङ्करं देवं यं दृष्ट्वा नोद्भवः पुनः ॥ ३७
एवमुक्तस्तु पुत्त्रेण पिता वचनमब्रवीत् ।

राजोवाच ।

अहं तत्र गमिष्यामि यत्र त्वं प्रस्थितोऽनघ ॥ ३८
जातिस्मरत्वं सम्प्राप्य उद्विग्नमानसो ह्यहम् ।
संसारे च सदा पुंसां वैराग्यं जायते पुनः ॥ ३९
तदा गोत्रकृतां वृत्तिं यथा जातिकृतामपि ।
प्रियाप्रियाणि सर्व्वाणि निर्म्ममो निरहङ्कृतिः ॥ ४०
त्यक्तकर्म्माणि सर्व्वाणि आत्मशुद्धानि धारयेत् ।
सन्न्यस्य सर्व्वकर्म्माणि अविमुक्तं ततो व्रजेत् ॥ ४१
अविमुक्तप्रविष्टस्य विहारो नैव विद्यते ।
कृत्वापि क्षेत्रसन्न्यासमविमुक्तमुपासकाः ॥ ४२
शान्ता दान्ता जितक्रोधास्तितिक्षापरमायुधाः ।
आत्मन्यात्मानमाधाय ओङ्कारेश्वरसर्व्वगम् ॥ ४३
सर्व्वभूतेषु चात्मानं पश्यन्ति विजितेन्द्रियाः ।
अव्यक्तलिङ्गिनश्चैव तस्मिन् क्षेत्र उपासकाः ॥ ४४
सद्भावभाविताः सर्व्वे जपन्ति शतरुद्रियम् ।
विशन्ति परमं देवमोङ्कारं परमं पदम् ॥ ४५

सर्व्वे वेदा यत्पदमामनन्ति
तपांसि सर्व्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति
तत्पदमविमुक्ते निश्चितम् ॥ ४६

एवमुक्तस्तदा राजा ओङ्कारं मनसा स्मरन् ।
राज्येऽभिषेचयामास पुत्त्रञ्चैव कनीयसम् ॥ ४७
संस्मरन् पूर्व्वचरितं ततो निर्व्वेदमागतः ।
प्रणम्य मनसा देवं पञ्चायतनवासिनम् ॥ ४८
ओङ्कारं परमं ब्रह्म वाराणस्यामुपागतम् ।
पूर्व्वजन्मकपोतोऽसौ तस्मिन्नायतने सदा ॥ ४९
प्रदक्षिणां प्रकुरुते ओङ्कारं देवमीश्वरम् ।
स्तुवंश्च परमं देवमोङ्कारञ्च स्तवेन तम् ॥ ५०
पञ्चत्वमागतस्तत्र राजयोनिसमागतः ।
आराधयन्तौ देवेशं पञ्चायतनमीश्वरम् ॥ ५१
स्तुवन्तौ परमं देवमोङ्कारं परमेश्वरम् ।

व्यास उवाच ।

कीदृशञ्च व्रतं ताभ्यां कृतं देवस्य शूलिनः ॥ ५२
यस्य चोच्चारमात्रेण आत्मा सम्प्रकटीभवेत् ।

सनत्कुमार उवाच ।

शृणु व्यास परं गुह्यं रहस्ययोगमुत्तमम् ॥ ५३
मृत्युञ्जयं परंयोगमविमुक्ते स्थितं परम् ।
ओङ्कारजं शिवपदमनादिमजमव्ययम् ॥ ५४
स्वयम्भुवमनिर्द्देश्यं कारणं परमं विभुम् ।
भवाभावस्वभावस्थमचिन्त्यमचलं पदम् ॥ ५५
निर्भयं निर्म्मलं नित्यं निरपेक्षमनाश्रयम् ।
निस्तुति निर्नमस्कारं निःसङ्गं निरुपद्रवम् ॥ ५६
निरञ्जनं निरुत्पादं निरालम्बञ्च निर्म्मलम् ।
अपवर्गमविज्ञेयमनौपम्यमनामयम् ॥ ५७
अनित्यं कारणं देवमलग्नं सर्व्वतोमुखम् ।
नमस्कृत्य महादेवं विशुद्धं ज्ञाननिर्म्मलम् ॥ ५८
शिवं सर्व्वात्मकं सूक्ष्ममनादिं पञ्चदेवतम् ।
आत्माधिकोपविषयं स्तुतमाचारवर्ज्जितम् ॥ ५९
शब्दावकाशरहितं ब्रह्म निर्व्वाणकेवलम् ।
शङ्काविशेषनिर्म्मुक्तं विद्यापतितमोचनम् ॥ ६०
चितं तेजो ह्यनन्ताख्यं स्थितं स्थावरवर्ज्जितम् ।
निष्क्रम्य चात्मनात्मानं प्रकटं ज्ञानदीपकम् ॥ ६१
मुक्तोपदेशविज्ञातं प्रत्यस्तमितविग्रहम् ।
आत्मोपलब्धिविज्ञेयं चित्तं चित्यवलोकनम् ॥ ६२
समागमविनिर्म्मुक्तं वहिरन्तश्च केवलम् ।
नित्यावकाशरहितं शब्दाशब्दाद्यगोचरम् ॥ ६३
सकृद्विस्तीर्णविपुलं देवदेवं सुरात्मकम् ।
हेतुप्रमाणरहितं कल्पनाजालवर्ज्जितम् ॥ ६४
चिन्ताविलोकविषयं व्योमवत् प्रबलं स्थितम् ।
अनिस्पन्दं महात्मानं निरानन्दावलोकनम् ॥ ६५
लोकालोकनमार्गस्थमनेकाकारवर्ज्जितम् ।
स्वभावं भावनाग्राह्यं भावातीतं सुलक्षणम् ॥ ६६
वाक्यापवादरहितं निष्प्रपञ्चात्मकं शिवम् ।
ज्ञानज्ञेयावलोकस्य हेतुं परमकारणम् ॥ ६७
अनाहतं सर्व्वगतं शब्दादिगुणसम्भवम् ।
शब्दब्रह्मगतं शान्तं शब्दशब्दात्मसास्पदम् ॥ ६८

शब्दातिरिक्तविषयं सर्व्वज्ञानपदे स्थितम् ।
अनादिमच्युतं दिव्यं प्रमाणातीतगोचरम् ॥ ६९
अधश्चोर्द्ध्वं गतं नित्यं जीवाख्यं हेतुसंस्थितम् ।
हृदादिद्वादशान्तस्थं प्राणापानोदयाष्टकम् ॥ ७०
अग्राह्यमिन्द्रियात्मानं निष्कलङ्कात्मकं विभुम् ।
स्वरादिव्यञ्जनातीतं वर्णादिपरिवर्ज्जितम् ॥ ७१
वाचामवाच्यविषयं ओङ्काराद्र्ध्वरूपिणम् ।
अप्रतर्क्यमतर्क्याख्यं कलनाकालवर्ज्जितम् ॥ ७२
निःशब्दं निश्चलं सौम्यं देहातीतं परात्परम् ।
भूतावगाहरहितं निःशब्दमेकधा स्थितम् ॥ ७३
अचिन्त्यं परमं सूक्ष्मं पञ्चतन्त्रादिसंवृतम् ।
अप्रमेयमनन्ताद्यमक्षयं कामरूपिणम् ॥ ७४
प्रभवं सर्व्वभूतानां वीजाङ्कुरसमुद्भवम् ।
व्यापकं सर्व्वकामाख्यमक्षरं परमं महत् ॥ ७५
स्थूलसूक्ष्मविभागस्थं व्यक्ताव्यक्तं सनातनम् ।
आदिमध्यान्तरहितमनादिनिधनं महत् ॥ ७६
महाभूतं महाकायं शिवं निर्व्वाणभैरवम् ।
योगक्रियाविनिर्म्मुक्तं मृत्युञ्जयमहेश्वरम् ॥ ७७
सर्व्वोपसर्गरहितं सर्व्वतः सूर्य्यसन्निभम् ।
अव्यक्तं परतो नित्यं केवलं द्वैतवर्ज्जितम् ॥ ७८
अनन्यतेजःसंक्रान्तमविमुक्तनिवासिनम् ।
भुवि सूर्य्यसमप्रख्यं पञ्चायतनमीश्वरम् ॥ ७९
शरण्यं देवमीशानमोङ्कारं शिवरूपिणम् ।
देवदेवं महादेवं पञ्चवक्त्रं वृषध्वजम् ॥ ८०
सदाशिवं विरूपाक्षं शूलहस्तं जटाधरम् ।
हृत्पद्मकोषमध्यस्थं नमस्यामि शिवात्मकम् ॥ ८१
वाराणस्यां स्थितं देवमोङ्कारं परमं पदम् ।
भावकं सर्व्वजन्तूनां नमस्यामि नमो नमः ॥ ८२

सनत्कुमार उवाच ।

एवन्तु स्तुवतस्तस्य दिव्यं तेजो बभूव ह ।
वह्निभास्करसङ्काशं सूर्य्यकोटिसमप्रभम् ॥ ८३
स्तोत्रान्ते तत्र सञ्जाते स राजा स स्तुतस्तदा ।
एकदोङ्कारनिर्द्दिष्टं स्तोत्रं शम्भोः पठिष्यति ॥ ८४
अविमुक्ते महाक्षेत्रे सर्व्वात्मनाभिसंस्कृतः ।
तस्य सिद्धिः सदा व्यास दिव्या करतले स्थिता ॥ ८५
ब्राह्मणः क्षत्रियो वैश्यः शूद्रोऽपि यदि वा पठेत् ।
मुच्यते सर्व्वपापेभ्यः श्रद्धावान् यः स्तवे भवेत् ॥
वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वा न भवेन्मृत्यु-
र्नान्यः पन्था विद्यते हि जनानाम् ॥ ८७
यदि वक्त्रसहस्राणि लक्षकोटिर्भवन्ति हि ।
तदा चोङ्कारदेवस्य शक्यं माहात्म्यमीरितुम् ॥
इतीरितं ते तु मया समस्तं
माहात्म्यमोङ्कारकृतैकदेशम् ।
शक्यं न वक्त्रैर्बहुभिः सहस्रै-
रपीह केनापि सुखेन वक्तुम् ॥ ८८

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायामोङ्कारेश्वरवर्णनं नाम त्रिचत्वारिंशोऽध्यायः ॥४३॥

चतुश्चत्वारिंशोऽध्यायः ।

व्यास उवाच ।

अहो कथेयं सुभगा महापुण्यफलोदया ।
न तृप्तिमधिगच्छामि ओङ्कारस्य कथां पराम् ॥
शृण्वन् ततः पुनर्ब्रह्मन् यद्यनुग्रहवानसि ।
तस्य माहात्म्यमाचक्ष्व विस्तरेण तपोधन ॥

सनत्कुमार उवाच ।

शृणु व्यास कथां दिव्यां पौराणीं वेदसम्मिताम् ।
शम्भोर्गिरिसुता देवी भार्य्या कालीति विश्रुता ।
अत्यर्थदयिता साध्वी शीलवृत्तगुणान्विता ।
तया सहारमद्देशे अविमुक्ते पुरोत्तमे ॥ ४
पञ्चायतनसंस्थस्य कालो याति द्विजोत्तम ।
सदा नित्यक्रियार्थञ्च सोपास्ते शङ्करो वशी ।
सन्ध्यां पूर्व्वां पश्चिमाञ्च ओङ्कारे संस्थितो हि ।
गन्धर्व्वाप्सरसश्चैव विद्याधरगणास्तथा ॥ ६
नृत्यमानाः स्थिताः सर्व्वे गीत-वादित्रसंयुताः ।
शतवर्षसहस्रेण खेदभूता गणास्तथा ॥ ७
प्रेतभूतास्तथा देवा हृष्टा ननृतुरुत्तमम् ।
तत्र तद्दासश्च मुञ्चन्ति स्खलन्तश्च पदे पदे ।
तं तादृशमथो दृष्ट्वा गौरी वचनमब्रवीत् ।

किं विरूपाच नृत्योऽयं मम विस्मयकारकः ॥ ९
अनेकैर्बहुभिः स्थानैर्दृष्टं नृत्यं मया पुरा।
मन्दराद्यैर्गिरिवरैस्तथा पर्य्यैस्तभूधरैः ॥ १०
कैलासे नैव संदृष्टं कदाचित् तु मया पुरा।
कारणं कथय त्वद्य यद्यनुग्रहभागहम् ॥ ११
एवमुक्तस्तदा देवो देव्या च परमेश्वरः।
उवाच प्रहसन् देवो देव्याः स मुखपङ्कजम् ॥ १२
उद्यम्य पाणिना देवः स्वङ्कुलेन महात्मना।
सान्त्वयन् प्राह वचनमिदं सान्त्वेन तन्महत् ॥ १३
विशिष्टं कारणं मेऽत्र स्थाने गिरिसुते शृणु।
योऽसौ परावरो देवः सात्विकः परिकीर्त्तितः ॥ १४
नादाख्यः सुव्रते भद्रे योऽस्मिन् स्थाने स्थितः स्वयम्।
एतद्वादयं ब्रह्म पञ्चास्यं संस्थितं प्रभुम् ॥ १५
पञ्चपञ्चस्थितं देवं पञ्चायतनवासिनम्।
तेन नृत्याम्यहं देवि परमानन्दमास्थितः ॥ १६
ब्रह्माण्डोदरवर्त्तीनि तीर्थानि गिरीशोद्भवे।
तेषामत्यधिकं स्थानं पञ्चायतनमुत्तमम् ॥ १७
मम चाप्यधिका प्रीतिर्येन कार्य्येण तच्छृणु।
योऽसौ पद्मवने लोके आनन्दो ब्रह्मणः परः ॥ १८
सोऽयं स्थाने परे देवि मन्तव्यो नात्र संशयः।
अस्मिन् स्थाने स्थितस्यापि पुरुषस्य जितात्मनः॥१९
दिव्यं चक्षुः प्रवर्त्तेत येन पश्यत्यसौ परम्।
प्रत्यक्षं ज्ञातवान् भद्रे पुरुषस्य चतुर्भुजः ॥ २०
त्रिनेत्रं शूलहस्तञ्च ललाटाक्षं वृषध्वजम्।
द्रक्ष्यन्ति मानवाः पूर्व्वं पञ्चायतनसंस्थिताः ॥ २१
शिवलोकस्य सञ्चारं पञ्चायतनसंस्थितम्।
रहस्यं सर्व्वजन्तूनां पञ्चायतनमुत्तमम् ॥ २२
सर्व्वभूतकलौ देवि अविमुक्तो रतिं प्रति।
नराणामन्यबुद्धीनां विषयाक्रान्तचेतसाम् ॥ २३
अन्तर्भूतन्तु संस्थानं वेदशास्त्रबहिष्कृताः।
शान्ता दान्ता जितक्रोधाः पञ्चायतनपूजया ॥ २४
सद्भावभाविताः सर्व्वे द्रक्ष्यन्ति परमेश्वरम्।
यैस्तु जन्मान्तरे देवि पुरा आराधितो ह्यहम् ॥ २५
ते विदन्ति परं स्थानमविमुक्तं परं पदम्।
ब्रह्माण्डोदरमध्ये च यानि तीर्थानि सुव्रते ॥ २६
वाराणस्यां गमिष्यन्ति वैशाखस्य चतुर्द्दशीम्।
द्रक्ष्यन्ति परमं देवं पञ्चायतनवासिनम् ॥ २७
देवाश्च ऋषयश्चैव रुद्राः पाशुपताश्च ये।
परिवार्य्य स्थिताः सर्व्वे ओङ्कारेशन्तु सुव्रते ॥ २८
मत्स्योदर्य्यास्तु परित आदिदेवस्तु केशवः।
यस्मिन् क्षेत्रे स्वयम्भूश्च स्थितः पूर्व्वेण केशवः ॥ २९
रुद्राणाञ्चैव कोटिस्तु काशीपुर्य्येव संस्थिता।
ध्यायमाना च ओङ्कारं स्थिता तस्यैव दक्षिणे ॥ ३०
वामदेवश्च सावर्णिरघोरः कपिलः परे।
देहल्याख्यस्तु देवस्य स्थितो देवस्य चोत्तरे ॥ ३१
ध्यायमानास्तु ओङ्कारं पञ्चायतनवासिनम्।
सप्तकोट्यस्तु मन्त्राणां सर्व्वेषां तपसाधिकः ॥
कृत्तिवासाः स्थितो भद्रे तस्य देवस्य पश्चिमे।
एवं रक्षन्ति तत्स्थानं मदीयं शाश्वतं शुभम् ॥ ३३
मनो बुद्धिस्त्वहङ्कारः काम-लोभौ तथापरे।
एभ्यो रक्षन्ति सततं पञ्चायतनवासिनम् ॥ ३४
ओङ्कारदर्शनादेव गतिं प्राप्नोति दुर्लभाम् ॥ ३५

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायामोङ्कारनिर्णयो नाम चतु-
श्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः।

सनत्कुमार उवाच।

अस्मिन् स्थाने पुरा वृत्तं तदिहैकमनाः शृणु।
रथन्तरे पुरा कल्पे राजासीत् पुष्पवाहनः ॥ १
नाम्ना लोकेषु विख्यातस्तेजसा सूर्य्यसन्निभः।
तपसा तस्य तुष्टेन देवदेवेन शम्भुना ॥ २
कमलं काञ्चनं दत्तं यथा कामगमं मुने।
स तेन विचरन् लोकान् सप्तद्वीपनिवासिनाम् ॥ ३
द्वीपानि सुरलोकञ्च यथेष्टं विचरन् सदा।
कल्पादौ सप्तद्वीपेषु तस्य पुष्करवासिनः ॥ ४
तस्य नाम्ना तु तद्द्वीपं पुष्करद्वीपमुच्यते।
तदेव ब्रह्मणा दत्तं यानमस्य मनोजवम्।
पुष्पवाहनमित्याहुस्तस्मात् तं देव-दानवाः ॥ ५
नागम्यमस्यास्ति जगत्त्रयेऽपि
ब्रह्माम्बुजस्यापि जगत्त्रयेऽपि।

पत्नी च तस्याप्रतिमानरूपा
नारीसहस्रैरभितोऽभिमान्या ॥ ६
नाम्ना च लावण्यवती बभूव
सा पार्व्वती चेष्टतमा भवस्य ।
तस्यात्मजानामयुतं बभूव
धर्म्मात्मनामग्रधनुर्द्धराणाम् ॥ ७
तदात्मनः सर्व्वमवेक्ष्य राजा
मुहुर्म्मुहुर्विस्मयमाससाद ।
सोऽप्यागतं वीक्ष्य मुनिप्रवीरं
प्रचेतसं वाक्यमिदं बभाषे ॥ ८
कस्माद्विभूतिरमला च ममाद्य पूजा
जाता च सर्व्वविदिता मम सुन्दरीयम् ।
भार्य्या ममाल्पतपसैव सुतोषितेन
दत्तं ममाम्बुजगृहञ्च सुधीरधात्रा ॥ ९
यस्मिन् प्रविष्टमपि कोटिशतं नृपाणां
सामात्य-कुञ्जर-रथौघ-धनावृतानाम् ।
नालक्ष्यते क्व गतमम्बररत्नपूर्णं
वीथीगणैश्च विचित्रमनुत्तमञ्च ॥ १०
तस्मात् त्वमन्यजनुषीव वरोद्भवेन
धर्म्मादिकं कृतमशेषजनाभिगम्यम् ।
यद्यस्ति तत् कथय मे प्रविनाम्यकीर्त्ति
महीय्यमेतदखिलञ्च वद प्रचेतः ॥ ११
मुनिरप्यवोचत भवान्तरितां
पृथिवीपते ननु निशम्य कथाम् ।
तव जन्म लुब्धककुले परुषा
मतिरप्यनेकजनघातकरी ॥ १२
वपुरप्यवृत्तिपरुषं कुनखा-
भरणं कुसन्धि न वने सुकृतम् ।
न च सूनुरभून्न च बन्धुजनो
न पिता स्वसा न जननी च तथा ॥ १३
अभूदनावृष्टिरतीव रौद्रा
कदाचिदाहारमविन्दता ते ।
क्षुत्पीड़ितेन भ्रमता न किञ्चि-
दासादितं वन्यफलादि सद्यः ॥ १४
अथाप्यपश्यन्महदम्बुजाढ्यं
सरोवरं पङ्कपरीतरोधः ।

पद्मान्यथादाय ततो बहूनि
गतः पुरं सोऽविमुक्तनामधेयम् ॥ १५
तन्मूल्यलाभाय पुरं समस्तं
भ्रान्तं तदा शेषमभूत् तदानीम् ॥ १६
उपविष्टस्त्वमेकस्मिन् सभार्य्यो भवताङ्ग
रुद्रावासे तु संस्थाय त्वया रात्रौ महाशु
सभार्य्यस्तु स भगवान् तत्रासौ मङ्गलध्वनि
तत्र दृष्टस्त्वया देवो दिव्याश्चर्य्यविभूतिमा
ओङ्कारपरमं ब्रह्म देव-गन्धर्व्व-किन्नरैः ।
ब्राह्मणैर्वेदतत्त्वज्ञैः सिद्धैः पाशुपतैः परैः ।
हृत्पद्मकोषसंहारैर्मूर्द्धन्यञ्जलिभिस्तथा ।
तद्भावगतसङ्कल्पैरोङ्कारगतमानसैः ॥ २
अन्यैश्च विविधैः सिद्धैस्तस्मिन् देश उपवि
ध्यायमानः परं ब्रह्म ओङ्काराख्यन्तु ईश
त्वयाद्यावगतं सर्व्वं पञ्चायतनदर्शनात् ।
भक्तिश्चैव तदा जाता सापत्यस्य नरेश्वर ।
किमेभिः कमलैः कार्य्यं वरं शम्भुरलङ्कृ
निवेदितास्तथा पुष्पाः पञ्चायतनवासिने
दीयमानञ्च देवाय सुवर्णस्य शतं परम् ।
न गृहीतं ततः चित्रे महासत्त्वमहात्मना
तत्र जागरणञ्चैव प्रसङ्गेन त्वया कृतम् ।
प्रभाते च त्वया तस्मिन् दृष्टः शम्भुर्यदृच्छ
आश्चर्य्यं परमं मत्वा तस्मिन्नायतने स्थित
सम्मार्ज्जयन् सपत्नीक उपलेपनतत्परः ।
कालेन गच्छता तत्र रुद्रावासपदे शुते ।
पञ्चत्वं प्राप्तवांस्तत्र देवदेवस्य सन्निधौ
अवनौ प्रविश्य सुश्रोणि तदा गृह्य कलेवर
कस्मिणा तेन राजेन्द्र इयं व्युष्टिस्तवागत
स भवान् लुब्धको जातः सपत्नीको नरे
पुष्पानुकल्पनात् तस्माच्छङ्करस्य च पूज
इयं व्युष्टिस्तथा जाता पञ्चायतनपूजना
ओङ्कारेश्वरमाहात्म्यादल्पेन तपसा त्व
यथाकाशगते सत्यवर्य्ययाने चतुर्मुखः ।
सन्तुष्टस्तव राजेन्द्र ब्रह्मरूपी च ईश्वर
तस्माद्रक्षस्व राजेन्द्र पुष्करं त्वं महीत
अविमुक्तां समासाद्य ओङ्कारं शरणं

प्रसादात् तस्य देवस्य द्रष्टासि पदमीश्वरम्।
इत्युक्तः स तु राजा वै तेनैव तु महर्षिणा ॥ ३३
रोमाञ्चसर्व्वगात्रस्तु हर्षाविष्टस्तमब्रवीत्।
जन्मान्तरं त्वयाख्यातं ब्रह्मणां कुलवर्द्धन ॥ ३४
संसारे त्वत्समैः सङ्गः पुण्यभारात् तु जायते।
एवं प्रसाद्य तं विप्रं राजा तु कृतनिश्चयः ॥ ३५
सपत्नीको जगामाशु वाराणस्यां महामुने।
शश्वोः प्रियतमे देवि पञ्चायतनमुक्तिदे ॥ ३६
मत्स्योदर्य्यास्तटे ब्रह्मन् रुद्रावासस्य चोत्तरे।
दक्षिणां मूर्त्तिमास्थाय ओङ्कारस्तत्र संस्थितः ॥ ३७
तत्र देवह्रदो नाम देवस्याग्रे स्थितः पुरा।
दुर्लभञ्च परं स्थानं मानुषैरकृतात्मभिः ॥ ३८
रुद्रावासेति विख्यातं पुण्यदं सर्व्वदेहिनाम्।
दिव्यैरपि तदन्यैश्च काम्यञ्च क्षेत्रपूजकैः ॥ ३९
रुद्रावासे कृतस्नानः पञ्चायतनवासिनम्।
द्रक्ष्यामि ईश्वरं देवं यं दृष्ट्वा नोद्भवः पुनः ॥ ४०
मनोरथं प्रकुर्व्वन्ति तस्य देवस्य दर्शने।
दुराधार्य्यं दुःसहञ्च समन्ताद्दुरतिक्रमम् ॥ ४१
कलिकल्मषभूतैस्तु येषां नोपगता मतिः।
तेषां दृश्यञ्च गम्यञ्च तत् स्थानं शशिमौलिनः ॥ ४२
तीर्थञ्च स्थापितं व्यास देवदेवेन शूलिना।
न कैश्चिद्दृश्यते तत्र दृष्टे कलियुगे भये ॥ ४३
गन्धर्व्वैः किन्नरैर्यक्षैरप्सरोभिस्तथोरगैः।
सिद्धैः सम्पूज्यते तत्र दैत्य-दानवनायकैः ॥ ४४
अन्तर्ध्यानगतैर्नित्यं पूज्यते परमेश्वरः।
तत्र गत्वा तु राजर्षिः परमं भावमास्थितः ॥ ४५
आराधयानो देवेशं पञ्चायतनमीश्वरम्।
शान्ताकारं विनिर्नेत्य ज्ञानदीपेन ईश्वरम् ॥ ४६
दृष्टोवास तु राजर्षिरोङ्कारं परमं पदम्।
तेन व्याप्तमिदं विश्वं गिरेव परमात्मना ॥ ४७
जपन्ति योगिनो देवि तस्मिन्नेव लयं गताः।
एतत् ते कथितं देवि यन्मां त्वं परिपृच्छसि ॥ ४८
वाराणस्यान्तु ओङ्कारं पञ्चायतनसंस्थितम्।
यद्दर्शनान्नरा लोके विज्ञानैश्वर्य्यभाजनाः ॥ ४९
दुर्लभं तपसा देवि यत्रास्ते दुर्लभं पदम्।
दानानां दुर्लभं दानं व्रतानां दुर्लभं परम् ॥ ५०
सर्व्वत्र दुर्लभं स्थानमित्याह भगवान् शिवः।
भक्त्या परमया युक्ता महादेवं विशन्ति च ॥ ५१
पूजयिष्यन्ति ये तत्र सर्व्वभावेन शङ्करम्।
विज्ञेयास्ते गणा भद्रे मानुषीं प्रकृतिं स्थिताः ॥ ५२
सिद्धयोगस्य सोपानमेष लक्ष्याश्च सुन्दरि।
वाराणस्यान्तु ये केचित् तीर्थान्यायतनानि च ॥ ५३
तेषाञ्चैव तु सर्व्वेषामोङ्कारं प्रथमं स्मृतम्।
ओङ्कारदर्शनाद्देवि सर्व्वं दृष्टा न संशयः ॥ ५४

सनत्कुमार उवाच।

ततः स भगवान् देवो देवदेवस्य मातरम्।
उवाच देवि पश्येदमुद्यानं निर्म्मितं पुरा ॥ ५५
यन्नास्ति देवलोकेऽपि वस्तुसत् तत् कृतं मया।
तद्भूतमस्ति लोके न यस्य नो विस्मयेन्मनः ॥ ५६

देव्युवाच।

एवं भवतु देवेश यथात्थ त्वं सनातन।
न हि मेऽन्यत्र गन्तव्यं तद्युतस्य मनोहर ॥ ५७

सनत्कुमार उवाच।

सह देव्या ततो व्यास वाराणस्यां वृषध्वजः।
देवोद्यानं हि दिदृक्षुर्भगवांस्तत् समन्ततः ॥ ५८
पूर्व्वस्मिंस्त्वशिरे भागे देवो देव्याः परात्परः।
उद्यानं दर्शयामास नानाकिन्नरनादितम् ॥ ५९
नानावृक्षसमाकीर्णं नानाकुसुमशोभितम्।
नानावृक्षसमाकीर्णं नानापक्षिविनादितम् ॥ ६०
चम्पकाशोक-पुन्नाग-प्रियङ्गुशतसङ्कुलम्।
बिल्वार्ज्जुनकदम्बैश्च न्यग्रोधोदुम्बरैरपि ॥ ६१
गन्धवद्भिश्च कुसुमैर्जाति-केशर-केतकैः।
रम्यैः सुरभिपुष्पैश्च सदा सेवितषट्पदैः ॥ ६२
संयुक्तं सर्व्वतः शोभदनं तद्राजसन्निभम्।
स तदुद्यानमासाद्य देवीं प्राह जगत्पतिः ॥ ६३
पश्य देवि विमानस्थान् किन्नरांश्च मनोरमे।
पारिजातकखण्डानि तथा कल्पद्रुमाणि च ॥ ६४
मम लोके च ये वृक्षा विष्णुलोके च ये शुभ।
ब्रह्मणस्त्वपि ये लोके तान् सर्व्वान् पश्य सुव्रते ॥ ६५
इयं वाराणसी देवी शिवलोकं समाश्रिता।
अत्र हि भारतोद्याने देवदेवो जनार्द्दनः ॥ ६६
तिष्ठते सर्व्वलोकेशो ब्रह्मा कमलसम्भवः।

परिवार्य्य स्थिताः सर्व्वा ओङ्कारज्ञादिमुक्तिदम्॥६७
अस्मिन् देशे सुरा देवि तिष्ठन्ति मम शोभने।
जहुँ गोलोकसंस्थानं गवां वासः स्वयम्भुवैः॥ ६८
गवां यत्र सवर्णानां पयो मूर्द्ध्नि समापतत्।
ततो मयोर्द्धतो दृष्टा गावस्ता सोमपानुगाः॥ ६९
ततस्ता वीक्षितास्तत्र भीता गावस्तदाभवन्।
तेजसा मम निर्द्दग्धा नैकवर्णा मृषार्द्दिताः॥ ७०
गावः पूर्व्वमिमा देवि आसन् कपिलवंशजाः।
नैकवर्णास्तथा भूता यदैताः प्रेक्षिता मया॥ ७१
तं वै शरण्यतां गत्वा मामेवं लोकमातरः।
आश्रिताः सोममागत्य सोमोत्पत्तिं समाययुः॥ ७२
प्रसादयित्वा ता गावो ब्रह्मा मामब्रवीत् ततः।
प्रसादं कुरु देवेश गावस्तव तु तेजसा॥ ७३
न विनाशं यथा यान्ति तथा कुरु सुरार्च्चित।
ततोऽहमास्थितो देवि स्थानेऽस्मिन् स्वयमेव तत्॥७४
गोप्रेक्षक इति ख्यातो यस्ततः सर्व्वदैवतैः।
गोप्रेक्षकेश्वरं गत्वा दृष्ट्वा चाश्चर्य्यं मानवः॥ ७५
न दुर्गतिमवाप्नोति कल्मषाच्चैव मुच्यते।
ततस्ता वीक्षमाणास्तु प्रसन्ने सुव्रते मयि॥ ७६
ह्रदे सिञ्चितुमारेभे शान्ताः स्थिरचरास्ततः।
यथा भक्ता हि ताः सर्व्वा ब्रह्मणापि महात्मना७७
धन्याः पूज्याश्च मान्याश्च भविष्यथ ममाज्ञया।
कपिलाह्रदमाश्चर्य्यं तदाप्रभृति कथ्यते॥ ७८
अत्रापि स्वयमेवाहं वृषध्वज इति स्मृतः।
सान्निध्यं कृतवान् देवि सतां वै दृश्यतां गतः॥ ७९
कपिलाह्रदविख्यातं देवानामपि दुर्लभम्।
अस्मिन्नपि प्रदेशे तु दर्शितं ब्रह्मणा स्वयम्॥ ८०
शान्त्यर्थं धर्म्मलोकानां सर्व्वदुग्धपयोऽमृतम्।
आसां क्षीरेण सञ्जातं ह्रदमेतन्मनोहरम्॥ ८१
रुद्रह्रदमिति ख्यातं तेन देवह्रदं शुभम्।
सर्व्वदैवैरहं देवि अस्मिन् स्थाने प्रसादितः॥ ८२
गच्छेयमहमीशेति उपशान्तः स्थितस्तदा।
शिवो भूत्वा स्थितोऽहञ्च पुण्यमस्यापि दर्शनम्॥ ८३
प्रेक्षते प्रयतस्तं वै सुरलोकमवाप्नुयात्।
अत्राहं ब्रह्मणानीय स्थापितः परमेष्ठिना॥ ८४
ब्रह्मणा चापि संगृह्य विष्णुना स्थापितः पुनः।

तं दृष्ट्वा ब्रह्मणा विष्णुः प्रोक्तः संविस्मितेन
समानीतमिदं लिङ्गं कस्मात् स्थापितवानसि
तमुवाच पुनर्विष्णुर्ब्रह्माणं कुपितानन
काममेव महोत्पन्नं परं भावमहाद्भुतम्।
मयैव स्थापितस्तेन साम्प्रतञ्च भविष्यति॥
हिरण्यगर्भ इत्येव ततोऽभूवं समाहितः।
दृष्टे च मयि देवेशे शमनं को व्रजन्नरः॥
पुनरेव ततो ब्रह्मा मम लिङ्गमिदं ततः।
स्थापयामास विधिवद्भक्त्या परमया युतः।
देवदेवं महादेवं प्रहृष्टेनान्तरात्मना।
स्वयमेव महादेवि नयस्वेति पुनः पुनः॥
ततोऽहं सर्व्वदेवानां पश्यतां तत्र तत्र च।
प्रविष्टो लिङ्गमध्ये तु विष्णु-ब्रह्मप्रचोदितः
माननार्थं हि ताभ्याञ्च सूक्ष्मो भूत्वा स्वतो
सुनीलेश्वरनाम्ना वै लोकानां सर्व्वनेत्रगः
तस्मात् सुनीलमित्येवं गुह्यक्षेत्रमिदं मम।
प्राणानि त्यजते योऽत्र न पुनर्जायते भुवि
एवं देवि ततो विष्णुर्ब्रह्मा लोकपितामहः
प्रसन्नमनसौ द्वौ च सुवर्णौ सुमहात्मनौ
अशक्या सा गतिस्तस्य योगिनाञ्चैव शाश्वतं
अस्मिन्नपि स्थिता दैत्याः सर्व्वे ते देवकण्ट
व्याघ्ररूपं समास्थाय निर्द्दग्धास्तेजसा मम
व्याघ्रेश्वरस्ततः ख्यातो नित्यं तत्राहमास्थि
न पुनर्दुर्गतिं यान्ति दृष्ट्वेमं व्याघ्रमीश्वरम्।
उत्पलो विमलश्चैव द्वौ दैत्यौ ब्रह्मणा पुरा
अवध्यौ दैवतैः सृष्टौ त्वयैव निहतौ शुभे।
तवाज्ञयाम्बिके चात्र तस्येदं ह्रदमास्थितम्
निर्व्वाणनाम विख्यातं सुरासुरनमस्कृतम्।
दृष्ट्वेमं मनुजः सत्यं पशुपाशैर्विमुच्यते॥
आदावत्राहमासाद्य प्रस्थितो गणैः सह
ज्येष्ठस्थानमिदं तस्मादेतन्मे पुण्यदर्शनम्।
दृष्ट्वा तदमलं लिङ्गं ज्येष्ठस्थाने समास्थितम्
न शोचति पुनर्मर्त्यो नास्थितो मृत्यु-जन्म
आ समन्तात् तु देवेशि लिङ्गानि स्थापि
दृष्ट्वा तन्नियतो मर्त्यो देहभेदगुणो भवे
इदानीमहमागत्य स्वयमात्मन्यवस्थितः।

न च मुक्तं मया तस्मादविमुक्तमिदं ततः ॥ १०३
अविमुक्ते तदा देवि पुरा कल्पे सुरासुरैः ।
स्तुतोऽहं विविधस्तोत्रैर्महादेवेति भावितैः ॥ १०४
उत्पन्नं मम लिङ्गन्तु भित्त्वा भूमिं सुरालयम् ।
प्रदत्तं दर्शनं तेषां सर्व्वेषाञ्च दिवौकसाम् ॥ १०५
महादेवेति ते सर्व्वे ध्यायमानाः सुरोत्तमाः ।
वाराणस्यां ततो देवि देवानां मानितोऽभवम् ॥ १०६
क्षेत्रं वाराणसी पुण्या मुक्तिदा सा भविष्यति ।
अविमुक्तेश्वरं मां वै योऽत्र द्रक्ष्यति मानवः ॥ १०७
मम लोके गतिस्तस्य यत्र तत्र मृतस्य च ।
प्राणानिह तु संन्यस्य यास्यन्ति गतिमुत्तमाम् ॥ १०८
पित्रा ते गिरिराजेन पुरा हिमवता स्वयम् ।
मम प्रियमिदं स्थानं ज्ञात्वा लिङ्गं प्रतिष्ठितम् ॥ १०९
शैलेश्वरमिति ख्यातं द्रक्ष्यतामिदमाश्रितम् ।
दृष्ट्वैव शैलजं देवि मम लोकमवाप्नुयात् ॥ ११०
पुरा वाराणसी चेयं पुण्यभागा प्रमोदिनी ।
क्षेत्रागतमलङ्कृत्य जाह्नव्या सह सङ्गता ॥ १११
वरणा नाम तत्रैव गङ्गासिन्धु सरिद्वरा ।
स्थापितं सङ्गमे ताभ्यां ब्रह्मणा लिङ्गमुत्तमम् ॥ ११२
सङ्गमेश्वरमित्येव ख्यातं जगति दुर्लभम् ।
सङ्गमेश्वरं दृष्ट्वैव स्नात्वा च मनुजः शुचिः ॥ ११३
अर्च्चयेत् सङ्गमेशानं तस्य जन्म गतं पुनः ।
इदमत्यद्भुतं क्षेत्रं निवासं योगिनां परम् ॥ ११४
क्षेत्रमध्ये च यत्राहं स्वयं भूत्वा समाश्रितः ।
मध्यमेश्वरमित्येव ख्यातं सर्व्वैः सुरासुरैः ॥ ११५
सिद्धानां स्थानमित्येवं मदीयव्रतचारिणाम् ।
योगिनां मोक्षलिप्सानां जन्म-मृत्यू न शोचति ॥ ११६
स्थापितं लिङ्गमेतच्च शुक्रेण भृगुसूनुना ।
नाम्ना शुक्रेश्वरं पुण्यं सर्व्वसिद्धैः पुरार्च्चितम् ॥ ११७
दृष्ट्वेदं मानवः सद्यो मुक्तः स्यात् सर्व्वकिल्बिषैः ।
मृतस्तु न पुनर्जन्म संसारञ्च लभेन्नरः ॥ ११८
पुरा जम्बुकरूपेण असुरौ देवकण्टकौ ।
ब्रह्मणा च तले नद्या घातितौ दैवतैः सह ॥ ११९
प्रतिषिद्धा मया ते तु गोमायुवधशङ्किताः ।
मया जम्बुकरूपेण सादिता दानवाः पुरा ॥ १२०
ममाज्ञया पुनस्तैस्तु लिङ्गानि स्थापितानि च ।
यस्य लिङ्गानि पुण्यानि सर्व्वकामप्रदानि तु ॥ १२१
गम्भीरेश्वरविख्यातं लिङ्गं सूर्य्येण स्थापितम् ।
कल्पे शिवं महापुण्यं लिङ्गं यमभयापहम् ॥ १२२
यमेन स्थापितं भद्रे दृष्ट्वा वै तस्य मोक्षणम् ।
ईशेन स्थापितं लिङ्गं यस्माद्गत्वा च क्रीड़या ॥ १२३
यत्रेमं देवमीशानं दृष्ट्वा वाभ्यर्च्य मानवः ।
सद्यः पापैर्विनिर्म्मुक्तः पशुपाशैर्विमुच्यते ॥ १२४
ईशानस्तत्र तत् तस्मात् परं सुरनमस्कृतम् ।
एवमेतानि पुण्यानि सन्ति स्थानानि सुव्रते ॥ १२५
कथितानि महाक्षेत्रे गुह्यकस्थमिदं शृणु ।
क्रोशं क्रोशं चतुर्द्दिक्षु क्षेत्रमेतत् प्रकीर्त्तितम् ॥ १२६
योजनं विधिक्षेत्रस्य मृत्युकालेऽमृतप्रदम् ।
महानदीगिरिस्थं मां केदारे च वरे स्थितम् ॥ १२७
गणत्वं लभते दृष्ट्वा स्वयं मोक्षमवाप्स्यति ।
गाणपत्यं ततो याति गतिः सा मुक्तिरुत्तमा ॥ १२८
ततो महालयो यस्मात् केदारान्मुक्तिमाप्नुयात् ।

व्यास उवाच ।

उमा-हरौ तु देवेशौ चक्रतुर्यच्च सन्ततम् ॥ १२९
तन्मे सर्व्वमशेषेण कथयस्व महामुने ।

सनत्कुमार उवाच ।

उमा-हरौ तु सङ्गम्य परस्परमनिन्दितौ ॥ १३०
शिलादस्यात्मजं पुत्रं प्रयुञ्जानं प्रचक्रतुः ।
स चाप्ययोनिजश्चैव सर्व्वगो भगवान् प्रभुः ॥ १३१
आराध्य सर्व्वकल्याणं जगत्पतिमनिन्दितम् ।
रुद्रेण सततं लब्धा महागणत्वं विनिर्ब्बभौ ॥ १३२

व्यास उवाच ।

कथं नन्दी समुत्पन्नः कथमाराध्य शङ्करम् ।
समानत्वमगाच्छम्भोः प्रतीहारत्वमेव च ॥ १३३

सनत्कुमार उवाच ।

अभूदृषिः स धर्म्मात्मा शिलादो नाम वीर्य्यवान् ।
तस्यासीच्छिलकैर्वृत्तिः शिवलोके च सोऽभवत् ॥ १४३
अपश्यल्लम्बमानान् स्वान् निरयेऽसति स द्विजः ।
विच्छिन्नसन्ततिस्तस्मी निरये पतते तु सः ॥ १३५
तैरुक्तोऽपत्यकामस्तु देवलोकादिमव्ययम् ।
आराधय महादेवं पुत्रार्थं द्विजसत्तम ॥ १३६
योऽस्मत्सन्तारणे शक्तः स ते पुत्रं प्रदास्यति ।

तेषां वाक्यं ततः श्रुत्वा जगाम शरणं शिवम् ॥ १३७
दिव्येन तु सहस्रेण तप्यमानस्य शूलधृक् ।
सर्व्वदेववरस्तस्य वरदोऽस्मीत्यभाषत ॥ १३८
तं दृष्ट्वा सोममीशानं प्रणतः पदयोर्गतः ।
हर्षगद्गदया वाचा तुष्टाव विबुधेश्वरम् ॥ १३९
नमः परमदेवाय महेशाय महात्मने ।
स्रष्ट्रे सर्व्वसुरेशानां ब्रह्मणः पतये नमः ॥ १४०
कामाङ्गनाशनायैव योगसम्भवहेतवे ।
नमः पर्व्वतवासाय ध्येयगम्याय वेधसे ॥ १४१
ऋषीणां पतये नित्यं देवानां पतये नमः ।
देवानां पतये चैव योगिनां पतये नमः ॥ १४२
प्रधानाय नमो नित्यं तत्त्वाय परसञ्ज्ञिने ।
वरदाय च भक्तानां नमः सर्व्वगताय च ॥ १४३
तन्मात्रेन्द्रियभूतानां विकाराणां गणैः सह ।
प्रबोधपतये चैव नमस्ते प्रभविष्णवे ॥ १४४
जगतः पतये चैव जगत्स्रष्ट्रे नमः सदा ।
प्रकृतेः पतये नित्यं पूज्याय परगामिणे ॥ १४५
ईश्वराय नमो नित्यं योगगम्याय रंहसे ।
संसारोत्पत्तिनाशाय सर्व्वकामप्रदाय च ॥ १४६
अवस्थाय नमो नित्यं नमो भस्माङ्गधारिणे ।
नमस्ते योगरूपाय तेजसां पतये नमः ॥ १४७
सूर्य्यानलाम्बुजाद्याय अर्द्धचन्द्रधराय च ।
स्थिताय च नमो नित्यं नमस्त्रैलोक्यवेधसे ॥ १४८
स्तोतव्यस्य मुने देव विश्रामस्ते न विद्यते ।
यस्मादुक्तस्त्वमेवास्य जगतः स्थिति-नाशयोः ॥ १४९
अशरण्यस्य देवेश लक्ष्य शरणार्थिनः ।
प्रसीद परमानन्द वरदो भव विश्वकृत् ॥ १५०
तस्यैवं वदतो व्यास देवदेवस्त्रिलोचनः ।
वरदोऽस्मीति तं प्राह शिलादं मुनिसत्तमम् ॥ १५१

यः स्तोत्रमेतदखिलं पठति द्विजन्मा
प्रातः शुचिर्नियमवान् द्विजसत्तमानाम् ।
तं ब्रह्मराक्षस-पिशाचक-भूतसङ्घा
हिंसन्ति नो द्विपद-पन्नग-पूतनाश्च ॥ १५२

ततः स भगवान् देवः स्तूयमानो महोदयः ।
उवाच वरदोऽस्मीति ब्रूहि यत् ते मनोगतम् ॥ १५३
तमेवंवादिनं देवं शिलादोऽभ्यवदत् प्रभुम् ।
उवाच देवदेवेशं वाचा संसज्जमानया ॥ १
भगवन् यदि तुष्टोऽसि यदि वा वरदश्च मे ।
इच्छामि त्वत्समं पुत्रं मृत्युहीनमयोनिजम् ।
एवमुक्तस्ततो देवः प्रीयमाणस्त्रिलोचनः ।
एवमस्त्विति तं प्रोच्य तत्रैवान्तरधीयत ॥ १
गते तस्मिन् महादेवे ऋषिः परमपूजितः ।
स्वमाश्रममुपागम्य ऋषिभ्यः कथयंस्ततः ॥ १
तैर्भृशं संस्तुतश्चैव कालेन मुनिसत्तमः ।
स हि इष्टुर्यज्ञभूमिं लाङ्गलेन च कर्षताम् ॥ १
तस्य तूत्कर्षमाणस्य सीतायां समुपस्थितः ।
संवर्त्तकानलप्रख्यः कुमारः प्रत्यदृश्यत ॥ १
स तं दृष्ट्वा तदोद्भूतं कुमारं दीप्ततेजसम् ।
राक्षसोऽयमिति ज्ञात्वा भयान्नोपससार ह ।
कुमारोऽपि तथोद्भूतः पितरं दीप्ततेजसम् ।
उपासर्पत दीनात्मा तात तातेति सोऽब्रवीत् ।
स तथेत्युच्यमानोऽपि यदा तं नाभ्यनन्दत ।
ततो वायुस्तदाकाशे शिलादं प्राह सत्वरम् ।
शालङ्कायन पुत्रस्ते योऽसौ देवेन शम्भुना ।
अयोनिजः पुरा दत्तः स एष प्रतिनन्दय ॥
यस्मान्नन्दकरस्तेऽयं सदैव द्विजसत्तम ।
तस्मान्नन्दीति नाम्नायं भविष्यति न संशयः ।
ततः स वायुवचनान्नन्दिनं परिषस्वजे ।
गृहीत्वा चाश्रमं नीतो नन्दीशस्तुष्टिवर्द्धनः ।
चूड़ोपनयनादीनि कर्म्माण्यपि चकार ह ।
कृत्वा चाध्यापयामास वेदान् साङ्गपदक्रमान्
आयुर्व्वेदं धनुर्व्वेदं गान्धर्व्वशास्त्रमुत्तमम् ।
शिल्पानि चैव सर्व्वाणि निमित्तज्ञानमेव च ।
भूतग्रामचिकित्साञ्च मातृणां चरितञ्च यत् ।
भुजङ्गानाञ्च सर्व्वेषां यत् किञ्चित् परिचेष्टितम्
सर्व्वशास्त्रं सदाचारमष्टौ व्याकरणानि च ।
तथैव च पुराणानि इतिहासमशेषतः ॥ १
पञ्च यन्त्राणि यानि स्युर्ज्योतिर्गणविचिन्तनम्
मातृतत्त्वं महामन्त्रं योगिनां शास्त्रमुत्तमम् ।
पञ्चभिर्दिवसैर्व्यास परिज्ञानमशेषतः
दक्षः शुचिरदीनात्मा प्रियवागनसूयकः ।
सर्व्वलोकप्रियो नित्यं मनो-नयननन्दनः ।

तस्याथ सप्तमे वर्षे ऋषी दिव्यौ तपोधनौ ॥ १७२
आश्रमं समनुप्राप्तौ शिलादस्य महौजसौ ।
तावर्च्यर्घ्यं यथान्यायं शिलादः सुमहातपाः ॥ १७३
तावालभ्य सुखासीनावासने परमार्च्चिते ।
मित्रावरुणनामानौ तपोयोगबलान्वितौ ॥ १७४
अभिज्ञौ सर्व्वजन्तूनां सर्व्वलोके चराचरे ।
तेनान्वितौ सुविस्रब्धौ निषण्णौ तु वरासने ॥ १७५
उपविष्टौ ततः प्राप्ताविष्टाभिर्वाग्भिरस्तुवत् ।
ताभ्यां पृष्टस्तु कच्चित् ते पुत्रस्तुष्टिप्रदः प्रभुः ॥१७६
स्वाध्यायनिरतः कच्चित् कच्चिद्धर्म्मास्य सन्ततिः ।
कच्चिद्दुर्वृत्तबालानां नात्र मन्येत कर्ह्हिचित् ॥ १७७
कच्चिन्नियमवादेन कच्चित् तुष्टिप्रदः प्रभुः ।
स एवमुक्तस्तेजस्वी शिलादः पुत्रवत्सलः ॥ १७८
उवाच गुणसम्पन्नः स मे वंशविवर्द्धनः ।
समानयत सन्तुष्टः पुत्रं नन्दिनमच्युतम् ॥ १७९
तयोः पादे स्वशिरसा पातयन्तमनिन्दितम् ।
तौ तु तस्याशिषं देवौ प्रायुङ्क्तां धर्म्मनित्यताम् ॥१८०
गुरुशुश्रूषणे भावं लोकांश्चैव तथाव्ययान् ।
शिलादस्तौ तथालभ्य आशिषं देवयोस्तयोः ॥ १८१
विसृज्य नन्दिनं भीतः सोऽपृच्छदृषिसत्तमौ ।

शिलाद उवाच ।

तपोवन्तौ ऋषी सत्यौ गतिज्ञौ सर्व्वदेहिनाम् ॥१८२
किमर्थं मम पुत्रस्य दीर्घमायुरुभावपि ।
प्रयुक्तवन्तौ सम्यक् तु नाशिषो मुनिसत्तमौ ॥ १८३

मित्रावरुणावूचतुः ।

तवैष तनयस्तात अष्टायुः पूर्व्वधर्म्मतः ।
अद्यारभ्याष्टमे वर्षे जीवितुं न भविष्यति ॥ १८४
ततः स शोकसन्तप्तो न्यपतद्भुवि दुःखितः ।
विसृज्य मुनिशार्दूलावेकाकी विललाप ह ॥ १८५
तस्य शोकाद्विलपतः स्वरं श्रुत्वा सुतः शुभः ।
क्रन्दमानञ्च तं दृष्ट्वा पितरं दुःखितं भृशम् ॥ १८६

नन्द्युवाच ।

केन त्वं तात दुःखेन वेपमानश्च रोदिषि ।
दुःखं ते कुत उद्भूतं ज्ञातुमिच्छामि तत्त्वतः ॥ १८७

शिलाद उवाच ।

पुत्र त्वं किल वर्षेण जीवितं सम्प्रहास्यसि ।
उचतुस्तावृषी सर्व्वं ततो मां दुःखमाविशत् ॥ १८८
अन्यं हि नोचतुर्विप्रौ न तावनृतभाषिणौ ।
तेनाहं पुत्रशोकेन भृशं पीड़ितमानसः ॥ १८९

नन्द्युवाच ।

देवो वा दानवो वापि यमो वापि कदाचन ।
तथापि न च मृत्युर्मे प्रभविष्यति मा रुदः ॥ १९०

शिलाद उवाच ।

किं तपः किं परिज्ञानं को योगः कः समाश्रितः ।
येन त्वं दारुणं मृत्युं वञ्चयिष्यसि पुत्रक ॥ १९१

नन्द्युवाच ।

न तात तपसा मृत्युं वञ्चयिष्ये न विद्यया ।
महादेवेन नाथेन मृत्युं जेष्यामि नान्यथा ॥ १९२
न स कश्चिदुपायोऽस्ति त्यक्त्वा देवं पिनाकिनम् ।
द्रक्ष्यामि शङ्करं देवं स मे मृत्युं विजेष्यति ॥ १९३

शिलाद उवाच ।

मया वर्षसहस्रेण तपस्तप्त्वा सुदुश्चरम् ।
महादेवः पुरा दृष्टो लब्धस्त्वं मे यतः सुतः ॥ १९४
भवांस्तु वर्षेणैकेन कथं द्रक्ष्यति शङ्करम् ।
वर्षेण किं तपः पुत्र शक्यं कर्त्तुं वृषध्वजात् ॥ १९५
का ते शक्तिर्महाभाग येन मृत्युं विजेष्यसि ।

नन्द्युवाच ।

न तात तपसा देवो दृश्यते न च विद्यया ॥ १९६
शुद्धेन मनसा भक्त्या दृश्यते परमेश्वरः ।
अहमेव च जानामि येन द्रक्ष्यामि शङ्करम् ॥ १९७
त्वया विसृष्टो गच्छामि अचिरेण त्रिलोचनम् ।
द्रष्टुं तात न सन्देहो विसृजस्व सुतन्तु माम् ॥ १९८
अचिरेणैव कालेन जन्म-मृत्युविवर्ज्जितम् ।
द्रक्ष्यसे मां कृतार्थञ्च तस्मान्मां त्वं विसर्ज्जय ॥ १९९
तिष्ठ त्वं निर्भयोऽद्येह पश्यतस्तेऽतिसम्मतः ।
न हिंसा वा यथा ते स्यादिति तात व्रजाम्यहम्२००
तिष्ठन्तं वा शयानं वा धावन्तं पतितं तथा ।
न प्रतीक्षति वै मृत्युरिति बुद्ध्वा विसर्ज्जय ॥ २०१
यदि मृत्युसहस्राणि यमकोटिशतानि च ।
अभिद्रवन्ति संक्रुद्धा दण्डपाशोद्यतायुधाः ॥ २०२
तत्रापि नान्यथा तात भयं त्वं मे करिष्यसि ।
न ममैते करिष्यन्ति व्यथां लोम्नोऽपि चैव हि ॥२०३

अवतीर्य्य जले तात भावशुद्धिं समास्थितः ।
अभ्यर्च्य रुद्रमध्यायं तथा च शतरुद्रियम् ॥ २०४
इच्छामि वरदं नाथं देवं मृत्युहरं परम् ।
जपतश्चापि युक्तस्य रुद्रभावान्वितस्य च ॥ २०५
न मृत्युकालो याम्यो वा करिष्यति मम व्यथाम् ।
तमेवंवादिनं मत्वा ब्रुवाणं शुद्धया गिरा ॥ २०६
व्यसर्ज्जयद्दीनात्मा ब्रह्म्यात् पुत्रं महातपाः ।
प्रणम्य स पितुः पादौ शिरसा च महायशाः ॥२०७
प्रदक्षिणं समावृत्य सम्प्रतस्थेऽतिनिश्चितम् ।
नमस्कार्य्य पितुः पादौ स दिदृक्षुरुदारधीः ॥ २०८
ध्यायते मनसा देवं प्रणतार्त्तिहरं हरम् ॥ २०९

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः ।

सनत्कुमार उवाच ।

निर्गतोऽथ तदा नन्दी जगाम सरितां वराम् ।
भुवनामिति विख्यातां सर्व्वलोकसुखावहाम् ॥ १
तां प्रविश्य ततो धीमानेकाग्रो हृदि संस्थितः ।
जजाप स तदा नन्दी रुद्रं परमकारणम् ॥ २
भयान्मृत्योस्ततो ध्यानैरेकचित्तः समाहितः ।
ध्यायता तेन तत्रैव तत्परेण तदाश्वसि ॥ ३
कोटिरेका यदा जप्ता तदा देवस्तुतोष ह ।
तदागत्याह भगवान् शर्व्वः कपर्द्दिधृक् ॥ ४
नन्दिन् तुष्टोऽस्मि भद्रं ते वरं वृणु यथेप्सितम् ।
एतच्छ्रुत्वा वचस्तत्र महादेवस्य तु द्विजः ॥ ५
उवाच प्रणतो भूयः प्रयतात्मा तदैव ह ।
द्वितीयां तप्तुमिच्छामि कोटिं परमकारण ॥ ६
एवमुक्तस्तु देवोऽपि उक्त्वागच्छद्यथागतम् ।
सोऽवतीर्य्य ततो भूयः प्रणतोऽतिबभूव ह ॥ ७
जजाप कोटिमन्यान्तु रुद्रमेवानुचिन्तयन् ।
द्वितीयायां ततः कोट्यां सम्पूर्णायां वृषध्वजः ॥ ८
आजगाम च तत्रैव वरदोऽस्मीत्यभाषत ।
अन्याञ्च भगवान् कोटिं तृतीयामपि जापितुम् ॥९
इच्छामि देवदेवेश त्वत्प्रसादादहं विभो ।
एवमस्त्विति भूयोऽपि भगवान् प्रत्युवाच
उक्त्वा जगाम देवेशो देव्या सह महाद्युति
ततस्तृतीयां तत्रैव कोटिमन्यां जजाप ह
युगान्तादित्यसङ्काशं ततः समभवद्वपुः ॥
तस्यां कोट्यां तृतीयायामज्वलद्दिव्या
सर्व्वैर्गणैर्देववृतः स गन्तुमुपचक्रमे ।
स तं करेण संगृह्य उद्धृत्य शिरसा तथा
संस्पृशंश्चाग्रहस्तेन नन्दिनं काममब्रवीत्
शैलादे वरदोऽहं ते तपसानेन तोषितः
साधु जप्तं त्वया धीमन् ब्रूहि यत् ते मनो

नन्द्युवाच ।

जपेयं कोटिमन्यां वै भूयोऽपि तव तेजसा
वरमेतं वृणे देव तुष्टोऽसि यदि मे विभो

देवदेव उवाच ।

किं ते जपेन भूयोऽपि तुष्टोऽस्मि तव सर्व्व
यं यं हि वृणुषे कामं सर्व्वं वद ददामि
ब्रह्मत्वमथ विष्णुत्वमन्यैरपि तु का कथा
आदित्यो भव रुद्रो वा सोमो वा मम
स एवमुक्तो देवेन शिरसा पादयोर्नतः
तुष्टाव परमेशानं जराशोकविनाशनम् ।
नमो देवादिदेवाय महादेवाय वै नमः
नमः कामाङ्गनाशाय त्रैलोक्यदहनाय च ।
नमः कालाग्निदण्डाय उग्रदण्डाय वै नमः
नमो नीलशिखण्डाय सहस्रशिरसे नमः ।
सहस्रपाणये चैव सहस्रचरणाय च ॥
सर्व्वतः पाणिपादाय सर्व्वतोऽक्षिमुखाय
सर्व्वतः श्रुतये चैव सर्व्वमावृत्य तिष्ठते ॥
नमस्ते रुद्रतत्त्वाय तथैवातीन्द्रियाय च ।
नमः कपर्द्दिने तुभ्यं कनकपिङ्गाय वै नमः
नमश्चन्द्रार्कनेत्राय योगीशायाजिताय च ।
पिनाकपाणये चैव शूल-मुद्गरपाणये ॥
खड्गिने गदिने चैव परशुधधराय च ।
रथिने चर्म्मिणे चैव महेष्वासाय वै नमः
नमस्त्रिशूलहस्ताय उग्रदण्डधराय च ।
नमो देवाधिपतये रुद्राणां पतये नमः ॥
सहस्रनेत्राय वै तुभ्यं सहस्रबाहवे नमः ।

आदित्यानाञ्च पतये वसूनां पतये नमः ॥ २७
नमः स्वर्लोकपतये महर्लोकपते नमः ।
नमो योगाधिगम्याय सर्व्वयोगप्रदाय च ॥ २८
ध्यानिने ध्यायमानाय ध्यानिभिः संस्तुताय च ।
मृत्यवे कालदण्डाय यमाय च महात्मने ॥ २९
देवाधिपतये चैव दिव्यसंहननाय च ।
यज्ञाय च सदानाय स्वर्गजन्मप्रदाय च ॥ ३०
प्रविष्टे सर्व्वदेवानां धर्म्मायानेकनेत्रिणे ।
अमृताय च वेद्याय सर्व्वदेवस्तवाय च ॥ ३१
उमारुद्रेन्द्ररूपाय तथा नारायणाय च ।
ब्रह्मणः शिरसश्चेन्द्रयज्ञस्य परिपन्थिने ॥ ३२
त्रिपुरघ्न-चरोग्राय सर्व्वाशुभहराय च ।
ललाटाङ्कितनेत्राय ततोर्द्धजननाय च ॥ ३३
महिषान्तककर्त्त्रे च स्त्रग्विणे च नमो नमः ।
ब्रह्मणो गुरवे चैव ब्रह्मणो जनकाय च ॥ ३४
कुमारगुरवे चैव कुमारवरदाय च ।
हलिने मुषलघ्नाय महाहासाय वै नमः ॥ ३५
त्युपाशोग्रहस्ताय नक्षत्रालोकसूत्रिणे ।
रिप्रधानवाहाय तथैव वृषयायिणे ॥ ३६
हिमवद्विन्ध्यवासाय मेरुपर्व्वतवासिने ।
कैलासवासिने चैव धनेश्वरसखाय च ॥ ३७
कणुदेहार्द्धसंस्थाय तस्मिंश्च वरदाय च ।
विभूताय संघाय सर्व्वभूतानुकम्पिने ॥ ३८
तभूताधिवासाय प्राणिनां जीवनाय च ।
रे च वाग्मिने चैव सूक्ष्माय तनवे नमः ॥ ३९
स्तोऽपशवे नित्यं चीवराय विटाय च ।
णवे लोककर्त्त्रे च प्रजानां पतये नमः ॥ ४०
ो रात्रे सप्तर्षये तप्यमानाय तापिने ।
षणाय विशुद्धाय तथा दुर्व्वाससे नमः ॥ ४१
ल्पने शिल्पनाशाय विदुषि विश्वकर्म्मणे ।
ी भृगवे चैव तथैवाङ्गिरसे नमः ॥ ४२
हाय पुलस्त्याय क्रत्वाह्वानाय तापिने ।
ाय रुचये चैव वशिष्ठाय नमोऽस्तु ते ॥ ४३
ाय भूतनाथाय कूष्माण्डपतये नमः ।
ते द्रवते चैव गायते नृत्यते तथा ॥ ४४
क्षायाप्यवध्याय अजरायामराय च ।

अक्षयायाव्ययायैव तथाऽप्रतिहताय च ॥ ४५
अनाथस्थाय सर्व्वेषां तथैव पुण्यरूपिणे ।
सूक्ष्मेभ्यश्चातिसूक्ष्माय सर्व्वगाय महात्मने ॥ ४६
नमस्ते भगवंस्त्र्यक्ष नमस्ते भगवन् शिव ।
नमस्ते सर्व्वलोकेश नमस्ते सर्व्वभावन ॥ ४७
नमो देवाधिपतये ब्रह्मणे वायवे नमः ।
न विष्णुत्वं न देवत्वं नापीन्द्रत्वञ्च कामये ॥ ४८
इच्छाम्यहं विश्वनाथ संसारादिनिवर्त्तनम् ।
नित्यं ते शरणं नाथ प्रसन्नोऽद्य परिच्छदम् ॥ ४९
द्रष्टुमिच्छामि योगीन एष मे दीयतां वरः ।
त्वं नो गतिः पुरा देव त्वं वा नाथायनं रुद्र ॥ ५०
त्वया त्यक्तस्य चैवास्ते विनाशो नात्र संशयः ।
अन्यां गतिं न पश्यामि पश्याम्यात्यन्तिकं र ॥ ५१
अनुरक्ताञ्च भक्ताञ्च त्वत्परं त्वदपाश्रयम् ।
पश्यामि सर्व्वलोकेश संसारमतिदुस्तरम् ॥ ५
भवाम्यहं महादेव यथा तत्र तथा कुरु ।
प्रतीच्छ मां महादेव एष मे दीयतां वरः ॥ ५३
य इदं प्रातरुत्थाय पठेद्दविमना नरः ।
चतुर्द्दश्यां विशेषेण ब्राह्मणो वा यतिस्तथा ॥ ५४
स देहभेदमासाद्य नन्दीश्वरसमो भवेत् ।
यश्चिमं शृणुयान्नित्यं श्रावयेद्वा द्विजोत्तमः ॥ ५५
सोऽश्वमेधफलं प्राप्य रुद्रलोके महीयते ।
श्रुत्वा सकृदपि ह्येनं स्तवं पापप्रणाशनम् ॥ ५६
यत्र तत्र मृतो व्यास दुर्गतिं न समाप्नुयात् ॥ ५७
योऽधीत्य नित्यं स्तवमेतदग्र्यं
देवं सदाभ्यर्च्चयते यतात्मा ।
किं तस्य यज्ञैर्विविधैश्च दानै-
स्तीर्थैः सुतप्तैश्च तथा तपोभिः ॥ ५८
समाप्तकृत्यो द्विजपुङ्गवो हि
गृहस्थधर्म्मापि यतेर्नरः समः ॥ ५९
एष मन्त्रजपश्चैव संसारविनिवर्त्तकः ॥ ६०

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः।

सनत्कुमार उवाच।

ततस्तं देवदेवेशो भक्त्या परमया युतम्।
अश्रुपूर्णेक्षणं दीनं पादयोः शिरसा नतम् ॥ १
कराभ्यां सम्मुखाभ्यान्तु संगृह्य भुवनेश्वरः।
उत्थाप्य परमेशानो मुखं तस्य ममार्ज्ज ह ॥ २
उवाच जगतां नाथो वचसा तोषयंश्च तम्।
निरीक्ष्य गणपान् सर्व्वान् महादेवोऽवदत् पुनः ॥ ३
न भेतव्यं न भेतव्यं तुष्टोऽहं तव पुत्रक।
न च जन्म जरा मृत्युर्मत्प्रसादाद्भविष्यति ॥ ४
तव भक्तिमहं वत्स जाने चार्त्तिं तवानघ।
तस्य सर्व्वस्य शैलादि यदुक्तं तन्निशामय ॥ ५
अमरो जरया मुक्तः सर्व्वदुःखविवर्ज्जितः।
अक्षयश्चाव्ययश्चैव सपिता ससुहृज्जनः ॥ ६
ये च त्वां सह संहृष्टाः स्निग्धभावं गताश्च ये।
ते सर्व्वे च त्वया सार्द्धं मम लोके प्रयान्तु ते ॥ ७
ममेष्टो गणपश्चैव मद्वीर्य्यो मत्पराक्रमः।
इष्टो मम सदा चैव मम पार्श्वगतः सदा ॥ ८
मद्रूपश्चैव भविता महायोगबलान्वितः।
ऋद्धियुक्तं सहद्वीपं क्षीरोदममृताकरम् ॥ ९
सवासं प्रयच्छामि तत्र त्वं वस पुत्रक।
कुशेशयमयीं मालां स्वयम्भूरात्मनः शुभाम् ॥ १०
आबबन्ध महादेवो नन्दिने देवरूपिणे।
स तया मालया नन्दी बभौ कण्ठावसक्तया ॥ ११
त्र्यक्षो दशभुजः श्रीमान् द्वितीय इव शङ्करः।
तत एनं समादाय हस्तेन भगवान् हरः ॥ १२
उवाच ब्रूहि किं तेऽद्य ददामि वरमुत्तमम्।
आश्रमश्चायमत्यर्थं तपसा तव भावितः ॥ १३
जाप्येश्वरसमाख्यातो मम गुह्यो भविष्यति।
समन्ताद्द्योजनं क्षेत्रं दिव्यसिद्धिप्रदायकम् ॥ १४
सिद्धचारणसङ्कीर्णमप्सरोगणसेवितम्।
सिद्धक्षेत्रं परं गुह्यं भविष्यति न संशयः ॥ १५
कर्म्मणा मनसा वाचा यत् किञ्चित् कुरुते नरः।
अशुभं वा शुभं वात्र सर्व्वं भवति भस्मसात् ॥ १६
जपमानस्य तोल्यं वै रुद्राणां तद्भविष्यति।
यत्र यत्र मृतास्तत्र यास्यन्ति मम लोकताम्
ततो जप्यं स्रुतं वारि गृहीत्वा हारनिर्झ
उक्तानन्दी भवस्वेति विससर्ज्ज महातपाः ॥
सा तदा दिव्यतोया च पुण्या मानजनाशुभा
हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ॥
फुल्लपद्मवरा चैव प्रावर्त्तत महानदी।
स्त्रीरूपधारिणी चैव प्राञ्जलिः शिरसा न
पद्मोत्पलदलाभाक्षी महादेवमुपस्थिता।

महादेव उवाच।

यस्माद्दयज्ञोदकाद्देवि प्रवृत्ता त्वं शुभानने
तस्माद्दयज्ञोदका नाम भविष्यसि सरिद्वरा।
त्वयि स्नानन्तु यः कुर्य्याच्छुचिः प्रयतमान
सोऽश्वमेधफलं प्राप्य रुद्रलोके महीयते।
तस्या देव्या महादेवो नन्दीश्वरपतिः प्र
पुत्रे स्नेहमिति प्राह पादयोस्तं व्यनामय
सा तमाघ्राय शिरसि पाणिभ्यां परिमार्
पुत्रप्रेम्णाभिषिञ्चन्ती स्रोतोभिस्तनुजैस्त
पयसा शङ्खगौरेण देवं देवी निरीक्षती
तानि स्रोतांसि त्रीणि स्याच्छ्रोतेभ्यः प
नदीं त्रिस्रोतसं पुण्यां ततस्तामब्रवीच्च
नन्दी त्रिस्रोतसं दृष्ट्वा भूयः परमहर्षितः।
ननाद नादं तस्माच्च सरिदन्या ततोऽभव
यस्मादुपप्रणादेन प्रवृत्ता सा महानदी।
तस्माच्छिवेन कान्ता वै उवाच वृषभध्व
जाम्बूनदमयं चित्रं स देवः परमाद्भुतम्।
मुकुटञ्च ददौ तस्मै कुण्डले चामृतोद्भवे
तं तथाभ्यर्च्चितं व्योम्नि दृष्ट्वाऽमेयप्रभाक
देवोऽपि राज्येऽभिषिञ्चन् ननाद शततं
तस्याभिषिक्तस्य तदा प्रवृत्ते स्रोतसि श
यस्मात् सुवर्णान्निःसृत्य नदीयं सम्प्रवर्त्ते
तत् सुवर्णोदका नाम्ना महादेवोऽब्रवी
जाम्बूनदमयाद्दयस्मादेषा मुकुटतः प्र
प्रावर्त्तत नदी पुण्या प्रोक्ता जाम्बूनदी
तच्च जाम्बूनदं नाम जाप्येश्वरसमीपतः
विख्यातं फलमेतेषां यज्ञो दानं महा
तच्च जाम्बूनदं दिव्यं देवं जाप्येश्वर

त्रिरात्रोपोषितो गत्वा स्नात्वाभ्यर्च्य च शूलिनम्।
ब्राह्मणांस्तर्पयित्वा च यत्र तत्र मृतो नरः।
नन्दीश्वरस्यानुचरः क्षीरोदनिलयो भवेत्॥ ३५
यस्तु जप्येश्वरे प्राणान् परित्यजति दुस्त्यजान्।
निशाम्य नान्यथा वापि स मे गणपतिर्भवेत्॥ ३६
नन्दीश्वरसमो नित्यं शाश्वतो ह्यक्षयोऽव्ययः।
यश्च प्रियस्ते देवेश प्रियः स मम एव च॥ ३७
जाप्येश्वरं पञ्चनदञ्च तद्दे
यो मानवोऽभ्येत्य जहाति देहम्।
स मे सदा स्याद्गणपो वरिष्ठ-
स्त्वया समः कान्तवपुर्भवेदिति॥ ३८

इति श्रीशैवे महापुराणे सनत्कुमारसंहि-
तायां नन्दीश्वरोत्पत्तिर्नाम सप्त-
चत्वारिंशोऽध्यायः॥ ४७॥

अष्टचत्वारिंशोऽध्यायः।

सनत्कुमार उवाच।

एतत् ते कथितं व्यास नन्दीशस्य समुद्भवम्।
...लेन जीवितेनापि सैनापत्येऽभिषिचितः॥ १
...गवान् देवदेवेशः सर्व्वभूतपतिर्भवः।
...वाच देवीमीशानीमुमां गिरिवरात्मजाम्॥ २
...वो नन्दीश्वरं देवञ्चाभिषिच्य विभूषितम्।
...णेश्वराणां सर्व्वेषां किं तत्त्वे मन्यसे शुभे॥ ३

देव्युवाच।

...सलोकाधिपत्यञ्च गणेशानां तथैव च।
...र्व्वेषामिति देवेश नन्दी पुत्रो महात्मनः॥ ४
...तः स भगवान् देवः सुर-सिद्धगणार्च्चितः।
...ह्मस्यः सगणेशो वै भूत्वा देवो महेश्वरः।
...न्तयामास सगणान् रुद्रांश्च दिविवासिनः॥ ५
...वं चिन्तितमात्रास्ते गणाध्यक्षा मुदान्विताः।
...प्राप्ताः सप्तलोकेशा ये रुद्राः स्वर्गवासिनः॥ ६
...सिरूपधरा व्यास त्रिनेत्रशूलधारिणः।
...गतास्ते महाभाग असंख्याता मुदा युताः॥ ७
...स्थिता दक्षिणामाशां पश्चिमामुत्तरां तथा।
...र्व्वाश्चोर्द्ध्वमधस्ते तु शूलहस्ता निषङ्गिणः॥ ८
नीलकण्ठाश्रितग्रीवाः शुद्धप्रज्वलनेक्षणाः।
समागतास्तदा व्यास येषां संख्या न विद्यते॥ ९
ब्रह्माण्डावरणाः पञ्च अधजर्द्धादयो मुने॥ १०
कपालीशो विश्वोकश्च शतनेत्रः शतानिलः।
अनन्तरुद्राः शतशः शतपादाः शताननाः।
सम्प्राप्ताः सर्व्वलोकेशास्तान् शृणुष्व महामुने॥ ११
ततः करालवदनो भ्रुकुटीभूषिताननः।
पञ्चयोजनविस्तीर्णो दीर्घतस्तादृगेव च॥ १२
ततश्चत्वारि वक्त्राणि बिभ्रच्छुंखेन्दुपाण्डुरः।
पञ्चजिह्वोर्द्ध्वकर्णश्च पाशहस्तो मनोजवः॥ १३
वृतः कोटिशतेनैव सदृशानां महात्मनाम्।
भारभूतिरिति ख्यातो महायोगबलान्वितः॥ १४
खड्गवेगधरश्चैव ध्यानयोगपरायणः।
सोमवर्षेति विख्यातः कोटीरथसमावृतः।
तादृशानां गणाध्यक्षो देवस्य च स्थितोऽग्रतः॥ १५
अश्वा शिवो महाकायः शूलपाणिर्महाबलः।
युगान्तानलसङ्काशः स्थितः स्थिरयशोबलः॥ १६
चन्द्रमौलिर्महाकाशश्चतुर्बाहुविलोहितः।
एकपादैर्महाकायैस्त्र्यक्षैस्तैः शूलपाणिभिः॥ १७
वृतः कोटिशतेनैव स्थाणुस्तत्राभ्यवर्त्तत।
स पार्षदोऽयं रुद्रस्य सर्व्वासुरसुपूजितः॥ १८
ततोदरः पद्मासनो ऋक्षपादो हरः शुचिः।
सहस्रबाहुचरणः सहस्राक्षः सहस्रपात्॥ १९
करालवदनश्चैव महासर्पपरिच्छदः।
त्र्यक्षश्चन्द्रकृतापीडः शिरोमालाविभूषितः॥ २०
चन्द्रमौलिर्महाकेशः कोटिशः परिवारितः।
ततः परिवृतः सोम आजगाम महाबलः॥ २१
ततः परं समीपे तं देवदेवं वरप्रदम्।
चतुर्व्वक्त्रो महातेजाश्चतुर्व्विंशतिलक्षणैः॥ २२
सहस्रबाहुर्व्याघ्रास्यो महादेवोर्द्ध्ववाहनः।
करालवदनश्चैव शङ्कुकर्णो महाबलः॥ २३
असिपाणिर्महातेजाः शतपादः कृशोदरः।
विद्युत्केशो महास्यश्च तथैवोभयतोगतिः॥ २४
अजैकपादविख्यातो वृतः कोटिशतेन सः।
काञ्चनोत्पलवर्णाढ्यो ह्यजेय इव पर्व्वतः॥ २५
आगात् ततोऽपरो व्यास गणपः स महाबलः।

सर्व्वतोवदनः श्रीमान् सर्व्वतः पाणिपादधृक् ॥ २६
करबाहुरपादश्च अशनिं धारयन् शुभाम् ।
शतैर्वृतस्तु कोटीनामष्टभिश्चात्मनः समैः ॥ २७
निकुम्भ इति विख्यातः शतपादः शताननः ।
आगतो ह्यपरश्चात्र तड़िल्केशो महाबलः ॥ २८
चन्द्रमालाधरो देवः सहस्रकरपल्लवः ।
दण्डधारी महाचक्रः शङ्खकुन्दसमप्रभः ॥ २९
गणकोटिशतवृतो देवस्य पुरतः स्थितः ।
ततोऽपरः सहस्रेण कोटीनां गणपैर्वृतः ॥ ३०
सर्पमालाशतं बिभ्रदाजगाम महातपाः ।
स सूर्य्योपायनो नाम देवस्य परमप्रियः ॥ ३१
सर्व्वस्थानमहातेजा विश्रुतः सुमहाद्युतिः ।
तथान्यः सर्व्वमानी च वज्राभरण एव च ॥ ३२
चन्द्रायुधो महातेजाश्चक्रबाहुः कटाकटः ।
गणकोटिशतैः षड्भिर्वृतः समनुधावति ॥ ३३
शङ्कुकर्णोऽस्थयाचैव गणकोट्या महाबलः ।
नन्दिकश्चैव दशभिः पिङ्गाक्षोऽष्टभिरेव च ॥ ३४
विनायकश्चतुःषष्ट्या कुष्माण्डो नाम विश्रुतः ।
हिरण्यवर्णः षड्भिश्च एकपादस्तथैव च ॥ ३५
धूम्रकेशो द्वादशभिः पताकी दशभिस्तथा ।
शतमुक्तोऽष्टादशभिः शतपञ्चभिरेव च ॥ ३६
सहस्रशीर्षः षड्भिश्च गणकोटिशतैर्वृतः ।
वीरो दशभिरायातः कुम्भकर्णस्तथाष्टभिः ॥ ३७
विश्ववलः सहस्रेण मनुस्तस्याः शतेन वै ।
नादेऽशनिस्तथाष्टाभिः सप्तभिश्चन्द्रवर्त्तनः ।
महीधरः सहस्रेण कोटीनां गणपैर्वृतः ॥ ३८
प्रणवादित्यमूर्त्तिश्च कोट्या चैव वृतो वह्निः ॥ ३९
सन्तोषश्च शतेनैव ककुद्दोऽष्टभिरेव च ।
कुम्भश्च पञ्चदशभिस्तथा सङ्कोचतः परः ॥ ४०
अमोघो भूतकोट्या च तथा द्वौ मेघ-भूतिकौ ।
एकपादोऽष्टषष्ट्या च तथा सप्तर्षिरोगणः ॥ ४१
महाबलश्च दशभिरपस्मारश्च विश्रुतः ।
नीलोद्भवश्च देवेशः कण्ठभद्रस्तथैव च ॥ ४२
विकृतिश्चापि सप्तत्या कोटीनामाजगाम ह ।
कोटीनाञ्च सहस्राणां शतैर्विंशतिभिर्वृतः ॥ ४३
इतश्चेतश्च आजग्मुर्महायोगबलान्विताः ।
भूतकोटिसहस्रेण प्रमथैः कोटिभिर्वृतः ॥ ४
वीरभद्रश्चतुःषष्ट्या दूषकश्च महाबलः ।
मेघसौदामनी नाम नवत्या कोटिभिर्वृतः ॥
प्रभाकरश्च विंशत्या विद्युज्जिह्वस्तु महाबलः ॥
मृत्युश्चैव यमश्चैव कालो विषधरस्तथा ॥
शतमायो महामायः पर्व्वताभरणस्तथा ।
एकशृङ्गाभिविख्यातस्तथाभृङ्गिरिटिश्च यः ॥
एते चान्ये च बहवो गणपाश्च महाबलाः ।
मुखैन वाद्यानि तथा वादयन्तो मुदान्विताः ।
रथैर्नागैर्हयैश्चैव ऋक्ष-मर्कट-वाहनाः ।
व्याघ्र-सिंह-विमानैस्तु सर्प-पक्षिभिरेव च ॥
श्वापदैश्च तथानेकैरन्यैश्च विविधैरपि ।
विमानेषु तथारूढ़ा नानारूपधराः परे ॥
पुष्पकेण विमानेन तथा महाद्विपेन च ।
एकीकृत्य तदाकाशं सकिन्नर-महोरगम् ॥
मत्तमायूरयुक्तेन हंसयुक्तेन चापरे ।
भेरी-शङ्ख-मृदङ्गैश्च पणवानकगोमुखैः ॥
वादित्रैर्विविधैश्चित्रैः पटहैरेकपुष्करैः ।
भेरीगम्भीरसन्नादैर्नानाडमरु डिण्डिमैः ॥
मङ्गलैर्वेणु-वीणाभिर्विविधैश्च स्वनैरपि ।
दर्द्दुरैस्तलघातैश्च कराग्रैः पणवैरपि ॥
वाद्यमानैर्महाघोरैराजग्मुर्यत्र शङ्करः ।
इन्द्रासनेन दिव्येन पद्मयोनिः पितामहः ॥
मुनिभिर्व्यास संसिद्धैर्वृताः सर्व्वे समन्ततः ।
ऋग्वेदो दक्षिणे भागे दिव्यकुण्डलभूषितः ।
पश्चिमे सामवेदश्च नानारूपधरः शुभः ।
अथर्व्वा चोत्तरे चैव वह्निना सदृशप्रभः ॥
यजुर्व्वेदश्च पूर्व्वेण विद्युद्रूपधरः सदा ।
इतिहासपुराणानि नानारूपधराणि च ॥
अग्रतो दिव्यपाणेन तोषितास्तत्र जग्मतुः ।
देवदेवो महादेवो यज्ञरूपधरः शुभः ॥
दृष्ट्वा नारायणं देवं महादेवोऽब्रवीत् तदा ।
वाचा गम्भीरया तन्तु स देवं लोकभावनम्
शृणु विष्णो वचो मह्यं यद्वक्ष्यामि सुरेश्वर ।
अभिषिक्तं प्रयच्छ त्वं नन्दिने सुरपूजित ॥
यदि ते च प्रियं कृष्ण अभिषिक्तं कुरुष्व

प्रहस्य च महादेवं ततो नारायणोऽब्रवीत् ॥ ६२
यथा वदसि देवेश करिष्येऽहं तथा विभो।
देवानामपि देवस्त्वं प्रमाणन्तु न संशयः ॥ ६३
शक्र ऐरावतारूढ़ आजगाम शिवान्तिकम्।
वसुभिर्मारुतैश्चैव प्राणिवासान् महाबलैः ॥ ६४
पृथग्विमानसंस्थैश्च नादयित्वा नभस्तलम् ॥ ६५
ते विश्वकर्म्माद्यविचित्रदेहा
विश्वेशमेकाक्षरमव्ययञ्च।
सहस्रनेत्रप्रतिमानभास्वराः
प्रणेदुरुच्चैरपि चातिनेदुः ॥ ६५

इति श्रीशैवे महापुराणे नन्द्युपाख्याने अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशोऽध्यायः।

सनत्कुमार उवाच।

ते गणेशा महासत्त्वाः सर्व्वदेवेश्वरेश्वरम्।
प्रणम्य देवदेवञ्च इदं वचनमब्रुवन् ॥ १
भगवन् देवदेवेश सर्व्वभूतनमस्कृत।
यदर्थञ्च समाहूता आज्ञापय वचो मम ॥ २
किं सागरान् शोषयामः पाटयामः सुपर्व्वतान्।
हन्म एता दिशः सर्व्वा यमं वा सह बान्धवैः ॥ ३
कस्याद्य व्यसनं घोरं करिष्यामस्तवाज्ञया।
कस्य वाऽद्योत्सवं देव सर्व्वकामसमृद्धिमत् ॥ ४
तांस्तथावादिनः सर्व्वान् सततं भक्तवत्सलः।
उवाच देवः सम्पूज्य गणान् रुद्रो महेश्वरः ॥ ५
शृणुध्वं यत्कृते पूर्व्वमिहाहूता जगद्धिताः।
श्रुत्वा च प्रणतात्मानः कुरुध्वं तदशङ्किताः ॥ ६
नन्दीश्वरोऽयं पुत्त्रो नः सर्व्वेषामीश्वरेश्वरः।
प्रियो गणाग्रणीर्देवैः क्रियतां वचनान्मम ॥ ७
सैनापत्येऽभिषिञ्चध्वं महागणपतिं पतिम्।
अद्यप्रभृति युष्माकमयं नन्दीश्वरः प्रभुः ॥ ८
एवमुक्ते भगवता रुद्राणी-गणकाः शुभाः।
एवमस्त्विति सम्मन्त्र्य सम्भारांस्ते ह्यकुर्व्वत ॥ ९
तत् सर्व्वञ्च स्वयं दिव्यं जाम्बूनदसमप्रभम्।
आसनं मेरुसङ्काशं शुभं समुपकल्पयन् ॥ १०
शातकुम्भमयञ्चापि वरं चामीकरप्रभम्।
मुक्तादामनिभञ्चैव मणिरत्नविभूषितम् ॥ ११
स्तम्भैश्च वैदूर्य्यमयैः किङ्किणीजालसङ्कुलम्।
चतुरङ्गकसंयुक्तं मण्डपं विश्वतोमुखम् ॥ १२
कृत्वा च शुवमप्येतदासनप्रवरे शुभे।
तस्मिन् संस्थाप्य देवेशमभ्यषिञ्चन्त नन्दिनम् ॥ १३
वासोयुगं ततो दिव्यं दिव्यगन्धांस्तथैव च।
केयूरं कुण्डले चैव मुकुटं हारमेव च ॥ १४
पट्टिशं शूलवज्रञ्च रशनाञ्च स्वयं हरः।
छत्त्रञ्चैवास्य जग्राह बालव्यजनमेव च ॥ १५
ऋषयस्तुष्टुवुश्चैनं पितामहपुरोगमाः।
नमः कुष्माण्डरागाय वज्रोद्यतकराय च ॥ १६
शालङ्कायनपुत्त्राय हलमार्गोत्थिताय च।
शिलादस्य च पुत्त्राय रुद्रजाप्यपराय च ॥ १७
रुद्रभक्ताय देवाय नमस्ते जलशायिने।
नमो गणाधिपतये महायोगीश्वराय च ॥ १८
दण्डघण्टाय चण्डाय एकादशशताय च।
अहयायामृतायैव अजरायाव्ययाय च ॥ १९
पशूनां पतये चैव रुद्ररूपधराय च।
नमः प्रबलवेशाय सर्व्वज्ञायाजिताय च ॥ २०
अनेकशिरसे चैव अनेकवदनाय च।
किरीटिने कुण्डलिने महापरिघबाहवे ॥ २१
पाहि सर्व्वगणांश्चैव पाहि देव नमोऽस्तु ते।
एवं स्तुत्वा तदा देवस्तस्मिन् व्यास महात्मने ॥ २२
प्राञ्जलिः प्रणतो भूत्वा जयशब्दं चकार ह।
ततो देवा जयेत्यूचुस्ततो दैत्यास्ततोऽसुराः ॥ २३
ततः सर्व्वाणि भूतानि ब्रह्मा शक्रस्तथैव च।
डिण्डिमा धेनुकाश्चैव मर्द्दनाश्च सहस्रशः ॥ २४
ततः शङ्खाश्च भेर्य्यश्च मर्द्दलाश्च सहस्रशः।
वंशाश्च वांशिकाश्चैव कर्क्करा गोविषाणिकाः ॥ २५
अवादयन्त गणपाः सयक्षासुरपन्नगाः।
नन्दीश्वरस्य य इमं स्तवं दैवतनिर्म्मितम् ॥ २६
यः पठेत् सततं मर्त्त्यः स गच्छेन्मम लोकताम्।
नमो नन्दीश्वरायेति यः कृत्वा स्तुतिमाचरेत् ॥ २७
तस्य कुष्माण्डराजेभ्यो न भयं विद्यते क्वचित्।
प्रभाते यः पठेन्नित्यं स्वयं वै भावसंयुतः ॥ २८

तस्य देवो वरं दद्यात् स्तवेनानेन पूजितः।
न भयं तत्र भवति भयेभ्यो व्यास सर्व्वदा ॥ २९
नन्दीश्वरं ये प्रणमन्ति नित्यं
प्रसन्नसर्व्वेन्द्रियशुद्धसत्त्वाः।
ते देवदेवस्य सदातिपूज्या
दृष्टा विशिष्टाश्च गणा भवन्ति ॥ ३०

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां नन्दीश्वराभिषेको नामैकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

पञ्चाशोऽध्यायः।

सनत्कुमार उवाच।

ततस्तानागतान् देवान् देवानामधिपो हरः।
मारुतान् प्राह सम्पूज्य कन्यार्थं सत्पतिः प्रभुः ॥ १
आमन्त्र्य नाम्ना तान् देवान् सर्व्वान् शक्रपुरोगमान् ॥ २
मारुता वो महाभागा महासत्त्वा महौजसः।
युष्माकं प्रीतिदा कन्या सुभगा दिव्यरूपिणी।
दातुमर्हथ तां शुद्धां स्नुषामेतां सतीं मम ॥ ३

देवा ऊचुः।

युष्माकञ्चैव तस्याश्च सर्व्वस्य जगतः सदा।
प्रभुरिष्टस्त्रिलोकेश न त्वं याचितुमर्हसि ॥ ४
तथैव देवदेवश्च त्वं नो गतिरनुत्तमा।
मान्यः परावरेशान यस्य त्वं सदसद्गुरुः ॥ ५
पिता न कश्यपः श्रीमान् मरीचिश्च पितामहः (क)।
पिता ब्रह्मा च तस्यापि देव त्वं प्रपितामहः ॥ ६
स त्वं पितामहोऽस्माकं न त्वं याचितुमर्हसि।

ईश्वर उवाच।

नाहमर्हामि कल्याणीं सत्यं वो भाषितं वचः ॥ ७
किन्तु लोकहितार्थाय मुनीनाञ्चेदृशं तथा।
अदत्तां न ग्रहीष्यामि एष धर्म्मः सनातनः ॥ ८
श्रुत्वा वाक्यन्तु देवेशात् मरुद्भिर्देवसत्तमात्।
तत्क्षणान्मनसि ध्यात्वा देवदेववरं तदा ॥ ९
स्वयं होता तु तत्रासीद्ब्रह्मा लोकपितामहः।

वृत्ते च पाणिग्रहणे गन्धर्व्वाः सह चारणैः।
नारदः पर्व्वतश्चैव चित्रासनः सपार्षदः।
सर्व्वाश्वः सुरुविश्चैव हाहा हूहूस्तथैव च।
एते चान्ये च गन्धर्व्वा जगुर्मधुरस्वराः।
उर्व्वशी चैव रम्भा च घृताची लोकविश्रुता।
तिलोत्तमा च विख्याता अन्याश्चाप्सरसः
अनृत्यन्त महाभागा नृत्यं देवमनोहरम्।
एवं समभवद्व्यास विवाहस्तस्य धीमतः।
नन्दिनो गणमुख्यस्य अनौपम्यो मनोहरः।
ततः स सत्कृतोद्वाहो नन्दी गत्वा महात्म
पादौ ववन्दे देवस्य तथा विष्णोर्जगत्पतेः।
पुनर्देव्याः स वै व्यास ब्रह्मणः स तथा पु
शिलादस्य कुले चायं श्रिया परमया यु

ईश्वर उवाच।

वरं वृणीष्व पुत्र त्वं स्नुषा चेयं तव प्रि
ददामि ते वरं तुष्ट्या मनसा यदभीप्सित

नन्दीश्वर उवाच।

भगवन् यदि तुष्टोऽसि त्वयि भक्तिर्दृढास्तु
सदा कालं महादेव भव तुष्टो भवोद्भव।
पितरं मम देवेश महेश्वर जगत्पते।
अनुग्रहेण दिव्येन योक्तुमर्हसि कामद।

देवदेव उवाच।

सदाहं तव नन्दीश सन्तुष्टस्तु गणेश्वर।
देव्या च सहितो वत्स शृणु मे परमं व
सदेष्टश्च वरिष्ठश्च परमैश्वर्य्यसंयुतः।
महायोगी महेष्वासः प्रपिता स पिताम
अजयश्चैव जेतास्य पूज्येशश्च महाबलः।
अहं यत्र भवांस्तत्र यत्र त्वं तत्र चाप्यह
अयञ्च ते पिता पुत्र परमैश्वर्य्यसंयुतः।
भविष्यति गणाध्यक्षो यन्ता गणपतिश्व
पितामहोऽपि ते वत्स ये चान्ये तव वं
मत्समीपं गमिष्यन्ति मया दत्तवरास्त
पर्व्वतञ्चैव वैभाजं कामगं सर्व्वकामद
उपपन्नं वनैर्दिव्यैः प्रयच्छामि जलाढ्य
ततो देवी महाभागा नन्दिनं वरदा
वरं ब्रूहि च ते पुत्र मत्तः कामान् व

(क) अत्र "कश्यपः पुलहः श्रीमान् मरीचिश्च पितामहः।" इति पाठान्तरं क्वचिद्दृश्यते।

नन्दीश्वर उवाच।

वरं मे देवि भक्तिर्मे सदा तुभ्यं भवेदिति।
ततो मरुत्सुता चैव देव्याश्चैत्य न्यवेदयत्॥ २७
पादयोः पतितां दृष्ट्वा तुष्टा देवी ततोऽब्रवीत्।
वत्से वरं यथेष्टं हि त्रिनेत्रा जन्मवर्ज्जिता॥ २८
पुत्रपौत्रैस्तु भक्तिर्मे तथा भर्त्तरि चैव हि।
नित्यं ध्यानपरा स्यान्मे ज्ञाने च मतिरुत्तमा॥ २९
एतद्भवन्तु ते पुत्रि देवौ ते च वरप्रदौ।
देव्याश्च वचनं श्रुत्वा ब्रह्म-नारायणावुभौ॥ ३०
ऊचतुर्मुदितौ देवाविवमस्त्विति भाविनि।
नारायणमथालोक्य ब्रह्मणा सहितं हरः॥ ३१
उवाच सहितौ देवौ प्रहृष्टेनान्तरात्मना।
अद्यप्रभृति नन्दीशः पुत्राभ्यां मानितः सदा॥ ३२
प्रभुश्चैव हि देवानां प्रतीहारश्च मे सदा।
एवं भवतु देवेति सहितौ तावभाषताम्॥ ३३
देवा रुद्रा गणाश्चैव सर्व्वदेवप्रिये समान्।
वरान् ददुर्महासत्त्वा एवमेतद्भविष्यति॥ ३४
ततो नन्द्यब्रवीत् सर्व्वान् भवतां भक्तिरस्तु मे।
ऐश्वर्य्यञ्च ममाचर्य्यं भवद्भिश्चानुमोदितम्॥ ३५
सर्व्वे प्रिया मे सततं भवताञ्चाप्यहं प्रियः।
एकत्र वासश्च सदा न च कालविपर्य्ययः॥ ३६

रुद्रगणा ऊचुः।

भवान् मन्ता च यन्ता च गतिश्चागतिरेव च।
अस्माकमीश सर्व्वेषां देवानामपि चेश्वरः॥ ३७
चरिष्यतां हरस्याग्रे रुद्राणां रुद्रसत्तमः।
ऋषीणां देवतानाञ्च प्रमथानां तथैव च॥ ३८
महाबलो महायोगी भविष्यसि न संशयः।
अस्माकं भवनाथस्य नायकोऽथ विनायकः॥ ३९

त्वं वै महासेनसमः सुराणां
नारायणेनामरपूजितेन।
स्वयम्भुवा चैव तु वानलेन
देव्या युतस्त्वं भव तात देव॥ ४०

यदुक्तं भवता यस्तु सर्व्वजाप्येश्वरेश्वरः।
महादेवं तदत्रास्तु हरस्येति नमो नमः॥ ४१
जाप्येश्वरनिकेतश्च जाप्येश्वरविभावितः।
त्वञ्चैव सर्व्वदाता च वरदो भव दीक्षितः॥ ४२
सर्व्वतः सर्व्वलोकेशो देवदेवपतिर्वरः।
स एवं सर्व्वदेवैस्तु वरदैः प्रतिबोधितः॥ ४३
उवाच वचनं सर्व्वान् ब्रूत किं करवाणि वः।
एवमुक्तास्च गणपा रुद्राश्च भावभाषितम्॥ ४४
तमब्रुवन् दिव्यज्ञाना ज्ञानं देवस्य सन्निधौ।
त्वमस्माकं गणाध्यक्षः स्तुतो देवेन शूलिना॥ ४५
अस्माभिश्चाभिषिक्तास्तु नायको मोक्षदायकः।
स त्वं शिशुश्च सौम्यश्च गुणवान् निगुणोऽपि च॥ ४६
क्षमा-शौच-दमोपेतो भवान् नः प्रियकृत् सदा।
एवमुक्तस्तदा नन्दी सर्व्वान् प्रबलमानितः॥ ४७
शिरस्यञ्जलिमादाय गणपानस्तुवत् तदा।
नमो वः सर्व्वभूतेभ्यो नमो योगिभ्य एव च॥ ४८
नमः परमयोगिभ्यो जटिलेभ्यश्च वो नमः।
नमो विश्वस्वरूपेभ्यो विश्वरूपेभ्यस्तथैव च॥ ४९
नमो वल्कलवासिभ्यः कृत्तिवासिभ्य एव च।
नमो देवेश्वरेभ्यश्च बहुरूपेभ्य एव च॥ ५०
धीरेभ्यश्च द्युमद्भ्यश्च संछिन्नेभ्यो नमो नमः।
नमो मुनिभ्यो मौनिभ्यो विप्रेभ्यश्च नमो नमः॥ ५१
नमः सहस्ररूपेभ्यः शतरूपेभ्य एव च।
नमः संयतरूपेभ्यो वायुरूपेभ्य एव च॥ ५२
नमो मार्ज्जाररूपेभ्य कालरूपेभ्यः एव च।
देवासुरमनुष्याणामाप्यायिभ्यो नमो नमः॥ ५३
नमो दैवतकारिभ्यः पवनेभ्यस्तथैव च।
नमोऽग्निभ्यस्तु वायुभ्यो वरुणेभ्यस्तथैव च॥ ५४
नमस्चादित्यरूपेभ्यः सर्व्ववायुभ्य एव च।
नमो वामनरूपेभ्यः कामरूपेभ्य एव च॥ ५५
नमोऽङ्गरः सर्व्वदेवानां नमः सर्व्वगताः शुभाः।
ग्रहेभ्यश्च नमो वोऽस्तु मोक्षेभ्यश्च नमस्तथा॥ ५६
समानेभ्योऽसमानेभ्यः शुभाशुभेभ्यस्तथैव च।
नमः सौम्यगिरिभ्यश्च भवन्तु गणनायकाः॥ ५७

इति स्तुता गणपतयो महाबलाः
शुभैर्वचोभिः सुरसिद्धपूजिताः।
दिशन्तु मे सुखमतुलं सुखप्रदा
बलञ्च वीर्य्यं स्थिरताञ्च संयुगे॥ ५८
ततोऽक्षयं ज्ञानमनुत्तमा गति-
र्यमस्तथा वा बहुधर्म्मनिश्चितम्।

दिशन्तु सर्व्वं मनसेप्सितञ्च यत्
सुरेश्वरा यक्ष-पिशाच-गुह्यकाः ॥ ५९
इदं नन्दिकृतं स्तोत्रं यो वाचयति नित्यशः।
सोऽश्वमेधावभृथवत् सर्व्वपापैः प्रमुच्यते ॥ ६०
सन्ध्यायामपरस्यान्तु यत् पापञ्च कृतं दिने।
पूर्व्वस्यां सन्त्यजेच्चापि सर्व्वरात्रं न संशयः ॥ ६१
ततस्ते गणपाः सर्व्वे संयुतास्तेन धीमता।
विसृष्टाश्च तथा जग्मुः प्रणिपत्य वृषध्वजम् ॥ ६२
देवाश्च ऋषयश्चैव स देवोऽपि महेश्वरः।
प्सितं सह देव्या वै जगामाकाशमव्ययम् ॥ ६३
यश्चेदं नन्दिनो जन्म वरदानं तथैव च।
अभिषिक्तं विवाहञ्च पठेद्वा श्रावयेत् तथा ॥ ६४
ब्राह्मणः पाठतो याति नन्दीश्वरसलोकताम् ॥ ६५
यो नियतस्तु पठेत् प्रयतात्मा
सर्व्वमिदं शृणुते भवभक्त्या।
सोऽपि भवेत् परलोकनिवासी
नन्दिसमोऽनुचरोऽपि भवस्य ॥ ६६

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां नन्दिविवाहो नाम
पञ्चाशोऽध्यायः ॥ ५० ॥

एकपञ्चाशोऽध्यायः।

ऋषय ऊचुः।

कस्मिन् देशे महापुण्यमेतदाख्यानमुत्तमम्।
वृत्तं ब्रह्मपुरोगाणां कस्मिन् काले महाद्युते ॥ १
एतदाख्याहि नः सर्व्वं यथावृत्तं तपोधन।

सनत्कुमार उवाच।

यथा श्रुतं मया सर्व्वं वायुना जगदात्मना ॥ २
कथ्यमानं द्विजश्रेष्ठाः शतवर्षसहस्रिके।
नीलता येन कण्ठस्य देवदेवस्य शूलिनः ॥ ३
तदहं कीर्त्तयिष्यामि शृणुध्वं शंसितव्रताः।
उत्तरे शैलराजस्य सरःसु च सरित्सु च ॥ ४
पुण्योद्यानेषु तीर्थेषु देवतायतनेषु च।
गिरिशृङ्गेषु तुङ्गेषु मञ्जरोपवनेषु च ॥ ५
एवं भक्त्या महात्मानं मुनयः संशितव्रताः।
स्तुवन्त्येवं महादेवं तत्र तत्र यथाविधि ॥ ६
ऋग्यजुःसामरूपाभिर्गीर्भिश्चाथर्व्वणादिभिः।
ओँह्रङ्कारनमस्कारैरर्च्चयन्ति सदाशिवम् ॥ ७
प्रवृत्ते ज्योतिषां चक्रे मध्यं प्राप्ते दिवाकरे।
देवता नियतात्मानः सर्व्वे तिष्ठन्ति तां कलाम् ॥ ८
अथ वै नियमस्यान्ते प्राणिनां जीवनोद्भवः।
नमस्ते नीलकण्ठाय इत्युवाच सदागतिः ॥ ९
तं श्रुत्वा भावितात्मानो मुनयः संशितव्रताः।
वालखिल्येतिविख्याताः पतङ्गसहचारिणः ॥ १०
अष्टाशीतिसहस्राणि ऋषीणामूर्द्ध्वरेतसाम्।
ते स्म पृच्छन्ति वै वायं वायुपर्णाम्बुभोजनाः ॥ ११

ऋषय ऊचुः।

नीलकण्ठेति यत् प्रोक्तं त्वया पवन सत्तम।
एतद्गुह्यं पवित्राणां पुण्यं पुण्यवतां वर ॥ १२
श्रोतुमिच्छाम तत् सर्व्वं त्वत्प्रसादात् प्रभञ्जन।
नीलता केन कण्ठस्य प्रकारेणाम्बिकापतेः ॥ १३
श्रोतुमिच्छामहे सम्यक् त्वद्वक्त्रात् तु विशेषतः।
या वै वाचः प्रवर्त्तन्ते सर्व्वास्ताः प्रेरितास्त्वया ॥ १४
वर्णस्थाने गते वायो वाग्विधौ सम्प्रवर्त्तते।
ज्ञानपूर्व्वं यथोत्साहं त्वत्तो वायुः प्रवर्त्तते ॥ १५
त्वयि निश्वसमाने तु सर्व्वे वर्णाः प्रकीर्त्तिताः।
यतो वाचो निवर्त्तन्ते देहवन्धाश्च दुर्लभाः ॥ १६
तत्रापि तेऽस्ति सद्भावः सर्व्वगस्त्वं सदानिलः।
नान्यः सर्व्वगतो देवस्त्वद्दतेऽस्तीह सर्व्वतः ॥ १७
अथ ते जीवलोकस्तु प्रत्यक्षं जीवनोद्भवः।
वेत्ति तावत् स्मृतिर्मेधा समानोऽयं त्वमीश्वर ॥ १८
ब्रूहि मङ्गलसंयुक्तां कथां पापप्रणाशिनीम्।
श्रुत्वा वाचं ततस्तेषां मुनीनां भावितात्मनाम् ॥ १९
प्रत्युवाच महातेजा वायुर्लोकनमस्कृतः।

वायुरुवाच।

शृणुध्वमृषयो विप्रा वेद-वेदाङ्गपारगाः ॥ २०
वशिष्ठो नाम धर्म्मात्मा मानसो वै प्रजापतेः।
पप्रच्छ कार्त्तिकेयं वै मयूरवरवाहनम् ॥ २१
क्रौञ्चजीवितहर्त्तारं गौरीहृदयनन्दनम्।
महिषासुरनारीणां नयनाञ्जनतस्करम् ॥ २२
महासेनं महात्मानं मेघस्तनितनिस्वनम्।

तमानतः प्रहर्षेण बालकं स्वच्छरूपिणम् ॥ २३
ब्रूहि मङ्गलसंयुक्तां कथां पुण्यां जनप्रियाम्।
एतदाम्नायं दान्ताय भक्ताय ब्रूहि पृच्छते ॥ २४
श्रुत्वा वाक्यं ततस्तस्य वशिष्ठस्य महात्मनः।
प्रत्युवाच महातेजा दैत्यारिः पावकोपमः ॥ २५
श्रूयतां वदतां श्रेष्ठ कथ्यमानमिदं मया।
उमोत्सङ्गोपविष्टेन यथा पूर्व्वं श्रुतं मया ॥ २६
पार्व्वत्याश्चैव संवादं शर्व्वस्य च महात्मनः।
तदहं कीर्त्तयिष्यामि त्वत्प्रियार्थं महामुने ॥ २७
कैलासशिखरे रम्ये नानाधातुविचित्रिते।
तरुणादित्यसङ्काशे तप्तकाञ्चनभूषिते ॥ २८
वज्रस्फटिकसोपाने चित्रपट्टशिलातले।
जाम्बूनदमये दिव्ये नानाधातुविभूषिते ॥ २९
नानाद्रुमलताकीर्णे नित्यं पुष्पफलाश्रये।
हंसकारण्डवाकीर्णे किन्नरैरुपशोभिते ॥ ३०
जीवञ्जीवकजातीनां विरुतैश्चैव कूजिते।
कोकिलालापबहुले सिद्धचारणसेविते ॥ ३१
सौरभेयनिनादाढ्ये मेघस्तनितनिस्वने।
विनायकभयोद्विग्नैः किन्नरैर्मुक्तकन्दरे ॥ ३२
वंशवादित्रनिर्घोषैः श्रोत्रेन्द्रियमनोहरैः।
दोलालम्बितसम्पात-सुरसङ्घनिषेविते ॥ ३३
ध्वजालम्बितदोलानां घण्टानां निनदावृते।
वर्णकोघोषबहुले नित्यं व्यापारसङ्कुले ॥ ३४
मुखप्रयत्नवाद्यैश्च वर्णितास्फोटितैस्तथा।
क्रीड़ाचेष्टितवाद्यानां निर्घोषैः पूर्णकन्दरे ॥ ३५
हासैः सन्त्रासजननैर्विकरालमुखैस्तथा।
देहवर्णैर्विचित्रैश्च प्रक्रीड़ितगणेश्वरैः ॥ ३६
व्याघ्रसिंहमुखैर्घोरैर्भीमरूपैर्दुरासदैः।
मृगमेषमुखैश्चान्यैर्गजवाजिमुखैस्तथा ॥ ३७
विड़ालवदनैश्चोग्रैः क्रोष्टु-वानरमूर्त्तिभिः।
ह्रस्वैर्दीर्घैः कृशैः स्थूलैर्लम्बोदरमहोदरैः ॥ ३८
ह्रस्वजङ्घैः प्रलम्बोष्ठैः स्थूलजङ्घैस्तथापरैः।
गोकर्णैरेककर्णैश्च महाकर्णैरकर्णकैः ॥ ३९
एकपादैर्महापादैर्बहुपादैरपादकैः।
एकशीर्षैश्चतुःशीर्षैर्बहुशीर्षैरशीर्षकैः ॥ ४०
एकनेत्रैर्महानेत्रैश्चतुर्नेत्रैरनेत्रकैः।

विविधैश्च महाघोरैर्भूतैर्भूतपतिर्वृतः ॥ ४१
विचित्ररत्नाङ्गविभूषणाञ्चित
शिलातले हेममये मनोरमे।
सुखोपविष्टं मदनाङ्गनाशनं-
जगाद वाक्यं गिरिराजपुत्री ॥ ४२

देव्युवाच।

भगवन् देवदेवेश गोवृषाङ्कितवाहन।
तव कण्ठे महादेव भ्राजतेऽम्बुदसन्निभम् ॥ ४३
नात्युल्वणं शुभं शुद्धं नीलाञ्जनचयोपमम्।
किमिदं देव दीप्तं ते कण्ठे कामाङ्गनाशन ॥ ४४
हेतुः कः कारणं किं वा येनेदं नीलमीश्वर।
एतत् सर्व्वं यथान्यायं श्रोतुमिच्छामि तत्त्वतः ॥ ४५
श्रुत्वा वाक्यं ततस्तस्याः पार्व्वत्याः पार्व्वतीप्रियः।
कथां मङ्गलसंयुक्तां कथयामास शङ्करः ॥ ४६

महेश्वर उवाच।

मथ्यमानेऽमृते पूर्व्वं क्षीरोदे सुरदानवैः।
अग्रे समुत्थितं तस्माद्विषं कालानलप्रभम् ॥ ४७
तद्दृष्ट्वा सुरसङ्घाश्च दैत्याश्चैव वरानने।
विषण्णवदनाः सर्व्वे गतास्ते ब्रह्मणोऽन्तिकम् ॥ ४८
दृष्ट्वा सुरगणान् भीतान् ब्रह्मोवाच महाद्युतिः।
किमर्थं वै महाभागा भीता उद्विग्नमानसाः ॥ ४९
मयाष्टगुणमैश्वर्य्यं भवतां सम्प्रवर्त्तितम्।
त्रैलोक्यस्येश्वरा यूयं सर्व्वे च विगतज्वराः ॥ ५०
विमानचारिणः सर्व्वे सर्व्वे स्वच्छन्दचारिणः।
अध्यात्मे चाधिभूते च अधिदैवे च सर्व्वशः ॥ ५१
प्रजाः कर्म्मविपाकेन शक्ता यूयं प्रवर्त्तितुम्।
येन यूयं समुद्विग्ना मृगाः सिंहार्द्दिता इव ॥ ५२
एतत् सर्व्वं यथान्यायं शीघ्रमाख्यातुमर्हथ।
श्रुत्वा वाक्यं ततस्तस्य ब्रह्मणः परमात्मनः ॥ ५३
ऊचुस्ते ऋषिभिः सार्द्धं देव-दैत्येन्द्र-दानवाः।
सुरासुरैर्मथ्यमाने क्षीरोदे सुरसत्तम ॥ ५४
अभवन्मेघसङ्काशं नीलाञ्जनचयोपमम्।
प्रादुर्भूतं विषं घोरं संवर्त्ताग्निसमप्रभम् ॥ ५५
कालकूटमिति ख्यातं विषं विषमवेगधृक्।
तं दृष्ट्वा सुरसङ्घाश्च दैत्याश्चैव वरानने ॥ ५६
विषण्णवदनाः सर्व्वे त्वामेव शरणं गताः।

ब्रह्मोवाच।

नमस्तुभ्यं विरूपाक्ष नमस्ते दिव्यचक्षुषे ॥ ५७
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः।
सांख्याय चैव योगाय भूतग्रामाय वै नमः ॥ ५८
नमस्त्रैलोक्यनाथाय भूतानां पतये नमः।
नमः सुरारिहन्त्रे च सोमसूर्य्याग्निचक्षुषे ॥ ५९
ब्रह्मणे चैव रुद्राय विष्णवे चैव ते नमः।
मदनाङ्गविनाशाय कालकालाय वै नमः ॥ ६०
रुद्राय वसुरेताय देवदेवाय रंहसे।
कपर्द्दिने करालाय शङ्कराय हराय च ॥ ६१
कपालिने विरूपाय शिवाय वरदाय च।
त्रिपुरघ्ने मखघ्नाय मन्त्राणां पतये नमः ॥ ६२
बुद्धाय चैव शुद्धाय मुक्ताय केवलाय च।
नमः कपालहस्ताय (क) दिग्वासाय शिखण्डिने ॥ ६३
शग्राय चैव चोग्राय विप्रायानेकचक्षुषे।
रजसे चैव सत्त्वाय नमस्तेऽव्यक्तयोनये ॥ ६४
अनित्याय च नित्याय नित्यानित्याय वै नमः।
अचिन्त्याय च चिन्त्याय चिन्त्याचिन्त्याय वै नमः ॥ ६५
भक्तानामार्त्तिनाशाय नारायणप्रियाय च।
उमाप्रियाय सर्व्वाय नन्दिवक्त्रानलाय च ॥ ६६
पक्षमासार्द्धमासाय ऋतुसंवत्सराय च।
बहुरूपाय मुण्डाय दण्डिने च सवल्किने ॥ ६७
वल्किने धन्विने चैव जटिने ब्रह्मचारिणे।
ऋग्यजुःसामरूपाय पुरुषायेश्वराय च ॥ ६८
लोकत्रयनिपाताय इन्द्राय वरुणाय च।
इत्येवमादि चरितं ततस्तुभ्यं नमोऽस्तु ते ॥ ६९

क्षितेः पितस्तुत्यतमं भवन्तं
कस्तु प्रसादेन विना ददर्श।
ज्ञानन्तु भक्तिं मम देवदेव
प्रसीद गङ्गाद्युतिसिक्तकेन ॥ ७०
सूक्ष्मोऽसि देवातिमयादिचिन्त्यो
न हि प्रभुव्यक्तमपेहि रुद्र ॥ ७१

महेश्वर उवाच।

एवं भगवता पूर्व्वं ब्रह्मणा लोककर्त्तृणा।
स्तुतोऽहं विविधैः स्तोत्रैर्वेदवेदाङ्गसम्भवैः ॥ ७२

(क) कमलहस्तायेति वा पाठः।

ततः प्रीतो ह्यहं तस्मै ब्रह्मणे सुमहात्मने।
दत्त्वा सुमुखया प्रीत्या विद्ययाहमथाब्रवम् ॥ ७३
भगवन् भूतभव्येश भूताधिप महातपः।
किं कार्य्यं ते मया ब्रह्मन् कर्त्तव्यं मम सुव्रत ॥ ७४
श्रुत्वा वाक्यं ततो ब्रह्मा प्रत्युवाचाम्बुजेक्षणः।
भूत-भव्य-भवन्नाथ श्रूयतां कारणं मम ॥ ७५
सुरासुरैर्मथ्यमाने पयोधौ पङ्कजेक्षण।
अभवन्मेघसङ्काशं नीलाञ्जनचयोपमम् ॥ ७६
प्रादुर्भूतं विषं घोरं संवर्त्ताग्निसमप्रभम्।
कालमृत्युमिवोद्भूतं युगान्तादित्यवर्च्चसम् ॥ ७७
त्रैलोक्येष्वादिसूर्य्याभं विस्फुरन्तं समन्ततः।
दृष्ट्वा सर्व्वे वयं भीता दृष्टुं वृषभवाहनम् ॥ ७८
तं पिबस्व महादेव लोकानां हितकाम्यया।
भवानग्रस्य भोक्ता वै भवान् देववरप्रदः ॥ ७९
भवांस्तस्य महावेगं समर्थः संनियच्छितुम्।
न हि कश्चित् पुमान् शक्तस्त्रिषु लोकेषु विद्यते ॥ ८०
येनाभ्युद्धतमात्रेण कृतः कृष्णो जनार्द्दनः।
ब्रुवतस्तु वरारोहे ब्रह्मणः परमेष्ठिनः ॥ ८१
वाढ़मित्येव तद्वाक्यं प्रतिगृह्य वरानने।
ततोऽहं पातुमारब्धो विषमन्तकसन्निभम् ॥ ८२
पीतञ्च मे महाघोरं विषं सुरगणार्द्दनम्।
कण्ठं समभिरक्षन्तु दृष्ट्वा कृष्णाम्बुजेक्षणे ॥ ८३
तद्दृष्ट्वोत्पलपत्राभं विषं कालानलप्रभम्।
तक्षकं नागराजानं लेलिहानमिवापरम् ॥ ८४
तदोवाच महातेजा ब्रह्मा लोकपितामहः।
शोभसे त्वं महादेव कण्ठेनानेन सुव्रत ॥ ८५
इति तस्य वचः श्रुत्वा मया गिरिवरात्मजे।
पश्यतां सुरसङ्घानां दैत्यानाञ्च वरानने ॥ ८६
यक्ष-गन्धर्व्व-नागानां पिशाचोरगरक्षसाम्।
धृतं कण्ठे विषं घोरं ततः श्रीकण्ठता मम ॥ ८७

तत् कालकूटं विषमुग्रतेजो
धृतञ्च यत् पर्व्वतराजपुत्त्रि।
सम्पश्यमानाः सुर-दैत्यसङ्घा
हृष्टाः परं विस्मयमागताश्च ॥ ८८

ततः सुरगणाः सर्व्वे सयक्षोरग-राक्षसाः।
ऊचुः प्राञ्जलयो भूत्वा मत्तमातङ्गगामिनि।

अहो बलं वीर्य्यपराक्रमं ते
अहो वपुर्यौवनबलं तदेव।
अहो विभूतिस्तव देवदेव
गङ्गाजलप्लावितकेशपाश ॥ ९०
त्वमेव विष्णुश्चतुराननस्त्वं
त्वमेव मृत्युर्धनदस्त्वमेव।
त्वमेव वह्निः परमस्त्वमेव
त्वमेव सूक्ष्मं परमञ्च सूक्ष्मम् ॥ ९१
त्वमेव योगैरभिगम्य एक-
स्त्वमेव सर्व्वस्य चराचरस्य।
पृथग्विभोक्ता प्रलये च गोप्ता
इतीदमुक्त्वा वचनं सुरेन्द्राः ॥ ९२
प्रपद्य सोमं प्रणिपत्य तस्थुः
समेत्य सर्व्वे विषदोषमुक्ताः।
गता विमानैरनिलोग्रवेगै-
र्निनादयन्तो विदिशो दिशश्च ॥ ९३
अथावसन् नाकमुपेत्य सर्व्वे
महेश्वरस्य स्तवनं प्रचक्रुः ॥ ९४
इत्येतत् परमं गुह्यं गुह्याद्गुह्यतरं महत्।
नीलकण्ठेति यत् प्रोक्तं त्रिषु लोकेषु विश्रुतम् ॥ ९५
स्वयं स्वयम्भुवा प्रोक्तां कथां पापप्रमोचनीम्।
यस्तु धारयते चैनां ब्रह्मोद्गीतां कथां शुभाम् ॥९६
तस्य वक्ष्याम्यहं सम्यग्गतिञ्चैवाप्यसत्व च।
विषं तस्य वरारोहे स्थावरं जङ्गमञ्च यत् ॥ ९७
गात्रं प्राप्य च सुश्रोणि क्षिप्रञ्च प्रतिहन्यते।
शमयत्यशुभं घोरं दुःस्वप्नञ्चापकर्षति ॥ ९८
स्त्रीणां वल्लभतां याति सभायां पार्थिवस्य च।
विवादे जयमाप्नोति युद्धे शूरत्वमेव च ॥ ९९
गच्छति क्षेममध्वानं शरीरे नास्ति तद्भयम्।
शरीरभेदे वक्ष्यामि गतिं तस्य वरानने ॥ १००
हरिश्मश्रुर्नीलकण्ठः शशाङ्काङ्कितमूर्द्धजः।
नन्दितुल्यबलः श्रीमान् नन्दितुल्यपराक्रमः ॥ १०१
अभेद्यस्त्रिशिरास्त्वञ्चस्त्रिशूली वरवाहनः।
विचरत्यखिलान् सिद्धः सप्तलोकान् ममाज्ञया॥१०२
न हन्यते गतिस्तस्य अनिलस्य यथाम्बरे।
मम तुल्यबलो भूत्वा तिष्ठत्याभूतसंप्लवम् ॥ १०३
मम भक्त्या वरारोहे ये च शृण्वन्ति मानवाः।
तेषां गतिं प्रवक्ष्यामि इह लोके परत्र च ॥ १०४
गवां शतसहस्रस्य सम्यग्दत्तस्य यत् फलम्।
तत् फलं लभते मर्त्त्यः श्रुत्वा दिव्यामिमां कथाम् १०५
पादं वा यदि वाप्यर्द्धं श्लोकं श्लोकार्द्धमेव च।
यस्तु धारयते नित्यं रुद्रलोकं स गच्छति ॥ १०६
इतीतिहासं गिरिराजपुत्रि
मया सुतुष्टेन तवाम्बुजानने।
निवेदितं पुण्यफलादियुक्तं
स्वयञ्च गीतं चतुराननेन ॥ १०७
कथामिमां पुण्यफलादियुक्तां
निवेद्य देव्याः शशिबद्धमूर्द्धजः।
वृषस्य पृष्ठेन सहोमया प्रभु-
र्जगाम कैलासगुहां गुहप्रियः ॥ १०८
श्रुतं मया पापहरं महत् परं
निवेद्य तेभ्यः प्रययौ प्रभञ्जनः।
अधीत्य सर्व्वं लिखितं स तत्क्षणं
जगाम चादित्यपथं द्विजोत्तमाः ॥ १०९
इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
नीलकण्ठस्तवो नामैकपञ्चाशोऽध्यायः॥५१॥

द्विपञ्चाशोऽध्यायः।

व्यास उवाच।

इच्छामि वेत्तुं त्रिपुरञ्च दग्ध-
मेकेषुणा विप्र पिनाकधन्वा।
यथा पुरा भक्तवरप्रदेन
तन्मे मुने ब्रूहि यथा प्रवृत्तम् ॥ १
पृष्टस्तथैवं मुनिना मुनीन्द्रः
प्रश्नं यथावत् कथयाञ्चकार।
दग्धं यथा तत् त्रिपुरं तथा त-
च्छृणुष्व पुत्रेति यथाब्रुवन् वचः ॥ २
तस्मिन् हते दैत्यवरे नृसिंहे
पुरा हिरण्याक्षसुते प्रवीरे।
भग्नेषु दैत्येषु सदानवेषु
मयोऽथ दध्यावतिदुःखतप्तः ॥ ३

स विघ्नकृद्दानवराजलक्ष्म्या
रत्येव हीनो मकरध्वजोऽभूत् ।
आदाय दैत्यं सहतारकाख्यं
विद्युत्प्रभं विष्णुसमप्रभावम् ॥ ४
तपश्चचारोग्रसुघोरकर्म्मा
दैत्यौ च तावन्तकतुल्यकल्पौ ।
ते शीतकाले हिमपर्व्वतस्था
ग्रीष्मे च पञ्चज्वलनाभितप्ताः ॥ ५
अब्दे पयःप्लावितभूमिभागी
चेरुस्तपः प्राग्रभयः प्रयत्नात् ।
तेषामगाद्दिव्यसमासहस्रं
तथायुतञ्चोग्रतपःस्थितानाम् ॥ ६
चर्म्मास्थिशेषा ज्वलनप्रभावा
सुखादिहीना दितिपुत्रसिंहाः ।
आदित्यतेजःप्रतिमानवीर्य्या
बभूवुरादित्यतपःप्रकाशाः ॥ ७
पितामहस्तानभिगम्य सर्व्वान्
प्रियंवदस्तान् वचनं बभाषे ।
तप्तं तपो वोऽघशतप्रमोचनं
वरन्त्विदानीं वृणुतेह हृष्टाः ॥ ८
तं प्राञ्जलिर्भूमिनिविष्टजानु-
र्मयः सुरेशं प्रणतोऽभ्युवाच ।
अवध्यतामप्रतिमं बलञ्च
स्थानञ्च दिव्यं परमं सुखञ्च ॥ ९
मृत्युर्यथा नैव भवेत् तदेव
वरं प्रयच्छेतमभीप्सितं नः ।
करोम्यहं यन्नगरं शुभाङ्ग
एभिः पुरद्दिव्यविमानकल्पम् ॥ १०
तन्मे भवेत् सर्व्वनरैरगम्यं
स्वच्छन्दसंस्थानगतिः पुरीयम् ।
इत्येवमुक्ते दनुजाधिपेन
ब्रह्मा वचस्तं मयमाबभाषे ॥ ११
दातुं न शक्यो वर एष तुभ्यं
तस्मादरं सान्तरमेतदेव ।
त्वं पुत्र याचस्व ततः प्रदास्ये
चित्तञ्च मा ते दनुजान्यथा भूत् ॥ १२
ततो मयः प्राह तथापि मूढो
वरो यथा प्रार्थित एष नोऽस्तु ।
ब्रवीमि यच्चान्यदहं सुरेश
तन्मेऽह सिद्धं प्रतियातु मह्यम् ॥ १३
पूर्णे सहस्रे तु पुरं समानां
सङ्गीभवत्यर्द्धनिमेषमात्रम् ।
तस्मिन् क्षणे यस्त्रिषु सङ्गतेषु
पुरेषु दिव्येषु सुरप्रवीरः ॥ १४
एकेषुणा यस्त्रिपुरं दहेत
स नो विनाशस्त्रिपुरस्य भूयात् ।
श्रुत्वा ततस्तद्वचनं मयस्य
ब्रह्मा वरं तं हृषितान्तरात्मा ॥ १५
ददावभीष्टं दनुजाधिपाय
दत्त्वा वरञ्च स्वपुरं जगाम ।
ततो मयस्तु त्रिपुरं ससर्ज्ज
जगद्विघाति च पुरादिकल्पे ॥ १६
अयोमयं तत् प्रथमं चकार
ततःपरं राजतमग्निकल्पम् ।
तृतीयमन्यत् पुरमाशु हैमं
ससर्ज्ज मेरोरिव शृङ्गमुग्रम् ॥ १७
सृष्टं तदा तत् त्रिपुरं मयेन
स्वर्गस्य रूपं प्रजहार दिव्यम् ।
द्वारैर्मनोज्ञैर्वलभी-गवाक्षै-
र्वीथ्यङ्गणैर्हैममयैः सुयुक्तम् ॥ १८
चन्द्रांशुसंमृष्टतमैश्च हर्म्म्यैः
शीतानिलाह्लादसुखप्रवेशैः ।
मुक्ता-प्रवालैर्मणिखण्डचित्रै-
रालम्बितैश्चित्रतड़ित्प्रकाशैः ॥ १९
वज्रैर्विचित्रैः पवनावधूतै-
श्चलत्पताकाशिरतीव रेजे ।
प्रासादपङ्क्तिस्थितरत्नखण्डै-
र्महामहौषधद्युतिसन्निकाशैः ॥ २०
सतोरणाभ्युच्छ्रितहर्म्म्यरयूथै-
रलङ्कृतं तत् त्रिपुरञ्च रेजे ।
सर्व्वर्त्तुपुष्पैः फलिभिर्मनोज्ञै-
र्वृतं समन्तात् तरुभिर्मनोज्ञैः ॥ २१

रत्नैस्तथोद्यानशतैरुपेतं
वन्यैरुपेतं तनुभिः फलाढ्यैः।
वापीभिराक्रान्तविशुद्धशाभिः
प्रफुल्लनीलोत्पलसंवृताभिः ॥ २२
दैत्यालयं तच्छुशुभे तथैव
प्रवृत्तकेकाविहगैर्महद्भिः।
तत् पुंनखाभिन्नपयोधराभि-
राकीर्णरत्नान्तविलोचनाभिः ॥ २३
सव्रीड़भीषच्चपलेक्षणाभि-
र्योषिद्भिराकीर्णमतीव रेजे।
लौहं पुरं यत् तु मयश्चकार
तत् तारकाख्याय ददौ मयश्च ॥ २४
पुरं द्वितीयं रजतालयं य-
द्विद्युत्प्रभायासुरराट् प्रदाय।
हैमं तृतीयं स्वयमेव दिव्यं
जग्राह राजा मय आत्मनोऽर्थे ॥ २५
अधिष्ठितं तत् त्रिपुरं तदाभूत्
समं त्रिभिस्तैर्दनुराजसिंहैः।
ते सर्व्वतः शत्रुबलान् विजित्य
प्रियासहायाः सहविप्रशल्यैः ॥ २६
सुखानि तस्मिन् विविधानि चापु-
स्त्रैलोक्यसौख्यानि विनाशयन्तः।
ते दर्प-मोहप्रतिबद्धरागा
जितानमन्यन्त ततो हि देवान् ॥ २७
मत्वा तु तेषां प्रसभं निपत्य
नानाविधाश्चक्रुरतीव पीड़ाः।
वनानि वैभ्राजपुरःसराणि
संभिद्य तान्यात्तसुमानि चक्रुः ॥ २८
तेषामतीतः स मयो महानलं
प्रकुर्व्वतां देवविनाशनानि।
ततो मयं ते प्रति जातकोपा
इन्द्रादयो देवगणास्तदैव ॥ २९
वृत्तं यथा सर्व्वमशेषमेत-
न्न्यवेदयन्नाशु पितामहाय।
तानाह देवः कमलासनस्तु
सर्व्वान् सुरेशान् प्रति सान्त्वयित्वा ॥ ३०

महाबलास्ते त्रिपुरासुरेन्द्रा
हन्तुं न शक्या स्वबलाद्भवद्भिः।
तस्मादयं विष्णुरहञ्च युष्मान्
प्रगृह्य शम्भुं शरणं प्रयामः ॥ ३१
गतिः सदा नः शशिभृत् सुरेशः
सर्व्वान् बलान् भक्ष्यति शूलपाणिः।
तथैव ते तु प्रतिपद्य देवा
ब्रह्मार्कशक्रानिलपावकाद्याः ॥ ३२
कैलासमागम्य सुरेश्वरं ते
दृष्ट्वा हरं तुष्टुवुराहतास्ते।
नमस्त्रिलोकेश्वरवन्दिताय
प्रियामरायामितविक्रमाय ॥ ३३
नमस्तु चन्द्रार्द्धजटाकलाप-
कान्तिप्रभाद्योतितशेखराय।
त्रैलोक्यदेवाय नमोऽस्तु नित्यं
पिनाकहस्ताय नमस्तथैव ॥ ३४
नमः प्रदीप्ताग्रपरश्वधाय
त्रिशूलहस्ताय नमोऽस्तु नित्यम्।
नमो नमो नन्दिवरप्रदाय
जगच्छरण्याय सुरेश्वराय ॥ ३५
नमः सदा हर्षवरप्रदाय
नमोऽस्तु यक्षेशवरप्रदाय।
स्थिताय नित्यं हिमवद्गिरीन्द्रे
कैलासवासाय नमः सदैव ॥ ३६
नमोऽस्तु मुक्ताशयकेतनाय
नमोऽस्तु नित्यं वृषभस्थिताय।
दिग्वाससे श्वेतवरप्रदाय
सम्यग्विमुक्ताय जगद्विधात्रे ॥ ३७
चन्द्रार्कशक्राग्निपितामहानां
स्रष्ट्रे नमो देववरेश्वराय।
सूक्ष्माय नित्यं परमेश्वराय
नित्यं नमः सर्व्वगताय गात्र ॥ ३८
नमः परायातिपरात्मने परः-
शतं नमः शङ्करसंज्ञिताय।
नमोऽस्तु शर्व्वाय धराधराय
नमोऽस्तु सर्व्वप्रभवाय नित्यम् ॥ ३९

सोमानिलार्कज्वलनाम्बुभूमि-
व्योमात्मकादिं सृजते नमोऽस्तु ।
पूष्णो नमो दन्तविनाशनाय
कामाङ्गनाशाय नमोऽस्तु नित्यम् ॥ ४०
नमः प्रधानाय नमो नमोऽस्तु
नमोऽस्तु नित्यं पुरुषोत्तमाय ।
रुद्राय सौम्याय वपुष्मते च
नमो नमः सर्व्वजगत्सृजे च ॥ ४१
नमः सृजे यक्षसुरासुराणां
नमस्त्रितीयेक्षणधारिणे च ।
नमो नमो नीलशिखण्डिने च
नमोऽस्तु नित्यं पुरुषोत्तमाय ॥ ४२
श्मशानवासाय नमः सदैव
नमोऽस्तु दैत्याङ्गविनाशनाय ।
नमः सदा मोहविनाशनाय
अज्ञाननाशाय च ते नमोऽस्तु ॥ ४३
नमः सदा मोक्षवरप्रदाय
नमः सदा चामृतसंस्थिताय ।
भर्त्रे नमो भूमिधरेन्द्रपुत्र्याः
पित्रे कुमारस्य नमोऽस्तु नित्यम् ॥ ४४
नमोऽस्तु विश्वेश वरप्रदाय
ब्रह्मात्मने विश्वसृजे नमोऽस्तु ।
नमो नमो देवसृजे विधात्रे
नमोऽस्तु दक्षस्य च यज्ञहन्त्रे ॥ ४५
नमोऽस्तु चण्डेशवरप्रदात्रे
योगीश्वराणां वरदाय तुभ्यम् ।
नमोऽस्तु ते शर्व्व दिगम्बराय
नमोऽस्तु रुद्राय सदैव धात्रे ॥ ४६
हराय शर्व्वाय नमो नमोऽस्तु
भीमाय शम्भो च नमः सदैव ।
प्रसाद्यमानः कुरु नः प्रसादं
तुष्टः परेशान्तु वरप्रदाय ॥ ४७
एवञ्च तेषां स्तुवतां सुराणां
ब्रह्मेन्द्रविष्ण्वर्कपुरःसराणाम् ।
प्रीतस्तया स्तोत्रविशेषभक्त्या
जगाद वाक्यं परमेप्सितार्थम् ॥ ४८
तुष्टोऽस्मि देवा व्रजताद्य शीघ्रं
समाहितश्चापदि किञ्चिदस्ति ।
दातास्मि सर्व्वं तदशेषतोऽद्य
किञ्चिन्न युष्माकमदेयमस्ति ॥ ४९

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां त्रिपुरोपाख्याने
द्विपञ्चाशोऽध्यायः ॥५२॥

त्रिपञ्चाशोऽध्यायः ।

देवा ऊचुः ।

ब्रह्मलब्धवरैर्देव मयाद्यैर्दानवैस्त्रिभिः ।
हृताश्चाप्सरसः सर्व्वा ध्वंसितानि वनानि च ॥ १
सर्व्वान् देवान् निहन्मोऽद्य श्वो हन्मेति च तेऽब्रुवन् ।
न तेषां निग्रहे शक्तो ब्रह्माप्येष पितामहः ॥ २
विष्णुर्वापि महादेव तेन नः सुमहद्भयम् ।
तद्वृथा त्रिपुरं नश्येद्देवाः स्युर्जयिनस्तथा ॥ ३
तथा कुरु सुरश्रेष्ठ वरोऽयं नः प्रदीयताम् ।
इति विज्ञापितः सर्व्वैस्तैर्देवैर्हि सुरोत्तमैः ॥ ४
इदमाह महातेजाः सर्व्वानाश्वासयन्निव ।
अर्द्धमंशं सुरगणा गृहीत्वा मम तेजसः ॥ ५
रुद्रतेजोमया भूत्वा दानवान् विनिहंस्यथ ।
ततस्ते पुनरेवेशं प्राहुर्वाक्यमिदं सुराः ॥ ६
शक्ताः सहस्रमप्यंशं वोढुं न च वयं भव ।
का नः शक्तिः सुरेशान तेजो माहेश्वरं परम् ॥ ७
द्रष्टुं धारयितुं वापि प्रसादं कुरु नः प्रभो ।
न कथञ्चिदयं शक्ता ग्रहीतुं दानवान् बलात् ॥ ८
भगवन् स्वयमेव त्वं त्रिपुरं जहि शङ्कर ।
तेभ्यः किल वरो दत्तो ब्रह्मणा तेन शूलधृक् ॥ ९
दिव्ये वर्षसहस्रे तु समेष्यति पुरत्रयम् ।
निमेषार्द्धं क्षणे तस्मिन् य एव त्रिपुरं बलात् ॥ १०
एकदैकमिषुं क्षिप्त्वा समग्रं धक्ष्यति दानवान् ।
भविष्यति ततो मृत्युर्नान्यथा मरणं हि वः ॥ ११
तच्च कर्त्तुं न शक्ताः स्म प्रसादं तेन नः कुरु ।
ततः स भगवान् देवः प्रणतान् वृषभध्वजः ॥ १२
पुनराश्वासयन् प्राह समुद्विग्नान् दिवौकसः ।

यद्येवं सुरशार्दूलास्त्रिपुरं दुर्गमं महत् ॥ १३
दूषुमेकं ततः छित्वा प्रधक्ष्यामि पुरोत्तमम्।
ब्रह्म-विष्णुप्रियार्थं हि भक्तस्यानुग्रहाय च ॥ १४
त्रिपुरं रथमास्थाय हिंसामि स्वयमेव तु।
क्रियतां स रथः सज्जो यत्रारुह्य दिवौकसः ॥ १५
धक्ष्यामि त्रिपुरं दुर्गमाक्रान्तं दानवैस्त्रिभिः।
यादृशश्च हि मां वोढुं शक्तः स्यात् सुरपुङ्गवाः ॥ १६
बलवान् हिमवत्कल्पः कर्त्तव्यस्तादृशो रथः।
ततो देवाः प्रणम्यैतं प्रहृष्टमनसोऽभवन् ॥ १७
रथञ्च सहिताः सर्व्वे कल्पयामासुरुत्तमम्।
ततः स भगवान् ब्रह्मा तथा विष्णु-हुताशनौ ॥ १८
सर्व्वदेवमयं दिव्यं चक्रुस्तं रथमुत्तमम्।
धातारं भास्करञ्चोग्रं पवनं धनदं यमम् ॥ १९
वसून् रुद्रांस्तथादित्यान् गन्धर्व्वानश्विनावपि।
गरुडं पर्व्वतान् नागान् गुह्यकान् समहोरगान्॥२०
ऋषीन् सिद्धांस्तथा यक्षान् ग्रहांश्च सुमहाबलान्।
पर्ज्जन्यं शशिनं कालं तथा चैव वनस्पतीन् ॥ २१
दिवसांश्च मुहूर्त्तांश्च क्षणान् काष्ठा लवांस्तथा।
अयने च ऋतून् मासान् विषुवं वत्सरांस्तथा ॥ २२
स्थावरं जङ्गमं यच्च नक्षत्राणि तथैव च।
अष्टौ देवनिकायांश्च रथे तस्मिन्नकल्पयन् ॥ २३
कांश्चिचक्रद्वयं चक्रुः प्रतोदञ्च महासुरान्।
ध्वजान् कांश्चिद्रथे तस्मिन् बबन्धुः सुरपुङ्गवाः ॥ २४
कलाश्वांश्चतुरो वेदान् रथे तस्मिन्नयोजयन्।
संवत्सरमयं चक्रं धनुर्गिरिवरं तथा ॥ २५
ज्याञ्चैव धनुषश्चक्रुर्देवदेवं जगत्पतिम्।
ते तमेवंविधं देवा रथमग्रमचीकरन् ॥ २६
सर्व्वदेवमयं कृत्वा गिरिकल्पं रथोत्तमम्।
विष्णुः पितामहोऽग्निश्च प्रणम्य परमेश्वरम् ॥ २७
रथं सज्जमिति प्राहुर्विनाशाय सुरद्विषाम्।
ततः स भगवान् शम्भुः स्तूयमानः सुरासुरैः ॥ २८
अवेक्ष्य तं रथं दिव्यं सर्व्वतेजोमयं परम्।
अश्वश्चोर्द्ध्वञ्च संप्रेक्ष्य त्वशेषभुवनेश्वरः ॥ २९
पितामहं ततो वीक्ष्य प्रोवाच वचसांपतिम्।
रथ एष धनुश्चैव त्वया ब्रह्मन् प्रकल्पितौ ॥ ३०
दग्धव्यं त्रिपुरं येन तमिषुं शीघ्रमानय।
ततः प्रोवाच तं ब्रह्मा प्रणम्य वृषभध्वजम् ॥ ३१
रथ एष कृतो देव धनुश्च ते मया कृतम्।
तमिषुं भगवन् देव उद्योगं कर्त्तुमर्हसि ॥ ३२
ततः पार्श्वस्थितो दृष्ट्वा शम्भुर्विष्णु-हुताशनौ।
दृष्टिपातेन तौ देवौ समाह्वयदरिन्दमौ ॥ ३३
द्वौ तावञ्जलिमाधाय सुरेशानमुपस्थितौ।
स्वयमेव ततश्चक्रे शम्भुर्विष्णुं शरोत्तमम् ॥ ३४
ओषधीनां पतिं सोमं मुखे तस्य न्ययोजयत्।
शल्यञ्च पावकं चक्रे स ब्रह्माणं ततोऽब्रवीत् ॥ ३५
सारथिः को रथे ब्रह्मन् त्वयैव परिकल्पितः।
तमुवाच ततो ब्रह्मा प्राञ्जलिर्जगतां पतिम् ॥ ३६
महं ददासि यद्याज्ञां स्वयमेव हि सारथिः।
प्राप्तं किमधिकं देव सारथ्यादधिकं ततः ॥ ३७
सर्व्वं शोभनमित्युक्त्वा ततो देवः पिनाकधृक्।
हस्ते प्रगृह्य देवेशमारुरोह रथोत्तरम् ॥ ३८
रुद्रस्य पार्षदा ये च नन्दीश्वरपुरोगमाः।
शङ्कुकर्णपुरोगाश्च ये च चण्डेश्वरादयः ॥ ३९
गणेश्वरा महायोगास्त्वग्रचाः पट्टिशपाणयः।
नानाशस्त्रप्रहरणा नानायुद्धविशारदाः ॥ ४०
वादयन्तस्तथा वाद्यं भेरीशङ्खस्वरान् बहून्।
आजग्मुर्गणमुख्यास्ते सहस्राणि चतुर्दश ॥ ४१
नानाविधानां पुष्पाणामुपरिष्टात् सहस्रशः।
निपेतुर्वृष्टयो मूर्द्ध्नि देवदेवस्य शूलिनः ॥ ४२
अशक्ता भारमुद्वोढुं मुमुहुर्देवता भृशम्।
ततस्तान् देवदेवेशो ज्ञात्वा युक्तान् दिवौकसः ॥ ४३
सहनीयं वपुश्चक्रे सुराः सर्व्वे विदुद्रुवुः।
एतस्मिन्नन्तरे व्यास नारदोऽभ्यागमन्मुनिः ॥ ४४
प्रसादितः स सर्व्वैस्तु स देवो वृषभध्वजः।
आयाति त्रिपुरं दग्धुमत्र यत् साधु तत् कुरु ॥ ४५
रथे देवमये दिव्ये समारुह्य जगत्पतिः।
ब्रह्माणं सारथिं कृत्वा स्वयमायाति शङ्करः ॥ ४६
नारदस्य वचः श्रुत्वा स तदा दानवाधिपः।
तारकाख्यं समाहूय विद्युन्मालिनमेव च ॥ ४७
तथान्यानपि जान् भृत्यान् दानवोऽपि पुरःसरान्।
नारदेन यथाख्यातं सर्व्वमाख्यातवांस्तदा ॥ ४८
ततः श्रुत्वा दैत्यराजस्तारकाख्योऽब्रवीदिदम्।

किमर्थं चिन्त्यते राजन् सर्व्वे वध्या यथार्थतः ॥ ४९
कस्येह त्रिपुरं हन्तुं शक्तिर्विद्येत दानव ।
सङ्गत्य दैवताः सर्व्वे सर्व्वैर्योद्धुमिहागताः ॥ ५०
दुर्व्वलः कुरुते भेदं दानं सान्त्वमथापि वा ।
प्रमाणं यशसः सन्तो वीर्य्यन्तु वलिनः सदा ॥ ५१
दुर्व्वलस्य रिपोर्द्दण्डो वलिना विजिगीषया ।
कर्त्तव्यो विक्रमैरेवं प्राह शुक्रस्तथा गुरुः ॥ ५२
यथेमे वलिनो दैत्या न तथापि दिवौकसः ।
जित्वादण्डेनतान्सर्व्वान्स्थास्यामोनिर्वृताःसुखम् ५३
तारकाख्यवचः श्रुत्वा विद्युन्माली महावलः ।
सम्मान्य तद्दतीवेष्टं राज्ञोऽस्य वचनं शुभम् ॥ ५४
न शक्ता योद्धुमस्माभिर्द्दैवता वलवज्जिताः ।
ते चेद्योत्स्यन्ति संमूढाः प्रयास्यन्ति ततः क्षयम् ॥५५
अन्योन्यन्तु वयं बुद्ध्वा उपायं तेषु योत्स्यते ।
युद्धेनैव सदा दैत्याः प्राप्नुवन्ति जयं परम् ॥ ५६
प्रत्याहृत्य सुरान् सर्व्वान् कुरु राज्यं त्रिविष्टपे ।
त्रैलोक्यनिर्व्वृतो भूत्वा इन्द्रो भवसि विश्वकृत् ॥ ५७
सप्तलोकेश्वरं ह्यद्य पश्याम त्वां पुरःसरम् ।
हिरण्यकशिपुश्चैवा हिरण्याक्षश्च दैत्यपम् ॥ ५८
भोक्ता च जगतो राजा त्वं प्रयाहि तयोर्गतिम् ।
ततः श्रुत्वा मयो व्यास विद्युन्मालिविभाषितम् ॥५९
नैतदेवमिति प्राह कम्पयन्नसकृच्छिरः ।
यस्तुश्च सवलः शत्रुर्हीनो वा दैत्यपुङ्गवाः ॥ ६०
तैर्द्दैवैः सार्द्धमस्माकं युक्तं सामादियोजनम् ।
य एष भगवानीशः सर्व्वभूतेश्वरः प्रभुः ॥ ६१
अस्माकं दैवतानाञ्च स्रष्टा हर्त्ता च स प्रभुः ।
स हन्तुं स्वयमायाति उपायस्तस्य कीदृशः ॥ ६२
प्रणामः संश्रयश्चैव गुणोपायैः कपर्द्दिनः ।
दाविमौ साधने तस्य प्रयोज्याविति मे मतिः ॥ ६३
यदि क्रार्कश्यमास्थाय योधयाम पिनाकिनम् ।
तस्य जिह्मेक्षणेनैव निहताः स्थ ततोऽसुराः ॥ ६४
ब्रह्माद्याः शरणं सन्तमर्द्दिता यान्ति शान्तरे ।
योऽभियुक्तः स्वयं तेन शरणं तस्य को भवेत् ॥ ६५
तस्य सर्व्वमिदं दैत्या ब्रह्मादि प्रथितं जगत् ।
अभिध्यानात् क्षणेनैव प्रणश्येत भवेदपि ॥ ६६
यो हेतुरपवर्गस्य कारणं जगतः स्वयम् ।
कीदृशं तेन युद्धं नो देवदेवेन शम्भुना ॥ ६७
किं तपोऽपि विशुद्धं नो नष्टं कियदनन्तरम् ।
भवन्तो लोष्टवो भूत्वा गिरिकल्पसमाश्रिनः ॥ ६८
इच्छन्ति सहिता योद्धुं कालपाशेन चोदिताः ।
अहं भक्तो महादेवं जाने तस्य च नान्तरम् ॥ ६९
सप्रणामः स्वयं स्थास्ये न योत्स्ये शम्भुना सह ।
यदि यूयमपि प्राज्ञा मम शुश्रूषवो यदि ॥ ७०
मा कुर्ध्वं शम्भुना युद्धं गच्छध्वं शरणं शिवम् ।
तमेवंवादिनं श्रुत्वा विश्वकर्म्माणमूर्ज्जितम् ॥ ७१
नारदो भगवानाह दानवान्तकरं वचः ।
न त्वया विश्वकर्म्मेदमुक्तं विस्तरतोऽर्थवत् ॥ ७२
सर्व्वं युक्तमिदं किन्तु कालोऽयं नास्य सम्मति ।
भवतान्तु तपः क्षीणमैश्वर्य्यं भुक्तमेव च ॥ ७३
क्लीवतामपि कुर्व्वन्तो यूयं नश्यथ दानवाः ।
हतः सर्व्वामरैः शम्भुर्वधार्थं भवतामिह ॥ ७४
प्रणतानप्यसौ युष्मांस्तत्प्रियार्थं हनिष्यति ।
कथं दनुसुता भूत्वा राजानो वलगर्व्विताः ॥ ७५
भीता मृत्युं जिगीषध्वं कृपणा इव दानवाः ।
प्राप्य नाधिकमैश्वर्य्यं यशसो म्लानते यदि ॥ ७६
विना युद्धं प्रपन्नानामशुभा वो गतिर्भवेत् ।
अथ प्राप्स्यथ विध्वंसं देवदेवेन शूलिना ॥ ७७
प्रमथेन्द्रास्ततो यूयं भवितारो न संशयः ।
गुणसिद्धिस्ततो नास्ति युष्माकं दैवतैः सह ॥ ७८
विग्रहे वो मतिर्युक्ता साम त्यक्त्वा भवेन च ।
शौर्य्येण भवतां प्रीतः कदाचिद्वृषभध्वजः ॥ ७९
भवेदरप्रदो दैत्याः श्रेयो यत्नेन विक्रमः ।
करिष्यामि च रक्षां वः शस्त्रघातनिवारिणीम् ॥ ८०
उत्तिष्ठत दनोः पुत्त्रा विजयाय युयुत्सया ।
नारदस्य वचः श्रुत्वा तारकाख्यो महावलः ॥ ८१
विद्युन्माली च दैत्येन्द्रो वाणाद्याश्च महासुराः ।
कालेन नोदिता मूढाः क्षीणपुण्या गतायुषः ॥ ८२
सर्व्वं तच्छोभनं प्रोक्तं नारदेनेति तेऽब्रुवन् ।
मयोऽपि तद्वचो बुद्ध्वा ज्ञात्वा नाशमुपस्थितम् ॥ ८३
शोभनं नारदेनोक्तमिति वाक्यमुवाच ह ।
नारदोऽपि ततो हृष्टो रक्षां वद्ध्वा तु मायया ॥ ८४
युयुत्सूनसुरान् कृत्वा ययौ शर्व्वरथं प्रति ।

ततस्ते दानवाः सर्व्वे युद्धाय कृतनिश्चयाः ॥ ८५
नानाप्रहरणोपेता बभूवुर्युद्धलालसाः ।
तारकाक्षो बली वाणो विद्युन्माली च दानवः ॥ ८६
सैन्यैश्च सहिताः सर्व्वे राजानस्तस्थुरग्रतः ।
अवाद्यन्त ततः शङ्खास्तूर्य्याणि च सहस्रशः ॥ ८७
दानवानां बले घोरे कातराणां भयप्रदे ।
अथः सहसायाति अयं कौतुक दृश्यते ॥ ८८
कथमागत इत्येवं ते च जगुः परस्परम् ॥ ८९

विगतभयविषादास्त्रिपुरा दैत्यसङ्घाः
प्रकुपितवदनास्ते युद्धसज्जा बभूवुः ।
प्रहरणवरहस्तास्तद्रथं वीक्षमाणाः
पशव इव यथाग्नेरन्वगच्छन् समीपम् ॥ ९०

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
त्रिपुराख्याने द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशोऽध्यायः ।

सनत्कुमार उवाच ।

अथाभ्ययात् पश्चिमसागरस्य
मूर्द्धि स्थितं तत् त्रिपुरं रथोऽसौ ।
नानापताकोज्ज्वलचित्रमौलि-
र्हैमोऽपरो मेरुरिवाधिराजः ॥ १
ते वीक्ष्य दुर्गं त्रिपुरं गणेशा
नन्दीश्वराद्याः प्रमथाः सपत्नाः ।
नादं प्रचक्रुः सहिताः प्रवीरा
युयुत्सवो दानवसिंहमुख्याः ॥ २
चण्डेश्वरश्चण्डवपुर्महात्मा
ज्वलत्प्रदीपोग्रकुठारपाणिः ।
व्यादाय वक्त्रं पुरतः स्थितोऽभूद्-
देवस्य शम्भोः प्रमथेन्द्रवीरः ॥ ३
दीप्तं त्रिशूलं परिगृह्य नन्दी
वामः प्रतस्थे हरतुल्यधर्म्मा ।
पार्श्वस्थितोऽभूत् स च शङ्कुकर्णः
प्रगृह्य दीप्तं मुषलं गणेन्द्रः ॥ ४
भृङ्गी महात्मा स च वीरभद्र-
स्तथा गणेन्द्राः शतशः प्रवीराः ।
वज्रत्रिशूलासिगदर्ष्टिहस्ताः
प्रतस्थिरे ते विजयात्तहस्ताः ॥ ५
समागतं तं रथमीक्ष्य दैत्या
युद्धाय ते जग्मुरुपेतमोहाः ।
ते तारकाक्षप्रमुखाः सुवीराः
संनह्य नानायुधदीप्तहस्ताः ॥ ६
साद्धं गणेन्द्रैः समरं प्रचक्रु-
र्दनोः सुताः कोपवशं प्रयाताः ।
देवोऽपि चन्द्रार्द्धनिकेतमौलिः
सर्व्वं समीक्ष्य त्रिपुरं प्रदग्धुम् ॥ ७
तस्थौ सहासं कृतवान् स्वनञ्च
पश्यन् रणं तद्गण-दैत्यपानाम् ।
ततः स नन्दी गणपैः प्रवीरै-
रचीकरद्युद्धमहीनसत्त्वैः ॥ ८
विव्याध भृङ्गी दशभिः पृषत्कै-
र्विद्युत्प्रभं कोपसरक्तनेत्रः ।
भृङ्गिं समासाद्य शिलायुधास्त
नाशक्नुवंस्तस्य रुजं प्रकर्त्तुम् ॥ ९
विद्युत्प्रभं भृङ्गिरिटिस्ततोऽसौ
शूलेन दीप्तेन जघान पृष्ठे ।
शितेन शूलेन हतोऽस्य पूर्ण-
फूत्कारभृङ्गी प्रययौ भयार्त्तः ॥ १०
भग्नस्तदासौ दितिजाधिपेशो
भृङ्गिं समुल्लङ्घ्य गणेन्द्रमुख्यम् ।
विव्याध तीक्ष्णैर्निशितैः पृषत्कै-
र्विनायकं सप्तभिरंसदेशे ॥ ११
पुनस्त्रिषष्ट्या दशभिश्च भूयो
विद्युत्प्रभस्तं गजराजवक्त्रम् ।
जघानमर्मस्वविलक्षरूपं
ततश्चुकोपास्य विनायकेन्द्रः ॥ १२
स पुष्कराग्रेण गजेन्द्रसिंहो
ग्रीवां तदा दैत्यपतेर्विपिष्य
उत्पाटयामास शिरः शरीरात्
पद्मं यथा नाग इव द्विपेन्द्रः ॥ १३
दैत्यस्य कृत्तं शुशुभे शिरस्तु
दन्तावलेन्द्रप्रतिभाच्छरीरात् ।

महोत्सवे भृङ्गवरोपगीतं
ह्रदाह्नतोत्खातमिवाशु पद्मम् ॥ १४
ततोऽपरौ दैत्यपती सपत्नौ
नेमिर्बलश्चान्यकतुल्यवीर्यौ ।
क्रुद्धावुपागम्य च शङ्कुकर्णं
शिलीमुखैर्विव्यधतुर्गणेन्द्रम् ॥ १५
तौ शङ्कुकर्णः प्रसभं निपात्य
छिन्नध्वजाश्वौ विरथौ चकार ।
अन्यौ समारुह्य रथौ पुनस्तौ
भूयः समागम्य गणप्रवीरम् ॥ १६
तं जघ्नतुर्नैकविधैः पृषत्कै-
र्वज्राभिघातप्रतिमैः सुतीक्ष्णैः ।
क्रुद्धस्तदा स प्रसभं गणेश-
स्तौ दैत्यराजौ सुचिरं निरीक्ष्य ॥ १७
दीप्तेन हत्वा मुषलेन वीरौ
सम्प्रेषयामास पुरं यमस्य ।
अन्ये च दैत्यास्त्रिपुराधिवासाः
क्रुद्धा विनिष्क्रम्य गणेन्द्रमुख्यैः ॥ १८
नाराच-वज्रासि-कुठारहस्ता
घोरं महायुद्धमतीव चक्रुः ।
दैत्येश्वरास्ते हरकल्पतुल्यै-
र्गणेश्वरैः प्राप्तशिवप्रसादैः ॥ १९
हता बभूवुर्विगतासवस्तु
मृगा यथा केसरिभिर्वनान्ते ।
प्रभ्रष्टनानायुधवक्त्रधारा-
श्छिन्नैर्भुजैः शोणितमुद्वमन्तः ॥ २०
वात्याहतास्ते तु पयोधरा इव
पेतुः समुद्रे गिरिशृङ्गकल्पाः ।
श्रुत्वा च दैत्यौ बल-नेमिसंज्ञौ
तौ शङ्कुकर्णेन हतौ प्ररुद्य ॥ २१
पुराद्विनिष्क्रम्य स तारकाक्षः
क्रुद्धो गणेन्द्रं स्वयमभ्यधावत् ॥ २२
तं शङ्कुकर्णौ दितिजाधिकल्पं
जघान मूर्ध्नि प्रसभं गणेन्द्रः ।
निपत्य किञ्चिन्महितस्य वीर्यं
भल्लेन दैत्याधिपतिं निहत्य ॥ २३
प्रोत्थाय तूर्णं स हि तारकाक्ष-
श्चिक्षेप तस्मै गणपाय चक्रम् ।
क्रुद्धस्ततः सोऽभिहतो गणेन्द्र-
स्तं तारकाक्षं स तु शङ्कुकर्णः ॥ २४
निपत्य मुष्ट्या निजघान मूर्ध्नि
समाहतः सोऽपि जगाम कृच्छ्रम् ।
जघ्नंस्तु बभ्राम मुमोह तस्मै
पपात तत्याज वरायुधञ्च ॥ २५
मुमोच रोषं विरराज तीव्रं
ममार पश्चादसुरः प्रसक्तः ।
दृष्ट्वा विपन्नं दितिजाधिपेन्द्रं
प्रगृह्य दैत्या भवनं मयस्य ॥ २६
गत्वा निवेद्यासुरराजभर्त्रे
नादान् प्रचक्रुर्विविधैर्विलापैः ।
ततो मयस्तान् सहतोऽसुरेशा-
नाश्वासयन् प्राह वचोऽसुरेन्द्रः ॥ २७
गृहे मयाऽस्त्यमृतं तदस्ति
तेनैनमुत्थापयताशु दैत्याः ।
ततो गृहीत्वामृतमुत्तमं ते
दैत्याधिपं दैत्यवृषाः प्रहृष्टाः ॥ २८
चक्रुः सजीवं हि यथा पुराणं
मयं प्रणेमुश्च मुहुः शिरोभिः ।
स तारकाक्षस्तत आशु भूयो
युयुत्सया युद्धपथं जगाम ॥ २९
आयान्तमालक्ष्य पितामहस्तं
पूर्वं मृतं जीवितमाशु भूयः ।
प्रोवाच वाक्यं स सुरासुरेशं
निवेदयन् वामकरेण दैत्यम् ॥ ३०
हतोऽप्ययं शङ्कर तारकाक्षः
कृतो मयेनाशु सजीव एव ।
अस्यास्ति देव्यमृतमुत्तमं हि
तेनासुरान् जीवयते सुरेन्द्रः ॥ ३१
देवो महानेष सुरेन्द्र केन
मृतान् मृतान् जीवयते सदासौ ।
ततोऽमृतं तन्मयसंस्थमाशु
प्रहारमात्रेण हरास्य भक्ष्यौ ॥ ३२

श्रुत्वा वचस्तस्य पितामहस्य
प्रहारमात्रेण जहार सद्यः ।
तदामृतं तद्भ्रमितं तदास्तु
यद्बाणदेवेश शिरोऽव्ययस्तदा ॥ ३३
पितामहस्तत् पुनरेव हृष्टः
पिनाकिनं प्राह वचः प्रणम्य ।
दृष्टं मया युद्धमिदं गणानां
दैत्याधिपैः सार्द्धमहीनसत्त्वैः ॥ ३४
दिव्यं सहस्रं हि गतं समानां
त्वयं न चैतत् त्रिपुरं जगाम ।
क्षिप प्रदीप्तं तमिषुं सुरेश
प्रयान्तु नाशं सुरविद्विषस्ते ॥ ३५
पूर्णे सहस्रे त्रिपुरं समेत्य
पुनर्विपर्य्यस्तमभूत् सुरेश ।
क्षिप्तस्त्वयेषुर्न च देवदेव
योगीन किं वा तव देवनाथ ॥ ३६
सङ्कल्पमात्रादपि नाशमेति
दैत्याधिवासं त्रिपुरं तदेव ।
यदि त्वहं मानयितव्य ईश
विमुञ्च तन्तु त्रिपुरे निबद्धे ॥ ३७
विज्ञप्त एवं चतुराननेन
प्रलीढमालीढमनङ्गहन्ता ।
कृत्वा धनुस्तद्बलवन्निकृष्य
प्रायोजयद्दीप्तमिषुं पिनाके ॥ ३८
सङ्कल्पमात्रेण तदा समानि
पुराणि दैत्यैः सहितानि तानि ।
चक्रे जगत्सृष्टिविनाशकर्त्ता
जगच्च निष्पन्दमभूत् तदाशु ॥ ३९
विश्वात्मकं पावक-सोमपुङ्खं
त्रैलोक्यसंहारमिषुं प्रदीप्तम् ।
चिक्षेप देवस्तमिषुं तथोग्रं
क्षिप्त्वा च कष्टं धिगतीति चाह ॥ ४०
नन्दी समागस्य ततः सुरेशं
प्रोवाच वाक्यं किमिति प्रणम्य ।
नन्दीश्वरं तं भगवानुवाच
मयस्य भक्तस्य शुभं चिकीर्षुः ॥ ४१

नन्दीश भक्तो मम विश्वकर्म्मा
दहेत् पुरं तस्य यथा न वह्निः ।
तथानलं सोमहरञ्च देव
शीघ्रं समागच्छ निवारयस्व ॥ ४२
नन्दी प्रगृह्याथ सुरेश्वराज्ञां
तूर्णं ययौ विश्वकृतः पुरं तत् ।
स योगयुक्त्यानिलतुल्यवेगो
ज्योतिष्मतः पूर्व्वपुरं जगाम ॥ ४३
दृष्ट्वा मयं तत्र स दानवेन्द्रं
मूर्ध्ना नताङ्गं वृषभध्वजाय ।
मृत्योर्भयात् तं शरणार्थिनञ्च
नन्दी समाश्वासयदीशभक्तम् ॥ ४४
भयं कृथा मा सुपरीक्षितस्त्वं
भक्त्या भवेनेति वचोऽभ्युवाच ।
नन्दीश्वरं दानवराट् स दृष्ट्वा
श्रुत्वा मयस्तं शिवसम्प्रसादम् ॥ ४५
यथैव रुद्राय ननाम मूर्ध्ना
चक्रे प्रणामं स तथैव तस्य ।
अथाग्निरागात् त्रिपुरं दिधक्षुः
प्रदीपयित्वा सकलं समन्तात् ॥ ४६
संवर्त्तवह्निप्रतिमो युगान्ते
जगत् प्रसंहर्त्तुमिव प्रदीप्तः ।
तमागतं विश्वकृतो निवासं
विश्वेन्द्रयुक्तं ज्वलनं स नन्दी ॥ ४७
दग्धव्यमेतन्न हुताशनेति
वचोऽभ्युवाचाथ विभोर्नियोगात् ।
ततः स वह्निस्तमुवाच देवं
कस्मान्न दग्धव्यमिदं मयेति ॥ ४८
नन्दी हुताशं स ततो ह्युवाच
मयोऽत्र तिष्ठत्यमरेशभक्तः ।
तं वह्निराहासुरराजमाशु
पुराद्विनिर्गच्छ मयेति वाक्यम् ॥ ४९
हैमं गृहीत्वा स महेशलिङ्गं
पुराद्विनिष्क्रम्य मयोऽसुरेन्द्रः ।
पातालमार्त्तः सहसा प्रविष्टः
कुर्य्यान्नमस्कारसुमाप्रियाय ॥ ५०

नन्दीश्वरः सोऽपि सुरेशपार्श्व-
मागम्य चाख्याय च संस्थितोऽभूत्।
ततः प्रदीप्तं त्रिपुरं बभूव
विस्पष्टनष्टाकुलवेदिवेश्म ॥ ५१
नैकासुरीन्दुत्तमभोगनादं
विवस्त्रदैत्येन्द्रवधूजनार्त्तम्।
वातायने हर्म्म्यविमानसंस्था-
श्चन्द्राननाः पीतपयोधराढ्याः ॥ ५२
पर्य्यङ्कसुप्ता मदविह्वलाच्चो
मानं प्रियाणां सह वीच्चमाणाः।
विलोचनैस्ताम्रनितान्तरागैः
श्यामावदाता नयनैर्विशालैः ॥ ५३
दैत्याङ्गनास्तं दहशुः प्रदीप्त-
मालिङ्ग्यमानाः शरपावकेण।
प्रासादसंस्थाः प्रययुर्भयार्त्ता-
स्त्रासेन क्रिन्तर्थ्य इवाचलस्थाः ॥ ५४
प्रियास्तथोद्वीच्य समागतांस्तान्
मोहं समालिङ्ग्य भृशं स जग्मुः।
प्रियाग्यहीता दितिजास्ततस्ते
प्रनष्टकामास्तरसाभिजग्मुः ॥ ५५
निष्क्रान्तिमूढाः शिवभक्तिमूढाः
पेतुः समुद्रे बलविप्रयुक्ताः।
दैत्यान् समुद्रे पतितान् प्रनष्टान्
मत्स्या महान्तो गिरिसन्निकाशाः ॥ ५६
तीव्राश्च नक्रा मकराश्च घोराः
संजग्रसुर्नष्टबलान् निनष्टान्।
जलेचरास्ताश्चपरे महान्तः
संछिन्नहाराः पतिता स्त्रियस्ताः ॥ ५७
हीनाः परैर्भच्चयितुं प्रवृत्ताः
करालदंष्ट्रा विकृताननास्ताः।
ता भच्यमाणाः पतितास्तरुण्यः
प्रियान् सरोषं बहुशो निरीच्य ॥ ५८
रुजा हतान्याः परिभिद्यमानाः
संचुक्रशुर्दीनतरं युवानः।
तासां तदा दैत्यविलासिनीनां
रेजे भृशं क्रोधनिरीचितं तत् ॥ ५९

रतावसाने परिखेदितानां
प्रियैरिवाशामभिगन्तुकामैः।
सर्व्वे ततो दैत्यवृषाः सभार्य्याः
प्रदह्यमानास्त्रिपुरानलेन ॥ ६०
मग्नाः समुद्रे मकरैर्विभिन्ना
गतासवो मृत्युवशं प्रजग्मुः।
शरश्च सोऽग्नीन्दुजनार्द्दनात्मा
प्रदह्य कृत्स्नं त्रिपुरं ततोऽमुम् ॥ ६१
हित्वा समुद्रस्य समं प्रयातः
समन्ततः शम्भुकरं जगाम।
दैत्यैर्हृतैस्तैस्त्रिपुरे च दग्धे
देवानवस्थाप्य पुरेव देवः ॥ ६२
पूर्व्वं यथा दिव्यशरीरधारी
चकार सृष्टिप्रलयादिहेतुः।
ब्रह्मादयस्ते त्रिदिवौकसेशा
नेमुर्वचश्चेदमथोचुरीशम् ॥ ६३
कृतं त्वयेदं भगवन्नशक्यं
शुभं महद्रौद्रकरञ्च कर्म्म।
दैत्या हतास्तत्त्रिपुरं प्रदग्धं
शान्तिः कृता नश्च सुरासुरेश ॥ ६४
नमोऽस्तु सर्व्वत्र सदा स्थिताय
स्रष्ट्रे सुराणां प्रमथेश तुभ्यम्।
नित्यञ्च विज्ञानलसत्क्रियाय
नमो नमः सर्व्वगताय तुभ्यम् ॥ ६५
तानाह देवः स तदा सुरेन्द्रान्
ब्रह्मार्क-विष्णिन्द्र-यमेश्वरादीन्।
सदैव यूयं परिपालनीया
रच्याश्च देवाः सुतवत् सदैव ॥ ६६
पूर्णाभिलाषा हतविद्विषश्च
प्रयात हृष्टाश्च निवेशनानि।
देवास्ततो देववरं प्रणम्य
जग्मुः स्वकीयानि निवेशनानि ॥ ६७
देवोऽपि साध्यैरभिनन्द्यमानः
कैलासशृङ्गे सहितो गणेन्द्रैः।
चण्डीश-नन्दीश्वर-वीरभद्रै-
र्जगाम कर्त्ता जगतस्त्रिनेत्रः ॥ ६८

इति कथितमशक्यं देवदेवस्य कर्म्म
त्रिपुरदहनसंज्ञं व्यास तुभ्यं मयैतत् ।
मनुज इदमधीते यः शुचिः सर्व्वभक्तः
स भवति गतपापः स्वर्गभाग्देवजन्मा ॥ ६९

इति श्रीशैवे महापुराणे सनत्कुमार-
संहितायां त्रिपुरदहने
त्रिपञ्चाशोऽध्यायः ॥५३

चतुःपञ्चाशोऽध्यायः ।

व्यास उवाच ।

गत्वा हिमवतः शृङ्गं पार्व्वत्या सहितो हरः ।
किं चकार मुने तत्र महादेवः सहोमया ॥ १

सनत्कुमार उवाच ।

प्रयाते हिमवच्छृङ्गं देवदेवे सहोमया ।
बभाषे गिरिजा देवं प्रणम्य परमेश्वरम् ॥ २
उञ्छवृत्तेर्हिरण्यस्य नैमिषारण्यवासिनः ।
शौचेन तपसा भक्त्या युक्तस्य च शमेन हि ॥ ३
स्वयमेव प्रयाताहं द्विजात् पूजां प्रतीच्छितुम् ।
माहात्म्यं तस्य तद्दृष्ट्वा ब्राह्मणस्य तपस्विनः ॥ ४
गताहं विस्मयं देव द्विजाः श्रेष्ठतमा इति ।
देवेभ्योऽपि गरीयांसो ब्राह्मणा इति मे मतिः ।
किन्त्वस्य श्रोतुमिच्छामि द्विजमाहात्म्यमुत्तमम् ॥५

देवदेव उवाच ।

एवमेव जगद्धात्रि सुरासुरनमस्कृते ।
श्रेष्ठास्तपस्विनो विप्रा देवेभ्योऽपि गरीयसः ॥ ६
मदीयायां पुरासृष्टौ प्रथमः प्रबभौ ह्यहम् ।
रुद्रा द्विजातयः पूर्व्वं मया सृष्टा महौजसः ॥ ७
मदीयां सृष्टिमादाय ब्रह्मणोऽपि सिसृक्षया ।
ब्रह्मणा मूर्द्धतः सृष्टाः पूर्व्वमेव महाव्रताः ॥ ८
अग्रिमो ह्यहमेतेषां द्विजाः श्रेष्ठास्ततोऽभवन् ।
ततस्ते मन्मनाः सर्व्वे बभूवुर्द्विजसत्तमाः ॥ ९
धर्म्मादिकश्चतुर्व्वर्गः सर्व्वस्तेषु प्रतिष्ठितः ।
यज्ञहुतिर्हविर्विप्रास्तेन तृप्यन्ति देवताः ॥ १०
जगत् प्रतिष्ठितं सर्व्वं ब्राह्मणानां हिते तदा ।
लक्षणं सम्प्रवक्ष्यामि द्विजातीनामिदं कलौ ॥ ११
शौचाचारविधानञ्च प्रभावं कर्म्मवैभवम् ॥ १२
ब्राह्मणस्तु भवेज्जात्या संस्काराद्द्विज उच्यते ।
विद्यया विप्रतां याति ब्राह्मणस्त्रिविधः स्मृतः ॥ १३
संस्काराद्यो भवेद्विप्रो यस्य स्याद्वेदपारगः ।
तयोस्त्राणे वधे चापि पुण्यपापौ समौ स्मृतौ ॥ १४
जात्या च यो भवेद्विप्रः सर्व्वागमविशारदः ।
तपःशौचसमायुक्तस्त्रवो नाम्ना स उच्यते ॥ १५
तादृशं भोजयेच्छ्राद्धे दैवे कर्म्माणि चापि यः ।
अक्षयं भवत्यत्तस्य व्रवता तस्य तत्क्षणात् ॥ १६
वेदविद्यो भवेद्विप्रो वह्निहोमपरायणः ।
सोऽपि श्रेष्ठः स्मृतो देवि पूजितस्तारयेत् समम् ॥१७
सर्व्वपूजातिमात्रेण योऽपि स्याद्ब्राह्मणः क्वचित् ।
सोऽपि लोकगुरुर्देवि पूजितः सुलभो भवेत् ॥ १८
अग्निहोत्रं तपो योगः शौचमार्ज्जवमेव च ।
सत्यं वेदप्रसङ्गश्च द्विजकर्म्म परं स्मृतम् ॥ १९
नानृतं ब्राह्मणो ब्रूते न हन्ति प्राणिनं द्विजः ।
न सेवां कुरुते विप्रो न द्विजः पापकृद्भवेत् ॥ २०
ब्राह्मणस्तु तपस्वी च न जन्म पुनराप्नुते ॥ २१
विद्याब्राह्मणतां लब्ध्वा किं नरत्वञ्च देहिनाम् ।
मूर्त्तयो हि स्मृता ह्यष्टावर्कसोमादयो मम ॥ २२
सर्व्वास्ता निवसन्ति स्म ब्राह्मणे भागसेविते ।
प्रस्रवन्ति महादेवि विप्राः क्लिष्टतमास्ततः ॥ २३
नासाध्यं विद्यते तेषां द्विजानां परमौजसाम् ।
रुषितास्ते प्रसन्ना वा प्रयच्छन्ति शुभाशुभम् ॥ २४
द्विजास्तपस्विनो ये तु वेदविद्याविशारदाः ।
वृत्तिदास्ते भवेयुस्तु देवानामपि देवताः ॥ २५
अहं पितामहश्चैव तेषां योनिर्द्वयं स्मृतम् ॥ २६
सत्त्वप्रवृत्तास्ते विप्रास्तदा देवि पितामहात् ।
प्रकृतिस्त्वं समाख्याता पुरुषः परमोऽप्यहम् ॥ २७
रजस्त्वं व्यापितं विद्धि गुणभूतेषु कर्म्मसु ।
मोहात्मकौ स्मृतावेतौ तमो वामस्तथैव च ॥ २८
सत्त्वं नाशयते मोहं स चाग्नौ सम्प्रवर्त्तते ॥ २९
वह्नितेजःसमा ह्येते महात्मानो द्विजातयः ।
सर्व्वतः प्रभवन्तस्ते नास्ति तेषां निवारणम् ॥ ३०
आर्ज्जवं समता चैव विद्धि तेजो द्विजातिषु ।
तपोविद्यासमायुक्तादार्ज्जवन्तु विशिष्यते ॥ ३१

असाध्यं हन्ति पापानि समता मोहबन्धनम् ।
उभेऽप्येतेऽतिहन्ति स्म आर्ज्जवं सेवितं द्विजैः ॥ ३२
पुरा भागीरथीतीरे द्विजः परमधर्म्मवित् ।
नाम्ना दानरुचिर्नाम उञ्छवृत्तिर्बभूव ह ॥ ३३
सर्व्वविद्याविनीतात्मा सर्व्वभूताभयप्रदः ।
सह पत्न्या समभवद्वह्निहोमपरायणः ॥ ३४
अतिथिं भोजयित्वा तु पूर्व्वं देवि यथागतम् ।
षष्ठे काले ततोऽश्नाति तस्येदं व्रतमुत्तमम् ॥ ३५
तथैव वर्त्तमानस्य भूयान् कालो जगाम ह ।
अतिथावागते तस्य न विकल्पः प्रजायते ॥ ३६
स तपःशौचसंयुक्त आर्ज्जवैकरतो द्विजः ।
बभूवात्यर्थमर्च्चिष्मानकाग्न्योरपि तेजसा ॥ ३७
तस्यैवं तपसा वह्निः प्रीतस्तुष्टिमगात् पराम् ।
गुरुतुष्टिर्बभूवास्य समीहितफलप्रदः ॥ ३८
कदाचिदथ कालेन षष्ठे काले समागते ।
हिमवद्वेगजैः शीतैर्दुर्द्दिनं पर्य्यटन् द्विजः ॥ ३९
नापश्यदतिथिं कञ्चित् तपसा च स खेदितः ।
यदा नासादितस्तेन दिनान्तेऽप्यतिथिः क्वचित् ॥ ४०
अप्राप्यैव तु तं कञ्चिदुपवासपरायणः ।
बभूव द्विजमुख्योऽसौ वासुदेवमचिन्तयत् ॥ ४१
पत्नी चास्य महाभागा पतिभक्तिव्रते स्थिता ।
यथा चास्याः पतिश्चक्रे तथैवाप्यकरोत् सदा ॥ ४२
शीतवातार्दितप्राङ्गो नैकद्वन्द्वसमावृतः ।
क्लेशेन महतातीव खिन्नोऽभूद्देवि स द्विजः ॥ ४३
शीतदुर्द्दिनदोषात् तु नैवातिथिमविन्दत ।
तथाग्निस्तस्य तं ज्ञात्वा निश्चयं परमं महत् ॥ ४४
श्वपाकसदृशं रूपं विकृतं कुत्सितं वहिः ।
कृत्वा पादपमूलस्थः प्रददौ तस्य दर्शनम् ॥ ४५
क्षुधार्त्तोऽथ स विप्रेन्द्रः पर्य्यटन्नतिथीप्सया ।
अपश्यद्वृक्षमूलस्थं घोरं विकृतरूपिणम् ॥ ४६
श्वपाकं शीतसंक्षुब्धं नैकव्रणशतार्द्दितम् ।
ददर्श तस्य गात्रे च प्रस्रवत्क्रिमिशोणितम् ॥ ४७
विक्रोशन्तञ्च तातेति स चापश्यद्द्विजोत्तमः ।
कृपणं तं सदा दृष्ट्वा स्वपन्तं द्विजसत्तमः ॥ ४८
समाश्वसिहि भद्रेति प्रोवाच मधुरं वचः ।
शीतापनयनार्थञ्च वह्निं प्रज्वालयन् द्विजः ॥ ४९

विशीतं वह्निसंसर्गात् समाश्वस्तमुवाच सः ।
एहि भद्रातिथे सेऽन्नं भुङ्क्ष्व चावेति सादरम् ॥ ५०
तमुवाच ततो दीनः श्वपाकस्तपसां निधिम् ।
श्वपाकोऽहं द्विजश्रेष्ठ मह्यमन्नमिहैव हि ॥ ५१
कुत्सिताय प्रयच्छस्व यथैव मृगपक्षिणे ।
नाहं संस्कृतमाहर्त्तुं योग्योऽन्नमिति चाब्रवीत् ॥ ५२
तमेवंवादिनं ध्यानाज्ज्ञात्वा वह्निमुपस्थितम् ।
प्रोवाच द्विजशार्द्दूल इदं वचनकोविदः ॥ ५३
नाहं जातिं तवार्च्चाभिः पूजयामि तवानघ ।
आत्मा वै सर्व्वतो ज्येष्ठः सर्व्वप्राणिष्वयं स्थितः ॥ ५४
आत्मानं तमहं भद्र पूजयामि परं शिवम् ।
सर्व्वत्र संस्थितं मत्वा पुरुषं परमेश्वरम् ॥ ५५
तिर्य्यक्षु न हि मे कुत्सा त्वद्विधेषु विशेषतः ।
सर्व्वमेव हि देवेति तपःशौचपरायणः ॥ ५६
पूजयाम्यहमव्यग्रं तत्र निःसंशयो भव ।
कृमिकीटादिसर्पेषु श्वपाकेषु द्विजातिषु ॥ ५७
यदा सर्व्वगतो ह्यात्मा तदा कुत्सा कथञ्चन ।
न हि मे कुत्सिते भेदो न हि मे त्वमकुत्सितः ॥ ५८
भुक्त्वा संस्कृतमन्नं त्वं पावयास्माननुग्रहात् ।
एवमुक्तो द्विजेन्द्रेण श्वपाकः प्रीतिमांस्तदा ॥ ५९
गृहं गतः स विप्रस्य विप्रानुग्रहलिप्सया ।
अथ भावरुचिस्तस्यातिथेरेव प्रपूजने ॥ ६०
आतिथ्यं विधिवच्चक्रे भावशुद्धेन चेतसा ।
मूर्त्तिमान् सोऽभवत् प्रीतो भोजितो हव्यवाहनः ॥ ६१
प्रददावीप्सितं तस्य योगैश्वर्य्यमनुत्तमम् ।
स योगं परमं प्राप्य उञ्छवृत्तिर्द्विजोत्तमः ॥ ६२
विमुक्तः सह पत्न्या तु प्राप्तवानमृतं पदम् ।
यथैव कपिलः सिद्धस्तत्त्ववित् परमो मुनिः ॥ ६३
एवमार्ज्जवसम्पन्नो ब्राह्मणः कृतलक्षणः ।
न किञ्चित् प्राप्नुयाद्देवि शुभाशुभपरं पदम् ॥ ६४

एवं ते कथितं नगेन्द्रतनये
माहात्म्यमत्युत्तमं
शृण्वन् नित्यमिदं पठंश्च विधिवत्
सिद्धः शुचिर्मानवः ।
पुण्यं सौख्यमथाप्यभीप्सितफलं
तेजोबलं प्राप्नुयात् ॥ ६५

आख्यानमेतत् कथितं यथाव-
न्महामहीध्रेन्द्रसुते द्विजानाम्।
दृष्टप्रभावा मम ते द्विजेन्द्रा
महामुनीनां पदमध्यवापुः॥ ६६

सनत्कुमार उवाच।

द्विजमाहात्म्यमुल्लिख्य पार्व्वती-परमेशयोः।
बभूव चैवं संवादः पुण्यः पापभयापहः॥ ६७
यच्चान्यदप्युदस्थाम पाराशर्य्य तपोधन।
श्रोतव्यं मन्यसे मत्तस्तच्छृणुष्व समाहितः॥ ६८

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
चतुःपञ्चाशोऽध्यायः॥ ५४॥

पञ्चपञ्चाशोऽध्यायः।

व्यास उवाच।

भगवन् यत् त्वया प्रोक्तं नाड़ीचक्रस्य निश्चयम्।
प्राप्य पाशुपतं ज्ञानं ब्रह्माद्यास्ते सुरोत्तमाः॥ १
लेभिरे परमं तत्त्वं ज्ञानञ्चापि महाद्युते।
तन्मे कथय तत्त्वञ्च शिवाय परिपृच्छते॥ २
कीदृशं वा भवेद्योगं ज्ञानं पाशुपतं शुभम्।

सनत्कुमार उवाच।

ब्रह्माद्या देवता व्यास दक्षयज्ञमुखे पुरा॥ ३
शङ्करं शरणं जग्मुर्वीरभद्रभयार्द्दिताः।
गणेन्द्रैरभियुक्तास्ते भस्मकूटाजिरे स्थितैः॥ ४
यथा भस्मप्रदीप्तास्ते तेजसः परमुत्तमम्।
अभयं ते तथा रौद्राः पशवो दीक्षिता इव॥ ५
भस्मरूषितगात्राणां शङ्करव्रतधारिणाम्।
स्वयोगञ्च ददौ तेषां तदा देव उमापतिः॥ ६
सर्व्वासां मोक्षविद्यानां यत् तत्त्वमितिहोच्यते।
हिरण्यगर्भप्रमुखैर्योगिमुख्यैः प्रवर्त्तितः॥ ७
यो योगः सकलो व्यास स कृच्छ्रोपायसाधनः।
जन्मान्तरसहस्रैस्तु तमभ्यस्य महामुने॥ ८
सर्व्वकर्म्म वहिः कृत्वा निष्कलस्य प्रभावतः।
दीक्षां पाशुपतीं प्राप्य प्रविशन्ति महेश्वरम्॥ ९
सर्व्वज्ञानसमायुक्तं तपोधर्म्मनमस्कृतम्।
सेवनादस्य मुच्यन्ते तन्निबोध महाव्रतम्॥ १०

नाधर्म्मेण विना धर्म्मो न धर्म्मेण विनाऽशुभम्।
एतौ परस्परं द्वन्द्वौ त्यक्त्वा तस्मादिमावुभौ॥ ११
धर्म्माधर्म्मपरित्यक्तः स्मरेत् पाशुपतं व्रतम्।
ततो योगमिमं प्राप्य महदैश्वर्य्यमश्नुते॥ १२
भस्मग्रहणमात्राद्धि सर्व्वबन्धप्रमोचनम्।
मुच्यते स्पृष्टमात्रस्तु ब्रह्मभूतेन भस्मना॥ १३
दहेत् सोमकृतं वह्निरिन्धनञ्चानलं विदुः।
कृताकृतं दहत्यग्निर्भूयः सोमसमाहृतः॥ १४
भस्मना संस्थिताः सर्व्वे ब्रह्माद्या अभिमानिनः।
भस्मनस्तेजसा वीर्य्यं यस्मात् पावनमीश्वरम्॥ १५
आत्मानं शङ्करं न्यस्य यत् स्नानं भस्मना चरेत्।
भस्मना शिवयोगेन मुच्यते पापबन्धनात्॥ १६
प्रभवन्ति सुराः सोमात् पितरो वह्निसम्भवाः।
अग्नीषोमात्मकं तस्माज्जगत् सर्व्वं प्रतिष्ठितम्॥ १७
ईश्वरोऽग्निश्च सोमश्च भस्मनस्तेज उच्यते।
तेजसा तस्य संस्पृष्टो मुच्यते भस्मना द्विजः॥ १८
सांख्यं विद्यां तपश्चैव त्यक्त्वा धर्म्मांश्च वैदिकान्।
केवलं भस्मसंस्नानात् प्रभोर्गच्छति तत् पदम्॥ १९
पापमुक्तोऽप्यधर्म्मात्मा बहुधर्म्मरतोऽपि सन्।
यस्माद्भक्तिपरः शम्भोर्भस्मनैव विशुध्यति॥ २०
शीघ्रमेव परं योगं प्राप्य मुच्यति बन्धनात्।
एवं व्रतं महत् प्राप्य शूरः पाशुपतो मुनिः॥ २१
इदं माहेश्वरं ज्ञानं गुह्यं परममभ्यसेत्।
ज्ञेयं ज्ञानं तथा ज्ञाता त्रयं देहे तथा स्थितम्॥ २२
आत्मा यस्य यथा वायु-स्थानत्रयसमन्वितः।
नाड़ीषु च यथा ह्यात्मा आत्मन्येवावतिष्ठति॥ २३
सर्व्वतः सर्व्वभूतेषु निगूढ़स्तिष्ठते तथा।
पयः सोमघृतं व्यास विदित्वा च स मुच्यते॥ २४
न सेवितुं विना ज्ञानं सम्यगात्मा कथञ्चन।
रूप-शब्द-रसातीतं कस्तं वेत्ति महेश्वरम्॥ २५
तथा ह्यहं महाभाग प्रसादात् त्र्यम्बकस्य तु।
आत्मज्ञाने परोपायं कथयामि तवानघ॥ २६
सर्व्वमेव तमःशून्यमिदमासीज्जगत् किल।
न देवा नासुराश्चैव नद्यः सूर्य्यश्च चन्द्रमाः॥ २७
न किञ्चित् सर्व्वथा भूतं दृश्यते जगति स्थितम्।
शुद्धं महच्च विमलमक्षरं परमीश्वरम्॥ २८

सर्व्वमात्रगुणातीतं निर्व्विकारं निरञ्जनम्।
वहिरन्तश्चरं दीप्तमविकारं परं ध्रुवम् ॥ २९
विज्ञानं परमं यत् तदक्षरं ब्रह्म तच्छृणु।
ओमित्येकाक्षरं पूर्व्वाक्षरं तस्मादिनिर्गतम् ॥ ३०
त्यक्षरश्च त्रिमात्रश्च ओङ्कारो ब्रह्म शस्यते।
अकारे तत्र विष्णुः स्यादुकारे तु पितामहः ॥ ३१
मकारो भगवानीशो मात्रायां प्रकृतिः स्मृता।
पत्नीरूपेण सा शश्वं भुञ्जते प्रकृतिं पुनः ॥ ३२
ब्रह्म-विष्णु स्थितौ तौ च देवावीश्वरसंश्रितौ।
सम्पदिरूपं प्रकृतिः सर्व्वं त्रिष्णुः प्रजापतिः ॥ ३३
तावाक्रम्य महेशस्तं प्रकृतिस्तौ गुणात्मकौ।
महाबलो विभुर्भूत्वा नक्तं संहारमेव हि ॥ ३४
गुह्यमेतत् परं ज्ञानं मयोक्तन्तु मुनेऽक्षरम्।
ओङ्कारं ध्यायते येन अतीत्य प्रकृतिं मुने ॥ ३५
स तमादित्यमुक्तात्मा कृतार्थो जायते मुनिः।
नैवं जना विमार्गस्थाः शुद्धहेतुपरायणाः ॥ ३६
भोक्तारं प्रकृतेरीशं परं तत्त्वेषु संस्थितम्।
ओङ्कारं प्रकृतेर्नित्यं तन्मध्ये भास्वरं स्वयम् ॥ ३७
पयोमध्ये यथा व्याप्त सर्पिरन्तर्गतं स्थितम्।
ईश्वरोऽसौ ददातीशः स मुक्तः पशुबन्धनैः ॥ ३८
नेश्वरा प्रकृतिः ख्याता गुणकर्म्मादिभेदिनी।
वृहत्त्वाद्वृहती श्यामा विष्णुत्वादिभवा स्मृता ॥ ३९
साभिमाना भवेत् सृष्टिर्भोक्ता तस्या महेश्वरः।
अष्टबाहुस्त्रिपादा च पञ्चदेहमुखी तथा ॥ ४०
त्रिनेत्रा पञ्चकर्म्मस्था सप्तवाजिरथोत्तमा।
जगन्माता स्मृता ह्येषा गुणत्रयविकारजा ॥ ४१
उभे शुभाशुभे तस्यां विद्याविद्ये तथा ह्युभे।
उभयार्थं प्रमा यागः क्रियानुष्ठानमेव च ॥ ४२
निमित्तं भवने याने ताराः संक्षेपतस्त्वमी।
ईश्वराज्जात ओङ्कारः स च तस्मिन् प्रतिष्ठितः ॥ ४३
अतः कृत्वा महायोगं योगिनः कपिलादयः।
ओङ्कारं परमं ब्रह्म निर्व्विकल्पमुपासते ॥ ४४
स एव सर्व्वयोगात्मा कारणं स च एव तु।
एवं प्रकृतिभूतौ तावोङ्कारप्रभवौ स्थितौ ॥ ४५
ईशभोज्यौ गुणात्मानौ कृत्वा विष्णु-पितामहौ।
उत्सृष्टौ वेदयज्ञाख्यौ त्यक्तधर्म्मादिबन्धनौ ॥ ४६
महामोहतमोविष्टौ विद्यया सङ्गयुक्कृतौ।
सत्त्वपूर्व्वौ रजोमुख्यः सुखदुःखान्वितः सदा ॥ ४७
संसारताड़नौ मूढौ सर्व्वनित्यसमावुभौ।
ईश्वरे तु भवेद्विद्वान् ध्यानयोगपरायणः।
तस्मात् प्रकृतिरुत्पन्ना तस्मिन्नेव प्रणश्यति ॥ ४८
येनासावीश्वरो भिन्नो योगेनात्मनि संस्थितः।
प्रकृतिस्तं न बध्नाति मुच्यते च भवार्णवात् ॥ ४९

इति श्रीशैवे सनत्कुमारसंहितायां विभूतियोगो नाम पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

षट्पञ्चाशोऽध्यायः।

सनत्कुमार उवाच।

आत्मा सूक्ष्मो मनो बुद्धिरहङ्कारो गुणास्तथा।
भूतानीन्द्रियसम्भारस्तन्मात्राणि दशानिलाः ॥ १
विभक्ताः क्रमशो देहे विभागेन यथास्वयम्।
स्वप्नजाग्रत्सुषुप्तेषु स्थानेष्वेतेषु सुव्रत ॥ २
हृदये कर्णिकायान्तु यत् पद्मं सर्व्वतोमुखम्।
वेष्टितं दशभिः सूक्ष्मं तद्वन्द्वं सर्व्वदेहिनाम् ॥ ३
आत्मा तत्र सजीवस्तु समनःसु प्रतिष्ठितः।
तत् स्वप्नस्थमिति प्राहुः संसिद्धाः शिवयोगिनः ॥ ४
ज्वालिनी स्तिमिता चोस्त्रा विद्याविद्या विशालिनी।
मालिनी शङ्करी चैत्र सुमित्रा बोधिनी तथा ॥ ५
एता दश महानाड्यो जीवेऽस्मिंस्ताः प्रतिष्ठिताः।
शयानं प्रति चोद्बुद्धो भावैर्भावैः समाहितः ॥ ६
शब्दादिविषयेभ्यस्तु आत्मसर्व्वगतास्त्रयः।
सङ्गिर्वा पूर्व्वसंयुक्तौ जीव ईहयते पुनः ॥ ७
अहङ्कारो मनो बुद्धिर्भावश्चतस्रोऽदेहजाः।
सह नैव न तिष्ठन्ति वारयन्ति शरीरिणम् ॥ ८
त एवं विहिताः सर्व्वे जीवश्चैव तु पञ्चमः।
कर्णिकायां ततिव्योम्नि संस्थितः सर्व्वतोमुखः ॥ ९
स्थितो मनसि सूक्ष्मस्तु स तद्गुणमनन्तकम्।
चेतः स एव सम्प्रोक्तं स एव पुरुषः स्मृतः ॥ १०
अहङ्कारोऽप्यजारम्भभूतो भास्करसन्नरः।
मम सोमस्त्वयं ब्रह्मा ज्ञानं धर्म्मो रतिस्तथा ॥ ११
रसमात्मा महौषध्यः सानुगो भावविस्तरः।

अहङ्कारी गताश्चश्च मृत्युदुःखमनामयम् ॥ १२
कामरोषजवा दुष्टाः सुधर्म्माश्चाश्रिताः समाः ।
विष्णुर्बुद्धिर्यथाकार्य्यं कारणं भूमिरेव च ॥ १३
ज्ञानवैराग्यमाकाश्यं राजसं भावविस्तरम् ।
जीवमध्ये स्थिता सूक्ष्मा विधूमा पावकं शिखा ॥ १४
अमृतं सर्व्वभूतानां गतिश्चैव हि सा परा ।
मध्ये तस्याग्निसङ्काशो जीवः प्रोतो न दृश्यते ॥ १५
सरसा लोहिता मुख्या प्रोता रसवती तथा ।
विधूमा चामृता चैव नन्दिनी बभ्रुविस्तरा ॥ १६
एताः सूक्ष्मतरा नाड्यः सम्भिद्य दृशपावकम् ।
पर्य्यटन्ति सदा सोमं भूताधारं पयोव्रतम् ॥ १७
स ताभिस्तर्पितः सोमः सर्व्वान्तरसमीपतः ।
शब्दापयति वृद्धस्तां जीवमध्यं गतां शिवाम् ॥ १८
तदेवामृतमाख्यातं यच्चैवात्मदमुत्तमम् ।
तया यदा हि सोमस्य शिखया कल्पिताप्लवः ॥१९
जागर्त्तोऽपि पुनः प्राज्ञः सर्व्वयोगसमन्वितः ।
या भूतेषु सुरा नाड़ी सा सुषुम्णा प्रतिष्ठिता ॥ २०
यदा योगोऽवमायाति सुप्त इत्युच्यते तदा ।
उभावेतौ सुनिर्जित्वा सुप्तजाग्रदवस्थयोः ॥ २१
अजाग्रतं स्वयञ्चैव ध्यानयोगञ्च चिन्तयेत् ।
गमनाद्याश्च ये भावा मनसश्चैव या घृणा ॥ २२
न बुद्धो ह्यध्ववैराग्यं तेन बुध्यन्ति योगिनः ।
यन्मन्यते मनः किञ्चिदिदं यच्च विकल्पते ॥ २३
यत् लङ्घ्यादहङ्कारस्तज्ज्ञात्वा मरणं त्यजेत् ।
निक्षिप्य च कृतः कर्म्म तद्विना कुशलं कृतः ॥ २४
कर्म्मवद्वविषादस्तु संशुद्धो मुच्यते ध्रुवम् ।
य इमे विषयाः किञ्चिद्दिव्याः सोमस्य सम्भवाः ॥२५
भोक्ता वह्निः स्मृतस्तेषां त्वचा नाल्पेन बाध्यते ।
इति ज्ञात्वा त्यजेच्चिन्तां सर्व्वयोगरतः सदा ॥ २६
स हि जीवदवस्थायामहमेव महेश्वरः ।
धर्म्मवादहयं लोकानिच्छा मां बध्यते कथम् ॥ २७
क्रियया योगविदुषः शङ्करं व्रतमाश्रिताः ।
गच्छन्ति स्वतनुं त्यक्त्वा भित्त्वा मायां परं पदम् ॥२८
इदमन्यत् परं ज्ञानमस्य सूक्ष्मतरं स्फुटम् ।
प्रवक्ष्यामि तव व्यास भक्तस्त्वमसि शङ्करे ॥ २९
योगिनो यं न जानन्ति यत् सूक्ष्मं परमोत्तमम् ।
मुक्त्वा पाशुपतान् शुद्धान् यन्न भूतेषु विद्यते ॥ ३०
मनो बुद्धिरहङ्कार इन्द्रियाणि गुणाः त्रयम् ।
न स्पृशन्ति सदात्मानं विकारास्तस्य ते वहिः ॥ ३१
सर्व्वत्र विद्यते सोऽथ न च सर्व्वेषु दृश्यते ।
स दृश्यते च भगवान्न तु प्रायः कथञ्चन ॥ ३२
सर्व्वभावगुणानान्तमचिन्त्यं परमेश्वरम् ।
ज्ञानेन ये प्रपश्यन्ति योगिनस्ते परा मताः ॥ ३३
छायैषां दृश्यते या तु चक्षुर्व्विषयसङ्गता ।
कनीन्यन्तःस्थितिर्व्यास हेतुः सर्व्वशरीरिणाम् ॥ ३४
अत्रास्ते स हरो ज्ञात्वा सूक्ष्मो मध्यगतो न यः ।
सहस्रकर्णिकायन्ति नाड्यो जीवे च संस्थिताः ॥३५
गान्धारी विजया चैव एताः प्राणवहाः स्मृताः ।
पाणिना तालगन्धाया नाड्यो नाभौ च संयुते ॥ ३६
योगादयो दशोष्मान्ता नाड्यो नागेन सम्भृताः ।
सप्राणो वहिरन्तश्च तर्पयन् हव्यवाहनः ॥ ३७
वृद्धस्य वारयेद्वायुं वहन् पुंसा बलेन च ।
नाड़ी लम्या सुषुम्णेति सोमवह्निस्ववस्थिता ॥ ३८
तस्मिन् सहेतुके देहकुमारे चातिलम्बिता ।
तस्मिंश्चातुरके देहे कुमारे चानलं स्थिताः ॥ ३९
शुध्यते वा तवासन्ना नित्यवातप्रसारिणी ।
समानध्यानसंयुक्ता रक्तमात्मात्र पूर्य्यते ॥ ४०
तदा वा शेः परो वायुः स च कूर्म्म इहोच्यते ।
नाड्यां नाभिनिबद्धायां नतायां तौ प्रतिष्ठितौ ॥ ४१
अधरावधरे नाड्यां वायुरल्पास्तदूर्द्ध्वतः ।
अधस्तात् पादसंनद्धः कूर्म्मः शिरसि च स्थितः ॥ ४२
यो वायुर्देवदत्ताख्यः कृतकार्य्याय वोधिनः ।
वह्निसोमनिबद्धौ तु प्राणदेवमहाबलौ ॥ ४३
एको विवर्द्धयत्यग्निमन्यः सोममतर्पयत् ।
देवदत्त-महानाग-कृकर-कूर्म्म-धनञ्जयाः ॥ ४४
प्राणास्ते मयि विख्याताश्चक्रयोगाभिपालिनः ।
हुतशेषं प्रदिष्टं वा सोमं तत्र प्रतिष्ठति ॥ ४५
सोमं विधित्सते यज्ञान् न तेषां मुक्तिलक्षणम् ।
दीप्तिरग्निः स्मृतायान्तु स्रवितश्चात्र यत्र सा ॥ ४६
तर्पणं पर्व्वणा तस्य कर्णिकायां तदा स्मृतम् ।
नेत्रे पश्यति यज्ज्योतिस्तारारूपं प्रकाशकम् ॥ ४७
स जीवः सर्व्वभूतानां आत्मानञ्च समाश्रितः ।

ज्योतिषश्च त्वषः सूक्ष्मं तत्त्वं तत् परमं स्मृतम् ॥ ४८
तच्चामृतं समाख्यातं ज्ञानलभ्यं तदुच्यते।
तस्मात् परतरं नास्ति योगविज्ञानदा गतिः ॥ ४९
ज्ञात्वैवं सन्त्यजेन्मोहं गुणत्रयविकारजम्।
अभिन्नस्यात्मनस्तस्य वह्निर्गम्येश्वरस्य च ॥ ५०
भेदं भगवतः कुर्य्यात् कोऽन्यो योगविशारदः।
निरञ्जनं निर्व्विकल्पं प्रभूतं न विकल्पयेत् ॥ ५१
विमोहं त्यज संसर्गात्क्रियाः कार्य्यविवर्ज्जिताः।
तं विशन्ति महेशानमीश्वरं कृतकारिणी ॥ ५२
इति तत्त्वं समाख्यातं व्यास माहेश्वरं तव।
तद्ब्रह्म परिपूर्णन्तु नाम रूपञ्च नास्ति ते ॥ ५३

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

सप्तपञ्चाशोऽध्यायः।

व्यास उवाच।

भगवन् सर्व्वयोगीश सर्व्वामरनमस्कृत।
अहो ज्ञानं त्वयाख्यातमज्ञानविनिवर्त्तनम् ॥ १
अद्याहं गतसन्देहो महादेवं परं प्रति।
शङ्करात् प्रकृतिर्जाता ब्रह्म-विष्णु शिवात्मको ॥ २
ज्ञात्वा षड्‌विंशमीशानं मुच्यते सर्व्वबन्धनात्।
सर्व्वयोगं यथापूर्व्वं त्यक्त्वा सकलसंहिताम् ॥ ३
निष्कलं सकलं ज्ञात्वा सद्य एव प्रकाशते।
श्रवणादस्य विप्रेन्द्र हितमुक्तमथाधिकम् ॥ ४
त्वत्प्रसादादहं तात प्राप्तज्ञानो गताशुभः।
निःसन्देहोऽभवं शान्तः प्रष्टव्यं नान्यदस्ति मे ॥ ५
तथापि ज्ञापयामीदं तत् त्वमाख्यातुमर्हसि।
एवं विज्ञानसम्पन्नः प्राप्तयोगो मुनिर्मुनिम् ॥ ६
विना क्लेशं तनुं त्यक्त्वा योगी योगबलान्वितः।
कथमाप्नोति तद्वस्तु निष्कलं पुरुषोत्तमम् ॥ ७
ईश्वरध्यानसम्प्राप्तमुपायं योगलक्षणम्।
कथयस्व मुनिश्रेष्ठ प्रष्टव्यं नान्यदस्ति मे ॥ ८
एवमुक्तः स शिष्येण व्यासेन सुमहात्मना।

सनत्कुमार उवाच।

कथयामि च विप्रेन्द्र शिवसिद्धान्तनिश्चयम् ॥ ९
शृणु व्यास परं ज्ञानमीश्वरध्यानकारणम्।
स्वेच्छया येन मुच्यन्ते योगिनो ज्ञानतत्पराः ॥
विद्योक्तमिति मां ज्ञात्वा मुहुरभ्यस्य चैव हि।
स्वदेहं विघ्नवत् त्यक्त्वा षड्‌विंशेन यमाप्नुयात् ॥
या नाड्यो वायुसंरुद्धाः सञ्चरन्ति शरीरिणः।
सेतुस्तासां ततानान्तु कर्णिकामध्यमाश्रिताः ॥
तमाश्रित्य तु सा नाड़ी वाह्यपादेषु संस्थिता।
स्मृता भूयस्तु या नाड्यस्ता एककरमाश्रिताः ॥
निःसमाने सहस्राणि नाड़ीनां परमात्मनि।
तासामेकैकशो भेदः सूक्ष्मसूक्ष्मतरः स्मृतः ॥ १४
तासु सञ्चरते प्राणः कर्णिकामध्यसम्भवः।
तत्रात्मा सूक्ष्मसंलक्ष्यः प्रागुक्तस्तिष्ठति द्विज ॥
विद्यया दिशि पश्यंस्तास्तं पश्येद्योगमास्थितः ॥
तत्तेजः सर्व्वनाड़ीषु विभक्तं सर्व्वदेहिनाम् ॥
ताश्च नाड्यो मनःसङ्गान्मनः कुर्व्वन्ति विप्लुतम्।
तत् तेजश्चक्षुराहृत्य सर्व्वनाड़ीसमाश्रितम् ॥
मन एकमतं कृत्वा तथात्मनि नियोजयेत्।
वायुर्वर्णजयो नाम यो हृदीह स्फुरेत् सदा ॥
त्रीणि तस्य मुखान्याहुः शिरो नाभिर्हृदेव हि
ये प्रमाणास्तवाख्याता वायवः कीर्त्तिता मया।
धनञ्जयस्य ते सर्व्वे वशगा तन्निबन्धनाः।
न वशा गन्तुमन्यत्र तस्मिंस्तिष्ठन्ति संस्थिताः ॥
नाभिबन्धनमासाद्य नाड़ीचक्रं समाश्रिताः।
द्वितीयं कर्णिकायान्तु तृतीयं तालुसंस्थितम् ॥
भ्रूविकारपरं शूलं त्रिविधोत्क्रान्तिरुच्यते।
हृदि शूलं परं नाड्यां तालौ परशुराश्रितः।
तासु के हृदि बद्धश्च पद्मनाड्यां नियोजितः।
भानौ विशोजितं सर्व्वं प्राणमेव विसृज्यति ॥
आक्षिप्य त्रितयं नाड्यां कर्णिकायां नियोज्य
चित्तमात्मनि संयोज्य विक्षिपेत् पूर्व्वतो मम
प्रयोगादस्य विप्रेन्द्र मुच्यते तत्क्षणान्मुनिः।
धर्म्माधर्म्मनिबन्धैस्तु कर्म्मभिः प्रागनुष्ठितैः ॥
यथा जीवा न बाध्यन्ते योगिनस्तदिदं शृणु।
वाह्यः शरीरजश्चेति मृत्युर्द्विविध उच्यते ॥
विषशस्त्रादितिगैस्तु श्वापदैर्वह्निभिर्जलैः।
वाह्यो मृत्युरिति ख्यातः शारीरन्तु निबोध ॥

रोगजः कालजो वापि मृत्युरभ्यन्तरे भवेत् ।
कालजो जरया युक्तो रोगजो व्याधिसंचितः ॥ २८
दुर्लभो मृत्युरभ्यासाद्धयोगसाधनजो मुनेः ।
योगोपायकृतो यश्च यश्च कालकृतः चयः ॥ २९
तयोर्भेदाधिकारी वा शृणु व्यास समासतः ।
कालचोभाद्वेदिको द्वितीयो मनसि स्थितः ॥ ३०
योगमाक्रामतः शब्दः श्रूयते श्रोत्रसन्निजः ।
स पूर्वं नीयते कूर्म्मं तेन वह्निस्त्यजेत् प्रभाम् ॥ ३१
निष्प्रभः सततो वह्निः शब्दयोगाद्विमुच्यते ।
शब्दस्पर्शौ गुणातीतो रूपयोगं विमुञ्चति ॥ ३२
एवमन्तौ प्रविष्टे तु सर्व्वं एवानितास्ततः ।
एकतो योगमिच्छन्तो मर्म्माणि विनिकृन्तति ॥ ३३
किर्म्मिरो देवदत्तश्च कृकरो नाग एव च ।
उदानो नाम संयुज्य कर्णिकायां विशन्ति हि ॥ ३४
श्वसजाद्वै भवेत् स्थाणौ मनो जीवति निर्गमः ।
इन्द्रियाणि मनो यान्ति मनः प्राणविनिर्गतम् ॥ ३५
तेषु सर्व्वेषु लीनेषु प्राणवायुं निपीड़येत् ।
पीड्यमानास्ततः सर्व्वं भवन्त्येकगतानिलाः ॥ ३६
सुसंयुक्तं ततः स्थानं ततः कर्म्म यदात्मकम् ।
एकस्था वायवः सर्व्वं पूरयन्ति धनञ्जयम् ॥ ३७
शेषस्तदीयकूर्म्माद्या जीवं त्यक्त्वा स तिष्ठति ।
एककालकृता ह्येषा सर्व्वभूतगुणस्थितिः ॥ ३८
विना योगं न जीर्य्येत सूक्ष्मं माहेश्वरं पदम् ।
उपविष्टः प्रसुप्तो वा उत्क्रान्तस्तु न संशयः ॥ ३९
स्वेच्छया मुच्यते व्यास ज्ञात्वा तत्त्वं महेश्वरम् ।
छुरिकां परशुं वापि शूलं वा धारयेन्मुनिः ॥ ४०
ततः सर्व्वं विलीयन्ते विकाराः करणैः सह ।
वीक्ष्यते चेश्वरं ब्रह्म सर्व्वतत्त्वं महेश्वरम् ॥ ४१
मनस्तावद्भ्रजं जन्तोः प्रयच्छति विपद्गतः ।
सहजो मोहमापन्नो ज्ञानवस्तु न विन्दति ॥ ४२
अनेन कर्म्मणा विप्र सर्व्वदुःखविवर्ज्जितः ।
सुखमारोहति ब्रह्म कर्म्मपूतस्तलादिव ॥ ४३
यदा न पश्च विज्ञाय दृष्ट्वा तु परिनिष्ठितः ।
पञ्चभिर्ब्रह्मभिः पूतो भस्मना दीक्षितो द्विजः ॥ ४४
शङ्करैकमना योगी ज्ञानमेतदवाप्नुते ।
माहेश्वरमिमं योगं निष्कलं मुक्तिकारणम् ॥ ४५
यत्नादपि न मुञ्चन्ति व्रतमप्राप्य शाङ्करम् ।
सर्व्वज्ञाते प्रबुद्धेन नेह पाशुपतं व्रतम् ॥ ४६
महादेवपरो भूत्वा सर्व्वज्ञानमवाप्नुहि ।
नैवामत्या परं ब्रह्म अन्ये विन्दन्ति योगिनः ॥ ४७
महादेवप्रसादेन न मुक्ताः शिवयोगिनः ।
एष मोक्षविधिः कृत्स्नः सर्व्वप्रत्ययवर्ज्जितः ॥ ४८
सकलं स्थापदं दिव्यं ब्रह्मलोकात् परस्थितम् ।
महादेवस्य वक्ष्यामि तद्भक्त्या येन यान्ति हि ॥ ४९

इति श्रीशैवे महापुराणे सनत्कुमारसंहितायां
योगध्याने सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशोऽध्यायः ।

सनत्कुमार उवाच ।

सत्यस्य महतश्चैव जनस्य तपसस्तथा ।
भूत-भव्य-भवानाञ्च सप्तानामूर्द्ध्वतः स्थिताः ॥ १
लोका भगवतः शम्भोर्यत्रास्ते सततं शिवः ।
नासौ तर्कविनिर्द्दिष्टो लोकास्तस्मिन् प्रतिष्ठिताः ॥ २
ऊर्द्ध्वतिर्य्यगधस्ताच्च लोकास्तद्विनिबन्धनाः ।
ब्रह्माण्डं सकलं तस्मिञ्छिवलोके प्रतिष्ठितम् ॥ ३
नासौ नश्यति संहारे ध्रुवस्थानं सुरालयः ।
यत्राहं सनकाद्याश्च ब्रह्मा चैव पितामहः ॥ ४
बालखिल्यपुरोगाश्च सिद्धाश्च कापिलादयः ।
शिवयोगं परिप्राप्ताः सत्त्वादिगुणवर्ज्जिताः ॥ ५
निष्कामा निष्ठिता व्यास सेवमानाश्च ईश्वरम् ।
परमात्मा च भावोऽसौ परमोऽसौ मनोषिणाम् ॥ ६
परमैश्वर्य्यसंयुक्तस्तत्रास्ते विश्वेश्वरः ।
चमा सत्यं धृतिश्चैव तपो वैराग्यमेव च ॥ ७
विष्णुलत्त्व विधावलमायबोधो महेशता ।
नित्यमेतानि तिष्ठन्ति तस्मिन् देवे महेश्वरे ॥ ८
अतः परम्परो दिव्ये परमाणोः पदे स्थितः ।
मनसः प्राकृतस्यादौ तत् तेजःसम्प्रकाशनः ॥ ९
यथासिद्धेर्मण्डलन्तु लौकिकं सापवर्गिकम् ।
महान्तः सर्व्वतो नित्या ईश्वरात् तदभूत् तदा ॥ १०
तस्माद्द्विजस्य निर्भेदः चेत्रतः स विभुः स्मृतः ।
प्रकृतिर्वैष्णवी प्रोक्ता सा च तस्माद्विनिर्गता ॥ ११

अमुष्य पुरतो ब्रह्मा ब्रह्मणः शङ्करात्मनः ।
ब्रह्मलोकपुरस्ताच्च पुरं तेजोमयं परम् ॥ १२
यत् स्थानं विग्रहेशस्य ईश्वरस्य महात्मनः ।
नाम्ना शिवपुरं व्यास गतिरीश्वरयोगिणाम् ॥ १३
शतं शतसहस्राणां योजनानां तदुच्यते ।
महामण्डलसंस्थानं तन्मध्ये विमलं शुभम् ॥ १४
स्फुरदादित्यरूपोऽसौ वह्नितोऽधिकतेजसा ।
महता जातरूपेण प्रकारेण स वेष्टितः ॥ १५
बहुभिर्हेमजैर्हारैर्मणिमुक्ताविभूषितैः ।
शोभितं तत् पुरं रम्यं शुशुभे सिद्धसेवितम् ॥ १६
जरा-मृत्यु-श्रम-व्याधि-लोह-कोप-महाभयम् ।
एते तत्र न विद्यन्ते तस्मिन् शिवपुरे मुने ॥ १७
शतं शतसहस्राणां योजनानां यथादिशम् ।
तत् पुरं वृषभाङ्कस्य सर्व्वस्यातिसमृद्धिमत् ॥ १८
दिव्यामरावती भूमिः स्वर्गमात्रसुखावहा ।
विमलेन्दुविकाशानि वालार्कसदृशानि च ॥ १९
क्वचिद्रक्तानि पद्मानि क्वचिच्छ्वेतानि रेजिरे ।
महाह्रदप्रमाणानि नानावैदूर्य्यसन्निभाः ॥ २०
गन्धवन्ति महार्हाणि विन्यस्तानि महीतले ।
इन्द्रनीलनिकाशानि महामणिनिभानि च ॥ २१
क्वचित् कृष्णानि रक्तानि दिव्यगन्धवहानि च ।
कान्तानि रेजिरे तत्र उत्पलाणि समन्ततः ॥ २२
प्रवहन्ति महानद्यो पुरेऽस्मिन्नमृतोदकाः ।
पुरे भगवतः शम्भोः परिवार्य्य निबोध ताः ॥ २३
वरदा च वरेण्या च वरेशा वरवर्णिनि ।
वराहा वारिभद्रा च वरा चैव महापगा ॥ २४
नानाकुसुमसंमिश्रं बहुतानिजलामृतम् ।
न देवा न मुनीन्द्राश्च नासुराः पशवो न च ॥ २५
न चैवान्ये महेशस्य ज्ञातुं तत् परमाद्भुतम् ।
अन्तर्भावविशुद्धा ये सर्व्वतो भक्तिभाविताः ॥ २६
शिवैकमनसो व्यास तस्मिन् मोदन्ति ते नराः ।
तस्य मध्ये पुरेन्द्रस्य सूर्य्यज्वलनवर्च्चसः ॥ २७
मेरुशृङ्गप्रतीकाशो दृश्यते च पुनः पुनः ।
प्रासादो नवपादिक्षु कामदः कनकामयः ॥ २८
अनिरीक्ष्यो महालुब्धैः समन्तात् परिशोभितः ।
वैदूर्य्य-व्योमसङ्काशैः स्फटिकैश्चन्द्रसप्रभैः ॥ २९

प्रवालैरर्कसङ्काशैरिन्द्रनीलमयैः शुभैः ।
शिखिरश्मिप्रकाशाभिः क्वचिदर्कस्वरूपिभिः ॥ ३०
शोभितन्तु पताकाभिर्विरराज सुखानिलम् ।
सर्व्वर्त्तुकुसुमैश्चित्रैर्विविधैश्च फलैरपि ॥ ३१
शुशुभे तत् पुरं दिव्यं पादपैः कामदैश्चितम् ।
यथैव काञ्चनो मेरुः सर्व्वेषां प्रवरो महान् ॥ ३२
तथैव तत् पुरं रेजे सर्व्वलोकोपरि स्थितम् ।
तत्र विश्वेश्वरः साक्षान्महाभूतपरिग्रहः ॥ ३३
सदास्ते सहितः पत्न्या षड्विंशः सपरिग्रहः ।
लक्ष्मीर्मेधा धृतिश्चैव श्रीः कीर्त्तिश्च सरस्वती ॥ ३४
उमया सहितास्तत्र मोदन्ते लोकमातरः ।
तास्ता मुनीश्वरा दिव्या रूपिण्यो योगसंयुताः ॥ ३५
गणेशैः सह मोदन्ते देवतासहिता मुने ।
गणानामधिपास्तत्र कुब्जवामनरूपिणः ॥ ३६
कामरूपा महावेशा महायोगपरायणाः ।
प्रमथानां महात्मानस्तत्र तिष्ठन्ति सुव्रताः ॥ ३७
महाकालेश्वरस्तत्र नन्दीश्वर-गणेश्वरौ ।
गृहीतपट्टिशौ दिव्यौ सदेवौ देवपार्श्वगौ ॥ ३८
जया च विजया चैव दिव्ययोगबलान्विते ।
देव्याः पार्श्वे स्थिते नित्यमसिहस्ते महाबले ॥ ३९
ककुद्मी च महानादो महानीश्वरवाहनः ।
तत्रास्ते मेघसङ्काशो गोपतिः कामरूपधृक् ॥ ४०
घण्टाशक्तिधरः श्रीमान् पितृपार्श्वे व्यवस्थितः ।
शाखश्चैव विशाखश्च नैगमी चैव सुव्रत ॥ ४१
कुमाराश्च स्थिताः पार्श्वे लोकानुग्रहहेतवः ।
दश सूर्य्यसहस्राणि रथे सूक्ष्मे जगत्पतेः ॥ ४२
शार्दूलाः काञ्चनास्तत्र सिंहाश्च रजतप्रभाः ।
प्रांशूनां मणितुल्यानां महायोगबलौजसाम् ॥ ४३
असंख्याताः स्थिताः कोट्यो रुद्राणां तत्र सुव्रत ।
काञ्चनैः सुव्रतैश्चित्रैर्दिव्यैर्मणिमयैरपि ॥ ४४
शुभैः प्रतिष्ठितः श्रीमान् शुशुभे स्यन्दनोत्तमः ।
स रथो देवदेवस्य योगेशो योगवाहनः ॥ ४५
सर्व्वलोकसमो दिव्यो रत्नभित्तियुतः क्षणात् ।
सकलाङ्गो महेशस्य देवदेवजगत्सृजः ॥ ४६
एतदाख्यानमव्यग्रं सर्व्वाशुभनिवर्त्तनम् ।
सर्व्वभावार्पितात्मानो ये योगा रुद्रतत्पराः ॥ ४७

यत्र तत्र मृता वत्स तेषां तत्रास्पदं स्मृतम्।
ये च माहेश्वरा व्यास तिष्ठन्ति शङ्करालये॥ ४८
अन्ये ये शङ्करे भक्तास्ताञ्छृणुष्व समाहितः।
अहं सनन्दनश्चैव सनकश्च सनातनः॥ ४९
धाता ब्रह्मा स तु ज्येष्ठो नर-नारायणावपि।
कपिलो योगसिद्धस्तु सिद्धः पञ्चशिखस्तथा॥ ५०
मुनिर्देवशिरा यश्च याज्ञवल्क्यादयस्तथा।
ऋषयः शुकधर्म्माणः परमैश्वर्य्यसंयुताः॥ ५१
तिष्ठन्तीश्वरमूले तु गुणातीता दिदृक्षवः।
परसंहारकाले तु अन्यत्र लयसंस्थिते॥ ५२
ईश्वरं ते समाविश्य प्राप्नुवन्त्यापराह्निकम्।
यैश्च दृष्टानि विप्रेन्द्र हरस्यायतनानि तु॥ ५३
महाकालेश्वरश्चैव गोकर्णश्च तथा शुभौ।
अविमुक्ते च ओङ्कारं विश्वेश्वरमिहापि च॥ ५४
कैकर्णेश्वरो देवः श्रीगिरौ वा महेश्वरः।
कारोहने च देवेशो महाकाले च शङ्करः॥ ५५
भद्रेशश्च महादेवः शब्दकर्णेश्वरस्तथा।
महाकालेश्वरश्चैव गोकर्णे च तथा शुभौ॥ ५६
अविमुक्ते च ओङ्कारं यैश्च दृष्टं महामुने।
तेऽपि यान्ति मृताः काले पुरे च गिरिजापतेः॥ ५७
योगः पाशुपतो यस्य मया ते परिकीर्त्तितः।
व्रतं पाशुपतं यस्य सोऽपि तत्र प्रवर्त्तते॥ ५८
भक्तिर्येषां भवे नित्यं कृतार्थास्ते नरोत्तमाः।
मृताः शिवपुरे व्यास भिक्षापट्टिशपाणयः॥ ५९
नन्दीश-स्कन्दसङ्काशा योगैश्वर्य्यबलान्विताः।
रुद्रा भवन्ति विप्रेन्द्र सदा शङ्करपार्श्वगाः॥ ६०
एष ते कथितः सर्व्वो योगो माहेश्वरः परः।
सकलञ्चैव ज्ञात्वैवं विज्ञाय परमेश्वरम्॥ ६१
सर्व्वविषविनिर्म्मुक्तः परं मोक्षमवाप्स्यसि।
भविष्यसि च योगी च ज्ञानस्यास्य प्रभावतः॥ ६२
जगत्स्थितिकरो योगी तस्माद्धर्म्मप्रवर्त्तकः।
ज्ञानसिद्धा स्मृतिं प्राप्य ब्रह्माण्डोद्भवकारणे॥ ६३
स्थितिधर्म्मनिरोधानां पुराणञ्च करिष्यसि।
यज्ञकर्म्मप्रचारार्थं वेद मे त्वं स्वयम्भुवम्॥ ६४
विज्ञानार्थमनुस्मृत्य चतुर्द्धा विकरिष्यसि।
मन्वन्तरमिदं कृत्स्नं वैवस्वतमनिन्दितम्॥ ६५

लोके स्थितिकरा धर्म्मा वेदस्मृतिपुरोगमाः।
त्वत्कृताः प्रकरिष्यन्ति तीर्थकृत् त्वं भविष्यसि॥ ६६
तस्माद्व्रतञ्च सम्प्राप्य पशुपाशविमोचनम्।
शङ्करज्ञानसम्पन्न ईश्वरे लयमाप्स्यसि॥ ६७
एवमुक्तस्तदा व्यास मुनिना ब्रह्मसूनुना।
उपसेव्य मुनीन्द्रन्तु भस्मसंस्कारमाप्नवत्॥ ६८
तत्क्षणाच्चास्य योगोऽसौ प्रादुर्भूतो महामुनेः।
अभिवाद्य गुरुं व्यासो ब्रह्मपुत्रं महातपाः॥ ६९
सवाय तेन शौचार्थं विवेश च महीतलम्।
एवं सनत्कुमारस्तु पृष्टो व्यासेन धीमता॥ ७०
मुनीन्द्रं कथयामास पुराणं शिवसम्भवम्।
सर्व्वागमसमायुक्तं मन्वन्तरजगत्स्थितम्॥ ७१
शिवयोगधरं धीरं सर्व्वज्ञानार्णवं महत्।
तस्माद्यूयमपि प्राप्य व्रतं पाशुपतं द्विजाः॥ ७२
अभ्यस्य सकलं योगमीश्वरे लयमाप्स्यथ।
इदमागत्य चाभ्यस्य व्यासोऽसौ मुनिसत्तमः॥ ७३
वेदार्थस्मृतिसम्पन्नश्चिन्तायक्रे महाद्युतिः।
अतो विनिर्गतो धर्म्मो योगविद्यास्तथैव च॥ ७४
पुराणं प्रथमं प्राह श्लाघ्यं नन्दीश्वरो द्विजः।
स सर्व्ववित् समाख्यातो य इमं वेत्ति सर्व्वतः॥ ७५
त्रिवर्गः प्राप्यते तेन मुक्तिरेतेन जायते।
आयुः प्रवर्द्धते योगी वर्त्तते तेन लभ्यते॥ ७६
कृत्स्नस्य जगतो विद्यास्त्वादिकर्त्ता यथा हरः।
तथा सर्व्वपुराणानां पुराणोऽयं परः स्मृतः॥ ७७
अधीतो यैरिदं विप्रैस्तत्परैश्चापि सेवितः।
मृत्युकालमनुप्राप्य न ते शोचन्ति जन्मिनः॥ ७८
श्रवणाद्देवदेवस्य सायुज्यं धारणाद्विभोः।
सेवनाद्योगसंसिद्धिं मोक्षञ्च परमं लभेत्॥ ७९

श्लाघ्यात् पुण्यमुमापतेर्हि जगतां
स्तोत्रानुवादं परं
देव्याश्चापि महाप्रभावकथनं
सर्व्वागमरचितः।
श्रुत्वैवं परमं नराः पदमिदं
त्र्यक्षालयं प्राप्नुयु-
र्नाकेन्द्रैश्च सुरेन्द्रयक्षविबुधः
सिद्धैर्द्विजैः सेवितम्॥ ८०

शशावर्पितसर्व्वभावहृदयै-
र्यैर्यैरयं सेवितः
सर्व्वे ते ज्वलदर्कवह्निवपुष-
स्त्र्यक्षाः शशाङ्कत्विषः।
देवस्यानुचराश्चतुर्भुजवरा
निर्मुक्तसर्व्वाशुभाः
सर्व्वे हर्षसमन्विताः श्रुतधियो
नानागुणैरन्विताः॥ ८१
तत इह परमं प्राप्य योगं मुनीन्द्राः
परमपरमनन्तं प्राप्य देवाधिवासम्।
त्रिपुरहरमिमं ये ज्ञातवन्तः प्रयत्ना-
द्धतकलुषचयास्ते प्राप्नुवन्ते च मोक्षम्॥ ८२

इदं पुराणं परमं पवित्रं
शुचिः पठेद्यः शृणुयाच्च यो नरः।
स सर्व्वकामान् समवाप्य दुर्लभान्
शिवस्य चान्ते पदमुत्तमं व्रजेत्॥ ८३
पितृणां तृप्तिदं श्राद्धे पठ्यमानमिदं भवेत्।
दुष्टस्वप्नादि-दुष्कर्म्म-कलिकल्मषनाशनम्॥ ८४
अधीते चास्य यः श्लोकं श्लोकार्द्धं वा समाहितः।
श्रद्धया भक्तियुक्तो वा तस्य प्रीतो भवेच्छिवः॥ ८५

इति श्रीशिवे महापुराणे सनत्कुमारसंहितायां
मष्टपञ्चाशोऽध्यायः॥ ५८॥

समाप्तेयं सनत्कुमारसंहिता।

शिवपुराणम्।

वायवीयसंहिता।

पूर्व्वभागः।

प्रथमोऽध्यायः।

ओं नमो भगवते वासुदेवाय।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥

नमः समस्तसंसार-चक्रभ्रमणहेतवे।
गौरीकुचतटद्वन्द्व-कुङ्कुमाञ्चितवक्षसे॥ १
उक्ता भगवतो लब्धं प्रसादादुपमन्युना।
नियमादुत्थितो वायुर्मध्यं प्राप्ते दिवाकरे॥ २
ऋषयश्चापि ते सर्व्वे नैमिषारण्यवासिनः।
अथायमर्थः प्रष्टव्य इति कृत्वा विनिश्चयम्॥ ३
कृत्वा यथा स्वकं कृत्यं प्रत्यागत्य यथा पुरा।
भगवन्तमुपायान्तं समीक्ष्य समुपाविशन्॥ ४
अथासौ नियमस्यान्ते भगवानम्बरोद्भवः।
मध्ये मुनिसमाजस्य भेजे कृप्तंवरासनम्॥ ५
सुखासनोपविष्टश्च वायुर्लोकनमस्कृतः।
श्रीमद्विभूतिर्मायस्य हृदि कृत्वेदमब्रवीत्॥ ६
तं प्रपद्ये महादेवं सर्व्वज्ञमपराजितम्।
विभूतिः सकलं यस्य चराचरमिदं जगत्॥ ७
इत्याकर्ण्य शुभां वाणीमृषयः क्षीणकल्मषाः।
विभूतिविस्तरं श्रोतुमूचुस्ते परमं वचः॥ ८

ऋषय ऊचुः।

उक्तं भगवता वृत्तमुपमन्योर्महात्मनः।
क्षीरार्थिनापि तपसा यत् प्राप्तं परमेश्वरात्॥ ९
दृष्टोऽसौ वासुदेवेन कृष्णेनाक्लिष्टकर्म्मणा।
धौम्याग्रजस्ततस्तेन कृतं पाशुपतं व्रतम्॥ १०
प्राप्तञ्च परमं ज्ञानमिति प्रागेव शुश्रुम।
कथं स लब्धवान् कृष्णो ज्ञानं पाशुपतं परम्॥ ११

वायुरुवाच।

स्वेच्छया ह्यवतीर्णोऽपि वासुदेवः सनातनः।
निन्दयन्निव मानुष्यं ददर्श मुनिसत्तमम्॥ १२
रुद्राक्षमालाभरणं जटामण्डलमण्डितम्।
तच्छिष्यभूतैर्मुनिभिः शाखैर्वेदमिवावृतम्॥ १३
शिवध्यानरतं शान्तमुपमन्युं महाद्युतिम्।
नमश्चकार तं दृष्ट्वा हृष्टसर्व्वतनूरुहः॥ १४
बहुमाने न कृष्णोऽसौ त्रिः कृत्वा तु प्रदक्षिणम्।
तस्यावलोकनादेव मुनेः कृष्णस्य धीमतः॥ १५

नष्टमासीन्मलं सर्व्वं मायीयं कर्म्म एव च ।
ततः क्षीणमलं कृष्णमुपमन्युर्यथाविधि ॥ १६
भस्मनोद्धूल्य तं मन्त्रैरग्निरित्यादिभिः क्रमात् ।
अथ पाशुपतं साक्षाद्व्रतं द्वादशमासिकम् ॥ १७
कारयित्वा मुनिस्तस्मै ददौ ज्ञानमनुत्तमम् ।
ततःप्रभृति तं कृष्णं मुनयः शंसितव्रताः ॥ १८
दिव्याः पाशुपताः सर्व्वे परिवृत्योपतस्थिरे ।
ततो गुरुनियोगाद्वै कृष्णः परमभक्तिमान् ॥ १९
तपश्चकार पुत्रार्थं साम्बमुद्दिश्य शङ्करम् ।
तपसा तेन वर्षान्ते दृष्टा देवं महेश्वरम् ॥ २०
साम्बं सगणमव्यग्रो लब्धवान् पुत्रमात्मनः ।
यस्मात् साम्बो महादेवः प्रददौ पुत्रमात्मनः ॥ २१
तस्माज्जाम्बवतीसूनुं साम्बं चक्रे स नामतः ।
पुराणं धर्म्मशास्त्रञ्च विद्या ह्येताश्चतुर्द्दश ॥ २२
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वश्चेत्यनुक्रमात् ।
अर्थशास्त्रं परं तस्माद्विद्या ह्यष्टादश स्मृताः ॥ २३
अष्टादशानां विद्यानामेतासां भिन्नवर्त्मनाम् ।
आदिकर्त्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः ॥२४
स हि सर्व्वजगन्नाथः सिसृक्षुरखिलं जगत् ।
ब्रह्माणं विदधे साक्षात् पुत्रमग्रे सनातनम् ॥ २५
तस्मै प्रथमपुत्राय ब्रह्मणे विश्वयोनये ।
विद्याश्चेमा ददौ पूर्व्वं विश्वसृष्ट्यर्थमीश्वरः ॥ २६
लब्धविद्येन तेनापि प्रजासृष्टिं वितन्वता ।
प्रथमं सर्व्वशास्त्राणां पुराणं ब्रह्मणा स्मृतम् ॥ २७
अनन्तरन्तु वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ।
प्रवृत्तिः सर्व्वशास्त्राणां तन्मुखादभवत् ततः ॥ २८
यदास्य विस्तरं शक्ता नाधिगन्तुं प्रजा भुवि ।
तदा विद्यासमासार्थं विश्वेश्वरनियोगतः ॥ २९
द्वापरान्तेषु विश्वात्मा विष्णुः सर्व्वजगन्मयः ।
व्यासनाम्ना चरत्यस्मिन्नवतीर्य्य महीतले ॥ ३०
स पुनर्द्वापरे चास्मिन् कृष्णद्वैपायनाख्यया ।
अरण्यामिव हव्याशी सत्यवत्यामजायत ॥ ३१
मतिमन्थानमाविध्य येन वेदमहार्णवात् ।
प्रकाशो जनितो लोके महाभारतचन्द्रमाः ॥ ३२
संक्षिप्य स पुनर्वेदांश्चतुर्द्धा कृतवान् मुनिः ।
व्यस्तवेदतया लोके वेदव्यास इति श्रुतः ॥ ३३

पुराणमपि संक्षिप्तं चतुर्लक्षप्रमाणतः ।
अद्यापि देवलोके तच्छतकोटिप्रविस्तरम् ॥ ३४
यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।
न चेत् पुराणं संविद्यान्नैव स स्याद्विचक्षणः ॥ ३५
इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥ ३६
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम् ॥ ३७
दशधा चाष्टधा चैतत् पुराणमुपदिश्यते ।
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥ ३८
भविष्यं नारदीयञ्च मार्कण्डेयमतः परम् ।
आग्नेयं ब्रह्मवैवर्त्तं लैङ्गं वाराहमेव च ॥ ३९
स्कान्दञ्च वामनञ्चैव कौर्म्मं मात्स्यञ्च गारुडम् ।
ब्रह्माण्डञ्चातिपुण्योऽयं पुराणानामनुक्रमः ॥ ४०
तत्र शैवं तुरीयं यच्छार्व्वं सर्व्वार्थसाधकम् ।
ग्रन्थलक्षप्रमाणं तद्व्यस्तं द्वादशसंहितम् ॥ ४१
निर्म्मितं तच्छिवेनैव तत्र धर्म्मः प्रतिष्ठितः ।
तदुक्तेनैव धर्म्मेण शैवास्त्रैवर्णिका नराः ॥ ४२
एकजन्मनि मुच्यन्ते प्रसादात् परमेष्ठिनः ।
तस्माद्विमुक्तिमन्विच्छन् शिवमेव समाश्रयेत् ॥ ४३
तमाश्रित्यैव देवानामपि मुक्तिर्न चान्यथा ।
यदिदं शैवमाख्यातं पुराणं वेदसम्मितम् ॥ ४४
तस्य भेदान् समासेन ब्रुवतो मे निबोधत ।
विद्येश्वरं तथा रौद्रं वैनायकमनुत्तमम् ॥ ४५
औमं मातृपुराणञ्च रुद्रैकादशकं तथा ।
कैलासं शतरुद्रञ्च कोटिरुद्राख्यमेव च ॥ ४६
सहस्रकोटिरुद्राख्यं वायवीयं ततः परम् ।
धर्म्मसंज्ञं पुराणञ्चेत्येवं द्वादश संहिताः ॥ ४७
विद्येशं दशसाहस्रमुदितं ग्रन्थसंख्यया ।
रौद्रं वैनायकञ्चौमं मातृकाख्यं ततः परम् ॥ ४८
प्रत्येकमष्टसाहस्रं त्रयोदशसहस्रकम् ।
रुद्रैकादशकाख्यं यत् कैलासं षट्सहस्रकम् ॥ ४९
शतरुद्रं दशप्रोक्तं कोटिरुद्रं तथैव च ।
सहस्रकोटिरुद्राख्यं दशसाहस्रकं तथा ॥ ५०
यदेतद्वायुना प्रोक्तं चतुःसाहस्रमीरितम् ।
तथा पञ्चसहस्रन्तु यदेतद्धर्म्मनामकम् ॥ ५१

तदेवं लक्षमुद्दिष्टं शैवं शाखाविभेदतः ।
चतुःसहस्रकं यत् तु वायुना समुदीरितम् ॥ ५२
तदिदं वर्त्तयिष्यामि भागद्वयसमन्वितम् ।
नावेदविदुषि वाच्यमिदं शास्त्रमनुत्तमम् ॥ ५३
न चैवाश्रद्दधानाय नापुराणविदे तथा ।
परीक्षिताय शिष्याय धार्म्मिकायानसूयवे ॥ ५४
प्रदेयं शिवभक्ताय शिवधर्म्मानुसारिणे ।
पुराणसंहिता यस्य प्रसादान्मयि वर्त्तते ॥ ५५
नमो भगवते तस्मै व्यासायामिततेजसे ॥ ५६

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे विद्यावतारकथनं नाम
प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

सूत उवाच ।

पुरा कालेन महता कल्पेऽतीते पुनः पुनः ।
अस्मिन्नुपस्थिते कल्पे प्रवृत्ते सृष्टिकर्म्मणि ॥ १
प्रतिष्ठितायां वार्त्तायां प्रबुद्धासु प्रजासु च ।
मुनीनां षट्कुलीयानां ब्रुवतामितरेतरम् ॥ २
इदं परमिदं नेति विवादः सुमहानभूत् ।
परस्य दुर्निरूपत्वान्न जातस्तत्र निश्चयः ॥ ३
तेऽभिजग्मुर्विधातारं द्रष्टुं ब्रह्माणमव्ययम् ।
यत्रास्ते भगवान् ब्रह्मा स्तूयमानः सुरासुरैः ॥ ४
मेरुशृङ्गे शुभे रम्ये देव-दानवसङ्कुले ।
सिद्धचारणसम्बाधे यक्ष-गन्धर्व्वसेविते ॥ ५
विहङ्गसङ्घसंघुष्टे मणिविद्रुमभूषिते ।
निकुञ्ज-कन्दर-दरी-गुहा-निर्झरशोभिते ॥ ६
तत्र ब्रह्मवनं नाम नानामृगसमाकुलम् ।
दशयोजनविस्तीर्णं शतयोजनमायतम् ॥ ७
सुरसामलपानीय-पूर्णरम्यसरोवरम् ।
मत्तभ्रमरसंछन्न-रम्यपुष्पितपादपम् ॥ ८
तरुणादित्यसङ्काशं तत्र चारु महत् पुरम् ।
दुर्द्धर्षं बलदृप्तानां दैत्य-दानव-रक्षसाम् ॥ ९
तप्तजाम्बूनदमयं प्रांशुप्राकारतोरणम् ।
निर्व्यूह-वलभी-कूट-प्रतोलीशतमण्डितम् ॥ १०

महार्हमणिचित्राभिर्लिलिहानमिवाम्बरम् ।
महाभवनकोटीभिरनेकाभिरलङ्कृतम् ॥ ११
तस्मिन् निवसति ब्रह्मा साध्यैः सार्द्धं प्रजापतिः ।
तत्र गत्वा महात्मानं साक्षाल्लोकपितामहम् ॥ १२
ददृशुर्मुनयो देवं देवर्षिगणसेवितम् ।
शुद्धचामीकरप्रख्यं सर्व्वाभरणभूषितम् ॥ १३
प्रसन्नवदनं सौम्यं पद्मपत्रायतेक्षणम् ।
दिव्यकान्तिसमायुक्तं दिव्यगन्धानुलेपनम् ॥ १४
दिव्यशुक्लाम्बरधरं दिव्यमालाविभूषितम् ।
सुरासुरेन्द्रयोगीन्द्र-वन्द्यमानपदाम्बुजम् ॥ १५
सर्व्वलक्षणयुक्ताङ्ग्या लब्धचामरहस्तया ।
भ्राजमानं सरस्वत्या प्रभयेव दिवाकरम् ॥ १६
तं दृष्ट्वा मुनयः सर्व्वे प्रहृष्टवदनेक्षणाः ।
शिरस्यञ्जलिमाधाय तुष्टुवुः सुरपुङ्गवम् ॥ १७

मुनय ऊचुः ।

नमस्त्रिमूर्त्तये तुभ्यं सर्गस्थित्यन्तहेतवे ।
पुरुषाय पुराणाय ब्रह्मणे परमात्मने ॥ १८
नमः प्रधानदेहाय प्रधानक्षोभकारिणे ।
त्रयोविंशतिभेदेन विकृतायाविकारिणे ॥ १९
नमो ब्रह्माण्डजाताय ब्रह्माण्डोदरवर्त्तिने ।
तत्र संसिद्धकार्य्याय संसिद्धकरणाय च ॥ २०
नमोऽस्तु सर्व्वलोकाय सर्व्वलोकविधायिने ।
सर्व्वात्मदेहसंयोग-वियोगविधिहेतवे ॥ २१
त्वयैव निखिलं सृष्टं संहृतं पालितं जगत् ।
तथापि मायया नाथ न विद्मस्त्वां पितामह ॥ २२

सूत उवाच ।

एवं ब्रह्मा महाभागैर्महर्षिभिरभिष्टुतः ।
प्राह गम्भीरया वाचा मुनीन् प्रह्लादयन्निव ॥ २३

ब्रह्मोवाच ।

ऋषयो हे महाभागा महासत्त्वा महौजसः ।
किमर्थं सहिताः सर्व्वे यूयमत्र समागताः ॥ २४
तमेवंवादिनं देवं ब्रह्माणं ब्रह्मवित्तमाः ।
वाग्भिर्विनयगर्भाभिः सर्व्वे प्राञ्जलयोऽब्रुवन् ॥ २५

मुनय ऊचुः ।

भगवन्नन्धकारेण महता वयमावृताः ।
खिन्ना विवदमानाश्च न पश्यामोऽत्र यत् परम् ॥ २६

त्वं हि सर्व्वजगद्धाता सर्व्वकारणकारणम्।
त्वया ह्यविदितं नाथ नेह किञ्चन विद्यते ॥ २७
कः पुमान् सर्व्वसत्त्वेभ्यः पुराणः पुरुषः परः।
विशुद्धः परिपूर्णश्च शाश्वतः परमेश्वरः ॥ २८
केनैव चित्रकृत्येन प्रथमं सृज्यते जगत्।
अन्तकाले पुनः सर्व्वं कस्मिन् प्रलयमेष्यति ॥ २९
कस्य भूतानि वश्यानि कः सर्व्वविनियोजकः।
कथं स पुरुषः शक्यो द्रष्टुमस्माभिरीश्वरः ॥ ३०

सूत उवाच।

एवं पृष्टस्तदा ब्रह्मा विस्मयस्मेरवीक्षणः।
देवानां दानवानाञ्च मुनीनामपि सन्निधौ ॥ ३१
उत्थाय सुचिरं ध्यात्वा रुद्र इत्युच्चरन् गिरम्।
आनन्दक्लिन्नसर्व्वाङ्गः कृताञ्जलिरभाषत ॥ ३२

ब्रह्मोवाच।

यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह।
आनन्दं यस्य वै विद्वान् न बिभेति कुतश्चन ॥ ३३
यस्मात् सर्व्वमिदं ब्रह्म-विष्णु-रुद्रेन्द्रपूर्व्वकम्।
सह भूतेन्द्रियैः सर्व्वैः प्रथमं सम्प्रसूयते ॥ ३४
कारणानाञ्च यो धाता ध्याता परमकारणम्।
न सम्प्रसूयतेऽन्यस्मात् कुतश्चन कदाचन ॥ ३५
सर्व्वैश्वर्य्येण सम्पन्नो नाम्ना सर्व्वेश्वरः स्वयम्।
सर्व्वैर्मुमुक्षुभिर्ध्येयः शम्भुराकाशमध्यगः ॥ ३६
योऽग्रे मां विदधे पुत्रं ज्ञानञ्च प्रहिणोति मे।
यत्प्रसादान्मया लब्धं प्राजापत्यमिदं पदम् ॥ ३७
ईशो वृक्ष इव स्तब्धो य एको दिवि तिष्ठति।
येनेदमखिलं पूर्णं पुरुषेण महात्मना ॥ ३८
एको बहूनां जन्तूनां निष्क्रियाणाञ्च सक्रियः।
य एको बहुधा वीजं करोति स महेश्वरः ॥ ३९
जीवैरेभिरिमान् लोकान् सर्व्वानीशो य ईशते।
य एको भगवान् रुद्रो न द्वितीयोऽस्ति कश्चन ॥ ४०
सदा जनानां हृदये सन्निविष्टोऽपि यः परैः।
अलक्ष्यो लक्षयन् विश्वमधितिष्ठति सर्व्वदा ॥ ४१
यस्तु कालात्मयुक्तानि कारणान्यखिलान्यपि।
अनन्तशक्तिरेको वै भगवानधितिष्ठति ॥ ४२
यदा तमस्तन्न दिवा न रात्रिर्न सदप्यसत्।
केवलः शिव एवैको यस्मात् प्रज्ञा विनिःसृता ॥ ४३
यस्य पुंसः परा शक्तिर्भावगम्या महीयसी।
निर्गुणा स्वगुणैरेव निगूढ़ा निष्कला शिवा ॥ ४४
न तस्य कार्य्यकरणे न समानो न चाधिकः।
स्वाभाविकी परा शक्तिर्नित्या ज्ञानक्रिया च ॥
यच्चेदं क्षरमव्यक्तं यदप्यमृतमक्षरम्।
तावुभावक्षरात्मानावेको देवः स्वयं हरः ॥ ४६
ईशते तदभिध्यानाद्योजनात् तत्स्वभावतः।
भूयोऽप्यस्य पशोरन्ते विश्वमाया निवर्त्तते ॥ ४७
यस्मिन् न भासते विद्युन्न सूर्य्यो न च चन्द्रमाः।
यस्य भासा विभातीदमित्येषा शाश्वती श्रुतिः ॥
एको देवो महादेवो विज्ञेयस्तु महेश्वरः।
न तस्य परमं किञ्चित् पदं समधिगम्यते ॥ ४९
अयमादिरनाद्यन्तः स्वभावादेव निर्म्मलः।
स्वतन्त्रः परिपूर्णश्च स्वेच्छाधीनचराचरः ॥ ५०
अप्राकृतवपुः श्रीमान् लक्ष्यलक्षणवर्ज्जितः।
अमुक्तो मोचकश्चायमकालः कालचोदकः ॥ ५१
सर्व्वोपरिकृतावासः सर्व्वावासश्च सर्व्ववित्।
षड्विधाध्वमयस्यास्य सर्व्वस्य जगतः पतिः ॥
उत्तरोत्तरभूतानामुत्तरश्च निरुत्तरः।
अनन्तमहिमा भूमिरनवच्छिन्नवैभवः ॥ ५३
अशेषविषयामोघ-शुद्धबुद्धिविजृम्भणः।
आत्मशक्त्यमृतास्वाद-प्रमोदरसिको युवा ॥ ५४
अनन्तानन्दसन्दोह-मकरन्दमधुव्रतः।
अखण्डजगदण्डानां पिण्डीकरणपण्डितः ॥ ५५
औदार्य्य-वीर्य्य-गाम्भीर्य्य-माधुर्य्यमकरालयः।
नैवास्य सदृशं वस्तु नाधिकञ्चापि किञ्चन ॥ ५६
अतुलः सर्व्वभूतानां राजराजश्च तिष्ठति।
अनेन चित्रकृत्येन प्रथमं सृज्यते जगत् ॥ ५७
अन्तकाले पुनश्चेदं तस्मिन् प्रलयमेष्यति।
अस्य भूतानि वश्यानि अयं सर्व्वनियोजकः ॥
अयन्तु परया भक्त्या दृश्यते नान्यथा क्वचित्।
व्रतानि सर्व्वदानानि तपांसि नियमास्तथा ॥
कथितानि पुरा सद्भिर्भावार्थं नात्र संशयः।
हरिश्चाहञ्च रुद्रश्च तथान्ये च सुरासुराः ॥ ६०
तपोभिरुग्रैरद्यापि तस्य दर्शनकाङ्क्षिणः।
अदृश्यः पतितैर्मूढ़ैर्दुर्ज्जनैरपि कुत्सितैः ॥ ६१

भक्तैरन्तर्वहिश्चापि पूज्यः सम्भाष्य एव च।
तदिदं त्रिविधं रूपं स्थूलं सूक्ष्मं ततः परम्॥ ६२
अस्मदाद्यमरैर्दृश्यं स्थूलं सूक्ष्मन्तु योगिभिः।
ततः परन्तु यन्नित्यं ज्ञानमानन्दमव्ययम्॥ ६३
तन्निष्ठैस्तत्परैर्भक्तैर्दृश्यं तद्व्रतमाश्रितैः।
बहुनात्र किमुक्तेन गुह्याद्गुह्यतरं परम्॥ ६४
शिवे भक्तिर्न सन्देहस्तया युक्तो विमुच्यते।
प्रसादादेव सा भक्तिः प्रसादो भक्तिसम्भवः॥ ६५
यथा वाङ्कुरतो वीजं वीजतो वा यथाङ्कुरः।
प्रसादपूर्व्विका एव पशोः सर्व्वत्र सिद्धयः॥ ६६
स एव साधनैरन्ते सर्व्वैरपि च साध्यते।
प्रसादसाधनं धर्म्मः स च वेदेन दर्शितः॥ ६७
तदभ्यासवशात् साम्यं पूर्व्वयोः पुण्य-पापयोः।
साम्यात् प्रसादसम्पर्कौ धर्म्मस्यातिशयस्ततः॥ ६८
धर्म्मातिशयमासाद्य पशोः पापपरिक्षयः।
एवं प्रक्षीणपापस्य बहुभिर्जन्मभिः क्रमात्॥ ६९
साम्बे सर्व्वेश्वरे भक्तिर्ज्ञानपूर्व्वा प्रजायते।
भावानुगुणमीशस्य प्रसादो व्यतिरिच्यते॥ ७०
प्रसादात् कर्म्मसन्त्यागः फलतो न स्वरूपतः।
तस्मात् कर्म्मफलत्यागाच्छिवधर्म्मान्वयः शुभः॥ ७१
स च गुर्व्वनपेक्षश्च तदपेक्ष इति द्विधा।
तत्रानपेक्षात् सापेक्षो मुख्यः शतगुणाधिकः॥ ७२
शिवधर्म्मान्वयस्यास्य शिवज्ञानसमन्वयः।
ज्ञानान्वयवशात् पुंसः संसारे दोषदर्शनम्॥ ७३
ततो विषयवैराग्यं वैराग्याद्भावसाधनम्।
भावसिद्धुपपन्नस्य ध्याने निष्ठा न कर्म्मणि॥ ७४
ज्ञानध्यानाभियुक्तस्य पुंसो योगः प्रवर्त्तते।
योगेन तु परा भक्तिः प्रसादस्तदनन्तरम्॥ ७५
प्रसादान्मुच्यते जन्तुर्मुक्तः शिवसमो भवेत्।
अनुग्रहप्रकारस्य क्रमोऽयमविवक्षितः॥ ७६
यादृशी योग्यता पुंसस्तस्य तादृगनुग्रहः।
गर्भस्थो मुच्यते कश्चिज्जायमानस्तथापरः॥ ७७
वालो वा तरुणो वाथ वृद्धो वा मुच्यते परः।
तिर्य्यग्योनिगतः कश्चिन्मुच्यते नारकोऽपरः॥ ७८
अपरस्तु पदं प्राप्तो मुच्यते तत्पदक्षयात्।
कश्चित् क्षीणपदो भूत्वा पुनरावर्त्त्य मुच्यते॥ ७९

कश्चिदूर्द्ध्वं गतस्तस्मिन् स्थित्वा स्थित्वा विमुच्यते।
तस्मान्नैकप्रकारेण नराणां मुक्तिरिष्यते॥ ८०
ज्ञानभावानुरूपेण प्रसादेनैव निर्वृतिः।
तस्मादस्य प्रसादार्थं वाङ्मनोदोषवर्ज्जिताः॥ ८१
ध्यायन्तः शिवमेवैकं सदारतनयाग्नयः।
तन्निष्ठास्तत्पराः सर्व्वे तद्युक्तास्तदुपाश्रयाः॥ ८२
सर्व्वक्रियाः प्रकुर्व्वाणास्तमेव मनसा गताः।
दीर्घसत्रं समासध्वं दिव्यं वर्षसहस्रकम्॥ ८३
सत्रान्ते मन्त्रयोगेण वायुस्तत्रागमिष्यति।
स एव भवतां श्रेयः सोपायं कथयिष्यति॥ ८४
ततो वाराणसी पुण्या पुरी परमशोभना।
गन्तव्या यत्र विश्वेशो देव्या सह पिनाकधृक्॥ ८५
सदा विहरति श्रीमान् भक्तानुग्रहकारणात्।
तत्राश्चर्य्यं महद्दृष्ट्वा मत्समीपं गमिष्यथ॥ ८६
ततो वः कथयिष्यामि मोक्षोपायं द्विजोत्तमाः।
येनैकजन्मना मुक्तिर्युष्मत्करतले स्थिता॥ ८७
एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते।
यत्रास्य शीर्य्यते नेमिः स देशस्तपसः शुभः॥ ८८
इत्युक्त्वा सूर्य्यसङ्काशं चक्रं दृष्ट्वा मनोमयम्।
प्रणिपत्य महादेवं विससर्ज्ज पितामहः॥ ८९
तेऽपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुम्।
प्रययुस्तस्य चक्रस्य यत्र नेमिरशीर्य्यत॥ ९०
चक्रं तदपि संक्षिप्तं श्लक्ष्णां चारुशिलातले।
विमलस्वादुपानीये निपपात वने क्वचित्॥ ९१
तद्वनं तेन विख्यातं नैमिषं मुनिपूजितम्।
अनेक-यक्ष-गन्धर्व्व-विद्याधरसमाकुलम्॥ ९२
अष्टादश समुद्रस्य द्वीपानश्नन् पुरूरवाः।
विलासवशसुर्व्वश्या यातो देवेन चोदितः॥ ९३
अज्ञानेनाहरन्मोहाद्यज्ञवाटं हिरण्मयम्।
मुनिभिर्यत्र संक्रुद्धैः कुशवज्रैर्निपातितः॥ ९४
विश्वं सिसृक्षमाणा वै यत्र विश्वसृजः पुरा।
सत्रमारेभिरे दिव्यं ब्रह्मणा गार्हपत्यगाः॥ ९५
ऋषिभिर्यत्र विद्वद्भिः शब्दार्थन्यायकोविदैः।
शक्ति-प्रज्ञा-क्रियायोगैर्विधिरासीदनुष्ठितः॥ ९६
यत्र वेदविदो नित्यं वेदवादवहिष्कृतान्।
वादजल्पबलैर्घ्नन्ति वचोभिः प्रतिवादिनः॥ ९७

स्फटिकमयमहीभृत्पादजाश्मः शिलाश्मः
प्रसरदमृतकल्पस्वच्छपानीयरम्यम्।
अतिरसफलवृक्षप्रायमव्यालसत्त्वं
तपस उचितमासीन्नैमिषं तन्मुनीनाम्॥ ६८

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे द्वितीयोऽध्यायः॥ २॥

तृतीयोऽध्यायः।

सूत उवाच।

तस्मिन् देशे महाभागा मुनयः संशितव्रताः।
अर्च्चयन्तो महादेवं सत्रमारेभिरे तदा॥ १
तच्च सत्रं प्रववृते सर्व्वाश्चर्य्यं महर्षिणाम्।
विश्वं सिसृक्षमाणानां पुरा विश्वसृजामिव॥ २
अथ काले गते सत्रे समाप्ते भूरिदक्षिणे।
पितामहनियोगेन वायुस्तत्रागमत् स्वयम्॥ ३
शिष्यः स्वयम्भुवो देवः सर्व्वप्रत्यक्षदृग्वशी।
आज्ञायां मरुतो यस्य संस्थिताः सप्तसप्तकाः॥ ४
प्रेरयन् शश्वदङ्गानि प्राणाद्याभिः स्ववृत्तिभिः।
सर्व्वभूतशरीराणां कुरुते यश्च धारणम्॥ ५
अणिमादिभिरष्टाभिरैश्वर्य्यैश्च समन्वितः।
तिर्य्यक्करादिभिर्म्मेधैर्भुवनानि बिभर्त्ति यः॥ ६
आकाशयोनिर्द्विगुणः स्पर्श-शब्दसमन्वयात्।
तेजसां प्रकृतिश्चेति यमाहुस्तत्त्वचिन्तकाः॥ ७
तमाश्रमगतं दृष्ट्वा मुनयो दीर्घसत्रिणः।
पितामहवचः स्मृत्वा प्रहर्षमतुलं ययुः॥ ८
अभ्युत्थाय ततः सर्व्वे प्रणम्याम्बरसम्भवम्।
चामीकरमयं तस्मै विष्टरं समकल्पयन्॥ ९
सोऽपि तत्र समासीनो मुनिभिः सम्यगर्च्चितः।
प्रतिनन्द्य च तान् सर्व्वान् पप्रच्छ कुशलं ततः॥ १०

वायुरुवाच।

अत्र वः कुशलं विप्राः कच्चिद्वृत्ते महाक्रतौ।
कच्चिद्यज्ञहनो दैत्या न बाधेरन् सुरद्विषः॥ ११
प्रायश्चित्तं दुरिष्टं वा न कच्चित् समजायत।
स्तोत्रशस्त्रग्रहैर्द्देवान् पितॄन् पित्र्यैश्च कर्म्मभिः॥ १२
कच्चिदभ्यर्च्च्य युष्माभिर्विधिरासीत् स्वनुष्ठितः।
निवृत्ते च महासत्रे पश्चात् किं वश्चिकीर्षितम्॥ १३

सूत उवाच।

इत्युक्त्वा मुनयः सर्व्वे वायुना शिवभाविना।
प्रहृष्टमनसः पूताः प्रत्यूचुर्विनयान्विताः॥ १४

मुनय ऊचुः।

अद्य नः कुशलं सर्व्वमद्य साधु भवेत् तपः।
अस्मच्छ्रेयोविवृद्ध्यर्थं भवानत्रागतो यतः॥ १५
शृणु चेदं पुरावृत्तं तमसाक्रान्तमानसैः।
उपासितः पुरास्माभिर्विज्ञानार्थं प्रजापतिः॥ १६
सोऽप्यस्माननुगृह्याह शरण्यः शरणागतान्।
सर्व्वस्मादधिको विप्रा रुद्रः परमकारणम्॥ १७
तमप्रतर्क्ययाथार्थ्यं भक्तिमानेव पश्यति।
भक्तिश्चास्य प्रसादेन प्रसादादेव निर्वृतिः॥ १८
तस्मादस्य प्रसादार्थं नैमिषे मन्त्रयोगतः।
यजध्वं दीर्घसत्रेण रुद्रं परमकारणम्॥ १९
तत्प्रसादेन सत्रान्ते वायुस्तत्रागमिष्यति।
तन्मुखाज्ज्ञानलाभो वस्तत्र श्रेयो भविष्यति॥ २०
इत्यादिश्य वयं सर्व्वे प्रेषिताः परमेष्ठिना।
अस्मिन् देशे महाभाग त्वदागमनकाङ्क्षिणः॥ २१
दीर्घसत्रं समासीना दिव्यवर्षसहस्रकम्।
अतस्त्वदागमादन्यत् प्रार्थ्यं नो नास्ति किञ्चन॥ २२
इत्याकर्ण्य पुरावृत्तमृषीणां दीर्घसत्रिणाम्।
वायुः प्रीतमना भूत्वा तत्रास्ते मुनिसंवृतः॥ २३
ततस्तैर्मुनिभिः पृष्टस्तेषां भावविवृद्धये।
सर्गादि शार्व्वमैश्वर्य्यं समासादवदद्विभुः॥ २४

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे तृतीयोऽध्यायः॥ ३॥

चतुर्थोऽध्यायः।

सूत उवाच।

तत्र पूर्व्वं महाभागा नैमिषारण्यवासिनः।
प्रणिपत्य यथान्यायं पप्रच्छुः पवनं प्रभुम्॥ १

नैमिषीया ऊचुः।

भवान् कथमनुप्राप्तो ज्ञानमीश्वरगोचरम्।
कथञ्च शिष्यभावस्ते ब्रह्मणोऽव्यक्तजन्मनः॥ २

वायुरुवाच ।
एकोनविंशतिः कल्पो विज्ञेयः श्वेतलोहितः ।
तस्मिन् कल्पे चतुर्वक्त्रः स्रष्टुकामोऽतपत् तपः ॥ ३
तपसा तेन तीव्रेण तुष्टस्तस्य पिता स्वयम् ।
दिव्यं कौमारमास्थाय रूपं रूपवतां वरः ॥ ४
श्वेतो नाम मुनिर्भूत्वा दिव्यां वाचमुदीरयन् ।
दर्शनं प्रददौ तस्मै देवदेवो महेश्वरः ॥ ५
तं दृष्ट्वा पितरं ब्रह्मा ब्रह्मणोऽधिपतिं पतिम् ।
प्रणम्य परमं ज्ञानं गायत्र्या सह लब्धवान् ॥ ६
ततः स लब्धविज्ञानो विश्वकर्म्मा चतुर्म्मुखः ।
असृजत् सर्व्वभूतानि स्थावराणि चराणि च ॥ ७
यच्छ्रुत्वा ह्यमृतं लब्धं ब्रह्मणा परमेश्वरात् ।
ततस्तद्वदनाद्देव मया लब्धं तपोबलात् ॥ ८

मुनय ऊचुः ।
किं तज्ज्ञानं त्वया लब्धं तथ्यात् तथ्यतरं शुभम् ।
यत्र कृत्वा परां निष्ठां पुरुषः सुखमृच्छति ॥ ९

वायुरुवाच ।
पशु-पाश-पतिज्ञानं यल्लब्धन्तु मया पुरा ।
तत्र निष्ठा परा कार्य्या पुरुषेण सुखार्थिना ॥ १०
अज्ञानप्रभवं दुःखं ज्ञानेनैव निवर्त्तते ।
ज्ञानं वस्तुपरिच्छेदो वस्तु च त्रिविधं स्मृतम् ॥ ११
अजडश्च जडश्चैव नियन्तृ च तयोरपि ।
पशुः पाशः पतिश्चेति कथ्यते तत् त्रयं क्रमात् ॥ १२
अक्षरञ्च क्षरञ्चैव क्षराक्षरपरं तथा ।
तदेतत् त्रितयं भूयः कथ्यते तत्त्ववेदिभिः ॥ १३
अक्षरं पशुरित्युक्तः क्षरं पाश उदाहृतः ।
क्षराक्षरपरं यत् तत् पतिरित्यभिधीयते ॥ १४

मुनय ऊचुः ।
किं तदक्षरमित्युक्तं किञ्च क्षरमुदाहृतम् ।
तयोश्च परमं किं वा तदेतद्ब्रूहि मारुत ॥ १५

वायुरुवाच ।
प्रकृतिः क्षरमित्युक्तं पुरुषोऽक्षर उच्यते ।
ताविमौ प्रेरयत्यन्यः स परः परमेश्वरः ॥ १६

मुनय ऊचुः ।
कैषा प्रकृतिरित्युक्ता क एष पुरुषो मतः ।
अनयोः केन सम्बन्धः कोऽयं प्रेरक ईश्वरः ॥ १७

वायुरुवाच ।
माया प्रकृतिरुद्दिष्टा पुरुषो माययावृतः ।
सम्बन्धो मल-कर्म्मभ्यां शिवः प्रेरक ईश्वरः ॥ १८

मुनय ऊचुः ।
केयं माया समाख्याता किंरूपो मायया कृतः ।
मलं कीदृक् कृतो वास्य किं शिवत्वं कुतः शिवः ॥ १९

वायुरुवाच ।
माया माहेश्वरी शक्तिश्चिद्रूपो माययावृतः ।
मलश्चिच्छादको नैजो विशुद्धिः शिवता स्वतः ॥ २०

मुनय ऊचुः ।
आवृणोति कथं माया व्यापिनं केन हेतुना ।
किमर्थं वा वृतिः पुंसः केन वा विनिवर्त्तते ॥ २१

वायुरुवाच ।
आवृतिर्व्यापिनोऽपि स्याद्व्यापि यस्मात् कलाद्यपि ।
हेतुः कर्म्मैव भोगार्थं निवर्त्तेत मलक्षयात् ॥ २२

मुनय ऊचुः ।
कलादि कथ्यते किं तत् कर्म्म वा किमुदाहृतम् ।
तत् किमादि किमन्तं वा किंफलं वा किमाश्रयम् ॥ २३
कस्य भोगश्च किं भोग्यं किं वा तद्भोगसाधनम् ।
मलक्षयस्य को हेतुः कीदृक् क्षीणमलः पुमान् ॥ २४

वायुरुवाच ।
कला विद्या च रागश्च कालो नियतिरेव च ।
कलादयः समाख्याता यो भोक्ता पुरुषो भवेत् ॥ २५
पुण्यपापात्मकं कर्म्म सुखदुःखफलन्तु यत् ।
अनादिमलभोगान्तमज्ञानात्मसमाश्रयम् ॥ २६
भोगः कर्म्मविनाशाय भोग्यमव्यक्तमुच्यते ।
वाह्यान्तःकरणद्वारं शरीरं भोगसाधनम् ॥ २७
भावातिशयलब्धेन प्रसादेन मलक्षयः ।
क्षीणे चात्ममले तस्मिन् पुमान् शिवसमो भवेत् ॥ २८

मुनय ऊचुः ।
कलादिपञ्चतत्त्वानां किं कर्म्म पृथगुच्यते ।
भोक्तेति पुरुषश्चेति येनात्मा व्यपदिश्यते ॥ २९
किमात्मकं तदव्यक्तं केनाकारेण भुज्यते ।
किं तस्य शरणं भुक्तौ शरीरञ्च किमुच्यते ॥ ३०

वायुरुवाच ।
दृक्क्रियाव्यञ्जिके विद्याकले रागः प्रवर्त्तकः ।

कालोऽवच्छेदकस्तत्र नियतिस्तु नियामिका ॥ ३१
अव्यक्तं कारणं यत् तत् त्रिगुणप्रभवाप्ययम्।
प्रधानं प्रकृतिश्चेति यदाहुस्तत्त्वचिन्तकाः ॥ ३२
कलातस्तदभिव्यक्तमनभिव्यक्तलक्षणम्।
सुखदुःखविमोहात्मा भुज्यते गुणवांस्त्रिधा ॥ ३३
सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
प्रकृतौ सूक्ष्मरूपेण तिले तैलमिव स्थिताः ॥ ३४
सुखञ्च सुखहेतुश्च समासात् सात्त्विकं स्मृतम्।
राजसं तद्विपर्य्यासः स्तम्भमोहौ तु तामसौ ॥ ३५
सात्त्विक्यूर्द्ध्वगतिः प्रोक्ता तामसी स्यादधोगतिः।
मध्यमा तु गतिर्या सा राजसी परिपठ्यते ॥ ३६
तन्मात्रापञ्चकञ्चैव भूतपञ्चकमेव च।
ज्ञानेन्द्रियाणि पञ्चैव पञ्च कर्म्मेन्द्रियाणि च ॥ ३७
प्रधानबुद्ध्यहङ्कार-मनांसि च चतुष्टयम्।
समासादेवमव्यक्तं सविकारमुदाहृतम् ॥ ३८
तत् कारणदशापन्नमव्यक्तमिति कथ्यते।
व्यक्तं कार्य्यदशापन्नं शरीरादिघटादिवत् ॥ ३९
यथा घटादिकं कार्य्यं मृदादेर्नातिभिद्यते।
शरीरादि तथा व्यक्तमव्यक्तान्नातिभिद्यते ॥ ४०
तस्मादव्यक्तमेवैकं कारणं करणानि च।
शरीरञ्च तदाधारं तद्भोग्यञ्चापि नेतरत् ॥ ४१

ऋषय ऊचुः।

बुद्धीन्द्रियशरीरेभ्यो व्यतिरिक्तस्य कस्यचित्।
आत्मशब्दाभिधेयस्य वस्तुतोऽपि कुतः स्थितिः ॥ ४२

वायुरुवाच।

बुद्धीन्द्रियशरीरेभ्यो व्यतिरिक्तो विभुर्ध्रुवः।
अस्त्येव कश्चिदात्मेति हेतुस्तत्र सुदुर्गमः ॥ ४३
बुद्धीन्द्रियशरीराणां नात्मता सद्भिरिष्यते।
स्मृतेरनियतज्ञानादयावद्देहवेदनात् ॥ ४४
अतः स्मर्त्तानुभूतानामशेषज्ञेयगोचरः।
अन्तर्य्यामीति वेदेषु वेदान्तेषु च गीयते ॥ ४५
सर्व्वं तत्र स सर्व्वत्र व्याप्य तिष्ठति शाश्वतः।
तथापि क्वापि केनापि व्यक्तमेष न दृश्यते ॥ ४६
नैवायं चक्षुषा ग्राह्यो नापरैरिन्द्रियैरपि।
मनसैव प्रदीप्तेन महानात्मावसीयते ॥ ४७
न च स्त्री न पुमानेष नैव चापि नपुंसकः।
नैवोर्द्ध्वं नापि तिर्य्यक् च नाधस्तान्न कुतश्चन ॥ ४८
अशरीरं शरीरेषु चलेषु स्थाणुमव्ययम्।
सदा पश्यति तं धीरो नरः प्रत्यवमर्शनात् ॥ ४९
किमत्र बहुनोक्तेन पुरुषो देहतः पृथक्।
अपृथग्ये तु पश्यन्ति असम्यक् तेषु दर्शनम् ॥ ५०
यच्छरीरमिदं प्रोक्तं पुरुषस्य ततः परम्।
अशुद्धमवशं दुःखमध्रुवञ्च न विद्यते ॥ ५१
विपदां वीजभूतेन पुरुषस्तेन संयुतः।
सुखी दुःखी च मूढश्च भवति स्वेन कर्म्मणा ॥ ५२
अद्भिराप्लावितं क्षेत्रं जनयत्यङ्कुरं यथा।
अज्ञानप्लावितं कर्म्म देहं जनयते तथा ॥ ५३
अत्यन्तमसुखावासं स्मृतञ्चैकान्ततोऽध्रुवः।
अनागता अतीताश्च तनवोऽस्य सहस्रशः ॥ ५४
आगत्यागत्य शीर्णासु शरीरेषु शरीरिणः।
अत्यन्तवसतिः क्वापि न केनापि च लभ्यते ॥ ५५
छादितश्च वियुक्तश्च शरीरैरेष लक्ष्यते।
चन्द्रबिम्बवदाकाशे तरलैरभ्रसञ्चयैः ॥ ५६
अनेकदेहभेदेन भिन्ना वृत्तिरिहात्मनः।
अष्टापदपरिक्षेपे ह्यक्षमुद्रेव लक्ष्यते ॥ ५७
नैवास्य भविता कश्चिन्नासौ भवति कस्यचित्।
पथि सङ्गम एवायं दारैरन्यैश्च बन्धुभिः ॥ ५८
यथा काष्ठञ्च काष्ठञ्च समेयातां महोदधौ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥ ५९
स पश्यति शरीरं तच्छरीरं तं न पश्यति।
तौ पश्यति परः कश्चित् तावुभौ तं न पश्यतः ॥ ६०
ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्त्तिताः।
पशूनामेव सर्व्वेषां प्रोक्तमेतन्निदर्शनम् ॥ ६१
य एष बध्यते पाशैः सुखदुःखाशनः पशुः।
लीलासाधनभूतोऽयमीश्वरस्येति सूरयः ॥ ६२
अज्ञो जन्तुरनीशोऽयमात्मनः सुख-दुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ ६३

मुनय ऊचुः।

योऽयं पशुरिति प्रोक्तो यश्च पाश उदाहृतः।
आभ्यां विलक्षणः कश्चित् कोऽयमस्त्यनयोः पतिः ॥ ६४

वायुरुवाच।

अस्ति कश्चिदपर्य्यन्तरमणीयगुणाश्रयः।

पतिर्विश्वस्य निर्म्माता पशु-पाशविमोचणः ॥ ६५
अभावे तस्य विश्वस्य सृष्टिरेषा कथं भवेत् ।
अचेतनत्वादज्ञानादनयोः पशु-पाशयोः ॥ ६६
प्रधानपरमाण्वादि यावत् किञ्चिदचेतनम् ।
न तत् कर्तृ स्वयं दृष्टं बुद्धिमत् कारणं विना ॥ ६७
जगच्च कर्तृसापेक्षं कार्य्यं सावयवं यतः ।
तस्मात् कार्य्यस्य कर्तृत्वं पत्युर्न पशु-पाशयोः ॥ ६८
पशोरपि च कर्तृत्वं पत्युः प्रेरणपूर्व्वकम् ।
अयथाकरणज्ञानमन्धस्य गमनं यथा ॥ ६९
आत्मानञ्च पृथक्कृत्वा प्रेरितारं ततः पृथक् ।
असौ जुष्टस्ततस्तेन ह्यमृतत्वाय कल्पते ॥ ७०
पशोः पाशस्य पत्युश्च तत्त्वतोऽस्ति यदन्तरम् ।
ब्रह्मवित् तद्विदित्वैव योनिमुक्तो भविष्यति ॥ ७१
संयुक्तमेतद्द्वितयं क्षरमक्षरमेव च ।
व्यक्ताव्यक्तं बिभर्त्तीशो विश्वं विश्वविमोचकः ॥ ७२
भोक्ता भोग्यं प्रेरयिता मन्तव्यं त्रिविधं स्मृतम् ।
नातः परं विजानद्भिर्वेदितव्यं हि किञ्चन ॥ ७३
तिलेषु वा यथा तैलं दध्नि वा सर्पिरर्पितम् ।
यथापः स्रोतसि व्याप्ता यथारण्यां हुताशनः ॥ ७४
एवमेव महात्मानमात्मन्यात्मविलक्षणम् ।
सत्येन तपसा चैव नित्ययुक्तोऽनुपश्यति ॥ ७५
य एको जालवानीश ईशनीभिः स्वशक्तिभिः ।
सर्व्वान् लोकानिमान् कृत्वा एक एव स ईशते ॥ ७६
एक एव तदा रुद्रो न द्वितीयोऽस्ति कश्चन ।
संसृज्य विश्वं भुवनं गोप्तान्ते सञ्चुकोच सः ॥ ७७
विश्वतश्चक्षुरेवायमुतायं विश्वतोमुखः ।
तथैव विश्वतोबाहुर्विश्वतःपादसंयुतः ॥ ७८
द्यावाभूमी च जनयन् देव एको महेश्वरः ।
स एव सर्व्वदेवानां प्रभवश्चोद्भवस्तथा ॥ ७९
हिरण्यगर्भं देवानां प्रथमं जनयेदयम् ।
विश्वस्मादधिको रुद्रो महर्षिरिति हि श्रुतिः ॥ ८०
वेदाहमेतं पुरुषं महान्तममृतं ध्रुवम् ।
आदित्यवर्णं तमसः परस्तात् संस्थितं प्रभुम् ॥ ८१
यस्मान्नास्ति परं किञ्चिदपरं परमात्मनः ।
नाणीयोऽस्ति न च ज्यायस्तेन पूर्णमिदं जगत् ॥ ८२
सदैको वृक्षवत् स्तब्धः केवलो दिवि तिष्ठति ।
सङ्कल्पप्रभवं तस्य चराचरमिदं जगत् ॥ ८३
सर्व्वाननशिरोग्रीवः सर्व्वभूतगुहाशयः ।
सर्व्वव्यापी च भगवांस्तस्मात् सर्व्वगतः शिवः ॥ ८४
सर्व्वतःपाणिपादोऽयं सर्व्वतोऽक्षिशिरोमुखः ।
सर्व्वतःश्रुतिमान् लोके सर्व्वमावृत्य तिष्ठति ॥ ८५
सर्व्वेन्द्रियगुणाभासः सर्व्वेन्द्रियविवर्ज्जितः ।
सर्व्वस्य प्रभुरीशानः सर्व्वस्य शरणं सुहृत् ॥ ८६
अचक्षुरपि यः पश्यत्यकर्णोऽपि शृणोति यः ।
सर्व्वं वेत्ति न वेत्तास्य तमाहुः पुरुषं परम् ॥ ८७
अणोरणीयान् महतो महीयानयमव्ययः ।
गुहायां निहितश्चापि जन्तोश्चास्य महेश्वरः ॥ ८८
तमक्रतुं क्रतुप्रायं महिमातिशयान्वितम् ।
धातुः प्रसादादीशानं वीतशोकः प्रपश्यति ॥ ८९
वेदाहमेनमजरं पुराणं सर्व्वगं प्रभुम् ।
निरोधं जन्मनो यस्य वदन्ति ब्रह्मवादिनः ॥ ९०
एकोऽपि त्रीनिमान् लोकान् बहुधा शक्तियोगतः ।
विदधाति विचेत्यन्ते विश्वमादौ महेश्वरः ॥ ९१
विश्वधात्री त्वजाख्या च शैवी चित् प्रकृतिः स्मृता ।
तामजां लोहितां शुक्लां कृष्णामेकान्त्वजः प्रजाः॥९२
जनित्रीमनुशेतेऽन्यो जुषमाणः स्वरूपिणीम् ।
तामेवाजामजोऽन्यस्तु भुक्तभोगां जहाति च ॥ ९३
द्वौ सुपर्णौ च सयुजौ समानं वृक्षमास्थितौ ।
एकोऽत्ति पिप्पलं स्वादु परोऽनश्नन् प्रपश्यति ॥ ९४
वृक्षेऽस्मिन् पुरुषो मग्नो मुह्यमानश्च शोचति ।
जुष्टमन्यं यदा पश्येदीशं परमकारणम् ॥ ९५
तदास्य महिमानञ्च वीतशोकः सुखी भवेत् ।
छन्दांसि यज्ञाः क्रतवो यद्भूतं भव्यमेव च ॥ ९६
मायी विश्वं सृजत्यस्मिन् निविष्टो मायया पुरः ।
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ॥ ९७
तस्यास्त्ववयवैरेव व्याप्तं सर्व्वमिदं जगत् ।
सूक्ष्मातिसूक्ष्ममीशानं कललस्यापि मध्यतः ॥ ९८
स्रष्टारमपि विश्वस्य चेष्टितारन्तु तस्य च ।
शिवमेवेश्वरं ज्ञात्वा शान्तिमत्यन्तमृच्छति ॥ ९९
स एव कालो गोप्ता च विश्वस्याधिपतिः प्रभुः ।
तं विश्वाधिपतिं ज्ञात्वा मृत्युपाशात् प्रमुच्यते ॥१००
घृतात् परं मण्डमिव सूक्ष्मं ज्ञात्वाधिपं शिवम् ।

सर्व्वभूतेषु गूढ़ञ्च सर्व्वपापैः प्रमुच्यते ॥ १०१
एष एव परो देवो विश्वकर्म्मा महेश्वरः ।
हृदये सन्निविष्टं तं ज्ञात्वैवामृतमश्नुते ॥ १०२
यदा समस्तं न दिवा न रात्रिर्न सदप्यसत् ।
केवलः शिव एवैको यतः प्रज्ञा पुरातनी ॥ १०३
नैनमूर्द्धं न तिर्य्यञ्चं न मध्ये परिजग्रहत् ।
न तस्य प्रतिमा चास्ति यस्य नाम महद्यशः ॥१०४
अजातमिममेवैकं बुद्धा जन्मनि भीरवः ।
रुद्रस्यास्य प्रपद्यन्ते रक्षार्थं दक्षिणं मुखम् ॥ १०५
द्वे अक्षरे ब्रह्मपरे त्वनन्ते समुदाहृते ।
विद्याविद्ये समाख्याते निहिते यत्र गूढ़वत् ॥ १०६
क्षरन्त्वविद्या ह्यमृतं विद्येति परिगीयते ।
ते उभे ईशते यस्तु सोऽन्यः खलु महेश्वरः ॥ १०७
एकैकं बहुधा जालं विकुर्व्वन्नेकवच्च यः ।
सर्व्वाधिपत्यं कुरुते सृष्ट्वा सर्व्वान् प्रतापवान् ॥ १०८
दिश ऊर्द्धमधस्तिर्य्यग्भासयन् भ्राजते स्वयम् ।
योनिस्वभावादप्येको वरेण्यस्त्वधितिष्ठति ॥ १०९
स्वभावं वाचकान् सर्व्वान् वाच्यांश्च परिणामयन् ।
गुणांश्च भोग्यभोक्तृत्वे तद्विश्वमधितिष्ठति ॥ ११०
तं वै गुह्योपनिषदि गूढ़ं ब्रह्म परात्परम् ।
ब्रह्मयोनिं जगत्पूर्व्वं विदुर्देवा महर्षयः ॥ १११
भावग्राह्यमनीड़ाख्यं भावाभावकरं शिवम् ।
कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ॥ ११२
स्वभावमेके मन्यन्ते कालमन्ये विमोहिताः ।
देवस्य महिमा ह्येष येनेदं भ्राम्यते जगत् ॥ ११३
येनेदमावृतं नित्यं कालकालात्मना यतः ।
तेनेरितमिदं कर्म्म भूतैः सह विवर्त्तते ॥ ११४
यत् कर्म्म भूयशः कृत्वा विनिवर्त्य च भूयशः ।
तत्त्वस्य सह सत्त्वेन योगञ्चापि समेत्य वै ॥ ११५
अष्टाभिश्च त्रिभिश्चैव द्वाभ्याञ्चैकेन वा पुनः ।
कालेनात्मगुणैश्चापि कृत्स्नमेव जगत् स्वयम् ॥ ११६
गुणैरारभ्य कर्म्माणि स्वभावान् विनियोजयेत् ।
तेषामभावे नाशः स्यात् कृतस्यापि च कर्म्मणः ॥११७
कर्म्मक्षये पुनश्चान्यत् ततो याति स तत्त्वतः ।
स एवादिः स्वयं योगनिमित्तं भोक्तृभोगयोः ॥११८
परस्त्रिकालादकलः स एव परमेश्वरः ।
तं विश्वरूपप्रभवं भवमीड्यं प्रजापतिम् ॥ ११९
देवदेवं जगत्पूज्यं स्वचित्तस्थमुपास्महे ।
कालादिभिः परो यस्मात् प्रपञ्चः परिवर्त्तते ॥ १२०
धर्म्मावहं पापनुदं भगेशं विश्वधाम च ।
तमीश्वराणां परमं महेश्वरं
तं देवतानां परमञ्च दैवतम् ॥ १२१
पतिं पतीनां परमं परस्ता-
द्विदाम देवं भुवनेश्वरेश्वरम् ।
न तस्य विद्यते कार्य्यं कारणञ्च न विद्यते ॥ १२२
न तत्समोऽधिकश्चापि क्वचिज्जगति दृश्यते ।
परास्य विविधा शक्तिः श्रुतौ स्वाभाविकी श्रुता ॥ १२३
ज्ञानं बलं क्रिया चैव याभ्यो विश्वमिदं कृतम् ।
न तस्यास्ति पतिः कश्चिन्नैव लिङ्गं न चेशिता ॥ १२४
कारणं करणानाञ्च स तेषामधिपाधिपः ।
न चास्य जनिता कश्चिन्न च जन्म कुतश्चन ॥ १२५
न जन्महेतवस्तद्वन्मल-मायादिसंज्ञकाः ।
स एकः सर्व्वभूतेषु गूढ़ो व्याप्तश्च सर्व्वतः ॥ १२६
सर्व्वभूतान्तरात्मा च धर्म्माध्यक्षः स कथ्यते ।
सर्व्वभूताधिवासश्च साक्षी चेता च निर्गुणः ॥ १२७
एको वशी निष्क्रियाणां बहूनां विवशात्मनाम् ।
एकस्तु बहुधा वीजं करोति समयोचितम् ॥ १२८
तमेवात्मनि तिष्ठन्तं ये पश्यन्ति मुमुक्षवः ।
तेषामेव सुखं नित्यं नेतरेषामिहात्मनाम् ॥ १२९
नित्यानामप्यसौ नित्यश्चेतनानाञ्च चेतनः ।
एको बहूनाञ्चाकामः कामानीशः प्रयच्छति ॥ १३०
सांख्ययोगाधिगम्यं तत् कारणं जगतः पतिम् ।
ज्ञात्वा देवं पशुः पाशैः सर्व्वैरेव विमुच्यते ॥ १३१
विश्वकृद्विश्ववित् स्वात्मयोनिज्ञः कालकृद्गुणी ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः पाशमोचकः ॥ १३२
ब्रह्माणं विदधे पूर्व्वं वेदांश्चोपादिशत् स्वयम् ।
यो देवस्तमहं बुद्धा स्वात्मबुद्धिप्रसादतः ॥ १३३
मुमुक्षुरस्मात् संसारात् प्रपद्ये शरणं शिवम् ।
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ॥ १३४
अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ।
यदा चर्म्मवदाकाशं वेष्टयिष्यन्ति मानवाः ॥ १३५
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ।

तपःप्रभावाद्देवस्य प्रसादाच्च महर्षयः ॥ १३६
अत्याश्रमोचितं ज्ञानं पवित्रं पापनाशनम् ।
वेदान्ते परमं गुह्यं पुराकल्पप्रचोदितम् ॥ १३७
ब्रह्मणो वदनाल्लब्धं मयेदं भाग्यगौरवात् ।
नाप्रशान्ताय दातव्यमेतज्ज्ञानमनुत्तमम् ॥ १३८
नापुत्रायासुव्रताय नाशिष्याय च सर्व्वथा ।
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ १३९
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ १४०

अतश्च संक्षेपमिदं शृणुध्वं
शिवः परस्तात् प्रकृतेश्च पुंसः ।
स सर्गकाले च करोति सर्व्वं
संहारकाले पुनराददाति ॥ १४१

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे शैवतत्त्वकथनं नाम
चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ।

मुनय ऊचुः ।

कालादुत्पद्यते सर्व्वं कालादेव विपद्यते ।
न कालनिरपेक्षं हि क्वचित् किञ्चन विद्यते ॥ १
यदास्यान्तर्गतं विश्वं शश्वत् संसारमण्डलम् ।
सर्ग-संहृतिमुद्राभ्यां चक्रवत् परिवर्त्तते ॥ २
ब्रह्मा हरिश्च रुद्रश्च तथान्ये च सुरासुराः ।
यत्कृतां नियतिं प्राप्य प्रभवो नातिवर्त्तितुम् ॥ ३
भूत-भव्य-भविष्याद्यैर्विभज्य जरयन् प्रजाः ।
अतिप्रभुरिति स्वैरं वर्त्ततेऽतिभयङ्करः ॥ ४
क एष भगवान् कालः कस्य वा वशवर्त्त्ययम् ।
क एवास्य वशे न स्यात् कथयैतद्विचक्षण ॥ ५

वायुरुवाच ।

कला-काष्ठा-निमेषादि-कलाकलितविग्रहम् ।
कालात्मेति समाख्यातं तेजो माहेश्वरं परम् ॥ ६
यदलङ्घ्यमशेषस्य स्थावरस्य चरस्य च ।
नियोगरूपमीशस्य बलं विश्वनियामकम् ॥ ७
तस्यांशांशमयी शक्तिः कालात्मनि महात्मनि ।
ततो निष्क्रम्य संक्रान्ता विसृष्टाग्नेरिवायसी ॥ ८
तस्मात् कालवशे विश्वं न स विश्ववशे स्थितः ।
शिवस्य तु वशे कालो न कालस्य वशे शिवः ॥ ९
यतोऽप्रतिहतं शार्व्वं तेजः काले प्रतिष्ठितम् ।
महती तेन कालस्य मर्य्यादा हि दुरत्यया ॥ १०
कालं प्रज्ञाविशेषेण कोऽतिवर्त्तितुमर्हति ।
कालेन तु कृतं कर्म्म न कश्चिदतिवर्त्तते ॥ ११
एकच्छत्रां महीं कृत्स्नां यः पराक्रम्य शासति ।
सोऽपि नैवातिवर्त्तेत कालं वेलामिवोदधिः ॥ १२
ये निगृह्येन्द्रियग्रामं जयन्ति सकलं जगत् ।
न जयन्त्यपि ते कालं कालो जयति तानपि ॥ १३
आयुर्व्वेदविदो वैद्याः स्वनुष्ठितरसायनाः ।
न मृत्युमतिवर्त्तन्त कालो हि दुरतिक्रमः ॥ १४
श्रिया रूपेण शीलेन बलेन सकलेन च ।
अन्यच्चिन्तयते जन्तुः कालोऽन्यत् कुरुते बलात् ॥ १५
अप्रियैश्च प्रियैश्चैव अचिन्तितगमागमैः ।
संयोजयति भूतानि वियोजयति चेश्वरः ॥ १६
यदैव दुःखितः कश्चित् तदैव सुखितः परः ।
दुर्व्विज्ञेयस्वभावस्य कालस्याहो विचित्रता ॥ १७
यो युवा स भवेद्वृद्धो यो बलीयान् स दुर्व्बलः ।
यः श्रीमान् सोऽपि निःश्रीकश्चित्रः कालविपर्य्ययः ॥ १८
नाभिजात्यं न वै शीलं न बलं न च नैपुणम् ।
भवेत् कार्य्याय पर्य्याप्तं कालश्चेत् प्रतिरोधकः ॥ १९
ये च निष्प्ररुषैस्तूर्य्यगीत-वाद्यैरुपस्थिताः ।
ये चानाथाः परान्नादाः कालस्तेषु समक्रियः ॥ २०

फलन्त्यकालेन रसायनानि
सम्यक्प्रयुक्तान्यपि चौषधानि ।
तान्येव कालेन समाहृतानि
सिद्धिं प्रयान्त्याशु सुखं दिशन्ति ॥ २१
नाकालतोऽयं म्रियते जायते वा
नाकालतः पुष्टिमग्रामुपैति ।
नाकालतः सुखितं दुःखितं वा
नाकालिकं वस्तु समस्ति किञ्चित् ॥ २२
कालेन शीतः प्रतिवाति वातः
कालेन वृष्टिर्जलदानुपैति ।
कालेन शस्यानि भवन्ति तस्मात्-
कालेन सञ्जीवति जीवलोकः ॥ २३

इत्थं कालात्मनस्तत्त्वं यो विजानाति तत्त्वतः।
कालात्मानमतिक्रम्य कालातीतं स पश्यति ॥ २४
न यस्य कालो न च बन्ध-मुक्ती
न यः पुमान् न प्रकृतिर्न विश्वम्।
विचित्ररूपाय शिवाय तस्मै
नमः परस्मै परमेश्वराय ॥ २५

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे कालमहात्म्यकथनं नाम
पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः।

ऋषय ऊचुः।
केन मानेन कालेऽस्मिन्नायुःसंख्या प्रकल्प्यते।
संख्यारूपस्य कालस्य कः पुनः परमोऽवधिः ॥ १
वायुरुवाच।
आयुषोऽत्र निमेषाख्यमाद्यमानं प्रचक्षते।
संख्यामयस्य कालस्य शान्त्यतीतकलावधिः ॥ २
अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः।
तादृशानां निमेषाणां काष्ठा दश च पञ्च च ॥ ३
काष्ठात्रिंशत् कला नाम कलात्रिंशन्मुहूर्त्तकम्।
मुहूर्त्तानामपि त्रिंशदहोरात्रं प्रचक्षते ॥ ४
त्रिंशत्संख्यैरहोरात्रैर्मासः पक्षद्वयात्मकः।
ज्ञेयः पित्र्यमहोरात्रं मासः कृष्णसितात्मकः ॥ ५
मासैस्तैरयनं षड्भिर्वर्षं द्वे चायने मते।
लौकिकेनैव मानेन अब्दो यो मानुषः स्मृतः ॥ ६
एतद्दिव्यमहोरात्रमिति शास्त्रस्य निश्चयः।
दक्षिणञ्चायनं रात्रिस्तथोदगयनं दिनम् ॥ ७
मासस्त्रिंशदहोरात्रैर्दिव्यो मानुषवत् स्मृतः।
संवत्सरोऽपि देवानां मासैर्द्वादशभिस्तथा ॥ ८
त्रीणि वर्षशतान्येव षष्टिवर्षयुतान्यपि।
दिव्यसंवत्सरो ज्ञेयो मानुषेण प्रकीर्त्तितः ॥ ९
दिव्येनैव प्रमाणेन युगसंख्या प्रवर्त्तते।
चत्वारि भारते वर्षे युगानि कवयो विदुः ॥ १०
पूर्वं कृतयुगं नाम ततस्त्रेता विधीयते।
द्वापरञ्च कलिश्चैव युगान्येतानि कृत्स्नशः ॥ ११
चत्वारि तु सहस्राणि वर्षाणां तत् कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ १२
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥ १३
एतद्द्वादशसाहस्रं साधिकञ्च चतुर्युगम्।
चतुर्युगसहस्रं यत् स कल्प इति कथ्यते ॥ १४
चतुर्युगैकसप्तत्या मनोरन्तरमुच्यते।
कल्पे चतुर्द्दशैकस्मिन् मनूनां परिवृत्तयः ॥ १५
एतेन क्रमयोगेण कल्पमन्वन्तराणि च।
सप्रजानि व्यतीतानि शतशोऽथ सहस्रशः ॥ १६
अज्ञेयत्वाच्च सर्व्वेषामसंख्येयतया पुनः।
शक्यो नैवानुपूर्व्व्याद्धि तेषां वक्तुं सुविस्तरः ॥ १७
कल्पो नाम दिवा प्रोक्तो ब्रह्मणोऽव्यक्तजन्मनः।
कल्पानां वै सहस्रञ्च ब्राह्मं वर्षमिहोच्यते ॥ १८
वर्षाणामष्टसाहस्रं यच्च तद्ब्रह्मणो युगम्।
सवनं युगसाहस्रं ब्रह्मणः पद्मजन्मनः ॥ १९
सवनानां सहस्रञ्च त्रिगुणं त्रिवृतं तथा।
कल्प्यते सकलः कालो ब्रह्मणः परमेष्ठिनः ॥ २०
तस्य वै दिवसे यान्ति चतुर्द्दश पुरन्दराः।
शतानि मासे चत्वारि विंशत्या सङ्ख्यितानि च ॥ २१
अब्दे पञ्च सहस्राणि चत्वारिंशद्युतानि च।
चत्वारिंशत् सहस्राणि पञ्चलक्षाणि चायुषि ॥ २२
ब्रह्मा विष्णोर्दिने चैको विष्णू रुद्रदिने तथा।
ईश्वरस्य दिने रुद्रः सदाख्यस्य तथेश्वरः ॥ २३
साक्षाच्छिवस्य तत्संख्यस्तथा सोऽपि सदाशिवः।
चत्वारिंशत्सहस्राणि पञ्चलक्षाणि चायुषि ॥ २४
तस्मिन् साक्षाच्छिवेनैष कालात्मा सम्प्रवर्त्तते।
यत्तत् सृष्टेः समाख्यातं कालान्तरमिह द्विजाः ॥ २५
एतत् कालान्तरं ज्ञेयमहर्वै पारमेश्वरम्।
रात्रिश्च तावती ज्ञेया परमेशस्य कृत्स्नशः ॥ २६
अहस्तस्य तु या सृष्टी रात्रिश्च प्रलयः स्मृतः।
अहर्न विद्यते तस्य न रात्रिरिति धारयेत् ॥ २७
एषोपचारः क्रियते लोकानां हितकाम्यया।
प्रजाः प्रजानां पतयो मूर्त्तयश्च सुरासुराः ॥ २८
इन्द्रियाणीन्द्रियार्थाश्च महाभूतानि पञ्च च।
तन्मात्राण्यथ भूतादिर्बुद्धिश्च सह दैवतैः ॥ २९

अहन्तिष्ठन्ति सर्व्वाणि परमेशस्य धीमतः।
अहरन्ते प्रलीयन्ते रात्र्यन्ते विश्वसम्भवः॥ ३०

यो विश्वात्मा कर्म्मकालस्वभावा-
द्यर्थे शक्तिर्यस्य नोल्लङ्घनीया।
यस्यैवाज्ञाधीनमेतत् समस्तं
नमस्तस्मै महते शङ्कराय॥ ३१

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे ब्रह्माद्यायुर्मानकथनं नाम
षष्ठोऽध्यायः॥ ६॥

सप्तमोऽध्यायः।

मुनय ऊचुः।

कथं जगदिदं कृत्स्नं विधाय च निधाय च।
आज्ञया परमां क्रीड़ां करोति परमेश्वरः॥ १
किं तत्प्रथमसम्भूतं केनेदमखिलं ततम्।
केन वा पुनरेवेदं ग्रस्यते पृथुकुक्षिणा॥ २

वायुरुवाच।

शक्तिः प्रथमसम्भूता शान्त्यतीतपदोत्तरा।
ततो माया ततोऽव्यक्तं शिवाच्छक्तिमतः प्रभोः॥ ३
शान्त्यतीतपदं शक्तेस्ततः शान्तिपदक्रमात्।
ततो विद्यापदं तस्मात् प्रतिष्ठापदसम्भवः॥ ४
निवृत्तिपदमुत्पन्नं प्रतिष्ठापदतः क्रमात्।
एवमुक्ता समासेन सृष्टिरीश्वरचोदिता॥ ५
आनुलोम्यात् तथैतेषां प्रातिलोम्येन संहृतिः।
अस्मात् पञ्चपदोद्दिष्टा न सृष्ट्यन्तरमिष्यते॥ ६
कलाभिः पञ्चभिर्व्याप्तं यस्मादिश्वमिदं जगत्।
अव्यक्तं कारणं यत् तदात्मना समधिष्ठितम्॥ ७
महदादि-विशेषान्तं सृजतीत्यपि सम्मतम्।
किन्तु तत्रापि कर्तृत्वं नाव्यक्तस्य न चात्मनः॥ ८
अचेतनत्वात् प्रकृतेरज्ञत्वात् पुरुषस्य च।
प्रधानपरमाण्वादि यावत् किञ्चिदचेतनम्॥ ९
न तत् कर्तृ स्वयं दृष्टं बुद्धिमत् कारणं विना।
जगच्च कर्तृसापेक्षं कार्य्यं सावयवं यतः॥ १०
तस्मात्कर्ता स्वतन्त्रो यः सर्व्वशक्तिश्च सर्व्ववित्।
अनादिनिधनश्चायं महदैश्वर्य्यसंयुतः॥ ११

स एव जगतः कर्त्ता महादेवो महेश्वरः।
परिणामः प्रधानस्य प्रवृत्तिः पुरुषस्य च॥ १२
सर्व्वं सत्यव्रतस्यैव शासनेन प्रवर्त्तते।
इतीयं शाश्वती निष्ठा सतां मनसि वर्त्तते॥ १३
न चैनं पश्यमाश्रित्य वर्त्तते खल्वचेतनः।
यावदादिसमारम्भो यावच्च प्रलयो महान्॥ १४
तावदस्येति सकलं ब्रह्मणः शरदां शतम्।
परमित्यायुषो नाम ब्रह्मणोऽव्यक्तजन्मनः॥ १५
यत् परार्द्धं तदर्द्धञ्च परार्द्धमभिधीयते।
परार्द्धद्वयकालान्ते प्रलये समुपस्थिते॥ १६
अव्यक्तमात्मनः कार्य्यमादायात्मनि तिष्ठति।
आत्मन्यवस्थितेऽव्यक्ते विकारे प्रतिसंहृते॥ १७
साधर्म्म्येणाधितिष्ठेते प्रधान-पुरुषावुभौ।
तमः-सत्त्वगुणावेतौ समत्वेन व्यवस्थितौ॥ १८
अनुद्रिक्तावनूनौ तावोतप्रोतौ परस्परम्।
गुणसाम्ये तदा तस्मिन्नविभागे तमोदये॥ १९
शान्तवातैकनीरे च न प्राज्ञायत किञ्चन।
अप्रज्ञाते जगत्यस्मिन्नेक एव महेश्वरः॥ २०
उपास्य रजनीं कृत्स्नां परां माहेश्वरीं ततः।
प्रभातायान्तु शर्व्वर्य्यां प्रधान-पुरुषावुभौ॥ २१
प्रविश्य क्षोभयामास मायायोगान्महेश्वरः।
ततः पुनरशेषाणां भूतानां प्रभवाप्ययात्॥ २२
अव्यक्तादभवत् सृष्टिराज्ञया परमेष्ठिनः।

विश्वोत्तरोत्तरविचित्रमनोरथस्य
यस्यैकशक्तिशकले सकलः समाप्तः।
आत्मानमध्वपतिमध्वविदो वदन्ति
तस्मै नमः सकललोकविलक्षणाय॥ २३

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे सप्तमोऽध्यायः॥ ७॥

अष्टमोऽध्यायः।

वायुरुवाच।

पुरुषाधिष्ठितात् पूर्व्वमव्यक्तादीश्वराज्ञया।
बुद्ध्यादयो विशेषान्ता विकाराश्चाभवन् क्रमात्॥ १
ततस्तेभ्यो विकारेभ्यो रुद्रो विष्णुः पितामहः।

जगतः कारणत्वेन त्रयो देवा विजज्ञिरे ॥ २
सर्व्वतो भुवनव्याप्ति-शक्तिमव्याहतां क्वचित्।
ज्ञानमप्रतिमं शश्वदैश्वर्य्यञ्चाणिमादिकम् ॥ ३
सृष्टि-स्थिति-लयाख्येषु कर्म्मसु त्रिषु हेतुताम्।
प्रभुत्वेन सहैतेषां प्रसीदति महेश्वरः ॥ ४
कल्पान्तरे पुनस्तेषामस्पर्द्धाबुद्धिमोहिनाम्।
सर्ग-रक्षा-लयाचारं प्रत्येकं प्रददौ च सः ॥ ५
एते परस्परोत्पन्ना धारयन्ति परस्परम्।
परस्परेण वर्द्धन्ते परस्परमनुव्रताः ॥ ६
क्वचिद्ब्रह्मा क्वचिद्विष्णुः क्वचिद्रुद्रः प्रशस्यते।
नानेन तेषामाधिक्यमैश्वर्य्यञ्चातिरिच्यते ॥ ७
अयं परस्त्वयं नेति संरम्भाभिनिवेशिनः।
यातुधाना भवन्त्येव पिशाचाश्च न संशयः ॥ ८
देवो गुणत्रयातीतश्चतुर्व्यूहो महेश्वरः।
सकलः सकलाधारः शक्तेरुत्पत्तिकारणम् ॥ ९
सोऽयमात्मत्रयस्यास्य प्रकृतेः पुरुषस्य च।
लीलाकृतजगत्सृष्टिरीश्वरत्वे व्यवस्थितः ॥ १०
यः सर्व्वस्मात् परो नित्यो निष्कलः परमेश्वरः।
स एव तत्तदाधारस्तदात्मा तदधिष्ठितः ॥ ११
तस्मान्महेश्वरस्यैव प्रकृतिः पुरुषस्तथा।
सदाशिवो भवो विष्णुर्ब्रह्मा सर्व्वं शिवात्मकम् ॥ १२
प्रधानात् प्रथमं जज्ञे बुद्धिः ख्यातिर्मतिर्महान्।
महत्तत्त्वस्य संक्षोभादहङ्कारस्त्रिधाभवत् ॥ १३
अहङ्काराच्च भूतानि तन्मात्राणीन्द्रियाणि च।
वैकारिकादहङ्कारात् सत्त्वोद्रिक्तात् तु सात्त्विकः॥१४
वैकारिकः स सर्गस्तु युगपत् सम्प्रवर्त्तते।
बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्म्मेन्द्रियाणि च ॥ १५
एकादशं मनस्तत्र स्वगुणेनोभयात्मकम्।
तमोयुक्तादहङ्काराद्भूततन्मात्रसम्भवः ॥ १६
भूतानामादिभूतत्वद्भूतादिः कथ्यते तु सः।
भूतादेः शब्दमात्रं स्यात् तत आकाशसम्भवः ॥ १७
आकाशात् स्पर्श उत्पन्नः स्पर्शाद्वायुसमुद्भवः।
वायो रूपं ततस्तेजस्तेजसो रससम्भवः ॥ १८
रसादापः समुत्पन्नास्ताभ्यो गन्धसमुद्भवः।
गन्धाच्च पृथिवी जाता भूतेभ्योऽन्यच्चराचरम् ॥ १९
पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च।
महदादि-विशेषान्ता ह्यण्डमुत्पादयन्ति वै ॥ २०
तत्र कार्य्यञ्च करणं संसिद्धं ब्रह्मणो यदा।
तदाण्डेऽस्मिन् प्रवृद्धोऽभूत् क्षेत्रज्ञो ब्रह्मसंज्ञितः ॥ २१
स वै शरीरी प्रथमः स वै पुरुष उच्यते।
आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत ॥ २२
तस्येश्वरस्याप्रतिमा ज्ञानवैराग्यलक्षणा।
धर्म्मैश्वर्य्यकरा बुद्धिर्ब्राह्मी जज्ञेऽभिमानिनः ॥ २३
अव्यक्ताज्जायते तस्य मनसा यद्यदीप्सितम्।
वशीकृतत्वात् त्रैगुण्यात् सापेक्षत्वात् स्वभावतः ॥ २४
त्रिधा विभज्य चात्मानं त्रैलोक्ये सम्प्रवर्त्तते।
सृजते ग्रसते चैव वीक्षते च त्रिभिः स्वयम् ॥ २५
चतुर्म्मुखस्तु ब्रह्मत्वे कालत्वे चान्तकः स्मृतः।
सहस्रमूर्द्धा पुरुषस्तिस्रोऽवस्थाः स्वयम्भुवः ॥ २६
सत्त्वं रजश्च ब्रह्मत्वे कालत्वे च तमो रजः।
विष्णुत्वे केवलं सत्त्वं गुणवृद्धिस्त्रिधा प्रभोः ॥ २७
ब्रह्मत्वे सृजते लोकान् कालत्वे संक्षिपत्यपि।
पुरुषत्वेऽप्युदासीनः कर्म्म च त्रिविधं विभोः ॥ २८
एवं त्रिधाविभिन्नत्वाद्ब्रह्मा त्रिगुण उच्यते।
चतुर्द्धाप्रविभक्तत्वाच्चतुर्व्यूहः प्रकीर्त्तितः ॥ २९
आदित्वादादिदेवोऽसावजातत्वादजः स्मृतः।
पाति यस्मात् प्रजाः सर्व्वाः प्रजापतिरिति स्मृतः ॥ ३०
हिरण्मयस्तु यो मेरुस्तस्योल्वं सुमहात्मनः।
गर्भोदकं समुद्राश्च जरायुश्चापि पर्व्वताः ॥ ३१
तस्मिन्नण्डे त्विमे लोका अन्तर्विश्वमिदं जगत्।
चन्द्रादित्यौ सनक्षत्रौ सग्रहौ सह वायुना ॥ ३२
अद्भिर्दशगुणाभिस्तु वाह्यतोऽण्डं समावृतम्।
आपो दशगुणेनैव तेजसा वहिरावृताः ॥ ३३
तेजो दशगुणेनैव वायुना वहिरावृतम्।
आकाशेनावृतो वायुः खञ्च भूतादिनावृतम् ॥ ३४
भूतादिर्महता तद्वदव्यक्तेनावृतो महान्।
एतैरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम् ॥ ३५
एतदावृत्य चान्योन्यमष्टौ प्रकृतयः स्थिताः।
एवं परस्परोपन्ना धारयन्ति परस्परम् ॥ ३६
आधाराधेयभावेन विकारास्तु विकारिषु।
कूर्म्मोऽङ्गानि यथा पूर्व्वं प्रसार्य्य विनियच्छति ॥ ३७
विकाराश्च तथाव्यक्तं सृष्ट्वा भूयो नियच्छति।

अव्यक्तप्रभवं सर्व्वमानुलोम्येन जायते ॥ ३८
प्राप्ते प्रलयकाले तु प्रातिलोम्येन लीयते।
गुणाः कालवशादेव भवन्ति विषमाः समाः ॥ ३९
गुणसाम्ये लयो ज्ञेयो वैषम्ये सृष्टिरुच्यते।
तदिदं ब्रह्मणो योनिरेतदण्डं घनं महत् ॥ ४०
ब्रह्मणः क्षेत्रमुद्दिष्टं ब्रह्मा क्षेत्रज्ञ उच्यते।
इतीदृशानामण्डानां कोट्यो ज्ञेयाः सहस्रशः ॥ ४१
सर्व्वगत्वात् प्रधानस्य तिर्य्यगूर्द्ध्वमधः स्थिताः।
तत्र तत्र चतुर्व्वक्त्रा ब्रह्माणो हरयो भवाः ॥ ४२
सृष्टाः प्रधानेन तथा लब्ध्वा शम्भोस्तु सन्निधिम्।
महेश्वरः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ॥ ४३
अण्डाज्जज्ञे विभुर्ब्रह्मा लोकास्तेन कृतास्त्विमे।

अबुद्धिपूर्व्वः कथितो मयैष
प्रधानसर्गः प्रथमः प्रवृत्तः।
आत्यन्तिकश्च प्रलयोऽन्तकाले
लीलाकृतः केवलमीश्वरस्य ॥ ४४
यत्तत् स्मृतं कारणमप्रमेयं
ब्रह्म प्रधानं प्रकृतेः प्रसूतिः।
अनादिमध्यान्तमनन्तवीर्य्यं
शुक्लं सुरक्तं पुरुषेण युक्तम् ॥ ४५
उत्पादकत्वाद्रजसोऽतिरेका-
ल्लोकस्य सन्तानविवृद्धिहेतून्।
अष्टौ विकारानपि चादिकाले
सृष्ट्वा समश्नाति तथान्तकाले ॥ ४६
प्रकृत्यवस्थापितकारणानां
यावत्स्थितिर्या च पुनः प्रवृत्तिः।
तत् सर्व्वमप्राकृतवैभवस्य
सङ्कल्पमात्रेण महेश्वरस्य ॥ ४७

इति श्रीशैवे वायवीयसंहितायां पूर्व्वभागे
लोकोत्पत्तिवर्णनं नामाष्टमोऽध्यायः ॥ ८॥

नवमोऽध्यायः।

मुनय ऊचुः।

मन्वन्तराणि सर्व्वाणि कल्पभेदांश्च सर्व्वशः।
तेष्ववान्तरसर्गञ्च प्रतिसर्गञ्च नो वद ॥ १

वायुरुवाच।

कालसंख्याविवृत्तस्य परार्द्धो ब्रह्मणः स्मृतः।
तावांश्चैवास्य कालोऽन्यस्तस्यान्ते प्रतिसृज्यते ॥ २
दिवसे दिवसे तस्य ब्रह्मणः पूर्व्वजन्मनः।
चतुर्द्दश महाभागा मनूनां परिवृत्तयः ॥ ३
अनादित्वादनन्तत्वादज्ञेयत्वाच्च कृत्स्नशः।
मन्वन्तराणि कल्पाश्च न शक्यवचनाः पृथक् ॥ ४
उक्तेष्वपि च सर्व्वेषु शृण्वतां वोऽथवा मम।
किमिहास्ति फलं तस्मान्न पृथग्वक्तुमुत्सहे ॥ ५
य एव खलु कल्पेषु कल्पः सम्प्रति वर्त्तते।
तत्र संक्षिप्य वर्त्तन्ते सृष्टयः प्रतिसृष्टयः ॥ ६
यश्चायं वर्त्तते कल्पो वाराहो नाम नामतः।
अस्मिन्नपि द्विजश्रेष्ठा मनवस्तु चतुर्द्दश ॥ ७
स्वायम्भुवादयः सप्त सप्त सावर्णिकादयः।
तेषु वैवस्वतो नाम सप्तमो वर्त्तते मनुः ॥ ८
मन्वन्तरेषु सर्व्वेषु सर्गसंहारवृत्तयः।
प्रायः समा भवन्तीति तर्कः कार्य्यो विजानता ॥ ९
पूर्व्वकल्पे परावृत्ते प्रवृत्ते कालमारुते।
समुन्मूलितमूलेषु वृक्षेषु च वनेषु च ॥ १०
जगन्ति तृणवत् त्रीणि देवे दहति पावके।
वृष्ट्या भुवि निषिक्तायां विवेलेष्वर्णवेषु च ॥ ११
दिक्षु सर्व्वासु मग्नासु वारिपूरे महीयसि।
तरङ्गिश्चटुलाक्षेपैस्तरङ्गभुजमण्डलैः ॥ १२
प्रारब्धचण्डनृत्येषु ततः प्रलयवारिषु।
ब्रह्मा नारायणो भूत्वा सुष्वाप सलिले सुखम् ॥१३
इमञ्चोदाहरन् मन्त्रं श्लोकं नारायणं प्रति।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ १४
अयनं तस्य ता यस्मात् तेन नारायणः स्मृतः।
शिवयोगमयीं निद्रां कुर्व्वन्तं त्रिदशेश्वरम् ॥ १५
बद्धाञ्जलिपुटाः सिद्धा जनलोकनिवासिनः।
स्तोत्रैः प्रबोधयामासुः प्रभातसमये सुराः ॥ १६
ततः प्रबुद्ध उत्थाय शयनात् तोयमध्यगात्।
उदैक्षत दिशः सर्व्वा योगनिद्रालसेक्षणः ॥ १७
नापश्यत् स तदा किञ्चित् स्वात्मनो व्यतिरेकि यत्।
सविस्मय इवासीनः परां चिन्तामुपागमत् ॥ १८
क्व सा भगवती या तु मनोज्ञा महती मही।

नानाविधमहाशैल-नदी-नगर-कानना ॥ १९
एवं सञ्चिन्तयन् ब्रह्मा बुबुधे नैव भूस्थितिम् ।
तदा सस्मार पितरं भगवन्तं त्रिलोचनम् ॥ २०
स्मरणाद्देवदेवस्य भवस्यामिततेजसः ।
ज्ञातवान् सलिले मग्नां धरणीं धरणीपतिः ॥ २१
ततो भूमेः समुद्धारं कर्त्तुकामः प्रजापतिः ।
जलक्रीड़ोचितं दिव्यं वाराहं रूपमस्मरत् ॥ २२
महापर्व्वतवर्ष्माणं महाजलदनिस्वनम् ।
नीलमेघप्रतीकाशं दीप्तशब्दं भयानकम् ॥ २३
पीनवृत्तघनस्कन्धं पीनोन्नतकटीतटम् ।
ह्रस्ववृत्तोरुजङ्घाग्रं सुतीक्ष्णखुरमण्डलम् ॥ २४
पद्मरागमणिप्रख्यं वृत्तभीषणलोचनम् ।
वृत्तदीर्घमहागात्रं स्तब्धकर्णस्थलोज्ज्वलम् ॥ २५
उदीर्णोच्छ्वासनिश्वास-घूर्णितप्रलयार्णवम् ।
विस्फुरत्सुसटाच्छन्नकपोलं स्कन्धबन्धुरम् ॥ २६
मणिभिर्भूषणैश्चित्रैर्महारत्नैः परिष्कृतैः ।
विराजमानं विद्युद्भिर्मेघसङ्घमिवोन्नतम् ॥ २७
आस्थाय विपुलं रूपं वाराहममितं विधिः ।
पृथिव्युद्धरणार्थाय प्रविवेश रसातलम् ॥ २८
स तदा शुशुभेऽतीव शूकरो गिरिसन्निभः ।
लिङ्गाकृतेर्महेशस्य पादमूलगतो यथा ॥ २९
ततः स सलिले मग्नां पृथिवीं पृथिवीधरः ।
उद्धृत्यालिङ्ग्य दंष्ट्राभ्यामुन्ममज्ज रसातलात् ॥ ३०
तं दृष्ट्वा मुनयः सिद्धा जनलोकनिवासिनः ।
मुमुदुर्नन्तुर्मूर्ध्नि तस्य पुष्पैरवाकिरन् ॥ ३१
वपुर्महावराहस्य शुशुभे पुष्पसंवृतम् ।
पतद्भिरिव खद्योतैः प्रांशुरञ्जनपर्व्वतः ॥ ३२
ततः संस्थानमानीय वराहो महतीं महीम् ।
स्वमेव रूपमास्थाय स्थापयामास वै प्रभुः ॥ ३३
पृथिवीञ्च समीकृत्य पृथिव्यां स्थापयन् गिरीन् ।
भूराद्यांश्चतुरो लोकान् कल्पयामास पूर्व्ववत् ॥ ३४

इति सह महतीञ्च मही महीध्रैः
प्रलयमहाजलधेरधःस्थमध्यात् ।
उपरि च विनिवेश्य स विश्वकर्मा
चरमचरञ्च जगत् ससर्ज भूयः ॥ ३५

इति श्रीशैवे वा० सं० पू० नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ।

वायुरुवाच ।

सर्गं चिन्तयतस्तस्य तदा वै बुद्धिपूर्व्वकम् ।
प्रध्यानकाले मोहस्तु प्रादुर्भूतस्तमोमयः ॥ १
तमो मोहो महामोहस्तामिस्रश्चान्धसंज्ञितः ।
अविद्या पञ्चमी चैषा प्रादुर्भूता महात्मनः ॥ २
पञ्चधावस्थितः सर्गो ध्यायतस्त्वभिमानिनः ।
सर्व्वतस्तमसातीव बीजकुम्भवदावृतः ॥ ३
वहिरन्तश्चाप्रकाशः स्तब्धो निःसंज्ञ एव च ।
तस्मात् तेषां वृता बुद्धिर्मुखानि करणानि च ॥ ४
तस्मात् ते संवृतात्मानो नगा मुख्याः प्रकीर्त्तिताः ।
तं दृष्ट्वाऽसाधकं ब्रह्मा प्रथमं सर्गमीदृशम् ॥ ५
अप्रसन्नमना भूत्वा द्वितीयं सोऽभ्यमन्यत ।
तस्याभिध्यायतः सर्गं तिर्य्यक्स्रोतोऽभ्यवर्त्तत ॥ ६
अन्तःप्रकाशास्तिर्य्यञ्च आवृताश्च वहिः पुनः ।
पश्वात्मानस्ततो जाता उत्पथग्राहिणश्च ते ॥ ७
तमप्यसाधकं ज्ञात्वा सर्गमन्यममन्यत ।
ततोर्द्ध्वस्रोतसो वृत्तो देवसर्गस्तु सात्त्विकः ॥ ८
ते सुखप्रीतिबहुला वहिरन्तश्च नावृताः ।
प्रकाशा वहिरन्तश्च स्वभावाद्देवसंज्ञिताः ॥ ९
ततोऽभिध्यायतो व्यक्तादर्व्वाक्स्रोतस्तु साधकः ।
मनुष्यनामा सञ्जातः सर्गो दुःखसमुत्कटः ॥ १०
प्रकाशा वहिरन्तस्ते तमोद्रिक्ता रजोऽधिकाः ।
पञ्चमोऽनुग्रहः सर्गश्चतुर्द्धा संव्यवस्थितः ॥ ११
विपर्य्ययेण शक्त्या च तुष्ट्या सिद्ध्या तथैव च ।
तेऽपरिग्राहिणः सर्व्वे संविभागरताः पुनः ॥ १२
खादनाश्चाप्यशीलाश्च भूताद्याः परिकीर्त्तिताः ।
प्रथमो महतः सर्गो ब्रह्मणः परमेष्ठिनः ॥ १३
तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते ।
वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः ॥ १४
इत्येष प्रकृतेः सर्गः सम्भूतोऽबुद्धिपूर्व्वकः ।
मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ॥ १५
तिर्य्यक्स्रोतस्तु यः प्रोक्तस्तिर्य्यग्योनिः स पञ्चमः ।
तदोर्द्ध्वस्रोतसः षष्ठो देवसर्गस्तु स स्मृतः ॥ १६
ततोऽर्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः ।

अष्टमोऽनुग्रहः सर्गः कौमारो नवमः स्मृतः ॥ १७
प्राकृताश्च त्रयः पूर्व्वं सर्गास्तेऽबुद्धिपूर्व्वकाः ।
बुद्धिपूर्व्वं प्रवर्त्तन्ते मुख्याद्याः पञ्च वैकृताः ॥ १८
अग्रे ससर्ज्ज वै ब्रह्मा मानसानात्मनः समान् ।
सनन्दं सनकञ्चैव विद्वांसञ्च सनातनम् ॥ १९
ऋभुं सनत्कुमारञ्च पूर्व्वमेव प्रजापतिः ।
सर्व्वे ते योगिनो ज्ञेया वीतरागा विमत्सराः ॥ २०
ईश्वरासक्तमनसो न चक्रुः सृष्टये मतिम् ।
तेषु सृष्ट्यनपेक्षेषु गतेषु सनकादिषु ॥ २१
स्रष्टुकामः पुनर्ब्रह्मा तताप परमं तपः ।
तस्यैवं तप्यमानस्य न किञ्चित् समवर्त्तत ॥ २२
ततो दीर्घेण कालेन दुःखात् क्रोधो व्यजायत ।
क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः ॥ २३
ततस्तेभ्योऽश्रुबिन्दुभ्यो भूताः प्रेतास्तदाभवन् ।
सर्व्वांस्तानश्रुजान् दृष्ट्वा ब्रह्मात्मानमनिन्दत ॥ २४
तस्य तीव्राभवन्मूर्च्छा क्रोधामर्षसमुद्भवा ।
मूर्च्छितस्तु जहौ प्राणान् क्रोधाविष्टः प्रजापतिः॥२५
ततः प्राणेश्वरो रुद्रो भगवान् नीललोहितः ।
प्रसादमतुलं कर्त्तुं प्रादुरासीत् प्रभोर्मुखात् ॥ २६
दशधा चैकधा चक्रे स्वात्मानं प्रभुरीश्वरः ।
ते तेनोक्ता महात्मानो दशधा चैकधा कृताः ॥ २७
यूयं सृष्टा मया वत्सा लोकानुग्रहकारणात् ।
तस्मात् सर्व्वस्य लोकस्य स्थापनाय हिताय च ॥ २८
प्रजासन्तानहेतोश्च प्रयतध्वमतन्द्रिताः ।
एवमुक्ताश्च रुरुदुर्दुद्रुवुश्च समन्ततः ॥ २९
रोदनाद्द्रावणाच्चैव ते रुद्रा नामतः स्मृताः ।
ये रुद्रास्ते खलु प्राणा ये प्राणास्ते महात्मकाः ॥३०
ततो मृतस्य देवस्य ब्रह्मणः परमेष्ठिनः ।
घृणी ददौ पुनः प्राणान् ब्रह्मपुत्रो महेश्वरः ॥ ३१
प्रहृष्टवदनो रुद्रः प्राणप्रत्यागमाद्विभोः ।
अभ्यभाषत विश्वेशो ब्रह्माणं परमं वचः ॥ ३२
मा भैर्मा भैर्महाभाग विरिञ्च जगतां गुरो ।
मया ते प्राणिताः प्राणाः सुखमुत्तिष्ठ सुव्रत ॥ ३३
स्वप्नानुभूतमिव तच्छ्रुत्वा वाक्यं मनोहरम् ।
हरं निरीक्ष्य शनकैर्नेत्रैः फुल्लाम्बुजप्रभैः ॥ ३४
तथा प्रत्यागतप्राणः स्निग्धगम्भीरया गिरा ।
उवाच वचनं ब्रह्मा तमुद्दिश्य कृताञ्जलिः ॥ ३५
भो भो वद महाभाग आनन्दयसि मे मनः ।
को भवान् विश्वमूर्त्तिस्त्वं स्थित एकादशात्मकः ॥३६
तस्य तद्वचनं श्रुत्वा व्याजहार महेश्वरः ।
स्पृशन् कराभ्यां ब्रह्माणं सुसुखाभ्यां सुरेश्वरः ॥३७
मां विद्धि परमात्मानं तव पुत्त्रत्वमागतम् ।
एते चैकादश रुद्रास्त्वां सुरक्षितुमागताः ॥ ३८
तस्मात् तीव्रामिमां मूर्च्छां विधूय मदनुग्रहात् ।
प्रबुद्धय यथा पूर्व्वं प्रजा वै स्रष्टुमर्हसि ॥ ३९
एवं भगवता प्रोक्तो ब्रह्मा प्रीतमना ह्यभूत् ।
नामाष्टकेन विश्वात्मा तुष्टाव परमेश्वरम् ॥ ४०

ब्रह्मोवाच ।

नमस्ते भगवन् रुद्र भास्करामिततेजसे ।
नमो भवाय देवाय रसायाम्बुमयात्मने ॥ ४१
शर्व्वाय क्षितिरूपाय सदा सुरभिणे नमः ।
ईशाय वायवे तुभ्यं नमः स्पर्शमयात्मने ॥ ४२
पशूनां पतये चैव पावकायातितेजसे ।
भीमाय व्योमरूपाय शब्दमात्राय ते नमः ॥ ४३
उग्रायोग्रस्वरूपाय यजमानात्मने नमः ।
महादेवाय सोमाय नमोऽस्त्वमृतमूर्त्तये ॥ ४४
एवं स्तुत्वा महादेवं ब्रह्मा लोकपितामहः ।
प्रार्थयामास विश्वेशं गिरा प्रणतिपूर्व्वया ॥ ४५
भगवन् भूतभव्येश मम पुत्त्र महेश्वर ।
सृष्टिहेतोस्त्वमुत्पन्नो ममाङ्गेऽनङ्गनाशन ॥ ४६
तस्मान्महति कार्य्येऽस्मिन् व्यापृतस्य मम प्रभो ।
साहाय्यं कुरु सर्व्वत्र स्रष्टुमर्हसि स प्रजाः ॥ ४७
तेनैवं याचितो देवो रुद्रस्त्रिपुरमर्द्दनः ।
बाढमित्येव तां वाणीं प्रतिजग्राह शङ्करः ॥ ४८
ततः स भगवान् ब्रह्मा हृष्टस्तमभिवन्द्य च ।
स्रष्टुं तेनाभ्यनुज्ञातस्तथान्याश्चासृजत् प्रजाः ॥ ४९
मरीचिभृग्वङ्गिरसः पुलस्त्यं पुलहं क्रतुम् ।
दक्षमत्रिं वशिष्ठञ्च सोऽसृजन्मनसैव च ॥ ५०
पुरस्तादसृजद्ब्रह्मा धर्म्मं सङ्कल्पमेव च ।
इत्येते ब्रह्मणः पुत्त्रा द्वादशादौ प्रकीर्त्तिताः ॥ ५१
सह रुद्रेण सम्भूताः पुराणा गृहमेधिनः ।
तेषां द्वादश वंशाः स्युर्दिव्या देवगणान्विताः ॥ ५२

प्रजावन्तः क्रियावन्तो महर्षिभिरलङ्कृताः।
अथ देवासुरपितॄन् मनुष्यांश्च चतुष्टयम् ॥ ५३
सह रुद्रेण सिसृक्षुरम्भस्येतानि वै विधिः।
स्वच्छार्थं वै समाधाय ब्रह्माऽऽत्मानमयूयुजत् ॥ ५४
मुखादजनयद्देवान् पितॄंश्चैवोपपक्षतः।
जघनादसुरान् सर्व्वान् प्रजनादपि मानुषान् ॥ ५५
अवस्करे क्षुधाविष्टा राक्षसास्तस्य जज्ञिरे।
पुत्रास्तमोरजःप्राया बलिनस्ते निशाचराः ॥ ५६
सर्पा यक्षास्तथा भूता गन्धर्व्वाः सम्प्रजज्ञिरे।
वयांसि पक्षतः सृष्टाः पक्षिणो वक्षसोऽसृजत् ॥ ५७
मुखतोऽजांस्तथा पार्श्वादुरगांश्च विनिर्म्ममे।
पद्भ्याञ्चाश्वान्समातङ्गान्शरभान्गवयान्मृगान् ॥ ५८
उष्ट्रानश्वतरांश्चैव न्यङ्कूनन्यांश्च जातयः।
ओषध्यः फलमूलानि रोमभ्यस्तस्य जज्ञिरे ॥ ५९
गायत्रीञ्च ऋचञ्चैव त्रिवृत्स्तोमं रथन्तरम्।
अग्निष्टोमञ्च यज्ञानां निर्म्ममे प्रथमान्मुखात् ॥ ६०
यजूंषि त्रैष्टुभं छन्दः स्तोमं पञ्चदशं तथा।
बृहत्साम तथोक्थञ्च दक्षिणादसृजन्मुखात् ॥ ६१
सामानि जगतीच्छन्दः स्तोमं सप्तदशं तथा।
वैरूपमतिरात्रञ्च पश्चिमादसृजन्मुखात् ॥ ६२
एकविंशमथर्व्वाणमाप्तोर्य्यामाणमेव च।
अनुष्टुभं सवैराजमुत्तरादसृजन्मुखात् ॥ ६३
उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे।
यक्षाः पिशाचा गन्धर्व्वास्तथैवाप्सरसां गणाः ॥ ६४
नर-किन्नर-रक्षांसि वयः-पशु-मृगोरगाः।
अव्ययञ्चैव यदिदं जगत् स्थावरजङ्गमम् ॥ ६५
तेषां वै यानि कर्म्माणि प्राक्सृष्ट्यां प्रतिपेदिरे।
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः ॥ ६६
हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते।
तद्भाविताः प्रपद्यन्ते तस्मात् तत् तस्य रोचते ॥ ६७
महाभूतेषु नानात्वमिन्द्रियार्थेषु मूर्त्तिषु।
विनियोगञ्च भूतानां धातैव विदधत् स्वयम् ॥ ६८
नाम रूपञ्च भूतानां प्राकृतानां प्रपञ्चनम्।
वेदशब्देभ्य एवादौ निर्म्ममेऽसौ पितामहः ॥ ६९
आर्षाणि चैव नामानि याश्च वेदेषु दृष्टयः।
शर्व्वर्य्यन्ते प्रसूतानां तान्येवैभ्यो ददावजः ॥ ७०
यथर्त्तुष्वृतुलिङ्गानि नानारूपाणि पर्य्यये।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ ७१
इत्येष करणोद्भूतो लोकसर्गः स्वयम्भुवः।
महदाद्यो विशेषान्तो विकारः प्रकृतेः स्वयम् ॥ ७२
चन्द्र-सूर्य्य-प्रभाजुष्टो ग्रह-नक्षत्रमण्डितः।
नदीभिश्च समुद्रैश्च पर्व्वतैश्च स मण्डितः ॥ ७३
पुरैश्च विविधै रम्यैः स्फीतैर्जनपदैस्तथा।
तस्मिन् ब्रह्मवने व्यक्तो ब्रह्मा चरति सर्व्ववित् ॥ ७४
अव्यक्तबीजप्रभव ईश्वरानुग्रहे स्थितः।
बुद्धिस्कन्धमहाशाख इन्द्रियान्तरकोटरः ॥ ७५
महाभूतप्रमाणश्च विशेषामलपल्लवः।
धर्म्माधर्म्मसुपुष्पाढ्यः सुखदुःखफलोदयः ॥ ७६
आजीव्यः सर्व्वभूतानां ब्रह्मवृक्षः सनातनः।
द्यां मूर्द्धानं तस्य विप्रा वदन्ति
खं वै नाभिं चन्द्रसूर्य्यौ च नेत्रे।
दिशः श्रोत्रे चरणौ च क्षितिञ्च
सोऽचिन्त्यात्मा सर्व्वभूतप्रणेता ॥ ७७
वक्त्रात् तस्य ब्राह्मणाः सम्प्रसूता-
स्तद्वक्षसः क्षत्रियाः पूर्व्वभागात्।
वैश्या ऊरुभ्यां तस्य पद्भ्याञ्च शूद्राः
सर्व्वे वर्णा गात्रतः सम्प्रसूताः ॥ ७८

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे सृष्टिनिरूपणं नाम
दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः।

ऋषय ऊचुः।

भवता कथिता सृष्टिर्भवस्य परमात्मनः।
चतुर्मुख मुखात् तत्र संशयो नः प्रजायते ॥ १
देवश्रेष्ठो विरूपाक्षो दीप्तः शूलधरो हरः।
कालात्मा भगवान् रुद्रः कपर्द्दी नीललोहितः ॥ २
सब्रह्मकमिमं लोकं सविष्णुञ्च सपावकम्।
यः संहरति संक्रुद्धो युगान्ते समुपस्थिते ॥ ३
यस्य ब्रह्मा च विष्णुश्च प्रणामं कुरुतो भयात्।
लोकसङ्कोचकस्यास्य यस्य तौ वशवर्त्तिनौ ॥ ४

योऽयं देवः स्वकादङ्गाद्ब्रह्मविष्णू पुराऽसृजत्।
स एव हि तयोर्नित्यं योगक्षेमकरः प्रभुः॥ ५
स कथं भगवान् रुद्र आदिदेवः पुरातनः।
पुत्रत्वमगमच्छम्भुर्ब्रह्मणोऽव्यक्तजन्मनः॥ ६
प्रजापतिश्च विष्णुश्च रुद्रस्य तौ परस्परम्।
सृष्टौ परस्परस्याङ्गादिति प्रागपि शुश्रुम॥ ७
कथं पुनरशेषाणां भूतानां हेतुभूतयोः।
गुणप्रधानभावेन प्रादुर्भावः परस्परात्॥ ८
नापृष्टं भवता किञ्चिन्नाश्रुतञ्च कथञ्चन।
भगवच्छिष्यभूतेन भवता सकलं श्रुतम्॥ ९
यथाह भगवान् ब्रह्मा वद त्वमपि नस्तथा।
सर्व्वमेतद्युथावृत्तं वक्तुमर्हसि मारुत॥ १०

सूत उवाच।

एवं पृष्टः स भगवान् वायुराकाशसम्भवः।
सर्व्वमेतत् समासेन मुनीनामवदद्विभुः॥ ११

वायुरुवाच।

स्थाने पृष्टमिदं विप्रा भवद्भिः प्रश्नकोविदैः।
इदमेव पुरा पृष्टो मम प्राह पितामहः॥ १२
तदहं सम्प्रवक्ष्यामि यथा रुद्रसमुद्भवः।
यथा च पुनरुत्पत्तिब्रह्म-विष्ण्वोः परस्परम्॥ १३
त्रयस्ते कारणात्मानो जाताः साक्षान्महेश्वरात्।
चराचरस्य विश्वस्य सर्गस्थित्यन्तहेतवः॥ १४
परमैश्वर्य्यसंयुक्ताः परमेश्वरभाविताः।
तच्छक्त्याधिष्ठिता नित्यं तत्कार्य्यकरणक्षमाः॥ १५
पित्रा नियमिताः पूर्व्वं त्रयोऽपि त्रिषु कर्म्मसु।
ब्रह्मा सर्गे हरिस्त्राणे रुद्रः संहरणे पुनः॥ १६
यथाप्यन्योऽन्यमात्सर्य्यादन्योऽन्यातिशयाशिनः।
तपसा तोषयित्वा स्वं पितरं परमेश्वरम्॥ १७
लब्धा सर्व्वात्मता तस्य प्रसादात् परमेष्ठिनः।
ब्रह्म-नारायणौ पूर्व्वं रुद्रः कल्पान्तरेऽसृजत्॥ १८
कल्पान्तरे पुनर्ब्रह्मा रुद्र विष्णू जगन्मयः।
विष्णुश्च भगवान् रुद्रं ब्रह्माणमसृजत् पुनः॥ १९
नारायणं पुनर्ब्रह्मा ब्रह्माणञ्च पुनर्भवः।
एवं कल्पेषु कल्पेषु ब्रह्म-विष्णु-महेश्वराः॥ २०
परस्परेण जायन्ते परस्परजयैषिणः।
तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः॥ २१
प्रभावः कथ्यते तेषां परस्परसमुद्भवात्।
शृणुतेमां कथां चित्रां पुण्यां पापप्रमोचनीम्॥ २२
कल्पे तत्पुरुषे वृत्तां ब्रह्मणः परमेष्ठिनः।
पुरा नारायणो नाम कल्पे वै मेघवाहने॥ २३
दिव्यं वर्षसहस्रन्तु मेघो भूत्वावहद्धरम्।
तस्य भावं समालक्ष्य विष्णोर्विश्वजगद्गुरुः॥ २४
शर्व्वः सर्व्वात्मभावेन प्रददौ शक्तिमव्ययाम्।
शक्तिं लब्ध्वा तु सर्व्वात्मा शिवात् सर्व्वेश्वरेश्वरात्॥ २५
ससर्ज्ज भगवान् विष्णुर्विश्वं विश्वसृजा सह।
विष्णोस्तद्वैभवं दृष्ट्वा सृष्टस्तेन पितामहः॥ २६
ईर्ष्यया परया ग्रस्तः स हसन्निदमब्रवीत्।
गच्छ विष्णो मया ज्ञातं तव सर्गस्य कारणम्॥ २७
आवयोरधिकश्चास्ति स रुद्रो नास्ति संशयः।
तस्य देवादिदेवस्य प्रसादात् परमेष्ठिनः॥ २८
स्रष्टा त्वं भगवानाद्यः पालकः परमार्थतः।
अहञ्च तपसाराध्य रुद्रं त्रिदशनायकम्॥ २९
त्वया सह जगत् सर्व्वं स्रक्ष्याम्यत्र न संशयः।
एवं विष्णुमुपालभ्य भगवानब्जसम्भवः॥ ३०
एवं विज्ञापयामास तपसा प्राप्य शङ्करम्।
भगवन् देवदेवेश विश्वेश्वर महेश्वर॥ ३१
तव वामाङ्गजो विष्णुर्दक्षिणाङ्गभवो ह्यहम्।
मया सह जगत् सर्व्वं तथाप्यसृजदच्युतः॥ ३२
स मत्सरादुपालभ्यस्त्वदाश्रयबलान्मया।
मद्भावादधिकस्तस्य भावस्त्वयि महेश्वर॥ ३३
त्वत्त एव समुत्पत्तिरावयोः सदृशी यतः।
तस्य भक्त्या यथा पूर्व्वं प्रसादं कृतवानसि॥ ३४
तथा ममापि तत् सर्व्वं दातुमर्हसि शङ्कर।
इति विज्ञापितस्तेन भगवान् भगनेत्रहा॥ ३५
न्यायेन वै ददौ सर्व्वं तस्यापि स घृणानिधिः।
लब्ध्वैवमीश्वरादेव ब्रह्मा सर्व्वात्मतां क्षणात्॥ ३६
त्वरमाणोऽथ सङ्गम्य ददर्श पुरुषोत्तमम्।
क्षीरार्णवालये शुभ्रे विमाने सूर्य्यसन्निभे॥ ३७
हेमरत्नान्विते दिव्ये मनसा तेन निर्म्मिते।
अनन्तभोगशय्यायां शयानं पङ्कजेक्षणम्॥ ३८
चतुर्भुजमुदाराङ्गं सर्व्वाभरणभूषितम्।
शङ्खचक्रधरं सौम्यं चन्द्रबिम्बसमाननम्॥ ३९

श्रीवत्सवक्षसं देवं प्रसन्नमधुरस्मितम् ।
धरामृदुकराम्भोज-स्पर्शरक्तपदाम्बुजम् ॥ ४०
क्षीरार्णवेऽमृतमिव शयानं योगनिद्रया ।
तमसा कालरुद्राख्यं रजसा कनकाण्डजम् ॥ ४१
सत्त्वेन सर्व्वगं विष्णुं निर्गुणत्वे महेश्वरम् ।
तं दृष्ट्वा पुरुषं ब्रह्मा प्रगल्भमिदमब्रवीत् ॥ ४२
ग्रसामि त्वामहं विष्णो त्वमात्मानं यथा पुरा ।
तस्य तद्वचनं श्रुत्वा प्रतिबुध्य पितामहम् ॥ ४३
उदैक्षत महाबाहुः स्मितमीषच्चकार च ।
तस्मिन्नवसरे विष्णुर्ग्रस्तस्तेन महात्मना ॥ ४४
सृष्टश्च ब्रह्मणा सद्यो भ्रुवोर्मध्यादयत्नतः ।
तस्मिन्नवसरे साक्षाद्भगवानिन्दुभूषणः ॥ ४५
शक्तिं तयोरपि द्रष्टुमरूपो रूपमास्थितः ।
प्रसादमतुलं कर्त्तुं पुरादत्तवरस्तयोः ॥ ४६
आगच्छत् तत्र यत्रेमौ ब्रह्म-नारायणौ स्थितौ ।
अथ तुष्टुवतुर्देवं प्रीतौ भीतौ च कौतुकात् ॥ ४७
प्रणेमतुश्च बहुशो बहुमानेन दूरतः ।
भवोऽपि भगवानेतावनुगृह्य पिनाकधृक् ।
सादरं पश्यतोरेव तयोरन्तरधीयत ॥ ४८

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे शेषशायि-नारायणवर्णनं
नामैकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

वायुरुवाच ।

प्रतिकल्पं प्रवक्ष्यामि रुद्राविर्भावकारणम् ।
यतो विच्छिन्नसन्ताना ब्रह्मसृष्टिः प्रवर्त्तते ॥ १
कल्पे कल्पे प्रजां सृष्ट्वा ब्रह्मा ब्रह्माण्डसम्भवः ।
अवृद्धिहेतोर्भूतानां मुमोह भृशदुःखितः ॥ २
तस्य दुःखप्रशान्त्यर्थं प्रजानाञ्च विवृद्धये ।
तत्तत्कल्पेषु कालात्मा रुद्रो रुद्रगणाधिपः ॥ ३
निर्द्दिष्टः परमेशेन महेशो नीललोहितः ।
पुत्रो भूत्वानुगृह्णाति ब्रह्माणं ब्रह्मणोऽनुजः ॥ ४
स एव भगवानीशस्तेजोराशिरनामयः ।
अनादिनिधनो धाता भूतसङ्कोचको विभुः ॥ ५
परमैश्वर्य्यसंयुक्तः परमेश्वरभावितः ।
तच्छक्त्याधिष्ठितः शश्वत्तच्चिह्नैरपि चिह्नितः ॥ ६
तन्नामनामा तद्रूपस्तत्कार्य्यकारणक्षमः ।
तत्तुल्यव्यवहारश्च तदाज्ञापरिपालकः ॥ ७
सहस्रादित्यसङ्काशश्चन्द्रावयवभूषणः ।
भुजङ्ग-हार-केयूर-वलयो मुञ्जमेखलः ॥ ८
जलन्धर-विरञ्चीन्द्र-कपालशकलोज्ज्वलः ।
गङ्गातुङ्गतरङ्गार्द्र-पिङ्गलाननमूर्द्धजः ॥ ९
भग्नदंष्ट्राङ्कुराक्रान्त-प्रान्तकान्तधराधरः ।
सव्यश्रवणपाशान्त-मण्डलीकृतकुण्डलः ॥ १०
महावृषभनिर्य्याणो महाजलदनिस्वनः ।
महानलसमप्रख्यो महाबलपराक्रमः ॥ ११
एवं घोरमहारूपो ब्रह्मपुत्रो महेश्वरः ।
विज्ञानं ब्रह्मणे दत्त्वा सर्ग सहकरोति च ॥ १२
तस्माद्रुद्रप्रसादेन प्रतिकल्पं प्रजापतेः ।
प्रवाहरूपतो नित्या प्रजासृष्टिः प्रवर्त्तते ॥ १३
कदाचित् प्रार्थितः स्रष्टुं ब्रह्मणा नीललोहितः ।
स्वात्मना सदृशान् सर्व्वान् ससर्ज्ज मनसा विभुः ॥ १४
कपर्द्दिनो निरातङ्कान् नीलग्रीवांस्त्रिलोचनान् ।
जरा-मरणनिर्म्मुक्तान् दीप्तशूलवरायुधान् ॥ १५
तैस्तु सञ्छादितं सर्व्वं चतुर्द्दशविधं जगत् ।
तान् दृष्ट्वा विविधान् रुद्रान् रुद्रमाह पितामहः ॥ १६
नमस्ते देवदेवेश मा स्राक्षीरीदृशीः प्रजाः ।
अन्याः सृज ह भद्रं ते प्रजा मृत्युसमन्विताः ॥ १७
इत्युक्तः प्रहसन् प्राह ब्रह्माणं परमेश्वरः ।
नास्ति मे तादृशः सर्गः सृज त्वमशुभाः प्रजाः ॥ १८
ये त्विमे मनसा सृष्टा महात्मानो महाबलाः ।
चरिष्यन्ति मया सार्द्धं सर्व्व एव हि याज्ञिकाः ॥ १९
इत्युक्त्वा विश्वकर्म्माणं विश्वभूतेश्वरो हरः ।
सह रुद्रैः प्रजासर्गान्निवृत्तात्मा व्यतिष्ठत ॥ २०
ततः प्रभृति देवोऽसौ न प्रसूते शुभाः प्रजाः ।
ऊर्द्ध्वरेताः स्थितः स्थाणुर्यावदाभूतसंप्लवम् ॥ २१

इति श्रीशैवे महापुराणे वायवीयसंहितायां पूर्व्वभागे रुद्रोत्पत्तिर्नाम
द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः।

वायुरुवाच।

यदा पुनः प्रजाः सृष्टा न व्यवर्द्धन्त वेधसः।
तदा मैथुनजां सृष्टिं ब्रह्मा कर्त्तुममन्यत॥ १
न निर्गतं पुरा यस्मान्नारीणां कुलमीश्वरात्।
तेन मैथुनजां सृष्टिं न शशाक पितामहः॥ २
ततः स विदधे बुद्धिमर्थनिश्चयगामिनीम्।
प्रजानामेव वृद्ध्यर्थं प्रष्टव्यः परमेश्वरः॥ ३
प्रसादेन विना तस्य न वर्द्धेरन्निमाः प्रजाः।
एवं सञ्चिन्त्य विश्वात्मा तपः कर्त्तुं प्रचक्रमे॥ ४
तदाद्या परमा शक्तिरनन्ता लोकभाविनी।
आद्या सूक्ष्मतरा शुद्धा भावगम्या मनोहरा॥ ५
निर्गुणा निष्प्रपञ्चा च निष्कला निरुपप्लवा।
निरन्तरतरा नित्या नित्यमीश्वरपार्श्वगा॥ ६
तया परमया शक्त्या भगवन्तं त्रियम्बकम्।
सञ्चिन्त्य हृदये ब्रह्मा तताप परमं तपः॥ ७
तीव्रेण तपसा तस्य युक्तस्य परमेष्ठिनः।
अचिरेणैव कालेन पिता सम्प्रतुतोष ह॥ ८
ततः केनचिदंशेन मूर्त्तिमाविश्य कामपि।
अर्द्धनारीश्वरो भूत्वा ययौ देवः स्वयं हरः॥ ९
तं दृष्ट्वा परमं देवं तमसः परमव्ययम्।
अद्वितीयमनिर्द्देश्यमदृश्यमकृतात्मभिः॥ १०
सर्व्वलोकविधातारं सर्व्वलोकेश्वरेश्वरम्।
सर्व्वलोकविधायिन्या शक्त्या परमया युतम्॥ ११
अप्रतर्क्यमनाभासममेयमजरं ध्रुवम्।
अचलं निर्गुणं शान्तमनन्तमहिमास्पदम्॥ १२
सर्व्वदं सर्व्वगं सर्व्वं सदसद्व्यक्तिवर्ज्जितम्।
सर्व्वोपमाननिर्म्मुक्तं शरण्यं शाश्वतं शिवम्॥ १३
प्रणम्य दण्डवद्ब्रह्मा समुत्थाय कृताञ्जलिः।
श्रद्धाविनयसम्पन्नैः श्राव्यैः संस्कारसंयुतैः॥ १४
यथार्थयुक्तसर्व्वार्थवेदार्थपरिबृंहितैः।
तुष्टाव देवं देवीञ्च सूक्तैः सूक्ष्मार्थगोचरैः॥ १५

ब्रह्मोवाच।

जय देव महादेव जयेश्वर महेश्वर।
जय सर्व्वगुणश्रेष्ठ जय सर्व्वसुराधिप॥ १६
जय प्रकृतिकल्याणि जय प्रकृतिनायिके।
जय प्रकृतिदूराङ्गि जय प्रकृतिसुन्दरि॥ १७
जयामोघमहामाय जयामोघमनोरथ।
जयामोघमहालील जयामोघमहाबल॥ १८
जय विश्वजगन्मातर्जय विश्वजगन्मयि।
जय विश्वजगद्धात्रि जय विश्वजगत्सखि॥ १९
जय शाश्वतिकैश्वर्य्ये जय शाश्वतिकालय।
जय शाश्वतिकाकार जय शाश्वतिकानुग॥ २०
जयात्मत्रयनिर्म्मात्रि जयात्मत्रयपालनि।
जयात्मत्रयसंहर्त्रि जयात्मत्रयनायिके॥ २१
जयावलोकनायत्त-जगत्कारणबृंहण।
जयोपेक्षाकटाक्षोत्थहुतभुग्भुक्तमौक्तिक॥ २२
जय देवाद्यविज्ञेय-स्वात्मसूक्ष्मदृशोज्ज्वले।
जय स्थूलात्मशक्त्येश-व्याप्तविश्वचराचरे॥ २३
जय नानैकविन्यस्त-विश्वतत्त्वसमुच्चय।
जयासुरशिरोनिष्ठ-श्रेष्ठानुगकदम्बक॥ २४
जयोपाश्रितसंरक्षा-संविधानपटीयसि।
जयोन्मूलितसंसारविषवृक्षाङ्कुरोद्गमे॥ २५
जय प्रादेशिकैश्वर्य्य-वीर्य्यशौर्य्यविजृम्भण।
जय विश्वबहिर्भूतनिरस्तपरवैभव॥ २६
जय प्रणीतपञ्चार्थ-प्रयोगपरमामृत।
जय पञ्चार्थविज्ञान-सुधास्तोतःस्वरूपिणि॥ २७
जयातिघोरसंसार-महारोगभिषग्वर।
जयानादिमलाऽज्ञानतमःपटलचन्द्रिके॥ २८
जय त्रिपुरकालाग्ने जय त्रिपुरभैरवि।
जय त्रिगुणनिर्म्मुक्ते जय त्रिगुणमर्द्दिनि॥ २९
जय प्रथम सर्व्वज्ञ जय सर्व्वप्रबोधिके।
जय प्रचुरदिव्याङ्ग जय प्रार्थितदायिनि॥ ३०
क्व देव ते परं धाम क्व वयं क्व च नो वचः।
तथापि भगवन् भक्त्या प्रलपन्तं क्षमस्व माम्॥ ३१
विज्ञाप्यैवंविधैः सूक्तैर्विश्वकर्म्मा चतुर्म्मुखः।
नमश्चकार रुद्राय रुद्राण्यै च मुहुर्म्मुहुः॥ ३२
इदं स्तोत्रवरं पुण्यं ब्रह्मणा समुदीरितम्।
अर्द्धनारीश्वरं नाम शिवयोर्हर्षवर्द्धनम्॥ ३३
य इदं कीर्त्तयेद्भक्त्या यस्य कस्यापि लिप्सया।
स तत् फलमवाप्नोति शिवयोः प्रीतिकारणात्॥ ३४

सकलभुवनभूतभावनाभ्यां
जननविनाशविहीनविग्रहाभ्याम् ।
नरवरयुवतिवपुर्धराभ्यां
सततमहं प्रणतोऽस्मि शङ्कराभ्याम् ॥ ३५

इति श्रीशैवे महापुराणे वायवीयसंहितायां पूर्व्वभागे रुद्र-ब्रह्मसंवादे त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ।

वायुरुवाच ।

अथ देवो महादेवो महाजलदनादया ।
वाचा मधुरगम्भीर-विशदश्लक्ष्णवर्णया ॥ १
अर्थसम्पन्नपदया राजलक्षणयुक्तया ।
अशेषविषयारम्भ-रक्षा-विलयदक्षया ॥ २
मनोहरतरोदार-मधुरस्मितपूर्व्वया ।
सस्वभाषे सुसम्प्रीतो विश्वकर्म्माणमीश्वरः ॥ ३

ईश्वर उवाच ।

वत्स वत्स महाभाग मम पुत्र पितामह ।
ज्ञातमेव मया सर्व्वं तव वाक्यस्य गौरवम् ॥ ४
प्रजानामेव वृद्ध्यर्थं तपस्तप्तं त्वयाधुना ।
तपसानेन तुष्टोऽस्मि ददामि च तवेप्सितम् ॥ ५
इत्युक्त्वा परमोदारः स्वभावमधुरं वचः ।
ससर्ज्ज वपुषो भागाद्देवीं देववरो हरः ॥ ६
यामाहुर्ब्रह्मविद्वांसो देवीं दिव्यगुणान्विताम् ।
परस्य परमां शक्तिं भवस्य परमात्मनः ॥ ७
यस्या न खलु विद्यन्ते जन्म-मृत्यु-जरादयः ।
या भवानी भवस्याङ्गात् समाविरभवत् किल ॥ ८
यस्मा वाचो निवर्त्तन्ते मनसा चेन्द्रियैः सह ।
सा भर्त्तुर्वपुषो भागाज्जातेव समदृश्यत ॥ ९
या सा जगदिदं कृत्स्नं महिम्ना व्याप्य तिष्ठति ।
शरीरिणीव सा देवी विचित्रा समलक्षिता ॥ १०
सर्व्वं जगदिदं यैषा संमोहयति मायया ।
ईश्वरात् सैव जाताभूदजाता परमार्थतः ॥ ११
न यस्याः परमो भावः सुराणामपि गोचरः ।
विश्वामरेश्वरा चैव विभक्ता भर्त्तुरङ्गतः ॥ १२

तां दृष्ट्वा परमेशानीं सर्व्वलोकमहेश्वरीम् ।
सर्व्वज्ञां सर्व्वगां सूक्ष्मां सदसद्व्यक्तिवर्जिताम् ॥ १३
परया निखिलं भासा भासयन्तीमिदं जगत् ।
प्रणिपत्य महादेवीं प्रार्थयामास वै विराट् ॥ १४

ब्रह्मोवाच ।

देवि देवेन सृष्टोऽहमादौ सर्व्वजगन्मयि ।
प्रजासर्गे नियुक्तश्च सृजामि सकलं जगत् ॥ १५
मनसा निर्म्मिताः सर्व्वे देवि देवादयो मया ।
न वृद्धिमुपगच्छन्ति सृज्यमानाः पुनः पुनः ॥ १६
मिथुनप्रभवामेव कृत्वा सृष्टिमतः परम् ।
संवर्द्धयितुमिच्छामि सर्व्वा एव मम प्रजाः ॥ १७
न निर्गतं पुरा त्वत्तो नारीणां कुलमव्ययम् ।
तेन नारीकुलं स्रष्टुं शक्तिर्मम न विद्यते ॥ १८
सर्व्वासामेव शक्तीनां त्वत्तः खलु समुद्भवः ।
तस्मात् सर्व्वत्र सर्व्वेषां सर्व्वशक्तिप्रदायिनि ॥ १९
त्वामेव वरदामद्य प्रार्थयामि सुरेश्वरीम् ।
चराचरविवृद्ध्यर्थमंशेनैकेन सर्व्वगे ॥ २०
दक्षस्य मम पुत्रस्य पुत्री भव भवार्द्दिनि ।
एवं सा याचिता देवी ब्रह्मणा ब्रह्मयोनिना ॥ २१
शक्तिमेकां भ्रुवोर्मध्यात् ससर्ज्जात्मसमप्रभाम् ।
तामाह प्रहसन् प्रेक्ष्य देवदेववरो हरः ॥ २२
ब्रह्माणं तपसाराध्य कुरु तस्य यथेप्सितम् ।
तामाज्ञां परमेशस्य शिरसा प्रतिगृह्य सा ॥ २३
ब्रह्मणो वचनाद्देवी दक्षस्य दुहिताभवत् ।
दत्त्वैवमतुलां शक्तिं ब्रह्मणे ब्रह्मरूपिणी ॥ २४
विवेश देहं देवस्य देवश्चान्तरधीयत ।
तदाप्रभृति लोकेऽस्मिन् स्त्रिया भोगः प्रतिष्ठितः॥२५
प्रजासृष्टिश्च विप्रेन्द्रा मैथुनेन प्रवर्त्तते ।
एतदः सर्व्वमाख्यातं देव्याः शक्तिसमुद्भवम् ॥ २६
पुण्यसृद्धिकरं श्राव्यं भूतसर्गानुषङ्गतः ।
य इदं कीर्त्तयेन्नित्यं देव्याः शक्तिसमुद्भवम् ।
पुण्यं सर्व्वमवाप्नोति पुत्रांश्च लभते शुभान् ॥ २७

इति श्रीशैवे महापुराणे वायवीयसंहितायां पूर्व्वभागे सृष्टिनिरूपणं नाम चतुर्द्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः।

वायुरुवाच।

एवं लब्ध्वा परां शक्तिमीश्वरादेव शाश्वतीम्।
मैथुनप्रभवां सृष्टिं कर्त्तुकामः प्रजापतिः॥ १
स्वयमर्द्धेन नारी चार्द्धेन पुरुषोऽभवत्।
यार्द्धेन नारी सा तस्माच्छतरूपा व्यजायत॥ २
विराजमसृजद्ब्रह्मा सोऽर्द्धेन पुरुषो विराट्।
स वै स्वायम्भुवः पूर्व्वं पुरुषो मनुरुच्यते॥ ३
सा देवी शतरूपा तु तपः कृत्वा सुदुश्चरम्।
भर्त्तारं दीप्तयशसं मनुमेवाभ्यपद्यत॥ ४
तस्मात् तु शतरूपा सा पुत्रद्वयमसूयत।
प्रियव्रतोत्तानपादौ पुत्रौ पुत्रवतां वरौ॥ ५
कन्ये द्वे च महाभागे याभ्यां जातास्त्विमाः प्रजाः।
आकूतिरेका विज्ञेया प्रसूतिरपरा स्मृता॥ ६
स्वायम्भुवः प्रसूतिन्तु ददौ दक्षाय तां प्रभुः।
रुचेः प्रजापतेश्चैव आकूतिं प्रत्यपादयत्॥ ७
आकूत्यां मिथुनं जज्ञे मानसस्य रुचेः शुभम्।
यज्ञश्च दक्षिणा चैव याभ्यां संवर्द्धितं जगत्॥ ८
स्वायम्भुवसुतायान्तु प्रसूत्यां लोकमातरः।
चतस्रो विंशतिं कन्या दक्षस्त्वजनयत् प्रभुः॥ ९
श्रद्धा लक्ष्मीर्धृतिः पुष्टिस्तुष्टिर्मेधा क्रिया तथा।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी॥१०
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः।
ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः॥ ११
ख्यातिः सत्यथ सम्भूतिः स्मृतिः प्रीतिः क्षमा तथा।
सन्नतिश्चानुसूया च ऊर्ज्जा स्वाहा स्वधा तथा॥१२
भृगुः शर्व्वो मरीचिश्च अङ्गिरा पुलहः क्रतुः।
पुलस्त्योऽत्रिर्वशिष्ठश्च पावकः पितरस्तथा॥ १३
ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तमाः।
कामाद्यास्तु यशोऽन्ता ये ते त्रयोदश सूनवः॥ १४
धर्म्मस्य जज्ञिरे तासु श्रद्धाद्यासु सुखोत्तराः।
दुःखोत्तराश्च हिंसायामधर्म्मस्य च सन्ततौ॥ १५
निकृत्यादय उत्पन्नाः पुत्राश्चाधर्म्मलक्षणाः।
नैषां भार्य्यास्ति पुत्रा वा सर्व्वे ह्यनियमाः स्मृताः॥१६
स एष तामसः सर्गो जज्ञेऽधर्म्मनियामकः।
या सा दक्षस्य दुहिता रुद्रस्य दयिता सती॥ १७
भर्त्तृनिन्दाप्रसङ्गेन त्यक्त्वा दाक्षायणीं तनुम्।
दक्षञ्च दक्षभार्य्याञ्च विनिन्द्य सह बन्धुभिः॥ १८
सा मेनायामाविरभूत् पुत्री हिमवतो गिरेः।
रुद्रस्तु तां सतीं दृष्ट्वा रुद्रांश्चात्मसमप्रभान्॥ १९
यथाऽसृजदसंख्यातांस्तथा कथितमेव च।
भृगोः ख्यात्यां समुत्पन्ना लक्ष्मीर्नारायणप्रिया॥२०
देवौ धातृ-विधातारौ मन्वन्तरविचारिणौ।
तयोर्वै पुत्रपौत्राद्याः शतशोऽथ सहस्रशः॥ २१
स्वायम्भुवेऽन्तरेऽतीताः सर्व्वे ते भार्गवा मताः।
मरीचेरपि सम्भूतिः पौर्णमासमसूयत॥ २२
कन्याचतुष्टयञ्चैव महीयांसस्तदन्वयाः।
येषां वंशे समुत्पन्नो बहुपुत्रः स काश्यपः॥ २३
स्मृतिश्चाङ्गिरसः पत्नी जनयामास वै सुतौ।
आग्नीध्रं शरभञ्चैव तथा कन्याचतुष्टयम्॥ २४
तदीयाः पुत्रपौत्राश्च येऽतीतास्ते सहस्रशः।
प्रीत्यां पुलस्त्यभार्य्यायां दन्तोऽग्निरभवत् सुतः॥२५
पूर्व्वजन्मनि योऽगस्त्यः स्मृतः स्वायम्भुवेऽन्तरे।
तत्सन्ततीया बहवः पौलस्त्या इति विश्रुताः॥ २६
क्षमा तु सुषुवे पुत्रान् पुलहस्य प्रजापतेः।
कर्द्दमश्चासुरीयश्च सहिष्णुश्चेति ते त्रयः॥ २७
त्रेताग्निवर्च्चसः सर्व्वे एषां वंशः प्रतिष्ठितः।
क्रतोः क्रतुसमान् पुत्रान् सन्नतिः सुषुवे सुतान्॥ २८
नैषां भार्य्याश्च पुत्राश्च सर्व्वे ते ह्यूर्द्ध्वरेतसः।
षष्टिस्तानि सहस्राणि बालखिल्या इति स्मृताः॥२९
अनूरुणाग्रतो यान्ति परिवार्य्य दिवाकरम्।
अत्रेर्भार्य्यानुसूया च पञ्चात्रेयानसूयत॥ ३०
कन्यकाञ्च श्रुतिं नाम माता शङ्खपदस्य या।
सत्यनेत्रश्च हव्यश्च आपोमूर्त्तिः शनैश्चरः॥ ३१
सोमश्च पञ्चमस्त्वेते पञ्चात्रेयाः प्रकीर्त्तिताः।
तेषां पुत्राश्च पौत्राश्च आत्रेयाणां महात्मनाम्॥ ३२
स्वायम्भुवेऽन्तरेऽतीताः शतशोऽथ सहस्रशः।
ऊर्ज्जायान्तु वशिष्ठस्य पुत्रा वै सप्त जज्ञिरे॥ ३३
ज्यायसी च स्वसा तेषां पुण्डरीका सुमध्यमा।
रजो गात्रोर्द्ध्वबाहु च सवनश्चानघश्च यः॥ ३४
सुतपाः शुक्र इत्येते सप्त सप्तर्षयः स्मृताः।

गोत्राणि नामभिस्तेषां वाशिष्ठानां महात्मनाम् ॥३५
स्वायम्भुवेऽन्तरेऽतीते न्यर्व्वुदानि शतानि च।
इत्येष ऋषिसर्गस्तु सानुबन्धः प्रकीर्त्तितः ॥ ३६
समासाद्विस्तराद्वक्तुमशक्योऽयमिति द्विजाः।
योऽसौ रुद्रात्मको वह्निर्ब्रह्मणो मानसः स्मृतः ॥३७
स्वाहा तस्य प्रिया लेभे पुत्रांस्त्रीनमितौजसः।
पावकः पवमानश्च शुचिरित्येव ते त्रयः ॥ ३८
निर्म्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः।
सूर्य्ये तपति यश्चासौ शुचिः सौर उदाहृतः ॥ ३९
हव्यवाहः कव्यवाहः सहरक्षा इति त्रयः।
त्रयाणां क्रमशः पुत्रा देवपित्र्यासुराश्च ते ॥ ४०
एतेषां पुत्रपौत्राश्च चत्वारिंशन्नवैव ते।
काम्यनैमित्तिकाजस्रकर्म्मसु त्रिषु संस्थिताः ॥ ४१
सर्व्वे तपस्विनो ज्ञेयाः सर्व्वे व्रतभृतस्तथा।
सर्व्वे रुद्रात्मकाश्चैव सर्व्वे रुद्रपरायणाः ॥ ४२
तस्मादग्निमुखे यत्तद्धुतं स्याद्येन केनचित्।
तत् सर्व्वं रुद्रमुद्दिश्य दत्तं स्यान्नात्र संशयः ॥ ४३
इत्येवं निश्चयोऽग्नीनामनुक्रान्तो यथातथम्।
नातिविस्तरतो विप्राः पितॄन् वक्ष्याम्यतः परम् ॥४४
ब्रह्मणः पितृवर्षत्वात् सृजतो जज्ञिरे तदा।
मध्वादयः षड्ऋतवः स्वान् पितॄन् परिचक्षते ॥ ४५
यस्मात् षड्ऋतवस्तेषां स्थानं स्थानाभिमानिनाम्।
ऋतवः पितरस्तस्मादित्येषा वैदिकी श्रुतिः ॥ ४६
यस्मादृतुषु सर्व्वे हि जायन्ते स्थाणु-जङ्गमाः।
तस्मादेतेऽपि पितर आर्त्तवा इति च श्रुतम् ॥ ४७
एवं पितृगणास्तेते ह्यृतुकालाभिमानिनाम्।
ऋतुत्वमार्त्तवत्वञ्च पितृत्वञ्च प्रकीर्त्तितम् ॥ ४८
मन्वन्तरेषु सर्व्वेषु पितरस्तेऽभिमानिनः।
आत्मैश्वर्य्या महात्मानस्तिष्ठन्तीहाभ्रसङ्गमात् ॥ ४९
अग्निष्वात्ता वर्हिषदः पितरो द्विविधाः स्मृताः।
अयज्वानश्च यज्वानः क्रमात् ते गृहमेधिनः ॥ ५०
स्वधासूत पितृभ्यश्च द्वे कन्ये लोकविश्रुते।
मेनाञ्च धरणीञ्चैव याभ्यां विश्वमिदं धृतम् ॥ ५१
अग्निष्वात्तसुता मेना धरणी वर्हिषत्सुता।
मेना हिमवतः पत्नी मैनाकं क्रौञ्चमेव च ॥ ५२
गौरीं गङ्गाञ्च सुषुवे भवाङ्गाश्लेषपावनीम्।
मेरोस्तु धरणी पत्नी दिव्यौषधिसमन्वितम् ॥ ५३
मन्दरं सुषुवे पुत्रं चित्रसुन्दरकन्दरम्।
स एव मन्दरः श्रीमान् मेरुपुत्रस्तपोबलात् ॥ ५४
साक्षाच्छ्रीकण्ठनाथस्य शिवस्यावासतां गतः।
सासूत धरणी भूयस्तिस्रः कन्याश्च विश्रुताः ॥ ५५
वेलाञ्च नियतिञ्चैव तृतीयामपि चायतिम्।
आयतिर्नियतिश्चैव पत्न्यौ द्वे भृगुपुत्रयोः ॥ ५६
स्वायम्भुवेऽन्तरे पूर्व्वं कथितस्तु तदन्वयः।
सुषुवे सागराद्वेला कन्यामेकामनिन्दिताम् ॥ ५७
सवर्णां नाम सामुद्रीं पत्नीं प्राचीनवर्हिषः।
सामुद्री सुषुवे पुत्रान् दश प्राचीनवर्हिषः ॥ ५८
सर्व्वे प्राचेतसा नाम धनुर्व्वेदस्य पारगाः।
एषां स्वायम्भुवे दक्षः पुत्रत्वमगमत् पुरा ॥ ५९
त्रियम्बकस्य शापेन चाक्षुषस्यान्तरे मनोः।
इत्येते ब्रह्मपुत्राणां धर्म्मादीनां महात्मनाम् ॥ ६०
नातिसंक्षेपतो विप्रा नातिविस्तरतः क्रमात्।
वर्णिता वै मया वंशा दिव्यदेवगणान्विताः ॥ ६१
क्रियावन्तः प्रजावन्तो महर्द्धिभिरलङ्कृताः।
प्रजानां सन्निवेशोऽयं प्रजापतिसमुद्भवः ॥ ६२
न हि शक्यः प्रसंख्यातुं वर्षकोटिशतैरपि।
राज्ञामपि च यो वंशो द्विधा सोऽपि प्रवर्त्तते ॥ ६३
सूर्य्यवंशः सोमवंश इति पुण्यतमः क्षितौ।
इक्ष्वाकुरम्बरीषश्च ययातिर्नहुषादयः ॥ ६४
पुण्यश्लोकाः श्रुता येऽत्र तेऽपि तद्वंशसम्भवाः।
अन्ये च राजऋषयो नानावीर्य्यपराक्रमाः ॥ ६५
किं तैः फलमनुक्रान्तैरुक्तपूर्व्वैः पुरातनैः।
किञ्चेश्वरकथा वृत्ता यत्र तत्रान्यकीर्त्तनम् ॥ ६६
न सद्भिः सम्मतं मत्वा नोत्सहे बहु भाषितुम्।
प्रसङ्गादीश्वरस्यैव प्रभावद्योतनादपि।
सर्गादयोऽपि कथ्यन्त इत्यलं तत्रविस्तरैः ॥ ६७

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे स्वायम्भुववंशवर्णनं नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

षोड़शोऽध्यायः।

ऋषय ऊचुः।

देवी दक्षस्य तनया त्यक्त्वा दाक्षायणीं तनुम्।
कथं हिमवतः पुत्त्री मेनायामभवत् पुरा॥ १
कथञ्च निन्दितो रुद्रो दक्षेण च महात्मना।
निमित्तमपि किं तत्र येन स्यान्निन्दितो भवः॥ २
उत्पन्नश्च कथं दक्षो अपि शापाद्भवस्य तु।
चाक्षुषस्यान्तरे पूर्व्वं मनोः प्रब्रूहि मारुत॥ ३

वायुरुवाच।

शृखन्तु कथयिष्यामि दक्षस्य लघुचेतसः।
वृत्तं पापात् प्रमादाच्च विश्वामरविदूषणम्॥ ४
पुरा सुरासुराः सर्व्वे सिद्धाश्च परमर्षयः।
कदाचिद्रष्टुमीशानं हिमवच्छिखरं ययुः॥ ५
तदा देवश्च देवी च दिव्यासनगतावुभौ।
दर्शनं ददतुस्तेषां देवादीनां द्विजोत्तमाः॥ ६
तदानीमेव दक्षोऽपि गतस्तत्र सहामरैः।
जामातरं हरं द्रष्टुं द्रष्टुञ्चात्मसुतां सतीम्॥ ७
तदात्मगौरवाद्देव देव्या दक्षे समागते।
देवादिभ्यो विशेषेण न काचिदभवत् स्मृतिः॥ ८
तस्य तस्याः परं भावमज्ञातुश्चापि केवलम्।
पुत्त्रीत्येवं विमूढस्य तस्यां वैरमजायत॥ ९
ततस्तेनैव वैरेण विधिना च प्रचोदितः।
नाभ्युहाव भवं दक्षो दीक्षितस्तामपि द्विषन्॥ १०
अन्यान् जामातरः सर्व्वानाहूय स यथाक्रमम्।
शतशः पुष्कलामर्च्चां चकार च पृथक् पृथक्॥ ११
तथा तान् सङ्गतान् श्रुत्वा नारदस्य मुखात् तदा।
ययौ रुद्राय रुद्राणी विज्ञाप्य भवनं पितुः॥ १२
अथ सन्निहितं दिव्यं विमानं विश्वतोमुखम्।
लक्षणाढ्यं सुखारोहमतिमात्रमनोहरम्॥ १३
तप्तजाम्बूनदप्रख्यं चित्ररत्नपरिष्कृतम्।
मुक्तामयवितानाग्रं स्रग्दामसमलङ्कृतम्॥ १४
तप्तकाञ्चननिर्व्यूहं रत्नस्तम्भशतावृतम्।
वज्रकल्पितसोपानं विद्रुमस्तम्भतोरणम्॥ १५
पुष्पपट्टपरिस्तीर्णं चित्ररत्नमहासनम्।
वज्रजालकिरच्छिद्रमच्छिद्रमणिकुट्टिमम्॥ १६
मणिदण्डमनोज्ञेन महावृषभलक्ष्मणा।
अलङ्कृतपुरोभागमभ्रशुभ्रेण केतुना॥ १७
रत्नकञ्चुकगुप्ताङ्गैश्चित्रवेत्रैकपाणिभिः।
अधिष्ठितमहाद्वारमप्रधृष्यैर्गणेश्वरैः॥ १८
मृदङ्गतालगीतादि-वेणुवीणाविशारदैः।
विदग्धवेशभाषैश्च बहुभिः स्त्रीजनैर्वृतम्॥ १९
आरुरोह महादेवी सह प्रियसखीजनैः।
चामरव्यजने तस्या वज्रदण्डे मनोहरे॥ २०
गृहीत्वा रुद्रकन्ये द्वे विवीजतुरुभे शुभे।
तदा चामरयोर्मध्ये देव्या वदनमाबभौ॥ २१
अन्योन्यं युध्यतोर्मध्ये हंसयोरिव पङ्कजम्।
छत्रं शशिनिभं तस्याश्चूडोपरि सुमालिनी॥ २२
धृतमुक्ता परिक्षिप्तं बभार प्रेमनिर्भरा।
तच्छत्रमुज्ज्वलं देव्या रुरुचे वदनोपरि॥ २३
उपर्य्यमृतभाण्डस्य मण्डलं शशिनो यथा।
अथ चाग्रे समासीना सुस्मितास्याः शुभावती॥ २४
अक्षद्यूतविनोदेन रमयामास पार्व्वतीम्।
सुयशाः पादुके देव्याः शुभे रत्नपरिष्कृते॥ २५
स्तनयोरन्तरे कृत्वा तदा देवीमसेवत।
अन्या काञ्चनचार्व्वङ्गी दीप्तं जग्राह दर्पणम्॥ २६
अपरा तालवृन्तञ्च परा ताम्बूलपेटिकाम्।
काचित् क्रीड़ाशुकं चारु करे चकार भामिनी॥ २७
काचित् तु सुमनोज्ञानि पुष्पाणि सुरभीणि च।
काचिदाभरणाधारं बभार कमलेक्षणा॥ २८
काचिच्च पुनरालेपं सप्रसूनं सभाजनम्।
अन्याश्च सदृशास्तास्ता यथास्वमुचितक्रियाः॥ २९
आवृत्यान्तर्महादेवीमसेवन्त समन्ततः।
अतीव शुशुभे तासामन्तरे परमेश्वरी॥ ३०
तारापरिषदो मध्ये चन्द्रलेखेव शारदी।
ततः शङ्खसमुत्थस्य नादस्य समनन्तरम्॥ ३१
प्रास्थानिको महानादः पटहः समताड्यत।
ततो मधुरवाद्यानि सह तालोद्यतैः स्वनैः॥ ३२
अनाहतानि सन्नेदुः काहलानां शतानि च।
सायुधानां गणेशानां महेशसमतेजसाम्॥ ३३
सहस्राणि शतान्यष्टौ तदानीं पुरतो ययुः।
तेषां मध्ये वृषारूढो गजारूढो यथा गुरुः॥ ३४

जगाम गणपः श्रीमान् सोमनन्दी सुरार्च्चितः।
देवदुन्दुभयो नेदुर्दिवि दिव्यसुखस्वनाः ॥ ३५
ननृतुर्मुनयः सर्व्वे मुमुदुः सिद्धयोगिनः।
ससृजुः पुष्पवृष्टिञ्च विमानोपरि वारिदाः ॥ ३६
तदा देवगणैश्चान्यैः पथि सर्व्वत्र सङ्गता।
क्षणादिव पितुर्गेहं प्रविवेश महेश्वरी ॥ ३७
तां दृष्ट्वा कुपितो दक्षश्चात्मनः क्षयकारणात्।
तस्या यवीयसीभ्योऽपि चक्रे पूजामसत्कृताम् ॥ ३८
तदा शशिमुखी देवी पितरं सदसि स्थितम्।
अम्बिका युक्तमव्यग्रमुवाच कृपणं वचः ॥ ३९

देव्युवाच।

ब्रह्मादयः पिशाचान्ता यस्याज्ञावशवर्त्तिनः।
स देवः साम्प्रतं तात विधिना नार्च्चितः किल ॥ ४०
तदास्तां मम ज्यायस्याः पुत्र्याः पूजां किमीदृशीम्।
असत्कृतामवज्ञाय कृतवानसि गर्हिताम् ॥ ४१
एवमुक्तोऽब्रवीदेनां दक्षः क्रोधादमर्षितः।
त्वत्तः श्रेष्ठा वरिष्ठाश्च पूज्या बालाः सुता मम ॥ ४२
तासान्तु ये च भर्त्तारस्ते मे बहुमता सदा।
गुणैश्चाप्यधिकाः सर्व्वे भर्त्तुस्ते त्र्यम्बकादपि ॥ ४३
स्तब्धात्मा तामसः सर्व्वस्त्वमिमं समुपाश्रिता।
तेन त्वामवमन्येऽहं प्रतिकूलो हि मे भवः ॥ ४४
तथोक्ता पितरं दक्षं क्रुद्धा देवीदमब्रवीत्।
शृण्वतामेव सर्व्वेषां ये यज्ञसदसि स्थिताः ॥ ४५
अकस्मान्मम भर्त्तारमजाताशेषदूषणम्।
वाचा दूषयसे दक्ष साक्षाल्लोकमहेश्वरम् ॥ ४६
विद्याचौरो गुरुद्रोही वेदेश्वरविदूषकः।
त एते बहुपाप्मानः सद्यो दण्ड्या इति श्रुतिः ॥ ४७
तस्मादत्युत्कटस्यास्य पापस्य सदृशो भृशम्।
सहसा दारुणो दण्डस्तव दैवाद्भविष्यति ॥ ४८
त्वया न पूजितो यस्माद्देवदेवस्त्रियम्बकः।
तस्मात् तव कुलं दुष्टं नष्टमित्यवधारय ॥ ४९
इत्युक्त्वा पितरं रुष्टा सती सन्त्यज्य साध्वया।
तदीयाञ्च तनुं त्यक्त्वा हिमवन्तं ययौ गिरिम् ॥ ५०
स पर्व्वतवरः श्रीमान् लब्धपुण्यफलोदयः।
तदर्थमेव कृतवान् सुचिरं दुश्चरं तपः ॥ ५१
तस्मात् तमनुगृह्णाति भूधरेश्वरमीश्वरी।
स्वेच्छया पितरं चक्रे स्वात्मनो योगमायया ॥ ५२
यदा गता सती दक्षं विनिन्द्य भयविह्वला।
तदा तिरोहिता मन्त्रा विहतश्च ततोऽध्वरः ॥ ५३
तदुपश्रुत्य गमनं देव्यास्त्रिपुरमर्द्दनः।
दक्षाय च ऋषिभ्यश्च चुकोप च शशाप तान् ॥ ५४
यस्मादवमता दक्ष मत्कृतेऽनागसा सती।
पूजिताश्चेतराः सर्व्वाः स्वसुता भर्त्तृभिः सह ॥ ५५
वैवस्वतेऽन्तरे यस्मात् तव जामातरस्त्वमी।
उत्पत्स्यन्ते समं सर्व्वे ब्राह्मयज्ञेष्वयोनिजाः ॥ ५६
भविता मानुषो राजा चाक्षुषस्य त्वमन्वये।
प्राचीनवर्हिषः पौत्रः पुत्रश्चापि प्रचेतसः ॥ ५७
अहं तत्रापि ते विघ्नमाचरिष्यामि दुर्म्मते।
धर्म्मार्थकामयुक्तेषु कर्म्मस्वपि पुनः पुनः ॥ ५८
तेनैवं व्याहृतो दक्षो रुद्रेणामिततेजसा।
स्वायम्भुवीं तनुं त्यक्त्वा पपात भुवि दुःखितः ॥ ५९
ततः प्राचेतसो दक्षो जज्ञे वै चाक्षुषेऽन्तरे।
प्राचीनवर्हिषः पौत्रः पुत्रश्चैव प्रचेतसः ॥ ६०
भृग्वादयोऽपि ते जाता वै मनोर्वैवस्वतस्य तु।
अन्तरे ब्रह्मणो यज्ञे वारुणीं बिभ्रतस्तनुम् ॥ ६१
तदा दक्षस्य धर्म्मार्थं प्रवृत्तस्य दुरात्मनः।
महेशः कृतवान् विघ्नं मनौ वैवस्वते सति ॥ ६२

इति श्रीशैवे महापुराणे वायवीयसंहितायां पूर्व्वभागे षोड़शोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः।

ऋषय ऊचुः।

कथं दक्षस्य धर्म्मार्थं प्रवृत्तस्य दुरात्मनः।
महेशः कृतवान् विघ्नमेतदिच्छामहे वयम् ॥ १

वायुरुवाच।

विश्वस्य जगतो मातुरपि देव्यास्तपोबलात्।
पितृभावमुपागम्य मुदिते हिमवद्गुरौ ॥ २
देवेऽपि च कृतोद्वाहे हिमवच्छिखरालये।
क्रीड़माने तया सार्द्धं काले बहुतरे गते ॥ ३
वैवस्वतेऽन्तरे प्राप्ते दक्षः प्राचेतसः स्वयम्।
अश्वमेधेन यज्ञेन यक्ष्यमाणोऽन्वपद्यत ॥ ४

ततो हिमवतः पृष्ठे दक्षो वै यज्ञमाहरत्।
गङ्गाद्वारे शुभे देशे ऋषिसिद्धनिषेविते ॥ ५
तस्य तस्मिन् मखे देवाः सर्व्वे शक्रपुरोगमाः।
गमनाय समागम्य बुद्धिमापेदिरे तदा ॥ ६
आदित्या वसवो रुद्राः साध्याः सह मरुद्गणैः।
सोमपाश्चैव पितर आज्यपा धूमपास्तथा ॥ ७
अश्विनौ पितरश्चैव तथा चान्ये महर्षयः।
विष्णुना सहिताः सर्व्वे स्वागता यज्ञभागिनः ॥ ८
दृष्ट्वा देवकुलं सर्व्वमीश्वरेण विनागतम्।
दधीचिर्मन्युनाविष्टो दक्षमेवमभाषत ॥ ९

दधीचिरुवाच।

अपूज्यपूजने चैव पूज्यानाञ्चाप्यपूजने।
नरः पापमवाप्नोति महद्वै नात्र संशयः ॥ १०
असतां सम्मतिर्यत्र सतामवमतिस्तथा।
दण्डो देवकृतस्तत्र सद्यः पतति दारुणः ॥ ११
एवमुक्त्वा तु विप्रर्षिः पुनर्दक्षमभाषत।
पूज्यन्तु पशुभर्त्तारं कस्मान्नार्च्चयसे प्रभुम् ॥ १२

दक्ष उवाच।

सन्ति मे बहवो रुद्राः शूलहस्ताः कपर्द्दिनः।
एकादशावस्थिता ये नान्यं वेद्मि महेश्वरम् ॥ १३

दधीचिरुवाच।

किमेभिरमरैरन्यैः पूजितैरध्वरे फलम्।
राजा चेदध्वरस्यास्य न रुद्रः पूज्यते त्वया ॥ १४
ब्रह्म-विष्णु-महेशानां स्रष्टा यः प्रभुरव्ययः।
ब्रह्मादयः पिशाचान्ता यस्य कैङ्कर्य्यवादिनः ॥ १५
प्रकृतीनां परश्चैव पुरुषस्य च यः परः।
चिन्त्यते योगविद्भिर्ऋषिभिस्तत्त्वदर्शिभिः ॥ १६
अक्षरं परमं ब्रह्म असच्च सदसच्च यत्।
अनादि-मध्य-निधनमप्रतर्क्यं सनातनम् ॥ १७
यः स्रष्टा चैव संहर्त्ता भर्त्ता चैव महेश्वरः।
तस्मादन्यं न पश्यामि शङ्करात्मानमध्वरे ॥ १८

दक्ष उवाच।

एतन्मखेशस्य सुवर्णपात्रे
हविः समस्तं विधिमन्त्रपूतम्।
विष्णोर्नयाम्यप्रतिमस्य भागं
प्रभोर्विभज्याहवनीयमद्य ॥ १९

दधीचिरुवाच।

यस्मान्नाराधितो रुद्रः सर्व्वदेवेश्वरेश्वरः।
तस्माद्दक्ष तवाशेषो यज्ञोऽयं न भविष्यति ॥ २०
इत्युक्त्वा वचनं क्रुद्धो दधीचो मुनिसत्तमः।
निर्गम्य च ततो देशाज्जगाम स्वकमाश्रमम् ॥ २१
निर्गतेऽपि मुनौ तस्मिन् देवा दक्षं न तत्यजुः।
अवश्यमनुभाव्यत्वादनर्थस्य तु भाविनः ॥ २२
एतस्मिन्नेव काले तु ज्ञात्वैतत् सर्व्वमीश्वरात्।
दग्धुं दक्षाध्वरं विप्रा देवी देवमचोदयत् ॥ २३
देव्या सञ्चोदितो देवो दक्षाध्वरजिघांसया।
ससर्ज्ज स हरो वीरं वीरभद्रं गणेश्वरम् ॥ २४
सहस्रवदनं देवं सहस्रकमलेक्षणम्।
सहस्रमुद्गरधरं सहस्रशरपाणिकम् ॥ २५
शूल-टङ्क-गदाहस्तं दीप्तकार्म्मुकधारिणम्।
चक्र-वज्रधरं घोरं चन्द्रार्द्धकृतशेखरम् ॥ २६
कुलिशोद्योतितकरं तडिज्ज्वलितमूर्द्धजम्।
दंष्ट्रां करालां बिभ्राणं महावक्त्रं महोदरम् ॥ २७
विद्युज्जिह्वं प्रलम्बोष्ठं मेघसागरनिस्वनम्।
वसानं चर्म्म वैयाघ्रं महद्रुधिरनिस्रवम् ॥ २८
गण्डद्वितयसंसृष्ट-मण्डलीकृतकुण्डलम्।
वरामरशिरोमालावलीकलितशेखरम् ॥ २९
रणन्नूपुरकेयूर-महाकनकभूषितम्।
रत्नसञ्चयसन्दीप्तं तारहारावृतोरसम् ॥ ३०
महाशरभ-शार्दूल-सिंहैः सदृशविक्रमम्।
प्रशस्तमत्तमातङ्ग-समानगमनालसम् ॥ ३१
शङ्ख-चामर-कुन्देन्दु-मृणालसदृशप्रभम्।
सतुषारमिवाद्रीन्द्रं साक्षाज्जङ्गमतां गतम् ॥ ३२
ज्वालामालापरिक्षिप्तं दीप्तमौक्तिकभूषणम्।
तेजसा चैव दीप्यन्तं युगान्त इव पावकम् ॥ ३३
स जानुभ्यां महीं गत्वा प्रणतः प्राञ्जलिस्ततः।
पार्श्वतो देवदेवस्य पर्य्यतिष्ठद्गणेश्वरः ॥ ३४
मन्युना चासृजद्भद्रां भद्रकालीं महेश्वरीम्।
आत्मनः कर्म्मसाक्षित्वे तेन गन्तुं सहैव तु ॥ ३५
तं दृष्ट्वावस्थितं वीरभद्रं कालाग्निसन्निभम्।
भद्रया सहितं प्राह भद्रमस्त्विति शङ्करः ॥ ३६
स च विज्ञापयामास सह देव्या महेश्वरम्।

आज्ञापय महादेव किं कार्य्यं करवाण्यहम् ॥ ३७
ततस्त्रिपुरहा प्राह हैमवत्या प्रियैषया ।
वीरभद्रं महाबाहुं वाचा विपुलनादया ॥ ३८

देवदेव उवाच ।

प्राचेतसस्य दक्षस्य यज्ञं सद्यो विनाशय ।
भद्रकाल्या सहासि त्वमेतत् कृत्यं गणेश्वर ॥ ३९
अहमप्यनया सार्द्धं रम्याश्रमसमीपतः ।
स्थित्वा वीक्षे गणेशान विक्रमं तव दुःसहम् ॥ ४०
वृक्षाः कनखले ये तु गङ्गाद्वारसमीपगाः ।
सुवर्णशृङ्गस्य गिरेर्मेरुमन्दरसन्निभाः ॥ ४१
तस्मिन् प्रदेशे दक्षस्य यज्ञः सम्प्रतिवर्त्तते ।
सहसा तस्य यज्ञस्य विघातं कुरु मा चिरम् ॥ ४२
इत्युक्ते सति देवेन देवी हिमगिरीन्द्रजा ।
भद्रं भद्राञ्च सम्प्रेक्ष्य वत्सं धेनुरिवौरसम् ॥ ४३
आलिङ्ग्य च समाघ्राय मूर्ध्नि षड्वदनं यथा ।
सस्मिता वचनं प्राह मधुरं मधुरस्वनम् ॥ ४४

देव्युवाच ।

वत्स भद्र महाभाग महाबलपराक्रम ।
मत्प्रियार्थं त्वमुत्पन्नो मम मन्युं प्रमार्ज्जय ॥ ४५
यज्ञेश्वरमनाहूय यज्ञकर्म्मरतोऽभवत् ।
दक्षो वैरेण तं तस्माद्भिन्धि यज्ञं गणेश्वरैः ॥ ४६
यज्ञलक्ष्मीन्त्वलक्ष्मीं त्वं भद्र कृत्वा ममाज्ञया ।
यजमानञ्च तं हत्वा वत्स हिंसय भद्रया ॥ ४७
अशेषामिव तामाज्ञां शिवयोश्शिवकृत्ययोः ।
मूर्ध्नि कृत्वा नमस्कृत्य भद्रो गन्तुं प्रचक्रमे ॥ ४८
अथैष भगवान् क्रुद्धः प्रेतावासकृतालयः ।
वीरभद्रो महादेवो देव्या मन्युप्रमार्ज्जकः ॥ ४९
ससर्ज रोमकूपेभ्यो रोमजाख्यान् गणेश्वरान् ।
दक्षिणाद्भुजदेशात् तु शतकोटिगणेश्वरान् ॥ ५०
सदारान् सर्व्वतोभद्रान् साक्षाद्वामाच्च वै भुजात् ।
रुद्रानुभावान् रौद्रांश्च रुद्रवीर्य्यपराक्रमान् ॥ ५१
पादात् तथोरुदेशाच्च पृष्ठात् पार्श्वान्मुखाद्गलात् ।
गुह्याद्गुल्फाच्छिरोमध्यात् कण्ठादास्यात्तथोदरात् ५२
तथा गणेश्वरैर्भद्रैर्भद्रतुल्यपराक्रमैः ।
सञ्छादितमभूत् सर्व्वं साकाशविवरं जगत् ॥ ५३
सर्व्वे सहस्रहस्तास्ते सहस्रायुधपाणयः ।
रुद्रस्यानुचराः सर्व्वे सर्व्वे रुद्रसमप्रभाः ॥ ५४
शूल-शक्ति-गदाहस्ताष्टङ्कोपलशिलाधराः ।
कालाग्निरुद्रसदृशास्त्रिनेत्राश्च जटाधराः ॥ ५५
निपेतुर्भृशमाकाशे शतशः सिंहवाहनाः ।
विनेदुश्च महानादं जलदा इव भद्रजाः ॥ ५६
तैर्भद्रो भगवान् भद्रस्तथा परिवृतो बभौ ।
कालानलशतैर्युक्तो यथान्ते कालभैरवः ॥ ५७
तेषां मध्ये समारुह्य वृषेन्द्रं वृषभध्वजः ।
जगाम भगवान् भद्रः शुभ्रमभ्रं यथा भवः ॥ ५८
तमेवं वृषमारूढ़े भद्रे तु भसितप्रभः ।
बभार मौक्तिकच्छत्रं गृहीतसितचामरः ॥ ५९
स तदा शुशुभे पार्श्वे भद्रस्य भसितप्रभः ।
भगवानिव शैलेन्द्रः पार्श्वे विश्वजगद्गुरोः ॥ ६०
सोऽपि तेन बभौ भद्रः श्वेतचामरपाणिना ।
सोमवर्णेन सौम्येन यथा शूलवरायुधः ॥ ६१
दध्मौ शङ्खं सितं भद्रं भद्रस्य पुरतः शुभम् ।
भानुकम्पो महातेजा हैमरत्नैरलङ्कृतम् ॥ ६२
देवदुन्दुभयो नेदुर्दिवि सङ्कुलनिस्वनाः ।
ववृषुः शतशो मूर्ध्नि पुष्पवर्षं बलाहकाः ॥ ६३
फुल्लानां मधुगर्भाणां पुष्पाणां गन्धबन्धवः ।
मार्गानुकूलसंवाहा ववुश्च पथि मारुताः ॥ ६४
ततो गणेश्वराः सर्व्वे मत्ता युद्धबलोद्धताः ।
ननृतुर्मुमुदुर्नेदुर्जहसुर्जगदुर्जगुः ॥ ६५
तदा भद्रगणान्तःस्थो बभौ भद्रः स भद्रया ।
यथा रुद्रगणान्तःस्थस्त्र्यम्बकोऽम्बिकया सह ॥ ६६
तत्क्षणादेव दक्षस्य यज्ञवाटं हिरण्मयम् ।
प्रविवेश महाबाहुर्वीरभद्रोऽद्रिजानुगः ॥ ६७

ततस्तु दक्षप्रतिपादितस्य
क्रतुप्रधानस्य गणप्रधानः ।
प्रयोगभूमिं प्रविवेश भद्रो
रुद्रो यथान्ते भुवनं दिधक्षुः ॥ ६८

इति श्रीशैवे महापुराणे वायवीयसंहितायां पूर्व्वभागे दक्षयज्ञमथनं नाम सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ।

वायुरुवाच ।

ततो विष्णुप्रधानानां सुराणाममितौजसाम् ।
ददर्श च महत् सत्रं चित्रध्वजपरिच्छदम् ॥ १
सुदर्भकृतसंस्तीर्णं सुसमिद्धहुताशनम् ।
काञ्चनैर्यज्ञभाण्डैश्च भ्राजिष्णुभिरलङ्कृतम् ॥ २
ऋषिभिर्यज्ञपटुभिर्यथावत् कर्म्मकर्तृभिः ।
विधिना वेददृष्टेन स्वनुष्ठितबहुक्रमम् ॥ ३
देवाङ्गनासहस्राढ्यमप्सरोगणसेवितम् ।
वेणु-वीणारवैर्जुष्टं वेदघोषैश्च बृंहितम् ॥ ४
दृष्ट्वा दक्षाध्वरं वीरो वीरभद्रः प्रतापवान् ।
सिंहनादं तदा चक्रे गम्भीरो निनदो यथा ॥ ५
ततः किलकिलाशब्द आकाशं पूरयन्निव ।
गणेश्वरैः कृतो यज्ञे महान् न्यक्कृतसागरः ॥ ६
तेन शब्देन महता त्रस्ताः सर्व्वे दिवौकसः ।
दुद्रुवुः परितो भीताः स्रस्तवस्त्रविभूषणाः ॥ ७
किंस्विद्भिन्नो महामेरुः किंस्वित् सन्दीर्य्यते मही ।
किमिदं किमिदञ्चेति जजल्पुस्त्रिदशा भृशम् ॥ ८
मृगेन्द्राणां यथा नादं गजेन्द्रा गहने वने ।
श्रुत्वा तथाविधं केचित् तत्यजुर्जीवितं भयात् ॥ ९
पर्व्वताश्च व्यशीर्य्यन्त चकम्पे च वसुन्धरा ।
मरुतश्च व्यघूर्णन्त चुक्षुभे मकरालयः ॥ १०
अग्नयो नैव दीप्यन्ते न च दीप्यति भास्करः ।
ग्रहाश्च न प्रकाशन्ते नक्षत्राणि च तारकाः ॥ ११
एतस्मिन्नेव काले तु यज्ञवाटं तदुज्ज्वलम् ।
सम्प्राप भगवान् भद्रो भद्रैश्च सह भद्रया ॥ १२
तं दृष्ट्वा भीतभीतोऽपि दक्षो दृढ इव स्थितः ।
क्रुद्धवद्वचनं प्राह को भवान् किमिहेच्छसि ॥ १३
तस्य तद्वचनं श्रुत्वा दक्षस्य च दुरात्मनः ।
वीरभद्रो महातेजा मेघगम्भीरनिस्वनः ॥ १४
स्मयन्निव तमालोक्य दक्षं देवांश्च ऋत्विजः ।
अर्थगर्भमसम्भ्रान्तमवोचदुचितं वचः ॥ १५

वीरभद्र उवाच ।

वयं ह्यनुचराः सर्व्वे शर्व्वस्यामिततेजसः ।
भागाभिलिप्सया प्राप्ता भागो नः सम्प्रदीयताम् ॥ १६
अथ चेद्दक्षरेऽस्माकं न भागः परिकल्पितः ।
कथ्यतां कारणं तत्र युध्यतां वा मयामरैः ॥ १७
इत्युक्तास्ते गणेन्द्रेण देवा दक्षपुरोगमाः ।
ऊचुर्मन्त्राः प्रमाणं नो न वयं प्रभवस्त्विति ॥ १८
मन्त्रा ऊचुः सुरा यूयं तमोऽपहतचेतसः ।
येन प्रथमभागार्हं न यजध्वं महेश्वरम् ॥ १९
तथोक्ता अपि तैर्मन्त्रैर्देवाः संमूढचेतसः ।
भद्राय न ददुर्भागं तत्प्रहारमभीप्सवः ॥ २०
यदा तथ्यञ्च पथ्यञ्च स्ववाक्यं तद्वृथाभवत् ।
तदा ततो ययुर्मन्त्रा ब्रह्मलोकं सनातनम् ॥ २१
अथोवाच गणाध्यक्षो देवान् विष्णुपुरोगमान् ।
मन्त्राः प्रमाणं न कृता युष्माभिर्बलगर्व्वितैः ॥ २२
यस्मादस्मिन् मखे देवैरित्थं वयमसत्कृताः ।
तस्माद्वो जीवितैः सार्द्धमपनेष्यामि गर्व्वितम् ॥ २३
इत्युक्त्वा भगवान् क्रुद्धो व्यदहन्नेत्रवह्निना ।
यज्ञवाटं महाकूटं यथा तिस्रः पुरो हरः ॥ २४
ततो गणेश्वराः सर्व्वे पर्व्वतोदग्रविग्रहाः ।
यूपानुत्पाट्य होतॄणां कण्ठेष्वाबध्य रज्जुभिः ॥ २५
यज्ञपात्राणि चित्राणि भित्त्वा सञ्चूर्ण्य वारिणि ।
गृहीत्वा चैव यज्ञाङ्गं गङ्गास्रोतसि चिक्षिपुः ॥ २६
तत्र दिव्यान्नपानानां राशयः पर्व्वतोपमाः ।
क्षीरनद्योऽमृतस्रावाः सुस्निग्धदधिकर्द्दमाः ॥ २७
उच्चावचानि मांसानि भक्ष्याणि सुरभीणि च ।
रसवन्ति च पानानि लेह्य-चोष्याणि तानि वै ॥ २८
वीरास्तद्भुञ्जते वक्त्रैर्विलुम्पन्ति क्षिपन्ति च ।
वज्रैश्चक्रैर्महाशूलैः शक्तिभिः प्रासपट्टिशैः ॥ २९
मुषलैरसिभिष्टङ्कैर्भिन्दिपालैः परश्वधैः ।
उद्धतांस्त्रिदशान् सर्व्वान् लोकपालपुरःसरान् ॥ ३०
विभिदुर्बलिनो वीरा वीरभद्राङ्गसम्भवाः ।
छिन्धि भिन्धि क्षिप क्षिप्रं मार्य्यतां दार्य्यतामिति ॥ ३१
हरस्व प्रहरस्वेति पाटयोत्पाटयेति च ।
संरम्भप्रभवाः क्रूराः शब्दाः श्रवणशङ्कवः ॥ ३२
तत्र तत्र गणेशानां जज्ञिरे समरोचिताः ।
विवृत्तनयनाः केचिद्दष्टदंष्ट्रोष्ठतालवः ॥ ३३
आश्रमस्थान् समाकृष्य मारयन्ति तपोधनान् ।
स्रुवानपहरन्तश्च क्षिपन्तोऽग्निं जलेषु च ॥ ३४

कलशानपि भिन्दन्तश्छिन्दन्तो मणिवेदिकाः ।
गायन्तश्च नदन्तश्च हसन्तश्च मुहुर्म्मुहुः ॥ ३५
रक्तासवं पिबन्तश्च ननृतुर्गणपुङ्गवाः ।
निर्म्मथ्य सेन्द्रानमरान् गणेन्द्रा
वृषेन्द्र-नागेन्द्र-मृगेन्द्रसाराः ॥ २६
चक्रुर्वहून्यप्रतिमप्रभावाः
सहर्षरोमाणि विचेष्टितानि ।
नन्दन्ति केचित् प्रहरन्ति केचिद्-
धावन्ति केचित् प्रलपन्ति केचित् ॥ ३७
नृत्यन्ति केचिद्विहसन्ति केचिद्-
वल्गन्ति केचित् प्रमथा मदेन ।
केचिज्जिघृक्षन्ति घनान् सतोयान्
केचिद्ग्रहीतुं रविमुत्पतन्ति ॥ ३८
केचित् प्रसर्त्तुं पवनेन सार्द्ध-
मिच्छन्ति भीमाः प्रमथा वियत्स्थाः ।
आक्षिप्य केचिच्च वरायुधानि
महाभुजङ्गानिव वैनतेयाः ॥ ३९
भ्रमन्ति देवानपि विद्रवन्तः
खमण्डले पर्व्वतकूटकल्पाः ।
उत्पाट्य चोत्पाट्य गृहाणि केचित्
सजालवातायनवेदिकानि ॥ ४०
प्रक्षिप्य विक्षिप्य जलस्य मध्ये
कालाम्बुदाभाः प्रमथा निनेदुः ।
उद्वर्त्तितद्वारकपाटकुड्यं
विध्वस्तशालावलभीगवाक्षम् ॥ ४१
अहोवताभज्यत यज्ञवाट-
मनाप्तवद्वाक्यमिवायथार्थम् ।
हा नाथ तातेतिं पितः सुतेति
भ्रातर्ममाम्बेति च मातुलेति ॥ ४२
उत्पाट्यमानेषु गृहेषु नार्य्यो
ह्यनाथशब्दान् बहुशः प्रचक्रुः ॥ ४३

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे दक्षयज्ञमथनं नामा-
ष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः ।

वायुरुवाच ।

ततश्चेन्द्रप्रमुखास्ते विष्णु-शक्रपुरोगमाः ।
सर्व्वे भयपरित्रस्ता दुद्रुवुर्भयविह्वलाः ॥ १
निर्जेरदूषितैरङ्गैर्दृष्ट्वा देवानुपद्रुतान् ।
दण्ड्यानदण्डितान् मत्वा चुकोप गणपुङ्गवः ॥ २
ततस्त्रिशूलमादाय सर्व्वशक्तिनिवर्हणम् ।
जर्द्धदृष्टिर्महाबाहुर्मुखाज्ज्वालां समुत्सृजन् ॥ ३
अमरानभिदुद्राव द्विरदानिव केशरी ।
तानभिद्रवतस्तस्य गमनं सुमनोहरम् ॥ ४
वारणस्येव मत्तस्य जगाम प्रेक्षणीयताम् ।
ततस्तत् क्षोभयामास महत् सुरबलं बली ॥ ५
महासरोवरं यद्वन्मत्तो वारणयूथपः ।
विकुर्व्वन् बहुधा वर्णान् नील-पाण्डुर-लोहितान्
बिभ्रद्व्याघ्राजिनं वासो हेमप्रवरतारकम् ।
छिन्दन् भिन्दन् रुजन् क्रान्दन् दारयन् प्रमथवर्त्म
व्यचरद्देवसङ्घेषु भद्रोऽग्निरिव कक्षगः ।
तत्र तत्र महावेगाच्चरन्तं शूलधारिणम् ॥ ८
तमेकं त्रिदशाः सर्व्वे सहस्रमिव मेनिरे ।
भद्रकाली च संक्रुद्धा युद्धवृद्धिमदोद्धता ॥ ९
मुक्तज्वालेन शूलेन निर्व्विभेद रणे सुरान् ।
स तया रुरुचे भद्रो रुद्रकोपसमुद्भवः ॥ १०
प्रभयैव युगान्ताग्निश्चलया धूमधूम्रया ।
भद्रकाली तदा युद्धे विद्रुतत्रिदशा बभौ ॥ ११
कल्पशेषानलज्वाला-दग्धविश्वजगद्यथा ।
तदा सवाजिनं सूर्य्यं रुद्रान् रुद्रगणाग्रणीः ॥ १२
भद्रो मूर्ध्नि जघानाशु वामपादेन लीलया ।
असिभिः पावकं भद्रः पट्टिशैस्तु यमं यमी ॥ १३
रुद्रान् दृढेन शूलेन मुद्गरैर्वरुणं दृढैः ।
परिघैर्निर्ऋतिं वायुं टङ्कैष्टङ्कधरः स्वयम् ॥ १४
निर्व्विभेद रणे वीरो लीलयैव गणेश्वरः ।
ततो देवः सरस्वत्या नासिकाग्रं सुशोभनम् ॥ १५
चिच्छेद करजाग्रेण देवमातुस्तथैव च ।
चिच्छेद च कुठारेण बाहुदण्डं विभावसोः ॥ १६
अग्रतो द्व्यङ्गुलां जिह्वामात्तहव्यां लुलाव च ।

हाहादेव्यास्तथा देवी दक्षिणं नासिकापुटम् ॥१७
चकर्त्त करजाग्रेण वामञ्च स्तनचूचुकम्।
भगस्य विपुले नेत्रे शतपत्रसमप्रभे ॥ १८
समुत्पाटयामास भद्रः परमवेगवान्।
पूष्णो दशनरेखाञ्च दीप्तां मुक्तावलीमिव ॥ १९
जघान धनुषः कोट्या स तेनास्पष्टवागभूत्।
ततश्चन्द्रमसं देवः पादाङ्गुष्ठेन लीलया ॥ २०
क्षणात् कृमिवदाक्रम्य घर्षयामास भूतले।
शिरश्चिच्छेद दक्षस्य भद्रः परमशोभनम् ॥ २१
क्रोशन्त्यामेव वैरिण्यां भद्रकाल्यै ददौ च तत्।
तत् प्रहृष्टा समादाय शिरस्तालफलोपमम् ॥ २२
सा देवी कन्दुकक्रीड़ां चकार समराङ्गणे।
ततो दक्षस्य या पत्नी कुशीला भर्त्तृभिर्यथा ॥ २३
पादाभ्याञ्चैव हस्ताभ्यां हन्यते स्म गणेश्वरैः।
अरिष्टनेमिनं सोमं धर्म्मञ्चैव प्रजापतिम् ॥ २४
बहुपुत्रं चाङ्गिरसं कृशाश्वं काश्यपं तथा।
गले प्रगृह्य वलिनो गणपाः सिंहविक्रमाः ॥ २५
भर्त्सयन्तो भृशं वाग्भिः सन्नघ्नर्मूर्द्ध्नि मुष्टिभिः।
धर्षिता भूतवेतालैर्दाराः सुतपरिग्रहाः ॥ २६
यथा कलियुगे जारैर्बलेन कुलयोषितः।
तद्विध्वस्तकलशं भग्नयूपं गतोत्सवम् ॥ २७
प्रदीपितमहाशालं प्रभिन्नद्वारतोरणम्।
उत्पाटितसुरानीकं हन्यमानतपोधनम् ॥ २८
प्रशान्तब्रह्मनिर्घोषं प्रक्षीणजनसञ्चयम्।
क्रन्दमानातुरस्त्रीकं हताशेषपरिच्छदम् ॥ २९
शून्यारण्यनिभं जज्ञे यज्ञवाटं तदार्द्दितम्।
शूलवेगप्ररुग्नाश्च भिन्नबाहूरुवक्षसः ॥ ३०
विनिकृत्तोत्तमाङ्गाश्च पेतुरुर्व्व्यां सुरोत्तमाः।
हतेषु तेषु देवेषु पतितेषु सहस्रशः ॥३१
प्रविवेश गणेशानः क्षणादाहवनीयकम्।
प्रविष्टमथ तं दृष्ट्वा भद्रं कालाग्निसन्निभम् ॥ ३२
दुद्राव मरणाद्भीतो यज्ञो मृगवपुर्द्धरः।
स विस्फार्य्य महच्चापं दृढ़ज्याघोषभीषणम् ॥ ३३
भद्रस्तमभिदुद्राव विक्षिपन्नेव शायकान्।
आकर्णपूर्णमाकृष्टं धनुरम्बुदसन्निभम् ॥ ३४
नादयामास तज्ज्याञ्च खञ्च भूमिञ्च सर्व्वशः।
तमुपश्रुत्य संनादं हतोऽस्मीत्येव विह्वलम् ॥ ३५
शरेणार्द्धेन्दुवक्त्रेण स वीरोऽध्वरपूरुषम्।
मृगरूपेण धावन्तं विशिरस्कं तदाकरोत् ॥ ३६
तदीदृशमवज्ञातं दृष्ट्वा तं सूर्य्यसम्भवम्।
विष्णुः परमसंक्रुद्धो युद्धायाभवदुद्यतः ॥ ३७
तमुवाह महावेगः स्कन्धेन नतसन्धिना।
सर्व्वेषां वयसां राजा गरुड़ः पन्नगाशनः ॥ ३८
देवाश्च हतशिष्टा ये देवराजपुरोगमाः।
प्रचक्रुस्तस्य साहाय्यं प्राणांस्त्यक्तुमिवोद्यताः ॥ ३९
विष्णुना सहितान् देवान् वृकेण क्रोष्टुकानिव।
दृष्ट्वा जहास भूतेन्द्रो मृगेन्द्र इव विव्यथः ॥ ४०
तस्मिन्नवसरे व्योम्नि समाविरभवद्रथः।
सहस्रसूर्य्यसङ्काशश्चारुवीरवृषध्वजः ॥ ४१
अश्वरत्नद्वयोदारः खरचक्रचतुष्टयः।
सञ्चितानेकदिव्यास्त्र-शररत्नपरिष्कृतः ॥ ४२
तस्यापि रथवर्य्यस्य स्यात् स एव हि सारथिः।
य एव त्रैपुरे युद्धे पूर्व्वं शार्व्वरथे स्थितः ॥ ४३
स तं रथवरं ब्रह्मा शासनादेव शूलिनः।
हरेः समीपमानीय कृताञ्जलिरभाषत ॥ ४४
भगवन् भद्र भद्राङ्ग भगवानिन्दुभूषणः।
आज्ञापयति धीरं त्वां रथमारोढुमव्ययः ॥ ४५
रैभ्याश्रमसमीपस्थस्त्र्यम्बकोऽम्बिकया सह।
पश्यत्येव महाबाहो दुःसहं ते पराक्रमम् ॥ ४६
तस्य तद्वचनं श्रुत्वा स वीरो रणकुञ्जरः।
आरुरोह रथं दिव्यमनुग्रह्य पितामहम् ॥ ४७
तदा रथवरे तस्मिन् स्थिते ब्रह्मणि सारथौ।
भद्रस्य ववृधे लक्ष्मी रुद्रस्येव पुरद्विषः ॥ ४८
ततः शङ्खवरं दीप्तं चन्द्र-कुन्दसमप्रभम्।
प्रदध्मौ वदने कृत्वा भानुकम्पो महाबलः ॥ ४९
तस्य शङ्खस्य सन्नादं भिन्नसागरसन्निभम्।
श्रुत्वा भयेन देवानां जज्वाल जठरानलः ॥ ५०
यक्षविद्याधराहीन्द्रैः सिद्धैर्युद्धदिदृक्षुभिः।
क्षणेन निविड़ीभूताः साकाशविवरा दिशः ॥ ५१
ततः शार्ङ्गेन्द्रचापाङ्कः स नारायणनीरदः।
महता बाणवर्षेण तुतोद गणगोवृषम् ॥ ५२
तं दृष्ट्वा विष्णुमायान्तं शतधा बाणवर्षिणम्।

स चाददे धनुर्जैत्रं भद्रो बाणसहस्रमुक् ॥ ५३
समादाय च तद्दिव्यं धनुः समरभैरवम्।
शनैर्विस्फारयामास मेरुं धनुरिवेश्वरः ॥ ५४
तस्य विस्फार्य्यमाणस्य धनुषोऽभून्महास्वनः।
तेन स्वनेन महता पृथिवी समकम्पत ॥ ५५
ततः शरवरं घोरं दीप्तमाशीविषोपमम्।
जग्राह गणपः श्रीमान् स्वयमुग्रपराक्रमः ॥ ५६
बाणोद्धारे भुजो यस्य तूणीवदनसङ्गतः।
प्रत्यदृश्यत वल्मीकं विविक्षुरिव पन्नगः ॥ ५७
समुद्धृतः करे तस्य तत्क्षणं सुरुचे शरः।
महाभुजङ्गसन्दष्टो यथा बालभुजङ्गमः ॥ ५८
शरेण घनतीव्रेण भद्रो रुद्रपराक्रमः।
विव्याध कुपितो गाढं ललाटे विष्णुमव्ययम् ॥ ५९
ललाटेऽभिहतो विष्णुः पूर्व्वमेवावमानितः।
चुकोप गणपेन्द्राय मृगेन्द्रायेव गोवृषः ॥ ६०
ततस्त्वशनिकल्पेन क्रूरास्येन महेषुणा।
विव्याध गणराजस्य भुजे भुजगसन्निभे ॥ ६१
सोऽपि तस्य भुजे भूयः सूर्य्यायुतसमप्रभम्।
विससर्ज्ज शरं वेगाद्वीरभद्रो महाबलः ॥ ६२
स च विष्णुः पुनर्भद्रं भद्रो विष्णुं तथा पुनः।
स च तं स च तं विप्राः शरैस्तावनुजघ्नतुः ॥ ६३
तथा परस्परं वेगात्क्षुरानाशु विमुञ्चतोः।
तयोः समभवद्युद्धं तुमुलं रोमहर्षणम् ॥ ६४
तद्दृष्ट्वा तुमुलं युद्धं तयोर्वै विजिगीषतोः।
हाहाकारो महानासीदाकाशे खेचरेरितः ॥ ६५
ततस्त्वनलतुण्डेन शरेणादित्यवर्च्चसा।
विव्याध सुदृढं भद्रो विष्णोर्महति वक्षसि ॥ ६६
स तु तीव्रप्रपातेन शरेण दृढजीवितः।
महतीं रुजमासाद्य निपपात विमोहितः ॥ ६७
पुनः क्षणादिवोत्थाय लब्धसंज्ञस्तदा हरिः।
सर्व्वाण्यपि च दिव्यास्त्राण्यथैन प्रत्यवासृजत् ॥ ६८
स च विष्णुधनुर्मुक्तान् सर्व्वान् शर्व्वचमूपतिः।
सहसा वारयामास घोरैः प्रतिशरैः शरान् ॥ ६९
ततो विष्णुः स्वनामाङ्कं बाणमव्याहतं क्वचित्।
ससर्ज्ज क्रोधरक्ताक्षस्समुद्दिश्य गणेश्वरम् ॥ ७०
तं बाणं बाणवर्य्येण भद्रो भद्राङ्गयेण तु।
अप्राप्तमेव भगवांश्चिच्छेद शतधा पथि ॥ ७१
अथैकेनेषुणा शाङ्गं द्वाभ्यां पक्षौ गरुत्मतः।
निमेषादिव चिच्छेद तदद्भुतमिवाभवत् ॥ ७२
ततो योगबलाद्विष्णुर्देहाद्देवान् सुदारुणान्।
शङ्ख-चक्र-गदाहस्तान् विससर्ज्ज सहस्रशः ॥ ७३
सर्व्वांस्तान् क्षणमात्रेण त्रैपुरानिव शङ्करः।
निर्द्ददाह महाबाहुर्नेत्रसृष्टेन वह्निना ॥ ७४
ततः क्रुद्धतरो विष्णुश्चक्रमुद्यम्य सत्वरः।
तस्मिन् वीरे समुत्स्रष्टुं तदानीमुद्यतोऽभवत् ॥ ७५
तं दृष्ट्वा चक्रमुद्यम्य पुरतः समुपस्थितम्।
स्मयन्निव गणेशानो व्यष्टम्भयदयत्नतः ॥ ७६
स्तम्भिताङ्गस्तु तच्चक्रं घोरमप्रतिमं क्वचित्।
इच्छन्नपि समुत्स्रष्टुं न विष्णुरभवत् क्षमः ॥ ७७
क्रोशन्निवैकमुद्धृत्य बाहुं चक्रसमन्वितम्।
अतिष्ठदलसो विष्णुः पाषाण इव निश्चलः ॥ ७८
विशरीरो यथा जीवो विशृङ्गो वा यथा वृषः।
विदंष्ट्रश्च यथा सिंहस्तथा विष्णुरवस्थितः ॥ ७९
तं दृष्ट्वा दुर्द्दशापन्नं विष्णुमिन्द्रादयः सुराः।
सुसन्नद्धा गणेन्द्रेण मृगेन्द्रेणेव गोवृषाः ॥ ८०
प्रगृहीतायुधा योद्धुं क्रुद्धाः समुपतस्थिरे।
तान् दृष्ट्वा समरे भद्रः क्षुद्रानिव हरिर्मृगान् ॥ ८१
अट्टहासेन घोरेण व्यष्टम्भयदनिन्दितः।
तथा शतमखस्यापि सवज्रो दक्षिणः करः ॥ ८२
सिसृक्षुरेव तद्वज्रं चित्रीकृत इवाभवत्।
अन्येषामपि सर्व्वेषामुद्युक्ता अपि बाहवः ॥ ८३
अलसानामिवारम्भास्तां दशां नातियान्त्युत।
एवं भगवता तेन व्याहताशेषवैभवाः ॥ ८४
अमराः समरे तस्य पुरतः स्थातुमक्षमाः।
स्तब्धैरवयवैरेव दुद्रुवुर्भयविह्वलाः ॥ ८५
विद्रुतां स्त्रिदशान् वीरान् वीरभद्रो महाभुजः।
विव्याध निशितैर्बाणैर्मेघो वर्षैरिवाचलान् ॥ ८६
बहवस्तस्य वीरस्य बाहवः परिघोपमाः।
शस्त्रैश्चकाशिरे दीप्तैः साग्निज्वाला इवोरगाः ॥ ८७
अस्त्रशस्त्राण्यनेकानि स वीरो विसृजन् बभौ।
विसृजन् सर्व्वभूतानि यथादौ विश्वसम्भवः ॥ ८८
यथा रश्मिभिरादित्यः प्रच्छादयति मेदिनीम्।

तथा वीरः क्षणादेव शरैः प्राच्छादयद्दिशः ॥ ८९
खमण्डली गणेन्द्रस्य शराः कनकभूषिताः।
उत्पतन्तस्तड़िद्रूपैरुपमानपदं ययुः ॥ ९०
महान्तस्ते सुरांस्तांश्च मण्डूकानिव डुण्डुभाः।
प्राणैर्वियोजयामासुः पपुश्च रुधिरासवम् ॥ ९१
निकृत्तबाहवः केचित् केचिल्लूनवराननाः।
पार्श्वे विदारिताः केचिन्निपेतुरमरा भुवि ॥ ९२
विशिखोन्मथितैर्गात्रैर्बाहुभिश्छिन्नसन्धिभिः।
विलुप्तनयनाः केचिन्निपेतुर्भूतले मृताः ॥ ९३
गां प्रविष्टमिवेच्छन्तः खं गन्तुमिव लिप्सवः।
शरव्यालतिरोधाना व्यलीयन्त परस्परम् ॥ ९४
भूमौ केचित् प्रविविशुः पर्व्वतानां गुहाः परे।
अपरे जग्मुराकाशं परे च विविशुर्जलम् ॥ ९५
तथा सञ्छिन्न सर्व्वाङ्गैः स वीरस्त्रिदशैर्बभौ।
परिग्रस्तप्रजावर्गो भगवानिव भैरवः ॥ ९६
एवं देवबलं सर्व्वं दीनं बीभत्सदर्शनम्।
गणेश्वरसमुत्पन्नं कृपणं वपुराददे ॥ ९७
तदा त्रिदशवीराणामसृक्सलिलवाहिनी।
प्रावर्त्तत नदी घोरा प्राणिनां भयशंसिनी ॥ ९८
रुधिरेण परिक्लिन्ना यज्ञभूमिस्तदा बभौ।
रक्तार्द्रवसना श्यामा हतशुम्भेव कौशिकी ॥ ९९
तस्मिन् महति निर्वृत्ते समरे भृशदारुणे।
भयेनैव परित्रस्ता प्रचचाल वसुन्धरा ॥ १००
महोर्म्मिकलिलावर्त्तश्चुक्षुभे च महोदधिः।
पेतुश्चोल्काः सहोत्पातैः शाखाश्च मुमुचुर्द्रुमाः ॥ १०१
अप्रसन्ना दिशः सर्व्वाः पवनश्चाशिवो ववौ।
अहो विधिविपर्य्यासस्त्वश्वमेधोऽयमध्वरः ॥ १०२
यजमानः स्वयं दक्षो ब्रह्मपुत्रः प्रजापतिः।
धर्म्मादयः सदस्याश्च रक्षिता गरुड़ध्वजः ॥ १०३
भागांश्च प्रतिगृह्णन्ति साक्षादिन्द्रादयः सुराः।
तथापि यजमानस्य यज्ञस्य च सहर्त्विजः ॥ १०४
सद्य एव शिरश्छेदः साधु सम्पद्यते फलम्।
तस्मान्नावेदनिर्द्दिष्टं न चेश्वरवहिष्कृतम् ॥ १०५
नासत्परिगृहीतञ्च कर्म्म कुर्य्यात् कदाचन।
कृत्वापि सुमहत् पुण्यमिष्ट्वा यज्ञशतैरपि ॥ १०६
न तत् फलमवाप्नोति भक्तिहीनो महेश्वरे।
कृत्वापि सुमहत् पापं भक्त्या यजति यः शिवम्॥१०७
मुच्यते पातकैः सर्व्वैर्नात्र कार्य्या विचारणा।
बहुनात्र किमुक्तेन वृथा दानं वृथा तपः।
वृथा यज्ञो वृथा होमः शिवनिन्दारतस्य तु ॥ १०८

ततः सनारायणकाः सरुद्राः
सलोकपालाः समरे सुरौघाः।
गणेन्द्रचापच्युतबाणविद्धाः
प्रदुद्रुवुर्गाढ़रुजाभिभूताः ॥ १०९
चेलुः क्वचित् केचन शीर्णकेशाः
सेदुः क्वचित् केचन दीर्घगात्राः।
पेतुः क्वचित् केचन भिन्नवक्त्रा
नेशुः क्वचित् केचन देववीराः ॥ ११०
केचिच्च तत्र त्रिदशा विपन्ना
विस्रस्तवस्त्राभरणास्त्रशस्त्राः।
निपेतुरुन्नावितदीनमुद्रा
मदञ्च दर्पञ्च बलञ्च हित्वा ॥ १११
तमुत्पथप्रस्थितमप्रधृष्यो
विध्वंस्य दक्षाध्वरमुद्यतास्त्रः।
बभौ गणेशः स गणेश्वराणां
मध्ये स्थितः सिंह इवर्षभाणाम् ॥ ११२

इति श्रीशैवे महापुराणे वायवीयसंहितायां पूर्व्वभागे दक्ष-शिवगणयुद्धवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः।

वायुरुवाच।

इति सञ्छिन्नभिन्नाङ्गा देवा विष्णुपुरोगमाः।
क्षणात् कष्टां दशामेत्य त्रेसुः स्तोकावशेषिताः ॥ १
त्रस्तांस्तान् समरे वीरा वीरभद्रप्रचोदिताः।
प्रगृह्य च यथा दोषं निगड़ैरायसैर्दृढ़ैः ॥ २
बबन्धुः पाणिपादेषु कन्धरेषूदरेषु च।
तस्मिन्नवसरे ब्रह्मा भद्रमद्रीन्द्रजानुगम् ॥ ३
सारथ्याल्लब्धवात्सल्यः प्रार्थयन् प्रणतोऽब्रवीत्।
अलं क्रोधेन भगवन् नष्टाश्चैते दिवौकसः ॥ ४
प्रसीद क्षम्यतां सर्व्वं रोमजैः सह सुव्रत।

एवं विज्ञापितस्तेन ब्रह्मणा परमेष्ठिना ॥ ५
शमं जगाम सम्प्रीतो गणपस्तस्य गौरवात् ।
देवाश्च लब्धावसरा देवदेवस्य मन्त्रिणः ॥ ६
धारयन्तोऽञ्जलिं मूर्द्ध्नि तुष्टुवुर्विविधैः स्तवैः ।

देवा ऊचुः ।

नमः शिवाय शान्ताय यज्ञहन्त्रे त्रिशूलिने ॥ ७
रुद्रभद्राय रुद्राणां पतये रुद्रमूर्त्तये ।
कालाग्निरुद्ररूपाय कालकामाङ्गहारिणे ॥ ८
देवतानां शिरोहन्त्रे दक्षस्य च दुरात्मनः ।
संसर्गादस्य पापस्य दक्षस्याक्लिष्टकर्म्मणः ॥ ९
शासिताः समरे वीर त्वया वयमनिन्दिताः ।
दग्धाश्चामी वयं सर्व्वे त्वत्तो भीताश्च भोः प्रभो ॥ १०
त्वमेव गतिरस्माकं त्राहि नः शरणागतान् ।
तुष्टस्त्वेवं स्तुतो देवान् विसृज्य निगड़ात् प्रभुः ॥ ११
आनयद्देवदेवस्य समीपममरानिह ।
देवोऽपि तत्र भगवानन्तरिक्षे स्थितः प्रभुः ॥ १२
सगणः सर्व्वगः सर्व्वः सर्व्वलोकमहेश्वरः ।
तं दृष्ट्वा परमेशानं देवा विष्णुपुरोगमाः ॥ १३
प्रीता अपि च भीताश्च नमश्चक्रुर्महेश्वरम् ।
दृष्ट्वा तानमरान् भीतान् प्रणतान् प्रणतार्त्तिहा ॥ १४
इदमाह महादेवः प्रहसन् प्रेक्ष्य पार्व्वतीम् ।
मा भैष्ट त्रिदशा यूयं चान्तोऽस्माभिव्यतिक्रमः ॥ १५
क्रुद्धेष्वस्मासु युष्माकं न स्थितिर्न च जीवितम् ।
इत्युक्ताखिलदशाः सर्व्वे शर्व्वेणामिततेजसा ॥ १६
सद्योविगतसन्त्रासा ननृतुर्विवशा मुदा ।
अथास्मिन्नन्तरे ब्रह्मा प्रणिपत्य कृताञ्जलिः ॥ १७
एवं ह्यवसरं प्राप्य व्यज्ञापयत शूलिने ।

ब्रह्मोवाच ।

जय देव महादेव प्रणतार्त्तिप्रभञ्जन ॥ १८
ईदृशेष्वपराधेषु कोऽन्यस्त्वत्तः प्रसीदति ।
लब्धात्मानो भविष्यन्ति ये सुरा निहता मृधे ॥ १९
प्रत्यापत्तिर्न कस्य स्यात् प्रसन्ने परमेश्वरे ।
यदिदं देवदेवानां कृतमङ्गेषु दूषणम् ॥ २०
तदिदं भूषणं मन्ये तवाङ्गीकारगौरवात् ।
इति विज्ञाप्यमानस्तु ब्रह्मणा परमेष्ठिना ॥ २१
विलोक्य वदनं देव्या देवदेवः स्मयन्निव ।
पुत्रभूतस्य वात्सल्याद्ब्रह्मणः पद्मजन्मनः ॥ २२
प्रनष्टानां पुनस्तेषां प्रददौ पूर्व्ववत् तनुम् ।
ततः क्षणेन ते देवाः शतक्रतुपुरोगमाः ॥ २३
प्रत्यापन्नशरीराङ्गाः प्रणेमुः परमेश्वरम् ।
वागीशाद्याश्च या देव्यो दण्डिता देवमातरः ॥ २
तासामपि यथा पूर्व्वं तान्यङ्गानि ददौ भवः ।
दक्षस्य भगवानेव स्वयं ब्रह्मा पितामहः ॥ २५
तत्पापानुगुणं चक्रे जरच्छागमुखं मुखम् ।
सोऽपि संज्ञां ततो लब्ध्वा समुत्थाय कृताञ्जलिः ॥
प्रलपन् बहुधा भीतस्तुष्टाव परमेश्वरम् ।
तं तथा व्याकुलं भीतं प्रलपन्तं कृतागसम् ॥ २७
स्मयन्निवावदत् प्रेक्ष्य मा भैरिति घृणानिधिः ।
तथोक्त्वा ब्रह्मणस्तस्य पितुः प्रियचिकीर्षया ॥ २
गाणपत्यं ददौ तस्मै दक्षायाक्षयमीश्वरः ।
ततो ब्रह्मा महादेवमभिवन्द्य कृताञ्जलिः ॥ २८
तुष्टाव शुभया वाचा देवीञ्च गिरिजामुमाम् ।
ततो विष्णुस्ततो देवास्ततः सर्व्वे महर्षयः ॥ ३
तुष्टुवुर्देवदेवेशं देवीञ्चापि पृथक् पृथक् ।
तदा पार्श्वस्थितं प्रेक्ष्य भद्रमद्रीन्द्रजा स्वयम् ॥ ३
कृतात्मप्रेषणं पुत्रं गृहीत्वा तं कृताञ्जलिम् ।
आकृष्य भद्रया सार्द्धमङ्के समुपवेश्य च ॥ ३२
सस्वजे गुहवद्गाढ़ं समाजिघ्रच्च मूर्द्धनि ।
ततः प्रीततरा देवी वीरभद्राय शूलिने ॥ ३३
प्रददौ विविधानिष्टान् वरांश्चैव सहस्रधा ।

अथ तदा हरि-शक्र-पितामह-
प्रभृतयः सुरलोकमहेश्वराः ॥ ३४
सकललोकमहेश्वरमीश्वरं
शरणमेत्य कृताञ्जलयोऽस्तुवन् ।
स च पुनस्त्रिदशान् शरणागतान्
परमकारुणिकः परमेश्वरः ॥ ३५
अनुगतस्मितलक्षणया गिरा
शमितसर्व्वभयः समभाषत ।
यदिदमाग दुराचरितं सुरै-
र्विधिनियोगवशादिव यन्त्रितैः ॥ ३६
शरणमेत्य नतानवलोक्य व-
स्तदखिलं किल विस्मृतमेव नः ।

तदिह यूयमपि प्रकृतं मनस्य-
विगणय्य विमर्द्दमपत्रपाः ॥ ३७
हरि-विरञ्चि-सुरेन्द्रमुखाः सुखं
व्रजत देवपुरं प्रति सम्प्रति ।
इति सुरानभिधाय सुरेश्वरो
निकृतदक्षकृतक्रतुरक्रतुः ॥ ३८
सगिरिजानुचरः सपरिच्छदः
स्थित इवाम्बरतोऽन्तरधीयत ।
अथ सुरा अपि ते विगतव्यथाः
कथितभद्रसुभद्रपराक्रमाः ।
सपदि खेन सुखेन यथासुखं
ययुरनेकसुखं मघवन्मुखाः ॥ ३९
इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः ।

ऋषय ऊचुः ।

अन्तर्द्धानगतो देव्या सह सानुचरो हरः ।
क्व यातः कुत्र वा वासः किं कृत्वा च रराम च ॥ १

वायुरुवाच ।

महीधरवरः श्रीमान् मन्दरश्चित्रकन्दरः ।
दयितो देवदेवस्य निवासस्तपसोऽभवत् ॥ २
तपो महत् कृतं तेन वोढुं स्वशिरसा शिवौ ।
चिरेण लब्धं तत्पाद-पङ्कजस्पर्शजं सुखम् ॥ ३
तस्य शैलस्य सौन्दर्य्यं सहस्रवदनैरपि ।
न शक्यं विस्तराद्वक्तुं वर्षकोटिशतैरपि ॥ ४
शक्यमप्यस्य सौन्दर्य्यं न वर्णयितुमुत्सहे ।
पर्व्वतान्तरसौन्दर्य्यसाधारण्यावधारणात् ॥ ५
इदन्तु शक्यते वक्तुमेष पर्व्वतसुन्दरः ।
ऋद्धा कयापि सौन्दर्य्य-मीश्वरावासयोग्यताम् ॥ ६
अत एव हि देवेन देव्याः प्रियचिकीर्षया ।
अतीव रमणीयोऽयं गिरिरन्तःपुरीकृतः ॥ ७
मेखलाभूमयस्तस्य विपुलोपलपादपाः ।
शिवयोर्नित्यसान्निध्यान्न्यक्कुर्व्वन्त्यखिलं जगत् ॥ ८
पितृभ्यां जगतो नित्यं स्नानपानोपयोगतः ।
अवाप्तपुण्यसंस्कारैः प्रसरद्भिरितस्ततः ॥ ९
लघुशीतलसंस्पर्शैरच्छाच्छैर्निर्झराम्बुभिः ।
आधिराज्य इवाद्रीणामद्रिरेषोऽभिषिच्यते ॥ १०
निशासु शिखरप्रान्त-वर्त्तिना स शिलोच्चयः ।
चन्द्रेणाचलसाम्राज्य-छत्रेणेव विराजते ॥ ११
स शैलश्चञ्चलीभूतैर्बालैश्चमरयोषिताम् ।
सर्व्वपर्व्वतसाम्राज्य-चामरैरिव वीज्यते ॥ १२
प्रातरभ्युदिते भानौ भूधरो रत्नभूषितः ।
दर्पणे देहसौभाग्यं द्रष्टुकाम इव स्थितः ॥ १३
कूजद्विहङ्गवाचालैर्वातोद्धूतलताभुजैः ।
विमुक्तपुष्पैः सततं व्यालम्बिमृदुपल्लवैः ॥ १४
लताप्रतानजटिलैस्तरुभिस्तापसैरिव ।
जयाशिषा सहाभ्यर्च्य निषेव्यत इवाद्रिराट् ॥ १५
अधोमुखैरूर्ध्वमुखैः शृङ्गैस्तिर्य्यङ्मुखैरपि ।
प्रपतन्निव पाताले भूपृष्ठादुत्पतन्निव ॥ १६
परीत्य सर्व्वतो दिक्षु भ्रमन्निव विहायसि ।
पश्यन्निव जगत् सर्व्वं नृत्यन्निव निरन्तरम् ॥ १७
गुहामुखैः प्रतिदिनं व्यात्तास्यैर्विपुलोदरैः ।
अजीर्णलावण्यतया जृम्भामिव सदाचरन् ॥ १८
ग्रसन्निव जगत् सर्व्वं पिबन्निव पयोनिधिम् ।
वसन्निव तमोऽन्तःस्थमदन्निव खमम्बुदैः ॥ १९
निवासभूमयस्तास्ता दर्पणप्रतिमोदराः ।
तिरस्कृतातपस्निग्धाश्रमच्छाया महीरुहाः ॥ २०
सरित्सरस्तटाकादि-सम्पर्कशिशिरानिलाः ।
तत्र तत्र निषण्णाभ्यां शिवाभ्यां सफलीकृताः ॥ २१
तमिमं पर्व्वश्रेष्ठं कृत्वा साम्बस्त्रियम्बकः ।
रैभ्याश्रमसमीपस्थस्त्वान्तर्द्धानं गतो ययौ ॥ २२
तत्रोद्यानमनुप्राप्य देव्या सह महेश्वरः ।
रराम रमणीयासु दिव्यान्तःपुरभूमिषु ॥ २३
तथा गतेषु कालेषु विवृद्धासु प्रजासु च ।
दैत्यौ शुम्भ-निशुम्भाख्यौ भ्रातरौ सम्बभूवतुः ॥ २४
ताभ्यां तपोबलाद्दत्तं ब्रह्मणा परमेष्ठिना ।
अवध्यत्वं जगत्यस्मिन् पुरुषैरखिलैरपि ॥ २५
अयोनिजा तु या कन्या अम्बिकांशसमुद्भवा ।
अजातपुंस्पर्शरतिरविलङ्घ्यपराक्रमा । २६
तयास्तु नौ वधः सङ्ख्ये तस्यां कामाभिभूतयोः ।

इति चाभ्यर्थितो ब्रह्मा ताभ्यां प्राह तथास्त्विति ॥ २७
ततः प्रभृति शक्रादीन् विजित्य समरे सुरान् ।
निःस्वाध्यायवषट्कारं जगच्चक्रतुरक्रमात् ॥ २८
तयोर्वधाय देवेशं ब्रह्माभ्यर्थितवान् पुनः ।
विनिन्द्यापि रहस्यम्बां क्रोधयित्वा यथा तथा ॥ २९
तद्वर्णकोशजां शक्तिमकामां कन्यकात्मिकाम् ।
निशुम्भ-शुम्भयोर्हन्त्रीं सुरेभ्यो दातुमर्हसि ॥ ३०
एवमभ्यर्थितो धात्रा भगवान् नीललोहितः ।
कालीत्याह रहस्यम्बां निन्दयन्निव सस्मितः ॥ ३१
ततः क्रुद्धतरा देवी सुवर्णा वर्णकारणात् ।
स्मयन्ती चाह भर्त्तारमसमाधेयया गिरा ॥ ३२

देव्युवाच ।

ईदृशे मम वर्णेऽस्मिन् न रतिर्भवतोऽस्ति चेत् ।
एतावन्तं चिरं कालं कथमेषा नियम्यते ॥ ३३
अरुच्या वर्त्तमानोऽपि कथञ्च रमसे मया ।
न ह्यशक्यं जगत्यस्मिन्नीश्वरस्य तव प्रभो ॥ ३४
स्वात्मारामस्य भवतो रतिर्न सुखसाधनम् ।
इति हेतोः स्मरो यस्मात् प्रसभं भस्मसात्कृतः ॥ ३५
याचनाभिरता भर्त्तुरपि सर्व्वाङ्गसुन्दरी ।
सा वृथैव हि जायेत सर्व्वैरपि गुणान्तरैः ॥ ३६
भर्त्तुर्भोगैकशेषो हि सर्ग एवैष योषिताम् ।
तथा सत्यन्यथाभूता नारी कुत्रोपयुज्यते ॥ ३७
तस्माद्वर्णमिमं त्यक्त्वा त्वया रहसि निन्दितम् ।
वर्णान्तरं भजिष्ये वा न भविष्यामि वा स्वयम् ॥ ३८
इत्युक्त्वोत्थाय शयनाद्देवी रोषात् सगद्गदम् ।
ययाचेऽनुमतिं भर्त्तुस्तपसे कृतनिश्चया ॥ ३९
तथा प्रणयभङ्गेन भीतो भूतपतिः स्वयम् ।
पादयोः प्रणमन्नेव भवानीं प्रत्यभाषत ॥ ४०

ईश्वर उवाच ।

अजानतीव क्रीड़ोक्तिं प्रिये किं कुपितासि मे ।
रतिः कुतो वा जायेत त्वत्तश्चेदरतिर्मम ॥ ४१
माता त्वमस्य जगतः पिताहमधिपस्तथा ।
कथं तदुपपद्येत त्वत्तो नाभिरतिर्मम ॥ ४२
आवयो रतिकामोऽपि किमसौ कामकारितः ।
यतः कामसमुत्पत्तेः प्रागेव जगदुद्भवः ॥ ४३
पृथग्जनानां रत्यर्थं कामात्मा कल्पितो मया ।
ततः कथमुपालब्धः कामदाहादहं त्वया ॥ ४४
मम त्रिदशसामान्यं मन्यमानो मनोभवः ।
मनाक् परिभवं कुर्व्वन् मया वै भस्मसात्कृतः ॥ ४५
विहारोऽप्यावयोरस्य जगतस्त्राणकारणात् ।
ततस्तदर्थं त्वय्यद्य क्रीड़ोक्तिं कृतवानहम् ॥ ४६
स चायमचिरादर्थस्तवैवाविष्करिष्यते ।
क्रोधेनालं मुधानेन त्वन्निष्ठं किं न वेत्सि माम् ॥ ४७
इत्येवमनुनीतापि भर्त्त्रा गिरिवरात्मजा ।
कालीति विप्रियं वाक्यं हृदि कृत्वेदमब्रवीत् ॥ ४८

देव्युवाच ।

श्रुतपूर्व्वा हि भगवंस्तव चाटूक्तयो मया ।
याभिरेवमधीराहमितः प्रागपि वञ्चिता ॥ ४९
प्राणानप्यप्रिया भर्त्तुर्नारी या न परित्यजेत् ।
कुलाङ्गनासु सा सद्भिः कुत्सितेव हि गण्यते ॥ ५०
भूयसी च तवाप्रीतिरगौरमिति मे वपुः ।
क्रीड़ोक्तिरपि कालीति घटते कथमन्यथा ॥ ५१
सद्भिर्विगर्हितं तस्मात् त्वीषु कार्य्यांग्रमसत्कृतम् ।
अनुत्सृज्य तपोयोगात् स्थातुमेवेह नोत्सहे ॥ ५२

देव उवाच ।

यद्येवं व्यवसायस्ते तपसा किं प्रयोजनम् ।
ममेच्छया स्वेच्छया वा वर्णान्तरवती भव ॥ ५३

देव्युवाच ।

नेच्छामि भवतो वर्णं स्वयं वा कर्त्तुमन्यथा ।
ब्रह्माणं तपसाराध्य ततो गौरी भवाम्यहम् ॥ ५४

ईश्वर उवाच ।

मत्प्रसादात् पुरा ब्रह्मा ब्रह्मत्वं प्राप्तवान् परम् ।
तमाहूय महादेवि तपसा किं करिष्यसि ॥ ५५

देव्युवाच ।

त्वत्तो लब्धपदा एव सर्व्वे ब्रह्मादयः सुराः ।
तथाप्याराध्य तपसा ब्रह्माणं त्वन्नियोगतः ॥ ५६
पुरा किल सती नाम्ना दक्षस्य दुहिताऽभवम् ।
जगतां पतिमेव त्वां पतिं प्राप्तवती तथा ॥ ५७
एवमद्यापि तपसा तोषयित्वा पितामहम् ।
गौरी भवितुमिच्छामि को दोषः कथ्यतामिह ॥ ५८
एवमुक्तो महादेव्या महादेवः स्मयन्निव ।
न तां निर्बन्धयामास देवकार्य्यचिकीर्षया ॥ ५९

ततः प्रदक्षिणीकृत्य पतिमम्बा पतिव्रता।
नियम्य च वियोगार्त्तिं जगाम हिमवद्गिरिम्॥ ६०
तपः कृतवती पूर्व्वं देशे यस्मिन् सखीजनैः।
तमेव देशं वृणुयात् तपसे प्रणयात् पुनः॥ ६१
ततः स्वपितरं दृष्ट्वा मातरञ्च तयोर्गृहे।
प्रणम्य वृत्तं विज्ञाप्य ताभ्याञ्चानुमता सती॥ ६२
पुनस्तपोवनं गत्वा भूषणानि विसृज्य च।
स्नात्वा तपस्विनीवेषं कृत्वा परमपावनम्॥ ६३
सङ्कल्प्य च महत् तीव्रं तपः परमदुश्चरम्।
सदा मनसि सन्धाय भर्त्तुश्चरणपङ्कजम्॥ ६४
तमेव क्षणिके लिङ्गे ध्यात्वावाह्यविधानतः।
त्रिसन्ध्यमभ्यर्चयन्ती वन्यैः पुष्पैः फलादिभिः॥ ६५
स एव ब्रह्मणो मूर्त्तिमास्थाय तपसः फलम्।
प्रदास्यति ममेत्येवं नित्यं मत्वाकरोत् तपः॥ ६६
तथा तपश्चरन्तीं तां काले बहुतिथे गते।
दृष्ट्वा कश्चिन्महाव्याघ्रो दुष्टभावादुपागमत्॥ ६७
तथैवोपगतस्यापि तस्यातीव दुरात्मनः।
गात्रं चित्रार्पितमिव स्तब्धं तस्याः सकाशतः॥ ६८
तं दृष्ट्वापि तथा व्याघ्रं दुष्टभावादुपागतम्।
न पृथग्जनवद्देवी स्वप्रभावेण विव्यथे॥ ६९
स तु विष्टब्धसर्व्वाङ्गो बुभुक्षापरिपीड़ितः।
ममामिषमितो नान्यदिति मत्वा निरन्तरम्॥ ७०
निरीक्षमाणः सततं देवीमेव तदानिशम्।
अतिष्ठदग्रतस्तस्या उपासनमिवाचरन्॥ ७१
देव्याश्च हृदये नित्यं ममैवायमुपासकः।
त्राता च दुष्टसत्त्वेभ्य इति प्रववृते कृपा॥ ७२
तत एव कृपायोगात् सद्यो नष्टमलत्रयः।
बभूव स महाव्याघ्रो देवीञ्च बुबुधे तदा॥ ७३
न्यवर्त्तत बुभुक्षा च तस्याङ्गस्तम्भनं तथा।
दौरात्म्यं जन्मसिद्धञ्च तृप्तिश्च समजायत॥ ७४
तदा परमभावेण ज्ञात्वा कार्त्तार्थ्यमात्मनः।
सत्योपासक एवैष सिषिवे परमेश्वरीम्॥ ७५
दुष्टानामपि सत्त्वानां तथान्येषां दुरात्मनाम्।
स एव द्रावको भूत्वा विचचार तपोवने॥ ७६
तपश्च ववृधे देव्यास्तीव्रं तीव्रतरात्मकम्।
देवाश्च दैत्यनिर्ब्बन्धाद्ब्रह्माणं शरणं ययुः॥ ७७

सोऽपि दैत्यवधासक्तः ज्ञात्वा हेत्वाश्रयां कथाम्।
सामरस्त्वरितो ब्रह्मा ययौ देव्यास्तपोवनम्॥ ७८
ददर्श च सुरश्रेष्ठः श्रेष्ठे तपसि निष्ठिताम्।
प्रतिष्ठामिव विश्वस्य भवानीं परमेश्वरीम्॥ ७९
ननाम चास्य जगतो मातरं स्वस्य चात्मनः।
रुद्रस्य च पितुर्भार्य्यामार्य्यामद्रीश्वरात्मजाम्॥ ८०
ब्रह्माणमागतं दृष्ट्वा देवी देवगणैः सह।
अर्घ्यं तदर्हं दत्त्वास्मै स्वागताद्यैरुपाचरत्॥ ८१
ताञ्च प्रत्युपचारोक्तिं पुरस्कृत्याभिनन्द्य च।
पप्रच्छ तपसो हेतुमजानन्निव पद्मजः॥ ८२

ब्रह्मोवाच।

तीव्रेण तपसानेन देव्या किमिह साध्यते।
तपःफलानां सर्व्वेषां त्वदधीना हि सिद्धयः॥ ८३
यश्चैव जगतां भर्त्ता तमेव परमेश्वरम्।
भर्त्तारमात्मना प्राप्य प्राप्तञ्च तपसः फलम्॥ ८४
अथवा सर्व्वमेवैतत् क्रीड़ाविलसितं तव।
इदन्तु चित्रं देवस्य विरहं सहसे कथम्॥ ८५

देव्युवाच।

सर्गादौ भवतो देवादुत्पत्तिः श्रूयते यदा।
तदा प्रजानां प्रथमस्त्वं मे प्रथमजः सुतः॥ ८६
यदा पुनः प्रजावृद्धौ ललाटाद्भवतो भवः।
उत्पन्नोऽभूत् तदा त्वं मे गुरुः श्वशुरभावतः॥ ८७
यदा चायं गिरीन्द्रस्ते पुत्त्रो मम पिता स्वयम्।
तदा पितामहस्त्वं मे जातो लोकपितामह॥ ८८
तदीदृशस्य भवतो लोकयात्रा विधायिनः।
वृत्तमन्तःपुरे भर्त्रा कथयिष्ये कथं पुनः॥ ८९
किमत्र बहुना देहे यश्चायं मम कालिमा।
त्यक्त्वेमं त्वद्विधानेन गौरी भवितुमुत्सहे॥ ९०

ब्रह्मोवाच।

एतावता किमर्थेन तीव्रं देवि तपः कृतम्।
स्वेच्छैव किमपर्य्याप्ता क्रीड़ेयं हि तवेदृशी॥ ९१
क्रीड़ापि च जगन्मातस्तव लोकहिताय वै।
अतो ममेष्टमनया फलं किमपि साध्यताम्॥ ९२
निशुम्भ-शुम्भनामानौ दैत्यौ दत्तवरौ मया।
दृप्तौ देवान् प्रबाधेते त्वत्तो लब्धस्तयोर्वधः॥ ९३
अलं विलम्बनेनात्र लच्छलेन स्थिता तव।

शक्तिर्विसृज्यमानाद्य तयोर्मृत्युर्भविष्यति ॥ ९४
ब्रह्मणाभ्यर्थिता चैवं देवी गिरिवरात्मजा ।
त्वक्कोशं सहसोत्सृज्य गौरी सा समजायत ॥ ९५
सा त्वक्कोशात्मनोत्सृष्टा कौशिकी नाम नामतः ।
काली कालाम्बुदप्रख्या कन्यका समपद्यत ॥ ९६
सा तु मायात्मिका शक्तिर्योगनिद्रा च वैष्णवी ।
शङ्ख-चक्र-त्रिशूलादि-सायुधाष्टमहाभुजा ॥ ९७
सौम्या घोरा च मिश्रा च त्रिनेत्रा चन्द्रशेखरा ।
अजातपुंस्पर्शरतिरधृष्या चातिसुन्दरी ॥ ९८
दत्ता च ब्रह्मणे देव्या शक्तिरेषा सनातनी ।
शुम्भस्य च निशुम्भस्य निहन्त्री दैत्यसिंहयोः ॥ ९९
ब्रह्मणापि प्रहृष्टेन तस्यै परमशक्तये ।
प्रबलः केशरी दत्तो वाहनत्वे समागतः ॥ १००
विन्ध्ये च वसतिं तस्याः पूजाञ्चासवपूर्व्वकैः ।
मांसैर्मत्स्यैरपूपैश्च निर्व्वर्त्त्यासौ समादिशत् ॥ १०१
सा चैवं सम्मता शक्तिर्ब्रह्मणा विश्वकर्म्मणा ।
प्रणम्य मातरं गौरीं ब्रह्माणञ्चानुपूर्व्वशः ॥ १०२
शक्तिभिः स्वात्मतुल्याभिः स्वात्मजाभिरनेकशः ।
परीता प्रययौ विन्ध्यं दैत्येन्द्रौ हन्तुमुद्यता ॥ १०३
निहतौ च तथा तत्र समरे दैत्यपुङ्गवौ ।
तद्बाणैः कामबाणैश्च छिन्नभिन्नाङ्गमानसौ ॥ १०४

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ।

वायुरुवाच ।

उत्पाद्य कौशिकीं गौरी ब्रह्मणे प्रतिपाद्य च ।
तस्य प्रत्युपकाराय पितामहमथाब्रवीत् ॥ १

देव्युवाच ।

दृष्टः किमेष भवता शार्दूलो मदुपाश्रयः ।
अनेन दुष्टसत्त्वेभ्यो रक्षितं मे तपोवनम् ॥ २
मय्यर्पितमना एष भजते मामनन्यधीः ।
अस्य संरक्षणादन्यत् प्रियं मम न विद्यते ॥ ३
भवितव्यमनेनातो ममान्तःपुरचारिणा ।
गणेश्वरपदस्थाने प्रीतो दास्यति शङ्करः ॥ ४
एनमग्रेसरं कृत्वा सखीभिर्गन्तुमुत्सहे ।
प्रदीयतामनुज्ञा मे प्रजानां पतिना त्वया ॥ ५
इत्युक्तः प्रहसन् ब्रह्मा देवीं मुग्धामिव स्मयन् ।
तस्य तीव्रैः पुरावृत्तैर्दौरात्म्यं समवर्णयत् ॥ ६

ब्रह्मोवाच ।

क्वासौ देवि मृगः क्रूरः क्व च तेऽनुग्रहः शुभः ।
आशीविषमुखे साक्षादमृतं किं निषिच्यते ॥ ७
व्याघ्रमात्रं न खल्वेष दुष्टः कोऽपि निशाचरः ।
अनेन भक्षिता गावो ब्राह्मणाश्च तपोधनाः ॥ ८
अपर्य्यन्ता यथाकामं कामरूपी चरत्यसौ ।
अवश्यं खलु भोक्तव्यं फलं पापस्य कर्म्मणः ॥ ९
अतः किं कृपया कृत्यमीदृशेषु दुरात्मसु ।
अनेन देव्याः किं कृत्यं प्रकृत्या कलुषात्मना ॥ १०

देव्युवाच ।

यदुक्तं भवता सर्व्वं तथ्यमस्त्वयमीदृशः ।
तथापि मां प्रपन्नोऽभून्न त्यक्तो मामुपाश्रितः ॥ ११

ब्रह्मोवाच ।

यस्य भक्तिमविज्ञाय प्राग्वृत्तं ते निवेदितम् ।
भक्तिश्चेदस्य किं पापैर्न ते भक्ताः प्रणश्यति ॥ १२
पुण्यकर्म्मापि किं कुर्य्यात् त्वदीयाज्ञानपेक्षया ।
आज्ञाप्रज्ञा पुराणी च त्वमेव परमेश्वरी ॥ १३
त्वदधीना हि सर्व्वेषां बन्ध-मोक्ष-व्यवस्थितिः ।
त्वामृते परमां शक्तिं संसिद्धिः कस्य कर्म्मणः ॥ १४
त्वमेव विविधा शक्तिर्भावानामभवा स्वयम् ।
अशक्तः कर्म्मकरणं कर्त्ता वा किं करिष्यति ॥ १५
विष्णोश्च मम चान्येषां देव-दानव-रक्षसाम् ।
तत्तदैश्वर्य्यसम्प्राप्तौ तवैवाज्ञा हि कारणम् ॥ १६
अतीताः खल्वसंख्याता ब्रह्माणो हरयो भवाः ।
अनागतास्त्वसंख्यातास्त्वदाज्ञानुविधायिनः ॥ १७
त्वामनाराध्य देवेशि पुरुषार्थचतुष्टयम् ।
लब्धुं न शक्यमस्माभिरपि सर्व्वैः सुरोत्तमैः ॥ १८
व्यत्यासोऽपि भवेत् सद्यो ब्रह्मत्व-स्थावरत्वयोः ।
सुकृते दुष्कृते चापि त्वदव्यवस्थापनं यतः ॥ १९
त्वं हि सर्व्वजगच्चक्षुः शिवस्य परमात्मनः ।
अनादि-मध्य-निधना शक्तिराद्या सनातनी ॥ २०
समस्तलोकयात्रार्थं मूर्त्तिमाविश्य कामपि ।

क्रीडसे विविधैर्भावैः कस्त्वां जानाति तत्त्वतः ॥ २१
अतो दुष्कृतकर्म्मापि व्याघ्रोऽयं त्वदनुग्रहात् ।
प्राप्नोतु परमां सिद्धिमत्र कः प्रतिबन्धकः ॥ २२
इत्यात्मनः परं भावं स्मारयित्वानुरूपतः ।
ब्रह्मणाभ्यर्थिता गौरी तपसोऽपि न्यवर्त्तत ॥ २३
ततो देवीमनुज्ञाप्य ब्रह्मण्यन्तर्हिते सति ।
देवी च मातरं दृष्ट्वा मेनां हिमवता सह ॥ २४
प्रणम्याश्वास्य बहुधा पितरौ विरहासहौ ।
ततः प्रणयिनी देवी तपोवनमहीरुहान् ॥ २५
विप्रयोगाश्रुचेवाग्रे पुष्पवास्पं विमुञ्चतः ।
तत्तच्छाखासमारूढ़-विहगोदीरितै रुतैः ॥ २६
व्याकुलं बहुधा दीनं विलापमिव कुर्व्वतः ।
सखीभ्यः कथयन्त्येव सत्वरा भर्त्तृदर्शने ॥ २७
पुरस्कृत्य च तं व्याघ्रं स्नेहात् पुत्त्रमिवौरसम् ।
देहस्य प्रभया चैव दीपयन्ती दिशो दश ।
प्रययौ मन्दरं गौरी यत्र भर्त्ता महेश्वरः ॥ २८

इति श्रीशैवे महापुराणे वायवीयसंहितायां पूर्व्वभागे देवी-ब्रह्मसंवादे द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः ।

ऋषय ऊचुः ।

कृत्वा गौरं वपुर्दिव्यं देवी गिरिवरात्मजा ।
कथं ददर्श भर्त्तारं प्रविष्टा मन्दरं सती ॥ १
प्रवेशसमये तस्या भवनद्वारगोचरैः ।
गणेशैः किं कृतं देवस्तां दृष्ट्वा किं तदाकरोत् ॥ २

वायुरुवाच ।

प्रवक्तुमञ्जसाऽशक्यस्तादृशः परमो रसः ।
येन प्रणयगर्भेण भावो भाववतां हृतः ॥ ३
द्वाःस्थैः ससम्भ्रमैरेव देवो देव्यागमोत्सुकः ।
शङ्कमानः प्रविष्टां तां तत्र सा समपश्यत ॥ ४
तैस्तैः प्रणयभावैश्च भवनान्तरवर्त्तिभिः ।
गणेन्द्रैर्वन्दिता वाचा प्रणनाम त्रियम्बकम् ॥ ५
प्रणम्य नोत्थिता यावत् तावत् तां परमेश्वरः ।
प्रगृह्य दोर्भ्यामाश्लिष्य परितः परया मुदा ॥ ६
स्वाङ्के धर्त्तुं प्रवृत्तोऽपि सा पर्य्यङ्के न्यषीदत ।
पर्य्यङ्कतो बलाद्देवीं स्वाङ्कमारोप्य सुस्मिताम् ॥ ७
सस्मितो विवृतैर्नेत्रैस्तद्वक्त्रं प्रपिबन्निव ।
तया सम्भाषणायेशः पूर्व्वभाषितमब्रवीत् ॥ ८

देव उवाच ।

सा दशा च व्यतीता किं तव सर्व्वाङ्गसुन्दरि ।
यस्यामनुनयोपायः कोऽपि कोपान्न लभ्यते ॥ ९
स्वेच्छयापि च कालीति नान्यवर्णवतीति च ।
त्वत्स्वभावाद्धृतं चित्तं सुष्ठु चिन्तावहं मम ॥ १०
विस्मृतः परमो भावः कथं स्वेच्छाङ्गयोगतः ।
न सम्भवन्ति ये तत्र चित्तकालुष्यहेतवः ॥ ११
पृथग्जनवदन्योऽन्यं विप्रियस्यापि कारणम् ।
आवयोरपि यद्यस्ति नास्त्येवैतच्चराचरम् ॥ १२
अहमग्निशिरोनिष्ठस्त्वं सोमशिरसि स्थिता ।
अग्नीषोमात्मकं विश्वमावाभ्यां समधिष्ठितम् ॥ १३
जगद्धिताय चरतोः स्वेच्छाधृतशरीरयोः ।
आवयोर्विप्रयोगे हि स्यान्निरालम्बनं जगत् ॥ १४
अस्ति हेत्वन्तरञ्चात्र शास्त्रयुक्तिविनिश्चितम् ।
वागर्थमयमेवैतज्जगत् स्थावर-जङ्गमम् ॥ १५
त्वं हि वागमृतं साक्षादहमर्थामृतं परम् ।
द्वयमप्यमृतं कस्माद्वियुक्तमुपपद्यते ॥ १६
विद्या-प्रत्यायिका त्वं मे वेद्योऽहं प्रत्ययात् तव ।
विद्यावेद्यात्मनोरेव विश्लेषः कथमावयोः ॥ १७
न कर्म्मणा सृजामीदं जगत् प्रतिसृजामि च ।
सर्व्वस्याज्ञैकलभ्यत्वादाज्ञा त्वं हि गरीयसी ॥ १८
आज्ञैकसारमैश्वर्य्यं यस्मात् स्वातन्त्र्यलक्षणम् ।
आज्ञया विप्रयुक्तस्य ऐश्वर्य्यं मम कीदृशम् ॥ १९
न कदाचिदवस्थानमावयोर्विप्रयुक्तयोः ।
तथापि विरहो वृत्त इत्यतोऽन्यत् किमद्भुतम् ॥ २०
न परानुग्रहादन्यत् प्रयोजनमिहात्मनः ।
प्रवृत्तिलक्षणं तस्माल्लीलापि न वृथावयोः ॥ २१
देवानां कार्य्यमुद्दिश्य लीलोक्तिं कृतवानहम् ।
त्वयाप्यविदितं नास्ति कथं कुपितवत्यसि ॥ २२
ततस्त्रिलोकरक्षार्थं कोपो मय्यपि ते कृतः ।
यदनर्थाय भूतानां न तदस्ति खलु त्वयि ॥ २३
इति प्रियंवदे साक्षादीश्वरे परमेश्वरी ।

शृङ्गारभावसाराणां जन्मभूमिरकृत्रिमा ॥ २४
स्वभर्त्रा ललितं तथ्यमुक्तं मत्वा स्मितोत्तरम्।
लज्जया न किमप्यूचे कौशिकीवर्णनात् परम् ॥ २५
देव्युवाच।
किं देवेन न सा दृष्टा या स्रष्टा कौशिकी मया।
तादृशी कन्यका लोके न भूता न भविष्यति ॥ २६
तस्या वीर्य्यं बलं विन्ध्ये निलयं विजयं तथा।
शुम्भस्य च निशुम्भस्य मारणञ्चरणे तयोः ॥ २७
प्रत्यक्षफलदानञ्च लोकाय भजते सदा।
देवानां रक्षणे ब्रह्मब्रह्मा विज्ञापयिष्यति ॥ २८
इति सम्भाषमाणायां देव्यां एवाज्ञया तदा।
व्याघ्रः सख्या समानीय पुरोऽवस्थापितस्तथा ॥ २९
तं प्रेक्ष्याह पुनर्देवी देवानीतमुपायनम्।
व्याघ्रं पश्य न चानेन सदृशो मदुपासकः ॥ ३०
अनेन दुष्टसत्त्वेभ्यो रक्षितं मत्तपोवनम्।
अतीव मम भक्तश्च विस्रब्धश्च स्वरक्षणात् ॥ ३१
स्वदेशञ्च परित्यज्य प्रसादार्थं समागतः।
यदि प्रीतिरभून्मत्तो यदि प्रीतिं करोषि मे ॥ ३२
नित्यमन्तःपुरद्वारि नियोगान्नन्दिनः स्वयम्।
रक्षिभिः सह तच्चिह्नैर्वर्त्ततामयमीश्वर ॥ ३३
मधुरं प्रणयोदर्कं श्रुत्वा देव्याः शुभं वचः।
प्रीतोऽस्मीत्याह तं देवः स चादृश्यत तत्क्षणात् ॥ ३४
बिभ्रद्वेत्रलतां हैमीं रत्नचित्रञ्च कञ्चुकम्।
छुरिकामुरगप्रख्यां गणेशो रक्षवेषधृक् ॥ ३५
यस्मात् सोमो महादेवो नन्दी चानेन नन्दितः।
सोमनन्दीति विख्यातस्तस्मादेष समाख्यया ॥ ३६
इत्थं देव्याः प्रियं कृत्वा देवश्चार्द्धेन्दुभूषणः।
भूषयामास तां दिव्यैर्भूषणै रत्नभूषितैः ॥ ३७
ततः स गौरीं गिरिशो गिरीन्द्रजां
सगौरवं सर्व्वमनोहरां हरः।
स्वमङ्कमारोप्य वराङ्गभूषणै-
र्विभूषयामास शशाङ्कभूषणः ॥ ३८
इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्व्विंशोऽध्यायः।

ऋषय ऊचुः।
देवीं समादधानेन देवेनेदं किमीरितम्।
अग्नीषोमात्मकं विश्वं वागर्थात्मकमित्यपि ॥ १
आज्ञैकसारमैश्वर्य्यमाज्ञा त्वमिति चोदितम्।
तदिदं श्रोतुमिच्छामो यथावदनुपूर्व्वशः ॥ २
वायुरुवाच।
अग्निरित्युच्यते रौद्री घोरा या तैजसी तनुः।
सोमः शाक्तोऽमृतमयः शक्तेः शान्तिकरी तनुः ॥ ३
अमृतं यत्प्रतिष्ठा सा तेजोविद्याकला स्वयम्।
भूतसूक्ष्मेषु सर्व्वेषु ते एव रस-तेजसी ॥ ४
विविधा तेजसो वृत्तिः सूर्य्यात्मा चानलात्मिका।
तथैव रसवृत्तिश्च सोमात्मा च जलात्मिका ॥ ५
वैद्युतादिमयं तेजो मधुरादिमयो रसः।
तेजो-रसविभेदैस्तु धृतमेतच्चराचरम् ॥ ६
अग्नेरमृतनिष्पत्तिरमृतेनाग्निरेधते।
अतएव हविः कॢप्तमग्नीषोमं जगद्धितम् ॥ ७
हविषे शस्यसम्पत्तिर्वृष्टिः शस्याभिवृद्धये।
वृष्टेर्य च हविस्तस्मादग्नीषोमधृतं जगत् ॥ ८
अग्निरूर्द्धं ज्वलत्येष यावत् सौम्यं परामृतम्।
यावदग्न्यास्पदं सौम्यममृतञ्च स्रवत्यधः ॥ ९
अतएव हि कालाग्निरधस्ताच्छक्तिरूर्द्धतः।
तावता दहनञ्चोर्द्ध्वमधश्चाप्लावनं भवेत् ॥ १०
आधारशक्त्यैव धृतः कालाग्निरयमूर्द्धगः।
तथैव निम्नगः सोमः शिवशक्तिपदास्पदः ॥ ११
शिवश्चोर्द्ध्वमधः शक्तिरूर्द्ध्वं शक्तिरधः शिवः।
तदित्थं शिव-शक्तिभ्यां नाव्याप्तमिह किञ्चन ॥ १२
असकृच्चाग्निना दग्धं जगद्यद्भस्मसात्कृतम्।
अग्नेर्वीर्य्यमिदं प्राहुस्तद्वीर्य्यं भस्म यत् ततः ॥ १३
यश्चेत्थं भस्मसद्भावं ज्ञात्वा स्नाति च भस्मना।
अग्निरित्यादिभिर्मन्त्रैर्बद्धः पाशाद्विमुच्यते ॥ १४
अग्नेर्वीर्य्यन्तु तद्भस्म सोमेनाप्लावितं पुनः।
अयोगयुक्त्या प्रकृतेरधिकाराय कल्पते ॥ १५
योगयुक्त्या तु तद्भस्म प्लाव्यमानं समन्ततः।
शाक्तेनामृतवर्षेण चाधिकारान्निवर्त्तयेत् ॥ १६

शती मृत्युजयायेदममृतप्लावनं सताम्।
शिव-शक्त्यमृतस्पर्शे लब्ध एव कुतो मृतिः ॥ १७
यो वेद दहनं गुह्यं प्लावनञ्च यथोदितम्।
अग्नीषोमपुटं हित्वा न स भूयोऽभिजायते ॥ १८
शिवाग्निना तनुं दग्ध्वा शक्तिसौम्यामृतेन यः।
प्लावयेद्योगमार्गेण सोऽमृतत्वाय कल्पते ॥ १९
हृदमर्थं हृदि कृत्य दैवेन समुदाहृतम्।
अग्नीषोमात्मकं विश्वं जगदित्यनुरूपतः ॥ २०

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे चतुर्व्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

वायुरुवाच।

अथ वक्ष्यामि जगतो वागर्थात्मकता यथा।
षड्ध्ववेदनं सम्यक् समासान्न तु विस्तरात्। १
नास्ति कश्चिद्शब्दोऽर्थो नापि शब्दो निरर्थकः।
काले हि समये शब्दः सर्व्वः सर्व्वार्थबोधकः ॥ २
प्रकृतेः परिणामोऽयं द्विधा शब्दार्थभावितः।
तामाहुः प्रकृतिं भूतिं शिवयोः परमात्मनोः ॥ ३
शब्दात्मिका भूतिर्या सा त्रिधा कथ्यते बुधैः।
स्थूला सूक्ष्मा परा चेति स्थूला या श्रुतिगोचरा ॥४
सूक्ष्मा चिन्तामयी प्रोक्ता चिन्तया रहिता परा।
या परा सा क्रियाशक्तिः शिवतत्त्वसमाश्रया ॥ ५
ज्ञानशक्तिसमायोगादिच्छोपोद्बलिता तथा।
सर्व्वशक्तिसमष्ट्यात्मा शक्तितत्त्वसमाख्यया ॥ ६
समस्तकार्यजातस्य मूलप्रकृततितां गता।
सैव कुण्डलिनी माया शुद्धाध्वपरमा सती ॥ ७
सा त्रिभागस्वरूपैव षड्ध्वात्मा विजृम्भते।
तत्र शब्दास्त्रयोऽध्वानस्त्रयश्चार्थाः समीरिताः ॥ ८
सर्व्वेषामपि ते पुंसा नैजशुद्ध्यनुरूपतः।
लय-भोगाधिकाराय पर्य्याप्ता इति निश्चयः ॥ ९
मन्त्राध्वा च पदाध्वा च वर्णाध्वा चेति शब्दतः।
भुवनाध्वा च तत्त्वाध्वा कलाध्वा चार्थतः क्रमात्॥१०
तत्रान्योऽन्यञ्च सर्व्वेषां व्याप्य-व्यापकतोच्यते।
मन्त्राः सर्व्वे पदैर्व्याप्ता वाक्यभावात् पदानि च ॥११

वर्णैर्वर्णसमूहं हि पदमाहुर्व्विपश्चितः।
वर्णास्तु भुवनैर्व्याप्तास्तेषां तेषूपलक्षनात् ॥ १२
भुवनान्यपि तत्त्वौघैरण्डस्यान्तर्वहिः क्रमात्।
व्याप्तानि कारणैस्तत्त्वैरारब्धलाद्यनेकशः ॥ १३
अन्तरण्डस्थितानीह भुवनानि तु कानिचित्।
पौराणिकानि चान्यानि विज्ञेयानि शिवागमे ॥ १४
सांख्ययोगप्रसिद्धानि तत्त्वान्यपि च कानिचित्।
शिवशास्त्रप्रसिद्धानि ततोऽन्यान्यपि कृत्स्नशः ॥ १५
कलाभिस्तानि तत्त्वानि व्याप्तान्येव यथातथम्।
परस्याः प्रकृतेरादौ पञ्चधा परिणामतः ॥ १६
कलाश्च ता निवृत्त्याद्या व्याप्ताः पञ्च यथोत्तरम्।
व्यापिकातः परा शक्तिरविभक्ता षड्ध्वनाम् ॥ १७
परप्रकृतिभावस्य तत्तत्त्वाच्छिवतत्त्वतः।
शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम् ॥ १८
व्याप्तमेकेन तेनैव मृदा कुम्भादिकं यथा।
शैवं तत् परमं धाम यत् प्राप्यं षड्भिरध्वभिः ॥ १९
प्रापिका व्यापिका शक्तिः पञ्चतत्त्वविशोधनात्।
निवृत्त्या रुद्रपर्य्यन्ता स्थितिरण्डस्य शोध्यते ॥ २०
प्रतिष्ठया तदूर्द्ध्वन्तु यावदव्यक्तगोचरम्।
तदूर्द्ध्वं विद्यया मध्ये यावद्विद्येश्वरावधि ॥ २१
शान्त्या तदूर्द्ध्वमध्वान्ते विशुद्धिः शान्त्यतीतया।
यामाहुः परमं व्योम परप्रकृतियोगतः ॥ २२
एतानि पञ्च तत्त्वानि यैर्व्याप्तमखिलं जगत्।
तत्रैव सर्व्वमेवेदं द्रष्टव्यं खलु साधकैः ॥ २३
अध्वव्याप्तिमविज्ञाय शुद्धिं यः कर्त्तुमिच्छति।
स विप्रलब्धकः शुद्धेर्नालं प्रापयितुं फलम् ॥ २४
वृथा परिश्रमस्तस्य निरयायैव केवलम्।
शक्तिपातसमायोगादृते तत्त्वानि तत्त्वतः ॥ २५
तद्व्याप्तिस्तद्विशुद्धिश्च ज्ञातुमेव न शक्यते।
शक्तिराज्ञा परा शैवी चिद्रूपा परमेश्वरी ॥ २६
शिवोऽधितिष्ठत्यखिलं यया कारणभूतया।
नात्मनो नैव मायैषा न विकारो विचारतः ॥ २७
न बन्धो नापि मुक्तिश्च बन्ध-मुक्तिविधायिनी।
सर्व्वैश्वर्य्यपरा काष्ठा शिवस्याव्यभिचारिणी ॥ २८
समानधर्म्मिणी तस्य तैस्तैर्भावैर्व्विशेषतः।
स तयैव रुद्री सापि तेनैव रुहिणी सदा ॥ २९

तयोरपत्यं यत् कार्य्यं पर-प्रकृतिजं जगत् ।
स कर्त्ता करणं चेति तयोर्भेदो व्यवस्थितः ॥ ३०
एक एव शिवः साक्षाद्द्विधासौ समवस्थितः ।
स्त्रीपुंसभावेन तयोर्भेद इत्यपि केचन ॥ ३१
अपरे तु परा शक्तिः शिवस्य समवायिनी ।
प्रभेव भानोश्चिद्रूपा भिन्नैवेति व्यवस्थितिः ॥ ३२
तस्माच्छिवः परो हेतुस्तस्याज्ञा परमेश्वरी ।
तयैव प्रेरिता शैवी मूलप्रकृतिरव्यया ॥ ३३
महामाया च माया च प्रकृतिस्त्रिगुणेति च ।
त्रिविधा कार्य्यभेदेन सा प्रसूते षडध्वनः ॥ ३४
स वागर्थमयश्चाध्वा षड्विधो निखिलं जगत् ।
अस्यैव विस्तरं प्राह शास्त्रजातमशेषतः ॥ ३५

इति श्रीशैवे महापुराणे वायवीयसंहितायां पूर्व्वभागे षडध्वकथनं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः ।

ऋषय ऊचुः ।

चरित्राणि विचित्राणि गुह्यानि गहनानि च ।
दुर्व्विज्ञेयानि देवस्य मोहयन्ति मनांसि नः ॥ १
शिवयोस्तत्त्वसम्बोधे न दोष उपलभ्यते ।
चरितैः प्राकृतो भावस्तयोरपि विभाव्यते ॥ २
ब्रह्मादयोऽपि लोकानां सृष्टिस्थित्यन्तहेतवः ।
निग्रहानुग्रहौ प्राप्य शिवस्य वशवर्त्तिनः ॥ ३
शिवः पुनर्न कस्यापि निग्रहानुग्रहास्पदम् ।
अतोऽनतिशयैश्वर्य्यं तस्यैवेति विनिश्चितम् ॥ ४
यच्चेदमीदृगैश्वर्य्यं तत् तु स्वातन्त्र्यलक्षणम् ।
स्वभावसिद्धञ्चेत्तस्य मूर्त्तिमत्तास्पदं भवेत् ॥ ५
न मूर्त्तिश्च स्वतन्त्रस्य घटते मूलहेतुना ।
मूर्त्तेरपि च कार्य्यत्वात् तत्सिद्धिः स्यादहेतुकी ॥ ६
सर्व्वत्र परमो भावो भावो नान्यश्च कथ्यते ।
परमापरमौ भावौ कथमेकत्र सङ्गतौ ॥ ७
निष्कलो हि स्वभावोऽस्य परमः परमात्मनः ।
स एव सकलः कस्मात् स्वभावो ह्यविपर्य्ययः ॥ ८
स्वभावोऽपि विपर्य्यस्येत् स्वतन्त्रस्येच्छया यदि ।
न करोति किमीशानो नित्यानित्यविपर्य्ययम् ॥ ९
मूर्त्त्यात्मा सकलः कश्चित् स चान्यो निष्कलाच्छिवः ।
शिवेनाधिष्ठितश्चेति सर्व्वत्र खलु कथ्यते ॥ १०
मूर्त्त्यात्मैव तदा मूर्त्तिः शिवस्यास्य भवेदिति ।
तस्यां मूर्त्तौ मूर्त्तिमतः पारतन्त्र्यं हि निश्चितम् ॥ ११
अन्यथा निरपेक्षेण मूर्त्तिः स्वीक्रियते कथम् ।
मूर्त्तिस्वीकरणं तस्मान्मूर्त्तिसाध्यफलेप्सया ॥ १२
न हि स्वेच्छाशरीरत्वं स्वातन्त्र्यायोपपद्यते ।
स्वेच्छैव तादृशी पुंसां यस्मात् कर्म्मानुसारिणी ॥ १३
स्वीकर्त्तुं स्वेच्छया देहं हातुञ्च प्रभवन्त्युत ।
ब्रह्मादयः पिशाचान्ताः किं ते कर्म्मातिवर्त्तिनः ॥ १४
इच्छया देहनिर्म्माणमिन्द्रजालोपमं विदुः ।
अणिमादिगुणैश्वर्य्य-वशीकारानतिक्रमात् ॥ १५
विश्वरूपं दधद्विष्णुर्दधीचेन महर्षिणा ।
युध्यता समुपालब्धस्तद्रूपं दधता स्वयम् ॥ १६
सर्व्वस्मादधिकस्यापि शिवस्य परमात्मनः ।
शरीरवत्तयान्यात्म-साधर्म्यं प्रतिभाति नः ॥ १७
सर्व्वानुग्राहकं प्राहुः शिवं परमकारणम् ।
स निगृह्णाति देवादीन् सर्व्वानुग्राहकः कथम् ॥ १८
बिभेद वज्रशो देवो ब्रह्मणः पञ्चमं शिरः ।
विष्णोरपि नृसिंहस्य रभसा शरभाकृतिः ॥ १९
बिभेद पञ्चग्रामाक्रस्य हृदयं नखरैः खरैः ।
देवस्त्रीषु च देवेषु दक्षस्याध्वरकारणात् ॥ २०
वीरभद्रेण वीरेण न हि कश्चिददण्डितः ।
पुरत्रयञ्च सस्त्रीकं सदैत्यं सह बालकैः ॥ २१
क्षणेनैकेन देवेन नेत्राग्नेरिन्धनीकृतम् ।
प्रजानां रतिहेतुश्च कामो रतिपतिः स्वयम् ॥ २२
क्रोशतामेव देवानां हुतो नेत्रहुताशने ।
गावश्च काश्चिद्दुग्धौघं स्रवन्त्यो मूर्ध्नि खेचराः ॥ २३
सरुषा प्रेक्ष्य देवेन तत्क्षणाद्भस्मसात्कृताः ।
जलन्धरासुरोदीर्णश्चक्रीकृत्य जलं पदा ॥ २४
बद्धानन्तेन यो विष्णुं चिक्षेप शतयोजनम् ।
तमेव जलसन्धायी शूलेनैव जघान सः ॥ २५
तच्चक्रं तपसा लब्ध्वा लब्धवीर्य्यो हरिः सदा ।
जिघांसते सुरारीणां कुलं निर्घृणचेतसाम् ॥ २६
त्रिशूलेनान्धकस्योरः शिखिनेवोपतापितम् ।

कण्ठात् कालाङ्गनां सृष्ट्वा दारुकोऽपि निपातितः २७
कौशिकीं जनयित्वा तु गौर्य्याः स्वकोशगोचराम् ।
शुम्भः सह निशुम्भेन प्रापितो मरणं रणे ॥ २८
श्रुतञ्च महदाख्यानं स्कान्दे स्कन्दसमाश्रयम् ।
वधार्थं तारकाख्यस्य दैत्येन्द्रस्येन्द्रविद्विषः ॥ २९
ब्रह्मणाभ्यर्थितो देवो मन्दरान्तःपुरं गतः ।
विहृत्य सुचिरं देव्या विहारातिप्रसङ्गतः ॥ ३०
रसां रसातलं नीतामिव ज्ञात्वाभिघाततः ।
देवीञ्च वञ्चयंस्तस्यां स्ववीर्य्यमतिदुर्व्वहम् ॥ ३१
अविसृज्य विसृज्याग्नौ हविःपूतमिवामृतम् ।
गङ्गादिष्वपि निक्षिप्य वह्निद्वारा तदंशतः ॥ ३२
तत् समाहृत्य शनकैः स्तोकं स्तोकमितस्ततः ।
स्वाहया कृत्तिकारूपात् स्वभर्त्रा रममाणया ॥ ३३
सुवर्णीभूतया न्यस्तं मेरौ शरवणे क्वचित् ।
सन्दीपयित्वा कालेन तस्य भासा दिशो दश ॥ ३४
रञ्जयित्वा गिरीन् सर्व्वान् काञ्चनीकृत्य मेरुणा ।
ततश्चिरेण कालेन सञ्जाते तत्र तेजसि ॥ ३५
कुमारे सुकुमाराङ्गे कुमाराणां निदर्शने ।
तच्छैशवं स्वरूपञ्च तस्य दृष्ट्वा मनोहरम् ॥ ३६
सह देवासुरैर्लोकैर्विस्मिते च विमोहिते ।
देवोऽपि स्वयमायातः पुत्रदर्शनलालसः ॥ ३७
सह देव्याङ्कमारोप्य तत् तस्य स्मेरमाननम् ।
पीत्वामृतमिव स्नेह-विवशेनान्तरात्मना ॥ ३८
देवेष्वपि च पश्यत्सु वीतरागैस्तपस्विभिः ।
स्वस्य वक्षःस्थले रङ्गे नर्त्तयित्वा कुमारम् ॥ ३९
अनुभूय च तत्क्रीडां सम्भाष्य च परस्परम् ।
स्तन्यमाज्ञापयद्देव्याः पाययित्वामृतोपमम् ॥ ४०
तवावतारो जगतां हितायेत्यनुशास्य च ।
स्वयं देवश्च देवी च न तृप्तिमुपजग्मतुः ॥ ४१
ततः शक्रेण सन्धाय बिभ्यता तारकासुरात् ।
कारयित्वाभिषेकञ्च सैनापत्ये दिवौकसाम् ॥ ४२
पुत्रमन्तरतः कृत्वा देवेन त्रिपुरद्विषा ।
स्वयमन्तर्हितेनैव स्कन्दमिन्द्राभिरक्षितम् ॥ ४३
तच्छक्त्या क्रौञ्चभेदिन्या युधि कालाग्निकल्पया ।
छेदितं तारकस्यापि शिरः शङ्कभिया सह ॥ ४४
तथा रक्षोऽधिपः साक्षाद्रावणो बलगर्व्वितः ।
उद्धरन् स्वभुजैर्दीर्घैः कैलासं गिरिमात्मनः ॥ ४५
तद्रागोऽसहमानस्य देवदेवस्य शूलिनः ।
पादाङ्गुष्ठपरिस्पन्दान्ममज्ज मर्दितो भुवि ॥ ४६
वटोः कस्यचिदर्थेन स्वाश्रितस्य गतायुषः ।
त्वरयागत्य देवेन पादान्तं गमितोऽन्तकः ॥ ४७
स्ववाहनमविज्ञाय वृषेन्द्रं वड़वानलः ।
सगलग्रहमानीतस्ततस्त्वेकोदकं जगत् ॥ ४८
अलोकविदितैस्तैस्तैर्नृत्यैरानन्दसुन्दरैः ।
अङ्गहारवशेनेदमसकृच्चलितं जगत् ॥ ४९
शान्त एव सदा सर्व्वमनुगृह्णाति चेच्छिवः ।
सर्व्वान् युगपदेवैष कथं शक्तो न मोचयेत् ॥ ५०
अनादिकर्म्मवैचित्र्यमपि नात्र नियामकम् ।
कारणं खलु कर्म्मापि भवेदीश्वरकारितम् ॥ ५१
किमत्र बहुनोक्तेन नास्तिक्यं हेतुकारितम् ।
यथास्मासु निवर्त्तेत तथा कथय मारुत ॥ ५२

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः ।

वायुरुवाच ।

स्थाने संशयितं विप्रा भवद्भिर्हेतुचोदितैः ।
जिज्ञासा हि न नास्तिक्यं साधयेत् साधुबुद्धिषु ॥ १
प्रमाणमत्र वक्ष्यामि सतां मोहनिवर्त्तकम् ।
असतान्त्वन्यथाभावः प्रसादेन विना प्रभोः ॥ २
शिवस्य परिपूर्णस्य परानुग्रहमन्तरा ।
न किञ्चिदपि कर्त्तव्यमिति साधुविनिश्चितम् ॥ ३
स्वभाव एव पर्य्याप्तः परानुग्रहकर्म्मणि ।
अन्यथा निःस्वभावेन न किमप्यनुगृह्यते ॥ ४
परं सर्व्वमनुग्राह्यं पशु-पाशात्मकं जगत् ।
परस्यानुग्रहार्थस्तु पत्युराज्ञासमन्वयः ॥ ५
पतिराज्ञापकः सर्व्वमनुगृह्णाति सर्व्वदा ।
तदर्थमर्थस्वीकारे परतन्त्रः कथं शिवः ॥ ६
अनुग्राह्यानपेक्षोऽस्ति न हि कश्चिदनुग्रहः ।
अतः स्वातन्त्र्यशब्दार्थो नानपेक्षत्वलक्षणः ॥ ७
यत्तत् पुनरनुग्राह्यं परतन्त्रं तदिष्यते ।

अनुग्रहाद्दते तस्य भुक्ति-मुक्त्योरनन्वयात् ॥ ८
मूर्त्त्यात्मानोऽप्यनुग्राह्याः शिवाज्ञाननिवर्त्तनात् ।
अज्ञानाधिष्ठितं यस्मोर्न किञ्चिदिह विद्यते ॥ ९
येनोपलभ्यतेऽस्माभिः सकलेनातिनिष्कलः ।
स मूर्त्त्यात्मा शिवस्यैव मूर्त्तिरित्युपचर्य्यते ॥ १०
न ह्यसौ निष्कलः साक्षाच्छिवः परमकारणम् ।
साकारेणानुभाव्येन केनाप्यनुपलक्षितः ॥ ११
प्रमाणगम्यतामात्रं तत्स्वभावोपपादकम् ।
न तावतात्रापेक्षा धीरुपलक्षणमन्तरा ॥ १२
आत्मोपलक्षणं साक्षान्मूर्त्तिरेव हि काचन ।
शिवस्य मूर्त्तिमूर्त्त्यात्मा यतस्तस्योपलक्षणम् ॥ १३
यथा काष्ठाद्यनारूढो न वह्निरुपलभ्यते ।
एवं शिवोऽपि मूर्त्त्यात्मन्यनारूढ इति स्थितिः ॥१४
यथाग्निमानयेत्युक्ते ज्वलत्काष्ठादृते स्वयम् ।
नाग्निरानीयते तद्वत् पूज्यो मूर्त्त्यात्मना शिवः ॥ १५
अतएव हि पूजादौ मूर्त्त्यात्मपरिकल्पनम् ।
मूर्त्त्यात्मनि कृतं साक्षाच्छिव एव कृतं यतः ॥ १६
लिङ्गादावपि तत्कृत्यमर्चायाञ्च विशेषतः ।
तत्तन्मूर्त्त्यात्मभावेन शिवोऽस्माभिरुपास्यते ॥ १७
यथानुगृह्यते सोऽपि मूर्त्त्यात्मा परमेष्ठिना ।
तथा मूर्त्त्यात्मनिष्ठेन शिवेन पशवो वयम् ॥ १८
लोकानुग्रहणायेव शिवेन परमेष्ठिना ।
सदाशिवादयः सर्व्वे मूर्त्त्यात्मानोऽप्यधिष्ठिताः ॥१९
ते हि मूर्त्त्यात्मभावेन लब्ध्वा स्वयमनुग्रहम् ।
अन्यात्मनोऽनुगृह्णन्ति शिवेन समधिष्ठिताः ॥ २०
आत्मनामेव भोगाय मोक्षाय च विशेषतः ।
तस्मात्तत्स्वरूपेषु मूर्त्त्यात्मसु शिवान्वयः ॥ २१
भोगः कर्म्मविपाकात्मा सुखदुःखात्मको यतः ।
न च कर्म्म शिवेऽस्तीति तस्य भोगः किमात्मकः ॥२२
सर्व्वं शिवोऽनुगृह्णाति न निगृह्णाति किञ्चन ।
निगृह्णतान्तु ये दोषाः शिवे तेषामसम्भवात् ॥ २३
ये पुनर्निग्रहाः केचिद्ब्रह्मादिषु निदर्शिताः ।
तेऽपि लोकहितायेव कृताः श्रीकण्ठमूर्त्तिना ॥ २४
अण्डस्याप्याधिपत्यं हि श्रीकण्ठस्य न संशयः ।
श्रीकण्ठाख्यां शिवो मूर्त्तिं क्रीड़न्तीमधितिष्ठति ॥२५
सदोषा एव देवद्याद्या निगृहीता यथोचितम् ।
ततस्तेऽपि विपाप्मानः प्रजाश्च विगतज्वराः ॥ २५
निग्रहोऽपि स्वरूपेण विदुषां न जुगुप्सितः ।
अत एव हि दण्डेशेषु दण्डो राज्ञां प्रशस्यते ॥ २६
यस्मिन्निरीश्वरत्वेन कार्य्यवर्गस्य कृत्स्नशः ।
न स चेदीशतां कुर्य्याज्जगतः कथमीश्वरः ॥ २७
ईशता च विधातृत्वं विधिराज्ञापनं परम् ।
आज्ञा चेत्यमिदं कुर्य्यान्न कुर्य्यादिति शासनम् ॥ २८
तच्छासनानुवर्त्तित्वं साधुभावस्य लक्षणम् ।
विपरीतमसाधु स्यान्न सर्व्वं तत् तु दृश्यते ॥ ३०
साधु संरक्षणीयञ्चेद्विनिवर्त्त्यमसाधु यत् ।
विनिवर्त्तने च सामादिरन्ते दण्डो हि साधनम् ॥ ३१
हितार्थलक्षणञ्चेदं दण्डान्तमनुशासनम् ।
अतोऽन्यद्विपरीतं तदहितं सम्प्रचक्षते ॥ ३२
हिते सदा निषण्णानामीश्वरः स्यान्निदर्शनम् ।
स कथं दूष्यते सद्भिरसतामेव निग्रहात् ॥ ३३
अयुक्तकारिणो लोके गर्हणीया विवेकिना ।
यदुद्वेजयते लोकं तदयुक्तं प्रचक्षते ॥ ३४
सर्व्वोऽपि निग्रहो लोके न च विद्वेषपूर्व्वकः ।
न हि द्वेष्टि पिता पुत्त्रं यो निगृह्यापि शिक्षयेत् ॥ ३५
माध्यस्थेनापि निग्राह्यान् यो निगृह्णाति मार्गतः ।
तस्याप्यवश्यं यत्किञ्चिन्नैर्घृण्यमनुवर्त्तते ॥ ३६
अन्यथा न हिनस्त्येव सदोषानप्यसौ परान् ।
हिनस्ति चायमप्यज्ञान् परं माध्यस्थमाचरन् ॥ ३७
तस्माद्दुःखात्मिकां हिंसां कुर्व्वाणो यः स निर्घृणः ।
इति निर्व्वन्धयन्त्येके नियमो नेति चापरे ॥ ३८
निदानज्ञस्य भिषजो रुग्णे हिंसां प्रयुञ्जतः ।
न किञ्चिदपि नैर्घृण्यं घृणैवात्र प्रयोजिका ॥ ३९
घृणापि न गुणायैव हिंस्रेषु प्रतियोगिषु ।
तादृशेषु घृणी भ्रान्त्या घृणान्तरितनिर्घृणः ॥ ४०
उपेक्षापि हि दोषाय रक्ष्येषु प्रतियोगिषु ।
शक्तयां सत्यामुपेक्षातो रक्ष्यः सद्यो विपद्यते ॥ ४१
सर्पस्यास्यगतं पश्यन् यस्तु रक्ष्यमुपेक्षते ।
दोषाभासात् समुत्प्रेक्ष्यः फलतः सोऽपि निर्घृणः ।
तस्माद्घृणा गुणायैव सर्व्वथेति न सम्मतम् ।
सम्मतं प्राप्तकारित्वं सर्व्वन्त्वन्यदसम्मतम् ॥ ४२
मूर्त्त्यात्मस्वपिरागाद्या दोषाः सन्त्येव वस्तुतः ।

तथापि तेषामेवैते न शिवस्य तु सर्व्वथा ॥ ४४
अन्तावपि समाविष्टं ताम्रं खलु सकालिकम् ।
इति नालिरसौ दुष्येत् ताम्रसंसर्गकारणात् ॥ ४५
नालेरशुचिसंसर्गादशुचित्वमुपेयते ।
अशुचेस्त्वग्निसंयोगाच्छुचित्वमपि जायते ॥ ४६
एवं शोध्यात्मसंसर्गान्न ह्यशुद्धः शिवो भवेत् ।
शिवसंसर्गतस्त्वेष शोध्यात्मैव हि शुध्यति ॥ ४७
अयस्यग्नौ समाविष्टे दाहोऽग्नेरेव नायसः ।
मूर्त्यात्मन्येवमैश्वर्य्यमीश्वरस्यैव नात्मनाम् ॥ ४८
न हि काष्ठं ज्वलत्यूर्ध्वमग्निरेव ज्वलत्यसौ ।
काष्ठस्याङ्गारता नाग्नेरेवमत्रापि योज्यताम् ॥ ४९
अत एव जगत्यस्मिन् काष्ठ-पाषाण-मृत्स्वपि ।
शिवावेशवशादेव शिवत्वमुपचर्य्यते ॥ ५०
मैत्र्यादयो गुणा गौणा यस्मात् ते चित्तवृत्तयः ।
तैर्गुणैरुपरक्तानां दोषाय च गुणाय च ॥ ५१
यत् तु गौणमगौणञ्च तत् सर्व्वमनुगृह्णतः ।
न गुणाय न दोषाय शिवस्य गुणवृत्तयः ॥ ५२
न चानुग्रहशब्दार्थं गौणमाहुर्विपश्चितः ।
संसारमोचनं किन्तु शैवमाज्ञामयं हितम् ॥ ५३
हितं तदाज्ञाकरणं यद्धितं तदनुग्रहः ।
सर्व्वं हिते नियुञ्जानः सर्व्वानुग्राहकः शिवः ॥ ५४
वस्तूपकारशब्दार्थस्तमध्याहुरनुग्रहम् ।
तथापि हितरूपत्वाच्छिवः सर्व्वोपकारकः ॥ ५५
हिते सदा नियुक्तान्तु सर्व्वं चिदचिदात्मकम् ।
स्वभावप्रतिबन्धं तत् समं न लभते हितम् ॥ ५६
यथा विकासं यान्त्येव रवेः पद्मानि भानुभिः ।
समं न विकसन्त्येव स्वस्वभावानुरोधतः ॥ ५७
स्वभावोऽपि हि भावानां भाविनोऽर्थस्य कारणम् ।
न हि स्वभावतोऽसन्तमर्थं कर्त्तुं साधयेत् ॥ ५८
सुवर्णमेव नाङ्गारं द्रावयत्यग्निसङ्गमः ।
एवं पक्वमलानेव मोचयेन्न शिवः परान् ॥ ५९
यद्यथा भवितुं योग्यं तत् तथा न भवेत् स्वयम् ।
विना भावनया कर्त्ता स्वतन्त्रः सन्ततौ भवेत् ॥ ६०
स्वभावविमलो यद्वत् सर्व्वानुग्रहकारकः ।
स्वभावमलिनास्तद्वदात्मानो जीवसंज्ञिताः ॥ ६१
अन्यथा संसरन्त्येते नियमान्न शिवः कथम् ।
कर्म्ममायानुबन्धोऽस्य संसारः कथ्यते बुधैः ॥ ६२
अनुबन्धो यमस्यैव न शिवस्येति हेतुमान् ।
स हेतुरात्मनामेव निजो नागन्तुको मलः ॥ ६३
आगन्तुकत्वे तस्यापि भाव्यं केनापि हेतुना ।
योऽयं हेतुरसावेकः कल्पतेऽनेकशक्तिकः ॥ ६४
कार्य्यभेदोऽपि तच्छक्तिभेदो नात्रोपपद्यते ।
कर्म्ममायानुबन्धो यः स विचित्रः स्वभावतः ॥ ६५
आत्मतायाः समत्वेऽपि बद्धा मुक्ताः परे यतः ।
बद्धेष्वेव पुनः केचिल्लय-भोगाधिकारतः ॥ ६६
ज्ञानैश्वर्य्यादिवैषम्यं भजन्ते सोत्तराधराः ।
केचिन्मूर्त्त्यात्मतां यान्ति केचिदासन्नगोचराः ॥ ६७
मूर्त्त्यात्मसु शिवाः केचिदध्वनां मूर्द्धसु स्थिताः ।
मध्ये महेश्वरा रुद्रास्त्वर्व्वाचीनपदे स्थिताः ॥ ६८
आसन्नेऽपि समाविष्टे परस्तात् कारणत्रयम् ।
तत्राप्यात्मा स्थितोऽधस्तादन्तरात्मा तु मध्यतः ॥ ६९
परस्तात् परमात्मेति ब्रह्म-विष्णु-महेश्वराः ।
वर्त्तन्ते पशवः केचित् परमात्मपदाश्रयाः ॥ ७०
अन्तरात्मपदे केचित् केचिदात्मपदे तथा ।
शान्त्यतीतपदे शैवाः शान्तौ माहेश्वरा मताः ॥ ७१
विद्यायान्तु तथा रौद्राः प्रतिष्ठायान्तु वैष्णवाः ।
निवृत्तौ च तथात्मानो ब्राह्मा ब्रह्माद्ययोनयः ॥ ७२
देवयोन्यष्टकं मुख्यं मानुष्यमथ मध्यमम् ।
पश्वादयोऽधमाः पञ्च योनयस्ताश्चतुर्द्दश ॥ ७३
उत्तराधरभावोऽपि नैजः संसारिणो मलः ।
यथामभावो भुक्तस्य पूर्व्वं पश्चात् तु पक्वता ॥ ७४
मलोऽप्यामश्च पक्वश्च भवेत् संसारकारणम् ।
आमे त्वधरता पुंसां पक्वे तूत्तरता क्रमात् ॥ ७५
पश्वात्मानस्त्रिधाभिन्ना एक-द्वि-त्रिमलाः क्रमात् ।
तत्रोत्तरा ह्येकमला द्विमला मध्यमा मताः ॥ ७६
त्रिमलास्त्वधमा ज्ञेया यथोत्तरमधिष्ठिताः ।
त्रिमलानधितिष्ठन्ति द्विमलैकमलाः क्रमात् ॥ ७७
एक-द्वि-त्रिमलान् सर्व्वाञ्छिव एकोऽधितिष्ठति ।
अशिवात्मकमप्येतच्छिवेनाधिष्ठितं तथा ॥ ७८
असद्रात्मकमप्येवं रुद्रैर्जगदधिष्ठितम् ।
अण्डान्ता हि महाभूमिः शतरुद्राद्यधिष्ठिता ॥ ७९
मायान्तमन्तरिक्षन्तु अमरेशादिभिः क्रमात् ।

अङ्गुष्ठमात्रपर्य्यन्तैः समन्तात् सन्ततं ततम् ॥ ८०
महामायावसाना यौर्व्वामाद्यैर्भुवनाधिपैः ।
अनाश्रिता तैरध्वान्तर्व्वर्त्तिभिः समधिष्ठिता ॥ ८१
ते हि साक्षाद्दिविषदस्तदन्तरिक्षसदस्तथा ।
पृथिवीषद इत्येवं देवा देवव्रतैः स्तुताः ॥ ८२
एवं त्रिभिर्मलैरेभिः पक्षैरेव पृथक् पृथक् ।
निदानभूतैः संसाररोगः पुंसां प्रवर्त्तते ॥ ८३
अस्य रोगस्य भैषज्यं ज्ञानमाज्ञौषधोद्भवम् ।
भिषगाज्ञापकः शम्भुः शिवः परमकारणम् ॥ ८४
अदुःखेनापि शक्तश्चेत् पशून् मोचयितुं शिवः ।
कथं दुःखं करोतीति नात्र कार्य्या विचारणा ॥ ८५
दुःखमेव हि सर्व्वोऽपि संसार इति निश्चितम् ।
कथं दुःखमदुःखं स्यात् स्वभावो ह्यविपर्य्ययः ॥ ८६
न हि रोगो ह्यरोगः स्याद्भिषग्भैषज्यकारणात् ।
रोगार्त्तन्तु भिषग्योगाद्भैषज्यैः सुखमुद्धरेत् ॥ ८७
एवं स्वभावमलिनान् स्वभावाद्दुःखिनः पशून् ।
स्वाज्ञौषधविधानेन दुःखान्मोचयति शिवः ॥ ८८
न भिषक् कारणं रोगे शिवः संसारकारणम् ।
इत्येतदपि वैषम्यं न दोषायास्य कल्पते ॥ ८९
दुःखस्वभावसंसिद्धेः कथं तत्कारणं शिवः ।
स्वाभाविको मलः पुंसां स हि संसारयत्यमून् ॥ ९०
संसारकारणं यत् तु मलं मायाद्यचेतनम् ।
तत् स्वयं सम्प्रवर्त्तेत शिवसान्निध्यमन्तरा ॥ ९१
यथा मणिरयस्कान्तः सान्निध्यादुपकारकः ।
अयसश्चलतस्तद्वच्छिवोऽप्यस्येति सूरयः ॥ ९२
न निवर्त्तयितुं शक्यं सान्निध्यं सहकारणम् ।
अधिष्ठाता ततो नित्यमज्ञातो जगतः शिवः ॥ ९३
न शिवेन विना किञ्चित् प्रवृत्तमिह विद्यते ।
तत्प्रेरितमिदं सर्व्वं तथापि स न दुष्यति ॥ ९४
शक्तिराज्ञात्मिका तस्य नियन्त्री विश्वतोमुखी ।
तया ततमिदं शश्वत् तथापि स न दुष्यति ॥ ९५
अनिदंप्रथमं सर्व्वमीशितव्यं स ईश्वरः ।
ईशनाच्च तदीयाज्ञा तथापि स न दुष्यति ॥ ९६
योऽन्यथा मन्यते मोहात् स विनश्यति दुर्म्मतिः ।
तच्छक्तिवैभवादेव तथापि स न दुष्यति ॥ ९७
एतस्मिन्नन्तरे व्योम्नि शौती वागशरीरिणी ।
सत्यमोमम्तं सत्यमित्याविरभवत् स्फुटम् ॥ ९८
ततो हृष्टतराः सर्व्वे विनष्टाशेषसंशयाः ।
मुनयो विस्मयाविष्टाः प्रणेमुः पवनं प्रभुम् ॥ ९९
तथा विगतसन्देहान् कृत्वापि पवनो मुनीन् ।
नैते प्रतिष्ठितज्ञाना इति मत्वैवमब्रवीत् ॥ १००

वायुरुवाच ।

परोक्षमपरोक्षञ्च द्विविधं ज्ञानमिष्यते ।
परोक्षमस्थिरं प्राहुरपरोक्षन्तु सुस्थिरम् ॥ १०१
हेतूपदेशगम्यं यत् तत् परोक्षं प्रचक्षते ।
अपरोक्षं पुनः श्रेष्ठादनुष्ठानाद्भविष्यति ॥ १०२
नापरोक्षादृते मोक्ष इति कृत्वा विनिश्चयम् ।
श्रेष्ठानुष्ठानसिद्ध्यर्थं प्रयतध्वमतन्द्रिताः ॥ १०३

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे शिवतत्त्वकथनं नाम
सप्तविंशोऽध्यायः ॥२७॥

अष्टाविंशोऽध्यायः ।

ऋषय ऊचुः ।

किं तच्छ्रेष्ठमनुष्ठानं मोक्षो येनापरोक्षितः ।
तत् तस्य साधनञ्चाद्य वक्तुमर्हसि मारुत ॥ १

वायुरुवाच ।

शैवो हि परमो धर्म्मः श्रेष्ठानुष्ठानशब्दितः ।
यत्रापरोक्षं लभ्येत साक्षान्मोक्षप्रदः शिवः ॥ २
स तु पञ्चविधो ज्ञेयः पञ्चभिः पर्व्वभिः क्रमात् ।
क्रिया-तपो-जप-ध्यान-ज्ञानात्मभिरनुत्तरैः ॥ ३
तैरेव सोत्तरैः सिद्धो धर्म्मस्तु परमो मतः ।
परोक्षमपरोक्षञ्च ज्ञानं यत्र च मोक्षदम् ॥ ४
परमोऽपरमश्चोभौ धर्म्मौ हि श्रुतिचोदितौ ।
धर्म्मशब्दाभिधेयेऽर्थे प्रमाणं श्रुतिरेव नः ॥ ५
परमो योगपर्य्यन्तो धर्म्मः श्रुतिशिरोगतः ।
धर्म्मस्त्वपरमस्तद्वदधःश्रुतिमुखे स्थितः ॥ ६
अपशवात्माधिकारः स्याद्यो धर्म्मः परमो मतः ।
साधारणस्ततोऽन्यस्तु सर्व्वेषामधिकारतः ॥ ७
स चायमपरो धर्म्मः परधर्म्मस्य साधनम् ।
धर्म्मशास्त्रादिभिः सम्यक् साङ्ग एवोपबृंहितः ॥ ८

तत्राद्यो यः परो धर्मः श्रेष्ठानुष्ठानशब्दितः ।
इतिहास-पुराणाभ्यां कथञ्चिदुपबृंहितः ॥ ९
शैवागमैस्तु स पुनः सहाङ्गोपाङ्गविस्तरः ।
सुसंस्काराधिकारश्च सम्यगेवोपबृंहितः ॥ १०
शैवागमोऽपि द्विविधः श्रौतोऽश्रौतश्च स स्मृतः ।
श्रुतिसारमयः श्रौतः स्वतन्त्र इतरो मतः ॥ ११
स्वतन्त्रो दशधा पूर्व्वं तथाष्टादशधा पुनः ।
कामिकादिसमाख्याभिः सिद्धः सिद्धान्तसंज्ञितः ॥ १२
श्रुतिसारमयो यस्तु शतकोटिप्रविस्तरः ।
परं पाशुपतं यत्र व्रतं ज्ञानञ्च कथ्यते ॥ १३
युगावर्त्तेषु शिष्येषु योगाचार्य्यस्वरूपिणा ।
तत्र तत्रावतीर्णेन शिवेनैव प्रवर्त्तते ॥ १४
संक्षिप्यास्य प्रवक्तारश्चत्वारः परमर्षयः ।
रुरुर्दधीचोऽगस्त्यश्च उपमन्युर्महायशाः ॥ १५
ते च पाशुपता ज्ञेयाः संहितानां प्रवर्त्तकाः ।
तत्सन्ततीया गुरवः शतशोऽथ सहस्रशः ॥ १६
तत्रोक्तः परमो धर्म्मश्चर्य्याद्यात्मा चतुर्व्विधः ।
तेषु पाशुपतो योगः शिवं प्रत्यक्षयेद्दृढम् ॥ १७
तस्माच्छ्रेष्ठमनुष्ठानं योगः पाशुपतो मतः ।
तत्राप्युपायः कोऽप्युक्तो ब्रह्मणा स तु कथ्यते ॥ १८
नामाष्टकमयो योगः शिवेन परिकल्पितः ।
तेन योगेन सहसा शैवी प्रज्ञा प्रजायते ॥ १९
प्रज्ञया परमं ज्ञानमचिराल्लभते स्थिरम् ।
प्रसीदति शिवस्तस्य यस्य ज्ञानं प्रतिष्ठितम् ॥ २०
प्रसादात् परमो योगो यः शिवञ्चापरोक्षयेत् ।
शिवापरोक्षात् संसारकारणेन वियुज्यते ॥ २१
ततः स्यान्मुक्तसंसारो मुक्तः शिवसमो भवेत् ।
शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः ॥ २२
संसारवैद्यः सर्व्वज्ञः परमात्मेति मुख्यतः ।
नामाष्टकमिदं नित्यं शिवस्य प्रतिपादकम् ॥ २३
आद्यन्तु पञ्चकं तत्र शान्त्यतीताद्यनुक्रमात् ।
संज्ञा सदाशिवादीनां पञ्चोपाधिपरिग्रहात् ॥ २४
उपाधिविनिवृत्तौ तु यथास्वं विनिवर्त्तते ।
पदमेव हि तन्नित्यमनित्याः पदिनः स्मृताः ॥ २५
पदानां परिवृत्तौ तु मुच्यन्ते पदिनो यतः ।
परिवृत्त्यन्तरे भूयः पदप्राप्तिरुपाधिना ॥ २६
आत्मान्तराभिधानं स्यादुक्तदाद्यं नामपञ्चकम् ।
अन्यत् तु त्रितयं नाम्नामुपादानादियोगतः ॥ २७
त्रिविधोपाधिवचनाच्छिव एवानुवर्त्तते ।
अनादिमलसंश्लेष-प्रागभावात् स्वभावतः ॥ २८
अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते ।
अथवाशेषकल्याण-गुणैकघन ईश्वरः ॥ २९
शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः ।
त्रयोविंशतितत्त्वेभ्यः परा प्रकृतिरुच्यते ॥ ३०
प्रकृतेस्तु परं प्राहुः पुरुषं पञ्चविंशकम् ।
यं वेदादौ स्वरं प्राहुर्वाच्य-वाचकभावतः ॥ ३१
वेदैकवेद्ययाथात्म्याद्वेदान्ते च प्रतिष्ठितः ।
स एव प्रकृतौ लीनो भोक्ता यः प्रकृतेर्मतः ॥ ३२
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।
तदधीनप्रवृत्तित्वात् प्रकृतेः पुरुषस्य च ॥ ३३
अथवा त्रिगुणं तत्त्वं मायेयमिदमव्ययम् ।
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ॥ ३४
मायाविक्षोभकोऽनन्तो महेश्वरसमन्वयात् ।
रुद्दुःखं दुःखहेतुर्वा तद्द्रावयति नः प्रभुः ॥ ३५
रुद्र इत्युच्यते सद्भिः शिवः परमकारणम् ।
शिवतत्त्वादि-भूम्यन्तं शरीरादि घटादि च ॥ ३६
व्याप्याधितिष्ठति शिवस्ततो रुद्रा इतस्ततः ।
जगतः पितृभूतानां शिवो मूर्त्त्यात्मनामपि ॥ ३७
पितृभावेण सर्व्वेषां पितामह उदीरितः ।
निदानज्ञो यथा वैद्यो रोगस्य विनिवर्त्तकः ॥ ३८
उपायैर्भेषजैस्तद्वल्लय-भोगाधिकारतः ।
संसारस्येश्वरो नित्यं समूलस्य निवर्त्तकः ॥ ३९
संसारवैद्य इत्युक्तः सर्व्वतत्त्वार्थवेदिभिः ।
दशार्थज्ञानसिद्ध्यर्थमिन्द्रियेष्वेषु सत्स्वपि ॥ ४०
त्रिकालभाविनो भावान् स्थूलान् सूक्ष्मानशेषतः ।
अणवो नैव जानन्ति मायायावमलावृताः ॥ ४१
असत्स्वपि च सर्व्वेषु सर्व्वार्थज्ञानहेतुषु ।
यद्वयथावस्थितं वस्तु तत् तथैव सदाशिवः ॥ ४२
अयत्नेनैव जानाति तस्मात् सर्व्वज्ञ उच्यते ।
सर्व्वात्मा परमैरेभिर्गुणैर्नित्यसमन्वयात् ॥ ४३
स्वस्मात् परात्मविरहात् परमात्मा शिवः स्वयम् ।
नामाष्टकमिदञ्चैव लब्धाचार्य्यप्रसादतः ॥ ४४

निवृत्त्यादिकलाग्रन्थीन् शिवाद्यैः पञ्चनामभिः ।
यथास्वं क्रमशः कृत्वा शोधयित्वा यथागुणम् ॥ ४५
गुणितैरेव सोद्धातैर्निरुद्धातैरथापि वा ।
हृत्कण्ठ-तालु-भ्रूमध्य-ब्रह्मरन्ध्रसमन्वितान् ॥ ४६
भित्त्वा पुर्य्यष्टकाकारं स्वात्मानञ्च सुषुम्णया ।
द्वादशान्तःस्थितस्येन्दोर्नीत्वोपरि शिवौजसि ॥ ४७
संहृत्य वा न वा पश्चाद्यथास्वं कारणे लयात् ।
शाक्तेनामृतवर्षेण संसिक्तायां तनौ पुनः ॥ ४८
अवतार्य्य स्वमात्मानममृतात्माकृतिं हृदि ।
द्वादशान्तःस्थितस्येन्दोः परस्ताच्छ्वेतपङ्कजे ॥ ४९
अर्द्धनारीश्वरं देवं निर्म्मलं मधुराकृतिम् ।
शुद्धस्फटिकसङ्काशं प्रसन्नं शीतलद्युतिम् ॥ ५०
ध्यात्वा नामाष्टकेनैव भावपुष्पैः समर्च्चयेत् ।
अभ्यर्च्चनान्ते तु पुनः प्राणानायम्य मानवः ॥ ५१
सम्यक् चित्तं समाधाय सार्थं नामाष्टकं जपेत् ।
नाभौ चाष्टाहुतीर्हुत्वा पूर्णां कृत्वा नमस्ततः ॥ ५२
अष्टपुष्पप्रदानेन कृत्वार्च्चनमन्तिमम् ।
निवेदयेत् स्वमात्मानं चुलुकोदकवर्त्मना ॥ ५३
एवं कृत्वाचिरादेव ज्ञानं पाशुपतं शुभम् ।
लभेत तत् प्रतिष्ठाञ्च व्रतञ्चानुत्तमं तथा ॥ ५४
योगञ्च परमं लब्ध्वा मुच्यते नात्र संशयः ॥ ५५

इति श्रीशैवे महापुराणे वायवीय-
संहितायां पूर्व्वभागेऽष्टा-
विंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः ।

ऋषय ऊचुः ।

भगवन् श्रोतुमिच्छामो व्रतं पाशुपतं परम् ।
ब्रह्मादयोऽपि यत् कृत्वा सर्व्वे पाशुपताः स्मृताः ॥ १

वायुरुवाच ।

रहस्यं वः प्रवक्ष्यामि सर्व्वपापनिकृन्तनम् ।
व्रतं पाशुपतं श्रौतमथर्व्वशिरसि श्रुतम् ॥ २
कालश्चैत्रीपौर्णमासी देशः शिवपरिग्रहः ।
क्षेत्रारामादिरन्यो वा प्रशस्तः शुभलक्षणः ॥ ३
तत्र पूर्व्वं त्रयोदश्यां सुस्नातः सुकृताह्निकः ।
अनुज्ञाप्य स्वमाचार्य्यं सम्पूज्य प्रणिपत्य च ॥ ४
पूजां वैशेषिकीं कृत्वा शुक्लाम्बरधरः स्वयम् ।
शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनः ॥ ५
दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च ।
प्राणायामत्रयं कृत्वा प्राङ्मुखो वाप्युदङ्मुखः ॥ ६
ध्यात्वा देवञ्च देवीञ्च तद्विज्ञापनवर्त्मना ।
व्रतमेतत् करोमीति भवेत् सङ्कल्प्य दीक्षितः ॥ ७
यावच्छरीरपातं वा द्वादशाब्दमथापि वा ।
तदर्द्धं वा तदर्द्धं वा मासद्वादशकन्तु वा ॥ ८
तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा ।
दिनद्वादशकं वाथ दिनषट्कमथापि वा ॥ ९
तदर्द्धं दिनमेकं वा व्रतसङ्कल्पनावधि ।
अग्निमाधाय विधिवद्विरजाहोमकारणात् ॥ १०
हुत्वाज्येन समिद्भिश्च चरुणा च यथाक्रमम् ।
पूर्णाद्याः पुरतो भूयस्तत्त्वानां शुद्धिमुद्दिशन् ॥ ११
जुहुयान्मूलमन्त्रेण तैरेव समिदादिभिः ।
तत्त्वान्येतानि मद्देहे शुध्यन्तामित्यनुस्मरन् ॥ १२
पञ्च भूतानि तन्मात्राः पञ्च कर्म्मेन्द्रियाणि च ।
ज्ञानकर्म्मविभेदेन पञ्चपञ्चविभागशः ॥ १३
त्वगादिधातवः सप्त पञ्च प्राणादिवायवः ।
मनोबुद्धिरहंख्यातिर्गुणाः प्रकृति-पूरुषौ ॥ १४
रागो विद्या कला चैव नियतिः काल एव च ।
माया च शुद्धविद्या च महेश्वर-सदाशिवौ ॥ १५
शक्तिश्च शिवतत्त्वञ्च तत्त्वानि क्रमशो विदुः ।
मन्त्रैस्तु विरजैर्हुत्वा होतासौ विरजो भवेत् ॥ १६
अथ गोमयमादाय पिण्डीकृत्याभिमन्त्र्य च ।
न्यस्याग्नौ तच्च संरक्ष्य दिने तस्मिन् हविष्यभुक् ॥ १७
प्रभाते तु चतुर्द्दश्यां कृत्वा सर्व्वं पुरोदितम् ।
दिने तस्मिन् निराहारः कालशेषं समापयेत् ॥ १८
प्रातः पर्व्वणि चाप्येवं कृत्वा होमावसानतः ।
उपसंहृत्य रुद्राग्निं गृह्णीयाद्भस्म यत्नतः ॥ १९
ततस्तु जटिलो मुण्डः शिखैकजट एव वा ।
भूत्वा स्नात्वा पुनर्वीतलज्जश्चेत् स्याद्दिगम्बरः ॥ २०
अन्यः काषायवसनश्चर्म्मचीराम्बरोऽथवा ।
एकाम्बरो वल्कली वा भवेद्दण्डी च मेखली ॥ २१

प्रक्षाल्य चरणौ पश्चाद्द्विराचम्यात्मनस्तनुम्।
सकलीकृत्य तद्भस्म विरजानलसम्भवम्॥ २२
अग्निरित्यादिभिर्मन्त्रैः षड्भिराथर्व्वणैः क्रमात्।
विमृज्याङ्गानि मूर्द्धादि-चरणान्तञ्च संस्पृशेत्॥ २३
ततस्तेन क्रमेणैव समुद्धृत्य च भस्मना।
सर्व्वाङ्गोद्धूलनं कुर्य्यात् प्रणवेन शिवेन वा॥ २४
ततस्त्रिपुण्ड्रं रचयेत् त्रियायुषसमाह्वयम्।
शिवभावं समागम्य शिवयोगं समाचरेत्॥ २५
कुर्य्यात् त्रिसन्ध्यमप्येवमेतत् पाशुपतं व्रतम्।
पूजनीयो महादेवो लिङ्गमूर्त्तिः सनातनः॥ २६
पद्ममष्टदलं हैमं नवरत्नैरलङ्कृतम्।
कर्णिकाकेशरोपेतमासनं परिकल्पयेत्॥ २७
विभवे तदभावे तु रक्तं सितमथापि वा।
पद्मं तस्याप्यभावे तु केवलं भावनामयम्॥ २८
तत्पद्मकर्णिकामध्ये कृत्वा लिङ्गं कनीयसम्।
स्फाटिकं पीठिकोपेतं पूजयेद्धि ततः क्रमात्॥ २९
प्रतिष्ठाप्य विधानेन तल्लिङ्गं कृतशोधनम्।
परिकल्प्यासनं मूर्त्तिं पञ्चवक्त्रप्रकारतः॥ ३०
पञ्चगव्यादिभिः पुण्यैर्यथाविभवविस्तरैः।
स्नापयेत् कलशैः पूर्णैः सहस्रादिषु सम्भवैः॥ ३१
गन्धद्रव्यैः सकर्पूरैश्चन्दनाद्यैः सकुङ्कुमैः।
सवेदिकं समालिप्य लिङ्गं भूषणभूषितम्॥ ३२
विल्वपत्रैश्च पद्मैश्च रक्तश्वेतैस्तथोत्पलैः।
नीलोत्पलैस्तथान्यैश्च पुष्पैस्तैस्तैः सुगन्धिभिः॥ ३३
पुण्यैश्च शतपत्रैश्च चित्रैर्दूर्व्वाक्षतादिभिः।
समभ्यर्च्च्य यथालाभं महापूजाविधानतः॥ ३४
धूपं दीपं तथा चार्घ्यं नैवेद्यञ्च समादिशेत्।
निवेदयित्वा विभवे कल्याणञ्च समाचरेत्॥ ३५
इष्टानि च विशिष्टानि न्यायेनोपार्ज्जितानि च।
सर्व्वद्रव्याणि देयानि व्रते तस्मिन् विशेषतः॥ ३६
श्रीपत्रोत्पलपद्मानां संख्या साहस्रिकी मता।
प्रत्येकमपरा संख्या शतमष्टोत्तरं द्विजाः॥ ३७
तत्रापि च विशेषेण न त्यजेद्बिल्वपत्रकम्।
हैममेकं परं प्राहुः पद्मं पद्मसहस्रकात्॥ ३८
नीलोत्पलादिष्वप्येतत् समानं बिल्वपत्रकैः।
पुष्पान्तरेष्वनियमाद्यथालाभं निवेदयेत्॥ ३९

अष्टाङ्गमर्घ्यमुत्कृष्टं धूपालेपौ विशेषतः।
कृष्णागुरुमघोराख्ये वक्त्रे सद्ये मनःशिलाम्॥ ४०
चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे।
ईशाने भसितं केचिदालेपनमितीदृशम्॥ ४१
न धूप इति मन्यन्ते धूपान्तरविधानतः।
सितागुरुमघोराख्ये मुखे कृष्णागुरुं पुनः॥ ४२
पौरुषे गुग्गुलुं सद्ये सौम्ये सौगन्धिकं मुखे।
ईशानेऽपि उशीरादि दद्याद्धूपं विशेषतः॥ ४३
शर्करा-मधु-कर्पूर-कपिलाघृतसंयुतम्।
चन्दनागुरुकाष्ठाद्यं सामान्यं सम्प्रचक्षते॥ ४४
कर्पूरवर्त्तिराज्याढ्या देया दीपावली ततः।
अर्घ्यमाचमनं देयं प्रतिवक्त्रमतः परम्॥ ४५
प्रथमावरणे पूज्यौ क्रमाद्धेरम्ब-षण्मुखौ।
ब्रह्माङ्गानि ततश्चैवं प्रथमावरणेऽर्च्चिते॥ ४६
द्वितीयावरणे पूज्या विघ्नेशासन्नवर्त्तिनः।
तृतीयावरणे पूज्या भवाद्याश्चाष्ट मूर्त्तयः॥ ४७
महादेवादयस्तत्र तथैकादश मूर्त्तयः।
चतुर्थावरणे पूज्याः सर्व्वे एव गणेश्वराः॥ ४८
वहिरेव तु पद्मस्य पञ्चमावरणे क्रमात्।
दश दिक्पतयः पूज्याः सास्त्राः सानुचरास्तथा॥ ४९
ब्रह्मणो मानसाः पुत्त्राः सर्व्वेऽपि ज्योतिषां गणाः।
सर्व्वे देवाश्च देव्यश्च सर्व्वाः सर्व्वेऽपि खेचराः॥ ५०
पातालवासिनश्चान्ये सर्व्वे मुनिगणा अपि।
योगिनो मुख्यतः सर्व्वे पञ्चमे मातरस्तथा॥ ५१
क्षेत्रपालश्च सगणाः सर्व्वञ्चैतच्चराचरम्।
अथावरणपूजान्ते सम्पूज्य परमेश्वरम्॥ ५२
साज्यं सव्यञ्जनं हृद्यं हविर्भक्त्या निवेदयेत्।
मुखवासादिकं दत्त्वा ताम्बूलं सोपदंशकम्॥ ५३
अलङ्कृत्य च भूयोऽपि नानापुष्पविभूषणैः।
नीराजनान्ते विस्तीर्णं पूजाशेषं समापयेत्॥ ५४
चन्द्रसङ्काशहारञ्च शयनीये समर्पयेत्।
आढ्यं नृपोचितं हृद्यं तत् सर्व्वमनुरूपतः॥ ५५
कृत्वा च कारयित्वा च हुत्वा च प्रतिपूजनम्।
स्तोत्रं व्यपोहनं जप्त्वा विद्यां पञ्चाक्षरीं जपेत्॥ ५६
प्रदक्षिणं प्रणामञ्च कृत्वात्मानं समर्पयेत्।
ततः पुरस्ताद्देवस्य गुरु-विप्रौ च पूजयेत्॥ ५७

दत्त्वाघ्यमष्टौ पुष्पाणि देवमुद्वास्य लिङ्गतः।
अग्नेश्चाग्निं सुसंरच्य उद्वास्य च तमप्युत ॥ ५८
प्रत्यहं जन इत्येवं कुर्य्यात् सर्व्वं पुरोदितम्।
ततस्तत् शाम्भुजं लिङ्गं सर्व्वोपकरणान्वितम् ॥ ५९
समर्पयेत् स्वगुरवे स्थापयेद्वा शिवालये।
सम्पूज्य च गुरूनन्यान् व्रतिनश्च विशेषतः ॥ ६०
भक्तान् द्विजांश्च शक्तश्चेद्दीनानाथांश्च तोषयेत्।
स्वयञ्चानशनप्रायः फलमूलाशनोऽथवा ॥ ६१
पयोव्रतो वा भिक्षाशी भवेदेकाशनस्तथा।
नक्तं युक्ताशनो नित्यं भूशय्यानिरतः शुचिः ॥ ६२
भस्मशायी तृणेशायी चीराजीनशयोऽथ वा।
ब्रह्मचर्य्यरतो नित्यं व्रतमेतत् समाचरेत् ॥ ६३
अर्कवारे तथार्द्रायां पञ्चदश्याञ्च पक्षयोः।
अष्टम्याञ्च चतुर्द्दश्यां शक्तस्तूपवसेदपि ॥ ६४
पाषण्डपतितोदक्या-सूतिकान्त्यजपूर्व्वकान्।
वर्ज्जयेत् सर्व्वयत्नेन मनसा कर्म्मणा गिरा ॥ ६५
क्षमा-दान-दया-सत्याहिंसाशीलः सदा भवेत्।
सन्तुष्टश्च प्रशान्तश्च तपो-ध्यानरतः सदा ॥ ६६
कुर्य्यात् त्रिषवणस्नानं भस्मस्नानमथापि वा।
पूजां वैशेषिकीञ्चैव मनसा कर्म्मणा गिरा ॥ ६७
बहुनात्र किमुक्तेन नाचरेदशिवं व्रती।
प्रमादात् तु तथाचारे निरूप्य गुरुलाघवम् ॥ ६८
उचितां निष्कृतिं कुर्य्यात् पूजा-होम-जपादिभिः।
आ समाप्तेर्व्रतस्यैवमाचरेन्न प्रमादतः ॥ ६९
गोदानञ्च वृषोत्सर्गं कुर्य्यात् पूजां जपं सदा।
सामान्यमेतत् कथितं व्रतस्यास्य समासतः ॥ ७०
प्रतिमासं विशेषञ्च प्रवक्ष्यामि यथाक्रमम्।
वैशाखे वज्रलिङ्गन्तु ज्यैष्ठे मारकतं शुभम् ॥ ७१
आषाढ़े मौक्तिकं विद्याच्छ्रावणे नीलनिर्म्मितम्।
मासि भाद्रपदे चैव पद्मरागमयं परम् ॥ ७२
आश्वयुज्याञ्च विधिवद्गोमेदकमयं शुभम्।
कार्त्तिक्यां वैद्रुमं लिङ्गं वैदूर्य्यं मार्गशीर्षके ॥ ७३
पुष्परागमयं पौषे माघे द्युमणिजं तथा।
फाल्गुन्यां चन्द्रकान्तोत्थं चैत्रे तद्व्यत्ययोऽथवा ॥ ७४
सर्व्वमासेषु रत्नानामलाभे हैममेव वा।
हैमाभावे राजतं वा ताम्रं शैलजमेव वा ॥ ७५

मृण्मयं वा यथालाभं क्षणिकं चान्यदेव वा।
सर्व्वगन्धमयं वाथ लिङ्गं कुर्य्यादयथारुचि ॥ ७६
व्रतावसानसमये समाचरितनैत्यकः।
कृत्वा वैशेषिकीं पूजां हुत्वा चैव यथा पुरा ॥ ७७
सम्पूज्य च सदाचार्य्यं व्रतिनश्च विशेषतः।
देशिकेनाभ्यनुज्ञातः प्राङ्मुखो वाप्युदङ्मुखः ॥ ७८
दर्भासनो दर्भपाणिः प्राणापानौ नियम्य च।
जपित्वा शक्तितो मूलं ध्यात्वा साम्बं त्रियम्बकम् ॥ ७९
अनुज्ञाप्य यथापूर्व्वं नमस्कृत्य कृताञ्जलिः।
समुत्सृजामि भगवन् व्रतमेतत् त्वदाज्ञया ॥ ८०
इत्युक्त्वा लिङ्गमूलन्तु दर्भानुत्तरतस्त्यजेत्।
ततो दण्ड-जटा-चीर-मेखलाद्यपि चोत्सृजेत् ॥ ८१
पुनराचम्य विधिवत् पञ्चाक्षरमुदीरयेत्।
यः कृत्वात्यन्तिकीं दीक्षामादेहान्तमनाकुलः ॥ ८२
व्रतमेतत् प्रकुर्व्वीत स तु वै नैष्ठिकः स्मृतः।
सोऽत्याश्रमी च विज्ञेयो महापाशुपतस्तथा ॥ ८३
स एव तपतां श्रेष्ठः स एव च महाव्रती।
न तेन सदृशः कश्चित् कृतकृत्यो मुमुक्षुषु ॥ ८४
यतिर्यो नैष्ठिको जातस्तमाहुर्नैष्ठिकोत्तमम्।
योऽनश्नन् द्वादशाहं वा व्रतमेतत् समाचरेत् ॥ ८५
सोऽपि नैष्ठिकतुल्यः स्यात् तीव्रव्रतसमन्वयात्।
घृताक्तो यश्चरेदेतद्व्रतं व्रतपरायणः ॥ ८६
द्वित्रैकदिवसं वापि स च कश्चन नैष्ठिकः।
कृत्यमित्येव निष्कामो यश्चरेद्व्रतमुत्तमम् ॥ ८७
शिवार्पितात्मा सततं न तेन सदृशः क्वचित्।
भस्मच्छन्नो द्विजो विद्वान् महापातकसम्भवैः ॥ ८८
पापैर्विमुच्यते सद्यो मुच्यते नात्र संशयः।
रुद्राग्नेर्यत् परं वीर्य्यं तद्भस्म परिकीर्त्तितम् ॥ ८९
तस्मात् सर्व्वेषु कालेषु वीर्य्यवान् भस्मसंयुतः।
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसङ्गमात् ॥ ९०
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः।
भस्मना दिग्धसर्व्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः ॥ ९१
भस्मशायी च पुरुषो भस्मकल्मषभक्षणात्।
भूतिर्भूतिकरी पुंसां रक्षा रक्षाकरी परम् ॥ ९२
किमन्यदिह वक्तव्यं भस्ममाहात्म्यकारणम्।
व्रती च भस्मना स्नातः स्वयं देवो महेश्वरः ॥ ९३

परमास्त्रञ्च शैवानां भस्मैतत् पारमेश्वरम्।
धौम्याग्रजस्य तपसि ह्यापदो यन्निवारिताः॥ ९४
तस्मात् सर्व्वप्रयत्नेन कृत्वा पाशुपतं व्रतम्।
धनवद्भस्म संरक्ष्य भस्मस्नानरतो भवेत्॥ ९५
इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे पूजाविधिनिरूपणं नाम
एकोनत्रिंशोऽध्यायः॥ २९॥

———

त्रिंशोऽध्यायः।

ऋषय ऊचुः।

धौम्याग्रजेन शिशुना क्षीरार्थं हि तपः कृतम्।
यस्मात् क्षीरार्णवो दत्तस्तस्मै देवेन शूलिना॥ १
स कथं शिशुको लेभे शिवशास्त्रप्रवक्तृताम्।
कथं वा शिवसद्भावं ज्ञात्वा तपसि निष्ठितः॥ २
कथञ्च लब्धं विज्ञानं तपश्चरणपर्व्वणि।
रुद्राग्नेर्यत् परं वीर्य्यं लेभे भस्म स्वरक्षकम्॥ ३

वायुरुवाच।

न ह्येष शिशुकः कश्चित् प्राकृतः कृतवांस्तपः।
मुनिवर्य्यस्य तनयो व्याघ्रपादस्य धीमतः॥ ४
जन्मान्तरेण संसिद्धः केनापि खलु हेतुना।
स्वपदप्रच्युतो दिष्ट्या प्राप्तो मुनिकुमारताम्॥ ५
महादेवप्रसादस्य भाग्यायत्तस्य भाविनः।
दुग्धाभिलाषप्रभवं द्वारतामगमत् तपः॥ ६
अतएव गणेशत्वं कुमारत्वञ्च शाश्वतम्।
सह दुग्धाब्धिना तस्मै प्रददौ शङ्करः स्वयम्॥ ७
तस्माज्ज्ञानागमोऽप्यस्य प्रसादादेव शाङ्करात्।
कौमारं हि परं साक्षाज्ज्ञानं शक्तिमयं विदुः॥ ८
शिवशास्त्रप्रवक्तृत्वमपि तस्य हि तत्कृतम्।
कुमारमुखतो लब्ध-ज्ञानाब्धेरिव नन्दिनः॥ ९
दृष्टन्तु कारणन्त्वस्य शिवज्ञानसमन्वये।
समातृवचनं साक्षाच्छोकजं क्षीरकारणात्॥ १०
आवदत् किल शोचन्ती सहसा दुःसहं वचः।

मातोवाच।

क्व दुग्धं साधु नो वत्स क्व वयं वनवासिनः॥ ११
कथमावेश दारिद्र्यान्मया ते भाग्यहीनया।
मिथ्यादुग्धमिदं दत्तं पिष्टमालोड्य वारिणा॥ १२
त्वं मातुलगृहे स्वल्पं पीत्वा दुग्धं पयःशृतम्।
ज्ञातास्वादस्त्वपर्य्याप्तस्तज्जातीयमनुस्मरन्॥ १३
दत्तं न पय इत्युक्त्वा रुदन् दुःखाकरोषि माम्।
प्रसादेन विना शम्भोः पयस्तव न विद्यते॥ १४
पादपङ्कजयोस्तस्य साम्बस्य सगणस्य च।
भक्त्या समर्पितं यत् तत् कारणं सर्व्वसम्पदाम्॥ १५
धनाद्युद्दिश्य नास्माभिरितः प्रागर्च्चितः शिवः।
अतो दरिद्राः सञ्जाता वयं तस्मान्न तत् पयः॥ १६

वायुरुवाच।

इति मातृवचः श्रुत्वा तथ्यं शोकादिसूचकम्।
बालोऽप्यनुतपन्नन्तः प्रगल्भमिदमब्रवीत्॥ १७

उपमन्युरुवाच।

शोकेनालमितो मातः साम्बो यद्यस्ति शङ्करः।
तत्प्रसादेन दुग्धाब्धिं साधयिष्यामि शाश्वतम्॥ १८

मातोवाच।

यद्यस्तीति न वक्तव्यं पुत्त्र सन्दिग्धकं वचः।
सर्व्वस्मादधिकोऽस्त्येव शिवः परमकारणम्॥ १९
तत्कृतं हि जगत् सर्व्वं ब्रह्माद्यास्तस्य किङ्कराः।
तत्प्रसादकृतैश्वर्य्या दासास्तस्य वयं प्रभोः॥ २०
अन्यान् देवान् परित्यज्य कामये मनसा गिरा।
तमेव साम्बं सगणं भजे भावपुरःसरम्॥ २१
तस्य देवाधिदेवस्य शिवस्य शिवदायिनः।
साक्षान्नमः शिवायेति मन्त्रोऽयं वाचकः स्मृतः॥ २२
सप्तकोटिमहामन्त्राः सर्व्वे सप्रणवाः परे।
तस्मिन्नेव विलीयन्ते पुनस्तस्माद्विनिर्गताः॥ २३
सुप्रसादाश्च ते मन्त्राः स्वाधिकारव्यपेक्षया।
सर्व्वाधिकारस्त्वेकोऽयं मन्त्र एवेश्वराज्ञया॥ २४
यथा निकृष्टानुत्कृष्टान् सर्व्वानप्यात्मनः शिवः।
क्षमते रक्षितुं तद्वन्मन्त्रोऽयमपि सर्व्वदा॥ २५
प्रबलश्च तथाचायं मन्त्रो मन्त्रान्तरादपि।
सर्व्वरक्षाक्षमो ह्येष नापरः कश्चिदिष्यते॥ २६
तस्मान्मन्त्रान्तरं त्यक्त्वा पञ्चाक्षरपरो भव।
तस्मिन् जिह्वान्तरगते न किञ्चिद्दुर्लभं मतम्॥ २७
अघोरास्त्रञ्च शैवानां रक्षाहेतुरनुत्तमम्।
तच्च तत्प्रभवं मत्वा तत्परो भव नान्यथा॥ २८

भस्मेदन्तु मया लब्धं पितुरेव तवोत्तमम् ।
विरजानलसंसिद्धं महाव्यापन्निवारणम् ॥ २९
मन्त्रञ्च ते मया दत्तं गृहाण मदनुज्ञया ।
अनेनैवास्तु जप्तेन रक्षा तव भविष्यति ॥ ३०

वायुरुवाच ।

एवं मात्रा समादिश्य शिवं तेऽस्त्वित्युदीर्य्य च ।
विसृष्टस्तद्वचो मूर्ध्नि कुर्व्वन्नेव सदा मुनिः ॥ ३१
तां प्रणम्यैवमुक्त्वा च तपः कर्त्तुं प्रचक्रमे ।
तमाह च तदा माता शुभं कुर्व्वन्तु ते सुराः ॥ ३२
अनुज्ञातस्तत्र तया तपस्तेपे सुदुश्चरम् ।
हिमवत्पर्व्वतं प्राप्य वायुभक्षः समाहितः ॥ ३३
अष्टेष्टकाभिः प्रासादं कृत्वा लिङ्गञ्च मृण्मयम् ।
तत्रावाह्य महादेवं साम्बं सगणमव्ययम् ॥ ३४
भक्त्या पञ्चाक्षरेणैव पत्रैः पुष्पैर्वनोद्भवैः ।
समभ्यर्च्य परं कालं चचार परमं तपः ॥ ३५
तथा तपश्चरन्तं तं बालमेकाकिनं कृशम् ।
पुरा मरीचिना शप्ताः केचिन्मुनिपिशाचकाः ॥ ३६
सम्पीड्य राक्षसैर्भावैस्तपसो विघ्नमाचरन् ।
स च तैः पीड्यमानोऽपि तपः कुर्व्वन् कथञ्चन ॥ ३७
सदा नमः शिवायेति क्रोशति स्मार्त्तनादवत् ।
तन्नादश्रवणादेव तपसो विघ्नकारिणः ॥ ३८
तत्तद्भावं समुत्सृज्य मुनयस्तमुपाचरन् ।
तपसा तस्य विप्रस्य प्रदीपितमभूज्जगत् ॥ ३९
प्रणम्याङ्गश्च तत् सर्व्वं हरये देवसत्तमाः ।
श्रुत्वा तेषां तदा वाक्यं भगवान् पुरुषोत्तमः ॥ ४०
किमिदन्त्विति सञ्चिन्त्य ज्ञात्वा तत्कारणञ्च सः ।
जगाम मन्दरं तूर्णं महेश्वरदिदृक्षया ॥ ४१
दृष्ट्वा देवं प्रणम्यैवं प्रोवाच च कृताञ्जलिः ।

हरिरुवाच ।

भगवन् ब्राह्मणः कश्चिदुपमन्युरिति श्रुतः ॥ ४२
क्षीरार्थमदहत् सर्व्वं तपसा तं निवारय ॥ ४३

वायुरुवाच ।

एतस्मिन्नन्तरे देवः पिनाकी परमेश्वरः ।
शक्रस्य रूपमास्थाय गन्तुं चक्रे मतिं तदा ॥ ४४
अथ जगाम मुनेस्तु तपोवनं
गजवरेण सितेन तदा शिवः ।
सह सुरासुरसिद्धमहोरगै-
रमरराजतनुं स्वयमास्थितः ॥ ४५
रराज भगवान् सोमः शक्ररूपी तदा शिवः ।
तेनातपत्रेण यथा चन्द्रबिम्बेन मन्दरः ॥ ४६
आस्थायैवं हि शक्रस्य स्वरूपं परमेश्वरः ।
जगामानुग्रहं कर्त्तुमुपमन्योस्तमाश्रमम् ॥ ४७
तं दृष्ट्वा परमेशानं शक्ररूपधरं शिवम् ।
प्रणम्य शिरसा प्राह मुनिर्मुनिवरः स्वयम् ॥ ४८

उपमन्युरुवाच ।

पावितश्चाश्रमः सोऽयं मम देवेश्वर स्वयम् ।
प्राप्तः शक्रो जगन्नाथो भगवान् भानुसप्रभः ॥ ४९

वायुरुवाच ।

एवमुक्त्वा स्थितं प्रेक्ष्य कृताञ्जलिपुटं द्विजम् ।
प्राह गम्भीरया वाचा शक्ररूपधरो हरः ॥ ५०

शक्र उवाच ।

तुष्टोऽस्मि ते वरं ब्रूहि तपसानेन सुव्रत ।
ददामि चेप्सितान् सर्व्वान् धौम्याग्रज महामुने ॥ ५१

वायुरुवाच ।

एवमुक्तस्तदा तेन शक्रेण मुनिसत्तमः ।
वरयामि शिवे भक्तिमित्युक्त्वा तपते पुनः ॥ ५२
तस्य तीव्रं तपो ज्ञात्वा शक्ररूपधरो हरः ।
आगत्य स्वगुणाभासैः स्वमात्मानमनिन्दत ॥ ५३
मुनिस्तु तमविज्ञाय शक्ररूपधरं हरम् ।
शिवनिन्दा श्रुतेत्येव मर्त्तुं व्यवसितः स्वयम् ॥ ५४
क्षीरे वाञ्छामपि त्यक्त्वा निहन्तुं शक्रमुद्यतः ।
भस्मादाय तदा घोरमघोरास्त्राभिमन्त्रितम् ॥ ५५
विसृज्य शक्रमुद्दिश्य स्वदेहं दग्धुमुद्यतः ।
आग्नेयीं धारणां बिभ्रदुपमन्युरवस्थितः ॥ ५६
तां तस्य धारणां देवो निरीक्ष्यावारयत् स्वयम् ।
तद्विसृष्टमघोरास्त्रं नन्दीश्वरनियोगतः ॥ ५७
जगृहे मध्यतः क्षिप्रं नन्दी शङ्करवल्लभः ।
ददृशेऽथ महादेवो देव्या सार्द्धं वृषोपरि ॥ ५८
गणेश्वरैस्त्रिशूलाद्यैर्दिव्यास्त्रैरपि संवृतः ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात च ॥ ५९
ब्रह्मेन्द्रविष्णुप्रमुखैर्देवैश्छन्ना दिशो दश ।
अथोपमन्युरानन्द-समुद्रोर्म्मिभिरावृतः ॥ ६०

पपात दण्डवद्भूमौ भक्तिनिघ्नेन चेतसा ।
एह्येहीति तमाहूय शिवः शीतांशुभूषणः ॥ ६१
मूर्द्ध्न्याघ्राय सुतस्तेऽयमिति देव्यै न्यवेदयत् ।
देवी च गुहवत् प्रीत्या मूर्द्ध्नि तस्य कराम्बुजम् ॥ ६२
विन्यस्य प्रददौ तस्मै कुमारपदमव्ययम् ।
क्षीराब्धिरथ साकारः क्षीरं स्वादु करे दधत् ॥ ६३
उपस्थाय ददौ तस्मै पिण्डीभूतमनश्वरम् ।
समृद्धिं धनदस्तद्वद्दावाप्रलयस्थिताम् ॥ ६४
ततः समृद्धमभवद्धनैर्धान्यैस्तपोवनम् ।
व्रतं पाशुपतं ज्ञानं व्रतयोगञ्च तत्त्वतः ॥ ६५
दत्त्वा तस्मै प्रवक्तृत्वं पादुके च चिरं परम् ।
सर्व्वेश्वत्वपदं दत्त्वा देवश्चान्तरधीयत ॥ ६६

इति श्रीशैवे महापुराणे वायवीयसंहितायां
पूर्व्वभागे त्रिंशोऽध्यायः ॥ ३० ॥

समाप्तोऽयं पूर्व्वभागः ।

वायवीयसंहिता ।

उत्तरभागः ।

प्रथमोऽध्यायः ।

ओं नमो भगवते वासुदेवाय ।

नमः शिवाय सोमाय सगणाय ससूनवे ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तहेतवे ॥ १
शक्तिरप्रतिमा यस्य ऐश्वर्य्यञ्चापि सर्व्वगम् ।
स्वामित्वञ्च विभुत्वञ्च स्वभावं सम्प्रचक्षते ॥ २
तमजं विश्वकर्म्माणं शाश्वतं शिवमव्ययम् ।
महादेवं महात्मानं व्रजामि शरणं शिवम् ॥ ३
धर्म्मक्षेत्रे महातीर्थे गङ्गा-कालिन्दि-सङ्गमे ।
प्रयागे नैमिषारण्ये ब्रह्मलोकस्य वर्त्मनि ॥ ४
मुनयः शंसितात्मानः सत्यव्रतपरायणाः ।
महौजसो महाभागा महासत्रं वितेनिरे ॥ ५
तत्र सत्रं समाकर्ण्य तेषामक्लिष्टकर्म्मणाम् ।
साक्षात् सत्यवतीसूनोर्वेदव्यासस्य धीमतः ॥ ६
शिष्यो महात्मा मेधावी त्रिषु लोकेषु विश्रुतः ।
पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित् ॥ ७
उत्तरोत्तरवक्ता च ब्रुवतोऽपि बृहस्पतेः ।
मधुरश्रवणानाञ्च मनोज्ञपदपर्व्वणाम् ॥ ८
कथानां निपुणो वक्ता कालविन्नयवित् कविः ।
आजगाम स तं देशं सूतः पौराणिकोत्तमः ॥ ९
तं दृष्ट्वा सूतमायातं मुनयो हृष्टमानसाः ।
तस्मै साम च पूजाञ्च यथावत् प्रत्यपादयन् ॥ १०
प्रतिगृह्य स तां पूजां मुनिभिः प्रतिपादिताम् ।
उद्दिष्टमासनं भेजे नियुक्तो युक्तमात्मनः ॥ ११
ततस्तत्सङ्गमादेव मुनीनां भावितात्मनाम् ।
सोत्कण्ठमभवच्चित्तं श्रोतं पौराणिकीः कथाः ॥ १२
तदा तमनुकूलाभिर्वाग्भिः पूज्य महर्षयः ।
अतीवाभिमुखं कृत्वा वचनञ्चेदमब्रुवन् ॥ १३

ऋषय ऊचुः ।

रोमहर्षण सर्व्वज्ञ भवान् वै भाग्यगौरवात् ।
पुराणविद्यामखिलां व्यासात् प्रत्यक्षमीयिवान् ॥ १
तस्मादाश्चर्य्यभूतानां कथानां त्वं हि भाजनम् ।
रत्नानामुरुसाराणां रत्नाकर इवार्णवः ॥ १५
यच्च भूतञ्च भव्यञ्च यच्चान्यद्वस्तु वर्त्तते ।
न तवाविदितं किञ्चित् त्रिषु लोकेषु विद्यते ॥ १
त्वमदृष्टवशादस्मद्दर्शनार्थमिहागतः ।
अकुर्व्वन् किमपि श्रेयो न वृथा गन्तुमर्हसि ॥ १
तस्माच्छ्राव्यतमं पुण्यं सत्कथाज्ञानसंहितम् ।
अपवर्गफलैकान्तमनाचारवहिष्कृतम् ॥ १८
जगतः सृष्टि-संहार-स्थितिहेतुप्रदर्शकम् ।
वेदान्तसारसर्व्वस्वं पुराणं श्रावयाशु नः ॥ १९
एवमभ्यर्थितः सूतो मुनिभिर्वेदवादिभिः ।
श्लक्ष्णाञ्च न्यायसंयुक्तां प्रत्युवाच शुभां गिरम् ॥ २

सूत उवाच ।

पूजितोऽनुगृहीतश्च भवद्भिरिति चोदितः ।
कस्मात् सम्यङ्न विब्रूयां पुराणमृषिपूजितम् ॥
अभिवन्द्य महादेवं देवीं स्कन्दं विनायकम् ।
नन्दिनञ्च तथा साक्षाद्व्यासं सत्यवतीसुतम् ॥ २
वक्ष्यामि परमं पुण्यं पुराणं ब्रह्मसम्मितम् ।
शिवज्ञानार्णवं साक्षाद्भुक्ति-मुक्तिफलप्रदम् ॥ २
शब्दार्थन्यायसंयुक्तैरागमार्थैर्विभूषितम् ।
श्वेतकल्पे प्रसङ्गेन वायुना कथितं पुरा ॥ २४
विद्यास्थानानि सर्व्वाणि पुराणानुक्रमं तथा ।
पुराणस्यास्य चोत्पत्तिं ब्रुवतो मे निबोधत ॥ २५
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।

एतद्वः कथितं सर्व्वं कृष्णस्याक्लिष्टकर्म्मणः ॥ २६
महर्षेर्ज्ञानलाभश्च पुत्रलाभश्च शङ्करात्।
य इदं कीर्त्तयेन्नित्यं शृणुयाच्छ्रावयेत् तथा ॥ २७
स विष्णोर्ज्ञानमासाद्य तेनैव सह मुच्यते ॥ २८

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे सूतर्षिसंवादो नाम
प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः।

ऋषय ऊचुः।

किं तत् पाशुपतं ज्ञानं कथं पशुपतिः शिवः।
कथं धौम्याग्रजः पृष्टः कृष्णेनाद्भुतकर्म्मणा ॥ १

वायुरुवाच।

पुरा साक्षान्महेशेन श्रीकण्ठाख्येन मन्दरे।
देव्यै देवेन कथितं ज्ञानं पाशुपतं परम् ॥ २
तदेव पृष्टं कृष्णेन विष्णुना विश्वयोनिना।
पशुत्वञ्च सुरादीनां पतित्वञ्च शिवस्य च ॥ ३
तथोपदिष्टं कृष्णाय मुनिनाप्युपमन्युना।
तथा समासतो वक्ष्ये तच्छृणुध्वमतन्द्रिताः ॥ ४
पुरोपमन्युमासीनं विष्णुः कृष्णवपुर्द्धरः।
प्रणिपत्य यथान्यायमिदं वचनमब्रवीत् ॥ ५

श्रीकृष्ण उवाच।

भगवन् श्रोतुमिच्छामि देव्यै देवेन भाषितम्।
दिव्यं पाशुपतं ज्ञानं विभूतिञ्चास्य कृत्स्नशः ॥ ६
कथं पशुपतिर्देवः पशवः के प्रकीर्त्तिताः।
कैः पाशैस्ते निबध्यन्ते विमुच्यन्ते च ते कथम् ॥ ७
इति सञ्चोदितः श्रीमानुपमन्युर्महामनाः।
प्रणम्य देवं देवीञ्च प्राह पृष्टो यथा तथा ॥ ८

उपमन्युरुवाच।

ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः।
पशवः परिकीर्त्त्यन्ते संसारवशवर्त्तिनः ॥ ९
तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः।
मल-मायादिभिः पाशैः स बध्नाति पशून् पतिः ॥१०
स एव मोचकस्तेषां भक्तानां समुपासितः।
चतुर्व्विंशति तत्त्वानि मायाकर्म्मगुणा अमी ॥ ११
विषया इति कथ्यन्ते पाशा जीवनिबन्धनाः।
ब्रह्मादिस्तम्बपर्य्यन्तान् पशून् बद्ध्वा महेश्वरः ॥ १२
पाशैरेतैः पतिर्देवः कार्य्यं कारयति स्वकम्।
तस्याज्ञया महेशस्य प्रकृतिः पुरुषोचिताम् ॥ १३
बुद्धिं प्रसूते सा बुद्धिरहङ्कारमहङ्कृतिः।
इन्द्रियाणि दशैकञ्च तन्मात्रापञ्चकं तथा ॥ १४
शासनाद्देवदेवस्य शिवस्य शिवदायिनः।
तन्मात्राण्यपि तस्यैव शासनेन महीयसा ॥ १५
महाभूतान्यशेषाणि भावयन्त्यनुपूर्व्वशः।
ब्रह्मादीनां तृणान्तानां देहिनां देहसङ्गतिम् ॥ १६
महाभूतान्यशेषाणि जनयन्ति शिवाज्ञया।
अध्यवस्यति वै बुद्धिरहङ्कारोऽभिमन्यते ॥ १७
चित्तं चेतयते चापि मनः सङ्कल्पयत्यपि।
श्रोत्रादीनि च गृह्णन्ति शब्दादीन् विषयान्पृथक्॥१८
स्वानेव नान्यान् देवस्य दिव्येनाज्ञाबलेन वै।
वागादीन्यपि यान्यासंस्तानि कर्म्मेन्द्रियाणि च ॥१९
यथास्वं कर्म्म कुर्व्वन्ति नान्यत् किञ्चिच्छिवाज्ञया।
शब्दादयोऽपि गृह्यन्ते क्रियन्ते वचनादयः ॥ २०
अविलङ्घ्या हि सर्व्वेषामाज्ञा शम्भोर्गरीयसी।
अवकाशमशेषाणां भूतानां सम्प्रयच्छति ॥ २१
आकाशः परमेशस्य शासनादेव सर्व्वगः।
प्राणाद्यैश्च तथा नामभेदैरन्तर्वहिर्जगत् ॥ २२
बिभर्त्ति सर्व्वं शर्व्वस्य शासने च प्रभञ्जनः।
हव्यं वहति देवानां कव्यं कव्याशिनामपि ॥ २३
पाकाद्यञ्च करोत्यग्निः परमेश्वरशासनात्।
सञ्जीवनाद्यं सर्व्वस्य कुर्व्वन्त्यापस्तदाज्ञया ॥ २४
विश्वम्भरा जगन्नित्यं धत्ते विश्वेश्वराज्ञया।
देवान् पात्यसुरान् हन्ति त्रिलोकमभिरक्षति ॥ २५
आज्ञया तस्य देवेन्द्रः सर्व्वदैवैरलङ्घ्यया।
जीवानां व्याधिभिः पीड़ां मृतानाञ्चैव यातनाम्॥२६
अधार्म्मिकाणां धर्म्मेशः करोति शिवशासनात्।
निर्ऋतिर्विधिहीनानां फलं हरति कर्म्मणाम् ॥ २७
निशाचराधिपत्यञ्च कुरुते शङ्कराज्ञया।
आधिपत्यमपां नित्यं कुरुते वरुणो मुने ॥ २८
पाशैर्बध्नाति बध्यांश्च परमेश्वरशासनात्।
ददाति नित्यं यक्षेन्द्रो द्रविणं द्रविणेश्वरः ॥ २९

गुणानुरूपं भूतेभ्यः पुरुषस्यानुशासनात्।
करोति सम्पदः शश्वज्ज्ञानञ्चैव सुसेवताम्॥ ३०
निग्रहञ्चाप्यसाधूनामीशानः शिवशासनात्।
धत्ते तु धरणीं मूर्ध्ना शेषः शिवनियोगतः॥ ३१
यामाहुस्तामसीं रौद्रीं मूर्त्तिमन्तकरीं हरेः।
सृजत्यशेषमीशस्य शासनाच्चतुराननः॥ ३२
तिसृभिर्मूर्त्तिभिः स्वाभिः पाति चान्ते निहन्ति च।
विष्णुः पालयते विश्वं विश्वेश्वरनियोगतः॥ ३३
सृजते ग्रसते चापि स्वकाभिस्तनुभिस्तथा।
हरत्यन्ते जगत् सर्व्वं हरस्तस्यैव शासनात्॥ ३४
सृजत्यपि च विश्वात्मा त्रिधाभिन्नस्तु रक्षति।
कालः करोति सकलं कालः संहरति प्रजाः॥ ३५
कालः पालयते विश्वं कालकालस्य शासनात्।
त्रिभिरंशैर्जगद्बिभ्रत् तेजोभिर्वृष्टिमादिशन्॥ ३६
दिवि वर्षत्यसौ भानुर्देवदेवस्य शासनात्।
पुष्णात्योषधिजातानि भूतानि ह्लादयत्यपि॥ ३७
देवैश्च पीयते चन्द्रश्चन्द्रभूषणशासनात्।
आदित्या वसवो रुद्रा अश्विनौ मरुतस्तथा॥ ३८
खेचरा ऋषयः सिद्धा भोगिनो मनुजा मृगाः।
पशवः पक्षिणश्चैव कीटाद्याः स्थावराणि च॥ ३९
नद्यः समुद्रा गिरयः काननानि सरांसि च।
वेदाः साङ्गाश्च शास्त्राणि मन्त्राः स्तोममखादयः॥ ४०
कालाग्न्यादि-शिवान्तानि भुवनानि सहाधिपैः।
ब्रह्माण्डान्यप्यसंख्यानि तेषामावरणानि च॥ ४१
वर्तमानान्यतीतानि भविष्यन्त्यपि कृत्स्नशः।
दिशश्च विदिशश्चैव कालभेदाः कलादयः॥ ४२
यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
तत् सर्व्वं शङ्करस्याज्ञाबलेन समधिष्ठितम्॥ ४३

आज्ञाबलात् तस्य धरा स्थितेह
धराधरा वारिधराः समुद्राः।
ज्योतिर्गणाः शक्रमुखाश्च देवाः
स्थिरं चरं वा चिदचिद्यदस्ति॥ ४४

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे पाशुपतज्ञाननिरूपणं नाम द्वितीयोऽध्यायः॥ २॥

तृतीयोऽध्यायः।

उपमन्युरुवाच।

अत्याश्चर्य्यमिदं कृष्ण शम्भोरमितकर्म्मणः।
आज्ञाकृतं शृणुष्वैतच्छ्रुतं श्रुतिमुखे मया॥ १
पुरा किल सुराः सेन्द्रा विवदन्तः परस्परम्।
असुरान् समरे जित्वा जेताहमहमित्युत॥ २
तदा महेश्वरस्तेषां मध्यतोऽवरवेषधृक्।
स्वलक्षणैर्विहीनाङ्गः स्वयं यक्ष इवाभवत्॥ ३
स तानाह सुरानेकं तृणमादाय भूतले।
य एतद्विकृतं कर्त्तुं क्षमेत स तु दैत्यजित्॥ ४
यक्षस्य वचनं श्रुत्वा वज्रपाणिः शचीपतिः।
किञ्चित् क्रुद्धो विहस्यैनं तृणमादातुमुद्यतः॥ ५
न तत् तृणमुपादातुं मनसापि च शक्यते।
यथा तथापि तच्छेत्तुं वज्रं वज्रधरोऽसृजत्॥ ६
तद्वज्रं निजवज्रेण संसृष्टमिव सर्व्वतः।
तृणेनाभिहतं तेन तिर्य्यगग्रं पपात ह॥ ७
तत् तथान्ये सुसंरब्धा लोकपाला महाबलाः।
ससृजुस्तृणमुद्दिश्य स्वायुधानि सहस्रशः॥ ८
प्रजज्वाल महावह्निः प्रचण्डः पवनो ववौ।
प्रवृद्धोऽपां पतिर्यद्वत् प्रलये समुपस्थिते॥ ९
एवं देवैः समारब्धं तृणमुद्दिश्य यत्नतः।
व्यर्थमासीद्धरो कृष्ण यक्षस्याज्ञाबलेन वै॥ १०
तदाह यक्षं देवेन्द्रः को भवानित्यमर्षितः।
ततः स पश्यतामेव तेषामन्तरधीयत॥ ११
तदन्तरे हैमवती देवी दिव्यविभूषणा।
आविरासीन्नभोरङ्गे शोभमाना शुचिस्मिता॥ १२
तां दृष्ट्वा विस्मयाविष्टा देवाः शक्रपुरोगमाः।
प्रणम्य यक्षं पप्रच्छुः कोऽसौ यक्षो विलक्षणः॥ १३
साब्रवीत् सस्मितं देवी स युष्माकमगोचरः।
तेनेदं भ्राम्यते चक्रं संसाराख्यं चराचरम्॥ १४
तेनादौ क्रियते विश्वं तेन संह्रियते पुनः।
न तस्य नियमः कश्चित् तेन सर्व्वं नियम्यते॥ १५
इत्युक्त्वा सा महादेवी तत्रैवान्तरधीयत।
देवाश्च विस्मिताः सर्व्वे तां प्रणम्य दिवं ययुः॥ १६

इति श्रीशैवे वा० सं० उ० तृतीयोऽध्यायः॥ ३॥

चतुर्थोऽध्यायः ।

उपमन्युरुवाच ।

शृणु कृष्ण महेशस्य शिवस्य परमात्मनः ।
मूर्त्यात्मभिस्ततं कृत्स्नं जगदेतच्चराचरम् ॥ १
स शिवः सर्व्वमेवेदं स्वकीयाभिश्च मूर्त्तिभिः ।
अधितिष्ठत्यमेयात्मा यत् तत् सर्व्वस्ततः स्मृतः ॥ २
ब्रह्मा विष्णुस्तथा रुद्रो महेशानः सदाशिवः ।
मूर्त्तयस्तस्य विज्ञेया याभिर्विश्वमिदं ततम् ॥ ३
अथान्याश्चापि तनवः पञ्च ब्रह्मसमाह्वयाः ।
तनुभिस्ताभिरव्याप्तमिह किञ्चिन्न विद्यते ॥ ४
ईशानः पुरुषो घोरो वामः सद्यस्तथैव च ।
ब्रह्माख्येतानि देवस्य मूर्त्तयः पञ्च विश्रुताः ॥ ५
ईशानाख्या तु या तस्य मूर्त्तिराद्या गरीयसी ।
भोक्तारं प्रकृतेः साक्षात् क्षेत्रज्ञमधितिष्ठति ॥ ६
स्थाणोस्तत्पुरुषाख्या या मूर्त्तिर्मूर्त्तिमतः प्रभोः ।
गुणाश्रयात्मकं भोग्यमव्यक्तमधितिष्ठति ॥ ७
धर्म्माद्यष्टाङ्गसंयुक्तं बुद्धितत्त्वं पिनाकिनः ।
अधितिष्ठति घोराख्या मूर्त्तिरत्यन्तपूजिता ॥ ८
वामदेवाह्वया मूर्त्तिर्महादेवस्य वेधसः ।
अहङ्कृतेरधिष्ठात्रीमाहुरागमवेदिनः ॥ ९
सद्योजाताह्वयां मूर्त्तिं शम्भोरमितवर्च्चसः ।
मनसः समधिष्ठात्रीं मतिमन्तः प्रचक्षते ॥ १०
श्रोत्रस्य वाचः शब्दस्य विभोर्व्योम्नस्तथैव च ।
ईश्वरीमीश्वरस्यैव तामीशाख्यां विदुर्बुधाः ॥ ११
त्वक्-पाणि-स्पर्श-वायूनामीश्वरीं मूर्त्तिमैश्वरीम् ।
पुरुषाख्यां विदुः सर्व्वे पुराणार्थविशारदाः ॥ १२
चक्षुश्चरणयोश्चापि रूपस्याग्नेस्तथैव च ।
अघोराख्यामधिष्ठात्रीं मूर्त्तिमाहुर्मनीषिणः ॥ १३
रसनायाश्च पायोश्च रसस्यापां तथैव च ।
ईश्वरीं वामदेवाख्यां मूर्त्तिं तन्निरता विदुः ॥ १४
घ्राणस्य चैवोपस्थस्य गन्धस्य च भुवस्तथा ।
सद्योजाताह्वयां मूर्त्तिमीश्वरीं सम्प्रचक्षते ॥ १५
मूर्त्तयः पञ्च देवस्य वन्दनीयाः प्रयत्नतः ।
श्रेयोऽर्थिभिर्नरैर्नित्यं श्रेयसामेव हेतवः ॥ १६
तस्य देवाधिदेवस्य मूर्त्त्यष्टकमयं जगत् ।
तस्मिन् व्याप्य स्थितं विश्वं सूत्रे मणिगणा इव ॥ १७
शर्व्वो भवस्तथा रुद्र उग्रो भीमः पशोःपतिः ।
ईशानश्च महादेवो मूर्त्त्यश्चाष्ट विश्रुताः ॥ १८
भूम्यम्भोऽग्निमरुद्व्योम-क्षेत्रज्ञार्कनिशाकराः ।
अधिष्ठिता महेशस्य शर्व्वाद्यैरष्टमूर्त्तिभिः ॥ १९
चराचरात्मकं विश्वं धत्ते विश्वम्भरात्मिका ।
शार्व्वी शर्व्वाह्वया मूर्त्तिरिति शास्त्रस्य निश्चयः ॥२०
सञ्जीवनं समस्तस्य जगतः सलिलात्मकम् ।
भव इत्युच्यते मूर्त्तिर्भवस्य परमात्मनः ॥ २१
बहिरन्तर्जगद्विश्वं व्याप्य तेजोमयी शुभा ।
रौद्री रुद्राह्वया मूर्त्तिराश्रिता घोररूपिणी ॥ २२
स्पन्दयन् पवनो विश्वं बिभर्त्ति स्पन्दते स्वयम् ।
उग्र इत्युच्यते सद्भिर्मूर्त्तिरुग्रस्य वेधसः ॥ २३
सर्व्वावकाशदा सर्व्वव्यापिका गगनात्मिका ।
मूर्त्तिर्भीमस्य भीमाख्या भूतवृन्दस्य भेदिका ॥ २४
सर्व्वात्मनामधिष्ठात्री सर्व्वक्षेत्रनिवासिनाम् ।
मूर्त्तिः पशुपतेर्ज्ञेया पशु-पाश-निकृन्तनी ॥ २५
दीपयन्ती जगत् सर्व्वं दिवाकरसमाह्वया ।
ईशानाख्या महेशस्य मूर्त्तिर्दिवि विसर्पति ॥ २६
आप्याययति यो विश्वममृतांशुर्निशाकरः ।
महादेवस्य सा मूर्त्तिर्महादेवसमाह्वया ॥ २७
आत्मनश्चाष्टमी मूर्त्तिः शिवस्य परमात्मनः ।
व्यापिकेतरमूर्त्तीनां विश्वं तस्माच्छिवात्मकम् ॥ २८
वृक्षमूलस्य सेकेन शाखाः पुष्यन्ति वै यथा ।
शिवस्य पूजया तद्वत् पुष्यत्यस्य वपुर्जगत् ॥ २९
सर्व्वाभयप्रदानञ्च सर्व्वानुग्रहणं तथा ।
सर्व्वोपकारकरणं शिवस्याराधनं विदुः ॥ ३०
यथेह पुत्रपौत्रादेः प्रीत्या प्रीतो भवेत् पिता ।
तथा सर्व्वस्य सम्प्रीत्या प्रीतो भवति शङ्करः ॥ ३१
देहिनो यस्य कस्यापि क्रियते यदि निग्रहः ।
अनिष्टमष्टमूर्त्तेस्तत् कृतमेव न संशयः ॥ ३२
अष्टमूर्त्त्यात्मना विश्वमधिष्ठाय स्थितं शिवम् ।
भजस्व सर्व्वभावेन रुद्रं परमकारणम् ॥ ३३

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ।

श्रीकृष्ण उवाच ।

भगवन् परमेशस्य सर्व्वस्यामिततेजसः ।
मूर्त्तिभिर्विश्वमेवेदं यथा व्याप्तं तथा श्रुतम् ॥ १
अथैतज्ज्ञातुमिच्छामि याथात्म्यं परमेशयोः ।
स्त्रीपुंभावात्मकञ्चेदं ताभ्यां कथमधिष्ठितम् ॥ २

उपमन्युरुवाच ।

श्रीमद्विभूतिं शिवयोर्याथात्म्यञ्च समासतः ।
वक्ष्ये तद्विस्तराद्वक्तुं भवेनापि न शक्यते ॥ ३
शक्तिः साक्षान्महादेवी महादेवः स शक्तिमान् ।
तयोर्विभूतिलेशो वै सर्व्वमेतच्चराचरम् ॥ ४
वस्तु किञ्चिदचिद्रूपं किञ्चिद्वस्तु चिदात्मकम् ।
द्वयं शुद्धमशुद्धञ्च परञ्चापरमेव च ॥ ५
यत् संसरति चिच्चक्रमचिच्चक्रसमन्वितम् ।
तदेवाशुद्धमपरमितरत् तु परं शुभम् ॥ ६
अपरञ्च परञ्चैव द्वयं चिदचिदात्मकम् ।
शिवस्य च शिवायाश्च स्वाम्यञ्चैतत् स्वभावतः ॥ ७
शिवयोर्वै वशं विश्वं न विश्वस्य वशे शिवौ ।
ईशितव्यमिदं यस्मात् तस्माद्विश्वेश्वरौ शिवौ ॥ ८
यथा शिवस्तथा देवी यथा देवी तथा शिवः ।
नानयोरन्तरं विद्याच्चन्द्र-चन्द्रिकयोरिव ॥ ९
चन्द्रो न खलु भात्येष यथा चन्द्रिकया विना ।
न भाति विद्यमानोऽपि तथा शक्त्या विना शिवः ॥१०
प्रभया हि विना यद्वद्भानुरेष न विद्यते ।
प्रभा च भानुना तेन सुतरां तदुपाश्रया ॥ ११
एवं परस्परापेक्षा शक्ति-शक्तिमतोः स्थितिः ।
न शिवेन विना शक्तिर्न शक्त्या च विना शिवः ॥ १२
शक्तो यया शिवो नित्यं भुक्तौ मुक्तौ च देहिनाम् ।
आद्या सैका परा शक्तिश्चिन्मयी शिवसंश्रया ॥ १३
यामाहुरखिलेशस्य तैस्तैरनुगुणैर्गुणैः ।
समानधर्म्मिणीमेव शिवस्य परमात्मनः ॥ १४
सैका परा च चिद्रूपा शक्तिः प्रसवधर्म्मिणी ।
विभज्य बहुधा विश्वं विदधाति शिवेच्छया ॥ १५
सा मूलप्रकृतिर्माया त्रिगुणा त्रिविधा स्मृता ।
शिवया च विपर्य्यस्तं यया ततमिदं जगत् ॥ १६
एकधा च द्विधा चैव तथा शतसहस्रधा ।
शक्तयः खलु भिद्यन्ते बहुधा व्यवहारतः ॥ १७
शिवेच्छया परा शक्तिः शिवतत्त्वैकतां गता ।
ततः परिस्फुरत्यादौ सर्गे तैलं तिलादिव ॥ १८
ततः क्रियाख्यया शक्त्या शक्तौ शक्तिमदुत्थया ।
तस्यां विक्षोभ्यमाणायामादौ नादः समुद्बभौ ॥ १९
नादाद्विनिःसृतो बिन्दुर्बिन्दोर्देवः सदाशिवः ।
तस्मान्महेश्वरो जातः शुद्धा विद्या महेश्वरात् ॥ २०
सा वाचामीश्वरी शक्तिर्वागीशाख्या हि शूलिनः ।
या सा वर्णस्वरूपेण मातृकेति विजृम्भते ॥ २१
अथानन्तसमावेशान्मायया कालमवासृजत् ।
नियतिञ्च कलां विद्यां कलातो राग-पूरुषौ ॥ २२
मायातः पुनरेवाभूदव्यक्तं त्रिगुणात्मकम् ।
त्रिगुणाच्च ततो व्यक्ताद्विभक्ताः स्युस्त्रयो गुणाः ॥ २३
सत्त्वं रजस्तमश्चेति यैर्व्याप्तमखिलं जगत् ।
गुणेभ्यः क्षोभ्यमाणेभ्यो गुणेशाख्यास्त्रिमूर्त्तयः ॥ २४
अभवन् महदादीनि तत्त्वानि च यथाक्रमम् ।
तेभ्यः स्युरण्डपिण्डानि त्वसंख्यानि शिवाज्ञया ॥ २५
अधिष्ठितान्यनन्ताद्यैर्विद्येशैश्चक्रवर्त्तिभिः ।
शरीरान्तरभेदेन शक्तेर्भेदाः प्रकीर्त्तिताः ॥ २६
नानारूपास्तु विज्ञेयाः स्थूलसूक्ष्मविभेदतः ।
रुद्रस्य रौद्री सा शक्तिर्विष्णोर्वै वैष्णवी मता ॥ २७
ब्रह्माणी ब्रह्मणः प्रोक्ता इन्द्रस्यैन्द्रीति कथ्यते ।
किमत्र बहुनोक्तेन यद्विश्वमिति कीर्त्तितम् ॥ २८
शक्त्यात्मनैव तद्व्याप्तं यथा देहोऽन्तरात्मना ।
तस्माच्छक्तिमयं सर्व्वं जगत् स्थावर-जङ्गमम् ॥ २९
कलया परमा शक्तिः कथिता परमात्मनः ।
एवमेषा परा शक्तिरीश्वरेच्छानुयायिनी ॥ ३०
स्थिरं चरञ्च यद्विश्वं सृजतीति विनिश्चयः ।
ज्ञानक्रियाचिकीर्षाभिस्तिसृभिः स्वात्मशक्तिभिः ॥ ३१
शक्तिमानीश्वरः शश्वद्विश्वं व्याप्याधितिष्ठति ।
इदमित्थमिदं नेत्थं भवेदित्येवमात्मिका ॥ ३२
इच्छाशक्तिर्महेशस्य नित्या कार्य्यनियामिका ।
ज्ञानशक्तिस्तु तत्कार्य्यं कारणं करणं तथा ॥ ३३
प्रयोजनञ्च तत्त्वेन बुद्धिरूपाध्यवस्यति ।
यथेप्सितं क्रियाशक्तिर्यथाध्यवसितं जगत् ॥ ३४

कल्पयत्यखिलं कार्य्यं च्चणात् सङ्कल्पस्वरूपिणी।
यथाशक्तिक्रियोत्थानं शक्तिः प्रसवधर्म्मिणी ॥ ३५
शक्त्या परमया नुन्ना प्रसूते सकलं जगत्।
एवं शक्तिसमायोगाच्छक्तिमानुच्यते शिवः ॥ ३६
शक्ति-शक्तिमदुत्थन्तु शाक्तं शैवमिदं जगत्।
यथा न जायते पुत्त्रः पितरं मातरं विना ॥ ३७
तथा भवं भवानीञ्च विना नैतच्चराचरम्।
स्त्रीपुंसप्रभवं विश्वं स्त्रीपुंसात्मकमेव च ॥ ३८
स्त्रीपुंसयोर्विभूतिश्च स्त्रीपुंसाभ्यामधिष्ठितम्।
परमात्मा शिवः प्रोक्तः शिवा सा च प्रकीर्त्तिता ॥३९
शिवः सदाशिवः प्रोक्तः शिवा सा च मनोन्मनी।
शिवो महेश्वरो ज्ञेयः शिवा मायेति कथ्यते ॥ ४०
पुरुषः परमेशानः प्रकृतिः परमेश्वरी।
रुद्रो महेश्वरः साक्षाद्रुद्राणी रुद्रवल्लभा ॥ ४१
विष्णुर्विश्वेश्वरो देवो लक्ष्मीर्विश्वेश्वरप्रिया।
ब्रह्मा ब्रह्मशिरोहर्त्ता ब्रह्माणी ब्रह्मणः प्रिया ॥४२
भास्करो भगवान् शम्भुः प्रभा भगवती शिवा।
महेन्द्रो मन्मथारातिः शची शैलेन्द्रकन्यका ॥ ४३
जातवेदा महादेवः स्वाहा शर्व्वार्द्धदेहिनी।
यमस्त्रियम्बको देवस्तत्प्रिया गिरिकन्यका ॥ ४४
निर्ऋतिर्भगवानीशो निर्ऋतिर्नगनन्दिनी।
वरुणो भगवान् रुद्रो गौरी गिरिवरात्मजा ॥ ४५
बालेन्दुशेखरो वायुः शिवा शिवमनोहरा।
यक्षो यज्ञशिरोहर्त्ता ऋद्धिर्हिमगिरिप्रजा ॥ ४६
चन्द्रार्द्धशेखरश्चन्द्रो रोहिणी रुद्रवल्लभा।
ईशानः परमेशानस्तदार्य्या परमेश्वरी ॥ ४७
अनन्तवलयोऽनन्तो ह्यनन्तानन्तवल्लभा।
कालाग्निरुद्रः कालारिः काली कालान्तकप्रिया ४८
पुरुषाख्यो मनुः शम्भुः शतरूपा शिवप्रिया।
दक्षः साक्षान्महादेवः प्रसूतिः परमेश्वरी ॥ ४९
रुचिर्भवो भवानी च बुधैराकूतिरुच्यते।
भृगुर्भगाक्षहा देवः ख्यातिस्त्रिनयनप्रिया ॥ ५०
मरीचिर्भगवान् रुद्रः सम्भूतिः शर्व्ववल्लभा।
गङ्गाधरोऽङ्गिरा ज्ञेयः स्मृतिः साक्षादुमा स्मृता ॥५१
पुलस्त्यः शशभृन्मौलिः प्रीतिः कान्ता पिनाकिनः।
पुलहस्त्रिपुरध्वंसी तत्प्रिया तु शिवप्रिया ॥ ५२

क्रतुध्वंसी क्रतुः प्रोक्ता सन्नतिर्दयिता विभोः।
त्रिनेत्रोऽत्रिरुमा साक्षादनुसूया स्मृता बुधैः ॥ ५३
कश्यपः कालहा देवो देवमाता महेश्वरी।
वशिष्ठो मन्मथारातिर्देवी साक्षादरुन्धती ॥ ५४
शङ्करः पुरुषाः सर्व्वे स्त्रियः सर्व्वा महेश्वरी।
सर्व्वे स्त्रीपुरुषास्तस्मात् तयोरेव विभूतयः ॥ ५५
विषयी भगवानीशो विषयः परमेश्वरी।
श्राव्यं सर्व्वमुमारूपं श्रोता शूलवरायुधः ॥ ५६
स्प्रष्टव्यं वस्तुजातन्तु धत्ते शङ्करवल्लभा।
स्प्रष्टा स एव विश्वात्मा बालचन्द्रावतंसकः ॥ ५७
द्रष्टव्यं वस्तुरूपन्तु बिभर्त्ति भववल्लभा।
द्रष्टा विश्वेश्वरो देवः शशिखण्डशिखामणिः ॥ ५८
रसजातं महादेवी देवो रसयिता शिवः।
प्रियजातञ्च गिरिजा प्रीतश्चैव गराशनः ॥ ५९
मन्तव्यवस्तुतां धत्ते महादेवी महेश्वरी।
मन्ता स एव विश्वात्मा महादेवो महेश्वरः ॥ ६०
बोढव्यं वस्तुरूपन्तु बिभर्त्ति भववल्लभा।
देवः स एव भगवान् बोढा मुग्धेन्दुशेखरः ॥ ६१
प्राणः पिनाकी सर्व्वेषां प्राणिनां भगवान् प्रभुः।
प्राणस्थितिस्तु सर्व्वेषामम्बिका चाम्बुरूपिणी ॥ ६२
बिभर्त्ति चेत्रतां देवी त्रिपुरान्तकवल्लभा।
क्षेत्रज्ञत्वं तदा धत्ते भगवानन्तकान्तकः ॥ ६३
अहः शूलायुधो देवः शूलपाणिप्रिया निशा।
आकाशः शङ्करो देवः पृथिवी शङ्करप्रिया ॥ ६४
समुद्रो भगवानीशो वेला शैलेन्द्रकन्यका।
वृक्षो वृषध्वजो देवो लता विश्वेश्वरप्रिया ॥ ६५
पुंलिङ्गमखिलं धत्ते भगवान् पुरशासनः।
स्त्रीलिङ्गञ्चाखिलं धत्ते देवी देवमनोरमा ॥ ६६
शब्दजालमशेषन्तु धत्ते शर्व्वस्य वल्लभा।
अर्थस्य रूपमखिलं धत्ते मुग्धेन्दुशेखरः ॥ ६७
यस्य यस्य पदार्थस्य या या शक्तिरुदाहृता।
सा सा विश्वेश्वरी देवी स स सर्व्वो महेश्वरः ॥ ६८
यत् परं यत् पवित्रञ्च यत् पुण्यं यच्च मङ्गलम्।
तत् तदाहुर्महाभागास्तयोस्तेजोविजृम्भितम् ॥ ६९
यथा दीपस्य दीप्तस्य शिखा दीपयते गृहम्।
तथा तेजस्तयोरेतद्व्याप्य दीपयते जगत् ॥ ७०

तयादि-शिवमूर्त्त्यन्तं विश्वस्यातिशयक्रमः।
सन्निकर्षक्रमवशात् तयोरिति परा श्रुतिः॥ ७१
सर्व्वाकारात्मकावेतौ सर्व्वश्रेयोविधायिनौ।
पूजनीयौ नमस्कार्य्यौ चिन्तनीयौ च सर्व्वदा॥ ७२
यथाप्रश्नमिदं कृष्ण याथात्म्यं परमेशयोः।
कथितं हि मया तेऽद्य न तु तावदियत्तया॥ ७३
तत् कथं शक्यते वक्तुं याथात्म्यं परमेशयोः।
महतामपि सर्व्वेषां मनसोऽपि वहिर्गतम्॥ ७४
अन्तर्गतमनन्यानामीश्वरार्पितचेतसाम्।
अन्येषां बुद्ध्यनारूढ़मारूढ़ं वा तथैव तत्॥ ७५
येयमुक्ता विभूतिर्वै प्राकृती सा परा मता।
अप्राकृतीं परामन्यां गुह्यां गुह्यविदो विदुः॥ ७६
यतो वाचो निवर्त्तन्ते मनसा चेन्द्रियैः सह।
अप्राकृती परा सैषा विभूतिः पारमेश्वरी॥ ७७
सैवेह परमं धाम सैवेह परमा गतिः।
सैवेह परमा काष्ठा विभूतिः परमेष्ठिनः॥ ७८
तां प्राप्तुं प्रयतन्तोऽत्र जितश्वासा जितेन्द्रियाः।
गर्भकारागृहद्वारं निश्छिद्रं घटितं यथा॥ ७९
संसाराशीविषालीढ़-मृतसञ्जीवनौषधम्।
विभूतिं शिवयोर्विद्वान् न बिभेति कुतश्चन॥ ८०
यः परामपराञ्चैव विभूतिं वेत्ति तत्त्वतः।
सोऽपरां भूतिमुल्लङ्घ्य परां भूतिं समश्नुते॥ ८१
एतत् ते कथितं कृष्ण याथात्म्यं परमात्मनोः।
रहस्यमपि योग्योऽसि भवभक्तो भवानिति॥ ८२
नाशिष्येभ्यः शठेभ्यो वा नाभक्तेभ्यः कदाचन।
व्याहरेदीदृशानर्थानिति वेदानुशासनम्॥ ८३
तस्मात् त्वमपि कल्याणपरेभ्यः कथयेर्यदि।
त्वादृशेभ्योऽनुरूपेभ्यः कथयेतन्न चान्यथा॥ ८४
विभूतिमेतां शिवयोर्योग्येभ्यो यः प्रदापयेत्।
संसारसागरान्मुक्तः शिवसायुज्यमाप्नुयात्॥ ८५
कीर्त्तनादस्य नश्यन्ति महान्तः पातकोत्तमाः।
त्रिशतुर्वा समभ्यस्ते विनश्यन्ति ततोऽधिकाः॥ ८६
नश्यन्त्यरिष्टरिपवो वर्द्धन्ते सुहृदस्तथा।
विद्या च वर्द्धते शैवी मतिः सत्ये प्रवर्त्तते॥ ८७
भक्तिः परा शिवे साम्बे सानुगे सपरिच्छदे।
यद्यदिष्टतमञ्चान्यत् तत् तदाप्नोत्यसंशयम्॥ ८८
अतः शुचिः शिवे भक्तो विश्वस्तः कीर्त्तयेद्यदि।
प्रबलैः कर्म्मभिः पूर्व्वैः फलं चेत् प्रतिबध्यते।
पुनः पुनः समभ्यस्येत् तस्य नास्तीह दुर्लभम्॥ ८९

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे शिवतत्त्वकथनं नाम पञ्चमोऽध्यायः॥ ५॥

षष्ठोऽध्यायः।

उपमन्युरुवाच।

विग्रहं देवदेवस्य विश्वमेतच्चराचरम्।
तदेव न विजानन्ति पशवः पाशगौरवात्॥ १
तमेकमेव बहुधा वदन्ति यदुनन्दन।
अजानन्तः परं भावमविकल्पं महर्षयः॥ २
अपरंब्रह्मरूपञ्च परब्रह्मात्मकं तथा।
केचिदाहुर्महादेवमनादिनिधनं परम्॥ ३
भूतेन्द्रियान्तःकरण-प्रधानविषयात्मकम्।
अपरंब्रह्म निर्द्दिष्टं परंब्रह्म चिदात्मकम्॥ ४
बृहत्त्वाद्बृंहणत्वाच्च परमित्यभिधीयते।
उभे ते ब्रह्मणो रूपे ब्रह्मणोऽधिपतेः प्रभोः॥ ५
विद्याविद्यास्वरूपीति कैश्चिदीशो निगद्यते।
विद्येति चेतनां प्राहुस्तथाविद्यामचेतनाम्॥ ६
विद्याविद्यात्मकञ्चैव विश्वं विश्वगुरोर्विभोः।
रूपमेव न सन्देहो विश्वं तस्य वशे यतः॥ ७
भ्रान्तिर्विद्या परञ्चेति शार्व्वं रूपं परे विदुः।
अयथाबुद्धिरर्थेषु बहुधा भ्रान्तिरुच्यते॥ ८
यथार्थाकारसंवित्तिर्विद्येति परिकीर्त्त्यते।
विकल्परहितं तत्त्वं परमित्यभिधीयते॥ ९
तत्त्रयं शाङ्करं रूपं तदात्माधिष्ठितं यतः।
सदसद्रूप इत्याहुः सदसत्यतिरित्यपि॥ १०
सत्ये साधौ च सच्छब्दः सद्भिरेव प्रयुज्यते।
विपरीते त्वसच्छब्दः कथ्यते वेदवादिभिः॥ ११
सच्चासच्च जगद्विश्वं शरीरं परमेष्ठिनः।
यदिदं सदिति प्रोक्तं यच्चासदिति कथ्यते॥ १२
तयोः पतित्वात् तु शिवः सदसत्पतिरुच्यते।
चराचरात्मकं प्राहुः चराचरपरं परे॥ १३

क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उभे ते परमेशस्य रूपं तस्य वशे यतः ॥ १४
तयोः परः शिवः शान्तः क्षराक्षरपरः स्मृतः ।
समष्टि-व्यष्टिरूपञ्च समष्टि-व्यष्टिकारणम् ॥ १५
वदन्ति मुनयः केचिच्छिवं परमकारणम् ।
समष्टिमाहुरव्यक्तं व्यष्टिं व्यक्तं तथैव च ॥ १६
ते रूपे परमेशस्य तदिच्छामनुवर्त्तनात् ।
तयोः कारणभावेन शिवं परमकारणम् ॥ १७
कारणार्थविदः प्राहुः समष्टि-व्यष्टिकारणम् ।
जाति-व्यक्तिस्वरूपीति कथ्यते कैश्चिदीश्वरः ॥ १८
यत् पिण्डेष्वनुवर्त्तेत सा जातिरिति कथ्यते ।
व्यक्तिर्व्यावृत्तरूपं तत् पिण्डजाते समाश्रितम् ॥ १९
जातयो व्यक्तयश्चैव तदाज्ञापरिपालिताः ।
यतस्ततो महादेवो जाति-व्यक्तिवपुः स्मृतः ॥ २०
प्रधान-पुरुष-व्यक्त-कालात्मा कथ्यते शिवः ।
प्रधानं प्रकृतिं प्राहुः क्षेत्रज्ञं पुरुषं तथा ॥ २१
त्रयोविंशति तत्त्वानि व्यक्तमाहुर्मनीषिणः ।
कालः कार्य्यप्रपञ्चस्य परिणामैककारणम् ॥ २२
एषामीशोऽधिपो धाता प्रवर्त्तकनिवर्त्तकः ।
आविर्भाव-तिरोभावहेतुरेकः स्वराड़जः ॥ २३
तस्मात् प्रधान-पुरुष-व्यक्तकालस्वरूपवान् ।
हेतुर्नेताधिपस्तेषां धाता चोक्तो महेश्वरः ॥ २४
विराड्हिरण्यगर्भात्मा कैश्चिदीशो निगद्यते ।
हिरण्यगर्भो लोकानां हेतुर्विश्वात्मको विराट् ॥ २५
अन्तर्यामी परश्चेति कथ्यते कविभिः शिवः ।
प्राज्ञ-तैजस-विश्वात्मेत्यपरे सम्प्रचक्षते ॥ २६
माता मानञ्च मेयञ्च मितिञ्चाहुस्तथापरे ।
कर्त्ता क्रिया च कार्य्यञ्च करणं कारणं परे ॥ २७
जाग्रत्स्वप्नसुषुप्तात्मेत्यपरे सम्प्रचक्षते ।
तुरीयमपरे प्राहुस्तुर्य्यातीतमितीतरे ॥ २८
तमाहुर्निर्गुणं केचिद्गुणवन्तं परे विदुः ।
केचित् संसारिणं प्राहुस्तमसंसारिणं परे ॥ २९
स्वतन्त्रमपरे प्राहुरस्वतन्त्रं परे विदुः ।
घोरमित्यपरे प्राहुः सौम्यमेव परे विदुः ॥ ३०
रागवन्तं परे प्राहुर्वीतरागं तथापरे ।
निष्क्रियन्त्वपरे प्राहुः सक्रियञ्चेतरे जनाः ॥ ३१
निरिन्द्रियं परे प्राहुः सेन्द्रियञ्च तथापरे ।
ध्रुवमित्यपरे प्राहुस्तमध्रुवमितीतरे ॥ ३२
अरूपं केचिदाहुर्वै रूपवन्तं परे विदुः ।
अदृश्यमपरे प्राहुर्दृश्यमित्यपरे विदुः ॥ ३३
वाच्यमित्यपरे प्राहुरवाच्यमिति चापरे ।
शब्दात्मकं परे प्राहुः शब्दातीतमथापरे ॥ ३४
केचिच्चिन्तामयं प्राहुश्चिन्तया रहितं परे ।
ज्ञानात्मकं परे प्राहुर्विज्ञानमिति चापरे ॥ ३५
केचिज्ज्ञेयमिति प्राहुरज्ञेयमिति चापरे ।
एको तमेकमेवाहुरनेकञ्च तथापरे ॥ ३६
एवं विकल्प्यमानं तद्याथात्म्यं परमेष्ठिनः ।
नाध्यवस्यन्ति मुनयो नानाप्रत्ययकारणात् ॥ ३७
ये पुनः सर्व्वभावेन प्रपन्नाः परमेश्वरम् ।
ते हि जानन्त्ययत्नेन शिवं परमकारणम् ॥ ३८

यावत् पशुर्नैव पश्यत्यनीशं
कविं पुराणं भुवनस्येशितारम् ।
तावद्दुःखे वर्त्तते बद्धपाशः
संसारेऽस्मिंश्चक्रनेमिभ्रमेण ॥ ३९
यदा पश्येत् पश्यन्तं रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परममुपैति साम्यम् ॥ ४०

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे षष्ठोऽध्यायः ॥ ६

सप्तमोऽध्यायः ।

उपमन्युरुवाच ।

न शिवस्याणवो बन्धः कार्म्मो मायेय एव वा ।
प्राकृतो वाथ बौद्धो वा ह्यहङ्कारात्मकस्तथा ॥ १
नैवास्य मानसो बन्धो न चैत्तो नेन्द्रियात्मकः ।
न च तन्मात्रबन्धोऽपि भूतबन्धो न कश्चन ॥ २
न च कालः कला चैव नाविद्या नियतिस्तथा ।
न रागो न च विद्वेषः शम्भोरमिततेजसः ॥ ३
न चाप्यभिनिवेशोऽस्य कुशलाकुशलान्यपि ।
कर्म्माणि तद्विपाकश्च सुख-दुःखे च तत्फले ॥ ४

आशयैर्नास्य सम्बन्धः संस्कारैः कर्म्मणामपि ।
भोगैश्च भोगसंस्कारैः कालत्रितयगोचरैः ॥ ५
न तस्य कारणं कर्त्ता नादिरन्तस्तथान्तरम् ।
न कर्म्म करणं वापि नाकार्य्यं कार्य्यमेव च ॥ ६
नास्य बन्धुर्न चारिर्वा नियन्ता प्रेरकोऽपि वा ।
न पतिर्न गुरुर्भ्राता नाधिको न समस्तथा ॥ ७
न जन्म-मरणे तस्य न काङ्क्षितमकाङ्क्षितम् ।
न विधिर्न निषेधश्च न मुक्तिर्न च बन्धनम् ॥ ८
नास्ति यद्यदकल्याणं तत् तदस्य कदाचन ।
कल्याणं सकलञ्चास्ति परमात्मा शिवो यतः ॥ ९
स शिवः सर्व्वमेवेदमधिष्ठाय स्वशक्तिभिः ।
अप्रच्युतस्ततो भावः स्थितः स्थाणुरतः स्मृतः ॥ १०
शिवेनाधिष्ठितं यस्माज्जगत् स्थावर-जङ्गमम् ।
सर्व्वरूपः स्मृतः शर्व्वस्तथा ज्ञात्वा न मुह्यति ॥ ११
शर्व्वो रुद्रो नमस्तस्मै पुरुषः सन् परो महान् ।
हिरण्यबाहुर्भगवान् हिरण्यपतिरीश्वरः ॥ १२
अम्बिकापतिरीशानः पिनाकी वृषवाहनः ।
एको रुद्रः परंब्रह्म पुरुषः कृष्णपिङ्गलः ॥ १३
बालाग्रमात्रो हृन्मध्ये विचिन्त्यो दहरान्तरे ।
हिरण्यकेशः पद्माक्षो ह्यरुणस्ताम्र एव च ॥ १४
योऽवसर्पत्यसौ देवो नीलग्रीवो हिरण्मयः ।
सौम्यो घोरस्तथा मिश्रश्चाक्षरश्चामृतोऽव्ययः ॥ १५
स पुंविशेषः परमो भगवानन्तकान्तकः ।
चेतनाचेतनोन्मुक्तः प्रपञ्चाच्च परात्परः ॥ १६
लोके सातिशयत्वेन ज्ञानैश्वर्य्यं विलोकिते ।
शिवेऽनातिशयत्वेन स्थिते प्राहुर्मनीषिणः ॥ १७
प्रतिसर्गं प्रसूतानां ब्रह्मणां शास्त्रविस्तरम् ।
उपदेष्टा स एवादौ कालावच्छेदवर्त्तिनाम् ॥ १८
कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः ।
सर्व्वेषामेव सर्व्वेशः कालावच्छेदवर्ज्जितः ॥ १९
शुद्धिः स्वाभाविकी तस्य शक्तिः सर्व्वातिशायिनी ।
ज्ञानमप्रतिमं नित्यं वपुरत्यन्तनिर्म्मलम् ॥ २०
ऐश्वर्य्यमप्रतिद्वन्द्वं सुखमात्यन्तिकं बलम् ।
तेजः प्रभावो वीर्य्यञ्च क्षमा कारुण्यमेव च ॥ २१
परिपूर्णस्य सर्गाद्यैर्नात्मनोऽस्ति प्रयोजनम् ।
परानुग्रह एवास्य फलं सर्व्वस्य कर्म्मणः ॥ २२
प्रणवो वाचकस्तस्य शिवस्य परमात्मनः ।
शिव-रुद्रादिशब्दानां प्रणवो हि परः स्मृतः ॥ २३
शम्भोः प्रणववाच्यस्य भावनात् तज्जपादपि ।
या सिद्धिः सा परा प्राप्या भवत्येव न संशयः ॥ २४
तस्मादेकाक्षरं देवमाहुरागमपारगाः ।
वाच्य-वाचकयोरैक्यं मन्यमाना मनस्विनः ॥ २५
अस्य मात्राः समाख्यातास्चतस्रो वेदमूर्द्धनि ।
अकारश्चाप्युकारश्च मकारो नाद इत्यपि ॥ २६
अकारं बह्वृचं प्राहुरुकारो यजुरुच्यते ।
मकारः साम नादोऽस्य श्रुतिराथर्व्वणी स्मृता ॥ २७
अकारश्च महाबीजं रजःस्रष्टा चतुर्मुखः ।
उकारः प्रकृतिर्योनिः सत्त्वं पालयिता हरिः ॥ २८
मकारः पुरुषो बीजं तमः संहारको हरः ।
नादः परः पुमानीशो निर्गुणो निष्क्रियः शिवः ॥ २९
एवं तिसृभिरेवैष मात्राभिर्निखिलं त्रिधा ।
अभिधाय शिवात्मानं बोधयत्यर्द्धमात्रया ॥ ३०

यस्मात् परं नापरमस्ति किञ्चिद्-
यस्मान्नाणीयो न च ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येक-
स्तेनेदं पूर्णं पुरुषेण सर्व्वम् ॥ ३१

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

उपमन्युरुवाच ।

शक्तिः स्वाभाविकी तस्य विद्या विश्वविलक्षणा ।
एकानेकस्वरूपेण भाति भानोरिव प्रभा ॥ १
अनन्ताः शक्तयस्तस्या इच्छा-ज्ञान-क्रियादयः ।
मायाद्याश्चाभवन् वह्नेर्विस्फुलिङ्गा यथा तथा ॥ २
सदाशिवेश्वराद्याश्च नानाविद्येश्वरादयः ।
अभवन् पुरुषाश्चास्याः प्रकृतिश्च परात्परा ॥ ३
महदादि-विशेषान्ता अजाद्याश्चापि मूर्त्तयः ।
यच्चान्यदपि तत् सर्व्वं तस्याः कार्य्यं न संशयः ॥ ४
सा शक्तिः सर्व्वगा सूक्ष्मा प्रबोधानन्दरूपिणी ।
शक्तिमानुच्यते देवः शिवः शीतांशुभूषणः ॥ ५

वेद्यः शिवः शिवा विद्या प्रज्ञा चैव श्रुतिः स्मृतिः ।
धृतिरेषा स्थितिर्निष्ठा ज्ञानेच्छाकर्म्मशक्तयः ॥ ६
आज्ञा चैव परंब्रह्म द्वे विद्ये च परापरे ।
शुद्धविद्या शुद्धकला सर्व्वं शक्तिकृतं यतः ॥ ७
माया च प्रकृतिर्जीवो विकारो विकृतिस्तथा ।
असच्च सच्च यत् किञ्चित् तया सर्व्वमिदं ततम् ॥ ८
सा देवी मायया सर्व्वं ब्रह्माण्डं सचराचरम् ।
मोहयत्यप्रयत्नेन मोचयत्यपि लीलया ॥ ९
अनया सह सर्व्वेशः सप्तविंशत्प्रकारया ।
विश्वं व्याप्य स्थितस्तस्मान्मुक्तिरत्र प्रवर्त्तते ॥ १०
मुमुक्षवः पुरा केचिन्मुनयो ब्रह्मवादिनः ।
संशयाविष्टमनसो विमृशन्ति यथातथम् ॥ ११
किं कारणं कुतो जाता जीवामः केन वा वयम् ।
क्व चास्माकं सम्प्रतिष्ठा केन वाधिष्ठिता वयम् ॥१२
केन वर्त्तामहे शश्वत् सुखेष्वन्येषु चानिशम् ।
अनिर्लङ्घ्या च विश्वस्य व्यवस्था केन वा कृता ॥ १३
कालः स्वभावो नियतिर्यदृच्छा नात्र युज्यते ।
भूतानि योनिः पुरुषो योगश्चैषां परोऽथवा ॥ १४
अचेतनत्वात् कालादेश्चेतनत्वेऽपि चात्मनः ।
सुखदुःखाभिभूतत्वादनीशत्वं विचार्य्य च ॥ १५
ते ध्यानयोगानुगताः प्रापश्यन् शक्तिमैश्वरीम् ।
पाशविच्छेदिकां साक्षान्निगूढ़ां स्वगुणैर्भृशम् ॥ १६
तया विच्छिन्नपाशास्ते सर्व्वकारणकारणम् ।
शक्तिमन्तं महादेवमपश्यन् दिव्यचक्षुषा ॥ १७
यः कारणान्यशेषाणि कालात्मसहितानि च ।
अप्रमेयोऽनया शक्त्या साक्रमेकोऽधितिष्ठति ॥ १८
ततः प्रसादयोगेन योगेन परमेण च ।
दृढ़ेन भक्तियोगेन दिव्यां गतिमवाप्नुवन् ॥ १९
तस्मात् सह तया शक्त्या हृदि पश्यन्ति ये शिवम् ।
तेषां शाश्वतिकी शान्तिर्नेतरेषामिति श्रुतिः ॥ २०
न हि शक्तिमतः शक्त्या विप्रयोगोऽस्ति जातुचित् ।
तस्माच्छक्तेः शक्तिमतः प्रसादान्निर्वृतिर्द्वयोः ॥ २१
क्रमोऽविवक्षितो नूनं विमुक्तौ ज्ञान-कर्म्मणोः ।
प्रसादे सति सा मुक्तिर्यस्मात् करतले स्थिता ॥ २२
देवो वा दानवो वापि पशुर्वा विहगोऽपि वा ।
कीटोऽथवा कृमिर्वापि मुच्यते तत्प्रसादतः ॥ २३
गर्भस्थो जायमानो वा बालो वा तरुणोऽपि वा ।
वृद्धो वा म्रियमाणो वा स्वर्गस्थो वाथ नारकी ॥२४
पतितो वापि धर्म्मात्मा पण्डितो मूढ़ एव वा ।
प्रसादे तत्क्षणादेव मुच्यते नात्र संशयः ॥ २५
अयोग्यानाञ्च कारुण्याद्भक्तानां परमेश्वरः ।
प्रसीदति न सन्देहो निगृह्य विविधान् मलान् ॥२६
प्रसादादेव सा भक्तिः प्रसादो भक्तिसम्भवः ।
अवस्थाभेदमुत्प्रेक्ष्य विद्वांस्तत्र न मुह्यति ॥ २७
प्रसादपूर्व्विका येयं भक्तिमुक्तिविधायिनी ।
नैव सा शक्यते प्राप्तं नरैरेकेन जन्मना ॥ २८
अनेकजन्मसिद्धानां श्रौत-स्मार्त्तानुवर्त्तिनाम् ।
विरक्तानां प्रबुद्धानां प्रसीदति महेश्वरः ॥ २९
प्रसन्ने सति देवेशे पशोस्तस्मिन् प्रवर्त्तते ।
अस्ति-नाथो ममेत्यल्पा भक्तिर्बुद्धिपुरःसरा ॥ ३०
तपसा विवशः शैवैर्धर्म्मैः संयुज्यते नरः ।
तत्प्रयोगी तदभ्यासस्ततो भक्तिः परा भवेत् ॥ ३१
परया च तया भक्त्या प्रसादो लभ्यते परः ।
प्रसादात् सर्व्वपाशेभ्यो मुक्तिभुक्तिः सुनिर्वृतिः ॥३२
अल्पभावोऽपि यो मर्त्त्यः सोऽपि जन्मत्रयात् परम् ।
न योनियन्त्रपीड़ां वै लभते नात्र संशयः ॥ ३३
साङ्गानङ्गा च या सेवा सा भक्तिरिति कथ्यते ।
सा पुनर्भिद्यते त्रेधा मनो-वाक्-कायसाधनैः ॥ ३४
शिवरूपादिचिन्ता या सा सेवा मानसी स्मृता ।
जपादिर्वाचिकी सेवा कर्म्मपूजादि कायिकी ॥३५
सेयं त्रिसाधना सेवा शिवधर्म्मश्च कथ्यते ।
स तु पञ्चविधः प्रोक्तः शिवेन परमात्मना ॥ ३६
तपःकर्म्म जपो ध्यानं ज्ञानञ्चेति समासतः ।
कर्म्मलिङ्गार्च्चनाद्यञ्च तपश्चान्द्रायणादिकम् ॥ ३७
जपस्त्रिधा शिवाभ्यासश्चिन्ता ध्यानं शिवस्य तु ।
शिवागमोक्तं यज्ज्ञानं तदत्र ज्ञानमुच्यते ॥ ३८
श्रीकण्ठेन शिवेनोक्तः शिवायै च शिवागमः ।
शिवाश्रितानां कारुण्याच्छ्रेयसामेकसाधनम् ॥ ३९
तस्माद्विवर्द्धयेद्भक्तिं शिवे परमकारणे ।
त्यजेच्च विषयासङ्गं श्रेयोऽर्थी मतिमान् नरः ॥ ४०

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागेऽष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः।

श्रीकृष्ण उवाच।

भगवन् श्रोतुमिच्छामि शिवेन परिभाषितम्।
वेदसारं शिवज्ञानं स्वाश्रितानां विमुक्तये॥ १
अभक्तानामबुद्धानामयुक्तानामगोचरम्।
अर्थदैशाद्यैः संयुक्तं गूढमप्राज्ञनिन्दितम्॥ २
वर्णाश्रमकृतैर्धर्मैर्विपरीतं क्वचित् समम्।
वेदात् षड़ङ्गादुद्धृत्य सांख्ययोगाच्च कृत्स्नशः॥ ३
शतकोटिप्रमाणेन विस्तीर्णं ग्रन्थसंख्यया।
कथितं परमेशेन तत्र पूजा कथं प्रभो॥ ४
कस्याधिकारः पूजादौ ज्ञानयोगादयः कथम्।
तत् सर्व्वं विस्तरादेव वक्तुमर्हसि सुव्रत॥ ५

उपमन्युरुवाच।

शैवं सङ्क्षिप्य वेदोक्तं शिवेन परिभाषितम्।
स्तुति-निन्दाविरहितं सद्यःप्रत्ययकारकम्॥ ६
गुरुप्रसादजं दिव्यमनायासेन मुक्तिदम्।
कथयिष्ये समासेन तस्य शक्यो न विस्तरः॥ ७
सिसृक्षया पुराऽव्यक्ताच्छिवः स्थाणुर्महेश्वरः।
सत्कार्यैकारणोपेतः स्वयमाविरभूत् प्रभुः॥ ८
जनयामास च तदा ऋषिर्विश्वाधिकः प्रभुः।
देवानां प्रथमं देवं ब्रह्माणं ब्रह्मणः पतिः॥ ९
ब्रह्मापि पितरं देवं जायमानोऽन्ववैक्षत।
तं जायमानं जनको देवः प्रापश्यदाज्ञया॥ १०
दृष्टो रुद्रेण देवोऽसावसृजद्विश्वमीश्वरः।
वर्णाश्रमव्यवस्थाञ्च चकार स पृथक् पृथक्॥ ११
सोमं ससर्ज्ज यज्ञार्थं सोमाद्द्यौः समजायत।
धरा च वह्निः सूर्य्यश्च यज्ञो विष्णुः शचीपतिः॥१२
ते चान्ये च सुरा रुद्रं रुद्राध्यायेन तुष्टुवुः।
प्रसन्नवदनस्तस्थौ देवानामग्रतः प्रभुः॥ १३
अपहृत्य स्वलीलार्थं तेषां ज्ञानं महेश्वरः।
तमपृच्छंस्ततो देवाः को भवानिति मोहिताः॥ १४
सोऽब्रवीद्भगवान् रुद्रो ह्यहमेकः पुरातनः।
आसं प्रथममेवाहं वर्त्तामि च सुरोत्तमाः॥ १५
भविष्यामि च मत्तोऽन्यो व्यतिरिक्तो न कश्चन।
अहमेव जगत् सर्व्वं तर्पयामि स्वतेजसा॥ १६
मत्तोऽधिकः समो नास्ति मां यो वेद स मुच्यते।
इत्युक्त्वा भगवान् रुद्रस्तत्रैवान्तरधीयत॥ १७
नापश्यंश्च ततो देवं देवा विष्णुपुरोगमाः।
अथर्व्वशिरसा रुद्रमस्तुवंश्चोर्द्ध्वबाहवः॥ १८
त्वरिताख्येन रुद्रेण रुद्रेण ब्रह्मभिस्तथा।
स्तोत्रैश्च विविधैरन्यैः सूक्तैः शैवैश्च नामभिः॥ १९
व्रतं पाशुपतं कृत्वा ह्यथर्व्वशिरसि स्थितम्।
भस्मसञ्छन्नसर्व्वाङ्गा बभूवुरमरास्तदा॥ २०
अथ तेषां प्रसादार्थं पशूनां पतिरीश्वरः।
सगणश्चाम्बया सार्द्धं सान्निध्यमकरोत् प्रभुः॥ २१
यं विनिद्रा जितश्वासा योगिनो दग्धकिल्बिषाः।
हृदि पश्यन्ति तं देवं ददृशुर्देवपुङ्गवाः॥ २२
यामाहुः परमां शक्तिमीश्वरेच्छानुवर्त्तिनीम्।
तामपश्यन् महेशस्य वामाङ्गे वामलोचनाम्॥ २३
ये विनिर्द्धूतसंसाराः प्राप्ताः शैवं परं पदम्।
नित्यसिद्धाश्च ये चान्ये ते च दृष्टा गणेश्वराः॥ २४
अथ तं तुष्टुवुर्देवा देव्या सह महेश्वरम्।
स्तोत्रैर्माहेश्वरैर्दिव्यैः स्तोत्रैः पौराणिकैरपि॥ २५
देवोऽपि देवानालोक्य कृपया वृषभध्वजः।
तुष्टोऽस्मीत्याह सम्प्रीतः स्वभावमधुरां गिरम्॥ २६
अथ तं प्रीतमनसं प्रणिपत्य वृषध्वजम्।
अर्थमर्थ्यतमं देवाः पप्रच्छुरिममादरात्॥ २७

देवा ऊचुः।

भगवन् केन मार्गेण पूजनीयोऽसि भूतले।
कस्याधिकारः पूजायां वक्तुमर्हसि तत्त्वतः॥ २८
ततः सस्मितमालोक्य देवीं देववरो हरः।
स्वरूपं दर्शयामास घोरं सूर्य्यात्मकं परम्॥ २९
सर्व्वैश्वर्य्यगुणोपेतं सर्व्वतेजोमयं परम्।
शक्तिभिर्मूर्त्तिभिः स्वाभिर्ग्रहैर्देवैश्च संवृतम्॥ ३०
अष्टबाहुं चतुर्व्वक्त्रमर्द्धनारीकमद्भुतम्।
दृष्ट्वैवमद्भुताकारं देवा विष्णुपुरोगमाः॥ ३१
बुद्ध्वा दिवाकरं देवं देवीञ्चैव निशाकरम्।
पञ्चभूतान्यशेषाणि तन्मयञ्च चराचरम्॥ ३२
एवमुक्त्वा नमश्चक्रुस्तस्मै चार्घ्यं प्रदाय वै॥ ३३
सिन्दूरवर्णाय सुमण्डलाय
सुवर्णवज्राभरणाय तुभ्यम्।

शशाभनेत्राय सपङ्कजाय
ब्रह्मेन्द्रनारायणकारणाय ॥ ३४
सुरत्नपूर्णं ससुवर्णतोयं
सुकुङ्कुमाढ्यं सकुशं सपुष्पम्।
प्रदत्तमादाय सहेमपात्रं
प्रशस्तमर्घ्यं भगवन् प्रसीद ॥ ३५

नमः शिवाय साम्बाय सगणायादिहेतवे।
रुद्राय विष्णवे तुभ्यं ब्रह्मणे सूर्य्यमूर्त्तये ॥ ३६
यः शिवं मण्डले सौरे सम्पूज्यैवं समाहितः।
प्रातर्मध्याह्नसायाह्ने प्रदद्यादर्घ्यमुत्तमम् ॥ ३७
प्रणमेद्वा पठेदेतत् स्तोत्रं स्तुतिशतोत्तमम्।
न तस्य दुर्लभं किञ्चिद्भक्तश्चेन्मुच्यते दृढम् ॥ ३८
तस्माद्भक्त्यार्चयेन्नित्यं शिवमादित्यरूपिणम्।
धर्म्मकामार्थमुक्त्यर्थं मनसा कर्म्मणा गिरा ॥ ३९
अथ देवान् समालोक्य मण्डलस्थो महेश्वरः।
सर्व्वागमोत्तरं दत्त्वा शास्त्रमन्तरधीयत ॥ ४०
तत्र पूजाधिकाराद्यं ब्रह्म-क्षत्र-विशामिति।
ज्ञात्वा प्रणम्य देवेशं देवा जग्मुर्यथागतम् ॥ ४१
अथ कालेन महता तस्मिन् शास्त्रे तिरोहिते।
भर्त्तारं परिपप्रच्छ तदङ्कस्था महेश्वरी ॥ ४२
तया सञ्चोदितो देवो देव्या चन्द्रार्द्धभूषणः।
अवदत् सारमुद्धृत्य शास्त्रं सर्व्वागमोत्तरम् ॥ ४३
प्रवर्त्तितञ्च तल्लोके नियोगात् परमेष्ठिनः।
मयागस्त्येन गुरुणा दधीचेन महर्षिणा ॥ ४४
स्वयमप्यवतीर्य्योर्व्यां युगावर्त्तेषु शूलधृक्।
स्वाश्रितानां विमुक्त्यर्थं कुरुते ज्ञानसन्ततिम् ॥ ४५
ऋभुः सत्यो भार्गवश्च अङ्गिराः सविता द्विजाः।
मृत्युः शतक्रतुर्धर्म्मो वशिष्ठो मुनिपुङ्गवः ॥ ४६
सारस्वतस्त्रिधामा च त्रिवृतो मुनिपुङ्गवः।
शततेजाः स्वयं धर्म्मो नारायण इति श्रुतः ॥ ४७
स्वरक्षश्चारुणिर्धीमांस्तथा चैव कृतञ्जयः।
भामतेयो भरद्वाजो गौतमः कविसत्तमः ॥ ४८
वाचःश्रवा मुनिः साक्षात् तथा सूक्ष्मायणिः शुचिः।
तृणबिन्दुर्मुनिः कृष्णशक्तिः शाक्तेय उत्तरः ॥ ४९
जातूकर्ण्यो हरिः साक्षात् कृष्णद्वैपायनो मुनिः।
व्यासास्त्वेते च शृण्वन्तु कल्पयोगेश्वरान् क्रमात् ॥ ५०
लैङ्गे व्यासावताराणि द्वापरान्तेषु सुव्रत।
योगाचार्य्यावताराणि तथा तिष्ये तु शूलिनः ॥ ५१
तत्र तत्र विभोः शिष्याश्चत्वारः स्युर्महौजसः।
शिष्यास्तेषां प्रशिष्याश्च शतशोऽथ सहस्रशः ॥ ५२
तेषां सम्भाषणाल्लोके सेवाज्ञाकरणादिभिः।
भाग्यवन्तो विमुच्यन्ते भक्त्या चात्यन्तभाविताः ॥ ५३

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः।

श्रीकृष्ण उवाच।
युगावर्त्तेषु सर्व्वेषु योगाचार्य्यच्छलेन तु।
अवताराणि शर्व्वस्य शिष्यांश्च भगवन् वद ॥ १
उपमन्युरुवाच।
श्वेतः सुतारो मदनः सुहोत्रः कङ्क एव च।
लौगाक्षिश्च महामायो जैगीषव्यस्तथैव च ॥ २
दधिवाहश्च ऋषभो मुनिरुग्रोऽत्रिरेव च।
सुबालको गौतमश्च तथा वेदशिरा मुनिः ॥ ३
गोकर्णश्च गुहावासी शिखण्डी चापरः स्मृतः।
जटामाली चाट्टहासो दारुको लाङ्गली तथा ॥ ४
महाकालश्च शूली च दण्डी मुण्डी स एव च।
सहिष्णुः सोमशर्म्मा च नकुलीश्वर एव च ॥ ५
एते वाराहकल्पेऽस्मिन् सप्तमस्यान्तरे मनोः।
अष्टाविंशतिसंख्याता योगाचार्य्या युगक्रमात् ॥ ६
शिष्याः प्रत्येकमेतेषां चत्वारः शान्तचेतसः।
श्वेतादयश्च रुष्यान्तास्तान् ब्रवीमि यथाक्रमम् ॥ ७
श्वेतः श्वेतशिखश्चैव श्वेताश्वः श्वेतलोहितः।
दुन्दुभिः शतरूपश्च ऋचीकः केतुमांस्तथा ॥ ८
विकोशश्च विकेशश्च विपाशः पाशनाशनः।
सुमुखो दुर्म्मुखश्चैव दुर्द्दमो दुरतिक्रमः ॥ ९
सनत्कुमारः सनकः सनन्दश्च सनातनः।
सुधामा विरजश्चैव शङ्खपाद्वैरजस्तथा ॥ १०
सारस्वतश्च मेघश्च मेघवाहः सुवाहकः।
कपिलश्चासुरिः पञ्चशिखो वाष्कल एव च ॥ ११
पराशरश्च गर्गश्च भार्गवश्चाङ्गिरास्तथा।

बलबन्धुर्निरामित्रः केतुशृङ्गस्तपोधनः ॥ १२
लम्बोदरश्च लम्बश्च लम्बाक्षो लम्बकेशकः।
सर्वज्ञः समबुद्धिश्च साध्यबुद्धिस्तथैव च ॥ १३
सुधामा काश्यपश्चैव वशिष्ठो विरजास्तथा।
अत्रिरुग्रो गुरुश्रेष्ठः श्रवणोऽथ श्रविष्ठकः ॥ १४
कुणिश्च कुणिबाहुश्च कुशरीरः कुनेत्रकः।
कश्यपो ह्युशनाचैव च्यवनश्च वृहस्पतिः ॥ १५
उतथ्यो वामदेवश्च महाकालो महानिलः।
वाचश्रवाः सुवीरश्च श्यावाश्वश्च यतीश्वरः ॥ १६
हिरण्यनाभः कौशल्यो लोकाक्षिः कुथुमिस्तथा।
सुमन्तुर्जैमिनिश्चैव कबन्धः कुशकन्धरः ॥ १७
प्लक्षो दार्भायणिश्चैव केतुमान् गौतमस्तथा।
भल्लवी मधुपिङ्गश्च श्वेतकेतुस्तथैव च ॥ १८
उशिजो वृहदश्वश्च देवलः कविरेव च।
शालिहोत्रः सुवेषश्च युवनाश्वः शरद्वसुः ॥ १९
छगलः कुण्डकर्णश्च कुम्भश्चैव प्रवाहकः।
उलूको विद्युतश्चैव शम्बुकश्चाश्वलायनः ॥ २०
अक्षपादः कणादश्च उलूको वत्स एव च।
कुशिकश्चैव गर्गश्च मित्रको रुष्य एव च ॥ २१
एते शिष्या महेशस्य योगाचार्यस्वरूपिणः।
संख्या च शतमेतेषां सह द्वादशसंख्यया ॥ २२
सर्व्वे पाशुपताः सिद्धा भस्मोद्धूलितविग्रहाः।
सर्व्वे शास्त्रार्थतत्त्वज्ञा वेदवेदाङ्गपारगाः ॥ २३
शिवाश्रमरताः सर्व्वे शिवज्ञानपरायणाः।
सर्व्वसङ्गविनिर्मुक्ताः शिवैकासक्तचेतसः ॥ २४
सर्व्वद्वन्द्वसहा धीराः सर्व्वभूतहिते रताः।
ऋजवो मृदवः स्वस्था जितक्रोधा जितेन्द्रियाः ॥ २५
रुद्राक्षमालाभरणास्त्रिपुण्ड्राङ्कितमस्तकाः।
शिखाजटाः सर्व्वजटा अजटा मुण्डशीर्षकाः ॥ २६
फलमूलाशनप्रायाः प्राणायामपरायणाः।
शिवाभिमानसम्पन्नाः शिवध्यानैकतत्पराः ॥ २७
समुन्मथितसंसार-विषवृक्षाङ्कुरोद्गमाः।
प्रयातुमेव सन्नद्धाः परं शिवपुरं प्रति ॥ २८
सदेशिकानिमान् मत्वा नित्यं यः शिवमर्च्चयेत्।
स याति शिवसायुज्यं नात्र कार्य्या विचारणा ॥ २९

इति श्रीशैवे वा० सं० उ० दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः।

श्रीकृष्ण उवाच।

भगवन् सर्व्वयोगीन्द्र गणेश्वर मुनीश्वर।
षड़ाननसमप्रख्य सर्व्वज्ञाननिधे गुरो ॥ १
प्रायस्त्वमवतीर्य्योर्व्यां पाशविच्छित्तये नृणाम्।
महर्षिवपुरास्थाय स्थितोऽसि परमेश्वरः ॥ २
अन्यथा हि जगत्यस्मिन् देवो वा दानवोऽपि वा।
त्वत्तोऽन्यः परमं भावं को जानीयाच्छिवात्मकम् ॥ ३
तस्मात् तव मुखोद्गीर्णां साक्षादिव पिनाकिनः।
शिवज्ञानामृतं पीत्वा न मे तृप्तमभून्मनः ॥ ४
साक्षात् सर्व्वजगद्धर्त्तुर्भर्त्तुरङ्कं समाश्रिता।
भगवन् किं नु पप्रच्छ भर्त्तारं परमेश्वरी ॥ ५

उपमन्युरुवाच।

स्थाने पृष्टं त्वया कृष्ण तद्वक्ष्यामि यथातथम्।
भवभक्तस्य युक्तस्य तव कल्याणचेतसः ॥ ६
महीधरवरे दिव्ये मन्दरे चारुकन्दरे।
देव्या सह महादेवो दिव्योद्यानगतोऽभवत् ॥ ७
तदा देव्याः प्रियसखी सुस्मितास्या शुभावती।
फुल्लान्यतिमनोज्ञानि पुष्पाणि समुपाहरत् ॥ ८
ततः स्वमङ्कमारोप्य देवीं देववरो हरः।
अलङ्कृत्य च तैः पुष्पैरास्ते हृष्टतरः स्वयम् ॥ ९
अथान्तःपुरचारिण्यो देव्यो दिव्यविभूषणाः।
अन्तरङ्गा गणेन्द्राश्च देवं देवीं सिषेविरे ॥ १०
ततः प्रियाः कथा वृत्ता विनोदाय महेशयोः।
त्राणाय च नृणां लोके ये शिवं शरणं गताः ॥ ११
तदावसरमालोक्य सर्व्वलोकमहेश्वरी।
भर्त्तारं परिपप्रच्छ सर्व्वलोकमहेश्वरम् ॥ १२

देव्युवाच।

केन वश्यो महादेवो मर्त्त्यानां मन्दचेतसाम्।
अल्पसत्त्वाल्पशक्तीनामल्पानामकृतात्मनाम् ॥ १३

ईश्वर उवाच।

न कर्म्मणा न तपसा न जपैर्न समाधिभिः।
न ज्ञानेन न चान्येन वश्योऽहं श्रद्धया विना ॥ १४
श्रद्धा मय्यस्ति चेत् पुंसां येन केनापि हेतुना।
वश्यः स्पृश्यश्च दृश्यश्च पूज्यः सम्भाष्य एव च ॥ १५

साध्या तस्मान्मयि श्रद्धा मां वशीकर्त्तुमिच्छता।
श्रद्धा हेतुः स्वधर्म्मस्य रक्षणं वर्णिनामिह॥ १६
स्ववर्णाश्रमधर्म्माभ्यां वर्त्तते यस्तु मानवः।
तस्यैव भवति श्रद्धा मयि नान्यस्य कस्यचित्॥ १७
आम्नायसिद्धमखिलं धर्म्ममाश्रमिणामिह।
ब्रह्मणा कल्पितं पूर्व्वं ममैवाज्ञापुरःसरम्॥ १८
स तु पैतामहो धर्म्मो बहुवित्तक्रियान्वितः।
नात्यन्तफलभूयिष्ठः क्लेशायाससमन्वितः॥ १९
तेन धर्म्मेण महता श्रद्धां प्राप्य सुदुर्लभाम्।
वर्णिनो ये प्रपद्यन्ते मामनन्यसमाश्रयाः॥ २०
तेषां सुखेन मार्गेण धर्म्मकामार्थमुक्तये।
वर्णाश्रमसमाचारो मया भूयः प्रकल्पितः॥ २१
तस्मिन् भक्तिमतामेव मदीयानान्तु वर्णिनाम्।
अधिकारो न चान्येषामित्याज्ञा नैष्ठिकी मम॥ २२
मदाज्ञप्तेन मार्गेण वर्णिनो मदुपाश्रयाः।
मल-मायादिपाशेभ्यो विमुक्ता मत्प्रसादतः॥ २३
पुरं मदीयमासाद्य पुनरावृत्तिदुर्लभम्।
परमं मम साधर्म्म्यं प्राप्य निर्वृतिमाप्नुयुः॥ २४
तस्माल्लब्ध्वाप्यलब्ध्वा वा वर्णधर्म्मं मयेरितम्।
आश्रित्य मम भक्तश्चेत् स्वात्मनात्मानमुद्धरेत्॥ २५
अलब्धाल्लब्ध एवैष कोटिकोटिगुणाधिकः।
तस्मान्मन्मुखतो लब्ध्वा वर्णधर्म्मं समाचरेत्॥ २६
ममावताराणि शुभे योगाचार्य्यच्छलेन तु।
सर्व्वान्तरेषु सन्त्यार्य्ये सन्ततिश्च सहस्रशः॥ २७
अयुक्तानामबुद्धानामभक्तानां सुरेश्वरि।
दुर्लभं सन्ततिज्ञानं ततो यत्नात् समाश्रयेत्॥ २८
सा हानिस्तन्महच्छिद्रं स मोहः सान्धमूकता।
यदन्यत्र श्रमं कुर्य्यान्मोक्षमार्गबहिष्कृतः॥ २९
ज्ञानं क्रिया च चर्य्या च योगश्चेति सुरेश्वरि।
चतुष्पादः समाख्यातो मम धर्म्मः सनातनः॥ ३०
पशु-पाश-पतिज्ञानं ज्ञानमित्यभिधीयते।
षडध्वशुद्धिर्विधिना गुर्व्वधीना क्रियोच्यते॥ ३१
वर्णाश्रमप्रयुक्तस्य मयैव विहितस्य च।
ममार्च्चनादिधर्म्मस्य चर्य्या चर्य्येति कथ्यते॥ ३२
मदुक्तेनैव मार्गेण मय्यवस्थितचेतसः।
वृत्त्यन्तरनिरोधो यो योग इत्यभिधीयते॥ ३३
अश्वमेधशताच्छ्रेष्ठं देवि चित्तप्रसाधनम्।
मुक्तिदञ्च तथाप्येतदसाध्यं विषयैषिणाम्॥ ३४
विजितेन्द्रियवर्गस्य यमेन नियमेन च।
सर्व्वपापहरो योगो विरक्तस्यैव कथ्यते॥ ३५
वैराग्याज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्त्तते।
योगज्ञः पतितो वापि मुच्यते नात्र संशयः॥ ३६
दया कार्य्याथ सततमहिंसा ज्ञानसंग्रहम्।
सत्यमस्तेयमास्तिक्यं श्रद्धा चेन्द्रियनिग्रहः॥ ३७
अध्यापनञ्चाध्ययनं यजनं याजनं तथा।
ध्यानमीश्वरभावश्च सततं ज्ञानशीलता॥ ३८
य एवं वर्त्तते विप्रो ज्ञानयोगस्य सिद्धये।
अचिरादेव विज्ञानं लब्ध्वा योगञ्च विन्दति॥ ३९
दग्ध्वा देहमिमं ज्ञानी क्षणाज्ज्ञानाग्निना प्रिये।
प्रसादान्मम योगज्ञः कर्म्मबन्धं प्रहास्यति॥ ४०
पुण्यापुण्यात्मकं कर्म्म मुक्तेस्तत्प्रतिबन्धकम्।
तस्मान्नियोगतो योगी पुण्यापुण्यं विवर्जयेत्॥ ४१
फलकामनया कर्म्म-करणात् प्रतिबध्यते।
न कर्म्ममात्रकरणात् तस्मात् कर्म्मफलं त्यजेत्॥ ४२
प्रथमं कर्म्मयज्ञेन बहिः सम्पूज्य मां प्रिये।
ज्ञानयज्ञरतो भूत्वा पश्चाद्योगं समभ्यसेत्॥ ४३
विदिते मम याथात्म्ये कर्म्मयज्ञेन देहिनः।
न यजन्ति हि मां युक्ताः समलोष्टाश्मकाञ्चनाः॥ ४४
नित्ययुक्तो मुनिश्रेष्ठो मद्भक्तश्च समाहितः।
ज्ञानयोगरतो योगी मम सायुज्यमाप्नुयात्॥ ४५
अथाविरक्तचित्ता ये वर्णिनो मदुपाश्रयाः।
ज्ञान-चर्य्या-क्रियास्वेव तेऽधिकुर्य्युस्तदर्हकाः॥ ४६
बाह्यमाभ्यन्तरञ्चैव बाह्याभ्यान्तरमेव च।
वाङ्मनःकायभेदाच्च त्रिधा मद्भजनं विदुः॥ ४७
जपः कर्म्म तपो ध्यानं ज्ञानञ्चेत्यनुपूर्व्वशः।
पञ्चधा कथ्यते सद्भिस्तदेव भजनं पुनः॥ ४८
अन्यात्मविदितं बाह्यमस्मदभ्यर्च्चनादिकम्।
तदेव तु स्वसंवेद्यमाभ्यन्तरमुदाहृतम्॥ ४९
मनो मत्प्रवणं चित्तं न मनोमात्रमुच्यते।
मन्नामनिरता वाणी वाङ्मता मम नेतरा॥ ५०
लिङ्गैर्मच्छासनादिष्टैस्त्रिपुण्ड्रादिभिरङ्कितः।
ममोपचारनिरतः कायः कायो न चेतरः॥ ५१

मदर्चा कर्म्म विज्ञेयं वाह्यं यागादि नोच्यते।
मदर्थे देहसंशोषस्तपः कृच्छ्रादि नो मतम् ॥ ५२
जपः पञ्चाक्षराभ्यासः प्रणवाभ्यास एव च।
रुद्राध्यायादिकाभ्यासो न वेदाध्ययनादिकम् ॥ ५३
ध्यानं मद्रूपचिन्ताद्यं नात्माद्यर्थसमाधयः।
ममागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम् ॥ ५४
वाह्ये वाभ्यन्तरे वाथ यत्र स्यान्मनसो रतिः।
प्राग्वासनावशाद्देवि तत्र निष्ठां समाचरेत् ॥ ५५
वाह्यादाभ्यन्तरं श्रेष्ठं भवेच्छतगुणाधिकम्।
असङ्कटत्वाद्दोषाणां दृष्टानामप्यसम्भवात् ॥ ५६
शौचमाभ्यन्तरं विद्यान्न वाह्यं शौचमुच्यते।
अन्तःशौचवियुक्तात्मा शुचिरप्यशुचिर्यतः ॥ ५७
वाह्यमाभ्यन्तरञ्चैव भजनं भावपूर्व्वकम्।
न भावरहितं देवि विप्रलम्भैककारणम् ॥ ५८
कृतकृत्यस्य तृप्तस्य मम किं क्रियते नरैः।
वहिर्वाभ्यन्तरे वाथ मया भावो हि गृह्यते ॥ ५९
भावैकात्मा क्रिया देवि मम धर्म्मः सनातनः।
मनसा कर्म्मणा वाचाप्यनपेक्ष्य फलं क्वचित् ॥ ६०
फलोद्देशेन देवेशि लघुर्मम समाश्रयः।
फलार्थी तदभावे मां परित्यक्तुं क्षमो यतः ॥ ६१
फलार्थिनोऽपि यस्यैव मयि चित्तं प्रतिष्ठितम्।
भावानुरूपफलदस्तस्याप्यहमनिन्दिते ॥ ६२
फलानपेक्षया येषां मनो मत्प्रवणं भवेत्।
प्रार्थयेयुः फलं पश्चाद्भक्तास्तेऽपि मम प्रियाः ॥ ६३
प्राक्संस्कारवशादेव येऽविचिन्त्य फलाफले।
विवशा मां प्रपद्यन्ते मम प्रियतमा मताः ॥ ६४
मल्लाभान्न परो लाभस्तेषामस्ति यथातथम्।
ममापि लाभस्तल्लाभान्न परः परमेश्वरि ॥ ६५
मदनुग्रहतस्तेषां भावो मयि समर्पितः।
फलं परमनिर्व्वाणं प्रयच्छति बलादिव ॥ ६६
महात्मनामनन्यानां मयि विन्यस्तचेतसाम्।
अष्टधा लक्षणं प्राहुर्मम धर्म्माधिकारिणाम् ॥ ६७
मद्भक्तजनवात्सल्यं पूजायाञ्चानुमोदनम्।
स्वयमप्यर्च्चनञ्चैव मदर्थे चाङ्गचेष्टितम् ॥ ६८
मत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गविक्रियाः।
ममानुस्मरणं नित्यं यश्च मामुपजीवति ॥ ६९

एवमष्टविधं चिह्नं यस्मिन् म्लेच्छेऽपि वर्त्तते।
स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः ॥ ७०
न मे प्रियश्चतुर्व्वेदी मद्भक्तः श्वपचोऽपि यः।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥ ७१
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ७२
अथ वक्ष्यामि देवेशि भक्तानामधिकारिणाम्।
विदुषां द्विजमुख्यानां वर्णधर्म्मं समासतः ॥ ७३
त्रिःस्नानञ्चाग्निकार्य्यञ्च लिङ्गार्च्चनमनुत्तमम्।
दानमीश्वरभावश्च दया सर्व्वत्र सर्व्वदा ॥ ७४
सत्यं सन्तोषमास्तिक्यमहिंसा सर्व्वजन्तुषु।
ह्रीः श्रद्धाध्यापनं योगः सदाध्ययनमेव च ॥ ७५
व्याख्यानं ब्रह्मचर्य्यञ्च श्रवणञ्च तपः क्षमा।
शौचं शिखोपवीतञ्च उष्णीषञ्चोत्तरीयकम् ॥ ७६
निषिद्धासेवनञ्चैव भस्मरुद्राक्षधारणम्।
पर्व्वण्यभ्यर्च्चनं देवि चतुर्द्दश्यां विशेषतः ॥ ७७
पानञ्च ब्रह्मकूर्च्चस्य मासि मासि यथाविधि।
अभ्यर्च्चनं विशेषेण तेनैव स्नाप्य मां प्रिये ॥ ७८
सर्व्वक्रियान्नसन्त्यागः श्राद्धान्नस्य च वर्ज्जनम्।
तथा पर्य्युषितान्नस्य यावकस्य विशेषतः ॥ ७९
मद्यस्य मद्यगन्धस्य नैवेद्यस्य च वर्ज्जनम्।
सामान्यं सर्व्ववर्णानां ब्राह्मणानां विशेषतः ॥ ८०
क्षमा शान्तिश्च सन्तोषः सत्यमस्तेयमेव च।
ब्रह्मचर्य्यं मम ज्ञानं वैराग्यं भस्मसेवनम् ॥ ८१
सर्व्वसङ्गनिवृत्तिश्च दशैतानि विशेषतः।
लिङ्गानि योगिनां भूयो दिवाभिक्षाशनं तथा ॥ ८२
वानप्रस्थाश्रमस्थानां समानमिदमिष्यते।
रात्रौ न भोजनं कार्य्यं सर्व्वेषां ब्रह्मचारिणाम् ॥ ८३
अध्यापनं याजनञ्च क्षत्रियस्य प्रतिग्रहः।
वैश्यस्य च विशेषेण मया नात्र विधीयते ॥ ८४
रक्षणं सर्व्ववर्णानां युद्धे शत्रुवधस्तथा।
दुष्टपक्षि-मृगाणाञ्च दुष्टानां शातनं नृणाम् ॥ ८५
अविश्वासश्च सर्व्वत्र विश्वासो मम योगिषु।
स्त्रीसंसर्गश्च कालेषु चमूरक्षणमेव च ॥ ८६
सदा सञ्चारितैश्चारैर्लोकवृत्तान्तवेदनम्।
सदास्त्रधारणञ्चैव भस्मकञ्चुकधारणम् ॥ ८७

राज्ञां ममाश्रमस्थानामेष धर्म्मस्य संग्रहः।
गोरक्षणञ्च वाणिज्यं कृषिर्वैश्यस्य कथ्यते ॥ ८८
शुश्रूषेतरवर्णानां धर्म्मः शूद्रस्य कथ्यते।
उद्यानकरणञ्चैव मम क्षेत्रसमाश्रयः ॥ ८९
धर्म्मपत्न्यास्तु गमनं गृहस्थस्य विधीयते।
ब्रह्मचर्य्यं वनस्थानां यतीनां ब्रह्मचारिणाम् ॥ ९०
स्त्रीणान्तु भर्त्तृशुश्रूषा धर्म्मो नान्यः सनातनः।
ममार्च्चनञ्च कल्याणि नियोगो भर्त्तुरस्ति चेत् ॥ ९१
या नारी भर्त्तृशुश्रूषां विहाय व्रततत्परा।
सा नारी नरकं याति नात्र कार्य्या विचारणा ॥ ९२
अथ भर्त्तृविहीना या वच्ये धर्म्मं समासतः।
व्रतं दानं तपः शौचं भूशय्या नक्तभोजनम् ॥ ९३
ब्रह्मचर्य्यं सदा स्नानं भस्मना सलिलेन वा।
शान्तिर्मौनं क्षमा नित्यं संविभागो यथाविधि ॥ ९४
अष्टम्याञ्च चतुर्द्दश्यां पौर्णमास्यां विशेषतः।
एकादश्याञ्च विधिवदुपवासो ममार्च्चनम् ॥ ९५
इति संक्षेपतः प्रोक्तं ममाश्रमनिषेवणम्।
ब्रह्म-क्षत्र-विशां देवि यतीनां ब्रह्मचारिणाम् ॥ ९६
तथैव वानप्रस्थानां गृहस्थानाञ्च सुन्दरि।
शूद्राणामथ नारीणां धर्म्म एष सनातनः ॥ ९७
ध्येयस्त्वयाहं देवेशि सदा जाप्यः षड़क्षरः।
वेदोक्तमखिलं धर्म्ममिति धर्म्मार्थसंग्रहः ॥ ९८
अथ ये मानवा लोके स्वेच्छया धृतविग्रहाः।
भावातिशयसम्पन्नाः पूर्व्वसंस्कारसंयुताः ॥ ९९
विरक्ताश्चानुरक्ता वा स्त्रियादिविषयेष्वपि।
पापैर्न ते विलिप्यन्ते पद्मपत्रमिवाम्भसा ॥ १००
तेषां ममात्मविज्ञानं विशुद्धानां विवेकिनाम्।
मत्प्रसादाद्विशुद्धानां दुःखमाश्रमरक्षणम् ॥ १०१
नास्ति कृत्यमकृत्यञ्च समाधिर्वा परायणम्।
न विधिर्न निषेधश्च तेषां मम यथा तथा ॥ १०२
यथेह परिपूर्णस्य साध्यं मम न विद्यते।
तथैव कृतकृत्यानां तेषामपि न संशयः ॥ १०३
मद्भक्तानां हितार्थाय मानुषं भावमाश्रिताः।
रुद्रलोकात् परिभ्रष्टास्ते रुद्रा नात्र संशयः ॥ १०४
ममानुशासनं यद्वद्ब्रह्मादीनां प्रवर्त्तकम्।
तथा नराणामन्येषां तन्नियोगः प्रवर्त्तकः ॥ १०५
ममाज्ञाधारभावेण मद्भावातिशयेन च।
तदालोकनमात्रेण सर्व्वपापक्षयो भवेत् ॥ १०६
प्रत्ययाश्च प्रवर्त्तन्ते प्रशस्तफलसूचकाः।
मयि भाववतां पुंसां प्रागदृष्टार्थगोचराः ॥ १०७
कम्पः स्वेदोऽश्रुपातश्च कण्ठे च स्वरविक्रिया।
आनन्दाद्युपलब्धिश्च भवेदाकस्मिकी मुहुः ॥ १०८
एतैर्व्यस्तैः समस्तैर्वा लिङ्गैरव्यभिचारिभिः।
मन्दमध्योत्तमैर्भावैर्विज्ञेयास्ते नरोत्तमाः ॥ १०९
यथायोऽग्निसमावेशान्नायो भवति केवलम्।
तथैव मम सान्निध्यान्न ते केवलमानुषाः ॥ ११०
हस्तपादादिसाधर्म्याद्रुद्रान् मर्त्त्यवपुर्द्धरान्।
प्राकृतानिव मन्वानो नावजानीत पण्डितः ॥ १११
अवज्ञानं कृतं तेषु नरैर्व्यामूढ़चेतनैः।
आयुः श्रियं कुलं शीलं हत्वा निरयमावहेत् ॥ ११२
ब्रह्म-विष्णु-सुरेशानामपि तूलायते पदम्।
मत्तोऽन्यदनपेक्षाणामुद्धतानां महात्मनाम् ॥ ११३
अशुद्धं बौद्धमैश्वर्य्यं प्राकृतं पौरुषं तथा।
गुणेशानामतस्त्याज्यं गुणातीतपदैषिणाम् ॥ ११४
अथ किं बहुनोक्तेन श्रेयःप्राप्तेरेकसाधनम्।
मयि चित्तसमासङ्गो येन केनापि हेतुना ॥ ११५

उपमन्युरुवाच

इत्थं श्रीकण्ठनाथेन शिवेन परमात्मना।
हिताय जगतामुक्तो ज्ञानसारार्थसंग्रहः ॥ ११६
विज्ञानसंग्रहश्चायं वेदशास्त्राणि कृत्स्नशः।
सेतिहास-पुराणानि विद्याव्याख्यानविस्तरः ॥ ११७
ज्ञानं ज्ञेयमनुष्ठेयमधिकारोऽथ साधनम्।
साध्यञ्चेति षड़र्थानां संग्रहस्त्वेष संग्रहः ॥ ११८
गुरोरधिगतं ज्ञानं ज्ञेयः पाशः पशुः पतिः।
लिङ्गार्च्चनाद्यनुष्ठेयं भक्तस्त्वधिकृतो द्विजः ॥ ११९
साधनं शिवमन्त्राद्यं साध्यं शिवसमानता।
षड़र्थसंग्रहस्यास्य ज्ञानात् सर्व्वज्ञतोच्यते ॥ १२०
प्रथमं कर्म्म यज्ञाद्यैर्भक्त्या वित्तानुसारतः।
वाह्येऽभ्यर्च्य शिवं पश्चादन्तर्यागरतो भवेत् ॥ १२१
रतिरभ्यन्तरे यस्य न वाह्ये पुण्यगौरवात्।
न कर्म्म करणीयं हि वहिस्तस्य महात्मनः ॥ १२२
ज्ञानामृतेन तृप्तस्य भक्त्या चैव शिवात्मनः।

नान्तर्न च वहिः कृष्ण कृत्यमस्ति कदाचन ॥ १२३
तस्मात् क्रमेण सन्त्यज्य वाह्यमाभ्यन्तरं तथा ।
ज्ञानेन ज्ञेयमालोक्य ज्ञानञ्चापि परित्यजेत् ॥ १२४
नैकाग्रं चेच्छिवे चित्तं किं कृतेनापि कर्म्मणा ।
एकाग्रमेव चेच्चित्तमकृतेनापि कर्म्मणा ॥ १२५
तस्मात् कर्म्माण्यकृत्वा वा कृत्वा वान्तर्वहिः क्रमात् ।
येन केनाप्युपायेन शिवे चित्तं निवेशयेत् ॥ १२६
शिवे निविष्टचित्तानां प्रतिष्ठितधियां सताम् ।
परत्रेह च सर्व्वत्र निर्वृतिः परमा भवेत् ॥ १२७
इहों नमः शिवायेति मन्त्रेणानेन सिद्धयः ।
स तस्मादधिगन्तव्यः परावरविभूतये ॥ १२८

इति श्रीशैवे महापुराणे वायवीयसंहि-
तायामुत्तभागे शैवधर्मकथनं नाम
एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

श्रीकृष्ण उवाच ।

महर्षिवर सर्व्वज्ञ सर्व्वज्ञानमहोदधे ।
पञ्चाक्षरस्य माहात्म्यं श्रोतुमिच्छामि तत्त्वतः ॥ १

उपमन्युरुवाच ।

पञ्चाक्षरस्य माहात्म्यं वर्षकोटिशतैरपि ।
अशक्यं विस्तराद्वक्तुं तस्मात् संक्षेपतः शृणु ॥ २
वेदे शिवागमे चायमुभयत्र षडक्षरः ।
मन्त्रः स्थितः सदा मुख्यो लोके पञ्चाक्षरः स्मृतः ॥३
सर्व्वमन्त्राधिकश्चायमोङ्काराद्यः षडक्षरः ।
सर्व्वेषां शिवभक्तानामशेषार्थप्रसाधकः ॥ ४
तदल्पाक्षरमर्थाढ्यं वेदसारं विमुक्तिदम् ।
आज्ञासिद्धमसन्दिग्धं वाक्यमेतच्छिवात्मकम् ॥ ५
नानासिद्धियुतं दिव्यं लोकचित्तानुरञ्जकम् ।
सुनिश्चितार्थगम्भीरं वाक्यं तत् पारमेश्वरम् ॥ ६
मन्त्रं सुखमुखोच्चार्य्यमशेषार्थप्रसिद्धये ।
प्राहोंं नमः शिवायेति सर्व्वज्ञः सर्व्वदेहिनाम् ॥ ७
तद्वीजं सर्व्वविद्यानां मन्त्रमाद्यं षडक्षरम् ।
अतिसूक्ष्मं महार्थञ्च ज्ञेयं तद्वटवीजवत् ॥ ८
देवो गुणत्रयातीतः सर्व्वज्ञः सर्व्वकृत् प्रभुः ।
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतः शिवः ॥ ९
ईशानाद्यानि सूक्ष्माणि ब्रह्माण्येकाक्षराणि तु ।
मन्त्रे नमः शिवायेति संस्थितानि यथाक्रमम् ॥ १०
मन्त्रे षडक्षरे सूक्ष्मे पञ्चब्रह्मतनुः शिवः ।
वाच्य-वाचकभावेन स्थितः साक्षात् स्वभावतः ॥ ११
वाच्यः शिवः प्रमेयत्वान्मन्त्रस्तद्वाचकः स्मृतः ।
वाच्य-वाचकभावोऽयमनादिः संस्थितस्तयोः ॥ १२
यथानादिः प्रवृत्तोऽयं घोरसंसारसागरः ।
शिवोऽपि हि तथानादिः संसारान्मोचकः स्थितः ॥ १३
व्याधीनां भेषजं यद्वत् प्रतिपक्षः स्वभावतः ।
तद्वत् संसारदोषाणां प्रतिपक्षः शिवः स्मृतः ॥ १४
असत्यस्मिन् जगन्नाथे तमोभूतमिदं भवेत् ।
आदित्येन यथा हीनं निरालोकमिदं जगत् ॥ १५
अभावादीश्वरस्येयं जगत्सृष्टिः कथं भवेत् ।
अचेतनत्वात् प्रकृतेरज्ञत्वात् पुरुषस्य च ॥ १६
प्रधानपरमाण्वादि यावत् किञ्चिदचेतनम् ।
न तत्कर्त्तृ स्वयं दृष्टं बुद्धिमत् कारणं विना ॥ १७
धर्म्माधर्म्मोपदेशश्च बन्ध-मोक्षविचारणा ।
न सर्व्वज्ञं विना पुंसामादिसर्गे प्रसिध्यति ॥ १८
वैद्यं विना निरानन्दाः क्लिश्यन्ते रोगिणो यथा ।
शिवं विना निरानन्दं क्लिश्यते हि जगत् तथा ॥ १९
तस्मादनादिः सर्व्वज्ञः परिपूर्णः सदाशिवः ।
अस्तिनाथः परित्राता पुंसां संसारसागरात् ॥ २०
आदिमध्यान्तनिर्म्मुक्तः स्वभावविमलः प्रभुः ।
सर्व्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ॥ २१
तस्याभिधानं मन्त्रोऽयमभिधेयश्च स स्मृतः ।
अभिधानाभिधेयत्वान्मन्त्रः सिद्धः परः शिवः ॥ २२
एतावत् तु शिवज्ञानमेतावत् परमं पदम् ।
यदों नमः शिवायेति शिववाक्यं षडक्षरम् ॥ २३
विधिवाक्यमिदं शैवं नार्थवादं शिवात्मकम् ।
यः सर्व्वज्ञः स सम्पूर्णः स्वभावविमलः शिवः ॥ २४
लोकानुग्रहकर्त्ता च स मृषार्थं कथं वदेत् ।
यद्यथावस्थितं वस्तु गुणदोषैः स्वभावतः ॥ २५
यावत् फलञ्च यत् पुण्यं सर्व्वज्ञस्तु तथा वदेत् ।
रागाज्ञानादिभिर्दोषैर्ग्रस्तत्वादनृतं वदेत् ॥ २६
ते चेश्वरे न विद्यन्ते ब्रूयात् स कथमन्यथा ।

अजाता दोषदोषेण सर्व्वज्ञेन शिवेन यत्॥ २७
प्रणीतममलं वाक्यं तत् प्रमाणं न संशयः।
तस्मादीश्वरवाक्यानि श्रद्धेयानि विपश्चिता॥ २८
यथार्थं पुण्यपापेषु तदश्रद्धो व्रजत्यधः।
स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत् सुशोभनम्॥ २९
वाक्यं मुनिवरैः शान्तैस्तद्विज्ञेयं सुभाषितम्।
राग-द्वेषानृत-क्रोध-काम-तृष्णानुसारि यत्॥ ३०
वाक्यं निरयहेतुत्वात् तद्दुर्भाषितमुच्यते।
संस्कृतेनापि किं तेन मृदुना ललितेन वा॥ ३१
अविद्यारागवाक्येन संसारक्लेशहेतुना।
यच्छ्रुत्वा जायते श्रेयो रागादीनाञ्च संक्षयः॥ ३२
विरूपमपि तद्वाक्यं विज्ञेयमतिशोभनम्।
बहुत्वेऽपि हि मन्त्राणां सर्व्वज्ञेन शिवेन यत्॥ ३३
प्रणीतममलं मन्त्रं न तेन सदृशं क्वचित्।
साङ्गानि वेदशास्त्राणि संस्थितानि षडक्षरे॥ ३४
न तेन सदृशस्तस्मान्मन्त्रोऽप्यस्ति परः क्वचित्।
सप्तकोटिमहामन्त्रैरुपमन्त्रैरनेकधा॥ ३५
मन्त्रः षडक्षरो भिन्नः सूत्रं वृत्त्यात्मना यथा।
शिवज्ञानानि यावन्ति विद्यास्थानानि यानि च॥३६
षडक्षरस्य सूत्रस्य तानि भाष्यं समासतः।
किं तस्य बहुभिर्मन्त्रैः शास्त्रैर्वा बहुविस्तरैः॥ ३७
यस्यों नमः शिवायेति मन्त्रोऽयं हृदि संस्थितः।
तेनाधीतं श्रुतं तेन कृतं सर्व्वमनुष्ठितम्॥ ३८
येनों नमः शिवायेति मन्त्राभ्यासः स्थिरीकृतः।
नमस्कारादिसंयुक्तं शिवायेत्यक्षरत्रयम्॥ ३९
जिह्वाग्रे वर्त्तते यस्य सफलं तस्य जीवितम्।
अन्त्यजो वाधमो वापि मूर्खो वा पण्डितोऽपि वा॥४०
पञ्चाक्षरजपे निष्ठो मुच्यते पापपञ्जरात्।
इत्युक्तं परमेशेन देव्या पृष्टेन शूलिना॥ ४१
हिताय सर्व्वमर्त्त्यानां तिष्यजानां विशेषतः।

देव्युवाच।

कलौ कलुषिते काले दुर्ज्जये दुरतिक्रमे॥ ४२
अपुण्यतमसाच्छन्ने लोके धर्म्मपराङ्मुखे।
क्षीणे वर्णसमाचारे सङ्करे समुपस्थिते॥ ४३
सर्व्वाधिकारे सन्दिग्धे निश्चिते वा विपर्य्यये।
तदोपदेशे विहते गुरुशिष्यक्रमे गते॥ ४४
केनोपायेन मुच्यन्ते भक्तास्तव महेश्वर।

महेश्वर उवाच।

आश्रित्य परमां विद्यां हृद्यां पञ्चाक्षरीं मम॥ ४५
भक्त्या च भावितात्मानो मुच्यन्ते कलिजा नराः।
मनोवाक्कायजैर्दोषैर्वक्तुं स्मर्त्तुमगोचरैः॥ ४६
दूषितानां कृतघ्नानां निर्द्दयानां खलात्मनाम्।
लुब्धानां वक्रमनसामपि मत्प्रवणात्मनाम्॥ ४७
मम पञ्चाक्षरी विद्या संसारभयतारिणी।
मयैवमसकृद्देवि प्रतिज्ञातं धरातले॥ ४८
पतितोऽपि विमुच्येत मद्भक्तो विद्ययानया।

देव्युवाच।

कर्म्मायोग्यो भवेन्मर्त्त्यः पतितो यदि सर्व्वथा॥ ४९
कर्म्मायोग्येन यत् कर्म्म कृतञ्च नरकाय हि।
ततः कथं विमुच्येत पतितो विद्ययानया॥ ५०

ईश्वर उवाच।

तथ्यमेतत् त्वया प्रोक्तं तथा हि शृणु सुन्दरि।
रहस्यमिति मत्वैतद्गोपितं यन्मया पुरा॥ ५१
समन्त्रकं मां पतितः पूजयेद्यदि मोहितः।
नारकी स्यान्न सन्देहो मम पञ्चाक्षरं विना॥ ५२
अब्भक्षा वायुभक्षाश्च ये चान्ये व्रतकर्शिताः।
तेषामेतैर्व्रतैर्नास्ति मम लोकसमागमः॥ ५३
भक्त्या पञ्चाक्षरेणैव यो हि मां सकृदर्च्चयेत्।
सोऽपि गच्छेन्मम स्थानं मन्त्रस्यास्यैव गौरवात्॥५४
तस्मात् तपांसि यज्ञाश्च व्रतानि नियमास्तथा।
पञ्चाक्षरार्च्चनस्यैते कोट्यंशेनापि नो समाः॥ ५५
बद्धो वाप्यथवा मुक्तः पाशात् पञ्चाक्षरेण यः।
पूजयेन्मां स मुच्येत नात्र कार्य्या विचारणा॥ ५६
अरुद्रो वा सरुद्रो वा सकृत् पञ्चाक्षरेण यः।
पूजयेत् पतितो वापि मूढो वा मुच्यते नरः॥ ५७
षडक्षरेण वा देवि तथा पञ्चाक्षरेण वा।
स ब्रह्माङ्गेण मां भक्त्या पूजयेद्यदि मुच्यते॥ ५८
पतितोऽपतितो वापि मन्त्रेणानेन पूजयेत्।
मम भक्तो जितक्रोधो ह्यलब्धो लब्ध एव वा॥ ५९
अलब्धाल्लब्ध एवेह कोटिकोटिगुणाधिकः।
तस्माल्लब्ध्वैव मां देवि मन्त्रेणानेन पूजयेत्॥ ६०
लब्ध्वा सम्पूजयेद्यस्तु मैत्र्यादिगुणसंयुतः।

ब्रह्मचर्य्यरतो भक्त्या मत्साद्दृश्यमवाप्नुयात् ॥ ६१
किमत्र बहुनोक्तेन भक्ताः सर्व्वेऽधिकारिणः ।
मम पञ्चाक्षरे मन्त्रे तस्माच्छ्रेष्ठतरो हि सः ॥ ६२
पञ्चाक्षरप्रभावेण लोका वेदा महर्षयः ।
तिष्ठन्ति शाश्वता धर्म्मा देवाः सर्व्वमिदं जगत् ॥ ६३
प्रलये समनुप्राप्ते नष्टे स्थावर-जङ्गमे ।
सर्व्वं प्रकृतिमापन्नं तत्र संलयमेष्यति ॥ ६४
एकोऽहं संस्थितो देवि न द्वितीयोऽस्ति कुत्रचित् ।
तदा वेदाश्च शास्त्राणि सर्व्वं पञ्चाक्षरे स्थिताः ॥ ६५
ते नाशं नैव सम्प्राप्ता मच्छक्त्या ह्यनुपालिताः ।
गुणमूर्त्यात्मनाश्चैव ततोऽवान्तरसंहृतिः ॥ ६६
ततः सृष्टिरभून्मत्तः प्रकृत्यात्मप्रभेदतः ।
तदा नारायणः शेते देवो मायामयीं तनुम् ॥ ६७
आस्थाय भोगिपर्य्यङ्कशयने तोयमध्यगः ।
तन्नाभिपङ्कजाज्जातः पञ्चवक्त्रः पितामहः ॥ ६८
सिसृक्षमाणो लोकांस्त्रीनशक्तो ह्यसहायवान् ।
मुनीन् दश ससर्ज्जादौ मानसानमितौजसः ॥ ६९
तेषां सिद्धिविवृद्ध्यर्थं मां प्रोवाच पितामहः ।
मत्पुत्त्राणां महादेव शक्तिं देहि महेश्वर ॥ ७०
इत्येवं प्रार्थितस्तेन पञ्चवक्त्रधरो ह्यहम् ।
पञ्चाक्षराणि क्रमशः प्रोक्तवान् पद्मयोनये ॥ ७१
स पञ्चवदनैस्तानि गृह्णन् लोकपितामहः ।
वाच्य-वाचकभावेन ज्ञातवान् मां महेश्वरम् ॥ ७२
ज्ञात्वा प्रयोगं विधिवत् सिद्धमन्त्रः प्रजापतिः ।
पुत्त्रेभ्यः प्रददौ मन्त्रं मन्त्रार्थञ्च यथातथम् ॥ ७३
ते च लब्ध्वा मन्त्ररत्नं साक्षाल्लोकपितामहात् ।
तदाज्ञप्तेन मार्गेण मदाराधनकाङ्क्षिणः ॥ ७४
मेरोस्तु शिखरे रम्ये मुञ्जवान् नाम पर्व्वतः ।
मत्प्रियः सततं श्रीमान् मद्भूतैरपि रक्षितः ॥ ७५
तस्याभ्याशे तपस्तीव्रं लोकसृष्टिसमुत्सुकाः ।
दिव्यं वर्षसहस्रन्तु वायुभक्षाः समाचरन् ॥ ७६
तेषां भक्तिमहं दृष्ट्वा सद्यः प्रत्यक्षतामियाम् ।
ऋषिं छन्दश्च कीलञ्च वीजं शक्तिञ्च दैवतम् ॥ ७७
न्यासं षडङ्गदिग्बन्धं विनियोगमशेषतः ।
प्रोक्तवानहमार्य्याणां जगत्सृष्टिविवृद्धये ॥ ७८
ततस्ते मन्त्रमाहात्म्यादृषयस्तपसैधिताः ।

सृष्टिं वितन्वते सम्यक् सदेवासुरमानुषाम् ॥ ७९
अस्याः परमविद्यायाः स्वरूपमधुनोच्यते ।
आदौ नमः प्रयोक्तव्यं शिवायेति ततः परम् ॥ ८०
सैषा पञ्चाक्षरी विद्या सर्व्वश्रुतिशिरोगता ।
शब्दजातस्य सर्व्वस्य वीजभूता समासतः ॥ ८१
प्रथमं मन्मुखोद्गीर्णा सा ममैवास्तिवाचिका ।
तप्तचामीकरप्रख्या पीनोन्नतपयोधरा ॥ ८२
चतुर्भुजा त्रिनयना बालेन्दुकृतशेखरा ।
पद्मोत्पलकरी सौम्या वरदाभयपाणिका ॥ ८३
सर्व्वलक्षणसम्पन्ना सर्व्वाभरणभूषिता ।
सितपद्मासनासीना नीलकुञ्चितमूर्द्धजा ॥ ८४
अस्याः पञ्चविधा वर्णाः प्रस्फुरद्रश्मिमण्डलाः ।
पीतः कृष्णस्तथा धूम्रः स्वर्णाभो रक्त एव च ॥ ८५
पृथक् प्रयोज्या यद्येते बिन्दुनादविभूषिताः ।
अर्द्धचन्द्राकृतिर्बिन्दु-र्नादो दीपशिखाकृतिः ॥ ८६
वीजं द्वितीयं वीजेषु मन्त्रस्यास्य वरानने ।
दीर्घपूर्व्वं तुरीयस्य पञ्चमं शक्तिमादिशेत् ॥ ८७
वामदेवो नाम ऋषिः पङ्क्तिश्छन्द उदाहृतम् ।
देवता शिव एवाहं मन्त्रस्यास्य वरानने ॥ ८८
गौतमोऽत्रिर्वरारोहे विश्वामित्रस्तथाङ्गिराः ।
भरद्वाजश्च वर्णानां क्रमशो ऋषयः स्मृताः ॥ ८९
गायत्र्यनुष्टुप् त्रिष्टुप् च च्छन्दांसि वृहती विराट् ।
इन्द्रो रुद्रो हरिर्ब्रह्मा स्कन्दस्तेषाञ्च देवताः ॥ ९०
मम पञ्च मुखान्याहुः स्थानं तेषां वरानने ।
पूर्व्वादिषूर्द्ध्वपर्य्यन्तं नकारादि यथाक्रमम् ॥ ९१
उदात्तः प्रथमो वर्णश्चतुर्थश्च द्वितीयकः ।
पञ्चमः स्वरितश्चैव तृतीयो निहतः स्मृतः ॥ ९२
मूलविद्या शिवञ्चैवं सूत्रं पञ्चाक्षरस्तथा ।
नामान्यस्य विजानीयाच्छैवं मे हृदयं महत् ॥ ९३
नकारः शिर उच्येत मकारस्तु शिखोच्यते ।
शिकारः कवचं तद्वद्वाकारो नेत्रमुच्यते ॥ ९४
यकारोऽस्त्रं नमः स्वाहा वषट् हुं वौषड़ित्यपि ।
फड़ित्यपि च वर्णानामन्तेऽङ्गत्वं यदा तदा ॥ ९५
तत्रापि मूलमन्त्रोऽयं किञ्चिद्भेदसमन्वयात् ।
तत्रापि पञ्चमो वर्णो द्वादशस्वरभूषितः ॥ ९६
तस्मादनेन मन्त्रेण मनोवाक्कायभेदतः ।

आवयोरर्च्चनं कुर्य्याज्जपहोमादिकं तथा ॥ ९७
यथाप्रश्नं यथाश्रद्धं यथाकालं यथामति।
यथाशक्ति यथासम्पद्वयथायोगं यथारति ॥ ९८
यदा कदापि वा भक्त्या यत्र कुत्रापि वा कृता।
येन केनापि वा देवि प्रजा मुक्तिं नयिष्यति ॥ ९९
मय्यासक्तेन मनसा यत् कृतं मम सुन्दरि।
मत्प्रियञ्च शिवञ्चैव क्रमेणाप्यक्रमेण वा ॥ १००
तथापि मम भक्ता ये नात्यन्तविवशाः पुनः।
तेषामर्थं तु शास्त्रेषु मयैष नियमः कृतः ॥ १०१
तत्रादौ सम्प्रवक्ष्यामि मन्त्रसंग्रहणं शुभम्।
यद्विना निष्फलं जाप्यं येन वा सफलं भवेत् ॥ १०२
शास्त्राहीनं क्रियाहीनं श्रद्धाहीनं वरानने।
शास्त्रार्थं दक्षिणाहीनं सदा जप्तञ्च निष्फलम् ॥१०३
शास्त्रासिद्धं क्रियासिद्धं श्रद्धासिद्धं महात्मकम्।
एवन्दक्षिणायुक्तं मन्त्रसिद्धं महत् फलम् ॥ १०४
उपगम्य गुरुं विप्रमाचार्य्यं तत्त्ववेदिनम्।
जापिनं सद्गुणोपेतं ध्यान-योगपरायणम् ॥ १०५
तोषयेत् तं प्रयत्नेन भावशुद्धिसमन्वितः।
वाचा च मनसा चैव कायेन द्रविणेन च ॥ १०६
आचार्य्यं पूजयेच्छिष्यः सर्व्वदा हि प्रयत्नतः।
हस्त्यश्व-रथ-रत्नानि क्षेत्राणि च गृहाणि च ॥१०७
भूषणानि च वासांसि धान्यानि च धनानि च।
एतानि गुरवे दद्याद्भक्त्या च विभवे सति ॥ १०८
वित्तशाठ्यं न कुर्व्वीत यदीच्छेत् सिद्धिमात्मनः।
पश्चान्निवेदयेद्देवि स्वात्मानं सपरिच्छदम् ॥ १०९
एवं सम्पूज्य विधिवद्वयथाशक्ति त्ववञ्चयन्।
आददीत गुरोर्मन्त्रं ज्ञानञ्चैव क्रमेण तु ॥ ११०
एवं तुष्टो गुरुः शिष्यं पूजकं वत्सरोषितम्।
शुश्रूषुमनहङ्कारं स्नातं शुचिमुपोषितम् ॥ १११
स्नापयित्वा विशुद्ध्यर्थं पूर्णकुम्भघृतेन वै।
जलेन मन्त्रशुद्धेन पुण्यद्रव्ययुतेन च ॥ ११२
अलङ्कृत्य सुवेषञ्च गन्धस्रग्वस्त्रभूषणैः।
पुण्याहं वाचयित्वा च ब्राह्मणानभिपूज्य च ॥ ११३
समुद्रतीरे नद्याञ्च गोष्ठे देवालयेऽपि वा।
शुचौ देशे गृहे वापि काले सिद्धिकरे तिथौ ॥ ११४
नक्षत्रे शुभयोगे च सर्व्वदोषविवर्ज्जिते।
अनुगृह्य ततो दद्याज्ज्ञानं मम यथाविधि ॥ ११५
स्वरेणोच्चारयेत् सम्यगेकान्तेऽतिप्रसन्नधीः।
उच्चार्य्योच्चारयित्वा तमावयोर्मन्त्रमुत्तमम् ॥ ११६
शिवञ्चास्तु शुभञ्चास्तु शोभनोऽस्तु प्रियोऽस्त्विति।
एवं दद्याद्गुरुर्मन्त्रमाज्ञाञ्चैव ततः परम् ॥ ११७
एवं लब्ध्वा गुरोर्मन्त्रमाज्ञाञ्चैव समाहितः।
संकल्पञ्च च जपेन्नित्यं पुरश्चरणपूर्व्वकम् ॥ ११८
यावज्जीवं जपेन्नित्यमष्टोत्तरसहस्रकम्।
अनन्यस्तत्परो भूत्वा स याति परमां गतिम् ॥ ११९
जपेदक्षरलक्षं वै चतुर्गुणितमादरात्।
नक्ताशी संयमी यः स पौरश्चरणिकः स्मृतः ॥ १२०
यः पुरश्चरणं कृत्वा नित्यजापी भवेत् पुनः।
तस्य नास्ति समो लोके स सिद्धः सिद्धिदो भवेत्॥१२१
स्नानं कृत्वा शुचौ देशे बद्ध्वा रुचिरमासनम्।
त्वया मां हृदि सञ्चिन्त्य सञ्चिन्त्य स्वगुरुं ततः ॥ १२२
उदङ्मुखः प्राङ्मुखो वा मौनी चैकाग्रमानसः।
विशोध्य पञ्चतत्त्वानि दहनप्लावनादिभिः ॥ १२३
मन्त्रन्यासादिकं कृत्वा सकलीकृतविग्रहः।
आवयोर्विग्रहं ध्यायन् प्राणापानौ नियम्य च ॥१२४
विद्यास्थानं स्वकं रूपमृषिं छन्दोऽधिदैवतम्।
वीजं शक्तिं तथा वाच्यं स्मृत्वा पञ्चाक्षरीं जपेत्॥१२५
उत्तमं मानसं जाप्यमुपांशु मध्यमं विदुः।
अधमं वाचिकं प्राहुरागमार्थविशारदाः ॥ १२६
उत्तमं रुद्रदैवत्यं मध्यमं विष्णुदैवतम्।
अधमं ब्रह्मदैवत्यमित्याहुरनुपूर्व्वशः ॥ १२७
यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः।
मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः ॥ १२८
जिह्वामात्रपरिस्पन्दादीषदुच्चारितोऽपि वा।
अपरैरश्रुतः किञ्चिच्छ्रुतो वोपांशुरुच्यते ॥ १२९
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात् पदम्।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः ॥ १३०
वाचिकस्त्वेक एव स्यादुपांशुः शतमुच्यते।
साहस्रो मानसः प्रोक्तः सगर्भस्तु शताधिकः ॥ १३१
प्राणायामसमायुक्तः सगर्भो जप उच्यते।
आद्यन्तयोरगर्भोऽपि प्राणायामः प्रशस्यते ॥ १३२
चत्वारिंशत्समावृत्ति प्राणानायम्य संस्मरेत्।

मन्त्रमन्त्रार्थविद्धीमानशक्तः शक्तितो जपेत् ॥ १३३
पञ्चकं त्रिकमेकं वा प्राणायामं समाचरेत्।
अगर्भं वा सगर्भं वा सगर्भस्तत्र शस्यते ॥ १३४
सगर्भादपि साहस्रः सध्यानो जप उच्यते।
एषु पञ्चविधेष्वेकः कर्त्तव्यः शक्तितो जपः ॥ १३५
अङ्गुल्या जपसंख्यानमेकमेकमुदाहृतम्।
रेखयाष्टगुणं विद्यात् पुत्रजीवैर्दशाधिकम् ॥ १३६
शतं स्याच्छङ्खमणिभिः प्रवालैस्तु सहस्रकम्।
स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ॥ १३७
पद्माक्षैर्दशलक्षन्तु सौवर्णैः कोटिरुच्यते।
कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं भवेत् ॥ १३८
त्रिंशदक्षैः कृता माला धनदा जपकर्म्मणि।
सप्तविंशतिसंख्यातैरक्षैः पुष्टिप्रदा भवेत् ॥ १३९
पञ्चविंशतिसंख्यातैः कृता मुक्तिं प्रयच्छति।
अक्षैस्तु पञ्चदशभिरभिचारफलप्रदा ॥ १४०
अङ्गुष्ठं मोक्षदं विद्यात् तर्ज्जनी शत्रुनाशिनी।
मध्यमा धनदा शान्तिं करोत्येषा अनामिका ॥ १४१
कनिष्ठा चरणी प्रोक्ता जपकर्म्मणि शोभना।
अङ्गुष्ठेन जपेज्जाप्यमन्यैरङ्गुलिभिः सह ॥ १४२
अङ्गुष्ठेन विना जाप्यं कृतं तदफलं यतः।
गृहे जपं समं विद्याद्गोष्ठे शतगुणं विदुः ॥ १४३
पुण्यारण्ये तथारामे सहस्रगुणमुच्यते।
अयुतं पर्व्वते पुण्ये नद्यां लक्षमुदाहृतम् ॥ १४४
कोटिं देवालये प्राहुरनन्तं मम सन्निधौ।
सूर्य्यस्याग्नेर्गुरोरिन्दोर्दीपस्य च जलस्य च ॥ १४५
विप्राणाञ्च गवाञ्चैव सन्निधौ शस्यते जपः।
तत्पूर्व्वाभिमुखं वश्यं दक्षिणञ्चाभिचारकम् ॥ १४६
पश्चिमं धनदं विद्यादौत्तरं शान्तिदं भवेत्।
सूर्य्याग्नि-विप्र-देवानां गुरूणामपि सन्निधौ ॥ १४७
अन्येषाञ्च प्रशस्तानां मन्त्रं न विमुखो जपेत्।
उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गलावृतः ॥ १४८
अपवित्रकरोऽशुद्धो विलपन्न जपेत् क्वचित्।
क्रोधं मदं क्षुतं त्रीणि निष्ठीवनविजृम्भणे ॥ १४९
दर्शनञ्च श्व-नीचानां वर्ज्जयेज्जपकर्म्मणि।
आचामेत् सम्भवे तेषां स्मरेद्वा मां त्वया सह ॥ १५०
ज्योतींषि च प्रपश्येद्वा कुर्य्याद्वा प्राणसंयमम्।
अनासनः शयानो वा गच्छन्नुत्थित एव वा ॥ १५१
रथ्यायामशिवे स्थाने न जपेत् तिमिरान्तरे।
प्रसार्य्य न जपेत् पादौ कुक्कुटासन एव वा ॥ १५२
यान-शय्याधिरूढो वा चिन्ताव्याकुलितोऽथवा।
शक्तश्चेत् सर्व्वमेवैतदशक्तः शक्तितो जपेत् ॥ १५३
किमत्र बहुनोक्तेन समासेन वचः शृणु।
सदाचारी जपन् शुद्धं ध्यायन् भद्रं समश्नुते ॥ १५४
आचारः परमो धर्म्म आचारः परमं धनम्।
आचारः परमा विद्या आचारः परमा गतिः ॥ १५५
आचारहीनः पुरुषो लोके भवति निन्दितः।
परत्र च सुखी न स्यात् तस्मादाचारवान् भवेत् ॥ १५६
यस्य यद्विहितं कर्म्म वेदे शास्त्रे च वैदिकैः।
तस्य तेन समाचारः सदाचारो न चेतरः ॥ १५७
सद्भिराचरितत्वाच्च सदाचारः स उच्यते।
सदाचारस्य तस्याहुरास्तिक्यं मूलकारणम् ॥ १५८
आस्तिकश्चेत् प्रमादाद्यैः सदाचारादपि च्युतः।
न दुष्यति नरो नित्यं तस्मादास्तिकतां व्रजेत् ॥ १५९
यथेहास्ति सुखं दुःखं सुकृतैर्दुष्कृतैरपि।
तथा परत्र चास्तीतिमतिरास्तिक्यमुच्यते ॥ १६०
रहस्यमन्यद्वक्ष्यामि गोपनीयमिदं प्रिये।
न वाच्यं यस्य कस्यापि नास्तिकस्याथवा पशोः ॥ १६१
सदाचारविहीनस्य पतितस्यान्त्यजस्य च।
पञ्चाक्षरात् परं नास्ति परित्राणं कलौ युगे ॥ १६२
गच्छतस्तिष्ठतो वापि स्वेच्छया कर्म्म कुर्व्वतः।
अशुचेर्वा शुचेर्वापि मन्त्रोऽयं न च निष्फलः ॥ १६३
अनाचारवतां पुंसामविशुद्धषडध्वनाम्।
अनादिष्टोऽपि गुरुणा मन्त्रोऽयं न च निष्फलः ॥ १६४
अन्त्यजस्यापि मूर्खस्य मूढस्य पतितस्य च।
निर्म्मर्य्यादस्य नीचस्य मन्त्रोऽयं न च निष्फलः ॥ १६५
सर्व्वावस्थां गतस्यापि मयि भक्तिमतः परम्।
सिध्यत्येव न सन्देहो नापरस्य तु कस्यचित् ॥ १६६
न लग्न-तिथि-नक्षत्र-वार-योगादयः प्रिये।
अस्यात्यन्तमवेक्ष्याः स्युर्नैष सुप्तः सदोदितः ॥ १६७
न कदाचिन्न कस्यापि रिपुरेष महामनुः।
सुसिद्धो वापि सिद्धो वा साध्यो वापि भविष्यति ॥ १६८
सिद्धेन गुरुणादिष्टः सुसिद्ध इति कथ्यते।

असिद्धेनापि वा दत्तः सिद्धः साध्यस्तु केवलः ॥ १६९
असाधितः साधितो वा सिध्यत्येव न संशयः।
श्रद्धातिशययुक्तस्य मयि मन्त्रे तथा गुरौ ॥ १७०
तस्मान्मन्त्रान्तरांस्त्यक्त्वा सापायनधिकारतः।
आश्रयेत् परमां विद्यां हृद्यां पञ्चाक्षरीं बुधः ॥१७१
मन्त्रान्तरेषु सिद्धेषु मन्त्र एष न सिध्यति।
सिद्धे त्वस्मिन् महामन्त्रे ते च सिद्धा भवन्त्युत ॥१७२
यथा देवेष्वलब्धोऽस्मि लब्धेष्वपि महेश्वरि।
मयि लब्धे तु ते लब्धा मन्त्रेष्वेष समो विधिः ॥ १७३
ये दोषाः सर्व्वमन्त्राणां न तेऽस्मिन् सम्भवन्त्यपि।
अस्य मन्त्रस्य जात्यादीननपेक्ष्य प्रवर्त्तनात् ॥ १७४
तथापि नैव क्षुद्रेषु फलेषु प्रतियोगिषु।
सहसा विनियुञ्जीत यस्मादेष महाफलः ॥ १७५

उपमन्युरुवाच।

एवं साक्षान्महादेव्यै महादेवेन शूलिना।
हिताय जगतामुक्तः पञ्चाक्षरविधिर्यथा ॥ १७६
य इदं कीर्त्तयेद्भक्त्या शृणुयाद्वा समाहितः।
सर्व्वपापविनिर्म्मुक्तः प्रयाति परमां गतिम् ॥ १७७

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे पञ्चाक्षरमन्त्रतत्त्वनिरूपणं नाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः।

श्रीकृष्ण उवाच।

भगवन् मन्त्रमाहात्म्यं भवता कथितं प्रभो।
तत्प्रयोगविधानञ्च साक्षाच्छ्रुतिसमं यथा ॥ १
इदानीं श्रोतुमिच्छामि शिवसंस्कारमुत्तमम्।
मन्त्रसंग्रहणे किञ्चित् सूचितं न तु विस्तृतम् ॥ २

उपमन्युरुवाच।

हन्त ते कथयिष्यामि सर्व्वपापविशोधनम्।
संस्कारं परमं पुण्यं शिवेन परिभाषितम् ॥ ३
सम्यक्कृताधिकारः स्यात् पूजादिषु नरो यतः।
संस्कारः कथ्यते तेन षड़ध्वपरिशोधनम् ॥ ४
दीयते येन विज्ञानं क्षीयते पाशबन्धनम्।
तस्मात् संस्कार एवायं दीक्षेत्यपि च कथ्यते ॥ ५
शाम्भवी चैव शाक्ती च मान्त्री चैव शिवागमे।
दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना ॥ ६
गुरोरालोकमात्रेण स्पर्शात् सम्भाषणादपि।
सद्यः संज्ञा भवेज्जन्तोः पाशोपक्षयकारिणी ॥ ७
सा दीक्षा शाम्भवी प्रोक्ता सा पुनर्भिद्यते द्विधा।
तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः ॥ ८
यद्यस्य निर्वृतिः सद्यः सैव तीव्रतरा मता।
तीव्रा तु जीवतोऽत्यन्तं पुंसः पापविशोधिका ॥ ९
शाक्ती ज्ञानवती दीक्षा शिष्यदेहं प्रविश्य तु।
गुरुणा योगमार्गेण क्रियते ज्ञानचक्षुषा ॥ १०
मान्त्री क्रियावती दीक्षा कुण्डमण्डलपूर्व्विका।
मन्दमन्दतरोद्देशात् कर्त्तव्या गुरुणा बहिः ॥ ११
शक्तिपातानुसारेण शिष्योऽनुग्रहमर्हति।
शैवधर्म्मानुसारस्य तन्मूलत्वात् समासतः ॥ १२
यत्र शक्तिर्न पतिता तत्र शुद्धिर्न जायते।
न विद्या न शिवाचारो न मुक्तिर्न च सिद्धयः ॥ १३
तस्माल्लिङ्गानि संवीक्ष्य शक्तिपातस्य भूयसः।
ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत् ॥ १४
योऽन्यथा कुरुते मोहात् स विनश्यति दुर्म्मतिः।
तस्मात् सर्व्वप्रकारेण गुरुः शिष्यं परीक्षयेत् ॥ १५
लक्षणं शक्तिपातस्य प्रबोधानन्दसम्भवः।
सा यस्मात् परमा शक्तिः प्रबोधानन्दरूपिणी ॥१६
आनन्द-बोधयोर्लिङ्गमन्तःस्फुरणविक्रिया।
यया स्यात् कम्प-रोमाञ्चः स्वर-नेत्रादिविक्रियाः॥१७
शिष्योपि लक्षणैरेभिः कुर्य्याद्गुरुपरीक्षणम्।
तत्सम्पर्कें शिवार्च्चादौ स्वगतैर्वाथ तद्गतैः ॥ १८
शिष्यस्य शिक्षणीयत्वाद्गुरोर्गौरवकारणात्।
तस्मात् सर्व्वप्रयत्नेन गुरोर्गौरवमाचरेत् ॥ १९
यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः।
गुरुर्वा शिव एवाथ विद्याकारेण संस्थितः ॥ २०
यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः।
शिव-विद्या-गुरूणाञ्च पूजया सदृशं फलम् ॥ २१
सर्व्वदेवात्मकश्चासौ सर्व्वमन्त्रमतो गुरुः।
तस्मात् सर्व्वप्रयत्नेन तस्याज्ञां शिरसा वहेत् ॥ २२
श्रेयोऽर्थी यदि गुर्व्वाज्ञां मनसापि न लङ्घयेत्।
गुर्व्वाज्ञापालको यस्माज्ज्ञानसम्पत्तिमश्नुते ॥ २३

गच्छंस्तिष्ठन् स्वपन् भुञ्जन्नन्यत् कर्म्म समाचरन् ।
समक्षं यदि कुर्व्वीत सर्व्वञ्चानुज्ञया गुरोः ॥ २४
गुरोर्गृहे समक्षं वा न यथेष्टासनो भवेत् ।
गुरुर्देवो यतः साक्षात्तद्गृहं देवमन्दिरम् ॥ २५
पापिनाञ्च यथा सङ्गात् तत्पापात् पतितो भवेत् ।
तद्वदाचार्य्यसङ्गेन तद्धर्म्मफलभाग्भवेत् ॥ २६
यथेह वह्निसम्पर्कान्मलं त्यजति काञ्चनम् ।
तथैव गुरुसम्पर्कात् पापं त्यजति मानवः ॥ २७
यथा वह्निसमीपस्थो घृतकुम्भो विलीयते ।
तथा पापं विलीयेत आचार्य्यस्य समीपतः ॥ २८
यथा प्रज्वलितो वह्निः शुष्ककाष्ठञ्च निर्द्दहेत् ।
तथायमपि सन्तुष्टो गुरुः पापं क्षणाद्दहेत् ॥ २९
मनसा कर्म्मणा वाचा गुरोः क्रोधं न कारयेत् ।
तस्य क्रोधेन दह्यन्ते ह्यायुः-श्री-ज्ञान-सत्क्रियाः ॥ ३०
तत्क्रोधकारिणो ये स्युस्तेषां यज्ञाश्च निष्फलाः ।
यमाश्च नियमाश्चैव नात्र कार्य्या विचारणा ॥ ३१
गुरोर्विरुद्धं यद्वाक्यं न वदेज्जातुचिन्नरः ।
वदेद्यदि महामोहाद्रौरवं नरकं व्रजेत् ॥ ३२
मनसा कर्म्मणा वाचा गुरुमुद्दिश्य यत्नतः ।
श्रेयोऽर्थी चेन्नरो धीमान् न मिथ्याचारमाचरेत् ॥ ३३
नैर्गुण्ये ख्यापिते तस्य नैर्गुण्यशतवान् भवेत् ।
गुणेऽपि ख्यापिते तस्य सर्व्वं पुण्यफलं लभेत् ॥ ३४
गुरोर्हितं प्रियं कुर्य्यादादिष्टो वा न वा सदा ।
असमक्षं समक्षं वा तस्य कार्य्यं समाचरेत् ॥ ३५
इत्थमाचारवान् शक्तो नित्यमुद्युक्तमानसः ।
गुरुप्रियकरः शिष्यः शैवधर्म्मांस्ततोऽर्हति ॥ ३६
गुरुश्चेद्गुणवान् प्राज्ञः परमानन्दभासकः ।
तत्त्वविच्छिवसंसक्तो मुक्तिदो न तु चापरः ॥ ३७
संवित्तिजननं तत्त्वं परमानन्दसम्भवम् ।
तत् तत्त्वं विदितं येन स एवानन्ददर्शकः ॥ ३८
अन्योन्यं तारयेतां तौ किं शिला तारयेच्छिलाम् ।
न पुनर्नाममात्रेण संवित्तिरहितस्तु यः ॥ ३९
तेषां तन्नाममात्रेण मुक्तिर्वै नाममात्रिका ।
यैः पुनर्विदितं तत्त्वं ते मुक्ता मोचयन्त्यपि ॥ ४०
तत्त्वहीने कुतो बोधः कुतो ह्यात्मपरिग्रहः ।
परिग्रहाद्विनिर्म्मुक्तः पशुरित्यभिधीयते ॥ ४१

पशुभिः प्रेरितश्चापि पशुत्वं नातिवर्त्तते ।
तस्मात् तत्त्वविदेवेह मुक्तो मोचक इष्यते ॥ ४२
सर्व्वलक्षणसंयुक्तः सर्व्वशास्त्रविदप्ययम् ।
सर्व्वोपायविधिज्ञोऽपि तत्त्वहीनस्तु निष्फलः ॥ ४३
यस्यानुभवपर्य्यन्ता बुद्धिस्तत्त्वे प्रवर्त्तते ।
तस्यावलोकनाद्यैश्च परानन्दोऽभिजायते ॥ ४४
तस्माद्यस्यैव सम्पर्कात् प्रबोधानन्दसम्भवः ।
गुरुं तमेव वृणुयान्नापरं मतिमान् नरः ॥ ४५
सच्छिष्यैर्विनयाचार-चतुरैरुचितो गुरुः ।
यावद्विज्ञायते तावत् सेवनीयो मुमुक्षुभिः ॥ ४६
ज्ञाते तस्मिन् स्थिरा भक्तिर्यदि स्यात् तं समाश्रयेत् ।
न तु तं सन्त्यजेज्जातु नोपेक्षेत कथञ्चन ॥ ४७
यत्रानन्दः प्रबोधो वा नाल्पमप्युपलभ्यते ।
वत्सरादपि शिष्येण सोऽन्यं गुरुमुपाश्रयेत् ॥ ४८
गुरुमन्यं प्रपन्नोऽपि नावमन्येत पौर्व्विकम् ।
गुरोर्भ्रातॄंस्तथा पुत्रान् बोधकान् प्रेरकानपि ॥ ४९
तत्रादावुपसङ्गस्य ब्राह्मणं वेदपारगम् ।
गुरुमाराधयेत् प्राज्ञं सुभगं प्रियदर्शनम् ॥ ५०
सर्व्वाभयप्रदातारं करुणाक्रान्तमानसम् ।
तोषयेत् तं प्रयत्नेन मनसा कर्म्मणा गिरा ॥ ५१
तावदाराधयेच्छिष्यः प्रसन्नोऽसौ भवेद्यथा ।
तस्मिन् प्रसन्ने शिष्यस्य सद्यः पापक्षयो भवेत् ॥ ५२
तस्माद्धनानि रत्नानि क्षेत्राणि च गृहाणि च ।
भूषणानि च वासांसि पानशय्यासनानि च ॥ ५३
एतानि गुरवे दद्याद्भक्त्या वित्तानुसारतः ।
वित्तशाठ्यं न कुर्व्वीत यदीच्छेत् परमां गतिम् ॥ ५४
स एव जनको माता भ्राता बन्धुर्धनं सुखम् ।
सखा मित्रञ्च यद्यस्मात् सर्व्वं तस्मै निवेदयेत् ॥ ५५
निवेद्य पश्चात् स्वात्मानं सान्वयं सपरिच्छदम् ।
समर्प्य सोदकं तस्मै नित्यं तद्वशगो भवेत् ॥ ५६
यदा शिवाय स्वात्मानं दत्तवान् देशिकात्मने ।
तदा शैवो भवेद्देही न ततोऽस्ति पुनर्भवः ॥ ५७
देशिकाकृतिमास्थाय पशोः पाशानशेषतः ।
छित्त्वा परं पदं देवो नयत्येवमिति श्रुतिः ॥ ५८
गुरुस्तु स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत् ।
ब्राह्मणं क्षत्रियं वैश्यं द्विवर्षञ्च त्रिवर्षकम् ॥ ५९

प्राण-द्रव्य-प्रदानाद्यैरादरैरस्य समासमैः ।
उत्तमांश्चाधमे कृत्वा नीचानुत्तमकर्म्मणि ॥ ६०
आकृष्टास्ताड़िता वापि ये विषादं न यान्त्यपि ।
ते योग्याः संयताः शुद्धाः शिवसंस्कारकर्म्मणि ॥ ६१
अहिंसका दयावन्तो नित्यमुद्युक्तचेतसः ।
अमानिनो बुद्धिमन्तस्त्यक्तस्पर्द्धाः प्रियंवदाः ॥ ६२
ऋजवो मृदवः स्वस्था विनीताः स्थिरचेतसः ।
शौचाचारसमायुक्ताः शिवभक्ता द्विजातयः ॥ ६३
एवं वृत्तसमोपेता वाङ्मनःकायकर्म्मभिः ।
शोध्या बोध्या यथान्यायमिति शास्त्रेषु निश्चयः ॥ ६४
नाधिकारः स्वतो नार्य्याः शिवसंस्कारकर्म्मणि ।
नियोगाद्भर्त्तुरस्त्येव भक्तियुक्ता यदीश्वरे ॥ ६५
तथैव भर्त्तृहीनायाः पुत्रादेरभ्यनुज्ञया ।
अधिकारो भवत्येव कन्यायाः पितुराज्ञया ॥ ६६
शूद्राणामन्त्यजातीनां पतितानां विशेषतः ।
तथा सङ्करजातीनां नाध्वशुद्धिर्विधीयते ॥ ६७
तेऽप्यकृत्रिमभावाश्चेच्छिवे परमकारणे ।
पादोदकप्रदानाद्यैः कुर्य्युः पाशविशोधनम् ॥ ६८
अत्रानुलोमजाता ये युक्ता एव द्विजातिषु ।
तेषामध्वविशुद्ध्यादि कुर्य्यान्मातृकुलोचितम् ॥ ६९
या तु कन्या स्वपित्राद्यैः शिवधर्म्मे नियोजिता ।
सा भक्ताय प्रदातव्या नापराय विरोधिने ॥ ७०
दत्ता चेत् प्रतिकूलाय प्रमादाद्बोधयेत् पतिम् ।
अशक्तौ तं परित्यज्य मनसा धर्म्ममाचरेत् ॥ ७१
यथा मुनिवरं त्यक्त्वा पतिमत्रिं पतिव्रता ।
कृतकृत्याभवत् पूर्व्वं तपसाराध्य शङ्करम् ॥ ७२
यथा नारायणं देवं तपसाराध्य पाण्डवान् ।
पतीन् लब्धवती धर्म्मे गुरुभिर्विनियोजिता ॥ ७३
अतस्तत्त्यक्तृतो दोषो नेहास्ति परमार्थतः ।
शिवधर्म्मे नियुक्तायाः शिवशासनगौरवात् ॥ ७४
बहुनात्र किमुक्तेन योऽपि कोऽपि शिवाश्रयः ।
संस्कारो गुर्व्वधीनश्चेत् संक्रिया तु प्रभिद्यते ॥ ७५
गुरोरालोकनादेव स्पर्शात् सम्भाषणादपि ।
यस्य सञ्जायते ह्याज्ञा तस्य नास्ति परा क्रिया ॥ ७६
मनसा यस्तु संस्कारः क्रियते योगवर्त्मना ।
स नेह कथ्यते गुह्यो गुरुवक्त्रैकगोचरः ॥ ७७
क्रियावान् यस्तु संस्कारः कुण्डमण्डपपूर्व्वकः ।
स वक्ष्यते समासेन तस्य शक्यो न विस्तरः ॥ ७८

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे शैवमन्त्रदीक्षाविधिर्नाम
त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ।

उपमन्युरुवाच ।

पुण्येऽहनि शुचौ देशे बहुदोषविवर्ज्जिते ।
देशिकः प्रथमं कुर्य्यात् संस्कारं समयाह्वयम् ॥ १
परीक्ष्य भूमिं विधिवद्गन्ध-वर्ण-रसादिभिः ।
शिल्पशास्त्रोक्तमार्गेण मण्डपं तत्र कल्पयेत् ॥ २
कृत्वा वेदिञ्च तन्मध्ये कुण्डानि परिकल्पयेत् ।
अष्टदिक्ष्वथवा दिक्षु तत्रैशान्यां पुनः क्रमः ॥ ३
प्रधानकुण्डं कुर्व्वीत यद्वा पश्चिमभागतः ।
प्रधानमेकमेवाथ कृत्वा शोभां प्रकल्पयेत् ॥ ४
वितान-ध्वज-मालाभिर्विविधाभिरनेकशः ।
वेदिमध्ये ततः कुर्य्यान्मण्डलं शुभलक्षणम् ॥ ५
रत्नहेमादिभिश्चूर्णैरीश्वरावाहनोचितम् ।
सिन्दूर-शालि-नीवारचूर्णैरेवाथ निर्द्धनः ॥ ६
एकहस्तं द्विहस्तं वा सितं वा रक्तमेव वा ।
एकहस्तस्य पद्मस्य कर्णिकाष्टाङ्गुला मता ॥ ७
केशराणि तदर्द्धानि शेषञ्चाष्टदलात्मकम् ।
द्विहस्तस्य तु पद्मस्य द्विगुणं कर्णिकादिकम् ॥ ८
कृत्वा शोभोपशोभाढ्यमैशान्यां तस्य कल्पयेत् ।
एकहस्तं तदर्द्धं वा पुनर्वेद्यान्तु मण्डलम् ॥ ९
व्रीहि-तण्डुल-सिद्धार्थ-तिल-पुष्प-कुशास्तृते ।
तत्र लक्षणसंयुक्तं शिवकुम्भं प्रसाधयेत् ॥ १०
सौवर्णं राजतं वापि ताम्रजं मृण्मयन्तु वा ।
गन्धपुष्पाक्षताकीर्णं कुशदूर्व्वाङ्कुरार्च्चितम् ॥ ११
सितसूत्रावृतं कण्ठे नववस्त्रयुगावृतम् ।
शुद्धाम्बुपूर्णमुत्कूर्च्चं सद्रव्यं सपिधानकम् ॥ १२
भृङ्गारं वर्द्धनीञ्चापि शङ्खं चक्रकमेव वा ।
विना सूत्रादिकं सर्व्वं पद्मपत्रमथापि वा ॥ १३
तस्यासनारविन्दस्य कल्पयेदुत्तरे दले ।

अग्रतश्चन्दनाम्भोभिरस्त्रराजस्य वर्द्धनीम् ॥ १४
मण्डलस्य ततः प्राच्यां मन्त्रकुम्भञ्च पूर्व्ववत्।
कृत्वा विधिवदीशस्य महापूजामथाचरेत् ॥ १५
अथार्णवस्य तीरे वा नद्यां गोष्ठेऽपि वा गिरौ।
देवागारे गृहे वापि देशेऽन्यस्मिन् मनोहरे ॥ १६
कृत्वा पूर्व्वोदितं सर्व्वं विना वा मण्डपादिकम्।
मण्डलं पूर्व्ववत् कृत्वा स्थण्डिलञ्च विभावसोः ॥ १७
प्रविश्य पूजाभवनं प्रहृष्टवदनो गुरुः।
सर्व्वमङ्गलसंयुक्तः समाचरितनैत्यकः ॥ १८
महापूजां महेशस्य कृत्वा मण्डलमध्यतः।
शिवकुम्भे तथा भूयः शिवमावाह्य पूजयेत् ॥ १९
पश्चिमाभिमुखं ध्यात्वा यन्त्ररक्षकमीश्वरम्।
अर्च्चयेदस्त्रवर्द्धन्यामस्त्रमीशस्य दक्षिणे ॥ २०
मन्त्रकुम्भे च विन्यस्य मन्त्रं मन्त्रविशारदः।
कृत्वा मुद्रादिकं सर्व्वं मन्त्रयागं समाचरेत् ॥ २१
ततः शिवानले होमं कुर्य्याद्देशिकसत्तमः।
प्रधानकुण्डे परितो जुहुयुस्त्वपरे द्विजाः ॥ २२
आचार्य्यात् पादमर्द्धं वा होमस्तेषां विधीयते।
प्रधानकुण्ड एवाथ जुहुयाद्देशिकोत्तमः ॥ २३
स्वाध्यायमपरे कुर्य्युः स्तोत्रमङ्गलवाचनम्।
जपञ्च विधिवच्चान्ये शिवभक्तिपरायणाः ॥ २४
नृत्यं गीतञ्च वाद्यञ्च मङ्गलान्यपराणि च।
पूजनञ्च सदस्यानां कृत्वा सम्यग्विधानतः ॥ २५
पुण्याहं कारयित्वाथ पुनः सम्पूज्य शङ्करम्।
प्रार्थयेद्देशिको देवं शिष्यानुग्रहकाम्यया ॥ २६
प्रसीद देवदेवेश देहमाविश्य मामकम्।
विमोचयैनं विश्वेश घृणया च घृणानिधे ॥ २७
अथ चैवं करोमीति लब्धानुज्ञस्तु देशिकः।
आनीयोपोषितं शिष्यं हविष्याशिनमेव च ॥ २८
एकाशनं वा विरतं स्नातं प्रातः कृतक्रियम्।
जपन्तं प्रणवं देवं ध्यायन्तं कृतमङ्गलम् ॥ २९
द्वारस्य पश्चिमस्याग्रे मण्डले दक्षिणस्य वा।
दर्भासने समासीनं विधायोदङ्मुखं शिशुम् ॥ ३०
स्वयं प्राग्वदनस्तिष्ठन्नूर्द्धकायं कृताञ्जलिम्।
सम्प्रोक्ष्य प्रोक्षणीतोयैर्मूर्द्धन्यस्त्रेण मुद्रया ॥ ३१
पुष्पक्षेपेण सन्ताड्य बध्नीयाल्लोचनं गुरुः।
दुकूलार्द्धेन वस्त्रेण मन्त्रितेन नवेन च ॥ ३२
ततः प्रवेशयेच्छिष्यं गुरुर्द्वारेण मण्डलम्।
सोऽपि तेनेरितः शम्भोराचरेत् त्रिः प्रदक्षिणम् ॥ ३३
ततः सुवर्णसंमिश्रं दत्त्वा पुष्पाञ्जलिं प्रभोः।
प्राङ्मुखोदङ्मुखो वापि प्रणमेद्दण्डवत् क्षितौ ॥ ३४
ततः सम्प्रोक्ष्य मूलेन शिरः शस्त्रेण पूर्व्ववत्।
सन्ताड्य देशिकस्तस्य मोचयेन्नेत्रबन्धनम् ॥ ३५
स दृष्ट्वा मण्डलं भूयः प्रणमेद्दण्डवच्छिवम्।
अथासीनं शिवाचार्य्यो मण्डलस्य तु दक्षिणे ॥ ३६
उपवेश्यात्मनः सव्ये शिष्यं दर्भासने गुरुः।
आराध्य च महादेवं शिवहस्तं प्रविन्यसेत् ॥ ३७
शिवतेजोमयं पाणिं शिवमन्त्रमुदीरयन्।
शिवाभिमानसम्पन्नो न्यसेच्छिष्यस्य मस्तके ॥ ३८
सर्व्वाङ्गालम्बनञ्चैव कुर्य्यात् तेनैव देशिकः।
शिष्योऽपि प्रणमेद्भूमौ देशिकाकृतिमीश्वरम् ॥ ३९
ततः शिवानले देवं समभ्यर्च्य यथाविधि।
हुत्वाहुतित्रयं शिष्यमुपवेश्य यथा पुरा ॥ ४०
दर्भाग्रैः संस्पृशन्तं तं विधायात्मानमात्मवित्।
नमस्कृत्य महादेवं नाड़ीसन्धानमाचरेत् ॥ ४१
शिवशास्त्रोक्तमार्गेण कृत्वा प्राणस्य निर्गमम्।
शिष्यदेहप्रवेशञ्च स्मृत्वा मन्त्रांस्तु तर्पयेत् ॥ ४२
सन्तर्पणाय मूलस्य तेनैवाहुतयो दश।
देयास्तिस्रस्तथाङ्गानामङ्गैरेव यथाक्रमम् ॥ ४३
ततः पूर्णाहुतिं दत्त्वा प्रायश्चित्तञ्च देशिकः।
पुनर्दशाहुतिं कुर्य्यान्मूलमन्त्रेण मन्त्रवित् ॥ ४४
पुनः सम्पूज्य देवेशं प्रणम्याचम्य देशिकः।
दत्त्वा चैव यथान्यायं स्वजात्या वैश्यमुद्धरेत् ॥ ४५
तस्यैवं जनयेत् क्षात्रमुद्धारञ्च ततः पुनः।
कृत्वा तथैव विप्रत्वं जनयेदस्य देशिकः ॥ ४६
राजन्यञ्चैवमुद्धृत्य कृत्वा विप्रं पुनस्तयोः।
रुद्रत्वं जनयेद्विप्रे रुद्रनाम्नैव साधयेत् ॥ ४७
प्रोक्षणं ताड़नं कृत्वा शिशोः स्वात्मानमात्मनि।
शिवात्मकमनुस्मृत्य स्फुरन्तं विस्फुलिङ्गवत् ॥ ४८
नाड्या यथोक्तया वायुं रेचयन् मन्त्रतो गुरुः।
निर्गम्य प्रविशेन्नाड्या शिष्यस्य हृदयं तथा ॥ ४९
प्रविश्य तस्य चैतन्यं नीलबिन्दुनिभं स्मरन्।

सर्वतेजसापास्तमलं ज्वलन्तमनुचिन्तयेत् ॥ ५०
समादाय तया नाड्या मन्त्री संहारमुद्रया।
पूरकेण निवेश्यैनमेकीभावार्थमात्मनि ॥ ५१
कुम्भकेन तया नाड्या रेचकेन यथा पुरा।
समादाय शिष्यस्य हृदये तं निवेशयेत् ॥ ५२
समालभ्य शिवास्त्रकं तस्मै दत्त्वोपवीतकम्।
हुत्वाहुतित्रयं पश्चाद्दद्यात् पूर्णाहुतिं ततः ॥ ५३
देवस्य दक्षिणे शिष्यमुपवेश्य वरासने।
कुशपुष्पपरिस्तीर्णे बद्धाञ्जलिमुदङ्मुखम् ॥ ५४
स्वस्तिकासनमारूढं विधाय प्राङ्मुखः स्वयम्।
वरासनस्थितो मन्त्रैर्महामङ्गलनिस्वनैः ॥ ५५
समादाय घटं पूर्णं पूर्व्वमेव प्रसाधितम्।
ध्यायमानः शिवं शिष्यमभिषिञ्चेत देशिकः ॥ ५६
अथापनुद्य स्नानाम्बु परिधाय सिताम्बरम्।
आचान्तोऽलङ्कृतः शिष्यः प्राञ्जलिर्मण्डपं व्रजेत् ॥ ५७
उपवेश्य यथापूर्व्वं तं गुरुर्दर्भविष्टरे।
सम्पूज्य मण्डले देवं करन्यासं समाचरेत् ॥ ५८
ततस्तु भस्मना देवं ध्यायमानः स्वदेशिकः।
समालभेत पाणिभ्यां शिशुं शिवमुदीरयेत् ॥ ५९
अथ तस्य शिवाचार्य्यो दहनप्लावनादिकम्।
सकलीकरणं कृत्वा मातृकान्यासवर्त्मना ॥ ६०
ततः शिवासनं ध्यात्वा शिष्यमूर्द्धनि देशिकः।
तत्रावाह्य यथान्यायमर्च्चयेन्मनसा शिवम् ॥ ६१
प्रार्थयेत् प्राञ्जलिर्देवं नित्यमत्र स्थितो भव।
इति विज्ञाप्य तं शम्भोस्तेजसा भासुरं स्मरेत् ॥ ६२
सम्पूज्याथ शिवं शैवीमाज्ञां प्राप्य शिवात्मिकाम्।
कर्णे शिष्यस्य शनकैः शिवमन्त्रमुदीरयेत् ॥ ६३
स तु बद्धाञ्जलिः श्रुत्वा मन्त्रं तद्गतमानसः।
शनैस्तं व्याहरेच्छिष्यः शिवाचार्य्यस्य शासनात् ॥ ६४
ततः शाक्तञ्च सन्दिश्य मन्त्रं मन्त्रविचक्षणः।
उच्चारयित्वा च सुखं तस्मै मङ्गलमादिशेत् ॥ ६५
ततः समासान्मन्त्रार्थं वाच्य-वाचकयोगतः।
समादिश्येश्वरं रूपं योगमासनमादिशेत् ॥ ६६
अथ गुर्व्वाज्ञया शिष्यः शिवाग्नि-गुरुसन्निधौ।
भक्त्यैवमभिसन्धाय दीक्षावाक्यमुदीरयेत् ॥ ६७
वरं प्राणपरित्यागश्छेदनं शिरसोऽपि वा।
न त्वनभ्यर्च्य भुञ्जीयां भगवन्तं त्रिलोचनम् ॥ ६८
स एवमुक्त्वा नियतो यावन्मोहविपर्य्ययः।
तावदाराधयेद्देवं तन्निष्ठस्तत्परायणः ॥ ६९
ततः स समयो नाम भविष्यति शिवाश्रमे।
लब्धाधिकारो गुर्व्वाज्ञापालकस्तद्वशो भवेत् ॥ ७०
अतः परं न्यस्तकरो भस्मादाय स्वहस्ततः।
दद्याच्छिष्याय मूलेन रुद्राक्षञ्चाभिमन्त्रितम् ॥ ७१
प्रतिमां वापि देवस्य गूढदेहमथापि वा।
पूजा-होम-जप-ध्यानसाधनानि च सम्भवे ॥ ७२
सोऽपि शिष्यः शिवाचार्य्याल्लब्धानि बहुमानतः।
आददीताज्ञया तस्य देशिकस्य न चान्यथा ॥ ७३
आचार्य्यादाप्तमखिलं शिरस्याधाय भक्तितः।
रक्षयेत् पूजयेच्छम्भुं मठे वा गृह एव वा ॥ ७४
अतः परं शिवाचारमादिशेदस्य देशिकः।
भक्ति-श्रद्धानुसारेण प्रज्ञायाश्चानुसारतः ॥ ७५
यदुक्तं यत् समाम्नातं यच्च वान्यत् प्रकीर्त्तितम्।
शिवाचार्य्येण समये तत् सर्व्वं शिरसा वहेत् ॥ ७६
शिवागमस्य ग्रहणं वाचनं श्रवणं तथा।
देशिकादेशतः कुर्य्यान्न स्वेच्छातो न चान्यतः ॥ ७७
इति संक्षेपतः प्रोक्तः संस्कारः समयाह्वयः।
साक्षाच्छिवपुरप्राप्तौ नृणां परमसाधनम् ॥ ७८

इति श्रीशैवे महापुराणे वायवीयसंहि-
तायामुत्तरभागे दीक्षाविधानं नाम
चतुर्द्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः।

उपमन्युरुवाच।

अतः परं समालक्ष्य गुरुः शिष्यस्य योग्यताम्।
षडध्वशुद्धिं कुर्व्वीत सर्व्वबन्धविमुक्तये ॥ १
कला तत्त्वञ्च भुवनं वर्णं पदमतः परम्।
मन्त्रश्चेति समासेन षडध्वा परिपठ्यते ॥ २
निवृत्त्याद्याः कलाः पञ्च कलाध्वा कथ्यते बुधैः।
व्याप्ताः कलाभिरितरे ह्यध्वानः पञ्च पञ्चभिः ॥ ३
शिवतत्त्वादि-भूम्यन्तं तत्त्वाध्वा समुदाहृतः।
षड्विंशसंख्ययोपेतः शुद्धाशुद्धोभयात्मकः ॥ ४

आधाराद्युन्मनान्तश्च भुवनाध्वा प्रकीर्त्तितः ।
विना भेदोपभेदाभ्यां षष्टिसंख्यासमन्वितः ॥ ५
पञ्चाशद्रुद्ररूपास्तु वर्णा वर्णाध्वसंज्ञिताः ।
अनेकभेदसम्पन्नः पदाध्वा समुदाहृतः ॥ ६
महामन्त्रोपमन्त्राणां वर्त्ततेऽवयवात्मना ।
प्रधानावयवत्वे तु सोऽध्वा पञ्चपदात्मकः ॥ ७
सप्तकोटिमहामन्त्रा मन्त्राध्वा समुदाहृतः ।
सर्व्वोऽपि मन्त्रैर्मन्त्राध्वा व्याप्तः परमविद्यया ॥ ८
यथा शिवो न तत्त्वेषु गण्यते तत्त्वनायकः ।
मन्त्राध्वनि न गण्येत तथासौ मन्त्रनायकः ॥ ९
कलाध्वनो व्यापकत्वं व्याप्यत्वञ्चेतराध्वनाम् ।
न वेत्ति तत्त्वतो यः स नैवार्हत्यध्वशोधनम् ॥ १०
षड्विधस्याध्वनो रूपं न येन विदितं भवेत् ।
व्याप्य-व्यापकता तेन ज्ञातुमेव न शक्यते ॥ ११
तस्मादध्वस्वरूपञ्च व्याप्य-व्यापकतां तथा ।
यथावदवगम्यैव कुर्य्यादध्वविशोधनम् ॥ १२
कुण्डमण्डलपर्य्यन्तं तत्र कृत्वा यथा पुरा ।
द्विहस्तमानं कुर्व्वीत प्राच्यां कलशमण्डलम् ॥ १३
ततः स्नातः शिवाचार्य्यः सशिष्यः कृतनैत्यकः ।
प्रविश्य मण्डलं शम्भोः पूजां पूर्व्ववदाचरेत् ॥ १४
तत्राढ़कावरैः सिद्धं तण्डुलैः पायसं प्रभोः ।
अर्द्धं निवेद्य होमार्थं शेषं समुपकल्पयेत् ॥ १५
पुरतः कल्पिते वाथ मण्डले वर्णमण्डिते ।
स्थापयेत् पञ्च कलशान् दिक्षु मध्ये च देशिकः ॥१६
तेषु ब्रह्माणि मूलार्णैर्बिन्दु-नादसमन्वितैः ।
नमाद्यैश्च यकारान्तः कल्पयेत् कल्पवित्तमः ॥ १७
ईशानं मध्यमे कुम्भे पुरुषं पुरतः स्थिते ।
अघोरं दक्षिणे वामे वामं सद्यञ्च पश्चिमे ॥ १८
रक्षां विधाय मुद्राञ्च बद्धा कुम्भाभिमन्त्रणम् ।
कृत्वा शिवानले होमं प्रारभेत यथा पुरा ॥ १९
यदर्द्धं पायसं पूर्व्वं होमार्थमुपकल्पितम् ।
हुत्वा शिष्यस्य तच्छेषं भोक्तुं समुपकल्पयेत् ॥ २०
तर्पणान्तञ्च मन्त्राणां कृत्वा कर्म्म यथा पुरा ।
हुत्वा पूर्णाहुतिं तेषां ततः कुर्य्यात् प्रदीपनम् ॥ २१
ओङ्कारादनु हुङ्कारं ततो मूलं फड़न्तकम् ।
स्वाहान्तं दीपने प्राहुरङ्गानि च यथाक्रमम् ॥ २२

तेषामाहुतयस्तिस्रो देया दीपनकर्म्मणि ।
मन्त्रैरेकैकशस्तैस्तु विचिन्त्या दीप्तमूर्त्तयः ॥ २३
त्रिगुणं त्रिगुणीकृत्य द्विजकन्याकृतं सितम् ।
सूत्रं सूत्रेण संमन्त्र्य शिखाग्रे बन्धयेच्छिशोः ॥ २४
चरणाङ्गुष्ठपर्य्यन्तमूर्द्ध्वकायस्य तिष्ठतः ।
लम्बयित्वा तु तत् सूत्रं सुषुम्णां तत्र योजयेत् ॥ २५
शान्तया मुद्रयादाय मूलमन्त्रेण मन्त्रवित् ।
हुत्वाहुतित्रयं तस्याः सान्निध्यमुपकल्पयेत् ॥ २६
हृदि सन्ताड्य शिष्यस्य पुष्पक्षेपेण पूर्व्ववत् ।
चैतन्यं समुपादाय द्वादशान्ते निवेश्य च ॥ २७
सूत्रं सूत्रेण संयोज्य संरक्ष्यास्त्रेण वर्म्मणा ।
अवगुण्ठ्याथ तत् सूत्रं शिष्यदेहं विचिन्तयेत् ॥ २८
मलत्रयमलं भोग-भोग्य-भोक्तृत्वलक्षणम् ।
विषयेन्द्रियदेहादि जनकं तस्य भावयेत् ॥ २९
व्योमादिभूतरूपिण्यः शान्त्यतीतादयः कलाः ।
सूत्रे स्वनामभिर्योज्याः पूज्याश्चैव नमोयुतैः ॥ ३०
अथवा भूतबीजैस्तत् कृत्वा पूर्व्वोदितं क्रमात् ।
ततो मलादेस्तत्त्वादौ व्याप्तिं समवलोकयेत् ॥ ३१
कलाव्याप्तिं मलादौ च हुत्वा सन्दीपयेत् कलाः ।
शिष्यं शिरसि सन्ताड्य तत्र देहे यथाक्रमम् ॥ ३२
शान्त्यतीतपदे सूत्रं लाञ्छयेन्मन्त्रमुच्चरन् ।
एवं कृत्वा निवृत्त्यन्तं शान्त्यतीताद्यनुक्रमात् ॥ ३३
हुत्वाहुतित्रयं पश्चान्मण्डले च शिवं यजेत् ।
देवस्य दक्षिणे शिष्यमुपवेश्योत्तरामुखम् ॥ ३४
सदर्भे मण्डले दद्याद्धोमशिष्टं चरुं गुरुः ।
शिष्यस्तद्गुरुणा दत्तं सत्कृत्य शिवपूर्व्वकम् ॥ ३५
भुक्त्वा पश्चाद्द्विराचम्य शिवमन्त्रमुदीरयेत् ।
अपरे मण्डले दद्यात् पञ्चगव्यं तथा गुरुः ॥ ३६
सोऽपि तच्छक्तितः पीत्वा द्विराचम्य शिवं स्मरेत् ।
तृतीये मण्डले शिष्यमुपवेश्य यथा पुरा ॥ ३७
प्रदद्याद्दन्तपवनं यथाशास्त्रोक्तलक्षणम् ।
अग्रेण तस्य मृदुना प्राङ्मुखो वाप्युदङ्मुखः ॥ ३८
वाचं नियम्य चासीनः शिष्यो दन्तान् विशोधयेत् ।
प्रक्षाल्य दन्तपवनं त्यक्त्वाचम्य शिवं स्मरेत् ॥ ३९
प्रविशेद्देशिकादिष्टः प्राञ्जलिः शिवमण्डलम् ।
त्यक्तं तद्दन्तपवनं दृश्यते गुरुणा यदि ॥ ४०

प्रागुदक्प्रवणे चाग्रं शिवमन्यच्छिवेतरत् ।
प्रशस्ताप्रशस्ते तस्मिन् गुरुस्तद्दोषशान्तये ॥ ४१
शतमर्द्धं तदर्द्धं वा जुहुयान्मूलमन्त्रतः ।
ततः शिष्यं समालभ्य जपित्वा कर्णयोः शिवम् ॥ ४२
देवस्य दक्षिणे भागे तं शिष्यमधिवासयेत् ।
अहतास्तरणास्तीर्णे स दर्भशयने शुचिः ॥ ४३
मन्त्रितेऽतः शिवं ध्यायन् प्राक्शिरस्को निशि स्वपेत् ।
शिखायां बद्धसूत्रस्य शिखया तच्छिखां गुरुः ॥ ४४
आविश्याहतवस्त्रेण तमाच्छाद्य च वर्म्मणा ।
रेखात्रयञ्च परितो भस्मना तिलसर्षपैः ॥ ४५
कृत्वास्त्रजप्तैस्तद्बाह्ये दिगीशानां वलिं हरेत् ।
शिष्योऽपि परतोऽनश्नन् कृत्वैवमधिवासनम् ॥ ४६
प्रबुध्योत्थाय गुरवे स्वप्नं दृष्टं निवेदयेत् ।
ततः स्नानादिकं सर्व्वं समाप्याचार्य्यचोदितः ॥ ४७
गच्छेद्बद्धाञ्जलिर्ध्यायन् शिवमण्डलपार्श्वतः ।
अथ पूजां विना सर्व्वं कृत्वा पूर्व्वदिने यथा ॥ ४८
नेत्रवस्त्रनपर्य्यन्तं दर्शयेन्मण्डलं गुरुः ।
बद्धनेत्रेण शिष्येण पुष्पावकिरणे कृते ॥ ४९
यत्रापतन्ति पुष्पाणि तस्य नामास्य सन्दिशेत् ।
तमोऽपनीय निर्म्माल्यं मण्डलेऽस्मिन् यथा पुरा ॥ ५०
पूजयेद्देवमीशानं जुहुयाच्च शिवानले ।
शिष्येण यदि दुःस्वप्नो दृष्टस्तद्दोषशान्तये ॥ ५१
शतमर्द्धं तदर्द्धं वा जुहुयान्मूलविद्यया ।
ततः सूत्रं शिखाबद्धं लम्बयित्वा यथा पुरा ॥ ५२
आधारपूजाप्रभृति यन्निवृत्तिकलाश्रयम् ।
वागीश्वरीपूजनान्तं कुर्य्याद्धोमपुरःसरम् ॥ ५३
अथ प्रणम्य वागीशां निवृत्तेर्व्यापिकां सतीम् ।
मण्डले देवमभ्यर्च्य हुत्वा चैवाहुतित्रयम् ॥ ५४
प्रार्थयेच्च शिशोः प्राप्तिं युगपत् सर्व्वयोनिषु ।
सूत्रदेहेऽथ शिष्यस्य ताड़न-प्रोक्षणादिकम् ॥ ५५
स्वात्मानं समादाय द्वादशान्ते निवेद्य च ।
ततोऽथादाय मूलेन मुद्रया शास्त्रदृष्टया ॥ ५६
योजयेन्मनसाचार्य्यो युगपत् सर्व्वयोनिषु ।
देवानां जातयश्चाष्टौ तिरश्चां पञ्च जातयः ॥ ५७
एकैकया मानुषया योनयश्च चतुर्द्दश ।
तासु सर्व्वासु युगपत् प्रवेशाय शिशोर्धिया ॥ ५८

वागीशान्यां यथान्यायं शिष्यात्मानं निवेशयेत् ।
गर्भनिष्पत्तये देवं सम्पूज्य प्रणिपत्य च ॥ ५९
हुत्वा चैव यथान्यायं निष्पन्नं तदनु स्मरेत् ।
निष्पन्नस्यैवमुत्पत्तिमनुवृत्तिञ्च कर्म्मणा ॥ ६०
आर्ज्जवं भोगनिष्पत्तिं कुर्य्यात् प्रीतिं परां तथा ।
निष्कृत्यर्थञ्च जात्यायुर्भोगसंस्कारसिद्धये ॥ ६१
हुत्वाहुतित्रयं देवं प्रार्थयेद्देशिकोत्तमः ।
भोक्तृत्वविषयासङ्गमलं तत्कार्य्यशोधनम् ॥ ६२
कृत्वैवमेव शिष्यस्य छिन्द्यात् पाशत्रयं ततः ।
निवृत्त्या परिबद्धस्य पाशस्यात्यन्तभेदनम् ॥ ६३
कृत्वा शिष्यस्य चैतन्यं स्वच्छं मन्येत केवलम् ।
हुत्वा पूर्णाहुतिं वह्नौ ब्रह्माणं पूजयेत् ततः ॥ ६४
हुत्वाहुतित्रयं तस्मै शिवाज्ञामनुसन्दिशेत् ।
पितामह त्वया नास्य यातुः शैवं परं पदम् ॥ ६५
प्रतिबन्धो विधातव्यः शैवाज्ञैषा गरीयसी ।
इत्यादिश्य तमभ्यर्च्य विसृज्य च विधानतः ॥ ६६
समभ्यर्च्य महादेवं जुहुयादाहुतित्रयम् ।
निवृत्त्या शुद्धमुद्धृत्य शिष्यात्मानं यथा पुरा ॥ ६७
निवेश्यात्मनि सूत्रे च वागीशां पूजयेत् ततः ।
हुत्वाहुतित्रयं तस्मै प्रणम्य च विसृज्य ताम् ॥ ६८
कुर्य्यान्निवृत्तेः सन्धानं प्रतिष्ठाकलया सह ।
सन्धाने युगपत् पूजां कृत्वा हुत्वाहुतित्रयम् ॥ ६९
शिष्यात्मनः प्रतिष्ठायां प्रवेशन्त्वथ भावयेत् ।
ततः प्रतिष्ठामावाह्य कृत्वाशेषं पुरोदितम् ॥ ७०
तद्व्याप्तिं व्यापिकां तस्य वागीशानीञ्च भावयेत् ।
पूर्णेन्दुमण्डलप्रख्यां कृत्वा शेषञ्च पूर्व्ववत् ॥ ७१
विष्णवे सन्दिशेदाज्ञां शिवस्य परमात्मनः ।
विष्णोर्विसर्ज्जनाद्यञ्च कृत्वा शेषञ्च विद्यया ॥ ७२
प्रतिष्ठामनुसन्धाय तस्याञ्चापि यथा पुरा ।
कृत्वानुचिन्त्य तद्व्याप्तिं वागीशाञ्च यथाक्रमम् ॥ ७३
दीप्ताग्नौ पूर्णहोमान्तं कृत्वा शेषञ्च पूर्व्ववत् ।
नीलरुद्रमुपस्थाय तस्मै पूजादिकं तथा ॥ ७४
कृत्वा कर्म्म शिवाज्ञाञ्च दद्यात् पूर्व्वोक्तवर्त्मना ।
ततस्तमपि चोद्दास्य कृत्वा तस्याथ शान्तये ॥ ७५
विद्याकलां समाधाय तद्व्याप्तिञ्चावलोकयेत् ।
स्वात्मनो व्यापिकां तद्वागीशाञ्च यथा पुरा ॥ ७६

भास्वन्तीं दिशो दश।
बालार्कसदृशाकारां भासयन्तीं दिशो दश।
ततः शिष्यं यथापूर्व्वं कृत्वा देवं महेश्वरम् ॥ ७७
आवाह्याराध्य हुत्वास्मै शिवाज्ञां मनसादिशेत्।
महेश्वरं ततोत्सृज्य कृत्वा पञ्चकलामिमाम् ॥ ७८
शान्त्यतीतां कलां नीत्वा तद्ग्राप्तिमवलोकयेत्।
स्वात्मनो व्यापिकां तद्वागीशाञ्च विचिन्तयेत् ॥७९
नभोमण्डलसङ्काशां पूर्णान्तञ्चापि पूर्व्ववत्।
कृत्वा शेषं विधानेन समभ्यर्च्य सदाशिवम् ॥ ८०
तस्मै समादिशेदाज्ञां शम्भोरमितकर्म्मणः।
तत्रापि च यथापूर्व्वं शिवं शिरसि पूर्व्ववत् ॥ ८१
समभ्यर्च्य च वागीशां प्रणम्य च विसर्ज्जयेत्।
ततः शिवेन सम्प्रोच्य शिष्यं शिरसि पूर्व्ववत् ॥ ८२
विलयं शान्त्यतीतायाः शक्तितत्त्वेऽथ चिन्तयेत्।
षड़ध्वनः परे पारे सर्व्वाध्वव्यापिनीं पराम् ॥ ८३
कोटिसूर्य्यप्रतीकाशां शैवीं शक्तिञ्च चिन्तयेत्।
तदग्रे शिष्यमानीय शुद्धस्फटिकनिर्म्मलम् ॥ ८४
प्रक्षाल्य कर्त्तरीं पश्चाच्छिवशास्त्रोक्तमार्गतः।
कुर्य्यात् तस्य शिखाच्छेदं सह सूत्रेण देशिकः ॥ ८५
ततस्तां गोमये न्यस्य शिवाग्नौ जुहुयाच्छिखाम्।
वौषड़न्तेन मूलेन पुनः प्रक्षाल्य कर्त्तरीम् ॥ ८६
हस्तौ च शिष्यचैतन्यं तद्देहे विनिवेशयेत्।
ततः स्नातं समाचान्तं कृतस्वस्त्ययनं शिशुम् ॥ ८७
प्रवेश्य मण्डलाभ्याशं प्रणिपत्य च दण्डवत्।
पूजां कृत्वा यथान्यायं क्रियावैकल्यशुद्धये ॥ ८८
उपांशूच्चारयोगेण जुहुयादाहुतित्रयम्।
पुनः सम्पूज्य देवेशं मन्त्रवैकल्यशुद्धये ॥ ८९
मानसोच्चारयोगेण जुहुयादाहुतित्रयम्।
ततः शिवं समाराध्य मण्डलस्थं सहाम्बया ॥ ९०
हुत्वाहुतित्रयं पश्चात् प्रार्थयेत् प्राञ्जलिर्गुरुः।
भगवंस्त्वत्प्रसादेन शुद्धिरस्य षड़ध्वनः ॥ ९१
कृता तस्मात् परं धाम गमयेनं तवाव्ययम्।
इति विज्ञाप्य देवाय नाड़ीसन्धानपूर्व्वकम् ॥ ९२
पूर्णान्तं पूर्व्ववत् कृत्वा ततो भूतानि शोधयेत्।
स्थिरास्थिरे ततः शुद्धे शीतोष्णे च ततः परम् ॥९३
ध्यायेद्ग्राम्यैकताकारे भूतशोधनकर्म्मणि।
भूतानां ग्रन्थिविच्छेदं कृत्वा त्यक्त्वा सहाधिपैः ॥९४

भूतानि स्थितियोगेन योजयेत् परमे शिवे।
विशोध्यास्य तनुं दग्ध्वा प्लावयित्वा सुधाकणैः ॥ ९५
स्थाप्यात्मानं ततः कुर्य्याद्विशुद्धाध्वमयं वपुः।
तत्रादौ शान्त्यतीतान्तु व्यापिकां स्वाध्वनः कलाम्
शुद्धामेव शिशोर्मूर्द्ध्नि न्यसेच्छान्तिमुखे तथा।
विद्यां गलादि-नाभ्यन्तं प्रतिष्ठां तदधःक्रमात् ॥९७
जान्वन्तं तदधो न्यस्येन्निवृत्तिञ्चानुचिन्तयेत्।
स्ववीजैः सूत्रमन्त्रञ्च न्यस्याङ्गैस्तं शिवात्मकम् ॥ ९८
बुद्ध्वा तं हृदयाम्भोजे देवमावाह्य पूजयेत्।
आभास्य नित्यसान्निध्यं शिवस्वात्म्यं शिशौ गुरुः ॥९९
शिवतेजोमयस्यास्य शिशोरापादयेद्गुणान्।
अणिमादीन् प्रसीदेति प्रदद्यादाहुतित्रयम् ॥ १००
तथैव तु गुणानेव पुनरस्योपपादयेत्।
सर्व्वज्ञतां तथा तृप्तिं बोधञ्चाद्यन्तवर्ज्जितम् ॥ १०१
अलुप्तशक्तिं स्वातन्त्र्यमनन्तां शक्तिमेव च।
ततो देवमनुज्ञाप्य सद्यादिकलशैस्तु तम् ॥ १०२
अभिषिञ्चेत देवेशं ध्यायमानो यथाक्रमम्।
अथोपवेश्य तं शिष्यं शिवमभ्यर्च्य पूर्व्ववत् ॥ १०३
लब्धानुज्ञः शिवाच्छैवीं विद्यामस्मै समादिशेत्।
ओङ्कारपूर्व्विकां तेन सम्पुटान्तु नमोऽन्तगाम् ॥ १०
शिवशक्तियुताञ्चैव शक्तिविद्याञ्च तादृशीम्।
ऋषिं छन्दश्च देवञ्च शिवतां शिवयोस्तथा ॥ १०
पूजां सावरणां शम्भोरासनानि च सन्दिशेत्।
पुनः सम्पूज्य देवेशं यन्मया समनुष्ठितम् ॥ १०
सुकृतं कुरु तत् सर्व्वमिति विज्ञापयेच्छिवम्।
सहशिष्यो गुरुर्देवं दण्डवत् क्षितिमण्डले ॥ १०
प्रणम्योद्वासयेत् तस्मान्मण्डलात् पावकादपि।
ततः सदस्यिकाः सर्व्वे पूज्याः पूजार्हकाः क्रमात् ॥
सेव्या वित्तानुसारेण सदस्याश्च सहर्त्विजः।
वित्तशाठ्यं न कुर्व्वीत यदीच्छेच्छिवमात्मनः ॥

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे षड़ध्वशुद्ध्यादिकथनं नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

षोड़शोऽध्यायः ।

उपमन्युरुवाच ।

अतः परं प्रवक्ष्यामि साधकं नाम नामतः ।
संस्कारं मन्त्रमाहात्म्य-कथने सूचितं मया ॥ १
सम्पूज्य मण्डले देवं स्थाप्य कुम्भञ्च पूर्व्ववत् ।
हुत्वा शिष्यमनुष्णीषं प्रापयेद्भूमिमण्डलम् ॥ २
पूर्णान्तं पूर्व्ववत् कृत्वा हुत्वाहुतिशतं तथा ।
सन्तर्प्य मूलमङ्गानि दशांशैर्देशिकोत्तमः ॥ ३
सन्दीप्य च यथापूर्व्वं कृत्वा पूर्व्वोदितं क्रमात् ।
अभिषिच्य यथापूर्व्वं प्रदद्यान्मन्त्रमुत्तमम् ॥ ४
तत्र विद्योपदेशान्तं कृत्वा विस्तरशः क्रमात् ।
पुष्पाम्बुना शिशोः पाणौ विद्यां शैवीं समर्पयेत् ॥ ५
तवैहिकामुष्मिकयोः सर्व्वसिद्धिफलप्रदः ।
भवत्वेष महामन्त्रः प्रसादात् परमेष्ठिनः ॥ ६
इत्युक्त्वा देवमभ्यर्च्य लब्धानुज्ञः शिवाद्गुरुः ।
साधनं विनियोगञ्च साधकाय समादिशेत् ॥ ७
तच्छ्रुत्वा गुरुसन्देशं क्रमशो मन्त्रसाधकः ।
गुरुतो विनियोगस्य मन्त्रसाधनमाचरेत् ॥ ८
साधनं मूलमन्त्रस्य पुरश्चरणमुच्यते ।
पुरतश्चरणीयत्वाद्विनियोगाख्यकर्म्मणः ॥ ९
नात्यन्तकरणीयन्तु मुमुक्षोर्मन्त्रसाधनम् ।
कृतन्तु तदिहान्यत्र तस्यापि शुभदं भवेत् ॥ १०
शुभेऽहनि शुभे देशे काले वा दोषवर्ज्जिते ।
शुक्लदन्त-नखः स्नातः कृतपूर्व्वाह्णिकक्रियः ॥ ११
अलङ्कृत्य यथालब्धैर्गन्धमाल्यविभूषणैः ।
सोष्णीषः सोत्तरासङ्गः सर्व्वशुक्लः समाहितः ॥ १२
देवालये गृहेऽन्यस्मिन् देशे वा सुमनोहरे ।
सुखेनाभ्यस्तपूर्व्वेण त्वासनेन कृतासनः ॥ १३
तनुं कृत्वात्मनः शैवीं शिवशास्त्रोक्तवर्त्मना ।
सम्पूज्य देवदेवेशं नकुलीश्वरमीश्वरम् ॥ १४
निवेद्य पायसं तस्मै समाप्याराधनक्रमम् ।
प्रणिपत्य च तं देवं प्राप्तानुज्ञश्च तन्मुखात् ॥ १५
कोटिवारं तदर्द्धं वा तदर्द्धं वा जपेच्छिवम् ।
पञ्चविंशतिकं वापि दशलक्षमथापि वा ॥ १६
अहिंसकः क्षमी शान्तो दान्तश्चैव सदा भवेत् ।
ततश्च पायसाहारालवणैकमिताशनः ॥ १७
अलाभे पायसस्याश्नन् फलमूलादिकानि वा ।
विहितानि शिवेनैव विशिष्टान्युत्तरोत्तरम् ॥ १८
चरुं भक्ष्यमथो शक्तुकणान् यावकमेव च ।
शाकं पयो दधि घृतं मूलं फलमथोदकम् ॥ १९
अभिमन्त्र्य च मन्त्रेण भक्ष्य-भोज्यादिकानि च ।
साधनेऽस्मिन् विशेषेण नित्यं भुञ्जीत वाग्यतः ॥ २०
मन्त्राष्टशतपूतेन जलेन शुचिना व्रती ।
स्नायान्नदी-नदोत्थेन प्रोक्षयेद्वाथ शक्तितः ॥ २१
तर्पयेच्च तथा नित्यं जुहुयाच्च शिवानले ।
सप्तभिः पञ्चभिर्द्रव्यैस्त्रिभिर्वाथ घृतेन वा ॥ २२
इत्थं भक्त्या शिवं शैवो यः साधयति साधकः ।
तस्यैहामुत्र दुष्प्रापं न किञ्चिदिह विद्यते ॥ २३
अथवाहरहर्मन्त्रं जपेदेकाग्रमानसः ।
अनश्नन्नेव साहस्रं विना मन्त्रस्य साधनम् ॥ २४
न तस्य दुर्लभं किञ्चिन्न तस्यास्त्यशुभं क्वचित् ।
इह विद्यां श्रियं सौख्यं लब्ध्वा मुक्तिञ्च विन्दति ॥ २५
साधने विनियोगे च नित्ये नैमित्तिके तथा ।
जपेज्जलैर्भस्मना च स्नात्वा मन्त्रेण च क्रमात् ॥ २६
शुचिर्बद्धशिखः सूत्री सपवित्रकरस्तथा ।
धृतत्रिपुण्ड्र-रुद्राक्षो विद्यां पञ्चाक्षरीं जपेत् ॥ २७

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे मन्त्रसाधनप्रकारो नाम
षोड़शोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः ।

उपमन्युरुवाच ।

अथैवं संस्कृतं शिष्यं कृतपाशुपतव्रतम् ।
आचार्य्यत्वेऽभिषिञ्चेत तद्योग्यत्वे न चान्यथा ॥ १
मण्डलं पूर्व्ववत् कृत्वा सम्पूज्य परमेश्वरम् ।
स्थापयेत् पञ्च कलशान् दिक्षु मध्ये च पूर्व्ववत् ॥ २
निवृत्तिं पुरतो न्यस्य प्रतिष्ठां पश्चिमे घटे ।
विद्यां दक्षिणतः शान्तिमुत्तरे मध्यतः पराम् ॥ ३
कृत्वा दीक्षादिकं तत्र बद्ध्वा मुद्राञ्च धैनवीम् ।
अभिमन्त्र्य घटान् हुत्वा पूर्णान्तञ्च यथा पुरा ॥ ४

प्रवेश्य मण्डलं शिष्यमनुशीषच्च देशिकः ।
तर्पणाद्यन्तु मन्त्राणां कुर्य्यात् पूर्णावसानकम् ॥ ५
ततः सम्पूज्य देवेशमनुज्ञाप्य च पूर्व्ववत् ।
अभिषिकाय तं शिष्यमासनन्त्वधिरोहयेत् ॥ ६
सकलीकृत्य तं पश्चात् कलापञ्चकरूपिणम् ।
न्यस्तमन्त्रतनुं बुद्धा शिवं शिष्यं समर्पयेत् ॥ ७
ततो निवृत्तिकुम्भादि समुद्धृत्य घटान् क्रमात् ।
मध्यमान्तं शिवेनैव शिष्यं तमभिषिचयेत् ॥ ८
शिवहस्तं समर्प्याथ शिष्योः शिरसि देशिकः ।
शिवभावं समापन्नः शिवाचार्य्यं तमादिशेत् ॥ ९
अथालङ्कृत्य तं देवमाराध्य शिवमण्डले ।
शतमष्टोत्तरं हुत्वा दद्यात् पूर्णाहुतिं ततः ॥ १०
पुनः सम्पूज्य देवेशं प्रणम्य भुवि दण्डवत् ।
शिरस्यञ्जलिमाधाय शिवं विज्ञापयेद्गुरुः ॥ ११
भगवंस्त्वत्प्रसादेन देशिकोऽयं मया कृतः ।
अनुगृह्य त्वया देव दिव्याज्ञास्मै प्रदीयताम् ॥ १२
एवं विज्ञाप्य शिष्येण सह भूयः प्रणम्य च ।
शिवं शिवागमं दिव्यं पूजयेच्छिववद्गुरुः ॥ १३
पुनः शिवमनुज्ञाप्य शिवज्ञानस्य पुस्तकम् ।
उभाभ्यामथ पाणिभ्यां दद्याच्छिष्याय देशिकः ॥ १४
स तां मूर्द्धि समाधाय विद्यां विद्यासनोपरि ।
अधिरोप्य यथान्यायमभिवन्द्य समर्च्चयेत् ॥ १५
अथ तस्मै गुरुर्दद्याद्राजोपकरणान्यपि ।
आचार्य्यपदवीं प्राप्तो राज्यञ्चापि यतोऽर्हति ॥ १६
अथानुशासनं कुर्य्यात् पूर्व्वैराचरितं यथा ।
यथा च शिवशास्त्रोक्तं यथा लोकेषु पूज्यते ॥ १७
शिष्यान् परीक्ष्य यत्नेन शिवशास्त्रोक्तलक्षणैः ।
संस्कृत्य च शिवज्ञानं दातुमर्हसि नान्यथा ॥ १८
प्रतिष्ठाञ्चापि देवस्य विधिवत् कर्त्तुमर्हसि ।
परार्थमपि देवस्य पूजाहोमादिकं कुरु ॥ १९
अकार्पण्यमनायासं शौचं क्षान्तिं दयां तथा ।
अस्पृहामप्यसूयाञ्च यत्नेन च विभावयेत् ॥ २०
इत्यमादिश्य तं शिष्यं शिवमुद्वास्य मण्डलात् ।
शिवकुम्भानलादींश्च सदस्यानपि पूजयेत् ॥ २१
युगपद्वाथ संस्कारान् कुर्व्वीत गुणिनो गुरुः ।
तत्र त्रयं द्वयं वापि प्रयोगस्योपदिश्यते ॥ २२
तद्दाद्दावेव कलशान् कल्पयेदध्वशुद्धिवत् ।
कृत्वा समयसंस्कारमभिषेकं विनाखिलम् ॥ २३
समभ्यर्च्च्य शिवं भूयः कृत्वा चाध्वविशोधनम् ।
तस्मिन् परिसमाप्ते तु पुनर्देवं प्रपूजयेत् ॥ २४
हुत्वा मन्त्रन्तु सन्तर्प्य सन्दीप्याश्वास्य चेश्वरम् ।
समर्प्य मन्त्रं शिष्यस्य पाणौ शेषं समापयेत् ॥ २५
अथवा मन्त्रसंस्कारमनुचिन्त्याखिलं क्रमात् ।
अध्वशुद्धिं गुरुः कुर्य्यादभिषेकावसानिकाम् ॥ २६
तत्र यः शान्त्यतीतादिकलासु विहितो विधिः ।
स सर्व्वोऽपि विधातव्यस्तत्त्वत्रयविशोधने ॥ २७
शिवविद्यात्मतत्त्वाख्यं तत्त्वत्रयमुदाहृतम् ।
शक्तौ शिवस्ततो विद्या तस्यास्त्वात्मा समुद्भवौ ॥ २८
शिवेन शान्त्यतीताध्वा व्याप्तस्तदपरः परः ।
विद्यया परिशिष्टोऽध्वा ह्यात्मना निखिलः क्रमात् ॥ २९
दुर्लभं शाम्भवं मत्वा मन्त्रमूलं मनीषिणः ।
शाक्तं शंसन्ति संस्कारं शिवशास्त्रार्थपारगाः ॥ ३०
इति ते सर्व्वमाख्यातं संस्काराख्यस्य कर्मणः ।
चातुर्व्विध्यमिदं कृष्ण किं भूयः श्रोतुमिच्छसि ॥ ३१

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागेऽभिषेकादिसंस्कृतिर्नाम
सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ।

श्रीकृष्ण उवाच ।

भगवन् श्रोतुमिच्छामि शिवाश्रमनिषेवणम् ।
शिवशास्त्रोदितं कर्म्म नित्यं नैमित्तिकं तथा ॥ १

उपमन्युरुवाच ।

प्रातरुत्थाय शयनाद्ध्यात्वा देवं सहाम्बया ।
विचार्य्य कार्य्यं निर्गच्छेद्गृहादभ्युदितेऽरुणे ॥ २
अबाधे विजने देशे कुर्य्यादावश्यकं ततः ।
कृत्वा शौचं विधानेन दन्तधावनमाचरेत् ॥ ३
अलाभे दन्तकाष्ठानामष्टम्यादिदिनेषु च ।
अपां द्वादशगण्डूषैः कुर्य्यादास्यविशोधनम् ॥ ४
आचम्य विधिवत् पश्चाद्वारुणं स्नानमाचरेत् ।
नद्यां वा देवखाते वा ह्रदे वाथ गृहेऽपि वा ॥ ५

स्नानद्रव्याणि तत्तीरे स्थापयित्वा वह्निर्मलम्।
व्यपोह्य मृदमालिप्य स्नात्वा गोमयमालिपेत्॥ ६
स्नात्वा पुनः पुनर्वस्त्रं त्यक्त्वा वाथ विशोध्य वा।
सुस्नातो वृषवद्भूयः शुद्धं वासो वसेत् ततः॥ ७
मलस्नानं सुगन्धाद्यैः स्नानं दन्तविशोधनम्।
न कुर्य्याद्ब्रह्मचारी च तपस्वी विधवा तथा॥ ८
सोपवीतः शिखां बद्ध्वा प्रविश्य च जलान्तरम्।
अवगाह्य समाचान्तो जले न्यस्येत् त्रिमण्डलम्॥ ९
सौम्ये मन्त्रः पुनर्मन्त्रं जपेच्छ्रुतया शिवं स्मरन्।
उत्थायाचम्य तेनैव स्वात्मानमभिषिचयेत्॥ १०
गोशृङ्गेण सदर्भेण पालाशेन दलेन वा।
पाद्मेन वाथ पाणिभ्यां पञ्चकूलस्त्रिरेव वा॥ ११
उद्यानादौ गृहे चैव वर्द्धन्या कलशेन वा।
अवगाहनकालेऽद्भिर्मन्त्रितैरभिषिचयेत्॥ १२
अथ चेद्वारुणं कर्त्तुमशक्तः शुद्धवाससा।
मार्द्रेण शोधयेद्देहमापादतल-मस्तकम्॥ १३
आग्नेयं वाथवा मान्त्रं कुर्य्यात् स्नानं शिवेन वै।
शिवचिन्तापरं स्नानं युक्तस्यात्मीयमुच्यते॥ १४
स्वसूत्रोक्तविधानेन मन्त्राचमनपूर्व्वकम्।
आचरेद्ब्रह्मयज्ञान्तं कृत्वा देवादितर्पणम्॥ १५
मण्डलस्थं महादेवं ध्यात्वाभ्यर्च्य यथाविधि।
दद्यादर्घ्यं ततस्तस्मै शिवायादित्यरूपिणे॥ १६
अथवैतत् स्वसूत्रोक्तं कृत्वा हस्तौ विशोधयेत्।
करन्यासं ततः कुर्य्यात् सकलीकृतविग्रहः॥ १७
वामहस्तगताम्भोभिर्गन्धसिद्धार्थकान्वितैः।
कुशपुञ्जेन वाभ्युक्ष्य मूलमन्त्रसमन्वितैः॥ १८
आपो हि ष्ठादिभिर्मन्त्रैः शेषमाघ्राय वै जलम्।
वामनासापुटेनैव देहं सम्भावयेत् सितम्॥ १९
समादाय देहस्थं सव्यनासापुटेन च।
कृष्णवर्णेन वाह्यस्थं भावयेच्च शिलागतम्॥ २०
तर्पयेदथ देवेभ्य ऋषिभ्यश्च विशेषतः।
भूतेभ्यश्च पितृभ्यश्च दद्यादर्घ्यं यथाविधि॥ २१
रक्तचन्दनतोयेन हस्तमात्रेण मण्डलम्।
सुवृत्तं कल्पयेद्भूमौ रत्नचूर्णाद्यलङ्कृतम्॥ २२
तत्र सम्पूजयेद्भानुं स्वकीयावरणैः सह।
खखोल्कायेति मन्त्रेण साङ्गतः सुखसिद्धये॥ २३

पुनश्च मण्डलं कृत्वा तदङ्गैः परिपूज्य च।
तत्रस्थं हेमपात्राद्यं मागधप्रस्थसम्मितम्॥ २४
पूरयेद्गन्धतोयेन रक्तचन्दनयोगिना।
रक्तपुष्पैस्तिलैश्चैव कुशाक्षतसमन्वितैः॥ २५
दूर्व्वापामार्गगव्यैश्च केवलेन जलेन वा।
जानुभ्यां धरणीं गत्वा नत्वा देवञ्च मण्डले॥ २६
कृत्वा शिरसि तत् पात्रं दद्यादर्घ्यं शिवाय तत्।
अथवाञ्जलिना तोयं सदर्भं मूलविद्यया॥ २७
उत्क्षिपेदम्बरस्थाय शिवायादित्यमूर्त्तये।
कृत्वा पुनः करन्यासं करशोधनपूर्व्वकम्॥ २८
शुद्धेशानादि-सद्यान्तं पञ्चब्रह्ममयं शिवम्।
गृहीत्वा भसितं मन्त्रैर्विमृज्याङ्गानि संस्पृशेत्॥२९
यादि-नान्तैः शिरो-वक्त्र-हृद्गुह्य-चरणक्रमात्।
ततो मूलेन सर्व्वाङ्गमालभ्य वसनान्तरम्॥ ३०
परिधाय द्विराचम्य प्रोक्ष्यैकादशमन्त्रितैः।
जलैराच्छाद्य वासोऽन्यद्द्विराचम्य शिवं स्मरेत्॥३१
पुनर्न्यस्तकरो मन्त्री त्रिपुण्ड्रं भस्मना लिखेत्।
अवक्रमायतं व्यक्तं ललाटे गन्धवारिणा॥ ३२
वृत्तं वा चतुरस्रं वा बिन्दुमर्द्धेन्दुमेव वा।
ललाटे यादृशं पुण्ड्रं लिखितं भस्मना पुनः॥ ३३
तादृशं भुजयोर्मूर्द्ध्नि स्तनयोरन्तरे लिखेत्।
सर्व्वाङ्गोद्धूलनञ्चैव न समानं त्रिपुण्ड्रकैः॥ ३४
तस्मात्त्रिपुण्ड्रमेवैकं लिखेदुद्धूलनं विना।
रुद्राक्षान् धारयेन्मूर्द्ध्नि कण्ठे श्रोत्रे करे तथा॥३५
सुवर्णवर्णमच्छिन्नं शुभं नान्यधृतं शुभम्।
विप्रादीनां क्रमाच्छ्वेतं पीतं रक्तमथासितम्॥ ३६
तदलाभे यथालाभं धारणीयमदूषितम्।
तत्रापि नोत्तरं नीचैर्धार्य्यं नीचमथोत्तरैः॥ ३७
नाशुचिर्धारयेदक्षं सदा कालेषु धारयेत्।
इत्थं त्रिसन्ध्यमथवा द्विसन्ध्यं सकृदेव वा॥ ३८
कृत्वा स्नानादिकं शक्त्या पूजयेत् परमेश्वरम्।
पूजास्थानं समासाद्य बद्ध्वा रुचिरमासनम्॥ ३९
ध्यायेद्देवञ्च देवीञ्च प्राङ्मुखो वाप्युदङ्मुखः।
श्वेतादीन् नकुलीशान्तान् सशिष्यान् प्रणमेद्गुरून्॥४०
स्वगुरुञ्च पुनर्देवं ततो नामाष्टकं जपेत्।
शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः॥ ४१

संसारवैद्यः सर्व्वज्ञः परमात्मेति चाष्टकम्।
अथवा शिवमेवैकं जपित्वैकादशाधिकम्॥ ४२
जिह्वाग्रे तेजसो राशिं ध्यात्वा व्याध्यादिशान्तये।
प्रक्षाल्य च करौ पश्चात् कृत्वा चन्दनचर्चितौ॥ ४३
प्रकुर्व्वीत करन्यासं करशोधनपूर्व्वकम्।
न्यासस्तु त्रिविधः प्रोक्तः स्थित्युत्पत्तिलयक्रमात्॥४४
स्थितिन्यासो गृहस्थानामुत्पत्तिर्ब्रह्मचारिणाम्।
यतीनां संहृतिन्यासो वनस्थानां तथैव च॥ ४५
स एव भर्त्तृहीनायाः कुटुम्बिन्याः स्थितिर्भवेत्।
कन्यायाः पुनरुत्पत्तिर्वक्ष्ये न्यासस्य लक्षणम्॥ ४६
अङ्गुष्ठादि-कनिष्ठान्तं स्थितिन्यास उदाहृतः।
दक्षिणाङ्गुष्ठमारभ्य वामाङ्गुष्ठान्तमेव च॥ ४७
उत्पत्तिन्यास आख्यातो विपरीतस्तु संहृतिः।
सबिन्दुकान् नकारादीन् वर्णान् न्यस्येदनुक्रमात्॥४८
अङ्गुलीषु शिवं न्यस्य तलयोरप्यनामयोः।
अस्त्रन्यासं ततः कृत्वा दशदिक्ष्वस्त्रमन्त्रतः॥ ४९
निवृत्यादिकलाः पञ्च पञ्चभूतस्वरूपिणीः।
पञ्चभूताधिपः साङ्गं तत्तच्चिह्नसमन्विताः॥ ५०
हृत्कण्ठ-तालु-भ्रूमध्य-ब्रह्मरन्ध्रसमाश्रयाः।
तत्तद्बीजेन संग्रथ्यास्तत्तद्बीजेषु भावयेत्॥ ५१
तासां विशोधनार्थाय विद्यां पञ्चाक्षरीं जपेत्।
निरुद्धवाक्प्राणवायुर्गुणसंख्यानुसारतः॥ ५२
भूतग्रन्थिं ततश्छिन्द्यादस्त्रेणैवास्त्रमुद्रया।
नाड्या सुषुम्णयात्मानं प्रेरितं प्राणवायुना॥ ५३
निर्गतं ब्रह्मरन्ध्रेण योजयेच्छिवतेजसा।
विशोष्य वायुना पश्चाद्देहं कालाग्निना दहेत्॥ ५४
ततश्चोपरिभाविण कलाः संहृत्य वा न वा।
देहं संहृत्य वै दग्धं कलाः स्मृष्ट्वा सहाधिपम्॥ ५५
प्लावयित्वामृतैर्देहं यथास्थानं निवेशयेत्॥ ५६
अथासंहृत्य वै दग्धः कलासर्गं विनैव तु।
अमृतप्लावनं कुर्य्याद्भस्मीभूतस्य तस्य वै॥ ५७
ततो विद्यामयि तस्मिन् देहे दीपशिखाकृतिम्।
शिवान्निर्गतमात्मानं ब्रह्मरन्ध्रेण योजयेत्॥ ५८
देहस्यान्तःप्रविष्टं तं ध्यात्वा हृदयपङ्कजे।
पुनश्चामृतवर्षेण सिञ्चेद्विद्यामयं वपुः॥ ५९
पुनः कुर्य्यात् करन्यासं करशोधनपूर्व्वकम्।
देहन्यासं ततः पश्चान्महत्या मुद्रयाचरेत्॥ ६०
अङ्गन्यासं ततः कृत्वा शिवोक्तेन तु वर्त्मना।
वर्णन्यासं ततः कुर्य्याद्धस्तपादादिसन्धिषु॥ ६१
षडङ्गानि ततो न्यस्य जातिषट्कयुतानि च।
दिग्बन्धमाचरेत् पश्चादाग्नेयादि यथाक्रमम्॥ ६२
यद्वा मूर्द्धादिपञ्चाङ्गं न्यासमेव समाचरेत्।
तथा षडङ्गन्यासं वा भूतशुद्ध्यादिकं विना॥ ६३
एवं समासरूपेण कृत्वा देहात्मशोधनम्।
शिवभावमुपागम्य पूजयेत् परमेश्वरम्॥ ६४
अथ यस्यास्त्ववसरो नास्ति वा मतिविभ्रमः।
स विस्तीर्णेन कल्पेन न्यासकर्म्म समाचरेत्॥ ६५
तत्राद्यो मातृकान्यासो ब्रह्मन्यासस्ततः परः।
तृतीयः प्रणवन्यासो हंसन्यासस्तदुत्तरः॥ ६६
पञ्चमः कथ्यते सद्भिर्न्यासः पञ्चाक्षरात्मकः।
एतेष्वेकमनेकं वा कुर्य्यात् पूजादिकर्म्मसु॥ ६७
अकारो मूर्द्ध्नि विन्यस्य आकारोऽथ ललाटके।
इ ई च नेत्रयोस्तद्वदु ऊ श्रवणयोस्तथा॥ ६८
ऋ ॠ कपोलयोश्चैव ऌ ॡ नासापुटद्वये।
ए ऐ ओष्ठद्वये ओ औ दन्तपङ्क्तिद्वये क्रमात्॥ ६९
अं जिह्वायामथो तालुन्यः प्रयोज्यो यथाक्रमम्।
कवर्गं दक्षिणे हस्ते न्यसेत् पञ्चसु सन्धिषु॥ ७०
चवर्गञ्च तथा वामहस्तसन्धिषु विन्यसेत्।
टवर्गञ्च तवर्गञ्च पादयोरुभयोरपि॥ ७१
पफौ तु पार्श्वयोः पृष्ठे नाभौ चापि बभौ ततः।
न्यसेन्मकारं हृदये त्वगादिषु यथाक्रमम्॥ ७२
यकारादि-सकारान्तान् सप्त सप्तसु धातुषु।
हकारं हृदयस्यान्तः क्षकारं भ्रूयुगान्तरे॥ ७३
एवं वर्णान् प्रविन्यस्य पञ्चाशद्रुद्रवर्त्मना।
अङ्ग-वक्त्र-कलाभेदात् पञ्च ब्रह्माणि विन्यसेत्॥ ७४
करन्यासाद्यमपि तैः कृत्वा वाथ न वा क्रमात्।
शिरोर्वदन-हृद्गुह्य-पादेष्वेतानि कल्पयेत्॥ ७५
ततश्चोर्द्ध्वादिवक्त्राणि पश्चिमान्तानि कल्पयेत्।
ईशानस्य कलाः पञ्च पञ्चस्वेतेषु च क्रमात्॥ ७६
ततश्चतुर्षु वक्त्रेषु पुरुषस्य कला अपि।
चतस्रः प्रणिधातव्याः पूर्व्वादिक्रमयोगतः॥ ७७
हृत्कण्ठांसेषु नाभौ च कुक्षौ पृष्ठे च वक्षसि।

अघोरस्य कलाश्चाष्टौ योजनीया यथाक्रमम् ॥ ७८
पश्चात् तयोदश कलाः पायुमेढ्रोरु-जानुषु।
जङ्घास्फिक्कटिपार्श्वेषु वामदेवस्य भावयेत् ॥ ७९
तत्पुरुषस्यापि कलाश्चाष्टौ पादयोरपि हस्तयोः।
घ्राणे शिरसि बाह्वोश्च कल्पयेत् कल्पवित्तमः ॥ ८०
अष्टत्रिंशत् कलान्यासमेवं कृत्वानुपूर्व्वशः।
पश्चात् प्रणवविद्धीमान् प्रणवन्यासमाचरेत् ॥ ८१
बाहुद्वये कूर्परयोस्तथा च मणिबन्धयोः।
पार्श्वोदरोरुजङ्घेषु पादयोः पृष्ठतस्तथा ॥ ८२
इत्थं प्रणवविन्यासं कृत्वा न्यासविचक्षणः।
हंसन्यासं प्रकुर्व्वीत शिवशास्त्रे यथोदितम् ॥ ८३
बीजं विभज्य हंसस्य नेत्रयोर्घ्राणयोरपि।
विभज्य बाहु-नेत्रास्य-ललाटे घ्राणयोरपि ॥ ८४
कक्षयोः स्कन्धयोश्चैव पार्श्वयोः स्तनयोस्तथा।
जङ्घयोः पाण्योर्गुल्फयोश्च यद्वा पञ्चाङ्गवर्त्मना ॥ ८५
हंसन्यासमिमं कृत्वा न्यसेत् पञ्चाक्षरीं ततः।
यथापूर्व्वोक्तमार्गेण शिवत्वं येन जायते ॥ ८६
नाशिवः शिवमभ्यर्च्येन्नाशिवः शिवमर्च्चयेत्।
नाशिवस्तु शिवं ध्यायेन्नाशिवः शिवमाप्नुयात् ॥ ८७
तस्माच्छैवीं तनुं कृत्वा त्यक्त्वा च पशुभावनाम्।
शिवोऽहमिति सञ्चिन्त्य शैवं कर्म्म समाचरेत् ॥ ८८
कर्म्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुत्तरः।
ध्यानयज्ञो ज्ञानयज्ञः पञ्च यज्ञाः प्रकीर्त्तिताः ॥ ८९
कर्म्मयज्ञरताः केचित् तपोयज्ञरताः परे।
जपयज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा ॥ ९०
ज्ञानयज्ञरताश्चान्ये विशिष्टाश्चोत्तरोत्तरम्।
कर्म्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः ॥ ९१
कामान् कामी ततो भुक्त्वा कामासक्तः पुनर्भवेत्।
अकामो रुद्रभवने भोगान् भुक्त्वा ततश्च्युतः ॥ ९२
तपोयज्ञरतो भूत्वा जायते नात्र संशयः।
तपस्वी च पुनस्तस्मिन् भोगान् भुक्त्वा ततश्च्युतः ॥ ९३
जपध्यानरतो भूत्वा जायते भुवि मानवः।
जपध्यानरतो मर्त्यस्तद्वैशिष्ट्यवशादिह ॥ ९४
ज्ञानं लब्ध्वाचिरादेव शिवसायुज्यमाप्नुयात्।
तस्मान्मुक्तौ शिवाश्रमः कर्म्मयज्ञोऽपि देहिनाम् ॥ ९५
अकामः कामसंयुक्तो बन्धायैव भविष्यति।
तस्मात् पञ्चसु यज्ञेषु ध्यानज्ञानपरो भवेत् ॥ ९६
ध्यानं ज्ञानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः।
हिंसादिदोषनिर्म्मुक्तो विशुद्धश्चित्तसाधनः ॥ ९७
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः।
वहिःकर्म्मकरा यद्वन्नातीव फलभागिनः ॥ ९८
दृष्टा नरेन्द्रभवने तद्वदत्रापि कर्म्मिणः।
ध्यानिनां हि वपुः सूक्ष्मं भवेत् प्रत्यक्षमैश्वरम् ॥ ९९
तथेह कर्म्मिणां स्थूलं मृत्काष्ठाद्यैः प्रकल्पितम्।
ध्यानयज्ञरतास्तस्माद्देवान् पाषाणमृण्मयान् ॥ १००
नात्यन्तं प्रतिपद्यन्ते शिवयाथात्म्यवेदनात्।
आत्मस्थं यः शिवं त्यक्त्वा वहिरभ्यर्च्चयेन्नरः ॥ १०१
हस्तस्थं फलमुत्सृज्य लिहेत् कूर्परमात्मनः।
ज्ञानाद्ध्यानं भवेद्ध्यानाज्ज्ञानं भूयः प्रवर्त्तते ॥ १०२
तदुभाभ्यां भवेन्मुक्तिस्तस्माद्ध्यानरतो भवेत्।
द्वादशान्ते तथा मूर्द्ध्नि ललाटे भ्रूयुगान्तरे ॥ १०३
नासाग्रे वा तथास्ये वा कन्धरे हृदये तथा।
नाभौ वा शाश्वतस्थाने श्रद्धाविद्धेन चेतसा ॥ १०४
वहिर्यागोपचारेण देवं देवीञ्च पूजयेत्।
अथवा पूजयेन्नित्यं लिङ्गे वा कृतकेऽपि वा ॥ १०५
वह्नौ वा स्थण्डिले वाथ भक्त्या वित्तानुसारतः।
अथवान्तर्वहिश्चैव पूजयेत् परमेश्वरम्।
अन्तर्यागरतः पूजां वहिः कुर्व्वीत वा न वा ॥ १०६

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे दीक्षाविधानादिकथनं
नामाष्टदशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः।

उपमन्युरुवाच।

व्याख्यां पूजाविधानस्य प्रवदामि समासतः।
शिवशास्त्रे शिवेनैव शिवायै कथितस्य तु ॥ १
अङ्गमभ्यन्तरं यागमग्निकार्य्यावसानकम्।
विधाय वा न वा पश्चाद्वहिर्यागं समाचरेत् ॥ २
तत्र द्रव्याणि मनसा कल्पयित्वा विशोध्य च।
ध्यात्वा विनायकं देवं पूजयित्वा विधानतः ॥ ३
दक्षिणे चोत्तरे चैव नन्दीशं सुयशां तथा।

आराध्य मनसा सम्यगासनं कल्पयेद्बुधः ॥ ४
आराधनादिकैर्युक्तः सिंहयोगासनादिकम् ।
पद्मासनं वा विमलतत्त्वत्रयसमन्वितम् ॥ ५
तस्योपरि शिवं ध्यायेत् साम्बं सर्व्वमनोहरम् ।
सर्व्वलक्षणसम्पन्नं सर्व्वावयवशोभनम् ॥ ६
सर्व्वातिशयसंयुक्तं सर्व्वाभरणभूषितम् ।
रक्तास्यपाणिचरणं कुन्दमन्दस्मिताननम् ॥ ७
शुद्धस्फटिकसङ्काशं फुल्लपद्मविलोचनम् ।
चतुर्भुजमुदाराङ्गं चारुचन्द्रकलाधरम् ॥ ८
वरदाभयहस्तञ्च मृगटङ्कधरं हरम् ।
भुजङ्गहारवलयं चारुनीलगलान्तरम् ।
सर्व्वोपमानरहितं सानुगं सपरिच्छदम् ॥ ९
ततः सञ्चिन्तयेत् तस्य वामभागे महेश्वरीम् ।
प्रफुल्लोत्पलपत्राभां विस्तीर्णायतलोचनाम् ॥ १०
पूर्णचन्द्राभवदनां नील कुञ्चितमूर्द्धजाम् ।
नीलोत्पलदलप्रख्यां चन्द्रार्द्धकृतशेखराम् ॥ ११
अतिवृत्तघनोत्तुङ्ग-स्निग्धपीनपयोधराम् ।
तनुमध्यां पृथुश्रोणीं पीतसूक्ष्मवराम्बराम् ॥ १२
सर्व्वाभरणसम्पन्नां ललाटतिलकोज्ज्वलाम् ।
विचित्रपुष्पसङ्कीर्ण-केशपाशोपशोभिताम् ॥ १३
सर्व्वतोऽनुगुणाकारां किञ्चिल्लज्जायिताननाम् ।
हेमारविन्दं विकसद्दधानां दक्षिणे करे ॥ १४
दण्डवच्चापरं हस्तं न्यस्यासीनां महासने ।
पाशविच्छेदिकां साक्षात् सच्चिदानन्दरूपिणीम् ॥ १५
एवं देवञ्च देवीञ्च ध्यात्वासनवरे शुभे ।
सर्व्वोपचारवद्भक्त्या भावपुष्पैः समर्च्चयेत् ॥ १६
अथवा परिकल्प्यैवं मूर्त्तिमन्यतमां विभोः ।
शैवीं सदाशिवाख्यां वा तथा माहेश्वरीं पराम् ॥ १७
षड्विंशकाभिधानां वा श्रीकण्ठाख्यामथापि वा ।
मन्त्रन्यासादिकञ्चापि कृत्वा स्वस्यां तनौ यथा ॥ १८
अस्यां मूर्त्तौ मूर्त्तिमन्तं शिवं सदसतः परम् ।
ध्यात्वा वाह्यक्रमेणैव पूजां निर्व्वर्त्तयेद्धिया ॥ १९
समिदाज्यादिभिः पश्चान्नाभौ होमञ्च भावयेत् ।
भ्रूमध्ये च शिवं ध्यायेच्छुद्धदीपशिखाकृतिम् ॥ २०
इत्यमङ्गे स्वतन्त्रे वा योगी ध्यानमये शुभे ।
अग्निकार्य्यावसानञ्च सर्व्वत्रैष समो विधिः ॥ २१
अथ चिन्तामयं सर्व्वं समाप्याराधनक्रमम् ।
लिङ्गे च पूजयेद्देवं स्थण्डिले वानलेऽपि वा ॥ २२

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे एकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः ।

उपमन्युरुवाच ।

प्रोक्षयेन्मूलमन्त्रेण पूजास्थानं विशुद्धये ।
गन्धचन्दनतोयेन पुष्पं तत्र विनिक्षिपेत् ॥ १
अस्त्रेणोत्सार्य्य वै विघ्नानवगुण्ठ्य च वर्म्मणा ।
अस्त्रं दिक्षु प्रविन्यस्य कल्पयेदर्च्चनाभुवम् ॥ २
तत्र दर्भान् परिस्तीर्य्य क्षालयेत् प्रोक्षणादिभिः ।
संशोध्य सर्व्वपात्राणि द्रव्यशुद्धिं समाचरेत् ॥ ३
प्रोक्षणीमर्घ्यपात्रञ्च पाद्यपात्रमतः परम् ।
तथैवाचमनीयस्य पात्रञ्चेति चतुष्टयम् ॥ ४
प्रक्षाल्य प्रोक्ष्य वीक्ष्याथ क्षिपेत् तेषु जलं शिवम् ।
पुण्यद्रव्याणि सर्व्वाणि यथालाभं विनिक्षिपेत् ॥ ५
रत्नानि रजतं हेम गन्ध-पुष्पाक्षतादयः ।
फल पल्लव-दर्भांश्च पुण्यद्रव्याण्यनेकधा ॥ ६
स्नानोदके सुगन्धादि पानीये च विशेषतः ।
शीतलानि मनोज्ञानि कुसुमादीनि निक्षिपेत् ॥ ७
उशीरं चन्दनञ्चैव पाद्ये तु परिकल्पयेत् ।
जाति-कङ्कोल-कर्पूर-बहुमूल-तमालकान् ॥ ८
क्षिपेदाचमनीये च चूर्णयित्वा विशेषतः ।
एलां सर्व्वेषु पात्रेषु कर्पूरं चन्दनं तथा ॥ ९
कुशाग्राण्यक्षतांश्चैव यव-व्रीहि-तिलानपि ।
आज्य-सिद्धार्थ-पुष्पाणि भसितञ्चार्घ्यपात्रके ॥ १०
कुश-पुष्प-यव-व्रीहि-बहुमूल-तमालकान् ।
प्रक्षिपेत् प्रोक्षणीपात्रे भसितञ्च यथाक्रमम् ॥ ११
सर्व्वत्र मन्त्रं विन्यस्य वर्म्मणावेष्ट्य वाह्यतः ।
पश्चादस्त्रेण संरक्ष्य धेनुमुद्रां प्रदर्शयेत् ॥ १२
पूजाद्रव्याणि सर्व्वाणि प्रोक्षणीपात्रवारिणा ।
सम्प्रोक्ष्य मूलमन्त्रेण शोधयेद्विधिवत् ततः ॥ १३
पात्राणां प्रोक्षणीसेकामलाभे सर्व्वकर्म्मसु ।
साधयेदर्घ्यमद्भिस्तत् सामान्यं साधकोत्तमः ॥ १४

ततो विनायकं देवं भक्ष्य-भोज्यादिभिः क्रमात् ।
पूजयित्वा विधानेन द्वारपार्श्वेऽथ दक्षिणे ॥ १५
अन्तःपुराधिपं साक्षान्नन्दिनं सम्यगर्च्चयेत् ।
चामीकराचलप्रख्यं सर्व्वाभरणभूषितम् ॥ १६
बालेन्दुमुकुटं सौम्यं त्रिनेत्रञ्च चतुर्भुजम् ।
दीप्तशूल-मृगी-टङ्क-तिग्मवेत्रधरं प्रभुम् ॥ १७
चन्द्रबिम्बाभवदनं हरिवक्त्रमथापि वा ।
उत्तरे द्वारपार्श्वस्य भार्य्याञ्च मरुतां सुताम् ॥ १८
सुयशां सुव्रतामम्बापादमण्डनतत्पराम् ।
पूजयित्वा प्रविश्यान्तर्भवनं परमेष्ठिनः ॥ १९
सम्पूज्य लिङ्गं तैर्द्रव्यैर्निर्म्माल्यमपनोदयेत् ।
प्रक्षाल्य पुष्पं शिरसि न्यसेत् तस्य विशुद्धये ॥ २०
पुष्पहस्तो जपेच्छक्त्या मन्त्रं मन्त्रविशुद्धये ।
ऐशान्यां चण्डमाराध्य निर्म्माल्यं तस्य दापयेत् ॥ २१
कल्पयेदासनं पश्चादाधारादि यथाक्रमम् ।
आधारशक्तिं कल्याणीं श्यामां ध्यायेदधो भुवि ॥२२
तस्याः पुरस्तादुत्कण्ठमनन्तं कुण्डलाकृतिम् ।
धवलं पञ्चफणिनं लेलिहानमिवाम्बरम् ॥ २३
तस्योपर्य्यासनं भद्रं कण्ठीरवचतुष्पदम् ।
धर्म्मो ज्ञानञ्च वैराग्यमैश्वर्य्यञ्च पदानि वै ॥ २४
आग्नेयादि-श्वेत-रक्त-पीत-श्यामानि वर्णतः ।
अधर्म्मादीनि पूर्व्वादीन्युत्तरान्तान्यनुक्रमात् ॥ २५
राजावर्त्तमणिप्रख्यान्यस्य गात्राणि भावयेत् ।
अस्योर्द्ध्वच्छादनं पद्ममासनं विमलं सितम् ॥ २६
अष्ट पत्राणि तस्याङ्कराणिमादिगुणाष्टकम् ।
केशराणि च वामाद्या रुद्रा वामादिशक्तिभिः ॥ २७
बीजान्यपि च ता एव शक्तयोऽन्तर्मनोन्मनी ।
कर्णिका परवैराग्यं नालं ज्ञानं शिवात्मकम् ॥ २८
कन्दश्च शिवधर्म्मात्मा कर्णिकान्ते त्रिमण्डले ।
त्रिमण्डलोपर्य्यात्मादि-तत्त्वत्रितयमासनम् ॥ २९
सर्व्वासनोपरि सुखं विचित्रास्तरणास्तृतम् ।
आसनं कल्पयेद्दिव्यं शुद्धविद्यासमुज्ज्वलम् ॥ ३०
आवाहनं स्थापनञ्च सन्निरोधं निरीक्षणम् ।
नमस्कारञ्च कुर्व्वीत बद्ध्वा मुद्रां पृथक् पृथक् ॥ ३१
पाद्यमाचमनञ्चार्घ्यं गन्धं पुष्पं ततः परम् ।
धूपं दीपञ्च ताम्बूलं दत्त्वाथ स्नापयेच्छिवौ ॥ ३२

अथवा परिकल्प्यैवमासनं मूर्त्तिमेव च ।
सकलीकृत्य मूलेन ब्रह्मभिश्चापरैस्तथा ॥ ३३
आवाहयेत् ततो देव्या शिवं परमकारणम् ।
शुद्धस्फटिकसङ्काशं देवं निश्चलमक्षरम् ॥ ३४
कारणं सर्व्वलोकानां सर्व्वलोकमयं परम् ।
अन्तर्व्वहिःस्थितं व्याप्य अणोरणु महत्तरम् ॥ ३५
भक्तानामप्रयत्नेन दृश्यमीश्वरमव्ययम् ।
ब्रह्मेन्द्र-विष्णु-रुद्राद्यैरपि देवैरगोचरम् ॥ ३६
वेदसारञ्च विद्वद्भिरगोचरमिति श्रुतम् ।
आदिमध्यान्तरहितं भेषजं भवरोगिणाम् ॥ ३७
शिवतत्त्वमिति ख्यातं शिवार्थं जगति स्थितम् ।
पञ्चोपचारवद्भक्त्या पूजयेल्लिङ्गमूर्द्धनि ॥ ३८
लिङ्गमूर्त्तिर्महेशस्य शिवस्य परमात्मनः ।
स्नानकाले प्रकुर्व्वीत जयशब्दादिमङ्गलम् ॥ ३९
पञ्चगव्य-घृत-क्षीर-दधि-मध्वादिपूर्व्वकैः ।
फलैः फलानां सारैश्च तिल-सर्षप-शक्तुभिः ॥ ४०
वीजैर्यवादिभिः शस्तैश्चूर्णैर्माषादिसम्भवैः ।
संस्नाप्यालिप्य पिष्टाद्यैः स्नापयेदुष्णवारिभिः ॥ ४१
घर्षयेद्बिल्वपत्राद्यैर्लेपगन्धापनुत्तये ।
पुनः संस्नाप्य सलिलैश्चक्रवर्त्युपचारतः ॥ ४२
सुगन्ध्यामलकं दद्याद्धरिद्राञ्च यथाक्रमम् ।
ततः संशोध्य सलिलैर्लिङ्गं वेरमथापि वा ॥ ४३
स्नापयेद्गन्धतोयेन कुशपुष्पोदकेन च ।
हिरण्यरत्नतोयैश्च मन्त्रसिद्धैर्यथाक्रमम् ॥ ४४
असम्भवे तु द्रव्याणां यथासम्भवसम्भृतैः ।
केवलैर्मन्त्रतोयैर्वा स्नापयेच्छ्रद्धया शिवम् ॥ ४५
कलशेनाथ शङ्खेन वर्द्धन्या पाणिना तथा ।
सकुशेन सपुष्पेण स्नापयेन्मन्त्रपूर्व्वकम् ॥ ४६
पवमानेन रुद्रेण नीलेन त्वरितेन च ।
लिङ्गसूक्तादिसूक्तैश्च शिरसाथर्व्वणेन च ॥ ४७
ऋग्भिश्च सामभिः शैवैर्ब्रह्मभिश्चापि पञ्चभिः ।
स्नापयेद्देवदेवेशं शिवेन प्रणवेन च ॥ ४८
यथा देवस्य देव्याश्च कुर्य्यात् स्नानादिकं तथा ।
न तु कश्चिद्विशेषोऽस्ति तत्र तौ सदृशौ यतः ॥ ४९
प्रथमं देवमुद्दिश्य कृत्वा स्नानादिकाः क्रियाः ।
देव्यै पश्चात् प्रकुर्व्वीत देवदेवस्य शासनात् ॥ ५०

अर्द्धनारीश्वरे पूज्ये पौर्व्वापर्य्यञ्च विद्यते ।
तत्र तत्रोपचाराणां लिङ्गे वान्यत्र वा क्वचित् ॥ ५१
कृताभिषिक्तं लिङ्गाद्यं शुचिना च सुगन्धिना ।
संमृज्य वाससा दद्यादम्बरञ्चोपवीतकम् ॥ ५२
पाद्यमाचमनञ्चार्घ्यं गन्धपुष्पञ्च भूषणम् ।
धूपं दीपञ्च नैवेद्यं पानीयं मुखशोधनम् ॥ ५३
पुनश्चाचमनीयञ्च मुखवासं ततः परम् ।
मुकुटञ्च शुभं भद्रं सर्व्वरत्नैरलङ्कृतम् ॥ ५४
भूषणानि विचित्राणि माल्यानि विविधानि च ।
अञ्जनं चामरं छत्त्रं तालवृन्तञ्च दर्पणम् ॥ ५५
दत्त्वा नीराजनं कुर्य्यात् सर्व्वमङ्गलनिस्वनैः ।
गीतनृत्यादिभिश्चैव जयशब्दसमन्वितैः ॥ ५६
हैमे च राजते ताम्रे पात्रे वा मृण्मये शुभे ।
पद्मकैः शोभितैः पुष्पैर्वीजैर्दध्यक्षतादिभिः ॥ ५७
त्रिशूल-शङ्खयुग्माब्ज-नन्द्यावर्त्तैः करीषजैः ।
श्रीवत्स-स्वस्तिकादर्श-वज्रैर्वह्न्यादिचिह्नितैः ॥ ५८
अष्टौ प्रदीपान् परितो विधायैकन्तु मध्यतः ।
तेषु वामादिकाश्चिन्त्याः पूज्याश्च नव शक्तयः ॥ ५९
कवचेन समाच्छाद्य संरक्ष्यास्त्रेण सर्व्वतः ।
धेनुमुद्राञ्च सन्दर्श्य पाणिभ्यां पात्रमुद्धरेत् ॥ ६०
अथवारोपयेत् पात्रे पञ्च दीपान् यथाक्रमम् ।
विदिक्ष्वपि च मध्ये च दीपमेकमथापि वा ॥ ६१
ततस्तत्पात्रमुद्धृत्य लिङ्गादेरुपरि क्रमात् ।
त्रिः प्रदक्षिणयोगेन भ्रामयेन्मूलविद्यया ॥ ६२
दद्यादर्घ्यं ततो मूर्ध्नि भसितञ्च सुगन्धितम् ।
कृत्वा पुष्पाञ्जलिं पश्चादुपहारान् निवेदयेत् ॥ ६३
पानीयञ्च ततो दद्याद्दत्त्वा चाचमनं पुनः ।
पञ्चसौगन्धिकोपेतं ताम्बूलञ्च निवेदयेत् ॥ ६४
प्रोक्षयेत् प्रोक्षणीयानि गाननाट्यादि कारयेत् ।
लिङ्गादौ शिवयोश्चिन्तां कृत्वा शक्त्या जपेच्छिवम् ॥ ६५
प्रदक्षिणं प्रणामञ्च स्तवञ्चात्मसमर्पणम् ।
विज्ञापनञ्च कार्य्याणां कुर्य्याद्विनयपूर्व्वकम् ॥ ६६
अर्घ्यं पुष्पाञ्जलिं दत्त्वा बद्ध्वा मुद्रां यथाविधि ।
पश्चात् क्षमापयेद्देवमुद्वास्यात्मनि चिन्तयेत् ॥ ६७
पाद्यादि-मुखवासान्तमर्घ्याद्यञ्चातिसङ्कटे ।
पुष्पनिक्षेपमात्रं वा कुर्य्याद्भावपुरःसरम् ॥ ६८

तावतैव परो धर्म्मो भावेन सुकृतो भवेत् ।
असम्पूज्य न भुञ्जीत शिवमा प्राणसञ्चरात् ॥ ६९
यदि पापस्तु भुञ्जीत स्वैरं तस्य न निष्कृतिः ।
प्रमादेन तु भुक्तञ्चेत् तद्वुद्गीर्य्य प्रयत्नतः ॥ ७०
स्नात्वा द्विगुणमभ्यर्च्य देवं देवीमुपोष्य च ।
शिवस्यायुतमभ्यस्येद्ब्रह्मचर्य्यपुरःसरम् ॥ ७१
परेद्युः शक्तितो दत्त्वा सुवर्णाद्यं शिवाय च ।
शिवभक्ताय वा कृत्वा महापूजां शुचिर्भवेत् ॥ ७२
अनुक्तञ्चात्र पूजायाः क्रमलोपभयादिना ।
यत् तदन्यत् प्रवक्ष्यामि समासान्न तु विस्तरात् ॥ ७३
हविर्निवेदनात् पूर्व्वं दीपदानादनन्तरम् ।
कुर्य्यादावरणाभ्यार्च्चां प्राप्ते नीराजनेऽथवा ॥ ७४
तत्रेशानादि-सद्यान्तं हृदाद्यस्त्रान्तमेव च ।
शिवस्य च शिवायाश्च प्रथमावरणे यजेत् ॥ ७५
ईशान्यां पूर्व्वभागे च दक्षिणे चोत्तरे तथा ।
पश्चिमे च तथाग्नेय्यामैशान्यां निर्ऋतौ ततः ॥ ७६
वायव्यां पुनरीशान्यां चतुर्द्दिक्षु ततः परम् ।
गर्भावरणमाख्यातं मन्त्रसंघातमेव वा ॥ ७७
हृदयाद्यस्त्रपर्य्यन्तमथवापि समर्च्चयेत् ।
तद्वहिः पूर्व्वतः शक्रं यमं दक्षिणतो यजेत् ॥ ७८
वरुणं वारुणे भागे धनदञ्चोत्तरे बुधः ।
ईशमैशेऽनलं स्वीये नैर्ऋते निर्ऋतिं यजेत् ॥ ७९
मारुते मारुतं विष्णुं नैर्ऋते विधिमैश्वरे ।
वह्निः पद्मस्य वज्रादीन्यब्जान्तान्यायुधान्यपि ॥ ८०
प्रसिद्धरूपाण्याशासु लोकेशानां क्रमाद्यजेत् ।
देवं देवीञ्च सम्प्रेक्ष्य सर्व्वावरणदेवताः ॥ ८१
बद्धाञ्जलिपुटा ध्येयाः समासीना यथासुखम् ।
सर्व्वावरणदेवानां स्वाभिधानैर्नमोयुतैः ॥ ८२
पुष्पैः सम्पूजनं कुर्य्यान्नत्वा स्मृत्वा यथाक्रमम् ।
गर्भावरणमेवापि यजेत् स्वावरणेन वा ॥ ८३
योगी ध्याने जपे होमे वाह्ये वाभ्यन्तरेऽपि वा ।
हविश्च षड्विधं देयं शुद्धं मुद्गान्नमेव च ॥ ८४
पायसं दधिसंमिश्रं गौड़ञ्च मधुनाप्लुतम् ।
एतेष्वेकमनेकं वा नानाव्यञ्जनसंयुतम् ॥ ८५
गुड़खण्डान्वितं दद्यान्मथितं दधि चोत्तमम् ।
भक्ष्याण्यपूपमुख्यानि स्वादुमन्ति फलानि च ॥ ८६

एला-चन्दन-पुष्पाढ्यं पानीयञ्चातिशीतलम् ।
मृदुतैलरसात्तञ्च खण्डं पूगफलस्य च ॥ ८७
दलानि नागवल्ल्याश्च गौराणि च शिवानि च ।
शैलमेव सितं चूर्णं नातिरूक्षं न दूषितम् ॥ ८८
कर्पूरञ्चाथ कङ्कोलं जात्यादि च नवं शुभम् ।
आलेपनं चन्दनं स्यान्मूलकाष्ठरजोमयम् ॥ ८९
कस्तूरिका कुङ्कुमञ्च रसो मृगमदात्मकः ।
पुष्पाणि सुरभीण्येव पवित्राणि शुभानि च ॥ ९०
निर्गन्धान्युग्रगन्धानि दूषितान्युषितानि च ।
स्वयमेव विशीर्णानि नादेयानि शिवार्चने ॥ ९१
वासांसि च मृदून्येव नवानि च शुभानि च ।
दुकूलपट्टदेवाङ्गमयानि च सितानि च ॥ ९२
नवरत्नचितान्येव तपनीयमयानि च ।
विद्युद्वलयकल्पानि भूषणानि विशेषतः ॥ ९३
सर्वाण्येतानि कर्पूरनिर्यासागुरुचन्दनैः ।
प्रधूपितानि पुष्पौघैर्वासितानि समन्ततः ॥ ९४
चन्दनागुरु-कर्पूर-कुष्ठ-गुग्गुलुचूर्णकैः ।
घृतेन मधुना चैव सिद्धो धूपः प्रशस्यते ॥ ९५
कपिलासम्भवेनैव घृतेनापि सुगन्धिना ।
नित्यं प्रदीपिता दीपाः शस्ताः कर्पूरसंयुताः ॥ ९६
पञ्चगव्यञ्च मधुरं पयो दधि घृतं तथा ।
कपिलासम्भवं शम्भोरिष्टं स्नाने च पानकं ॥ ९७
आसनानि च भद्राणि गजदन्तमयानि च ।
सुवर्णरत्नचित्राणि चित्रास्तरणानि च ॥ ९८
मृदूपधानयुक्तानि सूक्ष्मतूलमयानि च ।
उच्चावचानि रम्याणि शयनानि सुखानि च ॥ ९९
नद्याः समुद्रगामिन्या नदाद्वाथः समाहृतम् ।
वस्त्रपूतञ्च शीतञ्च विशिष्टं स्नान-पानयोः ॥ १००
छत्रं शशिनिभं चारु मुक्तादामविराजितम् ।
नवरत्नचितं दिव्यं हेमदण्डमनोहरम् ॥ १०१
चामरे च सिते सूक्ष्मे चामीकरपरिष्कृते ।
राजहंसद्वयाकारे रत्नदण्डोपशोभिते ॥ १०२
दर्पणञ्चापि सुस्निग्धं दिव्यगन्धानुलेपनम् ।
समन्ताद्रत्नसञ्छन्नं स्रग्वरैश्चापि भूषितम् ॥ १०३
गम्भीरनिनदः शङ्खो हंसकुन्देन्दुसन्निभः ।
आस्यपृष्ठादिदेशेषु रत्नचामीकराञ्चितः ॥ १०४
काहलानि च रम्याणि नानानादकराणि च ।
सुवर्णनिर्मितान्येव मौक्तिकालङ्कृतानि च ॥ १०५
भेरी-मृदङ्ग-मुरज-तिमिच्छा-पटहादयः ।
समुद्रकल्पसन्नादाः कल्पनीयाः प्रयत्नतः ॥ १०६
भाण्डान्यपि च रम्याणि पात्राण्यपि च कृत्स्नशः ।
तदाधाराणि सर्वाणि सौवर्णान्येव धारयेत् ॥ १०७
आलयञ्च महेशस्य शिवस्य परमात्मनः ।
राजावसथवत् कल्प्यं शिल्पशास्त्रोक्तलक्षणम् ॥ १०८
उच्चप्राकारसम्भिन्नं भूधराकारगोपुरम् ।
अनेकरत्नसञ्छन्नं हेमद्वारकपाटकम् ॥ १०९
तप्तजाम्बूनदमयं रत्नस्तम्भशतावृतम् ।
मुक्तादामवितानाढ्यं विद्रुमद्वारतोरणम् ॥ ११०
चामीकरमयैर्दिव्यैर्मुकुटैः कुम्भलक्षणैः ।
अलङ्कृतशिरोभागमस्त्रराजेन चिह्नितैः ॥ १११
राजन्यार्हनिवासैश्च राजवीथ्यादिशोभितैः ।
प्रक्षिप्तप्रांशुशिखरैः प्रासादैश्च समन्ततः ॥ ११२
आस्थानस्थानवर्यैश्च स्थितैर्दिक्षु विदिक्षु च ।
अत्यन्तालङ्कृतप्रान्तमन्तरावरणैरिव ॥ ११३
उत्तमस्त्रीसहस्रैश्च नृत्यगीयविशारदैः ।
वेणुवीणाविदग्धैश्च पुरुषैर्बहुभिर्युतम् ॥ ११४
रक्षितं रक्षिभिर्वीरैर्गज-वाजि-रथान्वितैः ।
अनेकपुष्पवाटीभिरनेकैश्च सरोवरैः ॥ ११५
दीर्घिकाभिरनेकाभिर्दिग्विदिक्षु विराजितम् ।
वेदवेदाङ्गतत्त्वज्ञैः शिवशास्त्रपरायणैः ॥ ११६
शिवाश्रमरतैर्भक्तैः शिवशास्त्रोक्तलक्षणैः ।
शान्तैः स्मितमुखैः स्फीतैः सदाचारपरायणैः ॥ ११७
शैवैर्माहेश्वरैश्चैव श्रीमद्भिः सेवितं द्विजैः ।
एवमन्तर्बहिर्वाथ यथाशक्ति विनिर्मिते ॥ ११८
स्थाने शिलामये दान्ते दारवे चैष्टकामये ।
केवलं मृण्मये वापि पुण्यारण्येऽपि वा गिरौ ॥ ११९
नद्यां देवालयेऽन्यत्र देशे वाथ गृहे शुभे ।
आढ्यो वाथ दरिद्रो वा स्वकां शक्तिमवञ्चयन् ॥ १२०
द्रव्यैर्न्यायार्जितैरेव भक्त्या देवं समर्चयेत् ।
अथान्यायार्जितैश्चापि भक्त्या चेच्छिवमर्चयेत् ॥ १२१
न तस्य प्रत्यवायोऽस्ति भाववशो यतः प्रभुः ।
न्यायार्जितैरपि द्रव्यैरभक्त्या पूजयेद्यदि ॥ १२२

न तत्फलमवाप्नोति भक्तिरेवात्र कारणम् ।
भक्त्या वित्तानुसारेण शिवमुद्दिश्य यत् कृतम् ॥१२३
अल्पे महति वा तुल्यं फलमाढ्य-दरिद्रयोः ।
भक्त्या प्रचोदितः कुर्य्यादल्पवित्तोऽपि मानवः ॥ १२४
महाविभवसारोऽपि न कुर्य्याद्भक्तिवर्ज्जितः ।
सर्व्वस्वमपि यो दद्याच्छिवे भक्तिविवर्ज्जितः ॥ १२५
न तेन फलभाक् स स्याद्भक्तिरेवात्र कारणम् ।
न तत् तपोभिरत्युग्रैर्न च सर्व्वैर्महामखैः ॥ १२६
गच्छेच्छिवपुरं दिव्यं मुक्त्वा भक्तिं शिवात्मिकाम् ।
गुह्याद्गुह्यतरं कृष्ण सर्व्वत्र परमेश्वरे ॥ १२७
शिवे भक्तिर्न सन्देहस्तया युक्तो विमुच्यते ।
शिवमन्त्रजपो ध्यानं होमो यज्ञस्तपः श्रुतम् ॥ १२८
दानमध्ययनं सर्व्वं भावार्थं नात्र संशयः ।
भावहीनो नरः सर्व्वं कृत्वापि न विमुच्यते ॥ १२९
भावयुक्तः पुनः सर्व्वमकृत्वापि विमुच्यते ।
चान्द्रायणसहस्रैश्च प्राजापत्यशतैस्तथा ॥ १३०
मासोपवासैश्चान्यैश्च शिवभक्तस्य किं फलम् ।
अभक्ता मानवाश्चास्मिन् लोके गिरिगुहासु च ॥१३१
तपन्ति चाल्पभोगार्थं भक्तो भावेन मुच्यते ।
सात्त्विकं मुक्तिदं कर्म्म सत्त्वे वै योगिनः स्थिताः॥१३२
राजसं सिद्धिदं कुर्य्युः कर्म्मिणो रजसावृताः ।
असुरा राक्षसाश्चैव तमोगुणसमन्विताः ॥ १३३
ऐहिकार्थं यजन्तीशं नराश्चान्येऽपि तादृशाः ।
तामसं राजसं वापि सात्त्विकं भावमेव वा ॥ १३४
आश्रित्य भक्त्या पूजाद्यं कुर्व्वन् भद्रं समश्नुते ।
यतः पापार्णवात् त्रातुं भक्तिर्नौरिव निर्म्मिता ॥१३५
तस्माद्भक्त्युपपन्नस्य रजसा तमसा च किम् ।
अन्त्यजो वाधमो वापि मूर्खो वा पतितोऽपि वा १३६
शिवं प्रपन्नश्चेत् कृष्ण पूज्यः सर्व्वसुरासुरैः ।
तस्मात् सर्व्वप्रयत्नेन भक्त्यैव शिवमर्च्चयेत् ॥ १३७
अभक्तानां क्वचिदपि फलं नास्ति यतस्ततः ।
वक्ष्याम्यतिरहस्यं ते शृणु कृष्ण वचो मम ॥ १३८
वेदैः शास्त्रैर्वेदविद्भिर्विचार्य्य सुविनिश्चितम् ।
ब्रह्मघ्नो वा सुरापो वा स्तेयी वा गुरुतल्पगः ॥ १३९
मातृहा पितृहा वापि वीरहा भ्रूणहापि वा ।
सम्पूज्यामन्त्रकं भक्त्या शिवं परमकारणम् ॥ १४०

तैस्तैः पापैर्विमुच्येत वर्षैर्द्वादशभिः क्रमात् ।
तस्मात् सर्व्वप्रयत्नेन पतितोऽपि यजेच्छिवम् ॥ १४१
भक्तश्चेन्नापरः कश्चिद्भिक्षाहारो जितेन्द्रियः ।
कृत्वापि सुमहत् पापं भक्त्या पञ्चाक्षरेण तु ॥ १४२
पूजयेद्यदि देवेशं तस्मात् पापात् प्रमुच्यते ।
अब्भक्षा वायुभक्षाश्च ये चान्ये व्रतकर्शिताः ॥ १४३
तेषामेतैर्व्रतैर्नास्ति शिवलोकसमागमः ।
भक्त्या पञ्चाक्षरेणैव यः शिवं सकृदर्च्चयेत् ॥ १४४
सोऽपि गच्छेच्छिवस्थानं शिवमन्त्रस्य गौरवात् ।
तस्मात् तपांसि यज्ञाश्च सर्व्वे सर्व्वस्वदक्षिणाः ॥१४५
शिवमूर्त्त्यर्च्चनस्यैते कोट्यंशेनापि नो समाः ।
बद्धो वाप्यथ मुक्तो वा पाशात् पञ्चाक्षरेण चेत् ॥१४६
पूजयन्मुच्यते भक्तो नात्र कार्य्या विचारणा ।
अरुद्रो वा सरुद्रो वा सूक्तेन शिवमर्च्चयेत् ॥ १४७
यः सकृत् पतितो वापि मूढो वा मुच्यते नरः ।
षडक्षरेण वा नित्यं तथा पञ्चाक्षरेण वा ॥ १४८
सब्रह्माङ्गेण वा तेन सहंसेन विमुच्यते ।
तस्मान्नित्यं शिवं भक्त्या सूक्तमन्त्रेण पूजयेत् ॥१४९
शिवभक्तो जितक्रोधो ह्यलब्धो लब्ध एव च ।
अलब्धाल्लब्ध एवात्र विशिष्टो नात्र संशयः ॥ १५०
तस्माल्लब्ध्वैव देवेशं सूक्तमन्त्रेण पूजयेत् ।
एककालं द्विकालं वा त्रिकालं नित्यमेव वा ॥ १५१
येऽर्च्चयन्ति महादेवं विज्ञेयास्ते गणेश्वराः ।
ज्ञानेनात्मसहायेन नार्च्चितो भगवान् शिवः ॥ १५२
स चिरं संसरत्यस्मिन् संसारे दुःखसागरे ।
दुर्लभं प्राप्य मानुष्यं मूढो नार्च्चयते शिवम् ॥ १५३
निष्फलं तस्य तज्जन्म मोक्षाय न भवेद्यतः ।
दुर्लभं प्राप्य मानुष्यं येऽर्च्चयन्ति पिनाकिनम् ॥१५४
तेषां हि सफलं जन्म कृतार्थास्ते नरोत्तमाः ।
भवभक्तिपरा ये च भवप्रणतचेतसः ॥ १५५
भवसंस्मरणोद्युक्ता न ते दुःखस्य भागिनः ।
भवनानि मनोज्ञानि विभ्रमाभरणाः स्त्रियः ॥ १५६
धनञ्चातृप्तिपर्य्यन्तं शिवपूजाविधेः फलम् ।
ये वाञ्छन्ति महाभोगान् राज्यञ्च त्रिदशालये ॥१५७
ते वाञ्छति सदा कालं हरस्य चरणाम्बुजम् ।
सौभाग्यं कान्तिमद्रूपं सत्त्वं त्यागार्द्रभावता ॥ १५८

शौर्यञ्च जगति ख्यातिः शिवमर्च्चयतो भवेत् ।
तस्मात् सर्व्वं परित्यज्य शिवैकाहितमानसः ॥ १५९
शिवपूजाविधिं कुर्य्याद्यदीच्छेच्छिवमात्मनः ।
त्वरितं जीवितं याति त्वरितं याति यौवनम् ॥ १६०
त्वरितं व्याधिरभ्येति तस्मात् पूज्यः पिनाकधृक् ।
यावन्नायाति मरणं यावन्नाक्रमते जरा ॥ १६१
यावन्नेन्द्रियवैकल्यं तावत् पूजय शङ्करम् ।
न शिवार्च्चनतुल्योऽस्ति धर्म्मोऽन्यो भुवनत्रये ॥ १६२
इति विज्ञाय यत्नेन पूजनीयः सदाशिवः ।
द्वारयागञ्च वनिकां परिवारबलिक्रियाम् ॥ १६३
नित्योत्सवञ्च कुर्व्वीत प्रासादे यदि पूजयेत् ।
हविर्निवेदनादूर्द्ध्वं स्वयञ्चानुचरोऽपि वा ॥ १६४
प्रासादपरिवारेभ्यो बलिं दद्याद्यथाक्रमम् ।
निर्गम्य सह वादित्रैस्तद्दिशाभिमुखः स्थितः ॥ १६५
पुष्पं धूपञ्च दीपञ्च दद्यादन्नं जलैः सह ।
ततो दद्यान्महापीठे तिष्ठन् बलिमुदङ्मुखः ॥ १६६
ततो निवेदितं देवे यत्तदन्नादिकं पुरा ।
तत् सर्व्वं सावशेषं वा चण्डाय विनिवेदयेत् ॥ १६७
हुत्वा च विधिवत् पश्चात् पूजाशेषं समापयेत् ।
कृत्वा प्रयोगं विधिवद्यावन्मन्त्रं जपं ततः ॥ १६८
नित्योत्सवं प्रकुर्व्वीत यथोक्तं शिवशासने ।
विपुले तैजसे पात्रे रत्नपद्मोपशोभिते ॥ १६९
अस्त्रं पाशुपतं दिव्यं तत्रावाह्य समर्च्चयेत् ।
शिरस्यारोप्य तत् पात्रं द्विजस्यालङ्कृतस्य च ॥ १७०
न्यस्तास्त्रवपुषा तेन दीप्तयष्टिधरस्य च ।
प्रासादपरिवारेभ्यो वह्निर्मङ्गलनिस्वनैः ॥ १७१
नृत्यगेयादिभिश्चैव सह दीपध्वजादिभिः ।
प्रदक्षिणत्रयं कृत्वा न द्रुतं न विलम्बितम् ॥ १७२
महापीठं समावृत्य त्रिःप्रदक्षिणयोगतः ।
पुनः प्रविष्टो द्वारस्थो यजमानः कृताञ्जलिः ॥ १७३
आदायाभ्यन्तरं नीत्वा ह्यस्त्रमुद्वासयेत् ततः ।
प्रदक्षिणादिकं कृत्वा यथा पूर्व्वोदितं क्रमात् ।
प्रदाय चाष्टपुष्पाणि पूजामथ समापयेत् ॥ १७४

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे शिवपूजाविधिर्नाम
विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः ।

उपमन्युरुवाच ।

अथाग्निकार्य्यं वक्ष्यामि कुण्डे वा स्थण्डिलेऽपि वा ।
वेद्यां वा ह्यायसे पात्रे मृण्मये वा नवे शुभे ॥ १
आधायाग्निं विधानेन संस्कृत्य च ततः परम् ।
तत्राराध्य महादेवं होमकर्म्म समाचरेत् ॥ २
कुण्डं द्विहस्तमानं वा हस्तमात्रमथापि वा ।
वृत्तं वा चतुरस्रं वा कुर्य्याद्वेदीञ्च मण्डलम् ॥ ३
कुण्डं विस्तारवन्निम्नं तन्मध्येऽष्टदलाम्बुजम् ।
चतुरङ्गुलमुत्सेधं तस्य द्व्यङ्गुलमेव वा ॥ ४
वितस्तिद्विगुणोन्नत्या नाभिमन्तः प्रचक्षते ।
मध्यञ्च मध्यमाङ्गुल्या मध्यमोत्तमपर्व्वणोः ॥ ५
अङ्गुलिः कथ्यते सद्भिस्तच्चतुर्व्विंशतिः करः ।
मेखलानां त्रयं वापि द्वयमेकमथापि वा ॥ ६
यथाशोभं प्रकुर्व्वीत श्लक्ष्णमिष्टं मृदा स्थिरम् ।
अश्वत्थपत्रवद्योनिं गजाधरवदेव वा ॥ ७
मेखलामध्यतः कुर्य्यात् पश्चिमे दक्षिणेऽपि वा ।
शोभनामग्रतः किञ्चिन्निम्नामुन्मीलिकां शनैः ॥ ८
अग्रेण कुण्डाभिमुखीं किञ्चिदुत्सृज्य मेखलाम् ।
नोत्सेधनियमो वेद्याः सा माद्दीं वाथ सैकती ॥ ९
मण्डलं गोशकृत्तोयैर्मानं पात्रस्य नोदितम् ।
कुण्डञ्च मृण्मयीं वेदीमालिपेद्गोमयाम्बुना ॥ १०
प्रक्षाल्य तापयेत् पात्रं प्रोक्षयेदन्यदम्भसा ।
स्वसूत्रोक्तप्रकारेण कुण्डादौ विलिखेत् ततः ॥ ११
सम्प्रोक्ष्य कल्पयेद्दर्भैः पुष्पैर्वा वह्निविष्टरम् ।
अर्च्चनार्थञ्च होमार्थं सर्व्वद्रव्याणि साधयेत् ॥ १२
प्रक्षाल्य क्षालनीयानि प्रोक्षण्याप्रोक्ष्य शोधयेत् ।
मणिजं काष्ठजं वाथ श्रोत्रियागारसम्भवम् ॥ १३
अन्यं वा गर्हितं वह्निं ततः साधारमानयेत् ।
त्रिः प्रदक्षिणमावृत्य कुण्डादेरुपरि क्रमात् ॥ १४
वह्निवीजं समुच्चार्य्य त्वादधीताग्निमासने ।
योनिमार्गेण वा तद्वदात्मनः सम्मुखेन वा ॥ १५
योनिप्रदेशगः सर्व्वं कुण्डे कुर्य्याद्विचक्षणः ।
स्वनाभ्यन्तःस्थितं वह्निं तद्रन्ध्राद्विस्फुलिङ्गवत् ॥ १६
निर्गम्य पावके वाह्ये लीनं विम्बाकृतिं स्मरेत् ।

आज्यसंस्कारपर्य्यन्तमन्वाधानपुरःसरम् ॥ १७
स्वसूत्रोक्तक्रमात् कुर्य्यान्मूलमन्त्रेण मन्त्रवित्।
शिवमूर्त्तिं समभ्यर्च्च्य ततो दक्षिणपार्श्वतः ॥ १८
न्यस्य मन्त्रं घृते मुद्रां दर्शयेद्धेनुसंज्ञिताम्।
स्रुक्स्रुवौ तैजसौ ग्राह्यौ न कांस्यायससैसकौ ॥ १९
यज्ञदारुमयौ वापि स्मार्त्तौ वा शिल्पसम्मतौ।
पर्णं वा ब्रह्मवृक्षादेरच्छिद्रे मध्य उत्थिते ॥ २०
संमृज्य दर्भैस्तौ वह्नौ सन्ताप्य प्रोक्षयेत् पुनः।
परिषिच्य स्वसूत्रोक्तक्रमेण शिवपूर्व्वकैः ॥ २१
जुहुयादष्टभिर्बीजैरग्निसंस्कारसिद्धये।
भ्रुं स्तुं ब्रुं श्रुं क्रमेणैव पुं ड्रुं द्रुमित्यतः परम् ॥ २२
बीजानि सप्त सप्तानां जिह्वानामनुपूर्व्वशः।
विशिखा मध्यमा जिह्वा वह्नरूपसमाह्वया ॥ २३
तस्याः शिखैका दक्षिणतो ज्वलन्ती वामतः परा।
हिरण्या प्रागुदग्जिह्वा कनका पूर्व्वतः स्थिता ॥ २४
रक्ताग्नेयी नैरृती च कृष्णान्या सुप्रभा मता।
अतिरक्ता मरुज्जिह्वा स्वनामानुगुणप्रभा ॥ २५
स्वबीजानन्तरं वाच्याः स्वाहान्ताश्च यथाक्रमम्।
जिह्वामन्त्रैस्तु तैर्हुत्वा जिह्वास्वेकैकशः क्रमात् ॥ २६
रं वह्नये च स्वाहेति मध्ये हुत्वाहुतित्रयम्।
सर्पिषा वा समिद्भिर्वा परिषेचनमाचरेत् ॥ २७
एवं कृते शिवाग्निः स्यात् स्मरेत् तत्र शिवासनम्।
तत्रावाह्य यजेद्देवमर्द्धनारीश्वरं शिवम् ॥ २८
दीपान्तं परिषिच्याथ समिद्धोमं समाचरेत्।
ताः पालाशपरा वापि यज्ञिया द्वादशाङ्गुलाः॥२९
अवक्रा न स्वयंशुष्काः सत्वचो निर्व्रणाः समाः।
दशाङ्गुला वा विहिताः कनिष्ठाङ्गुलिसम्मिताः ॥ ३०
प्रादेशमात्रा वालाभे होतव्याः सकला अपि।
दूर्व्वांपत्रसमाकारां चतुरङ्गुलमायताम् ॥ ३१
दद्यादाज्याहुतिं पश्चादन्नमक्षप्रमाणतः।
लाजांस्तथा सर्षपांश्च यवांश्चैव तिलांस्तथा ॥ ३२
सर्पिषाक्तानि भक्ष्याणि लेह्य-चोष्याणि सम्भवे।
दशैवाहुतयस्तत्र पञ्च वा तिस्र एव वा ॥ ३३
होतव्याः शक्तितो दद्यादेकामेवाथवाहुतिम्।
स्रुवेणाज्यं समित् पाण्या स्रुचा शेषान् करेण वा॥३४
तत्र दिव्येन होतव्यं तीर्थेनार्षेण वापि च।
द्रव्येणैकेन वालाभे जुहुयाच्छ्रद्धया पुनः ॥ ३५
प्रायश्चित्ताय जुहुयान्मन्त्रयित्वाहुतित्रयम्।
ततो होमावशिष्टेन घृतेनापूर्य्य वै स्रुचम् ॥ ३६
निधाय पुष्पं तस्याग्रे स्रुवेणाधोमुखेन ताम्।
सदर्भेण समाच्छाद्य मूलेनाञ्जलिनोत्थितः ॥ ३७
वौषडन्तेन जुहुयाद्धारान्तु यवसम्मिताम्।
इत्थं पूर्णाहुतिं कृत्वा परिषिञ्चेच्च पूर्व्ववत् ॥ ३८
तत उद्वास्य देवेशं गोपयेत् तु हुताशनम्।
तमप्युद्वास्य वा नाभौ यजेत् सन्धाय नित्यशः ॥ ३९
अथवा वह्निमानीय शिवशास्त्रोक्तवर्त्मना।
वागीशीगर्भसम्भूतं संस्कृत्य विधिवद्यजेत् ॥ ४०
अन्वाधानं पुरः कृत्वा परिधीन् परिधाय च।
पात्राणि द्वन्द्वरूपेण निक्षिप्येष्ट्वा शिवं तथा ॥ ४१
संशोध्य प्रोक्षणीपात्रं प्रोक्ष्यान्यानि तदम्भसा।
प्रणीतापात्रमैशान्यां विन्यस्यापूरितं जलैः ॥ ४२
आज्यसंस्कारपर्य्यन्तं कृत्वा संशोध्य स्रुक्स्रुवौ।
गर्भाधानं पुंसवनं सीमन्तोन्नयनं ततः ॥ ४३
कृत्वा पृथक् पृथग्हुत्वा जातमग्निं विचिन्तयेत्।
त्रिपादं सप्तहस्तञ्च चतुःशृङ्गं द्विशीर्षकम् ॥ ४४
मधुपिङ्गत्रिनयनं सकपर्द्देन्दुशेखरम्।
रक्तं रक्ताम्बरालेप-माल्यभूषणभूषितम् ॥ ४५
सर्व्वलक्षणसम्पन्नं सोपवीतं त्रिमेखलम्।
शक्तिमन्तं स्रुक्स्रुवौ च दधानं दक्षिणैः करैः ॥ ४६
तोमरं तालवृन्तञ्च घृतपात्रं तथेतरैः।
जातं ध्यात्वैवमाकारं जातकर्म्म समाचरेत् ॥ ४७
नालापनयनं कृत्वा ततः संशोध्य सूतकम्।
शिवाग्ने रुचिनामास्य कृत्वाहुतिपुरःसरम् ॥ ४८
पित्रोर्विसर्ज्जनं कृत्वा चौलोपनयनादिकम्।
आप्तोर्यामावसानान्तं कृत्वा संस्कारमस्य तु ॥ ४९
इध्माघारादिहोमञ्च कृत्वा स्विष्टकृतं ततः।
रुमित्यनेन बीजेन परिषिञ्चेत् ततः परम् ॥ ५०
ब्रह्म-विष्णु-शिवेशानां लोकेशानां तथैव च।
तदस्त्राणाञ्च परितः कृत्वा पूजां यथाक्रमम् ॥ ५१
धूपदीपादिसिद्ध्यर्थं वह्निमुद्धृत्य कृत्यवित्।
साधयित्वाज्यपूर्व्वाणि द्रव्याणि पुनरेव च ॥ ५२
कल्पयित्वासनं वह्नौ तत्रावाह्य यथा पुरा।

सम्पूज्य देवं देवीञ्च ततः पूर्णान्तमाचरेत् ॥ ५३
अथवा स्वाश्रमोक्तान्तु वह्निकर्म्म शिवार्पणम् ।
कुर्य्या शिवाश्रमी कुर्य्यान्न च तत्रापरो विधिः ॥ ५४
शिवाग्नेर्भस्म संग्राह्यमग्निहोत्रोद्भवन्तु वा ।
वैवाहाग्निभवञ्चापि पक्वं शुचि सुगन्धि च ॥ ५५
कपिलायाः शकृच्छस्तं गृहीतं गगनेऽपतत् ।
न क्लिन्नं नातिकठिनं न दुर्गन्धं न शोषितम् ॥ ५६
उपर्य्यधः परित्यज्य गृह्णीयात् पतितं यदि ।
पिण्डीकृत्य शिवाग्न्यादौ तत् क्षिपेन्मूलमन्त्रतः ॥ ५७
अपक्वमतिपक्वञ्च सन्त्यज्य भसितं सितम् ।
आदाय वा समालोड्य भस्माधारे विनिक्षिपेत् ॥ ५८
सुकृते सुदृढ़े शुद्धे क्षालिते प्रोक्षिते शुभे ।
विन्यस्तमन्त्रे मन्त्रेण पात्रे भस्म विनिक्षिपेत् ॥ ५९
तैजसं दारवं वापि मृण्मयं शैलमेव च ।
अन्यद्वा शोभनं शुद्धं भस्माधारं प्रकल्पयेत् ॥ ६०
समे देशे शुभे शुद्धे धनवद्भस्म निक्षिपेत् ।
प्रस्थितो भस्म गृह्णीयात् स्वयञ्चानुचरोऽपि वा ॥ ६१
न चायुक्तकरे दद्यान्नैवाशुचितले क्षिपेत् ।
न संस्पृशेच्च नीचाङ्गैर्नोपेक्षेत न लङ्घयेत् ॥ ६२
तस्माद्भसितमादाय विनियुञ्जीत मन्त्रतः ।
कालेषूक्तेषु नान्यत्र नायोग्येभ्यः प्रदापयेत् ॥ ६३
भस्मसंग्रहणं कुर्य्याद्देवेऽनुद्वासिते सति ।
उद्वासने कृते यस्माच्चण्डभस्म प्रजायते ॥ ६४
अग्निकार्य्ये कृते पश्चाच्छिवशास्त्रोक्तमार्गतः ।
स्वसूत्रोक्तप्रकाराद्वा बलिकर्म्म समाचरेत् ॥ ६५
अथ विद्यासनं न्यस्य सुप्रलिप्ते तु मण्डले ।
विद्याकोशं प्रतिष्ठाप्य यजेत् पुष्पादिभिः क्रमात्॥६६
विद्यायाः पुरतः कृत्वा गुरोरपि च मण्डलम् ।
तत्रासनवरं कृत्वा पुष्पाद्यैर्गुरुमर्च्चयेत् ॥ ६७
ततोऽनुपूजयेत् पूज्यान् भोजयेच्च बुभुक्षितान् ।
ततः स्वयञ्च भुञ्जीत शुद्धमन्नं यथासुखम् ॥ ६८
निवेदितञ्च वा देवे तच्छेषञ्चात्मशुद्धये ।
श्रद्दधानो न लोभेन न चण्डाय समर्पितम् ॥ ६९
गन्धमाल्यादि यच्चान्यत् तत्राप्येष समो विधिः ।
तत्र तत्र शिवोऽस्मीति बुद्धिं कुर्य्याद्विचक्षणः ॥ ७०
भुक्त्वाचम्य शिवं ध्यात्वा हृदये मूलमुच्चरेत् ।
कालशेषं नयेद्युग्यैः शिवशास्त्रकथादिभिः ॥ ७१
रात्रौ व्यतीते पूर्व्वांशे कृत्वा पूजां मनोहराम् ।
शिवयोः शयनन्त्वेकं कल्पयेदतिशोभनम् ॥ ७२
भक्ष्यभोज्याम्बरालेप-पुष्पमालादिकं तथा ।
मनसा कर्म्मणा वापि कृत्वा सर्व्वं मनोहरम् ॥ ७३
ततो देवस्य देव्याश्च पादमूले शुचिः स्वपेत् ।
गृहस्थो भार्य्यया सार्द्धं तदन्योऽपि तु केवलः ॥ ७४
प्रत्यूषसमये बुद्ध्वा मन्त्रमाद्यमुदीरयेत् ।
प्रणम्य मनसा देवं साम्बं सगणमव्ययम् ॥ ७५
देशकालोचितं कृत्वा शौचाद्यमपि शक्तितः ।
शङ्खादिनिनदैर्दिव्यैर्देवं देवीञ्च बोधयेत् ॥ ७६
ततस्तत्समयोन्निद्रैः पुष्पैरतिसुगन्धिभिः ।
निर्व्वर्त्त्य शिवयोः पूजां प्रारभेत पुरोदितम् ॥७७

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे होमादिविधिकथनं नाम
एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ।

उपमन्युरुवाच ।

अतः परं प्रवक्ष्यामि शिवाश्रमनिषेविणाम् ।
शिवशास्त्रोक्तमार्गेण नैमित्तिकविधिक्रमम् ॥ १
सर्व्वेष्वपि च मासेषु पक्षयोरुभयोरपि ।
अष्टम्याञ्च चतुर्द्दश्यां तथा पर्व्वणि च क्रमात् ॥ २
अयने विषुवे चैव ग्रहणेषु विशेषतः ।
कर्त्तव्या महती पूजा ह्यधिका वापि शक्तितः ॥ ३
मासि मासि यथान्यायं ब्रह्मकूर्च्चं प्रसाध्य तु ।
स्नापयित्वा शिवं तेन पिबेच्छेषमुपोषितः ॥ ४
ब्रह्महत्यादिदोषाणामतीव महतामपि ।
निष्कृतिर्ब्रह्मकूर्च्चस्य पानान्नान्या विशिष्यते ॥ ५
पौषे तु पुष्यनक्षत्रे कुर्य्यान्नीराजनं विभोः ।
माघे मघाख्ये नक्षत्रे प्रदद्याद्घृतकम्बलम् ॥ ६
फाल्गुने चोत्तरान्ते वै प्रारभेत महोत्सवम् ।
चैत्रे चित्रापौर्णमास्यां दोलां कुर्य्याद्यथाविधि ॥७
वैशाखेऽपि च वैशाख्यां कुर्य्यात् पुष्पमहालयम् ।
ज्यैष्ठे मूलाख्यनक्षत्रे शीतकुम्भं प्रदापयेत् ॥ ८

आषाढ़े चोत्तराषाढ़ पवित्रारोपणं तथा।
श्रावणी प्राकृतान्यानि मण्डलानि प्रकल्पयेत् ॥ ९
श्रविष्ठाख्ये तु नक्षत्रे प्रोष्ठपद्यां ततः परम्।
प्रोद्दयेच्च जलक्रीड़ां पूर्वाषाढ़ाश्रये दिने ॥ १०
आश्वयुज्यां ततो दद्यात् पायसञ्च नवौदनम्।
अग्निकार्य्यञ्च तेनैव कुर्य्याच्छतभिषग्दिने ॥ ११
कार्त्तिक्यां कृत्तिकायोगे दद्याद्दीपसहस्रकम्।
मार्गशीर्षे तथार्द्रायां घृतेन स्नापयेच्छिवम् ॥ १२
अशक्तस्तेषु कालेषु कुर्य्यादुत्सवमेव वा।
आस्थानं वा महापूजामधिकं वा समर्च्चनम् ॥ १३
प्रवृत्तेऽपि च कल्याणे प्रशस्तेष्वपि कर्मसु।
दौर्म्मनस्ये दुराचारे दुःस्वप्ने दुष्टदर्शने ॥ १४
उत्पाते वा शुभेऽन्यस्मिन् रोगे वा प्रबलेऽथवा।
स्नान-पूजा-जप-ध्यान-होम-दानादिकाः क्रियाः॥१५
निमित्तानुगुणाः कार्य्याः पूरश्चरणपूर्व्विकाः।
शिवानले च विहृते पुनः सन्धानमाचरेत् ॥ १६
य एवं शिवधर्म्मिष्ठो वर्त्तते नित्यमुद्यतः।
तस्यैकजन्मना मुक्तिं प्रयच्छति महेश्वरः ॥ १७
एतद्द्वयथोत्तरं कुर्य्यान्नित्यनैमित्तिकेषु यः।
दिव्यं श्रीकण्ठनाथस्य स्थानमाद्यं स गच्छति ॥ १८
तत्र भुक्त्वा महाभोगान् कल्पकोटिशतं नरः।
कालान्तरे च्युतस्तस्मादोमं कौमारमेव च ॥ १९
सम्प्राप्य वैष्णवं ब्राह्मं रुद्रलोकं विशेषतः।
तत्रोषित्वा चिरं कालं भुक्त्वा भोगान्यथेप्सितान् ॥२०
पुनश्चोर्द्ध्वं गतस्तस्मादतीत्य स्थानपञ्चकम्।
श्रीकण्ठाज्ज्ञानमासाद्य परं शिवपुरं व्रजेत् ॥ २१
अर्द्धचर्य्यारतस्यापि द्विरावृत्त्यैवमेव तु।
पश्चाज्ज्ञानं समासाद्य शिवसायुज्यमाप्नुयात् ॥ २२
अर्द्धार्द्धचरितो यस्तु देही देहक्षयात् परम्।
अण्डान्तं बौद्धमव्यक्तमतीत्य भुवनद्वयम् ॥ २३
सम्प्राप्य पौरुषं रौद्रं स्थानमष्टौन्द्रजापतेः।
अनेकयुगसाहस्रं भुक्त्वा भोगाननेकधा ॥ २४
पुण्यक्षये क्षितिं प्राप्य कुले महति जायते।
तत्रापि पूर्व्वसंस्कार-वशेन स महाद्युतिः ॥ २५
पशुधर्म्मान् परित्यज्य शिवधर्म्मरतो भवेत्।
तद्धर्म्मगौरवादेव ध्यात्वा शिवपुरं व्रजेत् ॥ २६
भोगांश्च विविधान् भुक्त्वा विद्येश्वरपदं व्रजेत्।
तत्र विद्येश्वरैः सार्द्धं भुक्त्वा भोगान् बहून् क्रमात्॥२७
अण्डस्यान्तर्वहिर्व्वाथ सकृदावर्त्तते पुनः।
ततो लब्ध्वा शिवज्ञानं परां भक्तिमवाप्य च ॥ २८
शिवसाधर्म्म्यमासाद्य न भूयो विनिवर्त्तते।
यस्त्वतीव शिवासक्तो विषयासक्तचित्तवत् ॥ २९
शिवधर्म्मानसौ कुर्व्वन्नकुर्वन् वापि मुच्यते।
एकावृत्तो द्विरावृत्तस्त्रिरावृत्तो निवर्त्तकः ॥ ३०
न पुनश्चक्रावृत्तः स्याच्छिवधर्म्माधिकारवान्।
तस्माच्छिवाश्रितो भूत्वा येन केनापि हेतुना ॥ ३१
शिवधर्म्मे मतिं कुर्य्याच्छ्रेयसे चेत् कृतोद्यमः।
नात्र निर्व्वन्धयिष्यामो वयं कञ्चन केनचित् ॥ ३२
निर्व्वन्धोऽप्यत्र पापेभ्यः प्रकृत्यैव न रोचते।
रोचते वा परेभ्यस्तु पुण्यसंस्कारगौरवात् ॥ ३३
संसारकारणं ह्येषां न प्ररोढुमलं भवेत्।
प्रकृत्यनुगुणं तस्माद्विमृश्यैतदशेषतः ॥ ३४
शिवधर्म्मेऽधिकुर्व्वीत यदीच्छेच्छिवमात्मनः ॥ ३५

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः।

श्रीकृष्ण उवाच।

भगवंस्त्वन्मुखादेव श्रुतं श्रुतिसमं मया।
स्वाश्रितानां शिवप्रोक्तं नित्यं नैमित्तिकं तथा ॥ १
इदानीं श्रोतुमिच्छामि शिवधर्म्माधिकारिणाम्।
काम्यमप्यस्ति चेत् कर्म्म वक्तुमर्हसि साम्प्रतम् ॥ २

उपमन्युरुवाच।

अस्त्यैहिकफलं किञ्चिदामुष्मिकफलं तथा।
ऐहिकामुष्मिकञ्चापि तच्च पञ्चविधं पुनः ॥ ३
किञ्चित् क्रियामयं कर्म्म किञ्चित् कर्म्म तपोमयम्।
जप-ध्यानमयं किञ्चित् किञ्चित् सर्व्वमयं तथा ॥ ४
क्रियामयं तथा भिन्नं होमदानार्च्चनक्रमात्।
सर्व्वं शक्तिमतामेव नान्येषां सफलं भवेत् ॥ ५
शक्तिश्चाज्ञा महेशस्य शिवस्य परमात्मनः।
तस्मात् काम्यानि कर्म्माणि कुर्य्यादाज्ञाधरो द्विजः॥६

अथ वक्ष्यामि काम्यानामिहामुत्र फलप्रदम् ।
शैवैर्माहेश्वरैश्चैव कार्य्यमन्तर्वहिःक्रमात् ॥ ७
शिवो महेश्वरश्चेति नात्यन्तमिह भिद्यते ।
यथा तथा न भिद्यन्ते शैवा माहेश्वरा अपि ॥ ८
शिवाश्रितेषु ते शैवा ज्ञानयज्ञरता नराः ।
माहेश्वराः समाख्याताः कर्म्मयज्ञरता भुवि ॥ ९
तस्मादभ्यन्तरे कुर्य्युः शैवा माहेश्वरा वहिः ।
नातिप्रयोगो भिद्येत वक्ष्यमाणस्य कर्म्मणः ॥ १०
परीक्ष्य भूमिं विधिवद्गन्ध-वर्ण-रसादिभिः ।
मनोऽभिलषिते तत्र वितानविततामम्बरे ॥ ११
सुप्रलिप्ते महीपृष्ठे दर्पणोदरसन्निभे ।
प्राचीमुत्पादयेत् पूर्व्वं शास्त्रदृष्टेन वर्त्मना ॥ १२
एकहस्तं द्विहस्तं वा मण्डलं परिकल्पयेत् ।
आलिखेदिमलं पद्ममष्टपत्रं सकर्णिकम् ॥ १३
रत्नहेमादिभिश्चूर्णैर्यथासम्भवसम्भृतैः ।
पञ्चावरणसंयुक्तं बहुशोभासमन्वितम् ॥ १४
दलेषु सिद्धयः कल्प्याः केशरेषु सशक्तिकाः ।
रुद्रा वामादयस्त्वष्टौ पूर्व्वादिदलतः क्रमात् ॥ १५
कर्णिकायाञ्च वैराग्यं वीजेषु नव शक्तयः ।
कन्दे शिवात्मको धर्म्मो नाले ज्ञानं शिवात्मकम् ॥१६
कर्णिकोपरि वाह्नेयं मण्डलं सौरमैन्दवम् ।
शिवविद्यात्मतत्त्वाख्यं तत्त्वत्रयमतः परम् ॥ १७
सर्व्वासनोपरि सुखं विचित्रकुसुमान्वितम् ।
पञ्चावरणसंयुक्तं पूजयेदम्बया सह ॥ १८
शुद्धस्फटिकसङ्काशं जटामुकुटभूषितम् ।
शार्दूलचर्म्मवसनं किञ्चित्स्मितमुखाम्बुजम् ॥ १९
रक्तपद्मदलप्रख्य-पादपाणितलाधरम् ।
सर्व्वलक्षणसम्पन्नं सर्व्वाभरणभूषितम् ॥ २०
दिव्यायुधवरैर्युक्तं दिव्यगन्धानुलेपनम् ।
पञ्चवक्त्रं दशभुजं चन्द्रखण्डशिखामणिम् ॥ २१
अस्य पूर्व्वमुखं सौम्यं बालार्कसदृशप्रभम् ।
त्रिलोचनारविन्दाढ्यं कृतबालेन्दुशेखरम् ॥ २२
दक्षिणं नीलजीमूत-समानरुचिरप्रभम् ।
भ्रुकुटीकुटिलं घोरं रक्तवृत्तेक्षणत्रयम् ॥ २३
दंष्ट्राकरालं दुर्द्धर्षं स्फुरिताधरपल्लवम् ।
उत्तरं विद्रुमप्रख्यं नीलालकविभूषितम् ॥ २४
सविलासं त्रिनयनं चन्द्राभरणशेखरम् ।
पश्चिमं पूर्णचन्द्राभं लोचनत्रितयोज्ज्वलम् ॥ २५
चन्द्ररेखाधरं सौम्यं मन्दस्मितमनोहरम् ।
पञ्चमं स्फटिकप्रख्यमिन्दुरेखासमुज्ज्वलम् ॥ २६
अतीव सौम्यमुत्फुल्ल-लोचनत्रितयोज्ज्वलम् ।
दक्षिणे शूल-परशु-वज्र-खड्गानलोज्ज्वलम् ॥ २७
सव्ये च नाग-नाराच-घण्टा-पाशाङ्कुशोज्ज्वलम् ।
निवृत्त्या जानुसम्बद्धमानाभेश्च प्रतिष्ठया ॥ २८
आकण्ठं विद्यया तद्वाल्ललाटन्तु शान्तया ।
तदूर्द्ध्वं शान्त्यतीताख्य-कलया परया तथा ॥ २९
पञ्चाध्वव्यापिनं तस्मात् कलापञ्चकविग्रहम् ।
ईशानमुकुटं देवं पुरुषास्यं पुरातनम् ॥ ३०
अघोरहृदयं तद्वद्वामगुह्यं महेश्वरम् ।
सद्यपादञ्च तन्मूर्त्तिमष्टत्रिंशत्कलामयम् ॥ ३१
मातृकामयमीशानं पञ्चब्रह्ममयं तथा ।
ओङ्काराख्यमयञ्चैव हंसशक्त्या समन्वितम् ॥ ३२
पञ्चाक्षरमयं देवं षडक्षरमयन्तु वा ।
अङ्गषट्कमयञ्चैव जातिषट्कसमन्वितम् ॥ ३३
तथेच्छात्मिकया शक्त्या समारूढाङ्कमण्डलम् ।
ज्ञानाख्यया दक्षिणतो वामतश्च क्रियाख्यया ॥३४
तत्त्वत्रयमयं साक्षाद्विद्यामूर्त्तिं सदाशिवम् ।
मूर्त्तिं मूलेन सङ्कल्प्य सकलीकृत्य च क्रमात् ॥ ३५
सम्पूज्य च यथान्यायमर्घ्यान्तं मूलविद्यया ।
मूर्त्तिमन्तं शिवं साक्षाच्छक्त्या परमया सह ॥ ३६
तत्रावाह्य महादेवं सदसद्व्यक्तिवर्ज्जितम् ।
पञ्चोपकरणं कृत्वा पूजयेत् परमेश्वरम् ॥ ३७
ब्रह्मभिश्च षडङ्गैश्च ततो मातृकया सह ।
प्रणवेन शिवेनैव शक्तियुक्तेन च क्रमात् ॥ ३८
शान्तेन च तथान्यैश्च वेदमन्त्रैश्च कृत्स्नशः ।
पूजयेत् परमं देवं केवलेन शिवेन वा ॥ ३९
पाद्यादि-मुखवासान्तं कृत्वाथ स्नपनं विना ।
पञ्चावरणपूजान्तु आरभेत यथाक्रमम् ॥ ४०
तत्रादौ शिवयोः पार्श्वे दक्षिणे वामतः क्रमात् ।
गन्धाद्यैरर्च्चयेत् पूर्व्वं देवौ हेरम्ब-षण्मुखौ ॥ ४१
ततो ब्रह्माणि परित ईशानादि यथाक्रमम् ।
सशक्तिकानि सद्यान्तं प्रथमावरणं यजेत् ॥ ४२

षडङ्गान्यपि तत्रैव हृदयादीन्यनुक्रमात् ।
शिवस्य च शिवायाश्च वाह्नेयादि समर्चयेत् ॥ ४३
तत्र वामादिकान् रुद्रानष्टौ वामादिशक्तिभिः ।
अर्चयेद्वा न वा पश्चात् पूर्व्वादि परितः क्रमात् ॥ ४४
प्रथमावरणं प्रोक्तं द्वितीयावरणं शृणु ।
अनन्तं पूर्व्वदिक्पत्रे तच्छक्तिं तस्य वामतः ॥ ४५
सूक्ष्मं दक्षिणदिक्पत्रे शक्त्या सह समर्चयेत् ।
ततः पश्चिमदिक्पत्रे सह शक्त्या शिवोत्तमम् ॥ ४६
तथैवोत्तरदिक्पत्रे एकनेत्रं समर्चयेत् ।
एकरुद्रञ्च तच्छक्तिं पश्चादीशानदिग्दले ॥ ४७
त्रिमूर्त्तिं तस्य शक्तिञ्च पूजयेदग्निदिग्दले ।
श्रीकण्ठं नैर्ऋते पत्रे तच्छक्तिं तस्य वामतः ॥ ४८
तथैव मारुते पत्रे शिखण्डीशं समर्चयेत् ।
द्वितीयावरणे चेज्याः सर्व्वतश्चक्रवर्त्तिनः ॥ ४९
तृतीयावरणे पूज्याः शक्तिभिश्चाष्टमूर्त्तयः ।
अष्टासु क्रमशो दिक्षु पूर्व्वादि परितः क्रमात् ॥ ५०
भवः शर्व्वस्तथेशानो रुद्रः पशुपतिस्ततः ।
उग्रो भीमो महादेव इत्यष्टौ मूर्त्तयः क्रमात् ॥ ५१
अनन्तरं ततश्चैषां महादेवादयः क्रमात् ।
शक्तिभिः सह सम्पूज्यास्तत्रैकादश मूर्त्तयः ॥ ५२
महादेवः शिवो रुद्रः शङ्करो नीललोहितः ।
ईशानो विजयो भीमो देवदेवो भवोद्भवः ॥ ५३
कपालीशश्च कथ्यन्ते तथैकादश शक्तयः ।
तत्राष्टौ प्रथमं पूज्या वाह्नेयादि यथाक्रमम् ॥ ५४
देवदेवः पूर्व्वपत्र ईशान्यामग्निगोचरे ।
भवोद्भवस्तयोर्मध्ये कपालीशस्ततः परः ॥ ५५
तस्मिन्नावरणे भूयो वृषेन्द्रं पुरतो यजेत् ।
नन्दिनं दक्षिणे तस्य महाकालं तथोत्तरे ॥ ५६
शास्तारं वह्निदिक्पत्रे मातृदक्षिणदिग्दले ।
गजास्यं नैर्ऋते पत्रे षण्मुखं वारुणे पुनः ॥ ५७
ज्येष्ठां वायुदले गौरीमुत्तरे चण्डमैश्वरे ।
शास्तृ-नन्दीशयोर्मध्ये मुनीन्द्रं वृषभं यजेत् ॥ ५८
महाकालस्योत्तरतः पिङ्गलन्तु समर्चयेत् ।
शास्तृ-मातृसमूहस्य मध्ये भृङ्गीश्वरं ततः ॥ ५९
मातृ-विघ्नेशमध्ये तु वीरभद्रं समर्चयेत् ।
स्कन्द-विघ्नेशयोर्मध्ये यजेद्देवीं सरस्वतीम् ॥ ६०
ज्येष्ठा-कुमारयोर्मध्ये श्रियं शिवपदार्चिकाम् ।
ज्येष्ठा-गणाम्बयोर्मध्ये महामोटीं समर्चयेत् ॥ ६१
गणाम्बा-चण्डयोर्मध्ये देवीं दुर्गां प्रपूजयेत् ।
अत्रैवावरणे भूयः शिवानुचरसंहतिम् ॥ ६२
रुद्रप्रमथभूताख्यां विविधाञ्च सशक्तिकाम् ।
शिवायाश्च सखीवर्गं यजेद्ध्यात्वा समाहितः ॥ ६३
एवं तृतीयावरणे वितते पूजिते सति ।
चतुर्थावरणं ध्यात्वा वहिस्तस्य समर्चयेत् ॥ ६४
भानुः पूर्व्वदले पूज्यो दक्षिणे चतुराननः ।
रुद्रो वरुणदिक्पत्रे विष्णुरुत्तरदिग्दले ॥ ६५
चतुर्णामपि देवानां पृथगावरणान्यथ ।
तस्याङ्गानि षडेवादौ दीप्ताद्याभिश्च शक्तिभिः ॥ ६६
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला क्रमात् ।
अमोघा विद्युता चैव पूर्व्वादि परितः स्थिताः ॥ ६७
द्वितीयावरणे पूज्याश्चतस्रो मूर्त्तयः क्रमात् ।
पूर्व्वाद्युत्तरपर्य्यन्ताः शक्तयश्च ततः परम् ॥ ६८
आदित्यो भास्करो भानू रविश्चेत्यनुपूर्व्वशः ।
अर्को ब्रह्मा तथा रुद्रो विष्णुश्चेति विवस्वतः ॥ ६९
विस्तारा पूर्व्वदिग्भागे सुतरा दक्षिणे स्थिता ।
बोधनी पश्चिमे भागे आप्यायिन्युत्तरे पुनः ॥ ७०
उषां प्रभां तथा प्राज्ञां सन्ध्यामपि ततः परम् ।
ऐशानादिषु कोणेषु द्वितीयावरणे यजेत् ॥ ७१
सोमभङ्गारकञ्चैव बुधं बुद्धिमतां वरम् ।
वृहस्पतिं वृहद्बुद्धिं भार्गवं तेजसां निधिम् ॥ ७२
शनैश्चरं तथा राहुं केतुं धूम्रं भयङ्करम् ।
समन्ततो यजेदेतांस्तृतीयावरणे क्रमात् ॥ ७३
अथवा द्वादशादित्यान् द्वितीयावरणे यजेत् ।
तृतीयावरणे चैव राशीन् द्वादश पूजयेत् ॥ ७४
सप्त सप्तगणांश्चैव वहिस्तस्य समन्ततः ।
ऋषीन् देवांश्च गन्धर्व्वान् पन्नगानप्सरोगणान् ॥ ७५
ग्रामण्यश्च तथा यक्षान् यातुधानांस्तथा हयान् ।
सप्तच्छन्दोमयांश्चैव बालखिल्यांश्च पूजयेत् ॥ ७६
एवं तृतीयावरणे समभ्यर्च्य दिवाकरम् ।
ब्रह्माणमर्चयेत् पश्चात् त्रिभिरावरणैः सह ॥ ७७
हिरण्यगर्भं पूर्व्वस्यां विराजं दक्षिणे ततः ।
कालं पश्चिमदिग्भागे पुरुषञ्चोत्तरे यजेत् ॥ ७८

हिरण्यगर्भः प्रथमो ब्रह्मा कमलसन्निभः।
कालो जात्यञ्जनप्रख्यः पुरुषः स्फटिकोपमः॥ ७९
त्रिगुणो राजसश्चैव तामसः सात्त्विकस्तथा।
चत्वार एते क्रमशः प्रथमावरणे स्थिताः॥ ८०
द्वितीयावरणे पूज्याः पूर्व्वादि परितः क्रमात्।
सनत्कुमारः सनकः सनन्दश्च सनातनः॥ ८१
तृतीयावरणे पश्चादर्चयेच्च प्रजापतीन्।
अष्टौ पूर्व्वाश्च पूर्व्वादौ त्रीन् प्राक् पश्चादनुक्रमात्॥८२
दक्षो रुचिर्भृगुश्चैव मरीचिश्च तथाङ्गिराः।
पुलस्त्यः पुलहश्चैव क्रतुरत्रिश्च कश्यपः॥ ८३
वशिष्ठश्चेति विख्याताः प्रजानां पतयस्त्विमे।
तेषां भार्याश्च तैः सार्द्धं पूजनीया यथाक्रमम्॥ ८४
प्रसूतिश्च तथाकूतिः ख्यातिः सम्भूतिरेव च।
धृतिः प्रीतिः क्षमा चैव सन्नतिश्चानुसूयका॥ ८५
देवमातारुन्धती च सर्व्वाः खलु पतिव्रताः।
शिवार्चनरता नित्यं श्रीमत्यः प्रियदर्शनाः॥ ८६
प्रथमावरणे वेदांश्चतुरो वा प्रपूजयेत्।
इतिहासपुराणानि द्वितीयावरणे पुनः॥ ८७
तृतीयावरणे पश्चाद्धर्मशास्त्रपुरःसराः।
वैदिक्यो निखिला विद्याः पूज्या एव समन्ततः॥८८
पूर्व्वादि पुरतो वेदास्तदन्ये तु यथारुचि।
अष्टधा वा चतुर्द्धा वा कृत्वा पूजां समन्ततः॥ ८९
एवं ब्रह्माणमभ्यर्च्य त्रिभिरावरणैर्यतम्।
दक्षिणे पश्चिमे पश्चाद्रुद्रं सावरणं यजेत्॥ ९०
तस्य ब्रह्मषडङ्गानि प्रथमावरणं स्मृतम्।
द्वितीयावरणञ्चैव विद्येश्वरमयं तथा॥ ९१
तृतीयावरणे भेदो विद्यते स तु कथ्यते।
चतस्रो मूर्त्तयस्तस्य पूज्याः पूर्व्वादितः क्रमात्॥ ९२
त्रिगुणः सकलो देवः पुरस्ताच्छिवसंज्ञकः।
राजसो दक्षिणे ब्रह्मा सृष्टिकृत् पूज्यते भवः॥ ९३
तामसः पश्चिमे चाग्निः पूज्यः संहारको हरः।
सात्त्विकः सुखकृत् सौम्ये विष्णुर्विश्वपतिर्मृडः॥९४
एवं पश्चिमदिग्भागे शम्भोः षड्विंशकं शिवम्।
समभ्यर्च्योत्तरे पार्श्वे ततो वैकुण्ठमर्चयेत्॥ ९५
वासुदेवं पुरस्तस्य प्रथमावरणे यजेत्।
अनिरुद्धं दक्षिणतः प्रद्युम्नं पश्चिमे ततः॥ ९६

सौम्ये सङ्कर्षणं पश्चाद्व्यत्यस्तौ वा यजेदिमौ।
प्रथमावरणं प्रोक्तं द्वितीयावरणं शृणु॥ ९७
मत्स्यः कूर्म्मो वराहश्च नारसिंहोऽथ वामनः।
रामश्चान्यतमः कृष्णो भवानश्वमुखोऽपि च॥ ९८
तृतीयावरणे चक्रं पूर्व्वभागे समर्चयेत्।
नारायणाख्यं याम्येऽस्त्रं क्वचिदव्याहतं यजेत्॥९९
पश्चिमे पाञ्चजन्यञ्च शार्ङ्गं धनुरथोत्तरे।
एवं व्यावरणं साक्षाद्विश्वाख्यं परमं हरिम्॥१००
महाविष्णुं सदाविष्णुं मूर्त्तीकृत्य समर्चयेत्।
इत्थं विष्णोश्चतुर्व्यूहं क्रमान्मूर्त्तिचतुष्टयम्॥ १०१
पूजयित्वाथ तच्छक्तीश्चतस्रः पूजयेत् क्रमात्।
प्रभामाग्नेयदिग्भागे नैर्ऋते तु सरस्वतीम्॥ १०२
गणाम्बिकाञ्च वायव्ये लक्ष्मीं रौद्रे समर्चयेत्।
एवं भान्वादिमूर्त्तीनां तच्छक्तीनामनन्तरम्॥ १०३
पूजां विधाय लोकेशांस्तत्रैवावरणे यजेत्।
इन्द्रमग्निं यमञ्चैव निरृतिं वरुणं तथा॥ १०४
वायुं सोमं कुबेरञ्च पश्चादीशानमर्चयेत्।
एवं चतुर्थावरणं पूजयित्वा विधानतः॥ १०५
आयुधानि महेशस्य पश्चाद्वाह्ये समर्चयेत्।
श्रीमत्त्रिशूलमैशाने वज्रं माहेन्द्रदिङ्मुखे॥ १०६
परशुं वह्निदिग्भागे याम्ये सायकमर्चयेत्।
नैर्ऋते तु यजेत् खड्गं पाशं वारुणगोचरे॥ १०७
अङ्कुशं मारुते भागे पिनाकञ्चोत्तरे यजेत्।
पश्चिमाभिमुखं रौद्रं क्षेत्रपालं समर्चयेत्॥ १०८
पञ्चमावरणञ्चैव सम्पूज्यानन्तरं वहिः।
सर्व्वावरणदेवानां वहिर्वा पञ्चमेऽथवा॥ १०९
पञ्चमे मातृभिः सार्द्धं महोक्षं पुरतो यजेत्।
ततः समन्ततः पूज्याः सर्व्वा वै देवयोनयः॥ ११०
खेचरा ऋषयः सिद्धा दैत्या यक्षाश्च राक्षसाः।
अनन्ताद्याश्च नागेन्द्रा नागैस्तत्तत्कुलोद्भवैः॥ १११
डाकिनी-भूत-वेताल-प्रेत-भैरवनायकाः।
पातालवासिनश्चान्ये नानायोनिषु सम्भवाः॥ ११२
नद्यः समुद्रा गिरयः काननानि सरांसि च।
पशवः पक्षिणो वृक्षाः कीटाद्याः क्षुद्रयोनयः॥११३
नराश्च विविधाकारा मृगाश्च क्षुद्रयोनयः।
भुवनान्यन्तरण्डस्य ततो ब्रह्माण्डकोटयः॥ ११४

२७

वहिरण्डादसंख्यानि भुवनानि सहाधिपैः।
ब्रह्माण्डाधारका रुद्रा दशदिक्षु व्यवस्थिताः॥११५
यद्गौणं यच्च मायीयं यद्वा शाक्तं ततः परम्।
यत् किञ्चिदस्ति शब्दस्य वाच्यं चिदचिदात्मकम्॥११६
तत् सर्व्वं शिवयोः पार्श्वे बुद्ध्वा सामान्यतो यजेत्।
कृताञ्जलिपुटाः सर्व्वे चिन्त्याः स्मितमुखास्तथा॥११७
प्रीत्या सम्प्रेक्षमाणाश्च देवं देवीञ्च सर्व्वदा।
इत्थमावरणाभ्यर्च्चां कृत्वा व्याक्षेपशान्तये॥११८
पुनरभ्यर्च्य देवेशं पञ्चाक्षरमुदीरयेत्।
निवेदयेत् ततः पश्चाच्छिवयोरमृतोपमम्॥११९
सुव्यञ्जनसमायुक्तं शुद्धं चारु महाचरुम्।
द्वात्रिंशदाढ़कैमुख्यमधमन्त्वाढ़कावरम्॥१२०
साधयित्वा यथासम्पच्छ्रद्धया विनिवेदयेत्।
ततो निवेद्य पानीयं ताम्बूलञ्चोपदंशकैः॥१२१
नीराजनादिकं कृत्वा पूजाशेषं समाचरेत्।
यागोपयोगद्रव्याणि विशिष्टान्येव साधयेत्॥१२२
वित्तशाठ्यं न कुर्व्वीत भक्तिमान् विभवे सति।
शठस्योपेक्षकस्यापि व्यङ्गञ्चवानुतिष्ठतः॥१२३
न फलन्त्येव कर्म्माणि काम्यानीति सतां कथा।
तस्माच्छाठ्यमुपेक्षाञ्च त्यक्त्वा सर्व्वाङ्गयोगतः॥१२४
कुर्य्यात् काम्यानि कर्म्माणि फलसिद्धिं यदीच्छति।
इत्थं पूजां समाप्याथ देवं देवीं प्रणम्य च॥१२५
भक्त्या मनः समाधाय पश्चात् स्तोत्रमुदीरयेत्।
ततः स्तोत्रजपस्यान्ते लष्टोत्तरशतावराम्॥१२६
जपेत् पञ्चाक्षरीं विद्यां सहस्रोत्तरमुत्सुकः।
विद्यापूजां गुरोः पूजां कृत्वा पश्चाद्यथाक्रमम्॥१२७
यथोदयं यथाश्रद्धं सदस्यानपि पूजयेत्।
तत उद्वास्य देवेशं सर्व्वैरावरणैः सह॥१२८
मण्डलं गुरवे दद्याद्यागोपकरणैः सह।
शिवाश्रितेभ्यो वा दद्यात् सर्व्वमेवानुपूर्व्वशः॥१२९
अथवा तच्छिवायैव शिवक्षेत्रे समर्पयेत्
शिवाग्नौ वा यजेद्देवं होमद्रव्यैश्च शक्तुभिः॥१३०
समभ्यर्च्य यथान्यायं सर्व्वावरणदेवताः।
एष योगेश्वरो नाम त्रिषु लोकेषु विश्रुतः॥१३१
न तस्मादधिकः कश्चिद्यागोऽस्ति भुवने क्वचित्।
न तदस्ति जगत्यस्मिन्नसाध्यं यदनेन तु॥१३२

ऐहिकं वा फलं किञ्चिदामुष्मिकफलन्तु वा।
इदमस्य फलं नेदमिति नैव नियम्यते॥१३३
श्रेयोरूपस्य कृत्स्नस्य तदिदं श्रेष्ठसाधनम्।
इदन्तु शक्यते वक्तुं पुरुषेण यदर्थ्यते॥१३४
चिन्तामणेरिवैतस्मात् तत् तेन प्राप्यते फलम्।
तथापि क्षुद्रमुद्दिश्य फलं नैतत् प्रयोजयेत्॥१३५
लघ्वर्थी महतो यस्मात् स्वयं लघुतरो भवेत्।
महद्वा फलमल्पं वा कृतञ्चेत् कर्म्म सिध्यति॥१३६
महादेवं समुद्दिश्य कृतं कर्म्म प्रयुज्यताम्।
तस्मादनन्यलभ्येषु शत्रुमृत्युजयादिषु॥१३७
फलेषु दृष्टादृष्टेषु कुर्य्यादेतद्विचक्षणः।
महत्स्वपि च पातेषु महारोगभयादिषु॥१३८
दुर्भिक्षादिषु चात्यर्थं शान्तिं कुर्य्यादनेन तु।
बहुना किं प्रलापेन महाव्यापन्निवारकम्॥१३९
आत्मीयमस्त्रं शैवानामिदमाह महेश्वरः।
तस्मादितः परं नास्ति परित्राणमिहात्मनः॥१४०
इति मत्वा प्रयुञ्जानः कर्म्मेदं शुभमश्नुते।
स्तोत्रमात्रं शुचिर्भूत्वा यः पठेत् सुसमाहितः॥१४१
सोऽप्यभीष्टतमादर्थादष्टांशफलमाप्नुयात्।
अर्थं तस्यानुसन्धाय जपेद्यदि समाहितः॥१४२
अर्द्धाङ्गं फलमाप्नोति नात्र कार्य्या विचारणा।
अथार्थमनुसन्धाय पर्व्वस्वनशनः पठेत्॥१४३
अष्टम्यां वा चतुर्द्दश्यां फलमर्द्धं समाप्नुयात्।
यस्त्वर्थमनुसन्धाय पर्व्वादिषु तथा व्रती॥१४४
मासमेकं जपेत् स्तोत्रं स कृत्स्नं फलमाप्नुयात्॥१४५

इति श्रीशैवे महापुराणे वायवीयसंहितायाः-
मुत्तरभागे पूजा-व्रतविधिकथनं नाम
त्रयोविंशोऽध्यायः॥२३॥

चतुर्व्विंशोऽध्यायः।

उपमन्युरुवाच।

स्तोत्रं वक्ष्यामि ते कृष्ण पञ्चावरणमार्गतः।
योगेश्वरमिदं पुण्यं कर्म्म येन समाप्यते॥१
जय जय जगदेकनाथ शम्भो
प्रकृतिमनोहर नित्यचित्स्वभाव।

अतिगतकलुषप्रपञ्चवाचा-
मपि मनसां पदवीमतीततत्त्व ॥ २
स्वभावनिर्म्मलाभोग जय सुन्दरचेष्टित।
ज्वालतुल्य महाशक्ते जय शुद्धगुणार्णव ॥ ३
अनन्तकान्तिसम्पन्न जयासदृशविग्रह।
अतर्क्यमहिमाधार जयानाकुलमङ्गल ॥ ४
निरञ्जन निराधार जय निष्कारणोदय।
निरन्तरपरानन्द जय निर्वृतिकारण ॥ ५
जयातिपरमैश्वर्य्य जयातिकरुणास्पद।
जय स्वतन्त्र सर्व्वस्व जयासदृशवैभव ॥ ६
जयावृतमहाविश्व जयानावृत केनचित्।
जयोत्तर समस्तस्य जयात्यन्तनिरुत्तर ॥ ७
जयाद्भुत जयाक्षुद्र जयाक्षत जयाव्यय।
जयामेय जयामाय जयाभय जयामल ॥ ८
महाभुज महासार महागुण महाकथ।
महाबल महामाय महारस महारथ ॥ ९
नमः परमदेवाय नमः परमहेतवे।
नमः शिवाय शान्ताय नमः शिवतराय ते ॥ १०
त्वदधीनमिदं कृत्स्नं जगद्धि ससुरासुरम्।
अतस्त्वद्विहितामाज्ञां क्षमते कोऽतिवर्त्तितुम् ॥ ११
अयं पुनर्जनो नित्यं भवदेकसमाश्रयः।
भवानतोऽनुगृह्यास्मै प्रार्थितं सम्प्रयच्छतु ॥ १२
जयाम्बिके जगन्मातर्जय सर्व्वजगन्मयि।
जयानवधिकैश्वर्य्ये जयानुपमविग्रहे ॥ १३
जय वाङ्मनसातीते जयाचिद्ध्वान्तभञ्जिके।
जय जन्मजराहीने जय कालोत्तरोत्तरे ॥ १४
जयानेकविधावस्थे जयानेकसुखात्मिके।
जयानेकमहासत्त्वे जयानेकगुणोज्झिते ॥ १५
जयानेकगुणात्मस्थे जय लोकमहेश्वरि।
जय विश्वाधिकात्मस्थे जय विश्वेश्वरप्रिये ॥ १६
जय विश्वसुराराध्ये जय विश्वविजृम्भिणि।
जय मङ्गलदिव्याङ्गि जय मङ्गलदीपिके ॥ १७
जय मङ्गलचारित्रे जय मङ्गलदायिनि।
नमः परमकल्याणि गुणसञ्चयमूर्त्तये ॥ १८
नमः शिवायै विश्वस्मात् परस्यै शिवशक्तये।
त्वत्तः खलु समुत्पन्नं जगत् त्वय्येव लीयते ॥ १९
त्वद्विनातः फलं दातुमीश्वरोऽपि न शक्नुयात्।
जन्मप्रभृति देवेशि जनोऽयं त्वदुपाश्रितः ॥ २०
अतोऽस्य तव भक्तस्य निर्व्वर्त्तय मनोरथम्।
पञ्चवक्त्रो दशभुजः शुद्धस्फटिकसन्निभः ॥ २१
वर्णब्रह्मकलादेहो देवः सकलनिष्कलः।
शिवमूर्त्तिसमारूढः शान्त्यतीतः सदाशिवः ॥ २२
भक्त्या मयार्च्चितो मह्यं प्रार्थितं सम्प्रयच्छतु।
सदाशिवाङ्कमारूढा शक्तिरिच्छा शिवाह्वया ॥ २३
जननी सर्व्वलोकानां प्रयच्छतु मनोरथम्।
शिवयोर्दयितौ पुत्रौ देवौ हेरम्ब-षण्मुखौ ॥ २४
शिवानुभावौ च शिवौ शिवज्ञानामृताशिनौ।
तृप्तौ परस्परं स्निग्धौ शिवाभ्यां नित्यसत्कृतौ ॥ २५
आराधितौ सदा देवौ ब्रह्माद्यैस्त्रिदशैरपि।
सर्व्वलोकपरित्राणं कर्त्तुमभ्युदितौ सदा ॥ २६
स्वेच्छावतारं कुर्व्वन्तौ स्वांशभेदैरनेकशः।
ताविमौ शिवयोः पार्श्वे नित्यमित्थं मयार्च्चितौ ॥ २७
तयोराज्ञां पुरस्कृत्य प्रार्थितं मे प्रयच्छताम्।
शुद्धस्फटिकसङ्काशमीशानाख्यं सदाशिवम् ॥ २८
मूर्द्धाभिमानिनी मूर्त्तिः शिवस्य परमात्मनः।
शिवार्च्चनरतं शान्तं शान्त्यतीतं खमास्थितम् ॥ २९
पञ्चाक्षरान्तिमं वीजं कलाभिः पञ्चभिर्युतम्।
प्रथमावरणे पूर्व्वं शक्त्या सह समर्च्चितम् ॥ ३०
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।
बालसूर्य्यप्रतीकाशं पुरुषाख्यं पुरातनम् ॥ ३१
पूर्व्ववक्त्राभिमानञ्च शिवस्य परमेष्ठिनः।
शान्त्यात्मकं मरुत्संस्थं शम्भोः पादार्च्चने रतम् ॥ ३२
तुरीयं शिववीजेषु कलासु च चतुष्कलम्।
पूर्व्वभागे मया भक्त्या शक्त्या सह समन्वितम् ॥ ३३
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।
अञ्जनाद्रिप्रतीकाशमघोरं घोरविग्रहम् ॥ ३४
देवस्य दक्षिणं वक्त्रं देवदेवपदार्च्चकम्।
विद्यापदं समारूढं वह्निमण्डलमध्यगम् ॥ ३५
तृतीयं शिववीजेषु कलास्वष्टकलान्वितम्।
शम्भोर्दक्षिणदिग्भागे शक्त्या सह समर्च्चितम् ॥ ३६
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।
कुङ्कुम[illegible]ङ्काशं वामाख्यं वरवेषधृक् ॥ ३७

वक्त्रमुत्तरमीशस्य प्रतिष्ठायां प्रतिष्ठितम्।
वारिमण्डलमध्यस्थं महादेवार्च्चने रतम्॥ ३८
द्वितीयं शिववीजेषु त्रयोदशकलान्वितम्।
दैवेशोत्तरदिग्भागे शक्त्या सह समच्चितम्॥ ३९
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।
शङ्खकुन्देन्दुधवलं सद्याख्यं सौम्यलक्षणम्॥ ४०
शिवस्य पश्चिमं वक्त्रं शिवपादार्च्चने रतम्।
निवृत्तिपदनिष्ठञ्च पृथिव्यां समवस्थितम्॥ ४१
प्रथमं शिववीजेषु कलाभिश्चाष्टभिर्युतम्।
देवस्य पश्चिमे भागे शक्त्या सह समच्चितम्॥ ४२
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।
शिवस्य च शिवायाश्च हृन्मूर्त्तौ शिवभाविते॥ ४३
तयोराज्ञां पुरस्कृत्य ते मे कामं प्रयच्छताम्।
शिवस्य च शिवायाश्च शिरोमूर्त्तौ शिवाश्रिते॥ ४४
तयोराज्ञां पुरस्कृत्य ते मे कामं प्रयच्छताम्।
शिवस्य च शिवायाश्च शिखामूर्त्तौ शिवाश्रिते॥ ४५
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्।
शिवस्य च शिवायाश्च नेत्रमूर्त्तौ शिवाश्रिते॥ ४६
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्।
शिवस्य च शिवायाश्च वर्म्मणी शिवभाविते॥ ४७
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्।
अस्त्रमूर्त्तौ च शिवयोर्नित्यमर्च्चनतत्परे॥ ४८
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्।
वामो ज्येष्ठस्तथा रुद्रः कालो विकरणस्तथा॥ ४९
बलो विकरणश्चैव बलप्रमथनः परः।
सर्व्वभूतस्य दमनस्तादृशश्चाष्ट शक्तयः॥ ५०
प्रार्थितं मे प्रयच्छन्तु परमेशस्य शासनात्।
अथानन्तश्च सूक्ष्मश्च शिवश्चाप्येकनेत्रकः॥ ५१
एकरुद्रस्त्रिमूर्त्तिश्च श्रीकण्ठश्च शिखण्डकः।
तथाष्टौ शक्तयस्तेषां द्वितीयावरणेऽर्च्चिताः॥ ५२
ते मे कामं प्रयच्छन्तु शिवयोरेव शासनात्।
भवाद्या मूर्त्तयश्चाष्टौ तेषामपि च शक्तयः॥ ५३
महादेवादयश्चान्ये तथैकादश मूर्त्तयः।
शक्तिभिः सहिताः सर्व्वे तृतीयावरणे स्थिताः॥ ५४
सत्कृत्य शिवयोराज्ञां दिशन्तु फलमीप्सितम्।
वृषराजो महातेजा महामेघसमस्वनः॥ ५५
मेरु-मन्दर-कैलास-हिमाद्रिशिखरोपमः।
सिताभ्रशिखराकारः ककुदा परिशोभितः॥ ५६
महाभोगीन्द्रकल्पेन वालेन च विराजितः।
रक्तास्य-शृङ्ग-चरणो रक्तप्रायविलोचनः॥ ५७
पीवरोन्नतसर्व्वाङ्गः सुचारुगमनोज्ज्वलः।
प्रशस्तलक्षणः श्रीमान् प्रज्वलन्मणिभूषणः॥ ५८
शिवप्रियः शिवासक्तः शिवयोर्ध्वजवाहनः।
तथा तच्चरणन्यास-भावितापरविग्रहः॥ ५९
गोराजपुरुषः श्रीमान् श्रीमच्छूलवरायुधः।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु॥ ६०
नन्दीश्वरो महातेजा नगेन्द्रतनयात्मज
स नारायणकैर्देवैर्नित्यमभ्यर्च्य वन्दितः॥ ६१
शर्व्वस्यान्तःपुरद्वारि सार्द्धं परिजनैः स्थितः।
सर्व्वेश्वरसमप्रख्यः सर्व्वासुरविमर्द्दनः॥ ६२
सर्व्वेषां शिवधर्म्माणामध्यक्षत्वेऽभिषेचितः।
शिवप्रियः शिवासक्तः श्रीमच्छूलवरायुधः॥ ६३
शिवाश्रितेषु संसक्तस्त्वनुरक्तश्च तैरपि।
सत्कृत्य शिवयोराज्ञां स मे कामं प्रयच्छतु॥ ६४
महाकालो महाबाहुर्महादेव इवापरः।
महादेवाश्रितानान्तु नित्यमेवाभिरक्षिता॥ ६५
शिवप्रियः शिवासक्तः शिवयोरर्च्चकः सदा।
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम्॥ ६६
सर्व्वशास्त्रार्थतत्त्वज्ञः शास्ता विष्णोः परा तनुः।
महामोहात्मतनयो मधुमांसासवप्रियः॥ ६७
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु।
ब्रह्माणी चैव माहेशी कौमारी वैष्णवी परा॥ ६८
वाराही चैव माहेन्द्री चामुण्डा चण्डविक्रमा।
एता वै मातरः सप्त सर्व्वलोकस्य मातरः॥ ६९
प्रार्थितं मे प्रयच्छन्तु परमेश्वरशासनात्।
मत्तमातङ्गवदनो गङ्गोमाशङ्करात्मजः॥ ७०
आकाशदेहो दिग्बाहुः सोमसूर्य्याग्निलोचनः।
ऐरावतादिभिर्दिव्यैर्दिग्गजैर्नित्यमर्च्चितः॥ ७१
शिवज्ञानमदोद्भिन्नस्त्रिदशानामविघ्नकृत्।
विघ्नकृच्चासुरादीनां विघ्नेशः शिवभावितः॥ ७२
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम्।
षण्मुखः शिवसम्भूतः शक्ति-वज्रधरः प्रभुः॥ ७३

अस्यैव तनयो देवो ह्यपर्णातनयः प्रभुः।
गङ्गायाश्च गणाख्यायाः कृत्तिकायास्तथैव च ॥ ७४
विशाखेन च शाखेन नैगमेयेन चावृतः।
इन्द्रजिच्चेन्द्रसेनानीस्तारकासुरजित् तथा ॥ ७५
शैलानां मेरुमुख्यानां वेधकश्च स्वतेजसा।
तप्तचामीकरप्रख्यः शतपत्रदलेक्षणः ॥ ७६
कुमारः सुकुमाराणां रूपोदाहरणं महत्।
शिवप्रियः शिवासक्तः शिवपादार्च्चकः सदा ॥ ७७
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम्।
ज्येष्ठा वरिष्ठा वरदा शिवयोः पूजने रता ॥ ७८
तयोराज्ञां पुरस्कृत्य सा मे दिशतु काङ्क्षितम्।
त्रैलोक्यवन्दिता साक्षादुल्काकारा गणाम्बिका ॥ ७९
जगत्सृष्टिविवृद्ध्यर्थं ब्रह्मणाभ्यर्थिता शिवात्।
शिवायाः प्रविभक्ताया भ्रुवोरन्तरनिःसृता ॥ ८०
दाक्षायणी सती मेना तथा हैमवती ह्युमा।
कौशिकायाश्च जननी भद्रकाल्यास्तथैव च ॥ ८१
अपर्णायाश्च जननी पाटलायास्तथैव च।
शिवार्च्चनरता नित्यं रुद्राणी रुद्रवल्लभा ॥ ८२
सत्कृत्य शिवयोराज्ञां सा मे दिशतु काङ्क्षितम्।
चण्डः सर्व्वगणेशानः शम्भोर्वदनसम्भवः ॥ ८३
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम्
वृषभो नाम गणपो वृषवाहपदार्च्चकः ॥ ८४
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम्।
पिङ्गलो गणपः श्रीमान् शिवासक्तः शिवप्रियः ॥ ८५
आज्ञया शिवयोरेव स मे कामं प्रयच्छतु।
भृङ्गीशो नाम गणपः शिवाराधनतत्परः ॥ ८६
प्रयच्छतु स मे कामं पत्युराज्ञापुरःसरम्।
वीरभद्रो महातेजा हिमकुन्देन्दुसन्निभः ॥ ८७
भद्रकालीप्रियो नित्यं मातृणाञ्चाभिरक्षिता।
यज्ञस्य च शिरोहर्त्ता दक्षस्य च दुरात्मनः ॥ ८८
उपेन्द्रेन्द्रयमादीनां देवानामङ्गतक्षकः।
शिवस्यानुचरः श्रीमान् शिवशासनपालकः ॥ ८९
शिवयोः शासनादेव स मे दिशतु काङ्क्षितम्।
सरस्वती महेशस्य वाक्सरोजसमुद्भवा ॥ ९०
शिवयोः पूजने नित्यं सा मे दिशतु काङ्क्षितम्।
विष्णोर्वक्षःस्थिता लक्ष्मीः शिवयोः पूजने रता ॥ ९१

शिवयोः शासनादेव सा मे दिशतु काङ्क्षितम्॥
महामोटी महादेव्याः पादपूजापरायणा ॥ ९२
तस्या एव नियोगेन सा मे दिशतु काङ्क्षितम्।
कौशिकी सिंहमारूढा पार्व्वत्याः परमा सुता ॥ ९३
विष्णोर्निद्रा महामाया महामहिषमर्द्दिनी।
निशुम्भ-शुम्भसंहर्त्री मधुमांसासवप्रिया ॥ ९४
सत्कृत्य शासनं मातुः सा मे कामं प्रयच्छतु।
रुद्रा रुद्रसमप्रख्याः प्रमथाः प्रथितौजसः ॥ ९५
भूताख्याश्च महावीर्य्या महादेवसमप्रभाः।
नित्यमुक्ता निरुपमा निर्द्वन्द्वा निरुपप्लवाः ॥ ९६
सशक्तयः सानुचराः सर्व्वलोकनमस्कृताः।
सर्व्वेषामेव लोकानां सृष्टिसंहरणक्षमाः ॥ ९७
परस्परानुरक्ताश्च परस्परमनुव्रताः।
परस्परमतिस्निग्धाः परस्परनमस्कृताः ॥ ९८
शिवप्रियतमा नित्यं शिवलक्षणलक्षिताः।
सौम्या घोरास्तथा मिश्राश्चान्तरालद्वयात्मकाः ॥ ९९
विरूपाश्च सुरूपाश्च नानारूपधरास्तथा।
सत्कृत्य शिवयोराज्ञां ते मे कामं दिशन्तु वै ॥ १००
देव्याः प्रियसखीवर्गो देवीलक्षणलक्षितः।
सहितो रुद्रकन्याभिः शक्तिभिश्चाप्यनेकशः ॥ १०१
तृतीयावरणे शम्भोर्भक्त्या नित्यं समर्च्चितः।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥ १०२
दिवाकरो महेशस्य मूर्त्तिर्दीप्तसुमण्डलः।
निर्गुणो गुणसङ्कीर्णस्तथैव गुणकेवलः ॥ १०३
अविकारात्मकश्चाद्यस्ततः सामान्यविक्रियः।
असाधारणकर्म्मा च सृष्टि-स्थिति-लयक्रमात् ॥ १०४
एवं त्रिधा चतुर्द्धा च विभक्तः पञ्चधा पुनः।
चतुर्थावरणे शम्भोः पूजितश्चानुगैः सह ॥ १०५
शिवप्रियः शिवासक्तः शिवपादार्च्चने रतः।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥ १०६
दिवाकरषडङ्गानि आदित्याद्याश्च मूर्त्तयः।
आदित्यो भास्करो भानू रविश्चेत्यनुपूर्व्वशः ॥ १०७
अर्को ब्रह्मा तथा रुद्रो विष्णुश्चादित्यमूर्त्तयः।
विस्तारा सुतरा बोधिन्याप्यायिन्यपरा पुनः ॥ १०८
ऊषा प्रभा तथा प्राज्ञा सन्ध्या चेत्यपि शक्तयः।
सोमादिकेतुपर्य्यन्ता ग्रहाश्च शिवभाविताः ॥ १०९

शिवयोराज्ञया तुल्वा मङ्गलं प्रदिशन्तु मे ।
अथवा द्वादशादित्यास्तथा द्वादश राघवः ॥ ११०
ऋषयो देवगन्धर्व्वाः पन्नगाप्सरसां गणाः ।
ग्रामण्यश्च तथा यक्षा राक्षसाश्चासुरास्तथा ॥ १११
सप्त सप्तगणाश्चैते सप्तच्छन्दोमया हयाः ।
वालखिल्यगणाश्चैव सर्व्वे शिवपदार्च्चकाः ॥ ११२
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ।
ब्रह्माथ देवदेवस्य मूर्त्तिर्भूमण्डलाधिपः ॥ ११३
चतुःषष्टिगुणैश्वर्य्यो बुद्धितत्त्वे प्रतिष्ठितः ।
निर्गुणो गुणसङ्कीर्णस्तथैव गुणकेवलः ॥ ११४
अविकारात्मको देवस्ततः साधारणः परः ।
असाधारणकर्म्मा च सृष्टि-स्थिति-लयक्रमात् ॥११५
एवं त्रिधा चतुर्द्धा च विभक्तः पञ्चधा पुनः ।
चतुर्थावरणे शम्भोः पूजितश्च सहानुगैः ॥ ११६
शिवप्रियः शिवासक्तः शिवपादार्च्चने रतः ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥ ११७
हिरण्यगर्भो लोकेशो विराट् कालश्च पूरुषः ।
सनत्कुमारः सनकः सनन्दश्च सनातनः ॥ ११८
प्रजानां पतयश्चैव दक्षाद्या ब्रह्मसूनवः ।
एकादश सपत्नीका धर्म्मः सङ्कल्प एव च ॥ ११९
शिवार्च्चनरताश्चैते शिवभक्तिपरायणाः ।
शिवाज्ञावशगाः सर्व्वे दिशन्तु मम मङ्गलम् ॥ १२०
चत्वारश्च तथा वेदाः सेतिहासपुराणकाः ।
धर्म्मशास्त्रादिविद्याभिर्वैदिकीभिः समन्विताः ॥१२१
परस्पराविरुद्धार्थाः शिवैकप्रतिपादकाः ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्त्विमे ॥ १२२
अथ रुद्रो महादेवः शम्भोर्मूर्त्तिर्गरीयसी ।
वाह्नेयमण्डलाधीशः पौरुषैश्वर्य्यवान् प्रभुः ॥ १२३
शिवाभिमानसम्पन्नो निर्गुणस्त्रिगुणात्मकः ।
केवलं सात्त्विकश्चापि राजसश्चैव तामसः ॥ १२४
अविकाररतः पूर्व्वं ततस्तु समविक्रियः ।
असाधारणकर्म्मा च सृष्ट्यादिकरणात् पृथक् ॥१२५
ब्रह्मणोऽपि शिरश्छेत्ता जनकस्तस्य तत्सुतः ।
जनकस्तनयश्चापि विष्णोरपि नियामकः ॥ १२६
बोधकश्च तयोर्नित्यमनुग्रहकरः प्रभुः ।
अण्डस्यान्तर्बहिर्व्वर्त्ती रुद्रलोकद्वयाधिपः ॥ १२७

शिवप्रियः शिवासक्तः शिवपादार्च्चने रतः ॥
शिवस्याज्ञां पुरस्कृत्य स मे दिशतु मङ्गलम् ॥ १२८
तस्य ब्रह्मषडङ्गानि विद्येशानां तथाष्टकम् ।
चत्वारो मूर्त्तिभेदाश्च शिवपूर्व्वाः शिवार्च्चकाः ॥ १२९
शिवो भवो हरश्चैव मृडश्चैव तथा परः ।
शिवस्याज्ञां पुरस्कृत्य मङ्गलं प्रदिशन्तु मे ॥ १३०
अथ विष्णुर्महेशस्य शिवस्यैवापरा तनुः ।
वारितत्त्वाधिपः साक्षादव्यक्तपदसंस्थितः ॥ १३१
निर्गुणः सत्त्वबहुलस्तथैव गुणकेवलः ।
अविकाराभिमानी च त्रिसाधारणविक्रियः ॥ १३२
असाधारणकर्म्मा च सृष्ट्यादिकरणात् पृथक् ।
दक्षिणाङ्गभवेनापि स्पर्द्धमानः स्वयम्भुवा ॥ १३३
आद्येन ब्रह्मणा साक्षात् सृष्टः स्रष्टा च तस्य तु ।
अण्डस्यान्तर्बहिर्व्वर्त्ती विष्णुर्लोकद्वयाधिपः ॥ १३४
असुरान्तकरश्चक्री शक्रस्यापि तथानुजः ।
प्रादुर्भूतश्च दशधा भृगुशापच्छलादिह ॥ १३५
भूभारनिग्रहार्थाय स्वेच्छयावतरत् क्षितौ ।
अप्रमेयबलो मायी मायया मोहयन् जगत् ॥ १३६
मूर्त्तीकृत्य महाविष्णुं सदाविष्णुमथापि वा ।
वैष्णवैः पूजितो नित्यं मूर्त्तित्रयमयासने ॥ १३७
शिवप्रियः शिवासक्तः शिवपादार्च्चने रतः ।
शिवस्याज्ञां पुरस्कृत्य स मे दिशतु मङ्गलम् ॥ १३८
वासुदेवोऽनिरुद्धश्च प्रद्युम्नश्च ततः परः ।
सङ्कर्षणः समाख्यातश्चतस्रो मूर्त्तयो हरेः ॥ १३९
मत्स्यः कूर्म्मो वराहश्च नारसिंहश्च वामनः ।
रामत्रयं तथा कृष्णो विष्णुस्तुरगवक्त्रकः ॥ १४०
चक्रं नारायणस्यास्त्रं पाञ्चजन्यञ्च शार्ङ्गकम् ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ॥ १४१
प्रभा सरस्वती गौरी लक्ष्मीश्च शिवभाविता ।
शिवयोः शासनादेता मङ्गलं प्रदिशन्तु मे ॥ १४२
इन्द्रोऽग्निश्च यमश्चैव निर्ऋतिर्वरुणस्तथा ।
वायुः सोमः कुबेरश्च तथेशानस्त्रिशूलधृक् ॥ १४३
सर्व्वे शिवार्च्चनरताः शिवसद्भावभाविताः ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ॥ १४४
त्रिशूलमथ वज्रञ्च तथा परशु-सायकौ ।
खड्गपाशाङ्कुशाश्चैव पिनाकश्चायुधोत्तमः ॥ १४५

दिव्यायुधानि देवस्य देव्याश्चैतानि नित्यशः ।
सत्कृत्य शिवयोराज्ञां रक्षां कुर्व्वन्तु मे सदा ॥ १४६
वृषरूपधरो धर्म्मः सौरभेयो महाबलः ।
वाड़वाख्यानलस्पर्द्धी पञ्चगोमातृभिर्वृतः ॥ १४७
वाहनत्वमनुप्राप्तस्तपसा परमेशयोः ।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु ॥ १४८
नन्दा सुभद्रा सुरभिः सुशीला सुमनास्तथा ।
पञ्च गोमातरस्त्वेताः शिवलोके व्यवस्थिताः ॥ १४९
शिवभक्तिपरा नित्यं शिवार्च्चनपरायणाः ।
शिवयोः शासनादेव दिशन्तु मम वाञ्छितम् ॥ १५०
क्षेत्रपालो महातेजा नीलजीमूतसन्निभः ।
दंष्ट्राकरालवदनः स्फुरद्रक्ताधरोज्ज्वलः ॥ १५१
रक्तोर्द्ध्वमूर्द्धजः श्रीमान् भ्रुकुटीकुटिलेक्षणः ।
रक्तवृत्तत्रिनयनः शशि-पन्नगभूषणः ॥ १५२
नग्नस्त्रिशूल-पाशासि-कपालोद्यतपाणिकः ।
भैरवो भैरवैः सिद्धैर्योगिनीभिश्च संवृतः ॥ १५३
क्षेत्रे क्षेत्रे समासीनः स्थितो यो रक्षकः सताम् ।
शिवप्रणामपरमः शिवसद्भावभावितः ॥ १५४
शिवाश्रितान् विशेषेण रक्षन् पुत्रानिवौरसान् ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥ १५५
तालजङ्घादयस्तस्य प्रथमावरणेऽर्च्चिताः ।
सत्कृत्य शिवयोराज्ञां चत्वारः समवन्तु माम् ॥ १५६
भैरवाद्याश्च ये चान्ये समन्तात् तस्य वेष्टिताः ।
तेऽपि मामनुगृह्णन्तु शिवशासनगौरवात् ॥ १५७
नारदाद्याश्च मुनयो दिव्या देवैश्च पूजिताः ।
साध्याश्चैव तु ये देवा जनलोकनिवासिनः ॥ १५८
विनिवृत्ताधिकाराश्च महर्लोकनिवासिनः ।
महर्षयस्तथान्ये च वैमानिकगणैः सह ॥ १५९
सर्व्वे शिवार्च्चनरताः शिवाज्ञावशवर्त्तिनः ।
शिवयोराज्ञया मह्यं दिशन्तु मम काङ्क्षितम् ॥ १६०
गन्धर्व्वाद्याः पिशाचान्ताश्चतस्रो देवयोनयः ।
सिद्धा विद्याधराद्याश्च येऽपि चान्ये नभश्चराः ॥ १६१
असुरा राक्षसाश्चैव पातालतलवासिनः ।
अनन्ताद्याश्च नागेन्द्रा वैनतेयादयो द्विजाः ॥ १६२
कूष्माण्डाः प्रेतवेताला ग्रहा भूतगणाः परे ।
डाकिन्यश्चापि योगिन्यः शाकिन्यश्चापि तादृशः ॥ १६३
क्षेत्रारामगृहादीनि तीर्थान्यायतनानि च ।
द्वीपाः समुद्रा नद्यश्च नदाश्चान्ये सरांसि च ॥ १६४
गिरयश्च सुमेर्व्वाद्याः काननानि समन्ततः ।
पशवः पक्षिणो वृक्षाः कृमि-कीटादयो मृगाः ॥ १६५
भुवनान्यपि सर्व्वाणि भुवनानामधीश्वराः ।
अण्डाद्यावरणैः सार्द्धमाशाश्च दश दिग्गजाः ॥ १६६
वर्णाः पदानि मन्त्राश्च तत्त्वान्यपि सहाधिपैः ।
ब्रह्माण्डधारका रुद्रा रुद्राश्चान्ये सशक्तिकाः ॥ १६७
यच्च किञ्चिज्जगत्यस्मिन् दृष्टञ्चानुमितं श्रुतम् ।
सर्व्वं कामं प्रयच्छन्तु शिवयोरेव शासनात् ॥ १६८
अथ विद्या परा शैवी पशुपाशविमोचनी ।
पञ्चार्थसंज्ञिता दिव्या पशु-विद्याबहिष्कृता ॥ १६९
शास्त्रञ्च शिवधर्म्माख्यं धर्म्माख्यञ्च तदुत्तरम् ।
शैवाख्यं शिवधर्म्माख्यं पुराणं श्रुतिसम्मितम ॥ १७०
शैवागमाश्च ये चान्ये कामिकाद्याश्चतुर्व्विधाः ।
शिवाभ्यामविशेषेण सत्कृत्येह समर्च्चिताः ॥ १७१
ताभ्यामेव समाज्ञाता ममाभिप्रेतसिद्धये ।
कर्म्मैदमनुमन्यन्तां सफलं साध्वनुष्ठितम् ॥ १७२
शैवा माहेश्वराश्चैव ज्ञानकर्म्मपरायणाः ।
कर्म्मेदमनुमन्यन्तां सफलं साध्वनुष्ठितम् ॥ १७३
लौकिका ब्राह्मणाः सर्व्वे क्षत्रियाश्च विशः क्रमात् ।
वेदवेदाङ्गतत्त्वज्ञाः सर्व्वशास्त्रविशारदाः ॥ १७४
सांख्या वैशेषिकाश्चैव यौगा नैयायिका नराः ।
सौरा ब्राह्मास्तथा रौद्रा वैष्णवाश्चापरे नराः ॥ १७५
शिष्टाः सर्व्वे विशिष्टाश्च शिवशासनयन्त्रिताः ।
कर्म्मेदमनुमन्यन्तां ममाभिप्रेतसाधकम् ॥ १७६
शैवाः सिद्धान्तमार्गस्थाः शैवाः पाशुपतास्तथा ।
शैवा महाव्रतधराः शैवाः कापालिकाः परे ॥ १७७
शिवाज्ञापालकाः पूज्या ममापि शिवशासनात् ।
सर्व्वे मामनुगृह्णन्तु शंसन्तु सफलक्रियाम् ॥ १७८
दक्षिणज्ञाननिष्ठाश्च दक्षिणोत्तरमार्गगाः ।
अविरोधेन वर्त्तन्तां मन्त्रश्रेयोऽर्थिनो मम ॥ १७९
नास्तिकाश्च शठाश्चैव कृतघ्नाश्चैव तामसाः ।
पाषण्डाश्चातिपापाश्च वर्त्तन्तां दूरतो मम ॥ १८०
बहुभिः किं स्तुतैरत्र येऽपि केऽपिचिदास्तिकाः ।
सर्व्वे मामनुगृह्णन्तु सन्तः शंसन्तु मङ्गलम् ॥ १८१

नमः शिवाय साम्बाय ससुतायादिहेतवे।
पञ्चावरणरूपेण प्रपञ्चेनावृताय ते ॥ १८२
इत्युक्त्वा दण्डवद्भूमौ प्रणिपत्य शिवं शिवाम्।
जपेत् पञ्चाक्षरीं विद्यामष्टोत्तरशतावराम् ॥ १८३
तथैव शक्तिविद्याञ्च जपित्वा तत्समर्पणम्।
कृत्वा क्षमापयित्वेशं पूजाशेषं समापयेत् ॥ १८४
एतत् पुण्यतमं स्तोत्रं शिवयोर्हृदयङ्गमम्।
सर्वाभीष्टप्रदं साक्षाद्भुक्ति-मुक्त्येकसाधनम् ॥ १८५
य इदं कीर्त्तयेन्नित्यं शृणुयाद्वा समाहितः।
स विधूयाशु पापानि शिवसायुज्यमाप्नुयात् ॥ १८६
गोघ्नश्चैव कृतघ्नश्च वीरहा भ्रूणहापि वा।
शरणागतघाती च मित्रविस्रम्भघातकः ॥ १८७
दुष्टः पापसमाचारो मातृहा पितृहापि वा।
स्तवेनायुतजप्तेन तत्तत्पापात् प्रमुच्यते ॥ १८८
दुःस्वप्नादिमहानर्थ-सूचकेषु भयेषु च।
यदि सङ्कीर्त्तयेदेतन्न ततोऽनर्थभाग्भवेत् ॥ १८९
आयुरारोग्यमैश्वर्यं यच्चान्यदपि वाञ्छितम्।
स्तोत्रस्यास्य जपे निष्ठस्तत् सर्व्वं लभते नरः ॥१९०
असम्पूज्य शिवं स्तोत्र-जपात् फलमुदाहृतम्।
सम्पूज्य च जपे तस्य फलं वक्तुं न शक्यते ॥ १९१
आस्तामियं फलावाप्तिरेतस्मिन् कीर्त्तिते सति।
सार्द्धमम्बिकया देवः शूलेदं दिवि तिष्ठति ॥ १९२
तस्मान्नभसि सम्पूज्य देवदेवं सहोमया।
कृताञ्जलिपुटस्तिष्ठन् स्तोत्रमेतदुदीरयेत् ॥ १९३
इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे चतुर्व्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः।

उपमन्युरुवाच।

एतत् ते कथितं कृष्ण कर्म्मेहामुत्र सिद्धिदम्।
क्रिया-तपो-जप-ध्यानसमुच्चयमयं परम् ॥ १
अथ वक्ष्यामि शैवानामिहैव फलदं नृणाम्।
पूजा-होम-जप-ध्यान-तपो-दानमयं महत् ॥ २
तत्र संसाधयेत् पूर्व्वं मन्त्रं मन्त्रार्थवित्तमः।
दृष्टसिद्धिकरं कर्म्म नान्यथा फलदं यतः ॥ ३
सिद्धमन्त्रोऽप्यदृष्टेन प्रबलेन तु केनचित्।
प्रतिबद्धफलं कर्म्म न कुर्य्यात् सहसा बुधः ॥ ४
तस्य तु प्रतिबन्धस्य कर्त्तुं शक्येह निष्कृतिः।
परीक्ष्य शकुनाद्यैस्तु तदा निष्कृतिमाचरेत् ॥ ५
योऽन्यथा कुरुते मोहात् कर्म्मैहिकफलं नरः।
न तेन फलभाक् स स्यात् प्राप्नुयाच्चोपहास्यताम् ॥ ६
अविस्रब्धो न कुर्व्वीत कर्म्म दृष्टफलं क्वचित्।
स खल्वश्रद्दधानः स्यान्नाश्रद्धः फलमृच्छति ॥ ७
नापराधोऽस्ति देवस्य कर्म्मण्यपि तु निष्फले।
यथोक्तकारिणां पुंसामिहैव फलदर्शनात् ॥ ८
साधकः सिद्धमन्त्रश्च निरस्तप्रतिबन्धकः।
विस्रब्धः श्रद्दधानश्च कुर्व्वन्नाप्नोति तत्फलम् ॥ ९
अथवा तत्फलावाप्त्यै ब्रह्मचर्य्यरतो भवेत्।
रात्रौ हविष्यमश्नीयात् पायसं वा फलानि वा ॥ १०
हिंसादि यन्निषिद्धं स्यान्न कुर्य्यान्मनसापि तत्।
सदा भस्मानुलिप्ताङ्गः सुवेषश्च शुचिर्भवेत् ॥ ११
इत्थमाचारवान् भूत्वा स्वानुकूले शुभेऽहनि।
पूर्व्वोक्तलक्षणे देशे पुष्पदामाद्यलङ्कृते ॥ १२
आलिप्य शकृता भूमिं हस्तमानावरां तथा।
विलिखेत् कमलं भद्रं दीप्यमानं स्वतेजसा ॥ १३
तप्तजाम्बूनदमयमष्टपत्रं सकेशरम्।
मध्ये कर्णिकया युक्तं सर्व्वरत्नैरलङ्कृतम् ॥ १४
स्वाकारसदृशेनैव नालेन च समन्वितम्।
तादृशे स्वर्णनिर्म्माणे कन्दे सम्यक् प्रतिष्ठितम् ॥ १५
तत्राणिमादिकं सर्व्वं सङ्कल्प्य मनसा पुनः।
रत्नजं वाथ सौवर्णं स्फाटिकं वा सलक्षणम् ॥ १६
लिङ्गं सवेदिकं तत्र स्थापयित्वा विधानतः।
तत्रावाह्य यजेद्देवं साम्बं सगणमव्ययम् ॥ १७
तत्र माहेश्वरी कल्प्या मूर्त्तिर्मूर्त्तिमतः प्रभोः।
चतुर्भुजा चतुर्वक्त्रा सर्व्वाभरणभूषिता ॥ १८
शार्दूलचर्म्मवसना किञ्चिद्विहसितानना।
वरदाभयहस्ता च मृग-टङ्कधरा तथा ॥ १९
अथवाष्टभुजा चिन्त्या चिन्तकस्य यथारुचि।
तदा त्रिशूल-परशु-खड्गवज्राणि दक्षिणे ॥ २०
वामे पाशाङ्कुशे तद्वत् खेटं नागञ्च बिभ्रती।
बालार्कसदृशप्रख्या प्रतिवक्त्रं त्रिलोचना ॥ २१

तस्याः पूर्व्वमुखं सौम्यं स्वाकारसदृशप्रभम् ।
दक्षिणं नीलजीमूतसदृशं घोरदर्शनम् ॥ २२
उत्तरं विद्रुमप्रख्यं नीलालकविभूषितम् ।
पश्चिमं पूर्णचन्द्राभं सौम्यमिन्दुकलाधरम् ॥ २३
तस्याङ्कमण्डलारूढ़ा शक्तिर्माहेश्वरी परा ।
महालक्ष्मीरिति ख्याता श्यामा सर्व्वमनोहरा ॥ २४
मूर्त्तिं कृत्वैवमाकारां सकलीकृत्य च क्रमात् ।
मूर्त्तिमन्तमथावाह्य यजेत् परमकारणम् ॥ २५
स्नानार्थं कल्पयेत् तत्र पञ्चगव्यन्तु कापिलम् ।
पञ्चामृतञ्च पूर्णानि वीजानि च विशेषतः ॥ २६
पुरस्तान्मण्डलं कृत्वा रत्नचूर्णाद्यलङ्कृतम् ।
कर्णिकायां प्रविन्यस्य ईशानकलशं पुनः ॥ २७
सद्यादिकलशान् पश्चात् परितस्तस्य कल्पयेत् ।
ततो विद्येशकलशानष्टौ पूर्व्वादिदिक्क्रमात् ॥ २८
तीर्थाम्बुपूरितान् कृत्वा सूत्रेणावेष्ट्य पूर्व्ववत् ।
पुण्यद्रव्याणि निक्षिप्य समन्त्रं सविधानकम् (क) ॥२९
दुकूलाद्येन वस्त्रेण समाच्छाद्य समन्ततः ।
सर्व्वत्र मन्त्रं विन्यस्य तत्तन्मन्त्रपुरःसरम् ॥ ३०
स्नानकाले तु सम्प्राप्ते सर्व्वमङ्गलनिस्वनैः ।
पञ्चगव्यादिभिश्चैव स्नापयेत् परमेश्वरम् ॥ ३१
ततः कुशोदकाद्यानि स्वर्णरत्नोदकान्यपि ।
गन्धपुष्पादिसिद्धानि मन्त्रसिद्धानि च क्रमात् ॥ ३२
उद्धृत्योद्धृत्य मन्त्रेण तैस्तैः स्नाप्य महेश्वरम् ।
गन्ध-पुष्पादि-दीपांश्च पूजाकर्म्म समाचरेत् ॥ ३३
पलावरः स्यादालेप एकादशपलोत्तरः ।
सुवर्णरत्नपुष्पाणि शुभ्राणि सुरभीणि च ॥ ३४
नीलोत्पलाद्युत्पलानि विल्वपत्राण्यनेकशः ।
कमलानि च रक्तानि श्वेतान्यपि च सम्भवे ॥ ३५
कृष्णागुरूद्भवो धूपः सकर्पूराज्यगुग्गुलः ।
कपिलाघृतसंसिद्धा दीपाः कर्पूरवर्त्तिजाः ॥ ३६
पञ्च ब्रह्मषड़ङ्गानि पूज्यान्यावरणानि च ।
निवेद्यः पयसा सिद्धः सगुड़ाज्यो महाचरुः ॥ ३७
पाटलोत्पलपत्राद्यैः पानीयञ्च सुगन्धितम् ।
पञ्चसौगन्धिकोपेतं ताम्बूलञ्च सुसंस्कृतम् ॥ ३८
सुवर्णरत्नसिद्धानि भूषणानि विशेषतः ।
वासांसि च विचित्राणि सूक्ष्माणि च नवानि च ॥३९
दर्शनीयानि देयानि गान-वाद्यादिभिः सह ।
जपश्च मूलमन्त्रस्य लक्षः परमसंख्यया ॥ ४०
एकावरा त्र्युत्तरा च पूजाफलवशादिह ।
दशसंख्यावरो होमः प्रतिद्रव्यं शतोत्तरः ॥ ४१
घोररूपः शिवश्चिन्त्यो मारणोच्चाटनादिषु ।
शिवलिङ्गे शिवाग्नौ च शान्तः शान्तिक-पौष्टिके ॥ ४२
आयसौ स्रुक्स्रुवौ कार्य्यौ मारणादिषु कर्म्मसु ।
तदन्यत्र तु सौवर्णौ शान्तिकाद्येषु कृत्स्नशः ॥ ४३
दूर्व्वया घृत-गोक्षीरमिश्रया मधुना तथा ।
चरुणा सघृतेनैव केवलं पयसापि वा ॥ ४४
जुहुयान्मृत्युविजये तिलै रोगोपशान्तये ।
घृतेन पयसा चैव कमलैर्वाथ केवलैः ॥ ४५
समृद्धिकामो जुहुयान्महादारिद्र्यशान्तये ।
जातिपुष्पेण वश्यार्थी जुहुयात् सघृतेन तु ॥ ४६
घृतेन करवीरैश्च कुर्य्यादाकर्षणं द्विजः ।
तैलेनोच्चाटनं कुर्य्यात् स्तम्भनं मधुना पुनः ॥ ४७
स्तम्भनं सर्षपेणापि लशुनेन तु पातनम् ।
ताड़नं रुधिरेण स्यात् खरस्योष्ट्रस्य चोभयोः ॥ ४८
मारणोच्चाटने कुर्य्याद्रोहिवीजैस्तिलान्वितैः ।
विद्वेषणञ्च तैलेन कुर्य्याल्लाङ्गलकस्य तु ॥ ४९
बन्धनं रोहिवीजेन सेनास्तम्भनमेव च ।
रक्तसर्षपसंमिश्रैर्होमद्रव्यैरशेषतः ॥ ५०
हस्तयन्त्रोद्भवैस्तैलैर्जुहुयादाभिचारिके ।
कटूष(क)तुषसंयुक्तैः कार्पासास्थिभिरेव च ॥ ५१
सर्षपैस्तैलसंमिश्रैर्जुहुयादाभिचारिके ।
ज्वरोपशान्तिदं क्षीरं सौभाग्यफलदं तथा ॥ ५२
सर्व्वसिद्धिकरो होमः क्षौद्राज्यदधिभिर्युतैः ।
क्षीरेण तण्डुलैश्चैव चरुणा केवलेन वा ॥ ५३
शान्तिकं पौष्टिकं वापि सप्तभिः समिदादिभिः ।
द्रव्यैर्विशेषतो होमे वश्यमाकर्षणं तथा ॥ ५४
वश्यमाकर्षणञ्चैव श्रीपदञ्च विशेषतः ।
विल्वपत्रैस्तु हवनं शत्रोर्विजयदं तथा ॥ ५५
समिधः शान्तिकार्य्येषु पालाश-खदिरादिकाः ।
करवीरार्कजाः क्रूराः कण्टकिन्यस्तु निग्रहे ॥ ५६

(क) सकूर्चं सपिधानकमिति पाठः क्वचित् ।

(क) कङ्कणेति पाठान्तरं क्वचित् ।

प्रशान्तः शान्तिकं कुर्य्यात् पौष्टिकञ्च विशेषतः ।
निर्घृणः क्षुद्रचित्तस्तु प्रकुर्य्यादाभिचारिकम् ॥ ५७
अतीव दुरवस्थायां प्रतीकारान्तरं न चेत् ।
आततायिनमुद्दिश्य प्रकुर्य्यादाभिचारिकम् ॥ ५८
स्वराष्ट्रपतिमुद्दिश्य न कुर्य्यादाभिचारिकम् ।
यद्यास्तिकः स्वधर्म्मिष्ठोमान्योवा योऽपि कोऽपि वा५९
तमुद्दिश्यापि नो कुर्य्यादाततायिनमच्युत ।
मनसा कर्म्मणा वाचा योऽपि कोऽपि शिवाश्रितः॥६०
स्वराष्ट्रपतिमुद्दिश्य शिवाश्रितमथापि वा ।
कृत्वाभिचारिकं कर्म्म सद्यो विनिपतेन्नरः ॥ ६१
स्वराष्ट्रपालकं तस्माच्छिवभक्तञ्च कञ्चन ।
न हिंस्यादभिचाराद्यैर्यदीच्छेत् सुखमात्मनः ॥ ६२
अन्यं कमपि चोद्दिश्य कृत्वा वै मारणादिकम् ।
पश्चात्तापेन संयुक्तः प्रायश्चित्तं समाचरेत् ॥ ६३
बाणलिङ्गेऽपि वा कुर्य्यान्निर्द्धनो धनवानपि ।
स्वयम्भूतेऽथवा लिङ्गे आर्षके वैदिकेऽपि वा ॥ ६४
अभावे हेमरत्नानामशक्तौ च तदर्च्चने ।
मनसैवाचरेदेतद्द्रव्यैर्वा प्रतिरूपकैः ॥ ६५
क्वचिदंशे तु यः शक्तास्वशक्तः क्वचिदंशकें ।
सोऽपि शक्त्यनुसारेण कुर्व्वंश्चेत् फलमृच्छति ॥ ६६
कर्म्मण्यनुष्ठितेऽप्यस्मिन् फलं यत्र न दृश्यते ।
द्विस्त्रिर्वावर्त्तयेत् तत्र सर्व्वथा दृश्यते फलम् ॥ ६७
पूजोपयुक्तं यद्द्रव्यं हेमरत्नाद्यनुत्तमम् ।
तत् सर्व्वं गुरवे दद्याद्दक्षिणाञ्च ततः पृथक् ॥ ६८
स चेन्नेच्छति तत् सर्व्वं शिवाय विनिवेदयेत् ।
अथवा शिवभक्तेभ्यो नान्येभ्यस्तु प्रदीयते ॥ ६९
यः स्वयं साधयेच्छक्त्या गुर्व्वादिनिरपेक्षया ।
सोऽप्येवमाचरेदत्र न गृह्णीयात् स्वयं पुनः ॥ ७०
स्वयं गृह्णाति यो लोभात् पूजाङ्गं द्रव्यमुत्तमम् ।
काङ्क्षितं न लभेन्मूढ़ो नात्र कार्य्या विचारणा ॥ ७१
अर्च्चितं यत् तु तल्लिङ्गं गृह्णीयाद्वा न वा स्वयम् ।
गृह्णीयाद्यदि तन्नित्यं स्वयं वान्योऽपि वार्च्चयेत्७२
यथोक्तमेव कर्म्मैतदाचरेद्द्वयोऽनपायतः ।
फलं व्यभिचरेन्नैवमित्यतः किं प्ररोचकम् ॥ ७३
तथाप्युद्देशतो वच्मि कर्म्मणः सिद्धिमुत्तमाम् ।
अपि शत्रुभिराक्रान्तो व्याधिभिर्वाप्यनेकशः ॥ ७४
मृत्योरास्यगतश्चापि मुच्यते निरपायतः ।
राजायतेऽतिकृपणो रिक्तो वैश्रवणायते ॥ ७५
कामायते विरूपोऽपि वृद्धोऽपि तरुणायते ।
शत्रुर्मित्रायते सद्यो विरोधी किङ्करायते ॥ ७६
विषायते यदमृतं विषमप्यमृतायते ।
स्थलायते समुद्रोऽपि स्थलमप्यर्णवायते ॥ ७७
महीधरायते श्वभ्रं स च श्वभ्रायते गिरिः ।
पद्माकरायते वह्निः सरो वैश्वानरायते ॥ ७८
वनायते यदुद्यानं तदुद्यानायते वनम् ।
सिंहायते मृगः क्षुद्रः सिंहः क्रीड़ामृगायते ॥ ७९
स्त्रियोऽभिसारिकायन्ते लक्ष्मीः सुचरितायते ।
स्वैरप्रेष्यायते वाणी कीर्त्तिस्तु गणिकायते ॥ ८०
स्वैराचारायते मेधा वज्रसूचीयते मनः ।
महावातायते शक्तिर्बलं मत्तगजायते ॥ ८१
स्तम्भायते समुद्योगैः शत्रुपक्षे स्थिता क्रिया ।
शत्रुपक्षायतेऽरीणां सर्व्व एव सुहृज्जनः ॥ ८२
शत्रवः कुणपायन्ते जीवन्तोऽपि सबान्धवाः ।
आपन्नोऽपि गतारिष्टः स्वयं खल्वमृतायते ॥ ८३
रसायनायते नित्यमपथ्यमपि सेवितम् ।
अनिशं क्रियमाणापि रतिस्त्वभिनवायते ॥ ८४
अनागतादिकं सर्व्वं करस्थामलकायते ।
याहच्छिकफलायन्ते सिद्धयोऽप्यणिमादयः ॥ ८५
बहुनात्र किमुक्तेन सर्व्वकामार्थसिद्धिषु ।
अस्मिन् कर्म्मणि निवृत्ते लनवाप्यं न विद्यते ॥ ८६

इति श्रीशैवे महापुराणे वायवीयसंहितायां
उत्तरभागे काम्यपूजादिकथनं नाम
पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः ।

उपमन्युरुवाच ।

अतः परं प्रवक्ष्यामि केवलामुष्मिकं विधिम् ।
नैतेन सदृशं किञ्चित् कर्म्मास्ति भुवनत्रये ॥ १
पुण्यातिशयसंयुक्तः सर्व्वदेवैरनुष्ठितः ।
ब्रह्मणा विष्णुना चैव रुद्रेण च विशेषतः ॥ २
इन्द्रादिलोकपालैश्च सूर्य्याद्यैर्नवभिर्ग्रहैः ।

विश्वामित्र-वशिष्ठाद्यैर्ब्रह्मविद्भिर्महर्षिभिः ॥ ३
श्वेतागस्त्यदधीचाद्यैरस्माभिश्च शिवाश्रितैः।
नन्दीश्वर-महाकाल-चण्डीशाद्यैर्गणेश्वरैः ॥ ४
पातालवासिभिर्दैत्यैः शेषाद्यैश्च महोरगैः।
सिद्धैर्यक्षैश्च गन्धर्व्वै रक्षो-भूत-पिशाचकैः ॥ ५
स्वं स्वं पदमनुप्राप्तुं सर्व्वैरयमनुष्ठितः।
अनेन विधिना सर्व्वे देवा देवत्वमागताः ॥ ६
ब्रह्मा ब्रह्मत्वमापन्नो विष्णुर्विष्णुत्वमागतः।
रुद्रो रुद्रत्वमापन्न इन्द्रश्चेन्द्रत्वमागतः ॥ ७
गणेशश्च गणेशत्वमनेन विधिना गतः।
सितचन्दनतोयेन लिङ्गं स्नाप्य शिवं शिवाम् ॥ ८
श्वेतैर्विकसितैः पद्मैः सम्पूज्य प्रणिपत्य च।
तत्र पद्मासनं रम्यं कृत्वा लक्षणसंयुतम् ॥ ९
विभवे सति हैमाद्यै रत्नाद्यैर्वा स्वशक्तितः।
मध्ये केशरजालस्य स्थाप्य लिङ्गं कनीयसम् ॥ १०
अङ्गुष्ठप्रतिमं रम्यं सर्व्वगन्धमयं शुभम्।
दक्षिणे स्थापयित्वा तु विल्वपत्रैः समर्च्चयेत् ॥ ११
अगुरुं दक्षिणे पार्श्वे पश्चिमे तु मनःशिलाम्।
उत्तरे चन्दनं दद्याद्धरितालन्तु पूर्व्वतः ॥ १२
सुगन्धैः कुसुमै रम्यैर्विचित्रैश्चापि पूजयेत्।
धूपं कृष्णागुरुं दद्यात् सघृतञ्च सगुग्गुलुम् ॥ १३
वासांसि यानि सूक्ष्माणि विकाशानि निवेदयेत्।
पायसं घृतसंमिश्रं घृतदीपांश्च दापयेत् ॥ १४
सर्व्वं निवेद्य मन्त्रेण ततो गच्छेत् प्रदक्षिणम्।
प्रणम्य भक्त्या देवेशं स्तुत्वा चान्ते क्षमापयेत् ॥ १५
सर्व्वोपहारसंमिश्रं तल्लिङ्गञ्च निवेदयेत्।
शिवाय शिवमन्त्रेण दक्षिणां मूर्त्तिमाश्रितः ॥ १६
एवं योऽर्च्चयते नित्यं पञ्चगन्धमयं शुभम्।
सर्व्वपापविनिर्म्मुक्तः शिवलोके महीयते ॥ १७
एतद्व्रतोत्तमं गुह्यं शिवलिङ्गमहाव्रतम्।
भक्तस्य ते समाख्यातं न देयं यस्य कस्यचित्।
देयञ्च शिवभक्तेभ्यः शिवेन कथितं पुरा ॥ १८

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे पूजादिकथनं नाम षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः।

उपमन्युरुवाच।

नित्यान्नैमित्तिकात्काम्याद्या सिद्धिरिह कीर्त्तिता।
सा सर्व्वा लभ्यते सद्यो लिङ्ग-वेरप्रतिष्ठया ॥ १
सर्व्वो लिङ्गमयो लोकः सर्व्वं लिङ्गे प्रतिष्ठितम्।
तस्मात् प्रतिष्ठिते लिङ्गे भवेत् सर्व्वं प्रतिष्ठितम् ॥ २
ब्रह्मणा विष्णुना वापि रुद्रेणान्येन केन वा।
लिङ्गप्रतिष्ठामुत्सृज्य क्रियते स्वपदस्थितिः ॥ ३
किमन्यदिह वक्तव्यं प्रतिष्ठां प्रति कारणम्।
प्रतिष्ठितं शिवेनापि लिङ्गं वैश्वेश्वरं यतः ॥ ४
तस्मात् सर्व्वप्रयत्नेन परत्रेह च शर्म्मणे।
स्थापयेत् परमेशस्य लिङ्गंवेरमथापि वा ॥ ५

श्रीकृष्ण उवाच।

किमिदं लिङ्गमाख्यातं कथं लिङ्गी महेश्वरः।
कथञ्च लिङ्ग-भावोऽस्य कस्मादस्मिन् शिवोऽर्च्च्यते ॥६

उपमन्युरुवाच।

अव्यक्तं लिङ्गमाख्यातं त्रिगुणप्रभवाप्ययम्।
अनाद्यन्तञ्च विश्वस्य यदुपादानकारणम् ॥ ७
तदेव मूलप्रकृतिर्माया च गगनात्मिका।
तत एव समुत्पन्नं जगदेतच्चराचरम् ॥ ८
अशुद्धञ्चैव शुद्धं यच्छुद्धाशुद्धञ्च तत् त्रिधा।
ततः शिवो महेशश्च रुद्रो विष्णुः पितामहः ॥ ९
भूतानि चेन्द्रियैर्जाता लीयन्तेऽत्र शिवाज्ञया।
अत एव शिवो लिङ्गी लिङ्गमाज्ञापयेद्यतः ॥ १०
यतो न तदनाज्ञातं कार्य्याय प्रभवेत् स्वतः।
ततो जातस्य विश्वस्य तत्रैव विलयो यतः ॥ ११
अनेन लिङ्गता तस्य भवेन्नान्येन केनचित्।
लिङ्गञ्च शिवयोर्देहस्ताभ्यां यस्मादधिष्ठितम् ॥ १२
अतस्तत्र शिवः साम्बो नित्यमेव समर्च्च्यते।
लिङ्गवेदी महादेवी लिङ्गं साक्षान्महेश्वरः ॥ १३
तयोः सम्पूजनादेव स च सा च समर्च्चितौ।
न तयोर्लिङ्गदेहत्वं विद्यते परमार्थतः ॥ १४
यतः स्वतो विशुद्धौ तौ देहस्तदुपचारतः।
तदेव परमा शक्तिः शिवस्य परमात्मनः ॥ १५
शक्तिराज्ञा यदाज्ञातं प्रसूते तच्चराचरम्।

न तस्य महिमा शक्यो वक्तुं वर्षशतैरपि ॥ १६
येनादौ मोहितौ स्यातां ब्रह्म-नारायणावपि ।
पुरा त्रिभुवनस्यास्य प्रलये समुपस्थिते ॥ १७
वारिमध्यागतो विष्णुः सुष्वापानाकुलः सुखम् ।
यदृच्छया गतस्तत्र ब्रह्मा लोकपितामहः ॥ १८
ददर्श पुण्डरीकाक्षं स्वपन्तं तमनाकुलम् ।
मायया मोहितः शम्भोर्विष्णुमाह पितामहः ॥ १९
कस्त्वं वदेत्यमर्षेण प्रहृत्योत्थाप्य माधवम् ।
स तु हस्तप्रहारेण तीव्रेणाभिहतः क्षणात् ॥ २०
प्रबुध्योत्थाय शयनाद्ददर्श परमेष्ठिनम् ।
तमाह चान्तः संक्रुद्धः स्वयं न क्रुद्धवद्धरिः ॥ २१
कुतस्त्वमागतो वत्स कस्मात् त्वं व्याकुलो वद ।
इति विष्णुवचः श्रुत्वा प्रभुत्वगुणसूचकम् ॥ २२
रजसा बद्धवैरस्तं ब्रह्मा पुनरभाषत ।
वत्सेति मां कुतो ब्रूषे गुरुः शिष्यमिवात्मनः ॥ २३
मां न जानासि किं नाथं प्रपञ्चो यस्य मे कृतिः ।
त्रिधात्मानं विभज्येदं सृष्ट्वाथ परिपाल्यते ॥ २४
संहरामि न मे कश्चित् स्रष्टा जगति विद्यते ।
इत्युक्ते सति सोऽप्याह ब्रह्माणं विष्णुरव्ययः ॥ २५
अहमेवादिकर्त्तास्य हर्त्ता च परिपालकः ।
भवानपि ममैवाङ्गादवतीर्णः पुराव्ययात् ॥ २६
मन्नियोगात् त्वमात्मानं त्रिधा कृत्वा जगत्त्रयम् ।
सृजस्यवसि चान्ते तत् पुनः प्रतिसृजस्यपि ॥ २७
विस्मृतोऽसि जगन्नाथं नारायणमनामयम् ।
तवापि जनकं साक्षान्मामेवमवमन्यसे ॥ २८
तवापराधो नास्त्यत्र भ्रान्तोऽसि मम मायया ।
मत्प्रसादादियं भ्रान्तिरपैष्यति तवाचिरात् ॥ २९
शृणु सत्यं चतुर्व्वक्त्र सर्व्वदेवेश्वरो ह्यहम् ।
कर्त्ता भर्त्ता च हर्त्ता च न मयास्ति समो विभुः॥ ३०
एवमेव विवादोऽभूद्ब्रह्म-विष्ण्वोः परस्परम् ।
अभवच्च महायुद्धं भैरवं रोमहर्षणम् ॥ ३१
मुष्टिभिर्निघ्नतोस्तीव्रं रजसा बद्धवैरयोः ।
तयोर्दर्पापहाराय प्रबोधाय च देवयोः ॥ ३२
मध्ये समाविरभवल्लिङ्गमैश्वरमद्भुतम् ।
ज्वालामालासहस्राढ्यमप्रमेयमनौपमम् ॥ ३३
क्षय-वृद्धिविनिर्मुक्तमादिमध्यान्तवर्ज्जितम् ।
तस्य ज्वालासहस्रेण ब्रह्म-विष्णू विमोहितौ ॥ ३४
विसृज्य युद्धं किन्त्वेतदित्यचिन्तयतां तदा ।
न तयोस्तस्य याथात्म्यं प्रबुद्धमभवद्यदा ॥ ३५
तदा समुद्यतौ स्यातां तस्याद्यन्तं परीक्षितुम् ।
तत्र हंसाकृतिर्ब्रह्मा विश्वतः पक्षसंयुतः ॥ ३६
मनोऽनिलजवो भूत्वा गतस्तूर्द्ध्वं प्रयत्नतः ।
नारायणोऽपि विश्वात्मा नीलाञ्जनचयोपमम् ॥ ३७
वाराहममितं रूपमास्थाय गतवानधः ।
एवं वर्षसहस्रन्तु त्वरन् विष्णुरधो गतः ॥ ३८
नापश्यदल्पमप्यस्य मूलं लिङ्गस्य शूकरः ।
तावत् कालं गतश्चोर्द्ध्वं तस्यान्तं ज्ञातुमिच्छया ॥३९
श्रान्तोऽत्यन्तमदृष्ट्वान्तं पपाताधः पितामहः ।
तथैव भगवान् विष्णुः श्रान्तः संविग्नलोचनः ॥ ४०
क्लेशेन महता तूर्णमधस्तादुत्थितोऽभवत् ।
समागतावथान्योऽन्यं विस्मयस्मेरवीक्षणौ ॥ ४१
मायया मोहितौ शम्भोः कृत्याकृत्यं न जग्मतुः ।
पृष्ठतः पार्श्वतस्तस्य चाग्रतश्च स्थिताबुभौ ॥ ४२
प्रणिपत्य किमात्मेदमित्यचिन्तयतां तदा ।
अथाविरभवत् तत्र सनादं शब्दलक्षणम् ॥ ४३
ओमित्येकाक्षरं ब्रह्म ब्रह्मणः प्रतिपादकम् ।
तदप्यविदितं तावद्ब्रह्मणा विष्णुना तथा ॥ ४४
रजसा तमसा चित्तं तयोर्यस्मात् तिरस्कृतम् ।
तदा विभक्तमभवच्चतुर्द्धकं तदक्षरम् ॥ ४५
अ उ मेति त्रिमात्राभिः परस्ताच्चार्द्धमात्रया ।
तत्राकारः श्रितो भागे तदा लिङ्गस्य दक्षिणे ॥ ४६
उकारश्चोत्तरे तद्वन्मकारस्तस्य मध्यतः ।
अर्द्धमात्रात्मको नादः श्रूयते लिङ्गमूर्द्धनि ॥ ४७
विभक्तेऽपि तथा तस्मिन् प्रणवे परमाक्षरे ।
विभागार्थञ्च तौ देवौ न किञ्चिदवजग्मतुः ॥ ४८
वेदात्मना तदाव्यक्तः प्रणवो विकृतिं गतः ।
तत्राकारो ऋगभवदुकारो यजुरव्ययः ॥ ४९
मकारः साम सञ्जातो नादस्त्वाथर्व्वणी श्रुतिः ।
ऋगुपस्थापयामास समा सात् त्वर्थमात्मनः ॥ ५०
रजोगुणेषु ब्रह्माणं मूर्त्तिष्वाद्यं क्रियास्वपि ।
सृष्टिं लोकेषु पृथिवीं तत्त्वेष्वात्मानमव्ययम् ॥ ५१
कलाध्वनि निवृत्तिञ्च सद्यं ब्रह्मसु पञ्चसु ।

लिङ्गभागेष्वधोभागं वीजाख्यं कारणत्रये ॥ ५२
चतुःषष्टिगुणैश्वर्य्यं वौद्धं यदणिमादिषु ।
तदित्यमर्थैर्दशभिर्व्याप्तं विश्वमृचा जगत् ॥ ५३
अथोपस्थापयामास स्वार्थं दशविधं यजुः ।
सत्त्वं गुणेषु विष्णुञ्च मूर्त्तिष्वाद्यं क्रियास्वपि ॥ ५४
स्थितिं लोकेष्वन्तरिक्षं विद्यां तत्त्वेषु च त्रिषु ।
कलाध्वसु प्रतिष्ठाञ्च वामं ब्रह्मसु पञ्चसु ॥ ५५
मध्यन्तु लिङ्गभागेषु योनिञ्च त्रिषु हेतुषु ।
प्राकृतञ्च तथैश्वर्य्यं तस्माद्विश्वं यजुर्म्मयम् ॥ ५६
ततोपस्थापयामास सामार्थं दशधात्मनः ।
तमो,गुणेष्वथो रुद्रं मूर्त्तिमाद्यां क्रियासु च ॥ ५७
संहृतिं त्रिषु लोकेषु तत्त्वेषु शिवमुत्तमम् ।
विद्याकलास्वघोरञ्च ब्रह्म ब्रह्मसु पञ्चसु ॥ ५८
लिङ्गभागेषु पीठोर्द्ध्वं वीजिनं कारणत्रये ।
पौरुषञ्च तथैश्वर्य्यमित्थं साम्ना ततं जगत् ॥ ५९
अथाथर्व्वाह नैर्गुण्यमर्थं प्रथममात्मनः ।
ततो महेश्वरं साक्षान्मूर्त्तिष्वपि सदाशिवम् ॥ ६०
क्रियासु निष्क्रियस्यापि शिवस्य परमात्मनः ।
भूतानुग्रहणञ्चैव मुच्यन्ते येन जन्तवः ॥ ६१
लोकेष्वपि यतो वाचो निवृत्ता मनसा सह ।
तदूर्द्ध्वमुन्मनालोकात् सोमलोकमलौकिकम् ॥ ६२
सोमः सहोमया यत्र नित्यं निवसतीश्वरः ।
तदूर्द्ध्वमुन्मनालोकाद्दुयं प्राप्तो न निवर्त्तते ॥ ६३
शान्तिञ्च शान्त्यतीताञ्च व्यापिकां वै कलास्वपि ।
तत्पुरुषं तथेशानं ब्रह्म ब्रह्मसु पञ्चसु ॥ ६४
मूर्द्धानमपि लिङ्गस्य नादभागेष्वनुत्तमम् ।
यत्रावाच्य समाराध्यः केवलो निष्कलः शिवः ॥ ६५
तत्त्वेष्वपि तदा बिन्दोर्नादाच्छक्तेस्ततः परात् ।
तस्मादपि परं तत्त्वमतत्त्वं परमार्थतः ॥ ६६
कारणेषु त्रयातीतान् मायाविक्षोभकारणात् ।
अनन्ताच्छुद्धविद्यायाः परस्ताच्च महेश्वरात् ॥ ६७
सर्व्वविद्येश्वराधीशान्न पराच्च सदाशिवात् ।
सर्व्वमन्त्रतनोर्द्देवाच्छक्तित्रयसमन्वितात् ॥ ६८
पञ्चवक्त्राद्दशभुजात् साक्षात् सकल-निष्कलात् ।
तस्मादपि पराद्विन्दोरर्द्धेन्दोश्च ततः परात् ॥ ६९
ततः परान्निशाधीशान्नादाख्याच्च ततः परात् ।

ततः परात् सुषुम्णेशाद्ब्रह्मरन्ध्रेश्वरादपि ॥ ७०
ततः परस्याः शक्तेश्च परस्ताच्छिवतत्त्वतः ।
परमं कारणं साक्षात् स्वयं निष्कारणं शिवम् ॥ ७१
कारणानाञ्च धातारं ध्यातारं ध्येयमव्ययम् ।
परमाकाशमध्यस्थं परमात्मोपरि स्थितम् ॥ ७२
सर्व्वैश्वर्य्येण सम्पन्नं सर्व्वेश्वरमनीश्वरम् ।
ऐश्वर्य्याच्चापि मायेयादशुद्धान्मानुषादिकात् ॥ ७३
अपराच्च परात् त्याज्यादविशुद्धाध्वगोचरात् ।
तत्पराच्छुद्धविद्याद्यादुन्मनान्तात् परात् परात्॥ ७४
परमं परमैश्वर्य्यमुन्मनाद्यमनादि च ।
अपारमपराधीनं निःसाम्यातिशयं स्थिरम् ॥ ७५
इत्यमर्थैर्दशविधैरियमाथर्वणी श्रुतिः ।
यस्माद्गरीयसी तस्माद्विश्वं व्याप्तमथर्व्वणा ॥ ७६
ऋग्वेदः पुनराहेदं जाग्रद्रूपं मयोच्यते ।
येनाहमात्मतत्त्वस्य नित्यमस्यभिधायकः ॥ ७७
यजुर्व्वेदोऽवदत् तद्वत् स्वप्नावस्था मयोच्यते ।
भोग्यात्मना परिणता विद्या वेद्या.यतो मयि ॥ ७८
साम चाह सुषुप्ताख्यमेवं सर्व्वं मयोच्यते ।
ममार्थेन शिवेनेदं तामसेनापि धीयते ॥ ७९
अथर्व्वाह तुरीयाख्यं तुरीयातीतमेव च ।
मयाभिधीयते तस्मादध्वातीतपदोऽस्म्यहम् ॥ ८०
अध्वात्मकन्तु त्रिमलं शिवविद्यात्मसंश्रितम् ।
तत्त्रैगुण्यं त्रयीसाध्यं संशोध्यञ्च पदैषिणाम् ॥ ८१
अध्वातीतं तुरीयाख्यं निर्व्वाणं परमं पदम् ।
तदतीतञ्च नैर्गुण्यादध्वनोऽस्य विशोधकम् ॥ ८२
द्वयोः प्रमापको नादो नादान्तश्च मदात्मकः ।
तस्मान्ममार्थः स्वातन्त्र्यात् प्रधानः परमेश्वरः ॥ ८३
यदस्ति वस्तु तत् सर्व्वं गुणप्राधान्ययोगतः ।
समस्तं व्यस्तमपि च प्रणवार्थं प्रचक्षते ॥ ८४
सर्व्वार्थवाचकं तस्मादेकं ब्रह्मैतदक्षरम् ।
तेनोमिति जगत् कृत्स्नं कुरुते प्रथमं शिवः ॥ ८५
शिवो वा प्रणवो ह्येष प्रणवो वा शिवः स्मृतः ।
वाच्य-वाचकयोर्भेदो नात्यन्तं विद्यते यतः ॥ ८६
चिन्तया रहितो रुद्रो वाचो यं मनसा सह ।
अप्राप्य च निवर्त्तन्ते वाच्यस्त्वेकाक्षरेण सः ॥ ८७
एकाक्षरादकाराख्यादात्मा ब्रह्माभिधीयते ।

एकाक्षरादुकाराख्याद्धिया विष्णुरुदीर्य्यते ॥ ८८
एकाक्षरान्मकाराख्याच्छिवो रुद्र उदाहृतः ।
दक्षिणाङ्गान्महेशस्य जातो ब्रह्मात्मसंज्ञकः ॥ ८९
वामाङ्गादभवद्विष्णुस्ततो विद्येति संज्ञितः ।
हृदयान्नीलरुद्रोऽभूच्छिवस्य शिवसंज्ञितः ॥ ९०
सृष्टेः प्रवर्त्तको ब्रह्मा स्थितेर्विष्णुर्विमोहकः ।
संहारस्य तथा रुद्रस्तयोर्नित्यं नियामकः ॥ ९१
तस्मात् त्रयस्ते कथ्यन्ते जगतः कारणत्रयम् ।
कारणत्रयहेतुश्च शिवः परमकारणम् ॥ ९२
अर्थमेतमविज्ञाय रजसा बद्धवैरयोः ।
युवयोः प्रतिबोधाय मध्ये लिङ्गमुपस्थितम् ॥ ९३
एवमोमिति मां प्राहुर्यदिहोक्तमथर्व्वणा ।
ऋचो यजूंषि सामानि शाखाश्चान्याः सहस्रशः ॥ ९४
वेदेष्वेवं स्वयं वक्त्रैर्व्यक्तमित्थं वदत्स्वपि ।
स्वप्नानुभूतमिव तत् ताभ्यां नाध्यवसीयते ॥ ९५
तयोस्तत्र प्रबोधाय तमोऽपनयनाय च ।
लिङ्गेऽपि मुद्रितं सर्व्वं यथा वेदैरुदाहृतम् ॥ ९६
तद्दृष्ट्वा मुद्रितं लिङ्गे प्रसादाल्लिङ्गिनस्तदा ।
प्रशान्ततमसौ देवौ प्रबुद्धौ सम्बभूवतुः ॥ ९७
ततो लिङ्गस्य लिङ्गत्वं लिङ्गिनोऽपि च लिङ्गिताम् ।
लिङ्गे विश्वस्य जगतो विशेषात् स्वात्मनोरपि ॥ ९८
उत्पत्तिं विलयञ्चैव याथात्म्यञ्च षड्ध्वनाम् ।
ततः परतरं धाम धामवन्तञ्च पूरुषम् ॥ ९९
निरुत्तरतरं ब्रह्म निष्कलं शिवमीश्वरम् ।
पशु-पाशमयस्यास्य प्रपञ्चस्य सदापतिम् ॥ १००
अकुतोभयमत्यन्तमवृद्धिक्षयमव्ययम् ।
बाह्यमाभ्यन्तरं व्याप्तं बाह्याभ्यन्तरवर्ज्जितम् ॥ १०१
निरस्तातिशयं शश्वद्विश्वलोकविलक्षणम् ।
अलक्षणमनिर्द्देश्यमवाङ्मनसगोचरम् ॥ १०२
प्रकाशैकरसं शान्तं प्रसन्नं सततोदितम् ।
सर्व्वकल्याणनिलयं शक्त्या तादृशयान्वितम् ॥ १०३
ज्ञात्वा देवं विरूपाक्षं ब्रह्म-नारायणौ तदा ।
रचयित्वाञ्जलिं मूर्द्ध्नि भीतौ तौ वाचमूचतुः ॥ १०४

ब्रह्मोवाच ।

अज्ञो वाहमभिज्ञो वा त्वयादौ देव निर्म्मितः ।
ईदृशीं भ्रान्तिमापन्न इति कोऽत्रापराध्यति ॥ १०५
आस्तां ममेदमज्ञानं त्वयि सन्निहिते प्रभो ।
निर्भयः कोऽभिभाषेत कृत्यं स्वस्य परस्य वा ॥ १०६
आवयोर्द्देवदेवेश विवादोऽपि हि शोभनः ।
यात्प्रणामफलदो नाथस्य भवतो यतः ॥ १०७

विष्णुरुवाच ।

स्तोतुं देव न वागस्ति महिम्नः सदृशी तव ।
प्रभोरग्रे विधेयानां तूष्णीम्भावो व्यतिक्रमः ॥ १०८
किमत्र सङ्कटे कृत्यमित्येवावसरोचितम् ।
अजानन्नपि यत् किञ्चित् प्रलप्य त्वांनतोऽस्म्यहम् ॥ १०९
कारणत्वं त्वया दत्तं विस्मृतं तव मायया ।
मोहितोऽहङ्कृतश्चाहं पुनरेवास्मि शासितः ॥ ११०
विज्ञापितैः किं बहुभिर्भीतोऽस्मि भृशमीश्वर ।
यतोऽहमपरिच्छेद्यं त्वां परिच्छेत्तुमुद्यतः ॥ १११
त्वामुशन्ति महादेवं भीतानामार्त्तिनाशनम् ।
अतो व्यतिक्रमं मेऽद्य क्षन्तुमर्हसि शङ्कर ॥ ११२
इति विज्ञापितस्ताभ्यामीश्वराभ्यां महेश्वरः ।
प्रीतोऽनुगृह्य तौ देवौ स्मितपूर्व्वमभाषत ॥ ११३

ईश्वर उवाच ।

वत्स वत्स विधे विष्णो मायया मम मोहितौ ।
युवां प्रभुत्वेऽहङ्कृत्य बद्धवैरौ परस्परम् ॥ ११४
विवादं युद्धपर्य्यन्तं कृत्वा नोपरतौ किल ।
तेनोच्छिन्ना प्रजासृष्टिर्जगत्कारणभूतयोः ॥ ११५
अज्ञानमानप्रभवाद्वैमत्याद्युवयोरपि ।
तन्निवर्त्तयितुं युष्मद्दर्प-मोहौ मयैव तु ॥ ११६
एवं निवारितावद्य लिङ्गाविर्भावलीलया ।
तस्माद्भयं विषादञ्च व्रीडाञ्चोत्सृज्य कृत्स्नशः ॥ ११७
यथास्वं कर्म्म कुर्य्यातां भवन्तौ वीतमत्सरौ ।
पुरा ममाज्ञया सार्द्धं समस्ता ज्ञानसंहिताः ॥ ११८
युवाभ्यां हि मया दत्ताः कारणत्वप्रसिद्धये ।
मन्त्ररत्नञ्च सूत्राख्यं पञ्चाक्षरमयं परम् ॥ ११९
मयोपदिष्टं सर्व्वं तद्युवयोरद्य विस्मृतम् ।
ददामि च पुनः सर्व्वं यथापूर्व्वं ममाज्ञया ॥ १२०
यतो युवां विना तेन न क्षमौ सृष्टिरक्षणे ।
एवमुक्त्वा महादेवो नारायण-पितामहौ ॥ १२१
मन्त्रेणाज्ञां ददौ ताभ्यां ज्ञानसंहितया सह ।
तौ लब्ध्वा महतीं दिव्यामाज्ञां माहेश्वरीं परामू १२

सहार्थं मन्त्ररत्नञ्च तथैव सकलाः कलाः।
दण्डवत् प्रणतिं कृत्वा देवदेवस्य पादयोः॥ १२३
प्रतिष्ठतां वीतभयावानन्दस्तिमितौ तदा।
एतस्मिन्नन्तरे चित्रमिन्द्रजालवदैश्वरम्॥ १२४
लिङ्गं क्वापि तिरोभूतं न ताभ्यामुपलभ्यते।
ततो विलप्य हा हेति सद्यः प्रणयभङ्गतः॥ १२५
किमद्भुतमिदं वृत्तमिति चोक्त्वा परस्परम्।
अचिन्त्यवैभवं शम्भोर्विचिन्त्य च गतव्यथौ॥ १२६
अभ्युपेत्य परां मैत्रीमालिङ्ग्य च परस्परम्।
जगद्व्यापारमुद्दिश्य जग्मतुर्देवपुङ्गवौ॥ १२७
ततःप्रभृति शक्राद्याः सर्व्व एव सुरासुराः।
ऋषयश्च नरा नागा नार्य्यश्चापि विधानतः।
लिङ्गप्रतिष्ठां कुर्व्वन्ति लिङ्गं तत् पूजयन्ति च॥ १२८

इति शैवे महापुराणे वायवीयसंहितायामुत्तरभागे लिङ्गाविर्भावकथनं नाम सप्तविंशोऽध्यायः॥ २७॥

अष्टाविंशोऽध्यायः।

श्रीकृष्ण उवाच।

भगवन् श्रोतुमिच्छामि प्रतिष्ठाविधिमुत्तमम्।
लिङ्गस्यापि च वेरस्य शिवेन विहितं तथा॥ १

उपमन्युरुवाच।

अनात्मप्रतिकूले तु दिवसे शुक्लपक्षके।
शिवशास्त्रोक्तमार्गेण कुर्य्याल्लिङ्गं प्रमाणवत्॥ २
शोधयित्वाथ शुभं स्थानं भूपरीक्षां विधाय च।
दशोपचारान् कुर्व्वीत लक्षणोद्धारपूर्व्वकान्॥ ३
तेषां दशोपचाराणां पूर्व्वं पूज्य विनायकम्।
स्नानशुद्ध्यादिकं कृत्वा लिङ्गं स्नानालयं नयेत्॥ ४
शलाकया काञ्चनया कुङ्कुमादिरसाक्तया।
लाञ्छितं लक्षणं शिल्प-शास्त्रेण विलिखेत् ततः॥ ५
अष्टमृत्सलिलैर्वाथ पञ्चामृतजलैस्तथा।
लिङ्गं पिण्डिकया सार्द्धं पञ्चगव्यैश्च शोधयेत्॥ ६
सवेदिकं समभ्यर्च्च्य दिव्योद्यन्तु जलाशयम्।
नीलाधिवासयेत् तत्र लिङ्गं पिण्डिकया सह॥ ७
अधिवासालये शुद्धे सर्व्वशोभासमन्विते।
सतोरणे सावरणे दर्भमालासमावृते॥ ८
दिग्गजाष्टकसम्पन्ने दिक्पालाष्टघटान्विते।
अष्टमङ्गलकैर्युक्ते कृतदिक्पालकार्च्चिते॥ ९
तैजसं दारवं वापि कृत्वा पद्मासनाङ्कितम्।
विन्यसेन्मध्यतस्तत्र विपुलं पीठिकालयम्॥ १०
द्वारपालान् समभ्यर्च्च्य भद्रादींश्चतुरः क्रमात्।
सुभद्रश्च विभद्रश्च सुनन्दश्च विनन्दकः॥ ११
स्नापयित्वा समभ्यर्च्च्य लिङ्गं वेदिकया सह।
सकूर्च्चाभ्यान्तु वस्त्राभ्यां समावेष्ट्य समन्ततः॥ १२
प्रापय्य शनकैस्तोयं पीठिकोपरि शाययेत्।
प्राक्शिरस्कमधःसूत्रं पिण्डिकाञ्चास्य पश्चिमे॥ १३
सर्व्वमङ्गलसंयुक्तं लिङ्गं तत्राधिवासयेत्।
पञ्चरात्रं त्रिरात्रं वाप्येकरात्रमथापि वा॥ १४
विसृज्य पूजितांस्तत्र लिङ्गञ्चोद्धृत्य पूर्व्ववत्।
सम्पूज्योत्सवमार्गेण शयनालयमानयेत्॥ १५
तत्रापि शयनस्थानं कुर्य्यान्मण्डलमध्यतः।
शुद्धैर्जलैः स्नापयित्वा लिङ्गमभ्यर्च्चयेत् क्रमात्॥ १६
ऐशान्यां पद्ममालिख्य शुद्धलिप्ते महीतले।
शिवकुम्भं साधयित्वा तत्रावाह्य शिवं यजेत्॥ १७
वेदिमध्ये सितं पद्मं परिकल्प्य विधानतः।
तस्य पश्चिमतश्चापि पिण्डिकापद्ममालिखेत्॥ १८
क्षौमाद्यैर्वाहतैर्वस्त्रैः पुष्पैर्दर्भैरथापि वा।
प्रकल्प्य शयनं तस्मिन् हेमपुष्पं विनिक्षिपेत्॥ १९
तत्र लिङ्गं समानीय सर्व्वमङ्गलनिस्वनैः।
रक्तेन वस्त्रयुग्मेण सकूर्च्चेन समन्ततः॥ २०
सह पिण्डिकयावेष्ट्य शाययेच्च यथा पुरा।
पुरस्तात् पद्ममालिख्य तद्दलेषु यथाक्रमम्॥ २१
विद्येशकलशान् न्यस्येन्मध्ये शैवीञ्च वर्द्धनीम्।
परीत्य पद्मत्रितयं जुहुयुर्द्विजसत्तमाः॥ २२
ते चाष्टमूर्त्तयः कल्प्याः पूर्व्वादि परितः स्थिताः।
चत्वारश्चाथवा दिक्षु स्वध्यतारः सजापकाः॥ २३
जुहुयुस्ते विरञ्च्याद्यास्ततस्तो मूर्त्तयः स्मृताः।
देशिकः प्रथमं तेषामैशान्यां पश्चिमेऽथवा॥ २४
प्रधानहोमं कुर्व्वीत सप्तद्रव्यैर्यथाक्रमम्।
आचार्य्यात् पादमर्द्धं वा जुहुयुश्चापरे द्विजाः॥ २५
प्रधानमेकमेवात्र जुहुयादथवा गुरुः।

पूर्व्वं पूर्णाहुतेर्हुत्वा घृतेनाष्टोत्तरं शतम् ॥ २६
मूर्द्ध्नि मूलेन लिङ्गस्य शिवहस्तं प्रविन्यसेत्।
शतमर्द्धं तदर्द्धं वा क्रमाद्द्रव्यैश्च सप्तभिः ॥ २७
हुत्वा हुत्वा स्पृशेल्लिङ्गं वेदिकाञ्च पुनः पुनः।
पूर्णाहुतिं ततो हुत्वा क्रमाद्दद्याच्च दक्षिणाम् ॥ २८
आचार्य्यात् पादमर्द्धं वा होतॄणां स्थपतेरपि।
तदर्द्धं देयमन्येभ्यः सदस्येभ्यश्च शक्तितः ॥ २९
ततः श्वभ्रे वृषं हैमं कूर्च्चं वा विनिवेश्य च।
मृदम्भसा पञ्चगव्यैः पुनः शुद्धजलेन च ॥ ३०
शोधितां चन्दनालिप्तां श्वभ्रे ब्रह्मशिलां क्षिपेत्।
करन्यासं ततः कृत्वा नवभिः शक्तिनामभिः ॥ ३१
हरितालादिधातूंश्च वीजगन्धौषधैरपि।
शिवशास्त्रोक्तविधिना क्षिपेद्ब्रह्मशिलोपरि ॥ ३२
प्रतिलिङ्गन्तु संस्थाप्य क्षीरवृक्षसमुद्भवम्।
स्थितं बुद्ध्वा तमुत्सृज्य लिङ्गं ब्रह्मशिलामपि ॥ ३३
प्रागुदक्प्रवणां किञ्चित् स्थापयेन्मूलविद्यया।
पिण्डिकाञ्चाथ संयोज्य शान्तां मूलमनुस्मरन् ॥ ३४
बन्धनं बन्धकद्रव्यैः कृत्वा स्थानं विशोध्य च।
दत्त्वाचार्घ्यञ्च पुष्पाणि कुर्य्युर्यवनिकां पुनः ॥ ३५
यथायोग्यं निशिकादि लिङ्गस्य पुरतस्तदा।
आनीय शयनस्थानात् कलशान् विन्यसेत् क्रमात् ॥ ३६
महापूजामथारभ्य सम्पूज्य कलशान् दश।
शिवमन्त्रमनुस्मृत्य शिवकुम्भजलान्तरे ॥ ३७
अङ्गुष्ठानामिकायोगादादाय तमुदीरयेत्।
न्यसेदीशानभागस्य मध्ये लिङ्गस्य मन्त्रवित् ॥ ३८
शक्तिं न्यसेत् तथा विद्यां विद्येशांश्च यथाक्रमम्।
लिङ्गमूले शिवजलैस्तथा लिङ्गं निषिचयेत् ॥ ३९
वर्द्धन्या पिण्डिकां लिङ्गं विद्येशकलशैः पुनः।
अभिषिच्यासनं पश्चादाधाराद्यं प्रकल्पयेत् ॥ ४०
कृत्वा पञ्चकलान्यासं दीप्तं लिङ्गमनुस्मरन्।
आवाहयेच्छिवं साक्षात् प्राञ्जलिः प्रागुदङ्मुखः ॥ ४१
वृषाभिराजमारुह्य विमानं वा नभःस्थलात्।
अलङ्कृतं समायान्तं देव्या देवमनुस्मरन् ॥ ४२
सर्व्वाभरणशोभाढ्यं सर्व्वमङ्गलनिस्वनैः।
ब्रह्म-विष्णु-महेशार्क-शक्राद्यैर्देव-दानवैः ॥ ४३
आनन्दक्लिन्नसर्व्वाङ्गविन्यस्ताञ्जलिमस्तकैः।
स्तुवद्भिरेव नृत्यद्भिर्नमद्भिरभितो वृतम् ॥ ४४
ततः पञ्चोपचाराणां कृत्वा पूजां समापयेत्।
नातः परतरः कश्चिद्विधिः पञ्चोपचारकात् ॥ ४५
प्रतिष्ठां लिङ्गवत् कुर्य्यात् प्रतिमास्वपि सर्व्वतः।
लक्षणोद्धारसमये कार्य्यं नयनमोचनम् ॥ ४६
जलाधिवासे शयने शाययेत् तान्त्वधोमुखीम्।
कुम्भोदरगतं मन्त्रं हृदि तासां नियोजयेत् ॥ ४७
कृतालयां परामाहुः प्रतिष्ठामकृतालयात्।
शक्तः कृतालयं पश्चात् प्रतिष्ठाविधिमाचरेत् ॥ ४८
अशक्तश्चेत् प्रतिष्ठाप्य लिङ्गं वेरमथापि वा।
शक्तेरनुगुणं पश्चात् प्रकुर्व्वीत शिवालयम् ॥ ४९
गृहार्चायां पुनर्वक्ष्ये प्रतिष्ठाविधिमुत्तमम्।
कृत्वा कनीयसं वेरं लिङ्गं वा लक्षणान्वितम् ॥ ५०
अयने चोत्तरे प्राप्ते शुक्लपक्षे शुभे दिने।
वेदिं कृत्वा शुभे देशे तत्राब्जं पूर्व्ववल्लिखेत् ॥ ५१
विकीर्य्य पत्रपुष्पादि मध्ये कुम्भं निधाय च।
परितस्तस्य चतुरः कलशान् दिक्षु विन्यसेत् ॥ ५२
पञ्च ब्रह्माणि तद्वीजैस्तेषु पञ्चसु पञ्चभिः।
न्यस्य सम्पूज्य मुद्रादि दर्शयित्वाभिरक्ष्य च ॥ ५३
विशोध्य लिङ्गं वेरं वा मृत्तोयाद्यैर्यथा पुरा।
स्थापयेत् पुष्पसञ्छन्नमुत्तरस्थे वरासने ॥ ५४
निधाय पुष्पं शिरसि प्रोक्षयेत् प्रोक्षणीजलैः।
समभ्यर्च्य पुनः पुष्पैर्जयशब्दादिपूर्व्वकम् ॥ ५५
कुम्भैरीशानविद्यान्तैः स्नापयेन्मूलविद्यया।
ततः पञ्चकलान्यासं कृत्वा पूजाञ्च पूर्व्ववत् ॥ ५६
नित्यमाराधयेत् तत्र देव्या देवं त्रिलोचनम्।
एकमेवाथवा कुम्भं मूर्त्तिमन्त्रसमन्वितम् ॥ ५७
न्यस्य पद्मान्तरे सर्व्वं शेषं पूर्व्ववदाचरेत्।
अत्यन्तोपहतं लिङ्गं विशोध्य स्थापयेत् पुनः ॥ ५८
सम्प्रोक्षयेदुपहतं मनागुपहतं यजेत्।
लिङ्गानि बाणसंज्ञानि स्थापनीयानि वा न वा ॥ ५९
तानि पूर्व्वं शिवेनैव संस्कृतानि यु[illegible]स्ततः।
लौहानि स्थापनीयानि यानि दृष्टानि बाणवत् ॥ ६०
स्वयमुद्भूतलिङ्गे च दिव्ये चार्षे तथैव च।
अपीठे पीठमावेश्य कृत्वा सम्प्रोक्षणं विधिम् ॥ ६१
यजेत् तत्र शिवं तेषां प्रतिष्ठा न विधीयते।

स्वयं स्वयं च्युताङ्गञ्च क्षिपेल्लिङ्गं जलाशये ॥ ६२
सन्धानयोग्यं सन्धाय प्रतिष्ठाविधिमाचरेत्।
वैरादाविकलाल्लिङ्गाद्देवपूजापुरःसरम् ॥ ६३
उदास्य हृदि सन्धानं त्यागं वा युक्तमाचरेत्।
एकाहपूजाविहतौ कुर्य्याद्द्विगुणमर्च्चनम् ॥ ६४
द्विरात्रे च महापूजां सम्प्रोक्षणमतः परम्।
मासादूर्द्ध्वमनेकाहं पूजा यदि विहन्यते ॥ ६५
प्रतिष्ठा प्रोच्यते कैश्चित् कैश्चित् सम्प्रोक्षणक्रमः।
सम्प्रोक्षणे तु लिङ्गादेर्देवमुद्वास्य पूर्व्ववत् ॥ ६६
अष्टपञ्चक्रमेणैव स्नापयित्वा मृदम्भसा।
गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च ॥ ६७
प्रोक्षयेत् प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम्।
सपुष्पं सकुशं पाणिं न्यस्य लिङ्गस्य मस्तके ॥ ६८
सहस्रावरं जपेन्मूलमष्टोत्तरशतोत्तरम्।
ततो मूलेन मूर्द्धादि-पीठान्तं संस्पृशेदपि ॥ ६९
पूजाञ्च महतीं कुर्य्याद्देवमावाह्य पूर्व्ववत्।
अचले स्थापिते लिङ्गे शिवस्थाने जलेऽथवा।
वह्नौ रवौ तथा व्योम्नि भगवन्तं शिवं यजेत् ॥ ७०

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे लिङ्ग-वेरप्रतिष्ठा-सम्प्रोक्षणादिविधिकथनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः।

श्रीकृष्ण उवाच।

ज्ञाने क्रियायां चर्य्यायां सारमुद्धृत्य संग्रहात्।
उक्तं भगवता सर्व्वं श्रुतं श्रुतिसमं मया ॥ १
इदानीं श्रोतुमिच्छामि योगं परमदुर्लभम्।
साधिकारञ्च साङ्गञ्च सविधिं सप्रयोजनम् ॥ २
यद्यस्ति मरणं वैधं रोगाद्यनुपमर्द्दितः।
सद्यः साधयितुं शक्यं येन स्यान्नात्महा नरः ॥ ३
तच्च तत्कारणञ्चैव तत्काल-करणानि च।
तद्भेदतारतम्यञ्च वक्तुमर्हसि तत्त्वतः ॥ ४

उपमन्युरुवाच।

स्थाने पृष्टं त्वया कृष्ण सर्व्वप्रश्नार्थवेदिना।
ततः क्रमेण तत् सर्व्वं वक्ष्ये शृणु समाहितः ॥ ५
निरुद्धवृत्त्यन्तरस्य शिवे चित्तस्य निश्चला।
या वृत्तिः सा समासेन योगः स खलु पञ्चधा ॥ ६
मन्त्रयोगः स्पर्शयोगो भावयोगस्तथापरः।
अभावयोगः सर्व्वेभ्यो महायोगः परो मतः ॥ ७
मन्त्राभ्यासवशेनैव मन्त्रवाच्यार्थगोचरः।
अव्याक्षेपा मनोवृत्तिर्मन्त्रयोग उदाहृतः ॥ ८
प्राणायाममुखा सैव स्पर्शयोगोऽभिधीयते।
समन्त्रः स्पर्शनिर्मुक्तो भावयोगः प्रकीर्त्तितः ॥ ९
विलीनावयवं विश्वं रूपं सम्भाव्यते यतः।
अभावयोगः सम्प्रोक्तोऽनाभासाद्वस्तुनः सतः ॥ १०
शिवस्वभाव एवैकश्चिन्त्यते निरुपाधिकः।
यया सैव मनोवृत्तिर्महायोग इहोच्यते ॥ ११
दृष्टे तथानुश्रविके विरक्तं विषये मनः।
यस्य तस्याधिकारोऽस्ति योगे नान्यस्य कस्यचित् ॥ १२
विषयद्वयदोषाणां गुणानामीश्वरस्य च।
विमर्शादेव सततं विरक्तं जायते मनः ॥ १३
अष्टाङ्गो वा षडङ्गो वा सर्व्वयोगः समासतः।
यमश्च नियमश्चैव स्वस्तिकाद्यं तथासनम् ॥ १४
प्राणायामः प्रत्याहारो धारणा ध्यानमेव च।
समाधिरिति योगाङ्गान्यष्टौ चेति प्रकीर्त्तिताः ॥ १५
आसनं प्राणसंरोधः प्रत्याहारोऽथ धारणा।
ध्यानं समाधिर्योगस्य षडङ्गानि समासतः ॥ १६
पृथग्लक्षणमेतेषां शिवशास्त्रे समीरितम्।
शिवागमेषु चान्येषु विशेषात् कामिकादिषु ॥ १७
योगशास्त्रेष्वपि तथा पुराणेष्वपि केषुचित्।
तस्मात् समासात् सामान्यादुच्ये योगाङ्गलक्षणम् ॥ १८
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्या-परिग्रहौ।
यम इत्युच्यते सद्भिः पञ्चावयवयोगतः ॥ १९
शौचं तुष्टिस्तपश्चैव जपः प्रणिधिरेव च।
इति पञ्चप्रभेदः स्यान्नियमः स्वांशभेदतः ॥ २०
स्वस्तिकं पद्ममर्द्धेन्दु वीरं योगं प्रसाधितम्।
पर्य्यङ्कञ्च यथेष्टञ्च प्रोक्तमासनमष्टधा ॥ २१
प्राणः स्वदेहजो वायुस्तस्यायामो निरोधनम्।
तद्रेचकं पूरकञ्च कुम्भकञ्च त्रिधोच्यते ॥ २२
नासिकापुटमङ्गुल्या पीड्यैकमपरेण तु।

औदरं रेचयेद्वायुं तथायं रेचकः स्मृतः ॥ २३
वाह्येन मरुता देहं दृतिवत् परिपूरयेत् ।
नासापुटेनापरेण पूरणात् पूरकं मतम् ॥ २४
न मुञ्चति न गृह्णाति वायुमन्तर्व्वहिःस्थितम् ।
सम्पूर्णकुम्भवत् तिष्ठेदचलः स तु कुम्भकः ॥ २५
रेचकाद्यं त्रयमिदं न द्रुतं न विलम्बितम् ।
उद्यतः क्रमयोगेण लभ्यस्येद्योगसाधकः ॥ २६
रेचकादित्रयाभ्यासो नाड़ीशोधनपूर्व्वकः ।
स्वेच्छोत्क्रमणपर्य्यन्तः प्रोक्तो योगानुशासने ॥ २७
कनीयादिक्रमवशात् प्राणायामनिरोधनम् ।
तच्चतुर्द्धोपदिष्टं स्यान्मात्रा-गुणविभागतः ॥ २८
कनीयः सकृदुद्घातः स च द्वादशमात्रकः ।
मध्यमस्तु द्विरुद्घातश्चतुर्व्विंशतिमात्रकः ॥ २९
उत्तमस्तु त्रिरुद्घातः षट्त्रिंशन्मात्रकः परः ।
स्वेदकम्पादिजनकः प्राणायामस्तदुत्तरः ॥ ३०
आनन्दोद्भव-रोमाञ्च-नेत्राश्रूणां विमोचनम् ।
जल्प-भ्रमण-मूर्च्छाद्यं जायते योगिनः परम् ॥ ३१
जानं प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
अङ्गुलीस्फोटनं कुर्य्यात् सा मात्रेति प्रकीर्त्तिता ॥ ३२
मात्रा क्रमेण विज्ञेया चोद्घातक्रमयोगतः ।
नाड़ीविशुद्धिपूर्व्वन्तु प्राणायामं समाचरेत् ॥ ३३
अगर्भश्च सगर्भश्च प्राणायामो द्विधा स्मृतः ।
जप-ध्यानं विना गर्भः सगर्भस्तत्समन्वयात् ॥ ३४
अगर्भाद्गर्भसंयुक्तः प्राणायामः शताधिकः ।
तस्मात् सगर्भं कुर्व्वन्ति योगिनः प्राणसंयमम् ॥ ३५
प्राणस्य विजयादेव जीयन्ते दश वायवः ।
प्राणोऽपानः समानश्च उदानो व्यान एव च ॥ ३६
नागः कूर्म्मश्च कृकरो देवदत्तो धनञ्जयः ।
प्रयाणं कुरुते यस्मात् तस्मात् प्राणोऽभिधीयते ॥ ३७
अवाङ्नयत्यपानाख्यो यदाहारादि भुज्यते ।
व्यानो व्यानशयत्यङ्गान्यशेषाणि विवर्द्धयन् ॥ ३८
उद्वेजयति मर्म्माणीत्युदानो वायुरीरितः ।
समं नयति सर्व्वाङ्गं समानस्तेन गीयते ॥ ३९
उद्गारे नाग आख्यातः कूर्म्म उन्मीलने स्थितः ।
कृकरः क्षवथौ ज्ञेयो देवदत्तो विजृम्भणे ॥ ४०
न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः ।
क्रमेणाभ्यस्यमानोऽयं प्राणायामः प्रमाणवान् ॥ ४१
निर्द्दहत्यखिलं दोषं कर्त्तुर्देहञ्च रक्षति ।
प्राणे तु विजिते सम्यक् तच्चिह्नान्युपलक्षयेत् ॥ ४२
विण्मूत्रश्लेष्मणां तावदल्पभावः प्रजायते ।
बहुभोजनसामर्थ्यं चिरादुच्छ्वसनं तथा ॥ ४३
लघुत्वं शीघ्रगामित्वमुत्साहः स्वरसौष्ठवम् ।
सर्व्वरोगक्षयश्चैव बलं तेजः सुरूपता ॥ ४४
धृतिर्मेधा युवत्वञ्च स्थिरता च प्रसन्नता ।
तपांसि पापक्षयता यज्ञ-दान-व्रतादयः ॥ ४५
प्राणायामस्य तस्यैते कलां नार्हन्ति षोड़शीम् ।
इन्द्रियाणि प्रसक्तानि यथास्वं विषयेष्विह ॥ ४६
आहृत्य यन्निगृह्णाति स प्रत्याहार उच्यते ।
मनः पूर्व्वाणीन्द्रियाणि स्वर्गं नरकमेव च ॥ ४७
निगृहीतविसृष्टानि स्वर्गाय नरकाय च ।
तस्मात् सुखार्थी मतिमान् ज्ञानवैराग्यमास्थितः ॥ ४८
इन्द्रियाश्वान् निगृह्याशु स्वात्मनात्मानमुद्धरेत् ।
धारणा नाम चित्तस्य स्थानबन्धः समासतः ॥ ४९
स्थानञ्च शिव एवैको नान्यद्दोषात्रयं यतः ।
कालं कञ्चावधीकृत्य स्थानेऽवस्थापितं मनः ॥ ५०
न तु प्रच्यवते लक्ष्याद्धारणा स्यान्न चान्यथा ।
मनसः प्रथमं स्थैर्य्यं धारणातः प्रजायते ॥ ५१
तस्माद्धीरं मनः कुर्य्याद्धारणाभ्यासयोगतः ।
ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्मुहुः ॥ ५२
अव्याक्षिप्तेन मनसा ध्यानं नाम तदुच्यते ।
ध्येयावस्थितचित्तस्य सदृशप्रत्ययस्य यः ॥ ५३
प्रत्ययान्तरनिर्म्मुक्तप्रवाहो ध्यानमुच्यते ।
सर्व्वमन्यत् परित्यज्य शिव एव शिवङ्करः ॥ ५४
परो ध्येयोऽथर्वशेति समाप्ताथर्व्वणी श्रुतिः ।
सर्व्वप्रभू शिवौ तस्मात् सर्व्वगौ सर्व्वदोदितौ ॥ ५५
सर्व्वज्ञौ सततं ध्येयौ नानारूपविभेदतः ।
विमुक्तिप्रत्ययः पूर्व्वः प्रत्ययश्चाणिमादिकम् ॥ ५६
इत्येतद्द्विविधं ज्ञेयं ध्यानस्यास्य प्रयोजनम् ।
ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम् ॥ ५७
एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत योगवित् ।
ज्ञान-वैराग्यसम्पन्नः श्रद्दधानः क्षमान्वितः ॥ ५८
निर्म्ममश्च सदोत्साही ध्यातेत्थं पुरुषः स्मृतः ।

जपाक्कान्तः पुनर्ध्यायेत् ध्यानाक्कान्तः पुनर्जपेत्॥५९
जप-ध्यानाभियुक्तस्य चिप्रं योगः प्रसिध्यति।
धारणा द्वादशायामा ध्यानं द्वादशधारणम्॥६०
ध्यानद्वादशकं यावत् समाधिरभिधीयते।
समाधिर्नाम योगाङ्गमन्तिमं परिकीर्त्तितम्॥६१
समाधिना च सर्व्वत्र प्रज्ञालोकः प्रवर्त्तते।
यदर्थमात्रनिर्भासं स्तिमितोदधिवत् स्थितम्॥६२
स्वरूपशून्यवज्ज्ञानं समाधिरभिधीयते।
ध्येये मनः समावेश्य तिष्ठेदपि च सुस्थिरम्॥६३
निर्व्वाणानलवद्योगी समाधिस्थः प्रगीयते।
न शृणोति न चाघ्राति न रस्यति न पश्यति॥६४
न च स्पर्शं विजानाति न सङ्कल्पयते मनः।
न चाभिमन्यते किञ्चिन्न च बुध्यति काष्ठवत्॥६५
एवं शिवे विलीनात्मा समाधिस्थ इहोच्यते।
यथा दीपो निवातस्थः स्पन्दते न कदाचन॥६६
तथा समाधिनिष्ठोऽपि तस्मान्न विचलेत् सुधीः।
एवमभ्यस्यतश्चाद्दं योगिनो योगमुत्तमम्॥६७
वदन्तराया नश्यन्ति विघ्नाः सर्व्वे शनैः शनैः।
आलस्यं व्याधयस्तीव्राः प्रमादस्था न संशयः॥६८
अनवस्थितचित्तत्त्वमश्रद्धा भ्रान्तिदर्शनम्।
दुःखानि दौर्म्मनस्यञ्च विषयेषु च लोलता॥६९
दशैते युञ्जतां पुंसामन्तरायाः प्रकीर्त्तिताः।
आलस्यमलसत्वन्तु योगिनां देह-चेतसोः॥७०
धातुवैषम्यजा दोषा व्याधयः कर्म्मदोषजाः।
प्रमादो नाम योगस्य साधनानामभावना॥७१
इदं वेत्युभयालम्बि ज्ञानं तत्स्थानसंशयः।
अप्रतिष्ठा हि मनसस्त्वनवस्थितिरुच्यते॥७२
अश्रद्धा भावरहिता वृत्तिर्वै योगवर्त्मनि।
विपर्य्यस्ता मतिर्या सा भ्रान्तिरित्यभिधीयते॥७३
दुःखमज्ञानजं पुंसां चेतस्याध्यात्मिकं विदुः।
आधिभौतिकमङ्गोत्थं यच्च दुःखं पुराकृतैः॥७४
आधिदैविकमाख्यातमशन्यस्त्रविषादिजम्।
इच्छाविघातजं चोभं दौर्म्मनस्यं प्रचक्षते॥७५
विषयेषु विचित्रेषु विभ्रमस्तत्र लोलता।
शान्तेष्वेतेषु विघ्नेषु योगासक्तस्य योगिनः॥७६
उपसर्गाः प्रवर्त्तन्ते दिव्यास्ते सिद्धिसूचकाः।
प्रतिभा श्रवणं वार्त्ता दर्शनास्वादवेदनाः॥७७
उपसर्गाः षडित्येते व्ययी योगस्य सिद्धयः।
सूक्ष्मे व्यवहितेऽतीते विप्रकृष्टे त्वनागते॥७८
प्रतिभा कथ्यते योऽर्थे प्रतिभासो यथातथम्।
श्रवणं सर्व्वशब्दानां श्रवणन्त्वप्रयत्नतः॥७९
वार्त्ता वार्त्तासु विज्ञानं सर्व्वेषामेव देहिनाम्।
दर्शनं नाम दिव्यानां दर्शनञ्चाप्रयत्नतः॥८०
तथा स्वादश्च दिव्येषु रसेष्वास्वाद उच्यते।
स्पर्शनाधिगमस्तद्वद्वेदना नाम विश्रुता॥८१
गन्धादीनाञ्च दिव्यानामाब्रह्मभुवनाधिपाः।
सन्तिष्ठन्ते च रत्नानि प्रयच्छन्ति बहूनि च॥८२
स्वच्छन्दमधुरा वाणी विविधास्यात् प्रवर्त्तते।
रसायनानि सर्व्वाणि दिव्याश्चौषधयस्तथा॥८३
सिध्यन्ति प्रणिपत्यैनं दिशन्ति सुरयोषितः।
योगसिद्ध्यैकदेशेऽपि दृष्टे मोक्षे भवेन्मतिः॥८४
दृष्टमेतन्मया यद्वत् तद्वन्मोक्षो भवेदिति।
कृशता स्थूलता बाल्यं वार्द्धक्यञ्चैव यौवनम्॥८५
नानाजातिस्वरूपत्वं चतुर्णां देहधारणम्।
पार्थिवांशं विना नित्यं सुरभिर्गन्धसंग्रहः॥८६
एवमष्टगुणं प्राहुः पैशाचं पार्थिवं पदम्।
जले निवसनञ्चैव भूम्यामेव विनिर्गमः॥८७
इच्छेच्छक्तः स्वयं पातुं समुद्रमपि चातुरः।
यत्रेच्छति जगत्यस्मिंस्तत्रैव जलदर्शनम्॥८८
विना कुम्भादिकं पाणौ जलसञ्चयधारणम्।
यद्वस्तु विरसञ्चापि भोक्तुमिच्छति तत्क्षणात्॥८९
रसादिकं भवेच्चान्यत् त्रयाणां देहधारणम्।
निर्व्रणत्वं शरीरस्य पार्थिवैश्च समन्वितम्॥९०
तदिदं षोडशगुणमाप्यमैश्वर्य्यमद्भुतम्।
शरीरादग्निनिर्म्माणं तत्तापभयवर्ज्जनम्॥९१
शक्तिर्जगदिदं दग्धुं यदिच्छेदप्रयत्नतः।
स्थापनं वानलस्याप्सु पाणौ पावकधारणम्॥९२
दग्धे सर्गौ यथापूर्व्वं सुखे वान्नादिपाचनम्।
द्वाभ्यां देहविनिर्म्माणमाप्यैश्वर्य्यसमन्वितम्॥९३
एतच्चतुर्विंशतिधा तैजसं परिचक्षते।
मनोजवत्वं भूतानां चणादन्तःप्रवेशनम्॥९४
पर्व्वतादिमहाभार-धारणञ्चाप्रयत्नतः।

गुरुत्वञ्च लघुत्वञ्च पाणावनिलधारणम् ॥ ९५
अङ्गुल्यग्रनिपाताद्यैर्भूमेरपि च कम्पनम् ।
एकेन देहनिष्पत्तिर्युक्तं भोगैश्च तैजसैः ॥ ९६
द्वात्रिंशद्गुणमैश्वर्य्यं मारुतं कवयो विदुः ।
छायाहीनविनिष्पत्तिरिन्द्रियाणामदर्शनम् ॥ ९७
खेचरत्वं यथाकाममिन्द्रियार्थैः समन्वयः ।
आकाशे लङ्घनञ्चैव स्वदेशे तन्निवेशनम् ॥ ९८
आकाशपिण्डीकरणमशरीरत्वमेव च ।
अनिलैश्वर्य्यसंयुक्तं चत्वारिंशद्गुणं महत् ॥ ९९
ऐन्द्रमैश्वर्य्यमाख्यातमाम्बरं तत् प्रचक्षते ।
यथाकामोपलब्धिश्च यथाकामविनिर्गमः ॥ १००
सर्व्वस्याभिभवश्चैव सर्व्वगुह्यार्थदर्शनम् ।
कर्म्मानुरूपनिर्म्माणं वशित्वं प्रियदर्शनम् ॥ १०१
संसारदर्शनञ्चैव भोगैरैन्द्रैः समन्वितम् ।
एतच्चान्द्रमसैश्वर्य्यं मानसं गुणतोऽधिकम् ॥ १०२
छेदनं ताड़नञ्चैव बन्धनं मोचनं तथा ।
ग्रहणं सर्व्वभूतानां संसारवशवर्त्तिनाम् ॥ १०३
प्रसादश्चापि सर्व्वेषां मृत्युकालजयस्तथा ।
आभिमानिकमैश्वर्य्यं प्राजापत्यं प्रचक्षते ॥ १०४
एतच्चान्द्रमसैर्भोगैः षट्पञ्चाशद्गुणं महत् ।
सर्गः सङ्कल्पमात्रेण त्राणं संहरणं तथा ॥ १०५
स्वाधिकारश्च सर्व्वेषां भूतचित्तप्रवर्त्तनम् ।
असादृश्यञ्च सर्व्वस्य निर्म्माणं जगतः पृथक् ॥ १०६
शुभाशुभस्य करणं प्राजापत्यैश्च संयुतम् ।
चतुःषष्टिगुणं ब्राह्ममैश्वर्य्यं तत् प्रचक्षते ॥ १०७
बौद्धादस्मात् परं गौणमैश्वर्य्यं प्राकृतं विदुः ।
वैष्णवं तत् समाख्यातं तस्यैव भुवने स्थितम् ॥ १०८
ब्रह्मणैतद्गुणं सर्व्वं वेत्तुमन्यैर्न शक्यते ।
तत्पौरुषञ्च गौणञ्च गाणेशं पदमैश्वरम् ॥ १०९
विष्णुना तत्पदं किञ्चिज्ज्ञातुमन्यैर्न शक्यते ।
विज्ञानसिद्धयश्चैव सर्व्वा एवौपसर्गिकाः ॥ ११०
निरोद्धव्याः प्रयत्नेन वैराग्येण परेण तु ।
प्रतिभादिष्वशुद्धेषु गुणेष्वासक्तचेतसः ॥ १११
न सिध्येत् परमैश्वर्य्यमव्ययं सार्व्वकामिकम् ।
तस्माद्गुणांश्च भोगांश्च देवासुरमहीभृताम् ॥ ११२
तृणवद्यस्त्यजेत् तस्य योगसिद्धिः परा भवेत् ।
अथवानुग्रहेच्छायां जगतो विचरेन्मुनिः ॥ ११३
यथाकामं गुणान् भोगान् भुक्त्वा मुक्तिं प्रयास्यति ।
अथ प्रयोगं योगस्य वक्ष्ये शृणु समाहितः ॥ ११४
शुभे काले शुभे देशे शिवक्षेत्रादिके पुनः ।
विजने जन्तुरहिते निःशब्दे बाधवर्ज्जिते ॥ ११५
सुप्रलिप्ते स्थले सौम्ये गन्धधूपादिवासिते ।
मुक्तपुष्पसमाकीर्णे वितानादिविचित्रिते ॥ ११६
कुश-पुष्प-समित्तोय-फल-मूलसमन्विते ।
नाग्न्यभ्याशे जलाभ्याशे शुष्कपर्णमयेऽपि वा ॥ ११७
न दंश-मशकाकीर्णे सर्प-श्वापदसङ्कुले ।
न च दुष्टमृगाकीर्णे सभये दुर्ज्जनावृते ॥ ११८
श्मशाने चैत्यवल्मीके जीर्णागारे चतुष्पथे ।
नदी-नद-समुद्राणां तीरे रथ्यान्तरेऽपि वा ॥ ११९
न जीर्णोद्यानगोष्ठादौ नानिष्टे न च निन्दिते ।
नाजीर्णाम्लरसोद्गारे न च विण्मूत्रदूषिते ॥ १२०
न छर्द्दिगो नातिसारे च नातिभुक्तः श्रमान्वितः ।
न चातिचिन्ताकुलितो न चातिक्षुत्पिपासितः ॥ १२१
नापि स्वगुरुकर्म्मादौ प्रसक्तो योगमाचरेत् ।
युक्ताहार-विहारश्च युक्तचेष्टश्च कर्म्मसु ॥ १२२
युक्तनिद्रा च बोधश्च सर्व्वायासविवर्ज्जितः ।
आसनं मृदुलं रम्यं विपुलं सुषमं शुचि ॥ १२३
मृदुचर्म्मपरीधानं सच्चावृक्तं शुभं सुखम् ।
कल्पयित्वा समारुह्य समं स्थिरसुखं यथा ॥ १२४
पद्मक-स्वस्तिकादीनामभ्यसेदासनेषु च ।
अभिवन्द्य स्वगुर्व्वन्तानभिवाद्याननुक्रमात् ॥ १२५
ऋजुग्रीव-शिरो-वक्षा नातिश्लिष्टोष्ठलोचनः ।
किञ्चिदुन्नामितशिरा दन्तैर्दन्तान् न संस्पृशेत् ॥ १२६
दन्ताग्रसंस्थितां जिह्वामचलां सन्निवेश्य च ।
पार्ष्णिभ्यां वृषणौ रक्षंस्तथा प्रजननं पुनः ॥ १२७
जर्व्वोरुपरि संस्थाप्य बाहू तिर्य्यगयत्नतः ।
दक्षिणं करपृष्ठन्तु न्यस्य वामतलोपरि ॥ १२८
उन्नाम्य शनकैः पृष्ठमुरोऽवष्टभ्य चाग्रतः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १२९
संभृतप्राणसञ्चारः पाषाण इव निश्चलः ।
स्वदेहायतनस्यान्तर्विचिन्त्य शिवमम्बया ॥ १३०
हृत्पद्मपीठिकामध्ये ध्यानयज्ञेन पूजयेत् ।

भ्रूवौ नासाग्रतो नाभौ कण्ठे वा तालुरन्ध्रयोः ॥ १३१
भ्रूमध्ये द्वादशान्ते वा ललाटे मूर्द्ध्नि वा स्मरेत्।
परिकल्प्य यथान्यायं शिवयोः परमासनम् ॥ १३२
तत्र सावरणं वापि निरावरणमेव वा।
द्विदले षोड़शारे वा द्वादशारे यथाविधि ॥ १३३
दशारे वा षड़स्रे वा चतुरस्रे शिवं स्मरेत्।
भ्रुवोरन्तरतः पद्मं द्विदलं तड़िदुज्ज्वलम् ॥ १३४
भ्रूमध्यस्थारविन्दस्य क्रमाद्वै दक्षिणोत्तरे।
विद्युल्लमानवर्णे च पर्णे वर्णावसानके ॥ १३५
षोड़शारस्य पत्राणि स्वराः षोड़श तानि वै।
पूर्व्वादीनि क्रमादेतत् पद्मकन्दस्य मूलतः ॥ १३६
ककारादि-ठकारान्ता वर्णाः पर्णान्यनुक्रमात्।
भानुवर्णस्य पद्मस्य ध्येयं तद्धृदयान्तरे॥ १३७
वर्णाः पर्णानि पद्मस्य नाभेरुपरि पृष्ठतः।
गोक्षीरधवलस्योक्ता डादि-फान्ता यथाक्रमम् ॥१३८
अधोदलस्याम्बुजस्य एतस्य च दलानि षट्।
विधूमाङ्गारवर्णस्य वर्णा बाद्याश्च लान्तिमाः ॥ १३९
मूलाधारारविन्दस्य हेमाभस्य यथाक्रमम्।
वकारादि-सकारान्ता वर्णाः पर्णमयाः स्थिताः॥१४०
एतेष्वथारविन्देषु यत्रैवाभिरतं मनः।
तत्रैव देवं देवीञ्च चिन्तयेद्धीरया धिया ॥ १४१
अङ्गुष्ठमात्रममलं दीप्यमानं समन्ततः।
शुद्धदीपशिखाकारं स्वशक्त्या पूर्णमण्डितम् ॥ १४२
इन्दुरेखासमाकारं ताराकारमथापि वा।
नीवारशूकसदृशं बिससूत्राभमेव वा ॥ १४३
कदम्बगोलकाकारं तुषारकणिकोपमम्।
क्षित्यादितत्त्वविजयं ध्याता यद्यभिवाञ्छति ॥ १४४
तत्तत्त्वाधिपामेवं मूर्त्तिं स्थूलां विचिन्तयेत्।
सदाशिवान्ता ब्रह्माद्या भवाद्याश्चाष्टमूर्त्तयः ॥ १४५
शिवस्य मूर्त्तयः स्थूलाः शिवशास्त्रे विनिश्चिताः।
घोरा मिश्राः प्रशान्ताश्च मूर्त्तयस्ता मुनीश्वरैः ॥ १४६
फलाभिलाषसहितैश्चिन्त्याश्चिन्ताविशारदैः।
घोराश्चेच्चिन्तिताः कुर्य्युः पापरोगपरिक्षयम् ॥१४७
सर्व्वसिद्धिप्रदा मिश्राः प्रशान्ताः शान्तिदायकाः।
सिध्यन्ति सिद्धयः शीघ्रं घोरे वपुषि चिन्तिते ॥ १४८
चिरेण मिश्रे सौम्ये तु न सद्यो न चिरादपि।
सौम्ये मुक्तिर्विशेषेण शान्तिः प्रज्ञा प्रसिध्यति ॥ १४९
सिध्यन्ति सिद्धयश्चास्मात् क्रमशो नात्र संशयः।
श्रीकण्ठनाथं स्मरतां सद्यः सर्व्वार्थसिद्धयः ॥ १५०
प्रसिध्यन्तीति मत्वैके तं वै ध्यायन्ति योगिनः।
स्थित्यर्थं मनसः केचित् स्थूलध्यानं प्रकुर्व्वते ॥ १५१
स्थूले तु निश्चलं चेतो भवेत् सूक्ष्मे तु सुस्थितम्।
शिवे तु चिन्तिते साक्षात् सर्व्वाः सिध्यन्ति सिद्धयः॥१५२
मूर्त्यन्तरेषु ध्यातेषु शैवी शिद्धिर्न सिध्यति।
मूर्त्यन्तरेषु ध्यातेषु शिवरूपं विचिन्तयेत् ॥ १५३
लक्ष्याभ्यासादिना यद्वयच्छिवरूपं विचिन्तयेत्।
लक्षयेन्मनसः स्थैर्य्यं तत् तद्ध्यायेत् पुनः पुनः ॥ १५४
ध्यानमादौ सविषयं ततो निर्व्विषयं जगुः।
तत्र निर्व्विषयं ध्यानं नास्तीत्येव सतां मतम् ॥ १५५
बुद्धेर्हि सन्ततिः काचिद्ध्यानमित्यभिधीयते।
तेन निर्व्विषया बुद्धिः केवलेह प्रवर्त्तते ॥ १५६
तस्मात् सविषयं ध्यानं बालार्ककिरणाश्रयम् (क)।
सूक्ष्माश्रयं निर्व्विषयं नापरं परमार्थतः ॥ १५७
यद्वा सविषयं ध्यानं तत् साकारसमाश्रयम्।
निराकारात्मसंवित्तिर्ध्यानं निर्व्विषयं मतम् ॥ १५८
निर्व्वीजञ्च सवीजञ्च तदेव ध्यानमुच्यते।
निराकाराश्रयत्वेन साकाराश्रयतस्तथा ॥ १५९
तस्मात् सविषयं ध्यानमादौ कृत्वा सवीजकम्।
अन्ते निर्व्विषयं कुर्य्यान्निर्व्वीजं सर्व्वसिद्धये ॥ १६०
प्राणायामेन सिध्यन्ति दिव्याः शान्त्यादयः क्रमात्।
शान्तिः प्रशान्तिर्दीप्तिश्च प्रसादश्च ततः परम् ॥ १६१
शमः सर्व्वापदाञ्चैव शान्तिरित्यभिधीयते।
तमसोऽन्तर्वहिर्नाशः प्रशान्तिः परिगीयते ॥ १६२
वहिरन्तःप्रकाशो यो दीप्तिरित्यभिधीयते।
स्वस्थता या तु सा बुद्धेः प्रसादः परिकीर्त्तितः ॥१६३
कारणानि च सर्व्वाणि सवाह्याभ्यन्तराणि च।
बुद्धेः प्रसादतः क्षिप्रं प्रसन्नानि भवन्त्युत ॥ १६४
ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम्।
एतच्चतुष्टयं ज्ञात्वा ध्याता ध्यानं समाचरेत् ॥ १६५
ज्ञान-वैराग्यसम्पन्नो नित्यमुद्युक्तमानसः।
श्रद्दधानः प्रसन्नात्मा ध्याता सद्भिरुदाहृतः ॥ १६६

(क) स्थूलाकारसमाश्रयमिति पाठान्तरं क्वचित्।

ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्मुहुः ।
अव्याक्षिप्तेन मनसा ध्यानमित्यभिधीयते ॥ १६७
बुद्धिप्रवाहरूपस्य ध्यानस्यास्यावलम्बनम् ।
ध्येयमित्युच्यते सद्भिस्तच्च साम्बः स्वयं शिवः ॥ १६८
विमुक्तिप्रत्ययः पूर्व्वमैश्वर्य्यञ्चाणिमादिकम् ।
शिवध्यानस्य तस्यास्य साक्षादुक्तं प्रयोजनम् ॥ १६९
यस्मात् सौख्यञ्च मोक्षञ्च ध्यानादुभयमाप्नुयात् ।
तस्मात् सर्व्वं परित्यज्य ध्यानयुक्तो भवेन्नरः ॥ १७०
नास्ति ध्यानं विना ज्ञानं नास्ति ध्यानमयोगिनः ।
ध्यानं ज्ञानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ॥ १७१
ज्ञानं प्रसन्नमेकाग्रमशेषोपाधिवर्ज्जितम् ।
योगाभ्यासेन युक्तस्य योगिनस्त्वेव सिध्यति ॥ १७२
प्रक्षीणाशेषपापानां ज्ञाने ध्याने भवेन्मतिः ।
पापोपहतबुद्धीनां तद्वार्त्तापि सुदुर्लभा ॥ १७३
यथा वह्निर्महादीप्तः शुष्कमार्द्रञ्च निर्दहेत् ।
तथा शुभाशुभं कर्म्म ज्ञानाग्निर्दहते क्षणात् ॥ १७४
अत्यल्पोऽपि यथा दीपः सुमहन्नाशयेत् तमः ।
योगाभ्यासस्तथाल्पोऽपि महापापं विनाशयेत् ॥ १७५
ध्यायतः क्षणमात्रं वा श्रद्धया परमेश्वरम् ।
यद्भवेत् सुमहच्छ्रेयस्तस्यान्तो नैव विद्यते ॥ १७६
नास्ति ध्यानसमं तीर्थं नास्ति ध्यानसमं तपः ।
नास्ति ध्यानसमो यज्ञस्तस्माद्ध्यानं समाचरेत् ॥ १७७
तीर्थानि तोयपूर्णानि देवान् पाषाणमृण्मयान् ।
योगिनो न प्रपद्यन्ते स्वात्मप्रत्ययकारणात् ॥ १७८
योगिनाञ्च वपुः सूक्ष्मं भवेत् प्रत्यक्षमीश्वरम् ।
यथा स्थूलमयुक्तानां मृत्काष्ठाद्यैः प्रकल्पितम् ॥ १७९
यथेहान्तश्चरा राज्ञः प्रियाः स्युर्न बहिश्चराः ।
तथान्तर्ध्याननिरताः प्रियाः शम्भोर्न कर्म्मिणः ॥ १८०
बहिःकरा यथा लोके नातीव फलभागिनः ।
दृष्टा नरेन्द्रभवने तद्वदत्रापि कर्म्मिणः ॥ १८१
यद्यन्तरा विपद्येत ज्ञानयोगार्थमुद्यतः ।
योगस्योद्दयोगमात्रेण रुद्रलोकं गमिष्यति ॥ १८२
अनुभूय सुखं तत्र सञ्जातो योगिनां कुले ।
ज्ञानयोगं पुनर्लब्ध्वा संसारमतिवर्त्तते ॥ १८३
जिज्ञासुरपि योगस्य यां गतिं लभते नरः ।
न तां गतिमवाप्नोति सर्व्वैरपि महामखैः ॥ १८४
द्विजानां वेदविदुषां कोटिं सम्पूज्य यत् फलम् ।
भिक्षामात्रप्रदानेन तत् फलं शिवयोगिने ॥ १८५
यज्ञाग्निहोत्रदानेषु तीर्थहोमेषु यत् फलम् ।
योगिनामन्नदानेन तत् समस्तं फलं लभेत् ॥ १८६
ये चापवादं कुर्व्वन्ति विमूढ़ाः शिवयोगिनाम् ।
श्रोतृभिस्ते प्रपद्यन्ते नरकेष्वा महीक्षयात् ॥ १८७
सति श्रोतरि वक्ता स्यादपवादस्य योगिनाम् ।
तस्माच्छ्रोता च पापीयांस्तद्दण्डः सुमहानतः ॥ १८८
ये पुनः सततं भक्त्या भजन्ति शिवयोगिनः ।
विन्दन्ति ते महाभोगानन्ते योगञ्च शाङ्करम् ॥ १८९
भोगयोगार्थिभिस्तस्मात् सम्पूज्याः शिवयोगिनः ।
प्रतिश्रयान्नपानाद्यैः शय्या-प्रावरणादिभिः ॥ १९०
योगधर्म्मः ससारत्वादभेद्यः पापमुद्गरैः ।
वज्रं तण्डुलवज्ज्ञेयं तथा पापेन योगिनः ॥ १९१
न लिप्यन्ते च तापाद्यैः पद्मपत्रं यथाम्भसा ।
यस्मिन् देशे वसेन्नित्यं शिवयोगरतो मुनिः ॥ १९२
सोऽपि देशो भवेत् पूतः स पूत इति किं पुनः ।
तस्मात् सर्व्वं परित्यज्य कृत्यमन्यद्विचक्षणः ॥ १९३
सर्व्वदुःखप्रहाणाय शिवयोगं समभ्यसेत् ।
सिद्धयोगफलो योगी लोकानां हितकाम्यया ॥ १९४
भोगान् भुक्त्वा यथाकामं विहरेद्वात्र वर्त्तताम् ।
अथवा क्षुद्रमित्येव मत्वा वैषयिकं सुखम् ॥ १९५
त्यक्त्वा विरागयोगेण स्वेच्छया(क)कर्म्म मुच्यताम् ॥ १९६
यस्त्वासन्नां मृतिं मर्त्यो दृष्ट्वारिष्टञ्च भूयशः ।
स योगारम्भनिरतः शिवक्षेत्रं समाश्रयेत् ॥ १९७
स तत्र निवसन्नेव यदि धीरमनातुरः ।
प्राणान् विनापि रोगाद्यैः स्वयमेव परित्यजेत् ॥ १९८
कृत्वाप्यनशनं वैधं हुत्वा चाङ्गं शिवानले ।
क्षिप्त्वा वा शिवतीर्थेषु स्वदेहमवगाहनात् ॥ १९९
शिवशास्त्रोक्तविधिवत् प्राणान् यस्तु परित्यजेत् ।
सद्य एव विमुच्येत न चासावात्मघातकः ॥ २००
रोगाद्यैर्वाथ विवशः शिवक्षेत्रं समाश्रितः ।
म्रियते यदि सोऽप्येवं मुच्यते नात्र संशयः ॥ २०१
तथा विशिष्टं तत्रापि मरणान्तूत्तरोत्तरम् ।
निवृत्त्यादिवशाद्देहो भूतेषु च विलीयते ॥ २०२

(क) स्वेच्छयोत्क्रम्येति क्वचित् पाठान्तरम् ।

शैवक्षेत्रे विशेषतः।
लैङ्कयोत्क्रम्य मरणं शिवक्षेत्रे विशेषतः।
उत्तमं सर्व्वमरणादुत्मनापद्योगदम् ॥ २०३
शिवनिन्दारतं हत्वा पीड़ितः स्वयमेव वा।
यस्त्यजेद्दुस्त्यजान् प्राणान् न स भूयः प्रजायते॥२०४
शिवनिन्दारतं हन्तुमशक्तो यः स्वयं मृतः।
सद्यएव विमुच्येत त्रिःसप्तकुलसंयुतः ॥ २०५
शिवार्थं यस्त्यजेत् प्राणान् शिवभक्तार्थमेव वा।
शिवाचारार्थमथवा शिवविद्यार्थमेव वा ॥ २०६
न तेन सदृशः कश्चिन्मुक्तिमार्गस्थितो नरः।
तस्माच्छीघ्रतरा मुक्तिस्तस्य संसारमण्डलात् ॥ २०७
एतेष्वन्यतमोपायं कथमप्यवलम्ब्य वा।
षड़ध्वशुद्धिं विधिवत् प्राप्तो वा म्रियते यदि ॥ २०८
पशूनामिव तस्येह न कुर्य्यादौर्द्ध्वदेहिकम्।
नैवाशौचं प्रसज्येत तत्पुत्रादेर्विशेषतः ॥ २०९
खनेद्वा भुवि तद्देहं दहेद्वा शुचिनाग्निना।
क्षिपेद्वाप्सु शिवास्वेव त्यजेद्वा काष्ठलोष्टवत् ॥ २१०
श्रथैनमपि चोद्दिश्य कर्म्म चेत् कर्त्तुमीप्सितम्।
कल्याणमेव कुर्व्वीत शिवभक्तांश्च तर्पयेत् ॥ २११
धनं तस्य भजेच्छैवं शैवी चेदस्ति सन्ततिः।
नास्ति चेत् तच्छिवेदद्यान्नादद्यात् पशुसन्ततिः॥२१२

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे साङ्ख्ययोगनिरूपणं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः।

सूत उवाच।

इति स विजितमन्योर्यादवेनोपमन्यो-
रधिगतमभिधाय ज्ञानयोगं मुनिभ्यः।
प्रणतिमुपगतेभ्यस्तेभ्य उद्भावितात्मा
सपदि वियति वायुः सायमन्तर्हितोऽभूत् ॥ १
ततः प्रभातसमये नैमिषीयास्तपोधनाः।
सत्रान्तेऽवभृथं कर्त्तुं सर्व्व एव समुद्ययुः ॥ २
तदा ब्रह्मसमादेशाद्देवी साक्षात् सरस्वती।
प्रसन्ना स्वादुसलिला प्रावर्त्तत नदी शुभा ॥ ३
सरस्वतीं नदीं दृष्ट्वा मुनयो हृष्टमानसाः।
समाप्य सत्रं प्रारब्धं चक्रुस्तत्रावगाहनम् ॥ ४
अथ सन्तर्प्य देवादींस्तदीयैः सलिलैः शिवैः।
स्मरन्तः पूर्व्ववृत्तान्तं ययुर्वाराणसीं प्रति ॥ ५
तदा ते हिमवत्पादात् पतन्तीं दक्षिणामुखीम्।
दृष्ट्वा भागीरथीं तत्र स्नात्वा तत्तीरतो ययुः ॥ ६
ततो वाराणसीं प्राप्य मुदिताः सर्व्व एव ते।
तत्रोत्तरप्रवाहायां गङ्गायामवगाह्य च ॥ ७
अविमुक्तेश्वरं लिङ्गं दृष्ट्वाभ्यर्च्य विधानतः।
प्रयातुमुद्यतास्तत्र ददृशुर्दिवि भास्वरम् ॥ ८
सूर्य्यकोटिप्रतीकाशं तेजो दिव्यं महाद्भुतम्।
आत्मप्रभावितानेन व्याप्तसर्व्वदिगन्तरम् ॥ ९
अथ पाशुपताः सिद्धा भस्मसञ्छन्नविग्रहाः।
मुनयोऽभ्येत्य शतशो लीनाः स्युस्तत्र तेजसि ॥ १०
तथा विलीयमानेषु तपस्विषु महात्मसु।
सद्यस्तिरोदधे तेजस्तदद्भुतमिवाभवत् ॥ ११
तद्दृष्ट्वा महदाश्चर्य्यं नैमिषीया महर्षयः।
किमेतदित्यजानन्तो ययुर्ब्रह्मवनं प्रति ॥ १२
प्रागेवैषान्तु गमनात् पवनो लोकपावनः।
दर्शनं नैमिषीयाणां संवादं तैः सहात्मनः ॥ १३
शुद्धां बुद्धिं ततस्तेषां साम्बे सानुचरे शिवे।
समाप्तिञ्चापि सत्रस्य दीर्घपूर्व्वस्य सत्रिणाम् ॥ १४
विज्ञाप्य जगतां धात्रे ब्रह्मणे ब्रह्मयोनये।
स्वकार्य्ये तदनुज्ञातो जगाम स्वपुरं प्रति ॥ १५
यथास्थानं गतो ब्रह्मा तुम्बुरोर्नारदस्य च।
परस्परं स्पर्द्धितयोर्गाने विवदमानयोः ॥ १६
तदुद्भावितगानोत्थरसे माध्यस्थमाचरन्।
गन्धर्व्वैरप्सरोभिश्च सुखमास्ते निषेवितः ॥ १७
तदानवसरादेव द्वाःस्थैर्द्वारि निवारिताः।
मुनयो ब्रह्मभवनाद्बहिःपार्श्वमुपाविशन् ॥ १८
अथ तुम्बुरुणा गाने समतां प्राप्य नारदः।
साहचर्य्येष्वनुज्ञातो ब्रह्मणा परमेष्ठिना ॥ १९
त्यक्त्वा परस्परस्पर्द्धां मैत्रीञ्च परमां गतः।
सह तेनाप्सरोभिश्च गन्धर्व्वैश्च समावृतः ॥ २०
उपवीणयितुं देवं नकुलीश्वरमीश्वरम्।
भवनान्निर्ययौ धातुर्जलदादंशुमानिव ॥ २१
तं दृष्ट्वा षट्कुलीयास्ते नारदं मुनिगोवृषम्।

प्रणम्यावसरं शम्भोः पप्रच्छुः परमादरात् ॥ २२
स चावसर एवायमितोऽन्तर्गम्यतामिति ।
वदन् यथावन्यपरस्वरया परया युतः ॥ २३
ततो द्वारि स्थिता ये वै ब्रह्मणे तान् न्यवेदयन् ।
ततस्ते विविशुर्वेश्म पिण्डीभूयाण्डजन्मनः ॥ २४
प्रविश्य दूरतो देवं प्रणम्य भुवि दण्डवत् ।
समीपे तदनुज्ञाताः परिवृत्योपतस्थिरे ॥ २५
तांस्तत्रोपस्थितान् पृष्ट्वा कुशलं कमलासनः ।
वृत्तान्तं वो मया ज्ञातं वायुरेवाह पूर्व्वतः ॥ २६
भवद्भिः किं कृतं पश्चान्मारुतेऽन्तर्हिते सति ।
इत्युक्तवति देवेशे मुनयोऽवभृथात् परम् ॥ २७
गङ्गातीर्थस्य गमनं यात्रां वाराणसीं प्रति ।
दर्शनं तत्र लिङ्गानां स्थापितानां सुरेश्वरैः ॥ २८
अविमुक्तेश्वरस्यापि लिङ्गस्याभ्यर्च्चनं सकृत् (क) ।
आकाशे महतस्तस्य तेजोराशेश्च दर्शनम् ॥ २९
मुनीनां विलयं तत्र निरोधं तेजसस्ततः ।
याथात्म्यावेदनं तस्य चिन्तितस्यापि चात्मभिः ॥ ३०
सर्व्वं सविस्तरं तस्मै प्रणम्याङ्गर्मुहुर्म्मुहुः ।
मुनिभिः कथितं श्रुत्वा विश्वकर्म्मा चतुर्म्मुखः ॥ ३१
कम्पयित्वा शिरः किञ्चित् प्राह गम्भीरया गिरा ।
प्रत्यासीदति युष्माकं सिद्धिरामुष्मिकी परा ॥ ३२
भवद्भिर्दीर्घसत्रेण चिरमाराधितः प्रभुः ।
प्रसादाभिमुखो भूत इतिभूतार्थसूचितम् ॥ ३३
वाराणस्यान्तु युष्माभिर्यद्दृष्टं दिवि दीप्तिमत् ।
तल्लिङ्गसंश्रितं साक्षात् तेजो माहेश्वरं परम् ॥ ३४
तत्र लीनाश्च मुनयः श्रौतपाशुपतव्रताः ।
मुक्ता बभूवुः स्वस्थाश्च नैष्ठिका दग्धकिल्बिषाः ॥ ३५
प्राप्यानेन पथा मुक्तिरचिराद्भवतामपि ।
स चायमर्थः सूच्येत युष्मद्दृष्टेन तेजसा ॥ ३६
तत्र वः काल एवैष दैवादुपनतः स्वयम् ।
प्रयान्तु दक्षिणं मेरोः शिखरं देवसेवितम् ॥ ३७
सनत्कुमारो यत्रास्ते मम पुत्त्रः परो मुनिः ।
प्रतीक्ष्यागमनं साक्षाद्भूतनाथस्य नन्दिनः ॥ ३८
पुरा सनत्कुमारोऽपि दृष्ट्वापि परमेश्वरम् ।
अज्ञानात् सर्व्वयोगीन्द्रमानी विनयदूषितः ॥ ३९

अभ्युत्थानादिकं युक्तमकुर्व्वन्नास्त निर्भयः ।
ततोऽपराधात् क्रुद्धेन महोष्ट्रो नन्दिना कृतः ॥ ४०
अथ कालेन महता तद्दर्थं शोचता मया ।
उपास्य देवं देवीञ्च नन्दिनञ्चानुनीय वै ॥ ४१
कथञ्चिदुष्ट्रता तस्य प्रयत्नेन निवर्त्तिता ।
प्रापिता च यथापूर्व्वं सनत्पूर्व्वां कुमारता ॥ ४२
तदाह च महादेवः स्मयन्निव गणाधिपम् ।
अवज्ञाय हि मामेष तथाहङ्कृतवान् मुनिः ॥ ४३
अतस्त्वमेव याथात्म्यंममास्मै कथयानघ ।
ब्रह्मणः पूर्व्वजः पुत्त्रो मा भून्मूढ़ इति स्मरन् ॥ ४४
मयैष शिष्यस्ते दत्तो मम ज्ञानप्रवर्त्तकः ।
धर्म्माध्यक्षाभिषिकञ्च तव निर्व्वर्त्तयिष्यति ॥ ४५
स एवं व्याहृतो नन्दी सर्व्वभूतगणाग्रणीः ।
पत्युराज्ञापनं मूर्द्ध्ना प्रीतः प्रतिगृहीतवान् ॥ ४६
तथा सनत्कुमारोऽपि मेरौ मदनुशासनात् ।
प्रसादार्थं गणेशस्य तपश्चरति दुश्चरम् ॥ ४७
द्रष्टव्यश्च स युष्माभिः प्रागगणेशसमागमात् ।
तत्प्रसादार्थमचिरान्नन्दी तत्रागमिष्यति ॥ ४८
इति सत्वरमादिश्य प्रेषिता विश्वयोनिना ।
कुमारं शिखरं मेरोर्दक्षिणं मुनयो ययुः ॥ ४९
तत्र स्कन्दसरो नाम सरः सागरसन्निभम् ।
अमृतस्वादुशिशिर-स्वच्छागाधलघूदकम् ॥ ५०
समन्ततः सङ्घटितं स्फटिकोपलसञ्चयैः ।
सर्व्वर्त्तुकुसुमैः फुल्लैश्छादिताखिलदिङ्मुखम् ॥ ५१
सौवर्णैरुत्पलैः पद्मैः कुमुदैस्तारकोपमैः ।
तरङ्गैरभ्रसङ्काशैराकाशमिव भूमिगम् ॥ ५२
सुखावतरणारोहैः स्थूलनीलशिलामयैः ।
सोपानमार्गैं रुचिरैः शोभमानाष्टदिङ्मुखम् ॥ ५३
तत्र तत्रावतीर्णैश्च तत्रोत्तीर्णैश्च भूयशः ।
स्नातैः सितोपवीतैश्च शुक्लकौपीनवल्कलैः ॥ ५४
जटाशिखायुतैर्मुण्डैस्त्रिपुण्ड्रकृतमण्डनैः ।
विरागविशदस्मेर-मुखैर्मुनिकुमारकैः ॥ ५५
घटैः कमलिनीपत्र-पुटैश्च कलशैः शिवैः ।
कमण्डलुभिरन्यैश्च तादृशैः करकादिभिः ॥ ५६
आत्मार्थं च परार्थं च देवतार्थं विशेषतः ।
आनीयमानसलिलमात्तपुष्पञ्च नित्यशः ॥ ५७

(क) अर्च्चेन स्वयथाक्रममिति वा पाठः ।

मर्ल्लशिलारूढ़ैर्नीचानां स्पर्शशङ्कया।
शावरवद्भिर्मुनिभिः कृतभस्माङ्गधूलनैः ॥ ५८
वस्ततोऽप्सु मज्जद्भिरिष्टशिष्टैः शिलागतैः।
तिलैश शाश्वतैः पुष्पैस्त्यक्तदर्भपवित्रकैः ॥ ५९
देवाद्यृषिमध्यञ्च निर्व्वर्त्त्य पितृतर्पणम्।
निवेदयद्भिश्चेभ्यो नित्यस्नानगतान् द्विजान् ॥ ६०
स्थाने स्थाने कृतानेक-बलिपुष्पसमीरणैः।
गौराद्यपूर्व्वं कुर्व्वद्भिः स्थण्डिलेऽभ्यर्च्चनादिकम् ॥ ६१
क्वचिन्निमज्जदुन्मज्जत्प्रशस्तगजयूथपम्।
क्वचिच्च तृषयायात-मृगी-मृग-तुरङ्गमम् ॥ ६२
क्वचित् पीतजलोत्तीर्ण-मयूरवरवारणम्।
क्वचित् कृततटाघात-वृषप्रतिवृषोज्ज्वलम् ॥ ६३
क्वचित् कारण्डवरवैः क्वचित् सारसकूजितैः।
क्वचिच्च कोकनिनदैः क्वचिद्भ्रमरगीतिभिः ॥ ६४
स्नानपानादिकरणैः स्वसम्पदुपजीविभिः।
भयात् प्राणिभिस्तैस्तैर्भाषमाणमिवासकृत् ॥ ६५
वृक्षशाखिशिखालीन-कोकिलाकुलकूजितैः।
आतपोपहतान् सर्व्वानामन्त्रयदिवानिशम् ॥ ६६
उत्तरे तस्य सरसस्तीरे कल्पतरोरधः।
वेद्यां वज्रशिलामय्यां मृदुले मृगचर्म्मणि ॥ ६७
सनत्कुमारमासीनं शश्वद्बालवपुर्द्धरम्।
तत्कालमात्रोपरतं समाधेरचलात्मनः ॥ ६८
उपास्यमानं मुनिभिर्योगीन्द्रैरपि पूजितम्।
ददृशुर्नैमिषीयास्ते प्रणताश्चोपतस्थिरे ॥ ६९
यावत् पृष्टवते तस्मै प्रोचुः स्वागतकारणम्।
तावत्ः शुश्रुवे तावद्दिवि दुन्दुभिनिस्वनः ॥ ७०
ददृशे तत्क्षणे तस्मिन् विमानं भानुसन्निभम्।
गणेश्वरैरसंख्येयैः संवृतञ्च समन्ततः ॥ ७१
अप्सरोगणसङ्कीर्णं रुद्रकन्याभिरावृतम्।
मृदङ्गमुरजोद्घुष्ट-वेणुवीणारवान्वितम् ॥ ७२
विचित्ररत्नविनानाढ्यं मुक्तादामविराजितम्।
मुनिभिः सिद्धगन्धर्व्वैर्यक्ष-चारण-किन्नरैः ॥ ७३
नृत्यद्भिश्चैव गायद्भिर्वादयद्भिश्च संवृतम्।
गौरगोवृषचिह्नेन दिव्यविद्रुमयष्टिना ॥ ७४
कृतगोपुरसत्कारं केतुना मान्यहेतुना।
तस्य मध्ये विमानस्य चामरद्वितयान्तरे ॥ ७५
छत्रस्य मणिदण्डस्य चन्द्रस्येव शुचेरधः।
दिव्यसिंहासनारूढं देव्या सुयशसा (क) सह ॥ ७६
श्रिया च वपुषा चैव त्रिभिश्चापि विलोचनैः।
प्रकारैरपि कृत्यानां प्रत्यभिज्ञापकं प्रभोः ॥ ७७
अविलङ्घ्य जगत्कर्त्तुराज्ञापनमिवागतम्।
सर्व्वानुग्रहणं शम्भोः साक्षादिव पुरः स्थितम् ॥ ७८
शिलादतनयं साक्षाच्छीमच्छूलवरायुधम्।
विश्वेश्वरगणाध्यक्षं विश्वेश्वरमिवापरम् ॥ ७९
विश्वस्यापि विधातॄणां निग्रहानुग्रहक्षमम्।
चतुर्व्वाहुमुदाराङ्गं चन्द्ररेखाविभूषितम् ॥ ८०
कण्ठमध्ये च कालेन कलङ्केनाप्यलङ्कृतम्।
सविग्रहमिवैश्वर्य्यं सामर्थ्यमिव सक्रियम् ॥ ८१
समाप्तमिव निर्व्वाणं सार्व्वज्ञमिव सङ्गतम्।
दृष्ट्वा प्रहृष्टवदनो ब्रह्मपुत्रः सहर्षिभिः ॥ ८२
तस्थौ प्राञ्जलिरुत्थाय तस्यात्मानमिवार्पयन्।
अथासन्नतरे तस्मिन् विमाने चावनिं गते ॥ ८३
प्रणम्य दण्डवद्देवं स्तुत्वा व्यज्ञापयन्मुनीन्।
षट्कुलीया इमे दीर्घं नैमिषे सत्रमास्थिताः।
आगता ब्रह्मणादिष्टा देवसेवाभिकाङ्क्षया ॥ ८४

श्रुत्वा वाक्यं ब्रह्मपुत्रस्य नन्दी
च्छित्त्वा पाशान् दृष्टिपातेन सद्यः।
शैवं धर्म्मञ्चैश्वरं ज्ञानयोगं
दत्त्वा भूयो देवपार्श्वं जगाम ॥ ८५
सनत्कुमारेण च तत् समस्तं
व्यासाय साक्षाद्गुरवे समोक्तम्।
व्यासेन चोक्तं महितेन मह्यं
मया च तद्वः कथितं समासात् ॥ ८६
नावेदविद्भ्यः कथनीयमेतत्
पुराणरत्नं पुरशासनस्य।
नाभक्तशिष्याय न नास्तिकेभ्यो
दत्तं हि मोहान्निरयं ददाति ॥ ८७
मार्गेण वेदानुगतेन येस्तद्
दत्तं गृहीतं पठितं श्रुतं वा।
तेभ्यो मुखे धर्म्मसुखं त्रिवर्गं
निर्व्वाणमन्ते नियतं ददाति ॥ ८८

(क) सुयशयेति क्वचित् पाठः।

परस्परस्योपकृतं भवद्भि-
र्मया च पौराणिकमार्गयोगात्।
अतो गमिष्येऽहमवाप्तकामः
समस्तमेवास्तु शिवं सदा नः॥ ८९

सूते कृताशिषि गते मुनयः सुवृत्ता
यागे च पर्य्यवसिते महिते प्रयागे।
काले कलौ च विषयैः कलुषायमाणे
वाराणसीपरिसरे वसतिं वितेनुः॥ ९०

अथ च ते पशुपाशमुमुक्षया
स्वकृतया कृतपाशुपतव्रताः।
अधिगताखिलबोधसमाधयः
परमनिर्वृतिमापुरनिन्दिताः॥ ९१

इति श्रीशैवे महापुराणे वायवीयसंहिताया-
मुत्तरभागे श्रीकृष्णोपमन्युसंवादे
त्रिंशोऽध्यायः॥ ३०॥

समाप्तोऽयमुत्तर भागः।

समाप्ता चेयं वायवीयसंहिता।

शिवपुराणम्।

धर्म्मसंहिता।

प्रथमोऽध्यायः।

ओँ नमो भगवते वासुदेवाय।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥

जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः।
यस्यास्यकमलगलितं वाङ्मयममृतं जगत् पिबति॥१
यो धत्ते भुवनानि सत्त्वगुणवान् स्रष्टा रजःसंश्रयः
संहर्त्ता तमसान्वितो गुणमयीं मायामतीत्य स्थितः।
सत्यानन्तमनन्तबोधममलं ब्रह्मादिसंज्ञास्पदं
नित्यं तत्त्वसमन्वयादधिगतं पूर्णं शिवं धीमहि॥ २
सूत उवाच।
एकदा देवकीपुत्त्रश्चिन्तयन् रहसि स्थितः।
पूजयामास विधिवदुपमन्युं समागतम्॥ ३
पप्रच्छ सुखमासीनं कं पूजयसि नित्यशः।
एवमुक्तो मुनिश्रेष्ठ उवाच परिहर्षितः॥ ४
चिरकालं मया तप्तं पूर्व्वमेव महत् तपः।
शङ्करः कृपयाविष्टो देवो दर्शनमागतः॥ ५
त्रिभिरंशैः शोभमानमजस्रसुखमव्ययम्।
एकपादं महादंष्ट्रं सज्वालकवलैर्मुखैः॥ ६
दिव्यसहस्रमयूखाणां ज्योतिषातिविराजितम्।
सर्व्वास्त्रप्रवरश्लाघ्यमनेकाक्षं सहस्रपात्॥ ७
यतत् कल्पान्तसमये विश्वं संहरति ध्रुवम्।
नावध्यो यस्य च भवेद्दते देवाऽज्जनार्द्दनात्॥ ८
महेश्वरभुजोत्सृष्टं त्रैलोक्यं सचराचरम्।
निर्द्दहेच्च जगत् कृत्स्नं निमेषार्द्धान्न संशयः॥ ९
तपःस्थो रुद्रपार्श्वस्थं दृष्टवानहमव्ययम्।
गुह्यमस्त्रं परं नान्यत् तत्तुल्यमधिकं हि वा॥ १०
यत्तच्छूलमिति ख्यातं सर्व्वलोकेषु शूलिनः।
दारयेद्दुयन्महीं कृत्स्नां शोषयेद्वुयन्महोदधिम्॥ ११
यौवनाश्वो हतो येन मान्धाता सबलः पुरा।
चक्रवर्त्ती महातेजास्त्रैलोक्यविजयी नृपः॥ १२
दर्पाविष्टस्य गेहे यन्निक्षिप्य लवणासुरः।
शत्रुघ्नं नृपतिं युद्धे समाहूय क्षयं गतः॥ १३
तस्मिन् दैत्ये विनष्टे तु रुद्रहस्ते गतन्तु यत्।
तच्छूलमतितीक्ष्णाग्रं सन्त्रासजननं महत्॥ १
त्रिशिखां भ्रूकुटिं कृत्वा तर्ज्जयन्तमिव स्थितम्।
विधूमानलसङ्काशं बालसूर्य्यमिवोदितम्॥ १५
सर्पहस्तमनिर्द्देश्यं पाशहस्तमिवान्तकम्।
परशुं तीक्ष्णधारञ्च सर्पाद्यैश्च विभूषितम्॥ १६
कालानलदहनाकारं तथा पुरुषविग्रहम्।

यत्तद्भार्गवरामाय क्षत्रियान्तकरं रणे ॥ १७
रामो यद्बलमाश्रित्य पूर्व्वं दत्तं कपर्द्दिना।
प्रदर्शु तं गृहीत्वासौ शिवदत्तं महामनाः ॥ १८
त्रिःसप्तकृत्वो यः चत्रं ददाह सुषितो मुनिः।
सुदर्शनं तथा चक्रं सहस्रवदनं विभुम् ॥ १९
द्विसहस्रभुजं देवं ददर्श पुरुषाकृतिम्।
द्विसहस्रेचणं देवं सहस्रचरणाकुलम् ॥ २०
वज्रं शक्तिञ्च तूणीरं खड्गं पाशं यमाङ्कुशम्।
गदाञ्च लोकपालानामस्त्राण्येतानि यानि च ॥ २१
ददर्श तानि सर्व्वाणि भगवद्रुद्रपार्श्वतः।
अग्रदेशे तु देवस्य ब्रह्मा लोकपितामहः ॥ २२
विमानं दिव्यमास्थाय हंसयुक्तं मनोमयम्।
वामपार्श्वस्थितश्चैव शङ्ख-चक्र-गदाधरः ॥ २३
वैनतेयं समास्थाय तथा नारायणः स्थितः।
स्कन्दः शक्तिं समादाय मयूरस्थः सघण्टकः।
देवाः समीपे सन्तस्थौ द्वितीय इव पावकः ॥ २४
नन्दी शूलं समादाय भवाग्रे समवस्थितः।
सर्व्वभूतगणाश्चैव मातरो विविधाः स्थिताः ॥ २५
ते च सर्व्वे महात्मानं परिवार्य्य समन्ततः।
अस्तुवन् विविधैः स्तोत्रैर्महादेवं तदा सुराः ॥ २६
यत् किञ्चिच जगत्यस्मिन् दृश्यते श्रूयतेऽथवा।
तत् सर्व्वं भगवत्पार्श्वे निरीच्याहं सुविस्मितः ॥ २७
सुमहद्धैर्य्यमालम्ब्य प्राञ्जलिर्विविधैः स्तवैः।
स च तं शङ्करं दृष्ट्वा वाष्पगद्गदया गिरा ॥ २८
पूजयामास विधिवदहं श्रद्धासमन्वितः।
भगवानथ सुप्रीतो मामाह प्रहसन्निव ॥ २९
न विचालयितुं शक्यो मया विप्र पुनः पुनः।
परीचितोऽसि भद्रं ते भवान् भक्त्या मदीयया ॥ ३०
तस्मादरय भद्रं ते वरं देवेषु दुर्लभम्।
स च तं प्राञ्जलिर्भूत्वा प्राह भक्त्यानुकम्पितम् ॥ ३१
भगवन् यदि तुष्टोऽसि यदि भक्तिः स्थिरा मयि।
तेन सत्येन मे ज्ञानं त्रिकालविषयं विभो ॥ ३२
प्रयच्छ भक्तिं विपुलां त्वयि चाव्यभिचारिणीम्।
सान्वयस्यापि नित्यञ्च भूरि चीरौदनं विभो ॥ ३३
ममास्तु तव सान्निध्यं नित्यञ्चैवाश्रमे विभो।
एवमुक्तः स तं प्राह वर्ज्जितस्त्वं भविष्यसि ॥ ३४
जरामरणजैर्दोषैः सर्व्वकामप्रदो हरः।
मुनीनां पूजनीयश्च यशोधनसमन्वितः ॥ ३५
शीलरूपगुणैश्वर्य्यं मत्प्रसादात् पदे पदे।
चीरोदसागरस्यैव सान्निध्यं पयसां निधेः ॥ ३६
तत्र ते भविता नित्यं यत्र यत्रेच्छसे मुने।
अमृतात्म तु तत् चीरं यावत् संयास्यते ततः ॥ ३७
इमं वैवस्वतं कल्पं पश्यसे बन्धुभिः सह।
लप्स्यते त्वाचयन्त्वस्तु प्रदास्यामि सदैव हि ॥ ३८
सान्निध्यमाश्रमे तुभ्यं मयि भक्तिश्च सुस्थिरा।
दास्यामि दर्शनं वत्स स्मृतश्च भवता सुखम् ॥ ३९
तिष्ठ वत्स यथाकामं नोत्कण्ठां कर्त्तुमर्हसि।
एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत ॥ ४०
ममेशानो वरान् दत्त्वा सूर्य्यकोटिसमप्रभः।
एवं दृष्टो मया कृष्ण यदुक्तं तेन धीमता ॥ ४१
तदवाप्तञ्च मे सर्व्वं देवदेवसमाधिना।
प्रत्यचञ्चैव ते याता गन्धर्व्वाप्सरसस्तथा ॥ ४२
ऋषीन् विद्याधरांश्चैव पश्य सिद्धान् व्यवस्थितान्।
पश्य वृचान् मनोरम्यान् स्निग्धपत्रान् सुगन्धिनः ॥ ४३
सर्व्वर्त्तुकुसुमैर्युक्तान् सदा पुष्पफलान्वितान्।
सर्व्वमेतन्महाबाहो ईश्वरस्य महात्मनः ॥ ४४
प्रसादाद्देवदेवस्य विश्वभावसमन्वितम् ॥ ४५

इति श्रीशैवे महापुराणे धर्म्मसंहितायां शिव-
माहात्म्यनिरूपणं नाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः।

उपमन्युरुवाच।

ममास्ति लखिलं ज्ञानं प्रसादाच्छूलपाणिनः।
भूतं भव्यं भविष्यञ्च सर्व्वं जानामि तत्त्वतः ॥ १
तमहं दृष्टवान् देवमपि देवासुरेश्वरम्।
येन पश्यन्त्यनाराध्यं कोऽन्यो धन्यतरो मया ॥ २
षड्विंशकमिति ख्यातं परं तत्त्वं सनातनम्।
एतद्ध्यायन्ति विद्वांसो यत्तत् परममक्षरम् ॥ ३
सर्व्वतत्त्वविधानज्ञः सर्व्वतत्त्वार्थदर्शनः।
स एव भगवान् देवः प्रधानपुरुषेश्वरः ॥ ४
योऽसृजद्दक्षिणात् पार्श्वाद्ब्रह्माणं लोककारणम्।

...शाश्वतात् सृजद्विष्णुं लोकरक्षार्थमीश्वरम् ॥ ५
...कल्पान्ते चैव सम्प्राप्ते रुद्रमङ्गात् सृजत्प्रभुः ।
...तेन संहरेत् कृत्स्नं जगत् स्थावर-जङ्गमम् ॥ ६
युगान्ते सर्व्वभूतानि संवर्त्तक इवानलः ।
...कालो भूत्वा महादेवो ग्रसमानः स तिष्ठति ॥ ७
सर्व्वगः सर्व्वभूतात्मा सर्व्वभूतोद्भवोद्भवः ।
आस्ते सर्व्वगतो देवो अदृश्यः सर्व्वदैवतैः ॥ ८
अतस्त्वं पुत्रलाभाय समाराधय शङ्करम् ।
...तैर्यैराराधनात् प्राप्तं ह्यत्कामं तच्छृणुष्व ह ॥ ९
...शर्व्वात् सर्व्वामरैश्वर्य्यं हिरण्यकशिपुः पुरा ।
...वर्षाणां दश लक्षाणि सोऽलभच्चन्द्रशेखरात् ॥ १०
...तस्याथ पुत्रप्रवरो वर्षायुतमयोधयत् ।
...स च शर्व्ववरादिन्द्रं नन्दनो नाम विश्रुतः ॥ ११
...विष्णोश्चक्रञ्च तद्घोरं वज्रमाखण्डलस्य च ।
...शीर्णं पुराभवत् कृत्स्नं ग्रहस्याङ्गेषु माधव ॥ १२
...शस्त्राणि विहन्त्यङ्गे वरदस्तस्य धीमतः ।
...रहस्यातिबलस्याजौ चक्रं वज्रमुखाण्यपि ॥ १३
...हन्यमानाश्च विबुधा ग्रहेण सुबलीयसा ।
...शिवदत्तवरा जघ्नुरसुरेन्द्राः सुरान् भृशम् ॥ १४
...तुष्टो विद्युत्प्रभस्यापि त्रैलोक्येश्वरतामदात् ।
...शतवर्षसहस्राणि सर्व्वलोकेश्वरोऽभवत् ॥ १५
...तथा पुत्रसहस्राणामयुतञ्च ददौ शिवः ।
...मम चानुचरो नित्यं भवितासीति चाब्रवीत् ॥ १६
...कुशद्वीपे शुभं राज्यमददद्भगवानजः ।
...तथा सृष्टः शतमखो दैत्यो वर्षशतं पुरा ॥ १७
...यः कृत्वा सहस्रन्तु पुराणमलभद्भवात् ।
...याज्ञवल्क्य इति ख्यातो गीतो वेदे पुरा किल ॥१८
...आराध्य स महादेवं प्राप्तवान् ज्ञानमुत्तमम् ।
...वेदव्यासस्तु यो नाम्ना प्राप्तवानतुलं यशः ॥ १९
...सोऽपि शङ्करमाराध्य त्रिकालज्ञानमाप्तवान् ।
...इन्द्रेण वालखिल्यास्तु परीभूतास्तु शङ्करात् ॥ २०
...लेभिरे सोमहर्त्तारं गरुड़ं सर्व्वदुर्ज्जयम् ।
...आपः प्रनष्टाः सर्व्वाश्च पूर्व्वं रोषात् कपर्द्दिनः ॥२१
...सर्व्वे सप्तकपालेन दैवैरिष्ट्वा प्रवर्त्तिताः ।
...अत्रेर्भार्य्या चानुसूया त्रीणि वर्षशतानि च ॥ २२
...मुषलेषु निराहारा सुप्ता शर्व्वात् ततः सुतान् ।

दत्तात्रेयं मुनिं लेभे चन्द्रं दुर्व्वाससं तथा ॥ २३
विकर्णश्च महादेवं तथा भक्तसुखावहम् ।
प्रसाद्य भगवान् सिद्धिं प्राप्तवान् मधुसूदन ॥ २४
शाकल्यः संशितात्मासौ नववर्षशतान्यपि ।
भवमाराधयामास मनोयज्ञेन माधव ॥ २५
तुतोष भगवानाह ग्रन्थकर्त्ता भविष्यसि ।
वत्साक्षया च ते कीर्त्तिस्त्रैलोक्ये प्रभविष्यति ॥ २६
अक्षयञ्च कुलं तेऽस्तु महर्षिभिरलङ्कृतम् ।
भविष्यसि ऋषिश्रेष्ठ सूत्रकर्त्ता ततस्ततः ॥ २७
सावर्णिरिति विख्यात ऋषिरासीत् कृते युगे ।
इह तेन तपस्तप्तं षष्टिवर्षशतान्यथ ॥ २८
तमाह भगवान् रुद्रः साक्षात् तुष्टोऽस्मि तेऽनघ ।
ग्रन्थकृल्लोकविख्यातो भवितास्यजरामरः ॥ २९

उपमन्युरुवाच ।

एवंविधो महादेवः पुण्यः पूर्व्वतरैः स्तुतः ।
समर्च्चितः शुभान् कामान् प्रददाति यथेप्सितान् ॥३०
एकेनैव मुखेनाहं वक्तुं भगवतो गुणाः ।
ये सन्ति तान् न शक्नोमि ह्यपि वर्षशतैरपि ॥ ३१

सनत्कुमार उवाच ।

एतच्छ्रुत्वा वचस्तस्य सोऽब्रवीत् तं महामुनिम् ।
विस्मयं परमं गत्वा ऋषिं प्रयतमानसम् ॥ ३२

वासुदेव उवाच ।

धन्यस्त्वमसि विप्रेन्द्र कश्चत्तोऽस्तीह पुण्यकृत् ।
यस्य देवातिदेवस्ते सान्निध्यं कुरुते श्रमे ॥ ॥ ३३
दर्शनं मुनिशार्दूल दद्यात् स भगवान् शिवः ।
अपि तावन्ममाप्येवं प्रसादं वा करोत्वसौ ॥ ३४

उपमन्युरुवाच ।

अचिरेणैव कालेन महादेवं न संशयः ।
तस्यैव कृपया त्वं वै द्रक्ष्यसे पुरुषोत्तमम् ॥ ३५
षोड़शाष्टौ वरांश्चैव प्राप्स्यसि त्वं महेश्वरात् ।
सपत्नीकात् कथं नादात् त्वं हि देवो जनार्द्दनः ॥३६
पूज्योऽसि दैवतैः सर्व्वैः श्लाघनीयः सदा गुणैः ।
जपयज्ञं ते प्रदास्यामि श्रद्दधानाय चाच्युत ॥ ३७
ब्रह्मण्यः श्रद्दधानश्च सत्यं द्रक्ष्यसि शङ्करम् ।
आत्मतुल्यबलं पुत्रं लभिष्यसि महेश्वरात् ॥ ३८
देव ज्ञातोऽसि दृष्टोऽसि पुत्रकामो भगवान् मम ।

व्यास उवाच।

एवं कथयतस्तस्य महादेवाश्रिताः कथाः ॥ ३९
दिनान्यष्टौ प्रयातानि मुहूर्त्तमिव तापसाः।
नवमे तु दिने प्राप्ते मुनिना स च दीक्षितः ॥ ४०
मन्त्रमध्यापितः शार्व्वमथर्व्वशिरसं महत्।
जटी मुण्डी च शम्वी च बभूव नियमान्वितः ॥ ४१
मुनिना दीक्षितः कृष्णो योगकक्षी च मेखली।
मासमेकं निराहारो द्वितीयं जलमात्रभुक् ॥ ४२
मासत्रयं वायुभक्षो बभूव सुसमाहितः।
पदाङ्गुष्ठधृततनुः षष्ठे चोर्द्ध्वभुजस्तथा ॥ ४३
सम्प्राप्ते षोड़शे मासि सन्तुष्टो दर्शनं ददौ।
हरो महेन्द्रचापाढ्ये सर्व्वलोके पयोधरे ॥ ४४
पार्व्वत्या सहितं देवं सहितं चन्द्रशेखरम्।
ब्रह्माद्यैः स्तूयमानन्तु पूजितं सिद्धकोटिभिः ॥ ४५
दिव्यमाल्याम्बरधरं भक्तिनम्रैः सुरासुरैः।
तं दृष्ट्वा प्राञ्जलिः कृष्णो देवं तमजमव्ययम् ॥ ४६
सर्व्वाश्चर्य्यमयं देवं विस्मयोत्फुल्ललोचनः।
नानाविधैः स्तुतिपदैर्व्वाक्ययेनार्च्चयत् तदा ॥ ४७
सहस्रनाम्ना देवेशः स्तुतः कृष्णेन धीमता।
ततो देवाः सगन्धर्व्वा विद्याधरमहोरगाः ॥ ४८
मुमुचुः पुष्पवृष्टिन्तु साधुरावान् मनोगतान्।
निक्षिप्ता पुष्पवृष्टिस्तु वासुदेवस्य मूर्द्धनि ॥ ४९
सिद्धैः समुनिभिश्चैव अप्सरोभिः समं ततः।
पार्व्वत्याश्च मुखं प्रेक्ष्य भगवान् भक्तवत्सलः ॥ ५०
उवाच केशवं तुष्टो रुद्रश्चाथ विड़ौजसः।
कृष्ण जानामि भक्तं त्वां मयि नित्यं दृढ़व्रतः ॥ ५१
वृणीष्वाष्टौ वरान् मत्तः पुण्यांस्त्रैलोक्यदुर्लभान्।
तस्य तद्वचनं श्रुत्वा कृष्णः प्राञ्जलिमान् वरम् ॥ ५२
प्राह धर्म्मे मतिर्नित्यं यशश्चाग्र्यं बलं महत्।
त्वत्सामीप्यं स्थिरा भक्तिस्त्वयि नित्यं ममास्त्विति॥५३
पुत्राणि च दयाद्यानां पुत्राणां मम सन्तु वै।
वध्याश्च रिपवः सर्व्वे संग्रामे बलदर्पिताः ॥ ५४
योगिनामपि सर्व्वेषां भवेयमतिवल्लभः।
तस्य तद्वचनं श्रुत्वा तमाह भगवान् भवः ॥ ५५
सर्व्वं भविष्यतीत्येवं पुनः स प्राह शूलधृक्।
शाम्बो नाम महावीर्य्यः पुत्रस्ते भविता बली ॥ ५६
घोरं संवर्त्तकादित्यः शप्तो मुनिभिरेव च।
मानुषो भवितासीति स ते पुत्रो भविष्यति ॥ ५७
यदन्यत् प्रार्थितं किञ्चित् तत् तत् सर्व्वं लभस्व च।
स तु लब्धवरः सर्व्वान् स्तुतिभिः समतोषयत् ॥ ५८
नानाविधाभिर्वह्वीभिस्तां प्रणम्याथ पार्व्वतीम्।
तमाह पार्व्वती तुष्टा मनोज्ञान् भुवि दुर्लभान् ॥ ५९
गृहाण मत्तश्च वरान् कृष्ण तुष्टास्मि तेऽनघ।
देवि त्वं यदि तुष्टासि वासुदेवः कृताञ्जलिः ॥ ६०
तद्देवाथ तां प्राह चेद्ददासि जगन्मयि।
तपसा तेन सत्येन ब्राह्मणान् प्रति मास्म भूत् ॥ ६१
द्वेषः कदाचिद्भद्रन्तु पूजयेयं द्विजान् सदा।
तुष्टौ च माता-पितरौ नित्यं मम बभूवतुः ॥ ६२
सर्व्वभूतेष्वानुकूल्यं भजेयं यत्रतत्रगः।
कुलप्रसूतिरुचिता ममास्तु तव दर्शनात् ॥ ६३
तर्पयेयं सुरेन्द्रादीन् देवान् यज्ञशतेन तु।
यतीनामतिथीनाञ्च सहस्राण्यथ सप्त च ॥ ६४
भोजयेयं सदा गेहे श्रद्धापूतन्तु भोजनम्।
बान्धवैः सह प्रीतिस्तु नित्यमस्तु सुनिर्वृतिः ॥ ६५
देवि भार्य्यासहस्राणां भवेयं प्राणवल्लभः।
अक्षीणरेताः काम्यञ्च तास्तथापाश्रयं वपुः ॥ ६६
अन्नात् प्रियतरो लोके भवेयं सत्यवादिनि।
तस्य तद्वचनं श्रुत्वा देवी तं प्राह विस्मिता ॥ ६७
एवमस्त्विति भद्रं ते शाश्वती सर्व्वकामदा।
तस्मिंस्तांश्च वरान् दत्त्वा पार्व्वती-परमेश्वरौ ॥ ६८
तत्रैवान्तर्हितस्तौ कृष्णो वै स्वाश्रमं ययौ।
प्रणम्य शिरसा तत्र तं मुनिं केशिहा ततः ॥ ६९
तथावृत्तञ्च तस्मै तत् समाचष्टोपमन्यवे।
स तु तं प्राह कोऽन्यः स्यात् शर्व्वाद्देवाज्जनार्द्दन॥ ७०
महादानपतिर्लोके क्रोधेनापि सुदुःसहः।
ज्ञाने तपसि शौर्य्ये वा स्थैर्य्ये वा पञ्चम एव च ॥ ७१
शृणु शम्भोस्तु गोविन्द देवाश्चर्य्यं महद्यशः।
तच्छ्रुत्वा श्रद्धया युक्तोऽभवच्छम्भोस्तु भक्तिमान् ॥ ७२
भगवान् शङ्करः पूर्व्वं ब्रह्मलोके महात्मना।
स्तुतो नामसहस्रेण तण्डिना ब्रह्मयोगिणा ॥ ७३
सांख्याः पठन्ति तत् स्तोत्रं विस्तीर्णञ्च निघण्टुवत्।
दुर्ज्ञानं मानुषाणान्तु स्तोत्रं केचित् क्वचिद्भुवि ॥ ७४

तोषितोऽराधितः शम्भुः प्रादात् तस्मै त्रिलोचनः।
वरान् यथेप्सितान् पूर्व्वं नामभिरमृतोपमैः ॥ ७५
अविध्यस्युत्तमान् कामान् गच्छ कृष्ण गृहं सुखी।
स्तुतस्तं नमस्कृत्य केशवो द्वारकां ययौ ॥ ७६
अन्येषामपि यद्दत्तं पार्व्वत्याश्च यथेप्सितम्।
सर्व्वाद्दृष्टो लब्धवान् कृष्ण मुनीनां तच्छृणुष्वमे॥ ७७
अविगोकर्णमासाद्य तपस्तप्त्वा शतं समाः।
लेभे पुत्रशतं शर्व्वात् कीर्त्तिञ्चैव तु शाश्वतीम् ॥ ७८
जरा-मृत्युविहीनानां धर्म्मज्ञानां सुवर्च्चसाम्।
अयोनिजानां पुत्राणां शतं वर्षसहस्रिणाम् ॥ ७९
शौनि हेतोर्व्विवादेन गृहीतो ब्रह्महत्यया।
ब्रह्महा त्वमिति प्रोक्तो मुनिभिः परिवर्ज्जितः ॥ ८०
तोषितः शङ्करेणैव तेजस्वी जगतः कृतः।
देदे च पश्यति नित्यमध्यात्मनिरतः शुचिः ॥ ८१
तथा च भार्गवो रामो ह्याराध्य तपसा विभुम्।
रौद्र दुःखितः शर्व्वं पितरं चत्रियैर्हतम् ॥ ८२
तेषां स परशुं लेभे निर्द्ददाह च तेन सः।
निःशङ्कलः चत्रञ्च प्रसन्नात् स महेश्वरात् ॥ ८३
महेन्द्रपर्व्वते रामो घोरं कृत्वोपपातकम्।
नैवशामरश्चैव सोऽद्यापि तपसां निधिः ॥ ८४
लिङ्गार्च्चनरतो नित्यं दृश्यते सिद्धचारणैः।
कल्पान्ते पुनरेवासावृषिः स्थानमवाप्स्यति ॥ ८५
असितस्यानुजः पूर्व्वं पीड़या कृतवांस्तपः।
अनुग्रहेण विश्वस्य देवलो नाम तापसः ॥ ८६
पुरन्दरेण शप्तस्तु यशश्चायुश्च सुस्थिरम्।
सधर्म्मं धर्म्ममलभल्लिङ्गमाराध्य कामदम् ॥ ८७
चाक्षुषस्य मनोः पुत्रः सामगानाच्च संसदि।
शेषाद्दत्समदं नाम वशिष्ठः शप्तवान् मुनिम् ॥ ८८
यज्ञयजनं साम रणासि गतचेतनः।
तस्मात् तिष्ठ महाशापं किं गायसि रथन्तरम् ॥ ८९
वर्षाणां सहस्राणि दशाथाष्टौ च संख्यया।
वर्षाणां दण्डकारण्ये मृगश्चैको वसिष्यसि ॥ ९०
अपानीययवसे संवस त्वं वनेचर।
स्वया रहितो दुःखी रुरुसङ्घनिवासिते ॥ ९१
स च शापाभिभूतश्च दारुणे च मरुस्थले।
सर्व्वपियद्रुमे देशे तत्चणाद्भवन्मृगः ॥ ९२

नमस्कारान् संयुक्तां मृगो गृत्समदो गतः।
हृदये संस्मरन् भक्त्या प्रणवेन युतं शिवम् ॥ ९३
तस्मान्मृगमुखाकारो गणो मृगमुखः कृतः।
अजरामरतां नीतस्तीर्त्वा शापं पुनश्च सः ॥ ९४
शङ्करेण महाभागो नित्यं लम्बोदरानुगः।
लिङ्गार्च्चनरतो नित्यं जैगीषव्यो महातपाः ॥ ९५
वाराणस्यां मुनिः पूर्व्वं स्थितो भोगपराङ्मुखः।
विहाय च फलं सर्व्वं शुभाशुभस्य कर्म्मणः ॥ ९६
दत्त्वाष्टगुणमैश्वर्य्यं शङ्करेण विसर्ज्जितः।
गार्ग्याय प्रददौ शर्व्वो मोचदान् भुवि दुर्लभान्॥९७
कामचारी महाचैत्रं कालज्ञानं महद्भिमत्।
चतुष्पादं सरस्वत्याः पारगत्वञ्च शाश्वतम् ॥ ९८
तत्तुल्यन्तु सहस्रन्तु पुत्राणां प्रददौ शिवः।
वेदव्यासन्तु योगीन्द्रं पुत्रं तुष्टः पिनाकधृक् ॥ ९९
पराशराय च ददौ जरामृत्युविवर्ज्जितम्।
माण्डव्यः शङ्करेणैव जीवं दत्त्वा विसर्ज्जितः ॥१००
वर्षाणां दश लचाणि शूलाग्रादवरोपितः।
आधिभिर्व्याधिभिः शूलैर्वर्ज्जितश्च तथा कृतः ॥ १०१
ध्यायन् नमः शिवायेति शिवेन परमात्मना।
दरिद्रो ब्राह्मणः कश्चिन्निवसेत् गुरुवेश्मनि ॥ १०२
पुत्रन्तु गालवं बाल्ये पूर्व्वमासीद्गृहाश्रमे।
गुप्तायामग्निशालायां भिचुरायाति तद्गृहम् ॥ १०३
भार्य्यामुवाच यः कश्चिदवश्यं निर्द्धनो यतः।
स तु वाच्यो भवत्या च न दृश्यत इति प्रियः ॥ १०४
अतिथेरागतस्यापि किं दास्यामि गृहे वसन्।
कदाचिदतिथिः कश्चित् चुत्तप्ताश्रमकर्षितः ॥ १०५
तामुवाच स भर्त्ता ते क्व गतश्चेति तञ्च सा।
प्राह भर्त्ता मदीयस्तु साम्प्रतं न च दृश्यते ॥ १०६
स ऋषिस्तामुवाचेदं ज्ञात्वा दिव्येन चक्षुषा।
गृहस्थश्चाथ संच्छन्नस्तत्रैव स मृतो द्विजः ॥ १०७
विश्वामित्राभ्यनुज्ञातस्तत्पुत्रो गालवस्तथा।
गृहमागम्य मातुः स श्रुत्वा शापं सुदारुणम् ॥ १०८
आराध्य शङ्करं देवमिष्टिं कृत्वा तु शाश्वतीम्।
गृहाद्दृशो विनिष्क्रान्तः पिता तं प्राह साञ्जलिम्॥१०९
महादेवप्रसादाच्च कृतकृत्योऽस्मि ते कृतः।
धनवान् पुत्रवांश्चैव मृतोऽहं जीवितः पुनः ॥ ११०

इति वः कथितमशेषान्नाहं शक्तः समासतो वापि ।
वक्तुं शम्भोश्च गुणान् शैवस्येवेह मे सुखानि स्युः॥१११

इति श्रीशैवे महापुराणे धर्म्मसंहितायां शङ्कर-
माहात्म्यं नाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

मुनय ऊचुः ।

सूत त्वं ब्रूहि नो भूयो यदुक्तमृषिसंसदि ।
व्यासेन त्रिपुरघ्नस्तु ब्रुवता तत्र वै गुणान् ॥ १
श्रुत्वा हि तान् प्रियान् ब्रूहि यत् फलं प्राप्यते शिवे।
समहिते समासेन श्रोतुमिच्छामहे वयम् ॥ २
सूतपुत्रासुरास्ते हि कस्यान्वयसमुद्भवाः ।
कथं ददाह भगवान् नगराणि सुरद्विषाम् ॥ ३
त्रीण्येकेन च बाणेन युगपत् तेन वीर्य्यवान् ।
तेषां तद्वचनं श्रुत्वा सूतः प्रोवाच तत्त्ववित् ॥ ४
व्यासेन कथितं यद्वत् तद्वद्वक्ष्यामि तत्त्वतः ।

सूत उवाच ।

तारकाक्षस्तु तज्ज्येष्ठो विद्युन्माली च मध्यमः ॥ ५
कमलाक्षः कनीयांश्च सर्व्वे तुल्यबलाः सदा ।
जितेन्द्रियाः सुसन्नद्धाः संयताः सत्यवादिनः ॥ ६
ते तु मेरुगुहां गत्वा तपश्चक्रुर्महाद्भुतम् ।
त्रयः पुष्पाणि भोगांश्च विहाय सुमनोहरान् ॥ ७
वसन्ते सर्व्वकामांश्च गीतवादित्रनिस्वनम् ।
ग्रीष्मे सूर्य्यप्रभां जित्वा दिक्षु प्रज्वाल्य पावकम् ॥८
तन्मध्यसंस्थाः सिद्ध्यर्थं जुहुवुर्हव्यमादरात् ।
महाप्रतापपतिताः सर्व्वेऽप्यासन् समुत्थिताः ॥ ९
वर्षासु गतसन्त्रासा नदीं मूर्ध्नि न्यधारयन् ।
शरत्काले प्रभूतन्तु भोजनन्तु बुभुक्षिताः ॥ १०
रम्यं स्निग्धं स्थिरं हृद्यं फलमूलमनुत्तमम् ।
संयमात् क्षुत्तृषौ जित्वा पानान्युच्चावचान्यपि ॥ ११
बुभुक्षितेभ्यो दत्त्वा तु बभूवुरुपला इव ।
संस्थितास्ते महात्मानो निराधाराश्चतुर्द्दिशम् ॥ १२
हेमन्ते गिरिमाश्रित्य धैर्य्येण परमेण च ।
तुषारदेहसञ्छन्ना जलक्लिन्नेन वाससा ॥ १३
आच्छाद्य देहं चौमेण शिशिरे तोयमध्यगाः ।
अनिर्व्विण्णास्ततः सर्व्वे क्रमशो वर्द्धयंस्तपः ॥ १४
एवं ते संस्थिता दैत्या दिवारात्रमतन्द्रिताः ।
मुहूर्त्तेन समस्तत्र दशवर्षसहस्रकम् ॥ १५
एवं तेषां गतः कालो धर्म्मशीलेति मतिर्मम ।
प्रादुरासीत् ततो ब्रह्मा सुरासुरगुरुर्महान् ॥ १६
तुष्टः सन्दर्शने तेषां वरं दातुं महायशाः ।
मुनिदेवासुरैः सार्द्धं सान्त्वपूर्व्वमिदं वचः ॥ १७
ततस्तानब्रवीत् सर्व्वान् सर्व्वभूतपितामहः ।
किमर्थं वत दैत्येन्द्राः सर्व्वं क्लान्तोऽस्मि सर्व्वदा ॥ १८
सर्व्वं दास्यामि युष्मभ्यं कथयध्वं यदीप्सितम् ।
तस्य तद्वचनं श्रुत्वा शनैर्यद्दृद्यमनोगतम् ॥ १९
ऊचुः प्राञ्जलयः सर्व्वे प्रणिपत्य पितामहम् ।
भगवन् नास्ति नो वेश्म पराक्रमवतामपि ॥ २०
अवध्याः सात्रवाणान्तु यत्र वत्स्यामहे सुखम् ।
तारकाक्षस्ततः प्राह अभेद्यं यत् सुरैरपि ॥ २१
करोतु विश्वकर्म्मा यन्मम हैममयं पुरम् ।
ययाचे,कमलाक्षस्तु राजतं सुमहत् परम् ॥ २२
विद्युन्माली च संहृष्टो वज्रायसमयं महत् ।
एतदुक्त्वा ततो दैत्या जजल्पुरमितौजसः ॥ २३
हे देव दिवि नान्यत्र वेश्मान्यत्र वृणीमहे ।
यथाभिमतमेतेषां विश्वकर्म्माणमुक्तवान् ॥ २४
स तथेत्येव तं तेषां पुरं कुरु पृथक् पृथक् ।
पुराणि त्रीणि रम्याणि विश्वकर्म्मा चकार ह॥२५
एवं कुरुष्वेत्युक्तोऽसौ कालचारीणि तत्क्षणात् ।
किमुक्तेनापि बहुना फलमूलयुतानि च ॥ २६
उद्यान-वनवृक्षान्न स्वर्गाच्छतगुणानि च ।
नदी-नद-सरित्स्रोतः-पुष्करैः शोभितान्यपि ॥ २७
सर्व्वकामफला वृक्षाः सन्ति तत्र ह्यनेकशः ।
कृतैः पुरैः प्राह तुष्टस्तदा दैत्यान् पितामहः ॥ २८
त्रिपुरेषु च दैत्येन्द्राः प्रविशध्वं यथाक्रमम् ।
सर्व्वकामसमृद्धीनि दृष्ट्वा तानि पुराण्यपि ॥ २९
परितुष्टन्तु कं गत्वा जीवितं वीक्ष्य चास्थिरम् ।
ते तमूचुस्त्रिधामानं जीवितं वीक्ष्य चञ्चलम् ॥ ३०
भगवन् किं पुरैरेभिर्वाक्सगद्गदया गिरा ।
स्थिरीकुरु जगन्नाथ पान्तु नः परिपन्थिनः ॥ ३१
जरा रोगादयः सर्व्वे मास्मान् मृत्युरगात् क्वचित् ।

अजरावामराः सर्व्वे भवाम इति नो मतम् ॥ ३२
अक्षयवः करिष्यामः किं कार्य्यं हि पुरोत्तमैः ।
तस्मात् किं वा विपुलया स्थानैश्वर्य्येण वा पुनः ॥ ३३
यद्येव मृत्युना ग्रस्तो नियतं पञ्चभिर्द्दिनैः ।
तच्छ्रुत्वा वचनं प्राह न स जातो जनिष्यते ॥ ३४
अजरश्चामरो लोके भविष्यति महीतले ।
ऋते तु खण्डपरशोर्द्देवान्नारायणात् क्वचित् ॥ ३५
तौ धर्म्माधर्म्मपरमावव्यक्तौ व्यक्तरूपिणौ ।
सम्पीड़नाय जगतो यदि संक्रियते तपः ॥ ३६
अफलं तद्गतं विद्यात् तस्मात् सुविहितं नयम् ।
तद्विचार्य्य स्वयं बुद्ध्या न शक्यं यत् सुरासुरैः ॥ ३७
दुर्लभं वा सुदुःसाध्यं मृत्युं वञ्चयतानघाः ।
तत् किञ्चिन्मरणे हेतुं वृणीध्वं सत्त्वमाश्रिताः ॥ ३८
येन मृत्युर्न भवतां रचन्तस्तत् पृथक् पृथक् ।
एतच्छ्रुत्वा तु वचनं मुहूर्त्तं ध्यानमास्थिताः ॥ ३९
ऊचुः सञ्चिन्तयित्वाथ सर्व्वलोकपितामहम् ।
पुरेषु त्रिषु चैतेषु एकस्थानस्थितेषु च ॥ ४०
मध्याह्नाभिजिते काले शीतांशौ पुष्यसंस्थिते ।
वर्षत्सु कालमेघेषु पुष्करावर्त्तनामसु ॥ ४१
सर्व्वदेवमयो देवः सर्व्वेषामेकहेलया ।
सर्व्वशाव्ये रथे तिष्ठन् सर्व्वोपस्करणान्विते ॥ ४२
सर्व्वशाव्यैककाण्डेन भिनत्तु नगराणि नः ।
शङ्करः कृत्तिवासास्तु योऽस्माकमिति नित्यशः ॥ ४३
वन्द्यः पूज्योऽभिवाद्यश्च सोऽस्माकं निर्द्दहेत् कथम् ।
इति चेतसि सन्धाय तादृशो भुवि दुर्लभः ॥ ४४
ब्रह्मणा च वरो दत्तो याचितस्तैर्महावरः ।
ततो लब्धवरास्ते तु निवसन्ति स्म तत्र ह ॥ ४५
सर्व्वं त्रैलोक्यमुत्साद्य प्रविश्य नगराणि ते ।
ततो महान् गतः कालो वसतां पुण्यकर्म्मणाम् ॥ ४६
यथासुखं यथाजोषं तेषां संख्याविवर्ज्जितः ।
ततः कदाचित् त्रैलोक्ये देवाः शरणमभ्ययुः ॥ ४७
परित्राणाय साधूनां विध्वस्ते दैत्यदानवैः ।
महादेवं विरूपाक्षं पूजयित्वा वृषध्वजम् ॥ ४८
स्तोत्रैर्नानाविधैर्द्देवं शूलिनं कृत्तिवाससम् ।
असुरप्रतिमप्रज्ञा भ्रातृभ्यां सहितेन तु ॥ ४९
भगवंस्तारकाक्षेण सर्व्वे देवाः सवासवाः ।
त्रैलोक्यं स्ववशे नीतं तथा च मुनिसत्तमाः ॥ ५०
विध्वस्ताः सर्व्वशः सिद्धाः सर्व्वमुत्सादितं जगत् ।
यज्ञकर्म्म समग्रन्तु स्वयं बुद्ध्वा च दारुणः ॥ ५१
प्रवर्त्तितो ह्यधर्म्मस्तैर्ऋषीणाञ्च निवर्त्तितम् ।
अवध्ये सर्व्वभूतानां नीयतां वा सुरासुराः ॥ ५२
यावन्न वशगा दैत्यैर्घोरैस्त्रिपुरवासिभिः ।
तावद्विधीयतां नीतिर्यया संरक्ष्यते जगत् ॥ ५३
तेषां सम्भाषमाणानां प्रतिवाक्यमुवाच सः ।
जानामि दैत्यान् विबुधा अशक्यास्तु सुरासुरैः ॥ ५४
दुःसाध्यस्तु वधस्तेषां सर्व्वेषां पुरवासिनाम् ।
शिवद्रोहं कथं जानन् करोमि रणकर्कशः ॥ ५५
सुहृद्द्रोहे महत् पापं पूर्व्वमुक्तं स्वयम्भुवा ।
ब्रह्मघ्ने च सुरापे च स्तेये भग्नव्रते तथा ॥ ५६
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ।
शम्भोस्तु वचनं श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥ ५७
न किञ्चिद्विद्यते पापं यस्मात् त्वं योगवित्तमः ।
साधूनां रक्षणार्थाय हन्तव्या म्लेच्छजातयः ॥ ५८
राज्ञस्तस्य न तत् पापं विद्यते धर्म्म एव च ।
तस्माद्रक्षेद्द्विजान् साधून् कण्टकान् वै विशोधयेत् ॥ ५९
एवमिच्छेदिहामुत्र राजा चेद्राज्यमात्मनः ।
प्रभुस्त्वं सर्व्वलोकानां तस्माद्रक्षस्व माचिरम् ॥ ६०
मुनीन्द्रेशांस्तथा यज्ञान् वेदान् नाम्नासि शङ्करः ।
एतच्छ्रुत्वाह तं नास्ति रथः सारथिना सह ॥ ६१
यमास्थाय धनुर्व्वाणान् निहनिष्याम्यहं वरान् ।
ब्रह्मा चैतद्वचः श्रुत्वानीशोर्हन्तुमुवाच ह ॥ ६२
संग्रामं गच्छतस्तुभ्यं सारथ्यं करवाण्यहम् ।
ततस्तं पृथिवी प्राह रथं मां कुरु मानद ।
सपर्व्वतद्वीपवतीं चतुर्ज्जलधिमेखलाम् ॥ ६३
चन्द्रार्कावूचतुर्मान्तौ रथचक्रे तु नौ कुरु ।
भगवन् योद्धुमागच्छेस्तेषां त्रिपुरवासिनाम् ॥ ६४
आभाषितां महादेवं शम्भुं कुलगिरी वचः ।
गन्धमादन-विन्ध्यौ च वंशावावां कुरु प्रभो ॥ ६५
अस्मिन् दिव्ये रथे शम्भो शङ्करं प्राह बुद्धिमान् ।
ततस्त्वनन्तो नागेन्द्रो मामक्षं कुरु साम्प्रतम् ॥ ६६
एलापत्रो भुजङ्गस्तु पुष्पदन्तश्च तावुभौ ।
अग्रे द्वौ ध्रुवकावावां भवावस्तव गौरवात् ॥ ६७

पूर्व्वं मां कुरु दुर्भेद्यमुवाच मलयो गिरिः।
देवदेव जगन्नाथ भगवंश्चन्द्रशेखर ॥ ६८
ततः सन्ध्याभ्रवर्णस्तं तच्चकः कर्व्वुरोऽब्रवीत्।
अविनाहं महादेव कुरु मां सुदृढं रथे ॥ ६९
वेदव्रतानि चत्वारि पुण्यान्यूचुर्वृषध्वजम्।
योक्त्राणि कुरु नस्तत्र वेदाङ्गसहितान्यपि ॥ ७०
वेदाः प्राहुर्महादेवं तुरगान् नः कुरु प्रभो।
स्वायम्भुवान् महावेगान् दुर्भेद्यांश्च कुतार्क्किकैः ॥ ७१
उपवेदास्ततो देवं जजल्पुरपराजिताः।
अस्मान् खलीनान् बन्धेषु तत्र संयमने कुरु ॥ ७२
सावित्रीसहिता प्राह गायत्री कृत्तिवाससम्।
प्रग्रहन्त्वनया सार्द्धं दुराधर्षं कुरुष्व माम् ॥ ७३
प्रणवस्त्वब्रवीच्छर्व्वं प्रतोदं कुरु शाश्वतम्।
यत्नेन क्रियतां माद्य शर्व्व सर्व्वमयो यतः ॥ ७४
त्र्यम्बकं प्रहसन् प्राह धनुर्मां कुरु शङ्कर।
उद्धर्त्तुं यदि शक्नोषि करस्थं मन्दराचलम् ॥ ७५
वासुकिः प्रणतः प्राह दुर्भेद्यं देव-दानवैः।
गुणं मां कुरु देवेश तत्कण्ठस्थोऽपि नागराट् ॥ ७६
ततो नारायणो देवो भूत-भव्य-भवात्मकः।
भूतादिभूतनिधनः परमात्मा जनार्द्दनः ॥ ७७
देवानां कार्य्यसिद्ध्यर्थं प्रहसन्नाह शङ्करम्।
अस्मिन् युद्धे महादैत्यैः शरं मां कुरु दारुणम् ॥ ७८
क्रुद्धः कामरिपुं प्राह चण्डदोर्द्दण्डमण्डितम्।
वैश्वानरोऽपि कालाग्निः शल्यं मां न करोषि किम् ॥ ७९
कालो वैश्वानरो रुद्रो लेलिहानो भयानकः।
एवमुक्त्वा महाघोरं महाहासं चकार सः ॥ ८०
हसतस्तस्य घोरस्य घोरा निश्चेरुरर्च्चिषः।
विद्युत्कुटिललोलास्तु मुखद्वारेषु सप्तसु ॥ ८१
सितासिताः कृष्णनीला याभिः सदसदात्मकम्।
संहरन्तीदमेवासौ जगत् पूर्व्वं चराचरम् ॥ ८२
ततो भूत-पिशाचाश्च रुवन्ति स्म महारवम्।
व्याधयश्च यमं जित्वा पुरानीता ह्यनेकशः ॥ ८३
राक्षसा विविधाकाराः कर्म्मजाश्चाभियोनिजाः।
रतिग्रहाश्च विविधास्तथा कुहकवृत्तयः ॥ ८४
दैत्यानां वरलब्धानां तेषां ये वाक्यसंयुताः।
सर्व्वं निमेषतो दग्धास्तदा त्रिपुरवासिनाम् ॥ ८५
दह्यमानस्य तस्याथ विष्णुस्तं पुनरब्रवीत्।
अलं यदस्ति ते किञ्चित् कारणं तत् त्वया कृतम् ॥ ८६
निर्द्दहिष्यसि तत् सैन्यं भवकाण्डाग्रतः स्थितः।
तच्छ्रुत्वा वचनं विष्णोस्तूष्णीमासीत् स पावकः ॥ ८७
ततो वायुर्महादेवमुवाच च तथा शशी।
पक्षयोर्मां तथा पुङ्खे नियोजय शरे विभो ॥ ८८
व्योमालिकज्जलः श्यामः कुरुष्व यदि मन्यसे।
नियोजयाग्रधारायां यमः प्राह महेश्वरम् ॥ ८९
उवाच भीमं संहस्य प्रधाना तु शतक्रदा।
अथ विद्युत्सहस्राणां कुरु शल्यविशोधिनीम् ॥ ९०
ततः संवर्त्तका मेघाः प्रोचुः शम्भो कुरुष्व नः।
ध्वजे मेरौ शुभे स्तम्भे देवानामालये विभो ॥ ९१
एतच्छ्रुत्वा तु सर्व्वेषां ततः सर्व्वं चकार सः।
सम्मन्त्र्य देवतैः सार्द्धं शरण्यो भक्तवत्सलः ॥ ९२
रथं कृत्वा ततस्त्वष्टा सम्पादयत ब्रह्मणे।
शक्रवेऽसौ निवेद्याथ रोपयामास शूलिनम् ॥ ९३
ततस्तस्मिन् रथे दिव्ये दिव्यगन्धर्व्वपन्नगैः।
स्तूयमानो मुनिगणैः समारूढस्त्रिशूलधृक् ॥ ९४
शार्व्वं स्थानकमास्थाय सन्धाय च शरोत्तमम्।
सज्जं तत् कार्म्मुकं कृत्वा प्रत्यालीढं महाद्भुतम् ॥ ९५
निवेश्य दृष्टिं मुष्टौ च मुष्टिं दृष्टौ निवेश्य च।
अतिष्ठन्निश्चलस्तत्र शतं वर्षसहस्रकम् ॥ ९६
ततोऽङ्गुष्ठे गणाध्यक्षः स तु दन्तनिभं स्थितः।
न लक्ष्यं विविशुस्तानि पुराण्यस्य च पूजितः ॥ ९७
ततोऽन्तरिक्षादशृणोद्धनुर्व्वाणधरोऽहरः।
मुञ्जकेशो विरूपाक्षो वाचं परमशोभनाम् ॥ ९८
भो भो न यावद्भगवानर्च्चितोऽसौ द्विविग्रहः।
पुराणि जगदीशेश साम्प्रतं न दहिष्यसि ॥ ९९
एतच्छ्रुत्वा तु वचनं गजवक्त्रमपूजयत्।
भद्रकालीं समाहूय ततोऽन्धकनिसूदनः ॥ १००
तस्मिन् सम्पूजिते हृष्टे परितुष्टपुरःसरे।
विनायके ततो व्योम्नि ददर्श भगवान् हरः ॥ १०१
पुराणि त्रीणि दैत्यानां युक्तानि च यथातथम्।
अभीलाख्ये मुहूर्त्ते तु धनुर्निष्कृष्य सोऽद्भुतम् ॥ १०२
कृत्वा ज्यातलनिर्घोषं नादमत्यन्तदुस्तरम्।
आत्मनो नाम विश्राव्य समाभाष्य महासुरान् ॥ १०३

मार्त्तण्डकोटिवपुषं काण्डमुग्रो मुमोच ह।
ददाह त्रिपुरस्थांस्तांस्त्रीन् दैत्यान् विमलापहा॥१०४
ततः पुराणि भवनानि चतुर्जलधिमेखलाम्।
गतानि युगपद्भूमिं त्रीणि दग्धानि भस्मशः॥ १०५
दैत्याश्च शतशो दग्धास्तस्य बाणाग्रवह्निना।
तारकाचस्त्वनिर्द्दग्धो भ्रातृभ्यां सहितोऽभवत्॥१०६
महादेवं समुद्दिश्य तमूचुर्मनसा शनैः।
भक्त्या परमया युक्तः प्रलपन् विविधां गिरम्॥१०७
भव ज्ञातोऽसि तुष्टोऽसि यदस्माकं मनोगतम्।
करणीयं कृतन्त्वद्य दृष्टस्तव पराक्रमः॥ १०८
भगवन् यदि तुष्टोऽसि यज्वास्मान् सह बन्धुभिः।
तेन सत्येन भूयोऽपि कदा त्वं प्रदहिष्यसि॥ १०९
दुर्लभं लब्धमस्माभिर्यदप्राप्यं सुरासुरैः।
त्वद्भावभाविता बुद्धिर्जाता जातं भवत्विति॥ ११०
इत्येवं विब्रुवन्तस्ते दानवास्तेन वह्निना।
अन्येऽपि बालवृद्धाश्च निर्द्दग्धा भस्मसात्कृताः॥ १११
स्त्रियो वा पुरुषो वापि वाहनानि च तत्र ये।
सर्व्वं तेनाग्निना दग्धाः कल्पान्ते तु जगद्यथा॥११२
भर्तृकण्ठगतां कृत्वा काश्चिद्दग्धवरस्त्रियः।
काश्चित् पुत्रानवच्छाद्य बाहुभ्यां परिगृह्य च॥११३
दग्धाः पलायमानाश्च निर्द्दग्धाः शतशोऽपराः।
काश्चित् सुप्ताः प्रमत्ताश्च रतिश्रान्ताश्च योषितः॥११४
अर्द्धदग्धा विबुद्धाश्च बभ्रमुर्मोहमूर्च्छिताः।
तेन नासीत् सुसूक्ष्मोऽपि घोरस्त्रिपुरवह्निना॥ ११५
अविदग्धो विनिर्म्मुक्तः स्थावरो जङ्गमोऽपि वा।
वर्ज्जयित्वाऽभयं दैत्यं विश्वकर्म्माणमव्ययम्॥ ११६
अविरुद्धन्तु देवानां रचितं विष्णुतेजसा।
सन्निपातो हि येषां नो विद्यते नाशकारकः॥ ११७
दैवात् तद्वत् पदार्थानां भावाभावे कृताकृते।
तस्माद्दुयन्नाम सम्भाव्यं सद्भिः कर्त्तव्यमेव तत्॥ ११८
गर्हणा लभ्यते लोके न तत् कर्म्म समाचरेत्।
न संयोगः कदा येषां भूयात् त्रिपुरवासिनाम्॥११९
मतमेतद्धि सर्व्वेषां दैवाद्दुयर्हि यतो भवेत्।
ततः स भगवान् रुद्रो दग्ध्वा त्रिपुरवासिनः॥ १२०
कृतकृत्यो महायोगी ब्रह्माद्यैरभिपूजितः।
सघनुः सशरः साश्वस्तत्रैवान्तरधीयत॥ १२१
तस्मिंश्चान्तर्हिते देवे मुनि-गन्धर्व्व-किन्नराः।
नागाः सर्पाश्चाप्सरसः संहृष्टाश्चाथ मानुषाः॥ १२२
स्वं स्वं स्थानमनुप्राप्य निर्वृतिं परमां ययुः।
एतद्वः कथितं सर्व्वं धन्यं शत्रुचयङ्करम्॥ १२३
स्वर्गप्रदं मोक्षदञ्च किं भूयः श्रोतुमिच्छथ॥ १२४

इति श्रीशैवे महापुराणे धर्म्मसंहि-
तायां त्रिपुरदाहवर्णनं नाम
तृतीयोऽध्यायः॥ ३॥

चतुर्थोऽध्यायः।

माहात्म्यमेतद्वृषभध्वजस्य
श्रुत्वा मुनेर्गन्धवतीसुतस्य।
वचो महार्थं मुनयश्च सर्व्वे
पप्रच्छुरुग्रं प्रणिपत्य सूतम्॥ १

मुनय ऊचुः।

किमन्धकारिर्भगवान् पिनाकी
कस्यान्वये वीर्य्यवतः पृथिव्याम्।
जातो महात्मा बलवान् प्रधाने
कश्चान्धकः कस्य सुतः कथं वा॥ २
एतत् समग्रं सरहस्यमद्य
ब्रवीहि सूत भगवत्प्रसादात्।
व्यासात् त्वया वै विदितं हि सम्यग्-
युद्धं यथाभूदनयोर्हतः सः॥ ३
तेषां तदासौ वचनं निशम्य
प्रोवाच सूतस्तु मुनींस्तदानीम्।
पूर्व्वं द्विजा मन्दरशैलसंस्था
कपर्द्दिनश्चण्डपराक्रमस्य॥ ४
चक्रे ततो नेत्रनिमीलनन्तु
सा पार्व्वती नर्म्मयुतं सलीलम्।
प्रवालहेमाब्जधृतप्रभाभ्यां
कराम्बुजाभ्यां निमिमील नेत्रे॥ ५
हरस्य नेत्रेषु निमीलितेषु
क्षणेन जातः सुमहान्धकारः।
तत्संस्पर्शयोगाच्च महेश्वरस्य
कराच्च तस्याः स्खलितं मदाम्भः॥ ६

शम्भोर्ललाटेक्षणवह्नितप्तो
विनिर्गतो भूरिजलस्य बिन्दुः ।
गर्भो बभूवाथ करानन्स्य
भयङ्करः क्रोधपरः कृतघ्नः ॥ ७
अन्यो विरूपी जटिलः श्मश्रुलश्च
कृष्णो नरो वै विकृतः सुरोमा ।
गायन् हसन् प्ररुदन् नृत्यमानो
विलेलिहानो घनघोरघोषः ॥ ८
जातेन तेनाद्भुतदर्शनेन
गौरीं भवोऽसौ स्मितपूर्व्वमाह ।
निमील्य नेत्राणि कृतञ्च नर्म्म
विभेषि मां दयिते कथं त्वम् ॥ ९
गौरी हरात् तद्वचनं निशम्य
विहस्यमाना प्रमुमोच नेत्रे ।
जाते प्रकाशे सति घोररूपो
जातोऽन्धकारादपि नेत्रहीनः ॥ १०
पप्रच्छ कोऽयं भगवन् विरूप-
स्त्वादृग्विधं तच्च निरीक्ष्य भूतम् ।
वदस्व सत्यं मम किं निमित्तं
सृष्टोऽथवा केन च कस्य पुत्रः ॥ ११
श्रुत्वा हरस्तद्वचनं प्रियाया
उत्पन्न एषोऽद्भुतचण्डवीर्य्यः ।
निमीलिते चक्षुषी मे भवत्या
स खेदजश्चान्धकनामधेयः ॥ १२
ततोऽस्य कर्त्तास्मि यथानुरूपं
त्वया ससख्या सदयं गणेश्यः ।
स रक्षितव्यस्त्वयनं हि चैकं
विचार्य्य बुद्ध्या करणीयमार्य्ये ॥ १३
गौरी ततो भर्तृवचो निशम्य
कारुण्यभावात् सहिता सखीभिः ।
नानाप्रकारैर्बहुभिर्ह्युपायै-
श्चकार रक्षां स्वसुतस्य यद्वत् ॥ १४
कालेऽथ यस्मिन् भुवि चान्धकस्तु
हिरण्यनेत्रस्त्वथ पुत्रकामः ।
अरण्यमाश्रित्य तपश्चकार
जातस्तदा कश्यपजः सुतार्थम् ॥ १५
काष्ठोपमोऽसौ जितरोषदोषः
सन्दर्शनार्थन्तु महेश्वरस्य ।
तुष्टः पिनाकी तपसास्य सम्यग्-
वरप्रदानाय ययौ द्विजेन्द्राः ॥ १६
तुष्टस्तमाहाकुलितेन्द्रियं तं
किमर्थमेतद्व्रतमाश्रितं ते ।
प्रब्रूहि कामं वरदो भवोऽहं
यदिच्छसि त्वं सकलं ददामि ॥ १७
पुत्रस्तु मे चन्द्रललाट नास्ति
सुवीर्य्यवान् दैत्यकुलानुरूपी ।
तदर्थमेतद्व्रतमास्थितोऽहं
तं देहि देवेश सुवीर्य्यवन्तम् ॥ १८
यस्माच्च मद्भ्रातुरनन्तवीर्य्याः
प्रह्लादपूर्व्वा अपि पञ्च पुत्राः ।
ममेह नास्तीति निरन्वयोऽहं
यो मामकं राज्यमिदं बुभूषेत् ॥ १९
राष्ट्रं परस्य स्वबलेन हत्वा
भुङ्क्तेऽथवा स्वं पितुरेव दिष्टम् ।
स प्रोच्यते पुत्र इहाप्यमुत्र-
पुत्री स तेनापि भवेत् पितासौ ॥ २०
ऊर्द्ध्वं गतिः पुत्रवतां निरुक्ता
मनीषिभिर्धर्म्मवतां वरिष्ठैः ।
सर्व्वाणि भूतानि तदर्थमेव-
मतौ प्रवर्त्तन्ति हठात् स्वभावतः ॥ २१
निरन्वयस्यापि न सन्ति लोका-
स्तदर्थमिच्छन्ति सुतान् स्वभूम्ने ।
क्रीतादयः सन्ति सुतास्तथाष्टौ
इच्छामि तस्मात् सुतमेकमेव ॥ २२
एतद्भवस्तद्वचनं निशम्य
कृपाकरो दैत्यनृपस्य तुष्टः ।
तमाह दैत्याधिप नास्ति पुत्र-
स्त्वद्वीर्य्यजः किन्तु ददामि पुत्रम् ॥ २३
ममात्मजन्त्वन्धकनामधेयं
त्वत्तुल्यवीर्य्यं ह्यपराजितञ्च ।
वृणीष्व पुत्रं सकलं विहाय
दुःखं प्रतीच्छस्व सुखं हि चेमम् ॥ २४

इत्येवमुक्त्वा प्रददौ स तस्मै
हिरण्यनेत्राय सुतं प्रसन्नः ।
हरस्तु गौर्य्या सहितो महात्मा
भूताधिनाथस्त्रिपुरारिरुग्रः ॥ २५
ततो हरात् प्राप्य सुतं स दैत्यः
प्रदक्षिणीकृत्य यथाक्रमेण ।
स्तोत्रैरनेकैरभिपूज्य रुद्रं
हृष्टः स्वराज्यं गतवान् महात्मा ॥ २६
ततस्तु पुत्त्रं गिरिशादवाप्य
रसातलं चण्डपराक्रमस्तु ।
इमां धरित्रीमनयत् स्वदेशं
दैत्यो विजित्य त्रिदशानशेषान् ॥ २७
ततस्तु देवैर्मुनिभिश्च सर्व्वैः
सर्व्वात्मकं यज्ञमयं करालम् ।
वाराहमाश्रित्य वपुः प्रधान-
माराधितो विष्णुरनन्तवीर्य्यः ॥ २८
घोणाप्रहारैर्विविधैर्धरित्रीं
विदार्य्य पातालतलं प्रविश्य ।
तुण्डेन दैत्यान् शतशो विचूर्ण्य
दंष्ट्राभिरग्राभिरखण्डिताभिः ॥ २९
पादप्रहारैरशनिप्रकाशै-
रनाथ सैन्यानि निशाचराणाम् ।
मार्त्तण्डकोटिप्रतिमेन पश्चात्
सुदर्शनेनाद्भुतचण्डतेजाः ॥ ३०
हिरण्यनेत्रस्य शिरो ज्वलन्तं
चिच्छेद दैत्यांश्च ददाह दुष्टान् ।
ततः प्रहृष्टो दितिजेन्द्रराज्ये
तमन्धकं तत्र स चाभ्यषिञ्चत् ॥ ३१
स्वस्थानमासाद्य ततो धरित्रीं
दंष्ट्राङ्कुरेणादधरत् प्रहृष्टः ।
क्षमिन्द्र पातालतलान्महात्मा
पुपोष भागन्त्वथ पूर्व्वकर्त्तु ॥ ३२
प्रताप्य लोकानखिलांस्ततोऽसौ
समागतः पद्मयोनिं ददर्श ।
वरं प्रदातुं प्रवदन्तमेव
वरं वृणीष्वेति स मूढबुद्धिः ॥ ३३

मृत्योर्भयं मे भगवन् सदैव
पितामहाभून्न कदाचिदेवम् ।
शस्त्रास्त्रपाशाशनिशुष्कवृक्ष-
गिरीन्द्रतोयाग्निरिपुप्रहारैः ॥ ३४
स्वर्गे धरण्यां दिवसे निशायां
देवाहतः प्राह न सोऽपि सस्मौ ।
तस्यैतदीदृग्वचनं निशम्य
दैत्येन्द्र तुष्टोऽस्मि लभस्व सर्व्वम् ॥ ३५
प्रणम्य विष्णुं मनसा तमाह
भयान्वितोऽसावपि पद्मयोनिः ।
ततः स दैत्यः परिपूर्णकाम-
स्तमष्टकोत्यस्तथ प्रसवत्यः ॥ ३६
उत्तिष्ठ राज्यं कुरु दानवानां
श्रुत्वा गिरं तां स सुखी बभूव ।
राज्येऽभिषिक्तः प्रपितामहेन
त्रैलोक्यनाशाय मतिं चकार ॥ ३७
उत्साद्य धर्म्मान् सकलान् प्रमत्तो
जिलाहवे सोऽपि सुरान् समस्तान् ।
ततो भयादिन्द्रमुखाश्च देवाः
क्षीरोदधौ यत्र हरिस्तु शेते ॥ ३८
आराधयामासुरतीव गत्वा
ततस्तु हृष्टः प्रददौ वरांस्तु ।
उत्थाय तस्माच्छयनादुपेन्द्रो
यथानुरूपैर्विविधैर्वचोभिः ॥ ३९
आश्वास्य देवानखिलान् मुनीन्द्रा
रवीन्दुवैश्वानरतुल्यतेजाः ।
आश्रित्य रूपं जटिलं करालं
दंष्ट्रायुधं तीक्ष्णनखं सुनासम् ॥ ४०
मृगेन्द्रतुल्यञ्च विदारितास्यं
मार्त्तण्डकोटिप्रतिमं सुघोरम् ।
युगान्तकालाग्निसमप्रभावं
जगन्मयं किं बहुभिर्वचोभिः ॥ ४१
अस्तं रवौ सोऽपि हि गच्छमाने
गतोऽसुराणां नगरीं महात्मा ।
कृत्वा च युद्धं प्रबलैः सहाबै-
र्जलाथ तान् दैत्यगणान् ग्रहीतुम् ॥ ४२

बभ्राम तत्राद्भुतविक्रमश्च
भञ्जन् वनं तानसुरांश्च सिंहः।
दृष्टः सदैत्यैरतुलप्रभाव-
स्तं मेनिरे ते हि तथैव सर्व्वे ॥ ४३
सिंहञ्च तं सर्व्वमयं निरीक्ष्य
प्रह्लादनामादितिजेन्द्रपुत्रः।
उवाच राजानमयं मृगेन्द्रो
जगन्मयः किञ्चिदलं रणेन ॥ ४४
प्रविष्ट एषो भगवाननन्तो
नृसिंहमावो नगरन्त्विदं ते।
निवर्त्त्य युद्धाच्छरणं प्रयाहि
पश्यामि सिंहस्य करालमूर्त्तिम् ॥ ४५
यस्मान्न योद्धा भुवनत्रयेऽपि
कुरुष्व राज्यन्तु नमन् मृगेन्द्रम्।
श्रुत्वा स पुत्रस्य वचो दुरात्मा
संगृह्यतां सिंहमिमं भवद्भिः ॥ ४६
तमाह भीतोऽसि किमत्र चक्रे
वीरैर्विरूपं भ्रुकुटीमुखन्तु।
तस्याज्ञया दैत्यवरास्ततस्ते
प्रहीतुकामा विविशुर्मृगेन्द्रम् ॥ ४७
क्षणेन दग्धाः शलभा इवाग्निं
रूपाभिलाषात् प्रविविक्षवो वै।
दैत्येषु दग्धेष्वपि दैत्यराज-
श्चकार युद्धं स मृगाधिपेन ॥ ४८
शस्त्रैः समग्रैरखिलैस्तथास्त्रैः
शक्त्यृष्टिपाशाङ्कुशपावकाद्यैः।
संयुध्यतोरेव तयोर्जगाम
ब्राह्मं दिनं शस्त्रनखास्त्रपाण्योः ॥ ४९
ततः स दैत्यः सहसा बहूंश्च
कृत्वा भुजान् शस्त्रयुतान् निरीक्ष्य।
नृसिंहरूपं प्रययौ मृगेन्द्रं
संयुध्यमानन्त्वहरत् समन्तात् ॥ ५०
ततः स युद्धन्त्वतिदुःसहन्तु
शस्त्रैः समस्तैश्च तथा महास्त्रैः।
क्षयं गतैः शूलधरोऽप्युपायात्
ततो गृहीतः स मृगाधिपेन ॥ ५१

भुजैरनेकैर्गिरिसारवद्भि-
र्निधाय कण्ठं स भुजान्तरेषु।
नखाङ्कुरैर्दारणमस्य विद्धि-
र्नखास्त्रहृत्पद्ममसृग्विमिश्रम् ॥ ५२
उत्पाट्य जीवादिगतः क्षणेन
त्यक्तस्तदानीं स तु काष्ठभूतः।
पादप्रहारैरतिताड़ितोऽसौ
पुनः पुनश्चूर्णितसर्व्वगात्रः ॥ ५३
तस्मिन् हते देवरिपौ प्रसन्नः
प्रह्लादमामन्त्र्य कृतप्रणामम्।
राज्येऽभिषिच्याद्भुतवीर्य्यविष्णु-
स्ततः प्रयातो गतिमप्रतर्क्याम् ॥ ५४
ततो हिरण्याक्षसुतः कदाचित्
संश्राविती नर्म्मयुतं कदाचित्।
तैर्भ्रातृभिः सम्प्रयुतो विहारे
किमन्ध राज्येन तवाद्य कार्य्यम् ॥ ५५
हिरण्यनेत्रस्तु बभूव मूढ़ः
कलिप्रियं नेत्रविहीनमेव।
यो लब्धवांस्त्वां विकृतं विरूपं
घोरैस्तपोभिर्गिरिशं प्रसाद्य ॥ ५६
स त्वं न भागी दितिराजराज्ये
किमन्यजातोऽपि लभेत राज्यम्।
तेषान्तु वाक्यानि निशम्य तानि
निवार्य्य बुद्ध्या स्वयमेव दीनः ॥ ५७
ताञ्छान्तयित्वा विविधैर्वचोऽभि-
र्गतस्त्वरण्यं निशि निर्ज्जनन्तु।
वर्षायुतं तत्र तपश्चकार
जजाप जप्यं विधृतैकपादः ॥ ५८
आहारहीनो नियतोर्ध्वबाहुः
कर्त्तुं न शक्यं हि सुरासुरैर्यत्।
प्रज्वाल्य वह्निं प्रजुहोति गात्रं
स मांसरक्तस्य च कर्षमात्रम् ॥ ५९
तीक्ष्णेन शस्त्रेण निकृत्तदेहात्
समन्त्रकं प्रत्यहमेव हुत्वा।
स्नाय्वस्थिशेषं कुणपं तदासौ
क्षयं गतं शोणितमेव सर्व्वम् ॥ ६०

यदास्य मांसानि न सन्ति देहे
प्रदीप्तुकामस्तु हुताशनाय।
ततः स हृष्टस्त्रिदशालयैर्जनै-
र्निवारितो वाक्यशतैर्नयोक्तैः॥ ६१
निवारयित्वा प्रपितामहस्तं
प्रोवाच हृद्यं प्रवरं वृणीष्व।
दास्यामि कामांस्तव सर्व्वलोके
सुदुर्लभान् दानव तान् गृहाण॥ ६२
स पद्मयोनेस्तु वचो निशम्य
प्रोवाच दीनः प्रणतस्तु दैत्यः।
वैरिनिष्ठुरैर्मेऽपहृतन्तु राज्यं
प्रह्लादमुख्या मम सन्तु भृत्याः॥ ६३
अन्धस्य दिव्यं हि तथास्तु चक्षु-
रिन्द्रादयस्ते करदा भवन्तु।
मृत्युस्तु मा भून्मम देव-दैत्य-
गन्धर्व्व-यक्षोरग-मानुषेभ्यः॥ ६४
नारायणाद्वा दितिजेन्द्रशत्रोः
सर्व्वात्मकात् सर्व्वमयाच्च सर्व्वः।
श्रुत्वा वचस्तस्य सुदारुणं तत्
सुशङ्कितः पद्मभवस्तमाह॥ ६५
दैत्येन्द्र सर्व्वं भविता तदेत-
द्विनाशहेतुश्च गृहाण किञ्चित्।
यस्मान्न जातो न जनिष्यते वा
यो न प्रविष्टो मुखमन्तकस्य॥ ६६
अत्यन्तदीर्घं खलु जीवितन्तु
भवादृशाः सत्पुरुषास्त्यजन्ति।
एतद्वचः सानुनयं निशम्य
पितामहात् प्राह पुनः स दैत्यः॥ ६७
कालत्रये याश्च भवन्ति नार्य्यः
श्रेष्ठाश्च मध्याश्च तथा कनीयाः।
तासां मध्ये रत्नभूता तु या स्या-
न्ममापि नित्यं जननीव काचित्॥ ६८
कायेन वाचा मनसाप्यगम्या
नारी नृलोकस्य च दुर्लभा च।
तां कामयानस्य ममास्तु नाशो
दैत्येन्द्रभावाद्भगवन् स्वयम्भुः॥ ६९

वाक्यं तदाकर्ण्य स पद्मयोनिः
सुविस्मितः प्राह ततोऽन्धकस्य।
यत् काङ्क्षसे दैत्यवरास्तु ते वै
सर्व्वं भवत्वेष वचः सकामः॥ ७०
उत्तिष्ठ दैत्येन्द्र लभस्व कामं
सदैव वीरस्तु कुरुष्व युद्धम्।
श्रुत्वा तदिष्टं वचनं स दैत्यः
स्नाय्वस्थिशेषस्तु तमाह देवम्॥ ७१
कथं विभो वैरिबलं प्रविश्य
ह्यनेन देहेन करोमि युद्धम्।
स्नाय्वस्थिशेषं कुणपं सुपुष्टं
करेण पुण्येन भवेद्यथा मे॥ ७२
श्रुत्वा वचस्तस्य च पद्मयोनिः
करेण संस्पृश्य च तच्छरीरम्।
गतः सुरेन्द्रैः सहितः स्वधाम
सम्पूज्यमानो मुनिसिद्धसङ्घैः॥ ७३
संस्पृष्टमात्रः स च दैत्यराजः
सम्पूर्णदेहो बलवान् बभूव।
सञ्जातनेत्रः सुभगो बभूव
हृष्टः स्वमेवं नगरं विवेश॥ ७४
उत्सृज्य राज्यं सकलञ्च तस्मै
प्रह्लादमुख्यास्त्वथ दानवेन्द्राः।
तमागतं लब्धवरञ्च मत्वा
भृत्या बभूवुर्वशगाश्च तस्य॥ ७५
ततोऽन्धकः स्वर्गमगाद्विजेतुं
समाधियुक्तः सह भृत्यवर्गैः।
यत्राखिले तत्र सुरान् समस्तान्
करप्रदं वज्रधरं चकार॥ ७६
नागान् सुपर्णान् वरराक्षसांश्च
गन्धर्व्व-यक्षानपि मानुषांस्तु।
गिरीन्द्र-वृक्षांस्तृणजातिसर्व्वां-
श्चतुष्पदान् सिंहमुखान् विजित्य॥ ७७
त्रैलोक्यमेतद्धि चराचरं वै
वश्यं चकारात्मनि सन्नियोज्य।
ततोऽनुकूलानि सुदर्शनानि
नारीसहस्राणि बहूनि हृत्वा॥ ७८

रसातलाद्दत्य तथा धराया-
स्त्रिविष्टपाद्याः सुवर्णाः सुरूपाः ।
ताभिर्युतोऽग्रेषु स पर्व्वतेषु
रराम रम्येषु नदीतटेषु ॥ ७९
क्रीड़ायमानः स तु मध्यवर्त्ती
तासां प्रहर्षादथ दानवेन्द्रः ।
तत्पीतशिष्टानि पिबन् प्रमत्तो
दिव्यानि पेयानि सुमानुषाणि ॥ ८०
अन्यानि दिव्यानि तु षड्रसानि
फलानि मूलानि सुगन्धवन्ति ।
सम्प्राप्य यानानि सुवाहनानि
मयेन सृष्टानि गृहोत्तमानि ॥ ८१
पुष्पार्घधूपान्नविलेपनैश्च
सुशोभितान्यद्भुतदर्शनैश्च ।
संक्रीड़मानस्य गतानि तस्य
वर्षायुतानीह तथान्धकस्य ॥ ८२
जानाति किञ्चिन्न शुभं परत्र
यदात्मनः सौख्यकरं भवेद्धि ।
ततः प्रमत्तस्तु सुतान् प्रधानान्
कुतर्कवादैरभिभूय सर्व्वान् ॥ ८३
चचार दैत्यः सहितो महात्मा
विनाशयन् वैदिकसर्व्वधर्म्मान् ।
वेदद्विजान् वित्तमदाभिभूतो
न मन्यते सोऽप्यमरान् गुरूंश्च ॥ ८४
न मन्यते दैवहतो गतायुः
स्वल्पैरहोभिर्गमयन् वयश्च ।
ततः कदाचिद्गतवान् ससैन्यो
बहुप्रयाताः पृथिवीतलेऽस्मिन् ॥ ८५
अनेकसंख्या अपि वर्षकोट्यः
प्रहर्षितो मन्दरपर्व्वतन्तु ।
स्वर्गोपमां तत्र निरीक्ष्य शोभां
बभ्राम सैन्यैः सह पानमत्तः ॥ ८६
क्रीड़ार्थमासाद्य च तं गिरीन्द्रं
मतिं स वासाय चकार मोहात् ।
शुभ्रं दृढ़ं तत्र पुरं स कृत्वा
तत्र स्थितो दैत्यपतिः कदाचित् ॥ ८७

निवेशयामास पुनः क्रमेण
अत्यद्भुते मन्दरशैलसानौ ।
दुर्य्योधनो वैघस-हस्तिसंज्ञौ
तन्मन्त्रिणौ दानवसत्तमस्य ॥ ८८
नारीं सुरूपां ददृशुस्त्रयोऽपि
ते शीघ्रगा दैत्यवरं समेत्य ।
जचुर्यथादृष्टमतीव सर्व्वं
गुहान्तरे ध्याननिमीलिताक्षः ॥ ८९
दैत्येन्द्र कश्चिन्मुनिरत्र दृष्टो
रूपान्वितश्चन्द्रकलार्द्धजूटः ।
कटिस्थलव्याघ्रकृत्तिर्युवासौ
नागेन्द्रभोगावृतसर्व्वगात्रः ॥ ९०
कपालमालाभरणो जटालः
स शूलहस्तः शरतूणधारी ।
महाधनुष्मान् विवृताक्षसूत्रः
खड्गी त्रिशूली लकुटी कपर्द्दी ॥ ९१
तस्यापि दूरे परुषश्च दृष्टः
स वानरो घोरमुखः करालः ।
सर्व्वायुधः सूक्ष्मकरश्च रक्षन्
स्थितो जरद्गोवृषभस्तु शुक्लः ॥ ९२
तस्योपविष्टस्य तपस्विनोऽपि
सुचारुरूपा तरुणी मनोज्ञा ।
नारी शुभा पार्श्वगता हि तस्य
दृष्टा च काचिद्भुवि रत्नभूता ॥ ९३
प्रवाल-मुक्ता-मणि-हेम-रत्न-
वस्त्रावृता माल्यशुभोपगूढ़ा ।
सा येन दृष्टा स च दृष्टिमान् स्या-
द्दृष्टेन चान्येन किमत्र कार्य्यम् ॥ ९४
मन्यामहे तस्य च दिव्यनारी
भार्य्या मुनेः पश्यमनःप्रिया च ।
एतानि श्रुत्वा तु वचांसि तेषां
कामज्वरावर्णितसर्व्वगात्रः ॥ ९५
विसर्ज्जयामास मुनेः सकाशं
दुर्य्योधनादीन् सहसा जजल्पुः ।
आसाद्य ते तं मुनिमप्रमेयं
यद्दे वृतं तस्य च दैत्यराजः ॥ ९६

हिरण्यनेत्रस्य सुतो महात्मा
तमाह कस्यासि इहोपविष्टः ।
कस्येयमीदृक् तरुणी सुरूपा
नारी शुभा दैत्यपतिं मुनीन्द्र ॥ ९७

क्वेदं शरीरं तव भस्मदिग्धं
कपालमालाभरणं विरूपम् ।
तूणीर-भल्लाम्मुक-वाण-खड्ग-
भुशुण्डि-शूलाशनि-तोमराणि ॥ ९८

क्व जाह्नवी पुण्यतमा जटाग्रे
क्वायं शशी वा कुणपास्थिखण्डम् ।
विषानलोद्दीर्णमुखः क्व सर्पः
क्व सङ्गमः पीनपयोधरायाः ॥ ९९

जरद्गवारोहणमप्रशस्तं
क्षणे क्षणे तस्य न दर्शनञ्च ।
सन्ध्याप्रणामः क्वचिदेष धर्म्मः
क्व भोजनं लोकविरुद्धमेतत् ॥ १००

प्रयच्छ नारीं मम सान्त्वपूर्व्वं
सर्व्वं विरुद्धं कुरुषे विमूढ़ ।
अयुक्तमेतत् त्वयि नानुरूपं
यस्मादहं रत्नपतिस्त्रिलोके ॥ १०१

विमुञ्च शस्त्राणि मयाद्य चोक्तः
कुरुष्व पश्चात् तप एव शुद्धम् ।
उल्लङ्घ्य मच्छासनमप्रधृष्यं
विमोक्ष्यसे सर्व्वमिदं शरीरम् ॥ १०२

गलान्धकं श्रुद्धमिति प्रधानः
प्रोवाच दैत्यं स्मितपूर्व्वमेव ।
आकर्ण्य सर्व्वन्त्वथ दूतवाक्यं
यदस्ति रुद्रस्त्वथ किं मया स्यात् ॥ १०३

नाहं क्वचित् स्वं पितरं स्मरामि
गुहान्तरे घोरमनन्यचीर्णम् ।
एतद्व्रतं पाशुपतं चरामि
न मातरन्त्वशतमो विरूपः ॥ १०४

असूलमेतन्मयि सुप्रसिद्धं
यदुस्थजं सर्व्वमिदं ममास्ति ।
भार्य्या ममेयं तरुणी सुरूपा
सर्व्वंसहा सर्व्वगतस्य सिद्धिः ॥ १०५

एवं हि यद्यदुचितं तवास्ति
गृहाण तद्वै खलु राक्षस त्वम् ।
गम्भीरमेतद्वचनं निशम्य
ते दानवास्तं प्रणिपत्य मूर्द्ध्ना ॥ १०६

जग्मुस्ततो दैत्यवरस्य सूनुं
त्रैलोक्यनाशाय कृतप्रतिज्ञम् ।
बभाषिरे दैत्यपतिं प्रमत्तं
प्रणम्य राजानमदीनसत्त्वाः ॥ १०७

ते तत्र सर्व्वं जयशब्दपूर्व्वं
रुद्रेण यत् तत् स्मितपूर्व्वमुक्तम् ।
निशाचरस्त्वज्ज्वलशौर्य्यधैर्य्यैः
क्व दानवः कृपणः सत्त्वहीनः ॥ १०८

राजंस्त्वमुक्तो मुनिना विहस्य
क्रूरः कृतघ्नश्च सदैव पापी ।
क्व दानवः सूर्य्यसुताद्बिभेति
क्व मे भुजाः पर्व्वतराजसाराः ॥ १०९

क्वाहञ्च शस्त्राणि च दारुणानि
मृत्योश्च सन्त्रासकरं क्व युद्धम् ।
क्व वीरको वानरवक्त्रतुल्यो
निशाचरो जरसा जर्ज्जराङ्गः ॥ ११०

क्वेयं सुरूपा क्व च मन्दभाग्यो
बलं त्वदीयं क्व च वीवधो वा ।
शक्नोषि चेत् त्वं प्रयतस्व युद्धं
कर्त्तुं तदा छेहि कुरुष्व किञ्चित् ॥ १११

वज्राशनेस्तुल्यमिहास्ति शस्त्रं
क्व ते शरीरं मृदुपद्मतुल्यम् ।
इत्येवमादीनि वचांसि भद्र
तपस्विना दानव संयतेन ॥ ११२

युक्तं न ते तेन सहात्र युद्धं
त्वामाह राजन् स्मयमान एव ।
किं वस्तुशून्यैर्बहुभिः प्रलापै-
रस्माभिरुक्तैर्यदि बुध्यसे त्वम् ॥ ११३

तपोऽभियुक्तेन तपस्विना वै
स्मर्त्तासि पश्चान्मुनिवाक्यमेतत् ।
ततः स तेषां वचनं निशम्य
जज्वाल रोषेण स मन्दबुद्धिः ॥ ११४

आज्यावसिक्ता इव कृष्णवर्त्मा
सव्यं हिते तत् कुटिलं सुतीक्ष्णम् ।
गृहीतखड्गो वरदानमत्तः
प्रचण्डवातानुकृतीश्च कुर्व्वन् ॥ ११५
गतस्ततो मत्तगजेन्द्रगामी
पीत्वा सुरां घूर्णितलोचनश्च ।
गुहामुखं प्राप्य ददर्श दैत्यो
गौरीं त्रिलोकस्य च सारभूताम् ॥ ११६
अस्त्राणि हर्त्तुं वृषभध्वजस्य
तौ दम्पती गोवृषवीरकस्य ।
तां हर्त्तुकामः प्रविविक्षुरग्रे
ततोऽन्धकः क्रोधसरागनेत्रः ॥ ११७
निरीक्ष्य गौरीं स्मरबाणविद्धो
गुहां ततो वीरकरुद्धमार्गाम् ।
स्निग्धां यथा दीपशिखां निरीक्ष्य
पतङ्गसंघः कृमिरभ्युपेत्य ॥ ११८
तथा दृषावाशु पुनः पुनश्च
सम्पीड्यमानोऽपि स वीरकेण ।
पाषाण-वृक्षाशनि-तोय-वह्नि-
भुजङ्ग-शस्त्रास्त्रविभीषिकाभिः ॥ ११९
सम्पीड़ितोऽसौ तु पुनः प्रपीड्य
पृष्टश्च कस्त्वं किमिहागतोऽसि ।
निशम्य तद्वां स्वमतं स तस्मै
चकार युद्धं सह वीरकेण ॥ १२०
मुहूर्त्तमाश्चर्य्यवदप्रमेयं
संख्ये जितो वीरतरेण दैत्यः ।
तस्मिंस्तु संग्रामशिरो विहाय
क्षुत्क्षामकण्ठस्तृषितो गतोऽभूत् ॥ १२१
चूर्णीकृते खड्गवरे च खिन्ने
पलायमाने विषसादयस्ते ।
चक्रुः सुयुद्धं सह वीरकेण
प्रह्लादमुख्या दितिजप्रधानाः ॥ १२२
लज्जाङ्कुशाकृष्टधियो बभूवुः
सुदारुणं शस्त्रशतैरनेकैः ।
विरोचनस्तत्र चकार युद्धं
बलिश्च बाणश्च सहस्रबाहुः ॥ १२३
भज्जः सुभज्जस्तथ शम्बरश्च
वृत्रादयश्चाप्यथ वीर्य्यवन्तः ।
ते युध्यमाना विजिताः समन्तात्
क्षिप्रं हता वै गणवीरकेण ॥ १२४
संख्ये हतानां बहुदानवाना-
मुत्तां जयेत्येव हि सिद्धसङ्घैः ।
भेरुण्डनृत्याभिनयप्रवृत्ते
मेदो-वसा-मांससुपूतिमध्ये ॥ १२५
क्रव्यादसङ्घातसमाकुले तु
भयङ्करे शोणितकर्द्दमे तु ।
भग्नैस्तु दैत्यैर्भगवान् पिनाकी
व्रतं महापाशुपतं सुघोरम् ॥ १२६
प्रिये मया यत् कृतपूर्व्वमासी-
द्दाक्षायणीं प्राह सुसान्त्वयित्वा ।
तस्मात् फलं यन्मम तत् प्रनष्टं
मर्त्यैरमर्त्यस्य यतः प्रघातः ॥ १२७
पुण्यक्षयाद्विग्रह एव जातो
दिवानिशं देवि तव प्रसङ्गात् ।
उत्पाद्य दिव्यं परमाद्भुतन्तु
पुनर्वनं घोरतरञ्च गत्वा ॥ १२८
तस्माद्व्रतं घोरतरं चरामि
महाव्रतं नाम सुदारुणं यत् ।
संरक्षिता त्वं सुतवीरकेण
गुहान्तरे तिष्ठ सुसंयताथ ॥ १२९
यावत् लिहायामि व्रतं सुचीर्णं
सुनिर्भया सुन्दरि वै विशोका ।
एतावदुक्त्वा वचनं महात्मा
उत्पाद्य घोषं शनकैश्चचार ॥ १३०
स तत्र गत्वा व्रतमुग्रदीप्ति-
र्गतो वनं पुण्यतमं सुघोरम् ।
चर्त्तुं ह्यशक्यन्तु सुरासुरैर्यत्
तत् तादृशं वर्षसहस्रमात्रम् ॥ १३१
सा पार्व्वती मन्दरपर्व्वतस्था
प्रतीक्षमाणागमनं भवस्य ।
पतिव्रता शीलगुणोपपन्ना
एकाकिनी नित्यमथापि भीता ॥ १३२

गुहान्तरे दुःखपरा बभूव
संरक्षिता सा सुतवीरकेण ।
ततः स दैत्यो वरदानमत्त-
स्स्वैर्वैधमुख्यैः सहितो गुहान्तम् ॥ १३३
निर्भिन्नधैर्य्यैः पुनराजगाम
शिलीमुखैर्भास्समुद्भवैश्च ।
अत्यद्भुतं तत्र चकार युद्धं
तैसार्द्धं भोजन-पानवेलाम् ॥ १३४
रात्रिन्दिनं वर्षशतानि पञ्च
क्रुद्धः ससैन्यः सह वीरकेण ।
खड्गैः सकुन्तैः सह भिन्दिपालै-
र्गदा-भुशुण्डीभिरथेषुकाण्डैः ॥ १३५
शिलीमुखैरर्द्धशशीभिरुग्रै-
र्वितस्तिभिः कूर्म्ममुखैर्ज्वलद्भिः ।
नाराचमुख्यैर्निशितैश्च शूलैः
परश्वधैस्तोमरमुद्गरैश्च ॥ १३६
क्षुरैर्गुडैः पर्व्वतपादपैश्च
दिव्यैरथास्त्रैरपि दैत्यसङ्घैः ।
नन्दी विनिर्भिन्नतनुः पपात
द्वारं गुहायाः पिहितं समग्रम् ॥ १३७
तैरायुधैर्दैत्यभुजप्रयुक्तै-
र्गुहामुखे मूर्च्छित एव पश्चात् ।
आच्छादितं वीरकशस्त्रजालै-
र्दैत्येषु सर्व्वेषु मुहूर्त्तमात्रम् ॥ १३८
अपावृतं कर्त्तुमशक्यमासी-
न्निरीक्ष्य देवी दितिजान् सुघोरान् ।
भयेन सस्मार पितामहन्तु
देवी सखीभिः सहिता च विष्णुम् ॥ १३९
सैन्यञ्च तद्वीरवरस्य सर्व्वं
संस्मारयामास गुहान्तरस्था ।
ब्रह्मा तथा संस्मृतमात्र एव
स्त्रीरूपधारी भगवांश्च विष्णुः ॥ १४०
इन्द्रश्च सर्व्वैः सह सैनिकैश्च
स्त्रीरूपमास्थाय समागतास्ते ।
भूत्वा स्त्रियस्ते विविशुस्तदानीं
मुनीन्द्रसङ्घाश्च महानुभावाः ॥ १४१

सिद्धाश्च नागास्त्वथ गुह्यकाश्च
गुहान्तरं पर्व्वतराजपुत्र्याः ।
यस्मात् सुराणामनवस्थिताना-
मन्तःपुरे सङ्गमनं विरुद्धम् ॥ १४२
ततः सहस्राणि नितम्बिनीना-
मनन्तसंख्यान्यपि दर्शयेयुः ।
रूपाणि दिव्यानि महाद्भुतानि
गौर्य्यै गुहायान्तु सवीरकायै ॥ १४३
स्त्रियोऽथ दृष्ट्वा गिरिराजकन्या
गुहान्तरं पूरितपूर्व्वमासीत् ।
स्त्रीभिः शतैर्नादशतैरनेकै-
र्ननाद कल्पान्तसमेघघोषा ॥ १४४
भेर्य्यश्च संग्रामजयप्रदास्तु
ध्मातास्तु शङ्खास्तु नितम्बिनीभिः ।
मूर्च्छां विहायाद्भुतचण्डवीर्य्यः
स वीरको वै पुनरुत्थितस्तु ॥ १४५
प्रगृह्य शस्त्राणि महारथानां
तैरेव शस्त्रैर्दितिजान् जघान ।
ब्राह्मी ततो दण्डहस्ता विरुद्धा
गुहान्तरा क्रोधपरीतचेताः ॥ १४६
नारायणी शङ्ख-गदाब्ज-चक्र-
धनुर्द्धरा पूरितबाहुदण्डा ।
विनिर्ययौ लाङ्गलखड्गहस्ता
व्योमालिका-काञ्चनतुल्यवर्णा ॥ १४७
धारासहस्राकुलमुग्रवेगं
वैडौजसी वज्र करेण वज्रम् ।
सहस्रनेत्रा युधि सुस्थिरा च
सुदुर्ज्जया दैत्यशतैरधृष्या ॥ १४८
वैश्वानरी शक्तिकरा सुवक्त्रा
याम्या च दण्डोद्यतपाणिरुग्रा ।
सुतीक्ष्णखड्गोद्यतपाणिरुग्रा-
नैशाचरी नैर्ऋतचापघोरा ॥ १४९
तोयालिका वारुणचापहस्ता
विनिर्गता युद्धमभीप्समाना ।
प्रचण्डवातप्रभवा च देवी
तथा ततस्त्वङ्कुशपाणिरेव ॥ १५०

कल्पान्तवह्निप्रतिमां गदाञ्च
पाणौ गृहीत्वा धनदोद्भवा च ।
याहेश्वरी तीक्ष्णमुखा विरूपा
नखायुधा नागभयङ्करी च ॥ १५१

एतास्तथान्याः शतशो हि देव्यः
सुनिर्गताः सङ्कुलयुद्धभूमिम् ।
दृष्ट्वा च तत् सैन्यमनन्तपारं
विवर्णवर्णाश्च सुविस्मिताश्च ॥ १५२

समाकुलाः सङ्कित्ता भयार्द्दे
सेनापतिं वीरकं घोरवीर्य्यम् ।
चक्रुर्महायुद्धमभूतपूर्व्वं
निधाय बुद्धौ दितिजाः प्रधानाः ॥ १५३

निवर्त्तनं मृत्युमथात्मनश्च
नारीभिरन्तर्व्वैरदीनसत्त्वाः ।
अत्यद्भुतं तत्र चकार युद्धं
गौरी तदानीं सहिता सखीभिः ॥ १५४

कृत्वा रणे चाद्भुतबुद्धिमोघ्र्ं
सेनापतिं वीरकं घोरवीर्य्यम् ।
हिरण्यनेत्रात्मज एव भूय-
श्चक्रे महाव्यूहमुदारकर्म्मा ॥ १५५

सम्भावयिष्णुश्च निरीक्ष्य याम्यां
सुदारुणं तन्निलनामधेयम् ।
मुखं करालं विषमेव यस्य
तस्मिन् कृते भगवानाजगाम ॥ १५६

कल्पान्तघोरार्कसहस्रकान्ति-
श्चीर्णे व्रते कुपितः कृत्तिवासाः ।
गते ततो वर्षसहस्रमात्रे
तमागतं प्रेक्ष्य महेश्वरञ्च ॥ १५७

चक्रुर्महायुद्धमतीवमात्रं
नार्य्यः प्रहृष्टाः सह वीरकेण ।
प्रणम्य गौरीं गिरिशञ्च मूर्द्ध्ना
सन्दर्शयन् भर्त्तुरतीव शौर्य्यम् ॥ १५८

गौरी च युद्धञ्च चकार हृष्टा
हरस्ततः पर्व्वतराजपुत्त्रीम् ।
कण्ठे गृहीत्वा तु गुहां प्रविष्टो
रामासहस्राणि विसर्ज्जितानि ॥ १५९

गौरीञ्च सम्मानशतैः प्रपूज्य
गुहामुखे वीरक एव तस्थौ ।
ततः प्रहारैरपि जर्ज्जराङ्ग-
स्तस्मिन् रणे दैत्यवरेण दूतः ॥ १६०

जगाद वाक्यन्तु सगर्भमुग्रं
प्रविश्य शम्भुं प्रणिपत्य मूर्द्ध्ना ।
सम्प्रेषितस्त्वां विषमो गुहान्तु
एषोऽन्धकस्त्वामपि चाद्य वाक्यम् ॥ १६१

नार्य्या च कार्य्यं तव किञ्चिदस्ति
विमुञ्च नारीं तरुणीं सुरूपाम् ।
शयोक्तवांस्तापस तच्छुभस्य
क्रान्तं मया यत् कमनीयमात्रम् ॥ १६२

मुनिर्विरोद्धव्य इति प्रचिन्त्य
न त्वं मुनिस्तापस किन्तु शत्रुः ।
अतीव दैत्येषु महाविरोधी
युध्यस्व वध्योऽसि मया प्रमथ्य ॥ १६३

नेया मया ते ललनानुरूपा
एतद्वचो दूतमुखान्निशम्य ।
कपालमाली तमुवाच कोपा-
ज्ज्वलन् विषादेन महांस्त्रिनेत्रः ॥ १६४

व्यक्तं वचस्तद्भवता समग्रं
प्रोक्तं हि तत् त्वं त्वरितः प्रयाहि ।
यः स्याद्गशक्तो भुवि तस्य कोऽर्थो
दारैर्धनैर्वा सुमनोहरैश्च ॥ १६५

आयान्तु दैत्याश्च बलेन मत्ता
विचार्य्यमेवन्तु कृतं मयैतत् ।
शरीरयात्रापि कुतस्त्वशक्तेः
कुर्व्वन्तु यद्यद्धितन्तु तेषाम् ॥ १६६

ममापि यद्यत् करणीयमस्ति
तत्तत् करिष्यामि न संशयोऽत्र ।
एतद्वचस्तद्विषमोऽपि यस्मा-
च्छ्रुत्वा हरान्निर्गत एव हृष्टः ॥ १६७

आगानदन्नाञ्जितहङ्कृतानि
कुर्व्वन् गतो दैत्यपतेः सकाशम् ।
तस्येङ्गितज्ञस्य स दैत्यराजो
गदां गृहीत्वा त्वरितः ससैन्यः ॥ १६८

गुहान्तर्देहं गिलनामधेयं
सुदारुणं देववरैरभेद्यम्।
गुहामुखं प्राप्य महेश्वरस्य
विभेद शस्त्रैरशनिप्रकाशैः ॥ १६९
शस्त्रे ततो वीरकमेव शस्त्रै-
रवाकिरन्नद्रिसुतामथान्ये।
द्वारं हि केचिद्रुरुचिरं बभञ्जुः
गुहाणि सर्व्वाणि च नाशयेयुः ॥ १७०
प्रस्त्राणि मूलानि जलञ्च हृद्य-
मुद्यानमार्गानपि खण्डयेयुः।
निर्वोढ्येयुर्मुदिताश्च केचि-
च्छृङ्गाणि शैलस्य च भानुमन्ति ॥ १७१
ततो हरः संस्मृतवान् स्वसैन्यं
समाह्वयत् कुपितः शूलपाणिः।
भूतानि चान्यानि सुदारुणानि
देवान् ससैन्यान् सहविष्णुमुख्यान् ॥ १७२
आहूतमात्रास्तु गणाः ससैन्या
रथैर्गजैर्वाजिवृषैश्च गोभिः।
उष्ट्रैः खरैः पक्षिवरैश्च सिंहैः
सर्व्वे च देवाः सह भूतसङ्घैः ॥ १७३
व्याघ्रैर्मृगैः शूकर-शारभैश्च
मीन-मत्स्यैः शिशुमारमुख्यैः।
अन्यैश्च नानाविधजीवसङ्घै-
र्देहैर्विशीर्णस्फुटितैः श्मशानैः ॥ १७४
भुजङ्गमैः प्रेतशतैः पिशाचै-
र्दिव्यैर्विमानैः कमलाकरैश्च।
मीनध्वजैः पर्व्वतवाहनैश्च
समागताः प्राञ्जलयः प्रणम्य ॥ १७५
उपह्नं तस्थुरदीनसत्त्वाः
सेनापतिं वीरकमेव कृत्वा
विसर्ज्जयामास रणाय देवान्
विश्रान्तवाहानथ तत् पिनाकी ॥ १७६
युद्धं स्थिरं लब्धजयं प्रधानं
समर्पितास्ते तु महेश्वरेण।
चक्रुर्युगान्तप्रतिमञ्च युद्धं
सर्व्वैरहीनं त्वरितं गिलेन ॥ १७७

दैत्येन्द्रसैन्येन सहैव घोरं
क्रोधान्निगीर्णास्त्रिदशास्त्वसंख्याः।
तस्मिन् क्षणे युध्यमानाश्च सर्व्वे
ब्रह्मेन्द्रविष्ण्वर्कशशाङ्कमुख्याः ॥ १७८
तथैव भूतानि गणैश्च सार्द्धं
क्षुधान्वितेनाद्भुतविक्रमेण।
दैत्येन्द्रवाक्याद्विषसेन तेन
सैन्ये निगीर्णे सति वीरकस्तु ॥ १७९
विहाय संग्रामशिरो गुहां तां
प्रविश्य सर्व्वं प्रणिपत्य मूर्द्ध्नां।
प्रोवाच दुःखाभिहतः स्मरारिं
सवीरभद्रो विहिताञ्जलिः सन् ॥ १८०
निगीर्णं मे सैन्यं विषसदितिजेनाद्य भगवन्
निगीर्णोऽसौ विष्णुस्त्रिभुवनगुरुर्दैत्यदलनः।
निगीर्णौ चन्द्रार्कौ कमलज-मघोनौ च वरदौ
निगीर्णास्ते सर्व्वे यम वरुण-वाताश्च धनदः ॥ १८१
स्थितोऽस्म्येकः प्रह्वः किमिह करणीयं भवति मे
अजेयो दैत्येन्द्रः प्रमुदितमना दैत्यसहितः।
अजेयं त्वामायात् प्रतिजवमनो-मारुतगतिः
स्वयं बुद्ध्या दृष्ट्वा यदिह करणीयं कुरु विभो ॥ १८२
न सामान्यो दैत्यो विषसदितिजस्त्वप्ययमसौ
स्वयं विष्णुर्देवः कनककशिपुं कश्यपसुतम्।
नखैस्तीक्ष्णैर्भङ्क्त्वा तदपि भगवान् रोषवशगः
प्रवृत्तो वै विश्वं विघसितुमलं व्यात्तवदनः ॥ १८३
वशिष्ठाद्यैः शप्तो भुवनपतिभिः सप्तमुनिभि-
स्तथाभूतो भूयस्त्वमिति सुचिरं दैत्यसहितः।
ततस्तेनोक्तास्ते प्रणयवचनैरात्मनिहितैः
कदा शापात् तस्माद्भवति मम मोक्षो मुनिवराः ॥ १८४
यतः क्रोधैरुक्तो विषम हरणाद्युद्धसमये
ततो घोरैर्बाणैर्विदलितमुखो मुष्टिभिरलम्।
बदर्य्याख्यारण्ये नरहरिमहापुण्यवसतौ
निरस्ताभ्यां ताभ्यां विगतकलुषो यास्यसि परम् ॥ १८५
ततस्तेषां वाक्यात् प्रतिदिनमसौ दैत्यगिलनः
क्षुधार्त्तः संग्रामे भ्रमति पुनरामोदमुदितः।
तमश्चेदं घोरं जगति हितयोः सूर्य्य-शशिनो-
स्तथा शुक्रस्तुभ्यं परमरिपुरत्यन्तविधुरः ॥ १८६

हतान् देवैर्दैत्यान् पुनरमरविद्यास्तुतिपदैः
सवीर्य्यान् संहृष्टान् व्रणशतवियुक्तान् प्रकुरुते।
वरं प्राणास्त्याज्यास्तव तमनु संग्रामसमये
भवान्यां नीतायां क्षणमपि व्रतः कार्य्यकरणः ॥ १८७
इदानीं सत्पुत्रात् प्रमथपतिराकर्ण्य कुपित-
स्थिरं ध्यात्वा चक्रे त्रिभुवनमिति प्रागनुपमम्।
अगायत् सोमाख्यं दिनकरकराकारवपुषं
प्रहासात् तन्नाम्ना तदनु निहतं तेन च तमः ॥ १८८
प्रकाशोऽस्मिन् लोके पुनरपि महायुद्धमकरो-
द्रणे दैत्यैः सार्द्धं विकृतवदनैर्वीरकमुनिः।
शिलाचूर्णं भुक्त्वा प्रवरमुनिना यस्तु जनितः
तपः कृत्वा तोये यममपि पुरा यश्च जितवान् ॥ १८९
ततो रुद्रः सद्यः स खलु दितिजेनातिबलिना
निगीर्णोऽसौ नन्दी निशितशरशूलासिसहितः।
प्रधानो योधानां मुनिवरशतानामपि महान्
निवासो विद्यानां शम-दम-महाधैर्य्यसहितः ॥ १९०
निरीक्ष्यैवं पश्चाज्जरदृषभमारुह्य भगवान्
कपर्द्दी युद्धार्थी विषमदितिजं सम्मुखमुखः।
जपन् दिव्यं मन्त्रं निगिलनविधातोद्गिलनकं
स्थितः सज्जं कृत्वा धनुरशनिकल्पानपि शरान् ॥ १९१
ततो निष्क्रान्तोऽसौ विषमवदनाद्वीरकमुनि-
र्गृहीत्वा तत् सर्व्वं स्वबलमतुलं विष्णुसहितः।
तमुद्गीर्णाः सर्व्वे कमलज-मघोनेन्दु-दिनपाः
प्रहृष्टं तत् सैन्यं पुनरपि महायुद्धमकरोत् ॥ १९२
जिते तस्मिन् शुक्रस्तदनु दितिजान् युद्धनिहतान्
यदा विद्याशौर्य्यात् पुनरपि सजीवान् प्रकुरुते।
तदा बद्ध्वा दत्तः पशुमिव गणैर्भूतपतये
निगीर्णस्तेनासौ त्रिपुररिपुणा दानवगुरुः ॥ १९३
विनष्टे शुक्राख्ये सुररिपुबलं तत्तदखिलं
जितं ध्वस्तं भग्नं मृतमपि सुरैश्चापि दलितम्।
प्रभूतैर्भूतौघैर्दितिजकुणपग्रासरसिकैः
सरुण्डैर्नृत्यद्भिर्निशितशरशक्त्युद्यतकरैः ॥ १९४
प्रमत्तैर्वेतालैः सुदृढकरतुण्डैरपि खगै-
र्वृकैर्नानाभेदैः शवकुणपपूर्णस्य कवलैः।
विकीर्णे संग्रामे कनककशिपोर्वंशजनकः
चिरं युद्धं कृत्वा हरि-हर-मघोनैश्च विजितः ॥ १९५

प्रविष्टः पाताले गिरिजलधिरन्ध्राण्यपि भयात्
ततः सैन्ये क्षीणे दितिजवृषभस्त्वन्धकवरः।
प्रकोपे देवानां कदनमकरोद्वीरकवले
गदाघातैर्घोरैर्विदलिततनुश्चापि हरिणा ॥ १९६
न धैर्य्यात् संग्रामं त्यजति वरलब्धः किल यतः
तदा काण्डैर्घोरैस्त्रिदशपतिना पीड़िततनुः।
ततः शस्त्रास्त्रौघैस्तरुगिरिजलैस्तांश्च विबुधान्
जिगायोच्चैर्गर्ज्जन् प्रमथपतिमाहूय शनकैः ॥ १९७
स्थितो युद्धं कुर्व्वन् रणपतितशस्त्रैर्बहुविधैः
परिक्षीणैः सर्व्वैस्तदनु गिरिजां रुद्रमहनत्।
तथा वृक्षैः सर्पैरशनिनिवहैरम्बिजलदै-
र्विरूपैर्मायाभिः कपटरचनाशम्बरशतः ॥ १९८
विजित्वा शैलेन्द्रं कुहकमपरं तत्र कृतवान्
महासत्त्वो वीरस्त्रिपुररिपुतुल्यश्च मतिमान्।
अवध्यो देवानां वरशतमहोन्मादविवशः
प्रभूतैः शस्त्रास्त्रैः सपदि दितिजो जर्ज्जरतनुः ॥ १९९
स्वदेहाद्विस्यन्दैः क्षितितलगतैरन्धकगणै-
रसंख्यातं घोरं विकृतवदनं स्वात्मसदृशम्।
स्फुरत्कल्पान्ताग्निप्रतिमवपुषा भूतपतिना
त्रिशूलेनोद्भिन्नस्त्रिपुररिपुणा दारुणतरम् ॥ २००
यदा सैन्यात् सैन्यं पशुपतिहतादन्यदभव-
द्व्रणोत्थैरत्युष्णैः पिशितनिस्तैर्बिन्दुभिरलम्।
तदा विष्णो र्योगात् प्रमथपतिमाहूय मतिमान्
चकारोग्रं रूपं विकृतवदनं स्त्रैणमजितम् ॥ २०१
करालं संशुष्कं बहुभुजलताक्रान्तककुभं
द्विनेत्रन्त्वाकीर्णं भुजगवदनैर्लोमनिवहैः।
स ताभ्यां सर्पाभ्यां विषदहनपुञ्जौघमसृज-
च्छुरद्रोमाकारं तदनु कुपितो दक्षिणभवात् ॥ २०२
विनिष्क्रान्ता कर्णाद्रणशिरसि शम्भोर्भगवतः
संग्रामस्था देवी चरणयुगलालङ्कृतमही।
स्तुता देवैः सर्व्वैस्तदनु भगवत्प्रेरितमतिः
क्षुधार्त्ता तत् सैन्यं दितिजनिसृतं तच्च रुधिरम् ॥ २०३
जघासानुन्नं तद्रणशिरसि सत्कर्द्दमम्
ततस्त्वेको दैत्यस्तदपि युयुधे शुष्करुधिरः।
तलाघातैर्घोरैरशनिसदृशैर्जानु-चरणै-
र्नखैर्वज्राकारैर्मुख-भुज-शिरोभिश्च गिरिशम् ॥ २०४

...त्वत् यात्तं धर्म्मं स्वकुलविहितं शाश्वतमजं
...ती शान्तः पश्चात् प्रमथपतिना भिन्नहृदयः।
...त्रिशूले शम्भोतो नभसि विधृतम्छत्त्रसदृशो
...रुक्तकायः शुष्कस्तपनकिरणैर्जीर्णतनुमान् ॥ २०५
...जलाधारैर्मेघैः पवनसहितैः क्लेदितवपु-
...र्विचीर्णस्तिग्मांशुस्तुहिनसकलाकारशकलः।
...तथाभूतः प्राणांस्तदपि न जहौ दैत्यवृषभः
ततो युद्धान्ते भुवनपतयो जग्मुरमराः ॥ २०६
...स्तवैर्नानाभेदैः प्रमथपतिमभ्यर्च्य विधिवद्-
...गताः स्वं स्वं धाम त्रिदशपतयः प्रीतमनसः।
...हरः स्वीयैः सार्द्धं गिरिवरगुहायां प्रमुदितो
...त्रिलव्यैको वंशान् विविधबलिभिः पूज्यसुभगः॥२०७
...स्वारान्त्यां क्रीड़ां गिरिवरसुतां प्राप्य मुदितां
...त्वा पुत्त्रं घोराद्विषसवदनान्मुक्तमनघम् ॥ २०८
इति श्रीशैवे महापुराणे धर्म्मसंहितायामन्धक-
वधो नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः।

सूत उवाच।

इतिहासमिति श्रुत्वा पुनस्ते परमर्षयः।
...शं परमसंहृष्टाः प्रपच्छुर्मुनिसत्तमम् ॥ १

मुनय ऊचुः।

तस्मिन् महति संग्रामे दारुणे लोमहर्षणे।
...शुक्रो दैत्यपतिर्विद्वान् भक्षितस्त्रिपुरारिणा ॥ २
...युगान्तदहनः कालो जठरस्थः पिनाकिनः।
...किं चकार महायोगी रुद्रस्य जठरानलः ॥ ३
...प्रसन्नन्तु तं भूयो भार्गवं दीप्ततेजसम्।
...निर्ददाह कथं शुक्रं शम्भोर्जठरपञ्जरात् ॥ ४
...विनिष्क्रान्तः पुनर्धीमान् भगवन्तमुमापतिम्।
...कथमाराधयामास कियत्कालं स भार्गवः ॥ ५
...कथमन्धको गाणपत्यं कथं शूलाद्विनिर्गतः।
...एतत् सर्व्वमशेषेण शृखतां कथयस्व नः ॥ ६

सूत उवाच।

भगवान् कालिकापुत्त्रो याथातथ्यमुवाच सः।
...तेषामेतद्वचः श्रुत्वा सर्व्वे पारीक्षितस्य तु ॥ ७

व्यास उवाच।

तस्मिन् महति संग्रामे तुषारशशिशीतलाम्।
भार्गवो वारुणीं विभ्रद्भक्षितस्त्रिपुरारिणा ॥ ८
महामृत्युप्रशमनीं सर्व्वसिद्धिप्रदां शिवाम्।
शृणु मृत्युञ्जयां विद्यां पारम्पर्य्यक्रमागताम् ॥ ९

ओं नमस्ते देवेशाय सुरासुरनमस्कृताय भूत-
भव्यमहादेवाय हरिपिङ्गललोचनाय बलाय बुद्धि-
रूपिणे वैयाघ्रवसनच्छदायारणेयाय त्रैलोक्य-
प्रभव ईश्वराय हराय हरिनेत्राय युगान्तकर-
णायानलाय गणेशाय लोकशम्भवे लोकपालाय
महाभुजाय महाहस्ताय शूलिने महादंष्ट्रिणे
महेश्वराय कालाय कालरूपिणे नीलग्रीवाय
महादेवाय गणाध्यक्षाय सर्व्वात्मने सर्व्वभावनाय
सर्व्वगाय मृत्यवे मृत्युदूताय(क) पारियात्रसुव्रताय
ब्रह्मचारिणे वेदान्तगाय पशुपतयेऽव्ययाय शूल-
पाणिने वृषकेतवे हरये जटिने मुण्डिने शिखण्डिने
लकुटिने महायशसे भूतेश्वराय गुहावासिने
वीणापणवतूणवतेऽमराय दर्शनीयाय बालसूर्य्य-
निभाय श्मशानचारिणे भगवते उमापतये अरिन्द-
माय भगस्याक्षिपातिने पूषणोदशननाशनाय क्रूर-
कर्त्त्रे पाशहस्ताय प्रलयकालायोल्कामुखायाग्नि-
केतवे मुनये दीप्ताय विशांपतये उन्मदाय वेप-
नकाय चतुर्थकाय लोकसत्तमाय वामनाय वाम-
देवाय वाग्दाक्षिण्याय वामतोभिक्षवे भिक्षु-
रूपिणे जटिने स्वयंजटिलाय शक्रहस्तप्रतिष्टम्भ-
काय वसूनां स्तम्भकाय क्रतवे क्रतुकाराय
कालाय मेधाविने मधुकरायाचलाय वानस्पत्याय
वाजसने नित्यमाश्रमपूजिताय जगद्धात्रे जगत्कर्त्त्रे
पुरुषायशाश्वताय ध्रुवाय धर्म्माध्यक्षाय त्रिवर्त्मने
भूतभावनाय त्रिनेत्राय बहुरूपाय सूर्य्यायुतसम-
प्रभाय देवाय देवातिदेवाय चन्द्राङ्कितजटाय
नर्त्तकाय लासकाय पूर्णेन्दुसदृशाननाय ब्रह्मण्याय-
शरण्याय सर्व्वदेवमयाय सर्व्वतूर्य्यनिनादिने
सर्व्वबन्धमोचनाय बन्धनाय सर्व्वधारिणे धर्म्मो-
त्तमाय पुष्पदन्ताय पिभागाय मुख्याय सर्व्व-

(क) मृत्युहरायेति क्वचित् पाठान्तरम्।

हराय हिरण्यवसे हारिणे भीमाय भीमपरा-
क्रमाय ओं नमो नमः ॥ १०
व्यास उवाच ।
इमं मन्त्रवरं जप्त्वा शुक्रो जठरपञ्जरात् ।
निष्क्रान्तो लिङ्गमार्गेण शम्भोः शुक्रमिवोत्कटम् ॥ ११
गौर्य्या गृहीतः पुत्रार्थं ततो विघ्नेश्वरः कृतः ।
अजरश्चामरः श्रीमान् द्वितीय इव शङ्करः ॥ १२
त्रिभिर्वर्षसहस्रैस्तु समतीतैर्महीतले ।
महेश्वरात् पुनर्जातः शुक्रो वेदनिधिर्मुनिः ॥ १३
व्यास उवाच ।
ददर्श शूले संशुष्कं ध्यायन्तं परमेश्वरम् ।
अन्धकं धैर्यसम्पन्नं दानवं तं तपस्विनम् ॥ १४
महादेवं विरूपाक्षं चन्द्रार्द्धकृतशेखरम् ।
अमृतं शाश्वतं स्थाणुं नीलकण्ठं पिनाकिनम् ॥ १५
वृषभाक्षं महाज्ञेयं पुरुषं सर्व्वकामदम् ।
कामारिं कामदहनं कामरूपं कपर्द्दिनम् ॥ १६
विरूपं गिरिशं भीमं स्रग्विणं रक्तवाससम् ।
योगिनं कालदहनं त्रिपुरघ्नं कपालिनम् ॥ १७
गूढ़व्रतं गुप्तमन्त्रं गम्भीरं भावगोचरम् ।
अणिमादिगुणाधारं त्रिलोक्यैश्वर्य्यदायकम् ॥ १८
वीरं वीरहणं घोरं विरूपं मांसलं पटुम् ।
महामांसं वशोन्मत्तं भैरवं परमेश्वरम् ॥ १९
त्रैलोक्यडामरं लुब्धं लुब्धकं यज्ञसूदनम् ।
कृत्तिकानां सुते रक्तसुन्मत्तं कृतिवाससम् ॥ २०
गजकृत्तिपरीधानं क्षुब्धं भुजगभूषणम् ।
दत्तालम्बञ्च वेतालं घोरशाकिनिपूजितम् ॥ २१
अघोरं घोरदैत्यघ्नं घोरघोषं वनस्पतिम् ।
भस्माङ्गं जटिलं शुद्धं भेरुण्डशतसेवितम् ॥ २२
भूतेश्वरं भूतनाथं पञ्चभूताश्रितं खगम् ।
क्रोधिनं निष्ठुरं चण्डं चण्डीशं चण्डिकाप्रियम्॥२३
चण्डतुण्डं गरुत्मन्तं निस्त्रिंशं शवभोजनम् ।
लेलिहानं महारौद्रं मृत्युं मृत्योरगोचरम् ॥ २४
मृत्योर्मृत्युं महासेनं श्मशानारण्यवासिनम् ।
रागं विरागं रागान्धं वीतरागं शतार्च्चिषम् ॥ २५
सत्त्वं रजस्तमो धर्म्ममधर्म्मं वासवानुजम् ।
सत्यन्त्वसत्यं सद्रूपमसद्रूपमहेतुकम् ॥ २६
अर्द्धनारीश्वरं भानुं भानुकोटिशतप्रभम् ।
यज्ञं यज्ञपतिं रुद्रमीशानं वरदं शिवम् ॥ २७
अष्टोत्तरशतन्त्वेतन्मूर्त्तीनां परमात्मनः ।
शिवस्य दानवो ध्यायन् मुक्तस्तस्मान्महाभयात् ॥२८
दिव्येनामृतवर्षेण सिञ्चितश्च कपर्द्दिना ।
तुष्टेन मोचितस्तस्माच्छूलाग्रादवरोपितः ॥२९
उक्तश्च सान्त्वपूर्व्वं यत् कृतं सर्व्वं महात्मना ।
ईश्वर उवाच ।
भो भो तुष्टोऽस्मि दैत्येन्द्र दमेन नियमेन च ॥ ३०
शौर्य्येण तव धैर्य्येण वरं वरय सुव्रत ।
आराधितस्त्वया नित्यं सर्व्वनिर्द्धूतकिल्बिषः ॥ ३१
वरदोऽहं वरार्हस्त्वं महादैत्येन्द्रसत्तम ।
प्राणसन्धारणादस्ति यच्च पुण्यफलं तव ॥ ३२
त्रिभिर्वर्षसहस्रैस्तु तेनास्तु तव निर्वृतिः ।
एतच्छ्रुत्वान्धकः प्राह वेपमानः कृताञ्जलिः ॥ ३३
भूमौ जानुद्वयं कृत्वा भगवन्तमुमापतिम् ।
भगवन् यद्यदुक्तोऽसि दीनो दीनपदाक्षरः ॥ ३४
हर्षगद्गदया वाचा मया पूर्व्वं रणाजिरे ।
यद्यत् कृतं विमूढ़त्वात् कर्म्म लोकेषु गर्हितम् ॥३५
अजानता त्वां तत् सर्व्वं कामदोषात् कृतं मया ।
पार्व्वतीं प्रति दुष्टं यत् तत् तन्मनसि मा कृथाः ॥३६
दुःखितस्य दया कार्य्या कृपणस्य विशेषतः ।
दीनस्य भक्तियुक्तस्य भविता नित्यमेव हि ॥ ३७
क्षम्यतां मे महादेव कृपणो दुःखितो भृशम् ।
सोऽहं दीनो भक्तियुक्तो रचितोऽयं मयाञ्जलिः ॥३८
इयं देवी जगन्माता परितुष्टा ममोपरि ।
क्रोधं विहाय सकलं प्रसन्ना मां निरीक्षतु ॥ ३९
क्वास्याः क्रोधः क्व कृपणो दैत्योऽहं चन्द्रशेखरः ।
क्व भवान् परमोदारः कामेन विवशीकृतः ॥ ४०
काम-क्रोधादिभिर्दोषैर्जरसा मृत्युना तथा ।
अयं ते वीरकः पुत्रो युद्धशौण्डो महाबलः ॥ ४१
कृपणं मां समालक्ष्य मा मन्युवशमन्वगाः ।
भवेयं मा पुनर्देवि निर्लज्जो धर्म्मवर्ज्जितः ॥ ४२
स्यामहं वीरकेणापि तुल्यस्ते वल्लभः सुतः ।
तुषारहारशीतांशु-शङ्खकुन्देन्दुवर्णभाक् ॥ ४३
पश्येयं पार्व्वतीं नित्यं मातरं गुरुगौरवात् ।

नित्यं भवद्भ्यां भक्तस्तु निर्व्वैरो दैवतैः सह ॥ ४४
निवर्त्स्यं गणैः सार्द्धं शान्तात्मा योगचिन्तकः।
मा मरेयं पुनर्जातिं विरुद्धां दानवोद्भवाम् ॥ ४५
एतावदुक्त्वा वचनं दैत्येन्द्रो मौनमास्थितः।
आर्वांखिलोचनं देवं पार्व्वतीं प्रेच्य मातरम् ॥ ४६
ततो दृष्टस्तु रुद्रेण प्रसन्नेनैव चक्षुषा।
स्मृतवान् पूर्व्ववृत्तान्तमात्मनो जन्म चाद्भुतम् ॥ ४७
तस्मिन् स्मृते च वृत्तान्ते ततः पूर्णमनोरथः।
प्रणम्य मातापितरौ कृतकृत्योऽभवत् ततः ॥ ४८
पार्व्वत्या मूर्द्ध्न्युपाघ्रातः शङ्करेण च धीमता।
यथाभिलषितं लेभे तुष्टाद्बालेन्दुशेखरात् ॥ ४९
एतदः सर्व्वमाख्यातमन्धकस्य पुरातनम्।
मृत्युञ्जयञ्च कथितं मन्त्रं मृत्युविनाशनम्।
पठितव्यं प्रयत्नेन सर्व्वकामफलप्रदम् ॥ ५०

इति श्रीशैवे महापुराणे धर्म्मसंहितायामन्धक-
सिद्धिर्नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः।

मुनय ऊचुः।

पतिव्रता नित्यमशेषधात्री
सत्यव्रता सापि तपोऽन्विता च।
किमात्मनो रक्षयितुं ह्यशक्ता
गौरीं परं पालयति स्वयम्भूः ॥ १
आचक्ष्व सर्व्वं स्वमनोमतं तत्
काली सती गौरवतां प्रपन्ना।
प्रभावमस्याः शृत एव यत्ना-
ल्लिङ्गं यथा पूज्यतमं हि शम्भोः ॥ २

सूत उवाच।

यस्माच्च येन च यदा च यथा च यच्च
यावच्च यत्र च शुभाशुभमात्मकर्म्म।
तस्माच्च तेन च तदा च तथा च तच्च
तावच्च तत्र च कृतान्तवशादुपैति ॥ ३
सुचारुरूपां स्तनभारनम्रां
सरूपिणीं मत्तगजेन्द्रयानाम्।
दाक्षायणीं चन्द्रमुखीं निरीक्ष्य
रुरुः कदाचिन्मलयै कृतघ्नः ॥ ४
दैत्यस्ततो मारशिलीमुखैस्तु
प्रतप्तगात्रोऽभिहतान्तरात्मा।
वर्षायुतं सूर्य्यमरीचिकोटि-
निर्भिन्नमर्म्मा तप एव चक्रे ॥ ५
पाषाणभूतश्च सुनिश्चयेन
आहारहीनो ममताविहीनः।
ततः कदाचित् तमुवाच देवः
पद्मोद्भवः पद्मपलाशकान्तिः ॥ ६
किमर्थमेतत् तप आश्रितं ते
दैत्येन्द्र घोरं कथयस्व सर्व्वम्।
निशम्य तत् तद्वचनं हि तस्य
दैत्योऽब्रवीद्ध्याननिमीलिताक्षः ॥ ७
दाक्षायणी मे भवतु प्रहृष्टा
भार्य्या भवो वै हि ममास्तु वश्यः।
मा मेऽस्तु मृत्युरुषितात् तु देवात्
स्त्रीणां सकाशाद्विभियां न जातु ॥ ८
मुग्धाः स्त्रियस्त्वबलाः स्थैर्य्यधैर्य्याः
पराक्रमे शौर्य्यसुवीर्य्यहीनाः।
एवं रुरोर्वाचमिमां निशम्य
स जातहासो भगवानुवाच ॥ ९
नैतत् सत्यं त्रिषु लोकेषु दैत्य
सुदुर्लभा शङ्करेणापि नित्यम्।
जगन्माता पार्व्वती लोकपूज्या
कालत्रये कुत्रचिदप्यनार्य्ये ॥ १०
सुसम्प्राप्या चेत् सा भविष्यत्तु शम्भो-
र्नै शङ्करोऽन्यां ललनां गमिष्यन्।
न जाह्नवीं शिरसा धारयिष्यन्
न चेन्दुलेखामथवापि सन्ध्याम् ॥ ११
नानास्त्रियश्चाटुशतैरनेकै-
र्नाराधयिष्यन् विविधैरुपायैः।
तस्मादलं गच्छ वराप्सरोभिः
क्रीड़ां स चेच्छीवितुं ते मनोज्ञम् ॥ १२
गच्छाथवा पार्व्वतीं पश्य देवीं
तां प्रार्थयानस्तु यथेह कश्चित्।

तत्रैव वा स्थीयतां कालरात्रिं
कपर्द्दिनं वा त्रिपुरारिमुग्रम् ॥ १३
एतावदुक्त्वा वचनं महात्मा
प्रजापतिर्व्योमचरो बभूव ।
स दानवेन्द्रोऽपि गतोऽथ शम्भौ
चक्रे रुरुस्तत्र तपः सुरौद्रम् ॥ १४
तपोऽग्निना तन्निलयं ददाह
दन्दह्यमानो भगवान् पिनाकी ।
गतोऽन्यदेशं तरसा सदारो
भयात् तपोऽग्नेः परतः परन्तु ॥ १५
गौरी पतिं प्राह पलायसे किं
निवार्य्यतां वह्निरयं प्रभुत्वात् ।
अगादगं यासि भयात् किमर्थं
प्रब्रूहि सत्यं वचनं तथोक्तः ॥ १६
निशम्य गामीदृशमिन्दुमौलि-
स्तस्याः स तामाह शृणु प्रिये वै ।
त्वां प्रार्थयानो रुरुरेष दैत्य-
स्तपश्चचारोग्रमतिस्तु तेन ॥ १७
त्रैलोक्यमेतत् सचराचरं वै
निर्द्दग्धुमीष्टे तपसा परेण ।
नाहं समर्थस्त्वयि तत् कुरुष्व
यच्छक्यसे यत्नमतोऽद्य किञ्चित् ॥ १८
एषोऽञ्जलिः शीलधने मया ते
त्रैलोक्यमेतत् सचराचरञ्च ।
रच स्वमात्मानमिहोपयस्य
क्षमस्व मन्युं मयि मा कृथास्त्वम् ॥ १९
तं तापसं गच्छ रुरुं वनस्थं
विमोहयन्ती तमपीह शक्त्या ।
तत् तादृशं सा वचनं निशम्य
शम्भोस्तु गौरी चकिता तदाभूत् ॥ २०
क्रुद्धा ततः सापि वनं जगाम
विन्ध्याचले नागमहेन्द्रकल्पम् ।
संयुध्यमानं गुरुमुष्टिघातै-
स्त्वचर्म्मणा वेष्टितगात्रयष्टिः ॥ २१
गजेन्द्ररक्तेन तु लिप्तगात्रं
ददर्श सिंहं सुविदारितास्यम् ।
सा लीलया त निजघान घोरं
तच्चर्म्मणा च्छिन्नकटिस्थला च ॥ २२
रक्तेन सिंहस्य च सिक्तकेशी
लम्बोदरी वैकृतिका बभूव ।
प्रचण्डहुङ्कारशतानि कृत्वा
प्राप्ता गुहां दानवसत्तमस्य ॥ २३
पादप्रहारैरथ मुष्टिघातै-
र्हत्वा कपाटार्गलमेव तस्य ।
कृत्वाट्टहासं प्रलयाभ्रघोषा
उवाच तं मीलितलोचनन्तु ॥ २४
प्राप्तास्मि यद्वद्यत् करणीयमस्ति
एषास्मि गौरी तव किं करोमि ।
अलं महादैत्य तव श्रमेण
आचक्ष्व सर्व्वं मनसेप्सितं ते ॥ २५
दैत्येन्द्र किं त्वं तपसा कृतेन
तत् तत् कुरुष्वाद्य मनोरथन्तु ।
दंष्ट्राकरालामथ तां स दृष्ट्वा
संहृष्टरोमा पतितो धरण्याम् ॥ २६
धैर्य्यं गृहीत्वाप्यथ तामुवाच
गौरी च न त्वं व्रज कालरात्रि ।
गौरी सुगात्री शशिपूर्णवक्त्रा
सुचारुरूपा स्तनभारनम्रा ॥ २७
तपोऽग्निना हन्त परम्परेण
त्रैलोक्यमेतत् प्रदहामि गच्छ ।
न गच्छसे वा निहता मया त्वं
गमिष्यसे प्रेतपतेः सकाशम् ॥ २८
एतावदुक्त्वा गदया जघान
तां योगसिद्धां गिरिराजपुत्त्रीम् ।
तया च मुष्ट्या निहतः स दैत्यः
शस्त्रास्त्रसङ्घैरपि सा च तेन ॥ २९
पाषाणवर्षैश्च तया स दैत्यो
वृक्षैरनेकैर्गिरिभिस्तथैव ।
जलाग्निवर्षैर्विविधैरनेकैः
सर्पैर्महाघोरविषं वमद्भिः ॥ ३०
दन्तैर्नखैर्भच्छितक्रूरकर्म्मा
मायां चकाराथ सुदुर्निवार्य्याम् ।

शोणितस्रावसमुद्भवांश्च
वीर्य्यतुल्यांस्तु सुरून् ससर्ज्ज ॥ ३१
अनन्तरूपान् मलिनो विरूपान्
करालदंष्ट्रानतुलप्रभावान्।
ततो महासैन्यमनन्तसंख्यं
दृष्ट्वाणुमा स्वात् तनुतश्चकार ॥ ३२
स्त्रीसैन्यमुग्रं विकृतं हि योगात्
सम्भक्षणार्थं हि रिपोर्बलस्य।
दैत्येन्द्रसैन्यन्त्वथ चण्डिकाभिः
सम्भक्षितं तत्क्षणाचण्डिकायाः ॥ ३३
सम्भक्षितं सकलं शोणितञ्च
सर्व्वं निपीतं क्षतजं सुरूणाम्।
पीत्वा प्रमत्ता दितिजस्य मायां
गौरी च तेषां रुधिरञ्च भूरि ॥ ३४
एकाकिनी घोररूपा कराला
पुनः समग्रं हृदये निधाय।
विनाशयित्वा प्रविभूतमाया
प्रचण्डदोर्द्दण्डशतैरनेकैः ॥ ३५
युद्धं चकाराद्भुतदर्शनेन
एकेन मायाशतगूहितेन।
ततः स मायी कुपितश्च कुर्व्वन्
प्रचण्डवातानुकृतिं स दैत्यः ॥ ३६
ततश्चचाराशु गतस्त्रिलोकी-
माब्रह्मलोकादिसमस्तमेतत्।
पुनर्नभः स्वर्गमगात् क्षणेन
ततः स पातालतलं समग्रम् ॥ ३७
कालानलान्तं जगदप्रमेयो
बभ्राम तस्यास्त्वथ वञ्चनार्थम्।
दैत्यस्तु खिन्ना गिरिराजकन्या
चक्रे ततः स्थूलमतीव रूपम् ॥ ३८
कालानलार्कद्युतिमप्रमाणां
रूपस्य यस्याद्भुतविक्रमस्य।
प्रमाणमुक्तान्त्वपि चण्डिकायाः
किन्त्वस्य रन्ध्रस्य पितामहेन ॥ ३९
चक्रे न जातो न जनिष्यते वा
समग्ररूपस्य प्रमाणवक्ता।

ब्रह्माण्डमेतद्दराण्डकल्पं
यत्रान्तरस्थं कणवद्विभाति ॥ ४०
अनन्त-रुद्रादि-शिवादिसंख्ये
जगत्त्रये वदनान्तर्निलीने।
स्थित्वा गतिं दैत्यवरस्य तस्य
पदात् पदं गन्तुमशक्त आसीत् ॥ ४१
गौर्य्या ततो दैत्यवरो विमूढो
भुजैर्गृहीत्वा शिर उच्चकर्त्त।
नखाङ्कुरैर्वज्रमयैर्ज्ज्वलद्भिः
स्वदेहमत्यद्भुतचण्डवीर्य्यैः ॥ ४२
आच्छादयामास रिपोश्च कृत्वा
वर्म्मास्य कृत्स्नञ्च निकृत्य देवी।
दैत्येनरक्तेन सबुद्बुदेन
वान्तं शिराजालशतैस्तु यत् तत् ॥ ४३
सबुद्बुदं सोष्णमतीव हृद्यं
सम्भक्ष्य मांसानि च तानि गौरी।
गता प्रहृष्टा तु कपालहस्ता
दृष्ट्वा च तां तादृशरूपधारी ॥ ४४
गणैरसंख्यैरधिगम्यमानो
यत्र स्थितोऽसौ भगवान् पिनाकी।
कपालमाली भगवान् प्रहृष्ट
उत्थाय चालिङ्गनमेव चक्रे ॥ ४५
अङ्के च कृत्वा शनकैरनन्तं
पपौ महारक्तमपि प्रकामम्।
निवेदितं यद्गिरिराजपुत्र्या
तां पाययामास च पानमत्तः ॥ ४६
तत् पीतशिष्टं सुतरां पपौ च
गात्राणि गात्रेषु निधाय तस्याः।
गजेन्द्रसिंहोद्धतदैत्यरक्तै
तद्गात्ररक्तैरनुलिप्तगात्रः ॥ ४७
हरोश्च तत्रापि च कृत्तिवासा
हिमाचलः किंशुकपुष्पकुञ्जः।
ततो ददौ पर्व्वतराजपुत्री
सिंहस्य चर्म्माद्भुतखेलनाय ॥ ४८
मातङ्गकृत्तिञ्च महाविशालां
विशाललोलायतचारुनेत्रा।

मृगेन्द्रचर्म्माप्यथ तद्दत्तीत्वा
चकार कक्ष्यां भगवान् पिनाकी ॥ ४९
मातङ्गकृत्तिञ्च करैर्यहीत्वा
जुगोप गात्राणि ततः स्मरारिः।
देवी सुरोक्षर्ष्यं विगूहिताङ्गी
प्रमोदमाना सहिता सखीभिः ॥ ५०
तत्र स्तुता वै ऋषिभिः ससिद्धैः
सुरासुरैर्मानुष-किन्नरैश्च।
सम्प्रार्थिता पूजिता ब्रह्मणा च
त्रैलोक्यरक्षार्थमतीवघोरम् ॥ ५१
रूपन्तु तच्चाद्भिकं गोपयित्वा
पुनः शरच्चान्द्रमसं सुरूपम्।
कृत्वा रराजाथ हरेण देवी
हरोऽपि तद्वत् प्रमुमोद रामया ॥ ५२

इति श्रीशैवे महापुराणे धर्म्मसंहितायां रुरु-वधवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः।

मुनय ऊचुः।

शिवशक्त्यात्मके लोके मूलसर्गादितो मुने।
कोऽनयोर्व्वधिकः सूत मायया साध्वसेन तु ॥ १
गुणेनाप्यधिकः कश्चिद्दोषेण सूतनन्दन।
एतन्नो संशयं कृत्स्नं प्रब्रूहि वदतां वर ॥ २

सूत उवाच।

प्रत्यक्षं दृश्यते लोके स्त्रीणामत्यधिकाः सदा।
गुण-दोषौ तथा माया यद्रहस्यं शृणुष्व तत् ॥ ३
द्वासप्ततिसहस्राणि स्त्रीणां पुंसामथापि वा।
सर्व्वेषामेव भूतानां नाड़ीनामिति संख्यया ॥ ४
तासां जघन्या नाड़ी स्याद्वर्त्तते गर्भसंस्थिता।
तदन्तरे नरी यस्यां विख्याता गर्भधारिणी ॥ ५
कथं तस्या गुणैर्दोषैर्मायया वा पुमान् नरः।
स्त्रीभावेन च पुम्भावः स्त्रीपुंसोः सङ्गमे तथा ॥ ६
नित्यमाच्छाद्यते लोके तस्मादभ्यधिकाः स्त्रियः।
इतिहासमिमं पुण्यं स्त्रीणां मायाविजृम्भितम् ॥ ७
अत्रानुरूपं शृणु मे पुण्यं श्रोतसुखावहम्।
बाणासुरपुरे पूर्व्वं चक्रे देवासुरैः सह ॥ ८
नदीतीरे हरः क्रीड़ां रम्ये शोणसमाह्वये।
ननृतुर्जहसुश्चापि गन्धर्व्वाप्सरसस्तथा ॥ ९
जेपुः प्रणेमुरानर्चुस्तुष्टुवुर्मुनयश्च तम्।
ववल्गुः प्रमथाः सर्व्वे ऋषयो जुहुवुस्तथा ॥ १०
आययुः सिद्धसङ्घाश्च ददृशुः शाङ्करीं रतिम्।
कुतार्किका विनेशुश्च मल्लुश्च परिपन्थिनः ॥ ११
मातरोऽभिमुखास्तस्थुर्विनेशुश्च विभीषकाः।
रुद्रसद्भावभक्तानां भवदोषाश्च पुप्लुवुः ॥ १२
तस्मिन् दृष्टे प्रजाः सर्व्वाः परमां निर्वृतिं ययुः।
चस्खलुर्मुनयः सिद्धाः स्त्रीणां दृष्ट्वा विचेष्टितम् ॥ १३
पुपुषुश्चापि ऋतवः स्वं स्वं भावन्तु तत्र च।
ववुर्वाताश्च मृदवः पुष्पकेशरधूसराः ॥ १४
चुकूजुर्भृङ्गसङ्घाश्च शाखिनां मृदुलं पयः।
पुष्पभारावनद्धानां रराटीषुश्च कोकिलाः ॥ १५
मधुरं कामजननं वनेषु पवनेषु च।
ततः क्रीड़ाविहारे तु मत्तो बालेन्दुशेखरः ॥ १६
अनिर्ज्जितेन कामेन हृष्टः प्रोवाच नन्दिनम्।
शीघ्रं मद्वचनाद्गत्वा कृतस्नानामिहानय ॥ १७
वानरानन गौरीं मे कैलासात् कृतमण्डनाम्।
स तथेति प्रतिज्ञाय गत्वा तत्राह पार्व्वतीम् ॥ १८
द्रष्टुमिच्छति देवि त्वां देवो रूपकृतां शुभाम्।
ततस्तद्वचनाद्गौरी मण्डनं कर्त्तुमारभत् ॥ १९
आजगाम ततो नन्दी रुद्रान्तिकं मनोगतिः।
पुनराह ततो रुद्रः क्षिप्रमानय पार्व्वतीम् ॥ २०
वाढ़मुक्त्वैव तां गत्वा गौरीमाह सुलोचनाम्।
द्रष्टुमिच्छति ते भर्त्ता कृतवेषां मनोरमाम् ॥ २१
तद्वाचस्तमथाप्यन्यद्गतं योषाग्रप्रपञ्चकम्।
एवं पतौ सुकामार्त्ते गम्यमानेऽथ नन्दिनि ॥ २२
अप्सरोभिः समग्राभिरन्योऽन्यमभिमन्त्रितम्।
लब्धभावो यथा सद्यः पार्व्वत्या दर्शनोत्सुकः ॥ २३
अयं पिनाकी कामारिः क्रियते सा नितम्बिनी।
सर्व्वासां दिव्यनारीणां राज्ञी भवति चोत्तमा ॥ २४
मातृणां गौरीरूपेण क्रीड़या मान्यथैर्गुणैः।
कामोऽयं हन्ति कामारिमूचुरन्योऽन्यमादृताः ॥ २५
स्प्रष्टुं शक्नोति या काचिद्दते दाक्षयणीं स्त्रियम्।

कुष्माण्डदुहिता तव शङ्करं स्रष्टुमुत्सहे ॥ २६
एवं गौरीस्वरूपेण चित्रलेखा वचोऽब्रवीत् ।
चित्रलेखोवाच ।
यदि नान्दीश्वरं रूपं काचित् कर्त्तुं क्षमा भवेत् ।
देव्याः सखीनां रूपन्तु सुखसाध्यं करिष्यथ ॥ २७
ततो नान्दीश्वरं रूपं केशवोसस्समुत्थया ।
कृतं तदैवं योगमाश्रित्य परमार्थतः ॥ २८
उर्व्वशाद्य ततो दृष्ट्वा रूपस्य परिवर्त्तनम् ।
जालीरूपं घृताची तु विश्वाची चाण्डिकं वपुः॥२९
सावित्रीरूपं प्रम्लोचा गायत्त्रं मेनका तथा ।
सहजन्या जयारूपं वैजयं पुञ्जिकस्थली ॥ ३०
वैनायकं महारूपं चक्रे सा तु क्रतुस्थली ।
तासामप्यनुक्तानामनुक्ताश्चाप्सरोऽपि च ॥ ३१
सकाशात्तु रूपाणि दृष्ट्वा कुष्माण्डनन्दिनी ।
शिवादात्मयोगाच्च विज्ञानाच्च विडम्बनात् ॥ ३२
चकार रूपं पार्व्वत्या दिव्यमत्यद्भुतं शुभम् ।
महारक्ताब्जसङ्काशं चरणं ललिताकृति ॥ ३३
मृदु सुस्निग्धसम्पूर्णं दिव्यपादोपशोभितम् ।
क्रमोपचितसौभाग्य-गुल्फाङ्गुलिविराजितम् ॥ ३४
नखेन्दुकिरणजात-विडम्बितशशिप्रभम् ।
दिव्यनूपुरझङ्कार-पूरिताशेषदिङ्मुखम् ॥ ३५
सुवर्त्तुलसंश्लक्ष्ण-दिव्यजङ्घोपशोभितम् ।
कनकरूपसुवर्णाभं संहताङ्गुलिभूषितम् ॥ ३६
पृथुलोन्नतसम्पूर्ण-दिव्यस्फिगुपशोभितम् ।
कनकाद्रिप्रतीकाश-कटिमण्डनमण्डितम् ॥ ३७
निम्नकुञ्चितसुस्निग्ध-सूक्ष्मरोमावलीयुतम् ।
क्षीरसागराकार-वराहशुभलक्षणम् ॥ ३८
भ्रमरनिर्णाद-मेखलादामभूषितम् ।
नानावर्णमहावस्त्र-रम्यचन्द्राम्बिकाङ्कितम् ॥ ३९
रत्नज्वालासुशोभाढ्यं शनकैर्दर्शितान्तरम् ।
कल्पितवेद्यास्तु मध्यस्थं सुन्दरप्रभम् ॥ ४०
चक्रद्रोणिसङ्काश-दिव्यनाभिविराजितम् ।
भाञ्जदामतुल्याभ-पूर्णत्रिवलिशोभितम् ॥ ४१
कलशाम्बूनदप्रख्यं कुचोदरसुपीवरम् ।
कनकरूपनिभाकार-वक्षःस्थलमहद्धिमत् ॥ ४२
लावण्यशोभाढ्यं पूर्णस्कन्धोपशोभितम् ।

शशिकोटिनिभाकारं मुक्तादामविराजितम् ॥ ४३
सम्पूर्णमृदुसुश्लक्ष्ण-दिव्यदोर्द्दण्डमण्डितम् ।
दिव्यकेयूरकटकैर्भूषितश्चाङ्गुलीयकैः ॥ ४४
स्रग्दामदर्पणोपेत-सुशोभितकराम्बुजम् ।
प्रवालहेमरक्ताब्ज-तुल्यपाणितलं शुभम् ॥ ४५
दिव्यलावण्यशोभाढ्यं रेखात्रितयशोभितम् ।
क्रमोपचितसुश्लक्ष्ण-दीर्घाङ्गुलिमनोहरम् ॥ ४६
पुष्पोपचितभद्राभ-सुरम्यनखचन्द्रिकम् ।
प्रशस्तदक्षिणावर्त्त-कम्बुग्रीवोपशोभितम् ॥ ४७
नानाविधमहारत्न-ग्रैवेयकशतावृतम् ।
सम्पूर्णवर्त्तुलाकार-दिव्योष्ठपुटसूचितम् ॥ ४८
विद्रुमाङ्कुरसङ्काश-मृदुश्लक्ष्णावरोद्धतम् ।
सत्पद्मरागरक्ताभ-कोमलौष्ठविभासितम् ॥ ४९
बालेन्दुलेखासङ्घात-तुल्यदन्तावलीयुतम् ।
रक्ताब्जकर्णिकाकार-ह्रस्वजिह्वोपशोभितम् ॥ ५०
अत्यन्तहेमशुद्धाभ-सुसृष्टघ्राणमण्डितम् ।
विकाररहितस्निग्ध-नासापुटविलोमवत् ॥ ५१
चन्द्रमण्डलसङ्काश-स्फुरत्पाण्डुकपोलकम् ।
पूर्णविकारहेमाभ-रमणीयमहाहनु ॥ ५२
निम्नस्निग्धोन्नताभोग-विकारोज्झितकर्णवत् ।
हेममुक्तामहारत्न-दिव्यसंयुक्तकुण्डलम् ॥ ५३
सितासितमनाग्रक्त-लोललोचनमण्डितम् ।
सद्राजवर्त्तलेखाभ-भ्रूलतालङ्कृताननम् ॥ ५४
गौरीशलिङ्गसङ्काश-ललाटतटमण्डितम् ।
विकाररहितं स्निग्धं रागसंरक्तलोचनम् ॥ ५५
ललाटनयनाभोग-सविलासविलोकितम् ।
चलकुञ्चितसुस्निग्ध-सूक्ष्मकृष्णालकावृतम् ॥ ५६
कुङ्कुमादिमहामाल्य-तिलकादिविभूषितम् ।
अलकप्रान्तसंलग्न-सुवर्णमणिविद्रुमम् ॥ ५७
नानारत्नसुवर्णाढ्य-किरीटोद्द्योतिताननम् ।
कोकिलाञ्जनपुञ्जाभ-दीर्घवेणीसुशोभितम् ॥ ५८
पञ्चवर्णमहापुष्प-स्रग्दामच्छन्नवेणिमत् ।
दिव्यमाल्याम्बरधरं दिव्यस्रग्दामशोभितम् ॥ ५९
विश्वकर्म्मकृतैर्दिव्यैरतिप्रायैरलङ्कृतम् ।
एवं कृते तदा नन्दी पुनस्तु सगणो गतः ॥ ६०
गौरीमानयितुं हृष्टः कैलासात् तु पुनः शनैः ।

ततः सावसरं प्राप्य हरेस्तत्समुद्भवा ॥ ६१
दृष्ट्वा देवमुवाचाथ देव शैलादिहागता ।
अहं गौरी च सम्प्राप्ता मातरः सगणास्तव ॥ ६२
एवमुक्तस्तया रुद्रस्त्यक्त्वा शय्यान्तु हृष्टवत् ।
पुरस्तान्निर्ययौ गौर्य्याः शनैः सप्त पदानि तु ॥ ६३
देवा ब्रह्मादयश्चापि दैत्य-दानव-राक्षसाः ।
ऋषयो मुनयः सिद्धाः पार्व्वत्या अग्रतो ययुः ॥ ६४
नानाविधमहास्तोत्रैः स्तुवन्तो मुदितास्तथा ।
ततः पाणौ गृहीत्वा तां रुद्रः शय्यामथारुहत् ॥ ६५
चक्रे नानाविधां क्रीड़ां तया सार्द्धं पिनाकधृक् ।
रुद्रं गायन्ति नृत्यन्ति सर्व्वाः कपटमातरः ॥ ६६
काश्चिद्गायन्ति नृत्यन्ति रमयन्ति हसन्ति च ।
मुखनादसहस्राणि कुर्व्वन्त्यन्याः सहस्रशः ॥ ६७
शिवा च रुद्रसहिता रावांश्चक्रे महाद्भुतान् ।
अथ किं बहुनोक्तेन च्छिद्रं तासां न विद्यते ॥ ६८
येन विज्ञायते किञ्चित् स्त्रीणां व्याजविजृम्भितम् ।
केचिद्गायन्ति नृत्यन्ति हसन्ति च रुदन्ति च ॥ ६९
शङ्कराराधने सक्ता गणा नन्दीश्वरादयः ।
कैलासान्मातृभिः सार्द्धं गणैः परिवृताश्शनैः ॥ ७०
एतस्मिन्नन्तरे गौरी आजगाम महाद्भुता ।
भृङ्गि-नन्दि-महाकाल-दण्डि-लम्बोदरादिभिः ॥ ७१
स्तूयमाना तु गगनात् सम्प्राप्ता भर्त्तुरन्तिकम् ।
किमियं पार्व्वती देवी किमियमित्यचिन्तयन् ॥ ७२
तां दृष्ट्वा चकिताः सर्व्वे किमियं वा सुशोभना ।
नैतयोर्दृश्यते भेदो नानयोर्नन्दिनोरपि ॥ ७३
न मातॄणां गणानान्तु कोऽप्ययं स्याद्व्यतिक्रमः ।
ततो हरस्य पार्श्वस्था गौरी ज्ञात्वा व्यतिक्रमम्॥७४
क्रीड़ितं दिव्यनारीणां प्रहासं मुमुचे तदा ।
ताश्चैवाप्सरसः सर्व्वाश्चक्रुः किलिकिलारवान् ॥ ७५
भूत-प्रेत-पिशाचाश्च यक्षरक्षांसि चासकृत् ।
तच्छ्रुत्वा तच्च संवीक्ष्य ततो बालेन्दुशेखरः ॥ ७६
प्रहर्षमतुलं लेभे स्त्रीणां कर्म्मानुभूय च ।
उर्व्वश्याद्या ह्यप्सरसश्चित्रलेखा चकार ह ॥ ७७
ततो रतान्ते स्वं रूपं चक्रुः स्वं स्वं विचेष्टितम् ।
एवं स्त्रीभिर्महादेवः पूर्व्वं व्याजेन तोषितः ॥ ७८
ततः सद्भावगौरी तु पतिना सह सङ्गता ।
अत्यद्भुतां महाक्रीड़ां चक्रे देवी नदीतटे ॥ ७९
तत्रोषा बाणदुहिता क्रीड़मानान्तु पार्व्वतीम् ।
दृष्ट्वा मनसि सन्दध्यौ भर्त्तृसङ्गमकाङ्क्षिणी ॥ ८०
अनेन भर्त्रा सहिता यथेयमपि पार्व्वती ।
क्रीड़न्ते याः स्त्रियो धन्या रमन्त्येव समागताः ॥८१
एवं सञ्चिन्त्य मनसा सोषा सुनियमे स्थिता ।
उमामाराधयामास सोपवासा जितेन्द्रिया ॥ ८२
विज्ञाय तमभिप्रायं तस्या बाणसुतां प्रति ।
उवाच परमप्रीता नगराजस्य नन्दिनी ॥ ८३
यथानेन नदीतीरे रमाम्यहमनिन्दिते ।
त्वमपि भर्त्तृसहिता रमिष्यस्यचिरादिह ॥ ८४
सा कन्या वचनं श्रुत्वा अवदत्यात्मनो हृदि ।
चकार मन्दपुण्याहं भर्त्रा रंस्ये कदा त्विति ॥ ८५
तथापि तस्याः सङ्कल्पं विज्ञाय गिरिजा ततः ।
उवाच सप्तमे मासि सम्प्राप्ते सति मानिनि ॥ ८६
अस्मिंस्तु कार्त्तिके मासि अतोर्द्ध्वं मासि माधवे ।
द्वादश्यां शुक्लपक्षे तु यस्तु घोरे निशागमे ॥ ८७
कृतोपवासां त्वां भोक्ता सुप्तामन्तःपुरे नरः ।
स ते भर्त्ता कृतो देवैस्तेन सार्द्धं गमिष्यसि ॥ ८८
आ बाल्याद्विष्णुभक्तासि यतो नित्यमतन्द्रिता ।
एवमस्त्विति सा प्राह मनसा लज्जितानना ॥ ८९
ततो रतान्ते भगवान् रुद्रश्चादर्शनं ययौ ।
सदारः सगणश्चापि सहितो देवमानवैः ॥ ९०
मोदमानाः स्त्रियश्चाथ क्रीड़ां तामनुभूय च ।
जग्मुः स्वं स्वं गृहं हृष्टास्तुरगैर्वारणै रथैः ॥ ९१
अन्याश्च सिद्धयोगिन्यो जग्मुराकाशमेव हि ।
कस्यचित् त्वथ कालस्य बाणो रुद्रान्तिकं ययौ॥९२
भगवन्तमुमाकान्तं पूजयित्वा कृताञ्जलिः ।
उवाच दुःखसन्तप्तो दैवदोषाच्च गर्व्वितः ॥ ९३
हे देव किमनेनापि सहस्रेण करोम्यहम्
बाहूनां गिरितुल्यानां विना युद्धं वृषध्वज ॥ ९४
मया यमः कृतो योद्धा वह्निश्च कृतको महान् ।
वरुणश्चापि गोपालो गवां पालयिता तथा ॥ ९५
गजाध्यक्षः कुबेरस्तु सैरन्ध्री चापि निर्ऋतिः ।
जितश्चाखण्डलो युद्धे करदायी सदा कृतः ॥ ९६
युद्धस्यागमनं ब्रूहि यत्रेमे आहवो मम ।

मुद्गरहस्तप्रसुप्ताश्च अस्त्रास्त्रैर्जर्ज्जरीकृताः ॥ ९७
पतन्ति शक्रहस्ताद्वा पातयन्ति सहस्रधा ।
तच्छ्रुत्वा कुपितो रुद्रश्चाट्टहासं महाद्भुतम् ॥ ९८
कृत्वाब्रवीन्महामन्युर्धिग्धिग्दैत्याधमास्तु ते ।
दुर्बुद्धेस्य महायुद्धं लभिष्यसि सुदारुणम् ॥ ९९
तत्र ते गिरिवर्ष्माणो बाहवोऽनलकाष्ठवत् ।
छित्त्वा भूमौ पतिष्यन्ति अस्त्रास्त्रैः कदलीकृताः ॥१००
यदैतत्तानुषच्छिरो मयूरसहितं ध्वजे ।
निपतेत्तव दुष्टात्मंस्तस्य स्यात् पतनं यदा ॥ १०१
स्थापितस्यायुधागारे विना वातकृतं भयम् ।
तदा युद्धं महाघोरं सम्प्राप्तमिति चेतसि ॥ १०२
निधाय घोरं संग्रामं गच्छेथाः सर्व्वसैन्यवान् ।
शासतं गच्छ तद्देश्म यत्र तद्विद्यते शिरः ॥ १०३
तथान्यांस्तु महोत्पातांस्तत्र द्रष्टासि दुर्म्मते ।
तच्छ्रुत्वा रुद्रमभ्यर्च्य दिव्यैरञ्जलिकुड्मलैः ॥ १०४
प्रणम्य च महादेवं ततः अस्त्रगृहं गतः ।
कुण्डलाय यथावृत्तं पृष्टः प्रोवाच हर्षतः ॥ १०५
स्वयं भग्नध्वजं दृष्ट्वा तत्र युद्धाय निर्ध्ययौ ।
सैन्यं समग्रमाहूय संयुक्तः स्वाष्टभिर्गुणैः ॥ १०६
दृष्टिं सांग्रामिकीं कृत्वा दृष्ट्वा सांग्रामिकं मधु ।
ककुभां मण्डलं सर्व्वं संप्रेक्ष्य संस्थितोऽभवत् ॥ १०७
इति हलमले कृत्वा कः कस्मादागमिष्यति ।
योद्धा रणप्रियो यस्तु नानाअस्त्रास्त्रपारगः ॥ १०८
यस्तु बाहुसहस्रं मे च्छिनत्ति नलकाष्ठवत् ।
देवा अस्त्रैर्महातीक्ष्णैश्छिनद्मि तच्छिरस्त्विह ॥१०९
एतस्मिन्नन्तरे कालः सम्प्राप्तः स क्रमेण हि ।
तत्र सा बाणदुहिता सुस्नाता कृतमङ्गला ॥ ११०
माधवं माधवे मासि पूजयित्वा महानिशि ।
सुप्ता चान्तःपुरे गुप्ते स्त्रीभावमुपलक्षिता ॥ १११
गौर्य्या संप्रेक्षितेनापि व्याकृष्टा दिव्यमायया ।
कृष्णात्मजात्मजेनाथ रोदमानामनाथवत् ॥ ११२
स चापि तां बलाद्भुक्त्वा पार्व्वत्याः सखिभिः पुनः ।
नीतस्तु दिव्ययोगेन द्वारकां निमिषान्तरात् ॥ ११३
शङ्किता सा ततोत्थाय रुदती विविधा गिरः ।
सखीभ्यः कथयित्वा तु देहत्यागे कृतक्षणा ॥ ११४
दौःशील्यादोषशोभा च सख्या संस्मारिता पुनः ।
सर्व्वं तत् पूर्व्ववृत्तान्तं ततो हृष्टा च साभवत् ॥ ११५
अब्रवीच्चित्रलेखाञ्च ततो मधुरया गिरा ।
सखि यद्येष मे भर्त्ता पार्व्वत्या विहितः पुरा ॥११६
केनोपायेन ते गुप्तः प्राप्यते विधिवन्मया ।
कस्मिन् कुले वा जातोऽसौ मम येन हृतं मनः ॥११७
तया चोक्ता त्वया स्वप्ने यो दृष्टो देवि तं कथम् ।
अहं समानयिष्यामि न विज्ञातस्तु यो मम ॥ ११८
दैत्यकन्या तदुक्ते तु रागान्धा मरणोत्सुका ।
रचिता च तया सख्या सप्तमे दिवसे ततः ॥ ११९
रात्रौ वस्त्रपुटे कृत्वा देवान् दैत्यांश्च राक्षसान् ।
क्षत्रियांश्च तथाप्यस्य सानिरुद्धं ददर्श ह ॥ १२०
हृष्टा प्रोवाच चौरोऽसौ मया प्राप्तस्तु येन मे ।
चेतोरत्नं हृतं सद्यः संस्पर्शादेव भामिनि ॥ १२१
कस्यायमन्वये जातो नाम किञ्चास्य विद्यते ।
प्रोक्तं तस्यास्तया सर्व्वं सान्वयं तस्य धीमतः ॥ १२२
सर्व्वमाकर्ण्य सा भूयो बभाषे मत्तकाशिनी ।
उपायं तस्य मे पश्य येनोपायेन तत्क्षणात् ॥ १२३
लभामि यं विना नाहं क्षणं जीवितुमुत्सहे ।
ततः सखीं समाभाष्य चित्रलेखा मनोजवा ॥ १२४
ज्यैष्ठकृष्णचतुर्द्दश्यां तृतीयेन गते सति ।
आ प्रभातान्मुहूर्त्ते तु सम्प्राप्ता द्वारकां पुरीम् ॥१२५
एकेन क्षणमात्रेण नभसा दिव्ययोगिनी ।
ततश्चान्तःपुरोद्याने प्राद्युम्निं ददृशे स्थितम् ॥ १२६
क्रीड़न्तं स्त्रीजनैः सार्द्धं पिबन्तं मधु माधवीम् ।
ततः खट्वासमारूढ़मन्धकारपटेन सा ॥ १२७
आच्छादयित्वा योगेन तामसेन च माधवम् ।
आनयन्मूर्द्ध्नि तां खट्वां गृहीत्वा निमिषान्तरात्॥१२८
सम्प्राप्ता शोणितपुरं यत्र सा बाणनन्दिनी ।
कामार्त्ताविविधान्भावांश्चकारोन्मत्तवत्क्षणात्१२९
आनीतमथ तं दृष्ट्वा तदा भीता च साभवत् ।
अन्तःपुरे सुगुप्ते च नवे तस्मिन् समागमे ॥ १३०
यावत् क्रीड़ितुमारब्धं तावज्ज्ञातञ्च तत्क्षणात् ।
अन्तःपुरद्वारगतैर्व्वेत्रजर्ज्जरपाणिभिः ॥ १३१
दूङ्गितैरनुमानैश्च कन्यादौःशील्यमेव तत् ।
स चापि दृष्टस्तैस्तत्र नरो दिव्यवपुर्द्धरः ॥ १३२
तरुणो दर्शनीयस्तु साहसी समरप्रियः ।

तं दृष्ट्वा सर्व्वमाचख्युर्बाणाय बलिसूनवे ॥ १३३
देव कश्चिन्नरस्तुभ्यं गुप्तमन्तःपुरे बलात् ।
सक्तस्य तव कन्यान्तु स्वयंग्राहादधर्षयत् ॥ १३४
दानवेन्द्र महाबाहो पश्य पश्यैनमत्र च ।
तेषां तद्वचनं श्रुत्वा दानवेन्द्रो ददर्श तम् ॥ १३५
दिव्यनीलाब्जवपुषं प्रथमे वयसि स्थितम् ।
तं दृष्ट्वा विस्मितो वाक्यं किङ्करानप्यथाब्रवीत् ॥१३६
बाणः क्रोधपरीतात्मा युद्धशौण्डो हसन्निव ।
अहो मनुष्यो रूपाढ्यः साहसी धैर्य्यवानिति ॥१३७
येन मे कुलचारित्रं,दूषितं दुहिता हृता ।
तं मारयध्वं कुपिताः शीघ्रं शस्त्रैः सुदारुणैः ॥ १३८
दुराचारञ्च तं बद्ध्वा घोरे कारागृहे ततः ।
रक्षध्वं कालसमयं क्वचिद्वीरपराक्रमाः ॥ १३९
ततो दैत्येन सैन्यन्तु दशसाहस्रकं शनैः ।
वधार्थं तस्य वीरस्य व्यादिष्टं पापबुद्धिना ॥ १४०
शत्रुसैन्यं ततो दृष्ट्वा गर्ज्जमानं स यादवः ।
अन्तःपुरद्वारगतं परिघं गृह्य चातुलम् ॥ १४१
निष्क्रान्तो भवनात् तस्माद्वज्रहस्त इवान्तकः ।
तेन तान् किङ्करान् हत्वा पुनस्त्वान्तःपुरं ययौ ॥१४२
एवं दश सहस्राणि सैन्यानि मुनिसत्तमाः ।
जघान रोषरक्ताक्षो दिव्यरक्ताब्जलोचनः ॥ १४३
लक्षे हतेऽथ योधानां ततो बाणासुरो रुषा ।
कुम्भाण्डसंगृहीताश्वो युद्धशौण्डः समाह्वयत् ॥ १४४
अनिरुद्धं महाबाहुं द्वन्द्वयुद्धमहाहवे ।
ततो दश सहस्राणि तुरङ्गांश्च रथोत्तमान् ॥ १४५
युद्धप्रासेन खड्गेन दैत्येन्द्रस्य जघान सः ।
तद्वधाय ततः शक्तिः कालवैश्वानरोपमा ॥ १४६
क्षिप्ता बाणेन सम्भूयः शत्रुसम्प्रेरितां रुषा ।
अनिरुद्धो गृहीत्वा तां तया तं निजघान सः ॥ १४७
रथोपस्थे ततो बाणस्तेन शक्त्या हतो दृढम् ।
पतितो मन्त्रिणा तत्र हेतुभिः प्रतिबोधितः ॥ १४८
समाश्वस्तः क्षणे तस्मिंस्तत्रैवान्तरधीयत ।
तस्मिंस्त्वदर्शनं प्राप्ते प्राद्युम्निरपराजितः ॥ १४९
आलोक्य ककुभः सर्व्वास्तस्थौ गिरिरिवाचलः ।
अदृश्यमानस्तु तदा कूटयोधी स दानवः ॥ १५०
नानाशस्त्रसहस्रैश्च ताड़यित्वा पुनः पुनः ।
छद्मना नागपाशैस्तं बबन्ध सुमहाबलः ॥ १५१
तं बद्ध्वा पञ्जरान्तःस्थं कृत्वा युद्धादुपारमत् ।
सूतपुत्र शिरश्छिन्धि येन मे दूषितं कुलम् ॥१५२
छित्त्वा तु सर्व्वगात्राणि राक्षसेभ्यः प्रयच्छ भोः ।
अथवा नास्य मांसानि क्रव्यादा अपि भुञ्जते ॥१५३
अगाधे तृणसङ्कीर्णकूपे पातकिनं जहि ।
तस्य तद्वचनं श्रुत्वा धर्म्मबुद्धिर्निशाचरः ॥ १५४
कुम्भाण्डस्त्वब्रवीद्वाक्यं देव नैतत्क्षमो भवेत् ।
अस्मिन् हते हतो ह्यात्मा भवेदिति मतिर्मम ॥१५५
अयन्तु दृश्यते देव तुल्यो विष्णोः पराक्रमैः ।
अथ चन्द्रललाटस्य साहसेन समस्त्वयम् ॥ १५६
इमामवस्थां प्राप्तोऽपि पौरुषे स्वे व्यवस्थितः ।
अस्मांस्तृणोपमान् वेत्ति दष्टोऽपि भुजगैर्बलात्॥१५७
एतद्वाक्यन्तु बाणस्य कथयित्वा स दानवः ।
अनिरुद्धमुवाचेदं कोसि कस्यासि भोरिति ॥ १५८
केन वा त्वमिहानीतो दुराचार नराधम ।
दैत्येन्द्रं स्तुहि वीर त्वं नमस्कुरु कृताञ्जलिः ॥१५९
जितोऽस्मीति वचो दीनं कथयित्वा पुनः पुनः ।
एवं कृते तु मोक्षः स्याद्बन्धनात् तव नान्यथा ॥ १६०
तच्छ्रुत्वा वचनं तस्य प्रतिवाक्यमुवाच सः ।
रे रे दैत्याधमसखे परपिण्डोपजीवक ॥ १६१
निशाचर दुराचार क्षत्रधर्म्मं न वेत्सि भोः ।
दैन्यं पलायनं वाथ शूरस्य मरणादपि ॥ १६२
विरुद्धञ्चायशस्यञ्च भवेदिति मतिर्मम ।
क्षत्रियस्य रणे श्रेयो मरणं सम्मुखस्य च ॥ १६३
न तु प्राप्य तु भूमिन्तु दीनस्यैव कृताञ्जलिः ।
कृतेऽपि दैन्ये मरणं न विचालयितुं क्षमः ॥ १६४
शत्रुर्भवसि मन्दात्मन् जोषमास्स्वाथ मूकवत् ।
दानवानां सहस्राणि त्रैलोक्यं सचराचरम् ॥ १६५
नित्यं कृताञ्जलिर्यस्य सोऽन्यस्याञ्जलिमान् कथम् ।
स्वयन्तु वेत्स्यसे योऽहं छिन्ने बाहुवने वने ॥ १६६
एतद्वाक्यन्तु तस्योक्त्वा यादवो मौनमाश्रितः ।
बाणः कुम्भाण्डवचनादनिरुद्धं न जघ्निवान् ॥ १६७
किन्तु स्वान्तःपुरं गत्वा पपौ पानमनुत्तमम् ।
ततोऽनिरुद्धो बद्धस्तु नागभोगैर्विषोल्बणैः ॥ १६८
प्रियया हृतचेतास्तु दुर्गां सस्मार तत्क्षणात् ।

उवाच देवि बद्धोऽस्मि दह्यमानस्तु पन्नगैः ॥ १६९
आगच्छ मे कुरु त्राणं यशोदे चण्डरोषिणि ।
एवं सा तोषिता तत्र काली भिन्नाञ्जनप्रभा ॥ १७०
कृष्णाचतुर्द्दश्यां सम्प्राप्ता सुमहानिशि ।
मुष्टिभिर्घातैर्दारयामास पञ्जरम् ॥ १७१
शरांस्तान् भस्मसात्कृत्वा सर्परूपान् भयानकान् ।
वीर्यवानिरुद्धन्तु ततश्चान्तःपुरं ततः ॥ १७२
दर्शयित्वा दुर्गा तु तत्रैवादर्शनं गता ।
स तु बन्धजयी भूत्वा प्रियां प्राप्य मुमोद च ॥१७३
गतेऽनिरुद्धे तु तत्स्त्रीणां रोदनस्वनम् ।
श्रुत्वा च त्वरितः कृष्णो युद्धं श्रुत्वा च नारदात्॥१७४
जगाम शोणितपुरं तार्क्ष्यमारुह्य तत्क्षणात् ।
गत्वा रामेण सहितः प्रद्युम्नेन च धीमता ॥ १७५
त्वाग्निनाभवद्युद्धं यमेन च हरेण च ।
त्रिमुखेण त्रिपादेन ज्वरेण च गुहेन च ॥ १७६
अन्यैर्विविधाकारैस्तेषामत्यन्तदारुणाम् ।
शोषिकाभिर्बह्वीभिः कोटवीभिः पदे पदे ॥ १७७
विवस्त्राभिश्च नारीभिर्नग्नाभिरपि सर्व्वशः ।
शौर्य्यं संस्तम्भयन्तीभिर्वराङ्गस्य च दर्शनात् ॥ १७८
तेषां चतुर्णां संग्रामः पश्चाद्बाणेन चाभवत् ।
माहेश्वराश्च ये केचिद्बाणस्यासन् ज्वरादयः॥१७९
तांस्तान् जघान गोविन्दो घोरैः स्वैः स्वैर्ज्वरादिभिः ।
कृत्वा सहस्रं कायानां पीत्वा तोयं महार्णवात्॥१८०
गरुडोऽनाशयद्वह्निं वातैर्मेघार्णवाम्बुभिः ।
कुमारस्य मयूरन्तु तुण्डघातैर्व्यपाटयत् ॥ १८१
विष्णुना निर्ज्जिते रुद्रे सपुत्रे सगणे सति ।
बाणो विनिर्गतो युद्धे द्वन्द्वयुद्धेन विष्णुना ॥ १८२
कुष्माण्डसंगृहीताश्वो वृत्ते सैन्यक्षये सति ।
ततः सुदर्शनेनाथ विष्णुर्बाणभुजान् बहून् ॥ १८३
छित्वा शिरश्च शर्व्वोस्तु यदा छेत्तुं समुद्यतः ।
स्तोत्रैस्ततस्त्वनेकैश्च शङ्करेण स तोषितः ॥ १८४
उक्तश्चोर्द्धकरेणाथ हरेणामित्रघातिना ।
भगवन् देवकीपुत्र कृतं यत् क्रियते त्वया ॥ १८५
मा बाणस्य शिरश्छिन्धि संहरस्व सुदर्शनम् ।
दत्तं मया पुरा तुभ्यमतिवीर्य्यं रणे तव ॥ १८६
चक्रं जयश्च गोविन्द निवर्त्तस्व रणादतः ।
त्वन्तु योगीश्वरः साक्षात् परमात्मा जनार्द्दनः॥१८७
भक्तानुकम्पी भगवान् सर्व्वभूतहिते रतः ।
वरमस्य मया दत्तं न मृत्युभयमस्ति ते ॥ १८८
तन्मे सत्यं वचश्चास्तु यदि तुष्टोऽसि मे प्रभो ।
शङ्करस्य वचः श्रुत्वा संहृत्य च सुदर्शनम् ॥ १८९
अक्षताङ्गस्तु विजयी विष्णुरन्तःपुरं ययौ ।
अनिरुद्धं समाश्वास्य सहितं भार्य्यया पुनः ॥ १९०
गृहीत्वा रत्नसंघातं चित्रलेखाञ्च तत्सखीम् ।
पुनः स्वभवनं प्राप्तो जित्वा च वरुणं पथि ॥ १९१
विसर्ज्जयित्वा गरुडं सखिवच्चोपहस्य च ।
द्वारकायां ततो हृष्टः कामचारी चचार ह ॥ १९२
विष्णौ गते ततो नन्दी बाणं प्रोवाच दुःखितम् ।
दैत्यं शोणितदिग्धाङ्गं कुरु नृत्यमहोत्सवम् ॥ १९३
भक्तानुकम्पिनश्चाग्रे रुद्रस्येति पुनः पुनः ।
नन्दिवाक्यात् ततो बाणो द्विपाच्छीर्षैकमात्रकः॥१९४
ननर्त्त ताण्डवं मुख्यं प्रत्यालीढादिशोभितम् ।
स्थानकैर्विविधाकारैरालीढप्रमुखैरपि ॥ १९५
मुखवादसहस्राणि भ्रूक्षेपसहितान्यपि ।
शिरःकम्पसहस्राणि प्रत्यानीकान् सहस्रशः ॥ १९६
चारीश्च विविधाकारा दर्शयित्वा शनैः शनैः ।
तथा शोणितधाराभिः सिञ्चयित्वा महीतलम्॥१९७
रुद्रं प्रसादयामास शूलिनं चन्द्रशेखरम् ।
ततो नृत्यं महद्दृष्ट्वा भगवान् भक्तवत्सलः ॥ १९८
उवाच बाणं सन्तुष्टो नृत्यगीतप्रियो हरः ।
वरं गृहाण दैत्येन्द्र यत् ते मनसि वर्त्तते ॥ १९९
बाणेन च गृहीतोऽभूद्वरस्तु व्रणरोपणे ।
बाहुयुद्धस्य चोत्पत्तिर्गाणपत्यमथाक्षयम् ॥ २००
उषायाः पुत्रराज्यन्तु तस्मिन् शोणितकाह्वये ।
निर्व्वैरता च विबुधैर्विष्णौ भक्तिरनुत्तमा ॥ २०१
वासुदेवात् तु मरणं कल्यान्ते कुपिताद्धरः ।
न पुनर्दैत्यता दुष्टा तामसी रजसा युता ॥ २०२
हरेर्मन्त्राभियोगस्तु दिवारात्रञ्च मित्रता ।
सर्व्वं लभिष्यसीत्युक्त्वा तत्रैवान्तरधीयत ॥ २०३
रुद्रस्यानुचरो बाणो महाकालत्वमागतः ।
ततः कदाचित् पुत्रस्तु तस्यां जातो यदाभवत्॥२०४
तथा कुष्माण्डमुख्यैश्च विश्वजिद्राजसत्तमः ।

दैत्यराज्येऽभिषिक्तास्तु मन्त्रिभिः केशवाज्ञया ॥ २०५
तस्यान्ववाये ये केचिदाकल्पान्तास्तु भूभुजः ।
जायमाना जनिष्या वा तेऽनिरुद्धस्य सूनवः ॥ २०६
उषा च चित्रलेखा च स च राजा च विश्वजित् ।
तस्मिन् कल्पे परिक्षीणे गन्तारः शाङ्करं पदम् ॥ २०७
इति त्रिनयननाम्नः शङ्करस्यापि वृत्तं
सकलगुरुजनानां सद्गुरोः शूलपाणेः ।
कथितमिह मया ते श्रोत्ररम्यैर्वचोभि-
र्मदनशरवणाग्नेर्मन्मथक्षोभितस्य ॥ २०८

इति श्रीशैवे महापुराणे धर्मसंहितायां
सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

मुनय ऊचुः ।

कोऽयं कामो हि येनेशो व्याप्तपूर्व्वमतिर्भवः ।
नभो वाय्वग्निरापो वै पूर्व्विबुद्धिर्मनोऽप्यहम् ॥ १
प्रकृतिः पुरुषो हृत्स्थः पुरुषोऽङ्गुष्ठमात्रकः ।
एवं नः संशयं कृत्स्नं छेत्तुमर्हस्यशेषतः ॥ २

सूत उवाच ।

प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ।
कामस्यैषा तु या मूर्त्तिर्ब्रह्म-विष्ण्वीश्वरात्मिका ॥ ३
सर्व्वभूतात्मभूताख्या त्रिलिङ्गा विश्वरूपिणी ।
क्वचित् कामः क्वचित् कामः क्वचित् तु काम एव हि ४
स्नानं ध्यानञ्च योगश्च यमश्च नियमो जपः ।
नो शम्भुर्नैव वा विष्णुर्नो ब्रह्मा नेन्दु-भास्करौ ॥ ५
कर्त्तुमिच्छन्ति यं मुक्त्वा कामः सङ्कल्प एव हि ।
यज्ञश्च शिक्षा स्वाध्यायो ज्ञान-दाने श्रुतिः स्मृतिः ॥ ६
अशुद्धिः परपीड़ा च स्वर्गमोक्षपरिग्रहः ।
स्नेहवैराणि येनेह भवन्ति स मनोभवः ॥ ७
देवानां योनयश्चाष्टौ मानुषी नवमी च या ।
तिरश्चां योनयः पञ्च भवन्त्येवं चतुर्द्दश ॥ ८
भूता वा वर्त्तमाना वा जनिष्यापि च सर्व्वशः ।
कामात् सर्व्वं प्रवर्त्तन्ते लीयन्ते वृद्धिमागताः ॥ ९
सर्व्वासामथ योनीनां मिथुनानां क्रमेण तु ।
अन्योऽन्यासक्तबुद्धीनां कामोऽनेन विभागशः ॥ १०
स्थितो जितजगज्जन्मशान्ति संसारवर्त्मनि ।
शब्दाद्यैर्विषयै रम्यैर्निःसारैः कुसुमोपमैः ॥ ११
ब्रह्मेन्द्रोपेन्द्ररुद्राणां देव-दानव-भोगिनाम् ।
गन्धर्व्वाणामनुक्तानां मनुष्याणाञ्च सर्व्वशः ॥ १२
बन्धुर्मित्रमथाचार्य्यो रक्षा नेतार्थदो गुरुः ।
कल्पद्रुमोऽथवा भ्राता पिता माता यमस्तथा ॥ १३
वैतरण्यां जलं नष्टं नरको नन्दनं वनम् ।
कामः सर्व्वमयं पुंसां स्वयं कल्पसमुद्भवः ॥ १४
वक्तुं न शक्यते यच्च परञ्चानुपरञ्च यत् ।
केवलं बुद्धिगम्यञ्च संसर्गं प्रान्तसंस्थितम् ॥ १५
आनन्दममृतं दिव्यं परंब्रह्म तदुच्यते ।
अर्केन्दुवह्निप्रभवं येनेह च्छिद्यते तमः ॥ १६
यस्माद्विकाराः सूर्य्येन्दुवह्न्यनिलधराखमी ।
ब्रह्मेन्द्रोपेन्द्रमनुजाः क्रिमयः पशवो मृगाः ॥ १७
उत्पद्यन्ते तथा ब्रह्म दिव्यमानन्दमव्ययम् ।
परमात्मेति चाप्युक्तं विकाराः कामसंज्ञिताः ॥ १८
सुप्तानां जाग्रतां वाथ सर्व्वेषां यो हृदि स्थितः ।
नानाविधानि कर्म्माणि कुरुते ब्रह्म तन्महत् ॥ १९
कामसंज्ञा भवेत् तेषां तत्कृतानान्तु कर्म्मणाम् ।
एवं संसारचक्रन्तु शक्ति-शक्तिमतोरिदम् ॥ २०
शब्दौ प्रियाप्रियौ यस्तु तथा स्पर्शौ प्रियाप्रियौ ।
प्रियाप्रियाणिरूपाणिरसान्गन्धान् प्रियाप्रियान् २१
जानाति स तु विज्ञेयः परमात्मा सनातनः ।
विरूपः स तु विज्ञेयः कर्त्ता कर्म्म च योगिभिः ॥ २२
तयोर्विनश्वरं कर्म्म कर्त्ता तु न विनश्यति ।
यथा चित्रसहस्राणि कुरुते चित्रकर्म्मकृत् ॥ २३
तथा कर्म्मसहस्राणि कुरुते परमेश्वरः ।
एकैव परमात्मा तु द्विधाभिन्नस्तु दृश्यते ॥ २४
भोक्ता भोज्यञ्च लोकेऽस्मिन् न विना ज्ञानचक्षुषा ।
भोक्तैव संस्थितो देवः स्वेच्छया परमो विभुः ॥ २५
ये ये विकारा दृश्यन्ते व्यवहाराश्च भूतले ।
न तेषां संशयः कार्य्यः सर्व्वत्र परमेश्वरः ॥ २६
निराकारं महाघोरं स्वसंवेद्यं परं ध्रुवम् ।
शिवब्रह्म ततो विश्वं कामश्चेच्छात्मयं कृतम् ॥ २७
स्थूलश्चाकारवान् कामी विद्यते ब्रह्मसम्भवः ।
शुक्लश्चतुर्भुजो हृद्यः शङ्ख-चक्र-गदाब्जधृक् ॥ २८

चतुर्व्वक्त्रो महारत्न-सुवर्णाकुसुमावृतः ।
पुत्रो लब्ध्वा सरस्वत्या रत्या प्रीत्या च सर्व्वशः ॥२९
श्रीर्श्या शान्त्या तथा पुष्ट्या तुष्ट्या पद्मीश्वरेण तु ।
शालीद्वैवयुगी देवः प्रद्युम्नो भगवान् हरिः ॥ ३०
श्यामः कृतयुगी चाथ बभूव जगतां प्रियः ।
पूर्णेन्दुवदनः श्यामो दिव्यलावण्यलोचनः ॥ ३१
कुञ्चितासितकेशश्च मणिहेमविभूषितः ।
पाशाङ्कुशधनुर्बाणो रक्ताक्षः क्षीरसागरे ॥ ३२
स्थितो लब्ध्वा सुभद्राद्या रुक्मिण्या भद्रया तथा ।
रतो रत्या सहायस्तु कदाचिन्मन्मथो गतः ॥ ३३
संप्रेषितस्तु विबुधैः पुरीं चन्द्रप्रभां किल ।
तपश्चन्द्रललाटस्य प्रधर्षयितुमेव हि ॥ ३४
दिव्यैः शब्दादिभिर्घोरैर्बाणैः पुष्पमयैः शुभैः ।
उन्मील्य नेत्रे दृष्टश्च कैलासनिलयेन तु ॥ ३५
पृष्टश्च कोऽसि केनापि स चोक्तो वेत्स्यसे तु माम् ।
कामोऽस्मीति हरेणोक्तो ब्रह्मणोक्तः पुनश्च सः ॥ ३६
यद्द मां वेत्स्यसे दिष्ट्या तेन पृष्टः पुनश्च सः ।
किमागमनकृत्यं ते तेनोक्तस्त्वां विमोहितुम् ॥ ३७
कथमित्येव तेनोक्तस्तेनोक्तोऽसौ बलाद्धितः ।
किं ते बलञ्च तेनोक्तः पश्य मे कुसुमानि यत् ॥ ३८
इत्युक्त्वा पुष्पबाणैस्तु हृदयं भेत्तुमुद्यतः ।
कामश्चन्द्रललाटस्य ततः क्रुद्धः स दारुणः ॥ ३९
ललाटनयनाद्वह्निर्निष्क्रान्तो येन मन्मथः ।
महारक्तारुणो दग्धः सर्व्वभूतमनोहरः ॥ ४०
तस्मिन् दग्धे महादेवं स्तुत्वा कामान्तकं रतिः ।
प्रजापतिसुता लेभे वरं बालेन्दुशेखरात् ॥ ४१
मयस्य च गृहे जन्म वञ्चनं शम्बरस्य च ।
भर्त्रा समागमो भूयो द्वापरस्य विपर्य्यये ॥ ४२
रुद्रेण या परा दग्धा ललाटनयनाग्निना ।
कामस्य मूर्त्तिराद्या सा पुनर्जाता हरेर्गृहे ॥ ४३
त्रैलोक्यजयिनो विष्णोः प्राद्युम्नी तैजसी शुभा ।
हरितः श्यामवर्णा च सर्व्वभूतमनोहरा ॥ ४४
रुक्मिण्यां जातमात्रस्तु शम्बरेण हृतः पुरा ।
तामसं स्थानमाश्रित्य मायावत्यै समर्पितः ॥ ४५
तया संवर्द्धितो भूयः पूर्व्वरत्या पतिस्स सः ।
बोधितस्तु ततस्तेन शम्बरो निहतो युधि ॥ ४६

सा च कामस्य भार्य्या स्याद्रतिर्लब्धा वरं हरात् ।
शम्बरं वञ्चयित्वा तु भूयो लेभे पतिञ्च तम् ॥ ४७
स चापि कामस्तां भार्य्यां लब्ध्वा भूयोऽभवत् सुखी ।
शम्बरस्य धनं दारान् गृहीत्वा द्वारकां गतः ॥ ४८
भूयो नारायणगृहं प्राप्य संहृष्टमानसः ।
राज्यन्तु शम्बरपुरेऽकरोद्विष्णुबलाश्रयात् ॥ ४९
क्रीड़न्तं द्वारकोद्याने कदाचिच्छुम्भदानवः ।
नीत्वा भार्य्ये ददौ प्रीत्या भक्ष्येयं पद्युम्नेति ॥ ५०
तस्मात् संगृह्य तं दूरं नभो नीत्वा जहौ ततः ।
निशुम्भो विबुधस्थानाद्दृष्टमाहतवत्मनः ॥ ५१
ततः संविश्य शैलाग्रे शुम्भस्य नगरे शनैः ।
पतितो लब्धसंज्ञस्तु प्रद्युम्नो धन्विनां वरः ॥ ५२
उद्याने दैत्यकन्याञ्च लब्ध्वा लक्ष्मीं जहार च ।
क्षीरोदकन्यां सन्नाम्नीं चक्रधर्म्मेण धर्म्मवित् ॥ ५३
नागपाशैस्ततो बद्ध्वा सभार्य्यो विन्ध्यपर्व्वतात् ।
विनिर्ज्जित्य महाबुद्धिर्नीत्वा संस्थापितो गिरौ ॥ ५४
हिमाचलस्य शृङ्गे तु वितस्तातीरजे ततः ।
वज्रपञ्जरमध्यस्थो रक्ष्यमाणस्तु दानवैः ॥ ५५
विषमैर्नागभोगैस्तु दह्यमानो विलोखणैः ।
दुर्गां संस्तुतवान् भक्त्या विष्णुशक्तिं महाबलाम् ॥ ५६
स्तुतमात्रापि सापश्यद्रक्ष्यमाणञ्च तं तदा ।
नानाविधैरुपायैस्तत् पञ्जरं न शशाक सा ॥ ५७
यदा प्रवेष्टुं शस्त्रास्त्रैः सन्नद्धश्च तदा तु सा ।
सारिकारूपमकरोद्वदच्च मधुरस्वरम् ॥ ५८
सारिकां वाशतीं दृष्ट्वा लक्ष्मीः शुम्भासुरात्मजा ।
क्वचिदन्तःपुरपतिं बभाषे मत्तकामिनी ॥ ५९
भर्त्तुर्व्विनोदनार्थन्तु ममापि च महामते ।
दीयतां सारिकां बद्ध्वा यदि जानासि सौहृदम् ॥६०
तस्यास्तद्वचनं श्रुत्वा गृहीत्वा सारिकाञ्च ताम् ।
क्रीड़ार्थन्तु ददौ तस्यै निःशङ्को दानवश्च सः ॥ ६१
गवाक्षकोटरेणैव केनापि विवरेण तु ।
वज्रपञ्जरमध्यन्तु प्राप्य सा सारिका पुनः ॥ ६२
घोरं तद्रूपमाश्रित्य विददाराथ पञ्जरम् ।
तस्मिन् सञ्चूर्णिते घोरे दुर्भेद्ये देव-दानवैः ॥ ६३
देव्या नीलाञ्जवपुषा महालावण्ययुक्तया ।
श्रीमत्यत्यग्रतारुण्ययुक्तया गोपकन्यया ॥ ६४

ततः शुम्भगदां प्राप्य पञ्जरद्वारसंस्थिताम्।
प्रद्युम्नो दैत्यसङ्घातं निर्ज्जघान महाबलः॥ ६५
ततः शुम्भ-निशुम्भौ तु दृष्ट्वा सैन्यक्षयं महत्।
प्रद्युम्नं पाशनिर्म्मुक्तं चूर्णितं पञ्जरं महत्॥ ६६
वासुदेवस्य भगिनीं दृष्ट्वा कामवशं गतौ।
परस्परमथाब्रूतां भ्रातरौ युद्धलालसौ॥ ६७
ममेयं तव नेयं स्यादहमेनां हरामि भोः।
शत्रोरियं त्राणभूता मम येन हृता सुता॥ ६८
एवन्तु वक्ष्यमाणौ तु प्रोक्तौ गोपेन्द्रकन्यया।
अनेन क्षत्रधर्म्मेण हृतेयं दुहिता तव॥ ६९
यथा ह्यहमनेनैव विधिना दानवर्षभौ।
पराक्रमं भवद्भ्यान्तु पश्येयमिति मे मनः॥ ७०
तस्यास्तद्वचनं श्रुत्वा ततो युद्धं प्रचक्रतुः।
पश्यतामथ सर्व्वेषां प्रद्युम्ननिकटे महत्॥ ७१
ततो महागदाघातैरन्योऽन्येन निपातितैः।
तेनोपायेन तौ हत्वा मोचयित्वा तु यादवम्॥ ७२
सभार्यं द्वारकां नीत्वा देवी चान्तर्द्दधे पुनः।
तस्यां पुत्रस्तु यो जातः स शुम्भनगरेऽभवत्॥ ७३
राजा परमधर्म्मात्मा विष्वक्सेन इति श्रुतः।
मायावत्यास्तु यः पुत्रो मयो नाम्ना तृकेश्वरी॥ ७४
स शम्बरपुरे राजा बभूव रिपुमर्द्दनः॥ ७५

इति तव कुसुमेषोर्दिव्यमाहात्म्ययुक्तं
ललितपदवचोभिः श्रोत्रपेयैर्मनोज्ञैः।
तदनु शृणु रहस्यं मन्मथस्य प्रभावं
सकलजनमनांसि क्षोभितुं यस्तु जातः॥ ७६

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
कामतत्त्वादिनिरूपणं नाम
अष्टमोऽध्यायः॥ ८॥

नवमोऽध्यायः।

सूत उवाच।

मत्स्यः कूर्म्मो वराहश्च नारसिंहश्च वामनः।
रामो रामश्च कृष्णश्च बुद्धः कल्की हरिर्दश॥ १
योगीन्द्राणां प्रधानश्च संसारभयनाशनः।
दुष्टनिर्द्दलनः श्रीमान् क्षीरोदार्णवसम्भवाम्॥ २
लक्ष्मीमुरसि सन्धत्ते मन्मथेन वशीकृतः।
पुरा देवासुराः सर्व्वे जरा-मृत्युभयार्द्दिताः॥ ३
ममन्थुरमृतं दिव्यं क्षीरोदे सागरोत्तमे।
अमृते मथ्यमाने तु श्रीश्च लोकमहेश्वरी॥ ४
धन्वन्तरि-शशाङ्कौ च पारिजातो महाद्रुमः।
उच्चैःश्रवाश्च तुरगो गावः पीयूषमेव च॥ ५
पुनश्च मथ्यमाने च कालकूटं महाविषम्।
युगान्तानलसङ्काशं सुरासुरभयावहम्॥ ६
पीयूषजन्मकाले तु बिन्दवो ये बहिर्गताः।
तेभ्यः कन्याः समुद्भूता अनेकाद्भुतदर्शनाः॥ ७
शरत्पूर्णेन्दुवदनास्तडित्सूर्य्यानलप्रभाः।
काश्चिदुत्पलसङ्काशाः काश्चित् पुलकसन्निभाः॥ ८
काश्चित् कनकसङ्काशाः काश्चिद्विद्रुमसन्निभाः।
मसारसदृशाः काश्चित् काश्चिद्रजतसन्निभाः॥ ९
सुप्रभाः पद्मगर्भाभाः फुल्लनीलाब्जलोचनाः।
लावण्यामृततोयेन सिञ्चयन्त्यो दिशो दश॥ १०
दुःख-शोक-जरा-मृत्यु-रोगाणाममृतप्रभाः।
हार-केयूर-कटकैर्दिव्यरत्नैरलङ्कृताः॥ ११
भिन्दन्ति हृदयानीव रशाद्या मधुरस्वनैः।
जगदुन्मादयन्त्येव भ्रूभङ्गापाङ्गवीक्षणैः॥ १२
कोटिशस्ताः समुत्पन्नास्त्वमृताः काममिश्रिताः।
ततोऽमृतं समुत्पन्नं जरा-मृत्युनिवारणम्॥ १३
कालकूटं शशाङ्कञ्च शरीरे धृतवान् हरः।
जग्राहार्कस्तुरङ्गन्तु पारिजातं शचीपतिः॥ १४
कौस्तुभञ्चाश्रयद्विष्णुः सर्व्वे धन्वन्तरिं जनाः।
अमृतार्थं कृतं युद्धं देवैर्दैत्यैः परस्परम्॥ १५
युगान्तमिव संक्षुब्धैरनलार्कसमप्रभैः।
हृतं सोमञ्च दैतेयैर्बलाद्विष्णुश्च मायया॥ १६
स्त्रिया विलासरूपिण्या पुनर्वै विष्णुना हृतम्।
दृष्ट्वानन्दोऽभवत् स्वर्गे पान-स्त्री-भोजनादिषु॥ १७
प्रत्यक्षमिह सर्व्वेषु दृश्यते लोकसाक्षिकम्।
इत्युक्त्वा प्रददुस्तस्मै विष्णवे छद्मरूपिणे॥ १८
एतस्मिन्नन्तरे दृष्ट्वा स्त्रियो दानवपुङ्गवाः।
अनयन्नमृतोद्भूता यथास्थानं यथासुखम्॥ १९
तासां पुराणि दिव्यानि स्वर्गाच्छतगुणान्यपि।
घोरैर्यन्त्रैः सुगुप्तानि मयमायाकृतानि च॥ २०

...वितानि सर्व्वाणि कृत्वा युद्धाय निर्ययुः ।
...देव स्त्रियो दैत्याः कृत्वा समयमेव हि ॥ २१
...वाः स्त्रियो न स्प्रशामो यदि देवैर्विनिर्ज्जिताः ।
...सिंहनादांस्तदा चक्रुः शङ्खान् दध्मुः पृथक् पृथक् ॥ २२
...पूरयन्त इवाकाशं तर्ज्जयन्तो बलाहकान् ।
ततः समागता देवा युद्धाय कृतनिश्चयाः ॥ २३
...आयुधैर्विविधैरस्त्रैर्जिघांसन्तः परस्परम् ।
ततो दैत्या हता देवैर्विष्णुना च महात्मना ॥ २४
...हतावशिष्टाः पातालं विविशुर्विवराणि च ।
...अनुवव्राज तान् विष्णुश्चक्रपाणिर्महाबलः ॥ २५
...पातालं परमं गत्वा संस्थिता भीतभीतवत् ।
एतस्मिन्नन्तरे विष्णुर्ददृशेऽमृतसम्भवाः ॥ २६
...पूर्णेन्दुवदना दिव्यलावण्यगर्व्विताः ।
...मोहितः कामबाणैर्लेभे तत्रैव निर्वृतिम् ॥ २७
...रमिय वरनारीभिः क्रीड़मानो बभूव ह ।
...तासु पुत्रानजनयन्महाबलपराक्रमान् ॥ २८
...कम्पयन्तो महीं सर्व्वां नानायुद्धविशारदान् ।
एतस्मिन्नन्तरे ब्रह्मा देवदेवं व्यसर्ज्जयत् ॥ २९
...लोकस्य रक्षणार्थाय विष्णोरानयनाय च ।
ततो वृषभरूपेण गर्ज्जमानः पिनाकधृक् ॥ ३०
...प्रविष्टो विवरं तत्र विनदन् भैरवान् रवान् ।
...निपेतुस्तस्य निनदैः पुराण्यन्तःपुराणि च ॥ ३१
ततः क्रुद्धा हरेः पुत्राः संग्रामाय व्यनोदयन् ।
तान् रुद्रो दन्तरूपेण खुरैः शृङ्गैर्व्यदारयत् ॥ ३२
...हतेषु तेषु निष्क्रम्य ययौ विष्णुर्हरान्तिकम् ।
शरैः सन्ताड़यामास दिव्यैरस्त्रैश्च केशवः ॥ ३३
...अस्त्राणि तानि विष्णोश्च जग्रास गिरिगोचरः ।
हरिर्विज्ञाय गौरीशमागतं तं जगत्पतिम् ॥ ३४
प्राह गम्भीरया वाचा भगवन् क्षम्यतामिति ।
...तस्य तद्वचनं श्रुत्वा भगवानाह शङ्करः ॥ ३५
...आत्मानं किं न जानीषे त्वं हि विश्वस्य कारणम् ।
...तथा नात्र रतिः कार्य्या निवर्त्तस्व ममाज्ञया ॥ ३६
तच्छ्रुत्वा व्रीड़मानस्तु विष्णुः प्राह महेश्वरम् ।
...ममात्र विद्यते चक्रं तद्गृहीष्यामि सत्वरः ॥ ३७
...तमुवाच महादेवश्चक्रमत्रैव तिष्ठताम् ।
...दृष्टानां दैत्यसङ्घानां छिनत्तु वदनान्यपि ॥ ३८

अहं घोरतमं तस्माच्चक्रमन्यद्ददामि ते ।
एतदुक्त्वा हरोलिख्य दिव्यं कालानलप्रभम् ॥ ३९
विष्णवे प्रददौ चक्रं घोरार्कायुतसुप्रभम् ।
लब्ध्वा सुदर्शनञ्चान्यत् केशिहा विबुधांस्ततः ॥ ४०
उवाच नार्य्यः पाताले विद्यन्ते यौवनं गताः ।
ताभिः सार्द्धं महाक्रीड़ां यः करोति करोतु सः ॥ ४१
तच्छ्रुत्वा केशवाद्वाक्यं सर्व्वास्त्रिदशयोनयः ।
प्रवेष्टुकामाः पातालं विष्णुना सहितास्ततः ॥ ४२
एतस्मिन्नन्तरे काले विज्ञाय भगवान् हरः ।
क्रोधाच्छापं ददौ घोरं देवयोन्यष्टकस्य च ॥ ४३
वर्ज्जयित्वा मुनिं शान्तं दानवं वा मदंशजम् ।
इदं यः प्रविशेत् स्थानं स यातु निधनं क्षणात् ॥ ४४
श्रुत्वा वाक्यमिदं घोरं मनुष्यहितवर्द्धनम् ।
प्रत्याख्यातास्तु रुद्रेण देवाः स्वगृहमभ्ययुः ॥ ४५
कस्यचित् त्वथ कालस्य चिन्ताविष्टं महेश्वरम् ।
उवाच पार्व्वती देवी किं चिन्तयसि शङ्कर ॥ ४६
स्रष्टासि सर्व्वभूतानां जगतः कारणं परम् ।
एवं सञ्चोदितो देव्या प्राह वाक्यं त्रिलोचनः ॥ ४७
वैवराणाञ्च स्त्रीणाञ्च रूपं सञ्चिन्तयाम्यहम् ।
त्रैलोक्ये तादृशी नारी यतोऽद्यापि न विद्यते ॥ ४८
एतच्छ्रुत्वा तु वचनं पुनः प्राह पतिञ्च सा ।
अहोवत महद्दुःखं यत्र त्वमसि विस्मितः ॥ ४९
गन्तुमिच्छाम्यहं द्रष्टुं यद्यनुज्ञा भवेन्मम ।
एवं कुरुष्वेत्युक्ता तु शिवेन परमात्मना ॥ ५०
प्रविवेश विलं तूर्णं वक्त्राच्छायेव दर्पणम् ।
तामभ्येत्याङ्गनाः सर्व्वाः सूर्य्यमित्येव चिन्तयन् ॥ ५१
भास्करोऽयं समुदितः किंस्वित् पातालगह्वरे ।
इति सञ्चितयन्त्यश्च कन्या रूपमदालसाः ॥ ५२
पार्व्वती तु ततो दृष्ट्वा नार्च्चयतीर्विमोहिताः ।
तासां रूपं समालोक्य संहृष्टा प्राह पार्व्वती ॥ ५३
यूयं विषलताकारा वृथा रूपाणि बिभ्रथ ।
श्वभ्रे पुष्पफलानीव दुर्व्वोधकमलानि च ॥ ५४
युष्मदीयं तथा रूपमभोग्यं सर्व्वदेहिनाम् ।
स्त्रियः पुंसोपभोगार्थं प्रजापतिरथासृजत् ॥ ५५
कन्यास्तद्वचनं श्रुत्वा केयं स्यादित्यचिन्तयन् ।
ज्ञात्वा तु पार्व्वतीं तान्तु ततो भूमौ निपत्य च ॥ ५६

स्तोत्रैर्नानाविधाकारैरम्बिकां समतोषयन् ।
ततस्तुष्टा च सा ताभ्यो वरं दत्तवती पुनः ॥ ५७
युष्माकं पतयः शप्ताः प्रविशन्तश्च शम्भुना ।
इदानीं मम पुत्राश्च मनुष्याः शाङ्करा गणाः ॥ ५८
ज्ञान-विज्ञानपूताश्च मन्त्रपूताश्च तापसाः ।
युष्माकं पतयः सन्तु रूप-यौवनगर्व्विताः ॥ ५९
रमध्वं तैर्नरैः सार्द्धमित्युक्त्वान्तरधीयत ।
एवं स्त्रीलम्पटो विष्णुः पूर्व्वमासीत् प्रजापतिः ॥ ६०
भ्रातॄणां दैत्यमुख्यानां हतानां दारुणे युधि ।
स्त्रियो हृत्वा तु पाताले चिक्रीड़ च मुमोद च ॥ ६१
त्रेतायुगे रामरूपो विष्णुः सम्प्राप्य जानकीम् ।
नो तृप्तः स्त्रीविलासानां वित्तस्य च सुतस्य च ॥ ६२
रेतःसंप्रेषणस्यापि प्रोषितस्य स्त्रियामपि ।
तस्मात् कलियुगे भूयो गृहीत्वा जन्म केशवः ॥ ६३
वसुदेवस्य देवक्यां मथुरायां महाबलः ।
बालस्तु गोपकन्याभिर्वने क्रीड़ां चकार सः ॥ ६४
दश लक्षाणि पुत्राणां गोपालानां ससर्ज्ज ह ।
ततस्तु यौवनाक्रान्तो रुक्मिणीं प्रददर्श ह ॥ ६५
विवाहयित्वा पुत्रांश्च प्रद्युम्नाद्यांश्च निर्म्ममे ।
तथापि नरकं दैत्यं प्राग्ज्योतिषपतिं बलात् ॥ ६६
हत्वा स्त्रीणां सहस्राणि षोड़शैव जहार सः ।
तासां रतिफलं भुक्त्वा पुत्राणां नवतिं तथा ॥ ६७
सहस्राणि ससर्ज्जाशु मत्स्ये चाण्डं महाद्भुतम् ।
स्त्रीणां तथापि नो तृप्तो दिव्यानान्तु रतैर्यदा ॥ ६८
तदा राधां स्त्रियं काञ्चिन्निशि धैर्य्यादधर्षयत् ।
तथापि परनारीणां लम्पटो नित्यमेव हि ॥ ६९
सकामा चानुरक्ता च यतो नारी सुदुर्लभा ।
विचित्रं हि सुखं सुक्ताविव्याज्ञैर्य मतं न तत् ॥ ७०
भाति सेऽभ्रवदीशो वा ततः प्रकृतिमाश्रितः ।
यदान्योऽन्यहृतं चेतो यूनोः समुपजायते ॥ ७१
न तदा दृश्यते धर्म्मो दृश्यते न च वा कुलम् ।
ब्रह्मा पद्मोद्भवः शान्तो योग ध्यानपरायणः ॥ ७२
चतुर्वक्त्रश्च रक्ताङ्गो गुरूणां सहुरुर्महान् ।
दीर्घायुर्जनकः प्राज्ञो वेद-वेदाङ्गपारगः ॥ ७३
गौर्य्या विवाहे तत्पादौ दृष्ट्वा प्रस्खलितोऽभवत् ।
यत्र ते बालखिल्यास्तु जाताः सद्ब्रह्मचारिणः ॥ ७४

इति कथितमशेषं दिव्यनीलाब्जकान्ते-
र्मधुरिपुरिति नाम्ना शुद्धनीलाभ्रवर्णम् ।
चरितमतिरहस्यं दिव्यलावण्ययुक्तं
मदनविजितबुद्धेः पद्मयोनेश्च विप्राः ॥ ७५

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ।

सूत उवाच ।

श्वेतो रक्तो महानीलो भिन्नाञ्जनचयोपमः ।
सर्व्वरूपधरो रुद्रो दंष्ट्रालो दारिताननः ॥ १
शान्तो दान्तो जितक्रोधः संयमी विगतस्पृहः ।
नारायणस्ततो जातः सृष्ट्यर्थं तेन योजितः ॥ २
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः ॥ ३
तपसोऽन्ते करिष्यामि सृष्टिमित्येव चिन्त्य सः ।
तपसा सुपरिश्रान्तः कदाचित् क्षीरसागरे ॥ ४
सुष्वाप सुचिरं कालं दुर्लक्ष्यस्तु हरो यदा ।
तदापि रजसा विष्णुः सत्त्वेन च चतुर्म्मुखः ॥ ५
प्रसादजः पुनः सृष्टौ नियुक्तो विधिवत् कृतः ।
प्रथमं तामसं सर्गं पञ्चभेदमथासृजत् ॥ ६
ततस्तु मानुषं सर्गमसृजद्राजसं शनैः ।
दैवमष्टप्रकारन्तु सात्त्विकञ्चासृजत् क्रमात् ॥ ७
ततः स्थानानि धर्म्मांश्च जीवितं परिपालनम् ।
आहारमपि सर्व्वेषां तथा चान्योऽन्यभक्षणात् ॥ ८
कृत्वा सर्व्वगतो देवस्तत्रैवान्तरधीयत ।
एवं कृते ततो रुद्रस्त्यक्त्वा निद्रां समुत्थितः ॥ ९
संस्मरन् सृष्टिकामश्च ददर्श पूरितं जगत् ।
भूतैर्नानाप्रकारैस्तु जगदेतच्चराचरम् ॥ १०
ऊर्द्ध्वं मध्येऽथ पाताले तादृक्स्थानं न विद्यते ।
यन्न भूतगणैर्व्याप्तं मिथुनैर्युग्मचारिभिः ॥ ११
मोदमानं जगद्दृष्ट्वा सृष्टिहेतुर्महाद्भुतम् ।
चिच्छेद कुपितो लिङ्गं किमनेनेति चिन्त्य सः ॥ १२
महाज्वालामयं घोरं स्तम्भभूतं जगत्त्रयी ।
यस्य नान्तं न मध्यञ्च नो मूलमिह दृश्यते ॥ १३

देवानां प्रमाणं वा तेजसो वा स्थवीयसः।
पूर्व्ववरोधस्तत् ज्ञात्वा रुद्रस्यान्तर्द्दधे पुनः॥ १४
ततो बहुतिथे काले गते दर्पसमन्वितौ।
ब्रह्म-विष्णू प्रकुपितौ लिङ्गं परमपश्यताम्॥ १५
ज्वालालिङ्गं समुद्भ्रान्ते ज्वलन्तं स्वेन तेजसा।
दृष्टेयमिति सञ्चिन्त्य सर्व्वाकारं सुलक्षणम्॥ १६
तद्दृष्टा दर्पनाशनं तयोरन्योऽन्यदर्शनात्।
सत्वरौ ततस्तौ तु पिता-पुत्रौ च सौहृदात्॥१७
परस्परं समालिङ्ग्य कार्य्यमेतत् प्रचक्रतुः।
इदं ज्वालामयं लिङ्गं कस्य स्यादिति चिन्त्य तौ॥१८
ज्वालालिङ्गसहस्राणि निर्गच्छन्ति विशन्ति च।
अवेशावोऽस्य यन्मूलं यदूर्द्ध्वञ्चेह दृश्यते॥ १९
विष्णुना च ततो मूलमन्वेष्टुं ब्रह्मणा तथा।
ऊर्ध्वगूर्द्ध्वञ्च युगपद्युयावदन्तो न विद्यते॥ २०
तदा तेनैव मार्गेण निष्क्रम्य जलधेस्तटे।
परस्परं समालिङ्ग्य श्रान्तौ विविशतुश्च तौ॥ २१
शनैरोपतां ततो वाचं नभसः कस्यचित् तु ह।
इदं चन्द्रललाटस्य लिङ्गं ज्वालामयं सुरौ॥ २२
कुपितेन तु यच्छित्वा भूमौ त्यक्तं कपर्द्दिना।
तत् सम्पूज्य सिद्धिर्वां भविष्यत्यद्भुतोपमा॥ २३
तदिदं शाङ्करं लिङ्गं पूजयिष्यन्ति ये भुवि।
बलिपुष्पोपहारैश्च तेषां प्रीतः पिनाकधृक्॥ २४
तदाश्च युत्तमान् कामान् स देवो भक्तवत्सलः।
श्रुत्वा चक्रतुः स्तोत्रं तस्मै देवाय रंहसा॥ २५
तं पूजयित्वा विधिवत् सम्प्राप्तौ सिद्धिमुत्तमाम्।
ततोऽन्यस्मिन् महाकल्पे देवैर्दृष्टस्तु शङ्करः॥ २६
अर्द्धनारीशरीरस्तु कामशत्रुः पिनाकधृक्।
अन्यस्मिन् कल्पसमये गृहस्थाश्रमवानपि॥ २७
हिमवन्तगुहायान्तु भूतसङ्घैः समावृतः।
कदाचित् पार्व्वती तत्र काली गौरत्वलब्धये॥ २८
ब्रह्माणमर्चयित्वा तु तपस्तप्तुं गता वनम्।
इत्थं सती सरस्यापि जयन्तीन्तु महागुहाम्॥ २९
राजतासगुहाञ्चापि तत्र दृष्ट्वा पितामहम्।
गिरिगावैः समग्रैश्च संस्पृश्य च महामतिः॥ ३०
हेमजाम्बूनदप्रख्या प्रसादाद्ब्रह्मणोऽभवत्।
तपोवनन्तु गच्छन्त्या उद्दामकुसुमा सखी॥ ३१

भर्त्तुः स्त्रीलम्पटस्यापि रक्षार्थं विनिवेशिता।
एकस्मिन् द्वारदेशे तु द्वितीयो वीरकः सुतः॥ ३२
ईर्ष्यादोषेण तावुक्तौ भवद्भ्यां नित्यमेव हि।
रक्षितव्यो लम्पटोऽयं यथान्यां मद्गृहे स्त्रियम्॥ ३३
प्रवेश्य नोपभोक्ता स्यात् पतिर्मे जाह्नवीप्रियः।
सन्ध्यारागी कामशत्रुः सन्ध्यारागसमप्रभः॥ ३४
वाढ़ं वाढ़मितीत्युक्त्वा ताविदानीं प्रणम्य ताम्।
गौरीद्वारगतौ नित्यं दिवारात्रन्तु तस्थतुः॥ ३५
आड़ी नाम ततो दैत्यस्तस्मिन् काले पितामहम्।
आराध्य तपसा देवममरत्वमयाचत॥ ३६
ततः स तेन दुर्म्मेधा न किञ्चिदमरस्त्विति।
अमरत्वे महादैत्य हेतुमात्रं गृहाण भोः॥ ३७
तस्य तद्वचनं श्रुत्वा दैत्यो हेतुं तमुक्तवान्।
देव रौद्रे मुहूर्त्ते तु ऋक्षे चान्द्रेतिसंज्ञिते॥ ३८
यदा रूपत्रयं देव कुर्म्मि मम्मि तदा लयम्।
आखण्डलो महावृष्टिं पुष्करावर्त्तकैर्घनैः॥ ३९
कल्पापायी निरुक् चन्द्रः सरीसृत्यनिलो महान्।
शिखण्डी च नरीनर्त्ति दृष्ट्वा पूर्णं पयोधरम्॥ ४०
यदा तदा मे भगवन् प्रदानादस्तु मे मृतिः।
एवमस्त्विति तेनोक्तः स दैत्यो मुदितोऽभवत्॥ ४१
मत्तः कादम्बरीं पीत्वा तुषारशिखरं ययौ।
यत्र सा शङ्करगुहा द्वाःस्थयस्या गृहं महत्॥ ४२
उद्दामकुसुमां तत्र वीरकञ्च ददर्श सः।
पप्रच्छ तौ स ताभ्याञ्च यथावृत्तमथाशृणोत्॥ ४३
दैत्यस्त्रीलम्पटं रुद्रं संविज्ञाय तयोर्मुखात्।
प्रवेष्टुकामस्तु गुहां पौरुषं रूपमत्यजत्॥ ४४
आश्रित्य सर्व्वरूपन्तु प्रविश्य च गुहान्तरम्।
तेनोपायेन तौ मूढ़ौ मोहयित्वा च मूढ़धीः॥ ४५
गौरीरूपं क्षणात् कृत्वा तृतीयमपि चाद्भुतम्।
महेश्वरमुवाचेदं विरहोत्कण्ठमानसम्॥ ४६
भो भो चन्द्रललाटाहं पार्व्वती गिरिगोचरा।
सम्प्राप्तोत्कण्ठिता तुभ्यं ब्रह्मदत्तवरा सती॥ ४७
पश्य जाम्बूनदप्रख्यां मां क्रीड़स्व च मे प्रिय।
तदाक्योन्मीलिताक्षस्तु विरूपाक्षः स्मराहरम्॥४८
प्रियामिव भुजाभ्यान्तु पर्य्यष्वजत हृष्टवत्।
कृत्रिमान्तु रतिं कृत्वा ततो वाञ्छरतिं पुनः॥ ४९

अन्तरे च गतो लिङ्गं स ददर्श महाद्भुतम् ।
विश्वकर्म्मकृतं तस्यां कनकाभं महद्विमत् ॥ ५०
पश्चात् त्रिशूलमध्ये तु यथा सद्भावजां रतिम् ।
स्नेहसद्भावलिङ्गं तत् तच्च गात्रं महामृदु ॥ ५१
तथापि शङ्कितः किञ्चिज्ज्ञातः कामातुरश्च सः ।
चकार सुरतक्रीड़ां तावद्वज्रमयो भगः ॥ ५२
उत्पाद्य दण्डमुषले तस्य लिङ्गविकर्त्तनम् ।
कर्त्तुं समुद्यतो घोरो दानवः स्त्रीवपुर्द्धरः ॥ ५३
हरोऽपि तां महामायां विज्ञाय त्वन्यथाऽसृजत् ।
शूलपाशुपतादीनि लिङ्गाग्रान्निःसृतान्यपि ॥ ५४
ततो रतान्ते रुद्रस्य दैत्यो रूपं जहौ स्त्रियाः ।
परिच्छिन्नसद्वस्तु-विषयाणीन्द्रियाणि च ॥ ५५
हत्वा दैत्यं महादेवो वीरकायाप्यदर्शयत् ।
ततः स शङ्कितः स्त्रीणां विश्वासं नाकरोत् क्वचित् ॥ ५६
तव दैत्येन पतता पृष्टेनोक्तो महेश्वरः ।
हे भद्र दानववर त्वया युद्धे पराजितः ॥ ५७
अहं मृतो मम भ्राता विद्यते सुमहाबलः ।
त्वां हन्तुं स इहागन्ता पुनर्गौरीवपुर्द्धरः ॥ ५८
त्वां मारयिष्यत्यथवा मम मार्गं गमिष्यति ।
शवोरुक्त्वा वचस्त्वेतत् पपात च ममार च ॥ ५९
इति छलमले कृत्वा यदीयं न तु पार्व्वती ।
स्वयमेव प्रिया भार्य्या महासाध्वी मनागसा ॥ ६०
प्रविष्टा स्त्रीति सञ्चिन्त्य रुद्रः क्रोधवशानुगः ।
तस्मिन् काले महादैत्यं दृष्ट्वा नारीवपुर्द्धरम् ॥ ६१
उद्दामकुसुमा गत्वा गौर्य्यै सर्व्वं न्यवेदयत् ।
देवि नाहं समर्थाऽस्मि पतिं संरक्षितं तव ॥ ६२
वीरकेण महाधन्या काचिन्नारी प्रवेशिता ।
तया सह महाक्रीड़ां चक्रे बालेन्दुशेखरः ॥ ६३
अहन्तु व्रीड़िता चासं दृष्ट्वा तत्क्रीड़ितं वपुः ।
तच्छ्रुत्वा कुपिता पुत्रमशपद्वीरकञ्च सा ॥ ६४
गौरी लब्धवरा भूत्वा स्वगृहं गन्तुमुद्यता ।
प्राङ्मुखी चाब्रवीद्वाक्यं तोयेनाचम्य सत्वरा ॥ ६५
मनुष्यो भविता विप्रो जन्म-मृत्यु-जराश्रयी ।
वीरको येन मे नारी गृहे काचित् प्रवेशिता ॥ ६६
प्रमादिना वीरकेण स्त्रियो रुद्रो न रक्षितः ।
इत्युक्त्वा कुपिताऽपश्यत् सोत्कण्ठा जातविस्मया ॥ ६७
सकामा शङ्किता दीना रौद्रवीरभयानकान् ।
करुणां वाथ बीभत्सां केलिं किञ्चित् तु कारिणीं ॥ ६८
ददर्श स्वगृहे पुत्रं पतिञ्चानागसं तथा ।
एवम्भूतां सुतो दृष्ट्वा पादयोः पतितोऽब्रवीत् ॥ ६९
देवि धन्यासि भद्रं ते दिष्ट्या जीवति ते पतिः ।
आड़िना दानवेन्द्रेण न हतो दैत्यमायया ॥ ७०
तच्छ्रुत्वा दुःखिता गौरी शप्त्वा तं वीरकं रुषा ।
उवाच पुत्र शप्तोऽसि महामोहेन मानवः ॥ ७१
भविष्यसि शिलादस्य पुत्र पुत्रो महीतले ।
तत्र द्वादशभिर्वर्षैः शापान्तो भविता तव ॥ ७२
पुनस्तेनैव देहेन मम पुत्रो भविष्यसि ।
तद्वाक्याद्वीरको नन्दी शैलादिरभवत् पुनः ॥ ७३
तत्र कालन्तु तपसा जित्वा भूयोऽनुगोऽभवत् ।
गौर्य्याः सकाशं मतिमान् भगवान् वानराननः ॥ ७४
अथ रुद्रो महागौरीं दृष्ट्वा तु शङ्कितस्तदा ।
जिघांसुर्दैत्यवाक्येन भैरवं कृतवान् वपुः ॥ ७५
तस्य रूपसहस्राणि जग्राह गिरिगोचरा ।
ग्रस्ते सहस्रे रूपाणां ताराख्ये प्रदर्शिते ॥ ७६
पार्व्वत्या चाथ निःशङ्कः कपर्द्दी चाभवत् ततः ।
दृष्ट्वा जगन्मयीं तान्तु रराम सुरतप्रियः ॥ ७७
विरहोत्कण्ठितां भार्य्यां प्राप्य भूयो हिमाचले ।
सतीं गौरीं राजकन्यां प्राप्य बालेन्दुशेखरः ॥ ७८
यदा न सुरते तृप्तो देवदारुवनं तदा ।
विवेशोन्मत्तवेषश्च स्तब्धलिङ्गो दिगम्बरः ॥ ७९
मुनिदाररतिप्रेप्सुर्मन्मथाविष्टचेतनः ।
तुषार-हार-शीतांशु-शङ्खतुल्येन भस्मना ॥ ८०
कृतस्नानश्च शुशुभे कर्पूरेणेव धूसरः ।
मयूरचन्द्रिकापुञ्ज-पिच्छिकां धारयन् करे ॥ ८१
दण्डोपरि दृढ़ैः पाशैर्बद्ध्वा खट्वाङ्गकादिकम् ।
पूर्णेन्दुशकलाकारं कपालमपि धारयन् ॥ ८२
शोभमत्यग्रतारुण्य-गर्व्वेणोन्मादयन् स्त्रियः ।
लावण्य-स्मितशौभाग्य विलासानपि दर्शयन् ॥ ८३
व्योमालिकज्जलाकारैः स्निग्धैर्हृद्यैः सुकुञ्चितैः ।
शिरोरुहैस्तथा भाति सूक्ष्मैरष्टाङ्गुलैः शुभैः ॥ ८४
ललाटस्थैश्चलद्भिस्तु श्वेताब्जमिव षट्पदैः ।
सुस्निग्धसूक्ष्मकृष्णेन भ्रूयुगेण च शङ्करः ॥ ८५

लोलाभ्यां कृष्णताराभ्यां विशालाभ्याञ्च दैत्यहा ।
कपर्द्दी भाति नेत्राभ्यां सरागैः प्रेक्षणैश्चलैः ॥ ८६
बहूनां मुनिदाराणां दर्शनीयोऽभवत् तदा ।
संयतदृष्टिरभवन्नवे तस्मिन् समागमे ॥ ८७
दिव्याङ्गुलिपरिमाण-दिव्यांसश्मश्रुशोभितः ।
पीनाङ्गो दर्शनीयाङ्गो द्विभुजश्चारुकुण्डलः ॥ ८८
दक्षिणावर्त्तिभिः कृष्णैर्लोमभिर्भूषितो हरः ।
प्रशस्तमत्तमातङ्ग-गतिर्मोक्षगतिप्रदः ॥ ८९
पतिदिव्यमहारक्त-पाणिपादोष्ठभूषितः ।
विप्रयुक्तैः स्रग्दामैः सुसुगन्धैरकण्टकैः ॥ ९०
शाकुन्ताङ्गस्त्वनङ्गारिराभाति ऋतुसम्भवैः ।
वशौ वनं परिवृतो गणैर्भस्माङ्गरूपिभिः ॥ ९१
गायन् वाणैश्च संयुक्तो दशभिर्मन्थुरादिभिः ।
शेषैर्विरहितैर्दुष्टैश्चतुर्द्दशभिरेव च ॥ ९२
वृत्तिभिस्तिसृभिर्युक्तं लयकालयसंयुतम् ।
अष्टाङ्गमेकविंशत्या मूर्च्छनाभिश्च मूर्च्छितम् ॥ ९३
पञ्चाशता चैकहीनैस्तानैरपि च संयुतम् ।
कूटतानैरनेकैश्च नानाभेदैरलङ्कृतम् ॥ ९४
सप्तस्वराङ्कितं रम्यं तथा ग्रामत्रयान्वितम् ।
त्रिंशता महारागैर्दिव्यैर्जातिसमुद्भवैः ॥ ९५
छायाभिर्मिश्रिताभिश्च देशजातिविभूषितम् ।
णां रत्नजालैश्च भाषाभिरथ भाषितम् ॥ ९६
ःषष्टिप्रधानाभिरनन्ताभिरनन्तकम् ।
वा चान्तरभाषाभिर्द्दिरव्दाभिश्च संयुतम् ॥ ९७
तुर्व्विधेन वाद्येन तद्गुणेन गुणीकृतम् ।
चिन्नृत्यन् क्वचिद्गायन् क्वचिद्वल्गन् क्वचिद्धसन् ॥ ९८
ानि फलमूलानि क्वचित् खादन् गणैः सह ।
तीरेषु रम्येषु नेपथ्याद्युपशोभितः ॥ ९९
ंस्ताण्डवं लास्यं स्थानकानि सहस्रशः ।
विंशद्भेदभिन्नान्तु दृष्टिमेकाञ्च शङ्करः ॥ १००
करौ लाघवाच्चापि षट्त्रिंशच्छतसंख्यया ।
ार-वीर-बीभत्स-रौद्र-हास्य-भयानकान् ॥ १०१
णाद्भुत-शान्तांश्च नव नाट्ये रसास्तु ये ।
र्शयच्छान्तरसं तानस्य कस्यचित् ॥ १०२
ो न स्यात् सुशान्तस्य रसस्य भुवनत्रये ।
ं प्रयोक्ता द्रष्टा वा ऋते नारायणादपि ॥ १०३

सा च पूर्णेन्दुवदना पार्व्वती शाङ्करं वपुः ।
आस्थाय तरुणी हृद्या पीनश्रोणिपयोधरा ॥ १०४
कृष्णैस्तु सूक्ष्मैर्मृदुभिर्वस्त्रैः सञ्छन्नविग्रहा ।
रक्तवस्त्रकृतोष्णीषा पुष्पस्रग्दाममण्डिता ॥ १०५
अशोकपुष्पसम्पूर्णां मालां बिभ्रत् कराम्बुजैः ।
भर्त्तारमनुगच्छन्ती शुशुभे चारुसङ्गतिः ॥ १०६
विद्युल्लीलाभ्रनक्षत्रैर्नभसीव निशाकरः ।
गोपीरूपाणि बिभ्रद्भिर्मालभिः परिशोभिता ॥ १०७
कौतूहलाद्ययौ गौरी देवदारुवनं शनैः ।
भर्त्तुः स्त्रीलम्पटस्याथ परदारसमागमम् ॥ १०८
द्रष्टुं स्त्रीणाञ्च दौःशील्यं साध्वीनाञ्च तथा धृतिम् ।
रक्तान् विरक्तांश्च मुनीन् न्यस्य भर्त्तुरनुज्ञया ॥ १०९
पतिना सह संमन्त्र्य शर्व्वं द्रष्टुं समुद्यता ।
ततस्त्वपश्यंस्ताः सर्व्वास्तपस्विन्योऽथ निर्ज्जने ॥ ११०
अदृष्टपूर्व्वं पुरुषं मन्मथोपमदर्शनम् ।
निर्लज्जं भिक्षमाणन्तु मुनीनामाश्रमेष्वपि ॥ १११
हासादिभिर्मधुरैः सष्टैर्मन्मथोद्दीपनैः समैः ।
भिक्षाञ्चैव तु याचन्तं देहीति च पुनः पुनः ॥ ११२
शवरीसहितं रम्यं ततः कामवशं ययुः ।
बभ्रमुर्जहसुः पेतुर्जजृम्भुर्विविशुर्भयात् ॥ ११३
शेपुर्नेदुश्च रुरुदुर्जजल्पुर्मधुरं वचः ।
निश्वसुश्चुक्रुशुश्चैव विकारान् जुगुपुः स्वकान् ॥ ११४
ईषत् सन्दर्शयेयुश्च गोप्यान्यङ्गानि तस्य ताः ।
न किञ्चिज्जल्पितुं शेकुर्दहेयुर्मदनाग्निना ॥ ११५
अरुन्धतीमृते साध्वीं वशिष्ठमहिषीं शुभाम् ।
बालास्तरुण्यो वृद्धाश्च सर्व्वाः स्युर्मदनातुराः ॥ ११६
निमन्त्रयेयुराकारैरिङ्गितैर्गतिभिश्च तम् ।
अनङ्गशरभिन्नास्तु ततो वासांसि तत्यजुः ॥ ११७
आभाष्य तापसं तन्तु व्याहरेयुः क्वचिच्छनैः ।
किमयं तापसं धत्ते किमेतद्व्रतमेव वा ॥ ११८
किमनेनाथ घोरेण कृतेन कृतिनां वरः ।
तपो हि भोगसिद्ध्यर्थं जनाः कुर्व्वन्ति भूतले ॥ ११९
अत्र यद्विहितं किञ्चित् तत् स्वबुद्ध्या विचार्य्यताम् ।
यूनान्तु परदाराणामभिप्रेतः समागमः ॥ १२०
सकामानामकामानां किमु प्राप्तमुपेक्षसे ।
[illegible] परस्त्रियः ॥ १२१
न पुण्यहीनं पुरुषं प्र[illegible]

भोगार्थं वापि यत् कर्म्म तत् तत् कर्म्म महीतले।
नराः कुर्व्वन्ति सततं नैष्कर्म्म्यादिदमुत्तमम्॥ १२२
पुण्यैरुपार्ज्जितं मौढ्यात् कथं त्याज्यं लभस्व तत्।
त्वां दृष्ट्वा सुकुमाराङ्गमस्माकं जायते कृपा॥ १२३
यद्ययं माधवे मासि कथं गन्तुं वनं क्षमः।
इयं निर्लज्जता केन क्षेमा नारीः सुशोभनाः॥ १२४
कामयाना वरं कास्याः पीनश्रोणिपयोधराः।
सात्त्विकैः कामजैर्भावैरभिभूता रहोगताः॥ १२५
न त्वस्माकं त्वया कार्य्यं तपस्विन्यो वयं मुने।
यथोपजोषचारिण्यो नग्ना वस्त्रावृताथवा॥ १२६
निमील्य नेत्रे भिक्षां मा गृहाण चपलेन्द्रिय।
अस्माकं पश्य लावण्यं शरीरेषु स्तनेषु च॥ १२७
वयं वै परदारास्तु जराग्रस्तेषु साधुषु।
स्वाध्यस्थिशेषभूतेषु ब्राह्मणेषु परिग्रहः॥ १२८
ये न दण्डयितुं शक्ताः कथं ताड़यितं वचः।
अराजके वने चास्मिन् किं प्रविष्टोऽसि बालिश॥१२९
यस्य दण्डभयाल्लोकः सन्मार्गस्थो भवेदिह।
पश्येदं वृक्षगहनं वनं निर्झरसानुमत्॥ १३०
पश्येमांस्तापसान् दूरे नित्यमध्ययने रतान्।
दारकान् पाठयन्ति स्म क्षुत्पिपासासमन्विताः॥ १३१
अहोवत महायज्ञः सामवेदे न ते श्रुतः।
गौतमस्य प्रसन्नेन गुरुणा कथितस्तु यः॥ १३२
अग्निर्योषा समित् तत्र स्यादुपस्थश्च नित्यशः।
उपमन्त्रयते यत् सा स धूमो योषिदर्च्चिषः॥ १३३
यदन्तः कुरुते सा तु तेऽप्यङ्गाराः प्रकीर्त्तिताः।
अभिनन्दास्तु ये तत्र विस्फुलिङ्गास्त एव हि॥ १३४
तस्मिन् वैश्वानरे रेतो जुह्वते विबुधाः सदा।
तस्मात् कुरु कृपाञ्चैव तत्र वेद्मतुलं फलम्॥ ३५
एतत् स्थानमशुद्धञ्चेत् तत्रापि शृणु मे वचः।
साम्नां वाक्यं द्वितीयन्तु मुखमेतत् प्रजापतेः॥ १३६
ऋषिभिर्बहुधा गीतं गर्भाधानादिकर्म्मसु।
एवंविधाभिर्बह्वीभिः स्त्रीभिर्वाग्भिः प्रणोदितः॥१३७
स्त्रीणां नित्यप्रसन्नश्च तपस्वी वाक्यमुक्तवान्।
यदेतद्दक्षिणं नेत्रं विष्णोराभाति दीप्तिमत्॥ १३८
एषैव गुरुरस्माकं गुरुराह रतेः स्त्रियः।
चतुर्द्दशविधस्याथ भूतवर्गस्य दैशिकः॥ १३९
दिवाचराणां भूतानामयं पालयिता दिवा।
निशाचराणां भूतानामयमेव निशागमे॥ १४०
पिता पालयिता नित्यं प्रविश्य शशिमण्डलम्।
जलमात्रं स्वकिरणैः पातालतलमाश्रितः॥ १४१
अनेन मे व्रतं दत्तमिदं त्रिदशपूजितम्।
आवयोर्नैव भेदोऽस्ति योऽयं सोऽहमिति श्रुतिः॥१४२
यावदेष स्थितो व्योम्नि तावन्मे भोजनक्रिया।
विहिता प्राङ्मुखस्यापि मांस-क्षार-मधूज्झिता॥ १४३
अभक्ष्यापेयपानैश्च सर्व्वदोषैश्च वर्ज्जिता।
उषितस्य च मे नित्यं ग्रासो वै दीयतां पृथक्॥ १४४
आचान्तस्य जलेनाथ द्वितीयो देय इत्यपि।
घृतक्षीरान्नशाकैश्च फलमूलैश्च निःसृतम्॥ १४५
एका ददाति कवलं केश-कीटविवर्ज्जितम्।
द्वितीया वस्त्राच्छदनं पानीयमुपसेचनम्॥ १४६
अनेन विधिना तृप्तिं करोमि सततं स्त्रियः।
अयं मे दक्षिणः पाणिर्भोजने पात्रमेव हि॥ १४७
सम्भाषणं मे भगवन् नमोऽस्त्विति कृताञ्जलिः।
भूमौ जानुद्वयं कृत्वा करोति मम वन्दनम्॥ १४८
अनादरैरसम्मानैस्तुष्टिर्मे जायते सदा।
शयनं जाङ्गले देशे वृक्षकोटरवेश्मसु॥ १४९
इयं तपस्विनी मह्यं सुसमिद्धो हुताशनः।
अस्मिन् विभावसौ वीर्य्यं जुहोमि सृष्टिसिद्धये॥ १५०
मया तु सर्व्वभूतेभ्यो दानं देयं प्रकल्पितम्।
एतस्माद्दयस्य यस्य स्यादभिप्रीतिर्यथात्मनः॥ १५१
तं वै नयतु स क्षिप्रं येन स्यात् पूर्णमानसः।
निवृत्तः परितुष्टश्च सुखी पूर्णमनोरथः॥ १५२
तच्छ्रुत्वा परितुष्टास्ताः सावहासाः स्त्रियस्तु वै।
तमवष्टभ्य चिक्रीड़ुर्जजल्पुरिति तापसम्॥ १५३
उन्मत्तक वृथाशास्त्रं स्त्रीणामग्रे ब्रवीषि किम्।
स्त्रियः कामुकमिच्छन्ति कामितं स्त्रीजनैः परैः॥१५४
यदि न त्वं वृथाशास्त्रः कथं ते शवरी स्थिता।
छायाफलेव सततं स्त्रीरत्नं भुवि दुर्लभम्॥ १५५
एको महेश्वरो धन्यो यस्य तुष्टा च पार्व्वती।
न लोकस्य वृथावादस्त्वं धन्यः सत्यमेव हि॥ १५६
यस्येयं शवरी बाला भार्य्या त्रैलोक्यसुन्दरी।
संसर्गस्य तवार्थिन्यो वयन्तु वदतां वर॥ १५७

एवं वक्रोक्तिभिः स्त्रीभिः प्रार्थ्यमानः स तापसः।
निर्व्वाणी ययौ हृष्टः कामचारी गृहं गृहम् ॥१५८
अन्या गृहाणि नार्य्योऽपि ततस्तु मदनातुराः।
तमनुगच्छन्त्यो लपन्त्यो विविधा गिरः ॥ १५९
ततः कोलाहलं श्रुत्वा तापसास्तं समभ्ययुः।
नग्नं तपस्विनं द्रष्टुं निर्लज्जं कामचारिणम् ॥ १६०
जगद्गुरुर्यत्नात् काम-क्रोधविवर्ज्जिताः।
अवाद्यमानास्तैर्नार्य्यो भर्त्तॄंश्च तत्यजुः ॥ १६१
मोमर्षवशं प्राप्ता ना जानीयुर्महेश्वरम्।
तापसं जघ्नुर्गर्हयन्तश्च मोहिताः ॥ १६२
दैश्च पाषाणैः कमण्डलुभिरेव च।
वह्निना सर्पैः कण्टकैरायुधैस्तथा ॥ १६३
क्षामकण्ठाः पेतुश्च न शेकुश्च विचेष्टितुम्।
वल्कल-वासोभिरवष्टभ्य वरस्त्रियः ॥ १६४
निपेतुर्धरणीं ततस्तेषु यतत्स्वपि।
वल्कल-वासांसि लाघवाद्वमुच्य ताः ॥ १६५
प्रव्रजुर्नार्य्यो वरनारीश्वरं प्रति।
वशिष्ठस्य मुनेरगृहद्वारगतो मुनिः ॥ १६६
घनकैर्वाक्यं रुधिरौघपरिप्लुतः।
भवति भिक्षां मे देहि देहीति शङ्करः ॥ १६७
तिथिस्तव वामोरु सम्प्राप्तोऽहं सुशोभने।
वने चैव ताड़ितो मुनिपुङ्गवैः ॥ १६८
गात्राणि मे देवि मृदूनि ललितं मम।
पश्य वरारोहे मुनिभिर्जर्ज्जरीकृतम् ॥ १६९
वक्रोक्तिभिर्दण्डी दत्तकन्यामरुन्धतीम्।
दर्शयामास गात्राणि च शनैः शनैः ॥१७०
रुद्रस्य गात्राणि शक्रेरिव सुतस्य तु।
शीतलैस्तोयैः कामधेनूद्भवैर्हुतैः ॥ १७१
पुनस्तोयैः प्रक्षाल्य विविधैरथ।
रागैरालिप्य पुष्पैर्गन्धैर्विभूष्य च ॥ १७२
महार्हेण धूपेन च सुगन्धिना।
मन्त्रपूतेन चामरव्यजनैः शुभैः ॥ १७३
अनेकैश्च भोजनैश्च चिकित्सकैः।
सुखोष्णस्य राशिभिः पर्व्वतोपमैः ॥ १७४
नानाप्रकारैश्च हृद्यैः पुण्यैश्च पानकैः।
दधिना चैव चौरेण च तथा फलैः ॥ १७५

मूलैर्नानाविधैः पुण्यैर्मांसैरुत्स्वावचैरपि।
सद्भी तोयैन सहितः परिचारेण शङ्करः ॥ १७६
तर्पितश्च तया देव्या पार्व्वतीसहितो हरः।
ततस्तोयैन पुण्येन आचान्तो भगवांस्तदा ॥ १७७
तया प्रोक्तस्तपस्विन्या नमोऽस्तु भगवन्निति।
देहि च तत्र ते पुत्र गम्यतां यत्र रोचते ॥ १७८
वाढ़मित्येव सुप्रीतस्त्वतिथिस्तामुवाच ह।
देवि धर्म्मस्त्वया प्रोक्तो वयमर्चाश्च तापसाः ॥ १७९
नमन्तपणकास्तुष्टास्त्वञ्च सौभाग्यमाप्नुहि।
अयं वृद्धश्च ते भर्त्ता क्षमावांस्तरुणः पुनः ॥ १८०
अजरश्चामरैस्तुल्यो दिव्यदेहो भवत्विति।
एतावद्वचनं तस्यामुक्त्वा गेहाद्विनिर्गतः ॥ १८१
सम्पूजितो वशिष्ठेन चचार वनमञ्जसा।
भ्रमरैरिव नारीभिरुन्मत्ताभिर्निषेवितः ॥ १८२
ईर्ष्याभिभूतैश्च पुनः समन्तादपि ताड़ितः।
न विव्यथे स भूतात्मा प्रहारैर्जर्ज्जरीकृतः ॥ १८३
हसन् क्रीड़न् ययौ हृष्टस्तापसीभिरहर्निशम्।
यदा यदा स्मितं चक्रे प्रसन्नवदनस्तु सः ॥ १८४
तदा तदा महाक्रोधं चक्रुः क्रोधवशं गताः।
ततो द्वादशभिर्वर्षैर्गतैर्देवो महेश्वरः ॥ १८५
न कश्चित् परुषं ब्रूते कस्यचिद्वा प्रतिक्रियाम्।
करोति ताड्यमानस्तु तदा सर्व्वायुधक्षयै ॥ १८६
जाते सति तदा शप्तो भृगुमुख्यैस्तपस्विभिः।
मिथ्यातापस लिङ्गं ते पततामत्र भूतले ॥ १८७
अस्मिंश्चैव तु नो राजा नास्ति कश्चिन्महावने।
यस्ते छिनत्ति लिङ्गं वै परदाररतस्य तु ॥ १८८
परदाररतस्यापि निर्लज्जस्य दुरात्मनः।
शिश्नस्योत्कर्त्तनं कार्य्यं नान्यो दण्डः कदाचन ॥१८९
छित्त्वा सवृषणं लिङ्गं गुरुदाररतः स्वयम्।
गृहीत्वाञ्जलिना मर्त्त्यं स गच्छेन्नैरृतीं दिशम् ॥१९०
अयं पुनर्निर्व्विवेको दुराचारोऽथ दुर्म्मतिः।
स्वयं दण्ड्यस्ततोऽस्माभिः देवदारहरो यतः ॥ १९१
आततायी भवेद्वध्यो द्विजो वाप्यथवा मुनिः।
निघ्नन्तु शस्त्रवाणैस्तु नास्ति तत्र विचारणा ॥ १९२
मुनीनां तत्र शापेन पपात गहने वने।
बहुयोजनविस्तीर्णं लिङ्गं परमशोभनम् ॥ १९३

तत्राटव्यां सतीदेहे विजयं नाम नामतः।
तस्मिन् निमग्ने भूम्यान्तु दिव्यतेजसि भास्वरे ॥ १९४
तमोभूतं जगच्चासीन्मुनीनां हृदयानि च।
ततस्त्वरुन्धती तत्र वशिष्ठमिदमब्रवीत् ॥ १९५
स्वामिन् शङ्के महादेवो नग्नक्षपणकस्तु सः।
यः प्रहारशतैस्तैस्तैस्ताड़ितोऽपि न विव्यथे ॥ १९६
न च क्रोधन्तु कृतवान् प्रतिघातञ्च वा क्वचित्।
अयं महेश्वरो देवो निश्चयं चन्द्रशेखरः ॥ १९७
इमां मे भगिनीं मन्ये शवरीरूपधारिणीम्।
इमास्ता मातरः सत्यमेते प्रमथपुङ्गवाः ॥ १९८
गृहस्थाश्रममाश्रित्य यदावाभ्यां समर्ज्जितम्।
पुण्यं तेनास्तु भगवानक्षताङ्गस्तु तादृशः ॥ १९९
अन्धकारमिदं सर्व्वं त्वत्प्रभाभिर्विनश्यतु।
तच्छ्रुत्वा ध्यानयोगेन वशिष्ठोऽपि प्रजापतिः ॥ २००
दृष्ट्वा महेश्वरं प्राह सुभगे शङ्करं प्रति।
यद्दृयदिच्छसि धर्म्मज्ञे तत् तदस्तु वचस्तव ॥ २०१
ततो वाक्यान्मुनीन्द्रस्य देवो बालेन्दुशेखरः।
तादृशस्तच्च लिङ्गन्तु कानने विचचार ह ॥ २०२
प्रनष्टं तत् तमो घोरं देवदारुवनादपि।
शान्ते क्रोधे मुनीन्द्रैस्तु विज्ञाते वृषभध्वजे ॥ २०३
संस्तुतो विविधैः स्तोत्रैर्वाग्बभूवाशरीरिणी।
भो भो मुनीन्द्रा रुद्रस्य युष्माभिः पातितञ्च यत् २०४
लिङ्गं तदर्च्चयतामस्य सर्व्वसिद्धिप्रदं प्रभोः।
मन्त्रैर्वेदादिभिः पुण्यैर्मनोवाक्कायसंयुतम् ॥ २०५
शङ्करप्रतिमायास्तु लिङ्गपूजा गरीयसी।
तस्यास्तद्वचनं श्रुत्वा मुनयो मानवर्ज्जिताः ॥ २०६
चक्रुरष्टादशाङ्गान्तु पूजां लिङ्गाय शम्भवे।
एवं लिङ्गं निपात्यास्य ऋषयः पूजयन्ति च ॥ २०७
न जानन्ति यतो ब्रह्म चिन्मात्रं स्वे हृदि स्थितम्।
अङ्गलिङ्गञ्च लिङ्गाङ्गं परमात्मानमव्ययम् ॥ २०८
लिङ्गाच्छतगुणं पुण्यं हृदयस्थसमर्च्चनात्।
अग्निस्थन्तु द्विजातीनां हृदयस्थन्तु योगिनाम् ॥ २०९
पाषाणेन तु मूर्खाणां ज्ञानिनां सर्व्वगः शिवः।
पाषाणे चार्च्चनात् स्वर्गं प्राप्नोति राज्यमेव हि ॥ २१०
स्वदेहस्थात् सदा राज्यं स्वर्गं मोक्षं क्रमेण तु।
सर्व्वत्र दर्शनान्मोक्षं शिवसायुज्यमाप्नुयात् ॥ २११

हृदये ध्यायमानश्चेदेकाहाद्ध विपद्यते।
भुक्त्वासौ दुर्लभाँल्लोकान् मर्त्त्यो मोक्षं व्रजेत् तु सः २१२
ततः क्रीड़ां महादेवः कृत्वा द्वादशवार्षिकम्।
सकामानां मुनीनान्तु चापल्यं स्त्रीजनस्य च ॥ २१३
पतिव्रतानां धैर्य्यन्तु गृहस्थाश्रमिणाञ्च सः।
हास्यं नक्तव्रतानान्तु दर्शयित्वा महीतले ॥ २१४
सदारः सगणः पश्चात् तत्रैवान्तर्दधे हरः।
सकामतायां को दोषो यतः काममयं जगत् ॥ २१५
चापल्यस्य तु दोषोऽस्ति न तत् स्यात् परमात्मनः।
तत्स्थाः शब्दादयो भोगास्तन्मयास्तत्त्वया अपि ॥ २१६
पतिव्रतासु किं चित्रं तृप्तिमात्रप्रयोजनाः।
पुरुषेण भवेत् स्त्रीणां यस्मादल्पाशिनामपि ॥ २१७
नक्ताशिनः पर्य्यटन्ते भोजनप्राप्तये सदा।
गृहस्थस्तु कथं भुङ्क्ते भिक्षूणां सन्निधावपि ॥ २१८
अदत्त्वा संविभागन्तु भयसमर्थवतां यतः।
अज्ञानां स्तब्धलिङ्गानां निर्लज्जानां विचेतसाम् २१९
कुत्सितं तनयं पूर्णैर्दुष्टैर्दादशभिर्मलैः।
रोगैर्नानाविधैरन्यैर्व्याधिं दर्शयतामपि ॥ २२०
कामक्रोधादिभिर्दोषैस्तथा शीतातपैः सदा।
पतितानामथाज्ञानां शोच्यानामुपहन्यते ॥ २२१
न तु शङ्करवीर्य्यस्य व्रताचाररतस्य च।
ऋते वशिष्ठात् को भिक्षां दातुं शक्नोति शूलिने ॥ २२२
मज्जाशनाय चण्डाय परिवारयुताय च।
अब्दानां द्वादशानान्तु श्रद्धा-भक्तिसमन्वितः ॥ २२३
अरुन्धतीं वर्ज्जयित्वा महासाध्वीं पतिव्रताम्।
का रुद्रमदनस्पर्शं कामेन न खलीकृता ॥ २२४
यस्या विवाहे गुरवो नाम गृह्णन्ति संसदि।
कुमारि पश्य पश्येमां वशिष्ठमहिषीमपि ॥ २२५
पतिव्रतामाहात्म्यात् त्वं कुरु मातर्यदिच्छसि।
यदि पश्यसि साध्वी स्यादसाध्व्यदर्शनाद्भवेत् ॥ २२६
नक्षत्राणि न दृश्यन्ते दिवा सूर्य्योदये सति।
मुग्धत्वान्नैव जानाति निशि कन्यां पतिव्रताम् ॥ २२७
यदा तदा तु संख्यातुं नोदिता वक्ति संयता।
भगवान् बालभावे तु गते ज्ञात्वापतिव्रताम् ॥ २२८
पश्याम्यरुन्धतीं देवीं मानं तस्याः करोमि वा।
यदि मे संयतो भर्त्ता भवेत् पोषयिता भृशम् ॥ २२९

...वं तर्पयेत् पत्नी छप्ता सा तत् किल प्रिया।
...दर्शाति नियता तस्मात् संजायते प्रजा ॥ २३०
...नतु नमस्तस्यै भगवत्यै करोम्यहम्।
...किं बहुनोक्तेन संक्षिप्तमिदमुच्यते ॥ २३१
...महेश्वराद्देवात् कृष्णाद्वा देवकीसुतात्।
...बहूनां नारीणां को भवेद्वल्लभः पुमान् ॥ २३२
इति कथितमशेषं देवदेवस्य शम्भो-
...नविजितबुद्धेः पार्व्वतीवल्लभस्य।
...सुरमुनीनां सद्गुरोर्यच्च वृत्तं
पुनरपि कथयिष्ये तच्छृणुध्वं द्विजेन्द्राः ॥ २३३
इति श्रीशैवे महापुराणे धर्म्मसंहितायां
दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः।

सूत उवाच।

...त्रैलोक्यराज्यन्तु भोक्तुकामः सुखान्यपि।
...रक्षांसि जित्वा तु लब्ध्वा देवासुरोरगान् ॥ १
...श्चाद्याद्यप्सरसः प्राप्य कामेन मोहितः।
...चकार लोभेन गौतमस्य मुनेस्तदा ॥ २
...र्णाश्रमेषु वृद्धस्य मुनिर्दारांस्तु वज्रभृत्।
...शां पर्णशालायां भुक्त्वा चैकाकिनीं स्थिताम् ॥ ३
...तु त्यक्तं न शक्नोति शक्रो मूलफलान्यपि।
...हीत्वा मुनिर्विश्व समागतोऽथ गौतमः ॥ ४
...मानस्तया सार्द्धं मघवा तत्र संस्थितः।
...यमथ चात्मानं सा तत्र ददृशे पतिम् ॥ ५
...र्तादिति सञ्चिन्त्य शङ्किता गतचेतना।
...त्वा विस्मिता भीता शिलाखण्डेव निश्चला ॥ ६
...तः शङ्कितः क्रुद्धो मुनिश्रेष्ठो बभूव सः।
...स्तु लज्जितो भीतोऽगच्छत् संस्पर्शलोभितः ॥ ७
...दृष्ट्वाऽशिवं रूपं कालस्येव युगक्षये।
...सङ्कुचितां तस्य शापाद्भीतः स्वकां तनुम् ॥ ८
...ज्ञातस्तु मुनिना कोपाच्छप्तः शचीपतिः।
...च्छलेन मे पत्नीं भुक्तवानसि यद्रहः ॥ ९
...तां वृषणौ तस्मात् काममोहितचेतसः।
...दण्डप्रहारेण शर्णिताङ्गस्ततोऽभवत् ॥ १०
ततो वृषणनाशेन निर्व्वीर्य्यस्तु पुरन्दरः।
सवीर्य्यस्तु कृतो देवैः कृत्वा मेषस्य पीवरौ ॥ ११
वृषणौ योजितौ तस्य तन्मेषवृषणोऽभवत्।
सारमेयोपमशिराः कृशो वृद्धश्रवास्ततः ॥ १२
परदारोपभोगी तु सहस्रभगवानभूत्।
लज्जायां राक्षसैर्बद्धो वर्षाणां कोटयस्त्रयः ॥ १३
ऐन्द्रं स्थानं तथेन्द्राश्च ततः प्रभृति चास्थिताः।
सा च रूपवती दग्धा भर्त्रा क्रुद्धेन तत्क्षणात् ॥ १४
तत्रैव संस्थिता देवी शिलारूपा विचेतना।
स्पृष्टा नारायणेनापि भूयो लेभे स्वकं वपुः ॥ १५
कदाचिद्रामरूपेण पौलस्त्यकुलवह्निना।
इन्द्रो विष्णोः प्रसादेन सुन्दराङ्गोऽभवत् ततः ॥ १६
नेत्रैरिव महादेवस्त्रिभिः सर्व्वजगत्त्रयी।
तथापि काले कस्मिंस्तु राज्ञः पारिक्षितस्य तु ॥ १७
भार्य्यां वपुष्टमां दृष्ट्वा रूपयौवनशालिनीम्।
तत्स्पर्शलोभान्मानुष्यं स चकार वपुः क्षणात् ॥ १८
यदा न लब्धवान् स्प्रष्टुं तदा तुरगमाविशत्।
अश्वमेधे महाराज्ञस्तदा मृतकलेवरम् ॥ १९
ततो वृषस्य महिषीं यथाकामं समार्च्चयत्।
आर्ज्जुनेयः स्नुषां मोहान्नाशयन् यज्ञमुत्तमम् ॥ २०
संसारान्मोक्षकामस्तु कामारिरपि संयतः।
हाव-भाव-कटाक्षैश्च विलास-रति-विभ्रमैः ॥ २१
स्त्रीभिः क्षोभितुमारब्धस्तैस्तैस्त्रासैस्तु दैवतैः।
रत्नैर्माल्यैर्विभूत्या च निधिभिः पर्व्वतोपमैः ॥ २२
नैवेद्यैः सर्व्वतोभोज्यैस्तथापि च न शक्यते।
सनाथैर्निर्व्विकल्पात् तु चालितुं पर्व्वतोपमः ॥ २३
ततो लेभे महापानं सहजं भूमिमव्ययाम्।
तस्मिन् जितवरे प्रोक्ते समाधौ मन्मथः पुरा ॥ २४
आसीदेकमहारावं तत्प्रभावादिदं जगत्।
आत्मसात् सकलं कृत्वा जयत्येको जगत्त्रये ॥ २५
भावयेत् सर्व्वधर्म्मांश्च चिन्मात्रान् गगनोपमान्।
यत्र विश्वमिदं सर्व्वमसद्रूपमहेतुकम् ॥ २६
इति कथितमशेषं लज्जनीयं नृलोके
वरशिखरिशतानां पक्षविच्छेदकर्त्तुः।
सकलविजितशत्रोर्वज्रपाणेस्तु वृत्तं
सकलविबुधभर्त्तुः शूलपाणेस्तथैव ॥ २७

अनेनैव तथा वृत्तं सप्तर्षीणां गृहेष्वपि ।
शिवाद्यास्तु स्त्रियो दृष्ट्वा धैर्यनाशादनं गतः ॥ २८
स्त्रीभिस्तु रचितः शापात् ततस्तु गहने वने ।
तासां रूपाणि कृत्वा तु कामितश्च शनैः शनैः ॥ २९
तद्रेतः काञ्चने कुम्भे क्षिप्ता गरुड़रूपया ।
श्वेताचलस्य शिखरे तत्रोत्पादितः सुतः ॥ ३०
षण्मुखः कार्त्तिकेयस्तु सोऽसौ षट्कृत्तिकासुतः ।
तथा रूपमरुन्धत्या न कृतञ्च समर्थया ॥ ३१
यतो वशिष्ठमहिषी तपोनिष्ठा पतिव्रता ।
सेनापतिस्तु देवानां क्रौञ्च-तारकदर्पहा ॥ ३२
कुमारो बहुलापुत्त्रः पार्व्वत्याः पुत्त्रतां गतः ।
स्वाहां भुक्त्वा तु नो प्रीतस्तथा कपटकृत्तिकाः ॥ ३३
ततोऽग्निर्ब्राह्मणो भूत्वा पुरीं माहिष्मतीं गतः ।
दाक्षिणात्याः स्त्रियो भोक्तुं रम्याः कर्णाटकाङ्गनाः ॥ ३४
ज्ञात्वा नीलेन बद्धोऽभूद्राज्ञा तु भृतकः कृतः ।
प्राकाराच्छादितः सोऽपि नगर्य्यां प्रज्वलन्निव ॥ ३५
अयञ्च भगवान् वायुर्जगदायुर्महाबलः ।
पञ्चधा संस्थितो देहे स्थावरेषु चरेषु च ॥ ३६
धत्ते जगत् समग्रन्तु दिव्यैर्भावैस्तु सप्तभिः ।
रूपाण्येकोनपञ्चाशत् कृत्वा दितिसुतोऽनिलः ॥ ३७
राज्यन्त्वमरनाथस्य चक्रे निष्कण्टकञ्च सः ।
नित्यञ्च योगिभिर्ध्येयः परमात्मा सनातनः ॥ ३८
जगच्छ्रेष्ठोऽपि भूत्वादौ ततः कामेन निर्ज्जितः ।
शतं दृष्ट्वा तु कन्यानां कुशनाभमहीपतेः ॥ ३९
रूप-यौवन-लावण्य-कुल-सौभाग्यसंयुतम् ।
संस्पर्शार्थी ततस्तासामङ्गानां सङ्गमेन वै ॥ ४०
मुग्धानान्तु सलज्जानां सभयानां रहोगतः ।
नानाविधानुपायांश्च स्वयम्भूः कृतवांस्ततः ॥ ४१
तैस्तैरुपायैस्तु यदा वायुर्नो लब्धवान् रहः ।
तदा सप्रणयं वाक्यमुक्तवान् स्त्रीशतं शनैः ॥ ४२
हे स्त्रीशतं वायुरहं देवस्त्रैलोक्यपूजितः ।
परमात्मा जगज्ज्येष्ठो जरा-मृत्युविवर्ज्जितः ॥ ४३
भोक्ता सकलवस्तूनां स्रष्टा सर्व्वेषु जन्तुषु ।
सर्व्वेषां प्राणिनां जीवश्चामृतस्य च सम्भवः ॥ ४४
याचे त्वां प्रार्थये त्वाञ्च स्वशरीरं प्रयच्छ भोः ।
सकामाय प्रपन्नाय देव्यो मेऽर्पयताचिरात् ॥ ४५
नारीशतन्तु तच्छ्रुत्वा तमुवाच शनैर्हसत् ।
यादृशस्तादृशो वापि सोऽसि योऽसि वयञ्च ताः ॥ ४६
येन तेन विसृष्टोऽसि यस्मै तस्मै यतस्ततः ।
यस्य तस्य निमित्तन्तु यस्मिंस्तस्मिंश्च कर्म्मणि ॥ ४७
अलं सर्व्वत्र ते ह्यद्य यस्माद्दश्या वयं पितुः ।
स्वयमात्मप्रदानन्तु कन्यानां नेह विद्यते ॥ ४८
पद्मयोनेः सुतो यस्मात् कुशो मम पितामहः ।
कुशनाभस्तु तत्पुत्त्रः क्षत्त्रियो जनिता पुनः ॥ ४९
तच्छ्रुत्वा स्त्रीशतं वायुः कुब्जं चक्रे विरूपिणम् ।
नानारोगशतोपेतं देवो मात्सर्य्यसंयुतः ॥ ५०
दत्तन्तु ब्रह्मपुत्त्राय कदाचित् स्त्रीशतन्तु तत् ।
कुशेन मुनिना स्पृष्टं पुनः स्वास्थ्यञ्च लब्धवान् ॥ ५१
कुशनाभकृता तत्र पूर्व्वदेशे महापुरी ।
तेनैव नाम्ना दिव्या तु कन्याकुब्जेति विश्रुता ॥ ५२
चण्डरश्मिस्तु मार्त्तण्डः कल्पान्ताग्निशिखोपमैः ।
रोमभिर्भूषितो भीमैर्वह्निकुण्डाकृतीक्षणः ॥ ५३
विद्युत्कुटिलसंश्लश्मश्रुर्नित्यं व्योमचरो रविः ।
योगिनां ध्यानगम्यश्च ब्रह्माद्यैः पूजितः सदा ॥ ५४
त्वष्टुर्दुहितरं संज्ञां प्राप्य भार्य्यां सुरूपिणीम् ।
संस्पर्शार्थी प्रार्थयानो नानाचाटुशतैश्च ताम् ॥ ५५
सा तं दृष्ट्वा तथारूपं संस्प्रष्टुं न शशाक च ।
ततः सूर्य्योऽब्रवीद्दीनां यद्ब्रवीषि करोमि तत् ॥ ५६
तया हसन्त्या प्रोक्तोऽसौ घोरं तेजो विशातय ।
आरोहस्व भ्रमिं तीक्ष्णां मत्पित्रा तक्षितस्ततः ॥ ५७
शोधितो लघुतां प्राप्तः प्रियो मम भविष्यसि ।
तथेति च प्रतिज्ञाय सूर्य्यो भ्रमिमथारुहत् ॥ ५८
ततस्तु शोधितस्तेन त्वष्ट्रा देवासुरैः सह ।
ततः शतगुणीभूतस्तेजसा दारुणो रविः ॥ ५९
मार्त्तण्डचूर्णमादाय सहस्रारं सुदर्शनम् ।
निर्म्मितं विबुधैः सर्व्वैर्विष्णोरायुधमुत्तमम् ॥ ६०
हरस्य विबुधानाञ्च शस्त्राणि च तथाभवन् ।
भूयो घोरतरं दृष्ट्वा बड़वारूपधारिणी ॥ ६१
संज्ञा पलायनपरा पतिं त्यक्त्वा सुदारुणम् ।
सोऽप्यश्वरूपमाश्रित्य बलात् तां स्प्रष्टुमुद्यतः ॥ ६२
गोप्य सा तु प्रजाद्वारं कामार्त्ता सम्मुखीभवत् ।
भर्त्तुः स्कन्नं प्रकृष्टञ्च रेतस्तस्या मुखेऽपतत् ॥ ६३

नासापुटाभ्यां तत् सर्व्वं गृहीतञ्च तया तदा ।
रेतस्तत्र ततस्तस्याः पुत्रो जातो भिषग्वरः ॥ ६४
पुनर्विमन्त्रिता भर्त्त्रा संज्ञा संसर्गकर्म्मणि ।
ततः कपटतश्छायां संज्ञा कृत्वा तु योगिनी ॥ ६५
सूर्य्यं विमोहयित्वा तु साभवत् कामचारिणी ।
संज्ञामेव च तां प्राप्य रराम भगवान् रविः ॥ ६६
तस्यां रतिफलं लेभे पुत्रं भिन्नाञ्जनप्रभम् ।
कन्यां नीलाब्जपूर्णाञ्च यमुनां पुण्यवाहिनीम् ॥ ६७
तथैव कन्यकयाहूतः कुन्त्या ताञ्चाप्यधर्षयत् ।
सकुण्डलं सकवचं पुत्रं तस्यै ददौ तदा ॥ ६८
समुद्रे मथ्यमानेऽपि क्षीरोदादुत्थितस्तु यः ।
शशी पुनः समुद्भूतस्त्वनुसूयात्मजोऽपि वा ॥ ६९
अत्रेः पुत्रो महासौम्यो जगदाप्यायनक्षमः ।
नराणामोषधीनाञ्च नारीणां ब्राह्मणेषु च ॥ ७०
राज्यं प्राप्य महासत्त्वो राजसूयं चकार सः ।
सप्तविंशतिदक्षस्य दारान् प्राप्य सुमोद च ॥ ७१
ततः कामवशो भूत्वा रोहिण्यासक्तमानसः ।
दक्षशापेन दुर्ब्बुद्धिः सम्प्राप्तो राजयक्ष्मणा ॥ ७२
कृष्णपक्षे क्षयी नित्यं तथापि सुरतप्रियः ।
तारां बृहस्पतेर्भार्य्यां हृत्वा लोभान्न चात्यपत् ॥ ७३
कृत्वा युद्धं तदर्थन्तु पश्चात् तां त्यक्तवान् शशी ।
स्ववीर्य्यसम्भवं पुत्रं बुधञ्च कुपितः पुनः ॥ ७४
पूर्व्वन्तु मित्रावरुणौ घोरे तपसि संस्थितौ ।
नारायणोरुसम्भूतामिन्द्रियक्षानुवर्त्तिनीम् ॥ ७५
उर्व्वशीं तरुणीं दृष्ट्वा प्रस्कन्नौ तौ बभूवतुः ।
मित्रः कुम्भे जहौ रेतो वरुणोऽपि तथा जले ॥ ७६
ततः कुम्भात् समुत्पन्नो वशिष्ठो मित्रनन्दनः ।
अगस्त्यो वरुणाज्जातो बड़वाग्निसमद्युतिः ॥ ७७
येन तत् सागरं तोयं सर्व्वं पीतन्तु लीलया ॥ ७८

इति विपुलमतीनां तेजसा वामवृत्ति-
र्मदनशरहतानामुक्तमेतन्मयात्र ।
दहन-पवन-सूर्य्यानन्ततारावधिपानां
वरुणपरममित्राचार्य्ययोश्चापि सम्यक् ॥ ७९
इति श्रीशैवे महापुराणे धर्म्मसंहितायामेकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

सूत उवाच ।
दर्पो दाक्षिण्य-शौर्य्याभ्यां युक्तः स्मृत्या च नित्यशः ।
तुष्ट्या विरक्त्या प्रीत्या च शान्त्या धृत्या त्रिविद्यया ॥ १
स्वाध्याय-स्नान-दानैश्च ब्रह्मचर्य्याञ्जिवैः पुनः ।
विद्युत्पर्णां स्त्रियं दृष्ट्वा ब्रह्मलोके च नारदः ॥ २
मोहितः पद्मयोनिस्तामनासक्तामनिच्छतीम् ।
कपिलायाः स्वरूपं गोः कृत्वा च स तया तदा ॥ ३
वञ्चितः सोऽपि तच्छापाज्जरदश्ववशानुगः ।
तथापि स्वां दुहितरं समाश्रित्यासृजत् प्रजाः ॥ ४
क्वचित् तु मानसी सृष्टिर्वाचिकी च शरीरजा ।
गात्रैकमात्रसंस्पर्श-सम्भवा च क्वचिद्भवेत् ॥ ५
मारीचः कश्यपश्चापि कामस्य वशमागतः ।
लोकस्य पूरणार्थाय दक्षात् प्राप्य त्रयोदश ॥ ६
मोदमानस्ततः पुत्रान् देवादानसृजत्प्रभुः ।
यैरिदं पूरितं सर्व्वं जगत् सदसदात्मकम् ॥ ७
अगस्त्योऽपि महायोगी कल्पान्तदहनोपमः ।
पीत्वा समुद्रं विन्ध्यञ्च दर्पणोदरसन्निभम् ॥ ८
कृत्वा दैत्यं भक्षयित्वा वातापिं घोररूपिणम् ।
लोपामुद्रास्त्रिया सोऽपि ततो भृतकवत् कृतः ॥ ९
शमीको ब्रह्मचारी च तपस्वी नभसस्तलात् ।
शुश्राव मधुरां वाणीं मानसोन्मादिनीं स्फुटाम् ॥ १०
प्रियोऽसि मे प्रियान् प्राणान् देहि गृह्णीष्व मामिति ।
नारीयमिति मन्वानो रेतः कक्षे जहौ ततः ॥ ११
तस्यां वृषभवक्त्रस्तु शृङ्गी परमरोषणः ।
जातः कुरुपतिर्येन परीक्षिद्भस्मसात् कृतः ॥ १२
तथा भृगुकुले व्योम्नि पूर्णेन्दुस्तापसाग्रणीः ।
रुरुः प्रमद्वरां कन्यां प्राप्य सर्पविषाहताम् ॥ १३
रतिभङ्गे समुत्पन्ने गत्वा घोरे वने तनुम् ।
त्यक्तुकामः कामदोषात् ततो देवैश्च रक्षितः ॥ १४
तैरेवोक्तश्चायुषोऽर्द्धं ददास्यस्यै यदि प्रभो ।
तेन जीवति बालेयं मृता नान्येन हेतुना ॥ १५
तच्छ्रुत्वा चाब्रवीद्धृष्टो दत्तमर्द्धं मयेति च ।
ततः समुत्थितां ताञ्च प्राप्य विप्रो सुमोद सः ॥ १६
नासाप्रान्ताग्रदृष्टिस्तु च्यवनो ध्यानयोगवान् ।

प्रावृड्जलौघनिर्भिन्न-मृत्तिकाच्छन्नविग्रहः ॥ १७
सुकन्यया कुमार्य्या च मुग्धयोत्पाटितेक्षणः ।
शर्य्यातिपुत्र्या क्रीडन्त्या वैदूर्य्यमणिलुब्धया ॥ १८
दृष्टो वल्मीकमध्यात् तु निष्क्रम्याग्रे स्थितस्तु ताम् ।
राज्ञः प्राप्तस्ततोऽश्विभ्यां प्रसादाज्जातलोचनः ॥१९
तारुण्यं प्राप्य दुष्प्रापं तया सार्द्धं मुमोद च ।
कूर्म्मग्रीवो वैनतेयो योगी पक्षीश्वरो मुनिः ॥ २०
ज्ञानदृप्तः प्रशान्तस्तु स्नाय्वस्थिमकलाकृतिः ।
क्षीरोदार्णवमध्यस्थः क्षपितः क्षीरजैर्जलैः ॥ २१
पक्षौ नाडीव्रणारूढ-मूलशैवलविद्रुतः ।
स कदाचित् समुद्रान्ते दृष्ट्वा यादोगणान् बहून् ॥२२
मत्स्यादीन् सह मत्सीभिः स्वाभिः स्त्रीभिर्विमोदतः ।
प्रत्यग्रनारीसंस्पर्शमिच्छंस्तोयात् समुत्थितः ॥ २३
प्रजापतिं सुधन्वानमगच्छद्दयाचितुं स्त्रियः ।
स चापि तमृषिं दृष्ट्वा पूजयित्वा च शास्त्रतः ॥ २४
ततः सुखोपविष्टं तमपृच्छद्विनयान्वितः ।
भगवन् श्रोतुमिच्छामि तवागमनकारणम् ॥ २५
प्रतिवाक्यं मुनिः प्राह सुधन्वानं प्रहृष्टवत् ।
काश्यपो वैनतेयोऽहं कन्याभिक्षार्थमागतः ॥ २६
यदि ते विद्यते काचित् सुता तान्तु प्रयच्छ मे ।
तद्वाक्यस्यावसाने तु पक्षिणोऽङ्गं विलोक्य सः ॥ २७
ततः शापभयाद्भीतो मुनिं प्रोवाच बुद्धिमान् ।
सन्ति कन्या मम विभो पञ्चाशदमरप्रभाः ॥ २८
तासां चेतांसि नो मह्यं स्वाधीनानि तपोधन ।
ताभिर्यस्तु वृतो भर्त्ता तस्मै देया मया च ताः ॥२९
इति मत्वा महाबुद्धे मम क्षन्तुमतोऽर्हसि ।
मम कन्यापुरं विप्र मन्नियोगात् प्रविश्यताम् ॥ ३०
तत्र या काचिदेव त्वां वरयिष्यति मामकी ।
कन्या तां ते प्रदास्यामि सत्यमेतद्ब्रवीमि ते ॥ ३१
ततो विसर्जितस्तेन मुनिः कन्यापुरं ययौ
आत्मयोगान्महायोगी रूपं कृत्वा मनोहरम् ॥ ३२
रूप-यौवन-लावण्य-सौभाग्यानामिवास्पदम् ।
ततो मुनिवरं दृष्ट्वा कुमार्य्यस्ताः सुविस्मिताः ॥ ३३
आत्मानं प्रददुस्तस्मै मन्मथोपमतेजसे ।
ततः सुधन्वना तस्मै दत्ताः सर्व्वास्तु कन्यकाः ॥ ३४
तस्मिन् दिव्ये विवाहे तु शुक्राद्याः समहाग्रहाः ।
स्वक्षेत्रोच्चत्रिकोणस्थाः केन्द्रोपचयसत्तमाः ॥ ३५
वैनतेयभयात् सर्व्वे शुभ-सौभाग्य-पुत्रदाः ।
आसन् स चापि स्ताः सर्व्वा कुमारीः प्राप्यदुर्लभाः॥३६
प्राप्य तां राज्यलक्ष्मीन्तु चिक्रीड च मुमोद च ।
तासां रतिफलं लब्ध्वा पुत्रान् प्राप्य च तत्समान् ॥३७
कृतकृत्यस्ततः स्वर्गं जगाम विबुधैः सह ।
शाण्डिलीं तरुणीं कन्यामपश्यद्गरुडो वने ॥ ३८
हिमाचलगुहासंस्थां सुरूपां चारुहासिनीम् ।
वैश्वानरसुतां भक्त्या नेतुकामस्त्रिविष्टपे ॥ ३९
विज्ञातस्तु तया सद्यो दग्धपक्षो बभूव ह ।
अथ ध्यातस्तया भूयः कृपया दयया तथा ॥ ४०
अनुरोधात् तथाविष्टो हेमपक्षः क्षणात् कृतः ।
दीर्घश्मश्रुर्जटालश्च क्षुत्क्षामाङ्गो विभाण्डकः ॥ ४१
मुनिस्तीक्ष्णनखो नद्यां कदाचित् स्नातुमुद्यतः ।
दूरादभिनवां नारीं दृष्ट्वा प्रस्खलितोऽभवत् ॥ ४२
तद्रेतो जलसम्पृक्तं मृग्या पीतं विधेर्वशात् ।
ततस्तस्यान्तु पुत्रोऽपि एकशृङ्गो मृगोऽभवत् ॥ ४३
विभाण्डकेन मुनिना रक्षितो वर्द्धितस्तथा ।
मुनिवत् संस्कृतः पश्चाद्वेदमध्यापितस्ततः ॥ ४४
ऋष्यशृङ्गस्ततो बालः शान्तो दान्तो जितेन्द्रियः ।
शुद्धः स ब्रह्मचारी च नित्यमेव न संशयः ॥ ४५
शाक-पिण्याकभोजी च पितुर्भीतस्तु संयतः ।
स्वाध्यायी नित्यजापी च स्त्रीविलासेष्वकोविदः ॥४६
अथाङ्गराजसिंहेन लोमपादेन मायया ।
शमनार्थमनावृष्टेर्नीतः स्वविषयं प्रति ॥ ४७
नानाविधैर्व्याजशतैः पुंश्चलीभिः प्रलोभितः ।
विध्वस्तपुण्यो निःशङ्कः सम्मुखो भावसंयुतः ॥ ४८
मुनीनामिव वेश्यानां पूजको विधिवत् किल ।
अधीतवान् भरद्वाजः सपुत्रः सुस्वरं हठात् ॥ ४९
ततः परावसोर्भार्य्यां तरुणीं गहने वने ।
यवक्रीतेन रुदतीं स्त्रीभावमुपलम्भिताम् ॥ ५०
ज्ञात्वा रैभ्यः खलो मानी छित्त्वा क्रोधवशं गतः ।
हुत्वा वह्नेस्ततः कृत्यामकरोद्राक्षसान्विताम् ॥ ५१
यवक्रीतं ग्रसस्वेति प्रेषयास तां तदा ।
ततः सा ऋषिपत्न्याश्च रूपं कृत्वा मनोहरम् ॥ ५२
यवक्रीतमुवाचेदमेहि क्रीडस्व मे पुनः ।

दीक्षितश्चाग्निशालायामुपायैश्च विकृष्य तम् ॥ ५३
ते जघान कुपितः शूलहस्तश्च राक्षसः।
तो हृदः पिता तस्य सम्प्राप्तस्तमपश्यत ॥ ५४
तं पुत्त्रं ततः क्रोधाद्दर्शयन् मित्रमेव हि।
त्वेनु मित्रपुत्त्रघ्नं स्वपुत्त्रो मारयिष्यति ॥ ५५
एवमुक्त्वा स मुनिर्वह्निं प्रज्वाल्य कानने।
ददाह देहं पुत्त्रस्य स्वशरीरञ्च दुःखितः ॥ ५६
ततस्तु नृपतिं यज्ञे याजयित्वा परावसुः।
गृहारो ययौ रुष्टः स्वगृहन्तु निशासुखे ॥ ५७
तस्मिन्नन्तरे रैभ्यः सन्ध्यां मत्वा समागतः।
गुल्मलतामध्याद्घोररूपाद्गिरेस्तटात् ॥ ५८
ऽन्धकारे रैभ्यन्तु कृष्णसारस्य चर्म्मणा।
संवीताङ्गं ततो दृष्ट्वा काण्डैर्विव्याध दारुणैः ॥ ५९
मृगभ्रान्त्या च तं हत्वा रात्र्यां दग्ध्वा परावसुः।
प्रभाते यज्ञभूमिन्तु गत्वा भ्रात्रे न्यवेदयत् ॥ ६०
भ्रातस्तातो निहतो मया भ्रान्तेन कानने।
प्रायश्चित्तं करिष्यामि यदि मां प्रेषयिष्यसि ॥ ६१
रैभ्यस्य परावसुना भ्रात्रा चोक्तन्तु तत्र च।
अहं वनं गमिष्यामि त्वदर्थं त्वमितो यज ॥ ६२
तावदुक्त्वा वचनं गत्वा तप्त्वा महत् तपः।
ब्रह्महत्याकृतं पापं नाशयित्वा ततः पुनः ॥ ६३
कदाचिदागतो दृष्टो भ्रात्रा तेन महायशाः।
सम्प्राप्ते दक्षिणाकाले दृष्टमात्रस्तु धिक्कृतः ॥ ६४
रे रे दुर्ज्जन तातघ्न किं प्रविष्टोऽसि गच्छ भोः।
भ्रातुस्तद्वचनं श्रुत्वा स तु मोहवशं गतः ॥ ६५
शान्तो राजजनैर्घोरैर्गृहीतो जनसंसदि।
हन्यमानस्तु शुद्धात्मा न च क्रोधमुपेयिवान् ॥ ६६
बद्धाञ्जलिमुवाचेदमग्निमिन्द्रं यमं तथा।
यतो यदि मया तातो भवन्तस्तच्चनागसः ॥ ६७
मां दहध्वमधर्म्मिष्ठं कृतघ्नं पापपूरुषम्।
नो चेत् पीयूषधाराभिः प्लावयध्वञ्च तत्क्षणात् ॥ ६८
यदि दत्तं यदि हुतं गुरवस्तोषिता यदि।
तेन सत्येन ते सर्व्वे पुनर्जीवन्तु मामकाः ॥ ६९
ततो देवैः प्रसन्नैश्च पुष्पैरमृतबिन्दुभिः।
भरद्वाजो यवक्रीतो रैभ्यश्चोत्थापिताः पुनः ॥ ७०
ततस्ते तापसाः सर्व्वे शङ्किताश्चाभवंस्तदा।
गौतमो ब्रह्मचारी च योगध्यानपरायणः ॥ ७१
क्षीणसंसारदोषश्च वनवासी सुसंयतः।
ततः कदाचिदिन्द्रस्तु भयाच्छारद्वतीसुतम् ॥ ७२
प्रेषयामासाप्सरसं ततश्चालयितुं तपः।
दृष्ट्वा तान्तु मुनेश्चेतः प्रविष्टं कामजव्यथाम् ॥ ७३
वायुर्वस्त्राणि चोद्धूय मुनेरग्रे ववौ मृदु।
वसन्तः पुष्पसञ्छन्नान् द्रुमांश्चक्रे तदाश्रमे ॥ ७४
नारी वस्त्राणि चाहर्त्तुं मुनेरभिमुखं ययौ।
नग्नामप्सरसं प्रेक्ष्य ताञ्च दृष्ट्वा स तापसः ॥ ७५
रराम क्षुभितो रेतः स्कन्नं द्रोण्यां दधार च।
तस्माच्च कलशाज्जातो द्रोणः शस्त्रभृतां वरः ॥ ७६
कदाचिद्ब्राह्मणो वाक्यान्मार्त्तण्डो भगवान् पुनः।
जज्ञे देवेश्वरो राजा पृथिव्यां खेचरो वसुः ॥ ७७
चतुराश्रमरक्षार्थं चचार पृथिवीतले।
मृगयाधर्म्मशीलश्च सिंह-व्याघ्रांश्च तस्करान् ॥ ७८
मारयंश्चापि दुष्टांश्च राज्यस्य परिपन्थिनः।
श्येनहस्तः शरी धन्वी रथे व्योमचरे स्थितः ॥ ७९
वसन्ते कामसन्तप्तो दारेभ्यो दूरगो गृहात्।
पालाशपुटगर्भे तु रेतः स्कन्नमधारयत् ॥ ८०
पुटिकां प्रददौ चाथ श्येनाय प्रतिकामिने।
दारेभ्यो नेतुमाशातुमयोध्यां पुत्त्रकामुकः ॥ ८१
राजाज्ञया ततः श्येनो जगाम नृपतेर्गृहम्।
तां चञ्चुपुटमध्यस्थां पुटिकां धारयन् खगः ॥ ८२
अन्येन पक्षिणा दृष्टस्ततश्चामिषशङ्किना।
समाहूतस्ततो युद्धे पुटिकायाः मुने जले ॥ ८३
पतितं तच्च तद्रेतः पीतं गिरिकया तदा।
दिव्यनार्य्या महामत्स्या ब्रह्मशापाभिभूतया ॥ ८४
पश्चात्तस्य सा मत्सी तदा गर्भभरालसा।
गृहीता जलबन्धेन दाशराज्ञी सुपीवरा ॥ ८५
विदारितापतद्गर्भात्लेभे नृमिथुनं नृपः।
ततः करार्थं वसवे मत्स्योदरविनिर्गतम् ॥ ८६
कुमारं प्रददौ दाशो महारत्नं महद्विमत्।
ततः स्ववीर्य्यसम्भूतं राजोपरिचरो वसुः ॥ ८७
दाशात् प्राप्य च संस्कृत्य स्वीयराज्येऽभ्यषिञ्चयत्।
दाशराज्ञा ततः कन्या दुहिता वर्द्धिता गृहे ॥ ८८
पितृकन्या तु मार्त्तण्डी यमुना योगिनी नदी।

कलिन्दगिरिजा देवी दिव्यनीलाब्जसन्निभा ॥ ८९
बिभ्रती मानुषं रूपं शाक्तो यस्य मुनेः कृते ।
कृतनामा तु दाशेन सत्या सत्यवतीति च ॥ ९०
पराशरस्तु शाक्तेयस्तां दृष्ट्वाथ पुनः शमी ।
नीलोत्पलनिभां दृष्ट्वा यमुनां पुण्यवाहिनीम् ॥ ९१
चक्रे मनसि भावन्तु तरुणी स्याद्यदीदृशी ।
कामयाना समां क्रीड़ां करोमि सकृदेव हि ॥ ९२
इन्द्रस्तन्मतमाज्ञाय कालिन्दीमब्रवीद्वचः ।
मुनेस्तु यदभिप्रेतं तत् कुरुष्व महानदि ॥ ९३
तथेति सा प्रतिज्ञाय प्रविष्टा योगमायया ।
मत्सीगर्भस्ततो जातो भ्राता मत्स्येन संयुता ॥ ९४
मत्स्यदेशेऽभवन्मत्स्यो राजा राज्ञो वसोः कुले ।
यमुना दाशकन्या तु पितुर्वचनकारिणी ॥ ९५
तस्मिंस्तु यामुने तोये नावं वाहयते सदा ।
ततः कदाचिन्मुनिना सा दृष्टा प्रार्थिता सती ॥ ९६
दत्त्वा वराणान्तु शतं दुर्लभं यत् सुरैरपि ।
शरीरे दिव्यसौरभ्यं कन्यात्वं पुनरेव हि ॥ ९७
यथेच्छया तथा भुक्ता सृष्ट्वा नीहारमन्दिरम् ।
व्यासश्चोत्पादितः पुत्रो योगी तेन महात्मना ॥ ९८
तथा च भगवान् व्यासो देवानाञ्च हिताय च ।
क्षत्रियस्य मृतस्यापि भ्रातृदारेषु सङ्गतः ॥ ९९
त्रीन् पुत्रान् जनयामास धृतराष्ट्रमुखांस्ततः ।
शुकं पुत्त्रमरण्याञ्च निर्मथ्य चाग्निना सह ॥ १००
उत्पादयामास मुनिर्योगिनां प्रभुरव्ययः ।
शुकस्तु चतुरः पुत्रान् जनयामास योगिनः ॥ १०१
गौरवं कपिलं कृष्णं तथा नीलञ्च तापसम् ।
योगाचार्य्यां महात्मानस्त्वेका कन्या च भामिनी॥१०२
कपालमालानद्धाङ्गः पूर्व्वं वामशिरा मुनिः ।
नागलोकं जगामाशु खड्गं हर्त्तुं कृतोद्यमः ॥ १०३
सर्व्वविद्याधराणान्तु येन स्याद्राजसत्तमः ।
नागस्य भवनं शोध्य होम-जाप्य-समाधिभिः ॥ १०४
खादिरैः शङ्कुभिः सूत्रैः पञ्चरङ्गैः शरैस्तथा ।
तन्मन्त्रशक्त्या पाताले दह्यमाने तु पन्नगैः ॥ १०५
दीयमाने भयात् खड्गे वेश्यया वञ्चितोऽपि सः ।
अपराजितमन्त्रन्तु दर्शयित्वा मनोहरम् ॥ १०६
नग्नां तां तरुणीं दृष्ट्वा पीनश्रोणिपयोधराम् ।
किं खड्गेनेति सञ्चिन्त्य घृतपूर्णां स्रुचं जहौ ॥ १०७
पूर्णाहुतिमदत्त्वा तु व्युत्थितः क्षुभितेन्द्रियः ।
नागदासीं ततः प्राप्य चिक्रीड़ च जहास च ॥१०८
ततो रतान्ते निर्दग्धः शत्रुभिः पन्नगैः क्षणात् ।
तुष्टैर्विगतसन्त्रासैर्नार्य्या संरक्षितैरपि ॥ १०९

इति परममृषीणां मन्मथक्षोभितानां
चरितमिदमशेषं वर्णितं वो मयाद्य ।
प्रथमकथितकीर्त्तिर्यत्र दग्धो महात्मा
तदनु कथितशिष्टो वर्णितो वामदेवः ॥ ११०

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ।

सूत उवाच ।

क्षत्रियो गाधिपुत्त्रस्तु विश्वामित्रो महामनाः ।
वशिष्ठस्य मुनेर्लक्ष्मीं दृष्ट्वा सन्तप्तमानसः ॥ १
दौहित्रो ब्राह्मणत्वाय त्रैलोक्यक्षोभणाय च ।
संशुष्काङ्गस्तपस्वी च दृष्ट्वा देवैश्च वञ्चितः ॥ २
विजने मेनकां नारीं तथा स किल मोहितः ।
जड़ोन्मत्तस्वरूपोऽभूत् कामरागवशीकृतः ॥ ३
तथा शुम्भ-निशुम्भौ च दुर्ज्जयौ देव-दानवैः ।
अन्योऽन्येन हतौ मोहाद्दृष्ट्वा गोपेन्द्रकन्यकाम् ॥ ४
तत्पुत्रावसुरौ घोरौ तथा सुन्दोपसुन्दकौ ।
अवध्यौ सर्व्वभूतानां दृष्ट्वा नारीं तिलोत्तमाम् ॥ ५
ममेयं न तवैवैषा इत्युक्त्वा युद्धलालसौ ।
अन्योऽन्येन हतौ मोहात् कामरागवशानुगौ ॥ ६
इन्द्रलोकोपमं राज्यमैक्ष्वाकः प्राप्य दण्डकी ।
सूर्य्यप्रभाञ्च शुक्रस्य वशयित्वा सुतां प्रियाम् ॥ ७
सराष्ट्रः सपुरो दग्धो दण्डग्रः शुक्रेण दुर्ज्जयः ।
घोरेण पांशुवर्षेण दिनैः सप्तभिरेव च ॥ ८
अद्यापि दण्डकारण्यं निर्व्वृक्षतृणसानुमत् ॥ ९

इति कठिनमतीनां धार्म्मिकाणामृषीणां
चरितमिह पुराणे वर्णितं ते मयाद्य ।
सकलनृपतिमुख्यो यत्र गाधिः सपुत्र-
स्तदनु दितिजपुत्त्रौ कीर्त्तितौ कीर्त्तिमन्तौ ॥१०

रावणश्चाञ्जनश्यामो दशवक्त्रो भयानकः ।
विंशत्या च भुजैर्युक्तश्चतुष्पाच्च जगज्जयी ॥ ११
पुष्पोत्कटायाः पुत्रस्तु मुनेर्विंश्रवसः सुतः ।
इन्द्रं जित्वा च बद्ध्वा च क्षिप्तवान् दुर्गपञ्जरे ॥ १२
मेघनादस्य शक्त्या तु श्येनं शाकुनिको यथा ।
तथा त्रैलोक्यराज्यन्तु दिव्याश्च विबुधस्त्रियः ॥ १३
तारुण्य-गर्व्व-सौभाग्य-लावण्यैश्च समन्विताः ।
मयस्य तनयां प्राप्य भार्य्यां मन्दोदरीमपि ॥ १४
तथा च परनारीणां लम्पटः काममोहितः ।
मन्मथे तु गते नाशं प्रजापतिसुता रतिः ॥ १५
भूयो मयस्य गेहे तु जाता जगति सुन्दरी ।
हृता सा शम्बरेणाथ तया स किल वञ्चितः ॥ १६
नारीं दारुमयीं कृत्वा दिव्यालङ्कारभूषिताम् ।
आत्मनः सदृशीं योगान्निर्जीवां जीवयन्निव ॥ १७
तथा सा ब्रह्मवादिन्या रत्या सम्प्रेषिता सती ।
पाञ्चालिका ततो दैत्यं शम्बरं काममोहितम् ॥ १८
प्रक्रीड़यामास शनैर्निशासु दिवसेषु च ।
मायावतीं तादृशीञ्च ततो हर्त्तुं दशाननः ॥ १९
जगाम विवरं भूमेर्विचार्य्य सुमहाबलः ।
शम्बरस्य गृहं यत्र निर्म्मितं विश्वकर्म्मणा ॥ २०
पाताले दिव्यरत्नाढ्यं स्वर्गादष्टगुणं महत् ।
प्रविष्टमात्रस्तत्रासौ मयमायासमुद्भवैः ॥ २१
बद्धस्तु विविधैः पाशैस्तत्र मेषैश्च पीड़ितः ।
वज्रलेपप्रलिप्ते तु मार्गे मग्नस्तु दारुणे ॥ २२
चूर्णीकृते महामन्त्रैर्वरैर्लब्धैर्मयेन वै ।
सर्व्वं तत्र प्रहस्ताद्या निमग्ना वज्रकर्द्दमे ॥ २३
नानाशस्त्रैर्विभिन्नोऽसौ दिव्यैर्लौहमयैर्नरैः ।
दण्डिभिर्द्वारपालैश्च तथा गिरिमयैर्हतः ॥ २४
तच्छ्रुत्वा दुःखशोकार्त्ता ततो मन्दोदरी भयात् ।
पितरं श्रावयामास भर्त्तुर्दौःशील्यचापलम् ॥ २५
ततो मयेन तुष्टेन माया काचिद्विनिर्म्मिता ।
तया लेपैर्विनिर्म्मुक्तः ससैन्यो रावणस्तदा ॥ २६
समाश्वस्तोऽथ सव्रीड़स्तृषितस्तु बुभुक्षितः ।
उक्तास्तया सावहासं समाभाष्याथ मन्दधीः ॥ २७
रावणेन्द्रमुखं किं ते दशपन्नगसन्निभम् ।
बलारम्भरणास्ते वै पशुकल्प पशोरिव ॥ २८
किमिदं रूप-सौन्दर्य्यं तव शृत्वं पिशाचवत् ।
कथं देवैरलभ्यां मामपहर्त्तुं समागतः ॥ २९
यस्यास्ति नारी स्वगृहे स किमर्थं निशाचर ।
लुब्धः स्यात् परनारीषु पापबुद्धिरचेतनः ॥ ३०
क्वापि वा परनारीषु को विशेषस्तु विद्यते ।
परनारीष्वनायुष्यं गमने पापचेतसाम् ॥ ३१
शरीरावयवानान्तु येषां सञ्जायते स्पृहा ।
छिन्नास्त एव सन्त्रासं कुर्व्वन्ति रुधिरोक्षिताः ॥ ३२
येनेह चायुषः शेषो जीवितस्य च नान्यथा ।
रजसा चाभिभूतानां स्त्रीणान्तु मनसः प्रियम् ॥ ३३
यच्छरीरन्तु नारीणां तरुणीनां मनोरमम् ।
तदेव दृष्ट्वा कुणपं त्रासात् सञ्जायते मृतिः ॥ ३४
दर्द्दुरस्य भवे व्याप्ते विनिष्क्रान्तस्य कुत्सितम् ।
उत्तानोच्छूनदेहस्य तादृशस्य कृते हि किम् ॥ ३५
नराः कुर्व्वन्ति पापन्तु दोषांश्चैव तथात्मनः ।
अणुमात्रं सुखं पुंसां परदारसमागमे ॥ ३६
तदेव परिणामेन दुःखं पर्व्वतसन्निभम् ।
अहोवत न जानन्ति नरा नार्य्यश्च दारुणम् ॥ ३७
परिणामे महद्दुःखं तदात्वे च सुखं लघु ।
तत् कर्त्तव्यं प्रयत्नेन नरैर्दुःखं महात्मभिः ॥ ३८
पश्चात्तापो न येन स्यान्म्रियमाणस्य देहिनः ।
गच्छ मा साहसं कार्षीः शङ्कितव्याः स्त्रियः सदाः ३९
मेघान्तकाग्निपाताल-विषसर्पासिसन्निभाः ।
स्त्रियो मायासहस्राणि जानन्ति जड़चेतनाः ॥ ४०
गुरवः कितवा नार्य्यो नराश्च पिशितप्रियाः ।
मायोपजीवना नित्यं एताः को वञ्चितुं क्षमः ॥ ४१
तस्यास्तद्वचनं श्रुत्वा विवरान्निर्ययौ ततः ।
रावणो मन्दबुद्धिस्तु विचरन् पृथिवीतले ॥ ४२
कन्यामाङ्गिरसस्याथ पुनर्वेदवतीं ततः ।
चर्म्मचीरधरां दृष्ट्वा केशवार्पितमानसाम् ॥ ४३
हृद्यां रूपवतीं रम्यां नियतां ब्रह्मचारिणीम् ।
अनिच्छमानां रुदतीं स्वयंग्राहादधर्षयत् ॥ ४४
तेन विध्वंसिता सा तु ददाह स्वकलेवरम् ।
रावणस्य वधार्थाय साभूज्जाय्या सुशोभना ॥ ४५
भूमौ समुत्थिता यज्ञे मिथिलाधिपतेरपि ।
रावणस्य वधार्थाय रामपत्नी तथाभवत् ॥ ४६

एका एव सपत्नीभिर्वञ्चिता नित्यलालिता।
द्विपुत्रिणी ततश्चान्ते प्राविशन्मेदिनीतलम् ॥ ४७
पुनः क्षीरोदशयने भर्त्रा सह समागमम्।
लभेयमिति सञ्चिन्त्य प्रविष्टा मेदिनीतलम् ॥ ४८
विष्णुस्तस्या वियोगाच्च कामासक्तमना भृशम्।
मृत्युलोकं न सा याति तस्माद्भूपतिरूपभृत् ॥ ४९
ततः कदाचित् कैलासे रावणस्तु निशासुखे।
सुरापानेन संमूढो ददर्श जलजेक्षणाम् ॥ ५०
स्नुषां रूपवतीं रम्भां मत्तद्विरदगामिनीम्।
बलादनिच्छमानां तां स्नुषां मोहात् पराम्शत्॥५१
तन्निमित्तन्तु शप्तोऽसौ धनाध्यक्षसुतेन च
न जातु रावणो गच्छेदन्यासक्तान्तु कामिनीम् ॥५२
गतः प्रमादात् तत्काले भस्मीभूतो भविष्यति।
ततः कदाचित् पातालं गतो जेतुं दशाननः ॥ ५३
कस्मिंश्चित् तत्र भुवने ददर्शाद्भुतदर्शनम्।
व्योमालि-कज्जलश्यामं पुरुषं रक्तलोचनम् ॥ ५४
कल्पान्तदहनज्वाला-तुल्यरोमाखिमण्डितम्।
महाविद्युल्लताकार-जटाकारविभूषितम् ॥ ५५
दिवाकरसहस्राभं केशश्मश्रुविभूषणम्।
नागेन्द्रमुखसम्भूत-विषानलपटावृतम् ॥ ५६
तस्याश्चायगतां लक्ष्मीं दृष्ट्वा क्षीरोदकन्यकाम्।
काममोहितचैतन्यस्ताञ्च हर्त्तुं समुद्यतः ॥ ५७
श्वासेस्तथा घोरैर्योजनानां शतं ततः।
आसीनश्च तथा नीतस्तेन कालात्मना तदा ॥ ५८
क्षणान्निश्चेष्टतां नीतो वरं याचितवांस्ततः।
लक्षस्ताञ्जगत्न् मृत्युर्ममास्त्विति पुनः पुनः ॥ ५९
अवश्यमिति तेनोऽक्तो बलिं मोचयितं गतः।
तत्र कालं वर्षधरं द्विभुजं मुषलायुधम् ॥ ६०
तद्रूपं दारुणं दृष्ट्वा शङ्ख-चक्र-गदाधरम्।
विषणः शङ्कितो दीनः पातालान्निर्य्ययौ क्षणात्॥६१
पश्चान्मातृसमावस्य क्षत्रियस्य नितम्बिनीम्।
अथ रामस्य भार्य्यान्तु चीरवल्कलधारिणीम् ॥ ६२
पिण्याक-शाक-पानीय-मांस-मूल-फलाशिनीम्।
वल्मीक-धूलि-सिकता-कण्टकैः कृतविक्षताम् ॥ ६३
भ्रष्टराज्यस्य दीनस्य त्यक्तस्य पितृमातृभिः।
अत्यन्तभक्तां रक्ताञ्च दृष्ट्वा कामवशं ययौ ॥ ६४

सौवर्णं हरिणं कृत्वा मारीचं राक्षसाधमम्।
विद्रुमाङ्कुरशृङ्गन्तु वैदूर्य्यमणिलोचनम् ॥ ६५
श्रीमन्मरकतव्रात-सङ्कुन्नपृष्ठमण्डलम्।
पूर्णेन्दुसदृशाकारं मुक्तामालाविभूषितम् ॥ ६६
सुशुद्धपद्मरागैश्च चतुश्चरणशोभितम्।
विसर्ज्जयित्वा रामस्य पर्णशालां शनैः शनैः ॥ ६७
स्वयञ्च यतिरूपं वै कृतवान् कृतिनां वरः।
मृगं सा मानुषी दृष्ट्वा पतिं लोभादसज्जयत् ॥ ६८
तस्मिन् गते मृगं हन्तुं वने रामशरैर्मृगः।
विद्धो दशाननं प्राह भो भ्रातर्निहतोऽस्म्यहम् ॥ ६९
तच्छ्रुत्वा भ्रातरित्येवं वाक्यं सीता व्यसर्ज्जयत्।
भर्त्तुरन्वेषणार्थाय देवरं विजने स्थिता ॥ ७०
रावणेन हृता सीता मोहं नीता क्षणादिव।
तां प्रार्थमानो रामेण निहतो राक्षसैः सह ॥ ७१
दक्षिणं जलधिं तीर्त्वा काण्डैर्घोराग्निसन्निभैः।
ततो लब्धजयस्तान्तु लब्ध्वा स्वविषयं ययौ ॥ ७२
सूर्य्यवंशसमुद्भूतो रामो दाशरथिर्हरिः।
नाना मांसानि मद्यञ्च पीत्वा भुक्त्वा च राक्षसः ॥ ७३
मत्तः सुप्तो दारितास्यः कुम्भकर्णो भयानकः।
कल्पान्तदहनज्वाला-लोलज्जिह्वः पुरा गृहे ॥ ७४
ततः संग्रामसमये रावणाद्यैः प्रबोधितः।
ततो रथैर्महानादैरश्वैः काष्ठासिमुद्गरैः ॥ ७५
जलाग्नि-गिरि-वृक्षैश्च ताड्यमानोऽपि राक्षसैः।
न बुबोध यतस्तत्र तदा स्त्रीभिः प्रबोधितः ॥ ७६
रम्यैः पयोधरोत्तानैरुरोभिः पीड़ितः स च ॥ ७७

इति दशमुखनाम्नो रावणस्यापि वृत्तं
वरगिरिगुरुधाम्नोद्भूतसत्त्वस्य पूर्व्वम्।
विकृतभुजगदंष्ट्रातुल्यखड्गोग्रधारा-
वरमुखवरपद्मोत्कृत्तनाशं गतस्य ॥ ७८
मदनविषमबाणासारनिर्भिन्नबुद्धे-
र्मनुजनृपतिदारस्पर्शसंलोभितस्य।
वरनरशतमांसैः शोणितैश्चापि सम्यक्
क्षुभितजठरवह्नेः कुम्भकर्णस्य चापि ॥ ७९

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्द्दशोऽध्यायः।

सूत उवाच।

सूर्य्यवंशे समुत्पन्नो राजा दशरथोऽपि च।
मानुषेण शरीरेण स्वर्गादायाति याति च ॥ १
दत्तार्थे तिलान् स्वर्गात् पितॄणां तृप्तये तदा।
वर्षसहस्राणि कृत्वा राज्यमकण्टकम् ॥ २
कैकेय्यास्तु स दोषेण राज्यं प्राणान् सुतान् जहौ।
रामो दाशरथिर्वीरो युद्धशौण्डो महामुनिः ॥ ३
राजा राजान्वये जातो धर्म्मनित्यो महामतिः।
मानी रामाभिरामस्तु सर्व्वभूतसुहृत् प्रियः ॥ ४
त्रैलोक्यविजयी भूत्वा ततः कामेन मोहितः।
अन्येन युध्यमानन्तु भूमिदारहरेण तु ॥ ५
सुग्रीवेण विरुद्धेन भ्रात्रा परमशत्रुणा।
दृढं स्थाय्यस्थिशेषञ्च बालिनं निजघान च ॥ ६
कल्पान्तदहनप्रख्यैः शरैः सन्नतपर्व्वभिः ॥ ७
रघुपतिकुलचन्द्रे वृत्तमेतद्विरुद्धं
दशरथ इति नाम्नि स्त्रीविलासाभिलाषात्।
सकलविबुधमुख्यानन्तकीर्त्तेश्च विष्णो-
स्त्रिभुवनभयभेत्तुस्तत्सुतस्यापि वृत्तम् ॥ ८
वसति हृदयदेशे हृच्छयः कामदेवः
सकलसुरगणानामादिदेवः स्वयम्भूः।
अजित इति विदित्वा लिङ्गसंस्थः स्मरारिः
स्वमभिमतमशेषं दर्शयँल्लोकहेतोः ॥ ९
मुनि-सुरवर-दैत्याः पूजयध्वं स्वभक्त्या
वदति नभसि वाणी देवदेवैर्विमुक्ता।
कमलज-हरिमुख्या नित्यमेवं हि लिङ्गं
सकलहृदयकामप्राप्तये. तद्यजन्ते ॥ १०
इति श्रीशैवे महापुराणे धर्म्मसंहितायां
चतुर्द्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः।

ऋषय ऊचुः।

सूतपुत्र पुरास्माभिः सर्व्वधर्म्माश्च शाश्वताः।
श्रुता बहुषु शास्त्रेषु यथोद्दिष्टा मनीषिभिः ॥ १
न श्रुताश्चेश्वरा धर्म्मा इहामुत्र फलप्रदाः।
त्वयेदानीं यतः शम्भोः कीर्त्तितं गुणकीर्त्तनम् ॥
तस्मात् त्वं नः समाख्याहि यत् पुण्यं त्वर्चनाद्भवेत्।
लिङ्गस्येह परत्रैव समासात् सूतनन्दन ॥ ३
धर्म्मा बहुविधाः प्रोक्ता ये देवेन श्रुतास्त्वया।
तान् वयं श्रोतुमिच्छामो लोकानां हितकाम्यया ॥ ४
अतः सदा कथ्यमिहैव धर्म्मं
ब्रूयादमुं यो मनसाचलेन।
तल्लिङ्गहेतो(क)रिह कीर्त्तिरेव
स यज्ञदानस्य फलं लभेत ॥ ५
लोके वन्दतीह हिताहितञ्च
मनीषया ये वसुमाददन्ते।
फलं चतुर्णां हि सुधाप्रदिष्टं
केतुर्यथा तत्सकलं प्रचक्रुः ॥ ६
किंप्रधानाश्च ते धर्म्मा हरवाक्यन्तु कीदृशम्।
लिङ्गेऽर्च्चितः शिवः केन विधिना सम्प्रसीदति ॥ ७
शिवदानं कथं ज्ञेयं शिवयज्ञः कथं भवेत्।
तच्च श्रुतौ द्विजेन्द्राणां नान्येषां समुदाहृतम् ॥ ८
तत् पुण्यं सर्व्वपुण्यानां जायते केन कर्म्मणा।
कानि कर्म्माणि कृत्वेह गृहस्थः स्वर्गभाग्भवेत् ॥ ९
कथं मर्त्त्योऽत्र सम्भूतो योगं विन्दति शाङ्करम्।
कर्म्मयज्ञस्तपोयज्ञः स्वाध्यायो ध्यानमाश्रितः ॥ १०
ज्ञानयज्ञश्च पञ्चैते महायज्ञाः प्रकीर्त्तिताः।
एतेषां पञ्चयज्ञानामुत्तमः कः प्रकीर्त्तितः ॥ ११
गतयः कतिधा तेषां परतः कीदृशं फलम्।
धर्म्माधर्म्मप्रभेदाश्च कियन्तश्च प्रकीर्त्तिताः ॥ १२
कानि चिह्नानि जायन्ते भुक्तशेषेण कर्म्मणा।
संसारसागराद्घोराद्धर्म्माधर्म्मोर्म्मिसङ्कुलात् ॥ १३
कर्म्मादिदुःखफेनाढ्यान्मुच्यन्ते हि जनाः कथम्।

सूत उवाच।

इति पृष्टः पुरा व्यासो मुनिभिस्तत्त्वदर्शिभिः ॥ १४
यथाहं किल युष्माभिः स तान् पुनरथाब्रवीत्।

व्यास उवाच।

एवमुक्तो मया सर्व्वं कुमारो मे सनत्प्रभुः ॥ १५
प्रत्युवाच स मां भूयो नमस्कृत्वा महेश्वरम्।

(क) अलिङ्गहेतोरिति पाठे तु मोक्षस्येत्यर्थः।

स्वर्गापवर्गफलदं नरकार्णवतारकम् ॥ १६
शिवधर्म्मं प्रवक्ष्यामि यथा चेश्वरभाषितम्।

सनत्कुमार उवाच।

श्रद्धापूर्व्वा इमे धर्म्माः श्रद्धामध्यान्तसंस्थिताः ॥ १७
श्रद्धा निष्ठाः प्रतिष्ठाश्च श्रद्धा धर्म्माः प्रकीर्त्तिताः।
श्रुतिमात्ररसाः सूक्ष्माः प्रधानपुरुषेश्वराः ॥ १८
श्रद्धामात्रेण गृह्यन्ते न करेण न चक्षुषा।
कायक्लेशैर्वहुविधैर्न चैवार्थस्य राशिभिः ॥ १९
धर्म्मः सम्प्राप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि।
श्रद्धाधर्म्मः परः सूक्ष्मः श्रद्धादानं परं तपः ॥ २०
श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्व्वमिदं जगत्।
सर्व्वस्वं जीवितं वापि दद्यादश्रद्धया यदि ॥ २१
प्राप्नुयान्न फलं किञ्चिच्छ्रद्धा तस्मात् परं पदम्।
एवं श्रद्धामयाः सर्व्वे शिवधर्म्माः प्रकीर्त्तिताः ॥ २२
शिवश्च श्रद्धया गम्यः पूज्यो ध्येयश्च सर्व्वदा।
अथाहं ते प्रवक्ष्यामि महासारं विमुक्तिदम् ॥ २३
आम्नासिद्धमिदं दिव्यवाक्यमेतच्छिवात्मकम्।
नानासिद्धिकरं दिव्यं लोकचित्तानुरञ्जकम् ॥ २४
मन्त्रं सुखमुखोच्चार्य्यमशेषार्थप्रदायकम्।
प्रणवोन्नमः शिवायेति मूलमन्त्रं हि शैवकम् ॥ २५
यद्वीजं सर्व्वविद्यानां मन्त्रमाद्यं षड़क्षरम्।
अतिसूक्ष्मं महार्थञ्च विज्ञेयं वटवीजवत् ॥ २६
देवो गुणत्रयातीतः सर्व्वज्ञः सर्व्वकृत् प्रभुः।
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतः शिवः ॥ २७
यानि मन्त्राणि सूक्ष्माणि मालामन्त्राण्यशेषतः।
ओँ नमः शिवायेति संस्थितानि यथाक्रमम् ॥ २८
मन्त्रे षड़क्षरे सूक्ष्मे पञ्चब्रह्मतनुः शिवः।
वाच्य-वाचकभावेन स्थितः साक्षात् स्वभावतः ॥२९
वाच्यः शिवः प्रमेयत्वान्मन्त्रस्तद्वाचकः स्मृतः।
वाच्य-वाचकभावोऽयमनादिः संस्थितस्तयोः ॥ ३०
यथानादिप्रवृत्तोऽयं घोरः संसारसागरः।
शिवोऽपि हि तथानादिः संसारान्मोचकः स्थितः॥३१
व्याधीनां भेषजं यद्वत् प्रतिपक्षं स्वभावतः।
तद्वत् संसारदोषाणां प्रतिपक्षः शिवः स्थितः ॥ ३२
असत्यस्मिन् जगन्नाथे तमोभूतमिदं भवेत्।
आदित्येन विहीनं हि निरालोकं जगद्यथा ॥ ३३
तस्मादनादिः सर्व्वज्ञः परिपूर्णः स्वभावतः।
मुक्तिहेतुः शिवः सिद्धः सर्व्वज्ञो ज्ञानभासकः ॥ ३४
अस्याभिधानं मन्त्रोऽयमभिधेयश्च स स्मृतः।
अभिधानाभिधेयत्वान्मन्त्रसिद्धः परः शिवः ॥ ३५
वेदे शिवागमे वायमुभयत्र षड़क्षरः।
मन्त्रः स्थितः सदा मुक्त्यै मन्त्रः षड़क्षरः स्मृतः ॥३६
किं तस्य वहुभिर्मन्त्रैः शास्त्रैर्वा वहुविस्तरैः।
यस्योँ नमः शिवायेति मन्त्रोऽयं हृदि संस्थितः ॥३७
तेनाधीतं श्रुतं तेन तेन सर्व्वमनुष्ठितम्।
येनोँ नमः शिवायेति मन्त्राभ्यासः स्थिरः कृतः ॥३८
शिवज्ञानानि यावन्ति विद्यास्थानानि यानि च।
षड़क्षरस्य मन्त्रस्य कलां नार्हन्ति षोड़शीम् ॥ ३९
एतावत् तच्छिवज्ञानमेतावत् तत् परं पदम्।
यदोँ नमः शिवायेति शिववाक्यं षड़क्षरम् ॥ ४०
विधिवाक्यमिदञ्चैव नार्थवादं शिवात्मकम्।
लोकानुग्रहकर्त्ता यः स मृषार्थं कथं वदेत् ॥ ४१
सर्व्वज्ञः परिपूर्णत्वात् सर्व्वदोषविवर्ज्जितः।
ब्रूयाद्वाक्यं शिवः स्वान्तस्त्वन्यथा केन हेतुना ॥ ४२
यद्वद्यथावस्थितं वस्तु सर्व्वज्ञश्च तथा वदेत्।
यावत् फलञ्च यत् पुण्यं गुणदोषैः स्वभावतः ॥ ४३
रागद्वेषादिभिर्दोषैर्ब्रूयात् स कथमन्यथा।
ते चेश्वरे न विद्यन्ते ग्रस्तो यैरनृतं वदेत् ॥ ४४
प्रणीतममलज्ञानं सर्व्वं तेन शिवेन यत्।
अतीताशेषदोषेण तत्प्रमाणं न संशयः ॥ ४५
यथार्थं पुण्यपापेषु श्रद्धेयानि विपश्चिता।
तत्तादीश्वरवाक्यानि तदश्रद्धो व्रजत्यधः ॥ ४६
धर्म्मज्ञानप्रवक्तारं शिववत् पूजयेत् सदा।
तस्माद्धर्म्मञ्च ज्ञानञ्च मोक्षञ्च प्राप्यते यतः ॥ ४७
जगद्धिताय नृपतिरात्मनश्च विभूतये।
नरं परोपकाराय शुभधर्म्मे नियोजयेत् ॥ ४८
यं यं धर्म्मं नरश्रेष्ठः प्रब्रूयाद्धर्म्मतत्परः।
तन्नियोगादयं लोकः समाचरति भक्तितः ॥ ४९
धर्म्मनिष्ठः कृतो राजा तत्प्रामाण्याद्भयेन वा।
तत्तत् समाचरेल्लोकस्तस्माद्धर्म्मे नियोजयेत् ॥ ५०
धर्म्मतः सततं राजा प्रजा धर्म्मेण पालयेत्।
न्यायेन पाल्यमानास्तु राज्ञो ध्यायन्ति वै शुभम् ॥५१

धर्म्ममर्थञ्च कामञ्च यत् प्रजानामभीप्सति ।
...प्रोत्थसन्देहः प्रजा धर्म्मेण पालयन् ॥ ५२
...सु धर्म्मयुक्तासु तथाधर्म्मयुतासु च ।
...लभेद्राजा उभयोः पुण्य-पापयोः ॥ ५३
...युगे भवेद्राजा त्रेतायां द्वापरे कलौ ।
...युगे स विज्ञेयो धर्म्मपादानुभासकः ॥ ५४
...धर्म्मं मज्जन्तमुभयार्थं च पण्डितः ।
...नियोजयेन्नित्यं यदीच्छेद्धर्म्ममात्मनः ॥ ५५
...पीड़नसन्तापात् समुद्भूतो हुताशनः ।
राज्यं श्रियं कुलं प्राणानदग्ध्वा न निवर्त्तते ॥ ५६
नृपतिं वोधयेत् तस्मात् प्रजाः स्युर्धर्म्मतत्पराः ।
धर्म्मशीले नृपे यस्मात् सर्व्वलोकानुकम्पया ॥ ५७
...लौषधि-निधि-क्षेत्र-वीज-मूल-रसैर्धनम् ।
धर्म्ममार्गावताराय वेदोऽष्टाङ्गः प्रकीर्त्तितः ॥ ५८
प्रज्ञया शास्त्रवादेन कामार्थाभिरतान् नृपान् ।
...धर्म्मे नियुञ्जीत ज्ञात्वा योगं पुनः क्रमात् ॥ ५९
जगद्गुरुः स विज्ञेयो राजानं यो निवोधयेत् ।
तस्मात् सर्व्वप्रयत्नेन सर्व्वलोकानुकम्पया ॥ ६०
शिवं ज्ञात्वात्मतत्त्वेन यः समुद्धरते जनम् ।
संसारपङ्कनिर्म्मग्नं कस्तेन सदृशः पिता ॥ ६१
ज्ञानामृतेन नृपतिं निर्व्वापयति यः शनैः ।
अज्ञानवह्निसन्तप्तं कस्तं न प्रतिपूजयेत् ॥ ६२
प्राप्यते न श्रमैर्यज्ञैस्तथैवार्थस्य राशिभिः ।
नैव राज्येन महता परलोकसुभाषितम् ॥ ६३
वाक्यं मुनिवरैः शान्तैर्भाषितं तत् सुशोभनम् ।
स्वर्गापवर्गसिद्ध्यर्थं तद्विज्ञेयं सुभाषितम् ॥ ६४
वाक्यं निरयहेतुर्वै कामकृष्णानुसारि यत् ।
रागद्वेषानृतक्रोधैर्न तद्भाषितमुच्यते ॥ ६५
अविद्यारागवाक्येण मृदुना ललितेन च ।
संस्कृतेनापि किं तेन संसारगतिहेतुना ॥ ६६
यच्छ्रुत्वा जायते पुण्यं रागादीनाञ्च संक्षयः ।
शिवे च जायते भक्तिर्ज्ञानं यत् तदहैतुकम् ॥ ६७
विरुद्धमपि तद्वाक्यं विज्ञेयमपि शोभनम् ।
पुराणं भारतं वेदाः शास्त्राणि विविधानि च ॥ ६८
मुनिभिः सुप्रणीतानि श्रूयन्ते धर्म्महेतुना ।
पुत्रदारादिसंसारः पुंसामुत्तिष्ठतु बन्धनम् ॥ ६९

ऋषिभिः शास्त्रसम्भारः सद्योगाभ्यासकारणम् ।
इदं ज्ञेयमिदं ज्ञेयं यः सर्व्वं ज्ञातुमिच्छति ॥ ७०
अपि वर्षसहस्रायुः शास्त्रान्तं नाधिगच्छति ।
विज्ञाय शास्त्रजालानि ज्ञात्वा स्वं जीवितं लघु ॥ ७१
विज्ञायाक्षरतन्मात्रं पारलौकिकमाचरेत् ।
पण्डितेनापि किं तेन सुसमर्थेन देहिना ॥ ७२
यः पुण्यभारसुद्वोढ़मशक्तः पारलौकिकम् ।
पण्डितोऽपि स मूर्खः स्याच्छक्तियुक्तोऽप्यशक्तिकः॥७३
संसारस्थं स्वमात्मानमुत्तारयितुमक्षमः ।
स पण्डितः स शक्तः स्यात् स तपस्वी जितेन्द्रियः॥७४
यः शिवज्ञानसद्भावमालोचयितुमुद्यतः ।
यः प्रदद्यान्महीं कृत्स्नां महामेरुञ्च काञ्चनम् ॥ ७५
स चेदन्यायतः पृच्छेन्न तस्योपदिशेद्गुरुः ।
यः शृणोति शिवज्ञानं न्यायतस्तद्ब्रवीति च ॥ ७६
तौ गच्छतः शिवस्थानं निरयं तद्विपर्य्यये ।
नित्यं नैमित्तिकं काम्यं त्रिविधं लिङ्गपूजनम् ॥ ७७
तद्वोऽहं सम्प्रवक्ष्यामि शिवतुष्टिकरं परम् ।
अथ गोदेहसम्भूतैः(क)षड़ङ्गविधिना शिवः ॥ ७८
नित्यं सम्पूजितः शीघ्रं नराणां सम्प्रसीदति ।
सुरासुरैर्मथ्यमाने क्षीरोदात् सागरोत्तमात् ॥ ७९
पञ्च गावः समुत्पन्नाः सर्व्वलोकस्य मातरः ।
नन्दा भद्रा सुशीला च सुरभिः सुमनास्तथा ॥ ८०
पञ्च गावो मुनिश्रेष्ठाः सुरभिर्भूमिमागता ।
सर्व्वलोकोपकाराय देवानां तर्पणाय च ॥ ८१
सुरभिः संस्थिता भूमौ स्नानार्थं शङ्करस्य च ।
गोमयं रोचना मूत्रं क्षीरं दधि घृतं गवाम् ॥ ८२
षड़ङ्गानि पवित्राणि सर्व्वसिद्धिकराणि च ।
गोमयादुत्थितः श्रीमान् विल्ववृक्षः शिवप्रियः ॥८३
तत्रास्ते पद्महस्ता श्रीः श्रीवृक्षस्तेन स स्मृतः ।
वीजान्युत्पलपद्मानां पुनर्जातानि गोमयात् ॥ ८४
शीता गोरोचना जाता पवित्रा सर्व्वमङ्गला ।
गोमूत्राद्गुग्गुलुर्जातो देवतानां सुखप्रियः ॥ ८५
क्षीराद्वीर्य्यन्तु सर्व्वेषां जातं दधि सुमङ्गलम् ।
घृतामृतन्तु सम्भूतममराणां सुखप्रियम् ॥ ८६
तस्माद्घृतेन पयसा दध्ना च स्नापयेच्छिवम् ।

(क) गोः पृथिव्या देहाज्जातैर्विल्वपत्रैरित्यर्थः ।

सुगन्धिनोष्णतोयेन सुगन्धैश्च विशोधयेत् ॥ ८७
स्नाप्य शीताम्बुना पश्चाच्चन्दनेन विलेपयेत्।
अर्च्चयेद्बिल्वपत्रैश्च पद्मनीलोत्पलैस्तथा ॥ ८८
एवं पूज्य ददेत् पश्चाद्घृतयुक्तं सुगुग्गुलुम्।
पायसं सुजलाद्यन्तु दधियुक्तं घृतप्लुतम् ॥ ८९
निवेदयेच्छिवायैव सुभक्ष्यं घृतपाचितम्।
कृत्वा प्रदक्षिणं पश्चात् प्रणिपत्य क्षमापयेत् ॥ ९०
अनेन विधिना देवः षडङ्गेन प्रसीदति।
इह लोके परे चैव सर्व्वान् कामान् प्रयच्छति॥९१
भावान्नित्यमभावाच्च चतुर्द्दश्यष्टमीषु च।
अनेन विधिना लिङ्गं यः कश्चित् पूजयेत् सदा ॥ ९२
शिवभक्तः समुत्तार्य्य कुलानामेकविंशतिम्।
लीलया दिवि संस्थाप्य स गच्छति परं पदम् ॥९३
देवकार्य्यनियुक्ता ये क्रयक्रीताश्च वृत्तितः।
भक्तितः पूजयन्तीह तेऽपि यान्ति शिवालयम् ॥ ९४
मालाकारः शिवस्यैवं महद्भक्त्या सुपूजनात्।
पृथिव्यामेकराड्भूत्वा स गच्छेच्छिवमन्दिरम् ॥ ९५
तस्मात् सम्पूजयेद्भक्त्या विधिना येन केनचित्।
षड्क्षरेण मन्त्रेण शिवमेकाग्रमानसः ॥ ९६
शिवभक्तः समुत्तार्य्य कुलानामेकविंशतिम्।
निरयाद्दिवि संस्थाप्य स गच्छेदैश्वरं पदम् ॥ ९७
भक्त्या येऽपि प्रपश्यन्ति देवकार्य्यनियोजिताः।
प्रयान्ति स्वामिना सार्द्धं श्रीमच्छिवपुरं महत् ॥ ९८
कालात् पुनरिहायातो भृत्यवर्गसमन्वितः।
भुक्त्वा भोगान् सुविपुलान् पृथिव्यामेकराड्भवेत् ९९
येषां पत्राणि पुष्पाणि लिङ्गस्यैवार्च्चने सदा।
शिवगायाश्च गच्छन्ति रुद्रलोकं न संशयः ॥ १००
पूज्यमानञ्च विधिना यः पश्येच्छ्रद्धया शिवम्।
सोऽपि यागफलं कृत्स्नं प्राप्तवान् नात्र संशयः ॥ १०१
श्रुत्वानुमोदयेत् पुण्यमीश्वरं ये समाधिना।
तत्समं फलमाप्नोति शिवस्य वचनं यथा ॥ १०२
भक्त्यानुमोदयेदीशं स्नानार्च्चनकृते तु यत्।
यतोऽशेषं शिवे भक्तस्तत्समं प्राप्नुते फलम् ॥ १०३
मनसा चार्च्चयेन्नित्यं भक्तियुक्तोऽपि मानवः।
सोऽपि तत् फलमाप्नोति शिवस्यास्य प्रभावतः ॥१०४
सकृदुच्चरितं येन शिव इत्यक्षरद्वयम्।
रुद्रं वापि हरं वापि स गच्छेद्रुद्रलोकताम् ॥ १०५
शिवपुण्यमशेषाद्यमशेषजनसेविताम्।
शिवधर्म्माः शिवेनोक्ताः सुसूक्ष्माः सुमहाफलाः॥१०६
कीर्त्तितास्ते समासेन नित्यपूजासमाश्रिताः ॥ १०७

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
नित्य-नैमित्तिकपूजाविधिर्नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

षोड़शोऽध्यायः।

मुनय ऊचुः।

शङ्करस्य क्रियायोगं श्रोतुमिच्छामहे वयम्।
प्रोक्तं सनत्कुमारेण यद्व्यासस्येह तद्वद ॥ १

सूत उवाच।

प्रोक्तं सनत्कुमारेण यद्व्यासाय कपर्द्दिनः।
क्रियायोगं समासेन तच्छृणुध्वं जितक्षमाः ॥ २

व्यास उवाच।

क्रियायोगस्त्वया पूर्व्वं समोक्तो यो महामुने।
तमहं श्रोतुमिच्छामि फलञ्चास्य यथातथम् ॥ ३
लिङ्गानां देवतान्यासं तन्मयत्वञ्च पूजनम्।
यथावच्चेतसो वृत्तिं कुरुते नियतात्मना ॥ ४
मनसा ब्रह्मचर्य्येण पुण्यैर्वाक्कायसम्भवैः।
क्रियायोगो हि विद्वद्भिर्योगिनां समुदाहृतः ॥ ५
तत्राहं श्रोतुमिच्छामि क्रियायोगस्थितो नरः।
यत् फलं समवाप्नोति स्थाणोः स्थानं हि कारयेत्॥६
हरार्चां लिङ्गमेवं वा कारयित्वा यदश्नुते।
सम्पूजयित्वा विधिवदनुलिप्य च यत् फलम् ॥ ७
कानि माल्यानि चोक्तानि कानि नार्हन्ति शङ्करे।
के धूपा वल्लभाः के च के च वर्ज्याः सदैव हि ॥ ८
उपहारफलं किं स्यात् किं फलं गीतवादने।
घृतक्षीरादिना यच्च स्नापिते शङ्करे फलम् ॥ ९
यच्चोपलेपनादौ तु फलमभ्युक्षिते च यत्।
शङ्करस्य हितञ्चापि तदशेषं वदस्व मे ॥ १०

सनत्कुमार उवाच।

कार्त्तिकेय यदेतत् त्वं शङ्करस्य च पृच्छसि।
शुश्रूषुर्विधिवत् पुण्यं तदिहैकमनाः शृणु ॥ ११

ज्ञानयोगस्तु संयोगश्चित्तस्यवात्मना तु यः ।
यस्तु वाह्यार्थसंयोगः क्रियायोगः स उच्यते ॥ १२
प्रधानं कारणं योगी विमुक्तेर्मुनिसत्तम ।
क्रियायोगस्तु योगस्य परमं ध्येयसाधनम् ॥ १३
यदितद्भवता पृष्टं फलमन्विच्छतां फलम् ।
देवालयादिकरणे तदिहैकमनाः शृणु ॥ १४
यस्तु देवालयं शम्भोः शैलं दार्व्वमथापि वा ।
कारयेन्मृण्मयं वापि शृणु तस्य मुने फलम् ॥ १५
अहन्यहनि योगेन यजतो यन्महाफलम् ।
प्राप्नोति तत् फलं शम्भोर्यः कारयति मन्दिरम् ॥ १६
कुलानां शतमागामि अतीतञ्च तथा शतम् ।
कारयन् शूलिनो धाम नयत्यच्युयलोकताम् ॥ १७
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।
शम्भोरालयविन्यास-प्रारम्भादेव नश्यति ॥ १८
सर्व्वदेवमुखो रुद्रो यस्तस्य कुरुते गृहम् ।
प्रतिष्ठां समवाप्नोति स नरः सार्व्वलौकिकीम् ॥ १९
प्रशस्तदेशभूभागे शिवस्यायतनन्तु यः ।
कारयेदखिलान् लोकान् स नरः प्रतिपद्यते ॥ २०
इष्टकानान्तु विन्यासो यावद्वर्षाणि तिष्ठति ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥ २१
प्रतिमाः कारयेच्छम्भोर्लिङ्गं वा लक्षणान्वितम् ।
शङ्करस्य परं लोकमक्षयं प्रतिपद्यते ॥ २२
षष्टिवर्षसहस्राणां सहस्राणि यथाक्रमम् ।
प्रत्येकशः समस्तानां देवानां प्रतिपद्यते ॥ २३
शम्भोर्लिङ्गं प्रतिष्ठाप्य सुप्रशस्ते निवेशने ।
पुरुषः कृतकृत्यः स्यान्नैतत् स्वं मरणं नयेत् ॥ २४
ये भविष्यन्ति येऽतीता आकल्पात् पुरुषाः कुले ।
तांस्तांस्तारयते स्थाप्य लिङ्गं सर्व्वगुणान्वितम् ॥ २५
मनसा ये चिकीर्षन्ति लिङ्गस्थापनमुत्तमम् ।
तेऽपि यान्ति शिवं शान्तं समुद्धृत्य कुलाष्टकम् ॥ २६
क्रियमाणन्तु यः प्रेक्ष्य चेतसा योऽनुचिन्तयेत् ।
कारयिष्याम्यहं किन्तु सम्पदा मे भविष्यति ॥ २७
एवं तस्य कुलं सद्यो याति स्वर्गं न संशयः ।
प्रजापतिर्यमं स्थाप्य तमाह तव किङ्कराः ॥ २८
पाशदण्डधरा नित्यं विचरिष्यन्ति भूतले ।
धर्म्मादिस्मानुशास्तारो मम वाक्यं निशम्यताम् ॥ २९
केवलं ये जगन्नाथं शङ्करं समुपाश्रिताः ।
त्वया ते परिहर्त्तव्यास्तेषां नास्त्यत्र संस्थितिः ॥ ३०
ये च माहेश्वरा लोके तच्चित्तास्तत्परायणाः ।
ते तु रुद्रगणा ज्ञेयाः सदा त्याज्याः सुदूरतः ॥ ३१
ये तिष्ठन्तः स्वपन्तश्च गच्छन्तो वै दिवानिशम् ।
कीर्त्तयन्ति शिवं शान्तं तेऽपि त्याज्याः सुदूरतः ॥ ३२
नित्ये नैमित्तिके देवं ये यजन्ति महेश्वरम् ।
नावलोक्या भवद्भिस्ते न ते चार्हन्ति वो गतिम् ॥ ३३
ये पुष्प-धूप-वासोभिर्भूषणैश्चात्मवल्लभैः ।
अर्च्चयन्ति न ते ग्राह्या नरा हरसमाश्रयाः ॥ ३४
उपलेपनकर्त्तारः सम्मार्ज्जनपराश्च ये ।
हरालये परित्याज्यास्तेषां त्रिपुरुषं कुलम् ॥ ३५
येन वायतनं शम्भोः कारितं तत्कुलोद्भवम् ।
पुंसां शतं नावलोक्यं भवद्भिर्दुष्टचेतसा ॥ ३६
येन लिङ्गं भगवतो महेश्वरस्य कारितम् ।
नरायुतं तत्कुलजं भवतां शासनातिगम् ॥ ३७
पुनर्वैवस्वतो गाथा एता वै परमेष्ठिना ।
हिताय ज्ञापयामास दूतान् प्रति यथातथम् ॥ ३८
स्थापयित्वा शुभं लिङ्गं सम्यक् सम्पूज्य मानवः ।
यं यं प्रार्थयते कामं तं तं प्राप्नोत्यसंशयम् ॥ ३९
यः स्नापयति भीमस्य लिङ्गं त्रिदशपूजितम् ।
घृतेन मधुयुक्तेन तस्य पुण्यफलं शृणु ॥ ४०
गवां साहस्रदत्तस्य यत् फलं लभते नरः ।
विप्रेभ्यो वेदपूर्णेभ्यो घृतप्रस्थेन तत् फलम् ॥ ४१
पृथुना च सुसम्प्राप्ता सप्तद्वीपा वसुन्धरा ।
घृताढ़केन संस्नाप्य लिङ्गं त्रिभुवनेश्वरम् ॥ ४२
लिङ्गं कृष्णचतुर्द्दश्यां घृतेन जगतः पतेः ।
स्नापयित्वा समभ्यर्च्च्य पापानां विप्र मुच्यते ॥ ४३
पञ्चदश्याममावास्यां लिङ्गं संस्नाप्य यत्नतः ।
कृत्वैकभक्तमाज्येन सर्व्वपापैः प्रमुच्यते ॥ ४४
ज्ञानतोऽज्ञानतो वापि यत् पापं कुरुते नरः ।
तत् क्षालयति सन्ध्यायां घृतेन स्नानकृन्नरः ॥ ४५
देवानां परमो रुद्रो हव्यानां परमं घृतम् ।
तयोरशेषपापानां क्षालकः सङ्गमो मुने ॥ ४६
येषु क्षीरवहा नद्यो ह्रदाः पायसकर्द्दमाः ।
भूर्लोकात् तांस्ततो यान्ति क्षीरस्नापनका नराः ॥ ४७

आह्लादं निर्वृतिं स्वास्थ्यमारोग्यं चारुरूपताम्।
समृजन्मान्यवाप्नोति चीरस्नानकरो विभोः ॥ ४८
दध्यादीनां विकाराणां चीरतः सम्भवो यथा।
तथैवाशेषकामाणां चीरस्नपनमुत्तमम् ॥ ४९
यथा च विमलं चीरं यथा पुष्टिकरं सदा।
तथास्य निर्मलं ज्ञानं भवेत् स्नानकृतः शिवे ॥ ५०
ग्रहानुकूलतां पुष्टिं प्रियत्वञ्चाखिले जने।
करोति शङ्करो नित्यं चीरस्नपनतोषितः ॥ ५१
घृतचीरेण देवेशे दृष्टमात्रः प्रसीदति।
सर्व्वस्य स्निग्धतामेति स्नापिते शङ्करे सदा ॥ ५२
अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
दृष्ट्वा पूष्णः शुभां भार्य्यां सुमतिं पतिना सह ॥ ५३
क्रीड़न्तीं गौतमी स्वर्गे तामाह विस्मयान्विता।
गौतम्युवाच।
सुमत्यनेकशः सन्ति स्वर्गे देवाः सवासवाः ॥ ५४
न चैषामीदृशी शोभा विद्यते ते यथा शुभे।
न चैषामीदृशो गन्धो न कान्तिर्न सुरूपता ॥ ५५
न वाससाञ्च शोभेयं यथा ते पतिना सह।
अन्नाद्यानामपीशानां युवयोरतिरिच्यते ॥ ५६
स्वस्थता चेतसश्चेयं सुमते पतिना सह।
तपःप्रभावो दानं वा किं कर्म्म होमसञ्चितम् ॥ ५७
युवयोस्तन्ममाचक्ष्व त्वं सर्व्वं वरवर्णिनि।
सुमतिरुवाच।
भर्त्तुर्मे कुलपूर्व्वेण समाराध्य महेश्वरम् ॥ ५८
यच्चेदेवं सुता राज्यमेतदाप्तं ततो व्रतः।
रुद्रो यज्ञेषु यज्ञेशः शङ्करस्तोषितो मया ॥ ५९
स्वर्गप्राप्तिरियं तस्मान्ममेदं कर्म्मणः फलम्।
तीर्थोदकैस्तथा ह्यर्थैः स्नानैः सन्तोषितः शिवः ॥ ६०
तेन कान्तिरियं जाता देवेभ्यस्त्वधिका मम।
मनःप्रसादः सौख्यत्वं शरीरस्य च निर्वृतिः ॥ ६१
यत् प्रियत्वञ्च सर्व्वस्य तद्घृतस्नानजं फलम्।
यान्यभीष्टानि वासांसि यच्चाभीष्टं विभूषणम् ॥ ६२
रत्नानि यान्यभीष्टानि यत् प्रियञ्चानुलेपनम्।
यान्यभीष्टानि माल्यानि स्वर्गे सन्ति ममानिशम् ॥ ६३
भर्त्तुर्ममोपतिष्ठन्ति शोभायुक्तानि गौतमि।
तानि मे शिवदत्तानि तस्माद्भूषात्मको गुणः ॥ ६४
आहारा दयिता ये च लिङ्गस्याग्रे निवेदिताः।
तस्मान्मे सर्व्वदा तृप्तिरासीदत्रैव गौतमि ॥ ६५
स्वर्गकामेण भर्त्रा मे मया च शुभदर्शने।
भक्त्या समर्च्चितो नित्यं तस्माद्गुरुष्टिर्ममोत्तमा ॥ ६६
यं यं काममभिध्याय मनोवाक्कायकर्म्मभिः।
लिङ्गं सम्पूजयेन्नित्यं तं तं प्राप्नोति मानवः ॥ ६७
सनत्कुमार उवाच।
एवमभ्यर्च्य देवेशं सर्व्वभूतेश्वरेश्वरम्।
प्राप्नोत्यभिमतान् कामान् देवानामपि दुर्लभान् ॥ ६८
चन्दनागुरुकर्पूरैः कुङ्कुमोशीरपद्मकैः।
अनुलिप्तः शिवः सद्यो वरान् भोगान् प्रयच्छति ॥ ६९
प्रदत्तं शम्भवे धूपं कालेयं रक्तचन्दनम्।
नृणां भवति रोगाय न दद्यात् तत् कपर्द्दिने ॥ ७०
धूपं प्राण्यङ्गनिर्मुक्तं सुगन्धं प्रियमुत्तमम्।
दद्यात् तुष्टिकरं सद्यो गुग्गुलं घृतसंयुतम् ॥ ७१
न शल्लक्या कृतं धूपं दद्यादासवसंयुतम्।
यान्यात्मनस्त्वनिष्टानि तानि पुष्पाणि वर्ज्जयेत् ॥ ७२
मानवः सर्व्वदेष्टानि दद्यादात्महितेच्छया।
पद्मानि मृदुगन्धीनि सर्व्वाणीष्टानि शूलिनः ॥ ७३
संशुष्काण्यपि पत्राणि श्रीवृक्षस्य सदैव हि।
सर्व्वाण्यम्बुसमुत्थानि रक्तनीले तथोत्पले ॥ ७४
मालती मल्लिका चैव यूथिका वातिमुक्तकः।
पाटला करवीरश्च कर्णिकारश्च वर्व्वरी ॥ ७५
चम्पकोऽथ किरातिक्तः कुब्जकः शतपत्रिका।
तुलस्यगस्त्यपुष्पाणि गुरुकुन्दं सकुन्दकम् ॥ ७६
अशोकः किंशुकश्चैव शस्ताः शङ्करपूजने।
तथैव शुभगन्धीनि सर्व्वाणीष्टानि शङ्करे ॥ ७७
देहे सतीह गृह्णाति तस्मात् तैरर्च्चयेच्छिवम्।
रक्तानि नीलकृष्णानि भूषार्थं तानि योजयेत् ॥ ७८
एवमभ्यर्च्चयेदीशमेभिरुक्तैस्तु सर्व्वदा।
यो नरः स तु स्वर्गी स्यात् सर्व्वसौभाग्यसंयुतः ॥ ७९
सिद्धविद्याधराणाञ्च गन्धर्व्वाप्सरसां गणैः।
यावत् कल्पस्य पर्य्यायः पूज्यमानः स तिष्ठति ॥ ८०
कण्टकैरुग्रगन्धैश्च सविषैश्च विषादिनम्।
योऽर्च्चयेत् स भवेन्मर्त्यः सर्व्वभूतगणप्रियः ॥ ८१
पुष्पाभावाच्छिवः पूज्यो भङ्गैर्दूर्व्वाङ्कुरैः शुभैः।

...श्री-तमालपत्रैश्च स दद्यात्यैश्वरान् गुणान् ॥ ८२
एवं यः पूजयेन्नित्यं शिवं परमकारणम्।
स प्रयात्यव्ययाँल्लोकान् पूज्यमानोऽप्सरोगणैः ॥ ८३
तदा कालादिहायाति राजा राज्येश्वरो महान्।
पृथिव्यामेकराड् भूत्वा क्रमान्मोक्षमवाप्नुयात् ॥ ८४
केतकी च सदा त्याज्या जपापुष्पाणि चैव हि।
स्नानैः श्रीपदैरिष्ट्वा नरो म्लेच्छाधिपो भवेत् ॥ ८५
गन्धैश्च सुरामांसी-कर्पूरागुरु-चन्दनैः।
गन्धादियुक्ततोयेन स्नापयेदीश्वरं सदा ॥ ८६
दुकूलपट्टकौशेयसूक्ष्मैः कार्पासिकैः सदा।
वासोभिः पूजयेदीशमन्यैश्चैवात्मनः प्रियैः ॥ ८७
शुभानि यानि भक्ष्याणि भोज्यान्यभिमतानि च।
आत्मनश्च वल्लभं सर्व्वं तत् तद्देयं कपर्द्दिने ॥ ८८
सुवर्ण-मणि-मुक्तादि यच्चान्यदपि वल्लभम्।
तत् तद्देवातिदेवाय शङ्कराय निवेदयेत् ॥ ८९
योगिनं शङ्करं मत्वा शुभाचारं द्विजोत्तमम्।
सर्व्वायाव्यक्तरूपाय नाम्ना तस्मै निवेदयेत् ॥ ९०
संक्रान्तिर्विषुवद्योगो व्यतीपातोऽयनद्वयम्।
ग्रहणं पर्व्वणी द्वे तु चतुर्द्दश्यष्टमी तथा ॥ ९१
तथान्ये तु शुभाः कालाः प्रोक्ता नैमित्तिकाः सदा।
सहस्रगुणितं नित्यात् फलं विद्याच्छिवार्च्चने ॥ ९२

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
षोड़शोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः।

व्यास उवाच।

शङ्करस्य तु ये भक्ताः शुभाचारा हि योगिनः।
पूजने यत् फलं तेषां समासात् कथयस्व नः ॥ १

सनत्कुमार उवाच।

शृणु ये सततं भक्त्या भजन्ति शिवयोगिनः।
प्राप्नुवन्ति महाभोगानन्ते योगञ्च शाङ्करम् ॥ २
मोक्षभोगार्थिभिस्तस्मात् सम्पूज्याः शिवयोगिनः।
प्रतिश्रयान्नपानेन शय्यावस्त्रादिभिः सदा ॥ ३
यः करोति हि शुश्रूषां विधिवच्छिवयोगिनः।
ईश्वरो वा दरिद्रो वा भक्त्या तस्य फलं शृणु ॥ ४
सूर्य्यदीप्तिप्रतीकाशैर्विमानैः सार्व्वकामिकैः।
मृतः शिवपुरं गच्छेत् स सप्तकुलसंयुतः ॥ ५
तत्र दिव्यैर्महाभोगैः स्त्रीसहस्रैर्मनोहरैः।
कल्पकोटिशतं दिव्यं सेव्यमानः स तिष्ठति ॥ ६
तदन्ते विष्णुभवने तावत् कालं वसेत् पुनः।
वैष्णवैर्विविधैर्भोगैः स्त्रीसहस्रैस्तु सेवितः ॥ ७
विष्णुलोकाद् ब्रह्मलोकं सम्प्राप्य मोदते पुनः।
भोगैः सुविपुलैस्तत्र तावत् कालं मनोहरैः ॥ ८
प्रजापतीन्द्रगन्धर्व्व-यक्षलोकमनुक्रमात्।
भोगान् नानाविधान् भुक्त्वा पृथिव्यां जायते पुनः॥९
कुले महति विप्राणां प्रज्ञा-शील-गुणान्वितः।
ततः स पूर्व्वभावेण योगीन्द्रं समुपासते ॥ १०
तत्सम्पर्काच्छिवज्ञानं प्राप्य योगन्तु सेवते।
योगाद्विरक्तः संसारात् प्राप्नोति परमं पदम् ॥ ११
अर्थपूजाग्निकार्य्याद्यैर्भेदैर्बहुविधैः स्थितः।
कर्म्मयज्ञः समाख्यातस्ततश्चान्द्रायणादिकः ॥ १२
स्वाध्यायश्च जपः प्रोक्तः शिवमन्त्रस्य स त्रिधा।
ध्यानयज्ञः समाख्यातः शिवचिन्ता मुहुर्म्मुहुः ॥ १३
अध्यापनमध्ययनं व्याख्या श्रवण-चिन्तने।
इति पञ्चप्रकारोऽयं ज्ञानयज्ञः प्रकीर्त्तितः ॥ १४
उत्तरोत्तरवैशिष्ट्यं सर्व्वेषां परिकीर्त्तितम्।
पञ्चानामपि यज्ञानां ज्ञानं ध्यानं विमुक्तिदम् ॥१५
नास्ति ज्ञानं विना ध्यानं नास्ति ज्ञानमयोगिनः।
ज्ञानं ध्यानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ॥ १६
ज्ञानं प्रसन्नमेकाग्रमशेषापायवर्ज्जितम्।
योगाभ्यासेन सततं विरक्तस्योपजायते ॥ १७
श्रुतिचिन्तामयं ज्ञानं विकल्पबहुलं यतः।
तस्मात् तदप्रसन्नत्वाच्चञ्चलं न विमुक्तिदम् ॥ १८
श्रुत्वा विवर्द्धयेज्ज्ञानं प्राज्ञस्तच्चिन्तयेत् सदा।
विमलं तत् प्रसन्नञ्च चिन्त्यमानं भवेच्छनैः ॥ १९
आरम्भकाले श्रवणं क्रियाकाले च चिन्तनम्।
निश्चयाद्भावनं तस्य निष्ठाकाले प्रसन्नता ॥ २०
ज्ञानं विकल्पबहुलं रागाद्यैः कलुषीकृतम्।
तच्च ज्ञानं विशुद्ध्यर्थं कलुषोदकवद्भवेत् ॥ २१
निःसारमतिकष्टञ्च भवं भावयतः शनैः।
नभसीव रजः काले तत् प्रसन्नं क्रमाद्भवेत् ॥ २२

यदा प्रसन्नमेकाग्रं स्तिमितोदधिसंस्थितम् ।
तत् तज्ज्ञानमिति प्रोक्तम ज्ञानमितरत् पुनः ॥ २३
इति प्रसन्नं यज्ज्ञानं भावनामयमुत्तमम् ।
रागाद्यैरपरामृष्टं तद्विज्ञेयं विमुक्तिदम् ॥ २४
अज्ञानपाशबद्धत्वादमुक्तः पुरुषः स्मृतः ।
तस्माज्ज्ञानेन मुक्तः स्यादज्ञानस्य परिक्षयात् ॥२५
संसारवीजमज्ञानं संशार्थ्यज्ञः पुमान् यतः ।
ज्ञानात् तस्य निवृत्तिः स्यात्प्रकाशात् तमसो यथा॥२६
अज्ञाने सति रागाद्या धर्म्माधर्म्मौ च तद्वशौ ।
धर्म्माधर्म्मवशात् पुंसां शरीरमुपजायते ॥ २७
शरीरे सति संक्लेशैः सर्व्वैः संयुज्यते यतः ।
ततः क्लेशव्यपोहार्थं पुनर्द्देहं न कामयेत् ॥ २८
जगतस्तत्त्वसम्बोधादज्ञानं विनिवर्त्तयेत् ।
अज्ञानविनिवृत्तौ च रागादीनामसम्भवः ॥ २९
रागाद्युपशमात् पुंसां पुण्य-पापपरिक्षयः ।
तत्क्षयाच्च शरीरेण पुनः संयुज्यते न हि ॥ ३०
अशरीरश्च संक्लेशैः सर्व्वदैव न बाध्यते ।
क्लेशमुक्तः प्रसन्नात्मा मुक्त इत्यभिधीयते ॥ ३१
तस्मादज्ञानमूलानि सर्व्वदुःखानि देहिनाम् ।
ज्ञानेन च तदज्ञानं निवर्त्तेत न कर्म्मभिः ॥ ३२
नास्ति ज्ञानादृते पुंसां पुण्यपापपरिक्षयः ।
मोक्षार्थी पुरुषस्तस्माज्ज्ञानमेव सदाभ्यसेत् ॥ ३३
मृज्यमानं सदा यद्वद्दर्पणं निर्म्मलं भवेत् ।
ज्ञानाभ्यासात् तथा पुंसां बुद्धिर्भवति निर्म्मला ॥ ३४
ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ।
स सर्व्वकार्य्याण्युत्सृज्य तत्रैव परिधावति ॥ ३५
ज्ञानामृतरसः प्रायो येन नास्वादितो भवेत् ।
स चान्यत्रैव रमते तद्विहायैव दुर्म्मतिः ॥ ३६
ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किञ्चित् कर्त्तव्यमस्ति चेन्न स तत्त्ववित् ॥३७
लोकद्वयेऽपि कर्त्तव्यं किञ्चिदस्य न विद्यते ।
इहैव स विमुक्तः स्यात् सम्पूर्णः प्रियदर्शनः ॥ ३८
नास्ति ज्ञानात् परं किञ्चित् पवित्रं पापनाशनम् ।
तत् सदाभ्यासयोगेन शनैरात्मनि विन्दति ॥ ३९

व्रतानि दानानि पतपांसि यज्ञाः
सन्न्यास-तीर्थाश्रम-कर्म्म-योगाः ।
स्वर्गार्थमेतत् पुनरेति मर्त्त्यो
ज्ञानं ध्रुवं शान्तिकरं महार्थम् ॥ ४०
नित्यं पठेद्यो नियतो महात्मा
तथैकचित्तः सततं शृणोति ।
पौराणधर्म्मं मुनिभिः प्रणीतं
पापक्षयात् तस्य भवेद्विमुक्तिः ॥ ४१

यज्ञैर्द्देवत्वमाप्नोति तपोभिर्ब्रह्मणः पदम् ।
दानेन विविधान् भोगान् ज्ञानान्मोक्षमवाप्नुयात् ॥४२
धर्म्मरज्ज्वा व्रजेदूर्द्ध्वं पापरज्ज्वा व्रजत्यधः ।
द्वयं ज्ञानासिना छित्त्वा विदेहः शिवमृच्छति ॥ ४३
ज्ञानिनां यद्यधर्म्मेण भवेद्बन्धः शुभेन वा ।
ध्रुवं मुक्तिः कथं तेषां निबद्धानां शुभाशुभैः ॥ ४४
न हि देहभृता शक्यं कर्म्म त्यक्तुं शुभाशुभम् ।
गच्छतस्तिष्ठतो वापि तद्वश्यं भवेद्यतः ॥ ४५
अधर्म्मविनिवृत्त्यैव भवेत् पुण्यमकुर्व्वतः ।
धर्म्मत्यागादधर्म्मश्च स तिष्ठेन्निश्चलः कथम् ॥ ४६
तस्माज्ज्ञानासिना छित्त्वा अशेषं कर्म्मबन्धनम् ।
कामाकामकृतं छित्त्वा शुद्धस्त्वात्मनि तिष्ठति ॥ ४७
तथा वह्निर्महादीप्तः शुष्कमार्द्रञ्च निर्द्दहेत् ।
तथा शुभाशुभं कर्म्म ज्ञानान्निर्द्दहते क्षणात् ॥ ४८
यद्वन्मन्त्रबलोपेतः क्रीड़न् सर्पैर्न दृश्यते ।
क्रीड़न् न लिप्यते ज्ञानी तद्वदिन्द्रियपन्नगैः ॥ ४९
मन्त्रौषधिबलैर्यद्वज्जीर्य्यते भक्षितं विषम् ।
तद्वत् सर्व्वाणि पापानि जीर्य्यन्ते ज्ञानिनां क्षणात् ५०
यथा ज्ञानं तथा ध्यानं ज्ञानं ध्यानं समं स्मृतम् ।
ज्ञानध्यानरतः सौख्यं मुनिर्मोक्षञ्च विन्दति ॥ ५१
ध्यानादैश्वर्य्यमतुलमैश्वर्य्यात् सौख्यमुत्तमम् ।
ज्ञानेन तत् परित्यज्य वितनुर्मुक्तिमाप्नुयात् ॥ ५२
सर्व्वेषामेव यज्ञानां ध्यानयज्ञः परः स्मृतः ।
नित्यः शुद्धः प्रसन्नश्च सर्व्वदोषविवर्ज्जितः ॥ ५३
शुक्लः कृष्णः परः सूक्ष्मः शुचिः शुद्धः समाधिजः ।
ध्यानयज्ञः परो यज्ञः स्थूलः शुद्धश्च कर्म्मणाम् ॥५४
अन्तर्यागोपचारेण यः पूजयति शङ्करम् ।
ध्यानयज्ञेन सततं स याति परमां गतिम् ॥ ५५
यमादिनियमैः पुष्पैरात्मैकादशभिः परैः ।
दशदिक्षु तथा मध्ये यजेत परमेश्वरम् ॥ ५६

कर्म्मयज्ञात् तपोयज्ञो विशिष्टो दशभिर्गुणैः ।
जपयज्ञस्तपोयज्ञाज्ज्ञेयः शतगुणोत्तरः ॥ ५७
ज्ञानध्यानात्मकः सूक्ष्मः शिवयोगो महामखः ।
पूजया विपुलं राज्यमग्निकार्य्येण सम्पदः ॥ ५८
तपेन पापसंशुद्धिर्ज्ञान-ध्यानेन मुच्यते ।
क्षीणाशेषपापस्य ज्ञानध्याने भवेन्मतिः ॥ ५९
पशूनां कोटिभिर्योगस्तदर्द्धेन हुताशनः ।
मुनीनां षष्टिभिश्चापैर्धर्म्मचैतं तदर्द्धतः ॥ ६०
अग्नौ क्रियावतो देवो हृदि देवो मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां ज्ञानिनां सर्व्वतः शिवः ॥ ६१
शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ।
तद्रूपभावनायैव प्रतिमा परिकल्पिता ॥ ६२
यः स्मरेत् सर्व्वगं शान्तं तस्यात्मस्थः शिवः सदा ।
आत्मस्थं ये न पश्यन्ति तीर्थे मार्गन्ति ते शिवम् ॥ ६३
दिवसं दिवसार्द्धं वा यत्र तिष्ठन्ति योगिनः ।
तस्माङ्गल्यं पवित्रञ्च तत् तीर्थं तत् तपोवनम् ॥ ६४
जिज्ञासुरपि योगस्य यां गतिं लभते मुनिः ।
न तां गतिमवाप्नोति सर्व्वैरपि महामखैः ॥ ६५
यदि क्लेशेन महता भवेत् पुण्यं महाफलम् ।
महापाषाणवाहिभ्यो न तत् स्याद्रत्नवाहिनाम् ॥ ६६
श्रमश्चेतिविनाशो वा नित्यं पाषाणवाहिनाम् ।
सुखस्वात्यर्थसम्प्राप्तिर्भवेद्दै रत्नवाहिनाम् ॥ ६७
कष्टैः सुयज्ञैश्च तपोभिरुग्र-
यैत् प्राप्यते धर्म्ममनन्तसंख्यम् ।
तच्छुद्धभावेन शिवं क्षणार्द्धं
ध्यात्वा परं मुक्तिकरं विशुद्धम् ॥ ६८
यथेहान्तश्चरा राज्ञः प्रियाः स्युर्न वहिश्चराः ।
तदान्तर्ध्याननिरताः प्रियाः शम्भोर्न कर्म्मिणः ॥ ६९
यथान्तर्दन्तिनो दन्ताः सुखिनो न वहिःस्थिताः ।
तथान्तर्ध्याननिरताः सत्फला न वहिश्चराः ॥ ७०
सदान्तर्ध्यानयोगेन शिवमभ्यर्च्चयेत् ततः ।
येन सम्प्राप्यते ज्ञानं महार्थं गूढ़गोचरम् ॥ ७१
कर्म्मयोगो भवेन्नो चेच्छिवो विज्ञायते कुतः ।
वैर्थ्यांसा च सहायत्वात् सुहृदेश्च यथा गजः ॥ ७२
नैकेन हि मरुद्वर्त्म गच्छतीह यथाण्डजः ।
कर्म्म ज्ञानमयो द्वाभ्यामाप्यते परमं पदम् ॥ ७३
समभ्यच्च मुहूर्त्तार्द्धं ध्यायेत परमेश्वरम् ।
यद्भवेत् सुमहत् पुण्यं न चान्तस्तस्य विद्यते ॥ ७४
यद्यन्तरा विपद्येत ज्ञानयोगार्थमुद्यतः ।
श्रद्धया गुरुभक्त्या च रौद्रं लोकं स गच्छति ॥ ७५
अनुभूय सुखं तत्र कुले जायेत योगिनाम् ।
ज्ञानयोगं ततः प्राप्य संसारमतिवर्त्तते ॥ ७६
मृदुमध्योत्तमा चैव श्रद्धा पुंसां त्रिधा मता ।
जन्मत्रयाज्ज्ञानयोगमश्रद्धोऽपीह विन्दति ॥ ७७
व्रतैश्च सुतपोभिश्च यद्यत् कामं समीहते ।
भक्त्या शिवात् तमाप्नोति तज्ज्ञानात् परमं पदम् ॥ ७८
इत्येवं ज्ञानयोगस्य माहात्म्यं समुदाहृतम् ।
तदभ्यासरतानाञ्च मुनीनां शान्तचेतसाम् ॥ ७९
दशजान्मनिकं दानं कर्म्मयोगरतात्मनाम् ।
शतजन्मभवं दानं तपोनिष्ठाय दीयते ॥ ८०
तपोयज्ञाभियुक्तेभ्यः सहस्रगुणितं स्मृतम् ।
तथा लक्षगुणं दानं प्रधानं शिवयोगिनाम् ॥ ८१
अत्यल्पमपि यद्दानं शिवज्ञानार्थवादिनाम् ।
तन्महाप्रलयं यावद्दातुर्भोगाय कल्पते ॥ ८२
न दानमल्पं बहु वा किञ्चिदस्ति विजानतः ।
देश-काल-विधि-श्रद्धा-पात्रदत्तं तदक्षयम् ॥ ८३
पात्रे देशे च काले च विधिना श्रद्धया च यत् ।
दत्तं कृतं हुतं श्रेष्ठं तदनन्तफलं भवेत् ॥ ८४
तिलार्द्धमात्रकेणापि परिमाणेन दीयते ।
सत्पात्रे श्रद्धया किञ्चित् तद्भवेत् सार्व्वकामिकम् ॥ ८५
यद्धौतं ज्ञानसलिलैः शीलभस्मप्रमार्ज्जितम् ।
तत् पात्रं सर्व्वपात्राणामुत्तमं सार्व्वकामिकम् ॥ ८६
ज्ञानोडुपेन यः पुंसां त्राता संसारसागरात् ।
अज्ञानफेनिलं त्राता तत् पात्रं परमं स्मृतम् ॥ ८७
ज्ञानप्लवबलोपेतो याति पापमहार्णवात् ।
नाज्ञानी तारयेदन्यं किं शिला तारयेच्छिलाम् ॥ ८८
शिवयोगी गृहे यस्य भिक्षां गृह्णाति सत्कृताम् ।
कुलमुत्तारयेत् तस्य नरकार्णवसंस्थितम् ॥ ८९
यज्ञाग्निहोत्रतीर्थेषु यत् फलं परिकल्पितम् ।
योगिनामन्नदानेन तत् समग्रं फलं लभेत् ॥
ज्ञानिने शान्तचित्ताय शिवध्यानरताय च ।
[illegible] सर्व्वपापैः प्रमुच्यते ॥ ९१

एकं मुनिवरं शान्तमीशानार्पितमानसम्।
भोजयित्वा सकृद्भक्त्या सर्व्वान् कामानवाप्नुयात्॥ ९२
पितॄनुद्दिश्य यः श्राद्धे भोजयेच्छिवयोगिनः।
स गच्छेदैश्वरं स्थानमेकविंशतिकुलान्वितः॥ ९३
ध्यायमानः शिवं योगी भुङ्क्तेऽन्नं सततं यतः।
ततः साक्षाच्छिवेनैतत् सुभुक्तमशनं भवेत्॥ ९४
शिवाय सर्व्वपाकान्नं निवेद्याग्नौ च होमयेत्।
कल्पयेच्च गुरोर्भागमित्ययं सततं विधिः॥ ९५
शिवाग्नि-गुरु-विप्रेभ्यः सर्व्वपाकाग्रमन्वहम्।
यो निवेद्यात्मना भुङ्क्ते स रुद्रो नात्र संशयः॥ ९६
अनिवेद्य च यो भुङ्क्ते स भुङ्क्ते किल्बिषं नरः।
कृषि-वृत्त्यादि-वाणिज्य-क्रोध-सम्मार्ज्जनादिभिः॥ ९७
पुंसां पापानि वर्द्धन्ते सूनादोषैस्तु पञ्चभिः।
सम्मार्ज्जनाञ्जनं तोयमग्निकुण्डनिपेषणम्॥ ९८
सूनापञ्च गृहस्थानां नित्यं पापाभिवृद्धये।
शिवाग्निगुरुपूजाभिः पापैरेतैर्न लिप्यते॥ ९९
अन्यैश्च पातकैर्घोरैस्तस्मात् सम्पूजयेत् त्रयम्।
शिवाग्निगुरुनैवेद्यैर्यावत् सिक्थास्तु संख्यया॥ १००
तावद्वर्षसहस्राणि दाता शिवपुरे वसेत्।
घृतापूपान्नसिक्थैश्च पुण्यं दशगुणोत्तरम्॥ १०१
षाष्टिकौदननैवेद्ये सहस्रगुणितं फलम्।
सुगन्धिशालिनैवेद्ये विज्ञेयं तद्दशाधिकम्॥ १०२
रक्तशालिसुनैवेद्ये फलं दशगुणं हि तत्।
कलमाशालिनैवेद्ये तस्य लक्षाधिकम् फलम्॥ १०३
एवं शालिविशेषेण फलं स्यादुत्तरोत्तरम्।
सहाज्ञनघृतैर्भूयस्तत् पुण्यमतिवर्द्धते॥ १०४
क्षीरभक्तेन नैवेद्ये तस्य पुण्यं दशाधिकम्।
दधि-शर्करया युक्ते तत् पुण्यं स्याद्दशाधिकम्॥ १०५
रसान्नं सुरसं शीतं कर्पूरसुरभीकृतम्।
निवेद्य पुण्यमाप्नोति दशकोटिगुणाधिकम्॥ १०६
गुड़खण्डकृतैर्भक्ष्यैर्घृतेन परिपाचितैः।
कोट्युत्तरन्तु नैवेद्यैः शिवाग्निगुरुबन्धुषु॥ १०७
यथा यथा च स्वादूनि स्निग्धानि सुरभीणि च।
भक्त्या निवेद्य भुञ्जानः फलमक्षय्यमाप्नुयात्॥ १०८
एवं यः कुरुते श्राद्धं भक्तितः शिवयोगिनाम्।
स पितॄन् सर्व्वपापेभ्यः समुद्धृत्य दिवं नयेत्॥ १०९
वस्त्रान्नपानैर्भक्त्या च पूजयेच्छिवयोगिनः।
युगपत् पूजितास्तेन ब्रह्म-विष्णु-महेश्वराः॥ ११०
यः सम्पूज्य शिवं श्राद्धे पूजयेच्छिवयोगिनः।
नृत्यन्ति पितरस्तृप्ता गायन्ति च पितामहाः॥ १११
शिवध्यानिनमायान्तं भस्माङ्गं गृहसंस्थितम्।
क्रीड़न्त्योषधयः सर्व्वा यास्यन्त्यः स्वर्गमुत्तमम्॥ ११२
तस्मादतिथिवेलायामभिगच्छेत् कृताञ्जलिः।
शक्त्या सम्पूजयेद्भक्त्या स्वयं पानान्नभोजनैः॥ ११३
रूपान्वितं विरूपञ्च मलिनं मलिनाम्बरम्।
योगीन्द्रशङ्कया नित्यमतिथिं न विचारयेत्॥ ११४
ये द्विषन्ति शिवं देवान् वेदान् यज्ञानथागमान्।
अधोमुखोर्द्ध्वपादास्ते पच्यन्ते नरकादिषु॥ ११५
क्रिमिभिर्भिन्नवदनास्तप्यमानाश्च वह्निना।
ते पीड्यन्ते महाघोरैर्यावदाभूतसंप्लवम्॥ ११६
येऽपवादं हि शृण्वन्ति साधूनां योगिनामपि।
ते विशेषेण पच्यन्ते नरकेष्वा महीक्षयात्॥ ११७
श्रोतरि सति वक्तारो भवन्ति श्रूयते न तु।
तस्माच्छ्रोता तु पापीयान् श्रोतुस्तद्द्विगुणं भवेत्॥ ११८
वक्ता श्रोतानुमन्ता च प्रयोक्ता दूषणस्य च।
एतैस्तु यः सुसम्पर्की पञ्चैते नारकाः स्मृताः॥ ११९
अज्ञानपङ्कनिर्मग्नमात्मत्राणविवर्ज्जितम्।
अपुण्यगिरिणाक्रान्तमपात्रं गुणवर्ज्जितम्॥ १२०
आमपात्रे रसो यद्वन्नश्यते द्राक् सभाजनः।
दानमह्ने तथा न्यस्तं सह पात्रेण नश्यति॥ १२१
यद्वीजमूषरे न्यस्तं सर्व्वं निष्फलतां व्रजेत्।
दानं तद्वदपात्रे तु विन्यस्तं निष्फलं भवेत्॥ १२२
भस्मनीव हुतं द्रव्यं यथा होतुश्च निष्फलम्।
ज्ञानाग्निरहिते विप्रे तथा दानं निरर्थकम्॥ १२३
यथा षण्ढो वरस्त्रीषु यथा गौर्गवि निष्फला।
ब्राह्मणस्य तथा जन्म ज्ञानहीनस्य निष्फलम्॥ १२४
लोहोडुपेन प्रतरन् निमज्जत्युदके यथा।
तथा दाता ग्रहीता च पतत्यन्धे तमस्यतः॥ १२५
कारुण्यात् सर्व्वभूतेभ्यः श्रद्धया यत् प्रदीयते।
दानं तदपि विज्ञेयं सार्व्वकामिकमुत्तमम्॥ १२६
दीनान्ध-कृपणानाथ-बाल-वृद्ध-क्षुधातुरान्।
एतान् सम्पूजयेन्नित्यमर्थी गृह्णाति नित्यशः॥ १२७

...नः पात्रं सम्यक्त्वान्न तेऽर्थिनः।
...पि हि तत्पूजा पर्य्याप्तं जन्मनः फलम्॥१२८
...हि स्वार्थं समुद्दिश्य प्रतिगृह्णन्ति साधवः।
...पकाराय गृह्णन्ति मुनयो मनाक्॥ १२९
...साधुभिर्यत्नात् प्रार्थनीयोऽनुकम्पया।
...तस्य दारिद्र्यं दानाद्दैश्वर्य्यमाप्नुयात्॥१३०
...पकाराय वदत्यर्थी ददस्व मे।
...ता व्रजेदूर्द्ध्वमधस्तिष्ठेत् प्रतिग्रही॥ १३१
...वं वदत्यर्थी जनं बोधयतीव सः।
...कष्टमर्थित्वं प्रागदानफलं हि तत्॥ १३२
...न्ति न याचन्ते देहीति कृपणा जनाः।
...मदानस्य मा भूदेवं भवानिति॥ १३३
...णमायान्तमर्थिनं को न पूजयेत्।
...स्वर्गमवाप्नोति कोऽनुबन्धुरिहार्थिनः॥ १३४
...फलेनापि दातारमनुयोजयेत्।
...र्थी गृहं दातुः कस्तं न प्रतिपूजयेत्॥ १३५
...स्युः कथं पूज्या याचमाना दिने दिने।
...दप्यनिच्छन्तो योजयन्ति श्रिया सह॥१३६
...नि मार्गन्तं को न विद्यात् गुरुं यथा।
...दर्पणस्येव यः करोति दिने दिने॥ १३७
...नकं कृत्वा दानं गृह्णाति यो द्विजः।
...गतिस्तेन दातुर्दर्शयतीव सः॥ १३८
...ष्ठताधस्तादन्येनोपरि तिष्ठता।
...चकयोर्भेदः कराभ्यामेव सूचितः॥ १३९
...र्थिनि दीने तु त्यक्त्वा पात्रं प्रतीच्छते।
...धर्म्मयुक्तत्वान्न दाता परमार्थतः॥ १४०
...नो नरा न स्युर्दातुर्धर्म्मः कथं भवेत्।
...षु भवेद्दानं सति दाने च तत् फलम्॥ १४१
...लुब्धाः सदा दीना न स्युरप्रियवादिनः।
...दानं दया चान्तिर्भाव्यन्ते साधुभिस्तथा॥१४२
...नाम न देयं स्यात् स्वं सम्प्राप्तार्थिने गृहे।
...वाक्यान्यपि नष्टानि प्रियाण्यनुगतानि च॥ १४३
...थानाभिगमनं स्वागतं स्वासनं प्रियम्।
...कमनुव्रज्या स्वर्गसोपानसप्तकम्॥ १४४
...वित्तानुसारेण कदा कस्य भविष्यति।
...दास्यति भूतं हि सोऽर्थिने गृहमागते॥ १४५

न मैत्री धर्म्मराजेन सार्द्धन्तु केनचित् क्वचित्।
मत्यन्त्वदत्तदानं यन्न नयिष्यति साम्प्रतम्॥ १४६
स्वभावाद्दानकामो यः स स्वर्गी नात्र संशयः।
दानं प्रियविनिर्म्मुक्तं नष्टमाहुर्मनीषिणः॥ १४७
सकृदपीह दातव्यं प्रियेणाक्षयमिच्छता।
प्रत्याख्यानमपि श्रेयः प्रियानुनयपेशलम्॥ १४८
न तु दानमसत्कारपारुष्यमलिनीकृतम्।
वरं न दत्तमर्थिभ्यः संक्रुद्धेनान्तरात्मना॥ १४९
दानं व्रतानि नियमा यज्ञा ध्यानं हुतं तपः।
यत्नेनापि कृतं सर्व्वं क्रोधेनैव वृथा भवेत्॥ १५०
यः श्रद्धयार्थिने दद्यात् प्रतिगृह्णन्ति चार्थिनः।
तावुभौ गच्छतः स्वर्गं नरकन्तु विपर्य्यये॥ १५१
औदार्य्यं सङ्गतं मैत्रीमनुकम्पाममत्सरम्।
गुणानेव हि तान् पश्च दातुर्दानं महाफलम्॥१५२
वाराणसी कुरुक्षेत्रं प्रयागं पुष्कराणि च।
गङ्गा समुद्रतीरञ्च नैमिषामरकण्टकम्॥ १५३
श्रीपर्व्वतो महापुण्यो गोकर्णो ज्ञानपर्व्वतः।
इत्यादि कीर्त्तिता देशाः सुर-सिद्धनिषेविताः॥ १५४
सर्व्वं शिवाश्रमं पुण्यं सर्व्वा नद्यः सपर्व्वताः।
गो-सिद्ध-मुनिवासश्च पुण्यदेशाः प्रकीर्त्तिताः॥ १५५
शिवायतनसंस्थाने यदल्पमपिदीयते।
तदनन्तफलं ज्ञेयं शिवक्षेत्रानुभावतः॥ १५६
ग्रहणं चन्द्रसूर्य्याभ्यामुत्तरायणदक्षिणम्।
विषुवत् सव्यतीपातं षड़शीतिमुखं तथा॥ १५७
दिनच्छिद्राणि संक्रान्तिर्युगान्ताश्च युगादयः।
एते कालाः समाख्याताः पुंसां पुण्यविवर्द्धनाः॥ १५८
भक्तिभावयुतं काले दानं दत्तं सदाक्षयम्।
श्रद्धा मातेव जननी ज्ञानस्य सुकृतस्य च॥ १५९
तस्माच्छ्रद्धां समुत्पाद्य देयमक्षयमिच्छता।
यद्दानं श्रद्धया पात्रे विधिवत् प्रतिपादितम्॥ १६०
तदनन्तफलं तेषामपि ग्रासार्द्धमात्रकम्॥ १६१
आर्त्तेषु दीनेषु गुणान्वितेषु
यद्दा बहु स्वल्पमपि प्रदत्तम्।
तत् सर्व्वकामान् समुपैति लोके
अत्रैव लोके प्रवदन्ति तज्ज्ञाः॥ १६२
इति श्रीशैवे धर्म्म... सप्तदशोऽध्यायः॥ १७॥

अष्टादशोऽध्यायः।

सूत उवाच।

तत्र ये पापनिलयाः स्थूला नरकहेतवः।
ते समासेन कथ्यन्ते वाङ्मनःकायसंस्थिताः॥ १
परस्त्रीद्रव्यसङ्कल्पं चेतसानिष्टचिन्तनम्।
अकार्य्याभिनिवेशश्च चतुर्द्धा कर्म्म मानसम्॥ २
अनिबद्धप्रलापित्वमसत्यञ्चाप्रियञ्च यत्।
परोक्षतश्च पैशुन्यं चतुर्द्धा कर्म्म वाचिकम्॥ ३
अभक्ष्यभक्षणं हिंसा मिथ्याकार्य्यनिवेशनम्।
परस्वानामुपादानं चतुर्द्धा कर्म्म कायिकम्॥ ४
इत्येतद्द्वादशविधं कर्म्म प्रोक्तं नृसाधनम्।
अस्य भेदान् पुनर्वक्ष्ये येषां फलमनन्तकम्॥ ५
ये द्विषन्ति महादेवं संसारार्णवतारकम्।
सुमहत्पातकोपेतास्ते यान्ति निरयं नराः॥ ६
दूषयन्ति शिवं शास्त्रं ज्ञानं सर्व्वार्थसाधकम्।
सुमहत्पातकं तेषां निरयार्णवगामिनाम्॥ ७
ये शिवज्ञानवक्तारं निन्दन्ति च तपस्विनम्।
गुरून् पितृनघोपेतास्ते यान्ति निरयार्णवम्॥ ८
शिवनिन्दा गुरोर्निन्दा शिवज्ञानस्य दूषणम्।
देवद्रव्यापहरणं द्विजद्रव्यविनाशनम्॥ ९
हरन्ति ये च संमूढाः शिवज्ञानस्य पुस्तकम्।
महान्ति पातकान्याहुरनन्तफलदानि षट्॥ १०
नाभिनन्दन्ति ये दृष्ट्वा शिवपूजां प्रकल्पिताम्।
न नमन्त्यर्चितं दृष्ट्वा पूजितं न स्तुवन्ति च॥ ११
यथेष्टचेष्टा निःशङ्काः सन्तिष्ठन्ते रमन्ति च।
उपचारविनिर्म्मुक्ताः शिवाग्निगुरुसन्निधौ॥ १२
स्नानसंस्कार-पूजाश्च ये न कुर्व्वन्ति पर्व्वसु।
विधिशहा गुरूणाञ्च कर्म्मयोगव्यवस्थिताः॥ १३
ये त्यजन्ति शिवाचारं शिवभक्तान् द्विषन्ति च।
असम्पूज्य शिवज्ञानं येऽधीयते लिखन्ति च॥ १४
अन्यायतः प्रयच्छन्ति शृण्वन्त्युच्चारयन्ति च।
विक्रीणन्ति च लोभेन कुज्ञाननियमेन वा॥ १५
असंस्कृतप्रदेशेषु यथेष्टं स्थापयन्ति च।
शिवज्ञानकथाक्षेपं यः कृत्वान्यत् प्रभाषते॥ १६
न ब्रवीति च यः सत्यं न प्रदानं करोति च।
अशुचिर्वा शुचिस्थाने यः प्रवक्ति शृणोति च॥ १७
गुरुपूजादि कृत्वैव यः शास्त्रं श्रोतुमिच्छति।
न करोति च शुश्रूषामाज्ञां भक्तिञ्च भावतः॥ १८
नाभिनन्दति तद्वाक्यमुत्तरञ्च प्रयच्छति।
गुरुकर्म्मणि साध्यञ्च तदुपेक्षां करोति च॥ १९
गुरुमार्त्तमशक्तं वा विदेशप्रस्थितं तथा।
वैरिभिः परिभूतं वा यः सन्त्यजति पापकृत्॥ २०
तद्भार्य्या-पुत्र-मित्रेषु यश्चावज्ञां करोति च।
एवं सुवाचकस्यापि गुरोर्धर्म्मानुदर्शिनः॥ २१
सुमहत्पातकान्याहुः शिवनिन्दासमानि च।
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः॥ २२
महापातकिनस्त्वेते तत्संयोगी च पञ्चमः।
क्रोधाल्लोभाद्भयाद्द्वेषाद्ब्राह्मणस्य वधे तु यः॥ २३
मर्म्मान्तिकं महादोषमुक्त्वा स ब्रह्महा भवेत्।
ब्राह्मणं यः समाहूय उक्त्वा पश्चाद्ददाति न॥ २४
निर्द्दोषं दूषयेद्यस्तु स नरो ब्रह्महा भवेत्।
यश्च विद्याभिमानेन निस्तेजयति सुद्विजम्॥ २५
उदासीनं सभामध्ये ब्रह्महा स प्रकीर्त्तितः।
मिथ्यागुणैर्य आत्मानं नयत्युत्कर्षतां बलात्॥ २६
गुणानपि निरुन्ध्याद्यः स च वै ब्रह्महा भवेत्।
क्षुत्तृषातप्तदेहानां गृहत्यागी सतान्तु यः॥ २७
उद्वेगजननः क्रूरः स च वै ब्रह्महा भवेत्।
परदोषान् परिज्ञाय नृपकर्णे जपेत् तु यः॥ २८
पापीयान् पिशुनः क्षुद्रः स च वै ब्रह्महा भवेत्।
गवां तृषाभिभूतानां द्विजानां गुरुपूर्व्वकम्॥ २९
यः समाचरते विघ्नं तमाहुर्ब्रह्मघातकम्।
देव-द्विज-गवां भूमिं प्रदत्तां हरते तु यः॥ ३०
प्रनष्टामपि कालेन तमाहुर्ब्रह्मघातकम्।
देव-द्विजस्वहरणं न्यायेनैवोपपादितम्॥ ३१
ब्रह्महत्यासमं ज्ञेयं पातकं नात्र संशयः।
अधीत्य यो द्विजो वेदं व्रतज्ञानं शिवात्मकम्॥ ३२
परित्यजति यो मूढः सुरापानस्य तत् समम्।
यत् किञ्चिद्धि व्रतं गृह्य नियमं यजनं तथा॥ ३३
सन्त्यागी पञ्चयज्ञानां सुरापानेन तत्समम्।
पितृमातृपरित्यागी कूटसाक्षी द्विजेऽनृते॥ ३४
अप्रियं शिवभक्तानामभक्ष्यस्य च भक्षणम्।

...निरपराधानां प्राणिनाञ्चोपघातनम् ॥ ३५
...र्थं प्रति यत् साधून् धर्म्मार्थन्तु नियोजयेत् ।
...मार्गे वने ग्रामे यच्चैवाग्निः प्रदीयते ॥ ३६
...पापानि घोराणि ब्रह्महत्यासमानि तु ।
...सर्व्वस्वहरणं नर-स्त्री-गज-वाजिनाम् ॥ ३७
...रजत-वस्त्राणामोषधीनां रसस्य च ।
...गुरु-कर्पूर-कस्तूरी-पटवाससाम् ॥ ३८
...न्यासापहरणं रुक्मस्तेयसमं स्मृतम् ।
...नां वरयोग्यानामदानात् सदृशे वरे ॥ ३९
पुत्र-मित्र-कलत्रेषु गमनं भगिनीषु च ।
कुमारीसाहसं घोरमन्त्यजस्त्रीनिषेवणम् ॥ ४०
सवर्णायाश्च गमनं गुरुभार्य्यासमं स्मृतम् ।
महापातकतुल्यानि शृणुध्वमुपपातकम् ॥ ४१
द्विजायार्थं प्रतिज्ञाय द्विजेभ्यो न ददाति चेत् ।
न च स्मारयते यस्तु तयोः स्यादुपपातकम् ॥ ४२
द्विजद्रव्यापहरणं मर्य्यादाया व्यतिक्रमः ।
अतिमानोऽतिकोपश्च दाम्भिकत्वं कृतघ्नता ॥ ४३
अत्यन्तविषयासक्तिः कार्पण्यं शाठ्यमत्सरम् ।
परदाराभिगमनं साधुकन्यासु दूषणम् ॥ ४४
परिवित्तिः परिवेत्ता यया च परिविन्दति ।
तयोर्दानञ्च कन्यायास्तयोरेव च वञ्चनम् ॥ ४५
पुत्र-मित्र-कलत्राणामभावे स्वामिनस्तथा ।
भार्य्यायाश्च परित्यागः साधु-बन्धु-तपस्विनाम् ॥ ४६
गवां क्षत्रिय वैश्यानां स्त्री-शूद्राणां तथा वधः ।
शिवाश्रमतरूणाञ्च पुष्पारामविनाशनम् ॥ ४७
यः पीड़ामाश्रमस्थानामाचरेदल्पिकामपि ।
भृत्यपरिवारस्य पशु-धान्य-धनस्य वा ॥ ४८
कुप्य-धान्य-पशुस्तेयमपाठ्यानाञ्च पाठनम् ।
यज्ञारामतड़ागानां दारापत्यस्य विक्रयः ॥ ४९
तीर्थयात्रोपवासानां व्रतायतनकर्म्मिणाम् ।
स्त्रीधनान्युपजीवन्ति स्त्रीभिरत्यन्तनिर्ज्जिताः ॥ ५०
अरक्षणञ्च नारीणां मद्यपस्त्रीनिषेवणम् ।
कालागताप्रदानञ्च धान्यवृद्ध्युपसेवनम् ॥ ५१
निन्दितस्य धनादानं पण्यानां कूटविक्रयः ।
विषमारण्ययन्त्राणां सततं वृषवाहनम् ॥ ५२
उच्चाटनाभिचारौ च वश्यादानभिमन्त्रिकाः ।

जिह्वाकामोपभोगार्थं यस्यारम्भः सुकर्म्मसु ॥ ५३
मूल्यनाध्यापको नित्यं वेदज्ञानादिकञ्च यत् ।
व्रात्यत्वं व्रतसन्त्याग अन्याचारनिषेवणम् ॥ ५४
असच्छास्त्राधिगमनं शुष्कतर्कावलम्बनम् ।
देवाग्निगुरुसाधूनां निन्दा गो-ब्राह्मणस्य च ॥ ५५
प्रत्यक्षं वा परोक्षं वा राज्ञां मण्डलिनामपि ।
उत्सन्नपितृदेवेज्याः स्वकर्म्मत्यागिनश्च ये ॥ ५६
दुःशीला नास्तिकाः पापाः सदा चासत्यवादिनः ।
पर्व्वकाले दिवा चाप्सु वियोनौ पशुयोनिषु ॥ ५७
रजस्वलाया योनौ च मैथुनं यः समाचरेत् ।
स्त्री-पुत्र-मित्रसम्प्राप्तौ आशाच्छेदकराश्च ये ॥ ५८
जनस्याप्रियवक्तारः क्रूराः समयभेदिनः ।
भेत्ता तड़ागकूपानां संक्रमाणां रसस्य च ॥ ५९
एकपङ्क्तिस्थितानाञ्च पाकभेदं करोति यः ।
इत्येतैः स्त्री-नराः पापैरुपपातकिनः स्मृताः ॥ ६०
युक्ता एभिस्तथान्यानि शृणु तानि ब्रवीमि ते ।
ये गो-ब्राह्मण-कन्यानां स्वामि-मित्र-तपस्विनाम् ॥ ६१
विनाशयन्ति कार्य्याणि ते नरा नारका मताः ।
परश्रियाभितप्यन्ते ये परद्रव्यसूचकाः ॥ ६२
परद्रव्यहरा नित्यं तौल्यमिथ्यानुकारकाः ।
द्विजदुःखकरा ये तु प्रहारञ्चोद्धरन्ति ये ॥ ६३
यः सेवते द्विजः शूद्रं सुराञ्चाघ्राति कामतः ।
ये पापाभिरताः क्रूरा येऽपि हिंसाप्रिया नराः ॥ ६४
पङ्क्त्यर्थं येऽपि कुर्व्वन्ति दानयज्ञादिकां क्रियाम् ।
गोष्ठाग्नि-जल-रथ्यासु तरुच्छायानगेषु च ॥ ६५
त्यजन्ति ये पुरीषाद्यमारामायतनेषु च ।
जलाश्रमप्रपादिषु मद्यपानरता नराः ॥ ६६
कृतकेलिभुजङ्गाश्च रन्ध्रान्वेषणतत्पराः ।
वंशेष्टकाशिलाकाष्ठैः शृङ्गैः शङ्कुभिरेव च ॥ ६७
ये मार्गमनुरुन्धन्ति परसीमां हरन्ति ये ।
कूटशासनकर्त्तारः कूटकर्म्मक्रियारताः ॥ ६८
कूटयुद्धान्नवस्त्राणि कूटसंव्यवहारिणः ।
धनुषां शस्त्रशल्यानां कर्त्ता यः क्रयविक्रयी ॥ ६९
निर्द्दयोऽतीव भृत्येषु पशूनां दमनश्च यः ।
मिथ्याप्रवदतो वाच आकर्णयति यः शनैः ॥ ७०
स्वामि-मित्र-गुरुद्रोही मायावी चपलः शठः ।

भार्य्यापुत्त्रांश्चमित्त्राणि वाल-वृद्ध-कृशातुरान् ॥ ७१
भृत्यानतिथिबन्धूंश्च त्यक्त्वाश्नाति बुभुक्षितान् ।
यः स्वयं मिष्टमश्नाति विप्रेभ्यो न प्रयच्छति ॥ ७२
वृथापाकी स विज्ञेयो ब्रह्मवादिषु गर्हितः ।
नियमान् स्वयमादाय ये त्यजन्त्यजितेन्द्रियाः ॥ ७३
प्रव्रज्यावसिता ये च रहस्यस्य प्रभेदकाः ।
ये ताड़यन्ति गाः क्रूराः शपन्ते च मुहुर्म्मुहुः ॥ ७४
दुर्ब्बलान् ये न पुष्णन्ति सततं ये त्यजन्ति च ।
पीड़यन्ति च भारेण सततं वाहयन्ति च ॥ ७५
योऽक्षेत्रमात् प्रहराद्दा संयतान् न विमुञ्चति ।
यो भाराक्रान्तरोगार्त्तान् गोवृषांश्च क्षुधातुरान् ॥ ७६
न पालयन्ति यत्नेन गोघ्नास्ते नारकाः स्मृताः ।
वृषाणां वृषणान् ये च पापिष्ठा गालयन्ति च ॥ ७७
वाहयन्ति च गां वन्ध्यां महानारकिणो नराः ।
आशया समनुप्राप्तान् क्षुत्तृड्भ्यां श्रमकर्शितान् ॥ ७८
अतिथींश्च तथा श्रेष्ठान् स्वशक्त्या गृहमागतान् ।
अनाथान् विकलान्दीनान् वाल-वृद्ध-कृशातुरान् ७९
नानुकम्पन्ति ये मूढ़ास्ते यान्ति नरकार्णवम् ।
गृहेष्वर्था निवर्त्तन्ते श्मशानादपि वान्धवाः ॥ ८०
सुकृतं दुष्कृतञ्चैव गच्छन्तमनुगच्छति ।
आजाविको माहिषिकः सामुद्री वृषलीपतिः ॥ ८१
शूद्रवत् क्षत्त्रवृत्तिश्च नारकाः स्युर्द्विजाधमाः ।
शिल्पिनः कारवो वैद्या हेमकारनृपध्वजाः ॥ ८२
भृतकाः कूटसयुक्ताः सर्व्वे ते नारकाः स्मृताः ।
यश्चोचितमतिक्रम्य स्वेच्छयैव हरेत् करम् ॥ ८३
नरके पच्यते सोऽपि योऽपि दण्डरुचिर्नरः ।
उत्कोचकैः रुचिक्रीतैस्तस्करैश्च प्रपीड्यते ॥ ८४
यस्य राज्ञः प्रजा राष्ट्रे पच्यते नरकेषु च ।
ये द्विजाः प्रतिगृह्णन्ति नृपस्यान्यायवर्त्तिनः ॥ ८५
प्रयान्ति ते तु घोरेषु नरकेषु न संशयः ।
अन्यायात् समुपादाय द्विजेभ्यो यः प्रयच्छति ॥ ८६
प्रजाभ्यः पच्यते सोऽपि नरकेषु नृगो यथा ।
पारदारिकचोराणां चण्डानां विद्यते लवम् ॥ ८७
यत् तद्रक्षकस्यापि राज्ञो भवति नित्यशः ।
अचोरं चोरवत् पश्चेचोरं वाचौरुरूपिणम् ॥ ८८
अविचार्य्य नृपस्तं वै घातयेन्नरकं व्रजेत् ।
घृत-तैलान्न-पानादि-मधु-मांस-सुरासवम् ॥ ८९
गुड़ेक्षुशर्करान्नानि दधि-सूत्र-फलानि च ।
तृणं काष्ठं पत्रपुष्पमौषधं वा सभाजनम् ॥ ९०
उपानच्छत्र-शकटमासनञ्च कमण्डलुम् ।
त्रपु-ताम्रार-सीसानि शङ्खाद्यञ्च जलोद्भवम् ॥ ९१
वाद्यञ्च वैणवञ्चान्यद्गृहोपकरणानि च ।
ऊर्णा-कार्पास-कौशेय-पट्टसूत्रोद्भवानि च ॥ ९२
स्थूलसूक्ष्माणि वस्त्राणि ये लोभाद्धिहरन्ति च ।
एवमाद्यानि चान्यानि द्रव्याणि विविधानि च ॥ ९३
नरकेषु ध्रुवं गच्छेदपहृत्याल्पकान्यपि ।
यद्वा तद्वा परद्रव्यमपि सर्षपमात्रकम् ॥ ९४
अपहृत्य नरो याति नरकं नात्र संशयः ।
एवमाद्यैर्नरः पापैरुत्क्रान्तेः समनन्तरम् ॥ ९५
शरीरयातनार्थाय पूर्व्वाकारमवाप्नुयात् ।
यमलोकं व्रजन्त्येते शरीरेण यमाज्ञया ॥ ९६
यमदूतैर्महाघोरैर्नीयमानाः सुदुःखिताः ।
देवतिर्य्यङ्मनुष्याणामधर्म्मनिरतात्मनाम् ॥ ९७
धर्म्मराजः स्मृतः शास्ता सुघोरैर्विविधैर्वधैः ।
नियमाचारयुक्तानां प्रमादात् स्खलितात्मनाम् ॥ ९८
प्रायश्चित्तैर्गुरुः शास्ता न बुधैरिष्यते यमः ।
पारदारिकचौराणामन्यायव्यवहारिणाम् ॥ ९९
नृपतिः शासकः प्रोक्तः प्रच्छन्नानाञ्च धर्म्मराट् ।
तस्मात् कृतस्य पापस्य प्रायश्चित्तं समाचरेत् ॥ १००
नाभुक्तस्यान्यथा नाशः कल्पकोटिशतैरपि ।
यः करोति स्वयं कर्म्म कारयेच्चानुमोदयेत् ॥ १०१
कायेन मनसा वाचा तस्य पापगतिः फलम् ॥ १०२

इति श्रीशैवे महापुराणे धर्म्मसंहितायां पापभेदादिकथनं नामाष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः ।

सनत्कुमार उवाच ।

अथ पापैर्नरा यान्ति यमलोकं चतुर्व्विधैः ।
सन्त्रासजननं घोरं विवशाः सर्व्वदेहिनः ॥ १
गर्भस्थैर्जायमानैश्च बालैस्तरुणमध्यमैः ।

...णोपुंसकैर्जीवैर्जातव्यं सर्व्वजन्तुषु ॥ २
...शुभफलं तत्र देहिनां संविचार्य्यते ।
...शुभादिभिः सर्व्वैर्वशिष्ठप्रमुखैस्तथा ॥ ३
...केचित् प्राणिनः सन्ति ये न यान्ति यमक्षयम् ।
...श्यं हि कृतं कर्म्म भोक्तव्यं तद्विचार्य्यते ॥ ४
...ये शुभकर्म्माणः सौम्यचित्ता दयान्विताः ।
...ते यान्ति सौम्येन पूर्व्वं यमनिकेतनम् ॥ ५
...दुष्क पापकर्म्माणः पापदानविवर्ज्जिताः ।
...घोरेण पथा यान्ति दक्षिणेन यमालयम् ॥ ६
...ड़शीतिसहस्राणि योजनानामतीत्य सः ।
...वैवस्वतपुरं याति नानारूपमवस्थितम् ॥ ७
...समीपस्थमिवाभाति नराणां शुभकर्म्मणाम् ।
...प्राणिनामपि दूरस्थं पथा रौद्रेण गच्छताम् ॥ ८
...तीक्ष्णकण्टकयुक्तेन शर्करानिचितेन च ।
...क्षुरधारानिभैस्तीक्ष्णैः पाषाणैर्निचितेन च ॥ ९
...केचित् पङ्केन महता दुरुत्तारैश्च पातकैः ।
...लोहसूचिमुखैर्दर्भैः सञ्छन्नेन पथा क्वचित् ॥ १०
...तटप्रपातविषमैः पर्व्वतैर्वृक्षसङ्कुलैः ।
...प्रतप्ताङ्गारयुक्तेन याति मार्गेण दुःखितः ॥ ११
...क्वचिद्विषमगर्त्ताद्यैः क्व च लोष्टैः सुपुष्कलैः ।
...सन्तप्तबालुकाभिश्च तथा तीक्ष्णैश्च शङ्कुभिः ॥ १२
...अनेकशाखाविततैर्व्याप्तं वंशवनैः क्वचित् ।
...कष्टेन तमसा मार्गे अनालम्बेन कुत्रचित् ॥ १३
...अयःशृङ्गाटकैस्तीक्ष्णैः क्वचिद्दावाग्निना वृतः ।
क्वचित् तप्तशिलाभिश्च क्वचिच्चाप्तं हिमेन वा ॥ १४
क्वचिद्बालुकया व्याप्तमाकण्ठान्तं प्रवेशितः ।
क्वचिद्दुष्टाम्बुना व्याप्तं क्वचिच्च करिषाग्निना ॥ १५
क्वचित् सिंहैर्वृकैर्व्याघ्रैर्मशकैश्च सुदारुणैः ।
क्वचिन्महाजलौकाभिः क्वचिदाजगरैस्तथा ॥ १६
मक्षिकाभिश्च रौद्राभिः क्वचित् सर्पैर्विषोल्वणैः ।
मत्तमातङ्गयूथैश्च बलोन्मत्तैः प्रमाथिभिः ॥ १७
पन्थानमुल्लिखद्भिश्च शूकरैस्तीक्ष्णदंष्ट्रिभिः ।
तीक्ष्णशृङ्गैश्च महिषैरुष्ट्रैर्मत्तैश्च खादकैः ॥ १८
डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः ।
व्याधिभिश्च महाघोरैः पीड्यमाना व्रजन्ति च ॥ १९
सदा धूलिविमिश्रेण महाचण्डेन वायुना ।

महापाषाणवर्षेण हन्यमाना निराश्रयाः ॥ २०
क्वचिद्विद्युत्प्रपातेन दार्य्यमाणा व्रजन्ति वा ।
महता वाणवर्षेण हन्यमानाश्च सर्व्वतः ॥ २१
पतद्भिर्वज्रपातैश्च उल्कापातैश्च दारुणैः ।
प्रदीप्ताङ्गारवर्षेण दह्यमानाः श्वयन्ति च ॥ २२
महता पांशुवर्षेण पूर्य्यमाणा रुदन्ति च ।
महामेघरवैर्घोरैस्त्रस्यन्ते च मुहुर्म्मुहुः ॥ २३
निशितायुधवर्षेण भिद्यमानाश्च सर्व्वतः ।
महाक्षाराम्बुधाराभिः सिच्यमाना व्रजन्ति ते ॥ २४
महाशीतेन मरुता रूक्षेण परुषेण वा ।
समन्ताद्द्राव्यमानाश्च शुष्यन्ते सङ्कुचन्ति च ॥ २५
इत्थं मार्गेण रौद्रेण पाथेयरहितेन च ।
निरालम्बेन दुर्गेण निर्ज्जलेन समन्ततः ॥ २६
विषमेणैव महता निर्ज्जनापाश्रयेण च ।
तमोरूपेण कष्टेन सर्व्वदुःखाश्रयेण च ॥ २७
नीयन्ते देहिनः सर्व्वे ये मूढाः पापकर्म्मिणः ।
यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् ॥ २८
एकाकिनं पराधीनं मित्र-बन्धुविवर्ज्जितम् ।
शोचन्तः स्वानि कर्म्माणि रुदन्तश्च मुहुर्म्मुहुः ॥ २९
प्रेतीभूता विवस्त्राश्च शुष्ककण्ठोष्ठतालुकाः ।
कृशाङ्गा भयभीताश्च दह्यमानाः क्षुधाग्निना ॥ ३०
बद्धशृङ्खलया केचिदुत्तानपादयोर्नराः ।
कृष्यन्ते कृष्यमाणाश्च यमदूतैर्बलोत्कटैः ॥ ३१
उरसाधोमुखाश्चान्ये घृष्यमाणाः सुदुःखिताः ।
केशपाशनिबन्धेन समाकृष्यन्ति रज्जुभिः ॥ ३२
ललाटे चाङ्कुशेनान्ये भिन्नाः कृष्यन्ति देहिनः ।
उत्तानाः कण्टकपथा क्वचिदङ्गारवर्त्मना ॥ ३३
पश्चाद्बाहुकबद्धाश्च जठरे च प्रपीड़िताः ।
पूरिताः शृङ्खलाभिश्च हस्तयोश्च सुकीलिताः ॥ ३४
ग्रीवापाशेन कृष्यन्ति प्रयान्त्यन्ये सुदुःखिताः ।
जिह्वाङ्कुशप्रवेशेन समाकृष्यन्ति रज्जुना ॥ ३५
नासाभेदेन रज्ज्वा च समाकृष्यन्ति चापरे ।
भिन्नाः कपोलयो रज्ज्वा कृष्यन्त्यन्ये तथौष्ठयोः ॥ ३६
विभिन्नाश्चोदरे चान्ये ततः शृङ्खलया नराः ।
घृष्यन्ते कर्णयोश्चान्ये भिन्नाश्च चिबुकेऽपरे ॥ ३७
छिन्नाग्रपाद-हस्ताश्च छिन्नकर्णोष्ठनासिकाः ।

सम्भिन्नशिश्न-वृषणाश्छिन्नभिन्नाङ्गसन्धयः ॥ ३८
प्रभिद्यमानाः कुन्तैश्च भिद्यमानाश्च शायकैः ।
इतश्चेतश्च धावन्ति क्रन्दमाना निराश्रयाः ॥ ३९
मुद्गरैर्लौहदण्डैश्च हन्यमाना मुहुर्मुहुः ।
कण्टकैर्विविधैर्घोरैर्ज्वलनार्कसमप्रभैः ॥ ४०
भिन्दिपालैर्विभिद्यन्ते स्रवन्तः पूय-शोणितम् ।
शर्कराक्रिमिदग्धाश्च नीयन्ते विवशा नराः ॥ ४१
याचमानाश्च सलिलमन्नं वापि बुभुक्षिताः ।
छायां प्रार्थयमानाश्च शीतार्त्ताश्चानलं पुनः ॥ ४२
दानहीनाः प्रयान्त्येवं प्रार्थयन्तः सुखं नराः ।
गृहीतदानपाथेयाः सुखं यान्ति यमालयम् ॥ ४३
एवंन्यायेन कष्टेन प्राप्ताः प्रेतपुरं यदा ।
प्रज्ञापितास्तदा दूतैर्निवेश्यन्ति यमाग्रतः ॥ ४४
तत्र ये शुभकर्म्माणस्तांस्तु सम्मानयेद्यमः ।
स्वागतासनदानेन पाद्यार्घ्येण प्रियेण वा ॥ ४५
धन्या यूयं महात्मान आत्मनो हितकारिणः ।
येन दिव्यसुखार्थाय भवद्भिः सुकृतं कृतम् ॥ ४६
इदं विमानमारुह्य दिव्यस्त्रीभोगभूषितम् ।
स्वर्गं गच्छन्तु अमलं सर्व्वकामान्वितं सदा ॥ ४७
तत्र भुक्त्वा महाभोगानन्ते पुण्यस्य संक्षयात् ।
यत्किञ्चिदल्पमशुभं पुनस्तदिह भोक्ष्यथ ॥ ४८
धर्म्मात्मानो नरा ये च मित्रभूतमिवात्मनः ।
सौम्यं सुखं प्रपश्यन्ति धर्म्मराजानमेव वा ॥ ४९
ये पुनः क्रूरकर्म्माणस्ते पश्यन्ति भयानकम् ।
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥ ५०
ऊर्द्धकेशं महाश्मश्रुमूर्द्धविस्फुरिताधरम् ।
अष्टादशभुजं क्रूरं नीलाञ्जनचयोपमम् ॥ ५१
सर्व्वायुधोद्यतकरं सर्व्वदण्डसमन्वितम् ।
महामहिषमारूढं दीप्ताग्निसमलोचनम् ॥ ५२
रक्तमाल्याम्बरधरं महामेरुमिवोच्छ्रितम् ।
प्रलयाम्बुदनिर्घोषं पिबन्निव महोदधिम् ॥ ५३
ग्रसन्तमिव शैलेन्द्रमुद्गिरन्तमिवानलम् ।
मृत्युश्चैव समीपस्थः कालानलसमप्रभः ॥ ५४
कालश्चाञ्जनसङ्काशः कृतान्तश्च भयानकः ।
मारी चोग्रमहामारी कालरात्री च दारुणा ॥ ५५
विविधा व्याधयः कष्टा नानारूपभयावहाः ।
शक्तिशूलाङ्कुशधराः पाशचक्रासिपाणयः ॥ ५६
वज्रतुण्डधरा रौद्राः क्षुर-तूण-धनुर्द्धराः ।
असंख्याता महावीराः क्रूराञ्जनमहाप्रभाः ॥ ५७
सर्व्वायुधोद्यतकरा यमदूता भयानकाः ।
अनेन परिवारेण वृतं सुघोरदर्शनम् ॥ ५८
यमं पश्यन्ति पापिष्ठाश्चित्रगुप्तञ्च भीषणम् ।
जीवा दुष्कृतकर्म्माणः परद्रव्यापहारकाः ॥ ५९
गर्व्विता रूपवीर्य्येण परदारावमर्द्दकाः ।
यत् स्वयं क्रियते कर्म्म तत् स्वयं भुज्यते पुनः ॥ ६०
तत् किमात्मोपघातार्थं भवद्भिर्दुष्कृतं कृतम् ।
इदानीं किं प्रतप्यध्वं पीड्यमानाः स्वकर्म्मभिः ॥ ६१
भुज्यध्वं स्वानि कर्म्माणि नास्ति दोषोऽत्र कस्यचित् ।
एवं ते पृथिवीपालाः संप्राप्तास्तत्समीपतः ॥ ६२
स्वकीयैः कर्म्मभिर्घोरैर्दुष्कर्म्मबलदर्पिताः ॥ ६३
भो भो नृपा दुराचारा प्रजाविध्वंसकारिणः ।
अल्पकालस्य राज्यस्य किं त्वया दुष्कृतं कृतम् ॥ ६४
राज्यभोगेन मोहेन बलादन्यायतः प्रजाः ।
यद्दण्डिताः फलं तस्य भुज्यध्वमधुना नृपाः ॥ ६५
क्व तद्राज्यं कलत्रञ्च यदर्थमशुभं कृतम् ।
तत् सर्व्वं संपरित्यज्य यूयमेकाकिनः स्थिताः ॥ ६६
पश्यामि तद्बलं नष्टं येन विध्वंसिताः प्रजाः ।
यमदूतैर्गृह्यमाणा अधुना कीदृशं भवेत् ॥ ६७
एवं बहुविधैर्वाक्यैरुपलब्धा यमेन ते ।
स्वानिकर्म्माणिशोचन्ति तूष्णींतिष्ठन्तिपार्थिवाः ॥ ६८
इति धर्म्मं समुद्दिश्य नृपाणां धर्म्मराड्यमः ।
तत्पापपङ्कशुद्ध्यर्थमिदं वचनमब्रवीत् ॥ ६९
भो भो चण्ड महाचण्ड गृहीत्वा नृपतीन् बलात् ।
नियमेन विशोधध्वं क्रमेण नरकाग्निषु ॥ ७०
ततः शीघ्रं समादाय नृपं संगृह्य पादयोः ।
भ्रामयित्वा तु वेगेन निक्षिप्योर्द्ध्वं प्रगृह्य च ॥ ७१
सर्व्वप्राणेन महता प्रतप्ते तु शिलातले ।
आस्फालयन्ति तरसा वज्रेणेव महाद्रुमाः ॥ ७२
ततः स रक्तं स्रोतोभिः स्रवते जर्ज्जरीकृतः ।
निःसंज्ञः स तदा देही निश्चेष्टः संप्रजायते ॥ ७३
ततः स वायुभिः स्पृष्टः स तैरुज्जीव्यते पुनः ।
ततः पापविशुद्ध्यर्थं क्षिपन्ति नरकार्णवे ॥ ७४

...विंशतिरेवाद्याः चित्यधस्तत्र कोटयः ।
...तलस्यान्ते घोरे तमसि संस्थिताः ॥ ७५
...था प्रथमा कोटिः सुघोरा तदधः स्थिता ।
...घोरा महाघोरा घोररूपा च पञ्चमी ॥ ७६
...तलातलाख्या च सप्तमी च भयानका ।
...कालरात्रिश्च नवमी च भयोत्कटा ॥ ७७
...तदधश्चण्डा महाचण्डा ततोऽप्यधः ।
...कोलाहला चान्या प्रचण्डतरनायका ॥ ७८
...भावती भीष्टा भीमा भीमप्रणायका ।
...विकराला च वज्रा विंशतिशा स्मृता ॥ ७९
...शा पञ्चकोणा च सुदीर्घा परिवर्त्तुला ।
...सप्तभौमाष्टभौमा च दीप्ता मायेति चाष्टमी ॥ ८०
...ते नामतः प्रोक्ता घोरा नरककोटयः ।
...विंशतिरेवैताः पापानां यातनात्मिकाः ॥ ८१
...नां क्रमेण विज्ञेयाः पञ्च पञ्चैव नायकाः ।
...सर्व्वकोटीनां नामतस्तान् निबोधत ॥ ८२
...रः प्रथमस्तेषां रुदन्ते सर्व्वदेहिनः ।
...रौरवपीड़ाभिर्महान्तोऽपि रुदन्ति च ॥ ८३
...शीतं तथा चोष्णं पञ्चाद्या नायकाः स्मृताः ।
...रः सुमहातीक्ष्णः पद्मसञ्जीवनः शिवः ॥ ८४
...तमविलोपश्च सुलोमश्चापि कण्टकः ।
...वेगकरालश्च विकरालः प्रकम्पणः ॥ ८५
...वक्रश्च वक्रश्च कालस्तत्र प्रगर्ज्जनः ।
...सूचीमुखः सुनेमिश्च खादकः सुप्रपीड़नः ॥ ८६
...कुम्भीपाकः सुपाकश्च क्रकचश्चापि दारुणः ।
...अङ्गारराशिभवनं मेदोऽसृक्प्रहितस्ततः ॥ ८७
...तुण्डश्च शकुनिर्महासंवर्त्तकः क्रतुः ।
...जन्तुः पङ्कलेपः प्रतिमांसस्त्रपूद्भवः ॥ ८८
...शो सुनिरुच्छ्वासः सुदीर्घः कूटशाल्मलिः ।
...सुमहानादः प्रवाहः सुप्रवाहणः ॥ ८९
...मेषो वृषः शल्यः सिंह-व्याघ्र-गजाननाः ।
...सूकराज-महिषा अविकारवृकाननाः ॥ ९०
...ग्राह-मीनवक्त्राख्याः सर्पकूर्म्माख्य-वायसाः ।
...उलूकजलौकाख्याः शार्दूलक-विकर्कटाः ॥ ९१
...गण्डूकः पूतिवक्त्रश्च रजतः पूतिमृत्तिकः ।
...धूमस्तथाग्निश्च क्रिमीणां निचयस्तथा ॥ ९२

अग्निशासोऽप्रतिष्ठश्च रुधिराम्भश्च भोजनः ।
लालाभक्षात्मभक्षाश्च सर्व्वभक्षः सुदारुणः ॥ ९३
सङ्कटः सुविशालश्च विकटः कटपूतनः ।
अम्बरीषः कटाहश्च कष्टा वैतरणी नदी ॥ ९४
सुतप्तलोहशयनमेकपादः प्रपूरणः ।
असितालवनं घोरमस्थिभङ्गं सुपूरणम् ॥ ९५
तिलातसी सुयन्त्राणि कूटपाशः प्रमर्द्दनः ।
महाचूर्णी सुचूर्णी च तप्तलोहमयस्तथा ॥ ९६
पर्व्वतैरम्बुधारा च तथा यमलपर्व्वतः ।
मूत्र-विष्ठा-शुक्रपश्च तारकूपाश्च शीतलाः ॥ ९७
मुषलोदूखलं यन्त्र-शिला-शकट-लाङ्गलम् ।
तालपत्राणि गहनं महाशकटमण्डलम् ॥ ९८
सम्मोहो ह्यस्थिभङ्गश्च तप्तश्च मलयो गुड़ः ।
बहुदुःखं महादुःखं कश्मलं शमलं मलम् ॥ ९९
हालाहलो विरूपश्च स्वरूपश्च यमानुगः ।
एकपादस्त्रिपादश्च तीव्रश्चाव्वीं च रन्तिमः ॥ १००
अष्टाविंशतिरित्येते क्रमशः पञ्चपञ्चकम् ।
कोटीनामानुपूर्व्व्येण पञ्च पञ्चैव नायकाः ॥ १०१
रौरवाद्यमवीच्यन्तं नरकाणां शतं स्मृतम् ।
चत्वारिंशच्छतं प्रोक्तं महानरकमण्डलम् ॥ १०२
एषु पापाः प्रपच्यन्ते शोष्यन्ते नरकाग्निषु ।
यातनाभिर्विचित्राभिः स्वकर्म्मप्रहयाङ्गशम् ॥ १०३
स्वमलप्रहयाद्वयद्दग्नौ धाम्यन्ति धातवः ।
तत्र पापक्षयात् पापा नराः कर्म्मानुरूपतः ॥ १०४
सुगाढ़ं हस्तयोर्बद्धास्तप्तशृङ्खलया नराः ।
महावृक्षाग्रशाखासु लम्बयन्ते यमकिङ्करैः ॥ १०५
ततस्ते सर्व्वयत्नेन क्षिप्ता दोलन्ति किङ्करैः ।
दोलन्तश्चापि वेगेन विसंज्ञा यान्ति योजनम् ॥ १०६
अन्तरिक्षस्थितानाञ्च लोहभारशतं पुनः ।
पादयोर्बध्यते तेषां यमदूतैर्महाबलैः ॥ १०७
तेन भारेण महता सुभृशं ताड़िता नराः ।
ध्यायन्ति स्वानि कर्म्माणि तूष्णीं ध्यायन्ति निश्चलाः ॥ १०८
ततोऽङ्कुशैरग्निवर्णैर्लौहदण्डैश्च कण्टकैः ।
हन्यन्ते किङ्करैर्घोरैः समन्तात् पापकर्म्मिणः ॥ १०९
ततः क्षारेण दीप्तेन वह्नेरपि विशेषतः ।
समन्ततः प्रलिप्यन्ति तीव्रेण च पुनः पुनः ॥ ११०

द्रुतेनात्यन्तलिप्तेन कृत्ताङ्गा जर्ज्जरीकृताः ।
पुनर्विदार्य्य चाङ्गानि शिरसःप्रभृति क्रमात् ॥ १११
वृन्ताकवत् प्रपच्यन्ते तप्तलोहकटाहकैः ।
विष्ठाकूपे तथा कूपे क्रिमीणां निचये पुनः ॥ ११२
मेदोऽसृक्पूयपूर्णायां वाप्यां क्षिप्यन्ति ते पुनः ।
भक्ष्यन्ते क्रिमिभिस्तीक्ष्णै र्लोहतुण्डैश्च वायसैः ॥ ११३
श्वभिर्दंशैर्वृकैर्व्याघ्रै रौद्रैश्च विकृताननैः ।
पच्यन्ते मत्स्यवच्चापि प्रदीप्ताङ्गारराशिषु ॥ ११४
भित्त्वा शूलैः सुतीक्ष्णैश्च नराः पापेन कर्म्मणा ।
तैलपिण्डैरिवाक्रम्य घोरैः कर्म्मभिरात्मनः ॥ ११५
तिलवत् सम्प्रपीड्यन्ते चक्राख्ये जनपीड़काः ।
भुज्यन्ते चातपे तप्ते लोहभाण्डेष्वनेकधा ॥ ११६
तैलपूर्णकटाहेषु सुतप्तेषु पुनः पुनः ।
बहुधा पाट्यते जिह्वा येऽसत्यप्रियवादिनः ॥ ११७
सुदंशेन सुतप्तेन प्रपीड्योरसि पादयोः ।
मिथ्यागमप्रवृत्तस्तु द्विजिह्वस्येव निर्गता ॥ ११८
जिह्वाऽर्द्धकोशविस्तीर्णा हलैस्तीक्ष्णैः प्रपीड्यते ।
निर्भर्त्सयन्ति ये क्रूरा मातरं पितरं गुरुम् ॥ ११९
वज्रतुण्डजलौकाभिर्मुखमापूर्य्य सिच्यते ।
ततः क्षारेण दीप्तेन ताम्रेण च पुनः पुनः ॥ १२०
द्रुतेनात्यन्ततप्तेन तप्ततैलेन तन्मुखम् ।
इतस्ततः पुनर्वक्त्रं भृशमापूर्य्य हन्यते ॥ १२१
विष्ठाभिः कृमिभिश्चापि पूर्य्यमाणाः क्वचित् क्वचित् ।
परिष्वजन्ति चात्युग्रां प्रदीप्तां लोहशाल्मलीम् ॥१२२
हन्यन्ते पृष्ठदेशे च पुनर्दीप्तैर्महाघनैः ।
दन्तुरेणातिकुण्ठेन क्रकचेन बलीयसा ॥ १२३
शिरःप्रभृति पीड्यन्ते घोरैः कर्म्मभिरात्मजैः ।
खाद्यन्ते च स्वमांसानि पाय्यन्ते शोणितं स्वकम्॥१२४
अन्नपानं न दत्तं यैः सर्व्वदा स्वात्मपोषणैः ।
इक्षुवत् सम्प्रपीड्यन्ते जर्ज्जरीकृत्य मुद्गरैः ॥ १२५
असितालववनैर्घोरैश्छिद्यन्ते खण्डखण्डशः ।
सूचीनिर्भिन्नसर्व्वाङ्गास्तप्तशूलप्ररोपिताः ॥ १२६
सञ्चाल्यमाना बहुशः क्लिश्यन्ते न म्रियन्ति च ।
यथा स्वप्नशरीराणि सुख-दुःखसहानि च ॥ १२७
देहादुत्पाट्य मांसानि भिद्यन्तेऽस्थीनि मुद्गरैः ।
पुनराक्षिप्यते तूर्णं यमदूतैर्बलोत्कटैः ॥ १२८

निरुच्छ्वासे निरुच्छ्वासास्तिष्ठन्ति नरके चिरम् ।
उच्छ्वास्यन्ति तथोच्छ्वास्य बालुका वदने नराः ॥१२९
रौरवे रोदमानाश्च पीड्यन्ते विविधैर्वधैः ।
महारौरवपीड़ाभिर्महान्तोऽपि रुदन्ति च ॥ १३०
पद्मग्रामास्ये गुदे गण्डे चाक्ष्णोश्चोरसि मस्तके ।
निहन्यन्ते घनैस्तीक्ष्णैः सुतप्तैर्लोहशङ्कुभिः ॥ १३१
सुतप्तबालुकायाञ्च प्रयोज्यन्ते मुहुर्मुहुः ।
जन्तुपङ्के भृशं तप्ते क्षिप्ताः क्रन्दन्ति विस्वरम् ॥ १३२
तेन तेनैव रूपेण शास्यन्ते पारदारिकाः ।
गाढ़मालिङ्गते नारीं ज्वलन्तीं लोहनिर्म्मिताम्॥१३३
पूर्व्वाकाराश्च पुरुषाः प्रज्वलन्ति समन्ततः ।
दुश्चारिणीं स्त्रियं गाढ़मालिङ्गन्ति हसन्ति च ॥ १३४
किं प्रधावसि वेगेन न ते मोक्षोऽस्ति साम्प्रतम् ।
लङ्घितस्ते यथा भर्त्ता पापं भुङ्क्ष्व तथाधुना ॥ १३५
लोहकुम्भे विनिक्षिप्ता सापिधाने शनैः शनैः ।
मृदग्निना प्रपच्यन्ते स्वपापैरेव मानवाः ॥ १३६
क्षिपन्त्युदूखलेऽप्येनं प्रपीड्यन्ते शिलासु च ।
क्षिप्यन्ते चान्धकूपेषु दश्यन्ते भ्रमरैर्भृशम् ॥ १३७
क्रिमिनिर्भिन्नसर्व्वाङ्गाः शतशो जर्ज्जरीकृताः ।
सुतीक्ष्णक्षारकूपेषु क्षिप्यन्ते तदनन्तरम् ॥ १३८
महाज्वाले तु नरके पापाः क्रन्दन्ति दुःखिताः ।
इतश्चेतश्च धावन्ति दह्यमानास्तदर्च्चिषा ॥ १३९
पृष्ठे चानीय जङ्घाभ्यां विन्यस्ताः स्कन्धयोजिते ।
तयोर्मध्येन वाकृष्य बाहुपृष्ठेन गाढ़तः ॥ १४०
बद्ध्वा परस्परं सर्व्वाः सुभृशं पापरज्जुभिः ।
पीड्य बद्धाः सुदृश्यन्ते भ्रमरैस्तीक्ष्णलोहजैः ॥१४१
मानिनां क्रोधिनाञ्चैव तस्कराणाञ्च दारुणाः ।
पिण्डबद्धास्ततो याम्यैर्महाज्वालेन यातनाः ॥१४२
रज्जुभिर्वेष्ट्यमानाश्च प्रलिप्ताः कर्द्दमेन च ।
करीष-तुषवह्नौ च पच्यन्ते न म्रियन्ति च ॥ १४३
सुतीक्ष्णक्षारतोयेन कर्कशासु शिलासु च ।
आस्फाल्य प्रहयात् पापा घृष्यन्ते चन्दनं यथा ॥१४४
शरीराभ्यन्तरगतैः प्रभूतैः क्रिमिभिर्नराः ।
भक्ष्यन्ते तीक्ष्णवदनैरादेहप्रक्षयाङ्गशम् ॥ १४५
क्रिमीणां निचये क्षिप्ताः पूय-मांसस्य राशिषु ।
तिष्ठन्त्युद्विग्नहृदयाः पर्व्वताभ्यां निपीड़िताः ॥१४६

न वज्रलेपेन शरीरमनुलिप्यते ।
मुखोर्द्धपादाश्च धृतास्तप्यन्ति वह्निना ॥ १४७
नात्तः प्रविन्यस्तं सुप्रतप्तमयोगुडम् ।
खादन्ति पराधीनास्ताड्यन्ते तु समुद्गरैः ॥ १४८
शिवायतनाराम-वापी-कूप-तड़ागकम् ।
विद्रवन्ति द्विजस्थानं नरास्तत्र रमन्ति च ॥ १४९
मायोद्वर्त्तनाभ्यङ्गं स्नान-पानाम्बुभोजनम् ।
क्रीड़नं मैथुनं द्यूतमाचरन्ति मदोद्धताः ॥ १५०
ते विविधैर्घोरैरिक्षुयन्त्रादिपीड़नैः ।
निरयाग्निषु पच्यन्ते यावदाभूतसंप्लवम् ॥ १५१
शृण्वन्ति सतां निन्दां तेषां कर्णौ प्रपूर्य्यते ।
ग्निवर्णैरयःकीलैस्ततस्ताम्रादिभिर्द्रुतैः ॥ १५२
त्रपु-सीसारकूटाभिः क्षारेण च पुनः पुनः ।
सुतप्तोच्चतैलेन वज्रलेपेन वा पुनः ॥ १५३
क्रमादापूर्य्यते कर्णौ नरकेषु च यातनाः ।
नुक्रमेण सर्व्वेषु भवन्त्येते समन्ततः ॥ १५४
सर्व्वेन्द्रियाणामप्येवं क्रमात् पापेन यातनाः ।
भवन्ति घोराः प्रत्येकं शरीरे तत्कृतेन च ॥ १५५
स्पर्शलोभेन ये मूढ़ाः स्पृशन्ति च परस्त्रियम् ।
तेषां करोऽग्निवर्णाभिः पांशुभिः पूर्य्यते भृशम् ॥१५६
ततः क्षारादिभिः सर्व्वैः शरीरमनुलिप्यते ।
यातनाश्च महाकष्टाः सर्व्वेषु नरकेषु च ॥ १५७
पित्रोः कुर्व्वन्ति भ्रुकुटिं कर-नेत्रांश्च ये नराः ।
परदारांश्च पश्यन्ति लुब्धास्तल्बेन चक्षुषा ॥ १५८
सूचीभिरग्निवर्णाभिस्तेषां नेत्रं प्रपूर्य्यते ।
क्षारादैश्च क्रमात् सर्व्वदेहे सर्व्वाश्च यातनाः ॥ १५९
देवाग्नि-गुरु-विप्राणामनिवेद्य प्रभुञ्जते ।
लोहकीलशतैस्तप्तैस्तज्जिह्वास्यं प्रपूर्य्यते ॥ १६०
ये देवारामपुष्पाणि लोभात् संगृह्य पाणिना ।
जिघ्रन्ति च नरा मूढ़ाः शिरसा धारयन्ति च ॥१६१
आपूर्य्यते शिरस्तेषां सन्तप्तैर्लौहशङ्कुभिः ।
नासिका चापि बह्नलैस्ततः क्षारादिभिर्भृशम् ॥१६२
ये निन्दन्ति महात्मानं वाचकं धर्म्मदेशकम् ।
देवाग्निगुरुभक्तांश्च धर्म्मशास्त्रञ्च शाश्वतम् ॥ १६३
तेषामुरसि कण्ठे च जिह्वायां दन्तसन्धिषु ।
तालुन्योष्ठे च जिह्वायां मूर्ध्नि सर्व्वाङ्गसन्धिषु ॥ १६४

अग्निवर्णाः सुतप्ताश्च विशिखा लोहशङ्कवः ।
आविध्यन्ते च बहुशः स्थानेष्वेतेषु मुद्गरैः ॥ १६५
ततः क्षारेण दीप्तेन प्रपूर्य्यन्ते समन्ततः ।
यातनाश्च महाचित्राः शरीरस्यापि सर्व्वतः ॥ १६६
निःशेषं नरके लेवं भ्रमन्ति क्रमशः पुनः ।
ये गृह्णन्ति परद्रव्यं पद्भ्यां विप्रं स्पृशन्ति च ॥ १६७
शिवोपकरणाङ्कञ्च ज्ञानादि लिखितञ्च यत् ।
हस्तपादा घनैस्तेषामापूर्य्यन्ते समन्ततः ॥ १६८
नरकेषु च सर्व्वेषु विचित्रा देहयातनाः ।
भवन्ति बहुशः कष्टाः पाणि-पादसमुद्भवाः ॥ १६९
शिवायतनपर्य्यन्ते देवारामेषु कुत्रचित् ।
समुत्सृजन्ति ये पापाः पुरीषं मूत्रमेव च ॥ १७०
तेषां शिश्नं सवृषणं चूर्ण्यते लोहमुद्गरैः ।
सूचीभिरग्निवर्णाभिस्तथा चापूर्य्यते पुनः ॥ १७१
ततः क्षारेण महता तीव्रेण च पुनः पुनः ।
तैलेनापूर्य्यते गाढ़ं गुदं शिश्नञ्च देहिनः ॥ १७२
मनः सर्व्वेन्द्रियाणाञ्च यस्माद्दुःखञ्च जायते ।
धने सत्यपि ये दानं न प्रयच्छन्ति तृष्णया ॥ १७३
अतिथिञ्चावमन्यन्ते काले प्राप्तं गृहाश्रमे ।
तस्य ते दुष्कृतं प्राप्य गच्छन्ति निरयेऽशुचौ ॥ १७४
ये न दत्त्वा तु भुञ्जन्ति ग्रासं श्वभ्यश्च वायसेः ।
तेषाञ्च विवृतं वक्त्रं कीलकद्वयताड़ितम् ॥ १७५
क्रिमिभिः प्राणिभिश्चोग्रैर्लौहतुण्डैश्च वायसैः ।
उपद्रवैर्बहुविधैर्मुखमन्तः प्रपीड्यते ॥ १७६
श्यामश्च शवलश्चैव यममार्गानुरोधकौ ।
यौस्तस्ताभ्यां प्रयच्छामि तौ गृह्णीतमिमं बलिम् १७७
ऐन्द्र-वारुण-वायव्या याम्या नैर्ऋतवायसाः ।
वायसाः पुण्यकर्म्माणस्ते मे गृह्णन्त्विमं बलिम् ॥१७८
शिवमभ्यर्च्य यत्नेन कुलाशो विधिपूर्व्वकम् ।
शैवैर्मन्त्रैर्बलिं पश्चाद्ददन्ति ये न ते यमम् ॥ १७९
पश्यन्ति त्रिदिवं यान्ति तस्माद्दद्याद्दिने दिने ।
मण्डलं चतुरस्रञ्च कृत्वा गन्धाधिवासितम् ॥ १८०
धन्वन्तरय ईशान्यां प्राच्यामिन्द्राय निक्षिपेत् ।
याम्यां यमाय वारुण्यां सुदच्चोमाय दक्षिणे ॥ १८१
पितृभ्यश्च विनिक्षिप्य प्राच्यामर्य्यमणे ततः ।
धातुश्चैव विधातुश्च द्वारपेभ्यश्च निक्षिपेत् ॥ १८२

श्वभ्यश्च श्वपतिभ्यश्च वयोभ्यो निक्षिपेद्भुवि।
देव-पितृ-मनुष्यैश्च प्रेतैर्भूतैः सगुह्यकैः ॥ १८३
वयोभिः क्रिमिकीटैश्च गृहस्थश्चोपजीव्यते ।
स्वाहाकारः स्वधाकारो वषट्कारस्तृतीयकः॥१८४
हन्तकारस्तथैवान्यो धेन्वाः स्तनचतुष्टयम् ।
स्वाहाकारं ततो देवा स्वधाञ्च पितरस्तथा ॥ १८५
वषट्कारं तथैवान्ये देवा भूतेश्वरास्तथा ।
हन्तकारं मनुष्याश्च पिबन्ति सततं स्तनम् ॥ १८६
यस्त्वेतां मानवो धेनुं श्रद्धयामरपूर्व्विकाम् ।
करोति सततं काले सोऽग्नित्वायोपपद्यते ॥ १८७
यस्तां जहाति वासस्थस्तामिस्रे स निमज्जति ।
तस्माद्दत्त्वा बलिं तेभ्यो द्वारस्थश्चिन्तयेत् क्षणम्॥१८८
क्षुधार्त्तमतिथिं सम्यगेकग्रामानिवासिनम् ।
भोजयेत् तं शुभान्नेन यथाशक्त्यात्मभोजनात् ॥ १८९
अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्य दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ १९०
ततोऽन्नं प्रियमेवाश्नन् नरः शृङ्खलया पुनः ।
जिह्वावेगेन बद्धोऽत्र चिरं कालं स तिष्ठति ॥ १९१
ततस्तन्मांसमुत्कृत्य तिलमात्रप्रमाणतः ।
खादितुं दीयते तेषां भित्त्वा चैव तु शोणितम्॥१९२
निःशेषयातनाभिस्तु पीड्यन्ते क्रमशः पुनः ।
अतिक्षुभुक्षया कष्टं तथा चातिपिपासया ॥ १९३
एवमाद्या महाघोरा यातनाः पापकर्म्मिणाम् ।
यः करोति महत् पापं धर्म्मं चरति वै लघु ॥ १९४
धर्म्मं गुरुतरं वापि तथावस्थां तयोः शृणु ।
सुकृतस्य फलं भुङ्क्ते गुरु पापप्रभावतः ॥ १९५
न मिनोति सुखं तत्र भोगैर्बहुभिरन्वितः ।
तथोद्विग्नोऽपि सन्तप्तो न भव्यमन्यते सुखम् ॥ १९६
अभावादग्रतोऽन्नस्य प्रातिकूल्यं दिने दिने ।
पुमान् यो गुरुधर्म्मापि सोपवासो यथा गृही॥१९७
वित्तवान् न विजानाति पीड़ां नियमसंस्थितः ।
तानि पापानि घोराणि सन्तीह यैस्ततो नरः ॥१९८
शतधा भेदमाप्नोति गिरिवज्रहतो यथा ॥ १९९
इति श्रीशैवे महापुराणे धर्म्मसंहितायामेकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः ।

व्यास उवाच ।

कृतपापा नरा यान्ति दुःखेन महतान्विताः ।
यममार्गं सुखं यैस्तु तान् धर्म्मान् वद मे प्रभो ॥ १

सनत्कुमार उवाच ।

अवश्यं हि कृतं कर्म्म भोक्तव्यमविचारतः ।
शुभाशुभमथो वक्ष्ये तान् धर्म्मान् सुखदायकान् ॥ २
अत्र ये शुभकर्म्माणः सौम्यचित्ता दयान्विताः ।
ते नरा यान्ति सौम्येन यममार्गं भयावहम् ॥ ३
यः प्रदद्याद्द्विजेन्द्राणामुपानत्काष्ठपादुके ।
स नराश्वेन महता सुखं याति यमालयम् ॥ ४
छत्त्रदानेन गच्छन्ति तथा च्छत्त्रेण देहिनः ।
शिविकायाः प्रदानेन तद्रथेन सुखं व्रजेत् ॥ ५
शय्यासनप्रदानेन सुखं यान्ति सुनिश्चयम् ।
आरामच्छायाकर्त्तारो व्रजन्ति वृक्षरोपकाः ॥ ६
यान्ति पुष्पकयानेन पुष्पारामकरा नराः ।
देवायतनकर्त्तारो यतीनामाश्रमस्य च ॥ ७
अनाथमण्डपानाञ्च क्रीड़यन्ति गृहोदरे ।
देवाग्निगुरुविप्राणां मातापित्रोश्च पूजकाः ॥ ८
पूज्यमाना नरा यान्ति कामुकेन यथासुखम् ।
द्योतयन्तो दिशः सर्व्वा यान्ति दीपप्रदायिनः ॥ ९
प्रतिश्रयप्रदानेन सुखं यान्ति निरामयाः ।
विश्राम्यमाणा गच्छन्ति गुरुशुश्रूषका नराः ॥ १०
आर्त्तौषधप्रदातारः सुखं यान्ति गृहे स्वके ।
सर्व्वकामसमृद्धेन पथा गच्छन्ति गोप्रदाः ॥ ११
येन दत्तान्नपानानि तृप्ता यान्ति हि तत्पथम् ।
पादशौचप्रदानेन शीतलेन पथा व्रजेत् ॥ १२
पादाभ्यङ्गञ्च यः कुर्य्यादश्वपृष्ठेन स व्रजेत् ।
पादशौचं तथाभ्यङ्गं दीपमन्नं प्रतिश्रयम् ॥ १३
ये ददन्ति सदा व्यास नोपसर्पन्ति ते यमम् ।
हेमरत्नप्रदानेन यान्ति दुर्गाणि निस्तरन् ॥ १४
रौप्यानडुद्वाहदानेन नरो यानेन गच्छति ।
सर्व्वकामसमृद्धात्मा भूमिदानेन गच्छति ॥ १५
इत्येवमादिभिर्दानैः सुखं यान्ति यमालयम् ।
स्वर्गे तु विविधान् भोगान् प्राप्नुवन्ति सदा नराः ॥१६

दानानामन्नदानं परं स्मृतम् ।
...षामेव दानानामन्नदानं परं स्मृतम् ।
...प्रीतिकरं हृद्यं बल-बुद्धिविवर्द्धनम् ॥ १७
...दानसमं दानं विद्यते मुनिसत्तम ।
...द्भवन्ति भूतानि तदभावे म्रियन्ते च ॥ १८
...-मांस-वसा-शुक्रं क्रमादन्नात् प्रवर्द्धते ।
...द्भवन्ति भूतानि तस्मादन्नमयं जगत् ॥ १९
...-रत्नाश्व-नागेन्द्रैर्नारी-स्रक्-चन्दनादिभिः ।
...रपि सम्प्राप्तैर्न रमन्ति बुभुक्षिताः ॥ २०
...जायमानाश्च बाला वृद्धाश्च मध्यमाः ।
...हारमभिकाङ्क्षन्ति देव-दानव-राक्षसाः ॥ २१
...हि सर्व्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः ।
...न्नौषधलेपेन नश्यतीह न संशयः ॥ २२
...ति क्षुधासमं दुःखं नास्ति रोगः क्षुधासमः ।
...रोगसमं सौख्यं नास्ति क्रोधसमो रिपुः ॥ २३
...व महत् पुण्यमन्नदानप्रदानतः ।
...क्षुधाग्निना तप्ता म्रियन्ते सर्व्वदेहिनः ॥ २४
...दः प्राणदः प्रोक्तः प्राणदश्चापि सर्व्वदः ।
...दन्नप्रदानेन सर्व्वदानफलं लभेत् ॥ २५
...न्नपानपुष्टाङ्गः कुरुते धर्म्मसञ्चयम् ।
...प्रदातुस्तस्यार्द्धं कर्त्तुश्चार्द्धं न संशयः ॥ २६
...लोके यानि रत्नानि भोग-स्त्री-वाहनानि च ।
...पानप्रदः सर्व्वमिहामुत्र च तल्लभेत् ॥ २७
...र्थ-काम-मोक्षाणां देहः परमसाधनम् ।
...प्रजापतिः साक्षादन्नं विष्णुः स्वयं शिवः ॥ २८
...दन्नसमं दानं न भूतं न भविष्यति ।
...णामपि लोकानामुदकं जीवनं स्मृतम् ॥ २९
...मृतं दिव्यं शुद्धं सर्व्वरसायनम् ।
...पि सुमहत् पापं यः पश्चादन्नदो भवेत् ॥ ३०
...ः सर्व्वपापेभ्यः स्वर्गलोकञ्च गच्छति ।
...नाच्च गो-वस्त्र-शय्या-च्छत्रासनानि च ॥ ३१
...लोके प्रशस्तानि दानान्यष्टौ विशेषतः ।
...दानविशेषेण धर्म्मराजपुरे नराः ॥ ३२
...यान्ति विमानेन तस्माद्धर्म्मं समाचरेत् ।

व्यास उवाच ।

...मि च नियमस्याद्य त्वत्तः प्रेतपुरं गतम् ॥ ३३
...र्यमिहेच्छामि सुखं येनेह जायते ।

सनत्कुमार उवाच ।

रहस्यमद्भुतञ्चैव शृणु वक्ष्यामि यत् त्वयि ॥ ३४
या गतिः प्राप्यते येन प्रेत्यभावे महामुने ।
तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ॥ ३५
आयुः प्रहर्षौ भोगश्च लभ्यन्ते तपसा मुने ।
ज्ञान-विज्ञानमारोग्यं रूपवत्त्वं तथैव च ॥ ३६
सौभाग्यञ्चैव तपसा प्राप्यते सर्व्वदा सुखम् ।
नातप्ततपसो यान्ति शिवलोकं सनातनम् ॥ ३७
यच्च दूरं दुराराध्यं सुदूरं दुरतिक्रमम् ।
तत् सर्व्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ ३८
धनं प्राप्नोति तपसा मौनेनाज्ञां तथैव च ।
उपभोगांस्तु दानेन ब्रह्मचर्य्येण जीवितम् ॥ ३९
अहिंसया बलं रूपं दीक्षया जन्म सत्कुले ।
फलमूलाशिनां राज्यं स्वर्गः पर्णाशिनां भवेत् ४०
पयोभक्षो दिवं याति स्थानञ्च द्रविणाधिकम् ।
गुरुशुश्रूषया विद्यां नित्यश्राद्धेन सन्ततिम् ॥ ४१
गवाढ्यः शाकदीक्षाभिः स्वर्गमाहुस्तृणाशिनाम् ।
स्त्रियस्त्रिषवणं स्नात्वा वायुं पीत्वा क्रतुं लभेत् ॥४२
नित्यस्नायी भवेद्दक्षः सन्ध्ये तु द्वे जपन्नरः ।
मौनं साधयते राज्यं नाकपृष्ठमनाशके ॥ ४३
स्थण्डिले तु शयानानां गृहाणि शयनानि वा ।
चीर-वल्कल-वासोभिर्वासांस्याभरणानि वा ॥ ४४
शय्यासनानि यानानि योगात्मनि तपोधने ।
अग्निप्रवेशे नियतं ब्रह्मलोकोऽभिधीयते ॥ ४५
रसानां प्रतिसंहारे सौभाग्यमिह विन्दति ।
आमिषप्रतिसंहारे प्रजास्यायुष्मती भवेत् ॥ ४६
उदयान्न स्वपेद्यस्तु स नराधिपतिर्भवेत् ।
सत्यवादी नरश्रेष्ठो दैवतैः सह मोदते ॥ ४७
कीर्त्तिर्भवति दानेन तथारोग्यमहिंसया ।
द्विजशुश्रूषया राज्यं द्विजत्वञ्चातिपुष्कलम् ॥ ४८
पानीयस्य प्रदानेन तृप्यन्ते कामभोगतः ।
सान्त्वदः सर्व्वभूतानां सर्व्वदुःखैर्विमुच्यते ॥ ४९
देवशुश्रूषया राज्यं दिव्यरूपं नियच्छति ।
लोके प्रदीपदानेन चक्षुष्मान् भवति प्रभुः ॥ ५०
प्रेक्षणीयप्रदानेन स्मृतिं मेधाञ्च विन्दति ।
गन्धमाल्यानि दत्त्वा च कीर्त्तिर्भवति पुष्कला ॥ ५१

केशश्मश्रु धारयतामग्र्या भवति सन्ततिः।
उपवासञ्च दीक्षां वाप्यभिषिकं यथाक्रमम्॥ ५२
कृत्वा द्वादश वर्षाणि वीरयानाद्विशिष्यते (क)।
दासीदासमलङ्कारं क्षेत्राणि विविधानि च॥ ५३
ब्रह्मदेयां सुतां दत्त्वा प्राप्नोति स्वर्गमुत्तमम्।
एवं तीर्थोपवासैश्च त्रिदिवं यान्ति मानवाः॥ ५४
लभते च चिरं स्थानं फलपुष्पप्रदो नरः॥ ५५

सुवर्णशृङ्गैः सुविराजितानां
गवां सहस्रञ्च नरः प्रदाता।
प्राप्नोति पुण्यं दिवि देवलोक-
मित्येवमाहुर्मुनि-देवसङ्घाः॥ ५६
प्रयच्छति यः कपिलां सवत्सां
कांस्यस्य दोहां द्रविणाग्रशृङ्गीम्।
तैस्तैर्गुणैः कामदुघास्य भूत्वा
नरं प्रदातारमुपैति सा गौः॥ ५७
यावन्ति रोमाणि भवन्ति धेन्वा-
स्तावत् फलं लभते गोप्रदाता।
पुत्रांश्च पौत्रांश्च कुलञ्च सर्व्व-
मासप्तमं तारयते परत्र॥ ५८
सदक्षिणां काञ्चनचारुशृङ्गीं
कांस्योपदोहां द्रविणोत्तरीयाम्।
धेनुं तिलानां ददतो द्विजाय
लोका वसूनां सुलभा भवन्ति॥ ५९
स्वकर्म्मभिर्मानवं सन्निबद्धं
तीव्रान्धकारे नरके पतन्तम्।
महार्णवान्नौरिव वातयुक्ता
दानं गवां तारयते परत्र॥ ६०
यो ब्रह्मदेयान्तु ददाति कन्यां
भूमिप्रदानञ्च करोति विप्रे।
ददाति वित्तं विविधञ्च यश्च
स लोकमाप्नोति पुरन्दरस्य॥ ६१
नैवेशिकं सर्व्वगुणोपपन्नं
यो वै ददाति पुरुषो द्विजाय।
स्वाध्याय-चारित्रगुणान्विताय
तस्यापि लोकान् प्रवदन्ति नित्यान्॥ ६२

धुर्य्यप्रदानेन तथा गवाश्वै-
र्लोकानवाप्नोति नरो वसूनाम्।
स्वर्गाय चाप्याहुर्हिरण्यदानं
ततो विशिष्टं कनकप्रदानम्॥ ६३
छत्रप्रदानेन गृहं विशिष्टं
यानं तथोपानहसम्प्रदाने।
वस्त्रप्रदानेन फलं सुरूपं
गन्धप्रदाता सुरभिर्नरः स्यात्॥ ६४
पुष्पोपगांश्चैव फलोपगांश्च
यः पादपान् यच्छति वै द्विजाय।
सुस्त्रीसमृद्धं बहुरत्नपूर्णं
लभेत् प्रयत्नोपचितं गृहं वै॥ ६५
भक्ष्यान्नपानस्य रसस्य दानं
सर्व्वानवाप्नोति रसान् प्रकामम्।
प्रतिश्रयाच्छादनसम्प्रदाता
प्राप्नोति तानेव न संशयोऽत्र॥ ६६
स्रग्दामगन्धान्यनुलेपनानि
स्नानानि माल्यानि च मानवो यः।
दद्याद्द्विजेन्द्राय भवेदरोग-
स्तथा सुरूपश्च नरेन्द्रकल्पः॥ ६७
बीजैरशून्यं शरणैरुपेतं
दद्याद्गृहं यः पुरुषो द्विजाय।
पुण्याभिरामं बहुवस्त्रपूर्णं
लभत्यधिष्ठानपरं मुनीश॥ ६८
सुगन्धचित्रास्तरणोपपन्नं
दद्यान्नरो यः शयनं द्विजाय।
रूपान्वितां पुत्त्रवतीं मनोज्ञां
भार्य्यामयत्नोपगतां लभेत् सः॥ ६९

व्यास उवाच।

यानि यानि तु देयानि दानानि परिचक्षते।
तेभ्यो विशिष्टं किं दानं किं तारयति तद्वद॥ ७०

सनत्कुमार उवाच।

अभयं सर्व्वसत्त्वेभ्यो व्यसने चाप्यनुग्रहः।
यच्चाभिलषितं दद्यात् तृषितायोपयाचते॥ ७१
दत्तमन्वेति यद्दत्त्वा तद्दानं श्रेष्ठमुच्यते।
दत्तं दातारमन्वेति तच्छृणुष्व महामते॥ ७२

(क) देवलोके विशिष्यते इति क्वचित् पाठान्तरम्।

हिरण्यदानं गोदानं पृथिवीदानमेव च ।
एतानि वै पवित्राणि तारयन्त्यतिदुष्कृतीन् ॥ ७३
दानान्येतानि साधुभ्यो दत्त्वा मुच्यति पातकात् ।
यद्यदिष्टतमं लोके यच्चास्ति दयितं गृहे ॥ ७४
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ।
प्रियाणि लभते लोके प्रियदः प्रियकृत् तथा ॥ ७५
प्रियो भवति भूतानामिह चैव परत्र च ।
याचमानमभीमानादनासक्तमकिञ्चनम् ॥ ७६
यो नार्चति यथा शक्त्या स नृशंसो नराधमः ।
अमित्रमपि चेद्दीनं शरणैषिणमागतम् ॥ ७७
व्यसने योऽनुगृह्णाति स वै पुरुष उच्यते ।
कृशाय क्लीमते दद्याद्वृत्तिग्लानाय याचते ॥ ७८
अपहत्य क्षुधं यस्तु न तेन पुरुषः समः ।
क्रिया तु निःश्रतान् साधून् पुत्त्रदारैश्च कर्षितान्॥७९
अयाचमानान् काले यः सर्व्वोपायैर्निमन्त्रयेत् ।
स्ववृत्तिं ये न देवेषु न मर्त्येषु च कुर्व्वते ॥ ८०
महान्तो नित्यसत्त्वस्था न्यायलब्धोपजीविनः ।
विद्यास्नाता व्रतस्नाता अध्यात्मगतिचिन्तकाः ॥८१
गूढ़स्वाध्यायतपसो ब्राह्मणाः संशितव्रताः ।
स्वदारनियता दान्ताः शक्त्या दानपरायणाः ॥ ८२
पुराणस्मृतिवेत्तारो यज्ञकर्म्मस्वनुष्ठिताः ।
एते पूज्यतमा नित्यमाचार्य्यः स पुरोहितः ॥ ८३
पुत्त्रवत् परिपाल्यास्ते यतो धर्म्मधराः सदा ।
यच्छुभार्थं शुभं न्याय्यं वित्तं यद्विद्यते गृहे ॥ ८४
तेनैते ब्राह्मणाः पूज्याः स्वधर्म्ममनुवर्त्तता ।
नमस्कुर्य्यात् स्वयं विप्रान् वर्त्तमानान् यथातथम्॥८५
यथासुखं यथोत्साहं नमस्यास्ते स्वमातृवत् ।
यथा पत्याश्रयो धर्म्मः स्त्रीणां लोके सनातनः ॥८६
सन्तारयति भर्त्तारं यजमानं तथा द्विजः ।
सैव सा गतिर्नान्या क्षत्त्रियाणां मनस्विनाम् ॥ ८७
ब्राह्मणेषु सदा भक्तिर्दानाच्छादनभोजनैः ।
यदिमे ब्राह्मणा व्यास सन्त्यजेयुरपूजिताः ॥ ८८
निन्दन्ति च क्षुधाविष्टास्तदभावाय कल्पते ।
अथ ते कीर्त्तयिष्यामि यथा धर्म्मः सनातनः ॥ ८९
राजन्यो ब्राह्मणं नित्यं पुरा परिचचार ह ।
वैश्यो राजन्यमित्येव शूद्रो वैश्यमिति स्मृतिः ॥ ९०
मृदुभावान् सत्यशीलान् सत्यधर्म्मानुपालकान् ।
आशीविषानिव क्रुद्धांस्तानुपाचरत द्विजान् ॥ ९१
अपरेषां परेषाञ्च परेभ्यश्चैव ये परे ।
ते सर्व्वे ब्राह्मणेभ्योऽपि निस्तरन्ति भवार्णवम् ॥ ९२

व्यास उवाच ।

विद्यया जन्मना यौ तु भवेतामधिकस्तयोः ।
एतं मे संशयं छिन्धि को दानाय भवेन्मुने ॥ ९३

सनत्कुमार उवाच ।

विद्यया जन्मना वापि न श्रेयान् ब्राह्मणो भवेत् ।
आचारो ब्राह्मणस्येह तस्माच्छ्रेष्ठतरः सदा ॥ ९४
श्रेयोऽभियाचतो दत्तं दानमाढ्यरयाचते ।
अर्हत्तमो यो धृतिमान् कृपणादकृतात्मनः ॥ ९५
क्षत्त्रियोऽप्यर्जनरतिर्ब्राह्मणो धृतिमान् शुचिः ।
तस्माद्धि धृतिमान् विद्वान् देवान्प्रीणाति तुष्टिमान्९६
द्विजस्य प्रार्थ्यमानोऽपि व्यभिचारो हि दृश्यते ।
उद्वेजयति याचन् वै सदा भूतानि दस्युवत् ॥ ९७
म्रियते याचमानोऽपि तदनु म्रियते ददत् ।
ददत् सञ्जीवयत्येवमात्मानञ्च महामृषे ॥ ९८
आनृशंस्यं परो धर्म्मो याचते यत् प्रदीयते ।
अयाचतः सीदमानान् सर्व्वोपायैर्निमन्त्रयेत् ॥ ९९
यस्य चैतादृशा राष्ट्रे वसेयुस्ते द्विजोत्तमाः ।
भस्मच्छन्नानिवाग्नींस्तान्विद्धि तारयन्ति ते ॥१००
पूज्यास्ते ज्ञान-विज्ञान-तपोवीर्य्यसमन्विताः ।
तेभ्यः पूजां प्रयुञ्जीत ब्राह्मणेभ्यो दिने दिने ॥ १०१
ददद्वस्त्रविधान् देयानुपच्छन्नं तपस्यताम् ।
यदग्निहोत्रे सुहुतं सायं प्रातश्च तत्फलम् ॥ १०२
विद्या-वेद-व्रतस्नातानव्ययापत्यजीविनः ।
गूढ़स्वाध्यायतपसो ब्राह्मणान् संशितव्रतान् ॥ १०३
कृतैरावसथैर्हृद्यैः सप्रेष्यैः सपरिच्छदैः ।
निमन्त्रयित्वा कालेय पूजार्हांस्तान् द्विजोत्तमान्१०४
अपि चेत् प्रतिगृह्णीयुः श्रद्धापूतं स्वशक्तितः ।
कार्य्यमित्येव मन्वाना धर्म्मज्ञास्तत्त्वदर्शिनः ॥ १०५
यस्य दानं प्रतीक्षन्ते पर्ज्जन्यमिव कर्षकाः ।
स द्विजस्त्रिदशायातः स्वर्गी स्यान्नात्र संशयः ॥ १०६
रौद्रं कर्म्म क्षत्त्रियस्य सततं वर्त्तते मुने ।
तस्य वैतानिकं कर्म्म दानञ्चैवेह पावनम् ॥ १०७

न तु पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः।
अथ ते प्रतिगृह्णीयुर्दद्याद्दहरहमुने ॥ १०८
श्रद्धामास्थाय परमां पावनं ह्येतदुत्तमम्।
ब्राह्मणांस्तर्पयेद्द्रव्यैः सर्व्वज्ञानविशारदान् ॥ १०९
मैत्रान् साधून् वेद-विद्या-शील-वृत्त-तपोऽन्वितान्।
समृद्धः सन् गृहे यावद्ब्राह्मणेभ्यः प्रदीयते ॥ ११०
धेनूरनड्होऽन्नानि छत्त्रवासांस्युपानहः।
अश्ववन्ति च यानानि वेश्मानि शयनानि च ॥ १११
एते महाफला वृष्टीर्दग्धपापा महाफलाः।
अजुगुप्साय विज्ञाय ब्राह्मणान् वृत्तिकर्शितान्॥११२
उपच्छन्नं प्रकाशञ्च वृत्त्या तान् प्रतिपादयेत्।
एवं पापैर्विनिर्म्मुक्तः स्वर्गं प्राप्नोति मानवः ॥ ११३
पुत्त्रवच्चापि भृत्यांश्च प्रजाश्च परिपालयेत्।
योगक्षेमो भवेत् तस्य ब्राह्मणेभ्यस्तु नित्यशः॥११४
यो रक्षिभ्यः समादाय राजा राष्ट्रं प्रलुम्पति।
न रक्षेच्च ततस्तस्मात् पापमाहुर्मनीषिणः ॥ ११५
यस्मादाय नयात् सम्यग्यजेद्राजा समाहितः।
यत्किञ्चित् कुरुते कर्म्म तं प्रशंसन्ति साधवः ॥ ११६
अपीड़िताः सुसंवृद्धा यद्ददत्यनुकूलतः।
तादृशेनाभ्युपायेन यष्टव्यं नित्यमादृतैः ॥ ११७
यथोपरि निषिञ्चेत निचितार्थो यथोदधिः।
तथा राजा महायज्ञैर्यजेत बहुदक्षिणैः ॥ ११८
बाल-वृद्धधनं रक्षेदन्धस्य कृपणस्य च।
न खातपूर्व्वं कुर्व्वीत न चादत्तं धनं हरेत् ॥ ११९
हृतं कृपणवित्तं हि राष्ट्रं हन्ति नृपश्रियाः।
यथा स्वादूनि भोज्यानि समवेक्षन्ति बालकाः॥१२०
यदि चैतादृशो राष्ट्रे विद्वान् सीदेत् क्षुधान्वितः।
धिक् तस्य जीवितं राज्ञो राष्ट्रे यस्यावसीदति १२१
अवृत्त्या तं मनुष्योऽसौ शिविराह वचो यथा।
यस्य स्म विषये राज्ञः क्षुधा सीदन्ति बाड़वाः॥१२२
अवृत्तिमेव तत् राष्ट्रं दहते सहराजकम्।
क्रोशन्त्यो यस्य राष्ट्राद्धि ह्रियन्त तरसा स्त्रियः॥१२३
क्रोशतां पतिपुत्त्राणां मृतः स न तु जीवति।
अरक्षितारं भर्त्तारं विलोप्तारमदायकम् ॥ १२४
तं राजानं वलाद्धन्युः प्रजाः सम्भूय निर्घृणम्।
अहं वो रक्षितेत्युक्त्वा स्ववचोनाशकारकः ॥ १२५
स संहत्य निहन्तव्यो यो न रक्षति भूमिपः।
पापं कुर्व्वन्ति यत्किञ्चित्प्रजा राज्ञा ह्यरक्षिताः॥१२६
चतुर्थं तस्य पापस्य राज्ञो भवति नो मतम्।
अप्याहुः सर्व्वमप्येतद्भूयोऽर्द्धमिति निश्चयः ॥ १२७
शुभं वा यदि कुर्व्वन्ति प्रजा राज्ञा सुरक्षिताः।
चतुर्थं तस्य पुण्यस्य राजा प्राप्नोति निश्चयः ॥ १२८

इति श्रीशैवे महापुराणे धर्म्मसंहितायां विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः।

व्यास उवाच।

गुणाधिकेभ्यो विप्रेभ्यो दातुकामो महीपतिः।
कानि दानानि लोकेऽस्मिन् दद्याद्ब्रह्मसुतोत्तम ॥ १

सनत्कुमार उवाच।

लोकतत्त्वं हि संज्ञाय देवाः सर्षिपुरोगमाः।
अन्नमेव प्रशंसन्ति सर्व्वमन्ने प्रतिष्ठितम् ॥ २
तस्मादन्नं विशेषेण दातुमिच्छन्ति साधवः।
अन्नेन सदृशं दानं न भूतं न भविष्यति ॥ ३
अन्नेन धार्य्यते सर्व्वं विश्वं जगदिदं मुने।
अन्नमूर्ज्जस्करं लोके प्राणा ह्यन्ने प्रतिष्ठिताः ॥ ४
दातव्यं भिक्षवे चान्नं ब्राह्मणाय महात्मने।
कुटुम्बं पीड़यित्वापि आत्मनो भूतिमिच्छता ॥ ५
निदधाति निधिश्रेष्ठं यो दद्यादन्नमर्थिने।
ब्राह्मणायार्त्तरूपाय पारलौकिकमात्मनः ॥ ६
अर्च्चयेद्भूतिमन्विच्छन् काले द्विजमुपस्थितम्।
श्रान्तमध्वनि वर्त्तन्तं गृहस्थं गृहमागतम् ॥ ७
अन्नदः प्राप्नुते व्यास सुशीलो वीतमत्सरः।
क्रोधमुत्पतितं हित्वा दिवि चैवेह यत् सुखम् ॥ ८
नाभिनन्देदभिगतं न प्रणुद्यात् कथञ्चन।
अपि श्वपाके शुनि वा न दानं विप्रणश्यति ॥ ९
श्रान्तायादृष्टपूर्व्वाय ह्यन्नमध्वनिवर्त्तिने।
यो दद्यादपरिक्लिष्टं स समृद्धिमवाप्नुयात् ॥ १०
पितॄन् देवांस्तथा विप्रानतिथींश्च महामुने।
यो नरः प्रीणयत्यन्नैस्तस्य पुण्यफलं महत् ॥ ११
कृत्वापि सुमहत् पापं यो दद्यादन्नमर्थिने।

ब्राह्मणाय विशेषेण स तु पापैः प्रमुच्यते ॥ १२
ब्राह्मणेष्वक्षयं दानमन्नं शूद्रे महत् फलम्।
अन्नपानञ्च शूद्रे च ब्राह्मणे च विशिष्यते ॥ १३
न पृच्छेद्गोत्रचरणं स्वाध्यायं देशमेव च।
भिक्षितो ब्राह्मणेनेह दद्यादन्नं प्रयाचतः ॥ १४
अन्नदस्य शुभा वृक्षाः सर्व्वकामफलान्विताः।
भवन्तीह यथा पुत्रा हर्षयुक्तास्त्रिविष्टपे ॥ १५
अन्नदानेन ये लोकास्तान् शृणुष्व महामुने।
भवनानि प्रकाशन्ते दिवि तेषां महात्मनाम् ॥ १६
नानासंस्थानरूपाणि नानाकामान्वितानि च।
सर्व्वकामफलाश्चापि वृक्षा भवनसंस्थिताः ॥ १७
हेमवाप्यः शुभाः कूपा दीर्घिकाश्चैव सर्व्वशः।
घोषवन्ति च यानानि युक्तान्यथ सहस्रशः ॥ १८
भक्ष्यभोज्यमयाः शैला वासांस्याभरणानि च।
क्षीरं स्रवन्त्यः सरितस्तथैवान्नस्य पर्व्वताः ॥ १९
प्रासादाः पाण्डुराभासाः शय्याश्च कनकोज्ज्वलाः।
दातारमनुगच्छन्ति तस्मादन्नप्रदो भवेत् ॥ २०
एते लोकाः पुण्यकृतामन्नदानान्महाशुभाः।
तस्मादन्नं विशेषेण दातव्यं मानवैर्भुवि ॥ २१
एतद्वयः श्रावयेच्छ्राद्धे ब्राह्मणान् भक्तितो मुने।
अक्षय्यमन्नदानञ्च पितॄणामुपतिष्ठति ॥ २२

इति श्रीशैवे महापुराणे धर्म्मसंहितायामन्नदानविधिर्नामैकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः।

सनत्कुमार उवाच।

पानीयदानं परमं दानानामुत्तमं सदा।
तस्माद्वापीश्च कूपांश्च तड़ागानि च कारयेत् ॥ १
अर्द्धं पापस्य हरति पुरुषस्य विकर्म्मिणः।
कूपः प्रवृत्तपानीयः सुप्रवृत्तश्च नित्यशः ॥ २
सर्व्वं तारयते वंशं यः खनेच्च जलाशयम्।
गावः पिबन्ति विप्राश्च साधवश्च नराः सदा ॥ ३
निदाघकाले पानीयं यस्य तिष्ठत्यवारितम्।
स दुर्गं विषमं कृच्छ्रं न कदाचिदवाप्नुते ॥ ४
तड़ागानाञ्च वक्ष्यामि कृतानां ये गुणाः स्मृताः।
त्रिषु लोकेषु सर्व्वत्र पूजितो यस्तड़ागवान् ॥ ५
अथवा मित्रसदनं मित्रमैत्रविवर्द्धनम्।
कीर्त्तिसञ्जननं श्रेष्ठं तड़ागानां निवेशनम् ॥ ६
धर्म्मस्यार्थस्य कामस्य फलमाहुर्मनीषिणः।
तड़ागं सुकृतं देशे क्षेत्रमध्ये महाश्रयम् ॥ ७
चतुर्व्विधानां भूतानां तड़ागस्योपलक्षयेत्।
तड़ागानि च सर्व्वाणि दिशन्ति श्रियमुत्तमाम् ॥ ८
देवा मनुष्या गन्धर्व्वाः पितरोरग-राक्षसाः।
स्थावराणि च भूतानि संश्रयन्ति जलाशयम् ॥ ९
वर्षाकृतौ तड़ागे तु सलिलं यस्य तिष्ठति।
अग्निहोत्रफलं तस्य एवमाहुर्मनीषिणः ॥ १०
शरत्काले तु सलिलं तड़ागे यस्य तिष्ठति।
गोसहस्रफलं तस्य लभते नात्र संशयः ॥ ११
हेमन्ते शिशिरे चैव सलिलं यस्य तिष्ठति।
स वै बहुसुवर्णस्य यज्ञस्य लभते फलम् ॥ १२
वसन्ते च तथा ग्रीष्मे सलिलं तिष्ठते यदि।
अतिरात्राश्वमेधानां फलमाहुर्मनीषिणः ॥ १३
नानाविधानां वृक्षाणां रोपणे च गुणान् शृणु।
अतीतानागतौ चोभौ पितृवंशौ समुद्धरेत् ॥ १४
कान्तारवृक्षरोपी च तस्माद्वृक्षांस्तु रोपयेत्।
तत्र पुत्रा भवन्त्येते पादपा नात्र संशयः ॥ १५
परलोकं गते सोऽपि लोकानाप्नोति चाक्षयान्।
पुष्पैः सुरगणान् सर्व्वान् फलैश्चापि तथा पितॄन् ॥ १६
छायया चातिथीन् सर्व्वान् पूजयन्ति महीरुहाः।
पुष्पिताः फलवन्तश्च तर्पयन्तीह मानवान् ॥ १७
किन्नरोरग-रक्षांसि देव-गन्धर्व्व-मानवाः।
तथा ऋषिगणाश्चैव संश्रयन्ति महीरुहान् ॥ १८
इह लोके परे चैव पुत्रास्ते धर्म्मतः स्मृताः।
तड़ागकृद्वृक्षरोपी इष्टयज्ञश्च यो द्विजः ॥ १९
एते स्वर्गान्न हीयन्ते ये चान्ये सत्यवादिनः।
सत्यमेव परं ब्रह्म सत्यमेव परं तपः ॥ २०
सत्यमेव परो यज्ञः सत्यमेव परं श्रुतम्।
सत्यं वेदेषु जागर्त्ति सत्यञ्च परमं पदम् ॥ २१
तपो यज्ञश्च पुण्यञ्च देवर्षिपितृपूजनम्।
आपो विधिश्च विद्या च सर्व्वं सत्ये प्रतिष्ठितम् ॥ २२

सत्यं यज्ञस्तथा दानं मन्त्रा देवी सरस्वती।
व्रतचर्य्या तथा सत्यमोङ्कारः सत्यमेव च ॥ २३
सत्येन वायुरभ्येति सत्येन तपते रविः।
सत्येनाग्निर्निर्द्दहति स्वर्गः सत्येन तिष्ठति ॥ २४
पालनं सर्व्ववेदानां सर्व्वतीर्थावगाहनम्।
सत्यञ्च वदतो लोके सर्व्वमाप्नोत्यसंशयः ॥ २५
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राच्च सत्यमेव विशिष्यते ॥ २६
सत्येन देवाः प्रीयन्ते पितरो ऋषयस्तथा।
सत्यमाहुः परं धर्म्मं सत्यमाहुः परं पदम् ॥ २७
सत्यमाहुः परंब्रह्म तस्मात् सत्यं सदा वदेत्।
मुनयः सत्यनिरतास्तपस्तप्त्वा सुदुष्करम् ॥ २८
सत्यधर्म्म रताः सिद्धास्ततः स्वर्गमितो गताः।
अप्सरोगणसङ्घुष्टैर्विमानैः परियात्यभिः ॥ २९
वक्तव्यञ्च सदा सत्यं न सत्याद्विद्यते परम्।
अगाधे विपुले शुद्धे सत्यतीर्थे शुचिह्रदे ॥ ३०
स्नातव्यं मनसा युक्तैः स्नानं तत् परमं स्मृतम्।
आत्मार्थे वा परार्थे वा पुत्रार्थे वापि मानवाः ॥ ३१
अनृतं ये न भाषन्ते ते नराः स्वर्गगामिणः।
वेदा यज्ञास्तथा मन्त्राः सन्ति विप्रेषु नित्यशः ॥ ३२
नो भान्त्यमी ह्यसत्येषु तस्मात् सत्यं समाचरेत्।

व्यास उवाच।

तपसो मे फलं ब्रूहि पुनरेव विशेषतः ॥ ३३
सर्व्वेषाञ्चैव वर्णानां ब्राह्मणानां तपो धनम्।

सनत्कुमार उवाच।

प्रवक्ष्यामि तपोऽध्यायं सर्व्वकामार्थसाधनम् ॥ ३४
सुदुश्चरं द्विजातीनां तन्मे निगदतः शृणु।
तपो हि परमं प्रोक्तं तपसा विन्दते फलम् ॥ ३५
तपोरता हि ये नित्यं मोदन्ते सह दैवतैः।
तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ॥ ३६
तपसा मोक्षमाप्नोति तपसा विन्दते महत्।
ज्ञानविज्ञानसम्पत्तिं सौभाग्यं रूपमेव च ॥ ३७
तपसा लभ्यते सर्व्वं मनसा यद्यदिच्छति।
नातप्ततपसो यान्ति ब्रह्मलोकं कदाचन ॥ ३८
यत् कार्य्यं किञ्चिदास्थाय पुरुषस्तप्यते तपः।
तत् सर्व्वं समवाप्नोति परत्रेह च मानवः ॥ ३९

सुरापः परदारी च ब्रह्महा गुरुतल्पगः।
तपसा तरते सर्व्वं सर्व्वतश्च विमुच्यते ॥ ४०
अपि सर्व्वेश्वरः स्थाणुर्विष्णुश्चैव सनातनः।
ब्रह्मा हुताशनः शक्रो ये चान्ये तपसान्विताः ॥ ४१
षड़शीतिसहस्राणि मुनीनामूर्द्ध्वरेतसाम्।
तपसा दिवि मोदन्ते समेता दैवतैः सह ॥ ४२
तपसा प्राप्यते राज्यं स च शक्रः सुरेश्वरः।
तपसा पालयन् सर्व्वमहन्यहनि वृत्रहा ॥ ४३
सूर्य्याचन्द्रमसौ देवौ सर्व्वलोकहिते रतौ।
तपसैव प्रकाशेते नक्षत्राणि ग्रहास्तथा ॥ ४४
न चास्ति तत् सुखं लोके यद्विना तपसा किल।
तपसैव सुखं सर्व्वमिति वेदविदो विदुः ॥ ४५
सर्व्वञ्च तपसाभ्येति सर्व्वञ्च सुखमश्नुते।
तपस्तप्यति योऽरण्ये वन्यमूलफलाशनः ॥ ४६
योऽधीते ऋचमेकाहं शुचिः सन् तत्समं मुने।
शुचिरध्ययनात् पुण्यं यदाप्नोति द्विजोत्तमः ॥ ४७
तदध्यायाज्जपस्यापि द्विगुणं फलमश्नुते।
जगद्वयथा निरालोकं जायते शशि-भास्करौ ॥ ४८
विना तथा पुराणं हि ध्येयमस्मान्मुने सदा।
तप्यमानः सदाज्ञानो निरयाद्बोधशास्त्रतः ॥ ४९
सम्बोधयति लोकं तं तस्मात् पूज्यतमो गुरुः।
सर्व्वेषाञ्चैव पात्राणां श्रेष्ठः पुराणवित्तमः ॥ ५०
पतनात् त्रायते यस्मात् तस्मात् पात्रमुदाहृतम्।
धनं धान्यं हिरण्यञ्च वासांसि विविधानि च ॥ ५१
ये ददन्ति सुपात्राय ते यान्ति परमां गतिम्।
गां रथं महिषीञ्चैव गजानश्वांश्च शोभनान् ॥ ५२
यः प्रयच्छति मुख्याय तस्य पुण्यफलं शृणु।
अक्षयं सर्व्वकामीयं सोऽश्वमेधफलं लभेत् ॥ ५३
महीं ददाति यस्तस्मै कृष्टां फलवतीं शुभाम्।
स तारयति वै वंशान् दश पूर्व्वान् दशापरान् ॥ ५४
विमानेन च दिव्येन शिवलोकं स गच्छति।
न यज्ञैस्तुष्टिमायान्ति देवाः प्रेक्षणकैरपि ॥ ५५
बलिभिः पुष्पपूजाभिर्यथा पुस्तकवाचनैः।
विष्णोरायतने यस्तु कारयेद्धर्म्मपुस्तकम् ॥ ५६
शम्भोरर्कस्य कस्यापि शृणु तस्यापि यत् फलम्।
राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥ ५७

इतिहास-पुराणानां पुण्यं पुस्तकवाचनम्।
सर्व्वान् कामानवाप्येह सूर्य्यलोकं भिनत्ति सः ॥५८
सूर्य्यलोकञ्च भित्त्वा स ब्रह्मलोकञ्च गच्छति।
स्थित्वा कल्पशतान्यत्र राजा भवति भूतले ॥ ५९
अश्वमेधसहस्रस्य यत् फलं समुदाहृतम्।
तत् फलं समवाप्नोति देवाग्रे यो जयं पठेत् ॥ ६०
तस्मात् सर्व्वप्रयत्नेन कार्य्यं पुस्तकवाचनम्।
इतिहास-पुराणानां शम्भोरायतने शुभे ॥ ६१
नान्यत् प्रीतिकरं शम्भोस्तथान्येषां दिवौकसाम् ॥६२

इति श्रीशैवे महापुराणे धर्म्मसंहितायां पानीय-
दान-सत्य-तपः-पुराणमाहात्म्यकथनं
नाम द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः।

सूत उवाच।

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
पुराणं परमं पुण्यं सर्व्वपापहरं शिवम् ॥ १
कुमारः सर्व्वलोकानां नमस्कृत्य पितामहम्।
प्रोवाचेदं महाख्यानं देवर्षिर्ब्रह्मसूनुना ॥ २
गतोऽहं धर्म्मराजानं द्रष्टुं सम्पूजितो मया।
स्तुतिभिः परया भक्त्या बहुमानपुरःसरम् ॥ ३
तथा मधुरया वाचा तेनोक्तोऽस्मि सुखासने।
मया तत्रोपविष्टेन दृष्टं किञ्चिन्महाद्भुतम् ॥ ४
काञ्चनेन विमानेन वैदूर्य्यकृतवेदिना।
मणिमुक्ताविचित्रेण किङ्किणीजालशोभिना ॥ ५
आगतं पुरुषं तत्र आसनाद्देवसत्तमः।
ससम्भ्रमं समुत्थाय दृष्ट्वा धर्म्मः स्वयं विभुः ॥ ६
गृहीत्वेदं तदा वाक्यमुवाच ह सुखान्वितम्। (क)
सुखागतं धर्म्मदर्शिन् प्रीतोऽस्मि दर्शनात् तव ॥ ७
समीपे मम तिष्ठस्व यावदाज्ञा सतीह मे।
पुनर्यास्यसि तत् स्थानं यत्र ब्रह्मा स्वयं स्थितः ॥ ८
इत्युक्ते तु ततश्चान्यो विमानवरमास्थितः।
आगतः पुरुषो दिव्यो यत्र तिष्ठति धर्म्मराट् ॥ ९
स पूजितो विमानस्थः प्रश्रयावनतेन च।
सामपूर्व्वं तथोक्तः स यथा पूर्व्वनरस्य च ॥ १०
स्वयं धर्म्मेण वै ब्रह्मन् दृष्ट्वा पूजां कृतां तयोः।
तत्र मे विस्मयो जातः पृष्टो धर्म्मो मया ततः ॥ ११
नरस्तव सकाशं हि योऽयं पूर्व्वमिहागतः।
किमनेन कृतं कर्म्म यस्य तुष्टो भवान् भृशम् ॥ १२
अत्र मे कौतुकं जातं कृता हि स्वयमेव तु।
यदस्य भवता पूजा विस्मयो मेऽभवन्महान् ॥ १३
तथैवास्य कृता पूजा द्वितीयस्य नरस्य तु।
मन्येऽहं शुभकर्म्माणौ काविमौ नरसत्तमौ ॥ १४
यस्त्वमाभ्यां समं पूजां कुरुषे धर्म्मकारणात्।
ब्रह्म-विष्णु-शिवाद्यैश्च पूज्यसे त्वं सदा भृशम् ॥ १५
यस्येदृक् परमं पुण्यं किमेतौ कर्म्म चक्रतुः।
कथ्यतां मम सर्व्वं हि फलं दिव्यमवापतुः ॥ १६
ततस्त्वसौ तु मामाह हरिः कर्म्म यथा तयोः।
कृतं शुभमिहायातौ तच्छृणुष्व महामते ॥ १७

धर्म्म उवाच।

वैदिशं नाम नगरं पृथिव्यामस्ति विश्रुतम्।
तत्राभूत् पृथिवीपालो धरापाल इति श्रुतः ॥ १८
कस्मिन् काले पुरा देवी शशाप स्वगणं क्रुधा।
मास्मृते तु परा नारी भर्त्तुर्यत्ने निवेशिता ॥ १९
तस्माद्द्वादश वर्षाणि जम्बुकस्त्वं भविष्यसि।
इत्युक्तः स तु बभ्राम जम्बुको मेदिनीतलम् ॥ २०
वितस्ता-वेत्रवत्योस्तु सङ्गमे लोकविश्रुते।
शापान्तो भविता तत्र पूर्व्वोक्तो गिरिकन्यया ॥ २
तत्रासौ नशनं कृत्वा चैत्रे प्राणांस्ततोऽत्यजत्।
दिव्यरूपवपुर्भूत्वा जगाम शिवसन्निधौ ॥ २२
तत्राश्चर्य्यं महद्दृष्ट्वा धरापालो महीपतिः।
शम्भोरायतनं कृत्वा स्थापयामास वै शिवम् ॥ २३
तस्मिन् पुरे सुरान् सर्व्वानर्चयन् सोऽस्य वीक्ष्यते
शुभमायतनं शम्भोस्तस्मिन्नग्रे सभाजनैः ॥ २४
पूर्णे तु ब्राह्मणादीनां पूजयित्वा कदम्बकम्।
इतिहास-पुराणञ्च वाचकञ्च विशेषतः ॥ २५

(क) एतदर्द्धस्य स्थाने—
"गृहीत्वा दक्षिणे पाणौ पूजितोऽर्घेण यत्नतः।
शिरसाघ्राय देवेशः पुरतः स्थाप्य तं नरम्।
पूजयित्वा च तं धर्म्म इदं वाक्यमुवाच ह।"
इति क्वचित् पाठः।

पूजयित्वा द्विजश्रेष्ठं विद्याश्रेष्ठं महामुनिम्।
पुस्तकञ्चापि सम्पूज्य गन्ध पुष्पादिभिः क्रमात्॥ २६
ततस्तमाह राजासौ वाचकं विनयान्वितः।
मयेहायतनं शम्भोः कारितन्तु शिवाग्रतः॥ २७
चातुर्व्वर्ण्यमिदञ्चापि श्रोतुकामं कदम्बकम्।
तिष्ठतीह द्विजश्रेष्ठ कुरु पुस्तकवाचनम्॥ २८
यावत् संवत्सरं विप्र गच्छ वृत्तिन्त्वनुत्तमाम्।
स्वर्णनिष्कशतञ्चात्र ततो दास्ये तथापरम्॥ २९
पूर्णे वर्षे द्विजश्रेष्ठ श्रेयोऽर्थमहमात्मनः।
एवं प्रवर्त्तिते तत्र पुण्ये पुस्तकवाचने॥ ३०
षण्मासे गतमात्रे तु काले मुनिवरोत्तम।
अथायुषः क्षयाच्चायं कालधर्म्ममुपेयिवान्॥ ३१
मया चास्य विमानं हि शिवेन प्रेरितं दिवि।
इत्येषा कर्म्मणो व्युष्टिः पुण्याख्यानकसंज्ञिका॥ ३२
गन्धपुष्पोपहारैस्तु न तुष्टिर्जायते तथा।
देवानामिह सर्व्वेषां पुराणश्रवणाद्यथा॥ ३३
गो,सुवर्ण-हिरण्यानां वस्त्राणाञ्चापि कृत्स्नशः।
ग्रामाणां नगराणाञ्च दानात् तुष्टिर्भवेन्न हि॥ ३४
यथा स्याद्धर्म्मश्रवणात् प्रीतिः सर्व्वदिवौकसाम्।
इतिहास-पुराणानां श्रवणं मुनिसत्तम॥ ३५
यथा मे स्यान्महाप्रीतिर्न श्राद्धैः सर्व्वकामिकैः।
कन्याश्राद्धे महाप्रीतिर्मम स्यान्मुनिसत्तम॥ ३६
न तथा रोचते सा तु यथा पुस्तकवाचने।
अथ किं बहुनोक्तेन नान्यत् प्रीतिकरं मम॥ ३७
पुण्यव्याख्यानतो विप्र गुह्यमेतत् प्रकीर्त्तितम्।
यश्चायमपरो विप्र इहायातो नरोत्तमः॥ ३८
अयमासीन्नरश्रेष्ठ अस्मिन्नेव पुरोत्तमे।
सञ्ज्ञात्वा तु गतश्चायं धर्म्मश्रवणमुत्तमम्॥ ३९
श्रुत्वा भक्तिरभूदस्य ततश्च श्रद्धयान्वितः।
कृत्वा प्रदक्षिणं तस्य वाचकस्य महात्मनः॥ ४०
एष विप्रो मुनिश्रेष्ठ प्रददौ स्वर्णमाषकम्।
नान्यद्दानं कदा चक्रे लोभाविष्टेन चेतसा॥ ४१
पात्रदानफलादेष प्राप्तवान् ब्रह्मणः पदम्।
एतत्कर्म्मफलञ्चास्य न चान्यत् कृतवानयम्॥ ४२
यदनेन कृता पूजा वाचकस्य महात्मनः।
फलं हि कर्म्मणस्तस्य यन्मया पूजितः स्वयम्॥ ४३
वाचकं पूजयेद्यस्तु श्रद्धा-भक्तिसमन्वितः।
तेनाहं पूजितः स्यां वै क-विष्णू शङ्करस्तथा॥ ४४
वाचकं पूजयेद्यस्तु भक्ष्यभोज्यैरनुत्तमैः।
श्राद्धेऽहं पूजितः स्यां वै दश वर्षाणि पञ्च च॥ ४५
वाचके सत्कृते चेह भोजिते मुनिसत्तम।
तृप्तिर्भवति मे विप्र संवत्सरशतद्वयम्॥ ४६
न केवलं मम प्रीतिर्वाचके भोजिते भवेत्।
कृत्स्नशो देवतानाञ्च इन्द्रादीनां तथा भवेत्॥ ४७
ब्रह्म-विष्णु-शिवादीनां सन्दिष्टा वाचको मुने।
प्रीते तस्मिन् देवताः स्युः सर्व्वाः प्रीता न संशयः॥ ४८
ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रादित्यौ ग्रहादयः।
मत्साधनाय पूज्यन्ते ततः सम्पूज्यतां गताः॥ ४९
स्नानं पूजा जपो होमः श्रुतं शौचमहिंसता।
व्रतोपवासधैर्य्यञ्च मौनमिन्द्रियनिग्रहम्॥ ५०
धीर्विद्या सत्यमक्रोधो दानं क्षान्तिर्दया दमः।
वापी-कूप-तड़ागानां प्रासादानाञ्च कल्पनम्॥ ५१
कृच्छ्रचान्द्रायणं यज्ञास्तीर्थानि स्वाश्रमाणि च।
मत्साधनानि सर्व्वाणि प्रोक्तानीह मनीषिभिः॥ ५२
धर्म्मादर्थश्च कामश्च मोक्षश्च मुनिसत्तम।
यत् सुखं विद्यते किञ्चिन्मत्तश्चेह परत्र तत्॥ ५३
दुःखं पापाद्विजानीहि तस्माद्धर्म्ममयं सुखम्।
त्रिविधं तं विजानीहि सत्त्व-राजस-तामसम्॥ ५४
सदा सत्त्वं तपो विद्यान्मुनिसिद्धेषु नित्यशः।
राजसं दिवि देवेषु दनुदैत्येषु तामसम्॥ ५५
इत्येतत् कथितं कर्म्म शुद्धमाश्यां महामुने।
न चान्यच्चक्रतुः किञ्चित् सत्यं ते कथितं मया॥ ५६

सनत्कुमार उवाच।

एतद्दृष्ट्वा च श्रुत्वा च तवाभ्यासमिहागतः।
किमत्र तथ्यं देवेश कथ्यतां कौतुकं मम॥ ५७
श्रुत्वा कुमारवचनमाह लोकपितामहः।
तावुभौ साधुपुण्योऽसि नास्ति तुल्यस्तथा परः॥ ५८
यौ दृष्टौ भवता तौ तु पुराणौ पुण्यकारिणौ।
यदुक्तं धर्म्मराजेन सर्व्वप्रत्यक्षदर्शिना॥ ५९
सूर्य्येणापि यदुक्तं हि तथ्यं वै नान्यथा भवेत्।
यदासीन्मे मुखं पुत्र पञ्चमं लोकपूजितम्॥ ६०
तस्मादेतानि सर्व्वाणि निःसृतानि समन्ततः।

इतिहास-पुराणानि लोकानां हितकाम्यया ॥ ६१
यथैतानि प्रमेष्टानि पुराणानि सदा मुने।
न तथा चतुरो वेदा न चाङ्गानि महामते ॥ ६२
ददातु वाचके वृत्तिं नित्यं श्रद्धासमन्वितः।
शृण्वन्ति तानि ये भक्त्या ते यान्ति परमां गतिम्॥६३
इतिहास-पुराणानि स्पष्टीकरणमुत्तमम्।
धर्म्मार्थ-काम-मोक्षाणां मया सृष्टानि सुव्रत ॥ ६४
इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥ ६५
य एते चतुरो वेदा गूढ़ार्थाः सततं स्थिताः।
अतस्त्वेतानि सृष्टानि बोधायैषां महामुने ॥ ६६
यस्तु कारयते तत्र धर्म्मश्रवणमुत्तमम्।
करोति यः सदा भक्त्या स याति परमं पदम् ॥ ६७
कृत्वा तु दक्षिणां तत्र परंब्रह्माधिगच्छति।
तादर्थ्यं पात्रदानाद्धि दानपात्र हि तत् परम् ॥ ६८
तीर्थानामिव केदारं व्रतानाञ्च महाव्रतम्।
पर्व्वतानां यथा मेरुः पक्षिणां गरुड़ो यथा ॥ ६९
गङ्गा च सर्व्वसरितां देवश्रेष्ठो यथा शिवः।
पात्राणामपि सर्व्वेषां वाचको नात्र संशयः ॥ ७०
वाचकं पूजयेद्वद्यस्तु नरो भक्तिपुरःसरः।
पूजितं सकलं तेन जगत् स्यान्नात्र संशयः ॥ ७१

सनत्कुमार उवाच।

अहोऽतिधन्यता तस्य धर्म्मश्रवणकारिणः।
दानं यद्ददतोऽत्यर्थं पुण्यता वाचकाय वै ॥ ७२

ब्रह्मोवाच।

नित्यं दिने दिने यस्तु देवदेवस्य मन्दिरे।
कारयेद्धर्म्मश्रवणं स याति परमं पदम् ॥ ७३

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
श्रवणमाहात्म्यकथनं नाम त्रयो-
विंशोऽध्यायः ॥ २३ ॥

चतुर्व्विंशोऽध्यायः।

सनत्कुमार उवाच।

एतानि घोरदानानि महादानानि नित्यशः।
पात्रेभ्यस्तु प्रदेयानि आत्मानं तारयन्ति ते ॥ १
हिरण्यदानं गोदानं पृथिवीदानमेव च।
गृह्णन्तौ तौ पवित्राणि तारयन्ति स्वमेव तम् ॥ २
एतानि श्रेष्ठदानानि सर्व्वपापैः प्रमुच्यते।
तुल्यदानानि शस्तानि गावः पृथ्वी सरस्वती ॥ ३
द्वे तु तुल्यबले शस्ते ह्यधिका च सरस्वती।
नित्यमनडुहो गावश्छत्त्रं वस्त्रमुपानहौ ॥ ४
देयानि याचमानेभ्यः पानमन्नं तथैव च।
सङ्कल्पविहितो योऽर्थो ब्राह्मणेभ्यः प्रदीयते ॥ ५
अर्थिभ्यः पीड़ितेभ्यो हि मनस्वी तेन जायते।
एष बुद्धिमतो यज्ञः श्रद्धापूतः सदक्षिणः ॥ ६
विशिष्टः सर्व्वयज्ञेभ्यो ददतो ह्यनसूयया।
महाघोराणि वक्ष्यामि ब्राह्मणमुपहन्यते ॥ ७
पात्राणि शृणु काले यत् त्याज्यान्यस्मादिनापदम्।
मृतशय्याजिनं कृष्णं पापाद्विक्रयमात्मनः ॥ ८
चाण्डालात् पतितान्म्लेच्छात् तथा चोभयतोमुखी।
तुलायां रोहणं दानं कुरुक्षेत्रप्रतिग्रहः ॥ ९
तिलैरापूरणं कृष्णैर्दानान्येव पृथग्दश।
यस्त्वेकं प्रतिगृह्णाति ब्राह्मणो ह्यानदुर्ब्बलः ॥ १०
स याति नरकं घोरं पूर्व्वजन्मनि तस्य हि।
दाता पङ्के यथाक्षिप्य पादमश्नाति तत् तथा ॥ ११
स याति परमं लोकं यावदाभूतसंप्लवम्।
दातुः प्रतिग्रहीतुश्च मयैतत् कथितं पुनः ॥ १२
प्रवक्ष्यामि गतिञ्चैषां प्रलोभाद्धतचेतसाम्।
सम्प्राप्य सुमहादानं यदीच्छेद्गतिमात्मनः ॥ १३
मनीषी सकलं यच्च विप्रेभ्यः सम्प्रयच्छति।
कृत्वार्द्धेन तु कार्य्याणि वदान्यः कुरुते सदा ॥ १४
एवं सन् विप्रमुख्योऽपि गतिं श्रेष्ठां प्रयाति हि।
कनकञ्च तिला नागाः कन्या दासी गृहं रथः ॥१५
हयो भूः कपिला चैव महादानानि वै दश।
गृहीत्वा तानि सर्व्वाणि ब्राह्मणो ज्ञानवित् सदा१६
वदान्यं तारयेच्चैव आत्मानञ्च न संशयः।
सुवर्णं प्रथमं दानं सुवर्णं दक्षिणा परा ॥ १७
एतत् पवित्रं परममेतत् स्वस्त्ययनं महत्।
दश पूर्व्वान् दश परानात्मानञ्चैकविंशकम् ॥ १८
अपि पापशतं कृत्वा दत्त्वा विप्रेषु तारयेत्।
सुवर्णं ये प्रयच्छन्ति नराः शुद्धेन चेतसा ॥ १९

देवतास्ते प्रयच्छन्ति समन्तादिति नः श्रुतम् ।
तस्मात् सुवर्णं दत्त्वा च दत्ताः स्युः सर्व्वदेवताः ॥ २०
अग्निर्हि देवताः सर्व्वाः सुवर्णञ्च हुताशनः ।
वह्न्यभावे च कुर्व्वन्ति वह्निस्थानञ्च काञ्चनम् ॥ २१
सर्व्ववेदप्रमाणज्ञा वेदश्रुतिनिदर्शनात् ।
अपूतं यदवाप्यञ्च स्पृष्टं हि पूततां व्रजेत् ॥ २२
पितृ-देव-मनुष्याणामिष्टं तत् सर्व्वदा मुने ।
अद्भिः संशुध्यते सर्व्वमापः शुद्धिं व्रजन्ति हि ॥ २३
हेम्ना तस्मात् सदा शुद्धं हाटकं वह्निसम्भवम् ।
यस्तेनं ज्वालयित्वाग्निमादित्योदयनं प्रति ॥ २४
दद्याद्व्रतं समुद्दिश्य सर्व्वान् कामानवाप्नुयात् ।
सर्वदः सर्व्वदः प्रोक्तः सर्व्वान् कामाँल्लभेद्दिवि ॥ २५
विमानेनार्कवर्णेन भास्वरेण विराजितः ।
अप्सरोगणकीर्णेन गन्धर्व्वगतिनादिना ॥ २६
हंसवाहनयुक्तेन कामगेन नरोत्तमः ।
दिव्यगन्धवहः स्वर्गं परियाति यतस्ततः ॥ २७
तस्मात् स्वशक्त्या दातव्यं काञ्चनं मानवैर्भुवि ।
न ह्यतः परमं लोके सदा पापविमोचनम् ॥ २८
सुवर्णं ये प्रयच्छन्ति नराः शुद्धेन चेतसा ।
वह्न्यब्दसहस्राणि मोदन्ते दिवि देववत् ॥ २९

व्यास उवाच ।

बहुप्रकाराणि मया श्रुतानि
अहो त्वयोक्तानि तु यानि तानि ।
शुभानि सर्व्वाणि विशेषितानि
प्रब्रूहि दानं त्वमतो धरायाः ॥ ३०
यद्दीयते दानमिहापि स्वल्पं
स्वल्पेन दानेन धराधिपत्वम् ।
ख्यातं त्वया पूर्व्वतरैर्नराधिपै-
र्दानाधिपैः सर्व्वभुजो बभूवुः ॥ ३१
स्वल्पेन येनापि मही समग्रा
सम्प्राप्यते ब्रूहि सुखं परेत्य ।
तदेव दानं भगवंस्त्विदानीं
सम्पत्करं सर्व्वमयो नराणाम् ॥ ३२

सनत्कुमार उवाच ।

सर्व्वाणि दानानि भवन्ति दातुः
सम्यक् प्रदत्तानि मुने हि सम्यक् ।
तत् ते प्रवक्ष्यामि कृतं हि येन
दानोत्तमं तत् त्वधुना शृणुष्व ॥ ३३
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
राजा चित्ररथो नाम पुरासीन्नृपसत्तमः ॥ ३४
बुभुजे सकलान् भोगान् सप्तद्वीपवतीं महीम् ।
समारुह्य गतः सोऽपि सुरथस्त्रिदशालयम् ॥ ३५
तत्र जित्वा सहस्राक्षं देवैः सार्द्धं बलात् ततः ।
शासनं कारयामास स्वकीयं तत्र तत्र ह ॥ ३६
एवं पालयतः सम्यक् त्रैलोक्यं सचराचरम् ।
सुविस्मयमभूत् तत्र दृष्ट्वा राज्यं सुखं स्वकम् ॥ ३७
पुत्राणां षट्सहस्राणि कोषश्चाक्षयमेव च ।
जनानामनुरागश्च प्रभूतवरवाहनम् ॥ ३८
स्फीतिर्जनपदानाञ्च नाकालमरणं तथा ।
भार्य्यायाश्चैव सौभाग्यं रूपञ्चाप्रतिमं तथा ॥ ३९
एतत् सञ्चिन्तयित्वाथ कथमप्यन्यजन्मनि ।
पुनः स्यादिह सम्प्राप्तिः पूर्व्वधर्म्मादहं मुनीन् ॥ ४०
पृच्छामि सर्व्वधर्म्मज्ञान् करिष्ये सकलं पुनः ।
एवं सञ्चिन्त्य राजासौ वशिष्ठमिदमब्रवीत् ॥ ४१
त्वत्प्रसादान्मुनिश्रेष्ठ राज्यमव्याहतं भुवि ।
रूपञ्चाप्रतिमं लोके भार्य्या मेऽस्ति सुशोभना ॥ ४२
शरीरारोग्यमैश्वर्य्यं दानशक्तिरनुत्तमा ।
स्त्रियोऽन्नपानसामर्थ्यं हानिः स्यान्नैव मे क्वचित् ॥ ४३
बलं नागसहस्रस्य धारयाम्यरिसूदनम् ।
सुसन्ततिः सुभृत्याश्च सानुरागाश्च मे प्रजाः ॥ ४४
धर्म्महानिश्च मे नास्ति शक्तिर्मे पालने भुवः ।
यद्यद्यदिच्छाम्यहं कर्त्तुं तत् करोमि महामुने ॥ ४५
सर्व्वं पूर्व्वकृताद्धर्म्मादेवं प्राप्तं मयाखिलम् ।
एतन्मे सर्व्वमाचक्ष्व पूर्व्वजन्मकृतं फलम् ॥ ४६
तच्छ्रुत्वा वचनं तस्य वशिष्ठः प्राह तं नृपम् ।
चिन्तयित्वा चिरं कालं शृणु भूपान्यजन्मनि ॥ ४७
यत् कृतं ते प्रवक्ष्यामि कुयोनिमनुवर्त्तते ।
अवन्ती नगरी नाम पृथिव्या जघने स्थिता ॥ ४८
धर्म्मपालो नृपस्तत्र सर्व्वधर्म्मानुशासकः ।
वर्णवाह्यस्त्वमप्यासीत् स्वधर्म्ममनुवर्त्तकः ॥ ४९
वसतस्ते त्वनावृष्टिरासीच्च बहुवार्षिकी ।
अन्नक्षयात् ततस्त्वन्तु गत्वा तु वनमाश्रयत् ॥ ५०

...ती ते वसत लोके बहवः समुपाश्रयात्।
...रामकर्षिताः सन्तः फलमूलमहाशिनः॥ ५१
...रते च ततो लोके तस्मिन् फलविवर्ज्जिते।
...धार्त्तौ भार्य्यया युक्तः प्रागाद्दङ्गारकारकः॥ ५२
...स्मात् त्वं भार्य्यया युक्तो दारुण्यादाय सत्वरः।
...विशन्नगरीं सोऽपि विक्रेतुं तानि सर्व्वथा॥ ५३
...त्रप्राह जनः कश्चिद्दम्पत्योरटमानयोः।
...तः सायं क्षुधार्त्तौ तौ ध्वनिं शुश्रुवतुस्तदा॥ ५४
...णिक्मुख्यस्य विप्राणां जुह्वतां तद्गृहाङ्गणे।
...तौ गत्वा तत्र काष्ठानि ज्वालयामासतुस्तदा॥ ५५
...प्रतापार्थन्तु माघस्य पूर्णिमायां समागमे।
...राहश्रयोर्महाभाग तत्र तावूषतुस्तदा॥ ५६
...पत्नानां शतमेकस्य समुपोष्य जनार्द्दनम्।
...श्र्चयित्वा विधानेन वणिक् सोऽपि कृदातरः॥ ५७
पृथिवीं समर्पयामास हैमीं विप्रेभ्य एव हि।
...साब्धिद्वीपवतीं राजन् भक्त्या परमया युतः॥ ५८
...सा दृष्टा दीयमाना वै युवयोः क्लिश्यमानयोः।
तं दृष्ट्वा दुःखसन्तप्तौ न कृतं पुण्यमावयोः॥ ५९
येनेदृशौ भविष्यावो धरन्तौ मनसा त्विति।
दम्पत्योर्युवयो राजंस्तेनेयं वृद्धिरुत्तमा॥ ६०
प्राप्ता धर्म्मफलाद्राज्यं तस्मात् त्वं देहि साम्प्रतम्।
येन लभच्चयाँल्लोकान् प्राप्नोषि देवदुर्लभान्॥ ६१
एतत् ते कथितं सम्यक् यथावृत्तमभूत् पुरा।
तस्मात् त्वं देहि राजेन्द्र पृथिवीं सर्व्वकामदाम्॥ ६२
येनाच्युतिं समाप्नोति स्वर्गान्नृपतिसत्तम।
दीयमानां प्रपश्यन्ति पृथ्वीं सकलस्य भक्तितः॥ ६३
सर्व्वपापविनिर्म्मुक्तास्ते यान्ति परमां गतिम्।
शृणु भूपाल भद्रं ते मनसा ये धराप्रदाः॥ ६४
साब्धिद्वीपवतीं दृष्ट्वा तेषां वाक्यं यथा तथा।
चक्रवर्त्ती महावीर्य्यः पृथू राजाधिपोऽभवत्॥ ६५
बुभुजे पार्थिवं चैवं स देवासुररक्षसाम्।
गायन्ति मुनयो यस्य कीर्त्तिं यस्य तु भूतले॥ ६६
स्वर्गे च देवगन्धर्व्वाः पिशाचोरगराक्षसाः।
तद्दत्तञ्चोपजीवन्ति तथान्ये भूभृतोऽपि च॥ ६७
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
सर्व्वत्रैव पृथोः चैवं त्रैलोक्यान्तप्रवर्त्तकम्॥ ६८
सर्व्वरत्नसमायुक्तां सप्तद्वीपवतीं महीम्।
शशास धर्म्मेण पुनर्नाधर्म्मो दृश्यते कुतः॥ ६९
नान्यायकृन्न वाशुद्धो नास्तेनो मूषकादयः।
धनुष्कोट्या कृता येन निरद्रिः पृथिवी पुरा॥ ७०
तस्यैतदभिमानञ्च वीर्य्यञ्च पृथिवीपतेः।
रूपं दृष्ट्वा शुभा पत्नी तस्याभूच्चातिविस्मया॥ ७१
ततः सा चिन्तयामास सम्पद्या विस्मिता सती।
कथं स्यात् सम्पदेषा मे किं पुनरन्यजन्मनि॥ ७२
एवं सा बहुधाचिन्त्य पृथुञ्चैव समानुदत्।
अनिश्चयपरो राजा वैण्यस्तु विस्मयान्वितः॥ ७३
ततः पप्रच्छ सर्व्वज्ञान् ब्राह्मणानादिभूमिपः।
प्रणिपत्य महाराजो वचनञ्चेदमब्रवीत्॥ ७४
यदि सानुग्रहा बुद्धिर्भवतां मुनिसत्तमाः।
तदहं प्रष्टुमिच्छामि किञ्चित् तद्वक्तुमर्हथ॥ ७५
यथा वने मया दृष्टा भवन्तः सुप्रसादिताः।
वक्तुमर्हथ सर्व्वज्ञाः सर्व्वं सर्व्वोपकारिणः॥ ७६

मुनय ऊचुः।

यस्ते मनसि सन्देहो यश्च सांशयिको भुवि।
वदिष्यामो यथान्यायं तं पृच्छाद्य महीपते॥ ७७
वयं हि नृपशार्दूल भवता परितोषिताः।
सम्यक् प्रजाः पालयता सर्व्वद्वीपेषु पार्थिव॥ ७८
सन्तुष्टो ब्राह्मणोऽश्नीयाच्छिन्द्याद्वा धर्म्मसंशयम्।
हितञ्चोपदिशेद्धर्म्ममहिताद्वा निवर्त्तयेत्॥ ७९
इत्युक्ते प्राह तान् विप्रानादिराजा पृथुस्तदा।
कथयन्तु यथा वृत्तं किं मया सुकृतं कृतम्॥ ८०
कोऽहमासं पुरा विप्राः किं कर्म्म च मया कृतम्।
किञ्चानया सुचार्व्वङ्ग्या मम पत्न्या कृतं पुनः॥ ८१
येनावयोरियं स्फीतिः सुसम्भूता सुदुर्लभा।
चत्वारश्चाप्रतिहता गतयो मम पृच्छतः॥ ८२
अशेषा भूभृतो वश्याः कोषस्यान्तो न विद्यते।
बलञ्चाप्रतिमं मेऽस्ति शरीरारोग्यमुत्तमम्॥ ८३
सुरोऽपि वपुषा तेजो न कश्चित् सहतेऽधुना।
सोऽहमिच्छामि तं ज्ञातुं यथा चेयमनिन्दिता॥ ८४
अतिभाति च मे कान्त्या भार्य्यमतिशोभना।
पुरा नौ किं कृतं कर्म्म यस्यायेषमिदं फलम्॥ ८५
इति पृष्टा नरेन्द्रेण समस्तास्ते तपोधनाः।

मरीचिं प्रेरयामासुः कथ्यतामिति भूपतेः ॥ ८६
इत्युक्तः सोऽपि धर्म्मज्ञः प्रजापतिसुतस्ततः।
योगमास्थाय सुचिरं यथावदृषिसत्तमः ॥ ८७
ज्ञातवानादिराजस्य सर्व्वं पूर्व्वविचेष्टितम्।
स तमाह ततो भूपं चिन्तितार्थो यतव्रतः ॥ ८८

मरीचिरुवाच।

शृणु भूपाल यस्येदं सकलं कर्म्मणः फलम्।
भार्य्यया सहितं प्राप्तमत एकमना भव ॥ ८९
बभूव त्वं पुरा शूद्रः परहिंसापरायणः।
पुरेयं भवतो भार्य्या पतिव्रतपरायणा ॥ ९०
त्वच्चित्तानुगता नित्यं तव शुश्रूषणे रता।
निःस्वो भूत्वा परिक्षीणः परेषां भृत्यतां गतः ॥ ९१
त्यज्यमानापि सा साध्वी नो त्यजेत् त्वामनिन्दिता।
अनया च समं साध्व्या विष्णोरायतने त्वया ॥ ९२
नीता हेममयी पृथ्वी धनिनो वृषलस्य तु।
अयोध्यायां महाराज कस्य भक्त्यानया सह ॥ ९३
परिचर्य्या कृता दातुर्मनसा पुण्यकाङ्क्षिणः।
सम्मार्ज्जनादिकं सर्व्वं कृतं ते भक्तितो नृप ॥ ९४
निःशेषमुपशान्तं तत् पापं शुश्रूषणादतु।
सर्व्वकामप्रदं कर्म्म सकमेन्वाः कृतं त्वया ॥ ९५
तेनेदमखिलं राज्यमशेषा जगती तव।
एवं नरेन्द्र शूद्रत्वात् तस्य कर्म्मपरायणः ॥ ९६
तन्मयत्वेन सम्प्राप्तं महीमानमनुत्तमम्।
किं पुनर्यो नरो भक्त्या पृथ्वीं हैमीं प्रयच्छति ॥ ९७
शतं पूर्व्वापरञ्चापि कुलानां तारयेन्नृप।
यावच्चन्द्रश्च सूर्य्यश्च यावत् तिष्ठति मेदिनी ॥ ९८
न स्वर्गाच्यवते तावदिमुक्तः सर्व्वपातकैः।
धर्म्मार्थ-काम-मोक्षञ्च यदिच्छेत् तत् तदाप्नुयात्॥९९
इत्येतत् कथितं राजन् सर्व्वभूमिप्रदो भव।
यदिच्छेन्मनसा सर्व्वं तत् तदाप्नोत्यसंशयम् ॥ १००
द्विजं हिताय यो दद्यान्मुच्यते सर्व्वपातकैः।
इत्येतत् कथितं राजन् पृथिवीदानमुत्तमम् ॥ १०१
मनसा चिन्तयेद्यस्तु स स्वर्गमधिगच्छति।
इदं यः शृणुयान्नित्यं पठेच्चैवेह भक्तितः ॥ १०२
विमुक्तः सर्व्वपापेभ्यः स्वर्गलोकञ्च गच्छति ॥ १०३

इति श्रीशैवे ध० सं० चतुर्व्विंशोऽध्यायः ॥२४॥

पञ्चविंशोऽध्यायः।

व्यास उवाच।

एवं श्रुत्वा स राजा तु पृथुवैंश्यः प्रतापवान्।
याहशीं कारयामास यत्प्रमाणां यदुद्भवाम् ॥ १
यस्मिन् कालेऽददात् सोऽपि तद्ब्रूहि लमशेषतः।

सनत्कुमार उवाच।

कुर्य्यात् स्वशक्तितो व्यास उत्तमाधममध्यमाः ॥ २
सन्तीह मानवा लोके शक्त्या दानं लभन्ति ते।
लक्षेण तु सुवर्णेन सहस्रेण शतेन तु ॥ ३
पञ्चशता वा निःस्वोऽपि सुवर्णेन तु कारयेत्।
एकहस्तां द्विहस्तां वा त्रिहस्तां वापि कामतः ॥ ४
हेमाभावे सुतास्रस्य कृत्वा हैमन्तु निक्षिपेत्।
एतन्मात्रेषु शैलेषु सर्व्वतः प्रकिरेद्वसु ॥ ५
रत्नाभावादणुश्चैव हैमं तेषु विनिक्षिपेत्।
तन्मध्ये चोत्थितो मेरुर्मन्दरं तस्य पूर्व्वतः ॥ ६
गन्धमादनसंज्ञन्तु मेरोश्चैव तु दक्षिणे।
नीलन्तु पश्चिमे भागे विपुलश्चोत्तरे ततः ॥ ७
मेरोर्द्धे बज्ररत्नानि न्यस्ता वैदूर्य्यमन्दिरे।
दक्षिणे विद्रुमञ्चैव महानीलन्तु पश्चिमे ॥ ८
मूर्द्ध्नि संविन्यसेत् तत् पद्मरागं तथोत्तरे।
तदभावाद्धिरण्यन्तु मौक्तिकादि ततः परम् ॥ ९
कदम्ब-जम्बुकाश्वत्थ-श्रीपर्णीपल्लवं क्रमात्।
नागवल्ल्यास्तथाभाऽवात् सम्यक् पत्राणि विन्यसेत्॥१०
लवणस्य समुद्रन्तु तद्बाह्ये परिकल्पयेत्।
लवणेन पवित्रेण वाह्यं तत् परिपूरयेत् ॥ ११
तद्बाह्ये प्लक्षद्वीपन्तु अब्धिरिक्षुरसस्य वै।
तेनापूर्य्य ततो द्वीपः शाल्मलिश्चापरो मुने ॥ १२
सर्पिषस्तु समुद्रं वै पूरयेत् सर्पिषा च तम्।
कुशद्वीपात् परो दध्नस्तेनैवापूरयेत् ततः ॥ १३
क्रौञ्चात् परस्तु दुग्धेन शाकद्वीपमतः परम्।
तस्मात् तं मधुनापूर्य्य तदन्ते पुष्करं स्थितम् ॥ १४
तस्मात् तदम्बुनापूर्य्य पुष्करैरुपशोभितम्।
एवं कृत्वा धरां सर्व्वां वेदिकायां निधापयेत् ॥ १५
संक्षेपात् कथितं व्यास पृथिव्या दानमुत्तमम्।
नास्या वर्षायुतेनापि वक्तुं शक्योऽतिविस्तरः ॥ १६

…मावं खनेत् कुण्डं होमं तत्रैव कारयेत् ।
…विद्यार्थकैर्युक्तैस्तिलैर्व्याहृतिभिस्तथा ॥ १७
…न्तैस्तु ग्रहेश्चैव स्वैः स्वैर्मन्त्रैः स वैदिकैः ।
…तैस्तु वितयं हुत्वा आपो देवेत्यनुक्रमात् ॥ १८
…तेः पवित्रं वितयं हुत्वाम्नावाहुतीस्ततः ।
…र्वीति पुनर्हुत्वा पूजयेत् तत्र केशवम् ॥ १९
…रैर्मिर्धरां तद्वन्मन्त्रेणानेन वै मुने ॥ २०
धराधराधार धराबलाग्र
सर्व्वाश्रयस्त्वं हि पुमानशेषः ।
दैवैः सुपूज्योऽसि सुपूजितो मे
सम्पूज्यमानोऽभिमतं ददस्व ॥ २१
दृष्टा लयेयं पृथिवी धृता पुन-
र्दत्ता त्वमस्याः प्रतिसंग्रहीता ।
तुभ्यं मया हेममयी निवेदिता
गृहीष्व कामाभिमतं ददस्व ॥ २२
…पूज्य विधानेन वस्त्रैराभरणैस्तथा ।
…ह्मणान् वाचयित्वाग्रे प्रीयतां धरणीधरः ॥ २३
…दत्त्वा द्विजेभ्यस्तां शृणु काले च यत् फलम् ।
…नां शतमागामि समतीतं तथा शतम् ॥ २४
…यित्वा दिवं याति यावदिन्द्राश्चतुर्द्दश ।
…थावेकच्छत्रन्तु राज्यं प्राप्नोति भूतले ॥ २५
…स्यैव सा बुद्धिर्वर्त्तते धर्म्म एव हि ।
…मोक्षमवाप्नोति दानादस्याः प्रभावतः ॥ २६
इति श्रीशैवे महापुराणे धर्म्मसंहितायां
पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः ।

व्यास उवाच ।

…हत्या गुरोरस्ति किं नश्यति तपो विना ।
…वः सर्व्वतस्त्वञ्चो दानात् त्वं ब्रूहि पृच्छतः ॥ १
…तदुक्तं पुरा तेन तद्दानं ब्रूह्यशेषतः ।
…दानेन सद्यो ना पापाद्भवत्यकिल्बिषी ॥ २

सनत्कुमार उवाच ।

…वाषशैर्निजं देहं कृत्वा पापान्यशेषतः ।
…पेतं तद्धि कालेन एतत् ते कथितं स्फुटम् ॥ ३
जीवं हि दैहिकाः प्राणा मध्ये वाह्ये सदा वसु ।
देहसम्पीड़या ताभ्यां नरः पापात् प्रमुच्यते ॥ ४
तस्मात् पृच्छ ऋषिश्रेष्ठ शाश्वतं कथयामि ते ।

व्यास उवाच ।

अस्मिन् कलियुगे मर्त्त्याः सदाचारविवर्ज्जिताः ॥ ५
बहुपापरता मूढ़ा भविष्यन्ति महामुने ।
रौरवादिषु घोराणां यातनाः किल शुश्रुम ॥ ६
कान्तारं गहनं तत्र तदर्थं ब्रूहि मे द्विज ।
यथा न पश्येत् कान्तारं सुदुष्पारं सुदुर्गमम् ॥ ७
दानेन तपसा वापि नरस्तन्मे वद प्रभो ।

सनत्कुमार उवाच ।

शृणु राजन् महागुह्यं महापातकनाशनम् ॥ ८
कान्तारं ये न पश्यन्ति तथा वक्ष्यामि सुव्रत ।
कार्त्तिकस्यासिते पक्षे चतुर्द्दश्यां समाहितः ॥ ९
गन्धपुष्पैः सुनैवेद्यैरर्च्चयेदच्युतं बुधः ।
तिलप्रस्थमयं कृत्वा नागं सर्व्वगुणान्वितम् ॥ १०
धेनुं वत्सं सुवर्णन्तु सुदीपैः सर्व्वतश्चितम् ।
मुक्ताफलेक्षणं रौप्य-दशनं विद्रुमच्छदम् ॥ ११
सुवर्णतिलकोपेतं कर्णचामरभूषितम् ।
कांस्यघण्टायुगयुतं क्षौमकक्षाविभूषितम् ॥ १२
मौक्तिकापूर्णकुम्भन्तु सिन्दूरावृतमस्तकम् ।
विचित्रवस्त्रसंवीतं मुक्तामालाविराजितम् ॥ १३
पादुकोपानहं छत्रं भाजनासनदर्पणम् ।
शक्त्या कुर्य्यात् सुवर्णेन वित्तशाठ्यविवर्ज्जितः ॥ १४
तस्याग्रेऽष्टदलं पद्मं संलिखेत् कुङ्कुमाकृतेः ।
आपूर्य्याच्युतमीशानमर्च्चयेत् कर्णिकापदे ॥ १५
धातारं विश्वकर्त्तारं पूर्व्वपत्रे तु वासवम् ।
नमोऽस्तु देवपतये पर्ज्जन्याय मरुत्वते ॥ १६
नमोऽग्नये हुताशाय हव्यवाहाय वह्नये ।
नमः पितॄणां पतये धर्म्मायानन्ददायिने ॥ १७
नमो निर्ऋतिनाथाय धर्म्माय निरयात्मने ।
नमोऽपां पतये तुभ्यं भवभीतार्त्तिहारिणे ॥ १८
नमस्ते पृषदश्वाय वायवे जगदायुषे ।
नमो रिक्थाधिपतये सोरस्मय-मदाय ते ॥ १९
नमस्ते पशुनाथाय शिवायेशाय ते नमः ।
कान्तारपतये धात्रे ब्रह्म-रुद्राय विष्णवे ॥ २०

विश्वरूपाय देवाय शर्म्मदाय नमो नमः।
एवं कल्पविधानेन तत्र कान्तारदेवताः॥ २१
देवदेवं ततोऽभ्यर्च्य विष्णुं विश्वपतिं पुनः।
इममुच्चारयेन्मन्त्रं कृताञ्जलिपुटः सुधीः॥ २२
कान्तारमध्वतो मार्गमिमेनानेन केशव।
सुखं व्रजामि तं दुर्गं तथा त्वं कुरु मे प्रभो॥ २३
यथा भद्रघटो नित्यं कामधेनुर्महाद्रुमः।
चिन्तामणिस्तथा दन्ती सदा भवतु मे विभो॥ २४
एवमुच्चार्य्य तं दद्याद्ब्राह्मणाय स्वशक्तितः।
सरत्नं सहिरण्यञ्च सर्व्वाभरणभूषितम्॥ २५
ततो नक्तं समश्नीयाद्दीपं दद्यात् तथा गजे।
पार्थिवे राजशार्दूल कार्त्तिक्यां वा प्रदापयेत्॥ २६
एवं यः कुरुते सम्यग्विधानेनैव शक्तितः।
यममार्गभयं घोरं नरकञ्च न पश्यति॥ २७
हत्वा पापान्यशेषाणि सबन्धुः ससुहृज्जनः।
दिवि संक्रीड़ते व्यास यावदिन्द्राश्चतुर्द्दश॥ २८
कपिलानां शते दत्ते यत् फलं ज्येष्ठपुष्करे।
कान्तारस्य प्रदानेन समं स्यान्मुनिसत्तम॥ २९
यच्चोभयमुखीनाञ्च शतेन लभते फलम्।
कान्तारस्य प्रदानेन तत् फलं नात्र संशयः॥ ३०
संनिहत्यां नरश्रेष्ठ राहुग्रस्ते दिवाकरे।
शरादानान्न तत् पुण्यं कान्तारेण यदश्नुते॥ ३१
कृष्णाजिनेन यत् पुण्यं भूयः शतगुणेन च।
पुण्यं तत् सकलं लभ्यं मुने कान्तारहस्तिना॥ ३२
गजाश्व-रथ-धेनूनां यत् फलं हि निगद्यते।
तत् फलं सकलं विद्यात् कान्तारेण महामुने॥ ३३
तिलाज्य-जल-धेनूनां यत् पूर्व्वोक्तं फलं लभेत्।
तन्मूर्त्तिं तन्मयीं दत्त्वा पुण्यं शतगुणं लभेत्॥ ३४
एवं ज्ञात्वा मुनिश्रेष्ठ श्रेष्ठं कान्तारकारणम्।
दद्यादनेन मन्त्रेण संपूज्य गजपुङ्गवम्॥ ३५
नमः कान्ताररूपाय परमेशाय शम्भवे।
नमोऽस्तु दिगिभेशाय नमोऽरूपाय विष्णवे॥ ३६
अनेन तिल-कान्तार-दन्तिदानेन दैत्यहा।
प्रीयतां पुण्डरीकाक्षः प्रभुः कान्तारतारकः॥ ३७
एवमुच्चार्य्य तं दद्याद्ब्राह्मणाय कुटुम्बिने।
एतत् पापहरं पुण्यं सुख-स्वर्गकरं परम्॥ ३८
पठतां शृण्वताञ्चापि यस्तु भावयते सदा।
करिष्यामीत्यहं भक्त्या स्वर्गलोकं स गच्छति॥ ३९

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
षड्विंशोऽध्यायः॥ २६॥

सप्तविंशोऽध्यायः।

व्यास उवाच।

पूर्व्वोक्तं ते दिनैकेन पूजितः स महेश्वरः।
फलं ददाति विपुलमेतत् सर्व्वं महामुने॥ १
गुरूणां न भवेत् क्वाऽत्र वचनं मुखनिःसृतम्।
विफलं वद तस्मात् त्वमीश्वराददतां वर॥ २

सनत्कुमार उवाच।

नासत्यमेतदुक्तं मे शृणु वाक्यं महामुने।
नियमेनार्च्चितः शम्भुर्दिनैकेन प्रसीदति॥ ३
क्रीड़ादिनेऽर्च्चितस्तस्य सर्व्वान् कामान् प्रयच्छति।
वृथाश्रमो हि बहुभिः क्लेशैनैवाश्नुते फलम्॥ ४
यथा च रत्नविक्रेतुः ससूक्ष्मादश्नुते मुने।

व्यास उवाच।

कथयस्व समासेन तद्व्रतं मे महामुने॥ ५
लोकानां हितकामेन कृतं येनेह तद्वद।

सनत्कुमार उवाच।

आसीत् पूर्व्वयुगे राजा जम्बूद्वीपे सुधार्म्मिकः॥ ६
शतमहीक्षिणीनाञ्च आधिपत्यं चकार सः।
स राजास्त्रविदां श्रेष्ठो वेदशास्त्रार्थपारगः॥ ७
धर्म्मिष्ठः सत्यवाक् शूरो दाता भोक्तातिथिप्रियः।
नित्यदाता द्विजेभ्योऽसौ हेमवस्त्रादिशोभनम्॥ ८
यदिष्टमानो नित्यं तत् तत्तच्छ्रद्धासमन्वितम्।
ददात्यनुदिनं व्यास तेषामर्थं स्त्रियादिकम्॥ ९
एवं राज्यं शुभं कृत्वा दीर्घकालं महीपतिः।
शतानीकस्ततो नाम्ना सहस्रानीकमेव च॥ १०
सुतं जज्ञे ततः कालात् क्षितीशोऽसौ मृतश्च सः।
कुलक्रमागतं राज्यं चक्रेऽसौ नृपसत्तमः॥ ११
न्यायतो धर्म्मतश्चैव राज्ये शास्ति वसुन्धराम्।
कान्त्या चन्द्रमसश्चैव प्रतापादित्यसन्निभः॥ १२
मनुश्चैवं सदा पाति पृथिवीं न्यायतोऽपि सः।

ब्राह्मणेभ्यो ददातीशो यथा तस्य पिता न सः ॥ १३
अथ दीर्घेण कालेन ब्राह्मणास्तु यतव्रताः।
प्रतिग्रहमलप्सन्तः समाजग्मुस्तदन्तिकम् ॥ १४
आगतान् स सम्प्रेक्ष्य पूजां चक्रे यथाविधि।
पूजितास्ते सुसंहृष्टाः प्रोचुर्नृपतिसत्तमम् ॥ १५

द्विजा ऊचुः।

शृणु राजन् प्रवक्ष्यामि एकचित्तः समाहितः।
पिता ते पूजिता नित्यं दानाच्छादनभोजनैः ॥ १६
ये केचिद्ब्राह्मणाः सन्ति यथाकामं यथासुखम्।
संवर्द्धिताः स्वके धाम्नि समबुद्धिरयं नृपः ॥ १७
श्रुत्वा तं तव राज्ये तु सम्प्रेक्ष्य च गता द्विजाः।
वयमोऽत्र परिखिन्ना नृपते सकुटुम्बिनः ॥ १८
अतः किं कुर्म्म एवं हि यास्यामः कुत्र पीड़िताः।
दारिद्र्येणैव नो बुद्धिर्यथा शृणु नृपोत्तमः ॥ १९
एतच्छ्रुत्वा स तान् विप्रान् प्रोवाच प्रहसन्निव।

राजोवाच।

सत्यमेतद्द्विजेभ्योऽपि दत्तं दानं महाफलम् ॥ २०
परत्र न्यायतो विप्राः किञ्चिद्वक्ष्यामि कारणम्।
दानात् स्वर्गमवाप्नोति इहायातः सुखी भवेत् ॥ २१
पिता मम द्विजश्रेष्ठा कथं स्वर्गे वसत्यसौ।
ज्ञात्वैवैतत् समासेन कथयस्व यथातथम् ॥ २२
एतच्छ्रुत्वा ततो विप्रा वज्रपातोपमं वचः।
समुत्तस्थुः समाश्वाप्य राजानं दीनमानसाः ॥ २३
समवायीकृतास्ते तु तथान्योऽन्यमभाषत।
राजा पञ्चत्वमापन्नः क्वासौ तिष्ठति धार्म्मिकः ॥ २४
वयं कथं न जानीमः संशयं परमं गताः।
एवं विब्रुवतां तेषां दिनानि सुबहूनि च ॥ २५
गतानि जुह्वतां व्यास रविर्व्याकुलतां गतः।
राज्ञां धर्म्मवताञ्चापि प्रजाः पालयतां सताम् ॥ २६
न वर्षं जायते तस्मात् सुभिक्षं क्षेममेव हि।
अग्नौ न्यस्ताहुतिः सम्यगादित्यायोपगच्छति ॥ २७
आदित्याज्जायते वृष्टिर्वृष्टेरन्नसमुद्भवः।
अन्नात् सञ्जायते सर्व्वं जगत्तृप्तिस्तु सर्व्वदा ॥ २८
एवं सञ्चिन्त्य भगवानाजगाम ततो रविः।
हिताय तेषां सन्द्रेष्टुं द्विजो भूत्वा तु तान् ब्रवीत्॥२९
किं विषण्णा द्विजा यूयमिहेप्सन्तः स्वकर्म्म तत्।
नैत्यकं पञ्चयज्ञोत्थमनन्तफलदायकम् ॥ ३०
नैत्यकं कर्म्म कुर्व्वाणो योऽन्यत् फलं समीहते।
तत् तत् सम्प्रेत्य ददतस्तत् त्यक्त्वान्यन्न तद्भवेत् ॥ ३१
बहूनि शुभतीर्थानि फलदानीह सर्व्वतः।
श्रूयन्ते न फलं दातुं स्वकर्म्मफलघातिनः ॥ ३२
पञ्चयज्ञफलं नित्यं चतुराश्रमवासिनाम्।
भुक्ति-मुक्तिकरं विप्रास्तस्मात् तन्न परित्यजेत् ॥ ३३
कुर्व्वन् नित्यन्तु नैमित्तं कामिकञ्च समाश्रयेत्।
नित्यकारी तु नैमित्ताल्लभेत् पुण्यं शतोत्तरम् ॥ ३४
सहस्रगुणितं काम्यात् तथाप्नोति पुमान् सदा।
प्रतिग्रहविहीनन्तु सदाजप्यपरो द्विजः ॥ ३५
यस्तं मृतं समाख्यास्येत् तत् पुरादागतो नृपम्।
एतच्छ्रुत्वा व्रतं तस्य प्रणिपत्य च तं द्विजाः ॥ ३६
ततस्तेऽन्वेषयामासुर्हर्षाद्गत्वा चतुर्द्दिशम्।
तथाविधं न पश्यन्तः पत्तनेषु पुरेषु च ॥ ३७
गत्वापश्यंस्तपस्यन्तं भार्गवं द्विजसत्तमम्।
ऊर्द्ध्वबाहुं निरालम्बं पादेनैकेन संस्थितम् ॥ ३८
तं दृष्ट्वा प्रणिपत्याशु परिवार्य्य द्विजोत्तमम्।
प्रत्यग्विसंस्थिते सूर्य्ये ततोऽसौ द्विजसत्तमः ॥ ३९
जप्यं त्यक्त्वा सुसन्तर्प्य देवान् पितृगणांस्तथा।
नैत्यकं कर्म्म कृत्वापि समुत्तस्थौ स तान् द्विजान् ॥४०
उपविष्टान् समद्राक्षीत् कृताञ्जलि स पूर्व्ववत्।
पूजयामास तान् सर्व्वान् पाद्याद्यैर्विधिपूर्व्वकम् ॥४१
पर्य्यपृच्छद्दुयथान्यायं फलमूलैः सुतर्पितान्।
ततस्ते सर्व्वमाचख्यू राज्ञो दुर्वृत्तमात्मनः ॥ ४२
तथा दृष्टस्य विप्रस्य यद्वाक्यं तन्निशम्य सः।
मनसा चिन्तयामास किं कृतं सुकृतं भवेत् ॥ ४३
त्यजेदहं तपः किं वाप्यथवार्त्तिं विनाशयेत्।
तपसोऽधिकमेवासौ धर्म्मो दुःखविनाशनः ॥ ४४
प्राणिनां भयभीतानामभयं यत् प्रदीयते।
सर्व्वसत्त्वेषु यद्दानमेकभूते तु या दया ॥ ४५
सर्व्वसत्त्वप्रदानाच्च दयैकात्र विशिष्यते।
एवं सञ्चिन्त्य विप्रोऽसौ द्विजैः सार्द्धं जगाम ह ॥ ४६
तं दृष्ट्वा सहसा सूर्य्यो दक्षिणां दिशमाव्रजत्।
स द्विजः पृष्ठलग्नोऽभूत् तस्य वै तपसो बलात् ॥ ४७
अष्टाशीतिसहस्राणि योजनानां प्रमाणतः।

यममार्गस्य चाध्वानमाचक्राम दिवाकरः ॥ ४८
न जलं न च तत्रान्नं वृक्षच्छायासुखं न हि ।
शीतं वातान्धकारन्तु दुःसहं देवदानवैः ॥ ४९
नरकाणि तदग्रे तु दुःसहानि क्रमेण तु ।
अष्टाविंशतिकोट्यस्तु मध्ये तासां ययौ रविः ॥ ५०
पश्यन् स ब्राह्मणस्तान्तु यातनां पापकर्म्मिणाम् ।
यथोदरे दह्यमाने लोड्यमाने च शत्रुभिः ॥ ५१
एकैकं निरयं तद्वच्छ्रूयते क्रन्दतां रवः ।
ततोऽसौ प्रवरो विप्रो गच्छमानो महापथम् ॥ ५२
विवृत्तो ब्राह्मणेकेन तदा लकुटपाणिना ।
भो भो द्विज क्व यास्यग्रग्रामदत्त्वा मम दक्षिणाम् ५३
या दत्ता ते पुरा मह्यं कस्मिन् काले तु तां स्मर ।
इत्युक्तः स तु तां स्मृत्वा प्रत्युवाच द्विजं प्रति ॥ ५४
उक्तं मया पुराणेकं तुभ्यं तेनास्मि याचितः ।
गृहं गत्वा प्रदास्यामि तिरोभव ममाग्रतः ॥ ५५
तमाहासौ द्विजो भूयो नेहायं तत्र विद्यते ।
मर्त्ये तु व्यवहारोऽपि न ते यत् त्वं ददामि ते ॥ ५६
तच्छ्रुत्वा तं द्विजं प्राह नास्ति किञ्चिदिहैव मे ।
तमाहासौ द्विजस्तेऽस्ति सुकृतं यत् कृतं त्वया ॥ ५७
तत् ते बहुधनन्त्वस्ति तस्यार्द्धं सम्प्रयच्छ मे ।
इत्युक्तो न ददात्येनं धर्म्मार्द्धं तं दिवाकरः ॥ ५८
प्रोवाच सान्त्वयित्वासौ न्यायतः सम्प्रदापयन् ।
षडङ्गञ्चैव धर्म्मस्य ततो विप्रो गतो ययौ ॥ ५९
गच्छमानन्तु तं भूयो गोपालस्तं तथाधरत् ।
काकिण्यर्थं तु गौस्तस्य रक्षिता न तु याचितः ॥ ६०
विप्रोऽसौ लज्जया तस्माद्विस्मृतः कालपर्य्ययात् ।
षड्भागं तेन धर्म्मस्य गृहीतं तस्य वै बलात् ॥ ६१
तथैव वसुधौतेन धर्म्मकारेण वा पुनः ।
वस्त्रकारपवित्रेण तस्यैव वणिग्धर्म्मिणः ॥ ६२
गृहीतः सर्व्वधर्म्मोऽपि ततोऽसौ द्विजसत्तमः ।
निस्तेजाश्चाभवत् तस्माद्गन्तुञ्चाग्रे न शक्तवान् ॥ ६३
ततो दिवाकरस्तन्तु संगृह्याशु करेण वै ।
प्रययौ यत्र राजासौ निरये समवस्थितः ॥ ६४
त दृष्ट्वा पच्यमानन्तु कुम्भमध्यगतं नृपम् ।
वह्निनासौ द्विजश्रेष्ठो विस्मयं समपद्यत ॥ ६५
किञ्चिन्मात्रं समाश्वस्य शतानीकमुवाच ह ।
भो भो राजन् प्रदत्तानि महादानानि षोडश ॥ ६६
ब्राह्मणेभ्यस्त्वया पूर्व्वं रत्नं वस्त्राणि चैव हि ।
ग्रामांश्च विविधांश्चैव नगराणि पुराणि च ॥ ६७
श्रूयन्ते मुनिमुख्येभ्यो वचांसि तपसा दिवम् ।
प्राप्नुवन्ति सुदानैस्तु नरा भक्त्योपपादितैः ॥ ६८
कस्येदं कर्म्मणः पापं यत् त्वं सन्दह्यसे सदा ।
सुगुप्तो यमदूतैस्तु यदि जानासि तद्वचः ॥ ६९
तच्छ्रुत्वा प्राह तं राजा शृणु विप्र यथातथम् ।

राजोवाच ।

मया दानानि दत्तानि ब्राह्मणेभ्यो यतस्ततः ॥ ७०
सुबहूनि प्रगृह्यापि परेभ्योऽज्ञानचक्षुषा ।
प्रजापीड़नसन्तापात् समुद्भूतो हुताशनः ॥ ७१
तेन दह्याम्यहं विप्राः प्रेतसंस्थो दिवानिशम् ।
गत्वा शीघ्रमितो ब्रह्मन् कथयस्व यथातथम् ॥ ७२
सुतस्य मे यदीहास्ति मुक्तिः पापात् सुदुःसहात् ।
तत् कुरुष्व सुसम्पर्कात् साधोर्नान्या गतिर्मम ॥ ७३
एतच्छ्रुत्वा वचो राज्ञः स विप्रस्त्वात्मकारणात् ।
मानुषाणां हितार्थाय पर्य्यपृच्छद्दिवाकरम् ॥ ७४

विप्र उवाच ।

साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः ।
कालेन फलते तीर्थं सद्यः साधुसमागमः ॥ ७५
न चैवाकृतपुण्यानां देवे भक्तिः सुजायते ।
विप्रेषु च विशेषेण तथा साधुतपस्विषु ॥ ७६
यदा पापक्षयः पुंसां दाने ध्याने तदा मतिः ।
तस्मादेव परं देवं मन्येऽहं त्वां न संशयः ॥ ७७
यस्मात् ते नारकाः सर्व्वे दर्शनात् सुखिनोऽभवन् ।
मम ते सन्निधौ विप्र न सुखं विद्यते सतः ॥ ७८
किञ्चिद्धर्म्मविहीनस्य देववत् संस्थितस्य वा ।
तस्माद्वदस्व मे किञ्चिद्धर्म्मं यद्यस्ति भूतले ॥ ७९
येन पापं निहत्याशु स्वर्गमाप्नोति मानवः ।
संसारे पतितो लोकः स्वैव-दार-गृहादिषु ॥ ८०
यथा संक्लिश्यते तद्वद्यदि धर्म्मं न सेवते ।
किं न प्राप्नोति संमूढः स्वर्गमोक्षसुखानि च ॥ ८१
एतच्छ्रुत्वा तु तस्यार्को वचनं प्राह तं द्विजम् ।
शृणु विप्र यथातथ्यं लोकानां हितकाम्यया ॥ ८२
पृष्टस्तेऽहं कृतस्ते यो धर्म्मः संवर्द्धयिष्यति ।

र्ज्जातुर्जनेभ्यस्तु यत् कर्त्तुः सफलं भवेत् ॥ ८३
गुह्यास जिह्वायास्तस्मादाप्नोत्यसंशयः ।
ममं प्रवक्तव्यं लोकानां विहितञ्च यत् ॥ ८४
तं वक्ष्यामि शुलेमं सर्व्वपापक्षयो भवेत् ।
रस्य मुखं चैवं पवित्रं शङ्करप्रियम् ॥ ८५
नानां प्रियं तत्र स्वर्गादायान्ति सर्व्वदा ।
जार्थं भुक्तिमादाय संविहृत्य पुनः पुनः ॥ ८६
तुष्टाः स्वकं धाम वर्षं प्रति व्रजन्ति ते ।
र्भा सह हरस्तस्मिन् वसते क्रीड़ते सदा ॥ ८७
रूपं समास्थाय सुकन्यारूपिभिर्गणैः (क) ।
मासे तु ये मर्त्त्या दीपदानमहोत्सवम् ॥ ८८
र्व्वन्ति सततं यद्वत् कार्त्तिके वा हि धर्म्मिणः ।
वाय चान्यदेवेभ्यः प्रेक्षणञ्च महोत्सवम् ॥ ८९
नां धाम तु यान्त्येते ये भवन्त्यतिपापिनः ।
माचतुर्द्दशीं कृष्णां शुक्लां वा समुपोष्य च ॥ ९०
द्याद्धेनुं द्विजातिभ्यः शिवाय परिकल्पिताम् ।
हत्वा च पापानि याति स्वर्गं न संशयः ॥ ९१
श्रुत्वा स सूर्य्यस्य सहामात्यद्विजोत्तमान् ।
ज्ञाप्य यथातथ्यं राज्ञे सर्व्वं न्यवेदयत् ॥ ९२
ततः स राजा तु सुसम्प्रहृष्टः
श्रुत्वा वचस्तस्य द्विजोत्तमस्य ।
निवेश्य तत्रैव तमेव पश्चाद्-
विहाय सद्यः प्रययौ विदेशम् ॥ ९३
सरः स दृष्ट्वैव निखन्यमानं
पृष्ट्वा तु मूल्येन चकार कर्म्म ।
दिने दिने यावदभूत् सुवर्णं
तथा च गोमूत्रमशेषदानम् ॥ ९४
ततः प्रहृष्टः प्रययौ स्वदेशं
सुरचितं मन्त्रिवरैस्तथा नृपैः ।
द्विजोपदिष्टं स चकार राजा
व्रतं यथावच्च तदेव दानम् ॥ ९५
व्रते कृते तस्य पिता कुसंस्थो
ययौ दिवं पूर्व्वपितामहैश्च ।
आरुह्य यानं सुविमानमग्र्यं
संक्रीड़मानः सहसाप्सरोभिः ॥ ९६

इदं व्रतं यः कुरुते सुसम्य-
गैकाङ्क्षिकं व्यास शिवप्रसादात् ।
लभे(क)द्दिवं पूर्व्वपितामहैः सह
निहत्य पापानि पुराकृतानि ॥ ९७
चतुर्द्दशीं यः समुपोष्य यत्नाद्-
वरन्तु सम्पूज्य तु पूर्णिमायाम् ।
धेनुं प्रदद्याद्द्विजसत्तमाय
तस्या अभावात् सुघृतस्य पात्रम् ॥ ९८
सव्यञ्जनं वस्त्रयुतं महान्नं
दत्त्वा फलं यल्लभते सुधेनोः ।
निहत्य पापानि पुराकृतानि
दिवं प्रयातीह न संशयोऽत्र ॥ ९९
चिरं ह्युषित्वा स तु रुद्रलोके
राजा भवेदत्र सुधर्म्मशीलः ।
एकां प्रकुर्य्यात् सुशुभां वसन्ते
चतुर्द्दशीं सत्ययुतः समं हि ॥ १००
दत्त्वा भवेन्मन्त्रविधानपूर्व्वं
तुष्टिर्यया स्यादिह शङ्करस्य ।
मन्त्राधिको यो द्विज एव शुद्धः
स क्षत्रियो वैश्यवरोऽपि शुद्धः ॥ १०१
पुष्टिं सुसर्पन्तु सुवर्णवाञ्छो
दधाति मन्त्रेण बलात् कृशोऽपि ।
मन्त्रात्मकाः सर्व्व इमे हि देवाः
सुयक्ष-रक्षः-पितरो मनुष्याः ॥ १०२
तृप्तिं नरेभ्यस्तु सदाप्नुवन्ति
दत्तं न गृह्णन्ति हि मन्त्रहीनाः ।
तस्मात् त्वमेवं वद मन्त्रपूर्व्वं
पूजादिकं सर्व्वमुमापतेस्तु ॥ १०३
यथा प्रमुच्येत् स हि पातकेभ्यः
स्वर्गं प्रयातः स मनुष्यधर्म्मा ।
सनत्कुमार उवाच ।
मन्त्राणि चोक्तानि पुरा व्रतेऽस्मिन्
तैरर्च्चनीयो भगवान् पिनाकी ॥ १०४
कुर्व्वन् सशक्रं हि चतुर्द्दिनानि
चतुर्द्दशी व्यास उपोषणीया ॥ १०५

(क) सुगणैरिति पाठे युक्तया गौर्य्येत्यर्थः ।

(क) लेभे इति वा पाठः ।

एकादश्यामेकभक्तं नक्तयानीयमेव च।
अयाचितन्तु द्वादश्यां सनक्ता च त्रयोदशी ॥ १०६
चतुर्द्दशी निराहारा कर्त्तव्या च महाव्रते।
पौर्णिमायान्तु गोदानं फलं कृत्वा तदश्नुते ॥ १०७
य इत्थमात्मनः किञ्चिद्भावो दद्याद्द्विजातये।
शिवः सम्प्रीयतामेवमित्युक्त्वा फलमश्नुते ॥ १०८
व्रतस्यास्य समग्रस्य द्रव्याभावाच्छृणुष्व तत्।
पलैर्द्वादशभिः पात्रं शुल्वस्य तु तदर्द्धकम् ॥ १०९
पलत्रयस्य वा कुर्य्यात् पलस्यैकमकिञ्चनः।
घृतेन पूरयित्वा तु सहिरण्यन्तु कारयेत् ॥ ११०
वस्त्रेण वेष्टयित्वा तु तदभावात् ससूत्रकम्।
दद्यात् तद्द्विजमुख्याय शिवः सम्प्रीयतामिति ॥ १११
स्थाणुमीशं जगन्नाथं शूलपाणिं महेश्वरम्।
प्रणतोऽस्मि भूतनाथं स मे पापं व्यपोहतु ॥ ११२
कपालमालिनं देवं वरखट्वाङ्गधारिणम्।
प्रणतोऽस्मि जगन्नाथं स मे पापं व्यपोहतु ॥ ११३
चन्द्रार्द्धधारिणं देवं सर्व्वाभरणभूषितम्।
प्रणतोऽस्मि जगन्नाथं स मे पापं व्यपोहतु ॥ ११४
त्रिशूलपाणिनं त्र्यक्षं त्रिपथाङ्कसुधारिणम्।
प्रणतोऽस्मि उमानाथं स मे पापं व्यपोहतु ॥ ११५
रुद्रश्चित्तगतो यस्मै रुद्रो बुद्धिगतश्च यः।
यश्चाहङ्कारको रुद्रः स मे पापं व्यपोहतु ॥ ११६
एवं पूज्य शिवं मन्त्रैस्ततो दानं प्रकल्पयेत्।
व्रतं कृत्वा तु येऽद्दत्तमस्मिन् मह्यं महाफलम् ॥ ११७
सुरूपाः सुभगास्ते तु जायन्ते भोक्तिणो धनम्।
एवं यः कुरुते सम्यक् चतुर्म्मास्याश्चतुर्द्दशीम् ॥ ११८
इयं यथा शतानीको यात्यसौ शाङ्करं पदम्।
कुलानां शतमुद्धृत्य निष्पापो सुरपूजितः ॥ ११९
यन्निशायां तथा प्रातर्यत्सन्ध्याह्नापराह्णयोः।
सन्ध्यायाञ्च कृतं पापं कर्म्मणा मनसा गिरा ॥ १२०
तत् सर्व्वं नाशमायाति तोयस्थं लवणं यथा।
एवं वा कुरुते यस्तु चातुर्म्मासीविधानतः ॥ १२१
यथा वै कुमुदो राजा स्वर्गं याति कलौ युगे।
एकभक्तेन नक्तेन तथैवायाचितेन यः ॥ १२२
व्रतं प्रकुरुते भक्त्या तस्य पुण्यमसंख्यकम्।
एवं यः पूजयेद्भक्त्या चतुर्द्दश्यान्तु शङ्करम् ॥ १२३
सहस्रं कीर्त्तयेन्नाम्नां शृणुयाद्वापि भक्तितः।
नियमस्थः शुचिर्भूत्वा एकचित्तः समाहितः ॥ १२४
विमुक्तः पातकैः सर्व्वैः शिवलोकं स गच्छति ॥ १२५

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः।

व्यास उवाच।

कथयस्व समासेन लोकानां हितकाम्यया।
शिवनाम्नां सहस्रन्तु इहामुत्र फलप्रदम् ॥ १

सनत्कुमार उवाच।

मुने शृणु प्रवक्ष्यामि सर्व्वाघौघविनाशनम्।
यच्छ्रुत्वाऽनियमस्थोऽपि सर्व्वपापैः प्रमुच्यते ॥ २
प्रख्यातुं नापि शक्तोऽहं प्रसादाच्चैव तस्य हि।
प्राप्यानुज्ञां ततस्तोवं ध्यानमागात् तदेश्वरम् ॥ ३
यदा तेनाभ्यनुज्ञातस्तुवन्नेव तदा भवम्।
अनादिनिधनस्याहं सर्व्वयोनेर्महात्मनः ॥ ४
नाम्नां किञ्चित् समुद्देशं वक्ष्ये चाव्यक्तयोनिनः।
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः ॥ ५
शृणु नामसहस्रन्तु यदुक्तं पद्मयोनिना।
दशनामसहस्राणां सहस्रन्तु पितामहः ॥ ६
तानि निर्म्मथ्य मनसा दध्नो घृतमिवोद्धृतम्।
गिरेः सारं यथा हेम तथैतत् सारमुद्धृतम् ॥ ७
सर्व्वपापापहमिदं चतुर्व्वेदसमन्वितम्।
प्रयत्नेनाधिगन्तव्यं ध्येयञ्च प्रयतात्मना ॥ ८
शान्तिकं पौष्टिकञ्चैव रक्षोघ्नं पावनं महत्।
इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च ॥ ९
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने।
यश्चाभ्यसूयते देवं भूतात्मानं पिनाकिनम् ॥ १०
स कृष्ण नरकं याति सह पूर्व्वैः पितामहैः।
इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम् ॥ ११
इदं ह्यालान्तकालेऽपि स गच्छेत् परमां गतिम्।
पवित्रं मङ्गलं पुण्यं कल्याणमिदमुत्तमम् ॥ १२
निगदिष्ये ह्यहं व्यास स्तवानामुत्तमं स्तवम्।
इदं ब्रह्मा पुरा कृत्वा सर्व्वलोकपितामहः ॥ १३

सर्व्वस्तवानां दिव्यानां राजत्वे समकल्पयत् ।
तदाप्रभृति चैवायमीश्वरस्य महात्मनः ॥ १४

स्तवराजोऽतिविख्यातो जगत्यमरपूजितः ।
ब्रह्मलोकादयञ्चैव स्तवराजोऽवतारितः ॥ १५

तदाप्रभृति चैवायं पराणामपि यः परः ।
तेजसामपि यस्तेजस्तपसामपि यत् तपः ॥ १६

शान्तानामपि या शान्तिद्युतीनामपि या द्युतिः ।
योगिनामपि यो योगी कारणानाञ्च कारणम् ॥ १७

यतो लोकाः सम्भवन्ति न भवन्ति यतः पुनः ।
सर्व्वभूतात्मभूतस्य हरस्यामिततेजसः ॥ १८

अष्टोत्तरसहस्रन्तु नाम्नामीशस्य मे शृणु ।
यच्छ्रुत्वा त्वं मुनिश्रेष्ठ सर्व्वान् कामानवाप्स्यसि ॥ १९

ओं स्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः ।
सर्व्वात्मा सर्व्वविख्यातः सर्व्वः सर्व्वकरोद्भवः ॥ २०

जटी वर्म्मी शिखी खड्गी सर्व्वाङ्गः सर्व्वभावनः ।
हरश्च हरिणाक्षश्च सर्व्वभूतहरः प्रभुः ॥ २१

प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानचारी भगवान् खेचरः खचरोद्भवः ॥ २२

अभिवन्द्यो महाकर्म्मा तपस्वी भूतभावनः ।
उन्मत्तवेषः प्रच्छन्नः सर्व्वलोकप्रजापतिः ॥ २३

महीरूपो महाकायः सर्व्वरूपो महाशनः ।
विश्वरूपो विरूपश्च विश्वभुग्वामनो मनुः ॥ २४

लोकपालान्तर्हितात्मा प्रसादो हयगर्द्दभी ।
पवित्रश्च महांश्चैव नियमो नियमाश्रयः ॥ २५

सर्व्वकर्म्मा स्वयम्भूश्च अनादिरादिरव्ययः ।
सौम्यरूपो विरूपाक्षः सोमो नक्षत्रसाधकः ॥ २६

चन्द्रः सूर्य्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अद्रिरद्र्यालयः कर्त्ता मृगवाणार्पणोऽनघः ॥ २७

महातपा दीर्घतपा अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥ २८

योगी याज्यो महावीर्य्यो महामात्रो महातपाः ।
सुवर्णरेताः सर्व्वज्ञः सुवीजो वृषवाहनः ॥ २९

दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपः स्वयंश्रेष्ठो बलिर्वैरोचनोऽरिहा ॥ ३०

गणकर्त्ता गणपतिर्दिग्वासाः काम्य एव च ।
पवित्रं परमं मन्त्रः सर्व्वभावहरो हरः ॥ ३१

कमण्डलुधरो धन्वी वाणहस्तः प्रतापवान् ।
अशनिः शतघ्नी खड्गी पट्टिशी चायुधी महान् ॥ ३२

स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो महान् ।
उष्णीषी च सुवक्त्रश्च अत्युग्रो विनतस्तथा ॥ ३३

दीर्घश्च हरिनेत्रश्च सतीर्थः कृष्ण एव च ।
शृगालरूपः सर्व्वार्थो मुण्डः कुण्डी कमण्डलुः ॥ ३४

अजश्च मृगरूपश्च गन्धमाली कपर्द्दपि ।
ऊर्द्ध्वरेता ऊर्द्ध्वलिङ्ग ऊर्द्ध्वशायी नभस्तलः ॥ ३५

त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरोऽथ नक्तञ्च तिग्ममन्युः सुवर्च्चसः ॥ ३६

गजहा दैत्यहा लोको लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्म्माम्बराधरः ॥ ३७

कालयोगी महानादः सर्व्वांत्रासश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥ ३८

बहुभूतो बहुधनः सर्व्वाधारोऽमितो गतिः ।
नृत्यप्रियो नृत्यदृप्तो नर्त्तकः सविलासकः ॥ ३९

घोषो महातपाः प्रांशुर्नित्यो गिरिचरो नभः ।
सहस्रहस्तो विजयो व्यवसायोऽप्यनिश्चितः ॥ ४०

अमर्षणो मर्षणात्मा यज्ञहा कामनाशकः ।
दक्षयज्ञापहारी च सुपथो मध्यमस्तथा ॥ ४१

तपोऽपहारी बलवान् मुदितोऽर्थोऽजितो वरः ।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥ ४२

न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थिभीर्विभुः ।
सुतीक्ष्णदशनश्चैव महाकायो महाननः ॥ ४३

विष्वक्सेनो हरिर्यज्ञः संयुगापीड़वाहनः ।
तीक्ष्णबाहुश्च हर्य्यक्षो महायः कर्म्मकालवित् ॥ ४४

विष्णुप्रसादितो यज्ञः समुद्रो बड़वामुखः ।
लम्बनो लम्बितोष्ठश्च बहुमायापयोनिधिः ॥ ४५

महाङ्गश्च महादंष्ट्रो महाजिह्वो महामखः ।
महानखो महारोमा महाकेशो महाजटः ॥ ४६

असपत्नः प्रसादश्च प्रत्ययो गिरिसाधकः ।
स्नेहनोऽस्नेहनश्चैव अजितोऽथ महामुनिः ॥ ४७

वृक्षकारो वृक्षकेतुस्तरलो वायुवाहनः ।
मण्डली वायुधामा च देव-दानव-दर्पहा ॥ ४८

अथर्व्वशीर्षः सामास्यो रिपुहस्तोऽमितेक्षणः ।
यजुःपादभुजोगुह्यः प्रकाशो जङ्गमस्तथा ॥ ४९

अमोघार्थप्रसादश्च अभिगम्यः सुदर्शनः ।
उपहारः प्रियः सर्व्वः कनकः काञ्चनस्थिरः ॥ ५०
नन्दी नन्दिकरो भव्यः पुष्करः स्थपतिः स्थिरः ।
तपनस्तापनश्चाद्यो घृणी यज्ञः समाहितः ॥ ५१
नक्तः कलिश्च कालश्च मकरः कालपूजितः ।
सुगणो गणकारश्च भूतभावनसारथिः ॥ ५२
भस्मशायी भस्मरूढो भस्मरूपस्तरङ्गणः ।
अगणश्चैव लोपश्च महात्मा सर्व्वपूजितः ॥ ५३
शङ्कुस्त्रिशङ्कुसम्पन्नः शुचिर्भूतनिषेवितः ।
आश्रमस्थः कपोतस्थो विश्वकर्म्मपतिर्वरः ॥ ५४
शाखो विशाखः कुष्माण्डश्चार्थजालः सुनिश्चयः ।
कपिलोऽकपिलः शूर आयुश्चैवापरोरगः ॥ ५५
गन्धर्व्वो ह्यदितिस्तार्क्ष्यो अविज्ञेयः सुसारथिः ।
परश्वधायुधो देवो अर्थकारः सुधीर्वरः ॥ ५६
तुम्बवीणो महाकोप ऊर्द्ध्वरेता जलेशयः ।
उग्रवंशकरो वंशो वंशधारो ह्यनिन्दितः ॥ ५७
सर्व्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः ।
बान्धवो बन्धुकर्त्ता च सुबन्धुरविलोचनः ॥ ५८
सुयज्ञारिः सुकामारिर्महादंष्ट्रोऽसमो युधि ।
बाहुस्त्वनिन्दितः सर्व्वः शङ्करो धनदोऽधनः ॥ ५९
अमरेशो महादेवो विश्वदेवः सुरारिहा ।
दीधितिश्चाहिर्ब्रध्नश्च चेकितानो हरिस्तथा ॥ ६०
अजैकपादः कापाली त्रिशङ्कुरजितः शिवः ।
धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ॥ ६१
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धनः ।
प्रभावः सर्व्वगो वायुरर्य्यमा सविता रविः ॥ ६२
उदग्रश्च विधाता च मान्धाता भूतभावनः ।
हुततीर्थश्च वाग्मी च सर्व्वकालगुणावहः ॥ ६३
पद्मवक्त्रो महावक्त्रश्चन्द्रवक्त्रो मनोजवः ।
बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ॥ ६३
कुरुः कर्त्ता कालरूपी कुरुभूतो महेश्वरः ।
सर्व्वाशनो दर्भशायी सर्व्वेषां प्राणिनां पतिः ॥ ६५
देवदेवः सुखासक्तः सदसत्सर्व्वरत्नवित् ।
कैलासशिखरेवासी हिमवद्गिरिसंश्रयः ॥ ६६
कूलहारी कूलकर्त्ता बहुवीजो बहुप्रदः ।
वणिजो वर्द्धनो वृक्षो नकुलश्चन्दनच्छदः ॥ ६७
सारपीठो महाजन्तुरलोकश्च महौषधम् ।
सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः ॥ ६८
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ।
प्रभावात्मा जगत्कालस्तलो लोकहितस्ततः ॥ ६९
ज्ञानसारो नवक्राङ्गः केतुमाली सुभावनः ।
भूताशयो भूतपतिरहोरात्रैस्त्वनिन्दितः ॥ ७०
वामनः सर्व्वभूतात्मा निलयश्च विभुर्भवः ।
अमोघः सञ्जयः पार्श्वो जीवनः प्राणधारणः ॥ ७१
धृतिमानात्मवान् दक्षः सत्कृतश्च युगाधिपः ।
गोपालो गोयुधिर्ग्राहो गोचर्म्मवसनो हरः ॥ ७२
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिता ।
प्रतिष्ठायी महाहर्षो जितकामो जितेन्द्रियः ॥ ७३
गान्धारश्च सुरालश्च तनुरात्मा गतिर्व्वरः ।
महागीतो महानृत्यो अप्सरोगणसेवितः ॥ ७४
महाकेतुर्धनुर्धातुर्विकर्त्ता तु चरेश्वरः ।
आवेदनीय आवासः सर्व्वगन्धसुखावहः ॥ ७५
तोरणस्तारणो वायुः पर्ज्जन्यो वाति चैकतः ।
हुताशनसहायस्तु प्रशान्तात्मा हुताशनः ॥ ७६
उग्रतेजा महातेजा जयो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः सन्धिविग्रह एव च ॥ ७७
शिखी दण्डी जटी ज्वाली मूर्त्तिजो दुर्द्धरो वणिक् ।
वैणवी पणवी ताली कालः कालकटङ्करः ॥ ७८
नक्षत्रो विग्रहो वृद्धिर्गुणवृद्धिरयोगमः ।
प्रजापतिर्द्दिशाबाहुर्विभागः सर्व्वतोमुखः ॥ ७९
विमोचनः सुरगणो हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च महाचारी स्तुतस्तथा ॥ ८०
सर्व्वतूर्य्यनिनादी च सर्व्ववाद्यपरिग्रहः ।
बालरूपो विलावासो हेममाली तरङ्गवित् ॥ ८१
त्रिदशस्त्रिवृतश्छन्दः सर्व्वबन्धविमोचनः ।
बन्धनस्तु सुरेन्द्राणां युधि शत्रुविनाशनः ॥ ८२
सांख्यप्रसादो दुर्व्वासाः सर्व्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागश्च अतुलो यज्ञसामवित् ॥ ८३
सर्व्वावासः सर्व्वचारी दुर्व्वासा वासवोऽमरः ।
हैमो हेमकरो यज्ञः सर्व्वधारी धरोत्तमः ॥ ८४
लोहिताक्षो महाक्षश्च विरूपाक्षो विशारदः ।
संग्रहो विग्रहः कामः सर्पचीरनिवासनः ॥ ८५

मुण्डी विमुक्तदेहश्च देहारिः सर्व्वकामदः।
सर्व्वकालप्रसादश्च सुबलो बलरूपधृक्॥ ८६
सर्व्वकामो निरूपश्च निपानी ऽतरणः खगः।
रौद्ररूपांशुरादित्यो वसुरश्मिः सुवर्च्चसी॥ ८७
वसुवेगो महावेगो मनोवेगो निशाकरः।
सर्व्वावासः प्रियावासी अपदेशकरो हरः॥ ८८
मुनिरात्माकरो लोकः सम्भोज्यश्च सहस्रभुक्।
पक्षी च पक्षिरूपी च विश्वदीपो विशां पतिः॥८९
उन्मादो मदनाकारो अर्थो अर्थकरोऽधसः।
वामदेवश्च वामश्च प्राग्देवश्चाथ वामनः॥ ९०
सिद्धयोगापचारी च सिद्धः सिद्धार्थसाधकः।
भिक्षुश्च भिक्षुरूपी च विषाणी मृदुरव्ययः॥ ९१
महासेनो विशाखश्च षष्टिनागो विशां पतिः।
वज्रहस्तप्रतिष्ठश्री वज्रस्तम्भन एव च॥ ९२
क्षमा-व्रतकरः कालो मनुर्मधुकरस्थलः।
वानसत्यो वाजिमेधो नित्यमाश्रमपूजितः॥ ९३
ब्रह्मचारी लोकचारी सर्व्वचारी सुचारवित्।
ईशान ईश्वरः कालो निशाचारी अनेकदृक्॥ ९४
निमित्तस्थो निमित्तश्च नन्दी नन्दिकरो हरः।
नन्दीश्वरश्च नन्दी च नन्दिवान् नन्दिवर्द्धनः॥ ९५
भगस्याक्षिनिहन्ता च कालो ब्रह्मविदां वरः।
चतुर्म्मुखो महालिङ्गश्चतुर्लिङ्गस्तथैव च॥ ९६
लिङ्गाध्यक्षो महाध्यक्षो लोकाध्यक्षो युगावहः।
बीजाध्यक्षो बीजकर्त्ता अध्यात्मानुगतो बलः॥ ९७
इतिहासकर्त्ता कल्पश्च सोत्तमोऽथ जलेश्वरः।
दम्भो दम्भकरो रंहा वश्यो वश्यकरः कलिः॥ ९८
लोककर्त्ता पशुपतिर्म्महाकर्त्ता महौषधम्।
अक्षरं परमं प्राज्ञर्बलवान् शुक्र एव च॥ ९९
नीतिरनीतिः शुद्धात्मा शुद्धमानो गतिप्रदः।
बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित्॥ १००
वेदकारः सूत्रकारो विद्वांसः परमं तपः।
महामेघनिनादी च महाघोरवशीकरः॥ १०१
अग्निज्वाली महाज्वाली अतिधूमो हुतो हविः।
वृषणः शङ्करो नित्यो वर्च्चस्वी धूमकेतनः॥ १०२
नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः।
स्वस्तिदः स्वस्तिभागश्च भागी भागकरो लघुः॥ १०३

उत्सङ्गश्च महाङ्गश्च महागर्भपरो युवा।
कृष्णावर्णः सुवर्णश्च इन्द्रियं सर्व्वप्राणिनाम्॥ १०४
महापादो महाहस्तो महाकायो महायशाः।
महामूर्द्धा महानेत्रो महामात्रो विशालयः॥ १०५
महादन्तो महाकर्णो महेशुश्च महानुगः।
महानादो महाकम्बुर्म्महाग्रीवः शुशान्तधृक्॥ १०६
महाचक्षुर्म्महावक्षो अन्तरात्मा मृगालयः।
महाकटिर्म्महाग्रीवो महाबाहुः प्रतापवान्॥ १०७
संयोगी वर्द्धनो वृद्धो नित्यवृद्धो गुणाधिकः।
नित्यो धर्म्मसहायश्च देवासुरपतिः पतिः॥ १०८
अयुक्तो युक्तबाहुश्च द्विविधश्च सुपर्व्वणः।
आषाढश्च सुषाढश्च ध्रुवो हरिहरो हरः॥ १०९
वसुरावृत्तिमान् नित्यो वसुश्रेष्ठो महारथः।
शिरोहारी विसर्पी च सर्व्वलक्षणभूषितः॥ ११०
अक्षरश्चाक्षरो योगी सर्व्वयोगी महाबलः।
समाम्नयो समाम्नायस्तीर्थसेवी महारथः॥ १११
निर्ज्जीवो जीवनो वासी नीरसो बहुकर्कशः।
रत्नप्रभूतो रत्नाङ्गो महार्णवनिनादकृत्॥ ११२
मूलो विशाखो निवृत्तो व्यक्तोऽव्यक्तस्तथा निधिः।
आरोहणो निरूहश्च शैलहारी महातपाः॥ ११३
सेनाकल्पो महाकल्पो योगी योगकरो हरः।
युगरूपो महारूपो अयनो गहनो नरः॥ ११४
नाट्यनिर्व्वापणः पादः पण्डितो विश्वलोचनः।
बहुमालो महामालः सुमालो बहुलोचनः॥ ११५
विस्तारो भवनः क्रूरः कुसुमः सुफलोदयः।
वृषभो वृषभाङ्गाङ्गो मणिविद्धो जटाधरः॥ ११६
इन्दुर्विसर्गः सुमुखः सुरः सर्व्वायुधाधरः।
निवेदनः सुधन्वा च गङ्गाधारी महाहनुः॥ ११७
गन्धमाली च भगवानुत्थानः सर्व्वकर्म्मणाम्।
मन्थानो बहुलो बाहुः सकलः सर्व्वलोचनः॥ ११८
उरस्तालो करस्तालो ऊर्द्धसंहननो वटुः।
छत्र-पत्रसुविख्यातः सर्व्वलोकाश्रयो महान्॥११९
मुण्डो विरूपो विकृतो दण्डी मुण्डो विकर्षणः।
हर्य्यक्षः कोकरुश्चक्री दीप्तजिह्वः सहस्रपात्॥ १२०
सहस्रमूर्द्धा देवेन्द्रः सर्व्वभूतमयो गुरुः।
सहस्रबाहुः सर्व्वाङ्गः शरण्यः सर्व्वलोककृत्॥ १२१

पवित्रस्त्रिमधुर्मन्त्रः कनिष्ठः कृष्णपिङ्गलः।
ब्रह्मदण्डविनिर्म्माता शतघ्नी-शतपाशधृक् ॥ १२२
पद्मगर्भो ब्रह्मगर्भो जलगर्भो जलोद्भवः।
गर्भस्थो ब्रह्मविद्ब्रह्म ब्राह्मणो ब्राह्मणो गतिः ॥१२३
अनन्तरूपो नैकात्मा तिग्मतेजास्तमोनुदः।
ऊर्द्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ॥ १२४
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः।
कर्णिकारो महास्रग्वी नीलमौलिपिनाकधृक् ॥ १२५
उमापतिरुमाकान्तो जाह्नवीहृदयङ्गमः।
वरो वराहो वरदो वरेशः सुमहास्वनः ॥ १२६
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः।
प्रीतात्मा प्रयतात्मा च संयतात्मा प्रधानवित् ॥१२७
सर्व्वपार्श्वसुतस्तार्क्ष्यो धर्म्मसाधारणो धरः।
चराचरात्मा सूक्ष्मात्मा सुवृषाङ्गो वृषेश्वरः ॥ १२८
साध्योर्षिर्व्वसुरादित्यो विवस्वान् सविताच्चितः।
व्यासः सर्व्वार्थसंक्षेप-विस्तारः पर्य्ययोऽभयः ॥ १२९
ऋतुः संवत्सरो मासः पक्षः सन्ध्या समापकः।
कलाः काष्ठा लवा मात्रा मुहूर्त्ताहः क्षपा क्षणः १३०
विश्वक्षेत्रं बीजलिङ्गं बीजमाद्यस्त्वनिन्दितः।
सर्व्वादिः सदसद्व्यक्तं पिता माता पितामहः ॥ १३१
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम्।
निर्व्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः ॥ १३२
देवासुरविनिर्म्माता देवासुरपरायणः।
सुरासुरगतिर्द्देवो देवासुरनमस्कृतः ॥ १३३
देवासुरमहामात्रो देवासुरमहाश्रयः।
देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ॥ १३४
देवासुरगुरुर्द्देवो देवासुरपरिष्टुतः।
देवासुरमहामन्त्रो देवासुरमहेश्वरः ॥ १३५
सर्व्वदेवमयश्चिन्त्योऽचिन्त्यो देवात्मसम्भवः।
उद्भिजः शुक्रमावेद्यो विरजो विरजाम्बरः ॥ १३६
ईड्यो हस्ती सुरव्याघ्रो देवसिंहो नरर्षभः।
निरायुधो वरश्रेष्ठः सर्व्वदेवोत्तमोत्तमः ॥ १३७
गुरुः कान्तो निजः सर्व्वः पवित्रं सर्व्ववाहनः।
प्रयुक्तः शोभनो वज्र ईशानः प्रभुरव्ययः ॥ १३८
शृङ्गी शृङ्गप्रियो राजा राजराजो निरामयः।
अभिरामः सुरगणो विरामः स्वर्गसाधनः ॥ १३९

ललाटाक्षो विश्वदेहो हरिणो ब्रह्मवर्च्चसी।
स्थावराणां पतिश्चैव नवमेन्द्रियवर्द्धनः ॥ १४०
सिद्धार्थः सर्व्वभूतार्थो नित्यः सत्यव्रतः शुचिः।
व्रतादिः परमं ब्रह्म भक्तानां परमा गतिः ॥ १४१
विमुक्तो दीप्ततेजाश्च श्रीमान् श्रीवर्द्धनो गजः।
यथाप्रसादो भगवानिति भक्त्या स्तुतो मया ॥ १४२
यं न ब्रह्मादयो देवा विदुर्यं न महर्षयः।
तं स्तव्यमर्च्चमग्र्यञ्च वन्द्यं स्तोष्ये जगत्पतिम् ॥ १४३
भक्तिमेव पुरस्कृत्य मया यज्ञपतिः स्तुतः।
तस्मादनुज्ञां प्राप्यैव स्तुतो गतिमतां गतिः ॥ १४४
शिवमेवं स्तुवन् देवं नामभिः पुष्टिवर्द्धनैः।
नित्ययुक्तः शुचिर्भूत्वा प्राप्नोत्यात्मानमात्मनः ॥ १४५
एतद्धि परमं ब्रह्म स्वयं गीतं स्वयम्भुवा।
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तं विभुम् ॥ १४६
स्तूयमानो महादेवः स्तूयते चात्मनो गतिः।
भक्तानुकम्पी भगवानात्मसंस्थान् करोति तान्॥१४७
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः।
आस्तिकाः श्रद्दधानाश्च बहुभिर्जन्मभिः स्तवैः ॥१४८
जाग्रतोऽथ स्वपन्तश्च यजन्तः पथि संस्थिताः।
स्तुवन्ति स्तूयमानैश्च तुष्यन्ति च रमन्ति च ॥ १४९
जन्मकोटिसहस्रेषु नानासंसारयोनिषु।
जन्तोर्विशुद्धपापस्य भवे भक्तिः प्रजायते ॥ १५०
उत्पन्ना च भवे भक्तिरनन्या सर्व्वभावतः।
कारणं भावि तत् तस्य सर्व्वमुक्तस्य सर्व्वतः ॥ १५१
एतद्देवेषु दुष्प्रापं मनुष्येष्वपलभ्यते।
निर्व्विघ्ना निश्चला भद्रे भक्तिरव्यभिचारिणी ॥ १५२
तस्यैव हि प्रसादेन भक्तिरुत्पद्यते नृणाम्।
यया यान्ति परां सिद्धिं तद्भावगतचेतसः ॥ १५३
ये सर्व्वभावोपगताः परं भावं भवस्य च।
प्रसन्नवत्सलो देवः संसारात् तं समुद्धरेत् ॥ १५४
एवमन्येऽपि कुर्व्वन्ति देवाः संसारगोचरम्।
मनुष्याणां महादेवादन्यत्र पितृवत्सलात् ॥ १५५
इति तेनेन्द्रकल्पेन भगवान् संस्तुतः पतिः।
कृत्तिवासाः स्तुतो व्यास तण्डिना शुद्धबुद्धिना ॥१५६
स्तवमेनं भगवतो ब्रह्मा स्वयमधार्य्यत।
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ॥ १५७

वायुः प्रोवाच रुद्राणां रुद्रेभ्यस्तण्डिमागमत्।
महता तपसा प्राप्तस्तण्डिना ब्रह्मसंसदि ॥ १५८
तण्डिः प्रोवाच शुक्राय गौतमाय स भार्गवः।
वैवस्वताय मनवे गौतमः प्राह धीमते ॥ १५९
नारायणाय साध्याय मनुरिष्टाय धीमते।
यमाय प्राह भगवान् साध्यो नारायणोऽच्युतः ॥१६०
मार्कण्डेयाय मार्कण्डो नाचिकेताय धीमते।
नाचिकेतस्तु सम्प्राप्य ददौ तत्रोपमन्यवे ॥ १६१
उपमन्युस्तु कृष्णाय ददौ तस्यार्थसिद्धये।
एवं प्रवर्त्तितं स्तोत्रं शम्भोरिह महीतले ॥ १६२
कामदं भोगदञ्चैव सर्व्वसिद्धिप्रदायकम्।
स्वर्ग्यमारोग्यमायुष्यं धनं धान्यं तथैव च ॥ १६३
नास्य विघ्नं प्रकुर्व्वन्ति दानवा यक्ष-राक्षसाः।
पिशाचा यातुधानाश्च गुह्यका भुजगास्तथा ॥ १६४
यः पठेत् सुशुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः।
अभग्नयोगो वर्षन्तु साक्षात् पश्यति शङ्करम् ॥ १६५
यः पुनर्नित्यमेवं हि पठेदीश्वरसन्निधौ।
सोऽश्वमेधफलं लेभे विमुक्तः सर्व्वपातकैः ॥ १६६

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
सहस्रनामकथनं नामाष्टा-
विंशोऽध्यायः ॥२८॥

एकोनत्रिंशोऽध्यायः।

व्यास उवाच।

धर्म्मादर्थञ्च कामञ्च मोक्षञ्च त्रितयं लभेत्।
तस्माद्धर्म्मं समीहेत विद्वान् स बहुधा स्मृतः ॥ १
तपसा चैव दानेन व्रतेन नियमेन च।
तपसा प्राप्यते स्वर्गः सात्त्विकेन महामुने ॥ २
इच्छायातो लभेद्राज्यं लोभ-क्रोधविवर्ज्जितः।
जन्मान्तरेण मुक्तिः स्यात् पदं विन्दति शाङ्करम् ॥ ३
तपसा राजसेनेह राजस्वो तेन जायते।
तामसेन तु भावेन क्रूरकर्म्मेह निष्ठुरः ॥ ४
सन्धाहा वचसो वाचं पुनः किं तमसा हतम् ॥ ५
ससात्त्विकञ्चैव तदुच्यते तपो
रजस्तमोभ्यां न युतं प्रशस्यते।
पर्णाग्निनां वायुभुजां मुनीनां
तपस्विनां वै विपिने समासताम् ॥ ६
वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः।
अकुत्सिते कर्म्मणि यः प्रवर्त्तते
निवृत्तरागस्य गृहं तपोवनम् ॥ ७
तुर्य्याश्रमोऽयं गदितः सुधर्म्मः
सुदुश्चरं सम्यगुर्जितेन्द्रियाणाम्।
संहन्यते श्रेष्ठतमः शुभाश्रमो
गृहस्थधर्म्मः प्रवरो मनीषिणाम् ॥ ८
तस्मात्तपः संविपिने क्षुधार्त्तो
गृहं समादाय सदान्नदातुः।
भक्त्या यतोऽन्नं प्रददाति तस्य
तपोविभागं भजते हि सम्यक् ॥ ९
गृहाश्रमः श्रेष्ठतमोऽश्रमाणां
सम्यक् सदा पालयते मनुष्यः।
इहैव भुञ्जन् स मनुष्यभोगान्
स्वर्गं प्रयातीति न संशयोऽत्र ॥ १०
सदा गृहं पालयतां नराणां
पापं समायाति कथं मुनीन्द्र।
तद्ब्रूहि शुद्धिं हि हिताय तेषां
दानेन कृत्वा दिवमाव्रजन्ति ॥ ११

सनत्कुमार उवाच।

शृणु वक्ष्यामि कालेय महापापविशोधनम्।
सर्व्वसम्पत्करं दानमिहामुत्र फलप्रदम् ॥ १२
शुभकाले समायाते समभ्यर्च्येष्टदेवतम्।
नित्यं नैमित्तिकं कृत्वा दद्याद्दानं स्वशक्तितः ॥ १३
गृहीत्वा परद्रव्यन्तु द्विजदेवेभ्य एव हि।
दद्यात् स निरयं दृष्ट्वा पश्चाद्याति परां गतिम् ॥१४
शतानीको यथा दानात् सपुत्त्रैर्वावतारितः।
तथान्येभ्यस्तदादाय संगृह्य धर्म्मतो ददत् ॥ १५
धर्म्मस्थानेषु यद्दत्तं तेषामर्थमुदाहृतम्।
शृणु व्यास प्रवक्ष्यामि बहुवित्तं समासतः ॥ १६
देहशुद्धिकरं दानं स्वर्गलोकप्रसादकृत्।
दानं पापापहं येन पुमान् याति त्रिविष्टपम् ॥ १७
पुरा त्रिनयनप्रोक्तं भार्गवाय महात्मने।

पापयुक्ताय रामाय तुलापुरुषमेव च ॥ १८
पापकर्मरतश्चैव वधबन्धक्रियो नृपः।
योनिरन्तः सङ्कीर्णासु सुरापाननिरतस्तु यः ॥ १९
अभक्ष्यभक्षणरतो भ्रूणहा गुरुतल्पगः।
स्वतोऽप्यनृतवादी स्यात् प्रसूतान् सुवियोनिषु ॥ २०
अयाज्ययाजनं कृत्वा कृत्वा चोपवसेद्दिनम्।
ततस्तु कारयेदिष्टिं या पुरोक्ता मया तव ॥ २१
ऐन्द्र-वारुण-वायव्या याम्य-नैर्ऋत-शाम्भवाः।
सौम्याग्नेयास्तु निर्दिष्टा वह्नेस्तु हवने सदा ॥ २२
ग्रहचक्रपतेश्चैव हुत्वा व्याहृतिभिः पुरा।
यद्देवा देवहेलनं यदि दिवान्यनुक्रमात् ॥ २३
यच्चाग्रत इतश्चैव पुनन्तु मेतिसप्तकम्।
हुत्वा गव्यघृतेनैव शाकल्यं होममाचरेत् ॥ २४
ततो हुत्वाहुतीर्देवा सर्व्वेभ्योऽपि यथाक्रमम्।
ततः स्तम्भौ दृढौ चक्रे यज्ञियौ च महाबलौ ॥ २५
विघ्नेश-विघ्नौ खलु कार्त्तिकेयौ
सुपूजितौ गन्धवरैः सुवस्त्रैः।
ततः प्रसन्नौ ददतुर्यथेष्टं
सम्पूज्य सोमं द्विज-शूलपाणी ॥ २६
पिनाकिनं तत्र शुभोपहारै
रौद्रेण सूक्तेन तु विष्टरेण।
अर्घ्येण पाद्येन तथासनेन
त्वमेहि यज्ञे मम शूलपाणे ॥ २७
नागोत्तरीयोऽसि उमासमेतो
गृहाण पूजाञ्च मया प्रदत्ताम् ॥ २८
पूजा ब्रह्मपवित्रेण सूर्य्यस्येव तु रश्मिभिः।
रुद्रोऽयं सपत्नीकः प्रतिगृह्णातु स्वाहा ॥ २९
सर्व्वाणीमानि पुष्पाणि पूतानि रविरश्मिभिः।
रुद्रः सपत्नीकः प्रतिगृह्णातु स्वाहा ॥ ३०
वनस्पतिरसो दिव्यः सर्व्वगन्धेषु चोत्तमः।
आघ्रेयः सर्व्वदेवानां प्रतिगृह्णातु मे सदा स्वाहा॥३१
अग्निः शुक्रश्च ज्योतिश्च सर्व्वतेजोमयः शिवः।
प्रभाकरो महातेजा दीपोऽयं प्रतिगृह्यतां स्वाहा॥३२
आहाराद्यं जुहुयात्। अग्नये पृथिव्यधिपतये स्वाहा। इन्द्राय सुराधिपतये स्वाहा। सूर्य्याय दिवोऽधिपतये स्वाहा। सोमाय नक्षत्राधिपतये स्वाहा। वरुणाय अपां पतये स्वाहा। तुलायै तुलापुरुषाय स्वाहा। शेषं व्याहृतिभिर्जुहुयात् ॥ ३३
ततो द्रव्यं समारोप्य तुलायां स्वयमारुहेत्।
धरणी यदि ते माता ब्रह्मा च जनिता स्वयम् ॥३४
भूत्वा त्वं सत्यधर्मश्च आरूढं मां विधारय।
सत्येन यासि देवानां मुनीनां भावितात्मनाम् ॥३५
प्रतिगृह्णीष्व यातेन सत्यं ते नरसत्तम।
यदा तु गुरुमात्मानं सकृत् तु तुलया धृतम् ॥ ३६
द्रव्यञ्च लघु मन्येत ततः कर्म्म समारभेत्।
सकृत् कृत्वेह दानं हि सर्व्वपापैः प्रमुच्यते ॥ ३७
द्विश्चीर्त्वा तु गाणपत्यं लभते नात्र संशयः।
त्रिश्चीर्त्वा तु हरस्यापि कायतुल्यो भवेन्नरः ॥ ३८
पौर्णमास्यां चतुर्थ्यन्ते दद्याद्दानं युगादिषु।
ग्रहणे वापि तीर्थेषु कृतकृत्यो भवेन्नरः ॥ ३९
शृणोति सततं योऽपि दाने वा कुरुते मनः।
विमुक्तः सर्व्वपापेभ्यः स्वर्गलोकञ्च गच्छति ॥ ४०

इति श्रीशैवे महापुराणे धर्म्मसंहितायामेकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः।

व्यास उवाच।

किमर्थं मुनिना तेन रामेणाक्लिष्टकर्म्मणा।
मनसापि विशुद्धेन कृतं दानं महात्मना ॥ १
एतदिच्छाम्यहं श्रोतुं देवदेवेन शूलिना।
तुलापुरुषदानन्तु तस्योद्दिष्टं महात्मना ॥ २

सनत्कुमार उवाच।

शृणु वक्ष्यामि कालेय यथा तस्य द्विजन्मनः।
उपदिष्टन्तु रामस्य शिवभक्तस्य शूलिनः ॥ ३
रामस्याहं प्रवक्ष्यामि यथा जन्म स यादृशः।
यथाभूद्वीर्य्यसम्पन्नो यस्माद्दानं कृतन्त्विदम् ॥ ४
कुशिको नाम धर्म्मज्ञः स चापुत्रो महीपतिः।
उग्रं तपः समास्थाय आत्मानं समपीड़यत् ॥ ५
पुत्रं लभेयमजितं बलिनं बलशालिनम्।
तमुग्रतपसं मत्वा सहस्राक्षस्तमभ्ययात् ॥ ६

पुत्त्रत्वमनयद्यास तस्य लोकेश्वरेश्वरः।
गाधिनामाभवत् पुत्त्रः कौशिकः पाकशासनः ॥ ७
तस्य कन्याभवद्राज्ञो नाम्ना सत्यवती मुने।
तां गाधिर्ऋषिपुत्त्राय ऋचीकाय ददौ मुदा ॥ ८
ततः प्रीतस्तु कालेय चरुं गाधेर्महाकृतौ।
शक्राय तस्य भार्य्यार्थं ऋचीक ऋषिसत्तमः ॥ ९
उपयोज्यश्चरुरयं त्वया मात्रा द्विधाकृतम्।
मातुस्ते भविता पुत्त्रो दीप्तिमान् क्षत्त्रियर्षभः ॥ १०
अजय्यः क्षत्त्रियो लोके क्षत्त्रियर्षभसूतुना।
तवापि पुत्त्रं कल्याणि धृतिमन्तं तपोऽन्वितम् ॥ ११
शमात्मकं द्विजश्रेष्ठमयं चरुर्विधास्यति।
इत्येवमुक्त्वा तां भार्य्यां जगामारण्यमेव हि ॥ १२
तपस्तप्तुं ततो राजा तीर्थयात्रापरो मुने।
गाधिः सदारः सम्प्राप्त ऋचीकस्याश्रमं प्रति ॥ १३
चरुद्वयं गृहीत्वा तु हृष्टा सत्यवती तदा।
भर्त्तुर्वाक्यादथाव्यग्रा मात्रे हृष्टा न्यवेदयत् ॥ १४
माता तु स्वं समादाय दुहित्रे सन्न्यवेदयत्।
तस्याश्चरुमथो ज्ञात्वा आत्मसंस्थं चकार ह ॥ १५
अथ सत्यवती गर्भं क्षत्त्रियान्तकरं तदा।
धारयामास दीप्तेन वपुषा घोरदर्शनम् ॥ १६
तामृचीकस्तदा दृष्ट्वा ध्यानयोगेन चैव हि।
अब्रवीद्भृगुशार्दूलः स्वभार्य्यां वरवर्णिनीम् ॥ १७
मात्रा विध्वंसिता भद्रे चरुव्यत्ययहेतुना।
भविष्यति च ते भ्राता ब्रह्मभूतस्तपोधनः ॥ १८
विश्वं हि ब्रह्मतपसा मया तत्र समर्पितम्।
सैवमुक्ता महाभागा भार्य्या सत्यवती तदा ॥ १९
तस्मै जगाम शिरसा वचनन्त्विदमब्रवीत्।
ब्राह्मणापसदं पुत्त्रं वक्तुमेवंविधं वचः ॥ २०
न मामर्हसि धर्म्मज्ञ प्राप्स्यसीति महामुने।
तामाह त्वयि मे कामो मया भद्रे प्रकल्पितः ॥ २१
क्रूरकर्म्मा भवेत् पुत्त्रस्तव माता च कारणम्।
सा तं प्राह सृजेयास्त्वं लोकानन्यान् पुनर्मम ॥ २२
दातुं पुत्त्रं समर्थोऽसि लभेयं जयतांवर।
पुनराह स तां पूर्व्वं स्वैरेष्वप्यनृतं वचः ॥ २३
नोक्तमग्निं समाधाय मन्त्रं तं चरुसाधने।
सा तमाहेप्सितं पुत्त्रं लभेयं जपतांवरम् ॥ २४

काममीदृक् भवत्पौत्त्रो ममैव तव चैव ह।
तामुवाच स मे नास्ति विशेषो वरवर्णिनि ॥
पुत्त्रे वाप्यथवा पौत्त्रे स मे सम्यग्भविष्यति।
ततः सत्यवती पुत्त्रं जामदग्न्यं समात्मजम् ॥ २६
तपस्यभिरतं दान्तं जनयामास भार्गवम्।
गाधिस्तु ब्रह्मसहितं विश्वामित्रमजीजनत् ॥ २७
तपसा चापरिश्रान्तं प्रदीप्तमिव पावकम्।
समः क्षत्त्रियहस्ते च धनुर्व्वेदे च पारगः ॥ २८
विधिज्ञः सर्व्वविद्यानां प्रदीप्त इव पावकः।
एतस्मिन्नेव काले तु क्षत्त्रियो हैहयान्वयः ॥ २९
अर्ज्जुनो नाम तेजस्वी कृतवीर्य्यात्मजो बली।
सहस्रबाहुर्विक्रान्तः सदृशश्चित्रभानुना ॥ ३०
तृषितेनाह (क) कालेय प्रादात् तस्मात् तु यद्वरम्।
जज्वाल तस्य बाणस्थो ग्रामाणि नगराणि च ॥३१
पत्तनानि च घोषांश्च चित्रभानुर्वरप्रदः।
कदाचिदाश्रमारण्यं ददाह चित्रभानुना ३२
वरुणस्यापि शरणं शरेण तु स हैहयः।
आपस्तम्बस्ततो रोषाद्दग्धं दृष्ट्वा स्वकं वनम् ॥ ३३
शशाप ते शिरः कायाद्रामो वै पातयिष्यति।
ततो रामः सुशिष्यार्थे जगाम हरमन्तिके ॥ ३४
ज्ञात्वा सर्व्वाणि शस्त्राणि तस्मादस्त्रविदांवरः।
एतस्मिन्नन्तरे राजा हैहयोऽश्रममभ्ययात् ॥ ३५
जमदग्नेः स तस्यापि पूजां चक्रे यथाविधि।
सोऽर्ज्जुनः कामधेनुं तां दृष्ट्वा तस्य वरप्रदाम् ॥ ३६
ययाचे बहुभिर्गोभिर्ऋषिस्तस्य न दत्तवान्।
बलात् तां नीयमानां वै दृष्ट्वा रामोऽभ्ययाद्वनात्॥३७
युद्धं कृत्वा वनं छित्त्वा बाहूनां तस्य भार्गवः।
जगाम तपसे धीमान् महेन्द्राद्रौ स वीर्य्यवान् ॥ ३८
जगामाथ श्रमं कर्त्तुं स रामो हरसन्निधौ।
अर्ज्जुनस्य सुतास्ते तु सम्भूयायोधयंस्ततः ॥ ३९
गत्वाश्रमन्तु बहवो जमदग्निं निजघ्निरे।
ततः स नृपशार्दूलं कार्त्तवीर्य्यञ्च वीर्य्यवान् ॥ ४०
विक्रम्य निजघानाशु पुत्त्रान् पौत्त्रांस्तु सर्व्वशः।
शस्त्रव्रणानि यावन्ति पितुर्दृष्ट्वा स भार्गवः ॥ ४१
चकाराजौ प्रतिज्ञान्तु करिष्येऽक्षत्त्रियां धराम्।

(क) तृषितेनेति मुनेर्विशेषणं पाठः क्वचित्।

तथा स तु महातेजाः कृत्वा चाक्षत्रियां धराम् ॥ ४२
ततः क्षत्रियवीराणां योषितो वनमाश्रयन्।
आश्रमाणि महर्षीणां तेभ्यः पुत्रांस्तु लेभिरे ॥ ४३
ततस्तदुत्थितं दृष्ट्वा पुनः क्षत्त्रं स भार्गवः।
समुपेत्य वनाद्विप्रो जघानामर्षनोदितः ॥ ४४
पुनः शतसहस्राणि हत्वा राज्ञां महायशाः।
चकार भार्गवः सर्व्वां महीं शोणितकर्द्दमाम् ॥ ४५
ततो दत्त्वा द्विजेभ्यस्तां महीं सर्व्वां स भार्गवः।
वनं ययौ तपस्तप्तुं भार्गवो मुनिसत्तमः ॥ ४६
पुनस्ते क्षत्त्रिया व्यास ब्राह्मणेभ्यः प्रजज्ञिरे।
ते च वृद्धा महावीर्य्याः पृथिवीपतयोऽभवन् ॥ ४७
ब्राह्मणेभ्यः समादाय बलिनः पृथिवीं ततः।
जातं जातं सगर्भन्तु पुनरेव जघान ह ॥ ४८
अरक्षंश्च सुतान् काश्चित् ता न क्षत्रिययोषितः।
त्रिःसप्तकृत्वः पृथिवीं दक्षिणामददात् प्रभुः ॥ ४९
कश्यपायाश्वमेधेनु क्रूरपापा(क)पनुत्तये।
न जहाति यदा पापं तपसा नियमेन च ॥ ५०
यज्ञेन सोऽश्वमेधेन तदा भवमपृच्छत।
स पृष्टस्तस्य चाचख्यौ तुलापुरुषमुत्तमम् ॥ ५१
सुदानं सर्व्वदानानामुत्तमं पापनाशनम्।
स कृत्वा दानमेतत् तु तुलापुरुषमुत्तमम् ॥ ५२
जगाम तपसे धीमान् भूत्वा निष्कल्मषो द्विजः।
एतदर्थं मुनिश्रेष्ठ भार्गवेण महात्मना ॥ ५३
ब्रह्महत्यापहं व्यास दत्तं दानमनुत्तमम्।
निर्म्मितः कलधौतस्य दद्याद्दिवं प्रयत्नतः ॥ ५४
मध्वाज्य-गुड़-वस्त्रैस्तु सुवर्णेन तु संयुतम्।
तुलासंरोहणं कार्य्यं यदीच्छेच्छ्रेय आत्मनः ॥ ५५
वचसा मनसा वापि कर्म्मणापीह यत् समम्।
वित्तेन मुच्यते पापैर्विधवन्धकृतोद्भवैः ॥ ५६
कृत्वा पापान्यशेषाणि तुलादानं करोति यः।
चित्तस्य पातकैर्मुक्तस्तैर्दिवं यात्यसंशयः ॥ ५७

पापं कृतं यद्दिवसे निशायां
द्विःसन्ध्ययोर्मध्यदिने निशान्तयोः।
कालत्रये कर्म्म-मनो-वचोभि-
स्तुलापुमान् याति ह तत्कृतेन ॥ ५८

(क) भ्रूणपापीत वा पाठः।

बालेन वृद्धेन मया हि यूना
विजानता ज्ञानपरेण पापम्।
तत् सर्व्वमेवाशु कृतं निहन्तु
तुलापुमान् मे हरतु स्मरारिः ॥ ५९
यत्राधितिष्ठं हि मया कृतं तत्
प्रणामवित्तं निहितं तुलायाम्।
तेनैव सार्द्धं सुकृतं प्रयातु
कृतं कृतं यत् सुकृतं समेतु ॥ ६०

सनत्कुमार उवाच।

एवमुच्चार्य्य तद्दद्याद्द्विजेभ्यः सर्व्वदा हि तु।
नैकस्यापि प्रदातव्यं न निस्तार्य्यं ततो भवेत् ॥ ६१
ददात्येवन्तु यो व्यास तुलापुरुषमुत्तमम्।
हत्वा पापं दिवं तिष्ठेद्यावदिन्द्राश्चतुर्द्दश ॥ ६२

इति श्रीशैवे महापुराणे धर्म्मसंहितायां तुलापुरुषवर्णनं नाम त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः।

व्यास उवाच।

येनैकेन हि दत्तेन सर्व्वेषामाप्यते फलम्।
दानानां तन्ममाख्याहि मानुषाणां हितार्थतः ॥ १

सनत्कुमार उवाच।

शृणु कालेय यद्दानात् फलं विन्दति मानवः।
एकस्मादपि सर्व्वेषां दानानां तच्छृणुष्व मे ॥ २
दानानामुत्तमं दानं ब्रह्माण्डं खलु मानवैः।
दातव्यं मुक्तिकामैस्तु संसारोत्तारणाय वै ॥ ३
ब्रह्माण्डे सकले दत्ते यत् फलं लभते नरः।
तदेकभावादाप्नोति सप्तलोकाधिपो भवेत् ॥ ४

यावच्चन्द्र-दिवाकरौ नभसि वै
यावत् स्थिरा मेदिनी
तावत् सोऽपि नरः स्वबान्धवयुतः
स्वर्गौकसामोकसि।
सर्व्वेष्वेव मनोऽनुगैः स बहुभि-
र्ब्रह्माण्डदः क्रीड़ति
पश्चाद्याति परं सुदुर्लभपदं
देवैर्मुने माधवः ॥ ५

व्यास उवाच।

तत् ब्रूहि ब्रह्माण्डं यत्प्रमाणं यदात्मकम्।
आधारं यथा जातं येन मे प्रत्ययो भवेत् ॥ ६

सनत्कुमार उवाच।

शृणु प्रवक्ष्यामि यदुक्तं धन्तु विस्तरम्।
रण्डन्तु सुसङ्क्षेपाच्छ्रुणु पापात् प्रमुच्यते ॥ ७
तत् कारणमव्यक्तं शिवं पदमनामयम्।
मादुत्पद्यते सर्व्वं लीयते च पुनः पुनः ॥ ८
स्मात् संजायते व्योम पुष्करादायुसम्भवः।
योरग्निरतश्चापोऽपो वै सञ्जायते धरा ॥ ९
तादिभूतसुन्मथ्य तदण्डमुपजायते।
स्मात् सञ्जायते ब्रह्मा द्विधाभूतादिकालतः ॥ १०
पातालानि तु सप्तैव भुवनानि तथोर्द्धतः।
उच्छ्रायं द्विगुणं तस्य जलमध्यस्थितस्य च ॥ ११
तस्याधारः सितो नागः स च विष्णुः प्रकीर्त्तितः।
ब्रह्मणो वचसो हेतोर्विभर्त्ति सकलन्त्विदम् ॥ १२
शेषाख्याय गुणान् वक्तुं न शक्ता देवदानवाः।
योऽनन्तः पठ्यते सिद्धैर्देवर्षिगणपूजितः ॥ १३
सहस्रशिरसो व्यक्तः सर्व्वा विद्योतयन् दिशः।
फणामणिसहस्रेण स्वस्तिकामलभूषणः ॥ १४
मदाघूर्णितनेत्रोऽसौ साग्निः श्वेत इवाचलः।
किरीटी स्रग्विणो भाति यः सदैवैककुण्डलः ॥ १५
यं गङ्गाप्रवाहेण श्वेतहारोपशोभितः।
नीलवासा मदोद्रिक्तः कैलासाद्रिरिवोन्नतः ॥ १६
लाङ्गलासक्तहस्ताग्रो विभ्रन्मुषलमुत्तमम्।
उपास्यते स्वयं कन्यया वारुण्येनमूर्त्तया ॥ १७
सङ्कर्षणात्मको रुद्रो विषानलशिखोज्ज्वलः।
कल्पान्ते यस्य वक्त्रेभ्यो निष्क्रम्यात्ति जगत्त्रयम् ॥ १८
आस्ते पातालमूलस्थः स शेषः क्षितिमण्डलम्।
बिभ्रन् सर्षपवद्भूतं शेषोऽशेषसुरार्च्चितः ॥ १९
तस्य वीर्य्यं प्रभावश्च शक्यं वा त्रिदशैरपि।
न हि वर्णयितुं ज्ञातुं स्वरूपं रूपमेव च ॥ २०
आस्ते कुसुममालेव फणामणिशिलारुणा।
यस्यैषा सकला पृथ्वी कस्तद्वीर्य्यं वदिष्यति ॥ २१
यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः।
तदा चलति भूरेषा साद्रितोयाब्धिकानना ॥ २२

नान्तं गुणानां गच्छन्ति जिह्वा मुनि-सुकिन्नराः।
गन्धर्व्वोरगदेवाश्च तेनानन्तोऽयमव्ययः ॥ २३
भुङ्क्तः श्वासानिलापास्तं लेपितं हरिचन्दनम्।
यस्य नागवधूहस्तैर्दिशं याति सुवासताम् ॥ २४
ज्ञातवान् सकलञ्चैव गर्गो ज्योतींषि तत्त्वतः।
यमाराध्य पुराणर्षिर्निमित्तपठितं फलम् ॥ २५
बिभर्त्ति मालां लोकानां शिरसा विश्रुता मही।
तेनेयं नागवीर्य्येण सदेवासुरमानुषान् ॥ २६
दशसहस्रमेकैकं पातालं मुनिसत्तम।
सुतलं वितलञ्चैव नितलञ्च गभस्तिमत् ॥ २७
महच्च सुतलञ्चाग्र्यं सप्तमञ्च रसातलम्।
उच्छ्रायं द्विगुणञ्चेषां सर्व्वेषां रत्नभूमयः ॥ २८
रत्नवन्तोऽथ प्रासादा भूमयो हेमसम्भवाः।
तेषु दानव-दैतेया नागानां जातयस्तथा ॥ २९
निवसन्ति महाभागा राक्षसा दैत्यसम्भवाः।
प्राह स्वर्गसदां मध्ये पातालानीति नारदः ॥ ३०
स्वर्लोकादपि रम्याणि तेभ्योऽसावागतो दिवि।
नानाभरणभूषासु मणयो यत्र सुप्रभाः ॥ ३१
आह्लादकारिणः शुभ्राः पातालं केन तत् समम्।
पाताले कस्य न प्रीतिरितश्चेतश्च शोभते ॥ ३२
देव-दानवकन्याभिर्विमुक्तस्यापि जायते।
दिवार्करश्मयो यत्र न भवन्ति विभोर्निशि ॥ ३३
न शीतमातपो यत्र मणितेजोऽत्र केवलम्।
भक्ष्यभोज्यान्नपानानि भुञ्जन्ते मुदितैर्भृशम् ॥ ३४
यत्र न ज्ञायते कालो गतोऽपि मुनिसत्तम।
पुंस्कोकिलरुतं तत्र वन्यानि कमलाकराः ॥ ३५
नद्यः सरांसि रम्याणि मनोज्ञान्यम्बराणि च।
भूषणान्यतिशुभ्राणि गन्धाढ्यञ्चानुलेपनम् ॥ ३६
वीणा-वेणु-मृदङ्गानां स्वना गीयानि च द्विज।
दैत्योरगैश्च भुज्यन्ते पाताले वै सुखानि च ॥ ३७
तपसा समवाप्तानि दानवैः सिद्ध-मानवैः ॥ ३८

इति श्रीशैवे महापुराणे धर्म्मसंहि-
तायां ब्रह्माण्डकथनं नामैक-
त्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः ।

सनत्कुमार उवाच ।

तेषामूर्द्ध्वोपरिष्टाद्वै नरकास्तान् शृणुष्व मे ।
वदतो मे मुनिश्रेष्ठ पच्यन्ते यत्र पापिनः ॥ १
रौरवः शूकरो रोधस्तालो विवसनस्तथा ।
महाज्वालस्तप्तकुम्भो लवणोऽपि विलोहितः ॥ २
वैतरणी पूयवहा क्रिमिलः क्रिमिभोजनः ।
असिपत्रवनं घोरं लालाभक्षश्च दारुणः ॥ ३
तथा पूयवहापायो वह्निर्ज्वालो ह्यधःशिराः ।
सन्दंशः कालसूत्रश्च तमश्चावीचिरोधनः ॥ ४
श्वभोजनोऽप्यदृष्टश्च महारौरव-शाल्मली ।
पच्यन्ते तेषु पुरुषाः पापकर्म्मरतास्तु ये ॥ ५
कूटसाक्ष्यन्तु यो वक्ति विना विप्रं सुरासवम् ।
सदानृतं वदेद्यस्तु स नरो याति रौरवम् ॥ ६
भ्रूणहा परसहर्त्ता गोरोधो विश्वघातकः ।
सुरापो ब्रह्महा हर्त्ता सुवर्णस्य तु शूकरे ॥ ७
तैः संसर्गी स वै याति राज्ञो वैश्यगुरोर्वधात् ।
तप्तकुम्भे स्वसृमातृगामी च दुहितुस्तु यः ॥ ८
साध्वीविक्रयकृद्बालवधकौ केशविक्रयी ।
तप्तलोहेषु पच्यन्ते यश्च भक्तं परित्यजेत् ॥ ९
अवमन्ता गुरूणां यः पश्चाद्भोक्ता नराधमः ।
देवदूषयिता चैव वेदविक्रयकृच्च यः ॥ १०
अगम्यगामी यश्चापि याति तप्तखलं द्विज ।
अवीचिरोधे पतति मर्य्यादादूषकस्तथा ॥ ११
देव-द्विज-पितृद्वेष्टा रत्नदूषयिता च यः ।
स याति क्रिमिभक्षे च क्रिमिले च दुरिष्टकृत् ॥ १२
पितृ-देव-सुरान् यस्तु पर्य्यश्नाति नराधमः ।
लालाभक्षे स यात्यज्ञो यः शस्त्रकूटकृन्नरः ॥ १३
विशसने स यात्युग्रे असद्ग्राही तु यो द्विजः ।
अयाज्ययाजकश्चैव तथैवाभक्ष्यभक्षकः ॥ १४
रुधिरान्धे पतन्त्ये ते सोमविक्रयिणश्च ये ।
मित्रहा मधुहा याति क्रूरां वैतरणीं नदीम् ॥ १५
नवयौवनमत्ताश्च मर्य्यादाभेदिनश्च ये ।
ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये ॥ १६
असिपत्रवने याति वृक्षच्छेदी तथैव यः ।
औरभ्रको मृगव्याधो वह्निज्वाले पतन्ति ते ॥ १७
यान्त्यन्ते द्विज तत्रैव यश्चापापेषु वह्निदः ।
व्रतस्य लोपको यश्च स्वाश्रमाद्विच्युताश्च ये ॥ १८
सन्दंशे यातनामध्ये पतन्ति भृशदारुणे ।
दिवास्वप्नेषु स्कन्दन्ति ये नराऽब्रह्मचारिणः ॥ १९
पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने ।
एते चान्ये च नरकाः शतशोऽथ सहस्रशः ॥ २०
येषु दुष्कृतकर्म्माणः पच्यन्ते यातनां गताः ।
तथैव पापान्येतानि तथान्यानि सहस्रशः ॥ २१
भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ।
वर्णाश्रमविरुद्धञ्च कर्म्म कुर्व्वन्ति ये नराः ॥ २२
कर्म्मणा मनसा वाचा निरये तु पतन्ति ते ।
अधःशिरोभिर्दृश्यन्ते नारका दिवि दैवतैः ॥ २३
देवानधोमुखान् सर्व्वान् न च पश्यन्ति नारकाः ।
स्थावराः क्रिमयोऽब्जाश्च पक्षिणः पशवो मृगाः ॥ २४
धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् ।
यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः ॥ २५
पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ।
पापानामनुरूपाणि प्रायश्चित्तानि यद्यथा ॥ २६
तथा तथैव संस्मृत्य प्रोक्तानि परमर्षिभिः ।
गुरूणि गुरुभिश्चैव लघुभिश्च लघूनि च ॥ २७
प्रायश्चित्तानि कालेय मनुः स्वायम्भुवोऽब्रवीत् ।
यानि तेषामशेषाणां तानि कर्म्माण्यशेषानि वै ॥ २८
प्रायश्चित्तमशेषाणां हरानुस्मरणं परम् ।
प्रायश्चित्तन्तु तस्यैकं यस्य पुंसः प्रजायते ॥ २९
कृते पापेऽनुतापो वै शिवसंस्मरणं परम् ।
महेश्वरमवाप्नोति मध्याह्नादिषु संस्मरन् ॥ ३०
प्रातर्निशि च सन्ध्यायां सद्यः पापक्षयं नरः ।
मुक्तिं प्रयाति स्वर्गाप्तिः समस्तक्लेशसङ्क्षयः ॥ ३१
शिवस्य स्मरणादेव तस्य भक्तोऽनुमीयते ।
तस्यान्तरायो विप्रेन्द्र जपहोमार्चनादिषु ॥ ३२
महेश्वरे तु भक्तस्य देवेन्द्रत्वादिकं फलम् ।
पुमान् न नरकं याति संस्मरन् भक्तितो मुने ॥ ३३
शिवमहर्निशं तस्मात् सङ्क्षीणाशेषपातकी ।
नरकः स्वर्गसंज्ञो वै पाप-पुण्ये द्विजोत्तम ॥ ३४
यस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च ।

...शीतरी भूत्वा पुनर्दुःखाय जायते ॥ ३५
...दुःखात्मकं नास्ति नैव किञ्चित् सुखात्मकम्।
...परिणामोऽयं सुखदुःखोपलक्षणम् ॥ ३६
...व परं ब्रह्म ज्ञानं तत्त्वाय कल्पते।
...कमिदं विश्वं ज्ञानान्न विद्यते परम् ॥ ३७
...समयाख्यातं सर्व्वं नरकमण्डलम्।
...ते प्रवक्ष्यामि समस्तं मण्डलं भूवः ॥ ३८
...ति श्रीशैवे महापुराणे धर्म्मसंहितायां
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः।

सनत्कुमार उवाच।

...यथै सुसंक्षेपाच्छृणु त्वं वदतो मम।
...प्लक्षः शाल्मलिश्च कुशः क्रौञ्चश्च पुष्करः ॥ १
...तु सप्तमः सर्व्वे समुद्रैः सप्तभिर्वृताः।
...क्षुरसैः सर्पिर्दधि-दुग्ध-जलैः समम् ॥ २
...द्वीपः समस्तानामेतेषां मध्यमः स्थितः।
...पि मेरुः कालेय मध्ये कनकपर्व्वतः ॥ ३
...षोड़शाधस्ताद्वयोजनैस्तस्य चोच्छ्रयः।
...शीतिसाहस्रैर्द्वात्रिंशन्मूर्द्ध्नि विस्तृतः ॥ ४
...स्यास्य शैलोऽसौ विस्तारस्तस्य सर्व्वतः।
...षोड़शसाहस्रः कर्णिकाकारसंस्थितः ॥ ५
...वान् हेमकूटश्च निषधश्चास्य दक्षिणे।
...श्वेतश्च शृङ्गी च उत्तरे वर्षपर्व्वताः ॥ ६
...हस्रिका ह्येते रत्नवन्तोऽरुणप्रभाः।
...हितयोत्सेधास्तावद्विस्तारिणश्च ते ॥ ७
...प्रथमं वर्षं ततः किम्पुरुषं स्मृतम्।
...ततोऽन्यद्वै मेरोर्दक्षिणतो मुने ॥ ८
...श्चोत्तरे पार्श्वे तस्य सानु हिरण्मयम्।
...कुरवश्चैव यथा वै भारतं तथा ॥ ९
...स्रमेकैकमेतेषां मुनिसत्तम।
...तु तन्मध्ये तन्मध्ये मेरुरुच्छ्रितः ॥ १०
...दिशं तत्र नवसाहस्रमुच्छ्रितम्।
...षिश्रेष्ठ चत्वारश्चात्र पर्व्वताः ॥ ११
...था रचिता मेरोर्योजनायुतमुच्छ्रिताः।

पूर्व्वेण मन्दरो नाम दक्षिणे गन्धमादनः ॥ १२
विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्थितः।
कदम्बो जम्बूवृक्षश्च पिप्पलो वट एव च ॥ १३
एकादशशतायामाः पादपा गिरिकेतवः।
जम्बूद्वीपस्य यो जम्बूर्नाम हेतुर्महामुने ॥ १४
महागजप्रमाणानि जम्ब्वास्तस्य फलानि च।
पतन्ति भूभृतः पृष्ठे शीर्य्यमाणानि सर्व्वतः ॥ १५
रसेन तेषां विख्याता तत्र जम्बूनदीति वै।
परितो वर्त्तते सा च पीयते तन्निवासिभिः ॥ १६
न स्वेदो न च दौर्गन्ध्यं न जरा चेन्द्रियक्षयः।
तत्पानस्वस्थमनसां जनानां तत्र जायते ॥ १७
तीरे मृत् तत्र सम्प्राप्य सुखवायुविशोषिता।
जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम् ॥ १८
भद्राश्वः पूर्व्वतो मेरोः केतुमालश्च पश्चिमे।
वर्षे द्वे तु मुनिश्रेष्ठ तयोर्मध्य इलावृतम् ॥ १९
वनं चैत्ररथं पूर्व्वे दक्षिणे गन्धमादनम्।
विभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम् ॥ २०
अरुणोदं महाभद्रं शीतोदं मानसं स्मृतम्।
सरांस्येतानि चत्वारि देवभोग्यानि सर्व्वशः ॥ २१
शीताञ्जनः कुमुदश्च कुररो माल्यवांस्तथा।
वैकङ्कप्रमुखा मेरोः पूर्व्वतः केशराचलाः ॥ २२
त्रिकूटः शिशिरश्चैव पतङ्गो रजतस्तथा।
निषधादयो दक्षिणतस्तस्य केशरपर्व्वताः ॥ २३
शिखिवासाः सवैदूर्य्यः कपिलो गन्धमादनः।
जारुधिप्रमुखास्तद्वत् पश्चिमे केशराचलाः ॥ २४
शङ्खचूड़ोऽथ ऋषभो हंसो नाम महीधरः।
कालञ्जराद्याश्च तथा उत्तरे केशराचलाः ॥ २५
मेरोरुपरि कालेय योजनानां तथा पुरम्।
चतुर्द्दश सहस्राणि ब्रह्मणः प्रथितं दिवि ॥ २६
इन्द्रादिलोकपालानां दिशासु विदिशासु च।
तस्य समन्ततश्चाष्टौ ख्याताः पुर्य्यः समन्ततः ॥ २७
समन्ताद्ब्रह्मणः पुर्य्याः प्लावयित्वेन्दुमण्डलम्।
विष्णुपादविनिष्क्रान्ता गङ्गा पतति वै दिवः ॥ २८
सीता चालकनन्दा च चतुर्द्धा प्रतिपद्यते।
सा तत्र पतिता दिक्षु चक्षुर्भद्रा च वै क्रमात् ॥ २९
सीता पूर्व्वेण शैलात् तु नन्दा चैव तु दक्षिणे।

सुचक्षुः पश्चिमे चैव भद्रा चोत्तरतो व्रजेत् ॥ ३०
गिरीनतीत्य सकलांश्चतुर्द्दिक्षु महाम्बुधिम्।
सा ययौ प्रयता भूत्वा गङ्गा त्रिपथगामिनी ॥ ३१
सुनील-निषधायातौ माल्यवद्गन्धमादनौ।
तेषां मध्यगतो मेरुः कर्णिकाकारसंस्थितः ॥ ३२
भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा।
पत्राणि लोकपद्मस्य मर्य्यादा लोकवाह्यतः ॥ ३३
जठरे देवकूटश्च आयामे दक्षिणोत्तरे।
गन्धमादन-कैलासौ पूर्व्वपश्चिमतो गतौ ॥ ३४
पूर्व्वपश्चिमतो मेरोर्निषधो नीलपर्व्वतः।
दक्षिणोत्तरमायातौ कर्णिकान्तर्व्यवस्थितौ ॥ ३५
जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ व्यवस्थितौ।
केशराः पर्व्वता एते शीताद्याः सुमनोरमाः ॥ ३६
शैलानामन्तरे द्रोण्यः सिद्ध-चारणसेविताः।
सुरम्याणि तथा तेषु काननानि पुराणि च ॥ ३७
सर्व्वेषाञ्चैव देवानां यक्ष-गन्धर्व्व-रक्षसाम्।
क्रीड़न्ति देव-दैतेयाः शैलद्रोणीष्वहर्निशम् ॥ ३८
धर्म्मिणामालया ह्येते भौमाः स्वर्गाः प्रकीर्त्तिताः।
नैतेषु पापकर्त्तारो यान्ति पश्यन्ति कुत्रचित् ॥ ३९
यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ महामुने।
न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम् ॥ ४०
स्वस्थाः प्रजा निरातङ्काः सर्व्वदुःखविवर्ज्जिताः।
दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः ॥ ४१
कृत-त्रेतादिकाश्चैव भौमान्यम्भांसि सर्व्वतः।
न तेषु वर्षते देवस्तेषु स्थानेषु कल्पना ॥ ४२
सप्तस्वेतेषु नद्यश्च सुपयाः स्वर्णबालुकाः।
शतशः सन्ति क्षुद्राश्च तासु क्रीड़ासुभाजनाः ॥ ४३

इति श्रीशैवे महापुराणे धर्म्मसंहितायां ब्रह्माण्ड-
कथनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः।

सनत्कुमार उवाच।

वक्ष्येऽहं भारतं वर्षं हिमाद्रेश्चैव दक्षिणम्।
उत्तरन्तु समुद्रस्य भारती यत्र संस्थितिः ॥ १
नवयोजनसाहस्रो विस्तारोऽस्य महामुने।
कर्म्मभूमिरियं स्वर्गापवर्गं पुण्यपापिभिः ॥ २
अतः सम्प्राप्यते स्वर्गो मोक्षो नरक एव च।
भारतस्यास्य वर्षस्य नव भेदान् ब्रवीमि ते ॥ ३
इन्द्रद्युम्नः कसेरुश्च ताम्रपर्णो गभस्तिमान्।
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुणः ॥ ४
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः।
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरः ॥ ५
पूर्व्वे किराता यस्य स्युः पश्चिमे यवनाः स्थिताः।
आन्ध्रा दक्षिणतो व्यास तुरुष्कास्त्वपि चोत्तरे ॥ ६
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः।
इज्यायुधवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थिताः ॥ ७
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः।
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्व्वताः ॥ ८
वेदस्मृतिमुखा नद्यः पारियात्रोद्भवा मुने।
नर्म्मदा-सुरसाद्याश्च सन्त्यन्याश्च सहस्रशः ॥ ९
विन्ध्योद्भवा महानद्यः सर्व्वपापहराः शुभाः।
गोदावरी-भीमरथी-तापी-प्रमुखतोयगाः ॥ १०
विन्ध्याद्रिनिर्गताः पुण्याः स्नानात् पापभयापहाः।
सह्यपादोद्भवा नद्यः कृष्णावेण्यादिकास्तथा ॥ ११
कृतमाला-ताम्रपर्णी-प्रमुखा मलयोद्भवाः।
त्रियामा-ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः ॥ १२
ऋषिकुल्या-कुमार्य्याद्याः शुक्तिमत्पादसम्भवाः।
नानाजनपदास्तेषु वसन्तो मण्डलेषु वै ॥ १३
आसां पिबन्ति पानीयं सरःसु विविधेषु च।
चत्वारि भारते वर्षे युगान्यासन् महामुने ॥ १४
कृतादीनि न चान्येषु द्वीपेषु प्रभवन्ति हि।
दानानि चात्र दीयन्ते जुह्वते चात्र यज्वनः ॥ १५
तपस्तप्यन्ति यतयः परलोकार्थमादरात्।
यतो हि कर्म्मभूरेषा जम्बूद्वीपे महामुने ॥ १६
तत्रापि भारतं श्रेष्ठमतोऽन्या भोगभूमयः।
कदाचिल्लभ्यते मर्त्यैः सहस्रैर्मुनिसत्तम ॥ १७
अत्र जन्मसहस्राणां मानुष्यं पुण्यसञ्चयम् ॥ १८

स्वर्गापवर्गास्पदमार्गभूते
धन्यास्तु ते भारतभूमिभागे।
गायन्ति देवाः किल गीतकानि
भवन्ति भूयः पुरुषाः सुरत्वात् ॥ १९

अवाप्य मानुष्यमयं कदाचिद्-
विहत्य शम्भौ परमात्मभूते ।
फलानि सर्व्वाणि तु कर्म्मजानि
यास्यामहे तत्तनुता हि तस्य ॥ २०
प्राप्स्यन्ति धन्याः खलु ते मनुष्या
वयं कृताः कर्म्मणि सन्निविष्टाः ।
जानीम तैस्तद्धि शिवं सुखाय
ते भारते चेन्द्रियविप्रधन्याः ॥ २१
लक्षयोजनविस्तारं समस्तपरिमण्डलम् ।
जम्बूद्वीपं मयाख्यातं क्षारोदधिसुसंवृतम् ॥ २२
संवेष्ट्य क्षारसुदधिं शतसाहस्रसम्मितम् ।
स एव द्विगुणो ब्रह्मन् प्लक्षद्वीपः प्रकीर्त्तितः ॥ २३
गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा ।
सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः ॥ २४
वर्षाचलेषु रम्येषु मुदिताः सततं प्रजाः ।
वसन्ति देवगन्धर्व्वा वर्षेष्वेतेषु नित्यशः ॥ २५
नाधयो व्याधयो वापि जनानां तत्र कुत्रचित् ।
दश वर्षसहस्राणि तत्र जीवन्ति मानवाः ॥ २६
अनुतप्ता शिखा चैव पापघ्नी त्रिदिवा कृपा ।
अमृता सुकृता चैव सप्तैवान्यत्र निम्नगाः ॥ २७
क्षुद्रनद्यस्तथा शैलास्तथा सन्ति सहस्रशः ।
ताः पिबन्ति सुसंहृष्टा नदीर्जनपदास्तु ते ॥ २८
न तत्रास्ति युगावस्था यथा स्थानेषु सप्तसु ।
त्रेतायुगसमः कालः सर्व्वदैव महामुने ॥ २९
विप्र-क्षत्रिय-वैश्यास्ते शूद्राश्च मुनिसत्तम ।
प्लक्षवृक्षप्रमाणास्तु तन्मध्ये सुमहातरुः ॥ ३०
प्लक्षस्तन्नामसंज्ञो वै प्लक्षद्वीपो द्विजोत्तम ।
इज्यते तत्र भगवाञ्छङ्करो लोकशङ्करः ॥ ३१
हरिश्च भगवान् ब्रह्मा यज्ञैर्मन्त्रैश्च वैदिकैः ।
संक्षेपेण तथा भूयः शाल्मलिं त्वं निशामय ॥ ३२
सप्त वर्षाणि तत्रैव तेषां नामानि मे शृणु ।
श्वेतोऽथ हरितश्चैव जीमूतो रोहितस्तथा ॥ ३३
वैद्युतो मानवश्चैव सुप्रभः सप्तमो मुने ।
शाल्मलेन तु वृक्षेण तेन शाल्मलिसंज्ञितः ॥ ३४
द्विगुणेन समुद्रेण सततं संवृतः स्थितः ।
वर्षाभिव्यञ्जिका नद्यस्तासां नामानि मे शृणु ॥ ३५
शुक्ला रक्ता हिरण्या च चन्द्रा शुभ्रा विमोचना ।
निवृत्तिः सप्तमी तासां पुण्यतोयाः सुशान्तिदाः ॥ ३६
सप्तैतानि तु वर्षाणि चतुर्व्वर्णयुतानि तु ।
भगवन्तं सदा विष्णुमिज्यते विविधैर्मखैः ॥ ३७
देवानां तत्र सान्निध्यमतीव सुमनोरमे ।
एष द्वीपः समुद्रेण सुरोदेन समावृतः ॥ ३८
द्विगुणेन कुशद्वीपः समन्ताद्वाह्यतः स्थितः ।
वसन्ति तत्र दैतेया मनुजैः सह दानवाः ॥ ३९
तथैव देवगन्धर्व्वा यक्षाः किम्पुरुषादयः ।
वर्णास्तत्रैव चत्वारो निजानुष्ठानतत्पराः ॥ ४०
तत्रैव च कुशद्वीपे ब्रह्मभूतं जनार्द्दनम् ।
यजन्ति च तथेशानं सर्व्वकामफलप्रदम् ॥ ४१
कुशेशयो हरिश्चैव द्युतिमान् पुण्यवांस्तथा ।
मणिद्रुमो महाशैलः सप्तमो मन्दराचलः ॥ ४२
नद्यश्च सप्त तासान्तु नामानि शृणु तत्त्वतः ।
धूतपापा शिवा चैव पवित्रा सम्मितिस्तथा ॥ ४३
विद्या दम्भा मही चान्या सर्व्वपापहरास्त्विमाः ।
अन्याः सहस्रशः सन्ति शुभापो हेमबालुकाः ॥ ४४
कुशद्वीपे कुशस्तम्बो घृतोदेन समावृतः ।
क्रौञ्चद्वीपो महाभाग श्रूयताञ्चापरो महान् ॥ ४५
द्विगुणेन समुद्रेण दधिमण्डोदकावृतः ।
वर्षाचला महाबुद्धे तेषां नामानि मे शृणु ॥ ४६
क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः ।
दिवावृत्त्यमनाश्चैव पुण्डरीकश्च दुन्दुभिः ॥ ४७
निवसन्ति निरातङ्का वर्षशैलेषु तेषु वै ।
सर्व्वसौवर्णरम्येषु सह देवगणैः प्रजाः ॥ ४८
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः ।
सन्ति तत्र महानद्यः सप्तान्यास्तु सहस्रशः ॥ ४९
गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ।
ख्यातिश्च पुण्डरीका च याः पिबन्ति पयः शुभम् ॥ ५०
भगवान् पूज्यते तत्र योगी रुद्रस्वरूपवान् ।
दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः ॥ ५१
द्विगुणेनाद्रयः सप्त तेषां नामानि मे शृणु ।
पूर्व्वं तत्रोदयगिरिर्जलधारोऽपरे यतः ॥ ५२
श्यामो ह्यस्तंगिरिश्चैव अम्बिकेयश्च केशरी ।
शाकस्तत्र महावृक्षः सिद्ध-गन्धर्व्वसेवितः ॥ ५३

तत्र पुण्या जनपदाश्चातुर्व्वर्ण्यसमन्विताः।
नद्यश्चात्र महापुण्याः सर्व्वपापभयापहाः॥ ५४
सुकुमारी कुमारी च नलिनी वेणुका तथा।
इक्षुश्च रेणुका चैव गभस्तिः सप्तमी तथा॥ ५५
अन्याः सहस्रशस्तत्र क्षुद्रनद्यो महामुने।
महीधरास्तथा सन्ति शतशोऽथ सहस्रशः॥ ५६
धर्म्महानिर्न तेष्वस्ति स्वर्गादागत्य मानवाः।
वर्षेषु तेषु पृथिवीं न सङ्घर्षः परस्परम्॥ ५७
शाकद्वीपे तु वै सूर्य्यः पूज्यते जनपदैः सदा।
यथोक्तैरिज्यते सम्यक् कर्म्मभिर्नियतात्मभिः॥ ५८
क्षीरोदेनावृतः सोऽपि द्विगुणेन समन्ततः।
क्षीराब्धिः सर्व्वतो व्याप्तः पुष्कराख्येण संवृतः॥ ५९
द्विगुणेन महावर्षस्तत्र ख्यातोऽथ मानसः।
योजनानां सहस्राणि पञ्च ऊर्ध्वं समुच्छ्रितः॥ ६०
तावतैव तु लक्षाणि सर्व्वतो वलयाकृतिः।
पुष्करद्वीपवलयो मध्यमेन बिभर्त्ति च॥ ६१
तेनैव वलयाकारद्वयवर्षसमाकृतिः।
दश वर्षसहस्राणि तत्र जीवन्ति मानवाः॥ ६२
निरामया वीतशोका रागद्वेषविवर्ज्जिताः।
अधमोत्तमतस्तेषां न व्यवस्था महामुने॥ ६३
सत्यानृतेन तस्यास्तां सदैव वसतिः सदा।
तुल्यवेषास्तु मनुजा हेमवर्णैकरूपिणः॥ ६४
वर्षद्वयन्तु कालेय भौमः स्वर्गोऽयमुत्तमः।
सर्व्वस्य सुखदः कालो जरा-रोगविवर्ज्जितः॥ ६५
पुष्करे धातकीखण्डे महावीते महामुने।
न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम्॥ ६६
तस्मिन् निवसते ब्रह्मा पूज्यमानः सुरासुरैः।
स्वादूदकेनाम्बुधिना पुष्करं परिवेष्टितम्॥ ६७
एवं द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः।
द्वीपश्चैव समुद्रश्च समानो द्विगुणैः परैः॥ ६८
न्यनातिरिक्तता तेषां समुद्रेषु समानि वै।
पयांसि सर्व्वदा सर्व्वं कदाचिन्नैव जायते॥ ६९
स्थालीस्थमग्निसंयोगादम्भोधौ मुनिसत्तम।
यथेन्दुवृद्धौ सलिलं वर्द्धते क्षीयते तथा॥ ७०
उदयास्तमने त्विन्दोर्वर्द्धन्त्यापो क्रसन्ति च।
अतो नानातिरेकांश्च पक्षयोः शुक्ल-कृष्णयोः॥ ७१
अपां वृद्धिः क्षयो दृष्टः शतशस्तद्दशोत्तरम्।
समुद्राणां मुनिश्रेष्ठ सर्व्वेषां कथितं तव॥ ७२
भोजनं पुष्करद्वीपे प्रजाः सर्व्वाः सदैव हि।
षड्रसं भुञ्जते विप्र तत्र स्वयमुपस्थितम्॥ ७३
स्वादूदकस्य परतो नान्यलोकस्य संस्थितिः।
द्विगुणा हिरण्मयी भूमिः सर्व्वजन्तुविवर्ज्जिता॥ ७४
लोकालोकस्ततः शैलः सहस्राख्यचलो हि सः।
उच्छ्रायेण च तावद्धि योजनायुतविस्तृतः॥ ७५
तमश्चाण्डकटाहेन सेयमुर्व्वी महामुने।
पञ्चाशत्कोटिविस्तारा सप्तद्वीपा महीधरा॥ ७६
आधारभूता सर्व्वेषां सर्व्वभूतगुणाधिका।
सेयं धात्री च कालेय सर्व्वेषां जगतामिला॥ ७७

इति श्रीशैवे महापुराणे धर्म्मसंहितायां भुवनकोष-
वर्णनं नाम चतुस्त्रिंशोऽध्यायः॥ ३४॥

पञ्चत्रिंशोऽध्यायः।

सनत्कुमार उवाच।

रवि-चन्द्रमसोर्यावन्मयूखा भासयन्ति हि।
तावत्प्रमाणा पृथिवी भूर्लोकः स तु गीयते॥ १
भूमेर्योजनलक्षे तु संस्थितं रविमण्डलम्।
योजनानां सहस्राणि दशैव परिसंख्यया॥ २
शशिनस्तु प्रमाणे यो जगतः परिचक्षते।
रवेरूर्द्ध्वं शशी तस्थौ लक्षयोजनसंख्यया॥ ३
ग्रहाणां मण्डलं कृत्स्नं शशिनोपरि संस्थितम्।
सनक्षत्रं सहस्राणि दशैव परितोपरि॥ ४
बुधस्तस्माद्दशो काव्यस्तस्मादुपरि मङ्गलः।
बृहस्पतिस्तदूर्द्ध्वं तु तस्योपरि शनैश्चरः॥ ५
सप्तर्षिमण्डलं तस्माल्लक्षमेकन्तु संस्थितम्।
ऋषिभ्यस्तु सहस्राणां शतादूर्द्ध्वं व्यवस्थितः॥ ६
मेधीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः।
भूर्भुवः स्वरिति ह्येयं भुवोर्द्धन्तु ध्रुवादवाक्॥ ७
एकयोजनकोटी तु यत्र ते कल्पवासिनः।
ध्रुवादूर्द्ध्वं महर्लोकः सप्तैते ब्रह्मणः स्मृताः॥ ८
सनकश्च सनन्दश्च तृतीयश्च सनातनः।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा॥ ९

गणोत्तरे चोर्द्धं जनलोकात् तपः स्मृतः ।
वैराजा यत्र वै देवाः स्थिता दाहविवर्ज्जिताः ॥ १०
गुणेन तपोलोकात् सत्यलोको व्यवस्थितः ।
ब्रह्मलोकः स विज्ञेयो वसन्त्यमलचेतसः ॥ ११
धर्म्मरताश्चैव ज्ञानिनो ब्रह्मचारिणः ।
गामिनोऽथ भूर्लोके निवसन्ति हि मानवाः ॥ १२
भुवर्लोके तु संसिद्धा मुनयो देवरूपिणः ।
स्वर्लोके तु सुरादित्या मरुतो वसवोऽश्विनौ ॥ १३
विश्वेदेवास्तथा रुद्राः साध्या नागाः सुरादयः ।
ग्रहगणास्तत्र ऋषयो वीतकल्मषाः ॥ १४
एते सप्त महालोकाः कालेय कथितास्तव ।
पातालानि च सप्तैव ब्रह्माण्डस्य च विस्तरः ॥ १५
द्विवच्चफलं यद्वत् तस्य चोर्द्धमधस्तथा ।
एतदण्डकटाहञ्च सर्व्वतो वै समावृतम् ॥ १६
सा दशगुणेन सर्व्वतस्तत् समावृतम् ।
वह्निना वायुना चैव नभसा तमसा तथा ॥ १७
भूतादिनापि महता दशोत्तरेण वेष्टितम् ।
महान्तञ्च समागत्य प्रधानपुरुषः स्थितः ॥ १८
अनन्तस्य न तस्यास्ति संख्यापि परमात्मनः ।
तेनानन्त इति ख्यातः प्रमाणं नापि वै यतः ॥ १९
हेतुभूतः समस्तस्य प्रकृतिः सा परा मुने ।
अण्डानान्तु सहस्राणां सहस्राण्ययुतानि च ॥ २०
ईदृशानि प्रभूतानि तस्मादव्यक्तजन्मनः ।
दारुण्यग्निर्यथा तैलं तिलेषु पयसि घृतम् ॥ २१
तथासौ परमात्मा वै सर्व्वं व्याप्यात्मवेदनः ।
आदिवीजात् प्रभवन्ति ततस्तेभ्योऽपरे द्रुमाः ॥ २२
तेभ्यः पुत्रास्तथान्येषां वीजान्यन्यानि वै यतः ।
महदादयो विशेषान्तास्तद्भवन्ति सुरादयः ॥ २३
वीजाद्वृक्षप्ररोहेण यथानापचयस्तरोः ।
सूर्य्यकान्तमणेः सूर्य्याद्यद्वद्वह्निः प्रजायते ॥ २४
तद्वत् सञ्जायते सृष्टिः शिवस्तत्र न कामयेत् ।
शिव-शक्तिसमायोगे देवाद्याः प्रभवन्ति हि ॥ २५
था कर्म्मस्वनेकेषु प्ररोहमुपयान्ति वै ।
ब्रह्मा विष्णुश्च रुद्रश्च स शिवः परिगीयते ॥ २६
स्मादुत्पद्यते सर्व्वं यस्मिंश्च लयमेष्यति ।
कर्त्ता क्रियाणां सर्व्वासां स शिवः परिगीयते ॥ २७

मुनय ऊचुः ।

षडक्षरं त्वया प्रोक्तं पुरा सर्व्वार्थसाधकम् ।
शिवस्य परमं मन्त्रं भुक्ति-मुक्तिकरं शिवम् ॥ २८
वयन्तु श्रोतुमिच्छामो मन्त्रान् परमसाधनान् ।
यैः पुरा मुनयः सिद्धाः शिवादमरतां गताः ॥ २९
सूत माण्डव्यादयः सर्व्वे तान् सर्व्वांस्त्वं वदस्व नः ।

सूत उवाच ।

प्रवक्ष्यामि मतं शम्भोर्यदुक्तं हि पुरा किल ॥ ३०
शङ्करेण विशाखस्य तच्छृणुध्वमतन्द्रिताः ।
प्रणवं प्रथमं गृह्य पश्चाद्देवं समुद्धरेत् ॥ ३१
त्रिवर्गस्य तृतीयन्तु पञ्चमस्वरसंयुतम् ।
मस्तके विन्दुसंयुक्तं पञ्चमं परिगृह्य च ॥ ३२
अष्टमस्य तृतीयन्तु सविसर्गं समुद्धरेत् ।
शिवस्य परमो ह्येष मन्त्रः सर्व्वार्थसाधकः ॥ ३३
परो मोक्षः परः शुद्धः परो धर्म्मः परो विभुः ।
ब्रह्महत्यादिपापानि अगम्यागमनानि च ॥ ३४
सुरापः स्वर्णहारी च भ्रूणहा गुरुतल्पगः ।
विश्वस्त-मित्रहा चैव गुरुघ्नः पितृघातकः ॥ ३५
मातृहा स्त्री-गुरुघ्नश्च अन्यान्युक्तानि सङ्घशः ।
स्मरणान्मन्त्रराजस्य भस्मसाद्यान्ति नित्यशः ॥ ३६
अत्यद्भुतानि पापानि शतशोऽथ सहस्रशः ।
शतजाप्यस्य मन्त्रस्य पुष्पं न्यस्य शिवस्य के ॥ ३७
कोटिमन्त्रार्च्चितं पुण्यं लभते साधकोत्तमः ।
त्रिसन्ध्यं यो जपेन्मन्त्रं शतमेकं प्रयत्नतः ॥ ३८
सम्पुटेनावरोहेण न मृत्योर्वशगो भवेत् ।
ललाटे वक्त्र-हृदये नाभौ गुह्ये तथैव च ॥ ३९
बाह्वोस्तु हस्तयोः पार्श्वे पृष्ठे जान्वोस्तु जङ्घयोः ।
गुल्फयोः पादयोश्चैव सृष्टिन्यासक्रमेण तु ॥ ४०
एवं विन्यस्य देहे तु इमं मन्त्रमनुस्मरेत् ।
मुच्यते सर्व्वपापेभ्यः कोटिजन्मशतैरपि ॥ ४१
वज्रोपलमहावर्ष-चौरव्याघ्रभयादिभिः ।
आधिभिः साध्वसैरन्यैर्ज्वर-कुष्ठभयादिभिः ॥ ४२
रोगैर्विमुच्यते सर्व्वैर्यैश्चो दुःखमिहागतम् ।
संग्रामे जयमाप्नोति सौभाग्यमतुलं भवेत् ॥ ४३
जपञ्च मानसं कुर्य्याद्दिवारात्रञ्च साधकः ।
सर्व्वावस्थागतो नित्यं जपन् सिद्धिमवाप्नुयात् ॥ ४४

त्रिकालं भार्य्यया युक्तो यन्त्रारूढ़स्तु साधकः ।
नोपवासं न मौनञ्च ब्रह्मचर्य्यं न चास्तिकम् ॥ ४५
सर्व्वकर्म्मप्रवृत्तस्तु सिध्यत्येव न संशयः ।
पुनरन्यत् प्रवक्ष्यामि ध्यानं सर्व्वार्थसाधनम् ॥ ४६
कुम्भमुद्रां परां बद्ध्वा सुखासनस्थितः पुमान् ।
आत्मदेहे सदा ध्यायेन्मन्त्रं मृत्युञ्जयं परम् ॥ ४७
वर्षमाणं सुधाराभिः सहस्रदलसंयुतम् ।
श्वेतपद्मं सुचन्द्रं वै पयस्तालुनि संस्थितम् ॥ ४८
एवं हि ध्यायतस्तस्य दिव्यं रूपं प्रजायते ।
अणिमादिगुणावाप्तिर्मानसी गतिरूपवान् ॥ ४९
सर्व्वज्ञः सर्व्वगो हृष्टो हरदर्शी परा श्रुतिः ।
वत्सरात् सर्व्वमाप्नोति एकचित्तः समाहितः ॥ ५०
तत्रास्याभ्यासयुक्तस्य खेचरत्वं प्रजायते ॥ ५१

सूत उवाच ।

समासादः समाख्यातं यदुक्तं शम्भुना पुरा ।
देव्याश्च कार्त्तिकेयेन नन्दिनोक्तमृषिस्तु यत् ॥ ५२
अगस्त्यप्रमुखा विप्रा मुनयो वीतकल्मषाः ।
बभूवुर्मन्त्रराजेन जरा-मरणवर्ज्जिताः ॥ ५३
एतदुक्तं कुमारेण व्यासस्यामिततेजसः ।
मया तुभ्यं समाख्यातं मन्त्रं मृत्युविनाशनम् ॥ ५४

इति श्रीशैवे महापुराणे धर्म्मसंहितायां मृत्युञ्जयोद्धरणं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः ।

सूत उवाच ।

एतद्वो मे समाख्यातं पुनर्वक्ष्याम्यतः परम् ।
हृदयं मन्त्रराजस्य ध्यानं जप्यं सदार्च्चनम् ॥ १
सद्यादिपञ्चवक्त्राणि नित्यं सन्निहितानि मे ।
यस्यैवमस्ति विज्ञानं सोऽहं नास्त्यत्र संशयः ॥ २
नास्य सङ्ख्या विसङ्ख्या वा पञ्च वक्त्राणि मे शुभे ।
मन्त्रराजं जपेद्यस्तु मुच्यते सर्व्वकिल्बिषैः ॥ ३
सिध्यन्ति सर्व्वकर्म्माणि अणिमादिगुणा अपि ।

देव्युवाच ।

श्रुतं ध्यानं मया देव मन्त्रञ्चामृत्युकारकम् ॥ ४
संयतैर्योगिभिः प्राप्यं न कदाचिद्दुरात्मभिः ।
काम-क्रोधादिभिर्दोषै रजसा व्याकुलं जगत् ॥ ५
द्वन्द्वदुःखशताविष्टमिन्द्रियार्थैः सुसंयुतम् ।
जगतीदृग्विधे देव संसारे दुःखसंज्ञिते ॥ ६
हितार्थं सर्व्वमर्त्यानां मोक्षोपायं वदस्व मे ।
इत्युक्तस्तामुवाचेदं शृणुष्वार्य्ये यथा तथम् ॥ ७
देहेऽस्मिन्नहमित्येकः पृथक् चिन्त्यः सदा बुधैः ।
एवं ज्ञात्वा चरँल्लोके मुच्यते भवबन्धनात् ॥ ८
ममेति परमं दुःखं न ममेति परं सुखम् ।
द्वाविमौ बन्ध-मोक्षाणां न ममेति ममेति च ॥ ९
यस्य नास्त्यात्मनो देहस्तस्य दारादिकं कथम् ।
गृहक्षेत्रादिकं तद्वदेवं बद्धो न मुच्यते ॥ १०
एष पाशुपतो योगः समासात् कथितो मया ।

देव्युवाच ।

यत् त्वयोक्तं न तत् प्राप्यं मानवैरजितेन्द्रियैः ॥ ११
ममाहमिति चाख्याति वचनं हि मनो जवः ।

महादेव उवाच ।

जेतुं रागादयः शक्या न तु जन्मान्तरैरपि ॥ १२
कृते युगेऽपि देवेशि अल्पायुर्मनुजो यतः ।
त्रेतायां द्वापरे चैव किमु प्राप्ते कलौ युगे ॥ १३

व्यास उवाच ।

भगवंस्तमुपायं मे वक्तुमर्हस्यशेषतः ।
अनायासेन येनेमं निस्तरन्ति भवार्णवम् ॥ १४
मानुषाः कलुषोपेताः श्रोतुमिच्छामि तत्त्वतः ।

सनत्कुमार उवाच ।

तस्यास्तद्वचनं श्रुत्वा कृपायुक्तो महेश्वरः ॥ १५
मर्त्यानां हितकामाय प्राहेदं पार्व्वतीं ततः ।

शङ्कर उवाच ।

यद्येवं मुक्तिकामासि मानवानां हिताय वै ॥ १६
तच्छृणुष्व क्रियायोगं क्लेशानां हानिकारकम् ।
स योगः प्राप्यते सद्भिश्चित्तस्यैवात्मना तु यः ॥ १७
यस्तु वाह्यार्थसंयोगः क्रियायोगः स उच्यते ।
एवं ज्ञात्वा तु प्रथमं क्रियायोगं सुसंमतम् ॥ १८
क्रियायोगं विना गन्तुं शक्तो नैव कथञ्चन ।
ततो द्विजैश्च राजन्यैर्वैश्यैः शूद्रैस्तथा प्रिये ॥ १९
शूद्रैश्च कर्म्मनिरतैः क्रियायोगाश्रितं मनः ।

कार्य्यं लिङ्गार्च्चने नित्यं मदनुष्ठानतत्परैः ॥ २०
मल्लिङ्गार्च्चनभक्तानां न किञ्चिद्भुवि दुर्लभम्।
तन्निष्ठास्तद्गतधियस्तत्कर्म्माणस्तदाश्रिताः ॥ २१
जपपूजापराश्चैव तस्यैव यजने रताः।
व्रतोपवासनिरता हिंसादिपरिवर्ज्जिताः ॥ २२
मद्गतुल्या भविष्यन्ति मम लोके नरोत्तमाः।
यो मां पश्यति सर्व्वत्र समवस्थितमीश्वरम् ॥ २३
सत्तावान् सर्व्वभूतेषु स रुद्रो नात्र संशयः।
जङ्गमाजङ्गमे यो मां वेत्त्यात्मनि परे तथा ॥ २४
समता सर्व्वभूतेषु स रुद्रो नात्र संशयः।
शास्त्रोक्तलक्षणं लिङ्गं कारयित्वा तु स्थापयेत् ॥ २५
सुवर्णरजताद्यैस्तु सत्कृतं वा सुधातुभिः।
सुपाषाणैः सुरत्नैश्च स्फाटिकं वापि शक्तितः ॥ २६
विविधैः पूजोपहारैश्च भक्त्या तन्नित्यमर्च्चयेत्।
स एवं पूजितो नित्यं ध्यातश्चैव महेश्वरि ॥ २७
भुञ्जन् गच्छंस्तथा तिष्ठन् पार्श्वे पृष्ठे तथाग्रतः।
ऊपर्य्यधस्तथा ध्यातः स तु मुक्तिकरो भवेत् ॥ २८
जलैः शुभैर्घृताद्यैस्तु स्नानैर्गन्धानुलेपनैः।
चन्दनागरुकर्पूरैर्गीतवाद्यैर्मनोरमैः ॥ २९
वासोभिर्भूषणैश्चैव भक्त्या च प्रणतः सदा।
प्रीणयन् सततं लिङ्गमर्च्चयेत्मत्परायणः ॥ ३०
मत्कथायां सदा चित्तं सन्ध्यायेत् परमेश्वरम्।
श्रोतव्या भैरवाद्यास्तु कथाः पौराणसम्भवाः ॥ ३१
एवं समर्पितमनाः पुरुषो मत्परायणः।
चित्तस्थानखिलान् भोगान् प्राप्नोत्यखिलनायकः॥३२
कामानुसक्तपुरुषो मत्क्रियापरमः परम्।
पदमाप्नोति ज्ञात्वैवं मत्क्रियापरमा भव ॥ ३३
शिवं चित्तगतं यस्य शिवं बुद्धिगतञ्च यत्।
तथाहङ्कारगो रुद्रो यो रुद्रो देहसंस्थितः ॥ ३४
करोति कर्त्तृभूतोऽसौ चरस्य स्थावरस्य च।
एवं ज्ञात्वा नरो देवि मुच्यते भवबन्धनात् ॥ ३५
मय्येव स न्यसेत् सर्व्वमात्मनः कर्म्म केवलम्।
तदनन्तफलं ज्ञेयं स चात्मानं समुद्धरेत् ॥ ३६
एतेनैवोपदेशेन तवाख्यातं मयाधुना।
मनुष्याणां हितार्थाय संसारभयभीरुणा ॥ ३७
ज्ञानयोगस्तु संयोगश्चित्तस्यैवात्मना तु यः।
क्रियायोगस्तु वाह्यार्थो द्वयोर्मुक्तिरुदाहृता ॥ ३८
क्रीयायोगं विना योगं दुःसाध्यममरैरपि।
क्रियायोगाद्धि देवत्वं ततो मुक्तिमवाप्नुयात् ॥ ३९
यथाग्निस्तृणजातानि दहत्यनिलसङ्गतः।
तथा लिङ्गार्च्चने भावो दहेत् पापान्यशेषतः ॥ ४०
मुखैवोक्तं भवेत् पापं मुखैवोक्तं भवेत् चयम्।
मुखैव नष्टं तज्जन्म यत्र नाराधितो हरः ॥ ४१
न वस्त्र-भूषणै रत्नैर्न सुवर्णस्य राशिभिः।
तुष्टिं याति महेशानो विना भक्तिं महेश्वरि ॥ ४२
कर्म्मभूमौ हि मानुष्यमाप्यते बहुभिर्युगैः।
तत् प्राप्य नार्च्चयेल्लिङ्गं तस्य जन्म निरर्थकम् ॥ ४३

सनत्कुमार उवाच।

इत्येतत् कथितं देव्याः शङ्करेण पुरा मया।
तव संक्षेपतो ह्युक्तं किं भूयः श्रोतुमिच्छसि ॥ ४४

व्यास उवाच।

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा चरितव्रताः।
यैर्मन्त्रैरर्च्चयन्ति स्म क्रमात्मे ब्रूहि तान् मुने ॥ ४५

सनत्कुमार उवाच।

आम्नायैर्विहितैर्मन्त्रैस्तैर्यजन्ति द्विजोत्तमाः।
तद्वते तु पुराणोक्तैरर्च्चयेत् समुपादितैः ॥ ४६
तान् प्रवक्ष्यामि यत्नेन शृणुष्व गदतो मम।
तद्दीक्षयाभियुक्तस्त्वं भूतपूर्व्वो महामुने ॥ ४७
शिवमूर्त्तिभिस्तत् सर्व्वं जगदेतच्चराचरम्।
व्याप्तं हि वर्त्तते चेदं तच्छृणुष्व यथातथम् ॥ ४८
पृथिव्यापस्तथा तेजो वायुराकाश एव च।
सर्व्वगः शशि-सूर्य्यौ च शिवप्रकृतयः पराः ॥ ४९
सर्व्वे मन्त्रात्मका देवा मन्त्रा बिन्दुसमाश्रिताः।
बिन्दुर्नादस्थितो नित्यं नादश्च परमात्मनि ॥ ५०
मन्त्रैस्तैः पूज्यते देवः शिवः सर्व्वमयो महान्।
यकारस्याष्टमं वीजं मात्राद्वादशभेदितम् ॥ ५१
अक्षरं निरतं कृत्वा षडङ्गं शिवमुच्यते।
दीर्घाद्यङ्गाः समाख्याता हृत्तस्था वक्त्राणि शूलिनः॥५२
शिवस्य परमा ह्येषा पूजा प्रोक्ता मनीषिभिः।
एवं सम्पूजितं लिङ्गं सर्व्वकामफलप्रदम् ॥ ५३
इह लोके परे चैव मुने सत्यमुमापतेः।
मन्त्रोऽयं सर्व्वगो नित्यं सर्व्वं व्याप्य व्यवस्थितः॥५४

ज्ञातव्यः सुप्रयत्नेन ध्येयः पूज्यश्च सर्व्वदा।
प्रसादो मे कृतो देवि मन्त्राख्यानान्महेश्वरि॥ ५५
प्रासादं येन विख्यातं यास्यतीह महीतले।
यो न वै वेत्ति संयुक्तं पञ्चमन्त्रं महातनुम्॥ ५६
सुकलाभिः समायुक्तं न स माहेश्वरो भवेत्।
पञ्च वक्त्राणि देवस्य नित्यं सन्निहितानि च॥ ५७
तानि वक्ष्यामि यैर्मन्त्रैरर्च्यन्ते चेह शूलिनः।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः॥ ५८
द्विपादौ तु समाख्यातौ तृतीयं शृणुतानघाः।
भवे भवे तानि भवे भजस्व मां भवोद्भवः॥ ५९
प्रणवादिसमायुक्तं नमस्कारेण संयुतम्।
वामो ज्येष्ठश्च रुद्रश्च कालरुद्रस्तृतीयकः॥ ६०
कालः कलविकर्णश्च बलप्रमथनस्तथा।
सर्व्वभूतदमो वापि मनोन्मनस्तथैव च॥ ६१
नमस्कारेण संयुक्तं द्वितीयं परिकीर्त्तितम्।
अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च सर्व्वतः॥६२
सर्व्वेभ्यः सर्व्वशर्व्वेभ्यो नमस्ते रुद्ररूपेभ्यः।
चतुष्पादं समाख्यातं नमस्कारेण संयुतम्॥ ६३
सर्व्वेषाञ्चैव मन्त्राणां मन्त्रराजं प्रकीर्त्तितम्।
अस्यैवाभ्यासयोगेन नास्ति तद्यन्न साधयेत्॥ ६४
देवत्वं मानुषत्वञ्च गन्धर्व्वत्वञ्च राक्षसम्।
असाध्यं साधयेन्मन्त्री मन्त्रराजप्रभावतः॥ ६५
त्रैलोक्ये याः स्त्रियः काश्चिदाकृष्टाः शतशोऽपराः।
अणिमादीन् प्रयच्छन्ति नात्र कार्य्या विचारणा॥६६
देवान् दैत्यांस्तथा सिद्धान् सयक्षोरगराक्षसान्।
भूत-वैताल-पैशाचान् सर्व्वांश्च वशमानयेत्॥ ६७
मृत्युबन्धार्त्तिभयदं दुःखं ग्रहसमुद्भवम्।
स्मरणान्मन्त्रराजस्य भस्मसाद्याति नित्यशः॥ ६८
ऐकाहिकं द्व्याहिकञ्च तथा त्रिदिवसं ज्वरम्।
चातुर्थिकं तथा घोरं नाशयत्याशु दर्शनात्॥ ६९
स्थावरं जङ्गमञ्चैव कृत्रिमञ्चापि यद्विषम्।
दन्तोद्भवं नखोद्भूतं हन्ति मन्त्रप्रभावतः॥ ७०
सुमन्त्री शतजप्येन शतजन्मसमुद्भवम्।
पापं हन्ति न सन्देहः स्वर्गं मोक्षञ्च विन्दति॥ ७१

इति श्रीशैवे धर्म्मसंहितायां मन्त्रराजप्रभावो नाम षट्त्रिंशोऽध्यायः॥ ३६॥

सप्तत्रिंशोऽध्यायः।

मुनय ऊचुः।

एवं प्रभावस्य हि मन्त्रराज्ञो
विधानमुक्तं मुनिना पुरा ते।
तद्ब्रूहि नः सर्व्वमशेषतोऽन्य-
द्धिताय कालेय ततो नराणाम्॥ १

व्यास उवाच।

शृणुध्वमेतन्मुनयः समेताः
सनत्कुमारेण विधानमुक्तम्।
समासतो देवमतो विधानं
सुमन्त्रराजस्य हि साधनाय॥ २
देशे सुगुप्ते सुमनोरमे तु
स्नात्वा शुचिश्चैकमनापि भूत्वा।
संस्मृत्य मन्त्रं मनसा तदङ्गे-
न्यासं कराभ्यां करयोश्च कुर्य्यात्॥ ३
हकारयुक्तेन तु वह्निनाथ
पश्चात् षडङ्गं गुरुणा स्वरेण॥ ४
चतुर्भिर्हृदयं प्रोक्तं चतुर्भिस्तु शिरो भवेत्।
अष्टभिस्तु शिखा ज्ञेया अष्टभिः कवचं न्यसेत्॥ ५
अष्टभिर्नेत्रमुद्दिष्टं फड्ढस्ते संनियोजयेत्।
एवं विन्यस्य देहे तु मन्त्ररूपमनुस्मरेत्॥ ६
माहेश्वरं वपुः कृत्वा जटा-मुकुटभूषणम्।
वामदेवाय ज्येष्ठाय नमो रुद्राय च नमः॥ ७
कलविकरणाय नमो बलप्रमथनाय नमः।
सर्व्वभूतदमनाय नमो मनोन्मनाय नमः॥ ८
सर्व्वाभरणपूर्णाङ्गं चन्द्रार्द्धकृतशेखरम्।
स्वशरीरं ततः पूज्य पुष्प-धूप-विलेपनैः॥ ९
स्थण्डिले वापि लिङ्गे वा पश्चाद्यजनमारभेत्।

ओं ह्रां हृदयाय नमः, हृदयमाग्नेय्यां न्यसेत्॥ १० ओं ह्रीं अघोरेभ्यः शिरसि स्वाहा, शिर ईशान्यां न्यसेत्। ओं ह्रूं घोरघोरतरेभ्यः शिखायै वषट्, शिखां नैरृत्ये विन्यसेत्॥ ११ ओं ह्रैं सर्व्वतः सर्व्वेभ्यः कवचाय नमः, कवचं वायव्ये विन्यसेत्। ओं ह्रौं नमस्ते रुद्ररूपेभ्यो नेत्राभ्यां वषट्, नेत्रमुपरि विन्यसेत्॥ १२

...ौं इः अस्त्राय फट्, अस्त्रं चतुर्दिक्षु विन्यसेत् ॥
एवं न्यस्य विधानेन हकारं वह्निसंयुतम् ॥ १३
...नाद बिन्दु-कलाक्रान्तमघोरं हृदये यजेत् ।
...घोरेश्वरीं देवीं तस्योत्सङ्गे तु पूजयेत् ॥ १४
...शं प्रमिकरञ्चैव अङ्कुशं कर्त्तरी-ध्वजौ ।
...विसर्गां परा देवी अघोरा परिकीर्त्तिता ॥ १५
...ादिवीजं समुद्दिश्य द्वितीयस्य चतुर्थकम् ।
...योदशेन चाक्रान्तं वह्निमेकादशान्वितम् ॥ १६
...ष्टमस्यादिमं रूपं समस्तस्य चतुर्थकम् ।
...कारं त्रिस्वराक्रान्तं हूं फट्कारेण संयुतम् ॥ १७
...एषा विद्या महाविद्या नाम्नाघोरेश्वरीति च ।
...कारे पूजिता देवी सद्यः प्रत्ययकारिका ॥ १८
एवं सम्पूजयेद्देवमघोरं घोरनाशनम् ।
मनसा पूजयेद्यस्तु एकचित्तः समाहितः ॥ १९
सर्व्वान् कामानवाप्नोति इह लोके परत्र च ॥ २०
कपालमालाभरणं चतुर्भुजं
वक्रोदरं शूलधराभयप्रदम् ।
त्रिलोचनं खड्गशशाङ्कधारिणं
ध्यायेद्धरं यः स लभेत ईप्सितम् ॥ २१
सर्व्वावस्थागतो नित्यं यः पूजयति शङ्करम् ।
...अपवित्रः पवित्रो वा स्वच्छन्दस्तेन कीर्त्तितः ॥ २२
...बिल्वपुष्पैस्तु यो लक्षं जप्त्वा होमन्तु कारयेत् ।
...एकलिङ्गे शुचौ देशे तस्य प्रत्यक्षतामियात् ॥ २३
...यदात्यभिमतां सिद्धिमणिमादिगुणात्मिकाम् ।
...कमलैर्यो यजेल्लक्षं पश्चाद्धोमं समारभेत् ॥ २४
...ततः प्रसन्नतां गत्वा देहेनान्येन शङ्करः ।
...नयत्यभीप्सितांल्लोकान् जरा-मृत्युविवर्ज्जितान् ॥ २५
...गोपवगुग्गुलस्यापि गुटिकाभिः समाचरेत् ।
...जपं होमं विधानेन पाताले सिद्धिमाप्नुयात् ॥ २६
...शतं यो जपेन्मन्त्रमघोरं क्लेशनाशनम् ।
...तस्य सर्व्वाः प्रसिध्यन्ति सिद्धयो मनसेप्सिताः ॥ २७
...तिलहोमेन नश्यन्ति ग्रहपीड़ाद्युपद्रवाः ।
...घृतप्रक्रियया च आयुर्वृद्धिर्भवेदिह ॥ २८
...क्षीरहवसमिद्भिस्तु समृद्धिरुपगच्छति ।
...अघोरेश्वरीं देवीं यो जपेदर्च्चयेन्नरः ॥ २९
...अघोरं हि यथादेवं द्विगुणं तस्य तत् फलम् ।

यं यं काममभिध्यायेत्त्रिषु लोकेषु दुर्लभम् ॥ ३०
तं तं प्राप्नोत्यसन्दिग्धं देव्याश्चैव प्रभावतः ।
जपहोमार्च्चनेनैव देव्याः कर्म्मणि साधने ॥ ३१
बद्ध्वाघोरेश्वरीं मुद्रां दर्शयेद्देवतुष्टये ।
तां प्रवक्ष्यामि वः सम्यक् सर्व्वसिद्धिकरां शुभाम् ॥ ३२
सम्मुखौ तु करौ कृत्वा स्वान्योन्यं ग्रथयेऽङ्गुलीः ।
उभयोस्तर्ज्जनीभ्यान्तु संगृह्णीयादनामिके ॥ ३३
संस्पृश्य मध्यमे चोर्द्ध्वमङ्गुष्ठौ श्लेषयेत् तयोः ।
कृत्वा ह्यधोमुखां मुद्रां ललाटे सन्निवेशयेत् ॥ ३४
बन्धौ कृत्वा ततो नेत्रे जिह्वाश्चैव हि चालयेत् ।
संस्मरेत् परमं मन्त्रं सर्व्वसिद्धिप्रवर्त्तकम् ॥ ३५
ततः सिध्यन्ति भूतानि सदेवासुरमानुषाः ।
ग्रह-वेताल-डाकिन्यो दुष्टाश्चान्ये सहस्रशः ॥ ३६
प्रलयं यान्ति ते सर्व्वे मैत्रीमायान्ति मानवाः ।
स्वच्छन्दस्य मयाख्यातं पूजनं दिशि संस्थितम् ॥ ३७
लिङ्गे वा स्थण्डिले वापि सर्व्वकामफलप्रदम् ।
इह लोके परे स्वर्गं राज्यञ्चैव लभेन्नरः ॥ ३८
यथैव पूज्यते शम्भुर्मन्त्रैः पञ्चभिरेव च ।
मुनयस्तत् प्रवक्ष्यामि स्वर्गमोक्षकरं परम् ॥ ३९
तत् पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥ ४०
चतुर्थन्तु महावक्त्रं गायत्र्यैतन्निगद्यते ।
पञ्चमन्तु तथा वक्त्रं शृणुध्वमेकचिन्तया ॥ ४१
ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानाम् ।
प्रजापतिर्ब्रह्मा स्वयम्भुवे ब्रह्मणे नमः ॥ ४२
सद्यादिभिर्यजन्तीह ये शिवं सर्व्वकारणम् ।
ते मोक्षमाप्नुवन्तीह मुनयो मोक्षकाङ्क्षिणः ॥ ४३
ईशानादिक्रमेणैव ईशानमर्च्चयन्ति ये ।
ते स्वर्गस्य हि भोक्तारो मर्त्त्यलोकसुखस्य च ॥ ४४
पूर्व्ववक्त्रं मया ख्यातमूर्द्ध्ववक्त्रं हि तापसाः ।
तस्मात् सम्पूजयेन्नित्यमनेनैव यतात्मवान् ॥ ४५
लिङ्गे वा स्थण्डिले शम्भुं सर्व्वकामफलाप्तये ॥ ४६

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
पञ्चब्रह्माख्यानं नाम सप्त-
त्रिंशोऽध्यायः ॥ ३७ ॥

अष्टत्रिंशोऽध्यायः।

व्यास उवाच।

भुक्तिमुक्तिकरो देवः शङ्करः परिकीर्त्तितः।
विना मन्त्रार्च्चितः शम्भुः किं पुनर्मन्त्रसंयुतः॥ १
ज्ञानं मया मुनिश्रेष्ठ किमेतत् सकलं जगत्।
ज्ञानवान् मोहितो देवाल्लोको मां समुपाश्रितः॥ २
जानन्तोऽपि न जानन्ति विष्णुमायाविमोहिताः।
लोकः सुप्तो विबुद्धस्तु कथं निद्रामुपेयिवान्॥ ३
आद्येन स्वस्य जानाति मृत्युसेना पतिष्यति (क)।
कस्मान्न यतते धर्म्मे मोक्षं प्रति महामुने॥ ४
एतत् सर्व्वं समाख्याहि मानुषाणां हितार्थतः॥ ५

सनत्कुमार उवाच।

पञ्चभूतात्मकं सर्व्वं जगत् स्थावर-जङ्गमम्।
स्वकर्म्मवशगाः सर्व्वे प्राणिनः सम्भवन्त्यतः॥ ६
आहार-निद्रा-भय-मैथुनञ्च
सामान्यमेतत् स्वपदाचराणाम् (ख)।
ज्ञानेन हीनाः पशुभिश्च तुल्याः
स्वकर्म्मवद्धाः प्रभवन्ति नित्यम्॥ ७
न यत्नकृतेनापि यथा तथापि
भावस्तदा ज्ञानवतां नराणाम्।
प्रयान्ति सम्यग्विधिना स्वकर्म्म-
चतुर्व्विधा भूतगणा नृलोके॥ ८
भवन्ति यान्तीह पुनर्विनाशं
प्रबुध्यमाना न हि चोद्विजन्ते।
सुसञ्चरन्तो वहुदुःखखिन्नाः
कृत्वेह पापं निरये प्रयान्ति॥ ९
ते स्थावरत्वं निरयावतीर्णा-
स्तिर्य्यक्त्वमिच्छन्ति पुनः समस्तम्।
पश्चात् तथा मानुषतां कुयोनिं
स्तवं न कुर्व्वन्ति यदा स्वधर्म्मैः॥ १०
शिवे गुरौ वापि हि मुक्तिहेतोः
स्वकर्म्मवद्धास्तु भवे निमग्नाः।
यथा जले बुद्बुदवत् क्षणाद्धि॥ ११

(क) मृत्युः समागमीष्यतीति पाठान्तरम्।
(ख) सकलं नराणामिति क्वचित् पाठः।

देव्युवाच।

पञ्चब्रह्मविधानन्तु मानुषाणां हितार्थतः।
पुनः पृच्छामि देवेश कथयस्व प्रसादतः॥ १२

ईश्वर उवाच।

कथयामि शृणुष्वेदं सर्व्वसिद्धिप्रदायकम्।
ईशानस्य सुभक्तानामिहामुत्र फलप्रदम्॥ १३
कपिलापञ्चगव्येन स्नात्वा जप्त्वाष्टकं नरः।
जुहुयादष्टसाहस्रं तिलैर्मुच्येत पातकैः॥ १४
तथोदकेन सम्पूर्य्य कुम्भं जप्त्वा शतं शतम्।
दिने दिने तु संस्नायात् स लब्ध्वा पुत्रवान् भवेत्॥ १५
देवस्य दक्षिणामूर्त्तेर्जपेदास्तमनाद्रवेः।
अष्टाविंव सहस्रन्तु हुत्वा सर्व्वोपपातकैः॥ १६
गुग्गुलस्य गुटीः कृत्वा पञ्चामृतेन मिश्रिताः।
हुत्वाग्नौ वश्यतां यान्ति यक्ष-राक्षस-मानुषाः॥ १७
संग्रामे जयमाप्नोति न क्लेशैरभिभूयते।
उपसर्गे त्रिरात्रन्तु देवस्य दक्षिणे स्थितः॥ १८
जप्त्वा चाष्टसहस्रन्तु जुहुयात् समिधस्ततः।
दधि-मधु-घृताक्तास्तु हुत्वा शान्तिर्भवेदिह॥ १९
कपिलायाः सवत्साया दध्याज्यमधुसंयुतम्।
सहस्रमोदनं हुत्वा सुपुत्रानीप्सितान् लभेत्॥ २०
गुग्गुलं घृतसंमिश्रं हुत्वा चाष्टसहस्रकम्।
सर्व्वे वश्या भवन्तीह हुत्वा शतसहस्रकम्॥ २१
पद्मादीनि निधानानि प्राप्नोति मुच्यते तथा।
हत्यया ब्राह्मणस्येह शिवसायुज्यतामियात्॥ २२
भिक्षाहारोऽभिमन्त्र्यापो यः शिवाय प्रदापयेत्।
विल्वं वा विल्वपत्रं वा सोऽश्वमेधफलं लभेत्॥ २३
पञ्चगव्याग्निष्टोमस्य तीर्थाद्भिः सर्व्वजातिकम्।
सकुशैः सर्व्वगन्धैश्च सर्व्वाभयफलं लभेत्॥ २४
सुधनी शतहोमेन सतिलेन घृतेन हि।
व्रीहिभिस्तु कुले तस्य न दरिद्रोऽभिजायते॥ २५
जप्त्वा चाष्टशतं विद्वान् व्रजेत् क्षेमी सदा पथि।
दुर्गे भयाकुले नद्यां न भयं विद्यते क्वचित्॥ २६
आदित्याभिमुखो भूत्वा जर्द्ध्वबाहुः शिवार्च्चकः।
ब्रह्महत्यादिपापानि नश्यत्येव न संशयः॥ २७
सलिलस्थः सप्त दिनान्यभक्षणाद्विशुध्यति।
सुरापानाच्छ्रकृन्मूत्रात् स्तेयात् खगुरुदारगात्॥ २८

मुच्यते पातकात् सद्यो निराहारो जितेन्द्रियः।
राज्ञां प्रतिग्रहीत्वा तु शूद्रान्नं बहुधा ह्यदन् ॥ २९
त्रिसन्ध्यञ्च जपेन्नित्यं मासेनैकेन शुध्यति।
गज-सिंह-वराहेषु शत्रु-राजकुलेषु वा ॥ ३०
न भयं विद्यते तस्य मनसा यो जपेदथ।
मनसा यो जपेन्मन्त्रं ईशानं ध्यानमाश्रितः ॥ ३१
देहेनानेन संसिद्धः प्रयाति परमं पदम्।
कृत्वा सुदुष्कृतं देवि मन्त्रेणानेन मां स्मरेत् ॥ ३२
विमुक्तः पातकैः सर्व्वैर्मम लोके महीयते ॥ ३३

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
पञ्चब्रह्ममाहात्म्यकथनं नाम
अष्टत्रिंशोऽध्यायः ॥३८॥

एकोनचत्वारिंशोऽध्यायः।

शङ्कर उवाच।

तत्पुरुषस्य वक्ष्यामि फलं तच्छृणु सुव्रते।
विल्वोदुम्बरयोर्हुत्वा समिच्छतसहस्रकम् ॥ १
ब्रह्महत्याविनिर्म्मुक्तो मन्त्रेणानेन सुव्रते।
गृहीत्वा दक्षिणे कर्णे अजां रात्रौ सुनिर्भयः ॥ २
लिङ्गस्य दक्षिणामूर्त्तिर्मासमेकन्तु यक्षिणी।
समागत्य सुरूपाढ्या सर्व्वान् कामान् प्रयच्छति ॥३
करवीरस्य पुष्पाणि घृतयुक्तानि जुह्वतः।
नाम्ना स्त्रीवशमायाति सप्तरात्रात् तदग्रतः ॥ ४
कर्णिकारस्य पुष्पाणां देव-गन्धर्व्वयोषितः।
समागम्य ददन्तीष्टं मनसो वत्सरार्द्धतः ॥ ५
प्रतिदिनं जपेद्यस्तु लिङ्गमाश्रित्य यत्नतः।
देहेनानेन मेधावी देवि मां प्रतिपद्यते ॥ ६
आदित्याभिमुखो भूत्वा जपन् पापैः प्रमुच्यते।
सलवणांस्तिलान् हुत्वा वशमानयते रिपून् ॥ ७
सघृतेन यशःकामी सदूर्व्वयायुरेव च।
मार्ज्जनेनामयान् हन्ति सर्षपै रक्षणं सदा ॥ ८
चन्द्रसूर्य्योपरागे तु जपेदष्टसहस्रकम्।
लिङ्गस्य दक्षिणामूर्त्तेः स कामानीप्सितांल्लभेत् ॥ ९
सततं जपते यो वै वर्षं वर्षार्द्धमेव च।
क्षिप्रसिद्धिं ददत्याशु स्वयमागत्य कन्यका ॥ १०
देवस्य दक्षिणामूर्त्तेर्जपेद्वा सततं सुधीः।
वत्सरादहमेवास्मै सिद्धिं यच्छामि वर्णिनि ॥ ११
पञ्चगव्यकृताहारो जपन् स्वमनुगच्छति।
मिताशी यो जपेन्नित्यं मोक्षं याति न संशयः ॥ १२
पर्व्वस्वेव जपेद्यस्तु सर्व्वक्रतुफलं लभेत्।
सर्व्वं सत्त्वा वशमीयुः श्मशाने जपतः शुभे ॥ १३
शान्तिकामो लभेद्धुत्वा शान्तिन्तु सितसर्षपान्।
रक्तपुष्पैर्वशे कार्य्ये कृष्णपुष्पैस्तु मारणे ॥ १४
विद्वेषे पीतपुष्पाणि धूम्राण्युच्चाटने तथा।
एतदेव जपेत् सर्व्वं मन्त्रं सर्व्वार्थसाधकम् ॥ १५
सर्व्वपापविनिर्म्मुक्तः शिवं याति न संशयः ॥ १६

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
तत्पुरुषविधानमन्त्रकथनं नामैकोन-
चत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः।

शङ्कर उवाच।

न तिथिर्न च नक्षत्रं नोपवासो विधीयते।
अघोरस्मरणाद्देवि सर्व्वपापक्षयो भवेत् ॥ १
स्नात्वादौ पञ्चगव्येन शिवमभ्यर्च्य मन्त्रतः।
जपेदयुतमेकन्तु सहस्रं जुहुयाद्घृतम् ॥ २
पुरश्चरणमेतत्तु त्रैलोक्यं वशमानयेत्।
मण्डूकस्य वसां गृह्य चतुर्द्दश्यामथाष्टमीम् ॥ ३
देवस्य दक्षिणे स्थित्वा जप्त्वा चाष्टसहस्रकम्।
वर्त्तिकां पद्मसूत्रस्य कपालकृतकज्जलम् ॥ ४
तेनैवाञ्जितनेत्रस्तु अदृश्यो जायते नरः।
कुसुम्भतैलमथवा पूर्व्वेण विधिना कृतम् ॥ ५
वर्त्तिं कृत्वार्कसूत्रस्य कज्जलं गृह्य यत्नतः।
तेनैवाञ्जितनेत्रस्तु अदृश्यो भवति क्षणात् ॥ ६
ब्रह्मेन्द्रविष्णुलोकांस्तु देहेनानेन गच्छति।
सर्व्वज्ञः सर्व्वदर्शी च दिव्यरूपस्तु जायते ॥ ७
श्रोताञ्जनं समादाय ब्रह्मपात्रे सुसप्तभिः।
पिधाय हवनं कुर्य्यात् कृष्णाया वा सितैस्तिलैः ॥ ८
अयुतं जितनेत्रस्तु सोऽदृश्यः प्रचरेन्महीम्।
तथा गोरोचनां गृह्य सहस्रेणाभिमन्त्रितम् ॥ ९

शिवस्यैव हि निर्माल्यं सहस्रेणाभिमन्त्रितम्।
धूपनं तेन रक्षांसि भूत-वेताल-सुग्रहाः ॥ १०
विनायकास्तु डाकिन्यो ज्वरापस्मारसम्भवाः।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ ११
श्मशानमध्यमास्थाय शवं गृह्य रुजा हतम्।
सुसंस्नाप्य गन्धतोयैः स्थापयेन्मण्डले बुधः ॥ १२
गन्धपुष्पैरलङ्कृत्य च्छादयेच्छुक्लवाससा।
शवे हस्तं समाधाय कृष्णां चतुर्द्दशीमनु ॥ १३
कपिलानवनीतेन स्रुचिर्दष्टशतं सुधीः।
एवं तज्जपतो वेगात् समुत्तिष्ठति निर्भयः ॥ १४
ब्रवीति किं ददामीति सिद्धोऽस्मीत्यहमेव ते।
इत्युक्तश्चेप्सितान् कामान् ब्रवीति तत्र साधकः ॥ १५
स दत्त्वा पतते भूमौ निश्चेष्टो जायते क्षणात्।
तालकं करवीरस्य रसेन परिमर्द्दयेत् ॥ १६
कुर्य्यात् कृष्णचतुर्द्दश्यां जपन्नष्टसहस्रकम्।
लिङ्गस्य दक्षिणे स्थित्वा तेनैवाङ्गं समालभेत् ॥ १७
अदृश्यो जायते सद्यो यथेष्टं गच्छतीति ह।
देवस्य दक्षिणामूर्त्तौ स्थित्वा लक्षं जपेद्यदि ॥ १८
दशांशेन तथा होमं बिल्वैः प्रकुरुते तु यः।
त्रिविधा जायते सिद्धिर्विषदृश्या भवन्ति हि ॥ १९
ज्वरादीनामयान् सर्व्वानपि कीटपतङ्गकान्।
सततं हि जपेद्यस्तु तन्नास्ति यन्न साधयेत् ॥ २०
पातालस्वर्गपुटकान् देहेनानेन गच्छति।
ब्रह्मचर्य्येण वै मासं पञ्चगव्यकृताशनः ॥ २१
जप्त्वा तु सर्व्वपापैस्तु मुच्यते ब्रह्महत्यया।
एकलिङ्गं समाश्रित्य जपेन्मूलफलाशनः ॥ २२
भिक्षाहारोऽपि षण्मासात् प्रत्यक्षं मां स पश्यति।
यानि कानि च पापानि घोराणि विविधानि च ॥ २३
शतजाप्येन देवेशि भस्मसाद्यान्ति निश्चयः।

इत्यघोरकल्पः ॥

शृणु त्वं वामदेवस्य कथयिष्यामि सुव्रते ॥ २४
लिङ्गस्य दक्षिणामूर्त्तेर्जपेदष्टसहस्रकम्।
पञ्चगव्येन च स्नात्वा जुहुयादयुतं पुनः ॥ २५
श्वेतपुष्पैः सुरक्तैर्वा पीतैश्चैव हि शोभनैः।
पुरश्चरणकं कृत्वा ततः सिध्यति नान्यथा ॥ २६
त्रिरात्रं समुपोष्याथ भास्मस्यास्थि समन्त्रयेत्।
बाहौ बद्ध्वा लक्षयुतं कुरुते भूत-राक्षसान् ॥ २७
मानुषादीन् सुक्रव्यादान् वशितं नात्र संशयः।
कपिलागोमयेनैव कृत्वा पुत्तलिकां ध्रुवम् ॥ २८
मन्त्रेणानेन संस्थाप्य घृतस्यैवाङ्गतोङ्गनेत्।
नाम्नामष्टौ सहस्राणि यक्षिणी राक्षसी तथा ॥ २९
श्रियं वाप्यानयत्याशु नात्र कार्य्या विचारणा।

सुरभिपुष्पाणि सुगन्धितान्यष्टौ सहस्राणि देवस्योपरि निधापयेत्। सर्व्वान् कामानवाप्नोति ॥ ३०

यवव्रीहिहोमेण धनपतिर्भवति।
शतसहस्रं जप्त्वाथ लिङ्गमूर्द्धनि निक्षिपेत् ॥ ३१
ततः श्रीः स्वयमागत्य सर्व्वान् कामान् ददाति च।

नागपुष्पपुन्नागाशोकपाटलाकर्णिकारादीनि कथितानि ॥ ३२

अथ सर्गस्य घृतमधुमिश्राहुतिसहस्रं जुहुयात्। अर्थलाभो भवति ॥ ३३

सूत्रेण रक्षां करोति सर्षपैः सर्व्वग्रहेभ्यो मुक्तापयति ॥ ३४

लघुभिर्दिशां बन्धनं करोति। उदकेन वशमानयति ॥ ३५

सर्व्वपुष्पाभिषेकं कृत्वात्मानमभिषिञ्चेदलक्ष्मीं नाशयति ॥ ३६

तगरमल्लिकाकुन्दाशोकसौगन्धिकाभिषेकेण श्रीर्भवति। गतं राज्यं समानयति ॥ ३७

प्रतिपदारभ्य सर्व्वशुक्लपुष्पाणां प्रतिदिनमष्टसहस्रं जुहुयात्। पौर्णमासी यावत् ततो भवानीश्वरः ॥ ३८

सर्व्वकामावाप्तिं ददाति वामदेवो भगवानायुःप्रदः कामप्रदश्चेति ॥ ३९

संग्रामे शस्त्रसन्नद्धपुरुषमभिमन्त्रयेत्। सर्व्वापराजितो भवति ॥ ४०

सुगन्धगन्धैर्भगवन्तं विलिप्य सुगन्धपुष्पैरभ्यर्च्याष्टशतं जुहुयात्। स कर्म्म कुर्व्वाणो लक्ष्मीवान् भवति ॥ ४१

तपते वर्षते चैव एष देवो महेश्वरः।
सृजते सर्व्वभूतानि सर्व्वसिद्धिप्रदो हरः ॥ ४२

इति वामदेवकल्पः ॥

ईश्वर उवाच ।

अथ सद्योजातेन मन्त्रेण कृष्णयोरेकतरेण
...ण त्रिरात्रोपोषितो भूत्वाष्टसहस्रं जपेत् ॥ ४३
...मालार्थं जुहुयाद्यदिच्छति तल्लभेत् । पुष्पाष्ट-
...हस्रं जुहुयान्मधुप्लुतानां यक्षराक्षसाप्सरसः
...श्य आगच्छन्ति ॥ ४४ ॥ रसरसायनसिद्धीः
...च्छन्ति ।

शिवस्य महतीं पूजां कृत्वा व्यपगतकामक्रोध-
...लोभमोहो भिक्षाभुजो वा मौनी शुक्लवासा जिते-
...न्द्रियः ॥ ४५ ॥

गुग्गलगुटिकाभिरष्टसहस्रं जुहुयादष्टगुणा-
...श्वर्यं भवति ॥ ४६

अथ देवस्य दक्षिणामूर्त्तौ भवनाम्ना जपेत् ।
...र्गं भवति ॥ ४७

अथ मधुपयसाष्टसहस्रं जुहुयाद्राज्यच्युतो
...राज्यं लभेत ॥ ४८

अथ विल्वार्कोदुम्बराश्वत्थानां समिदष्टसहस्रं
जुहुयात् । पृथ्वीराज्यं प्राप्नोति ॥ ४९

अथ सहस्रमभिमन्त्र्यात्मनोऽविकलो भवति ॥ ५०

अथ वस्त्रमाल्याभरणादीनभिमन्त्र्य सौभाग्यं
...ति ॥ ५१

अथ वटाधः स्थित्वा शतसहस्रं जपेत् ।
...क्षिणी सिध्यति । अन्तर्जले पञ्चसहस्रं जपे-
...ब्रह्महत्यादिपापैर्विमुक्तो भवति ॥ ५२

...पापानि पापानि तथोपपातकानि तु ।
...वार्द्धेतद्दर्शनं नश्यन्ति शतशस्तथा ॥ ५३
...लिङ्गे जपेल्लक्षं देवः प्रत्यक्षतामियात् ।
...कामोऽपि जपेद्देवं ज्ञानी सर्व्वज्ञतां व्रजेत् ॥ ५४

इति सद्योजातकल्पः ॥

...म्भू-वाणलिङ्गे वा ज्योतिर्लिङ्गेऽपि सुव्रते ।
...सेवां प्रकुर्व्वीत भक्त्या तद्गतमानसः ॥ ५५
...प्रमितभुञ्जानः सर्व्वभूतहिते रतः ।
...ब्रह्मचर्यरतो मौनी भूमिशायी जितेन्द्रियः ॥ ५६
...को दैशिको वापि पूर्व्वसेवां समारभेत् ।
...नाश्रयासेन वा योगी जप-ध्यानपरायणः ॥ ५७
...क्षिणनमस्कारैः क्रियायोगेण शङ्करः ।
भक्तिस्तु कारणं तत्र भक्तिग्राह्यो महेश्वरः ॥ ५८
सर्व्वाश्रमाणां वर्णानां बाल-वृद्ध-स्त्रियामपि ।
आस्तिकः श्रद्दधानश्च अहन्यहनि भावतः ॥ ५९
सिध्यते हि क्रियाश्चर्यं प्रसादाच्छङ्करस्य वै ।
ध्यात्वात्मानं प्रति शिवं सर्व्वभूतेषु संस्थितः ॥ ६०
जपेन्मन्त्रन्तु यो मन्त्री सर्व्वं सिध्यति नान्यथा ।
शिवोऽहं सर्व्वभूतोऽहं जगत् स्थावरजङ्गमम् ॥ ६१
एवं सम्भावयन् योगी सिध्यते वत्सरार्द्धतः ॥ ६२

शिवैकनिष्ठस्त्वनुयोगदक्षः
सर्व्वेषु भूतेषु सदा स्थितोऽस्मि ।
ध्यायन् जपन् वा मनसा यतात्मा
सोऽनेन देहेन भवेच्छिवो हि ॥ ६३

मन्त्राणां सिद्धिं वक्ष्येऽहं तच्छृणुष्व वरानने ।
नदी-नद-समुद्रे वा पर्व्वतेषु गृहेषु च ॥ ६४
पश्चिमाभिमुखं यत्र लिङ्गं तिष्ठति भामिनि ।
कपिलागोमयेनैव उपलिप्य प्रयत्नतः ॥ ६५
पुनस्तत्पञ्चगव्येन स्नात्वा सद्येन मन्त्रयेत् ।
स्थापयेद्वामदेवेन दिशासु विदिशासु च ॥ ६६
पञ्चामृतादिभिस्तोयैः स्नात्वा तत्पुरुषेण वै ।
गन्धपुष्पादिकं सर्व्वं वस्त्रालङ्कारभूषणम् ॥ ६७
अघोरेण समं कृत्वा ईशानं मूर्द्ध्नि विन्यसेत् ।
ईशानेनार्च्चयेन्नित्यं सिद्धिकामो ह्यतन्द्रितः ॥ ६८
स्वयम्भू-वाणलिङ्गं वा देवासुरप्रतिष्ठितम् ।
सर्व्वलक्षणहीनञ्च स्फुटितं शीर्णमेव च ॥ ६९
सिद्धिदं तद्विजानीयाज्जीर्णोद्धारं न कारयेत् ।
ईशानं यो जपेन्नित्यं लिङ्गमाश्रित्य यत्नतः ॥ ७०
तस्य सिद्धिर्न सन्देहः षण्मासैर्वत्सरेण वा ।
नाभिमात्रे जले विश्य जपेन्मन्त्रं समाहितः ॥ ७१
समाऽभिजायते दृष्टिरीशानेन न संशयः ।
अभिमन्त्र्याष्टसाहस्रैः क्षिपेद्बीजान्यशेषतः ॥ ७२
क्षेत्रे स्याच्छस्यनिष्पत्तिर्नोपद्रवभयं भवेत् ।
क्षीरवृक्षसमिद्भिस्तु हुत्वा शान्तिर्भवेदिह ॥ ७३
औपसर्गिकदोषाणां न भयं विद्यते क्वचित् ।
पर्व्वताग्रे समारुह्य जपेन्मन्त्रमतन्द्रितः ॥ ७४
देहेनानेन देवेशं वरदं पश्यते वरम् ।
सर्व्वपापैर्विमुक्तः स्याद्यो जपेल्लक्षमादृतः ॥ ७५

अन्नं भुञ्जन् जपेद्यस्तु तेजस्वी जायते सदा ।
प्रत्यहं शतमेकन्तु जपेत् सिद्धिमवाप्नुयात् ॥ ७६
कुभुक्तस्य कुपानस्य दिवास्वप्नस्य सेवतः ।
अस्थाने सम्मुखस्यापि द्विज-गो-देव-योषिताम् ॥ ७७
कुवातात् कुपथादेव ईशानं सततं स्मरेत् ।
एवं यो वर्त्तते नित्यं शिवपूजार्च्चने रतः ॥ ७८
विमुक्तः सर्व्वपापेभ्यः शिवलोके महीयते ।

ईश्वर उवाच ।

पञ्चब्रह्मविधानन्तु यथावत् कथितं मया ॥ ७९
साम्प्रतं हि सुभक्तानां तथा शुद्धतपस्विनाम् ।
ये पुनः शुद्धकर्म्माणः सुशुद्धतपसान्विताः ॥ ८०
समर्च्चयन्ति मां नित्यं वेद्यास्तेऽपि यथा ह्यहम् ।
नातप्ततपसो यान्ति शिवलोकमनामयम् ॥ ८१
तपसा दिवि मोदन्ते प्रत्यहं देवतागणाः ।
ऋषयो मुनयश्चैव सत्यं जानीहि सुन्दरि ॥ ८२
सुदुर्द्धरं दुराराध्यं सुदूरं दुरतिक्रमम् ।
तत् सर्व्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ ८३
तापस्ये संस्थितो ब्रह्मा नित्यं विष्णुरहं तथा ।
त्वं तथा देवि येनाहं प्राप्तो भर्त्ता सुदुर्लभः ॥ ८४
येन येन हि भावेन स्थित्वा यत् क्रियते तपः ।
तत् तत् सम्प्राप्यते देवि इह लोके न संशयः ॥ ८५
सात्त्विकं राजसञ्चैव तामसं त्रिविधं हितम् ।
सात्त्विकं देवतानां हि यतीनामूर्द्ध्वरेतसाम् ॥ ८६
तामसं दानवानां हि रक्षसां क्रूरकर्म्मणाम् ।
निजं देहं सुसम्पीड्य हिमातपसुदुःसहैः ॥ ८७
तत् तपस्तामसं प्रोक्तं मनोऽभिप्रेतसाधनम् ।
जपं ध्यानन्तु देवानामर्च्चनं भक्तितः शुभे ॥ ८८
सात्त्विकं तद्विनिर्द्दिष्टमशेषफलसाधनम् ।
इह लोके परे चैव क्रमान्मोक्षं व्रजेदतः ॥ ८९
उत्तमं सात्त्विकं विद्याद्धर्म्मे बुद्धिः सुनिश्चला ।
स्नानं पूजा जपो होमः शुद्धशौचमहिंसता ॥ ९०
व्रतोपवासचर्य्या च मौनमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दानं क्षान्तिर्दमो दया ॥ ९१
वापी-कूप-तडागानि प्रासादानाञ्च कल्पना ।
कृच्छ्रचान्द्रायणं यज्ञः सुतीर्थान्याश्रमाणि च ॥ ९२
धर्म्मस्थानानि चैतानि सुखदानि मनीषिणाम् ।
संक्रान्तिविषुवद्योगो नादसुक्रान्तियुञ्जताम् ॥ ९३
ध्यानं बिन्दुलवं ज्योतिरुन्मनीभावधारणा ।
रेचकः पूरकः कुम्भः प्राणायामस्त्रिकः स्मृतः ॥ ९४
नाडीसञ्चरविज्ञानं प्रत्याहार-निरोधनम् ।
तुरीयं तदधो बुद्धिरणिमाद्यष्टसंयुतम् ॥ ९५
काष्ठावस्था मृतावस्था हरिता चेति कीर्त्तिता ।
ज्ञानोपलब्धयो ह्येताः सर्व्वपापप्रणाशनाः ॥ ९६
नारीशय्यासनं यानं वस्त्रं धूपविलेपनम् ।
ताम्बूलभक्षणं पञ्च राज्यैश्वर्य्यविभूतयः ॥ ९७
हेमभारं तथा ताम्रगृहाश्वरत्नधेनवः ।
पाण्डित्यं वेदशास्त्राणि गीतनृत्यविभूषणम् ॥ ९८
शङ्ख-वीणा-मृदङ्गाश्च गजेन्द्र-च्छत्र-चामरम् ।
भोगरूपाणि चैतानि एभी रक्तोऽनुयुज्यते ॥ ९९
आदर्शवन्मुनिस्त्वेहस्तिलवत् तत्र पीड्यते ।
अरङ्गमेति चाप्येनं कुरुतेऽज्ञानमोहितः ॥ १००
जानन्नपीह संसारे भ्रमति घटियन्त्रवत् ।
सर्व्वयोनिषु दुःखार्त्तः स्थावरेषु चरेषु च ॥ १०१
एवं योनिषु सर्व्वासु प्रतिक्रम्य क्रमेण तु ।
कालान्तरवशाद्याति मानुष्यमतिदुर्लभम् ॥ १०२
व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात् ।
विचित्रा गतयः प्रोक्ताः कर्म्मणां गुरुलाघवात् ॥ १०३
मानुष्यं यः समासाद्य स्वर्ग-मोक्षप्रसाधकम् ।
नाचरत्यात्मनः श्रेयः स मृतः शोचते चिरम् ॥ १०४
देवासुराणां सर्व्वेषां मानुष्यमतिदुर्लभम् ।
तत् सम्प्राप्य तथा कुर्य्यान्न गच्छेन्नरकं यथा ॥ १०५
स्वर्गापवर्गलाभाय यदि नास्ति समुद्यमः ।
सर्व्वस्य मूलं मानुष्यं तद्यत्नादनुपालयेत् ॥ १०६
धर्म्ममूलं हि मानुष्यं लब्ध्वा सर्व्वार्थसाधकम् ।
यदि लाभे न यत्नः स्यान्मूलं रक्षेत् स्वयं ततः ॥ १०७
मनुष्यत्वेऽपि विप्रत्वं यः प्राप्य च सुदुर्लभम् ।
न करोत्यात्मनः श्रेयः कोऽन्यस्तस्मादचेतनः ॥ १०८
दीपानामेव सर्व्वेषां भुज्यतेऽस्मिन्नुपार्ज्जितम् ।
इतः स्वर्गश्च मोक्षश्च प्राप्यते समुपार्ज्जितः ॥ १०९
देशेऽस्मिन् भारते वर्षे प्राप्य मानुष्यमध्रुवम् ।
न कुर्य्यादात्मनः श्रेयस्तेनात्मा खलु वञ्चितः ॥ ११०
कर्म्मभूमिरियं विप्र फलभूमिरसौ स्मृता ।

इह यत् क्रियते कर्म्म स्वर्गे तदनुभुज्यते ॥ १११
यावत् स्वस्थशरीरत्वं तावद्धर्म्मं समाचरेत् ।
अस्वस्थश्चोदितो ह्यन्यैर्न किञ्चित् कर्त्तुमुत्सहेत् ॥ ११२
अध्रुवेण शरीरेण ध्रुवं यो न प्रसाधयेत् ।
ध्रुवं तस्य परिभ्रष्टमध्रुवं नष्टमेव च ॥ ११३
आयुषः खण्डखण्डानि निपतन्ति तवाग्रतः ।
अहोरात्रापदेशेन किमर्थं नावबुध्यसे ॥ ११४
यदा न ज्ञायते मृत्युः कदा कस्य भविष्यति ।
आकस्मिके हि मरणे धृतिं विन्दति कस्तदा ॥ ११५
परित्यज्य यदा सर्व्वमेकाकी यास्यसि ध्रुवम् ।
न ददासि कदा कस्मै पाथेयार्थमिदं धनम् ॥ ११६
गृहीतदानपाथेयाः सुखं यान्ति यमालयम् ।
अन्यथा क्लिश्यते जन्तुः पाथेयरहिते पथि ॥ ११७
येषां काले यदा वा हि पूर्णभाण्डः पुरो व्रजेत् ।
गच्छतां स्वर्गदेशस्य तेषां लाभः पदे पदे ॥ ११८
इति ज्ञात्वा नरः पुण्यं कुर्य्यात् पापं विवर्ज्जयेत् ।
पुण्येन याति देवत्वमपुण्यान्नरकं व्रजेत् ॥ ११९
ये मनागपि देवेशं प्रपन्नाः शरणं शिवम् ।
तेऽपि घोरं न पश्यन्ति न यमं नरकं तथा ॥ १२०
किन्तु पापैर्महाघोरैः किञ्चित् कालं शिवाज्ञया ।
वसन्ति तत्र मानुष्यास्ततो यान्ति शिवं पुरम् ॥ १२१
ये पुनः सर्व्वभावेन प्रतिपन्ना महेश्वरम् ।
न ते लिप्यन्ति पापेन पद्मपत्रमिवाम्भसा ॥ १२२
उक्तं शिवेति यैर्नाम तथा हर हरेति च ।
न तेषां नरकाद्भीतिर्यमाद्धि मुनिसत्तम ॥ १२३
तस्माद्विवर्द्धयेद्भक्तिमीश्वरे सततं बुधः ॥ १२४

इति श्रीशैवे महापुराणे धर्म्मसंहिताया-
मर्चनदानादिकथनं नाम चत्वा-
रिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः ।

व्यास उवाच ।

ब्राह्मणत्वं हि दुष्प्रापं निसर्गाद्ब्राह्मणो भवेत् ।
क्षत्रियो वापि वैश्यो वा निसर्गादेव जायते ॥ १
ब्राह्मणास्तु मुखोत्पन्ना ब्रह्मणः क्षत्रिया विशः ।
बाहुभ्यामूरुतोत्पन्नाः पद्भ्यां शूद्र इति श्रुतिः ॥ २
किमुत्कृतिमधः स्थानादाप्नुवन्ति ह्यतो वद ।

सनत्कुमार उवाच ।

दुष्कृतेन तु कालेय स्थानाद्भ्रश्यन्ति मानवाः ॥ ३
श्रेष्ठं स्थानं समासाद्य तस्माद्रक्षेत पण्डितः ।
यस्तु विप्रत्वमुत्सृज्य क्षत्रयोन्यां प्रसूयते ॥ ४
ब्राह्मण्यात् स परिभ्रष्टः क्षत्रियत्वं निषेवते ।
अधर्म्मसेवनान्मूढस्तथैव परिवर्त्तते ॥ ५
जात्यन्तरसहस्रेण तमसा विशते यतः ।
तस्मात् प्राप्य परं स्थानं प्रमाद्यन् न तु नाशयेत् ॥ ६
शूद्रान्नेनोदरस्थेन यो म्रियेत द्विजोत्तमः ।
आहिताग्निस्तथा विद्वान् स शूद्रगतिमाप्नुयात् ॥ ७
ब्राह्मणत्वं शुभं प्राप्य ब्राह्मण्यं योऽवमन्यते ।
भोज्याभोज्यं न जानाति स भवेत् क्षत्रियो द्विजः ॥ ८
कर्म्मणा येन मेधावी शूद्रो वैश्योऽभिजायते ।
तत् ते वक्ष्यामि निखिलं येन वर्णोत्तमो भवेत् ॥ ९
शूद्रकर्म्म यथादिष्टं शूद्रो भूत्वा समाचरेत् ।
यथावत् परिचर्य्यान्तु त्रिषु वर्णेषु नित्यदा ॥ १०
कुरुते कामयानस्तु स शूद्रो वैश्यतां व्रजेत् ।
यो ज्ञः पापजनद्वेष्टा जुह्वानश्च यथाविधि ॥ ११
अग्निहोत्रमुपादाय शेषान्नकृतभोजनः ।
स वैश्यः क्षत्रियकुले जायते नात्र संशयः ॥ १२
क्षत्रियो यजते यज्ञैः संस्कृतैराप्तदक्षिणैः ।
अधीते स्वर्गमन्विच्छंस्त्रेताग्निशरणः सदा ॥ १३
आर्द्रहस्तप्रदो नित्यं क्षितिं धर्म्मेण पालयेत् ।
ऋतुकाभिगामी च स्वां भार्य्यां धर्म्मतत्परः ॥ १४
सर्व्वातिथ्यं त्रिवर्गस्य भूतेभ्यो दीयतामिति ।
गोब्राह्मणात्मनोऽर्थे च संग्रामाभिहतो हवे ॥ १५
तेनाग्निमन्त्रपूतात्मा क्षत्रियो ब्राह्मणो भवेत् ।
विधिज्ञो ब्राह्मणो भूत्वा याजकस्तत्र जायते ॥ १६
प्राप्यते विपुलः स्वर्गो देवानामपि वल्लभः ।
ब्राह्मणत्वं सुदुष्प्रापं कृच्छ्रेणासाद्यते नरैः ॥ १७
तस्मात् सर्व्वप्रयत्नेन रक्षेद्ब्राह्मण्यमुत्तमम् ।

व्यास उवाच ।

संग्रामस्येह माहात्म्यं त्वयोक्तं मुनिसत्तम ॥ १८
एतदिच्छाम्यहं श्रोतुं ब्रूहि मे वदतां वर ।

सनत्कुमार उवाच।

अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ॥ १९
न तत् फलमवाप्नोति संग्रामे यदवाप्नुयात्।
इति यज्ञविदः प्राहुर्यज्ञकर्म्मविदः सदा ॥ २०
तस्मात् तत् ते प्रवक्ष्यामि यत् फलं शस्त्रजीविनाम्।
धर्म्मलाभोऽर्थलाभश्च यशोलाभस्तथैव च ॥ २१
यः शूरो वध्यते युद्धे विमर्द्दन् परवाहिनीम्।
तस्य धर्म्मार्थकामस्य यज्ञस्येवाप्तदक्षिणः ॥ २२
परं ह्यभिमुखं हत्वा तद्रथानं योऽधिरोहति।
विष्णुलोके स जायेत यश्च युद्धेऽपराजितः ॥ २३
अश्वमेधानवाप्नोति चतुरो न मृतः स चेत्।
यस्तु शस्त्रमनुप्राप्य वीर्य्यवान् वाहिनीमुखे ॥ २४
सम्मुखो वर्त्तते शूरः स स्वर्गान्न निवर्त्तते।
राजा वा राजपुत्रो वा सेनापतिरथापि वा ॥ २५
हतः क्षात्रेण यः शूरस्तस्य लोकोऽक्षयो ध्रुवम्।
यावन्ति तस्य रोमाणि भिनत्ति शस्त्रमाहवे ॥ २६
तावतो लभते लोकान् सर्व्वकामदुघोऽक्षयान्।
वीरासनं वीरशय्या वीरस्थानस्थितिः स्थिरा ॥ २७
गवार्थं ब्राह्मणार्थं च स्थानं स्वाम्यर्थमेव च।
ये मृतास्ते सुखं यान्ति यथा सुकृतिनस्तथा ॥ २८
यः कश्चिद्ब्राह्मणं हत्वा पश्चात् प्राणान् परित्यजेत्।
गो-विप्र-विभुकामाय सद्यः पापात् प्रमुच्यते ॥ २९
अभग्नो यः परैः सैन्यं भग्नं यः परिरक्षति।
तत् फलं समवाप्नोति नो चेत् प्राणान् परित्यजेत् ॥ ३०
तत्राशौ स्वपते युद्धे स स्वर्गान्न निवर्त्तते।
क्रव्यादैर्दन्तिभिश्चैव हतस्य गतिरुत्तमा ॥ ३१
द्विज-गो-स्वामिनामर्थे भवेद्विप्र सदाक्षया।
शक्यन्त्विह समर्थैश्च यष्टुं क्रतुशतैरपि ॥ ३२
आत्मदेहपरित्यागः कर्त्तुं युधि सुदुष्करः।
युद्धे पुण्यतमः स्वर्ग्यः सुयज्ञः सर्व्वतोमुखः ॥ ३३
सर्व्वेषामेव वर्णानां क्षत्रियस्य विशेषतः।
भूयश्चैव तु वक्ष्यामि युद्धधर्म्मं सनातनम् ॥ ३४
याद्दशाय प्रवर्त्तव्यं याद्दशं परिवर्ज्जयेत्।
आततायिनमायान्तमपि वेदान्तगं द्विजम् ॥ ३५
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्।
हन्ताप्यसौ न हन्तव्यः पानीयं यश्च याचते ॥ ३६
रथो हतातुरान् व्यास स नरो ब्रह्महा भवेत्।
व्याधितं दुर्ब्बलं बालं स्त्री-नाथं कृपणं ध्रुवम् ॥ ३७
धनुर्भग्नं छिन्नगुणं तं हत्वा ब्रह्महा भवेत्।
विमुक्तकेशो वै मोहाज्जड़ोऽन्मत्ताञ्जतिर्भवेत् ॥ ३८
पर्ण-शाखा-तृणग्राही तान् हत्वा ब्रह्महा भवेत्।
न युध्येऽहं तवास्मीति वृद्धोऽक्षोऽथ नपुंसकः ॥ ३९
एतान् हत्वा तु सम्मोहात् स मुने ब्रह्महा भवेत् ॥ ४०

यान् यज्ञसङ्घैस्तपसा च विप्राः
स्वर्गैषिणो यत्र च यैः प्रयान्ति।
क्षणेन तामेव गतिं प्रयान्ति
महाहवे संहननं त्यजन्तः ॥ ४१
सर्व्वांश्च वेदान् सुमहद्भिरङ्गै-
र्योगांश्च सांख्यञ्च वने निवासम्।
एतान् गुणानेकपदे निशिवति
संग्रामधर्म्मास्तितनुं त्यजेद्यः ॥ ४२

इति श्रीशैवे महापुराणे धर्म्मसंहितायां-
मेकचत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः।

व्यास उवाच।

श्रुता मे यातनाश्चित्राः पापिनां निरये तु याः।
स्वरतामिह संसारे तास्त्वं ब्रूहि समाखिलाः ॥ १

सनत्कुमार उवाच।

अथ नारकिणां पुंसां धर्म्मांश्चैव तु केवलान्।
क्षणमात्रेण भूतेभ्यः शरीरमुपपद्यते ॥ २
तद्वत्कर्म्मणा चैकेन देवानाञ्चोपपादकम्।
सद्यः प्रजायते दिव्यं शरीरं भूतसारतः ॥ ३
कर्म्मणा वापि मिश्रेण यच्छरीरमिहात्मने।
तद्भूतपरिणामोत्थं विज्ञेयं हि चतुर्व्विधम् ॥ ४
उद्भिजः स्थावरा ज्ञेयास्तृण-गुल्मादिरूपिणः।
क्रिमि-कीट-पतङ्गाद्याः स्वेदजा नाम देहिनः ॥ ५
अण्डजाः पक्षिणो नक्राश्चक्रा मत्स्याश्च कच्छपाः।
जरायुजाश्च विज्ञेया मानुषाश्च चतुष्पदाः ॥ ६
तत्र सिक्ता जलैर्भूमिस्तेजसा च प्रतापिता।
वायुना योज्यमानात् खादीजलमुपपद्यते ॥ ७

अथर्त्तु तानि वीजानि संसिक्तान्यम्भसा पुनः ।
उच्छूनतां मृदुलञ्च मूलभावं व्रजन्ति च ॥ ८
तन्मूलादङ्कुरोत्पत्तिरङ्कुरात् पर्णसम्भवः ।
पर्णान्नालं ततः काण्डं काण्डाच्च प्रसवः पुनः ॥ ९
प्रसवाच्च तुषं चीरं चीरात् तण्डुलसम्भवः ।
तण्डुलञ्च यदा पक्वं म्रियन्त्योषधयस्तदा ॥ १०
यवाद्यास्तृणपर्य्यन्ताः श्रेष्ठाः सप्तदश स्मृताः ।
ओषध्यः फलपाकान्ताः शेषाः क्षुद्राः प्रकीर्त्तिताः॥११
एता लूना मर्द्दिताश्च शनैरुत्प्रियसंस्कृताः ।
शूर्पोदूखलयन्त्राद्यैः पक्वाश्चोदकवह्निभिः ॥ १२
षड्विधाहारभेदेन परिणामं व्रजन्त्युत ।
अन्योन्यवसुसंयोगादनेकस्वादुतां गताः ॥ १३
भक्ष्यं भोज्यञ्च पेयञ्च लेह्यं चोष्यञ्च पिच्छिलम् ।
इति भेदाः षड़न्नस्य मधुराद्याश्च षड़्रसाः ॥ १४
तदन्नं पिण्डकवलैर्ग्रासं भुक्तञ्च देहिभिः ।
अन्नं स्थलाशये पूर्व्वं प्राणं स्थापयते क्रमात् ॥ १५
पीतभक्षितमाहारं स वायुः कुरुते द्विधा ।
सम्प्रविश्यान्नमध्ये तु पृथगन्नं पृथग्जलम् ॥ १६
अग्नेरूर्द्ध्वं जलं स्थाप्य तदन्नञ्च जलोपरि ।
जलस्याधः स चापानः स्थितोऽग्निं धमते शनैः ॥ १७
वायुना धम्यमानोऽग्निरत्युष्णां कुरुते जलम् ।
तदन्नमुष्णतोयेन समन्तात् पच्यते पुनः ॥ १८
द्विधा भवति तत् पक्वं पृथक्किट्टं पृथग्रसम् ।
मलैर्द्वादशभिः किट्टं भिन्नं देहाद्वहिर्व्रजेत् ॥ १९
कर्णाक्षि-नासिका-जिह्वा-दन्ताः शिश्न-गुदं नखाः ।
मलाश्रयाः कफः स्वेदो विण्मूत्रं द्वादश स्मृताः ॥ २०
हृत्पद्मे प्रतिवद्धाश्च सर्व्वनाड्यः समन्ततः ।
तासां मुखेषु तत्सूक्ष्मं प्राणः स्थापयते रसम् ॥ २१
रसेन तेन नाड्यस्ताः प्राणः पूरयते पुनः ।
पुनः प्रयान्ति सम्पूर्णास्ताश्च देहं समन्ततः ॥ २२
ततः स नाड़ीमध्यस्थः शारीरेणोष्मणा रसः ।
पच्यते पच्यमानाच्च भवेत् पाकद्वयं पुनः ॥ २३
त्वक् तया वेष्टितं पूर्व्वं रुधिरञ्च प्रजायते ।
रक्ताल्लोमानि मांसञ्च केशाः स्नायुश्च मांसतः ॥ २४
स्नायोः शिरास्तथास्थीनि नखमज्जास्थिसम्भवः ।
मज्जाकारणवैकल्यं शुक्रञ्च प्रसवात्मकम् ॥ २५

इति द्वादशधान्नस्य परिणामः प्रकीर्त्तितः ।
शुक्लान्नस्य ततः शुक्राद्दिव्यदेहस्य सम्भवः ॥ २६
ऋतुकाले यदा शुक्रं निर्द्दोषं योनिसंस्थितम् ।
तदा तद्वायुना स्पृष्टं स्त्रीरक्तेनैकतां व्रजेत् ॥ २७
विसर्गकाले शुक्रस्य जीवः करणसंयुतः ।
संवृतः प्रविशेद्योनिं कर्म्मभिः स्वैर्नियोजितः ॥ २८
तच्छुक्ररक्तमेकस्थमेकाहात् कललं भवेत् ।
पञ्चरात्रेण कललं वुद्बुदाकारतां व्रजेत् ॥ २९
वुद्बुदात् सप्तरात्रेण मांसपेशी भवेत् पुनः ।
द्विसप्ताहाद्भवेत् पेशी रक्तं मांसं त्वचा दृढ़ा ॥ ३०
वीजस्येवाङ्कुरोत्पत्तिः पञ्चविंशतिरात्रतः ।
भवन्ति माससात्रेण पञ्चधा जायते पुनः ॥ ३१
ग्रीवा शिरश्च स्कन्धश्च पृष्ठवंशस्तथोदरम् ।
पाणिपादं तथा पार्श्वौ कटिर्गात्रं तथैव च ॥ ३२
द्विमासाभ्यन्तरेणैव क्रमशः सम्भवन्ति हि ।
त्रिभिर्मासैः प्रजायन्ते सर्व्वाङ्गाङ्कुरसन्धयः ॥ ३३
मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम् ।
मुखं नासा च कर्णौ च मासैर्भवन्ति पञ्चभिः ॥ ३४
दन्तपङ्क्तिस्तथा गुह्यं जायन्ते च नखाः पुनः ।
कर्णयोस्तु भवेच्छिद्रं षण्मासाभ्यन्तरेण तु ॥ ३५
पायुर्मेढ्रमुपस्थञ्च नाभिश्चाप्युपजायते ।
सन्धयो ये च गात्रेषु मासैर्जायन्ति सप्तभिः ॥ ३६
अङ्गप्रत्यङ्गसम्पूर्णः शिरःकेशसमन्वितः ।
विभक्तावयवः स्पष्टः पुनर्मासाष्टकेन तु ॥ ३७
पञ्चात्मकसमायुक्तः परिपक्वः स तिष्ठति ।
मातुराहारवीर्य्येण षड़्विधेन रसेन तु ॥ ३८
नाभिनालाभिवद्धेन वर्द्धते स दिने दिने ।
ततः स्मृतिं लभेज्जीवः सम्पूर्णोऽस्मिञ्छरीरके ॥ ३९
सुखं दुःखं विजानाति निद्रा स्वप्नं पुराकृतम् ।
मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ॥ ४०
नानायोनिसहस्राणि मया दृष्टानि जायता ।
अधुना जातमात्रोऽहं प्राप्तसंस्कार एव च ॥ ४१
ततः श्रेयः करिष्यामि येन गर्भे न सम्भवः ।
गर्भस्थश्चिन्तयत्येवमहं गर्भाद्विनिःसृतः ॥ ४२
अन्वेष्यामि शिवज्ञानं संसारविनिवर्त्तकम् ।
एवं सगर्भदुःखेन महता परिपीड़ितः ॥ ४३

जीवः कर्म्मवशादास्ते मोक्षोपायं विचिन्तयन्।
यथा गिरिवराक्रान्तः कश्चिद्दुःखेन तिष्ठति ॥ ४४
तथा जरायुणा देही दुःखं तिष्ठति वेष्टितः।
पतितः सागरे यद्वद्दुःखमास्ते समाकुलः ॥ ४५
गर्भोदकेन सिक्ताङ्गः सर्व्वतोऽकुलितं तदा।
लोहकुम्भे यथा न्यस्तः पच्यते कश्चिदग्निना ॥ ४६
गर्भकुम्भे तथा क्षिप्तः पच्यते जाठराग्निना।
सूचीभिरग्निवर्णाभिर्निर्भिन्नस्य निरन्तरम् ॥ ४७
यद्दुःखं जायते तस्य तत्र संस्थस्य जायते।
गर्भवासात् परं दुःखं कष्टं नैवास्ति कुत्रचित् ॥ ४८
देहिनां दुःखबहुलं सुघोरमतिसङ्कटम्।
इत्येतत् सुमहद्दुःखं पापिनां परिकीर्त्तितम् ॥ ४९
केवलं धर्म्मबुद्धीनां सप्तमासोद्भवात् सदा।
गर्भात् सुदुर्लभं दुःखं योनियन्त्रनिपीड़नात् ॥ ५०
इक्षुवत् पीड्यमानस्य यन्त्रेणैव समन्ततः।
शिरसा ताड्यमानस्य पापमुद्गरकेण च ॥ ५१
यन्त्रेण पीड़िता यद्वन्निःसाराः स्युस्तिलाः क्षणात्।
तथा शरीरं निःसारं योनियन्त्रनिपीड़नात् ॥ ५२
अस्थिपट्टतुलास्तम्भस्नायुबन्धेन यन्त्रितम्।
रक्तमांसमृदा लिप्तं विण्मूत्रद्रव्यभाजनम् ॥ ५३
केशरोमतृणाच्छन्नं रोगायतनमातुरम्।
वदनैकमहाद्वारं गवाक्षाष्टकभूषितम् ॥ ५४
ओष्ठद्वयकपाटञ्च दन्तजिह्वार्गलान्वितम्।
भोगतृष्णातुरं मूढ़ं रागद्वेषवशानुगम् ॥ ५५
संवर्त्तिताङ्गप्रत्यङ्गं जरायुपरिवेष्टितम्।
सङ्कटेनाविविक्तेन योनिमार्गेण निर्गतम् ॥ ५६
विण्मूत्ररक्तसिक्ताङ्गं यत् कौशिकसमुद्भवम्।
अस्थिपञ्जरसङ्घातमस्मिन् ज्ञेयं कलेवरम् ॥ ५७
शतत्रयं षष्ट्यधिकं पञ्च पेशीशतानि च।
सार्द्धाभिस्तिसृभिश्छन्नं समन्ताद्रोमकोटिभिः ॥ ५८
शरीरं स्थूलसूक्ष्माभिर्दृश्यादृश्या हि ताः स्मृताः।
एतावतीभिर्नाड़ीभिः कोटिभिस्तत् समन्ततः ॥ ५९
अस्वेदमशुभिर्याभिरन्तःस्थं स्रवते बहिः।
द्वात्रिंशद्दशनाः प्रोक्ता विंशतिश्च नखाः स्मृताः ॥ ६०
पित्तस्य कुड़वं ज्ञेयं कफस्याप्याढ़कं स्मृतम्।
वसायाश्च पलं विंशत् तदर्द्धं कपिलस्य च ॥ ६१

पञ्चार्द्धन्तु पला ज्ञेया पलानि दश मेदसः।
पलत्रयं महारक्तं मज्जा स्याच्च चतुर्गुणा ॥ ६२
शुक्रार्द्धं कुड़वं ज्ञेयं तद्बीजं देहिनां बलम्।
मांसस्य चैकपिण्डेन पलसाहस्रमुच्यते ॥ ६३
रक्तं पलशतं ज्ञेयं विण्मूत्रञ्चाप्रमाणतः।
इति देहगृहं ह्येतन्नित्यस्यानित्यमात्मनः ॥ ६४
अविशुद्धं विशुद्धस्य कर्म्मबन्धादिनिर्म्मितम्।
शुक्र-शोणितसंयोगाद्देहः सञ्जायते यतः ॥ ६५
नित्यं विण्मूत्रसम्पूर्णस्तेनायमशुचिः स्मृतः।
यथान्तर्विष्ठया पूर्णः शुचिः स्यान्न बहिर्घटः ॥ ६६
शोध्यमानो हि देहोऽयं तेनायमशुचिस्ततः।
यं प्राप्यातिपवित्राणि पञ्चगव्यहवींषि च ॥ ६७
अशुचित्वं क्षणाद्यान्ति किमन्यदशुचिस्ततः।
हृद्यान्यप्यन्नपानानि यं प्राप्य सुरभीणि च ॥ ६८
अशुचित्वं प्रयान्त्याशु किमन्यदशुचिस्ततः।
हे जनाः किं न पश्यन्ति यन्निर्याति दिने दिने ॥ ६९
स्वदेहात् कश्मलं पूति तदाधारः कथं शुचिः।
देहः संशोध्यमानोऽपि पञ्चगव्यकुशाम्बुभिः ॥ ७०
घृष्यमाण इवाङ्गारो निर्म्मलत्वं न गच्छति।
स्रोतांसि यस्य सततं प्रस्रवन्ति गिरेरिव ॥ ७१
कफमूत्रपुरीषाद्यैः स देहः शुध्यते कथम्।
सर्व्वाशुचिनिधानस्य शरीरस्य न विद्यते ॥ ७२
शुचिरेकः प्रदेशोऽपि विण्मूत्रस्य दृतेरिव।
स्पृष्ट्वात्मदेहस्रोतांसि मृत्तोयैः शोध्यते करः ॥ ७३
तथाप्यशुचिभाण्डस्य न विरज्यन्ति किन्नराः ॥
कायः सुगन्धपुष्पाद्यैर्यत्नेनापि सुसंस्कृतः ॥ ७४
न जहाति स्वभावञ्च श्वपुच्छ इव नामितः।
यथा जात्यैव कृष्णोऽर्थः शुक्लः स्यात् तदुपायतः ॥ ७५
संशोध्यमानापि तथा भवेन्मूर्त्तिर्न निर्म्मला।
जिघ्रन्नपि सुदुर्गन्धं पश्यन्नपि स्वकं मलम् ॥ ७६
न विरज्येत लोकोऽयं पीड़यन्नपि नासिकाम्।
अहो मोहस्य माहात्म्यं येनेदं व्यापितं जगत् ॥ ७७
शीघ्रं पश्यन् स्वकं दोषं कायस्य न विरज्यते।
स्वदेहे च विगन्धेन विरज्येत न यो नरः ॥ ७८
विरागकारणं तस्य किमेतदुपदिश्यते।
सर्व्वमेव जगन्मेध्यं देह एवाशुचिर्भवेत् ॥ ७९

तन्मलावयवस्पर्शाच्छुचिरप्यशुचिर्भवेत्।
गन्धलेपापनोदार्थं शौचं देहस्य कीर्त्तितम् ॥ ८०
द्वयस्यापगमाच्छुद्धिः शु ःस्पर्शाद्विशुध्यति।
गङ्गातोयेन सर्व्वेण मृद्भारैः पर्व्वतोपमैः ॥ ८१
आ मृत्योराचरेच्छौचं भावदुष्टो न शुध्यति।
तीर्थस्नानैस्तपोभिर्वा दुष्टात्मा नैव शुध्यति ॥ ८२
श्वदृतिः क्षालिता तीर्थे किं शुद्धिमधिगच्छति।
अन्तर्भावप्रदुष्टस्य विशतोऽपि हुताशनम् ॥ ८३
न स्वर्गो नापवर्गश्च देहनिर्द्दहनं परम् ॥ ८४

सर्व्वेण गाङ्गेन जलेन सम्य-
क्मृत्पर्व्वतेनाप्यथ भावदुष्टः।
आ जन्मनः स्नानपरो मनुष्यो
न शुध्यतीत्येव वयं वदामः ॥ ८५

प्रज्वाल्य वह्निं घृततैलसिक्तं
प्रदक्षिणावर्त्तशिखं महान्तम्।
प्रविश्य दग्धो ह्यपि भावदुष्टो
न धर्म्ममाप्नोति फलं न चान्यत् ॥ ८६

गङ्गादितीर्थेषु वसन्ति मत्स्या
देवालये पक्षिगणाश्च नित्यम्।
भावोज्झितास्ते न फलं लभन्ते
तीर्थावगाहाच्च तथैव दानात् ॥ ८७

भावशुद्धं परं शौचं प्रमाणं सर्व्वकर्म्मसु।
अन्यथालिङ्ग्यते कान्ता भावेन दुहितान्यथा ॥ ८८
मनसो भिद्यते वृत्तिरभिन्नेष्वपि वस्तुषु।
अन्यथैव सुतं नारी चिन्तयत्यन्यथा पतिम् ॥ ८९
पश्यध्वमस्य भावस्य महाभाग्यमशेषतः।
परिष्वक्तोऽपि यन्नार्य्या भावहीनां न कामयेत् ॥ ९०
नाद्याद्विविधमन्नाद्यं भक्ष्याणि सुरभीणि च।
यदि चित्तं समाधत्ते चित्तं कामादिषु त्रिषु ॥ ९१
रज्यते तैस्तु भावेन नरो भावाद्विमुच्यते।
भावतः शुचिशुद्धात्मा स्वर्गं मोक्षञ्च विन्दति ॥ ९२
भावेनैकान्तशुद्धात्मा ददज्जुहृत् स चेन्मृतः।
ज्ञानावाप्तेरवाप्याशु लोकान् सुबहुयाजिनाम् ॥ ९३
ज्ञानामलाम्भसां पुंसां सद्वैराग्यमृदा पुनः।
अविद्या-राग-विण्मूत्र-लेपगन्धविशोधनम् ॥ ९४
एवमेतच्छरीरं हि निसर्गादशुचि स्मृतम्।
त्वङ्मात्रसारनिःसार-कदलीसारसन्निभम् ॥ ९५
ज्ञात्वैवं दोषदेहं यः प्राज्ञः स शिथिलो भवेत्।
सोऽतिक्रामति संसारं दृढग्राही च तिष्ठति ॥ ९६
एवमेतन्महाकष्टं जन्मदुःखं प्रकीर्त्तितम्।
पुंसामज्ञानदोषेण नानाकर्म्मवशेन च ॥ ९७
श्लोकार्द्धेन तु वक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ममेति परमं दुःखं निर्म्ममेति परं सुखम् ॥ ९८
बहवोऽपि हि राजानः परं मोक्षमितो गताः।
निर्म्ममेति ममेत्येवं बद्धाः शतसहस्रशः ॥ ९९
गर्भस्थस्य स्मृतिर्यासीत् सा च तस्य प्रणश्यति।
संमूर्च्छितस्य दुःखेन योनियन्त्रनिपीड़नात् ॥ १००
बाह्येन वायुना चास्य मोहसंज्ञेन देहिनः।
स्पृष्टमात्रस्य घोरेण ज्वरः समुपजायते ॥ १०१
तेन ज्वरेण महता सम्मोहश्च प्रजायते।
संमूढ़स्य स्मृतिभ्रंशः शीघ्रं सञ्जायते पुनः ॥ १०२
स्मृतिभ्रंशात् ततस्तस्य पूर्व्वकर्म्मवशेन च।
रतिः सञ्जायते तूर्णं जन्तोस्तत्रैव जन्मनि ॥ १०३
रक्तो मूढ़श्च लोकोऽयं न कार्य्ये सम्प्रवर्त्तते।
न चात्मानं विजानाति न परं न च दैवतम् ॥ १०४
न शृणोति परं श्रेयः सति चक्षुषि नेक्षते।
समे पथि शनैर्गच्छन् स्खलतीव पदे पदे ॥ १०५
सत्यां बुद्धौ न जानाति बोध्यमानो बुधैरपि।
संसारे क्लिश्यते तेन गर्व्वलोभवशानुगः ॥ १०६
गर्भस्मृतेन भावेन शास्त्रमुक्तं शिवेन तु।
तद्दुःखकथनार्थाय स्वर्गमोक्षप्रसाधनम् ॥ १०७
ये सत्यस्मिञ्छिवे ज्ञाने सर्व्वकामार्थसाधने।
न कुर्व्वन्त्यात्मनः श्रेयस्तदत्र महदद्भुतम् ॥ १०८
अव्यक्तेन्द्रियवृत्तित्वाद्बाल्ये दुःखं महत् पुनः।
इच्छन्नपि न शक्नोति वक्तुं कर्त्तुञ्च सत्क्रियाम् ॥ १०९
दन्तोत्थाने महद्दुःखमल्पेन व्याधिना तथा।
बालरोगैश्च विविधैः पीड़ाबालग्रहैरपि ॥ ११०
क्व च क्षुत्तृट्परीताङ्गः क्वचित् तिष्ठति रारटत्।
विण्मूत्रभक्षणाद्यञ्च मोहाद्बालः समाचरेत् ॥ १११
कौमारे कर्णपीड़ायां मातापित्रोश्च साधने।
न कुर्व्वन्त्यात्मनः श्रेयस्तदत्र महदद्भुतम् ॥ ११२
अक्षराध्ययनाद्यैश्च दुःखं स्याद्गुरुताड़ने।

प्रवृत्तेन्द्रियवृत्तित्वात् कामरागप्रपीड़नात्॥ ११३
तदप्राप्तेस्तु सततं कुतः सौख्यं हि यौवने।
ईर्ष्यया च महद्दुःखं मोहयुक्तस्य तस्य च॥ ११४
नेत्रस्य कुपितस्येव रागो दुःखाय केवलम्।
न रात्रौ विन्दते निद्रां कामाग्निपरिवेष्टितः॥ ११५
दिवा चापि कुतः सौख्यमर्थोपार्ज्जनचिन्तया।
स्त्रीष्वायामितचित्तस्य ये पुंसः शुक्रबिन्दवः॥ ११६
ते सुखाय न मन्यन्ते स्वेदजा इव बिन्दवः।
कृमिभिस्तुद्यमानस्य कुष्ठिनः पामनस्य च॥ ११७
कण्डूयनाग्नितापेन यद्भवेत् स्त्रीषु तद्विदः।
यादृशं मन्यते सौख्यं गण्डे पूयविनिर्गमात्॥ ११८
तादृशं स्त्रीषु मन्तव्यं नाधिकं तासु विद्यते।
विष्मूत्रस्य समुत्सर्गात् सुखं भवति यादृशम्॥ ११९
तादृशं स्त्रीषु विज्ञेयं मूढैः कल्पितमन्यथा।
नारीष्ववस्थाभूतासु सर्व्वदोषाश्रयासु च॥ १२०
नाणुमात्रं सुखं तासु कथितं पञ्चचूड़या।
तस्मानमवमानेन वियोगेन च सङ्गमः॥ १२१
यौवनं जरया ग्रस्तं क्व सौख्यमनुपद्रवम्।
वलीपलितखालित्यैः शिथिलीकृतविग्रहम्॥ १२२
सर्व्वक्रियास्वशक्तिञ्च जरया जर्ज्जरीकृतम्।
स्त्रीपुंसयौवनं ह्यन्योन्यस्य प्रियं पुरा॥ १२३
तदेव जरयाग्रस्तमनयोरपि न प्रियम्।
अपूर्व्ववत् स्वमात्मानं जरया परिवर्त्तितम्॥ १२४
यः पश्यन् न विरज्येत कोऽन्यस्तस्मादचेतनः
जराभिभूतः पुरुषः पत्नी-पुत्रादिबान्धवैः॥ ११५
अशक्तत्वादनाद्रियते भृत्यैश्च परिभूयते।
धर्म्ममर्थञ्च कामञ्च मोक्षञ्चातिजरन् यतः॥ १२६
अशक्तः साधितुं तस्माद्युवा धर्म्मं समाचरेत्॥ १२७

इति श्रीशैवे महापुराणे धर्म्मसंहितायां संसारचिकित्सावर्णनं नाम द्विचत्वारिंशोऽध्यायः॥ ४२॥

त्रिचत्वारिंशोऽध्यायः।

कुत्सितं योषिदर्थं यत् स्त्रियोक्तं पञ्चचूड़या।
तस्मै ब्रूहि समासेन यदि तुष्टोऽसि मे मुने॥ १

सनत्कुमार उवाच।

स्त्रीणां स्वभावं वक्ष्यामि शृणु विप्र यथातथम्।
स्त्रियो मूलं हि दोषाणां लघुचित्ताः सदा मुने॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
नारदस्य च संवादं पुंश्चल्या पञ्चचूड़या॥ ३
लोकान् परिचरन् धीमान् देवर्षिर्नारदः पुरा।
ददर्शाप्सरसं ब्राह्मीं पञ्चचूडामनुत्तमाम्॥ ४
पप्रच्छाप्सरसं सुभ्रु नारदो मुनिसत्तमः।
संशयो हृदि मे कश्चित् तन्मे ब्रूहि सुमध्यमे॥ ५
एवमुक्ता तु सा विप्रं प्रत्युवाच वराप्सराः।
विषये सति वक्ष्यामि समर्थां मन्यसेऽथ माम्॥ ६

नारद उवाच।

न त्वामविषये भद्रे नियोक्ष्यामि कथञ्चन।
स्त्रीणां स्वभावमिच्छामि त्वत्तः श्रोतुं सुमध्यमे॥ ७
एतच्छ्रुत्वा वचस्तस्य देवर्षेरप्सरोत्तमा।
प्रत्युवाच न शक्या स्त्री सती वै निन्दितुं स्त्रिया॥ ८
विदितास्ते स्त्रियो याश्च यादृश्यश्च स्वभावतः।
न मामर्हसि देवर्षे नियोक्तुं प्रश्नमीदृशम्॥ ९
तामुवाचाथ देवर्षिः सत्यं वद सुमध्यमे।
मृषावादे भवेद्दोषः सत्ये दोषो न विद्यते॥ १०
इत्युक्ता सा कृतमतिरभवा चारुहासिनी।
स्त्रीदोषाञ्छाश्वतान् सत्यान् भाषितुं सम्प्रचक्रमे॥ ११

पञ्चचूड़ोवाच।

कुलीना नाथवत्यश्च रूपवत्यश्च योषितः।
मर्य्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद॥ १२
न स्त्रीभ्यः किञ्चिदन्यद्वै पापीयस्तरमस्ति वै।
स्त्रियो मूलं हि पापानां तथा त्वमपि वेत्थ ह॥ १३
समाज्ञातानर्थवतः प्रतिरूपान् वशे स्थितान्।
पतीनन्तरमासाद्य नालं भार्य्याः प्रतीक्षितुम्॥ १४
असद्धर्म्मस्त्वयं स्त्रीणामस्माकं भवति प्रभो।
पापीयसो नरान् यद्वै लज्जां त्यक्त्वा भजामहे॥ १५
स्त्रियञ्च यः प्रार्थयते सन्निकर्षञ्च गच्छति।
ईषच्च कुरुते सेवां तमेवेच्छन्ति योषितः॥ १६
अनर्थित्वान्मनुष्याणां भयात् परिजनस्य च।
मर्य्यादायाममर्य्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु॥ १७
नासां कश्चिदमान्योऽस्ति नासां वयसि निश्चयः।

सुरूपी वा कुरूपी वा पुमानेवोपभुज्यते ॥ १८
न भयान्नाप्यनुक्रोशान्नार्थहेतोः कथञ्चन ।
न ज्ञातिकुलसम्बन्धात् स्त्रियस्तिष्ठन्ति भर्त्तृषु ॥ १९
यौवने वर्त्तमानानां मृष्टाभरणवाससाम् ।
नारीणां स्वैरवृत्तीनां स्पृहयन्ति कुलस्त्रियः ॥ २०
या हि शश्वद्बहुमता रक्ष्यन्ते दयिताः स्त्रियः ।
अपि ताः सम्प्रसज्जन्ते कुब्जान्ध-जड़-वामने ॥ २१
पङ्गुष्वपि च देवर्षे ये चान्ये कुत्सिता नराः ।
स्त्रीणामगम्यो लोकेषु नास्ति कश्चिन्महामुने ॥ २२
यदि पुंसां गतिर्ब्रह्मन् कथञ्चिन्नोपपद्यते ।
अप्यन्योन्यं प्रवर्त्तन्ते न च तिष्ठन्ति भर्त्तृषु ॥ २३
अलाभात् पुरुषाणाञ्च भयात् परिजनस्य च ।
वध-बन्धभयाच्चैव तेन ग्रस्ता हि योषितः ॥ २४
चलस्वभावा दुःसेव्या दुर्ग्राह्या भावतस्तथा ।
प्राज्ञस्य पुरुषस्येह यथा वाचस्तथा स्त्रियः ॥ २५
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचनाः ॥ २६
इदमन्यच्च देवर्षे रहस्यं सर्व्वयोषिताम् ।
दृष्ट्वैव पुरुषं हृद्यं योनिः प्रक्लिद्यते स्त्रियः ॥ २७
सुस्नातं पुरुषं दृष्ट्वा सुगन्धं मलवर्ज्जितम् ।
योनिः प्रक्लिद्यते स्त्रीणां दृतेः पात्रादिवोदकम् ॥ २८
कामानामपि दातारं कामानां मान-सान्त्वयोः ।
रक्षितारं न मृष्यन्ति भर्त्तारं परमं स्त्रियः ॥ २९
न कामभोगात् परमान्नालङ्कारार्थसञ्चयात् ।
तथा हि बहु मन्यन्ते यथा रतिपरिग्रहात् ॥ ३०
अन्तकः शमनो मृत्युः पातालं बड़वामुखम् ।
क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ॥ ३१

यतश्च भूतानि महान्ति पञ्च
यतश्च लोको विहितो विधात्रा ।
यतः पुमांसः प्रमदाश्च निर्म्मिता-
स्तदैव दोषः प्रमदासु नारद ॥ ३२

व्यास उवाच ।

इमे वै मानवा लोके स्त्रीषु सज्जन्त्यभीक्ष्णशः ।
मोहेन परमाविष्टा देवादिष्टेन बालिशाः ॥ ३३
कथमासां नराः सङ्गं कुर्व्वन्ति सततं मुने ।
दुर्जेयं दर्पकं मन्ये पुंभिः स्त्रीभिश्च का कथा ॥ ३४
कामेनानिर्ज्जितः कश्चित् तिष्ठतीह महीतले ।
एतद्ब्रूहि मुने सम्यङ्नारीणां चेष्टितं पुनः ॥ ३५
यदिदं सहधर्म्मेति पूर्व्वमुक्तं महर्षिभिः ।
सन्देहः सुमहानेष विरुद्ध इति मे मतिः ॥ ३६
यद्यावृताः स्त्रियः सर्व्वा वेदेष्वपि हि पठ्यते ।
धर्म्मोऽयं पौर्व्विको संज्ञा उपचारः क्रियाविधिः॥३७
गह्वरं प्रतिभात्येतन्मम चिन्तयतोऽनिशम् ।
निखिलेन महाबुद्धे यथा चैतत् प्रवर्त्तितम् ॥ ३८
यथा दृष्टं श्रुतञ्चैव भगवान् प्रब्रवीतु मे ॥ ३९

सनत्कुमार उवाच ।

अष्टावक्रस्य संवादं दिशया सह यत् पुरा ।
आसीत् तच्छृणु कार्त्स्न्य प्रवक्ष्यामि यथातथम् ॥ ४०
अष्टावक्रो द्विजो नाम कन्यां वव्रे गुणान्विताम् ।
वदान्यस्य प्रभां नाम साध्वीं चारित्रभूषणाम् ॥ ४१
ऋषिराह सुतां दद्मि दिशं सन्द्रक्ष्यसे यदि ।
त्वमुत्तरामह साधो स तमाह पुनर्मुनिम् ॥ ४२
तथेदानीं महाकार्य्यं वक्तुमर्हति मे भवान् ।
किं द्रष्टव्यं मया तत्र यथा वक्ष्यति मां भवान् ॥ ४३

वदान्य उवाच ।

धनदं समतिक्रम्य हिमवन्तं तथैव च ।
रुद्रस्यायतनं दृष्ट्वा सिद्ध-चारणसेवितम् ॥ ४४
ततो नीलं वनोद्देशं द्रक्ष्यसे मेघसन्निभम् ।
रमणीयं मनोग्राहि तत्र द्रक्ष्यसि वै स्त्रियम् ॥ ४५
तपस्विनीं महाभागां वृद्धां दीक्षामनुष्ठिताम् ।
द्रष्टव्या सा त्वया तत्र सम्पूज्या चैव यत्नतः ॥ ४६
तां दृष्ट्वा विनिवृत्तस्त्वं पाणिग्राहं ग्रहीष्यसि ।
यद्येष समयः सत्यः साध्यतां गम्यतामिति ॥ ४७

अष्टावक्र उवाच ।

यत्र त्वं वक्ष्यसे साधो तत्र यास्याम्यसंशयम् ।
तथा तु साधयिष्यामि भवान् भवतु सत्यवाक् ॥ ४८
ततोऽगच्छत् स भगवानुत्तरां दिशमुत्तमाम् ।
हिमवन्तं गिरिश्रेष्ठं सिद्ध-चारणसेवितम् ॥ ४९
गत्वा प्राप नदीं पुण्यां बाहुदां पुण्यवाहिनीम् ।
तत्रासौ विधिना स्नात्वा शयने स उवास ह ॥ ५०
स्नात्वा प्रातरथोत्थाय रुद्राणीकूपमाव्रजत् ।
तत्र स्नात्वा समुत्थाय कैलासमभितो ययौ ॥ ५१

मन्दाकिनीं धनेशस्य रक्षितां गुह्यकैः सदा ।
स्नात्वा तत्रोपविष्टोऽसौ ततो यक्षास्तमब्रुवन् ॥ ५२
वैश्रवणोऽयमायाति त्वां द्रष्टुमृषिसत्तम ।
ततो वैश्रवणोऽभ्येत्य पूजयित्वा तमब्रवीत् ॥ ५३
भवनं प्रविश त्वं मे यथाकामं सुसत्कृतः ।
ततस्तं स पुरस्कृत्य प्राविशद्भवनं स्वकम् ॥ ५४
पाद्यार्घ्यासनेनैव पूजाभिस्तमपूजयत् ।
निविष्टेदुर्न्त्र-गन्धर्व्वा धनदो वाक्यमब्रवीत् ॥ ५५
तवाज्ञया मुने सर्व्वा नृत्येरन् पुंश्चलीरिह ।
आतिथ्यं परमं कार्य्यं भवतो वाढ़मिच्छसौ ॥ ५६
ततो वरा घृताची च मिश्रकेशी तथोर्व्वशी ।
रम्भा त्वलम्बुषा चित्रा विश्वाची च मनोहरा ॥ ५७
सुकेशी सुमुखी चैव हासिनी च रतिप्रिया ।
एताश्चान्याश्च नृत्येयुर्वाद्यानि विविधानि च ॥ ५८
अवादयंश्च गन्धर्व्वा ऋषेस्तु पुरतोऽनिशम् ।
दिव्ये संवत्सरे तत्र गते साग्रे ऋषेर्भयात् ॥ ५९
धनी प्राह ततो नृत्यं मुने ते ह प्रपश्यतः ।
साग्रः संवत्सरो जातः साम्प्रतं करवाणि किम् ॥ ६०
सर्व्वमाज्ञाप्यतामाशु परवन्तो वयन्त्विति ।
अथ तुष्टस्तु तं प्राह पूजितोऽस्मि धनेश्वर ॥ ६१
त्वया कार्य्यस्य सिद्ध्यर्थं यास्यामि बुद्धिमान् भव ।
अथ निष्क्रम्य त्वरितः प्रययावुत्तरामुखः ॥ ६२
कैलासं मन्दरं हैममतीत्य हरपर्व्वतम् ।
शिरसा तं नमस्कृत्य उत्ततारोत्तरामुखः ॥ ६३
समेन भूमिभागेन या वोढ़व्याऽन्यशेषतः ।
ततो वरं वनोद्देशं नन्दनोपममुत्तमम् ॥ ६४
तत्राश्रमपदं रम्यमष्टावक्रो ददर्श सः ।
शैलांश्च विविधांस्तत्र हेमरत्नमयाञ्छुभान् ॥ ६५
मणिरत्नमयीं भूमिं पुष्करिण्यः शुभोज्ज्वलाः ।
अन्यान्यपि सुरम्याणि महर्षिर्भावितात्मनः ॥ ६६
भृशं तस्य मनो रेमे ददर्श सुबहून्यपि ।
स तत्र काञ्चनं दिव्यं धनदस्य गृहाद्वरम् ॥ ६७
ददर्शाद्भुतसङ्काशं सर्व्वरत्नमयं गृहम् ।
महान्तस्तत्र विविधाः काञ्चनाः पर्व्वतोत्तमाः ॥ ६८
तन्मूर्द्ध्नि च विमानानि रम्याण्यप्सरसां गणैः ।
मन्दारपुष्पसङ्कीर्णा तत्र मन्दाकिनी नदी ॥ ६९
स्वयंप्रभावा मणयो वज्रैर्भूमिः सुभूषिता ।
नानाविधैश्च भवनैर्मणिरत्नविभूषितैः ॥ ७०
मुक्ताजालपरिक्षिप्तैर्विचित्रमणितोरणैः ।
ऋषिः समन्ततोऽपश्यत् संवृतं पर्व्वतं शुभम् ॥ ७१
शुभं मनोदृष्टिहरैर्हर्म्यैस्तत्र मनोरमम् ।
अथ द्वारमभिगतः क्व मे वासो भवेदिति ॥ ७२
ततोऽभवत् तस्य चिन्ता गत्वा स्थित्वा ततोऽब्रवीत् ।
अतिथिं मामनुप्राप्तमनुजानन्तु येऽत्र वै ॥ ७३
नानारूपाः सप्त मुने गृहात् तस्माद्विनिर्ययुः ।
शुभाः कन्याः प्रहृष्टाश्च ऋषेः सर्व्वा मनोरमाः ॥ ७४
न शक्नुमो वर्णयितुं सा सा तत्र मनोहरा ।
यां यां प्रपश्येत् कन्यां स सर्व्वाभरणभूषिताम् ॥ ७५
अथ तं प्रमदाः प्रोचुर्भगवान् प्रविशत्विति ।
स च तासां सुरूपाणां प्रविवेश गृहं द्विजः ॥ ७६
कौतूहलसमाविष्टस्तस्यैव भवनस्य च ।
तत्रापश्यच्छुभां कन्यां सर्व्वाभरणभूषिताम् ॥ ७७
रत्नपर्य्यङ्कमासीनां विरजोऽम्बरधारिणीम् ।
प्रत्युत्थाय च तं विप्रं साध्वी त्वभ्यवदत् तदा ॥ ७८
स्वस्त्यस्त्विति च तेनोक्ता आस्यतामित्युवाच सा ।
कामभावाः स ता दृष्ट्वा ताः प्राह विस्मयान्वितः ॥ ७९

अष्टावक्र उवाच ।

या प्रसन्ना शुभाचारा एका मामनुतिष्ठतु ।
शेषाः स्वानालयान् यान्तु विश्रमेऽहं सुखञ्च यत् ॥ ८०
अथ तास्तमृषिं नत्वा ययुः सर्व्वाः स्वमालयम् ।
एका तत्रैव सातिष्ठत् पर्य्यङ्के तेन संयुता ॥ ८१
वृद्धा भूत्वा पर्य्यचरद्ब्राह्मणं शंसितव्रतम् ।
अथ तां संविशन् प्राह रजनी ह्यतिवर्त्तते ॥ ८२
त्वयापि सुप्यते भद्रे शयने भास्वरे तदा ।
द्वितीये शयने दिव्ये तया विप्रेण भाषिता ॥ ८३
संलापात् तेन विप्रेण संविवेश महाप्रभो ।
अथ सा वेपमानाङ्गी शयनन्त्वभिरोहताम् ॥ ८४
व्यपदिश्य महर्षिं वै निमित्तं शीतजं तदा ।
स्वागतं स्वागतञ्चास्तु तमृषिं मुनिसत्तमम् ॥ ८५
सोपगुह्य भुजाभ्यां तं भगवन्तमभाषत ।
निर्व्विकारमृषिं दृष्ट्वा काष्ठलोष्टोपमं तदा ॥ ८६
दुःखिता प्रेक्ष्य संजल्पमकार्षीद्धर्षिणा सह ।

स्त्र्युवाच।

कामेन मोहिता चाहं स्त्रीणां पुरुषतोऽस्तृतिः ॥ ८७
ब्रह्मन् न कामकारोऽस्ति तां भजन्तीं भजस्व माम्।
उपगूह च मां विप्र समागच्छ मया सह ॥ ८८
प्रहृष्टो भव विप्रर्षे कामार्त्ताहं स्वयं त्वयि।
एतद्धि तव धर्म्मात्मंस्तपसः पूज्यते फलम् ॥ ८९
प्रार्थितो दर्शनादेव भजमानां भजस्व माम्।
प्रभुत्वं तव सर्व्वत्र यच्चान्यदपि पश्यसि ॥ ९०
सद्म चेदं वनं यच्च मम चैव न संशयः।
सर्व्वान् कामान् विधास्यामि सर्व्वकामफलप्रदा ॥९१
रमणीये वनोद्देशे रम त्वं सहितो मया।
त्वद्वशाहं भविष्यामि रंस्यसे च मया सह ॥ ९२
सर्व्वान् कामानुपाश्नानो ये दिव्या ये च मानुषाः।
नातः परं हि नारीणां कार्य्यं किञ्चन विद्यते ॥ ९३
यथा पुरुषसंसर्गः परमेतद्धि नः फलम्।
आत्मच्छन्देन वर्त्तन्ते नार्य्यो मन्मथनोदिताः ॥ ९४
न च दह्यन्ति गच्छन्त्यः सुतप्तैरपि पांशुभिः।

अष्टावक्र उवाच।

परदारानहं भद्रे न गच्छेयं कथञ्चन ॥ ९५
दूषितं धर्म्मशास्त्रेषु परदाराभिमर्शनम्।
भद्रे निर्व्विष्टकामं मां विद्धि सत्येन ते शपे ॥ ९६
विषयेष्वनभिज्ञोऽहं पुत्रार्थं किल सन्ततिः।
एवं लोकान् गमिष्यामि पुत्त्रैरिति न संशयः ॥ ९७
भद्रे धर्म्मं विजानीष्व ज्ञात्वा चोपरमस्व ह।

स्त्र्युवाच।

नानिलोऽग्निर्न वरुणो न चापि त्रिदशा द्विज ॥ ९८
प्रियः स्त्रीणां यथा कामो रतिशीला हि योषितः।
सहस्रायेकतां नारीं प्राप्नोतीह कदाचन ॥ ९९
तथा शतसहस्रेषु यदि काचित् पतिव्रता।
नैता जानन्ति पितरं न कुलं न च मातरम् ॥ १००
न भ्रातॄन् न च भर्त्तारं न पुत्त्रान् न च देवरम्।
लीटयन्ति कुलं नार्य्यः कूलानीव सरिद्वराः ॥ १०१
दोषानमन्दं मन्दांश्च प्रजापतिरभाषत।

सनत्कुमार उवाच।

ततः स मुनिरेकाग्रस्तां स्त्रियं प्रत्युवाच ह ॥ १०२
आस्यतां रुचिरं छन्दात् किं वा कार्य्यं वदस्व मे।
सा स्त्री प्रोवाच भगवन् द्रक्ष्यसे देशकालतः ॥ १०३
वस तावन्महाप्राज्ञ कृतकृत्यो गमिष्यसि।
ब्रह्मर्षिस्तामथोवाच स तथेति महामुने ॥ १०४
वसेयं यावदुत्साहो भवत्या नात्र संशयः।
अथ सर्षिरभिप्रेक्ष्य स्त्रियं तां जरयान्विताम् ॥ १०५
चिन्तां परमिकां लेभे सन्तप्त इव चाभवत्।
यद्यदङ्गं हि सोऽपश्यत् तस्या विप्रर्षभस्तदा ॥ १०६
नारमत् तत्र तत्रास्य दृष्टी रूपपराजिता।
देवतेयं गृहस्यास्य शापान्नूनं विरूपिता ॥ १०७
शापस्य कारणं वक्तुं न युक्तं सहसा मया।
अथ चिन्तयतस्तस्य तमर्थं ज्ञातुमिच्छतः ॥ १०८
अगमत् तदहःशेषं मनसा व्याकुलेन तु।
अथ सा स्त्री तदोवाच भगवन् पश्य वै रवेः ॥ १०९
रूपं सन्ध्याभ्रसंयुक्तं किमुपस्थाप्यतां तव।
स उवाच तदा तां स्त्रीं स्नानोदकमिहानय ॥ ११०
उपासिष्ये ततः सन्ध्यां वाग्यतो नियतेन्द्रियः।
अथ सा स्त्री तमुक्त्वा वै विप्रमेवं भवत्विति ॥ १११
दिव्यतैलमुपादाय स्नानशाटीमुपानयत्।
अनुज्ञाता च मुनिना सा स्त्री तेन महात्मना ॥ ११२
अथास्य तैलेनाङ्गानि सर्व्वाण्येवास्य स्नापयत्।
शनैश्चोत्साञ्छितं तत्र स्नानशालामुपानयत् ॥ ११३
भद्रासनं तत्र चित्रमृषिरन्वाविशन्नवम्।
तथोपविष्टं प्रयता तस्मिन् भद्रासने शुभा ॥ ११४
स्नापयामास शनकैस्तमृषिं सुखहस्तवत्।
दिव्यञ्च विविधं चक्रे सोपचारं मुनेस्तदा ॥ ११५
मार्दवेन सुसुखोष्णेन तस्या हस्तसुखेन च।
व्यतीतां रजनीं कृत्स्नां न जज्ञौ स महामनाः ॥११६
तत उत्थाय स मुनिस्तदा परमविस्मितः।
पूर्व्वस्यां दिशि सोमञ्च सोऽपश्यदुदितं दिवि ॥ ११७
तस्य बुद्धिरियं किं नु मोहस्तत्त्वमिदं भवेत्।
अथोपास्य सहस्रांशुं किं करोमीत्युवाच ताम् ॥११८
सा चामृतरसप्रख्यमृषेरन्नमुपानयत्।
तस्य स्वादुतयान्नस्य न प्रभूतं चकार सः ॥ ११९
व्यगमच्चाप्यहःशेषं ततः सन्ध्यागमत् पुनः।
अथ स्त्री भगवन्तं सा सुप्यतामित्यचोदयत् ॥ १२०
तत्र वै शयने दिव्ये तस्य तस्याश्च कल्पिते।

अष्टावक्र उवाच।

न भद्रे परदारेषु मनो मे सम्प्रसज्जति ॥ १२१
उत्तिष्ठोत्तिष्ठ भद्रं ते स्वप चैव रमस्व च।

सनत्कुमार उवाच।

सा तदा तेन विप्रेण तथाव्युक्त्वा निवर्त्तिता ॥ १२२
स्वतन्त्रास्मीत्युवाचैनं न धर्मच्छलमस्ति ते।

अष्टावक्र उवाच।

नास्ति स्वतन्त्रता स्त्रीणामस्वतन्त्रा हि योषितः॥१२३
प्रजापतिमतं ह्येतन्न स्त्री स्वातन्त्र्यमर्हति।

स्त्र्युवाच।

बाधते मैथुनं विप्र मम भक्तिञ्च पश्यसि ॥ १२४
भूमौ निपतमानायाः शरणं मे भवानघ।
यदि वा दोषजातं त्वं परदारेषु पश्यसि ॥ १२५
आत्मानं स्पर्शयाम्यद्य पाणिं गृह्णीष्व मे द्विजः।
न दोषो भविता तेऽद्य सत्येनैव ब्रवीम्यहम् ॥ १२६
स्वतन्त्रां मां विजानीहि योऽधर्म्मः सोऽस्तु वै मयि।
अधर्म्मं प्राप्स्यसे विप्र यन्मां त्वं नाभिनन्दसि ॥ १२७

अष्टावक्र उवाच।

हरन्ति दोषजातानि नरं यातु यथेच्छकम्।
न रंस्ये परदारेषु भद्रे स्वं शयनं व्रज ॥ १२८

स्त्र्युवाच।

शिरसा प्रणमे विप्र प्रसादं कर्त्तुमर्हसि।
त्वय्यावेशितचित्ता च स्वतन्त्रास्मि भजस्व माम् ॥१२९

अष्टावक्र उवाच।

स्वतन्त्रासि कथं भद्रे ब्रूहि कारणमत्र वै।
नास्तिलोकेहि काचित्स्त्रीयावै स्वातन्त्र्यमर्हति१३०

स्त्र्युवाच।

कौमारं ब्रह्मचर्य्यं मे कन्यैवास्मि न संशयः।
कुमार विमतिं विप्र श्रद्धां नो विजहीहि मे ॥ १३१

अष्टावक्र उवाच।

यथा मम तथा तुभ्यं यथा तव तथा मम।
जिज्ञासेयमृषिस्तस्य विघ्नं सत्यन्तु किं भवेत् ॥ १३२
आश्चर्यं परमं हीदं किन्तु श्रेयो हि मे भवेत्।
दिव्याभरणवस्त्रा हि कन्येयं मामुपस्थिता ॥ १३३
किन्त्वस्याः परमं रूपं जीर्णमासीत् कथञ्चन।
कन्यारूपमिहाद्यैव किमिहात्रोत्तरं भवेत् ॥ १३४
यथा त्वत्तः पर शक्त्या न व्युत्थास्ये कदाचन।
न रोचयेऽहं व्युत्थानं त्वय्येव साधयिष्यसि ॥ १३५

व्यास उवाच।

न बिभेति कथं सा स्त्री शापस्य परमद्युतेः।
कथं निवृत्तो भगवांस्तद्ब्रवीतु महामुने ॥ १३६

सनत्कुमार उवाच।

अष्टावक्रोऽन्वपृच्छत् तां रूपं विकुरुषे कथम्।
अनृतञ्च न वक्तव्यं ब्रूहि ब्राह्मणकाम्यया ॥ १३७

स्त्र्युवाच।

द्यावापृथिव्योर्मात्रैषा काम्या ब्राह्मणसत्तम।
शृणुष्वावहितः सर्व्वं यदिदं सत्यविक्रम ॥ १३८
उत्तरां मां दिशं विद्धि दृष्टं स्त्रीचापलञ्च ते।
अभ्युत्थानेन वै लोका जिताः सत्यपराक्रम ॥ १३९
जिज्ञासेयं प्रयुक्ता मे स्थिरीकर्त्तुं तवानघ।
स्थविराणामपि स्त्रीणां बाधते मैथुनो ज्वरः ॥१४०
तुष्टः पितामहस्तेऽद्य तथा देवाः सवासवाः।
स त्वं येन च कार्य्येण सम्प्राप्तो भगवन्निति ॥ १४१
प्रेषितस्तेन विप्रेण कन्यार्थमृषिसत्तम।
तवोपदेशं कर्त्तुं वै तच्च सर्व्वं कृतं मया ॥ १४२
क्षेमं गमिष्यसि गृहं श्रमश्च न भविष्यति।
कन्यां प्राप्स्यसि तां विप्र पुत्रिणी सा भविष्यति ॥१४३
काम्यया पृष्टवांस्त्वं मे ततो व्याहृतमुत्तरम्।
अनतिक्रमणीयैषा कृत्स्नैर्लोकैस्त्रिभिः सदा ॥ १४४
गच्छस्व सुकृतं कृत्यं किञ्चान्यच्छ्रोतुमिच्छसि।
यावद्ब्रवीमि विप्रर्षे अष्टावक्र यथातथम् ॥ १४५
ऋषिप्रसादिता चास्मि तव हेतोर्द्विजर्षभ।
तस्य सम्मानार्थं मे त्वयि वाक्यं प्रभाषितम् ॥ १४६

सनत्कुमार उवाच।

श्रुत्वा तु वचनं तस्याः स विप्रः प्राञ्जलिस्तदा।
अनुज्ञातस्तया चापि स्वगृहं पुनराविशत् ॥ १४७
गृहमागम्य विश्रान्तः स्वजनं प्रतिपूज्य च।
अभ्यगच्छत तं विप्रं न्यायतः प्रीतिपूर्व्वकम् ॥ १४८
पृष्टश्च तेन विप्रेण दृष्टमेतन्निदर्शनम्।
प्राह विप्रं ततो विप्रः सुप्रीतेनान्तरात्मना ॥ १४९
भवताहमनुज्ञातः प्रस्थितो गन्धमादनम्।
तस्य चोत्तरतो देशे दृष्टं तद्दै वनं महत् ॥ १५०

तया चाहमनुज्ञातो भवाश्चापि प्रकीर्त्तितः।
श्रावितश्चास्मि त्वद्वाक्यं गृहञ्चाभ्यागतः प्रभो ॥ १५१
तमुवाच ततो विप्रः प्रतिगृह्णीष्व मे सुताम्।
नक्षत्र-तिथिसंयोगे पात्रं हि परमं भवान् ॥ १५२
अष्टावक्रस्तथेत्युक्त्वा प्रतिगृह्य च तां शुभाम्।
कन्यां परमधर्म्मात्मा प्रीतिमांश्चाभवत् तदा ॥ १५३
कन्यां तां प्रतिजग्राह भार्य्यां परमशोभनाम्।
ईदृशास्तु सदा नार्य्यो भवत्येका पतिव्रता ॥ १५४
यस्याः सङ्कीर्त्तनात् सद्यः सर्व्वपापक्षयो भवेत्।
नराः के त्वीदृशा नित्यं येषां सङ्कीर्त्तनात् कलिः॥ १५५
वर्षस्थोऽपि हि निर्याति सर्व्वकार्य्यप्रवर्त्तकः ॥ १५६

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः।

सनत्कुमार उवाच।

पुनरन्यत् तु वक्ष्यामि अरुन्धत्या यथा वचः।
असतीत्वे यथा स्त्रीणां तच्छृणुष्व महामुने ॥ १
पुरादित्यश्च शक्रश्च धूमकेतुरचिन्तयन्।
सदा स्त्रीणां पतिर्द्देवो रविरग्निर्द्विजन्मनाम् ॥ २
तथातिथिर्गृहस्थानां नृपादीनां द्विजोत्तमाः।
एते स्युर्यदि सन्तुष्टा ब्रह्म-विष्णु-महेश्वराः ॥ ३
भवन्ति सुखिनो नित्यं देवा इन्द्रपुरोगमाः।
इहाप्तिर्धर्म्मकामाणां परत्र च शुभा गतिः ॥ ४
अतः समीक्षितोऽस्माभिः सत्यमस्तीह योषिताम्।
असत्यं साहसं माया मूर्खत्वमतिलोभता ॥ ५
अशौचं निर्द्दयत्वञ्च स्त्रीणां दोषाः स्वभावजाः।
श्रूयन्ते योषितः काश्चित् सत्त्वधर्म्मे समास्थिताः ॥ ६
द्विजास्तथा स्वकर्म्मस्था गृहिणो गृहकर्म्मणि।
राजानोऽथ विशश्चापि प्रजापालनतत्पराः ॥ ७
अरुन्धती वशिष्ठस्य प्रख्यातास्ति पतिव्रता।
यस्याः साम्येन तद्रूपं न चकार पतिव्रता ॥ ८
स्वाहा चैवापि तां दृष्ट्वा पुरा विस्मयमागमत्।
धन्या त्वमसि कल्याणि या त्वमेका पतिव्रता ॥ ९
न ते रूपमहं कर्त्तुं शक्ता चान्या करिष्यति।
तस्मात् त्वां याः स्त्रियः काश्चित्प्रेक्षिष्यन्तिसुभावतः॥ १०
करं स्पृष्ट्वोढ़काले तु भर्त्तुर्द्विजाग्निसन्निधौ।
सुखं तासां धनं पुत्राश्चावैधव्यं भविष्यति ॥ ११
एवं या साभिमन्तव्या गुणैर्युक्ता पतिव्रता।
प्रोच्यते स्त्रीभिरन्याभिर्गुणी वेत्ति यतो गुणान् ॥ १२
गच्छामोऽतो वयं प्रष्टुं व्रतं स्त्रीणां पतिव्रताम्।
इत्युक्त्वा ते ययुर्द्देवास्त्रयः सूर्य्येन्द्रवह्नयः ॥ १३
ततो ददृशुरायान्तीं स्वधाम्नो घृतकुम्भकाम्।
अरुन्धतीं पतिप्राणां पत्युः प्रियहिते रताम् ॥ १४
दृष्ट्वा तां हर्षतस्तस्थुरग्रे तस्यास्तु वर्त्मनि।
ततः सा तान् मुदा दृष्ट्वा ज्ञात्वा देवानरुन्धती ॥ १५
प्रदक्षिणमुपावृत्य प्रणिपत्य पुनः पुनः।
प्राह तान् सुनिकृत्यं यत् तद्ब्रुवन्तु दिवौकसः ॥ १६
तच्छ्रुत्वा ते वचस्तस्याः प्रोचुस्तां वरवर्णिनीम्।
प्रष्टुं वयं समायाताः कञ्चित् प्रश्नं हि नो वद ॥ १७
सा च तानाह मे धाम्नि विश्रमध्वं क्षणादनु।
कथयिष्यामि तत् सर्व्वं प्रश्नं चेष्टितमात्मनः ॥ १८
यावद्यायामि संगृह्य जलपूर्णमिमं घटम्।
ते तामूचुर्घटं ते तु जलेनाशु अबीभरन् ॥ १९
निवृत्य कथयास्माकं येन गच्छामहे वयम्।
तच्छ्रुत्वा वाढ़ं तानाह पूरयध्वमिमं घटम् ॥ २०

इन्द्र उवाच।

जन्मतो ब्राह्मणस्येह यदि मे न भयं भवेत्।
तपसा ब्रह्मचर्य्येण स्वर्गान्मां च्यावयिष्यति ॥ २१
तेन सत्येन मे देवि पादः कुम्भस्य पूर्य्यताम्।

अग्निरुवाच।

हव्यैर्वाप्यथवा कव्यैर्हविष्यैरस्मि तर्पितः ॥ २२
यदि मे तृप्तिरस्तीह ब्राह्मणे वान्नतर्पिते।
तेन सत्येन मे देवि पादः कुम्भस्य पूर्य्यताम् ॥ २३

सूर्य्य उवाच।

ब्राह्मणाः प्रीतितो नित्यं संगृहीतो महासुरैः।
जलपूर्णप्रसृत्यापि नो चेद्धन्युरर्द्दमि किम् ॥ २४
तेन सत्येन मे देवि पादः कुम्भस्य पूर्य्यताम्।

अरुन्धत्युवाच।

यावद्रक्षो न वा स्त्रीणां यावन्नैवाभिभाषणम् ॥ २५
तावत् तासां सतीत्वं स्यात् तस्माद्रक्ष्या वरस्त्रियः।

तेन सत्येन मे देवाः पादः कुम्भस्य पूर्य्यताम् ॥ २६
इत्युक्ते जलसम्पूर्णो कुम्भे देवा ब्रुवंस्ततः ।
एतदेव वयं देवि त्वत्समीपमिहागताः ॥ २७
स्त्रीणां हि चरितं प्रष्टुमतो याम: स्वमालयम् ।
इत्युक्तां तानुवाचेदमुत्तमाधममध्यमाः ॥ २८
सन्ति नो विस्मयः कार्य्यः स्त्रियो हि देवसम्मताः ।
इत्युक्तास्ते ययुर्धाम स्वं स्वमिन्द्रपुरोगमाः ॥ २९

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः ।

सनत्कुमार उवाच ।

विवाहं कारयेत् पश्चाद्विधिवद्द्विजपुङ्गवैः ।
ततः संपूजयेद्विप्रान् सपत्नीकान् महामुने ॥ १
भक्ष्यैर्भोज्यैर्गन्धमाल्यैर्वस्त्रैराभरणैर्द्विजः ।
ततः क्षमापयेद्विप्रानिमं मन्त्रमुदाहरेत् ॥ २
यथा भद्रे मदुहिता यमात् प्राप्नुवती वरान् ।
तथाहं प्राप्नुयां देव वरान् सर्व्वान् मनोरमान् ॥ ३
इत्युक्त्वा प्रणिपत्याथ द्विजेन्द्रांस्तान् विसर्ज्जयेत् ॥ ४

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः ।

देव्युवाच ।

भगवंस्त्वत्प्रसादेन ज्ञातं मे सकलं मतम् ।
यथार्च्चनन्तु ते देव येर्मन्त्रैश्च यथाविधि ॥ १
अद्यापि संशयो ह्येकः कालचक्रं प्रति प्रभो ।
मृत्युचिह्नं यथा देव किं प्रमाणं तथायुषः ॥ २
यथा कथय मे नाथ यद्यहं तव वल्लभा ।

ईश्वर उवाच ।

सत्यं ते कथयिष्यामि येन कालः प्रबुध्यते ॥ ३
अहः पक्षं तथा मासमृतुञ्चायनवत्सरम् ।
स्थूलसूक्ष्मगतैश्चिह्नैर्बहिरन्तर्गतैस्तथा ॥ ४
तत् तेऽहं संप्रवक्ष्यामि शृणु तत्त्वेन सुन्दरि ।
अकस्मात् पाण्डुरं देहमूर्द्धरागं समन्ततः ॥ ५
मुखं कर्णौ तथा चक्षुर्जिह्वा स्तम्भो यदा भवेत् ।
तदा मृत्युं विजानीयात् षण्मासाभ्यन्तरं प्रिये ॥ ६
रौरवानुगतं भद्रे ध्वनिनं नाकर्णयेद्द्रुतम् ।
षण्मासाभ्यन्तरं मृत्युर्ज्ञातव्यः कालवेदिभिः ॥ ७
रविसोमाग्निसंयोगाद्वयद्योद्योतं न पश्यति ।
कृष्णं सर्पं समस्तञ्च षण्मासं जीवितं तथा ॥ ८
वामहस्तो यदा देवि सप्ताहं स्पन्दते प्रिये ।
उन्मीलयन्ति गात्राणि तालुकं शुष्यते यदा ॥ ९
जीवितन्तु तदा तस्य मासमेकं न संशयः ।
नासा तु स्रवते यस्य त्रिदोषे पक्षजीवितम् ॥ १०
वक्त्रं कण्ठश्च शुष्येत षण्मासान्ते गतायुषः ।
स्थूला जिह्वा भवेद्यस्य द्विजाः क्लिद्यन्ति भामिनि ११
षण्मासाज्जायते मृत्युश्चिह्नैस्तैरुपलक्षयेत् ।
अम्बु-तैल-घृतस्थन्तु दर्पणे वरवर्णिनि ॥ १२
पश्यते न यदात्मानं विकृतं स्थूलमेव च ।
षण्मासायुः स विज्ञेयः कालचक्रं विजानता ॥ १३
शिरोहीनां यदा छायां स्वकीयामुपलक्षयेत् ।
अथवा छायया हीनं मासमेकं न जीवति ॥ १४
आङ्गिकाः कथिता भद्रे बाह्यस्थान् शृणु साम्प्रतम् ।
रश्मिहीनं यदा देवि सोमार्कमण्डलद्वयम् ॥ १५
दृश्यते पटलाकारं मासार्द्धेन विपद्यते ।
अरुन्धती महायानमिन्दुलाञ्छनवर्ज्जितम् ॥ १६
सोऽपि जीवति वर्षार्द्धं तथा वादृष्टतारकः ।
मेघहीनं यदा देवि विद्युद्भिर्ज्वलितं नभः ॥ १७
दृष्टे गृहे च दिङ्मोहः षण्मासाज्जायते ध्रुवम् ।
रात्रौ धनुर्यदा पश्येन्मध्याह्ने चोल्कापातनम् ॥ १८
वेष्ट्यते गृध्र-काकैश्च षण्मासायुर्न संशयः ।
ऋषयः स्वर्गपन्थाश्च नैव दृश्येत चाम्बरे ॥ १९
षण्मासायुर्विजानीयात् पुरुषैः कालवेदिभिः ।
अकस्माद्राहुणा ग्रस्तं सूर्य्यं वा सोममेव च ॥ २०
दिक्चक्रं भ्रान्तवत् पश्येत् षण्मासान्म्रियते स्फुटम् ।
मक्षिकैर्नीलवर्णाभिरकस्माद्वेष्ट्यते पुमान् ॥ २१
जीवते मासमेकन्तु ज्ञातव्यं परमार्थतः ।
गृध्रः काकः कपोतश्च शिरश्चाक्रम्य तिष्ठति ॥ २२
शीघ्रन्तु म्रियते जन्तुर्मासिकेन न संशयः ।

एवञ्चारिष्टभेदन्तु वाह्यस्थं समुदाहृतम् ॥ २३
आयुधानां हितार्थाय संक्षेपेण वदाम्यहम् ।
हस्तयोरुभयोर्देवि यथाकालं विजानते ॥ २४
वाम-दक्षिणयोर्भद्रे प्रलक्षं ते वदाम्यहम् ।
वामं शुक्लं विजानीयाद्दक्षिणं कृष्णसंज्ञितम् ॥ २५
दक्षिणं सूर्य्यमित्याहुर्वामश्चन्द्र उदाहृतः ।
एवं पक्षौ स्थितौ तौ तु समासात् सुरसुन्दरि ॥ २६
शुचिर्भूत्वा वरेद्देवं सुस्नातः संयतेन्द्रियः ।
हस्तौ प्रक्षाल्य क्षीरेणालक्तकेन तु मर्द्दयेत् ॥ २७
गन्धैः पुष्पैः करौ कृत्वा लगयेच्च शुभाशुभम् ।
कनिष्ठामादितः कृत्वा यावदङ्गुष्ठकं प्रिये ॥ २८
पर्व्वत्रयक्रमेणैव हस्तयोरुभयोरपि ।
प्रतिपदादि विन्यस्य तिथिं प्रतिपदादितः ॥ २९
सम्पुटाकारहस्तौ तु पूर्व्वादिमुखसंस्थितः ।
स्मरेन्नवार्णकं मन्त्रं यावदष्टोत्तरं शतम् ॥ ३०
निरीक्षयेत् ततो हस्तौ सर्व्वपर्व्वणि यत्नतः ।
तस्मिन् पर्व्वणि तद्रेखा दृश्यते भृङ्गसन्निभा ॥ ३१
तत्तिथौ मृत्युर्विज्ञेयः कृष्णे शुक्ले तथा प्रिये ।
निश्चितं मरणं तस्य कालचक्रस्य कीर्त्तितम् ॥ ३२
अधुना नादजं वक्ष्ये संक्षेपात् काललक्षणम् ।
गमागमं विदित्वा तु कर्म्म कुर्य्याच्छृणु प्रिये ॥ ३३
आत्मविज्ञानं सुश्रोणि चारं ज्ञात्वा तु तत्त्वतः ।
क्षणं त्रुटिर्लवश्चैव निमेषं काष्ठकालिकम् ॥ ३४
मुहूर्त्तकन्त्वहोरात्रं पक्षमासर्त्तुवत्सरम् ।
अब्दं युगं तथा कल्पं महाकल्पं तथैव च ॥ ३५
एवं संहरते कालः परिपाट्या सदाशिवः ।
वाम-दक्षिणमध्ये तु पथि त्रयमिदं स्मृतम् ॥ ३६
दिनानि पञ्च चारभ्य पञ्चविंशद्दिनावधि ।
वाम-चारगतो नादः प्रमाणं कथितं तव ॥ ३७
भूतरन्ध्रदिशश्चैव ध्वजश्च वरवर्णिनि ।
वामचारगतो नादः प्रमाणं कालवेदिनः ॥ ३८
ऋतुविकारभूताश्च गुणास्तत्रैव भामिनि ।
प्रमाणं दक्षिणं प्रोक्तं ज्ञातव्यं प्राणवेदिभिः ॥ ३९
भूतसंख्यां यदा प्राणो वहते च दृढ़ादयः ।
वर्षत्रयं तदा तस्य जीवितस्य न संशयः ॥ ४०
दिना दश प्रवाहेण द्वावब्दानि स जीवति ।
पञ्चदशप्रवाहेण अब्दमेकं गतायुषः ॥ ४१
विंशद्दिनप्रवाहेण षण्मासं लक्षयेत् तथा ।
पञ्चविंशद्दिनानान्तु वहते वामनाड़िका ॥ ४२
जीवितन्तु तदा तस्य मासत्रयगतायुषः ।
षड्विंशद्दिनमानेन मासद्वयगतायुषः ॥ ४३
सप्तविंशद्दिनानान्तु वहते लतिविश्रगा ।
मासमेकं समाख्यातं जीवितं वामगोचरे ॥ ४४
एतत्प्रमाणं विज्ञेयं वामवायुप्रमाणतः ।
सव्येतरे दिनान्ये च चत्वार अनुपूर्व्वशः ॥ ४५
चतुःस्थाने स्थिता देवि षोड़शैताः प्रकीर्त्तिताः ।
तेषां प्रमाणं वक्ष्यामि अधुना हि हितार्थतः ॥ ४६
षड्दिनान्यादितः कृत्वा संख्यायाश्च यथाविधि ।
एतदन्तर्गतं कालं वामरन्ध्रे प्रकाशितम् ॥ ४७
षड्दिनानि यदारूढं वर्षद्वयं स जीवति ।
मासान्यष्टौ विजानीयाद्दिनान्यष्टादशानि तु ॥ ४८
प्राणः सप्तदिने देवि वर्षद्वयं न संशयः ।
सप्त मासान् विजानीयाद्दिनैः षड्भिर्गतायुषः ॥४९
अष्टौ दिनप्रभेदेन वर्षद्वयं स जीवति ।
मासांश्चत्वारि विज्ञेयं चतुर्व्विंशद्दिनावधि ॥ ५०
नव दिनानि यदा प्राणा वहन्ति तत् त्रिमासकम् ।
मासद्वयञ्च द्वे मासे दिना द्वादश कीर्त्तिताः ॥ ५१
पूर्व्ववत् कथिता ये तु कालं तेषां न पूर्व्वके ।
अवान्तरदिना ये तु ते समासेन कथ्यते ॥ ५२
एकादशप्रवाहेण वर्षमेकं न जीवति ।
मासा नव तथा प्रोक्ता दिना अष्टदिनावधि ॥ ५३
द्वादशाहे प्रवाहेण वर्षमेकं गतायुषम् ।
मासान् सप्त विजानीयाद्दिनषट्कमुदाहृतम् ॥ ५४
यदा च वहते नाड़ी त्रयोदशदिनावधि ।
संवत्सरं भवेत् तस्य मासाश्चत्वारि कीर्त्तिताः ॥ ५५
चतुर्व्विंशद्दिनाः शेषा जीवितञ्च न संशयः ।
प्राणवाह्यो यदा वामे चतुर्द्दशदिनानि तु ॥ ५६
द्वादशाहप्रवाहेण द्विमासं जीवितं खलु ।
द्वितीयन्तु चतुर्थेन अन्तरालदशान्तरे ॥ ५७
तृतीयञ्च समासेन कालचक्रं वदाम्यहम् ।
षोड़शाहप्रवाहेण नवमासैर्गतायुषम् ॥ ५८
दिना अष्टादश तत्र कथितं साधकेश्वर ।

वामचारं यदा देवि अष्टादशदिनावधि ॥ ५९
जीवितं अष्टमासन्तु दिना द्वादश कीर्त्तिताः।
चतुर्व्विंशद्दिनास्तत्र निश्चयेनावधारय ॥ ६०
प्राणवाहो यदा वामे त्रयोविंशद्दिनावधि।
मासाश्चत्वारो विज्ञेयाः षड्दिनानि तथोत्तरे ॥६१
चतुर्व्विंशप्रवाहेण मासत्रयं स जीवति।
दिनास्तत्र दशाष्टौ च संहरत्यविचारतः ॥ ६२
अवान्तरदिना ये तु संक्षेपात् प्रकटीकृताः।
वामचारं समाख्यातं दक्षिणं शृणु साम्प्रतम् ॥ ६३
अष्टाविंशप्रवाहेण तिथिमानेन जीवति।
प्रवाहेण दशाहेन तत्संख्येन विपद्यते ॥ ६४
त्रिंशवाहप्रवाहेण पञ्चाहेन विनश्यति।
एकत्रिंशद्यदा देवि वहते च निरन्तरम् ॥ ६५
दिनत्रयं तदा तस्य जीवितस्य न संशयः।
दक्षिणं कथितं प्राणं मध्यस्थं कथयामि ते ॥ ६६
एकभावगतो वायु-प्रवाहो मुखमण्डले।
धममानः प्रवाहे तु दिनमेकं स जीवति ॥ ६७
चक्रमेतत् परासोर्हि कालचक्रमुदाहृतम्।
एतत् ते कथितं देवि किमन्यच्छ्रोतुमिच्छसि ॥ ६८

इति श्रीशैवे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः।

देव्युवाच।

कथितन्तु त्वया देव कालज्ञानं यथार्थतः।
कालस्य वञ्चनं ब्रूहि यथातत्त्वेन योगिनः ॥ १
कालस्तु सन्निकृष्टो हि वर्त्तते सर्व्वजन्तुषु।
यथा चास्य न मृत्युश्च वञ्चते कालमागतम् ॥ २
तथा कथय मे देव हितार्थमिह योगिनः।

शङ्कर उवाच।

शृणु देवि प्रवक्ष्यामि यत् त्वया पृच्छ्यते ह्यहम् ॥ ३
कथयामि समासेन मानुषाणां हितार्थतः।
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥ ४
एतेषां हि समायोगः शरीरं पाञ्चभौतिकम्।
आकाशस्तु परो व्यापी सर्व्वेषां सर्व्वगः स्थितः ॥५
आकाशे तु विलीयन्ते सम्भवन्ति पुनस्ततः।
वियोगे तु सदकस्य स्वं धाम प्रतिपेदिरे ॥ ६
ततोऽस्य स्थिरता चास्ति सन्निपातस्य सुन्दरि।
ज्ञानिनोऽपि तथा यत्नात् तपो-मन्त्रबलाद्यदि ॥७

देव्युवाच।

श्वेतं न यत् नश्यति घोररूपः
कालः करालस्त्रिदिवेशनाथ।
दग्धस्त्वया त्वं पुनरेव तुष्टः
स्तोत्रैः स्तुत्वा त्वां प्रकृतिं स लेभे॥ ८
त्वया स चोक्तः कृपया जनाना-
मदृष्टरूपः प्रचरिष्यसीति।
दृष्टं त्वया तन्निहितं मया हि
प्रभो वरात् ते पुनरुत्थितश्च ॥ ९
तदद्य सोः काल इहास्ति किञ्चिद्-
विहन्यते येन वदस्व तन्मे।

शङ्कर उवाच।

न हन्यते देववरैस्तु दैत्यैः
सयक्ष-रक्षोरग-मानुषैश्च ॥ १०
ये योगिनो ध्यानपराः सदैव
भवन्ति ते घ्नन्ति सुखेन कालम् ॥ ११

सनत्कुमार उवाच।

एतच्छ्रुत्वा त्रिभुवनगुरोः प्राह गौरी विहस्य
सत्यं त्वं मे वद कथमसौ हन्यते येन कालः।
शम्भुस्तामाह शशिवदने योगिनो ये क्षयन्ति
कालं जातं सकलमनवास्तच्छृणुष्वैकचित्ता ॥ १२

शङ्कर उवाच।

पञ्चभूतात्मको देहः सदा युक्तस्तु तद्गुणः।
उत्पद्यते वरारोहे तद्विलीनैर्हि पार्थिवैः ॥ १३
आकाशाज्जायते वायुर्वायोस्तेजश्च जायते।
तेजसोऽम्बु विनिर्द्दिष्टं तस्माद्धि पृथिवी भवेत् ॥ १४
पृथिव्यादीनि भूतानि गच्छन्ति क्रमशो वरम्।
धरा पञ्चगुणा प्रोक्ता आपश्चैव चतुर्गुणाः ॥ १५
त्रिगुणञ्च तथा तेजो वायुर्द्विगुण एव च।
शब्दैकगुणमाकाशं पृथिव्यादिषु कीर्त्तिताः ॥ १६
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः।
विजहाति गुणं स्वं स्वं तदा भूतं विपद्यते ॥ १७
यदा गुणं विसृजाति प्रादुर्भूतं तदुच्यते।

तस्माद्धियोगिना नित्यं स्वकायाकाशजा गुणाः ॥ १८
चिन्तनीयाः प्रयत्नेन देवि कालजिगीषुणा ।
देव्युवाच ।
कथं हि जीयते कालो योगिभिर्मे वदेश्वर ॥ १९
ध्यानेन जाप्यमात्रेण तत् सर्व्वं कथय प्रभो ।
शङ्कर उवाच ।
शृणु देवि प्रवक्ष्यामि योगिनां हितकाम्यया ॥ २०
परं ज्ञानमकथ्यञ्च न देयं यस्य कस्यचित् ।
श्रद्दधानाय दातव्यं भक्तियुक्ताय धीमते ॥ २१
अनास्तिकाय शुद्धाय धर्म्मनित्याय भामिनि ।
सुखासनेऽथ शय्यायां योगं युञ्जीत योगवित् ॥ २२
दीपं विनान्धकारे तु प्रजासुप्ते तु धारयेत् ।
तर्ज्जन्या पिहितौ कर्णौ पीड़यित्वा मुहूर्त्तकम् ॥ २३
तस्मात् संश्रूयते शब्दस्तुन्दवह्निसमुद्भवः ।
स ध्यातो भुक्तमेवं हि पचत्यन्नं क्षणादपि ॥ २४
सर्व्वरोगं निहन्त्याशु ज्वराद्युपद्रवान् बहून् ।
यश्चोपलक्षयेन्नित्यमेकान्ते घटिकाद्वयम् ॥ २५
जित्वा मृत्युं यथाकामं स्वेच्छया पर्य्यटेदिह ।
सर्व्वतः सर्व्वदर्शी च सर्व्वसिद्धिमवाप्नुयात् ॥ २६
यथाभ्रं नदते नादं प्रावृण्नभसि संस्थितम् ।
तं श्रुत्वा मुच्यते योगी सद्यः संसारबन्धनात् ॥ २७
ततः स योगिभिर्नित्यं सूक्ष्मः सूक्ष्मतरो भवेत् ।
एतत् ते कथितं देवि शब्दब्रह्मविधिक्रमम् ॥ २८
पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ।
शब्दब्रह्म इदं प्राप्य ये केचिदन्यकाङ्क्षिणः ॥ २९
घ्नन्ति ते मुष्टिनाकाशं कण्डयन्ति क्षुधा तुषान् ।
ज्ञात्वा परमिदं ब्रह्म सुखदं मुक्तिकारणम् ॥ ३०
अवाच्यमक्षरञ्चैव सर्व्वोपाधिविवर्ज्जितम् ।
मोहिताः कालपाशेन मृत्युपाशवशं गताः ॥ ३१
शब्दब्रह्म न जानन्ति पापिनस्ते कुबुद्धयः ।
तावद्भ्रमति संसारे यावद्ब्रह्म न विन्दति ॥ ३२
विदिते तु परे तत्त्वे मुच्यते जन्मबन्धनात् ।
निद्रालस्यं महाविघ्नं जित्वा शत्रुं प्रयत्नतः ॥ ३३
सुखासने स्थितो नित्यं शब्दब्रह्माभ्यसेन्निशि ।
शतब्दः पुमाँल्लब्ध्वा यावदायुष्यमभ्यसेत् ॥ ३४
मृत्युञ्जयवपुस्तस्य आरोग्यञ्चायुर्व्वर्द्धनम् ।
प्रत्ययो दृश्यते वृद्धे किं पुनस्तरुणे जने ॥ ३५
न चोङ्कारो न मन्त्रोऽपि नैव बीजं न चाक्षरम् ।
अनाहतमनुच्चार्य्यं शब्दब्रह्म परं शिवम् ॥ ३६
तस्माच्छब्दा नव प्रोक्ताः प्राणविद्भिस्तु लक्षिताः ।
तान् प्रवक्ष्यामि यत्नेन नादसिद्धिमनुक्रमात् ॥ ३७
घोषं कांस्यं तथा शृङ्गं घण्टा वीणादि वंशकम् ।
दुन्दुभिः शङ्खशब्दश्च नवमं मेघगर्ज्जितम् ॥ ३८
नवशब्दं परित्यज्य ओङ्कारन्तु समाश्रयेत् ।
ध्यायन्नेवं सदायोगी पुण्यपापैर्न लिप्यते ॥ ३९
न शृणोति यदा शृण्वन् षण्मासे च तदम्बिके ।
म्रियतेऽभ्यस्यमानस्तं योगी तिष्ठेद्दिवानिशम् ॥ ४०
तस्मादुत्पद्यते शब्दो मृत्युजित् सप्तभिर्दिनैः ।
प्रथमं नदते घोषमात्मशुद्धिकरं परम् ॥ ४१
सर्व्वव्याधिहरं नादं वश्याकर्षणमुत्तमम् ।
द्वितीयं नदते कांस्यं स्तम्भयेत् प्राणिनां गतिम् ॥ ४२
विषं भूतग्रहान् सर्व्वान् बन्धयेन्नात्र संशयः ।
तृतीयं नदते शृङ्गमभिचारे नियोजयेत् ॥ ४३
विद्वेषोच्चाटने शत्रोर्मारणे च प्रयोजयेत् ।
घण्टानादं चतुर्थन्तु वदते परमेश्वरः ॥ ४४
आकर्षे सर्व्वदेवानां किं पुनर्मानुषा भुवि ।
यक्ष-गन्धर्व्वकन्याश्च तस्याकृष्टा ददन्ति हि ॥ ४५
यथेप्सितां महासिद्धिं योगिनः कामतोऽपि वा ।
वीणा तु पञ्चमो नादः श्रूयते योगिभिः सदा ॥ ४६
तस्मादुत्पद्यते देवि दूराद्दर्शनमेव हि ।
ध्यायते वंशनादन्तु सर्व्वतत्त्वं प्रजायते ॥ ४७
दुन्दुभिं ध्यायमानस्तु जरा-मृत्युविवर्ज्जितः ।
शङ्खशब्देन देवेशि कामरूपं प्रपद्यते ॥ ४८
योगिनो मेघनादेन विपत्सङ्गमतो भवेत् ।
सर्व्वज्ञः सर्व्वदर्शी च कामरूपी व्रजत्यसौ ॥ ४९
एतत् ते सर्व्वमाख्यातं किं भूयः श्रोतुमिच्छसि ।
देव्युवाच ।
वायोस्तु पदमाप्नोति योगाकाशसमुद्भवात् ॥ ५०
तन्मे सर्व्वं समाचक्ष्व प्रसन्नस्त्वं यदि प्रभो ।
शङ्कर उवाच ।
पुरा मे सर्व्वमाख्यातं योगिनां हितकाम्यया ॥ ५१
कालं जिगमिषोः सम्यग्वायोर्लिङ्गं यथा भवेत् ।

तेन ज्ञात्वा दिनं योगी प्राणायामपरिस्थितः ॥ ५२
स जयत्यागतं कालं मासार्द्धेनैव सुन्दरि ।
हृत्स्थो वायुः सदा वह्नेर्दीपकः सोऽग्निपावकः ॥५३
स बाह्याभ्यन्तरव्यापी वायुः सर्व्वगतो महान् ।
ज्ञान-विज्ञानसुखाद्यं सर्व्वं वायोः प्रवर्त्तते ॥ ५४
येनेह निर्ज्जितो वायुस्तेन सर्व्वमिदं जगत् ।
धारणायां सदा तिष्ठेज्जरा-मृत्युजिघांसया ॥ ५५
लोहकारो यथा भस्त्रामापूर्य्य मुखतोऽन्यतः ।
धारयेद्वायुना कर्म्म तद्वद्योगी समभ्यसेत् ॥ ५६
देवः सहस्राक्षो नेत्र-पाद-हस्तसहस्रकः ।
खं योऽपि सर्व्वमावृत्य सोऽग्रेऽतिष्ठद्दशाङ्गुलम् ॥५७
गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्व्वकम् ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ ५८
गत्वा गत्वा निवर्त्तन्ते चन्द्र-सूर्य्यादयो ग्रहाः ।
अद्यापि न निवर्त्तन्ते प्राणायामपरायणाः ॥ ५९
शतमब्दं तपस्तप्त्वा कुशाग्राम्पः पिबेद्द्विजः ।
तदाप्नोति फलं देवि प्राणानां धारणैकया ॥ ६०
यो द्विजः कल्यमुत्थाय प्राणायामैकमाचरेत् ।
सर्व्वं पापं निहन्त्याशु ब्रह्मलोकं स गच्छति ॥ ६१
योऽतन्द्रितः सदैकान्ते प्राणायामपरो भवेत् ।
जरां मृत्युं विनिर्ज्जित्य वायुगः खेचरीति सः ॥६२
सिद्धस्य भवते रूपं कान्तिर्मेधा पराक्रमः ।
शौर्य्यं वायुसमो गत्या सौख्यं श्लाघ्यं सुरादिभिः ॥६३
एतत् कथितमशेषं वायोः सिद्धिं यदाप्नुते योगी ।
यत् तेजसोऽपि लभते तत् ते वक्ष्यामि देवेशि ॥ ६४
स्थित्वा सुखासनेऽसौ सुप्रान्ते जनवचनहीने तु ।
शिशिरवियुक्तया तेजः प्रकाशयेन्मध्यमे देशे ॥ ६५
वह्निगतं भ्रूमध्ये प्रकाशते यस्त्वतन्द्रितो योगी ।
तारं पश्येद्यदीश्वरसत्त्वार्द्धं तमेकभावोऽपि ॥ ६६
ततस्तु तमसि ध्यानी पश्यते ज्योतिरैश्वरम् ।
श्वेतं रक्तं तथा पीतं कृष्णमिन्द्रायुधप्रभम् ॥ ६७
भ्रुवोर्मध्ये ललाटस्थं बालार्कसमतेजसम् ।
तं विदित्वा तु कामाङ्गी क्रीडते कामरूपधृक् ॥६८
कारणप्रसमावेशं परकायप्रवेशनम् ।
अणिमादिगुणावाप्तिर्मनसा चावलोकनम् ॥ ६९
दूराच्छ्रवणविज्ञानमदृश्यं बहुरूपधृक् ।
सन्तताभ्यासयोगेन खेचरत्वं प्रजायते ॥ ७०
श्रुताध्ययनसम्पन्ना नानाशास्त्रविशारदाः ।
ज्ञानिनोऽपि विमुह्यन्ते पूर्व्वकर्म्मवशानुगाः ॥ ७१
पश्यन्तोऽपि न पश्यन्ति शृण्वाना बधिरा यथा ।
यथान्धा मानुषे लोके मूढाः पापविमोहिताः ॥ ७२

वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति
नान्यः पन्था विद्यते प्रापणाय ॥ ७३

एतत् ते कथितं सम्यक् तेजसो विधिमुत्तमम् ।
कालं जित्वा यथा योगी चामरत्वं प्रपद्यते ॥ ७४
पुनः परतरं वक्ष्ये यथा मृत्युर्न जायते ।
तुरीयादेवि भूतानि योगिनो ध्यानिनः कदा ॥ ७५
सुखासने समास्थाय योगी नियतमानसः ।
समुन्नतशरीरोऽपि स बद्ध्वा करसम्पुटम् ॥ ७६
चञ्च्वाकारेण वक्त्रेण पिबन् वायुं शनैः शनैः ।
प्रस्रवन्ति क्षणादापस्तालुस्था जीवदायकाः ॥७७
ता जिघ्रेद्वायुनादायामृतं तच्छीतलं जलम् ।
पिबन्ननुदिनं योगी न मृत्युवशगो भवेत् ॥ ७८
दिव्यकायो महातेजाः पिपासा-क्षुद्विवर्ज्जितः ॥७९

बलेन नागस्तुरगो जवेन
दृष्ट्या सुपर्णः सुश्रुतिस्तु दूरात् ।
आकुञ्चिता कुण्डलिकृष्णकेशो
गन्धर्व्व-विद्याधरतुल्यवर्णः ॥ ८०
जीवेन्नरो वर्षशतं सुराणां
सुमेधसा वाक्पतिना समत्वम् ॥ ८१

पुनरन्यत् प्रवक्ष्यामि विधानं यत् सुरैरपि ।
गोपितन्तु प्रयत्नेन तच्छृणुष्व वरानने ॥ ८२
समाकुञ्च्याभ्यसेद्योगी रसनां तालुकं प्रति ।
किञ्चित् कालान्तरेणैव क्रमात् प्राप्नोति लम्बिकाम् ॥८३
ततः प्रस्रवते सा तु संस्पृष्टा शीतलां सुधाम् ।
पिबन्नेव सदा योगी सोऽमरत्वं हि गच्छति ॥ ८४

रेफाग्रं लम्बिकाग्रं कुरु तलघटनं
शुभ्रपद्मस्य बिन्दु-
स्तेनाकृष्टं सुधौघं पतति परपदे
दैवतानन्दकारम् ।

सारं संसारतारं कृतकलुषहरं
कारणं कालतारं
येनेमं प्लाविताङ्गं स भवति अमरः
क्षुत्पिपासाविहीनः ॥ ८५
एभिर्युक्त्या चतुर्भिः क्षितिधरतनये
योगिनेयं धरा वै
धैर्य्यान्नित्यं कृतोऽन्तः सकलमपि जगद्-
यत् सुखं प्रायणाय ।
स्वप्ने देही विधत्ते सकलमपि सदा
मानसं यच्च दुःखं
स्वर्गे ह्येवं धरित्र्याः प्रभवति च ततो
वाहि किञ्चिच्चतुर्णाम् ॥ ८६
तस्मान्मन्त्रैस्तपोभिर्व्रतनियमयुते-
रौषधैर्योगयुक्ता
धात्री रक्षा मनुष्यैर्नयविनययुते-
र्धर्म्मविद्भिः क्रमेण ।
भूतानामादिदेवो न हि भवति चलः
संयुतो वै चतुर्णां
तस्मा एवं प्रवच्मे विविधमनुदिनं
छायिकं यच्छिवाख्यम् ॥ ८७

इति श्रीशैवे महापुराणे धर्म्मसंहितायां काल-
ज्ञानं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः ।

देव्युवाच ।

कथितं ते समासेन छायिकं ज्ञानमुत्तमम् ।
विस्तरेण समाख्याहि योगिनां हितकाम्यया ॥ १

शङ्कर उवाच ।

शृणु देवि प्रवक्ष्यामि छायापुरुषलक्षणम् ।
यं ज्ञात्वा पुरुषः सम्यक् सर्व्वपापैः प्रमुच्यते ॥ ॥ २
सूर्य्यं हि पृष्ठतः कृत्वा सोमं वा वरवर्णिनि ।
शुक्लाम्बरधरः स्रग्वी गन्धधूपादिवासितः ॥ ३
संस्मरेन्मे महामन्त्रं सर्व्वकामफलप्रदम् ।
नवात्मकं पिण्डभूतं स्वां छायां स्वं निरीक्षयेत् ॥ ४
दृष्ट्वा तां पुनराकाशे श्वेतवर्णस्वरूपिणम् ।
स पठत्येकभावस्तु शिवं परमकारणम् ॥ ५
ब्रह्महत्यादिकैः पापैर्मुच्यते नात्र संशयः ।
शिरोहीनं यदा पश्येत् षड्भिर्मासैर्भवेन्न सः ॥ ६
समस्तश्चाभयं तस्य विद्यते योगिनस्तथा ।
शुक्ले धर्म्मं विजानीयात् कृष्णे पापं विनिर्द्दिशेत् ॥ ७
रक्ते बन्धं विजानीयात् पीते विद्वेषमादिशेत् ।
विबाहौ बन्धुनाशः स्यादितुण्डे चैव क्षुद्भयम् ॥ ८
विकटौ नश्यते भार्य्या विजङ्घे धनमेव हि ।
पादयोर्वै विदेशः स्यादित्येतत् कथितं मया ॥ ९
सम्यक् तं पुरुषं दृष्ट्वा सन्निवेश्यात्मनात्मनि ।
जपेन्नवात्मकं मन्त्रं हृदयं मे महेश्वरि ॥ १०
वत्सरे विगते मन्त्री तन्नास्ति यन्न साधयेत् ।
अणिमादिगुणान्यष्टौ खेचरत्वं प्रपद्यते ॥ ११
पुनरन्यत् प्रवक्ष्यामि शक्तिं ज्ञातुं दुरासदाम् ।
प्रत्यक्षं दृश्यते लोके ज्ञानिनामग्रतः स्थितम् ॥ १२
अशेया लिख्यते लोके या सर्पी कृतकुण्डली ।
सा मात्रापानसंस्थापि दृश्यते न च पठ्यते ॥ १३
ब्रह्माण्डमूर्द्ध्नि गायत्री स्तुता वेदैस्तु नित्यशः ।
जननी सर्व्वविद्यानां गुह्यविद्येति गीयते ॥ १४
खेचरा सा विनिर्द्दिष्टा सर्व्वप्राणिषु संस्थिता ।
दृश्यादृश्याचला नित्या व्यक्ताव्यक्ता सनातनी ॥ १५
अवर्णा वर्णसंयुक्ता प्रोच्यते बिन्दुमालिनी ।
तां पश्यन् सर्व्वदा योगी कृतकृत्योऽभिजायते ॥ १६
सर्व्वतीर्थकृतस्नानाद्बेदेहानस्य यत् फलम् ।
सर्व्वयज्ञफलं यच्च मालिन्या दर्शनात् सदा ॥ १७
प्राप्नोति तत्र सन्देहः सत्यञ्च कथितं मया ।
सर्व्वतीर्थेषु यः स्नात्वा दत्त्वा दानानि सर्व्वशः ॥ १८
सर्व्वेषां देवि यज्ञानां यत् फलं तल्लभेत् पुमान् ।
तस्माज्ज्ञानं तथा योगमभ्यसेत् सततं बुधः ॥ १९
अभ्यासाज्जायते सिद्धिर्योगोऽभ्यासात् प्रवर्त्तते ।
संवित्तिर्लभ्यतेऽभ्यासान्मोक्षोऽभ्यासात् समश्नुते ॥२०
इत्येतत् कथितं देवि भुक्तिमुक्तिफलप्रदम् ।
किमन्यत् पृच्छसे देवि वद सत्यं ब्रवीमि ते ॥ २१

इति श्रीशैवे महापुराणे धर्म्मसंहिताया-
मष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशोऽध्यायः।

देव्युवाच।

ज्ञाननिष्ठास्तपोनिष्ठाः पञ्चाग्निब्रह्मचारिणः।
दृश्यन्ते विविधा लोके का चैषामुत्तमा गतिः॥ १
एतत् सर्व्वं समाख्याहि यदि तुष्टोऽसि मे प्रभो।

शङ्कर उवाच।

शृणु देवि प्रवक्ष्यामि याथातथ्यं वरानने॥ २
पुष्करे पर्व्वते कौ वा त्रिविधौ वर्त्तते सदा।
उत्तमाधममध्या वा नोत्तमौ बहुधा नृषु॥ ३
आत्मश्रेयो न जानन्ति पश्यन्तोऽपि विचक्षुषः।
स्थावराः पादमिच्छन्ति चतुष्पादत्वमीप्सवः॥ ४
मानवाः स्वर्गमिच्छन्ति मोक्षमिच्छन्ति देवताः।
यज्ञैर्दानैस्तपोभिस्तु स्वर्गः सम्प्राप्यते किल॥ ५
तत्रस्था मोक्षमिच्छन्ति मानवाः पतनात् ततः।
मोक्षमिच्छेत् सदा देवि सर्व्वदानन्ददायकम्॥ ६
ब्रह्मा विष्णुरहं देवि बद्धाः स्म कर्म्मणा सदा।
कामक्रोधादिभिर्दोषैस्तस्मात् सर्व्वे अनीश्वराः॥ ७
मुच्यन्ते कर्म्मणः सङ्गाज्ज्ञानिनो मोक्षतत्पराः।
प्राप्नुवन्ति न चेत् तान्तु ज्ञानावाप्तिन्तु योगिनः॥८
या गतिः पुण्यशीलानां यज्वनाञ्च तपस्विनाम्।
यदि नो ज्ञानावाप्तिः स्याद्योगशास्त्राणि यत्नतः॥९
अध्येतव्यानि पौराणं शास्त्रं तच्छ्रूयते सदा।
पापं संक्षीयते नित्यं धर्म्मश्चैव विवर्द्धते॥ १०
क्रमाज्ज्ञानफलावाप्तिर्न संसारं प्रपद्यते।
अतएव पुराणानि श्रोतव्यानि प्रयत्नतः॥ ११
धर्म्मार्थ-कामलाभाय मोक्षमार्गाप्तये तथा।
यज्ञैर्दानैस्तपोभिस्तु यत् फलं तीर्थसेवया॥ १२
तत् फलं समवाप्नोति पुराणश्रवणान्नरः।
न भवेयुः पुराणानि धर्म्ममार्गक्षणानि तु॥ १३
यद्यत्र पद्धती स्यातामिह-पारत्रिकी कथम्॥ १४

वेदेन दृष्टो जगतां हि मार्गः
पौराणधर्म्मो हि सदा वरिष्ठः।
शास्त्रं विना सर्व्वमिदं विभाति
सूर्य्येण हीनस्त्विव जीवलोकः॥ १५

आदिसर्गश्च पौराणे वंश-मन्वन्तराणि च।
दानानि नियमाश्चैव एतदुक्तं स्वयम्भुवा॥ १६
षट्त्रिंशतिपुराणानामत एकं शृणोति यः।
पठेद्वा भक्तियुक्तस्तु शृणु तस्यापि यत् फलम्॥ १७
अरण्ये योऽप्यधीयानश्चातुर्व्विद्यं फलं लभेत्।
यज्ञैर्दानैस्तपोभिस्तु देवि तत्पठनादतः॥ १८
एतत् ते कथितं देवि सुधावाप्तिफलं हि तत्।
धर्म्मशास्त्रं हि श्रोतव्यं सर्व्वधर्म्मफलप्रदम्॥ १९

सूत उवाच।

एतद्वः कथितं धर्म्मं यथा देवेन भाषितम्।
यत् पृच्छध्वं हि तद्भूयः कथयामि पुरातनम्॥ २०

शौनक उवाच।

पादादि ह्यङ्गं मूर्द्धान्तं देवानां पूज्यते सदा।
शङ्करस्येज्यते कस्माल्लिङ्गं शंसस्व मे सदा॥ २१
एतन्मे ब्रूहि सर्व्वं हि यदि जानासि तत्त्वतः।

सूत उवाच।

सनत्कुमारेण पुरा यदुक्तं मुनिसत्तमाः॥ २२
तद्वक्ष्यामि मतं भूयः पाराशर्य्यस्य पृच्छतः।
एकार्णवे पुरा भूते नष्टे स्थावरजङ्गमे॥ २३
ब्रह्मा विष्णुश्च रुद्रश्च समुत्तस्थुर्जलात् किल।
अव्यक्ताभिगतिस्तेषां न जानन्ति मनीषिणः॥ २४
पृथिवी गतिः पूर्व्वेषां नष्टा स्थावरजङ्गमाः।
वायुस्तीव्रः समुत्तस्थौ शोषयन् सप्त सागरान्॥ २५
संशुष्काः सर्व्वतश्चापो विनष्टा जङ्गमास्ततः।
स्थावराश्च ततः सर्व्वे संशुष्काः क्रमशः किल॥ २६
तस्थौ प्रागुदितः सूर्य्य एकोऽभूद्द्वितीयः किल।
दक्षिणायां समाशायां तद्वदासीत् करैर्युतः॥ २७
शोषयन् सर्व्वतस्तोयं प्रदहन् सचराचरम्।
पश्चिमायां ततस्तस्थौ तृतीयश्चोत्तरां दिशम्॥ २८
प्रदहन् स्वं चतुर्थश्च उदितः सचराचरम्।
उपरिष्टात् तथा चाष्टावुदिता द्वादशैव ते॥ २९
योऽसाविह समाख्यातो रुद्रः कालाग्निसंज्ञितः।
समुत्तस्थौ स पातालात् पूरयन् सर्व्वतो दिशम्॥३०
जर्द्ध तिर्य्यक् स पातालं दग्ध्वा सर्व्वमशेषतः।
उदारः सर्व्वतो ज्ञेयः स्वं धाम पूर्व्वनिर्म्मितम्॥ ३१
ततो मेघाः समुत्तस्थुर्वर्षन्तः सर्व्वतोदिशम्।
ततस्ते पृथिवीं सर्व्वां संप्लाव्याद्भिर्दिशस्तदा॥ ३२

निशमब्जुश्च तत्रैव एकार्णवमभूज्जगत्।
न धरा न दिशस्तत्र लन्तरा पुष्करं तदा॥ ३३
भायते किंश्चिद्देवेह कबन्धपरिपूरिते।
तदब्धमध्ये गतास्तस्युस्त्रयो देवाः सनातनाः॥ ३४
ब्रह्मा विष्णुश्च रुद्रश्च अव्यक्तगतयस्तु ते।
ततस्तावूचतुः शर्व्वं ज्वलितं तिग्मतेजसम्॥ ३५
रौद्रीं शक्तिं सुविभ्राणं तं क-विष्णू प्रणम्य ह।
प्रभुस्त्वं सर्व्वतोऽस्माकं कुरु सृष्टिं यथेच्छया॥ ३६
करिष्यामीति तावाह इत्युक्त्वाप्सु ममज्ज सः।
दिव्यं वर्षसहस्रन्तु मग्नं समभिवीक्ष्य ते॥ ३७
अन्योन्यमूचतुरावां किं करिष्यावहे विना।
कथन्तु वर्त्तते सृष्टिस्ताविवं वेधसं हरिः॥ ३८
प्रोवाच कुरु मे वाक्यं नात्र कालात्ययो भवेत्।
प्रजासर्गनिमित्तं हि कुरु यत्नं पितामह॥ ३९
लोकानां त्वं समर्थो हि स्रष्टुं वै विविधाः प्रजाः।
शक्तिं तेऽहं प्रदास्यामि स्रष्टृत्वेऽपि तथात्मनः॥ ४०
इत्युक्तश्चिन्तयामास विष्णुवाक्यप्रणोदितः।
सृष्ट्यर्थन्तु चकारासौ सृष्टिं सर्व्वसुखावहाम्॥ ४१
सदेवासुरगन्धर्व्वां सयक्षोरगराक्षसाम्।
तत्कृतायां ततः शम्भुरुन्ममज्ज जलाम्बुने॥ ४२
कर्त्तुकामः स सर्गञ्च मनसा स व्यचिन्तयत्।
ततोऽपश्यज्जगत् सर्व्वमधोर्द्धन्तु समन्ततः॥ ४३
सदेवासुरगन्धर्व्वं सयक्षोरगराक्षसम्।
समनुष्यं महादेवो मनसा क्रोधमादधे॥ ४४
किं करोमि कृतं सर्गं ब्रह्मणा संहराम्यतः।
उत्क्राद्य ह्यात्मनः शुक्रमित्युक्त्वाग्निं मुखात् सृजन्॥४५
तत् सर्व्वं दह्यमानन्तु दृष्ट्वा ब्रह्मा च भक्तितः।
तं प्रणम्य महेशानं तुष्टाव प्रभुमीश्वरम्॥ ४६

ब्रह्मोवाच।

नमः शर्व्वाय रुद्राय स्थाणवे तिग्मतेजसे।
ईशानाय नमो नित्यं नमः कालस्वरूपिणे॥ ४७
सहस्राक्ष विरूपाक्ष त्र्यक्ष यज्ञाधिपप्रिय।
शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय॥ ४८
गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते।
शतोदर शतावर्त्त शतजिह्व शतानन॥ ४९
नमश्चण्डाय मुण्डाय रुद्राय वरदाय च।
नमोर्द्धदंष्ट्रकेशाय नीलग्रीवाय ते नमः॥ ५०
नमोऽस्तु प्रतिरूपाय विरूपाय शिवाय च।
भैरवाय नमो नित्यं शम्भोरमिततेजसे॥ ५१
शितिकण्ठाय शुभ्राय स्थाणवे च कपर्द्दिने।
पशूनां पतये तुभ्यं नमस्त्रिपुरघातिने॥ ५२
नित्यं त्रिशूलहस्ताय नमः कापालमालिने।
महादेवाय वेशाय देवदेवाय वेधसे॥ ५३
यमीशं सर्व्वभूतानां ध्यायन्ति यतयोऽक्षरम्।
व्यापिनं परमं देवं तमस्मि शरणं गतः॥ ५४
ब्रह्मभूतं जगत् सर्व्वं सदेवासुरमानुषम्।
यः सृजेदीश्वरो देवं तमस्मि शरणं गतः॥ ५५
सव्यापसव्ये ब्रह्माहं गतः शम्भुं सदा स्थितः।
यं त्रिमूर्त्तिधरं शान्तं तमस्मि शरणं गतः॥ ५६
ब्रह्मा तु यस्य वक्त्रोऽथ चतुर्व्वेदमयः प्रभुः।
जिष्णुः प्रभोः पुरा जज्ञे तमस्मि शरणं गतः॥ ५७
ब्रह्मरूपधरं देवं जगद्योनिं महेश्वरम्।
स्रष्टृत्वे संस्थितः सृष्ट्यै तमस्मि शरणं गतः॥ ५८
यः पालने च सृष्टौ च स्थितावसुरसूदनः।
तमादिपुरुषं शम्भुं प्रणतोऽस्मि सनातनम्॥ ५९
भूतक्रीड़ासहो नाथो भूतानामादिकृद्धरः।
तमादिपुरुषाज्जातं प्रणतोऽस्मि सनातनम्॥ ६०
यज्ञैर्यजन्ति तं विप्रा रोहिता यज्ञभावनम्।
तं यज्ञपुरुषं होमं प्रणतोऽस्मि सनातनम्॥ ६१
संभक्षयित्वा सकलं तथा सृष्टमिदं जगत्।
यो वै तिष्ठति रुद्रात्मा तं नतोऽस्मि सनातनम्॥ ६२
कल्पान्ते यमरूपी यः संहृत्य सकलं जगत्।
अविज्ञेया गतिर्यस्य तमस्मि शरणं गतः॥ ६३
स्थाणुमीशं पशुपतिं शितिकण्ठं महेश्वरम्।
भक्तानुकम्पिनं देवं तमस्मि शरणं गतः॥ ६४
शूलपाणिं महादेवं भीमं शर्व्वं त्रिलोचनम्।
भक्तानुकम्पिनं देवं तमस्मि शरणं गतः। ६५
गङ्गाधरं हरं रुद्रं शिवं शम्भुमुमापतिम्।
भक्तानुकम्पिनं देवं तमस्मि शरणं गतः॥ ६६
स्मरारिं वामदेवञ्च त्र्यम्बकं त्रिपुरान्तकम्।
भक्तानुकम्पिनं देवं तमस्मि शरणं गतः॥ ६७
शिपिविष्टं विरूपाक्षं शङ्करं प्रमथाधिपम्।

भक्तानुकम्पिनं देवं तमस्मि शरणं गतः ॥ ६८
ईशानं शूलिनं वेशसर्द्धचन्द्रं कपर्द्दिनम्।
भक्तानुकम्पिनं देवं तमस्मि शरणं गतः ॥ ६९
जगद्दाहिशिरोहर्त्ता पिनाकी वृषभध्वजः।
स भक्त्या संस्तुतो नित्यं देवो मां पातु सर्व्वतः ॥ ७०
कपालमाली बालेन्दुशेखरः सर्पभूषणः।
स भक्त्या संस्तुतो नित्यं देवो मां पातु सर्व्वतः ॥ ७१
प्रजासंहारकारी यो भूतिशश्चन्द्रशेखरः।
कृशानुरेताः श्रीकण्ठो देवो मां पातु सर्व्वतः ॥ ७२
गिरीशो व्योमकेशश्च शर्व्वो भीमः सुयशहा।
कृपालुर्भक्तियुक्तेभ्यो देवो मां पातु सर्व्वतः ॥ ७३
सन्तुष्टो ब्रह्मणा त्वेवं तुष्टः प्रोवाच शङ्करः।
शङ्करोऽहं सदा ब्रह्मन् यो मां भक्त्या प्रपद्यते ॥ ७४
तस्याहं सर्व्वकार्य्याणि साधयिष्यामि नान्यतः।
तुष्टोऽस्मि ते वरं ब्रूहि यद्दे मनसि काङ्क्षितम् ॥ ७५
तच्छ्रुत्वा प्राह तं ब्रह्मा प्रजासर्गं सुविस्तरम्।
कृतं मे तत् तथैवास्तु यदि तुष्टोऽसि मे प्रभो ॥ ७६
तच्छ्रुत्वा प्राह कं रुद्रो यत् तेजो मे समाहृतम्।
संहर्त्तुं ते तु सर्गाय ब्रूहि किं करवाणि ते ॥ ७७

सनत्कुमार उवाच।

एतच्छ्रुत्वा सुसञ्चिन्त्य ब्रह्मा लोकहिताय वै।
प्रोवाच शङ्करं सूर्य्ये स्वकं तेजो निवेशय ॥ ७८
यतस्त्वं प्रभुरादित्ये स्रष्टा पाता नियामकः।
सूर्य्यतेजसि वत्स्यामो वयं सर्व्वैः सहामरैः ॥ ७९
त्रिकालार्च्चां ग्रहीष्यामो भक्त्या दत्तान्तु मानवैः।
कल्पान्ते त्वं महादेव जगदेतच्चराचरम् ॥ ८०
सूर्य्यरूपं समास्थाय सन्निर्दहसि तत्क्षणात्।
स तथेति हसन् मत्वा ब्रह्माणमिदमब्रवीत् ॥ ८१
प्रजासर्गं विनानेन लिङ्गेनासत् प्रयोजनम्।
इत्युक्त्वा तं विनिर्भिद्य चिक्षेप च महीतले ॥ ८२
तल्लिङ्गन्तु धरां भित्त्वा जगामाकाशमेव हि।
तस्यान्तं विष्णुरन्वेष्टुमधस्तात् प्रययौ हि सः ॥ ८३
ब्रह्मापि च ययावूर्द्ध्वं प्रापतुर्नान्तमोजसा।
आकाशप्रभवा वाणी तयोस्तत्रोपविष्टयोः ॥ ८४
बभाषे पूजितं लिङ्गं सर्व्वान् कामान् कपर्द्दिनः।
प्रदास्यति न सन्देहो हृदये यदभीप्सितान् ॥ ८५
एतच्छ्रुत्वा ततो ब्रह्मा विष्णुः सर्व्वाश्च देवताः।
लिङ्ग समर्च्चयन्ति स्म भक्त्या तद्गतमानसाः ॥ ८६

इति श्रीशैवे महापुराणे धर्म्मसंहितायां-
मेकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

पञ्चाशोऽध्यायः।

सूत उवाच।

लिङ्गं शम्भोर्हरिर्दृष्ट्वा अनन्तं सर्व्वतोमुखम्।
तुष्टाव प्रणतो भूत्वा देवदेवं सुनामभिः ॥ १
नमः शिवाय शान्ताय स्थाणवेऽमिततेजसे।
ईशानाय नमो नित्यं पशूनां पतये नमः ॥ २
शितिकण्ठाय रुद्राय महादेवाय वै नमः।
शूलहस्ताय ते नित्यं नमो भीमाय शम्भवे ॥ ३
नमो भर्गाय व्यक्ताय नमो गङ्गाङ्कधारिणे।
नमो हराय शुभ्राय नमो गौरीप्रियाय च ॥ ४
नमः स्मरारये तुभ्यं नमस्त्रिपुरघातिने।
वामदेवाय वेद्याय शिपिविष्टाय ते नमः ॥ ५
महेश्वराय उग्राय नमः कपालमालिने।
प्रमथाधिपकामाय नमस्तेऽस्तु कपर्द्दिने ॥ ६
विषाणाय नमो नित्यं नीलग्रीवाय ते नमः।
नलीलोहितरूपाय नमस्तेऽतिविषादिने ॥ ७
भूतेशाय नमो नित्यं प्रजासंहारकारिणे।
नमो बालेन्दुभूषाय नमः कृशानुरेतसे ॥ ८
श्रीकण्ठाय नमस्तुभ्यं दक्षयज्ञविनाशिने।
व्योमकेशाय शर्व्वाय नौमि नित्यं नमो नमः ॥ ९

सनत्कुमार उवाच।

विष्णुना संस्तुतं लिङ्गं मन्त्रेणानेन सुव्रत।
प्रसन्नवदनो भूत्वा इदं वचनमब्रवीत् ॥ १०
युवाभ्यां संस्तुतो भक्त्या स्तोत्रेणानेन तोषितः।
स्वकेनापि हि तान् कामान् ब्रह्मा-विष्णू समाप्नुतः ॥ ११
दुर्ज्जयत्वं हरिर्लेभे शत्रुभिः सह सङ्गरे।
सर्ज्जनं मानवे लोके सुप्रजायास्तु पालनम् ॥ १२
ब्रह्मा चैवाहयां सृष्टिं यावन्मन्वन्तराणि च।
एवञ्चान्योऽपि यः स्तौति मानवो भक्तितः शुचिः ॥ १३
सर्व्वान् कामानवाप्नोति परत्र च शुभां गतिम्।

विष्णुस्य पूजनं शम्भोः स्वर्गमोक्षप्रदं नृणाम् ॥ १४
इह कामप्रदं नृणां राज्य-पुष्टि-सुखप्रदम् ।
किं पुनर्वः प्रवक्ष्यामि पृच्छध्वं यदभीप्सथ ॥ १५

इति श्रीशैवे महापुराणे धर्म्मसंहितायां पञ्चाशोऽध्यायः ॥ ५० ॥

एकपञ्चाशोऽध्यायः ।

शौनक उवाच ।

श्रुतं मे महदाख्यानं यत् त्वया परिकीर्त्तितम् ।
अतोऽहं श्रोतुमिच्छामि यथा सर्गन्तु ब्रह्मणः ॥ १
देवानां दानवानाञ्च पार्थिवानाञ्च सर्व्वशः ।
समुत्पन्नन्तु मे ब्रूहि यथा व्यासाच्च ते श्रुतम् ॥ २

सूत उवाच ।

मुने शृणु कथां दिव्यां सर्व्वपापप्रणाशिनीम् ।
कथ्यमानां मया चित्रां बह्वर्थां श्रुतविस्तराम् ॥ ३
यश्चेमां धारयेत् तांञ्च शृणुयाद्वाप्यभीक्ष्णशः ।
स्ववंशधारणं कृत्वा स्वर्गलोके महीयते ॥ ४
प्रधानं पुरुषो यत् तन्नित्यं सदसदात्मकम् ।
प्रधानपुरुषो भूत्वा निर्म्ममे लोकभावनः ॥ ५
स्रष्टारं सर्व्वभूतानां नारायणपरायणम् ।
तं वै विद्धि मुनिश्रेष्ठ ब्रह्माणममितौजसम् ॥ ६
यस्मात् कल्पयते कल्पः समग्राशुचयः शुचिः ।
तस्मै हिरण्यगर्भाय पुरुषायेश्वराय च ॥ ७
अजाय स्थाणुरूपाय वरिष्ठाय प्रजाभुवे ।
नमस्कृत्य प्रवक्ष्यामि भुवः सर्गमनुत्तमम् ॥ ८
ब्रह्मा स्रष्टा हरिः पाता संहर्त्ता च महेश्वरः ।
तस्य सर्गस्य नान्योऽस्ति काले काले यथा गते ॥ ९
सोऽपि स्वयम्भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्ज्जादौ तासु वीर्य्यमवासृजत् ॥ १०
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः ॥ ११
हिरण्यवर्णमभवत् तदण्डमुदकेशयम् ।
तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति विश्रुतः ॥ १२
हिरण्यगर्भो भगवानुषित्वा परिवत्सरम् ।
तदण्डमकरोद्द्वैधं दिवं भूमिञ्च निर्म्ममे ॥ १३
अधोऽर्थोर्द्धं प्रयुक्तानि भुवनानि चतुर्द्दश ।
तयोः शकलयोर्मध्यमाकाशमसृजत् प्रभुः ॥ १४
अप्सु परिप्लुता पृथ्वी दिशश्च दशधा दिवि ।
तत्र कालो मनो वाचः काम-क्रोधावथो रतिम् ॥ १५
मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् ।
वशिष्ठन्तु महातेजाः सोऽसृजत् सप्त मानसान् ॥ १६
सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः ।
ततोऽसृजत् पुनर्ब्रह्मा रुद्रानेवात्मसम्भवान् ॥ १७
सनत्कुमारञ्च ऋषिं सर्व्वेषामपि पूर्व्वजम् ।
सप्त त्वेते प्रजायन्ते पश्चाद्रुद्राश्च सर्व्वतः ॥ १८
अतः सनत्कुमारस्तु तेजः सङ्क्षिप्य तिष्ठति ।
तेषां सप्त महावंशा दिव्यदेवर्षिपूजिताः ॥ १९
विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ।
पयांसि च ससर्ज्जादौ पर्ज्जन्यञ्च ससर्ज्ज ह ॥ २०
ऋचो यजूंषि सामानि निर्म्ममे यज्ञसिद्धये ।
पूज्यास्तैरयजन् देवानित्येवमनुशुश्रुम ॥ २१
मुखाद्देवानजनयत् पितॄंश्चैवाथ वक्षसः ।
प्रजनाच्च मनुष्यान् वै जघनान्निर्म्ममेऽसुरान् ॥ २२
उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ।
आपवस्य प्रजासर्गं सृजतो वै प्रजापतेः ॥ २३
सृज्यमानाः प्रजाश्चैव न वर्द्धन्ते यदा तदा ।
द्विधा कृत्वात्मनो देहं स्त्री चैव पुरुषोऽभवत् ॥ २४
ससृजेऽथ प्रजाः सर्व्वा महिम्ना व्याप्य विश्वतः ।
विराजमसृजद्विष्णुं स सृष्टः पुरुषो विराट् ॥ २५
द्वितीयं तं मनुं विद्धि मनोरन्तरमेव च ।
स वैराजः प्रजासर्गं ससर्ज्ज पुरुषः प्रभुः ॥ २६
नारायणविसर्गस्य प्रजास्तस्याप्ययोनिजाः ।
आयुष्मान् कीर्त्तिमान् धन्यः प्रजावांश्च भवत्यतः ॥ २७
आदिसर्गं विदित्वैवं यथेष्टां प्राप्नुयाद्गतिम् ॥ २८

इति श्रीशैवे एकपञ्चाशोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशोऽध्यायः ।

सूत उवाच ।

संसृष्टासु प्रजास्वेव आपवोऽथ प्रजापतिः ।
लेभे वै पुरुषः पत्नीं शतरूपामयोनिजाम् ॥ १

आपस्य महिम्ना तु दिवमावृत्य तिष्ठतः ।
धर्म्मेणैव महात्मा स शतरूपा व्यजायत ॥ २
सा तु वर्षशतं तप्त्वा तपः परमदुश्चरम् ।
भर्त्तारं दीप्ततपसं पुरुषं प्रत्यपद्यत ॥ ३
स वै स्वायम्भुवं जज्ञे पुरुषो मनुरुच्यते ।
यस्यैकसप्ततियुगं मन्वन्तरमिहोच्यते ॥ ४
वैराजः पुरुषाद्वीरां शतरूपा व्यजायत ।
प्रियव्रतोत्तानपादौ वीरकाम्यामजायताम् ॥ ५
काम्या नाम महाभागा कर्द्दमस्य प्रजापतेः ।
काम्या पुत्रांश्च चत्वारः सम्राट्कुक्षिर्विराट् प्रभुः॥६
उत्तानपादोऽजनयत् पुत्राञ्छक्रसमान् प्रभुः ।
धर्म्मस्य कन्या सुश्रोणी सुनीतिर्नाम विश्रुता ॥ ७
उत्पन्ना चापि धर्म्मेण ध्रुवस्य जननी तथा ।
ध्रुवो वर्षसहस्राणि त्रीणि दिव्यानि कानने ॥ ८
तपस्तेपे स बालस्तु प्रार्थयन् स्थानमव्ययम् ।
तस्मै ब्रह्मा ददौ प्रीतः स्थानमात्मसमं प्रभुः ॥ ९
अचलञ्चैव पुरतः सप्तर्षीणां प्रजापतिः ।
तस्मात् पुष्टिश्च धान्यञ्च ध्रुवात् पुत्रौ व्यजायत ॥ १०
पुष्टेरजनयत्सुच्छाया: पञ्च पुत्रानकल्मषान् ।
रिपुं रिपुञ्जयं विप्रं वृकलं वृकतेजसम् ॥ ११
रिपोरावन्तमहिषी चाक्षुषं सर्व्वतेजसम् ।
अजीजनत् पुष्करिण्यां वरुणं चाक्षुषो मनुः ॥ १२
मनोरजायन्त दश नड्वलायां महौजसः ।
कन्यायां हि मुनिश्रेष्ठ वैराजस्य प्रजापतेः ॥ १३
उरुः पूरुः शतद्युम्नस्तपस्वी सत्यजित् कविः ।
अग्निष्टोमोऽतिरात्रश्चातिमन्युः सुयशा दश ॥ १४
उरोरजनयत् पुत्रान् षडाग्नेयी महाप्रभा ।
अङ्गं सुमनसं ख्यातिं क्रतुमाङ्गिरसन्त्जिम् ॥ १५
अङ्गात् सुनीथा भार्य्या वै वेणमेकमसूयत ।
अपचारेण वेणस्य कोपस्तु सुमहानभूत् ॥ १६
प्रजार्थमृषयस्तस्य ममन्थुर्दक्षिणं करम् ।
वेणस्य पाणौ मथिते सम्बभूव ततः पृथुः ॥ १७
स धन्वी कवची जातस्तेजसादित्यसन्निभः ।
पृथुर्वैण्यस्तदा पृथ्वीमरक्षत् क्षत्रपूर्व्वजः ॥ १८
राजसूयाभिषिक्तानामाद्यः स वसुधाधिपः ।
तस्माच्चैव समुत्पन्नौ निपुणौ सूत-मागधौ ॥ १९
तेनेयं गौर्मुनिश्रेष्ठ दुग्धा सर्व्वहिताय वै ।
प्रजानां हितकामेन देवैः सर्षिगणैः सह ॥ २०
पितृभिर्दानवैश्चैव गन्धर्व्वैः साप्सरोगणैः ।
सर्पैः पुण्यजनैश्चैव वीरुद्भिः पर्व्वतैस्तथा ॥ २१
तेन दत्तेन जीवन्ति सर्व्वदेवगणाः सदा ॥ २२

इति श्रीशैवे महापुराणे धर्म्मसंहितायां सर्ग-
वर्णनं नाम द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशोऽध्यायः ।

सूत उवाच ।

पृथोः पुत्रौ तु धर्म्मज्ञौ जज्ञाते भुवि पार्थिवौ ।
हविर्धानी-हविर्द्धामनामानौ तौ बभूवतुः ॥ १
शिखण्डिनी हविर्द्धामात् पुत्रं प्राचीनबर्हिषम् ।
प्राचीनाग्राः कुशास्तस्य पृथिवीतलचारिणः ॥ २
समुद्रतनयाधान्तु कृतदारोऽभवत् प्रभुः ।
समुद्रतनयायान्तु दश प्राचीनबर्हिषः ॥ ३
सर्व्वे प्रचेतसो नाम धनुर्व्वेदस्य पारगाः ।
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत् तपः ॥ ४
दश वर्षसहस्राणि समुद्रसलिलेशयाः ।
तपश्चरत्सु पृथिव्यामभवन् सुमहीरुहाः ॥ ५
अरक्ष्यमाणायां पृथ्व्यां बभूवाथ प्रजाक्षयः ।
तं दृष्ट्वा तु द्रुमेभ्यस्ते प्रासृजन्नग्नि-मारुतौ ॥ ६
वृक्षानुन्मूल्य वायुस्तानदहद्धव्यवाहनः ।
वृक्षक्षयं ततो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु ॥ ७
उपगम्याब्रवीदेतान् राजा सोमः प्रतापवान् ।
कोपं यच्छथ राजानः सर्व्वे प्राचीनबर्हिषः ॥ ८
अनु भूतानु कन्येयं वृक्षाणां वरवर्णिनी ।
भविष्यं जानता सा तु धृता गर्भेण वै मया ॥ ९
भार्य्या वोऽस्तु महाभागा सोमवंशविवर्द्धिनी ।
अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः ॥ १०
युष्माकं तेजसार्द्धेन मम चांशेन तेजसः ।
ब्रह्मतेजोमयो भूयः प्रजाः संवर्द्धयिष्यति ॥ ११
ततः सोमस्य वचनाज्जगृहुस्ते प्रचेतसः ।
भार्य्यां धर्म्मेण तस्यास्तु दक्षो जज्ञे प्रजापतिः ॥ १२
सोऽपि जज्ञे महातेजाः सोमस्यांशेन वै मुने ।

अचरांश्च चरांश्चैव द्विपदोऽथ चतुष्पदः ॥ १३
स दृष्ट्वा मनसा दक्षः पश्चादसृजत स्त्रियः।
ददौ स दश धर्म्माय कश्यपाय त्रयोदश ॥ १४
शिष्टाः सोमाय दक्षोऽपि नक्षत्राख्यां ददौ प्रभुः।
देवासुराः खगा नागा दितिजाश्चान्यदेवताः ॥ १५
ततःप्रभृति विप्रेन्द्र प्रजा मैथुनसम्भवाः।
सङ्कल्पाद्दर्शनात् स्पर्शात् पूर्व्वेषां सृष्टिरुच्यते ॥ १६
शौनक उवाच।
अङ्गुष्ठाद्ब्रह्मणो जातो दक्षश्चोक्तः पुरा त्वया।
कथं प्राचेतसत्वं हि पुनर्लेभे महातपाः ॥ १७
एतन्मे संशयं सूत आख्यातुं वै त्वमर्हसि।
दौहित्रश्चैव सोमस्य कथं श्वशुरतां गतः ॥ १८
सूत उवाच।
उत्पत्तिश्च निरोधश्च नित्यं भूतेषु वर्त्तते।
कल्पे कल्पे भवन्त्येते सर्व्वे दक्षादयो मुने ॥ १९
पुनश्चैव निरुध्यन्ते सुज्ञस्तत्र न मुह्यति।
ज्येष्ठः कनिष्ठो मध्यस्थः पूर्व्वमासीन्महामुने ॥ २०
इमां विसृष्टिं दक्षस्य यो विद्यात् सचराचरम्।
प्रजावानायुषा पूर्णः स्वर्गलोके महीयते ॥ २१
इति श्रीशैवे महापुराणे धर्म्मसंहितायां
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशोऽध्यायः।

शौनक उवाच।
देवानां दानवानाञ्च गन्धर्व्वोरगरक्षसाम्।
सृष्टिन्तु विस्तरेणेमां सूतपुत्र ब्रवीहि मे ॥ १
सूत उवाच।
पूर्व्वं हि मनसा दक्षः सृष्टिं चक्रे प्रजापतिः।
यदा न वर्द्धते सा तु वीरणस्य प्रजापतेः ॥ २
सुतां सुतपसा युक्तामाह्वयत् सर्गकारणात्।
स मैथुनेन धर्म्मेण ससर्ज्ज विविधाः प्रजाः ॥ ३
तस्यां पुत्रसहस्राणि वीरण्यां पञ्च वीर्य्यवान्।
आश्रित्य जनयामास दक्ष एव प्रजापतिः ॥ ४
तान् सिसृक्षूंस्ततो दृष्ट्वा नारदः प्राह वै मुने।
पूर्व्वं स तु समुत्पन्नो नारदः परमेष्ठिनः ॥ ५
श्रुतं वाचा कश्यपाद्वै पुंसां सृष्टिर्भविष्यति।
दक्षस्य वै दुहितरि तस्मात् तानब्रवीत् तु सः ॥ ६
नारद उवाच।
अजानन्तः कथं सृष्टिं बालिशा वै करिष्यथ।
दिशं काञ्चिदजानन्तस्तस्माद्विज्ञायता भुवम् ॥ ७
सूत उवाच।
इत्युक्ता वव्रजुः सर्व्वे आशां विज्ञातुमोजसा।
गतेस्तैर्जनयामास पुनः पञ्चशतं सुतान् ॥ ८
दक्षस्य पुत्रा हर्य्यश्वा विवर्द्धयिषवः प्रजाः।
तानुवाच पुनः सोऽपि नारदः किं हि बालिशाः ॥ ९
भुवो मानमजानन्तः कथं सृष्टिर्भविष्यति।
ते तु तद्वचनं श्रुत्वा निर्याताः सर्व्वतोदिशम् ॥ १०
अनन्तं पुष्करं प्राप्य गतास्तेऽपि पराभवम्।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥ ११
तदाप्रभृति वै भ्राता भ्रातुरन्वेषणे रतः।
प्रयातो नश्यति मुने तन्न कार्य्यं विपश्चिता ॥ १२
तांश्चापि नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः।
षष्टिकन्याः सृजत् पश्चाद्वीरण्यामिति नः श्रुतम् ॥ १३
ददौ स दश धर्म्माय कश्यपाय त्रयोदश।
सप्तविंशतिं सोमाय चतस्रोऽरिष्टनेमिने ॥ १४
द्वे चैव ब्रह्मपुत्राय द्वे चैवाङ्गिरसे तदा।
द्वे कृशाश्वाय विदुषे तासां नामानि मे शृणु ॥ १५
अरुन्धती वसुर्जामिर्लम्बा भानुर्मरुत्वती।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च वै मुने ॥१६
धर्म्मपत्न्यो दश त्वेतास्तासपत्यानि मे शृणु।
विश्वेदेवास्तु विश्वायाः साध्यान् साध्याव्यजायत१७
मरुत्वत्या मरुत्वन्तो वसोस्तु वसवस्तथा।
भानोस्तु भानवः सर्व्वे मुहूर्त्ताया मुहू जाः ॥ १८
लम्बायाश्चैव घोषोऽथ नागवीथी च जामिजा।
पृथिवीविषयस्तस्यामरुन्धत्यां व्यजायत ॥ १९
सङ्कल्पायास्तु सत्यात्मा जज्ञे सङ्कल्प एव हि।
अयो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ॥ २०
प्रत्यूषश्च प्रभासश्च वसवो नामतः स्मृताः।
अयस्य पुत्रो वैतण्डः श्रमः शान्तो मुनिस्तथा ॥ २१
ध्रुवस्य पुत्रो भगवान् कालो लोकप्रभावनः।
सोमस्य भगवान् वर्चा वर्चस्वी येन जायते ॥ २२

धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ।
मनोहरायाः शिशिरः प्राणोऽथ रमणस्तथा ॥ २३
अनिलस्य शिवा भार्य्या यस्याः पुत्रः पुरोजवः ।
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु ॥ २४
अग्निपुत्रः कुमारस्तु शरस्तम्बे श्रियावृते ।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठतः ॥ २५
अपत्यं कृत्तिकानान्तु कार्त्तिकेय इति स्मृतः ।
प्रत्यूषस्य त्वभूत् पुत्र ऋषिर्नाम्ना तु देवलः ॥ २६
द्वौ पुत्रौ देवलस्यापि प्रजावन्तौ मनीषिणः ।
बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी ॥ २७
योगसिद्धा जगत् कृत्स्नं समन्तादप्रचरत्युत ।
प्रभासस्य तु सा भार्य्या वसूनामष्टमस्य च ॥ २८
विश्वकर्म्मा महाभागस्तस्यां जज्ञे प्रजापतिः ।
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः ॥ २९
भूषणानाञ्च सर्व्वेषां कर्त्ता शिल्पवतां वरः ।
यः सर्व्वासां विमानानि देवतानां चकार ह ॥ ३०
मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः ।
अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्रश्च वीर्य्यवान् ॥ ३१
त्वष्टुश्चाप्यात्मजः श्रीमान् विश्वरूपो महायशाः ।
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ॥ ३२
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ।
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥ ३३
एवं ते वंशमाख्यात रुद्राणाममितौजसाम् ।
अदितिर्दितिश्च दनुररिष्टा सुरसा द्रुला ॥ ३४
सुरभिर्विनता चैव ताम्रा क्रोधा समा द्रुला ।
कद्रूः मुनिश्च विप्रेन्द्र तास्वपत्यानि मे शृणु ॥ ३५
पूर्व्वमन्वन्तरे श्रेष्ठा द्वादशासन् सुरोत्तमाः ।
तुषिता नाम तेऽन्योन्यमूचुर्वैवस्वतेऽन्तरे ॥ ३६
उपस्थिते चान्वयशश्चाक्षुषस्यान्तरं मनोः ।
हितार्थं सर्व्वलोकानां समागम्य परस्परम् ॥ ३७
आगच्छंस्तांस्तु तानूचुरदितिं सम्प्रविश्य च ।
मन्वन्तरे प्रसूयामः सतां श्रेयो भविष्यति ॥ ३८
एवमुक्तास्तु ते सर्व्वे चाक्षुषस्यान्तरे मनोः ।
मारीचिः कश्यपाज्जातास्त्वदित्या दक्षकन्यया ॥ ३९
तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव हि ।
अर्य्यमा चैव धाता च त्वष्टा पूषा तथैव च ॥ ४०
विवस्वान् सविता चैव मित्रावरुण एव च ।
अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः ॥ ४१
चाक्षुषस्यान्तरे पूर्व्वमासन् ये तुषिताः सुराः ।
रैवतस्यान्तरे ते तु आदित्या द्वादश स्मृताः ॥ ४२
सप्तविंशति याः प्रोक्ताः सोमपत्न्योऽथ सुव्रताः ।
तासामपत्यान्यभवन् दीप्तयोऽमिततेजसः ॥ ४३
अरिष्टनेमेः पत्नीनामपत्यानीह षोडश ।
बहुपुत्रस्य विदुषश्चतस्रो याः सुताः स्मृताः ॥ ४४
कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः स्मृताः ।
एते युगसहस्रान्ते जायन्ते पुनरेव हि ॥ ४५
सर्व्वे देवनिकायाश्च त्रयस्त्रिंशत् तु कामजाः ।
तेषामपि च विप्रेन्द्र निरोधोत्पत्तिरुच्यते ॥ ४६
यथा सूर्य्यस्य नित्यं हि उदयास्तमयाविह ।
एवं देवनिकायास्ते सम्भवन्ति युगे युगे ॥ ४७
दित्या बभूवतुः पुत्रौ कश्यपादिति नः श्रुतम् ।
हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्य्यवान् ॥ ४८
सिंहिका चाभवत् कन्या विप्रचित्तेः परिग्रहः ।
हिरण्यकशिपोः पुत्राश्चत्वारोऽप्यमितौजसः ॥ ४९
अनुह्रादश्च ह्रादश्च प्रह्रादश्चैव वीर्य्यवान् ।
संह्रादश्च चतुर्थोऽभूद्ध्रादपुत्रो ह्रदः स्मृतः ॥ ५०
ह्रदस्य पुत्र आयुष्माञ्छिबिः कालस्तथैव च ।
विरोचनस्तु प्राह्लादिर्बलिर्जज्ञे विरोचनात् ॥ ५१
बलेः पुत्रशतन्त्वासीद्बाणो ज्येष्ठश्च तस्य तु ।
हिरण्याक्षसुताः पञ्च पण्डिताः सुमहाबलाः ॥ ५२
कुकुरः शकुनिश्चैव भूतसन्तापनस्तथा ।
महानादश्च विक्रान्तः कालनाभस्तथैव च ॥ ५३
अभवन् दनुपुत्राश्च शतं तीव्रपराक्रमाः ।
महाबला महावीर्य्याः प्राधान्येन निबोध मे ॥ ५४
द्विमूर्द्धा शकुरश्चैव तथा बलिशिवः प्रभुः ।
अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥ ५५
विश्वानरः पुलोमा च विद्रावण-महाशरी ।
स्वर्भानुर्वृषपर्व्वा च विप्रचित्तिश्च वीर्य्यवान् ॥ ५६
एते सर्व्वे दनोः पुत्राः कश्यपादनु जज्ञिरे ।
स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु शची सुता ॥ ५७
उपदानवी हयशिराः शर्म्मिष्ठा वार्षपर्व्वणी ।
पुलोमा कालिका चैव वैश्वानरसुते उभे ॥ ५८

वह्निपत्न्यो महावीर्य्य मरीचेस्तु परिग्रहे।
तयोः पुत्त्रसहस्राणि षष्टिर्दानवनन्दनाः॥ ५९
मरीचिर्जनयामास महता तपसान्वितः।
पौलोमाः कालखञ्जाश्च दानवानां महाबलाः॥ ६०
अवध्या देवतानां हि हिरण्यपुरवासिनः।
पितामहप्रसादेन ये हताः सव्यसाचिना॥ ६१
सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा।
दैत्य-दानवसंयोगाज्जातास्तीव्रपराक्रमाः॥ ६२
सैंहिकेया इति ख्यातास्त्रयोदश महाबलाः।
राहुः शल्यः सुबलिनो बलश्चैव महाबलः॥ ६३
वातापिर्नमुचिश्चैव इल्वलः स्वसृपस्तथा।
अजिको नरकश्चैव कालनाभस्तथैव च॥ ६४
शरमाणः शरकल्प एते वंशविवर्द्धनाः।
तेषां पुत्त्राश्च पौत्त्राश्च दनुवंशविवर्द्धनाः॥ ६५
संह्रादस्य तु दैत्यस्य निवातकवचाः कुले।
उत्पन्ना महता तस्मिंस्तपसा भावितात्मनः॥ ६६
षरसुखा महासत्त्वास्ताम्रायाः परिकीर्त्तिताः।
काकी श्येनी च भासी च सुग्रीवी गृध्रिका शुकी॥६७
काकी काकानजनयदुलूकीप्रत्युलूकिकान्।
श्येनी श्येनांस्तथा भासीभासान् गृध्री तु गृध्रकान्॥६८
शुकी शुकान्यदेवांस्तु सुग्रीवी शुभपक्षिणः।
अश्वानुष्ट्रान् गर्द्दभांश्च ताम्रावंशः प्रकीर्त्तितः॥ ६९
विनतायास्तु पुत्त्रौ द्वावरुणो गरुड़स्तथा।
सुपर्णः पततां श्रेष्ठादरुणः स्वेन कर्म्मणा॥ ७०
सुरसायाः सहस्रन्तु सर्पाणाममितौजसाम्।
अनेकशिरसां तेषां खेचराणां महात्मनाम्॥ ७१
येषां प्रधाना राजानः शेष-वासुकि-तक्षकाः।
ऐरावतो महापद्मः कम्बलाश्वतरावुभौ॥ ७२
एलापत्रस्तथा पद्मः कर्कोटक-धनञ्जयौ।
महानील-महावर्णौ धृतराष्ट्रो बलाहकः॥ ७३
कुहरः पुष्पदन्तश्च दुर्म्मुखः सुमुखस्तथा।
वहुशः खररोमा च पाणिरित्येवमादयः॥ ७४
गणं क्रोधवशा विप्र तस्य सर्व्वं च दंष्ट्रिणः।
अण्डजाः पक्षिणोऽजाश्च वरायाः पशवः स्मृताः॥७५
अनायुषायाः पुत्त्रास्तु पञ्चाशच्च महाबलाः।
अभवन् बलवृत्ताश्च विहरोऽथ वृहस्तथा॥ ७६
अशांस्तु जनयामास सुरभिर्महिषी तथा।
इला वृक्ष-लता-वल्लीस्तृणजातींश्च सर्व्वतः॥ ७७
खसा तु यक्ष-रक्षांसि मुनिरप्सरसस्तथा।
अरिष्टासूत सर्व्वांश्च शभावैर्मानवोत्तम॥ ७८
एते कश्यपदायादाः कीर्त्तिताः शृणु जङ्गमान्।
एषां पुत्त्राश्च पौत्त्राश्च शतशोऽथ सहस्रशः॥ ७९
एष मन्वन्तरे तात सर्गः स्वारोचिषे स्मृतः।
वैवस्वते तु महति वारुणे वितते क्रतौ॥ ८०
जुह्वानस्य ब्रह्मणो वै प्रजाः सर्ग इहोच्यते।
पूर्व्वं यत्र तु ब्रह्मर्षीनुत्पन्नान् सप्त मानसान्॥ ८१
पुत्त्रान् वै कल्पयामास स्वयमेव पितामहः।
ततो विरोधे देवानां दानवानां महर्षयः॥ ८२
दितिर्विनष्टपुत्त्रा वै कश्यपं समुपस्थिता।
तां कश्यपः प्रसन्नात्मा सम्यगाराधितस्तथा॥ ८३
वरेण च्छन्दयामास सा च वव्रे वरं तदा।
पुत्त्रमिन्द्रवधार्थाय समर्थममितौजसम्॥ ८४
स च तस्यै वरं प्रादात् प्रार्थितः सुमहातपाः।
धारयामास गर्भन्तु शुचिः सा वरवर्णिनी॥ ८५
ततस्त्वाधाय सो दित्यां गर्भं तं संशितव्रतः।
जगाम कश्यपस्तप्तुं तपसा हृष्टमानसः॥ ८६
तस्याश्चैवान्तरं प्रेप्सुः सोऽभवत् पाकशासनः।
ऊने वर्षशते चास्या ददर्शान्तरमेव सः॥ ८७
अकृत्वा पादयोः शौचं दितिश्शयनमास्थिता ततः।
निद्रामाहारयामास तस्याः कुक्षिं प्रविश्य ह॥ ८८
वज्रपाणिस्तु तं गर्भं सप्तधा समकृन्तत।
स पाट्यमानो गर्भोऽथ वज्रेण प्ररुरोद ह॥ ८९
मा रोदीस्त्वं पुनः शक्रः पुनरेवाभ्यभाषत।
सोऽभवत् सप्तधा गर्भस्तमिन्द्रस्त्वसितः पुनः॥ ९०
एकैकं सप्तधा चक्रे वज्रेणैवारिकर्शनः।
मरुतो नाम ते देवा बभूवुः सुमहाबलाः॥ ९१
खगा एकोनपञ्चाशत् सहाया वज्रपाणिनः।
तेषामेव प्रवृद्धानां हरिः प्रादात् प्रजापतिः॥ ९२
क्रमशस्तानि राज्यानि पृथुपूर्व्वं शृणुष्व तत्।
अरिष्टपुरुषो वीरः कृष्णो जिष्णुः प्रजापतिः॥ ९३
पर्ज्जन्यस्तु धनाध्यक्षस्तस्य सर्व्वमिदं जगत्।
भूतसर्गमिमं सम्यक् कथितं शृणु चाग्रतः॥ ९४

अभिषिच्याधिराज्ये तु पृथवै पितामहः।
ततः क्रमेण राज्यानि व्यादेष्टुमुपचक्रमे ॥ ८५

इति श्रीशैवे महापुराणे धर्मसंहितायां देव-दानवादिसृष्टिकथनं नाम चतुःपञ्चाशोऽध्यायः॥५४॥

पञ्चपञ्चाशोऽध्यायः।

सूत उवाच।

द्विजानां वीरुधाञ्चैव नक्षत्र-ग्रहयोस्तथा।
यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यषिचयत् ॥ १
अपान्तु वरुणं राज्ये राज्ञां वैश्रवणं प्रभुम्।
आदित्यानां तथा विष्णुं वसूनामथ पावकम् ॥ २
प्रजापतीनां दक्षन्तु मरुतामथ वासवम्।
दैत्यानां दानवानाञ्च प्रह्लादममितौजसम् ॥ ३
वैवस्वतं पितॄणाञ्च यमं राज्येऽभ्यषिचयत्।
मातॄणाञ्च व्रतानाञ्च मन्त्राणाञ्च तथा गवाम् ॥ ४
यक्षाणां राक्षसानाञ्च पार्थिवानां तथैव च।
सर्व्वभूतपिशाचानां गिरिशं शूलपाणिनम् ॥ ५
शैलानां हिमवन्तञ्च नदीनामथ सागरम्।
मृगाणामथ शार्दूलं गोवृषन्तु गवामपि ॥ ६
वनस्पतीनां प्लक्षन्तु एवं राज्येऽभ्यषिचयत्।
दिशापालांस्ततश्चैव स्थापयामास सर्व्वशः ॥ ७
पूर्व्वस्यां दिशि पुत्रन्तु वैराजस्य प्रजापतेः।
सुधन्वानन्तु राज्ये तु कर्द्दमस्य प्रजापतेः ॥ ८
दक्षिणस्यां तथा पुत्रं स्थापयद्दैवतं विभुः।
पश्चिमायां दिशि तथा रजसः पुत्रमच्युतम् ॥ ९
केतुमन्तं महात्मानं राजानं व्यादिशत् प्रभुः।
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ॥ १०
उदीच्यां दिशि राजानं दुर्द्धर्षं सोऽभ्यषिचयत्।
तस्य विस्तरमाख्यातं मनोर्वैवस्वतस्य ह ॥ ११
सर्व्वतदधिष्ठानं पुराणं परिकीर्त्तितम् ॥ १२

इति श्रीशैवे महापुराणे धर्मसंहितायां माधिपत्यप्रकल्पना नाम पञ्चपञ्चाशोऽध्यायः ॥५५॥

षट्पञ्चाशोऽध्यायः।

सनत्कुमार उवाच।

आसीद्धर्मस्य गोप्ता वै पूर्व्वमत्रिसमः प्रभुः।
अत्रिवंशसमुत्पन्नस्त्वङ्गो नाम प्रजापतिः ॥ १
तस्य पुत्रोऽभवद्वेणो नात्यर्थं धार्म्मिकोऽभवत्।
जातो मृत्युसुतायां वै सुनीथायां प्रजापतेः ॥ २
स मातामहदोषेण वेणः कालात्मजात्मजः।
स्वधर्म्मं पृष्ठतः कृत्वा कामाल्लोकेष्ववर्त्तत ॥ ३
मर्य्यादां स्थापयामास धर्मशास्त्रविरोधिनीम्।
वर्णधर्म्मानतिक्रम्य सोऽधर्मनिरतोऽभवत् ॥ ४
निःस्वाध्याय-वषट्कारास्तस्मिन् राजनि शासति।
प्रावर्त्तन्त पपुः सोमं हुतं यज्ञेषु दीक्षिताः ॥ ५
न यष्टव्यं न होतव्यमित्याज्ञापयति प्रजाः।
तमतिक्रान्तमर्य्यादमाददानमसाम्प्रतम् ॥ ६
जघ्नुर्महर्षयः सर्व्वे मरीचिप्रमुखास्तदा।
वयं दीक्षां प्रवेक्ष्यामः संवत्सरगणान् बहून् ॥ ७
अधर्म्मं कुरु मा वेण एष धर्म्मः सतामपि।
निधानं हि प्रसूतस्त्वं प्रजानां परिपालकः ॥ ८
प्रजास्त्वं पालयिष्येऽहमिति तैः समयः कृतः।
तांस्तदा ब्रुवतः सर्व्वान् मुमूर्षुरब्रवीत् ततः ॥ ९
वेणः प्रहस्य दुर्बुद्धिरिममर्थं विचिन्तयन्।
स्रष्टा धर्मस्य कश्चान्यः श्रोतव्यः कस्य वै मया ॥ १०
संमूढ़ा न विदुर्धर्म्मं भवन्तो मां विशेषतः।
इत्थं संसाधयन् पृथ्वीं प्लावयेयं तथा जलम् ॥ ११
द्यां भुवञ्चैव विध्येयं नात्र कार्य्या विचारणा।
यदा न शक्यते नेतुं दैवमोहेन मोहितम् ॥ १२
अनुनेतुं तदा वेणं ततः क्रुद्धा महर्षयः।
निगृह्य तं दुरात्मानं विस्फुरन्तं महाबलम् ॥ १३
ततोऽस्य सव्यमूरुं ते ममन्थुर्जातमन्यवः।
तस्मिन् सुमथ्यमाने वै राज्ञ ऊरौ प्रजज्ञिवान् ॥ १४
ह्रस्वोऽतिमात्रः पुरुषः कृष्णश्चापि बभूव ह।
स भीतः प्राञ्जलिर्भूत्वा तस्थौ च ऋषिसत्तमः ॥ १५
तमत्रिर्विह्वलं दृष्ट्वा निषीदेत्यब्रवीद्वचः।
निषादवंशकर्त्ता स बभूव वदतां वरः ॥ १६
धीवरानसृजच्चापि वेणकल्मषसम्भवान्।

...री चान्ये विन्ध्यनिलयाः पुलिन्दास्तुम्बरास्तथा ॥ १७
अधर्म्मरुचयो ये च विद्धि तान् वेणकल्मषान्।
ततः पुनर्महात्मानः पाणिं वेणस्य दक्षिणम् ॥ १८
अरणीमिव सन्धाय ममन्थुस्ते महर्षयः।
पृथुस्तस्मात् समुत्तस्थौ कराज्ज्वलनसन्निभात् ॥ १९
दीप्यमानः स्ववपुषा साक्षादग्निसमोज्ज्वलः।
आद्यमाजगवं नाम धनुर्गृह्य महारवम् ॥ २०
शरांश्च दिव्यान् रक्षार्थं कवचञ्च महाप्रभम्।
तस्मिन् जातेऽथ भूतानि मुदितानि तु सर्व्वशः ॥ २१
समापेतुर्दिवो देवा वेणश्च त्रिदिवं ययौ।
सत्पुत्त्रेण सुजातेन एवं सर्व्वमिदं जगत् ॥ २२
त्राता स पुरुषव्याघ्रः पुन्नाम्नो नरकात् तदा।
तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्व्वशः ॥ २३
तोयानि चाभिषेकार्थं सर्व्व एवावतस्थिरे।
पितामहश्च भगवान् देवैराङ्गिरसैः सह ॥ २४
समागम्य तदा वैण्यमभ्यषिञ्चन्नराधिपम्।
महता राजराज्येन प्रजापालो महाद्युतिः ॥ २५
अभिषिक्तो महातेजा विधिवद्धर्म्मकोविदैः ॥
आदिराज्ये महातेजाः पृथुर्वैण्यः प्रतापवान् ॥ २६
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः।
अनुरागात् ततस्तस्य नानाश्वर्य्यमभूत् तदा ॥ २७
आपः संस्तम्भिता दद्युर्मार्गं समभिपद्यत।
पर्व्वताश्च ददुर्मार्गं ध्वजसङ्गश्च नाभवत् ॥ २८
अकृष्टपच्या पृथिवी सिध्यन्त्यन्नानि चिन्तया।
सर्व्वकामदुघा गावः पुटके पुटके मधु ॥ २९
एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामतिः ॥ ३०
तस्मिन्नेव महायज्ञे प्राप्ते जज्ञेऽथ मागधः।
पृथोस्तवार्थं तौ तत्र समाहूतौ महर्षिभिः ॥ ३१
तावूचुरृषयः सर्व्वे स्तूयतामेष पार्थिवः।
कर्म्मैतदनुरूपं वा पात्रं वा यन्नराधिपः ॥ ३२
तावूचतुस्तानानस्य न विद्मो लक्षणं यशः।
तावूचुस्ते भविष्यैश्च लक्षणैः स्तूयतामिति ॥ ३३
तच्छ्रुत्वाशीस्तु चक्राते राज्ञस्तौ सूत-मागधौ।
तयोः स्तवान्ते सुप्रीतः पृथुः प्रादात् प्रजेश्वरः ॥ ३४
अनूपदेशं सूताय मगधं मागधाय च।

तं दृष्ट्वा परमप्रीता देवा ब्रह्मपुरोगमाः ॥ ३५
वृत्तीनामेष वो दाता भविष्यति नरेश्वरः।
ततो वैण्यं प्रजाः सर्व्वा जीवनायाभिदुद्रुवुः ॥ ३६
त्वं नो वृत्तिं विधत्स्वेति तमूचुर्ब्राह्मणाः किल।
सोऽपसृत्याथ सहसा प्रजापतिचिकीर्षया ॥ ३७
धनुर्गृह्य पृषत्कांश्च धरां प्रत्यद्रुययां पुनः।
ततो वैण्यभयत्रस्ता गौर्भूत्वा प्राद्रवन्मही ॥ ३८
तां पृथुर्धनुरादाय द्रवन्तीमन्वधावत।
सा लोकाँल्लोकपालादीन् ययौ वैण्यभयात् तदा ॥ ३९
अलभन्ती तु सा त्राणं तं वै शरणमीयिवान्।
कृताञ्जलिपुटा भूत्वा इदं वचनमब्रवीत् ॥ ४०
कथं धारयिता चासि प्रजा राजन् मया विना।
मयि लोकाः स्थिता राजन् मयेदं धार्य्यते जगत् ॥ ४१
मत्कृते च विनश्यन्ति सर्व्वे पार्थिव पार्थिवाः।
न मामर्हसि हन्तुं वै श्रेयश्चेत् त्वं चिकीर्षसि ॥ ४२
उपायतः समारब्धाः सर्व्वे सिध्यन्त्युपक्रमाः।
उपायं पश्य येन त्वं धारयेथाः प्रजा नृप ॥ ४३
अनुभूता भविष्यामि यच्छ कोपं महीपते।
अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि ॥ ४४
स त्वन्तु पृथिवीपाल न धर्म्मं त्यक्तुमर्हसि।
एवं बहुविधं वाक्यं श्रुत्वा राजा महामनाः ॥ ४५
कोपं निगृह्य धर्म्मात्मा इदं वचनमब्रवीत्।
एकस्यार्थे तु यो हन्यादहन् पापन्तु तस्य तत् ॥ ४६
बहूनां हन्ति वाप्येकं तस्य नास्तीह पातकम्।
सोऽहं प्रजानिमित्तं त्वां हनिष्यामि वसुन्धरे ॥ ४७
यदि मे वचनन्त्वद्य करिष्यसि च नो हितम्।
सा त्वमाद्यां समास्थाय मम सञ्जीवय प्रजाः ॥ ४८

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

सप्तपञ्चाशोऽध्यायः।

सूत उवाच।

तच्छ्रुत्वा पृथिवी प्राह न मां त्वं हन्तुमर्हसि।
वत्सन्तु मे मतं पश्य क्षरेऽहं येन वत्सला ॥ १
स माञ्च कुरु सर्व्वत्र पर्व्वतैरावृता यतः।

यथा विसन्दमानाहं चीरं सर्व्वत्र भावये ॥ २
तत उत्सारयामास गिरौञ्छ्तसचस्रशः ।
धनुष्कोव्या तदा वैन्यस्तेन शैला विवर्द्धिताः ॥ ३
न हि पूर्व्वविसर्गे वै विषये पृथिवीतले ।
प्रविभागः पुराणां वै ग्रामाणां वासवत् तदा ॥ ४
न शस्यानि न गोरचा न कृषिर्न वणिक्‌पथः।
यत्र तत्र समलं स्याद्भूमेर्वासस्तद्भूद्विजाः ॥ ५
आहारः फलमूलानि प्रजानाञ्चाभवत् तदा ।
सङ्कल्पयित्वा वत्सन्तु मनुं स्वायम्भुवं प्रभुः ॥ ६
स पाणौ पुरुषश्रेष्ठो दुदोह पृथिवीं तदा ।
शस्यजातानि सर्व्वाणि गोर्हि वैन्यः प्रतापवान् ॥७
तेनान्नेन प्रजाः सर्व्वा वर्त्तयन्त्यद्य नित्यशः ।
ऋषिभिस्तु ततो दुग्धा वत्सः सोमोऽभवत् ततः ॥ ८
पात्रं छन्दांसि दोग्धा वै तपो दुग्धञ्च शाश्वतम् ।
ततो देवगणैर्दुग्धा वत्सं कृत्वा पुरन्दरम् ॥ ९
काञ्चनं पात्रमादाय दोग्धा चैव तु भास्करः ।
चीरमूर्ज्जस्करञ्चैव येन वर्त्तन्ति देवताः ॥ १०
पितृभिश्च पुनर्दुग्धा पात्रमादाय राजतम् ।
वत्सं कृत्वा यमञ्चैव दोग्धा कालस्तु चान्तकः ॥ ११
स्वधा दुग्धन्तु नागैर्या पुनर्दुग्धा वसुन्धरा ।
अलाबुपात्रमादाय वत्सं कृत्वा तु तक्षकम् ॥ १२
नागैर्दुग्धा वसुमती विषं चीरं महाकृते ।
तेषामैरावतो दोग्धा धृतराष्ट्रः प्रतापवान् ॥ १३
वाय्वाहारस्तदाचाराः सदा सर्पा विषोल्बणाः ।
असुरैश्च पुनर्दुग्धा पात्रं कृत्वा तदायसम् ॥ १४
माया दुग्धन्तु वत्सं हि कृत्वा पौत्रं विरोचनम् ।
दोग्धा दैत्यो मधुस्तत्र ततो मायाधिकासुराः ॥१५
यचैः संश्रूयते दुग्धा आमपात्रे वसुन्धरा ।
अन्तर्द्धानञ्च वै दुग्धं वत्सं वैश्रवणं तथा ॥ १६
राचसैश्च पिशाचैश्च पुनर्दुग्धा वसुन्धरा ।
चीरं रुधिरमेवापि दोग्धा राचसनायकः ॥ १७
वत्सं सुमालिनं कृत्वा तेन ते वर्त्तयन्त्यथ ।
पद्मपत्रे पुनर्दुग्धा गन्धर्व्वैः साप्सरोगणैः ॥ १८
वत्सं चित्ररथं कृत्वा दोग्धा वसुरुचिस्तथा ।
शैलैश्च श्रूयते दुग्धा रत्नान्योषधयः शुभाः ॥ १९
वत्सस्तु हिमवानासीद्दोग्धा मेरुर्महागिरिः ।
आसीदियं समुद्रान्ता मेदिनी च परिस्रुता ॥ २०
मधु-कैटभयोः कृत्स्ना मेदसा च परिप्लुता ।
दुहितृत्वमनुप्राप्ता धरा पृथ्वुरुच्यते ततः ॥ २१
पृथुना प्रविभक्ता च कृता सस्वरवन्दना ।
एवंप्रभावो वैन्यः स राजासीन्मुख्यतो नृपाम् ॥२२
नमस्यश्चैव पूज्यश्च वृत्तिकामैर्नृपैः सदा ।
ब्राह्मणैश्च महाभागैर्वेद्धैः शूद्रैर्धनेप्सुभिः ॥ २३
योधैरपि च विक्रान्तैः पार्थिवत्वमभीप्सुभिः ।
आदिकर्त्ता रणानाञ्च योधानां प्रथमो मुने ॥ २४
यो हि योधो रणं याति कीर्त्तयित्वा पृथुं नृपम् ।
स घोररूपात् संग्रामात् चेमी तरति मूर्त्तिमान्॥२५
वैश्योऽपि कृषिभागी स्याच्छूद्रः पुण्यफलं लभेत् ।
पृथुः सदा नमस्कार्यो भूतिकामैस्तु पर्व्वसु ॥ २६

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशोऽध्यायः ।

सूत उवाच ।

एतत् ते मे मुने ख्यातं व्यासस्यामिततेजसः ।
यथा सनत्कुमारेण कथितं यत् पुरातनम् ॥ १
यत् पृच्छसि मुने भूयस्तद्वच्यामीह साम्प्रतम् ।

शौनक उवाच ।

मन्वन्तराणि सर्व्वाणि विस्तरेणानुकीर्त्तय ॥ २
यावन्तो मनवश्चैव श्रोतुमिच्छामि मानद ।

सूत उवाच ।

स्वायम्भुवो मनुश्चैव ततः स्वारोचिषस्तथा ॥ ३
वैवस्वतो मुनिश्रेष्ठ साम्प्रतं मनुरुच्यते ।
सावर्णिश्च मनुश्चैव भौत्यो रौच्यस्तथाऽपरः ॥ ४
तथैवमेव सावर्णिश्चत्वारो मनवस्तथा ।
अतीता वर्त्तमानाश्च तथैवानागताश्च ये ॥ ५
कीर्त्तिता मनवश्चापि मयैवैते यथा श्रुताः ।
ऋषींस्तेषां प्रवच्यामि पुत्रान् देवगणांस्तथा ॥ ६
मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः ।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः ॥ ७
उत्तरस्यां दिशि तथा मुने सप्तर्षयस्तथा ।

धामा नाम तथा देवा आसन् स्वायम्भुवान्तरे ॥ ८
आग्नीध्रश्चाग्निवाहश्च मेधा मेधातिथिर्वसुः।
ज्योतिष्मान् द्युतिमान् हव्यः सवनः शुभ्र एव च ॥ ९
इति महर्षयस्तत्र वायुप्रोक्ता महाव्रताः।
देवाश्च तुषिता नाम स्मृताः स्वारोचिषेऽन्तरे ॥ १०
हरिघ्नः सुकृतिर्ज्योतिरयोमूर्त्तिरयः स्मयः।
प्रथितश्च मनस्यश्च नभः सूर्य्यस्तथैव च ॥ ११
स्वारोचिषस्य पुत्त्रास्ते मनोः पुत्त्रा महात्मनः।
कीर्त्तिता मुनिशार्दूल महावीर्य्यपराक्रमाः ॥ १२
द्वितीयमेतत् कथितं मुने मन्वन्तरं तव।
तृतीयं तव वक्ष्यामि तन्निबोध यथातथम् ॥ १३
वशिष्ठपुत्त्राः सप्तासन् वाशिष्ठा इति विश्रुताः।
हिरण्यगर्भस्य सुता ऊर्ज्जा नाम महौजसः ॥ १४
ऋषयोऽत्र समाख्याताः कीर्त्त्यमानान् निबोध मे।
औत्तमेया ऋषिश्रेष्ठ दश पुत्त्रा मनोरमाः ॥ १५
इष ऊर्ज्जा तनूर्ज्जश्च मधुर्माधव एव च।
शुचिः शुक्रवहश्चैव नभसो नभ एव च ॥ १६
ऋषभस्तत्र देवाश्च मन्वन्तर उदाहृताः।
मन्वन्तरं चतुर्थं ते कथयिष्यामि तच्छृणु ॥ १७
गार्ग्यः पृथुस्तथैवाग्निर्जन्यो धाता कपीनकः।
कपीवान् सप्तर्षयस्तु सत्या देवगणास्तथा ॥ १८
तामसस्यान्तरे चैव मनोर्म्मे कथितास्तव।
द्युतिः पीतः सौतपस्यः तपः शूलश्च तापनः ॥ १९
तपोरतिरकल्माषस्तन्वी धन्वी महाऋषे।
तामसस्य सुता ह्येते दश पुत्त्रा महाव्रताः ॥ २०
वायुप्रोक्ता महाकाले चतुर्थे वै तदन्तरे।
वेदबाहुर्जयश्चैव मुनिर्व्वेदशिरास्तथा ॥ २१
हिरण्यरोमा पर्ज्जन्य ऊर्द्ध्वबाहुश्च सोमपाः।
सत्यनेत्ररताश्चान्ये एते सप्तर्षयोऽपरे ॥ २२
देवाश्च भूतरजसस्तथा प्रकृतयस्तथा।
पारिप्लवश्च रैभ्यश्च मनोरन्तरमेव च ॥ २३
अथ पुत्त्रानिमांस्तस्य निबोध गदतो मम।
धृतिमानव्ययोऽव्यक्तः सत्यदर्शी निरुत्सवः ॥ २४
अरण्यश्च प्रकाशश्च निर्म्मोहः सत्यवान् कृतिः।
रैवतस्य मनोः पुत्त्राः पञ्चमश्चैतदन्तरम् ॥ २५
षष्ठं ते सम्प्रवक्ष्यामि तन्निबोध महामुने।
भृगुर्नभो विवस्वांश्च सुधर्म्मा विरजास्तथा ॥ २६
अतिनामा सहिष्णुश्च सप्तैवैते महर्षयः।
चाक्षुषस्यान्तरे विप्र मनोर्देवानिमान् शृणु ॥ २७
आद्याः प्रसूता ऋभवः पृथूग्राश्च दिवौकसः।
लेखाश्च नाम विप्रेन्द्र पञ्च देवगणाः स्मृताः ॥ २८
ऋषेरङ्गिरसः पुत्त्रा महात्मानो महाबलाः।
नड्वलेया मुनिश्रेष्ठ दश पुत्त्राश्च विश्रुताः ॥ २९
रुरुप्रभृतयो विप्र षष्ठे मन्वन्तरे स्मृताः।
अत्रिर्वशिष्ठो भव्यश्च कश्यपश्च महानृषिः ॥ ३०
गौतमोऽथ भरद्वाजो विश्वामित्रस्तथैव च।
जमदग्निः सप्तमस्तु ऋषयः साम्प्रतं दिवि ॥ ३१
आदित्यान् मरुतो रुद्रानश्विनौ भास्करान् वसून्।
महाराजिकसाध्यांश्च साध्यांश्चैव गणान् विभुः ॥ ३२
मनोर्वैवस्वतस्यैते वर्त्तन्ते साम्प्रतन्तु ये।
इक्ष्वाकुप्रमुखाश्चैव पुत्त्र-पौत्त्रा महात्मनः ॥ ३३
मनोः समभवन् विप्र दिक्षु सर्व्वासु शौनक।
मन्वन्तरेषु सर्व्वेषु प्रागृषयः सप्तसप्तकाः ॥ ३४
स्थिता धर्म्मव्यवस्थार्थं लोकसंरक्षणाय च।
मन्वन्तरे व्यतिक्रान्ते चत्वारः सप्तसप्तकाः ॥ ३५
कृत्वा कर्म्म दिवं यान्ति ब्रह्मलोकमनामयम्।
ततोऽन्ये तपसा स्थानं तत्पूर्व्वं सम्प्रयान्ति च ॥ ३६
सवर्णा मुनयो भव्याः पञ्च तांश्च निबोध मे।
एको वैवस्वतस्तेषां चत्वारस्तु प्रजापतेः ॥ ३७
परमेष्ठिसुता विप्र मेरुसावर्णतां गताः।
दक्षस्य ते च दौहित्राः प्रियायास्तनयास्तु ते ॥ ३८
महता तपसा युक्ता मेरुपृष्ठे वसन्ति हि।
रुचेः प्रजापतेः पुत्त्रो रौच्यो नाम मनुः स्मृतः ॥ ३९
भूत्याश्चोत्पादितो देव्यां भौत्यो नामाभवत् पुनः।
अनागताश्च सप्तैते कल्पेऽस्मिन् मनवः स्मृताः ॥ ४०
अनागताश्च सप्तैव स्मृता दिवि महर्षयः।
रामो व्यासस्तथात्रेयो दीप्तिमान् सुबहुश्रुतः ॥ ४१
भारद्वाजिस्तथा द्रौणिरश्वत्थामा महाद्युतिः।
गौतमस्यात्मजश्चैव शरद्वान् गौतमः कृतः ॥ ४२
कौशिको गालवश्चैव रुरुः काश्यप एव च।
एते सप्त महात्मानो भविष्या मुनिसत्तमाः ॥ ४३
देवतानां गणास्तत्र त्रयः प्रोक्ताः स्वयम्भुवा।

मारीचेश्चैव पुत्रास्ते कश्यपस्य महात्मनः ॥ ४४
वीरवांश्चावनीवांश्च सुमन्तो धृतिमान् वसुः ।
वरिष्णुरार्य्यो विष्णुश्च राजा सुमतिरेव च ॥ ४५
सावर्णस्य मनोः पुत्रा भविष्या दश शौनक ।
प्रथमं मेरुसावर्णिं प्रवक्ष्यामि मनुं शृणु ॥ ४६
मेधातिथिश्च पौलस्त्यो वसुः काश्यप एव च ।
ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा ॥ ४७
सवनश्चैव वाशिष्ठ आत्रेयो हव्य एव च ।
पौलहः सप्त इत्येते ऋषयो रोहितान्तरे ॥ ४८
देवतानां गणास्तत्र त्रय एव महामुने ।
दीक्षापुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः ॥ ४९
दृष्टकेतुर्दीप्तकेतुः पञ्चहस्तो निराकृतिः ।
पृथुश्रवा भूरिद्युम्नो ऋचीको बृहतो गयः ॥ ५०
प्रथमस्य तु सावर्णेनव पुत्रा महौजसः ।
दशमे त्वथ पर्य्याये द्वितीयस्यान्तरे मनोः ॥ ५१
हविष्मान् पुलहश्चैव सुकृतिश्चैव भार्गवः ।
आयोमुक्तिस्तथात्रेयो वशिष्ठश्चाव्ययः स्मृतः ॥ ५२
पौलस्त्यः प्रयतिश्चैव नाभारश्चैव काश्यपः ।
अङ्गिरा नभसः सत्यः सप्तैते परमर्षयः ॥ ५३
देवतानां गणाश्चापि द्विशिमन्तश्च ये स्मृताः ।
अचलान्नोत्तमौजाश्च भूरिषेणश्च वीर्य्यवान् ॥ ५४
शतानीको निरामित्रो वृषसेनो जयद्रथः ।
भूरिद्युम्नः सुवर्च्चाश्च दश त्वेते मनोः सुताः ॥ ५५
एकादशे तु पर्य्याये तृतीयस्यान्तरे मनोः ।
तस्यापि सप्त ऋषयः कीर्त्यमानान् निबोध मे ॥ ५६
हविष्मान् कश्यपश्चापि वपुष्मांश्चैव वारुणः ।
आत्रेयोऽथ वशिष्ठश्च अनघस्त्वङ्गिरास्तथा ॥ ५७
चारुधृष्यश्च पौलस्त्यो निस्वरोऽग्निस्तु तेजसः ।
सप्तैते ऋषयः प्रोक्तास्त्रयो देवगणाः स्मृताः ॥ ५८
ब्रह्मणस्तु सुतास्ते तु अतः शृणु महामते ।
सर्व्वत्रगः सुशर्म्मा च देवानीकस्तु क्षेमकः ॥ ५९
दृढेषुः पण्डको दर्श जरुर्वाहो मनोः सुताः ।
सुवर्णस्य तु पुत्रा वै तृतीयस्य नव स्मृताः ॥ ६०
चतुर्थस्य तु सावर्णेर्ऋषीन् सप्त निबोध मे ।
द्युतिर्वशिष्ठपुत्रश्च आत्रेयः सुतपास्तथा ॥ ६१
अङ्गिरास्तपसो मूर्त्तिस्तपस्वी कश्यपस्तथा ।
तपोऽशनश्च पौलस्त्यः पौलहश्च तपोरतिः ॥ ६२
भार्गवः सप्तमस्तेषां विज्ञेयस्तपसो निधिः ।
पञ्च देवगणाः प्रोक्ता मानसा ब्रह्मणः सुताः ॥ ६३
द्वादशे चैव पर्य्याये भाव्ये रौच्यान्तरे मनोः ।
अङ्गिराश्चैव धृतिमान् पौलस्त्यो हव्यवांस्तु यः ॥ ६४
पौलहस्तत्त्वदर्शी च भार्गवश्च निरुत्सवः ।
निष्प्रपञ्चस्तथात्रेयो निर्म्मोहः काश्यपस्तथा ॥ ६५
सुतपाश्चैव वाशिष्ठः सप्तैवैते महर्षयः ।
त्रय एव गणाः प्रोक्ता देवतानां स्वयम्भुवा ॥ ६६
पुनर्महात्मजास्ते वै चित्रो वैचित्र एव च ।
तयोर्धर्म्मभृतोध्रश्च सुनेत्रः क्षत्रवृद्धकः ॥ ६७
निर्भयः सुतपा द्रोढ़ो मनो रौच्यस्य ते सुताः ।
त्रयोदशे तु पर्य्याये भौत्यस्यैवान्तरे मनोः ॥ ६८
आग्नीध्रः काश्यपश्चैव पौलस्त्यो मागधश्च यः ।
भार्गवोऽप्यतिवाह्यश्च शुचिराङ्गिरसस्तथा ॥ ६९
युक्तश्चैव तथात्रेयः शक्रो वाशिष्ठ एव च ।
अजितः पुलहश्चैव अन्त्याः सप्तर्षयश्च ते ॥ ७०
एतेषां कल्य उत्थाय कीर्त्तनात् सुखमेधते ।
अतीतानागतानां वै महर्षीणां सदा नरः ॥ ७१
देवतानां गणाः प्रोक्ताः पञ्च शृणु महामते ।
तरङ्गभीरुर्बुध्नश्च तनूग्रोऽनुग्र एव च ॥ ७२
अतिमानी प्रवीणश्च विष्णुः संक्रन्दनस्तथा ।
तेजस्वी शबलश्चैव सत्यस्यैते मनोः सुताः ॥ ७३
भौत्यस्यैवाधिकारे तु पूर्व्वकल्पस्तु पूर्य्यते ।
इत्येतेऽनागतातीता मनवः कीर्त्तिता मया ॥ ७४
उक्ताः सनत्कुमारेण व्यासायामिततेजसा ।
पूर्णे युगसहस्रान्ते परिपाल्य स्वधर्म्मतः ॥ ७५
प्रजाभिस्तपसा युक्ता ब्रह्मलोकं व्रजन्ति ते ।
युगानि सप्ततिर्ह्येक-साग्राण्यन्तरमुच्यते ॥ ७६
चतुर्द्दशैते मनवः कीर्त्तिताः कीर्त्तिवर्द्धनाः ।
मन्वतरेषु संहाराः संहारान्ते पुनर्भवः ॥ ७७
न शक्यमन्तरं तेषां वक्तुं वर्षशतैरपि ।
पूर्णे शतसहस्रे तु कल्पो निःशेष उच्यते ॥ ७८
तत्र सर्व्वाणि भूतानि दग्धान्यादित्यरश्मिभिः ।
ब्रह्माणमग्रतः कृत्वा सहादित्यगणैर्मुने ॥ ७९
प्रविशन्ति सुरश्रेष्ठ हरिं नारायणं प्रभुम् ।

स्रष्टारं सर्व्वभूतानां कल्पान्तेषु पुनः पुनः ॥ ८०
भूयोऽपि भगवान् रुद्रः संहर्त्ता काल एव हि ।
कल्पान्तेऽतः प्रवक्ष्यामि मनोर्वैवस्वतस्य वै ॥ ८१
विसर्गं पुण्यमाख्यानं धन्यं कुलविवर्द्धनम् ॥ ८२

इति श्रीशैवे महापुराणे धर्म्मसंहितायां मन्वन्तरकथावर्णनेऽष्टपञ्चाशोऽध्यायः ॥५८॥

एकोनषष्टितमोऽध्यायः ।

सूत उवाच ।

विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यां महामृषिः ।
तस्य भार्य्याभवत् संज्ञा त्वाष्ट्री देवी सुरेणुका ॥ १
भर्त्तृरूपेण नातुष्यद्रूप-यौवनशालिनी ।
आदित्यस्य हि तद्रूपमसहन्ती सुतेजसा ॥ २
दह्यमाना ततोद्वेगमकरोद्वरवर्णिनी ।
ऋषिऽस्यां त्रीण्यपत्यानि जनयामास भास्करः ॥ ३
संज्ञायान्तु मनुः पूर्व्वं श्राद्धदेवः प्रजापतिः ।
यमश्च यमुना चैव यमजौ सम्बभूवतुः ॥ ४
संवर्त्तुलन्तु तद्रूपं दृष्ट्वा संज्ञा विवस्वतः ।
असहन्ती ततश्छायामात्मनः सासृजच्छुभा ॥ ५
छाया सती तु सा संज्ञामवोचद्भक्तितः शुभे ।
किं करोमि हि कार्य्यं ते कथयस्व शुचिस्मिते ॥ ६

संज्ञोवाच ।

अहं यास्यामि भद्रं ते ममैव भवनं पितुः ।
त्वयैव भवने मह्यं वस्तव्यं निर्व्विकारया ॥ ७
इमौ च बालकौ मह्यं कन्या चेयं सुमध्यमा ।
पालनीयाः सुखेनैव मम चेदिच्छसि प्रियम् ॥ ८

छायोवाच ।

आ केशग्रहणाद्देवि सहिष्यामि सुदुष्कृतम् ।
आख्यास्यामि मतं तुभ्यं गच्छ देवि यथासुखम् ॥ ९
इत्युक्ता सागमद्देवी व्रीड़िता सन्निधौ पितुः ।
पित्रा निर्भर्त्सिता तत्र नियुक्ता सा पुनः पुनः ॥ १०
आगच्छद्वड़वा भूत्वाच्छाद्य रूपं ततः स्वकम् ।
कुरूंस्तदोत्तरान् प्राप्य तृणां मध्ये चचार ह ॥ ११
संज्ञां तान्तु रविर्मत्वा छायायां स सुतं तदा ।
जनयामास सावर्णिर्मनुः स भविता किल ॥ १२
संज्ञा तु पार्थिवी या तु तस्य पुत्रस्य वै तदा ।
चकाराभ्यधिकं स्नेहं न तथा पूर्व्वजे सुते ॥ १३
अनुजस्य च भूषादि यमस्तस्य न चक्षमे ।
सरोषः स च बाल्याच्च भाविनोऽर्थस्य वै बलात् ॥१४
छायां सन्तर्ज्जयामास पदा वैवस्वतो यमः ।
तं शशाप ततः क्रोधाच्छाया तं कलुषीकृता ॥ १५
चरणः पततामेष न वेति भृशरोषिता ।
यमस्ततः पितुः सर्व्वं प्राञ्जलिः प्रत्यवेदयत् ॥ १६
भृशं शापभयोद्विग्नः संज्ञावाक्यैर्विचेष्टितः ।
मात्रा स्नेहेन सर्व्वेषु वर्त्तितव्यं सुतेषु वै ॥ १७
स्नेहमस्मानपहाय कनीयांसं विभूषति ।
तस्मान्मयोद्यतः पादस्तद्भवान् क्षन्तुमर्हति ॥ १८
शप्तोऽहमस्मि देवेश जनन्या तपतां वर ।
तव प्रसादाच्चरणो न पतेन्मम गोपते ॥ १९

सवितोवाच ।

असंशयं पुत्र महद्भविष्यत्यत्र कारणम् ।
येन त्वामाविशत् क्रोधो धर्म्मज्ञं सत्यवादिनम् ॥ २०
न शक्यमेतन्मिथ्या वै कर्त्तुं मातृवचस्तव ।
क्रिमयो मांसमदाय गमिष्यन्ति महीतले ॥ २१
तद्वचो भविता नित्यं त्वञ्च त्राता भविष्यसि ।
आदित्यश्चाब्रवीत् तान्तु च्छायां क्रोधसमन्वितः ॥२२
किं तुल्येऽभ्यधिकः स्नेह एतदाख्यातुमर्हसि ।
सा रवेर्वचनं श्रुत्वा याथातथ्यं न्यवेदयत् ॥ २३
विवस्वानपि तच्छ्रुत्वा क्रुद्धस्त्वष्टारमभ्यगात् ।
त्वष्टा च तं यथान्यायमर्च्चयित्वा विभावसुम् ॥ २४
निर्द्दग्धुकामं रोषेण सान्त्वयामास वै तदा ।
तवातितेजसा दग्धा इदं रूपं न शोभते ॥ २५
असहन्ती च तत् संज्ञा वने वसति शाद्वले ।
श्लाघ्या योगबलोपेता योगमासाद्य गोपते ॥ २६
अनुकूलन्तु देवेश यदि स्यान्मम यन्मतम् ।
रूपं निवर्त्तयाम्यद्य नवं कान्तं करोम्यहम् ॥ २७
तच्छ्रुत्वापगतः क्रोधो मार्त्तण्डस्य विवस्वतः ।
भ्रमिमारोप्य तत् तेजः शातयामास वै मुनिः ॥ २८
ततो विभ्राजितं रूपं तेजसा संवृतेन च ।
कृतं कान्ततरं रूपं त्वष्ट्रा तच्छुशुभे तदा ॥ २९

ततोऽसौ योगमास्थाय स्वां भार्य्यां वै ददर्श ह।
अदृश्यं सर्व्वभूतानां तेजसा नियमेन च ॥ ३०
सोऽश्वरूपं समास्थाय गत्वा तां मैथुनाय च।
मैथुनाय विचेष्टन्ती परपुंसोऽपशङ्कया ॥ ३१
मुखतो नासिकायान्तु शुक्रं तन्न्यदधन्मुने।
देवौ ततः प्रजायितामश्विनौ भिषजां वरौ ॥ ३२
नासत्यौ तौ च दस्रौ च स्मृतौ द्वावश्विनावपि।
तौ तु कान्तेन रूपेण दर्शयामास भास्करः ॥ ३३
आत्मानं सा तु तं दृष्ट्वा प्रहृष्टा पतिमादरात्।
यमस्तु कर्म्मणा तेन भृशं पीड़ितमानसः ॥ ३४
धर्म्मेण रञ्जयामास धर्म्मराज इमाः प्रजाः।
लेभे स कर्म्मणा तेन धर्म्मराजो महाद्युतिः ॥ ३५
पितृणामाधिपत्यञ्च लोकपालत्वमेव च।
मनुः प्रजापतिस्त्वासीत् सावर्णः स तपोधनः ॥ ३६
भावी सोऽवर्त्तकेऽन्यस्मिन् मनुः सावर्णिकेऽन्तरे।
मेरुपृष्ठे तपो घोरमद्यापि चरते प्रभुः ॥ ३७
भ्राता शनैश्चरस्तापि ग्रहत्वं स लब्धवान्।
त्वष्टा तु तेजसा तेन विष्णोश्चक्रमवर्त्तयत् ॥ ३८
तदप्रतिहतं युद्धे दानवानां चिकीर्षया।
यवीयसी तयोर्जातु यमकन्या यशस्विनी ॥ ३९
अभवत् सा सरिच्छ्रेष्ठा यमुना लोकपावनी।
मनुरित्युच्यते लोके सावर्णिरिति चोच्यते ॥ ४०
यदिदं जन्म देवानां शृणुयाद्धारयेत वा।
आपदं प्राप्य मुच्येत प्राप्नुयात् सुमहद्यशः ॥ ४१

इति श्रीशैवे महापुराणे धर्म्मसंहितायामेकोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः।

सूत उवाच।

मनोर्वैवस्वतस्यासन् पुत्त्रा वै नव तत्समाः।
इक्ष्वाकुः शिवि-नाभागौ धृष्णुः शर्यातिरेव च ॥ १
नरिष्यन्तोऽथ नाभागः करूषश्च प्रियव्रतः।
अकरोत् पुत्त्रकामस्तु मनुरिष्टिं प्रजापतिः ॥ २
अनुत्पन्नेषु पुत्त्रेषु तत्रेच्छां संबभूव ह।
तत्र दिव्याम्बरधरा दिव्याभरणभूषिता ॥ ३
दिव्यसंहनना चैव इड़ा जज्ञेऽथ विश्रुता।
तामिड़ेत्येव होवाच मनुर्दण्डधरस्तथा ॥ ४
अनुगच्छस्व मामेहि तमिड़ा प्रत्युवाच ह।
धर्म्मयुक्तमिदं वाक्यं पुत्त्रकामं प्रजापतिम् ॥ ५
मित्रावरुणयोरंशे जातास्मि वदतां वर।
तयोः सकाशं यास्यामि न सोऽधर्म्मो हि तद्भवेत् ॥ ६
एवमुक्त्वा ययौ सा तु मित्रावरुणयोरतः।
गत्वान्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत् ॥ ७
अङ्गास्मिन् युवयोर्जाता ब्रूत किं करवाणि वाम्।
तां तथावादिनीं साध्वीं मित्रावरुणावूचतुः ॥ ८
अनेन तव धर्म्मज्ञे प्रश्रयेण दमेन च।
सत्येन चैव सुश्रोणि प्रीतौ स्वो वरवर्णिनि ॥ ९
आवयोस्त्वं महाभागे ख्यातिञ्चैव गमिष्यसि।
मनोर्वंशकरः पुत्त्रस्त्वमेव च भविष्यसि ॥ १०
सुद्युम्न इति विख्यातस्त्रिषु लोकेषु विश्रुतः।
जगत्प्रियो धर्म्मशीलो मनोर्वंशविवर्द्धनः ॥ ११
निवृत्ता सा तु तच्छ्रुत्वा गच्छन्ती पितुरन्तिकम्।
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता ॥ १२
सोमस्य पुत्त्रस्तस्यान्तु पुत्त्रो जज्ञे पुरूरवाः।
जनयित्वा तु सा पुत्त्रं पुनः सुद्युम्नतां गता ॥ १३
सुद्युम्नस्य तु दायादास्त्रयः परमधार्म्मिकाः।
उत्कलश्च गयश्चैव विनताश्वश्च वीर्य्यवान् ॥ १४
उत्कलस्योत्कला विप्र विनताश्वस्य पश्चिमा।
दिक् पूर्व्वा मुनिशार्दूल गयस्य तु गया स्मृता ॥ १५
प्रविष्टे तु मनौ ताते दिवाकरमतं मुने।
दशधा तत्र तत् क्षेत्रमकरोत् पृथिवीं मनुः ॥ १६
इक्ष्वाकुः श्रेष्ठदायादो मध्यदेशमवाप्तवान्।
वशिष्ठवचनादासीत् प्रतिष्ठानं महात्मनः ॥ १७
प्रतिष्ठां धर्म्मराजस्य सुद्युम्नोऽथ ततो ददौ।
तत् पुरूरवसे प्रादाद्राज्यं प्राप्य महायशाः ॥ १८
मानवो यो मुनिश्रेष्ठ स्त्रीपुंसोर्लक्षणः प्रभुः।
नरिष्यतः शका पुत्त्रा नाभागस्य सुतोऽभवत् ॥ १९
अम्बरीषस्तु वार्ष्णेयो वाह्लीकं क्षेत्रमावसन्।
शर्यातेर्मिथुनन्त्वासीदानर्त्तो नाम विश्रुतः ॥ २०
पुत्त्रः सुकन्या कन्या च या पत्नी च्यवनस्य हि।
आनर्त्तस्य हि दायादो रेवो नाम महाद्युतिः ॥ १२

आनर्त्तविषये चैव पुरी नाम कुशस्थली।
देवस्य रेवतः पुत्त्रः ककुद्मी नाम विश्रुतः॥ २२
ज्येष्ठः पुत्त्रः स तस्यासीद्राज्यं प्राप्य कुशस्थलीम्।
स कन्यासहितः श्रुत्वा गान्धर्व्वं ब्रह्मणोऽन्तिके॥२३
मुहूर्त्तभूतं देवस्य जातं बहुयुगं तदा।
आजगाम युवैवाथ स्वां पुरीं यादवैर्वृताम्॥ २४
कृतां द्वारवतीं नाम बहुद्वारां मनोरमाम्।
भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमैः॥ २५
ततस्तद्रैवतो ज्ञात्वा गतान् बहुयुगांस्तदा।
कन्यां तां बलदेवाय प्रादात् तत्र स रेवतीम्॥ २६
दत्त्वा जगाम शिखरे मेरोस्तपसि संस्थितः।

सूत उवाच।

न जरा क्षुत्पिपासा वा न मृत्युर्ब्रह्मणोऽन्तिके॥ २७
ककुद्मिनश्च तत्रैव गतस्य रैवतस्य हि।
हृता पुण्यजनैस्तीव्रराक्षसैः सा कुशस्थली॥ २८
तस्य पुत्त्रशतन्त्वासीद्धार्म्मिकस्य ययौ दिशः।
अन्ववायस्तु सुमहांस्तत्र तस्य महात्मनः॥ २९
क्षत्त्रिया दिक्षु सर्व्वासु गताः सर्व्वत्र धार्म्मिकाः।
नाभाग-रिष्टस्य सुतौ यौ तौ ब्राह्मणसङ्गतौ॥ ३०
कारूषस्य तु कारूषाः क्षत्त्रिया युद्धदुर्म्मदाः।
प्रांशुरेकोऽभवत् पुत्त्रः प्रजातेरिति नः श्रुतम्॥ ३१
पृषध्रो हिंसयित्वा तु गुरोर्गां मुनिसत्तम।
शापाच्छूद्रत्वमापन्नो नवैते परिकीर्त्तिताः॥ ३२
पूर्व्वजस्तु मनोर्विप्र इक्ष्वाकुरभवत् सुतः।
तस्य पुत्त्रशतन्त्वासीदिक्ष्वाकोर्भूरिदक्षिणम्॥ ३३
तेषां विकुक्षिर्ज्येष्ठस्तु सोऽयोध्यामभवन्नृपः।
शकुनिप्रमुखास्तस्य पुत्त्राः पञ्चदश स्मृताः॥ ३४
उत्तरापथदेशस्य रक्षितारो महीक्षितः।
श्राद्धकर्म्मणि चोद्दिष्टे ह्यकृते श्राद्धकर्म्मणि॥ ३५
भक्षयित्वा शशं शीघ्रं शशादत्वं ततो गतः।
इक्ष्वाकुणा परित्यक्तो वशिष्ठवचनात् प्रभुः॥ ३६
इक्ष्वाकुः संस्थितो राजा शशादो वनमाविशत्।
अयोधस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान्॥३७
अनेनाः ककुत्स्थस्य पृथुरनेनसः सुतः।
विष्टराश्वः पृथोः पुत्त्रस्तस्मादिन्द्रो व्यजायत॥३८
इन्द्रस्य युवनाश्वस्तु श्रावस्तस्य व्यजायत।

जज्ञे श्रावस्तको राज्ञः श्रावस्ती येन निर्म्मिता॥ ३९
श्रावस्तस्य तु दायादो वृहदश्वो महायशाः।
कुवलाश्वः सुतस्तस्य राजा परमधार्म्मिकः॥ ४०
यः स धुन्धुवधाद्भूतो धुन्धुमारो नृपोत्तमः।
कुवलाश्वस्य पुत्त्राणां शतमुत्तमधन्विनाम्॥ ४१
बभूवाथ पिता राज्ये कुवलाश्वो न्ययोजयत्।
पुत्त्रसंक्रामितश्रीको वनं राजा समाविशत्॥ ४२
तमुत्तङ्कोऽथ विप्रर्षिः प्रयान्तं प्रत्यवारयत्।

उत्तङ्क उवाच।

भवता रक्षणं कार्य्यं पृथिव्या धर्म्मतः शृणु॥ ४३
त्वया हि पृथिवी राजन् रक्ष्यमाणा महात्मना।
भविष्यति निरुद्विग्ना नारण्यं गन्तुमर्हसि॥ ४४
ममाश्रमसमीपे तु समेषु मरुधन्वसु।
समुद्रवालुकापूर्णो दानवो बलदर्पितः॥ ४५
देवतानामवध्यो हि महाकायो महाबलः।
अन्तर्भूमिगतस्तत्र वालुकान्तर्हितः स्थितः॥ ४६
राक्षसस्य मधोः पुत्त्रो धुन्धुनामा सुदारुणः।
शेते लोकविनाशाय तप आस्थाय दारुणम्॥ ४७
संवत्सरस्य पर्य्यन्ते स निश्वासं विमुञ्चति।
यदा तदा मा चलति सशैलवनकानना॥ ४८
तस्य निश्वासवातेन रज उद्धूयते महत्।
आदित्यपथमावृत्य सप्ताहं भूमिकम्पनम्॥ ४९
सविस्फुलिङ्गं साङ्गारं सधूममपि दारुणम्।
तेन राजन् न शक्नोमि तस्मिन् स्थातुं स्व आश्रमे॥५०
तं वारय महाबाहो लोकानां हितकाम्यया।
लोकाः स्वस्था भवन्त्वद्य तस्मिन् विनिहते त्वया॥५१
त्वं हि तस्य वधायैव समर्थः पृथिवीपते।
विष्णुना च वरो दत्तो मह्यं पूर्व्वयुगेऽनघ॥ ५२
तेजसा स्वेन ते विष्णुस्तेज आप्याययिष्यति।
पालने हि महान् धर्म्मः प्रजानामिह दृश्यते॥ ५३
न तथा दृश्यतेऽरण्ये मा तेऽभूद्बुद्धिरीदृशी।
ईदृशो न हि राजेन्द्र धर्म्मः क्वचन विद्यते॥ ५४
प्रजानां पालने यादृक् पुरा राजर्षिभिः कृतः।
स एवमुक्तो राजर्षिरुत्तङ्केन महात्मना॥ ५५
कुवलाश्वः सुतं प्रादात् तस्मै धुन्धुनिवारणे।
भगवन् न्यस्तशस्त्रोऽहमयन्तु तनयो मम॥ ५६

भविष्यति द्विजश्रेष्ठ धुन्धुमारो न संशयः ।
इत्युक्त्वा पुत्त्रमादिश्य ययौ स तपसे नृपः ॥ ५७
कुवलाश्वस्य सोत्तङ्को ययौ धुन्धुविनिग्रहे ।
तमाविशत् तदा विष्णुर्भगवांस्तेजसा प्रभुः ॥ ५८
उत्तङ्कस्य नियोगाद्वै लोकानां हितकाम्यया ।
तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत् ॥ ५९
एष श्रीमान् नृपसुतो धुन्धुमारो भविष्यति ।
दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवारयन् ॥ ६०
स गत्वा जयतां श्रेष्ठस्तनयैः सह पार्थिवः ।
समुद्रं खनयामास बालुकार्णवमध्यगः ॥ ६१
नारायणस्य विप्रर्षेस्तेजसाप्यायितस्तु सः ।
बभूव सुमहातेजा भूयो बलसमन्वितः ॥ ६२
तस्य पुत्त्रैः खनद्भिस्तु बालुकान्तर्गतस्तु सः ।
धुन्धुरासादितो ब्रह्मन् दिशमाश्रित्य पश्चिमाम् ॥ ६३
मुखजेनाग्निना क्रोधाल्लोकानुद्वर्त्तयन्निव ।
वारि सुस्राव वेगेन महोदधिरिवोदये ॥ ६४
सोमस्य च त्रिभिरूनं दग्धं पुत्त्रशतं हि तत् ।
ततः स राजा विप्रेन्द्र राक्षसं तं महाबलम् ॥ ६५
आससाद महातेजा धुन्धुं विप्रविनाशनम् ।
तस्य वारिमयं वेगमापीय स नराधिपः ॥ ६६
वह्निवारिणा वह्निन्तु शमयामास वारिणा ।
तं निहत्य महाकायं बलेनोदकराक्षसम् ॥ ६७
उत्तङ्कस्येक्षयामास कृतं कर्म्म नराधिपः ।
उत्तङ्कस्तु वरं प्रादात् तस्मै राज्ञे महात्मने ॥ ६८
अददच्चाक्षयं वित्तं शत्रुभिश्चापराजयम् ।
धर्म्मे मतिञ्च सततं स्वर्गे वासं तथाक्षयम् ॥ ६९
पुत्त्रांस्तथाक्षयाँल्लोकान् ये चैव रक्षसा हताः ।
तस्य पुत्त्रास्त्रयः शिष्टा दृढाश्वः श्रेष्ठ उच्यते ॥ ७०
हंसाश्व-कपिलाश्वौ च कुमारौ च कनीयसौ ।
धौन्धुमारिर्दृढाश्वो यो हर्य्यश्वस्तस्य चात्मजः ॥ ७१
हर्य्यश्वस्य निकुम्भोऽभूत् पुत्त्रो धर्म्मरतः सदा ।
संहताश्वो निकुम्भस्य पुत्त्रो रणविशारदः ॥ ७२
अक्षाश्वश्च कृताश्वश्च संहताश्वसुतोऽभवत् ।
तस्य हैमवती कन्या सतां माता दृषद्वती ॥ ७३
विख्याता त्रिषु लोकेषु पुत्त्रस्तस्याः प्रसेनजित् ।
लेभे प्रसेनजिद्भार्य्यां गौरीं नाम पतिव्रताम् ॥ ७४

अभिशप्ता तु सा भर्त्त्रा नदी सा बाहुदा कृता ।
तस्याः पुत्त्रो महानासीद्युवनाश्वो महीपतिः ॥ ७५
मान्धाता युवनाश्वस्य त्रिषु लोकेषु विश्रुतः ।
तस्य चैत्ररथी भार्य्या शशबिन्दुसुताभवत् ॥ ७६
शशबिन्दोर्मती नाम रूपेणाप्रतिमाभवत् ।
पतिव्रता च ज्येष्ठा च भ्रातॄणामयुतस्य च ॥ ७७
तस्यामुत्पादयामास मान्धाता द्वौ सुतौ तदा ।
पुरुकुत्सञ्च धर्म्मज्ञं मुचुकुन्दञ्च धार्म्मिकम् ॥ ७८
पुरुकुत्ससुतस्त्वासीत् त्रसदस्युर्महीपतिः ।
नर्म्मदायां समुत्पन्नः सम्भूतस्तस्य चात्मजः ॥ ७९
सम्भूतस्य तु दायादस्त्रिधन्वारिप्रमर्द्दनः ।
राज्ञस्त्रिधन्वनस्त्वासीद्विद्वांस्त्रय्यारुणिः प्रभुः ॥ ८०
तस्य सत्यव्रतो नाम कुमारोऽभून्महाबलः ।
पाणिग्रहणमन्त्राणां विघ्नं चक्रे महात्मभिः ॥ ८१
येन भार्य्या हृता पूर्व्वं कृतोद्वाहा परस्य वै ।
बलात् कामाच्च मोहाच्च संहर्षाच्च मदोत्कटात् ॥ ८२
जहार कन्यां कामाच्च कस्यचित् पुरवासिनः ।
अधर्म्मसङ्गिनं तन्तु राजा त्रय्यारुणिस्त्यजन् ॥ ८३
अपध्वंसेति बहुशोऽवदत् क्रोधसमन्वितः ।
पितरं सोऽब्रवीत् त्यक्तः क्व गच्छामीति वै तदा ॥ ८४
स तु सत्यव्रतस्तन्तु श्वपाकावसथान्तिके ।
पित्रा त्यक्तोऽवसद्वीरः पिता तस्य वनं ययौ ॥ ८५
ततस्तस्य तु विषये नावर्षत् पाकशासनः ।
समा द्वादश विप्रर्षे तेनाधर्म्मेण वै तदा ॥ ८६
दारांस्तस्य तु विषये विश्वामित्रो महातपाः ।
सन्त्यज्य सागरानूपे चचार विपुलं तपः ॥ ८७
तस्य पत्नी गले बद्ध्वा मध्यमं पुत्त्रमौरसम् ।
शेषस्य भरणार्थाय व्यक्रीणीत शतेन च ॥ ८८
तान्तु दृष्ट्वा गले बद्ध्वा विक्रीणन्तीं स्वमात्मजम् ।
महर्षिपुत्त्रं धर्म्मात्मा मोक्षयामास वै नृप ॥ ८९
सत्यव्रतो महाबाहुर्भरणं तस्य चाकरोत् ।
विश्वामित्रस्य तुष्ट्यर्थमनुक्रोशार्थमेव च ॥ ९०
सोऽभवद्गालवो नाम गलबन्धान्महातपाः ॥ ९१

इति श्रीशैवे महापुराणे धर्म्मसंहितायां वंश-
कथनं नाम षष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः ।

सूत उवाच ।

सत्यव्रतस्तु तद्भक्त्या कृपया च प्रतिज्ञया ।
विश्वामित्रकलत्रञ्च पोषयामास वै तदा ॥ १
हत्वा मृगान् वराहांश्च महिषांश्च वनेचरान् ।
विश्वामित्राश्रमाभ्याशे तन्मांसञ्चाक्षिपन्मुने ॥ २
तीर्थं गाङ्गेव राष्ट्रञ्च तथैवान्तःपुरं मुनिः ।
याज्योपाध्यायसंयोगाद्वशिष्ठः पर्य्यरक्षत ॥ ३
सत्यव्रतस्य बाल्याद्वा भाविनोऽर्थस्य वै बलात् ।
वशिष्ठोऽभ्यधिकं मन्युं धारयामास नित्यशः ॥ ४
पित्रा तु तं तदा राष्ट्रात् परित्यक्तं स्वमात्मजम् ।
न वारयामास मुनिर्वशिष्ठः कारणेन ह ॥ ५
पाणिग्रहणमन्त्राणां निष्ठा स्यात् सप्तमे पदे ।
न च सत्यव्रतस्तस्य तमुपांशुमबुध्यत ॥ ६
जानन् धर्म्मान् वशिष्ठात् तु न तं शंसति भार्गवः ।
सत्यव्रतस्तदा रोषं वशिष्ठो मनसाकरोत् ॥ ७
गुणबुद्धा तु भगवान् वशिष्ठः कृतवांस्तदा ।
स च सत्यव्रतस्तस्य तमुपांशुमबुध्यत ॥ ८
तस्मिन् ह्यपरितोषाय पितुरासीन्महात्मनः ।
कुलस्य निष्कृतिर्विप्र कृतवान् वै भवेदिति ॥ ९
न तं वशिष्ठो भगवान् पित्रा त्यक्तं न्यवारयत् ।
अभिषिच्याम्यहं पुत्रमस्यान्ते वै ब्रवीन्मुनिः ॥ १०
स तु द्वादश वर्षाणि दीक्षां तामुद्वहद्वली ।
अविद्यमाने मांसे तु वशिष्ठस्य महात्मनः ॥ ११
सर्व्वकामदुघां दोग्ध्रीं ददर्श स नृपात्मजः ।
तां वै क्रोधाच्च लोभाच्च श्रमाद्दै च क्षुधान्वितः ॥ १२
दाशधर्म्मगतो राजा जघान तां स वै मुने ।
स तं मांसं स्वयञ्चैव विश्वामित्रस्य चात्मजम् ॥ १३
भोजयामास तच्छ्रुत्वा वशिष्ठो ह्यस्य चुक्रुधे ।

वशिष्ठ उवाच ।

पातयेयमहं क्रूरं तव शङ्कुमयस्मयम् ॥ १४
यदि ते द्वाविमौ शङ्कू नस्येतां वै कृतौ पुरा ।
पितुश्च परितोषेण गुरोर्दोग्ध्रीवधेन च ।
अप्रोक्षितोपयोगात् स त्रिविधस्ते व्यतिक्रमः ॥ १५
त्रिशङ्कुरिति होवाच त्रिशङ्कुरिति स स्मृतः ।
विश्वामित्रस्तु दाराणामागतो भरणे कृते ॥ १६
तेन तस्मै वरं प्रादान्मुनिः प्रीतस्त्रिशङ्कवे ।
छन्द्यमानो वरेणाथ वरं वव्रे नृपात्मजः ॥ १७
अनावृष्टिभये चास्मिन् जाते द्वादशवार्षिके ।
अभिषिच्य पितृराज्ये याजयामास तं मुनिः ॥ १८
मिषतां देवतानाञ्च वशिष्ठस्य च कौशिकः ।
सशरीरं सदा तन्तु दिवमारोपयत् प्रभुः ॥ १९
तस्य सत्यरथा नाम भार्य्या कैकयवंशजा ।
कुमारं जनयामास हरिश्चन्द्रमकल्मषम् ॥ २०
स वै राजा हरिश्चन्द्रस्त्रैशङ्कव इति स्मृतः ।
आहर्त्ता राजसूयस्य सम्राड़िति ह विश्रुतः ॥ २१
हरिश्चन्द्रस्य तु सुतो रोहितो नाम विश्रुतः ।
रोहितस्य वृकः पुत्रो वृकाद्वाहुस्तु जज्ञिवान् ॥ २२
हैहयास्तालजङ्घाश्च निरस्यन्ति स्म तं नृपम् ।
नात्यर्थं धार्म्मिको विप्र स हि धर्म्मयुगेऽभवत् ॥ २३
सगरं स सुतं बाहुर्जज्ञे सह गरेण वै ।
और्व्वस्याश्रममासाद्य भार्गवेणाभिरक्षितः ॥ २४
आग्नेयमस्त्रं लब्ध्वा च भार्गवात् सगरो नृपः ।
जिगाय पृथिवीं गत्वा तालजङ्घान् सहैहयान् ।
शकान् बहूदकांश्चैव पारदातगणान् खशान् ॥ २५

शौनक उवाच ।

गरेणैव युतः सोऽथ कथं जातस्तु क्षत्रियात् ।
जितवानेतदाचक्ष्व विस्तरेणैव सूतज ॥ २६

सूत उवाच ।

पारीक्षितेन यत् पृष्टो वैशम्पायन एव च ।
यदाचष्टापि तद्वक्ष्ये शृणुष्वेकमना मुने ॥ २७

पारीक्षित उवाच ।

कथं स सगरो राजा गरेण सहितो मुने ।
जातः स जज्ञिवान् भूपानेतदाख्यातुमर्हसि ॥ २८

वैशम्पायन उवाच ।

बाहोर्व्यसनिनस्तात हृतं राज्यमभूत् किल ।
हैहयैस्तालजङ्घैश्च शकैः सार्थं विशां पते ॥ २९
यवनाः पारदाश्चैव काम्बोजाः पह्लवास्तथा ।
एतेषाञ्च गणा राजन् हैहयार्थे पराक्रमन् ॥ ३०
हृतराज्यस्ततो राजा स वै बाहुर्वनं ययौ ।
पत्न्या चानुगतो दुःखी स वै प्राणानवासृजत् ॥ ३१

पत्नी तु यादवी तस्य सगर्भा पृष्ठतोऽन्वगात् ।
सपत्न्या च गरस्तस्या दत्तः पूर्व्वं तु ईर्ष्यया ॥ ३२
सा तु भर्त्तुश्चितां कृत्वा ज्वलनञ्चावरोहत ।
औौर्व्वस्तां भार्गवो राजन् कारुण्यात् समवारयत्॥३३
तस्याश्रमे च वै गर्भो गरेणैव सह च्युतः ।
व्यजायत महाबाहो सगरो नाम पार्थिवः ॥ ३४
औौर्व्वस्तु जातकर्म्मादि तस्य कृत्वा महात्मनः ।
अध्याप्य वेदं शास्त्राणि ततोऽस्त्रं प्रत्यपादयत् ॥ ३५
आग्नेयं तं महाभाग सामरैरपि दुःसहम् ।
स तेनास्त्रबलेनाजौ बलेन च समन्वितः ॥ ३६
हैहयान् विजघानाशु क्रुद्धो रुद्रबलेन च ।
आजहार च लोकेषु कीर्त्तिं कीर्त्तिमतां वरः ॥ ३७
ततः शकाः सयवनाः काम्बोजाः पह्लवास्तथा ।
हन्यमानास्तदा ते तु वशिष्ठं शरणं ययुः ॥ ३८
वशिष्ठो वञ्चनां कृत्वा समयेन महाद्युतिः ।
सगरं वारयामास तेषां दत्त्वाभयं नृपम् ॥ ३९
सगरः स्वां प्रतिज्ञान्तु गुरोर्व्वाक्यं निशम्य च ।
धर्म्मं जघान तेषां वै केशान्यत्वं चकार ह ॥ ४०
अर्द्धं शकानां शिरसो मुण्डं कृत्वा व्यसर्ज्जयत् ।
यवनानां शिरः सर्व्वं काम्बोजानां तथैव च ॥ ४१
पारदा मुण्डकेशाश्च पह्लवाः श्मश्रुधारिणः ।
निःस्वाध्याय-वषट्कारा: कृतास्तेन महात्मना ॥ ४२
सर्व्वे ते क्षत्रियास्तात धर्म्महीनाः कृताः पुरा ।
स धर्म्मविजयी राजा विजित्येमां वसुन्धराम् ॥ ४३
अश्वं संस्कारयामास वाजिमेधाय पार्थिवः ।
तस्य चारयतः सोऽश्वः समुद्रे पूर्व्वदक्षिणे ॥ ४४
वेलासमीपेऽपहृतो भूमिञ्चैव प्रवेशितः ।
स तं देशं तदा पुत्रैः खानयामास सर्व्वतः ॥ ४५
आसेदुस्ते ततस्तत्र खन्यमाने महार्णवे ।
तमादिपुरुषं देवं कपिलं विश्वरूपिणम् ॥ ४६
तस्य चक्षुःसमुत्थेन वह्निना प्रतिबुध्यतः ।
दग्धाः षष्टिसहस्राणि चत्वारस्त्ववशेषिताः ॥ ४७
हर्षकेतुः सुकेतुश्च तथा धर्म्मरतोऽपरः ।
शूरः पञ्चजनश्चैव तस्य वंशकरा नृप ॥ ४८
प्रादाच्च तस्मै भगवान् हरिः पञ्च वरान् स्वयम् ।
वंशं मेधाञ्च कीर्त्तिञ्च समुद्रं तनयं धनम् ॥ ४९
सागरत्वञ्च लेभे स कर्म्मणा तेन तस्य वै ।
तञ्चाश्वमेधिकं सोऽश्वं समुद्रादुपलब्धवान् ॥ ५०
आजहाराश्वमेधानां शतं स सुमहायशाः ॥ ५१

शौनक उवाच ।

सगरस्यात्मजा वीराः कथं जाता महाबलाः ।
विक्रान्ताः षष्टिसाहस्रा विधिना केन वा वद ॥ ५२

सूत उवाच ।

द्वे पत्न्यौ सगरस्यास्तां तपसा दग्धकिल्बिषे ।
औौर्व्वस्तयोर्वरं प्रादात् तोषितो मुनिरुत्तमः ॥ ५३
षष्टिं पुत्रसहस्राणि एका वव्रे तरस्विनम् ।
एकं वंशधरन्त्वेका यथेष्टं वरशालिनी ॥ ५४
तत्रैका जगृहे तुम्बीं पुत्राङ्कूरान् बहूंस्तदा ।
सा चैव सुषुवे तुम्बं बीजपूर्णं पृथक्कृताः ॥ ५५
ततो धात्रीभिः सर्व्वेऽपि ववृधुस्ते यथाक्रमम् ।
घृतपूर्णेषु कुण्डेषु कुमाराः प्रीतिवर्द्धनाः ॥ ५६
कपिलाग्निप्रदग्धानां तेषां तत्र महात्मनाम् ।
एकः पञ्चजनो नाम पुत्रो राजा बभूव ह ॥ ५७
ततः पञ्चजनस्यासीदंशुमान् नाम वीर्य्यवान् ।
दिलीपस्तनयस्तस्य पुत्रो यस्य भगीरथः ॥ ५८
यः स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभुः ।
समुद्रमानयच्चेमां दुहितृत्वे प्रकल्पयत् ॥ ५९
भगीरथसुतो जातः श्रुतसेन इति श्रुतः ।
नाभागस्तु सुतस्तस्य पुत्रः परमधार्म्मिकः ॥ ६०
अम्बरीषस्तु नाभागिः सिन्धुद्वीपस्ततोऽभवत् ।
अयुताजित् सुदायादः सिन्धुद्वीपस्य वीर्य्यवान् ॥ ६१
अयुताजित्सुतस्त्वासीदृतुपर्णो महायशाः ।
दिव्याक्षहृदयज्ञोऽसौ राजा नलसखोऽभवत् ॥ ६२
ऋतुपर्णसुतस्त्वासीदनुपर्णो महाद्युतिः ।
तस्य कल्माषपादो वै नाम्ना मित्रसहस्तथा ॥ ६३
कल्माषपादस्य सुतः सर्व्वकर्म्मेति विश्रुतः ।
अनरण्यस्य पुत्रोऽभूद्विश्रुतः सर्व्वकर्म्मणः ॥ ६४
अनरण्यसुतो राजा विद्वान् मुण्डिद्रुहोऽभवत् ।
निषधस्तस्य तनयो रामस्य प्रपितामहः ॥ ६५
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितम् ।
त्रयोऽभिसन्धिता लोका बुद्ध्या सत्येन चानघ ॥ ६६
दीर्घबाहुस्ततस्तस्य रघुनामाभवत् सुतः ।

अजस्तस्य तु पुत्त्रोऽभूत् तस्माद्दशरथोऽप्यजात्॥ ६७
रामो दशरथाज्जज्ञे धर्म्मारामो महायशाः।
रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः॥ ६८
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः।
निषधस्य नलः पुत्त्रो नभः पुत्त्रो नलस्य तु॥ ६९
नभसः पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः।
क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान्॥ ७०
आसीदहीनगुर्नाम देवानीकात्मजः प्रभुः।
अहीनगोस्तु दायादः सहस्वान् नाम वीर्य्यवान्॥७१
वीरसेनात्मजस्तस्य यश्चेक्ष्वाकुकुलोद्वहः।
इक्ष्वाकुवंशप्रभवाः प्राधान्येन प्रकीर्त्तिताः॥ ७२
एते वैवस्वते वंशे राजानो भूरिदक्षिणाः।
पठन् सम्यगिमां सृष्टिमादित्यस्य विवस्वतः॥ ७३
श्राद्धदेवस्य देवस्य प्रजानां पुष्टिदस्य च।
प्रजावानतिसायुज्यमादित्यस्य न संशयः॥ ७४

इति श्रीशैवे महापुराणे धर्म्मसंहिताया-
मेकषष्टितमोऽध्यायः॥ ६१॥

द्विषष्टितमोऽध्यायः।

शौनक उवाच।

श्रुतो वै श्राद्धदेवस्य ह्यादित्यस्य विवस्वतः।
श्रोतुमिच्छामि माहात्म्यं श्राद्धस्य किं फलं भवेत्॥ १
प्रीताश्च पितरो येन श्रेयसा योजयन्ति च।
एतद्द श्रोतुमिच्छामि पितृणां सर्गमुत्तमम्॥ २

सूत उवाच।

हन्त ते कथयिष्यामि पितृणां सर्गमुत्तमम्।
मार्क्कण्डेयेन कथितं भीष्माय परिपृच्छते॥ ३
गीतं सनत्कुमारेण मार्क्कण्डेयाय धीमते।
तत् तेऽहं सम्प्रवक्ष्यामि सर्व्वकामफलप्रदम्॥ ४
युधिष्ठिरेण संपृष्टो भीष्मः प्रोवाच तच्छृणु।

युधिष्ठिर उवाच।

पुष्टिकामेन धर्म्मज्ञ कथं पुष्टिरवाप्यते॥ ५
एतदाख्यातुमिच्छामि किं कुर्व्वाणो न सीदति।

भीष्म उवाच।

श्राद्धैः प्रीणाति हि पितॄन् सर्व्वकामफलैस्तु यः॥६
स पुनः प्रथितः श्राद्धी प्रेत्य चेह च मोदते।
यं यं काममभिध्याय श्राद्धं प्रकुरुते तु यः॥ ७
तं तं प्राप्नोत्ययत्नेन पितृणान्तु प्रसादतः।

युधिष्ठिर उवाच।

वर्त्तन्ते पितरः स्वर्गे केषाञ्चिन्नरके पुनः॥ ८
प्राणिनां नियतञ्चापि कर्म्मजं फलमुच्यते।
तानि श्राद्धानि तस्मानि कथं गच्छन्त्यधः पितॄन्॥९
कथं शक्ताः समुद्धर्त्तुं नरकस्थान् पितॄन् पुनः।
देवा अपि पितॄन् स्वर्गे यजन्त इति नः श्रुतम्॥ १०
एतदिच्छाम्यहं श्रोतुं विस्तरेण ब्रवीहि मे।

भीष्म उवाच।

अत्र तं वर्णयिष्यामि यथातत्त्वमरिन्दम॥ ११
पित्रा मम पुरागीतं लोकान्तरगतेन वै।
श्राद्धकाले मम पितुर्म्मया पिण्डः समुद्यतः॥ १२
तत् पिता मम हस्तेन भित्त्वा भूमिमयाचत।
नैष कल्पविधिर्दृष्ट इति निश्चित्य चाप्यहम्॥ १३
कुशेष्वेव तु तं पिण्डं दत्तवानविचारयन्।
ततः पिता मे सुप्रीतो वाचा मधुरया तदा॥ १४
उवाच भरतश्रेष्ठ प्रीयमाणो मयानघ।
त्वया दायादवानस्मि धर्म्मज्ञेन विपश्चिता॥ १५
तारितोऽहन्तु जिज्ञासा कृता मे पुरुषोत्तम।
प्रमाणं यद्धि कुरुते धर्म्माचारेण पार्थिवः॥ १६
प्रजास्तदनुवर्त्तन्ते प्रमाणाचरितं सदा।
उवाच भरतश्रेष्ठ वेदधर्म्माश्च शाश्वताः॥ १७
प्रमाणा कीर्त्तिर्भक्तिश्च मम निर्व्वर्त्तिता त्वया।
तस्मात् तवाहं सुप्रीतः प्रीत्या वरमनुत्तमम्॥ १८
ददामि तं प्रतीच्छस्व त्रिषु लोकेषु दुर्लभम्।
न ते प्रभविता मृत्युर्यावज्जीवितुमिच्छसि॥ १९
किं वा ते प्रार्थितं भूयो ददामि वरमुत्तमम्।
तद्ब्रूहि भरतश्रेष्ठ यत् ते मनसि वर्त्तते॥ २०
इत्युक्तवति तस्मिंस्तु अभिवाद्य कृताञ्जलिः।
अब्रुवं कृतकृत्योऽहं प्रसन्ने त्वयि मानद॥ २१
प्रश्नं पृच्छामि वै किञ्चिद्व्याहर्त्तुं भवता स्वयम्।
स मामुवाच तद्ब्रूहि यदिच्छसि वदामि ते॥ २२
इत्युक्ते च मतं प्राह जातकौतूहलात् तदा।
श्रूयन्ते पितरो राजन् देवानामपि देवताः॥ २३

कथं दत्तमेवास्माभिः श्राद्धं प्रीणन्ति वै पितॄन्।
लोकान्तरगतांस्तांस्तान् किन्तु श्राद्धस्य वै फलम्॥२४
अत्र मे संशयस्तात तद्ब्रूहि वदतां वर।
एतच्छ्रुत्वा वचः सोऽपि प्रत्युवाच च मां पिता॥२५
सङ्क्षेपेण च ते वक्ष्ये यत् ते पृष्टोऽस्मि भारत।
पितरश्च यथोद्भूताः शृणु तत् सर्व्वमादितः॥२६
आदिदेवसुतास्तात पितरो देवदेवताः।
तान् यजन्ति च वै लोकाः सदेवा नर-दानवाः॥२७
सयक्ष-रक्षो-गन्धर्व्वाः सकिन्नर-महोरगाः।
आप्यायिताश्च ते सर्व्वे पुनराप्याययन्ति च॥२८
जगत् सदेवगन्धर्व्वमिति ब्रह्मानुशासनम्।
तान् यजस्व महाभाग श्राद्धैरग्र्यैरतन्द्रितः॥२९
ते ते श्रेयोऽभिधास्यन्ति सर्व्वकामफलप्रदाः।
त्वयैवाराध्यमानाश्च नाम-गोत्रानुकीर्त्तनैः॥३०
अस्मानप्याययिष्यन्ति स्वर्गस्थान् यत्र संस्थितान्।
मार्कण्डेयस्तु ते शेषमेतत् सर्व्वं प्रवक्ष्यति॥३१
इत्युक्त्वासौ महाभागस्तत्रैवान्तरधीयत।

इति पितृकल्पः॥

सूत उवाच।

पितुः स वचनं श्रुत्वा मार्कण्डेयं समागतम्॥३२
प्रश्नमेतत् स चाप्रच्छन्मार्कण्डेय उवाच ह।

मार्कण्डेय उवाच।

भीष्म वक्ष्यामि कार्त्स्न्येन शुश्रूषुः प्रयतो भव॥३३
मया पितृप्रसादेन दीर्घायुष्ट्वमपि प्रभो।
पितृभक्त्या हि लब्धञ्च प्राग्लोके परमं यशः॥३४
सोऽहं युगस्य पर्य्यन्ते बहुवर्षशतान्तिके।
अधिरुह्य गिरिं मेरुं तपोऽतप्यं सुदुश्चरम्॥३५
ततः कदाचित् पश्यामि दिवं प्रच्छाद्य तेजसा।
विमानं महदायान्तमन्तरेण गिरेस्तदा॥३६
तस्मिन् विमाने पर्य्यङ्कं ज्वलिताङ्गारवर्चसम्।
अपश्यञ्चैव तत्राहं शयानं दीप्ततेजसम्॥३७
अङ्गुष्ठमात्रं पुरुषमग्नावग्निमिवाहितम्।
सोऽहं तस्य नमः कृत्वा प्रणम्य शिरसा प्रभुम्॥३८
अपृच्छञ्चैव तमहं विद्यामस्त्वां कथं विभो।
स मामुवाच धर्म्मात्मा तेन तद्दियते तपः॥३९
येन त्वं बुध्यसे मां हि मार्कण्डे ब्रह्मणः सुतम्।
सनत्कुमारमिति मां विद्धि किं करवाणि ते॥४०
ये त्वन्ये ब्रह्मणः पुत्रा यवीयांसस्तु ते मताः।
भ्रातरः सप्त दुर्द्धर्षा येषां वंशः प्रतिष्ठितः॥४१
वयन्तु यतिधर्म्माणः संयम्यात्मानमात्मनि।
यदोत्पन्नस्तदैवाहं कुमार इति विश्रुतः॥४२
तस्मात् सनत्कुमारं मे नामैतत् कथितं मुने।
यद्भक्त्या ते तपश्चीर्णं मम दर्शनकाङ्क्षया॥४३
एष दृष्टोऽस्मि भद्रं ते कं कामं करवाणि ते।
इत्युक्तवन्तं तमहं प्रोवाच त्वं शृणु प्रभो॥४४
पितॄणामादिसर्गञ्च कथयस्व यथातथम्।
इत्युक्तः स तु मां प्राह शृणु सर्व्वं यथातथम्॥४५
देवानसृजत ब्रह्मा मां यजध्वं (क) स चाह तान्।
तमुत्सृज्य ततोऽस्मानमयजन्त फलार्थिनः॥४६
ते शप्ता ब्रह्मणा मूढा नष्टसंज्ञा भविष्यथ।
तस्मात् किञ्चिदजानन्तो नष्टसंज्ञाः पितामहम्॥४७
प्रोचुस्तं प्रणताः सर्व्वे कुरुष्वानुग्रहं हि नः।
इत्युक्तस्तानुवाचेदं प्रायश्चित्तार्थमेव हि॥४८
पुत्रान् स्वान् परिपृच्छध्वं ततो ज्ञानमवाप्स्यथ।
इत्युक्ता नष्टसंज्ञास्ते पुत्रान् पप्रच्छुरोजसा॥४९
प्रायश्चित्तार्थतत्त्वज्ञा लब्धसंज्ञा दिवौकसः।
गम्यतां पुत्रका एवं पुत्रैरुक्ताश्च ते तदा॥५०
अभिशप्तास्तु ते देवाः पुत्रकामेण वेधसम्।
पप्रच्छुः पुत्रैरुक्तास्ते गतास्ते पुत्रका इति॥५१
ततस्तानब्रवीद्देवो यूयं न ब्रह्मवादिनः।
तस्माद्यदुक्तं युष्माकं तत् तथा न तदन्यथा॥५२
यूयं शरीरकर्त्तारो न च ज्ञानप्रदायिनः।
अन्योन्यं पितरो यूयं भविष्यथ न संशयः॥५३
देवाश्च पितरश्चैव बुध्यध्वं त्रिदिवौकसः।
ततस्ते छिन्नसन्देहा प्रीतिमन्तः परस्परम्॥५४
बभूवुर्देवान् प्रोचुस्तान् यदुक्तं पुत्रका वयम्।
तस्माद्भवन्तः पितरो भविष्यथ न संशयः॥५५
पितॄन् श्राद्धे क्रिया काचित् करिष्यति न संशयः।
श्राद्धैराप्यायितः सोमो लोकानाप्याययिष्यति॥५६
समुद्र-पर्व्वत-वनं जङ्गमं जङ्गमैर्वृतम्।
श्राद्धानि पुष्टिकामाश्च ये करिष्यन्ति मानवाः॥५७

(क) यक्ष्यति वा पाठः।

तेभ्यः पुष्टिं प्रजाश्चैव पितरः प्रीणिताः सदा।
श्राद्धे ये च प्रदास्यन्ति त्रीन् पिण्डान् नामगोत्रतः॥५८
सर्व्वत्र वर्त्तमानास्ते पितरः प्रपितामहान्।
भावयिष्यन्ति सततं श्राद्धदानेन तर्पिताः॥ ५९
इति तद्वचनं सत्यमवगम्य दिवौकसः।
पुत्राश्च पितरश्चैव वयं सर्व्वे परस्परम्॥ ६०
सनत्कुमार उवाच।
एवं ते पितरो देवा देवाश्च पितरस्तथा।
अन्योन्यपितरो वैते देवाश्च पितरश्च ह॥ ६१
इति श्रीशैवे महापुराणे धर्म्मसंहितायां
द्विषष्टितमोऽध्यायः॥ ६२॥

त्रिषष्टितमोऽध्यायः।

सनत्कुमार उवाच।
सप्त तेजोवतां श्रेष्ठ स्वर्गे पितृगणाः स्मृताः।
चत्वारो मूर्त्तिमन्तो वै त्रयश्चैव ह्यमूर्त्तयः॥ १
काव्यवाहोऽनलः सोमो यमश्चैवार्य्यमा तथा।
अग्निष्वात्ता वर्हिषदस्त्रयश्चान्या ह्यमूर्त्तयः॥ २
त्रीन् यजन्ते देवगणा अन्यान् विप्रादयस्तथा।
आप्याययन्ति ये पूर्व्वं सोमं योगबलेन वै॥ ३
तस्माच्छ्राद्धानि देयानि योगिनान्तु विशेषतः।
सर्व्वेषां राजतं पात्रमथवा रजतान्वितम्॥ ४
एवं स्वधां पुरोधाय श्राद्धैः प्रीणाति वै पितॄन्।
वह्नेराप्यायनं कृत्वा सोमस्य तु यमस्य वै॥ ५
उदगायनमप्यत्रावग्न्यभावेऽप्सु वा पुनः।
पितॄन् प्रीणाति यो भक्त्या पितरः प्रीणयन्ति तम्॥६
यच्छन्ति पितरः पुष्टिं प्रजाश्च विपुलास्तथा।
स्वर्गमारोग्यवृद्धिञ्च यदन्यदपि चेप्सितम्॥ ७
देवकार्य्यादपि मुने पितृकार्य्यं विशिष्यते।
पितृभक्तोऽसि विप्रर्षे तेन त्वमजरामरः॥ ८
न योगेन गतिः सा तु पितृभक्तस्य या मुने।
मार्कण्डेय उवाच।
एवमुक्त्वा स देवेशो देवानामपि दुर्लभम्॥ ९
चक्षुर्दत्त्वा सविज्ञानं जगाम योगिनां गतिम्।
शृणु भीष्म पुराभूद्‌यद्भारद्वाजात्मजा द्विजाः॥ १०
योगधर्म्ममनुप्राप्य भ्रष्टा दुश्चरितेन वै।
वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कपिरेव च॥ ११
स्वसृपः पितृवर्त्ती च नामभिः कर्म्मभिस्तथा।
कौशिकस्य सुतास्तात शिष्या गर्गस्य चाभवन्॥१२
पितर्य्युपरते सर्व्वे प्रवसन्तस्तदाभवन्।
विनियोगाद्गुरोस्तस्य गां दोग्ध्रीं समकालयन्॥१३
समानवत्सां कपिलां सर्व्वे मार्गे गतास्तदा।
तेषां पथि क्षुधार्त्तानां बाल्यान्मोहाच्च भारत॥ १४
क्रूरा बुद्धिः समुत्पन्ना तां गां वै हिंसितुं तदा।
तां कपिः स्वसृपश्चैव याचेते नेति वै तदा॥ १५
न च शक्यं तदा ताभ्यां घाताद्वारयितुं निजान्।
पितृवर्त्ती तु यस्तेषां नित्यं श्राद्धाह्निको द्विजः॥ १६
स सर्व्वानब्रवीत् कोपात् पितृभक्तिसमन्वितः।
यद्यशक्यं प्रकर्त्तव्यं पितृनुद्दिश्य साध्यताम्॥ १७
प्रकुर्व्वन्तो हि श्राद्धन्तु सर्व्व एव समाहिताः।
एवमेषाञ्च वो धर्म्मः प्राप्स्यते नात्र संशयः॥ १८
पितृनभ्यर्च्च धर्म्मेण नाधर्म्मोऽस्मान् भविष्यति।
एवमुक्ताश्च ते सर्व्वे मोक्षयित्वा च गां तदा॥ १९
पितृभ्यः कल्पयित्वा तु उपयुञ्जन्त भारत।
उपयुज्य च गां सर्व्वे गुरोरग्रे न्यवेदयन्॥ २०
शार्दूलेन हता धेनुर्वत्सो वै गृह्यतामिति।
आर्ज्जवात् स तु तं वत्सं प्रतिजग्राह वै द्विजः॥ २१
मिथ्योपचारतः पापमभूत् तेषाञ्च गोघ्नताम्।
कालेन समयुज्यन्त भेरीत उपयुच्य च॥ २२
गोः सर्व्वे तस्य हन्तारः सर्व्वे ते स्वायुषः च्युयेः।
ते वै क्रूरतया हिंस्राश्चनार्य्यत्वाद्गुरोस्तथा॥ २३
उग्रहिंसा-विहाराश्च जाताः सप्त सहोदराः।
लुब्धकस्य सुतास्तात बलवन्तो मनस्विनः॥ २४
जाता व्याधा दशार्णेषु सप्त धर्म्मविचक्षणाः।
स्वधर्म्मनिरताः सर्व्वे मृगा नृपतिवर्ज्जिताः॥ २५
त्रासोद्वेगेन संविग्ना रम्ये कालञ्जरे गिरौ।
तमेवार्थमनुध्यातो ज्ञानं मरणसम्भवम्॥ २६
आसन् वनचराः दान्ता निर्द्वन्द्वा निष्परिग्रहाः।
ते सर्व्वे शुभकर्म्माणः सधर्म्माणो वनेचराः॥ २७
पूर्व्वजातिषु यद्धर्म्मं श्रुतं गुरुकुलेषु वै।
तत्रैव च स्थिता बुद्धौ संसारेष्वनिवर्त्तनम्॥ २८

सेस्मध्येऽजहन् प्राणं लब्धाहारास्तपस्विनः।
तेषान्तु पतितानाञ्च पदस्थानानि भारत ॥ २९
तथैवाद्यापि दृश्यन्ते गिरौ कालञ्जरे नृप।
कर्म्मणा तेन तेनातः शुभाशुभविवर्ज्जिकाः ॥ ३०
शुभाशुभतरीं योनिं चक्रवाकत्वमागताः।
शुभोद्देशे शरद्वीपे सप्तैवासन् जलौकसः ॥ ३१
त्यक्त्वा सहचरीधर्म्मं मुनयो धर्म्मचारिणः।
विप्रयोनौ यदामोहान्मिथ्यापचरितं गुरौ ॥ ३२
निःस्पृता निर्म्ममाः शान्ता निर्द्वन्द्वा निष्परिग्रहाः।
निवृत्तिनिवृत्ताश्चैव शकुना नामतः स्मृताः ॥ ३३
ते ब्रह्मचारिणः सर्व्वे शकुना धर्म्मचारिणः।
जातिस्मराः सुसम्बद्धाः सप्तैव ब्रह्मचारिणः ॥ ३४
विप्रयोनौ यदा मोहान्मिथ्यापचरितं गुरौ।
तिर्य्यग्योनौ तथा जन्म श्राद्धाज्ज्ञानन्तु लेभिरे ॥ ३५
तथा तु पितृकार्य्यार्थं कृतं श्राद्धं व्यवस्थितौ।
तथा ज्ञानञ्च जातञ्च क्रमात् प्राप्तं गुणोत्तरम् ॥ ३६
पूर्व्वजातिषु यद्ब्रह्म श्रुतं गुरुकुलेषु वै।
तथैव संस्थितं ज्ञानं तस्माज्ज्ञानं समभ्यसेत् ॥ ३७
सुमना च सुवाक् शुद्धः पञ्चालश्छिद्रदर्शकः।
सुनेत्रश्च सुतन्त्रश्च कुलीना नामतः स्मृताः ॥ ३८
तेषां तत्र विहङ्गानां चरतां धर्म्मचारिणाम्।
नीपानामीश्वरो राजा प्रभावेण समन्वितः ॥ ३९
श्रीमानन्तःपुरवृतो वनं तत्राविवेश ह।
सुतन्त्रश्चक्रवाकः स स्पृहयामास तं नृपम् ॥ ४०
दृष्ट्वा यान्तं सुखोपेतं भवेयमहमीदृशः।
यद्यस्ति सुकृतं किञ्चित् तपो वा नियमोऽपि वा ॥ ४१
खिन्नोऽहमुपवासेन तपसा निष्फलेन च।

मार्क्कण्डेय उवाच।

ततस्तु चक्रवाकौ द्वावूचतुः सहचारिणौ ॥ ४२
आवां ते सचिवौ स्यावस्तव प्रियहितैषिणौ।
तथेत्युक्तस्य तस्यासीत् तदा योगात्मनो मतिः ॥ ४३
एवं तौ चक्रवाकत्वं सुवाक् तं प्रत्यभाषत।
यस्मात् कामं ब्रुवाणस्त्वं योगधर्म्ममवाप्य तम् ॥ ४४
अजरं वरं प्रार्थयसे तस्माद्वाक्यं निबोध मे।
राजा त्वं भविता तात काम्पिल्ये नगरोत्तमे ॥ ४५
भविष्यतः सखायौ द्वाविमौ ते सचिवौ वरौ।
शप्तास्तांस्त्रीनभीप्सन्तौ व्यभिचारप्रधर्षितान् ॥ ४
ते तानूचुस्त्रयो राजंश्चतुरः सहचारिणः।
प्रसादं ते पुनश्चक्रुस्तन्मते सुमनाब्रवीत् ॥ ४७
भ्रातर्वो भविता शापः पुनर्योगमवाप्स्यथ।
सर्व्वसत्त्वरुतज्ञश्च स्वतन्त्रोऽयं भविष्यति ॥ ४८
पितृप्रसादो युष्माभिरप्राप्तः सुहृदो भवेत्।
गां प्रोक्षयित्वा धर्म्मेण पितृभ्यश्चोपकल्पिता ॥ ४९
अस्माकं ज्ञानसंयोगः सर्व्वेषां योगसाधनम्।
इदञ्च वाक्यं संरब्धं श्लोकमेकमुदाहृतम् ॥ ५०
पुरुषान्तरितं श्रुत्वा ततो योगमवाप्स्यथ ॥ ५१

इति श्रीशैवे महापुराणे धर्म्मसंहितायां
पितृसर्ज्जनं नाम त्रिषष्टि-
तमोऽध्यायः ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः।

मार्क्कण्डेय उवाच।

ते धर्म्मयोगनिरताः सप्त मानसचारिणः।
वाय्वम्बुभक्ष्याः सततं शरीरमुपशोषयन् ॥ १
स राजान्तःपुरवृतो नन्दने मघवानिव।
क्रीड़यित्वा चिरं तत्र सभार्य्यः स्वपुरं ययौ ॥ २
अनूहो नाम तस्यासीत् पुत्त्रः परमधार्म्मिकः।
तं विभ्राजः सुतं राज्ये स्थापयित्वा वनं ययौ ॥ ३
तपः कर्त्तुं समारेभे यत्र ते सहचारिणः।
स वै तत्र निराहारो वायुभक्षो महातपाः ॥ ४
ततो विभ्राजितं तेन विभ्राजं नाम तद्वनम्।
बभूव यत्र शकुनाश्चत्वारो योगधर्म्मिणः ॥ ५
योगभ्रष्टास्त्रयश्चैव देहत्यागकृतोऽभवन्।
काम्पिल्ये नगरे ते तु ब्रह्मदत्तपुरोगमाः ॥ ६
जाताः सप्त महात्मानः सर्व्वे विगतकल्मषाः।
स्मृतिमन्तोऽत्र चत्वारस्त्रयस्तु परिमोहिताः ॥ ७
सुतन्त्रस्त्वनूहात्मजो ब्रह्मदत्तो महायशाः।
छिद्रदर्शी सुनेत्रस्तु वेदवेदाङ्गपारगौ ॥ ८
जातौ श्रोत्रियदायादौ पूर्व्वजातिसहोषितौ।
पाञ्चालो बह्वृचस्त्वासीदाचार्य्यत्वं चकार ह ॥ ९
द्विवेदं पुण्डरीकश्च छन्दोगोऽध्वर्य्युरेव च।

ततोऽनूढः सुतं दृष्ट्वा ब्रह्मदत्तमकल्मषम् ॥ १०
अभिषिच्य स्वराज्ये तु परां गतिमवाप्तवान् ।
पाञ्चालः पुण्डरीकस्तु पुत्त्रौ संस्थाप्य मन्दिरे ॥ ११
विविशतुर्वनं तत्र गतौ पारमिकां गतिम् ।
ब्रह्मदत्तस्य भार्य्या तु सन्नतिर्नाम भारत ॥ १२
सा लोकभावसंयुक्ता रेमे भार्य्या सहैव तु ।
शेषास्तु चक्रवाका वै काम्पिल्यसहचारिणः ॥ १३
जाताः श्रोत्रियदायादा दरिद्रस्य कुले नृप ।
धृतिमान् सुमहात्मा च तत्त्वदर्शी निरुत्सुकः ॥ १४
वेदाध्ययनसम्पन्नाश्चत्वारश्चेन्द्रदर्शिनः ।
ते योगनिरताः सिद्धाः प्रस्थिताः सर्व्व एव हि ॥ १५
आमन्त्रयित्वास्मिन् विष्णोः पदं परिप्रणम्य तु ।
भूरा ये सम्प्रपद्यन्ते अपुनर्भवकाङ्क्षिणः ॥ १६
पापं प्रणाशयत्वद्य तद्विष्णोः परमं पदम् ।
शारीरे मानसे चैव पापे वाक्ये महामुने ॥ १७
कृते सम्यगिदं भक्त्या पठन् श्रद्धासमन्वितः ।
मुच्यते सर्व्वपापेभ्योऽक्षणानामानुकीर्त्तनात् ॥ १८
उच्चार्य्यमाण एतस्मिन् देवदेवस्य संस्तवे ।
विलयं पापमायाति आमभाण्डमिवाम्भसि ॥ १९
तस्मात् सञ्चिन्तिते पापे समनन्तरमेव च ।
जप्तव्यमेतत् पापस्य प्रशमाय महामुने ॥ २०
योऽस्य चार्थमिमं ध्यायन् पठेच्चैनं शृणोति वा ।
मुच्यते सर्व्वपापेभ्यो मोक्षं याति न संशयः ॥ २१

इति श्रीशैवे महापुराणे धर्म्मसंहितायां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः ।

व्यासपूजनम् ।

आचार्य्य त्वं महाविष्णुर्व्यासरूप नमोऽस्तु ते ।
प्रसन्ने त्वयि विप्रेन्द्र प्रसन्नो मे सदाशिवः ॥ १
ग्रन्थान्ते विधिवद्दद्याद्विद्वज्ज्ञो भूरिदक्षिणाम् ।
ततो वक्तारमानम्य सम्पूज्य च यथाविधि ॥ २
भूषणैर्हस्तकर्णानां वस्त्रैर्हेमादिभिः सुधीः ।
शिवपूजासमाप्तौ तु दद्याद्धेनुं सवत्सकाम् ॥ ३
श्रुते सिंहे सुवर्णस्य पलमानस्य सोऽम्बरे ।
आचार्य्याय सुधीर्दद्याद्भक्तिः स्याद्भवबन्धनैः ॥ ४
विधानसहितं सम्यक् पुराणं फलदं श्रुतम् ।
तस्माद्विधानयुक्तन्तु पुराणं फलमुत्तमम् ॥ ५

इति श्रीशैवे महापुराणे धर्म्मसंहितायां व्यासपूजनप्रकारो नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

समाप्तेयं धर्म्मसंहिता ।

समाप्तञ्चेदं शिवपुराणम् ।

॥ श्रीः ॥